५०८

शब्द कल्पद्रुमस्य
परिशिष्टम्

१

अथ

...ब्दकल्पद्रुमस्य परिशिष्टमारभ्यते ॥

अ

अ. आद्यस्वरवर्णः। अस्य ले
खनप्रकारो यथा। दक्षतः कु
ण्डलीभूत्वा कुञ्चिता वामतो ग
ता। ततोऽर्द्धसङ्गता रेखा दक्षो
र्द्ध्वा नास्य शङ्करः॥ विधिर्नारा
यणो चैव संश्लिष्टेन क्रमतः स
दा। अर्द्धमात्रा शक्तिरूपा ध्यान
मस्य च कथ्यते॥ इति वर्णो
द्धारतन्त्रं॥ ॥ अस्य पर्य्यायः
। अः श्रीकण्ठो मातृकाद्यो
ऽनन्तो विष्णु रवन्नरः। इति
वीजवर्णाभिधानं॥ अन्यश्च।
अः श्रीकण्ठः स्वरेशश्च ल्ला
टेन्द्वेकमात्रिकः। कृशोदरी स
ष्टि मेषौ सारस्वतः प्रियम्वदः॥
महाब्राह्मी वासुदेवो धनेशः
केशवोऽमृतं। कीर्त्ति र्निवृत्ति
र्वागीशो नरकारि र्हरो मरुत्॥
॥ ब्रह्मा वामाद्यजो हृस्वः कर

अंशी

इत्यर्थः। इन्द्राणी कामरू
पश्च कामेशी वासिनी वियत्
॥ विश्वेशः श्रीविश्वकर्त्ता प्र
तिपन्निधि रंशिनी। अर्कमण्ड
ल वर्णाद्यो ब्राह्मणः काम
कर्षिणी॥ इति वर्णाभिधानतन्त्रं॥
अंश तक विभाजने।
तालव्योपधः। विभाजन इति
भाज न् क ल्यु पृथक्करण्यो
इत्यस्य रूपं। अंशयति अं
शापयति धनं वणिक्। इति दु
र्गादास कृत धातु दीपिका॥
अंशभाक् त्रि अंशी। यथा।
बौधायनः। स्ववन्ती घनि दृष्टा
स्त्रयो वर्णा द्विजातयः। प्रात
रुत्थाय कर्त्तव्यं देवर्षि पितृत
र्पणं॥ निरुद्धास्तु नकुर्वीरन्नंश
भाक् तत्र सेतुकृत्। इति प्रा
यश्चित्ततत्त्वं॥

स्वः प्रणवाद्यकः। प्रणवाद्यावयव अंशी त्रि भागी। यथा। याज्ञ

वल्क्यः। विभागश्चेत् पिता कु र्य्यात् स्वेच्छया विभजेत् सुता न्। ज्येष्ठं वा श्रेष्ठभागेन स र्वे वा स्युः समांशिनः॥ इति सति तु पितरि पार्व्वणानधिका रात् पुत्राणां नांशिता। एवं यतिनः पौत्रस्वत्वोपरमे त दंशमात्रे प्रपौत्राणां मंशिता। इति दायतत्वं॥

अंशुमान् पुं सूर्य्यवंशीया समञ्जोराजपौत्रः। यथा। तत अकारासमञ्जा गङ्गानयन कारणं। लक्षवर्षं तप स्तप्त्वा ममारकालयोगतः॥ दिलीप स्तस्य तनयो गङ्गानयनकार णं। तपः कृत्वा लक्षवर्षं ययौ लोकांस्तरं नृपः॥ अंशुमा स्तस्यपुत्रो ऽभुद्गङ्गानयनकार णं। तपः कृत्वा लक्षवर्षं ममा रकालयोगतः॥ भगीरथस्त स्यपुत्रो महाभागवतः सुधीः। त पः कृत्वा लक्षवर्षं ममारकाल योगतः॥ इत्यादि ब्रह्मवैवर्त्ते प्रकृतिखण्डे ८ अध्यायः॥

अंशु तु क विभाजने। दन्त्योपध्यः। विभाजन इति भाज तु क तु पृथक्कृत्यो इ

त्यस्य रूपं। अंसय पयति धनं वीणक दुर्गादासः॥

अक म वक्रगते म अकय ति अकति सर्पः। इतिदुर्गादा सः॥

अक इक लक्षणि। लक्षविह्ने युक्तकरणे। इक अङ्कयति वस्त्रं रजकः। नोपधपाठे पि नो न्नित्यत्वाद्धस्वइलोपो ऽनाविन्त्यस्याप्राप्तौ यँगादौ अङ्क्यते इत्यादौ सिद्धे इ दित् पाठ अुराद्यै रनित्य त्वज्ञापनार्थः। तेन अङ्कती त्यपि स्यात्। तथा च वोपदे वः। सिद्धे नित्यनिजस्त्वान्नि त्यनुन्त्वे किना मिदित्। णिज न्नित्यत्वादार्थे न हेतोः ऽनम विधिः क्वचिदिति। अस्यार्थः। कितां कात्वन्द्धानां नित्यनिज स्त्वान्नित्यस्यात्त्वान्नित्यनुस्त्वे नित्यनकारवत्त्वे सिद्धे उदित् इदनुबन्धकरणं णिचो ज्ये र नित्यत्वबोधार्थं। किन्तु अतोन्व यिर्नकाराभावः क्वचिदपि नहेतोः। इतिदुर्गादासः॥

अक इ अङ्क गत्यां॥ लक्षणे।

एव [illegible] अङ्क्ते पुण्य [illegible] युग्मान्यशीङ्गतः। [illegible] हत्वा युधः। इति दुर्गा दासः॥

अकर्त्तव्यं त्रि अकरणीयं। यथा। अविरोधो भवाब्धौ च सर्वमङ्गलमङ्गले। विरोधो नाशबीजञ्च सर्वोपद्रवकार णं॥ अकर्त्तव्यो विरोधश्च दारु णैः क्षत्रियैः सह। इति ब्रह्म वैवर्त्ते गणपतिखण्डे २८ अध्यायः॥

अकर्त्ता त्रि अकारकः। य था। चातुर्वर्ण्यं मया सृष्टं गुण कर्म्मविभागशः। तस्य कर्त्तार मपि मां विद्ध्यकर्त्तार मव्ययं॥ इति श्रीभगवद्गीतायां ४ अ ध्याये १३ श्लोकः॥

अकर्म्म क्ली अकरणीयका र्य्यं। यथा। किं कर्म्म किम कर्म्मे ति कवयोप्यत्र मोहिताः। तत्ते कर्म्म प्रवक्ष्यामि यज्ज्ञात्वा मो क्ष्य से ऽशुभात्॥ कर्म्मणो ह्यपि बोद्धव्यं बोद्धव्यञ्च विकर्म्मण ः। अकर्म्मणश्च बोद्धव्यं गहना कर्म्मणोगतिः॥ कर्म्मण्यकर्म्म यः पश्येदकर्म्मणि च कर्म्म यः। स बुद्धि

मान् मनुष्येषु स युक्तः कृत्स्न कर्म्मकृत्॥ इति श्रीभगवद्गी तायां ४ अध्याये १६। १७। १८ श्लोकाः॥

अकर्म्मण्यं त्रि कर्म्मायोग्यं। कार्य्यानर्हं। यथा। षष्टिदण्डा त्मिकायाश्च तिथे र्निष्क्रमणे प रे। अकर्म्मण्यं तिथिमलं वि द्यादेकादशी म्विना॥ इति ति थ्यादितत्वं॥

अकार्पण्यं क्ली कृपणताराहि त्यं। यथा लोकादपि च दात व्य मदीनेनैव चात्मना। अहन्यहनि यत्किञ्चिदकार्प ण्यं हि तत्स्मृतं॥ इत्येकाद शीतत्वं॥

अकीर्त्तिः स्त्री अयशः। यथा। अकीर्त्तिञ्चापि भूतानि कथयि ष्यन्ति ते ऽव्ययां। सम्भावितस्य चाकीर्त्ति र्मरणादतिरिच्यते॥ इति श्रीभगवद्गीतायां २ अध्या ये ३४ श्लोकः॥

अकीर्त्तिकरं त्रि अयशस्करं। यथा। कुतस्त्वा कश्मलमिदं वि षमे समुपस्थितं। अनार्य्यजु ष्टमस्वर्ग्य मकीर्त्तिकर मर्ज्जुन॥ इति श्रीभगवद्गीतायां २ अ-

ध्याये २ श्लोकः॥
अकृत्रिमं त्रि अकरणजातं।
यथादत्तः।चतुर्थे च तथा भागे
स्नानार्थं मृदमाहरेत्।तिलपु
ष्पकुशादीनि स्नान न्याकृत्रि
मेजले॥इत्याह्निकाचारतत्वं॥
किञ्च।कात्यायनः।एवं
पत्रं स्वभावोक्तं प्राड्विवाको
ऽप्यलेखयेत्।शोधयेत् एवं
पत्रन्तु यावन्नोत्तरदर्शनं॥स्व
भावोक्तं अकृत्रिमं।इतिव्य
वहारतत्वं॥
अक्तुः स्त्री रात्रिः।अनक्ति प्र
तिदिनं गच्छति अक्तुः।अन्तु ग
त्रि व्यक्ति गति मृक्षणे वा बाहुल
कात् ऊः अनिदिता मिति न
लोपः।वेदप्रचुरप्रयोगो
ऽयं॥
अक्रव्यादः त्रि अमांसभक्षकः।
यथा।क्रव्यादांस्तु मृगान्हत्वा
धेनुं दद्यात् पयस्विनीं।अक्र
व्यादान् वत् सतरी मुष्ट्रं हत्वा तु
कृष्णलं॥इति मानवे ११ अ
ध्याये १३३ श्लोकः॥
अक्लेशः स्त्री क्लेशाभावः।यथा।
यात्रामात्र प्रसिद्ध्यर्थं स्वैः कर्म्म
भि रगर्हितैः।अक्लेशेनश

रीरस्य कुर्वीत ध[...]
इति मानवे ४ अ[...]
श्लोकः॥क्लेशाभाववति त्रि॥
अग म वक्रगतौ।म अग
यति अगति सर्पः। इति
दुर्गादासः॥
अग ह गत्यां।इ त्यङ्गते।
इतिदुर्गादासः॥
अगम्या स्त्री अमैथुनार्हा
नारी।गम्यागम्या विवरणं यथा
।यम उवाच।या या गम्या
नृणा मेव निबोध कथया
मि ते।स्वस्त्री गम्या च सर्व्वेषा
मिति वेदनिरूपिता॥अग
म्या च तदन्या या इति वेदवि
दो विदुः॥सामान्यं कथितं
सर्व्वं विशेषं शृणु सुन्दरि॥अ
गम्या श्चैव या यास्तु निबोध
कथयामि ताः।शूद्राणां विप्रप
त्नीच विप्राणां शूद्रकामिनी॥
अत्यगम्या च निन्द्या च लोके
वेदे पतिव्रते।शूद्रस्य ब्रा
ह्मणीं गच्छेद्ब्रह्महत्याशतं
लभेत्॥तत्समं ब्राह्मणीचापि
कुम्भीपाकं व्रजेद्ध्रुवं।यदि
शूद्रां व्रजेद्विप्रो वृषलीपति
रेव सः॥स भ्रष्टो विप्रजा

एव[...]त् सो ऽधमः
[...]समस्तु तत्पिण्डं
मूत्र तस्य च तर्पणं॥तत्पितृ
णां सुराणाञ्च पूजने तत्समं
सति कोटिजन्मार्जितं पुण्यं
सन्ध्याश्च तपमार्जितं॥द्विज
स्य वृषलीभोगान्नश्यत्येव न
संशयः।ब्राह्मणश्च सुरापी
ती विड्भोजी वृषलीपतिः॥
हरिवासर भोजीच कुम्भीपाके
व्रजेद्ध्रुवं।गुरुपत्नीं राजपत्नीं
सपत्नीमातरं प्रसूं॥ सु
तां पुत्रवधूं श्वश्रूं सगर्भां भ
गिनीं सती।सोदर भ्रातृजा
यान्च भगिनीभ्रातृकन्यकां॥
शिष्येञ्च शिष्यपत्नीञ्च भागि
ने यस्य कामिनीं भ्रातृपुत्रप्रि
याञ्चैवात्यगम्या मात्र पद्मज:
॥एतास्विका मनेकां वा यो
व्रजेन्मानवोधमः।स मातृगामी
वेदेषु ब्रह्महत्याशतं लभेत्॥
अकर्म्मार्हो ऽपि सो ऽप्र[illegible]
श्यो लोके वेदे ऽतिनिन्दितः
सयाति कुम्भीपाकञ्च महा
पापी सुदुष्करं॥इति ब्रह्म
वैवर्त्ते प्रकृतिखण्डे २७ अ
ध्यायः॥

अगर्हितः त्रि अनिन्दितः॥
यथा।ज्येष्ठः कुलं वर्द्धयति
विनाशयति वा पुनः।ज्येष्ठः
पूज्यतमो लोके ज्येष्ठः स
द्भिरगर्हितः॥इति मानवे ९
अध्याये १०९ श्लोकः॥
अगस्त्योदयः पुं आकाशे
नक्षत्ररूपेण अगस्त्यमुने रुद
यः।स तु सौरभाद्रस्य सप्त
दशदिने भवति अस्यार्घ्यदा
नं तन्मासीय शेषदिनत्रये क
र्त्तव्यं।यथा।अगस्त्यार्घ्यदानं
सौरेण सिंहराशौ विधानात्
।यथा।ब्रह्मवैवर्त्ते।अप्राप्ते
भास्करे कन्यां शेषभूते त्रि
भिर्दिनैः॥अर्घ्यं दद्य रग
स्त्याय गौडदेशनिवासिनः।
भीमपराक्रमे।यस्तु भाद्रपद
स्यान्ते उदिते कलशोद्भवे।
अर्घ्यं दद्यादगस्त्याय सर्व्वान्
कामान् लभेत सः॥नारसिं
हे।शङ्खे तोयं विनिक्षिप्य
सितपुष्पाक्षतैर्युतं।मन्त्रेण
नेनवै दद्यात् दक्षिणाशामुख
स्थितः॥काशपुष्पप्रतीकाश
अग्निमारुतसम्भव।मित्रावरुण
योः पुत्र कुम्भयोने नमो ऽस्तु

ते॥ प्रार्थनन्तु। आतापि भक्षि
तो येन वातापिश्च महासुरः।
। समुद्रः शोषितो येन स मे
ऽगस्त्यः प्रसीदतु॥ गन्धादिक
न्तु अगस्त्याय नमः इत्यनेन दे
यं। विशेषानुपदेशो सामा
न्यतः प्राप्तत्वात् दक्षिणाशा
मवस्थित इति गन्धादावपि प्र
योगाङ्गकर्त्तृ धर्म्मत्वादिति रत्ना
करः॥ तत् पत्न्यर्घ्यमन्त्रस्तु।
लोपामुद्रे महाभागे राजपु
त्रि पतिव्रते। गृहाणार्घ्यं म
यादत्तं मित्रावरुणिवल्लभे॥
इति मलमासतत्त्वं॥
अगुरु क्ली गन्धद्रव्यविशेषः
यथा। अगुरु सुवर्णं लोहं
राजार्हं योगजं तथा। वं
शिकं क्रिमिजं चापि क्रिमिजग्ध
मनार्य्यकं॥ अगुरुस्तु कटुत्वं
च तिक्तं तीक्ष्णञ्च पित्तलं।
लघु कर्णाक्षिरोगघ्नं शीतवात
कफप्रणुत्॥ कृष्णं गुणाधि
कं तत्तु लोहवद्वारि मज्जति।
अगुरु प्रभवः स्नेहः कृष्णागुरु
समः स्मृतः॥ इति भावप्र
काशः॥
अग्निकोणं क्ली पूर्व्वदक्षिणको
णं। यथा॥ हल्ला...
व तीर्थं कर्त्तव्यं ...
प्राग्निहोत्रकं। पूर्वोक्ते प्य
थवाप्राग्ने दर्शोऽस्यात् पूर्व्वद
क्षिणे॥ पूर्व्वदक्षिणे अग्निकोणे
। इति प्रायश्चित्ततत्त्वं॥
अग्निजिह्वा स्त्री अग्नेः सप्तशि
खाः तासां नामादिकं सप्त
जिह्वेशब्दे द्रष्टव्यं।
अग्निदीपनः त्रि अग्निवर्द्धकः॥
जठराग्निकारकौषधविशेषः॥
यथा। रसेन्द्रचिन्तामणौ।
पारदामृत लवङ्गगन्धकं भाग
युग्मममरिचेन मिश्रितं। तत्र
जातिफल मर्द्धभागिकं ति
न्तिडीफलरसेन मर्द्दितं॥
वह्निमान्द्यदशवक्त्रनाशनो रा
मवाण इति विश्रुतो रसः
। संग्रहग्रहणि कुम्भकर्णक मा
मवात खरदूषणं जयेत्॥ दी
यते तु शाणकानुमानतः सद्य
एव जठराग्निदीपनः। इति।
हरीतकी तथा शुण्ठी भक्ष्यमाणा
गुडेन वा। सैन्धवेन युता
वा स्यात् सातत्येनाग्निदीप
नी॥ इति च भावप्रकाशः॥
अग्निवर्द्धनं क्ली जठराग्निवृद्धिका

एव ... जीरकं रुचि
... गन्धाढ्यं कफवात
नुत्। पाके च कटु तीक्ष्णा
स्रं लघु पित्ताग्निवर्द्धनं॥ इति
राजवल्लभः॥
अग्निसन्दीपनं त्रि वह्निवर्द्धकौ
षधादि। यथा। एला लवङ्गागपु
ष्पाणां मात्रोत्तर विवर्द्धिता।
मरिचं पिप्पली शुण्ठी चतुःप
ञ्चषडुत्तरां॥ द्रव्याण्येतानि या
वन्ति अवंती सितशर्करा॥ चूर्ण
मेतत् प्रयोक्तव्य मग्निसन्दीप
नं परं॥ इतिभावप्रकाशः॥
अपि च। अग्निसन्दीपनं –च्यं
लवणाईकभक्षणं। इति राज
वल्लभः॥
अग्निस्तम्भनं क्ली मन्त्रौषधि
द्वारा अग्ने र्दाहिकाशक्तिनि
वारणं। तद्यथा। मात्सरस्य व
सां गृह्य जलौकां तत्र पेष
येत्। हस्तौ तु लेपयेत्तेन
अग्निस्तम्भन मुत्तमं॥ मात्सरस्य
स्थाने मानुषस्य इति वा पाठः
॥१॥ शाल्मलीरस मादाय खर
मूत्रेनियापितं। अभ्यागारे क्षिपे
त्तेन अग्निस्तम्भन मुत्तमं॥२॥
वायसी उदरं गृह्य माण्डूकवसया
सह। गुटिकां कारयेत्तेन ततो
ऽग्निं प्रक्षिपेद्वशी॥ एव मेतत्
प्रयोगेण अग्निस्तंभनमुत्तमं॥३॥
। रक्तपाटलमूलन्तु अवष्टब्ध
चूलकैः॥ दिव्यं स्तम्भयते क्षिप्रं
पयःपिण्डं जलान्तकं॥४॥ शुण्ठी
तका वचा कुष्ठ मरीचं नागरं
तथा॥ चर्व्वित्वा च इमं सद्यो जि
ह्वया ज्वलनं लिहेत्॥५॥ गो
रोचनां भृङ्गराजं चूर्णीकृत्य
घृतं समं॥ दिव्यस्तम्भश्च पीत्वा
स्यान्मन्त्रेणानेन वै तथा॥६॥
तम् ह्रं अग्निस्तम्भनं कुरु। इति
गारुडे १८६ अध्यायः॥
अग्रहायणः पुं मासविशेषः।
तस्य व्युत्पत्तिर्यथा॥ हायनस्या
ग्रे ऽग्रहायणः निपातनात् प
रनिपातनमत्र। इत्यमरटीका
यां भरतः॥ तत्कृत्यं मार्ग
शीर्षशब्दे द्रष्टव्यं॥
अग्र इक्र यतौ॥ निन्दारम्भज
वेषु॥ जवो वेगगतिः। इ
अङ्ग्रते। क्र अङ्ग्रते वायु
र्वेगेन गच्छतीत्यर्थः। जवे
एव केचित् पठन्ति। इति
दुर्गादासः॥
अग्र त् क ततकृतौ। तत्कृतिः

पापकृतिः। अयथाति व्या
यः। कर्म्मणोऽर्थमध्यपा
ठात्कर्म्मकोऽयं। तथा च।
धातो रर्थान्तरे हत्ते धात्वर्थे
नोपसंग्रहात्। प्रसिद्धे र
विवक्षातः कर्म्मणोऽकर्म्मि
काक्रिया॥ इति गोयीचन्द्रः॥
धात्वर्थेन सह कर्म्मण उपसंग्र
हादित्यर्थः। क्रमेणोदाहरणा
नि। नदी वहति स्रवतीत्यर्थः।
अच्चयति व्याधः। भवति घटः।
आहृतेजनः। इति दुर्गादासः॥
अङ्क त क पदे॥ लक्षणे क
ण्ठवर्गीयोपधः। पदं संक्षा संस्था
नं। लक्षचिह्नयुक्तक्रिया। त
था च। अर्थक्रियैव धातूनां क
र्त्तृव्यापारलक्षणा। आत्मनि
ष्ठं क्रियार्थत्वं धात्वर्थेऽक्रिया
त्मसु॥ इति वोपदेवः॥ अ
ङ्कयन्त्यरिसैन्यानि युधि हेषु
शायकैरिति हलायुधः। अङ्क
यति अङ्कापयति। इति दु
र्गादासः॥
अङ्कनं क्ली चिह्नकरणं। यथा
पराशराङ्किरसौ। अन्यत्राङ्क
न लक्ष्याभ्यां वाहनिर्म्मोचने
क्रते। सायं संयमनार्थन्त्व

न्डुभ्येद्वोथवन्ध्ययो...
नं त्रिशूलादिचिह्नव...
त स्थिरचिह्नकरणं। इति प्राय
श्चित्ततत्त्वं॥
अङ्क त क पदे॥ लक्षणे। क
ण्ठवर्गतृतीयोपधः। पदं सं
ख्यासंस्थानं। लक्ष चिह्नयुक्त
क्रिया। तथा च अर्थक्रियैव
धातूनां कर्त्तृव्यापारलक्षणा।
आत्मनिष्ठं क्रियार्थत्वं धात्वर्थे
ऽक्रियात्मसु॥ इति वोपदेवः
अङ्गयति अङ्गापयति। इति
दुर्गादासः॥
अङ्गः पुं देशविशेषः। यथा।
वैद्यनाथं समारभ्य भुवने
शान्तगं शिवे। तावदङ्गाभिधो
देशो यात्रायां नहि दुष्यते॥
इति शक्तिसङ्गमतन्त्रे ७ पटलः॥
अच इ इजे। इ अन्चते।
अन्चु गति पूजनयो रिति पू
जार्थो यः स एवायं। इदित
पाठः पूजायां नलोपाभावात्
। उदनुबन्धाभावश्च क्त्वय वस पू
जार्थोञ्चेत्यादिना क्त्वाप्रत्यय
स्य निष्ठायाश्च नित्यमविधा
नात्। इति दुर्गादासः॥ ॥
अच ई ऋगते॥ म्लिष्टोक्तौ

एव ... क्र अञ्चति
...ति दुर्गादासः॥
अचक्र उ गतौ॥ म्लिष्टोक्तौ।
अचति अचते। उ अचित्वा
अक्त्वा। म्लिष्टोक्ति रव्यक्त
शब्दः। इति दुर्गादासः॥
अच्छा स्त्री विसो राच्छादनं।
इति मुग्धबोधव्याकरणं॥
अच्छिद्रं त्रि छिद्ररहितं। दो
षाभावविशिष्टं। यथा। शाता
तपपराशरौ। अच्छिद्र मिति
यद्वाक्यं वदन्ति क्षितिदेवताः।
प्रणम्य शिरसा ग्राह्य मग्निष्टो
मफलैः समं॥ इति श्राद्ध
तत्त्वं॥
अच्छिद्रावधारणं क्ली दोषर
हित कर्म्मनिश्चयः। तज्ज्ञाप
कवाक्यं यथा। ततः कर्म्म
मात्रप्राप्ताच्छिद्रावधारणं कु
र्य्यात्। तथा च शातातप प
राशरौ। अच्छिद्र मिति यद्वा
क्यंवदन्ति क्षितिदेवताः। प्र
णम्यशिरसा ग्राह्य मग्निष्टोम
फलैः समं॥ इति श्राद्ध तत्त्वं॥
अपि च। वशिष्ठः। ततः शांतिं
प्रकुर्वीत अवधारणवाचनं।
अवधारणं अच्छिद्रावधारणं।

इति तिथ्यादितत्त्वं॥ तद्वाक्यं
यथा। अद्यामुके मासि अमुक
पक्षे अमुकतिथौ मत्कृतै
तदमुककर्म्माच्छिद्रं मस्तु॥
अच्छिन्नं त्रि छेदरहितं। अ
कर्त्तितं। यथा गर्गः। कृत्वा
पुत्रस्य वै जन्म कृत्वा वेदोदि
ताः क्रियाः। अच्छिन्ननालश्रे
षेयत्नं दत्वा रुक्मं कलान्वितं॥
इति शुद्धितत्त्वं॥ अपि च।
शाङ्खः। अश्रद्दधानः पा
पात्मा नास्तिकोऽच्छिन्नसंश
यः। हेतुनिष्ठश्च पञ्चैते न
तीर्थफलभागिनः॥ अच्छिन्न
संशयः फलोपायेतिकर्त्तव्य
तासु निश्चयशून्यः। इति प्रा
यश्चित्ततत्त्वं॥
अजक्षेपे॥ गतौ। अजति।
इति दुर्गादासः॥
अज इक भासि। इ क अञ्ज
यति भासि दीप्तौ इति
दुर्गादासः॥
अजः पुं छागः। तत् परी
क्षा यथा। तत्राणां विभेदेन
नराणान्तु गणत्रयं। तेषां शु
भाशुभ निर्द्दिष्टं पशु वत्सत्रयं व
लो॥ ये कृष्णाः शुचय श्मागाः

पशवोन्ये तथैवच।देवजा
तिभि रुतस्त्ज्या स्ते सर्वार्थोप
सिद्धये॥ये पीता हरिता वा
पि नरजाते रुदीरिताः।ये
शुक्लाश्च महान्तोवा स्तोजा
तेः शुभप्रदाः॥यो मोहा
रथवाप्तानाद्धलि मन्य प्रय
छतिावथ एव फलं तस्य ना
न्यत् किञ्चित् फलं भवेत्॥३
तियुक्तिकल्पतरुः॥
अजमोहा स्त्री यमानी यथा
अजमोहा खराश्वा च मयूरो
दीप्यक स्तथा।तथा ब्रह्म ऊ
ग्रामोक्ता कारवी लोचमस्तकः॥
अजमोहा कटु स्तीक्ष्णा दीप
नीकफवातनुत् उष्णा विदाहि
नीरूच्या हृष्या वलकरीलघुः॥
नेत्रामय कृमि छर्दि हिध्म व
स्थिरुजोहरेत्॥अथ खुरा
सानीयवानीसदृशीगुणेः।पार
सीय यवानी तु यवानी सदृशीगुणैः
विशेषात् पाचनी रुच्या ग्राहि
णी मादिनी गुरुः॥ इति
भावप्रकाशः॥
अजातोत्पत्तिः पुं अजोप
जीविमुनिविशेषः।इति म
ध्यपदलो कर्म्मधारय समा

शे स्वपच्यवाकरणं
स्यापत्यं तैत्वत्तिः
जीवो चासौ तैत्वत्ति श्चेति।
इति तट्टीका॥
अजीर्णं क्ली अपाकरोगः।
अथाजीर्णस्य विप्रकृष्टं निदा
नमाह।अत्यम्बुपानाद्विषमा
शनाच्च सन्धारणात् स्वप्नवि
पर्य्ययाच्च।कालेपि सात्म्यं ल
घुचापि भुक्तमन्नं न पाकं भ
जतेनरस्य॥सन्धारणात् व
ह्रातमूत्रपुरीषादीनां।स्वप्न
विपर्य्ययात् दिवाशयनाद्रात्रौ
जागरणात्।लघुचापीत्यपिश
ब्दात् स्निग्धोष्णादि गुणयुक्त
मपि॥अन्यच्चाह।ईर्षा भय
क्रोधपरिप्लुतेन लुब्धेन शोके
न्य निपीडितेन।प्रद्वेष युक्ते
न च सेव्यमान मन्नं न स
म्यक परिपाक मेति॥परि
प्लुतेन व्याप्तेन।उक्तकारणे
भ्यो ऽतिमात्रभोजनं
विशेषादजीर्णस्य कारण मजी
र्णञ्च वलव्यादीनां कारण मि
त्याह।अनात्मवन्तः पशुवद्भुं
जते ये ऽप्रमाणतः।रो
गानीकस्य ते मूल मजीर्णं प्रा

[illegible] अनात्मवन्तः अवु
[illegible] गानीकस्य विसु
च्यादेः।मूलं कारणं॥अ
न्यच्च।प्रायेणाहारवैषम्यादजी
र्णं जायते नृणां तन्मूलो रो
गसंघात स्तद्विनाशाद्विनश्यति
॥तद्विनाशाद्विनश्यति अजीर्ण
विनाशात् विनश्यति रोगसं
घात इत्यर्थः।यद्वा तत् अजीर्ण
नाशात् भक्षणात् विना भक्ष
णाभावे विनश्यति निवर्त्तेत इत्य
र्थः॥अजीर्णस्य सामान्यस्य
लक्षण माह।ग्लानि गौरव मा
टोपो भ्रमो मारुतमूढता।वि
बन्धो ऽतिप्रवृत्ति र्वा सामान्या
जीर्णलक्षणं॥मारुतमूढता वा
यो रवरोधः।विबन्धः मलाप्र
वृत्तिः॥सन्निकृष्टकारणैः स
हितानजीर्णस्य भेदानाह।आमं
विदग्धं विष्टब्धं कफपित्तानिलै
स्त्रिभिः त्रिभि रित्येकशो यथा
सिलिंगैः।अजीर्णं केचिदिच्छ
न्ति चतुर्थं रसशेषतः।केचित्
सुश्रुतादयः।रसशेषतः भुक्त
स्यपक्वस्य सारभूतो यो द्रवः स
रसः सोपि पच्यते।भुक्तस्य पक्व
स्य सारभूतो द्रवः सचापक्वः

सरसशेषः तस्मात् चतुर्थमजी
र्णमित्यामाजीर्णं।तत्वामाजी
र्णाद्रसशेषस्य को भेद उच्यते।
आमं मधुरतागत मप
क्वं अन्न मेवारसशेषस्तुभुक्तस्य
पक्वस्य सारभूतो यो द्रवः स
चापक्व इति भेदः।अजीर्णंपञ्च
मं केचित् निर्द्दोषं दिनपाकि
चानिर्द्दोषं गौरव भ्रम शूलादि
दोषाजनकं।दिनपाकि च आ
हारो अहोरात्रेण पाकं या
तीतिस्वभावः।यत्र मात्रा काल
सात्म्यादि दोषाद्दिनान्तरे पा
कं याति तद्दिनपाकि।अतए
व याममध्ये न भोक्तव्य मिति
वचनं।वदन्ति षष्टं चाजीर्णं प्रा
कृतं प्रतिवासरं।प्राकृतं अ
विकारकं।प्रतिवासरं प्रतिदि
नभावि।भुक्ते यावन्नजीर्णं ता
वदजीर्ण मित्युच्यते एतदभि
धानस्य प्रयोजनं पाकार्थं वा
मपार्श्वशयन प्रियशब्दादि सेव
नादिकं।तत्राहारस्य निषे
धः।प्रातराश त्वजीर्णे तु साय
माशो न दुष्यतीति वचनेन सा
यमाशस्यावश्यं कर्त्तव्यत्वात्॥
आमाजीर्णस्य लक्षण माह॥

तत्रामे गुरुतोत्क्लेशः। शो
थो गण्डाक्षिकूटगः॥उद्गारश्च
यथाभुक्तमविदग्धः प्रवर्त्तते॥गु
रुता उदराङ्गयोः।उत्क्लेशः
उपस्थितं वमनमिव।अक्षिकूटो
ऽक्षिपुटकः।अविदग्धः अन
लो निर्गन्धश्च॥विदग्धा
जीर्णस्यलक्षणमाह।विदग्धे भ्र
मत्तृण्मूर्छा पित्ताच्च विविधा रुज
ः।उद्गारश्च सधूमाम्लः स्वेदो दाह
श्च जायते॥विविधा रुजः प
च्चोषदाहादयः॥विष्टब्धा
जीर्णस्य लक्षणमाह।विष्टब्धे
शूल माध्मानं विविधा वातवेद
नाः।मल वाताप्रवृत्तिश्च स्तम्भो
मोहो ऽङ्गपीडनं॥वातवेदनाः।
तोदभेदादयः।स्तम्भो मात्रा
णां।मोहो मूर्छा।रसशेषा
जीर्णस्य लक्षणमाह।रसशेषे
ऽन्नविद्वेषो हृदयाशुद्धि गौर
वे॥एतस्य उपद्रवानाह।
मूर्छा प्रलापो वमथुः प्रसेकः
सादनं भ्रमः।उपद्रवा भवन्त्येते
मृतिश्च रसशेषतः॥अतिशेषि
तेभ्यः आमाद्यजीर्णेभ्यो विसू
च्यादि रोगानाह।आमं विद
ग्धं विष्टब्ध मित्यजीर्णं यदीरितं।

विसूच्यलसको तय
विलम्बिका॥तत्र य
विष्टब्धाद्विलम्बिका भवितमहति
।सा च कफवाताभ्यां भवतीत्ये
केकतो ऽजीर्णाद्विसूच्यादि त्र
योत्पत्तिः॥विसूच्यादिनि
रुक्तिमाह।सूचीभि रिव गात्रा
णि तुदन् सन्तिष्ठते ऽनिलः।यत्रा
जीर्णेन सा वैद्यै र्विसूचीति नि
गद्यते॥विसूच्या निदान
माह।न तां परिमिताहारा
लभन्ते विदितागमाः।मूढा स्त्वा
मजितात्मानो लभन्ते ऽशनलो
लुपाः॥विदितागमाः सातायु
र्वेदाः॥विसूच्या लक्षणमाह।
मूर्छातिसारो वमथुः पिपा
सा शूलं भ्रमोद्वेष्टन जृम्भ दा
हाः।विवर्णो कम्पो हृदये रुजश्च
भवन्ति तस्यां शिरसश्च भेदः॥
उद्वेष्टनं हस्तपादयोः।शि
रसोभेदः शिरःशूलं॥ वि
सूच्या उपद्रवानाह।निद्रानाशो
ऽरतिः कम्पो मूत्राघातो विसं
ज्ञता।अमी उपद्रवा घोराः
विसूच्याः पञ्च दारुणाः॥अ
मीउपद्रवाः घोरा अमी निद्रा
नाशादयः उपद्रवाः सर्वेषा मेव

एव [illegible]रा भयङ्कराः।
[illegible] पञ्च दारुणा वि
सूच्यास्तु पञ्चापि यदि स्युस्त
दा दारुणाः प्राणभयङ्कराः॥
कलशकलक्षणमाह।कुक्षि
नह्यते ऽत्यर्थं प्रताम्येत् परिकू
जति।निरुद्धो मारुतश्चैव कु
क्षावुपरि धावति॥वातवर्चोनिरो
धश्च यस्यात्यर्थं भवेदपि।त
स्यालसक माचष्टे तृष्णोद्गारौ
च यस्य तु॥आनह्यते आध्मा
यते।प्रताम्येत् ग्लायति।प
रिकूजति आन्त्रनादं करोति।
कुक्षौ अजीर्णेन निरुद्धो मा
रुतः उपरि धावति हृदय क
ण्ठादिकं गच्छतीत्यर्थः॥काश्य
पस्त्वाह।नाधो याति न चाप्यू
र्ध्वमाहारो न च पच्यते कोष्ठेस्थि
तो ऽलसीभूतस्ततो ऽसावलसः
स्मृतः॥विसूच्यलसयो रविष्ठ
माह।यः श्यावदन्तोष्ठ नखो
ऽल्पसंज्ञः छर्द्यर्दितो ऽभ्यन्तर
यातनेत्रः।क्षामस्वरः सर्वविमु
क्तसन्धिर्यायान्नरः सो ऽपुनरोग
माय॥सर्वविमुक्तसन्धिः सर्वेविमु
क्ताः शिथिलीभूताः सन्धयो यस्य
सः॥विलम्बिकाया लक्षणमाह॥

दुष्टन्तु भुक्तं कफमारुताभ्यां
प्रवर्त्तते नोर्द्ध्व मधश्च यत्र।विल
म्बिकां तां भृशदुश्चिकित्स्यामाचक्ष
ते शास्त्रविदः पुराणाः॥भृश
दुश्चिकित्स्यं प्रत्याख्यायोपचर
णीयं।इय मसाध्यैवेति जेज्जटः
॥जीर्णस्याहारस्य लक्षणमा
ह उद्गारशुद्धि रुत्साहो वेगो
त्सर्गो यथोचितं।लघुता क्षु
त्पिपासे च जीर्णाहारस्य लक्ष
णं॥अथ चिकित्सा।हरीतकी
तथा शुण्ठी भक्षमाणा गुडेन
वा सैन्धवेन युता वा।स्यात्
सातत्येनाग्निदीपनी॥गुडेन
शुण्ठीमथवो प्रकुस्यां पथ्यां
तृतीयामथ दाडिमं वा।
आमेषुजीर्णेषु गुदामयेषु
वर्चोविबन्धेषु च नित्यमद्यात्
॥व्योषं दन्ती त्रिवृच्चित्रं
कुलाम्लं विहूर्णितं।तच्चूर्णं
गुडसंमिश्रं भक्षयेत् प्रातरुत्थि
तः।एतद् गुडाष्टकं नाम बल
वर्णाग्निवर्द्धनं शोथोदावर्त्त
शूलघ्नं प्लीहपाण्ड्वामयापहं॥स
र्वचूर्णसमो गुडो देयः।केचि
त्तद्द्विगुणं गुडं दत्वा गुटिकां कु
र्वन्ति।रेचको ऽयं योगः।गु

डाष्टकं॥दहनाजमोदसैन्धव
नागर मरिचानि चाम्लतक्रेण
।समाहादग्निकरं पाण्डुरोगीना
शनंपरमं॥औषध मित्यध्या
हार्य्यं॥तत्रामे वमनं कार्य्यं
विदग्धे लङ्घनं हितं।विष्टब्धे
स्वेदनं शस्त रसशेषेशयीत च॥
वचा लवणतोयेन वान्तिरामे प्र
शस्यते।कणासिन्धु वचाकल्कंपी
त्वावा शिशिराम्भसा॥जलमत्र
सरावमात्रं।वचा कर्षार्द्धमिता।
सैन्धवं कर्षार्द्धमितं द्वयोश्चूर्ण
युतेन जलेन पीतेन।कणादि
कल्कं वा पीत्वा वान्ति रोमे प्र
शस्यते इत्यनेनास्वयः॥धान्य
नागरसिद्धं वा तोयं दद्याद्विच
क्षणः।आमाजीर्णप्रशमनं शूल
घ्नं वस्तिशोधनं॥भवेद्यदि शा
त रजीर्ण शङ्का तदाभयां ना
गरसैन्धवाभ्यां।विचूर्णितां शी
तजलेन भुक्ता भुक्तामशङ्कोभि
त मन्नकाले॥विदह्यते यस्य त
भुक्तमात्रंदंदह्यते कुक्षि गलश्च
यस्य।द्राक्षा सिता माक्षिक सं
प्रयुक्तां लीढ्वाभयां चातिसुखं
लभेत॥त्रिकटु मजमोदा सैन्ध
वं जीरके द्वे समधरण धृताना

मष्टमोहिङ्गु-भाग[illegible]
लभुक्तं सर्पिषा च[illegible]
ति जठरेऽग्निं वातरोगांश्च हन्ति
॥अजमोदात्र यवानी अन्भः
संमार्जकत्वात्।जीरके द्वे शु
क्लं कृष्णञ्च।धरण मत्र मानंाते
न समधरणं धृतानां तुल्यमा
नं गृहीतानां शुण्ठ्यादीनां भागाः
सप्त।तत्राष्टमो भागो हिङ्गुनः
।हिङ्गु-ष्टकं॥शुद्धं सूतं
गन्धकञ्च पलमानं पृथक्पृ
थक् हरीतकीच त्रिपला नागर
स्त्रिपलः स्मृतः॥कृष्णा च मरि
चंतद्वत् सि– त्वं त्रिपलं मतं।
चतुष्पला च विजया मर्दयेन्नि
म्बुकद्रवैः॥पुटानि सप्त देयानि
चर्म्ममध्ये पुनः पुनः।अजीर्णा
रि रयं प्रोक्तः सद्यो दीपन पाच
नः॥भक्षयेद्द्विगुणं भक्ष्यं पाच
येद्रेचयेदपि।अजीर्णारिः॥
द्वौ क्षारौ चित्रकं पाठा क
रञ्जंलवणानि च।सूक्ष्मैला प
त्रकं भार्गी कृमिघ्नं हिङ्गु-पौष्करं
॥शटी दार्वी त्रिवृन्मुस्तं वचाचे
न्द्रयवास्तथा।धात्र्याम्लं जीरकं
धात्री श्रेयसी चोपकुञ्चिका॥
अम्लवेतसमम्लीका यवानीदेवदा

एव[illegible]
[illegible]तविषा श्यामारु
[illegible]मं॥तिल मुष्कक
शिग्रूणां कोकिलाक्ष पलाशयोः
।क्षाराणि लोहकिट्टञ्च तप्तं
गोमूत्रसेचितं॥सूक्ष्मचूर्णानि कृ
त्वात समभागानि कारयेत्।मा
तुलुङ्गरसेनैतद्भावयेद्दिवसत्र
यं॥दिनत्रयस्तु शुक्तेन तथार्द्र
करसेन च।अत्यग्निकारकं चूर्णं
प्रदीप्ताग्नि समप्रभं॥उपयुक्तं
विधानेन नाशयत्यविरुद्धदान्
।अजीर्ण मथ गुल्मांश्च प्लीहानं
गुदजानि च॥उदराण्यन्त्रवृद्धिं
ञ्च अष्ठीलां वात शोणितं।प्र
णुदन्त्युल्वनान्दोषान्नष्टमग्निं
प्रदीपयेत्॥द्वौ क्षारौ सर्जीकाय
वक्षारश्च।लवणानि पञ्च।हस्ता
म्लविषाम्लिल इति लोके।श्रे
यसी हरीतकी।उपकुञ्चिका म
गरेला।अम्लवेतसाभावे चुक्रं
दातव्यं।श्यामा सान्दु।मुष्ककः
मोय इति लोके।कोकिला
क्षः कोइलया इति लोके।ह
रिद्रामुखे चूर्णं॥स्नुह्यार्के चि
त्रकैरण्ड वरुणं सपुनर्णवां ति
लापामार्ग कदली पलाशं ति
न्तिडी तथा॥गृहीत्वा ज्वालये

देतत् प्रस्थं भस्माखिलञ्च तत्।
जलाढके विपक्तव्यं यावत् पा
दावशेषितं॥स्वप्रसन्नं विनि
स्राव्य लवणप्रस्थस युतं।पक्वं
निर्धूम कठिनं सूक्ष्म चूर्णीकृतं पु
नः॥यवानी जीरक व्योष स्थूल
जीरक हिङ्गु-भिः।पृथगर्द्धपलै
रेभि श्चूर्णितैस्तत् विमिश्रयेत्
॥आर्द्रक स्वरसेनापि भावये
च्छोषयेत् पुनः।शीतोदकेन
तच्चूर्णं पिबेत् प्रातर्हि मात्रया॥
तस्मिन् जीर्णेऽन्न मश्नीयाद्यूषे
जाङ्गलजे रसैः।ईषदम्ले स
लवणैः सुखोष्णे र्वह्नि दीपनैः॥
एतेनाग्निर्विवर्द्धेत बल मारोग्य
मेवच।तत्रानुपानं शस्तं हि त
क्रं वा भोजनं हितं॥मन्दा
ग्न्यर्शोविकारेषु वातश्लेष्मामये
षु च॥सर्वाङ्ग-शोथरोगेषु शूल
गुल्मोदरेषु च॥अ[illegible]र्या शर्क
रायाञ्च विसूच्यानिलरोगिषु।
वैश्वानरक्षारः॥सामुद्रं लवणं
ग्राह्यं मष्टकर्षमितं बुधैः।
सौवर्च्चलं पञ्चकर्षं विडंसै
न्धव धान्यके॥पिप्पली पि
प्पलीमूलं पत्रकं कृष्णजीरकं।
तालीशं केशरं चव्य मम्लवेतस

कंतथा॥ द्विकर्षमात्राण्येतानि
प्रत्येकं कारयेद्बुधः। मरिचं जी
रकं विश्व मेकैकं कर्षमात्रकं॥
दाडिमंस्याच्चतःकर्षंत्वगेलेचा
र्द्धकर्षके। एतच्चूर्णीकृतं सर्वं ल
वणं भास्कराभिधं भक्षयेच्छाण
माने तक्र मस्तुक काञ्जिकैः
। वातश्लेष्मभवं गुल्मं प्लीहान
मुदरं क्षयं॥ अर्शांसि ग्रहणीं कुष्ठं
विबन्धञ्च भगन्दरं॥ शूलं शोथं
श्वासकासावामदोषञ्च हृद्रुजं
॥ अश्मरीशर्कराञ्चापि पाण्डुरोगं
कृमीनपि। मन्दाग्निं नाशयेदे
तद्दीपनं पाचनंपरं॥ हिताय
सर्वलोकानां भास्करेणेतदीरि
तं। हन्यात् सर्वाण्यजीर्णानि
भुक्तमात्र मसंशयं॥ निम्बुरसा
दिकं दत्वा गुटिका मध्यके ऊ
र्ध्वन्ति॥ अथदाडिमस्य बीजानां
चूर्णं कर्षचतुष्टयमितं देयं।
भास्करलवणचूर्णं॥ से
न्धवं समूलमभया चव्यानल
नागरंपथ्या। क्रमवृद्धि मग्निह
द्धे वडवानलनामचूर्णं॥ स्नान
॥ वडवानलनामचूर्णं॥ पथ्या
नागर कृष्णा करञ्ज बिल्वाग्नि
भिःसितातुल्यैः। वडवानल इव

जरयति बहुगु
॥ द्वितीयं वडवा
एला लङ्गागपुष्पाणि मात्रोज्वर
विवर्द्धिता। मरिचं पिप्पली शु
ण्ठी चतःपञ्च षडुत्तरं॥ द्रव्या
ण्येतानि यावन्ति तावती सित
शर्करा। चूर्णमेतत् प्रयोक्तव्य
मग्निसंदीपनंपरं॥ समशर्कर
चूर्णं॥ इन्द्रासने सप्तपलं
त्रिफलायाः पलत्रयं। पलत्रयं
ऋषणस्य सितायाश्च चतुःपलं॥
अमृता शतपुत्री च तथा हंसाप
राजिता। आसां चूर्णं समादाय
पलमात्रं पृथक् पृथक्॥ भावये
देकतः सर्वं भृङ्गराजरसेन तु
। स्वभाविक मिदं चूर्णं स्निग्धभा
ण्डे विनिक्षिपेत्॥ विलिहने
मधुसर्पिर्भ्यां मन्दाग्नेः सहसान
रः। मुच्यते ग्रहणीरोगात् श्वगु
दरोगात् सजाठरात्॥ मेहं
कुष्ठञ्च वीसर्पवातरोगात् सशो
षितात्। नचात्र परिहारास्ति
भोजनं सर्वकामिकं॥ रोगा
नीकप्रशान्त्यर्थं मुनिभिःपरि
कीर्तितं। अस्याभ्यासात् बलं
वीर्यं पुष्टिर्दृष्टिप्रशस्तथा॥ त्रि
सप्ताहप्रयोगेण जायते नात्र

एव [illegible]ालामुखीचूर्णं॥
[illegible] रसाः। द्विपलं
[illegible]द्धं पल मेकन्तु पारदं
। मृतं लोहं तथा ताम्रं कर्ष
द्वयमितं पृथक्॥ संचूर्ण्य सर्वं
संमिश्र्य द्रावयित्वाग्नियोगतः।
सम्यग्द्रुतं समस्तं तत् पञ्चा
ङ्गुलदले क्षिपेत्॥ पुनः सं
चूर्ण्य तत्सर्वं लोहपात्रे निधा
य चाजम्बीरस्य रसं तत्र घृतं
पलशतं क्षिपेत्॥ चुल्ल्यां नि
वेश्य उत्पन्नान्मृदुना वह्निना प
चेत्। रसे तस्मिन् घनीभूते
तत् संशोष्य विचूर्णयेत्॥ पञ्च
कोलकषायस्य चुक्रेण सहित
स्य च। भावना स्तत्र दातव्यः पञ्चा
शत् संख्यया शनैः॥ भृष्टटङ्क
णचूर्णेन तुल्येन सह मेलयेत्
। मरिचेनापि तुल्येन तदर्द्धेन
विडेनच॥ भावयेत् सप्तकृत्व
ज स्त्वचणकाम्लेन चाततःसं
शोष्य संपिष्य कूपीमध्ये नि
धापयेत्॥ रसः क्रव्यादनामा
यं भैरवानन्दयोगिना। उक्तः
सिंहलराजाय वल्लमांसाशिने
पुरा॥ भक्षयेद्भोजनस्यान्ते
माषद्वयमितं रसं। भक्षयित्वा

रसं पश्चात् पिबेत्तक्रं ससैन्ध
वं॥ अतीवगुरु यद्भुक्त मति
मात्र मथापि वा। तत्सर्वं जी
र्यति क्षिप्रं रसस्येतस्य भक्ष
णात्॥ शूलं गुल्मञ्च विष्टम्भं
प्लीहान मुदरं तथा। रसःक्रव्या
दनामायं विनिहन्ति न संशयः
क्रव्यादो रसोऽजीर्णे॥
रसेन्द्रचिन्तामणौ रसरत्नप्रदीपे
रसप्रदीपे च। क्षारत्रयं सू
त गन्धौ पञ्चकोल मिदं शुभं
सर्वं स्तुल्या जया भृष्टा तदर्द्धो
शिग्रुजा जटा॥ एतत् सर्वं जया
शिग्रु वह्नि मार्कवजै द्रवैः॥ भा
वयेत्त्रिदिनं घर्मे ततो लघुपुटे
क्षिपेत्॥ सप्तधाद्रद्रवै र्भृष्टो र
सो ज्वालानलो भवेत्। निष्को
ऽस्यमधुना लीढो ऽनुपानं गुड
नागरं॥ हन्त्यजीर्णं मतीसारं
ग्रहणी मग्निमार्दवं। श्लेष्म हृल्ला
स वमन मालस्य मरुचिं जवा
त्॥ पञ्चकोलं। पिप्पली पिप्पली
मूलंचव्य चित्रकनागरं। जयात्र
विजया। मार्कवो भृङ्गराजः। ल
घुपुटे गजपुटे। आर्द्र मार्द्रकं
। निष्कः टंकः। ज्वालानलो रसो
ऽजीर्णे॥ रसप्रदीपादङ्क

णं रस गन्धौ च समं भागत्रयं
विषात्।कपर्दः स्वर्जिकाक्षारो
मागधी विश्वभेषजं॥पृथक् पृ
थक् कर्षमात्रं स्नुभाग मिहो
षणं।जम्बीराम्ले दिनं घृष्टं भवे
दग्निकुमारकः॥विसूची शूल वा
तादि वह्निमान्द्य प्रशान्तये क्षा
रो यवक्षारः।अग्निकुमारो र
सो विसूच्याद्यजीर्णे॥रसे
न्द्रचिन्तामणौ।शुद्धसूतं गन्ध
कञ्च पक्वमानं पृथक् पृथक्।ह
रीतकी च द्विपला नागरस्त्रिपलास्मृ
ता॥कृष्णा च मरिचं तद्वत् सिंधु
रं त्रिपलं मतं।चतुष्पला च विज
या मर्दयेन्निम्बुकद्रवैः पुटानि
सप्तदेयानि घर्ममध्ये पुनः पुनः
।अजीर्णारि रसं प्रोक्तः सद्यो
दीपनपाचनः॥भक्षयेद्द्विगुणं
भक्तं पाचयेद्रेचयेदपि।अजी
र्णारिः॥पारदामृत लवङ्ग
गन्धकं भागयुग्ममरिचेन मि
श्रितं तत्र जातिफल मर्द्धभा
गिकं तिन्तिडीफलरसेन मर्दि
तं॥वह्निमान्द्य दशवक्त्रनाश
नो रामबाण इति विश्रुतो रसः
।संग्रह ग्रहणी कुम्भकर्णकमा
मवात खरदूषणं जयेत्॥दीयते त

चणकातुमाननः [illegible]
ग्निदीपनः।रोचकः [illegible]
कारकः श्वासकास [illegible]
शनः॥पाराभाग १ विषभाग १ ल
वङ्गभाग १ गन्धकभाग १ मरिचभा
ग ८ जायफलभाग २।रामबाण
रसो ऽजीर्णे॥ ॥रसेन्द्रचिन्ताम
णौ।पलं चिञ्चारः पलपरिमितं
पञ्चलवणं द्वयं सम्यक् पिष्टं
भवति लघु निम्बूफलरसैः।त
त्सकलं तस्मिन् पलपरिमितं
शङ्खशकलं क्षिपेद्धारान् सप्त
द्रवति तद्धनेनैव विधिना॥पल
प्रमाणं कटुकत्रयञ्च पलार्द्ध
मानेन च हिङ्गुभागः।विषं प
लद्वादशभागयुक्तं तावांश्च शो
गन्धक एष चोक्तः॥वदरास्थि
प्रमाणेन वटीं मेनस्य कारयेत्
।भक्षयेत् सर्वदा सा स्यात्
सर्वाजीर्णप्रशान्तये॥सर्वोदा
रेषु शूलेषु विसूच्यां विविधे
षु च।अग्निमान्द्येषु गुल्मेषु स
दा शङ्खवटी हिता॥शङ्खवटी
अजीर्णे॥रसप्रदीपे।स्नुगर्कचि
ञ्चापामार्ग रम्भातिल पला
शजान्।लवणान् भिषगादद्यात्
प्रत्येकं पलमात्रया॥लवणानि

एव [illegible] ग्राह्याणि पलमात्र
[illegible]का च यवक्षार टङ्कणं
त्रितयं पलं॥सर्वं त्रयोदश पलं
सूक्ष्मचूर्णं विधायत।निम्बूफल
रसे प्रस्थसंमिते तत् परिक्षिपेत्
॥तत्र शङ्खस्य शकलं पलं च
क्रौ प्रताप्य तु।वारान्निर्वापये
त् सप्त सर्वं द्रवति तद्यथा॥
नागरं त्रिपलं ग्राह्यं मरिचञ्च
पलद्वयं।पिप्पली पलमाना
स्यात् पलार्द्धं भृष्टहिङ्गुनाः॥
ग्रन्थिकं चित्रकं चापि यवानी
जीरकं तथा।जातीफलं लवङ्ग
ञ्च पृथक् कर्षद्वयोन्मितं॥
रसो गन्धो विषञ्चापि टङ्कण
ञ्च मनःशिला।एतानि कर्षमा
त्राणि सर्वं संचूर्ण्य मिश्रयेत्॥श
रेवाद्रेन चुक्रेण संनीय वटिकाञ्च
रेत्।माषप्रमाणा सा वैद्यै हृद्ग
ह्व्वटी स्मृता॥सर्वाजीर्णप्रशम
नी सर्वशूलनिवारिणी।विसूच्य
लसकादीनां सद्यो भवति नाशि
नी॥बृहच्छङ्खवटिका अजीर्णे
॥टङ्कणं कणमूलानां सहिङ्गु
लानां समभागः।मरिचस्य भा
गयुगलं निम्बुनीरै र्वटीकार्य्या
॥वटिकां कलायसदृशी मोक्ता

देवा समश्नीयात्।सत्वरं मजीर्ण
शान्त्यै वह्नेर्वृद्ध्यै कफध्वंस्यै॥
अजीर्णकण्टको रसः॥जलपी
त मपामार्ग मूलं हन्याद्विसू
चिकां।सतैलं कारवेल्यम्बु वि
धुनोति विसूचिकां॥वालमूल
स्य निःक्वाथः पिप्पलीचूर्णसं
युतः॥विसूचीनाशनः श्रेष्ठो ज
ठराग्निविवर्द्धनः॥विल्व नागर
निःक्वाथो हन्याच्छर्दिं विसू
चिकां॥विल्वनागर कैडर्य्यक्वा
थस्तद्यथिको गुणैः॥कैडर्य्येक
ट्फलं॥व्योषं करञ्जस्य फलं ह
रिद्रे मूलं समावाप्य च मातुलु
ङ्गाः॥छायाविशुष्का गुटिकाः कृ
तास्ता हन्युर्विसूची नयनाञ्जने
न॥मातुलुङ्गी मधुककर्कटी अ
नुभूत मिदं॥अपामार्गस्य पत्रा
णि मरिचानि समानि चाम्लरस
लाम्लया पिष्टानाञ्जनाद्धन्ति सू
चिकां॥विसूच्यां मतिहृष्टायां तक्रं
दधिसमं जलं।नारिकेलाम्बु पेय
न्वा प्राणत्राणाय योजयेत्॥नक्र
पत्र रास्ना गुरु शिग्रु कुष्ठै रम्ल प्र
पिष्टैः सवचा शताह्वैः।उद्वर्तनं
खल्लि विसूचिकाघ्नं तैलं वि
पक्वञ्च तदर्थकारि॥त्वक्तैलं॥

॥कुष्ठसैन्धवयोः कल्कः शुक्ते
तैलं तु तच्छृतं।विसूच्यां मर्द्दने
तेन खल्ली शूलनिवारणं॥कुष्ठ
तैलं॥पिपासायां तथोत्क्लेशे त
वङ्गस्याम्बु प्रशस्यते।जातीफल
स्य वा शीतं स्रुतं भद्रघनस्य
वा॥उत्क्लेशलक्षणं।उत्क्लि
ष्टयान्नं नर्निर्गच्छेत् प्रसेकष्ठी
वनेरितं।हृदयं पीड्यते चास्य
त मुत्क्लेशं विनिर्द्दिशेदिति॥
सक्तून्वानद्ध मुद्गर मस्तपिष्टैः
प्रलेपयेत्।दारुहैमवती कु
ष्ठ शताह्वा हिङ्गु सैन्धवैः॥है
मवती श्वेतवचा।दारुषट्कं॥
तक्रेण युक्तं यवचूर्णं मुष्णं
सक्षार मार्त्तिं जठरे निहन्यात्
।खिदो घटैर्वा वलवाम्प्रपूर्णैरु
ष्णो मलथान्ये रपि पाणितापैः॥
विलम्बिकालसकयो रष एव
क्रियाक्रमः।अतएवैतयो रुक्तं
पृथक् नेह चिकित्सितं॥तद्रस
कं गुरु स्निग्ध सान्द्र मन्द हिम
स्थिरैः॥अन्न पानै र्नयेच्छान्तिं
पित्तश्लेष्मविरेचनैः॥अत्युद्दता
भिप्रशान्त्ये माहिष दधि दुग्ध स
र्पीषि।संसेवेत यवागूं समस्त
विकृष्टां ससर्पिष्कां॥अग्रसकृत् पि

त्तहरणं पायसं प्रति[illegible]
मा त्रिहृद्धि पक्वान्च प[illegible]
रेचनं॥यत्किञ्चित् मधुरं मेध्यं
श्लेष्मलं गुरु भोजनं।सर्वं तदत्य
ग्निहितं भुक्त्वा प्रस्वपनं दिवा॥
सिततण्डुलं सितकमलं क्षोणी
क्षीरेण पायसं सिद्धं।भुक्त्वा घृ
तेन पुरुषो द्वादशदिवसाद्भस्म
ह्नितो भवेत्॥ ॥अथ विशिष्ट
द्रव्याजीर्णे विशिष्टपाचनद्रवा
माह।अलंपनसपाकाय फलं
कदलसम्भवं।अदलस्य तु पा
काय बुधै रभिहितं घृतं॥घृतस्य
परिपाकाय जम्बीरस्य रसो हि
तः।नारिकेलफल तालबीज
योः पाचकं सपदि तण्डुलं
विदुः।क्षीरस्याम्बु सहकार पाच
नं चाम्रजनि हरीतकी हिता॥
मधूक माक्षूर तृपादनानां परूष
खर्जूर कपित्थकानां।पाकाय
पेयं पिचुमर्दबीजं घृतेपितक्रे
पि तदेव देयं॥खर्जूरस्यशृङ्गाटक
योः प्रशस्तं विश्वौषधं कु
त्र च भद्रमुस्तं।पनसाङ्ग बोधि
द्रुफलेषु शीतं सेव्यते तथा
वाय्युषितं प्रणीतं॥तण्डु
लेषु प॥ ॥ ॥

एव[illegible]हतं दीप्यकन्त वि
[illegible]युतं।षष्टिका दधिज
लेन जीर्य्यते कर्कटी च खमने
षु गोधूमेषु।गीर्य्यते कथ्यते॥गो
धूम माष हरिमन्थ सतील मुद्ग
पाको भवेत् ऊटिति मातुल पु
त्रकेण।एरन्डयति माषभवं त
जीर्णे तैलं कुलत्थ मद्य वा वि
दधाति जीर्णे॥मातुलपुत्रकः
धत्तूरफलं॥कङ्गु श्यामाकनी
वाराः कुलथ श्चाविलेम्बितं।
दध्नो जलेन जीर्य्यन्ति वैदलाः
काञ्जिकेन तु॥पिष्टान्नं शी
तलं वारि ह्रशरान् सैन्धवं प
चेत्।माषेन्दुरी निम्बमूलं पाय
संमुद्गयूषकैः॥वटो वेशवारा
लवङ्गेन फेणी शामं पर्पटः
शिग्रुबीजेन याति।कणामूल
तो लड्डुकाद्यप शाटा विपाको
भवेच्छष्कुली मन्दयोश्च॥वे
शवारः वेसर इतिलोके।तद्य
था।स्नेहो निशा हिङ्गु लवङ्गमेके
ला धान्याक जीराईक नागरा
णि।अम्लोयणं सैन्धवचूर्ण
मन्ने यथोचितं संस्कृतये प्र
णीतमिति॥शाटा शाटकः
पानकविशेषः।मन्डः मा

न्डे इतिलोके॥किमत्र चित्रं व
हुमेतस्यमांसभोजी सुखी काञ्जि
कपानतः स्यात्।इत्यद्भुतं के
वलवह्निपक्वमांसेन मत्स्यः प
रिपाकमेति॥आम मांस मीने
तद्बीजं पिशिते हितं।कूर्म्म मां
सं यवक्षाराच्छीयं पाकमुपैति
हि॥कपोत पारावत नीलक
एठ कपिञ्जलानां पिशितानि
भुक्त्वा कासास्य मूलं परिपीय
पिष्टं सुखीभवेत्तावहुशो हि दृ
ष्टं॥कपोतो धवलः पाण्डः।शा
कानि सर्व्वाण्यपि यान्ति पाकं
क्षारेण सद्यस्तिलनालजेन।
चञ्चूक सिद्धार्थक वास्तुकानां
गायत्रिगारक्वथितेन पाकः॥च
ञ्चूकं चेच्चूरु इतिलोके।गायत्री
खदिरः॥पलङ्क्या केमुकका
रवेल्ली वार्त्ताकुवंशाङ्कुर मूल
कानां।उपोदिकालाबु पटोल
कानां सिद्धार्थको मेघरवस्य
पक्त्वा॥मेघरवः चवराङ्ग इति
लोके॥विपच्यते शूरणकं गु
डेन तथालुकं तण्डुलजोदके
न।पिण्डालुकं जीर्य्यति कोरदू
षात् कसेरुपाकः किल नाग
रेण॥लवणं तण्डुलतोयात् स

पि जंम्बीरकाच्चम्लात्।मरिचार
पि नत्क्षीरं पाकं यात्येव का
ञ्जिकात्तैलं॥क्षीरं जीर्य्यति
नक्रेण नक्रव्यं कोष्णमण्ड
कात्।माहिषं माणिमन्थेन श
ष्कुचूर्णेन नद्धि॥मण्डकः मा
रेड इति लोके॥रसाला जीर्य्यति
व्यायात् खण्डं नागरभक्षणा
त्।क्षिना नागरमुस्तेन नथेक्षु
श्चार्द्रिकावशात्॥जरा मिरा गै
रिक चन्दनाभ्यां मभ्येति शीघ्रं
मुनिभिः प्रणीतं।उस्मेन शीतं
शिशिरेण चोस्रं जीर्णो भवे
त् क्षारगणं स्तथाम्लैः॥इरा
मदिरा।तप्तं नप्तं हेमवानार
मग्नौ तोये क्षिप्तं सप्तकृत्वस्त
दम्भः।पीत्वाजीर्णं नोयजातं
निहन्यात्तत्र चोद्रं भक्ष्युक्तं
विशेषात्॥तत्र नोयाजीर्णे।
इति जठराग्निविकारा जीर्णे
विसूचिका ऽलस विलम्बि
का विकित्सा।इति भावप्र
काशः॥अजुगुप्सितः त्रि अ
निन्दितः।यथा।उपवेश्य नमान्
विप्रान्नासनेष्वजुगुप्सितान्।ग
न्धमाल्यैः सुरभिभिरर्च्चयेद्देव
पूर्व्वकं॥इति मानवे ३ अध्या

ध्याये २०९ श्लोकः।[illegible]
अजेनव्यः।यथा।अजे[illegible]
ग्रामे ममापिहि नविख्याता।इति
स्कान्दे काशीखण्डे २३ अध्यायः॥
अज्येष्ठवृत्तिः पुं ज्येष्ठवृत्तिरहितः।
।भ्रातृषु पितृवद्वर्त्तनाभाववान्
।यथा।यो ज्येष्ठो ज्येष्ठवृत्तिः स्या
न्मातेव स पितेव सः।अज्येष्ठवृत्ति
र्यस्तु स्यात् सम्पूज्यस्तु बन्धुवत्
इति मानवे ९ अध्याये ११० श्लो
कः॥यो ज्येष्ठो ऽनुजेषु भ्रातृषु
पितृवद्वर्त्ते सपितेव मातेव अग
र्हणीयो भवति।यः पुनस्तथा
न वर्त्तेत स मातृत्वादिवर्ज्जनी
यः।इति नटीकायां कुल्लूक
भट्टः॥अञ्जनं क्ली कज्जलं।
तत्तु षड्विधं।यथा।सौवीरं जा
म्बलं नत्थं मयूरग्रीकरे नथा॥
दर्व्विका नीलमेघश्च अञ्जना
नि भवन्ति षट्॥नल्लक्षणानि
।यथा।खञ्जनपत्र सौवीरं जा
म्बलं प्रस्तरं नथा। मयूरग्री
करं रत्नं मेघनीलन्तु[illegible]
नेजसं॥ चूड्डा निगाह्य चे
नानि शिलायां
नेज ॥

एव[illegible]दद्यात् सर्व्वदेवेभ्यो
[illegible]पि पुत्रक॥चूतेने
[illegible]न नाम्बादो दीपव
ह्निना।यदञ्जनं जायते नु द
र्व्विका परिकीर्त्तिता॥सर्व्वाभावे
नु नां दद्यात् देवीभ्यो दर्व्वि
काञ्जनं।महामायाजगद्धात्री
कामाख्या त्रिपुरा नथा॥ आ
भुवंति महानोषं षड्भिरेभिः
सदाञ्जनैः।विषवाञ्जनं कु
र्य्यात् महामायार्घमुत्तमं॥
नादत्ते नुञ्जनं देवी वैसवी
विषवाहनं।न मृन्पात्रे यो
जयेन्नु साधको नेत्ररञ्जनं॥
न पूजाफल माप्नोति मृत्मा
त्रविहिनाञ्जनैः।चतुर्व्वर्गप्र
दो धूपः कामदं नेत्ररञ्जनं॥
नस्मात् इय मिदं दद्याद्दे
भ्यो भक्तिनो नरः।इति का
लिकापुराणे ६८ अध्यायः॥
अट गत्यां।अटति।इति
दुर्गादासः॥
अट क नौच्छ्ये॥अनादरे।ट
इयान्तः।क अट्टयति।एकट
कार इति रामः।नौच्छ्यं मत्सी
भावः।इतिदुर्गादासः॥
अट्ट ऋ अतिक्रमे॥वधे।

मूर्द्धन्यवर्गाद्योपधः।ऋ अटि
टियते।इति दुर्गादासः॥
अट्ट ऋ अतिक्रमे॥वधे।दन्त्य
वर्गाद्योपधः।ऋ अतिवियते।
इति दुर्गादासः॥
अट्ट ऋ अतिक्रमे वधे।दन्त्य
वर्गतृतीयोपधः।ऋ अदिदिय
ने खलराजा।इति दुर्गा
दासः॥
अठ इ ऋ गते।इ अण्ठते।
ऋ अण्ठते।इति दुर्गादासः॥
अठ गते।अठति।इति दुर्गा
दासः॥
अड रन व्याप्तौ।रवैदिकः।
न अड्डोति।इति दुर्गादासः॥
अड उद्यमे।अडति लोकः
स्वखाय।इति दुर्गादासः॥
अड्ड अभियोगे।मूर्द्धन्यवर्गतृ
तीयोपधः।अडिड्डुयति।क्विपि
संयोगान्तलोपे अड्।अभियो
गः समाधानं।अड्डति पण्डं
विद्वान्।अभिसमन्तात् योगो
अभियोग इति गोविन्दभट्टः
इति दुर्गा
दासः॥
अण रवे।अणति।रवः शब्दः।
इति दुर्गादासः॥

अण य ऊ प्राणे।य ऊ अणय
ते जनो दुःखेन जीवतीत्यर्थः।
इति दुर्गादासः॥
अण्डकोषः पुं शरीरावयववि
शेषः।तत्पर्य्यायः।कोषको
यक मुष्काण्ड वृषणा अण्डको
षकः।सीमा च पेल सीमानो
फल मित्यपि क्वचित्॥इति
शब्दरत्नावली॥
अत सातत्यगतौ।सातत्यगतं
नैरन्तर्य्येण भ्रमणं प्रापणञ्च।
।अतति वायुः।अतति सूर्य्यो
गगणं प्राप्नोतीत्यर्थः।इति
दुर्गादासः॥
अत इ बन्धे।अंतीति बन्धे।शे
षो दीर्घादि रित्यन्यः।अतएव
अन्त्यते इन्त्यते।छन्दोनुरोधाद
भयत्र इकारः।इति दुर्गा
दासः॥ ॥
अतसी स्त्री क्षुमा।मसिना
इति भाषा।यथा।अतसी नील
पुष्पी च पार्वती स्यादुमा
क्षुमा।अतसी मधुरा तिक्ता
स्निग्धा पाके कटुः गु
रुः।उष्णा दृक्‌शुक्र वा
तघ्नी कफपित्त विनाशिनी॥
इति भावप्रकाशः॥

अतिविषा स्त्री इत्त[illegible]
आतइष इतिभाषा।[illegible]
त्वतिविषा विश्वा श्र[illegible]
यारुणा।शुक्लकन्दा चोपविषा
भङ्गुरा घुणवल्लभा॥
विषा शोषणा कटु स्तिक्ता पाच
नी दीपनी हरेत्।कफपित्तातिसा
राम विष कास वमिकृमीन्॥
इति भावप्रकाशः॥ अतिसारः
पुं बहुद्रवमलनिःसरणरो
गः।अथ सामान्यातिसारस्य
चिकित्सा माह।आमपक्वमे
क्रमं हित्वा नातिसारक्रियायतः
।अतोतिसारे सर्व्वस्मिन्नामं
पक्वञ्च लक्षयेत्।क्रमशः
श्चिकित्सा।तत्रामपक्वयोर्लक्ष
णं।संसृष्टमाने दोषैस्तु न्यस्त
मप्सु निमज्जति।पुरीषं भृशदु
र्गन्धि पिच्छिलं ह्यामसंज्ञितं॥
एतान्येव तु लिङ्गानि विपरी
तानि यस्य वै।लाघवञ्च वि
शेषेण तस्य पक्वं विनिर्दिशेत्
॥न च संग्राहणं दद्यात् पूर्वे
मामातिसारिणे अकाले स
गृहीतो हि विकारान् कुरुते
बहून्॥दण्डकालसकाध्मान
ग्रहण्यर्शो भगंदरान्।शो

एव[illegible]यं प्लीह गुल्म मेहो
[illegible]ड्मिस्थः स्थविरस्य
[illegible]त्मकस्त्रयः।क्षीणधा
तुबलस्यापि बहुदोषातिविस्रुतः
॥आमो ऽपि स्तम्भनीयः स्यात् पा
चनान्मरणं भवेत्।लङ्घनमेकं
मुक्त्वा न चान्यदस्तीह भेषजं
बलिनः।समुदीर्णं दोषनिचयं
तत् पाचयते तथा शमयेत्॥
लङ्घन एव दोषघ्नः सहपिपासा
यां दोषपाकार्थं षडङ्ग विधिना
ईरितं योगवलस्य माह।धा
न्योदीच्य शृतं तोयं तृष्णादा
हातिसारिणे।ह्रीबेर शृङ्गवे
राभ्यां मुस्त पर्पटकेन वा॥
मुस्तोदीच्य शृत शीतं प्रद
तव्यं पिपासवे।हितं लङ्घन
मेवादौ पूर्वरूपे ऽतिसारिणः
॥कार्य्यं स्वानशनस्यान्ते
प्रद्रवं लघुभोजनं।पथ्यादा
रु वचा मुस्ते नागरातिविषा
न्वितैः॥आमातीसारनाशाय
क्वाथमेभिः पिबेन्नरः॥पथ्या
दिक्वाथः॥ ॥पाठा हिङ्गुज
मोदोग्रा पञ्चकोलाब्दजं रजः
।उष्णाम्बुपीतं सरुजं जयत्यामं
संसेव्यन्यवं॥पाठादिचूर्णं॥ ॥

हरीतकी सातिविषा हिङ्गु सो
वर्चलं वचा।सैन्धवञ्चापि सं
पिष्य पाययेदुष्णवारिणा॥आमा
तिसारे योगो ऽयं पाचयित्वा चि
कित्सति।आमातिसारो योगेन
येनेतेन न शाम्यति॥ततं योगशा
तेनापि चिकित्सति चिकित्सकः।
चिकित्सति अपनयति।हरीतक्या
दिकल्कः॥ ॥वत्सकातिविषा
बिल्व मुस्त बालकजं शृतं।अती
सारं जयेत् सामं चिरजं रक्तशूल
जित्॥वत्सकादिक्वाथः॥ ॥
एवगुरुसंपिष्टं पक्व माम
ञ्च नागरं।आमातिसार शूलघ्नं
दीपनं पाचनं परं॥नागरस्य
पुटपाकः कल्कश्च॥ ॥धान्य
बालक बिल्वाब्द नागरैः पा
चितं जलं।आमशूल विबन्ध
घ्नं पाचनं नित्यसेवितं॥धान्य
पञ्चकं॥पित्ते धान्यचतुष्कन्तु
शुण्ठीत्यागादुदन्ति हि।रक्ते
पित्तसाधर्म्याहितं धान्यच
तुष्टयं॥ ॥धान्यचतुष्कं
इत्यामातिसारस्य चिकित्सा
॥ ॥सलोध्रं धातकी
बिल्वं मुस्ताम्रास्थि कलि
ङ्गकं।पिबेन्माक्षिकत

केण पक्वातीसारनाशनं॥लो
ध्रादिचूर्णं॥अरलुधातकी
लोध्रं समङ्गा पद्मकेशरं।मधू
कारलु बिल्वञ्च पक्वातीसार
हागणः॥अरलुः श्योणाकः।पा
ठादिर्गणः॥ समङ्गा धातकी
पुष्पं मञ्जिष्ठा लोध्र एव च।
शाल्मलीवेष्टको लोध्रो दाडि
मद्रुफलत्वचो॥आम्रास्थिमध्यं
लोध्रञ्च बिल्वमध्यं प्रियङ्गु च।
मधूकं शृङ्गवेरञ्च दीर्घवृन्तत्वगे
व च॥चत्वार एते योगाः स्युः प
क्वातीसारनाशनाः।ते योगा उ
पयोज्याः स्युः सक्षौद्रा स्तन्डु
लाम्बुना॥समङ्गात्र लज्जालुः।
शाल्मलीवेष्टको मोचरसः।दा
डिमस्यद्रुमफलयो स्त्वचो।प्रिय
ङ्गो र्न पुंसकत्व मत्रफले वर्त्तमा
नत्वात्।शृङ्गवेरमत्र शुण्ठी।दीर्घ
वृन्तः श्योणाकः।तस्यत्वक्।समङ्गा
दीनि चत्वारिचूर्णानि॥कञ्चट जम्बू
दाडिम शृङ्गाटकपत्र बिल्ववर्हिष्ठ।
जलधर नागरसहितंगङ्गामपि वे
गवाहिनीं रुन्ध्यात्॥कञ्चटं चव
राङ्ग शाकस्य भेदः।कञ्चटादि
भिष्वत्रभिः पत्रशब्दः सम्बध्यते
।वर्हिष्ठं वालकं।गङ्गाधरक्वाथः

॥मोचरस मुस्त नाग[illegible]
धातकीकुसुमैः।च[illegible]
समेतं रुणद्धि गङ्गाप्र[illegible]
॥अरलुः श्योणाकः।मथितंनि
र्जलं दधि वस्त्रपूतं।गङ्गाधरचू
र्णं॥मुस्ता वत्सकबीजं मोचर
सो बिल्व धातकी लोध्रं।उडम
ध्यिन संप्रयुक्तं गङ्गामपि वेग
वाहिनीं रुन्ध्यात्॥द्वितीयं गङ्गा
धरचूर्णं॥मुस्तारलुक शुण्ठा
भि र्धातकी लोध्र वालकैः।बि
ल्व मोचरसाभ्याञ्च पाठेन्द्रय
व वत्सकैः॥आम्रबीजसमङ्गा
भिविषायुक्तैः विचूर्णितैः।मधुत
ण्डुल पानीय पीतै निषेवयेत् प्र
वाहिकां॥सर्वेऽतिसारा ग्रह
णी प्रशमं यान्ति वेगतः।वृहद्ग
ङ्गाधरं चूर्णं रुन्ध्याज्जीर्णावा
हिनीं॥समङ्गा लज्जालुः।वृहद्ग
ङ्गाधरचूर्णं॥अङ्कोठ मूलकल्कः
तण्डुलपयसा समाक्षिकः पीतः।
सेतु रिव वारिवेगं झटितिरुन्ध्या
दतीसारं॥अङ्कोठकल्कः॥ ॥
कुटजत्वग्दला माद्री द्रोणनीरे
पचेत् भिषक्।पादशेषं शृतं
नीत्वा वस्त्रपूतं पुनः पचेत्॥
लज्जालु धातकी बिल्वं पा

एव[illegible]तथा।मुस्तं प्रतिवि
[illegible]न्येषां पलं पलं॥
निक्षिप्य विपचेत्तावत् यावत् द
र्वी प्रलिप्यते।जलेन छागदुग्धे
न पीतो मण्डेन वा जयेत्॥
घोरान् सर्वानतीसारा नानाव
र्णान् सवेदनान्।असृग्धरं स
मस्तञ्च तथार्शांसि प्रवाहिकां॥
कुटजावलेहः॥ ॥कृत्वाखवा
लं खण्डं पिष्टे रामलके भिष
क्।आर्द्रकस्वरसेनाशु पूरये
न्नाभिमण्डलं॥नदीवेगोपमं
घोरं प्रवृद्धं दुर्द्धरं नृणां।सद्यो
तिसार मजयं नाशयत्येषयो
गराट्॥पाठा पिष्टाच गोदग्ध त
या मध्यत्वगाम्रजा।अतीसा
रं व्यथा दाहयुक्तं हन्त्युदरेऽस्य
ता॥अथ वातातिसारस्यलक्ष
णं।अरुणं फेनिलं रुक्षमल्प
मल्पं मुहुर्मुहुः।शकृदामं स
रुक्छब्दं मारुतेनातिसार्य्य
ते॥अरुणमीषद्रक्तं।शकृत् पुरी
षं।सरुक्छब्दे शब्दो युद्धे।तत्
साहचर्यात् रुगपि युद्ध एव बो
द्धव्या॥तस्य चिकित्सा।वचा
चातिविषा मुस्तं बीजानि कु
टजस्यच।अष्टः कषाय एते

षां वातातिसार शान्तये॥ ॥
अथ पित्ता तीसारस्य लक्षणं।
पित्तात्पीतं शकृद्रक्तं दुर्गन्धि
हरितं द्रुतं।गुदपाक तृषा मू
र्च्छा दाहयुक्तं प्रवर्त्तते॥ ॥
तस्य चिकित्सा।बिल्व शक्र य
वाम्भोद वालकातिविषाकृतः।
कषायो हन्त्यतीसारं सामं पित्त
समुद्भवं॥बिल्वादिकषायः॥ ॥
रसाञ्जनं सातिविषं कुटजस्य फ
लं त्वचं।धातकी शृङ्गवेरञ्च पा
ययेत्तण्डुलाम्बुना॥निहन्ति म
धुना पीतं पित्तातीसार मुल्वणं।
अग्निं सन्दीपयत्येतत् शूल मा
शुनिवारयेत्॥रसाञ्जनादिचूर्णं
॥अथ पित्तातिसारभेदस्य रक्ता
तीसारस्य संप्राप्तिमाह। पित्त
कृन्ति यदाऽत्यर्थं द्रव्याण्यश्ना
ति पैत्तिके।तद्दोषाज्जायते शी
घ्रं रक्तातीसार उल्वणः॥ ॥
तस्य चिकित्सा।वत्सकतरु
त्वगाद्री डाडिमफलसम्भवात्व
क् च।द्वययुगलं पलमानं विप
चेदष्टांशसम्मिते तोये॥अष्टम
भागं शेषं क्वाथं मधुना पिबेत्
पुरुषः।रक्तातिसा सत्वराम
तिशयितं नाशयेन्नियतं॥कु

टजदाडिमक्वाथः॥ ॥कुटजा
तिविषा मुस्तं बालकं लोध्र च
न्दनं।धातकी दाडिमं पाठ्य क्वा
थमेषां समाक्षिकं॥पिवेद्रक्ताति
सारे तु दाह शूलाम संयुते।कु
टजादिकषायो ऽयं सर्व्वातीसार
नाशनं।आमशूल विवन्धघ्नं कु
क्षिरोगहरं परं॥बिल्व शस्त्रिन्नं
बालविल्वगर्भं शीतं तत्क्षौद
नोदकं चानुपेयं।गुडविल्वं॥
जम्ब्वाम्रामलकीनान्तु कुडुये
त् पल्लवान् नवान्।संगृह्य स्वर
सं तेषां अजाक्षीरेण योजयेत्
॥ततपिवेन्मधुना युक्तं रक्ता
तीसारनाशनं।जम्ब्वादिस्वरसः
॥ ॥निष्क्वाथ्य मूल मम
लं गिरिमल्लिकायाः सम्यक्
पलद्विजय मम्बु चतुःश
रावे।तत्पादशेष सलिलं
खलु शोषनीयं क्षीरे पल
हयमिते कुथल्ले रजायाः॥
प्रक्षिप्य माषकानष्टौ मधु
न स्तन्न शीतले।रक्ताति
सारी तत पीत्वा
नैरुज्यं क्षिप्र माप्नु
यात् ॥ ॥
कुटजक्षीरं ॥ ॥पी

[illegible]

ता शतावरीकल्कं
म् जयेत्।रक्तातिसार
या सिद्धं हन्त नरः॥शतावरीकल्क
स्तद्घृतञ्च॥ ॥गोडग्ध नवनी
तञ्च मधुना सितयासह।लीढं र
क्तातिसारे तु ग्राहकं परमं मतं॥
नवनीतावलेहः॥पीतं मधुसिता
युक्तं चन्दनं तण्डुलाम्बुना।रक्ता
तिसारजिद्रक्त पित्त तृड्दाह मे
हनुत्॥चन्दन मत्र श्वेतं।चन्दना
कल्कः॥ ॥विरेके बहुभि र्यस्य
गुदं पित्तेन दह्यते।पच्यते वा
तयोः कार्य्यं सेक प्रक्षालनादि
कं॥आदिशब्देन लेपादिग्रहः।
पटोल यष्टीमधुक क्वाथेन शि
शिरेणहि।गुद प्रक्षालनं कार्य्यं
तेनैव गुदसेचनं॥दाहे पाकेहि
तं छागीदुग्धं सक्षौद्र शर्करं।
गुदस्य क्षालने सेके युक्तं
पानेच भाजने॥गुदस्य
दाहपाकयोः॥ गुदनिःसर
णे प्रोक्तं चाङ्गेरीघृत मुत्तमं
। अतिप्रवृत्त्या महती भवेद्
यदि गुदव्यथा॥सिन्न मूषक
मांसेन तदा संस्वेदयेद् गुदं
।अथ गोस्तमहूर्णस्य संनीतस्य
तु वारिणा ॥ सा

एव [illegible] कं कृत्वा मृद् संस्वे
[illegible] दव्यथायां गुदभ्रं
शे गुद स्नेहे रभ्यज्यान्तःप्रवे
शयेत्।प्रविष्टं स्वेदयेन्मंदं मू
षकस्यामिषेण हि॥मूषक
स्यामिषेण काञ्जिकेनोत्स्वि
न्नेन एरण्डपत्रादि स्थापितेन
स्वेदयेत्।मूषकस्याथ वसया
पायुं सम्यक् प्रलेपयेत्।गुद
भ्रंशाभिधो व्याधिः प्रणश्यति
नसंशयः॥चाङ्गेरी कोल दध्य
म्ल क्षार नागर संयुतं।घृतं विप
क्वं पातव्यं गुदभ्रंशगदापहं॥
चाङ्गेरी चतुष्पत्रा अम्ललोनि
का तस्याः स्वरसः कोलस्य क्वा
थः दध्यम्लं दधिरूप मम्लं प
तत्त्रयंमिलितं घृताच्चतुर्गुणं।
क्षारनागरयोः कल्कः।चाङ्गे
रीघृतं॥ ॥कोमलं पद्मिनीपत्रं
यः खादेच्छर्करान्वितं।एतन्नि
श्चित्य निर्दिष्टं न तस्य गुदनि
र्गमः॥पद्मिनीपत्रं पुरइनिपत्रं
तत् संशोष्य संचूर्ण्य शर्करायु
क्तं खादेत्।अयन्तु गुदभ्रंशो
ऽतीसारं विनापि भवति।त
तः क्षुद्ररोगेषु लिखितः।अ
त्र तु गुदस्य दाह पाक व्यथा प्रम

कृत्य भ्रंशोपि लिखितः।चिकि
त्सा तुसमग्र तत्रैव॥ अथ
श्लेष्मातिसारस्य लक्षणं।श्वेतं
स्निग्धं घनं विस्रं शीतलं मन्द
वेदनं।गौरवारुचिसंयुक्तं श्लेष्म
णा सार्य्यते शकृत्॥विस्रं स्या
दामगन्धि यत्॥अथ तस्य
चिकित्सा।श्लेष्मातिसारे प्रथमं
हितं लङ्घन पाचनं।योज्य
श्चामातिसारघ्नो यथोक्तो दीप
नो गणः॥चव्य श्चातिविषा
कुष्टं बालविल्वं सनागरं।व
त् सकलकफले पथ्या छर्दि
श्लेष्मातिसारनुत्॥चव्यादिक्वा
थः॥हिङ्गु सौवर्च्चलं व्योष मा
भयातिविषा वचा।पीत मुष्णा
म्बुनाचूर्णमेषां श्लेष्मातिसारनु
त्॥हिङ्ग्वादिचूर्णं॥कृमिशत्रु व
चाविल्वपेशी धान्याक कट्फ
लं।एषां क्वाथं पिबद्यात्
अतीसारे बलासजे॥विडङ्गादि
क्वाथः॥अथ द्विदोषजातिसारा
णां लक्षणानि चिकित्सा चाद्वि
दोष लक्षणे द्विधातृतीसारं द्वि
दोषजं।तेषां चिकित्सा प्रोक्तैव
विशिष्टा च निगद्यते॥कट्
फलं मधुकं लोध्र त्वकदाडिम

फलस्य च।तण्डुलजलं चूर्णं
वातपित्तातिसारनुत्॥वातपित्ता
तिसारे॥ ॥चित्रकातिविषा मुस्त
बालविल्वं सनागरं।वत्सकत्व
क्फलं पथ्या वातश्लेष्मातिसार
नुत्॥वातश्लेष्मातिसारे॥मुस्ता
सातिविषा मूर्वा वचा च कुट
जः समाः।एषांकषायः सन्तो
द्रः पित्तश्लेष्मातिसारनुत्॥पि
त्तश्लेष्मातिसारे॥अथ सन्नि
पातातिसारस्य लक्षणं।तन्द्रा
युक्तो मोह सादास्यशोषी वर्चः
कुर्य्यान्नैकरूपं तृषार्त्तः।सर्व्वो
द्भूते सर्व्वलिङ्गोपपत्तिः कृच्छ्रो
ऽसाध्यो बालवृद्धावलानां॥
अथ तस्य चिकित्सा।पञ्चमू
लीवला विल्वगुडूची मुस्त ना
गरैः।पाठा भूनिम्ब वर्हिष्ठ कु
टजत्वक् फलैः शृतं॥सर्व्वजं
हन्त्यतीसारं ज्वरञ्चापि तथा
वमिं।सशूलोपद्रवं श्वासं कासं
चापि सुदुस्तरं॥पञ्चमूल्यत्र सा
मान्या पित्ते योज्या कनीयसी।वा
तेपुनर्व्वलासे च सा योज्या महती
मता॥वर्हिष्टं वालकं।पञ्चमूल्या
दिक्काथः॥अथवा नागरं मुस्तं गु
डेन सह योजितं।चतुःसमेयं

गुटिका स्यात्त्रिदोष[illegible]
आमातिसार मानाह[illegible]
विसूचिकां।कृमीनरोचकं हन्या
द्दीपयत्याशु चानलं।चतुःसमो
मोदकः॥ ॥तत् काला
हृष्ट कुटजत्वचं तण्डुलवारिणा
।पिष्टां चतुःपलमितां जम्बु पल्ल
ववेष्टितां॥सूत्रेण वद्धा गोधूम
पिष्टेन परिवेष्टितां लिप्ताञ्च
घनपङ्केन निर्द्दहेद्गोमयाग्निना
॥अङ्गारवर्णाञ्च मृदं दृष्ट्वा व
ह्नेः समुद्धरेत्।ततोरसं समादा
य शीतं क्षौद्रयुतं पिवेत्॥उक्तः
कृष्णात्रिपुत्रेण पुटपाकस्तु
कौटजः।जयेत् सर्व्वानतीसा
रान् दुस्तरान् सचिरोत्थितान्
॥कुटजपुटपाकः॥ ॥कुटज
त्वक्कृतः क्वाथो वस्त्रपूतोथ
नीकृतः।स लीढो ऽतिविषायु
क्तः स्यात्त्रिदोषातिसारनुत्॥इ
च्छन्त्यत्राष्टमांशेन क्वाथादति
विषारजः।प्रक्षिपेद्वा चतुर्थांश
मिति केचिद्वदन्ति हि॥कुटजा
वलेहः॥ ॥पल मङ्कोठमूल
स्य पाठां दार्व्वीञ्च ततसमां।
पिष्ट्वा तण्डुलतोयेन वटकानक्ष
सम्मितान्॥छायाशुष्कांश्च तान्

एव[illegible]तण्डुलाम्बुना।पे
[illegible]यात्तं पानाय यदि
तेभिषक्॥वातपित्तकफोद्भूतान्
द्वन्द्वजान् सान्निपातिकान्।ह
न्यात् सर्व्वानतीसारान् वटको
ऽयं प्रयोजितः॥अङ्कोठवटकः
॥ ॥अथागन्तुजस्य शोकाति
सारस्य संप्राप्तिपूर्व्वकं लक्षण
माह।तैस्तै र्भावैः शोचतो ऽ
ल्पाशनस्य वाष्पोष्मा वै वह्नि
माविश्य जन्तोः।कोष्ठं गत्वा
क्षोभयेत् तस्य रक्तं तच्चाधस्ता
त् काकणन्तीप्रकाशं॥निर्ग
च्छेद्वै विड्भिमिश्रं ह्यविड्वा नि
र्गन्धम्वा गन्धवद्वातिसारः।शो
कोत्पन्नो दुश्चिकित्सो ऽतिमा
त्रं रोगो वैद्यै कष्ट एष प्रदिष्टः
॥अथ मर्थः।तैस्तैर्भावै र्वन्धु
वित्त क्षयादिभिः।शोचतः शो
कं कुर्व्वतः।जन्तोः प्राणिनः।
वाष्पोष्मा वाष्पः शोकजदे
होष्मणा जनितं नेत्रनाशा
गलादिषु जलं तेन सहितः
उष्मा शोकजं देहतेजः।स
कोष्ठं गत्वा वह्निमाविश्य जठ
राग्निं मन्दीकृत्य।वाष्पसाहित्या
दुष्मणापि वह्नेर्मन्दीभाव इतिन

दोषः।वह्नेर्मन्दीभावादेव अ
ल्पाशनस्येति जन्तो र्विशेषणं।
ततस्तस्य जन्तो रक्तं क्षोभयेत्
स्वस्थानाच्चालयेत्।इति संप्रा
प्तिः॥ ॥अथ लक्षणं।तच्च रक्तं
अधस्तात् गुदात् काकणन्तीप्र
काशं गुञ्जाफलसदृशं विड्भिमि
श्रं गन्धवच्च।अविट् निर्गन्धं वा
निर्गच्छेत्।शोकोत्पन्नोतिसारः
अतिमात्रं दुश्चिकित्स्यः।शो
कापनोदनं विना केवलेन भे
षजेन प्रतिकर्त्तुमशक्यत्वात्।
एषो ऽतीसारः।वैद्यैः कष्टः कृ
च्छ्रेन साध्यः।प्रदिष्टः कथितः इ
त्यर्थः॥ ॥अथागन्तुजत्वेन सा
म्यात् भयातीसारस्यापि संप्रा
प्तिपूर्व्वकं लक्षणमाहैवाह।भ
येन क्षोभिता दोषाद्रूषयन्ति
मलं यदा।तदातिसार्यते तत्त्व
क्षिप्रं कृष्णजलप्लवं॥वातपि
त्तातिसारस्य प्रायो लिङ्गैः स
मन्वितं।तभयोपशमात्सिद्धो
यस्मिन् स्यात् स भयात्मकः॥
प्लवत इति प्लवं जले प्लवमानं।
ननु भयातिसारस्य कथमागन्तु
जत्वमपि दोषजत्वमेवायत
आह।भयेन क्षोभिता दूषिता

दोषा मलं दूषयन्ति। तन्मलं म
तिसरति। अत्र शृङ्गं मेव दोष स
म्बन्धः। उच्यते। रोग द्वेष भयात्
ये च ते स्यु रागन्तवो गदा। इति
वचनाद्भयातीसार आगन्तज ए
व। श्लोकस्य तय मर्थः। भये
नैव हेतुभूतेन दोषा वात पि
त्त कफा अतीसारणाय क्षोभि
ताः सञ्चालिताः न दूषिता भ
येन त्रयाणा मपि दोषाणां दूष
णाऽसम्भवात्। अतिसर्तं चलिता
वातपित्त कफा मलं दूषयन्ति न
त्वसंस्थवात पित्त कफ मलं भये
नैवातिसार्य्यते। पश्चाद्वात सम्ब
न्धो भयाद्वायु रिति वचनात्।
अतएव भयातिसारे वातहर्ये
व क्रियाकथितेति समर्थः॥
अथ तयोश्चिकित्सा। भय शोक
समुद्भूतौ ज्ञेयौ वातादिसारवत्
। भयो वातहरी कार्य्या हर्ष
णाश्वासनैः क्रिया॥ वातादि
सारवत् वातातिसारलक्षणैः
। तयोश्चिकित्सा च हर्षणाश्वा
सनपूर्विका वातहरी कार्य्या॥
अथामातीसारस्य संप्राप्तिपूर्व
कं लक्षण माह। अन्नाजीर्णात्
प्रद्रुताः क्षोभयन्तो दोषाः

कोष्ठे धातु संच[…]
नानावर्णं नैकश[…]
शूलोपेतं षष्ठ मेनं वदन्ति। अन्नं
भुक्तं तदजीर्णं चेति कर्मधारय
ये अन्नाजीर्णं तस्मात् प्रद्रुता
उपद्रुताः। क्षोभयन्तः चालयं
तः। नैकश इत्यत्र नाकारि
त्वाकारान्तर विपर्य्ययः। तत्राम
तदोषा दूष्यन्ते गुर्वादि भक्षणा
दिभि रिवते चातीसार मुत्पाद
यन्ति। तत्राम मेवातीसार मुत
पादयन्ति। तेनामातीसारोपि दो
षज एव किमर्थं मयं पृथगुच्य
ते। उच्यते। आमातीसारस्य चि
कित्साविशेषार्थं सम्प्राप्तिपूर्व
को लक्षणविशेषः पृथगुक्तः
। कः स चिकित्साविशेषस्त
माह। अतीसारेषु सर्वेष्वेव सं
ग्राहक मौषधमुक्त मामाती
सारे तु ग्राहकं विरुद्धं। यत
उक्तं॥ नामे संग्राहकं विद्या
दतीसारे कदाचन। संगृहीतो
बलाद्दामो विकारान् कुरुते
बहून्॥ इति। बलाद्भेषजबला
त्। विकारान् ग्रहण्याध्मान
शूल गुल्म शोथोदर ज्वरादी
न्॥ ॥तस्य चिकित्सा। वत्

एव[…] शुण्ठी बिल्व हिङ्गु
[…]त्रकेण युता एषा
क्वाथ […]मातिसारनुत्॥ आमा
तिसारस्य चिकित्सा पूर्वमुक्तैव
॥धान्यत्रीहृयवाः पाठा विडङ्गा
तिविषा घनाः। क्वथिताः सोय
णाः पीताः शोथातीसारनाश
नाः॥ धान्यत्रीहुनर्णवा। उषणं
मरिचं। सशोथातीसारे॥ आम्रा
स्थिमध्य मालूरफलक्वाथः समा
क्षिकः। शर्करासहितो हन्यात् छ
र्द्यतीसार मुल्वणं॥ मालूरफलं
बिल्वफलं। कषायो भृष्टमुद्गस्य
सलाज मधुशर्करः। निहन्याच्छर्द्य
तीसारं तृष्णा दाहं ज्वरं भ्रमं॥
छर्द्यतीसारे॥ ॥दध्ना ससारेण
समाक्षिकेण भुञ्जीत निःसा
रकपीडितस्तु। सुतप्तकुप्य क्व
थितेन चापि क्षीरेण शीतेन
मधुप्लुतेन॥ निःसारकः निदाही
इति लोके। सुतप्तकुप्यक्वथिते
न सुतप्तस्वर्ण रजतेतर लोह
निर्वापणक्वथितेन भुञ्जीत पथ्य
मितिशेषः॥ निःसारके॥ दीप्ता
ग्नि र्निष्पुरीषो सार्य्यते फे
निलं शकृत्। स पिबेत् फाणितं
शुण्ठी दधितैलं पयो घृतं॥

बला बिम्बाम्लतं क्षीरं गुडतैला
नुयोजितं। दीप्ताग्निं पाययेत् प्रा
तः स्रावेदं वर्च्चसक्षये॥ पुरीषक्ष
ये॥ ॥तुला संकुट्य बिल्वस्य
पचेत् पादावशेषितं सक्षीरं सा
धयेत्तैलं स्वल्पपिष्टै रिमैः समैः॥
बिल्वं सपातकी कुष्ठ शुण्ठी रा
स्ना पुनर्णवा। देवदारु वचा मुस्त
लोध्र मोचरसान्वितं॥ एभि र्मृदु
ग्निना पक्वं ग्रहण्यर्शो ऽतिसारनु
त्। बिल्वतैल मितिख्यात मत्रिपु
त्रेण भाषितं॥ ग्रहण्यर्शो ऽधिका
रे ये स्नेहाः समुपदर्शिताः। प्रयो
ज्या स्ते ऽतिसारे ऽपि त्रयाणां तु
ल्य हेतुता॥ त्रयाणां ग्रहण्यर्शो
ऽतिसाराणां। बिल्वतैलं॥ ॥
अथातिसारभेदस्य प्रवाहिकाख्या
धेः संप्राप्तिपूर्वक लक्षण माह
। वायुः प्रवृद्धो निचितं बलासं
नुदत्यधस्ताद्धिताशनस्य। प्रवा
हतो ऽल्पः बलशो मलो
क्तं प्रवाहिकां तां
प्रवदन्ति तज्ज्ञाः॥
अस्यार्थः। अहि
ताशनस्य अतिशयेन वातल
भक्ष्यभोजिनः। प्रवृद्धो वायुः
प्रवाहतः काय्वहृदलेन सशब्दं

वायु मपानमार्गेण त्यजतः।नि
वितं सञ्चितं।वलासं कफं।म
लाक्तं पुरीषयुक्तं अल्पं।वहुशः
वारं वारं।अपस्तात् गुदमार्गे
ण।नुदति प्रेरयति।तज्ज्ञाःपुरा
णा वैद्याः।तां प्रवाहिकां।
प्रवदन्ति कथयन्ति॥ तस्या
वातजादिभेदेन रूप माह।प्र
वाहिका वातकृता सशूला पित्ता
त् सदाहा सकफा कफाच्च।सशो
णिता शोणितसम्भवाच्च ताः स्नि
ह रूक्षप्रभवा मतास्तु॥तत्र रू
क्षप्रभवा वातजा।स्नेहप्रभवा
कफजा।त शब्दात्तीक्ष्णोष्णप्रभ
वा पित्तजा रक्तजा च॥तासाम
तीसारवदादिशेच्च लिङ्गं क्रमं
चामविपक्वतां च।क्रमं चिकित्
सां॥तस्या श्चिकित्सा माह।
विल्वपेशी गुडं लोध्रं तैलं
मरिच सं युतं।लीढ्वा प्रवाहिका
क्रान्तः।सत्वरं सुख माप्नुयात्॥
विल्वादि रवलेहः॥ धातकी
वदरीपत्र कपित्थ रसमाक्षिकं।
सलोध्र मेकतो दध्ना पिवेत्त्रि
र्वाहिकार्दितः॥एकतः प्रत्येकं
दध्नापिवेदित्यर्थः।निर्वाहिकाप्र
वाहिका।धातक्यादिः॥ ॥अथ

असाध्यातिसारि[illegible]
हा।पक्वजाम्बुसंवं[illegible]
निभं तनुं।घृततैल व[illegible] मज्ज वे
शवार पयो दधि।मांसधावन
तोयाभं कृष्णं नीलारुणप्रभं॥
ऊर्णपं सकृदालोक्य नातिसार
मुपक्रमेत्।तस्या दाहारुचि श्वास
हिक्का पार्श्वास्थिशूलिनं।संमू
र्च्छारति संमोहयुक्तं पक्ववलीगु
दं।प्रलापयुक्तं च भिषक् वर्जये
दतिसारिणं॥संमूर्च्छा सकलेन्द्रि
य मनसा स्वस्वविषय ग्रहण
शक्तिहेतु रवस्थाविशेषः।संमोहः
विकृतमतित्वं॥असंहतगुदं
क्षीणं शूलध्मानै रुपद्रुतं।गु
दे पक्वे गतोष्माणमतीसारिण
मुत्सृजेत्॥असंहतगुदं गुदसं
वरणाक्षमं।गुदे पक्वे गतोष्मा
णं गुदपाकारम्भके पित्ते विद्य
माने ऽपिशीतमात्रे नष्टाग्निम्वा
श्वास शूल पिपासार्तं क्षीणं ज्व
रनिपीडितं।विशेषेण नरं वृद्ध
मतीसारो विनाशयेत्॥शोथं
शूलं ज्वरं तृष्णां श्वासं कास म
रोचकं।छर्दि मूर्च्छाञ्च हिक्का
ञ्च दृष्ट्वातिसारिणं त्यजेत्॥हस्त
पादाङ्गुलीसन्धि प्रपाको मूत्रनि

एव[illegible]क्षाणानातीवमर
[illegible]रिणां॥अतीसारी रा
जरोगी[illegible]ग्रहणीरोगवानपि।मां
साग्निवलहीनो यो दुर्लभं त
स्यजीवनं॥वालेवृद्धे त्वसाध्यो
ऽयं लिङ्गै रेतै रुपद्रुतः।अ
पि यूना मसाध्यः स्यादति
दुष्टेषु धातुषु॥एतै लिङ्गैः
पूर्वोक्तैः पक्वजाम्बुसंकाशान्वा
दिभिः॥ ॥अथातिसारयुक्त
स्य लक्षणं।यस्योच्चारं विना
मूत्रं सम्यग्वायुश्च गच्छति॥
दीप्ताग्ने र्लघु कोष्ठस्य स्थितस्त
स्योदरामयः॥उच्चारं पुरीषं वि
ना स्थितः निवृत्त उदरामयो
ऽत्रातीसारः॥ अथातीसारि
णा वर्जनीयान्याह।स्नानाव
गाहनाभ्यङ्ग गुरु स्निग्धादि
भोजनं॥व्यायाम मग्निसन्ताप म
तीसारी विवर्जयेत्॥स्नान मु
ष्णजलेन।अवगाहनं नद्या
दौ।इत्यतीसाराधिकारः।
इति भावप्रकाशः
अतीतं त्रि भूतकालः।तत्र
निष्ठा क्त क्तवतू विभक्तयो भ
वन्ति।यथा भवद्भूत भव्ये त्रिशः
क्यायाः।कर्ष्यो क्रय लिस्व

स्निग्धः क्रमाद्वर्त्तमानातीतभावि
ष्यत्सु कालेषु स्युः।इति मु
ग्धवोधव्याकरणं॥तस्य लक्ष
णादि यथा।वर्त्तनामध्वंस प्रति
योगित्व मतीतत्वं।लङ् लुङो
रतीतत्वं।लिट्कासो र्वक्तुः प
रोक्षत्वं अतीतत्वञ्च।लुङोऽती न
तत्वं क्रियातिक्रमश्च।कुतश्चि
द्धेतुगणात् क्रियानिष्पत्तिः क्रि
यातिक्रमः।क्तक्तवत्वोरतीत
त्वं।इति सारमञ्जरी॥अतुष्टिक
रं॥त्रि सन्तोषाजनकं।यथा
मनुः।अनिर्दशाच्च प्रेतान्नं
अतुष्टिकर मेव च।इत्यादि
कतत्वं॥ ॥अत् ट ङ
अतिक्रमे॥वधे।दन्त्यवर्गाद्यो
पधः।ङ अतिदिषते।इति
दुर्गादासः॥
अत्याचारं क्ली विरुद्धाचरणं।
आचारमतिक्रम्य इत्यव्ययीभा
व समासनिष्पन्नं॥
अत्याज्यं त्रि त्यागानर्हं।
यथा।यत्त पतितस्त्री गमनस्य
लघुत्वं प्रायश्चित्तविवेकवृद्धि
रुक्तं तदत्याज्यापरं।इति
प्रायश्चित्ततत्त्वं॥
अत्याहारीन त्रि वह्वाशी

अतिसर्ब्बीड-हब्बे त्वधातोः क
र्त्तरि णिन्प्रत्ययनिष्पन्नः॥
अत्युक्तिः स्त्री अतिशयोक्तिः॥
अलङ्कारविशेषः।यथा।अत्यु
क्ति रद्भुतातथ्य सौर्य्योदार्य्या
दि वर्णनं।त्वयि दातरि राजेन्द्र
याचकाः कल्पशाखिनः॥इति
चन्द्रालोकः॥
अथर्व्वन् स्त्री चतुर्थवेदः।अस्य
विवरणं वेदशब्दे द्रष्टव्यं॥अ
द ल – भक्षेल अत्ति। – अ
त्ता।गणाकृतमनित्य मितिन्या
यात् शपःश्लुतौ अदतीत्यपी
ति वररुचिः।इति दुर्गादासः॥
अद इ वन्धे।इ अद्यते।
इति दुर्गादासः॥ ॥
अदत्तं त्रि अन्यायेन दत्तं।
यथा।यत्पुनरन्यायेन दत्तं
८ तेदत्तं।षोडशप्रकार मपि
प्रत्याहर्त्तव्य मेव इत्यर्थोऽक्तं
भवति।नारदेन चादत्तं सप्त
विधं प्रोक्त मदत्तं षोडशा
त्मक मिति प्रतिपाद्य दत्तादत्त
योः स्वरूपं विवृतं।अदत्तञ्च
भय क्रोध शोक वेगरुजान्वि
तैः।तथोत्कोच परीहासव्य
त्यास च्छलयोगतः॥बाल

मूढास्वतन्त्रार्त्त मत्ते[illegible]
तं।कर्त्ता ममेदं कर्म्म[illegible]
मेच्छया च यत्॥अपात्रे पात्र
मित्युक्ते कार्य्ये वाधर्म्मसंहिते।
यद्दत्तं स्याद्विज्ञा नाददत्त
मिति तत् स्मृत मिति॥अय
मर्थः।भयेन वन्दिग्राहादिभ्यो
दत्तं।क्रोधेन पुत्रादि वैरनिर्यात
नायान्यस्मै दत्तं।पुत्रवियोगादि
निमित्त शोकाविष्टेन दत्तं।उत्
कोचेन कार्य्यप्रतिवन्ध निरासा
र्थं मध्यिकतेभ्यो दत्तं।परिहासे
नोपहासेन दत्तं।एकः स्वद्रव्य
मन्यस्मै ददात्यन्योपि तस्मै
ददातीति दानव्यत्यासः।छ
लयोगतः शतदान मभिस
न्धाय सहस्रमिति परिभाष्य
ददाति।वालेनाप्राप्तषोडशव
र्षेण।मूढेन लोके वेदानभि
ज्ञेन।अस्वतन्त्रेण पुत्र दासादि
ना।आर्त्तेन रोगाभिभूतेन
मत्तेन मदनीयप्रमत्तेन।उन्म
त्तेन वातिकाद्युन्मादग्रस्तेन। न
अपवर्जितं दत्तं।तथायं मदी
य मिदं कर्म्मकरिष्यतीति
प्रतिलाभेच्छया दत्तं।अ
चतुर्वेदाय चतुर्वेदोहं मि

एव[illegible]यज्ञं करिष्यामी
[illegible]दो सूनादौ विनि
युज्ज्ञा[illegible] दत्त मित्येवं षोड
शप्रकार मपि दत्त मदत्त मित्यु
च्यते।प्रत्याहरणीयत्वात्।
आर्त्तेदत्तस्यादत्तत्वं धर्म्मकार्य्य
व्यतिरिक्त विषयं।स्वस्थेनार्त्तेन
वादत्तं श्राविते धर्म्मकारणा
त्।अदत्वा तु मृतेदाप्यस्तत्सु
तो नात्र संशयः॥इति कात्या
यन स्मरणात्।यः पुनः षोड
शप्रका मप्यदत्तं गृह्णाति।य
श्चादेयं प्रयच्छति।तयो र्दण्डो
नारदेनोक्तः।गृह्णात्यदत्तं यो
लोभात् यश्चादेयं प्रयच्छति।
अदेयदायकोदण्ड्य स्तथादत्त
प्रतीच्छकः॥इति इतिमिता
क्षरा॥ ॥
अदृट ऋ अतिक्रमे॥वधे।
दन्त्यवर्गत्ततीयोपधः। ऋ
अदिटिषते।इति दुर्गादासः॥
अद्ड अभियोगे।दन्त्यवर्ग
त्ततीयोपधः।अदिडिषति।
क्विपि संयोगान्तलोपे अद्।
अभियोगः समाधानं।अद्धुति
पत्तं विद्वान्।अभि समस्तात्
योगो अभियोगः।इति गो

विन्दभट्टः।इतिदुर्गादासः॥अ
द्भुतं त्रि आश्चर्य्यं।तत्पर्य्यायः
।इङ्क २।इति जटाधरः॥ ॥
अथाद्भुतं।अद्भुतसागरे आथर्व्व
णाद्भुतवचनं।प्रकृतिविरुद्ध म
द्भुतमापदः प्राक् प्रबोधाय
देवाः सृजन्तीति।तेन आपज्
ज्ञानाय भूम्यादीनां स्वं स
भावप्रच्यवो देवकर्तृको ऽद्भु
त इति।एवञ्च तुथोदयपर्व्व
ग्रहणादीनां गणिभागतत्वेन
प्रकृतानामपि यदुत् पातत्वं
तदुक्तं।तत् कारणञ्च गर्ग
संहिता वार्हस्पत्ययोः।अतिलो
भादशान्त्याद्वा नास्तिक्याद्वाप्य
धर्म्मतः।नरापचारान्नियतमुप
सर्गः प्रवर्त्तते॥ततो ऽपचारा
न्नियत मपवर्जन्ति देवताः।ताः
सृजन्त्यद्भुतांस्तांस्तु दिव्यनाभ
सभूमिजान्॥त एवत्रिविधालो
के उत्पाता देवनिर्म्मिताः।वि
चरन्ति विनाशाय रूपैः सम्बो
धयन्ति च॥तांश्च पर्र नदर्शये
दित्याह विष्णुः।नोत्पातं दर्श
येदिति॥ ॥तत्र वेलानक्ष
त्र मण्डल निरूपणं।यथा दी
पिकायां।प्राक् द्वि त्रि चतु

भौमेषु युतिशो रङ्गुतेषु सर्वेषु
।अनिलाग्नि शक्र वरुणा मण्ड
लपनयः सुभाशुभेषु ॥
वेलामण्डलं॥ ॥अर्य्यम्नादि
चतुष्क चन्द्र त्वरगादित्येषु वायु
र्भवेत् देवेज्याजविशाख याम्य
युगले पित्रद्वये चानलः।वि
ष्णादित्रय यात् मैत्र युगलेषि
न्द्रो भवेन्मंडलः सर्पोपान्त्य मृ
गान्त्य मूलयुगलेशानेषपा मी
ष्वरः॥पवन दहनौ नेष्टौ योग
स्तयो रतिदुष्करः।स्वरप वरु
णौ शस्तौ योग स्तयो रतिशो
भनः॥सवरुण मरुन्मिश्रः शक्र
स्तयाग्निसमायुतः।फलविरहितः
सेन्द्रो वायु स्तयाग्नियुतो ऽम्बुपः॥
यन्मण्डले ऽद्भुतं जातं शान्ति स्त
द्देवताश्रयो।तथा शान्तिद्वयं का
र्य्यं मण्डलद्वयजाद्भुते॥ ॥वि
स्वयम्भोन्तरे ग्रहर्त्तवैकृतं दिव्य
मान्तरीक्षं निबोधमे। उल्का
पातो दिग्दाहः परिवेषास्त
थैव च॥गन्धर्वनगरञ्चैव वृ
ष्टिश्च विकृता तथा।एव मादीनि
लोके ऽस्मिन् नाभसानि विनि
र्दिशेत्॥चर स्थिरभवं भौमं
भूरस्य मपि भूमिजं।जलाशया

नां वैकृत्यं भौमं तद [illegible]
भौमम्न्वाल्पफलं ज्ञे [illegible]
परिपच्यते नाभसं मध्यफलदं
मध्यकालफलप्रदं॥दिव्यंतीव्रफ
लं ज्ञेयं शीघ्रकारि तथैवच॥
शीतोष्णाना विपर्य्यास ऋतूनां
रिपुजं भयं॥पुष्पे फले च विकृ
ते राज्ञो मृत्युं तथादिशेत् अका
लप्रभवानार्य्यः कालातीताः प्रजा
स्तथा॥विकृताः प्रसवा श्चैव यु
ग्मप्रसवनं तथा।हीनाङ्गा अधि
काङ्गाश्च जायन्ते यदि वा त्रयः॥
पशवः पक्षिणश्चैव तथैव च सरी
सृपाः।विनाशं तस्य देहस्य कुल
स्यच विनिर्द्दिशेत्॥ ॥
प्रदोषककुदारावो हेमन्तेचापि
कोकिलाः।अर्कोदये ऽर्कोभिमु
खेम्षावारो नृभयं दिशेत्॥उलू
कोवसते यत्र निपतेद्वा तथा
गृहे।ज्ञेयो गृहपते र्मृत्यु र्धन
नाश स्तथैव च॥गृध्रः कङ्कः
कपोतश्च उलूकः श्येनएव च
।चिल्लश्च चर्म्मचिल्लश्च भासः
पाण्डर एव च ॥
गृहे यस्य पतन्त्येते गेहं
तस्य विपद्यते।पक्षान्मासान्त
थावर्षान्मृत्युः स्याद्गृहमेधि

एव [illegible] पुत्रस्य वा मृत्यु र्द्
[illegible] विनश्यति।ब्राह्मणाय
गृहं दत्वा दत्वा तन्मूल्य मेव वा
॥गृहत्तीयायदि रोचेत शान्ति
ञ्चेमां प्रयोजयेत्।मांसास्थी
नि समादाय श्मशानाद्गृध्र वा
यसाः॥श्वा शृगालो ऽथ वा
मध्ये पुरस्य प्रविशन्ति चेत्।
विकिरन्तिगृहादौच श्मशानं सा
मही भवेत्॥चौरेण हन्यते
लोकः परचक्रसमागमः।सं
ग्रामश्च महाचोरो दुर्भिक्षं म
रकं तथा॥अद्भुतानि प्रसूयन्ते
तत्र देशस्य विद्रवः।अकाले
फल पुष्पाणि देशविद्रवकार
णं॥मत्स्यपुराणे।अतिवृष्टि र
नावृष्टि दुर्भिक्षादिभयं मतं।
अनृतौ तु दिनाहर्ष्टि वृष्टि र्ज्ञेया
भयाय च॥निरभ्रे वाथ रात्रौ
वा श्वेतं याम्योत्तरेण तु।इन्द्रा
युधं ततो दृष्ट्वा उल्कापातं त
थैव च॥दिग्दाह परिवेषौ च
गन्धर्वनगरं तथा।परचक्रभयं
विद्यात् देशोपद्रव मेव च॥ग्रा
मोवनकुक्कुटः॥कंसनिधनस्
चेन हरिवंशः।वक्रमङ्गारक स्य
के चित्रायां चोरदर्शनं।चल

न्यपर्वणि मही गिरीणां शिखरा
णि च॥वाणोत् पाते सण्व।दीप्त
णां दिशा मास्थाय धूमकेतुः स्थि
तो भवेत्।वक्र मङ्गारक श्चकेतु
त्रिकासुभयङ्करः॥ ॥कन्यचि
न्तामणौ।न्यक्कोशोच विवेक त
तवसुधा लोकाः क्षुधापीडिता
विप्रा वेदहता स्तथा प्रचलिताव
न्नाशिनो दुःखिताः।क्षोणी मन्द
फला नृपाश्च विकलाः संग्राम
चोरा मही प्रेताचात दुरन्त पीडि
तजरा देवेज्य राज्ञो युतौ॥रक्ते
शस्त्राद्रोगो मांसास्थिवसादिभि
र्मरकः।धान्य हिरण्यत्वत् फल
कुसुमाद्ये वर्षिते भयं विद्यात्॥
अङ्गार पांसुवर्षे विनाश नृप
याति तन्नगरं उपलैर्विना जल
धरे विकृता वा यदा प्राणिनो
दृष्टा॥छिद्रं वाप्यतिवृष्टिं श
स्याना मीति सं जननं॥ ॥
बुधकौशिकसम्वादे। पक्ष्याः
प्रपाते च फलं शरदस्य प्ररोह
णे।ग्रीष्मे राजश्रियो ऽवाप्ति भी
ले चैश्वर्य्य मेव च।कर्णयो
र्भूषणावाप्ति र्नेत्रयो र्बन्धु
दर्शनं॥नासिकायाञ्च सौगन्ध्यं
वक्त्रे मिष्टान्नभोजनं।कण्ठे

चैव श्रियो ऽवाप्तिर्भुजयोर्वि
भवो भवेत्॥धनलाभो बाहुमूले
करयोर्धनहृद्दयः।स्तन मूले
च सौभाग्यं हृदि सौख्यविवर्द्धनं
॥पृष्ठे नित्यं मतीलाभः पार्श्वयोः
र्बन्धुदर्शनं।कटिद्वये वस्त्रला
भो गुह्ये मृत्युसमागमः।जङ्घे
चार्थक्षयो नित्यं गुदे रोगभयं
भवेत् ऊर्वोस्तु वाहनावाप्ति
र्जानु जङ्घे ऽर्थसंक्षयः॥वा
मदक्षिणयोः पादौ भ्रमणं
नियतं भवेत्।पल्ल्याः प्ररोहणे
चैव पतने शरटस्य च॥व्य
त्याशाश्च फलञ्चैव तद्वदेवं
प्रजायते।पल्ल्याः प्ररोहणं
रात्रौ शरटस्य प्रपातनं॥नि
धनार्थाय भवति व्याधि पीडा वि
पर्य्यये।पतनानन्तरञ्चैवारो
हणं यदि जायते॥पतने फल
मुत्कृष्टं रोहणे ऽन्यत्फलं भ
वेत्।आरोहणञ्चोर्द्ध्ववक्त्रे अ
धोवक्त्रे च पातनं॥भवेदिष्ट
फलं तस्य तत्फलं जायते ध्रुवं
।स्पृष्टमात्रेण यः सद्यः सचेलं
जल माविशेत्॥पञ्चगव्यप्राश
नञ्च कुर्य्यादर्कावलोकनं।पल्ली
रूपं सुवर्णस्य रक्तवस्त्रेण वेष्टये

त्॥पूजयेद्गन्धपुष्पाद्यै
र्हर्णाञ्जिम्मके।पञ्चगव्य
रत्नं पञ्चामृतं सपल्लवं॥पञ्चव
त्वकषायञ्च निःक्षिप्य वाहयेत्त
तः।पूजयेद्गन्धपुष्पाद्यैर्लोकपा
लांस्तथा ग्रहान्॥मृत्युञ्जयेन
मन्त्रेण समिद्भिः खादिरैः शुभैः।
तिलैर्व्रीहिभिर्होम मष्टोत्तर
सहस्रकं॥पल्ली गृहगोधिका।
मृत्युञ्जयमन्त्र त्र्यम्बकमन्त्रः।
इति विद्याकरः॥ ॥गर्गसंहिता
वार्हस्पत्ययोः।ये तेषु शान्तिं कु
र्वन्ति न ते यान्ति पराभवं।ये
तु न प्रतिकुर्वन्ति क्रियया श्रद्ध
यान्विताः॥दाम्भिक्याद्वा विमो
हाद्वा विनश्यन्त्येव ते ऽचिरात्
॥ अत्र निमित्तनिश्चयवतो अधि
कारः।अन्यथा दोषः।इत्याह
मत्स्यपुराणं।भिन्नमण्डल वेला
यां ये भवन्त्यद्भुताः क्वचित्तत
त्र शान्तिद्वयं कार्य्यं निमित्ते
सति नान्यथा॥निर्निमित्तकृता
शान्ति निमित्त मुपपादयेत्।
एतच्च तत्तद्विशेषविहित शान्ति
विषयं।अन्यथा वेलामण्डल स
न्देहे शान्ति न स्यात् साधारण
शान्तिश्च निर्विषया स्यात्।अत

एव [illegible] याज्ञवल्क्येन।यत्र
[illegible] कीर्णमात्मानं मन्यते
द्विजः।तत्र तत्र तिलै होमो गा
यत्र्या समुदाहृतः॥गायत्र्याश्र
च्य यतः शुद्धः सर्व्वपापैः प्रमुते।
शान्तिकामश्च जुहुयात् गाय
त्रीं मत्तनैः शुचिः॥हन्तुकाम
श्च नृपते र्हुतेन जुहुयात् शुचिः
।सावित्र्या शान्तिहोमांश्च कुर्य्या
त् पर्वसु नित्यशः॥प्रणवव्या
हृतिभ्याञ्च स्वाहान्ता होमक
र्मणि।प्रतिलोमा प्रयोक्तव्या फ
टकारान्ताभिचारके॥ ॥वि
श्वामित्रेणापि निमित्तसन्देहेऽ
कृच्छ्रादीन्युक्तानि।यथा।कृच्छ्र
चान्द्रायणादीनि सुखाभ्युदय
कारणं।प्रकाशे च रहस्ये च संश
येत् तक्रके ऽक्रुटे॥ ॥मार्कण्डे
यपुराणे।दिग्देश जन सामान्यं
नृपसामान्य मात्मनि।नक्षत्र
ग्रह सामान्यं नरो भुङ्क्ते शुभा
शुभं॥परस्पराभिवादश्च ग्रह
दोषेषु जायते।तथा।तस्मात्क्षा
न्तिपरः प्राज्ञो लोकवादरत
स्तथा॥लोकवादांश्च शान्ती
श्च ग्रहपीडासु कारयेत्।भूदे
हानुपवासांश्च शस्तं चैत्या

भिवन्दनं॥कुर्य्यात् होमं तथा
दानं श्राद्धं क्रोधविवर्जनं।अद्रोहं
सर्वभूतेषु मैत्रीं कुर्य्याच्च पण्डि
तः॥वर्जयेदुष्टतीं वाच मतिवा
दं स्तथैव च।ग्रहपूजाञ्च कु
र्वीत सर्वपीडासु मानवः।एवं
शाम्यन्त्यशेषाणि घोराणि द्वि
जसत्तम प्रयतानां मनुष्याणां ग्र
हदोषाण्यनेकशः॥ ॥लोक
वादाश्च तत्रैवोक्ताः।यथा।आ
काशाद्देवतानाञ्च देव्यादीनाञ्च
सौहृदात्।पृथिव्यां प्रतिलोका
च लोकवादा इति स्मृताः॥तेच
सर्वभूत डाकिन्याद्यभिभवशा
न्त्यर्थं लौकिकौषध मन्त्रादयः
विषहरी मङ्गलचण्डिका गीता
दयः चैत्यहस्तादौ क्षेत्रपाल दे
वता पूजा च।तथा चापस्तम्भः।
स्त्रीभ्यो ऽवरवर्णेभ्यो धर्मशेषा
न् प्रतीयादित्येक इति॥धर्मशे
षान् कृतिस्मृति सदाचारेष्वप्र
सिद्धानिति नारायणोपाध्यायाः
।भूदेहस्य पातं विनाभूमौ गोस्त
नं निष्पीडा दुग्धोत्सर्गः।चैत्यः
पूज्यत्वेन ख्यातो ग्रामस्य वृक्षः।
तथा च वर्णित पाते हरिवंशः।
अनेकशास्त्र [illegible]

न्यश्च निपपात महीतले। अर्चि
तः सर्व्वकन्याभि र्दानवानां म
हात्मनो॥ उषती मकल्याणी।
अतिवादश्च इज्य मतिक्रम्य भाष
णे॥ ॥मत्स्यपुराणात्॥ काकस्ये
करवश्चावः प्रभाते दुःखदाय
कः। काकोमैथुनकाशक्तः श्वे
तो वा यदि दृश्यते उलूकोव
सते यत्र निपतेद्वा तथा गृहे।
ज्ञेयो गृहपते र्मृत्यु र्धननाश
स्तथैव च॥ ॥वराहसंहितायां।
क्रीडातुरक्तो रति मांसलुब्धो
भीतो रुजार्त्तः पतितो विहङ्गः
। नाशो गृहस्थस्य विनाशहे
तुर्दोषः समुत्पद्यत आहरण्यीः
॥ ॥अद्भुतशान्ति माहात्म्ये
। गृहे पतित विकारेषु कर्य्योचा
मरतर्पणं। देवाः कपोता इ
तिवा जप्तव्यं सप्तति द्विजैः॥
गावश्च देया विविधा द्विजा
नां सकाञ्चना वस्त्रयुगोत्तरी
याः। एवं कृते पाप मुपैति
शान्तिं मृगे द्विजै र्वा विनिवेदि
तं यत्॥ द्विजैः पत्तिभिःश्व
पिता अन्यैरपि॥ भुजवल्लभी
मे। एको हय स्त्रयो गावः स
प्ताष्टा नव दन्तिनः। सिंह

प्रसूतिका गावः क[illegible]मि
वातकाः॥ मत्स्यपुरा[illegible]
दक्षिणभागे तु शस्तं विष्फुर।
णं भवेत्। अप्रशस्तं तथा वा
मे पृष्ठस्य हृदयस्य च॥ लाञ्छ
नं पिटकं चैव ज्ञेयं विष्फुरितं
तथा। विपर्य्ययेण विहितं सर्व्व
स्त्रीणां फलं तथा॥ अनिष्टचि
ह्नोपगमे द्विजानां कार्य्ये सुव।
र्णेन च तर्पणं स्यात्। शाङ्खः। दुः
स्वप्नानिष्टदर्शनादौ घृतं हिर
ण्यञ्च दद्यादिति। मात्स्ये। नमस्ते
सर्व्वलोकेश नमस्ते भृगुनन्दन
। कवे सर्व्वार्थसिद्ध्यर्थं गृहाण
र्घ्यं नमोऽस्तु ते॥ एवं शुक्रोदये
कुर्व्वन् यात्रादिषु च भारत। सर्व्वा
न् कामानवाप्नोति विष्णुलोके म
हीयते॥ नमस्ते अङ्गिरसां नाथ
वाक्पतेय बृहस्पते। क्रूरग्रहैः
पीडितानां अमृताय नमोनमः
॥ संक्रान्तावपि कौन्तेय यात्रा
स्वभ्युदयेषु च। कुर्व्वन् बृहस्प
तेः पूजां सर्व्वान् कामान् सम
श्नुते॥ ॥विष्णुधर्म्मे व्यासः।
ग्रहयज्ञैः शान्तिकैश्च किं क्षिप
न्ति नरा द्विजाः। महाशान्तिकरः
श्रीमां स्तत्स्या पूजितो हरिः॥

[illegible]तान् दारुणान्
[illegible]भिन्नानेकशः। तल
स्याः पूजितो भक्त्या महाशान्तिक
रो हरिः॥ अत्र ब्रह्मपुराणीयो म
न्त्रः। नमस्ते वहुरूपाय विष्णवे प
रमात्मने स्वाहा इति॥ ॥
छन्दोगपरिशिष्टं। अथातो र
जस्वलाभि गमने यमजजनने
विजातीयजनने वा काक कङ्क
गृध्रवक श्येन भास चिल्ल कपो
तानां गृहप्रवेशे मानुषस्योपरि
विश्रामणे एषा मेव क्रियमाणे
गृहद्वारारोहणे वाद्भुतेषु वास्त
दृष्टेन विधिनाग्नि मुपसमाधा
य प्रायश्चित्ताज्याहुती र्जुहोति
अद्भुताय अग्नये स्वाहा सोमाय
विष्णवे रुद्राय वायवे सूर्य्याय
मृत्यवे विश्वेभ्यो देवेभ्यः स्वा
हेति स्थालीपाकहुतान्यदिति
॥ ॥कपोतं विशेषयति शो
नकः। रक्तपादः कपोताख्यो
अरण्योकः शुकच्छविः। सचे
च्छालां विशेद्वालक्ष्मी
पञ्च व्रजेद्यदि॥ अन्ये
षु गृहमध्ये वा वल्मीक
स्याद्भुमादिषु। कस्त्वदृष्टेन
विधिना गृह्योक्तेन। प्राय

श्चित्ताज्याहुतीः अद्भुतदोष प्र
शमनार्थाः सप्ताज्याहुतीः। अद्भु
ताय अग्नये स्वाहा इत्यादिमन्त्रैः
॥ तत्र स्थालीपाके तिकर्त्तव्यता
यां पायसचरुभि रेतेभ्यो देवे। भ्यो
जुहुयात्। छन्दोगपरिशिष्टं। प
श्चात् घृतपायसेन ब्राह्मणान्
भोजयित्वा गोवरं दत्वा शान्ति र्भ
वतीति। गोवरं गोश्रेष्ठं दक्षिणां
तां गां कृत्वा दोषशान्ति र्भवती
ति। तथा चोक्तं। गो विशिष्टतमा
लोके वेदेष्वपि निगद्यते। न ततो
न्यद्वरं यस्मात्तस्माद्गौ र्वर मुच्य
ते॥ ॥छन्दोगपरिशिष्टं। यस्त्वे
षा मन्यतम मापन्नः प्रायश्चि
त्तं न कुर्य्यात् तस्य गृहपते र्मर
णं सर्व्वस्वनाशो वा भवति तस्मात्
प्रायश्चित्तं कर्त्तव्यं कर्म्मापवर्गे
वामदेव्यगानं शान्तिः शान्ति रि
ति। अपवर्गे समाप्तौ। वामदेव्यगा
नं शान्तिः कर्त्तव्या आर्हतिः
प्रकरणसमाप्त्यर्थो। वार्हस्पत्ये।
शमयन्त्यास्त्राहान् कम्पा
दिकृतं निमित्तमाश्वेव। अ
भिवर्षणोपवास व्रतदीक्षा
जप्य हरणानि॥ ॥ ॥
वराहः। खे च न

दोषं जनयन्त्युत्पातास्तान्त
स्वभावकृतान्।ऋषिपुत्रकृतैः
श्लोकै विद्याद्देभिः समासो
क्तैः॥तथाच मत्स्यपुराणे।
वज्राशनि महीकम्प सन्ध्या नि
र्घात निस्वनाः।परिवेश रजो धू
म रक्ताकोस्तमयोदयाः॥द्रुमे
भ्यो ऽन्न रस स्नेह मधु पुष्प
फलोद्गमाः।गो पक्षि मदवृद्धि
श्च शिवाय मधुमाधवे॥तारो
ल्कापात कलुषं कपिलार्केन्दु
मण्डलं।अनग्निज्वलनं स्फोटं धू
मरेणुनिराकुलं॥रक्तपद्मारु
णा सन्ध्या नभः क्षुब्धार्णवोपमं
न्वा ।सरितोम्बु संशोषं दृष्ट्वा ग्री
ष्मे शुभं वदेत्॥ ॥शक्रायुध
परिवेशौ विद्युच्छुष्कविरोहणं
।कम्पोद्वर्त्तन वैकृत्यं रसनं द
रणं क्षितेः॥नद्युदपान सर
सां वृद्धिर्ध्वी भवनस्रवाः।पत
न न्वादि गेहानां वर्षासु नम
यावहं॥हरिरंशो वर्षावर्णना
यां।क्वचित् कन्दरहासाढ्यं
शिलीन्ध्राभरणं क्वचित्।इति द
र्शनात् वर्षासु शिलीन्ध्रोद्गमो न
भयावहः॥ ॥दिव्यस्त्री भूत ग
न्धर्व विमानाद्भुतदर्शनं।ग्रह न

क्षत्र ताराणां दर्शन[illegible]वास्व
रे।गीत वादित्र निर्घो[illegible]
र्वत सानुषु।शस्य वृद्धि रसोत्प
त्ति रपापाः शरदि स्मृताः॥ ॥
शीतानिल तुषारत्वं नर्द्दनं मृग
पक्षिणां।रक्षो यक्षादि सत्वानां
दर्शनं वागमानुषी॥दिशो धूमा
न्धकाराश्च शलभा वन पक्षिणः
।उच्चैः सूर्य्योदयास्तत्वं हेमन्ते
शोभना मताः॥ ॥हिमपाता
निलोत्पात विरूपाद्भुतदर्शनं।
दृष्टाञ्जननाभ माकाशं तारोल्का
पातपिञ्जरं॥चित्रा गर्भोद्भवाः
स्त्रीषु गोऽजाश्व मृग पक्षिणां।
पत्राङ्कुर लतानाञ्च विकाराः
शिशिरे शुभाः॥ऋतु स्वभाव
जास्तेते दृष्टाः स्वर्त्तौ शुभावहाः
।ऋतावन्यत्र चोत्पाता दृष्टा स्ते
भृशदारुणाः॥ ॥उन्मत्तानाञ्च
यागाद्याः शिशूनां व्याहृतञ्च
यत्।स्त्रियो यच्च प्रभाषन्ते त
त्रनास्ति व्यतिक्रमः॥पूर्व्वं चर
ति देवेषु पश्चाद्गच्छन्ति मानुषा
न्।नादेशिता वाग्वहति सत्या
ह्येषा सरस्वती॥ ॥वृहस्पतिः।
ज्योतिर्ज्ञानं तथोत्पात मविदि
त्वा तु ये नृणां।श्रावयन्त्यर्थ

लो[illegible]नेषा स्तेपि यत्नतः
।वि[illegible]दण्डनीयाः।इति
ज्योतिस्तत्त्वं॥ अद्वारं
स्त्री द्वारव्यतिरिक्तप्रदेशः।
यथा।अद्वारेण च नातीया
द्ग्रामं वा वेश्म वावृतं।रात्रौ
च वृक्षमूलानि दूरतः परिव
र्जयेत्॥इति मानवे ४ अध्या
ये ७३ श्लोकः॥प्राचीराद्या
वृतं ग्रामं गृहञ्च द्वारव्यति
रिक्त प्रदेशेन प्राकारादिल
ङ्घनं कृत्वा नविशेत्।रात्रौच
वृक्षमूलावस्थानं दूरत स्त्य
जेत्।इति नदीकायां कुल्लू
कभट्टः॥द्वाररहिते त्रि॥अ
द्वैतः पुं द्वैतरहितः॥विष्णुः।
यथा॥विष्णु मानन्द मद्वैतं वि
ज्ञानं सर्व्वगं प्रभुं।प्रणमामि
सदा भक्त्या चेतसा हृदयाल
यं॥इति गारुडे २३८ अध्यायः॥
शिवावतारविशेषः।यथा।
नित्यानन्दो भक्तरूपो व्रजेयः
श्रीहलायुधः।भक्तावतार आ
चार्य्यो ऽद्वैतो यः श्रीसदाशिवः
॥तत् पित्रादि विवरणं यथा
।महादेवस्य मित्रो यः कुवेरो
गुह्यकेश्वरः।कुवेरपंडितः सो

ऽद्यजनको ऽस्य विदाम्वरः॥
पुरा कुवेरः कैलासे सिध्य सा
ध्य निषेविते।जजाप परमं मन्त्रं
शैवं श्रीशिववल्लभः॥ततो द
यालु र्भगवान् वरं वृणिवितिसो
ऽब्रवीत्।ततः कुवेरो वरं यामा
स त्वं मेसुतो भव॥प्रार्थित स्ते
न देवेशो वरदेशः सदाशिवः।
जन्मजन्मान्तरे पुत्र प्राप्स्यामि
पुत्रतां तव॥इति प्राप्य वरं क
ष्टं कियत्कालमास्थितः॥का
र्य्यादीशवशात् सोऽद्याद्वैतस्य
जनको ऽभवत्॥योगमाया भ
गवती गृहिणी तस्य साम्प्रतं।सी
तारूपेणावतीर्णा श्रीनाम्नी त
त् प्रकाशतः॥तस्य पुत्रो ऽच्यु
तानन्दः कृष्णचैतन्यवल्लभः।
श्रीमत् पण्डित गोस्वामि शि
ष्यप्रिय इति स्मृतं॥यः कार्त्तिके
यः प्रागासीदिति जल्पन्ति के
चन।इति गौरगणोद्देशदीपिका॥
॥ ॥ ॥
अद्वैतवादीन त्रि एकब्रह्मवादी
।तस्य मतं यथा।ब्रह्मैव सत्यं
प्रत्यक्षादिसिद्धं विश्वं ब्रह्मणि
आरोपितं।यथा रज्जुः रज्जुस्व
रूपाज्ञानात् सर्पवत् प्र

तिभाति।तथा ब्रह्मस्वरूपाज्ञा
नात् विश्वं वस्तुवत् प्रतिभा
ति।प्रकृति जीव श्चापि पर्य्य
वसाने ब्रह्मैव ब्रह्मान्यत् स
द्वस्तु नास्ति।अत्र प्रमाणं शा
रीरिकसूत्रस्य शंकराचार्य्य
कृत भाष्य तट्टीका कल्पत
रु भाषरत्नप्रभादि॥
अधमर्णिकः त्रि अधमर्णः
यथा।गृहीतानुक्रमात्प्राप्यो
धनिना मधमर्णिकः।दत्वा त
ब्राह्मणायैव नृपते स्तदनन्तरं॥
इति मिताक्षरा॥अधरः पुं अ
धरोष्ठः।पुरुषस्य रक्ताधरः
प्रशस्तः।यथा।पाणि पादत
लौ रक्तौ नेत्रान्तरनखानि च
तालुकोऽधरं जिह्वा चाम्बर
क्तं प्रशस्यते॥स्त्रियास्तु य
था।पाटलावर्त्तुलः स्निग्धो
रेखाभूषितमध्यभूः।सीमन्ति
नीना मधरो राज्ञां चैव प्रियो भवे
त॥श्यामः स्थूलोऽधरोष्ठः
स्यात् वैधव्य कलहप्रभः।म
हृणो मसृणो मत्रकाषिन्या
श्चोत्तरोष्ठः स्वभोगदः॥इति
सामुद्रकं॥ अधरामृतं
क्ली अधरस्तथा

यथा।सिम्बाङ्क ने... यथा
मृतरक्षेकेण हासा...क
कल्मीतत्र कृच्छयामि।तो वे
दयंविरहजाम्बुपयुक्तदेहा
ध्यानेन यामपदयोः पदवी
सखेते॥इतिश्रीभागवते १०
स्कंदे २९ अध्यायः॥ ॥अधा
र्म्मिकः त्रि अधर्म्मी।यथा।
यस्तु पञ्चमहायज्ञविहीनः
सनिराकृतः।अधार्म्मिकः
स्यादृषलोऽवकीर्णी स्तनत्र
ती॥इति जटाधरः॥अनो
नाधार्म्मिके वसेद्ग्रामे।इति
उल्लूकभट्टस्य॥अधिकरणं
क्ली अधिक्रमते अत्र।विष
यादि पञ्चावयव विवेचनो
पेत ग्रन्थः।यथा।विषयो
विषय श्चैव पूर्वपक्ष स्तथोत्त
रं।निर्णय श्चेति पञ्चाङ्गं शा
स्त्रे ऽधिकरणं स्मृतं॥विष
यो विचारार्हवाक्यं।विशयो
ऽस्याय मर्थो न वेति संशयः
।पूर्वपक्षः प्रकृतार्थविरोधि
तर्कोपन्यासः।उत्तरं सिद्धान्ता
नुकूलतर्कोपन्यासः।निर्ण
यो महावाक्यार्थतात्पर्य्य
निश्चयः।एवं क्रमेण विवेचन

मत्रा...यते इत्यधिकरणं।
इ...त नि...दितन्त्रं॥
अधिकारी त्रि अधिकारवि
शिष्टः।यथा।इष्टमन्त्रे द्विजा
तीनां धर्म्मः सामान्य उच्यते
।अधिकारी भवेत् शूद्रः शैवे
धर्म्मे न वैदिके॥इति मत्समा
सतन्त्रं॥अपिच।स्नातो ऽधि
कारी भवति दैवे पैत्रे च क
र्म्मणि।इत्याह्निकाचार तन्त्रं॥
वेदान्तमते विधिवदधीत वेद
वेदाङ्गत्वेन आपाततो ऽधिगता
खिल वेदार्थो ऽस्मिन् जन्मनि
जन्मान्तरे वा काम्य निषिद्ध व
र्जन पुरःसरं नित्यनैमित्तिक प्रा
यश्चित्तोपासनानुष्ठानेन निर्ग
त निखिल कल्मषतया नितान्त
निर्म्मल स्वान्तः साधन च
तुष्टय सम्पन्नः प्रमाता।इति वे
दान्तसारः॥ ॥धनाधिकारिणो
दायभागशब्दे द्रष्टव्याः॥ ॥
श्रीमूर्त्त्यादीनां वेषाकन्ता।इति
लोकप्रसिद्धं॥
अधिमांसकः पुं दन्तरोगवि
शेषः।यथा।दन्तरुक् पश्चिमे
दन्ते महान् शोथो महान् रु
जः।लालास्रावी कफकृतोवि

ज्ञेयः सो ऽधिमांसकः॥इति
भावप्रकाशः॥अस्यचिकित्सा
दन्तरोगशब्दे द्रष्टव्या॥
अधिवासः पुं द्रव्यविशेषेण
संस्कारः।तत्र यजुर्वेदोक्त मन्त्रा
स्तयोविंशति द्रव्याणि च यथा
।तैल हरिद्रां गृहीत्वा ॐकोसि
कतमोसि कस्मै त्वा कायत्वा
सुश्लोकः सुमङ्गलः सत्यराजन्
।अनया तैलहरिद्रया अस्य शु
भाधिवासन मस्तु।एवं सर्वत्र।
१।गन्धं गृहीत्वा ॐगंधद्वारां दु
राधर्षां नित्यपुष्टां करीषिणीं
।ईश्वरीं सर्वभूतानां त्वामिहोप
ह्वये श्रियं॥२॥महीं गृहीत्वा
ॐभूरसि भूमि रस्यदिति रसि
विश्वधाया विश्वस्य भुवनस्य
धर्त्री पृथिवीं यच्छ पृथिवीं
दृंह पृथिवीं माहिंसीः।
३।पुनर्गन्धेन गन्धद्वारा मिति
।शिलां गृहीत्वा ॐपर्वतस्य
वृषभस्य पृष्ठान्नाव श्चरन्ति
स्वसिच इयानाः ता आववृत्रन
धरा गुदक्ता अहिं बुध्य मनु
रीयमाणाः।विष्णो विक्रमण म
सि विष्णो विक्रान्तमसि विष्णोः
क्रान्त मसि।४।धान्यं गृहीत्वा

ॐधान्य मसि धिनुहि देवान्
धिनुहि यज्ञं धिनुहि यज्ञपतिं
धिनुहि मां यज्ञन्यं।६।दूर्वां
गृहीत्वा ॐकाण्डात् काण्डा
त् प्ररोहन्ती परुषः परुषः
परिएवानो दूर्वे प्रतनु सहस्रे
ण शतेनच।६।पुष्पं गृहीत्वा
ॐश्रीश्च ते लक्ष्मीश्च पत्न्या
अहोरात्रे पार्श्वे नक्षत्राणि रू
प मश्विनौ व्यात्तं इष्णन्निषाण
ना मुम्मइषाण सर्वलोकम्मइ
षाण।७।फलं गृहीत्वा ॐयाः
फलिनीर्या अफला अपुष्पा
याश्च पुष्पिणीः बृहस्पतिप्रसू
ता स्तानोमुञ्चन्त्वंहसः।५।
दधिगृहीत्वा ॐदधिक्राव्णो
ऽकारिषं जिष्णोरश्वस्य वाजिनः
सुरभिनो मुखाकरोत् प्रणआ
यूंषितारिषत्।६।घृतं गृहीत्वा
ॐतेजोसि शुक्रमस्यमृतमसि
धामनामासि प्रियं देवाना म
नाधृष्टं देवयजनमसि।१०।स्व
स्तिकं गृहीत्वा ॐस्वस्तिन इ
न्द्रो वृद्धश्रवाः स्वस्तिनः पूषा
विश्ववेदाः स्वस्तिनस्तार्क्ष्यो रिष्टने
मिः स्वस्तिनो बृहस्पतिर्दधातु।११।सिं
दूरंगृहीत्वा ॐसिन्धोरिव प्रा
ध्वने मूर्च

नासो वातप्रमीय [illegible]ते दे
तस्य धारा अरुषोण[illegible]वाजी का
ष्ठाभिन्दन्नूर्मिभिः पिन्वमानः
अत्र वातप्रमिय पतयन्ति ज
ह्वा।इत्यपि पठन्ति।१२।घण्टां
गृहीत्वा ॐप्रतिश्रुत्काया अ
र्त्तनं घोषाय भयमन्ताय बहु
वादिने मनन्ताय मूकंशब्दा
याडम्बराघातं महसे वीणावा
दं क्रोशाय तूणवध्म मवरस्परा
य शङ्खध्मं वनायवनप मन्या
तो ऽरण्याय दावपं।१३।कज्जलं
गृहीत्वा ॐसमिद्धो अञ्जन कृदरं
मतीनां घृतमग्ने मधुमत् पिन्व
मानः वाजीवहन् वाजिने जा
तवेदो देवानां वक्षिप्रिय मासध
स्थं।१४।रोचनां गृहीत्वा।ॐयुञ्ज
न्ति ब्रध्न मरुषं चरन्तं परितस्थु
षः रोचन्ते रोचना दिवि।१५।सि
द्धार्थं गृहीत्वा।ॐअन्नपते अन्न
स्य नो देह्यनमीवस्य शुष्मिणः
।प्रदातारं तारिषऊर्जंनो धेहि द्वि
पदे शं चतुष्पदे।सिद्धार्थमत्र
अनपता उक्ताः।१६।काञ्चनं
गृहीत्वा ॐहिरण्यगर्भः सम
वर्त्तताग्रे भूतस्य जातः पतिरे
क आसीत्।सदाधारः पृथि

वि[illegible]मामुतेमां कस्मैदेवा
य हविषा विधेम।१७।रजतं
गृहीत्वा ॐतेजोसि शुक्र म
स्य मृतमसि धामनामासि प्रि
यं देवाना मनाधृष्टं देवयजनं
१८।ताम्रं गृहीत्वा ॐअसौ य
स्ताम्रो अरुण उतबभ्रुः सुमङ्ग
लः येचैनंरुद्रा अभितो दि
क्षुश्रिताः सहस्रशो वैषांहे
डइमहे।१९।सिद्धार्थं गृहीत्वा
ॐरक्षोहणो वलगहनः प्रोक्षा
मि वैस्नवान् रक्षोहणो वलगह
नो वत्सयामि वैस्नवान् रक्षोह
नो वलगहनो ऽवस्तृणामि वै
स्नवान् रक्षोहणो वलगहना
उपधामि वैस्नवी रक्षोहणो वल
गहनो पर्युहामि वैस्नवी वैस्न
वमसि वैस्नवास्थ।२०।दर्पणं गृ
हीत्वा ॐआकृष्णेन रजसा वर्त्त
म मानो निवेशयन्नमृतं मर्त्यंच हि
रण्ययेन सविता रथेना देवोया
ति भुवनानि पश्यन्।२१।दीपं
गृहीत्वा ॐअग्न आयाहि वीत
ये गृणानो हव्यदातये निहो
ता सत्सि बर्हिषि।२२।सहेद्ध
व्ययुकउलूकंगृहीत्वा।ॐप्रति
पदसि प्रतिपदे त्वा अनुपदसि

अनुपदे त्वा सम्पदसि सम्प
दे त्वा तेजोसि तेजसेत्वा।२३।
इति यजुर्वेदीय दुर्गोत्सव प
द्धतिः॥ ॥सामवेदिना मधि
वास मन्त्रा लतद्रव्याणि च
यथा।प्रथमं गन्धेन।ॐभद्रा इन्द्र
स्य रातयः योऽस्यकामं विध
तो नरोषति मनो दानाय चो
दयन्।१।ॐमहित्रीणा मवरस्तु
द्युक्ष मित्रस्यार्यम्णः दुराधर्षं व
रुणस्य।२।इतिमह्या।पुनर्गन्धेन
ॐभद्रा इन्द्रस्य रातयः इत्यादि।३।
ॐविन्वदापो न पर्वतस्य पृष्ठादु
क्थेभि रग्ने जनयन्त देवाः तन्त्वा
गिरः।सुष्टुतयो वाजयन्त्विन्त
गिर्व वैहो जिग्युस्त्वाः।४।इति
शिलया।ॐयानाबन्तं करस्ति
णमश्वावन्त मुक्थिने इन्द्रप्रा
तर्जयस्वनः।५।इतिधान्येन।ॐ
जज्ञा यथामस्त्वा मघवन् ह
त्रहत्याय तत्पृथिवी मप्रथय
स्तदस्तम्भा उतो दिवम्।६।इति
दूर्वया।ॐपवमान व्यश्नुहि रश्मि
भिर्वाजसातमः दधत्स्तोत्रे सु
वीर्य्यं।७।इतिपुष्पेण।ॐइन्द्रमिद्धो
ने मथिता हवन्ते यत्पार्य्या यु
नजते धियस्ताः शूरो नृषाता श्र

वसश्च कामत्वा गोमति व्रजे
भजात्वन्न:।८।इति फलेनाॐ
दधिक्राव्णो ऽकारिषं जिष्णो
रश्वस्य वाजिन: सुरभिनो
मुखाकरत् प्रणआयूंषितारि
षेत्।९।इति दध्ना।ॐ घृतवती
भुवनानामभिश्रियोर्वी पृथ्वी
मधुदुघे सुपेशसा द्यावा पृ
थिवी वरुणस्य धर्म्मणा विष्क
भिते अजरे भूरिरेतसा।१०।इति घृ
तेन।ॐ अभित्वा सोमो अयं स्वन: पि
बन्नस्य मरुत: उत स्वराजो ऽ
श्विना।११।इति स्वस्तिकेन।ॐ सि
न्धोरुच्छ्वासे पतयन्त मुक्षणं
हिरण्यपावा: पशुमप्सुगृभ्ण
ते।१२।इति सिन्दूरेण।ॐ स्वस्त
न्वयो वसूनां धारया मानेता
य इडानां सोमो य: सुक्षिती
नां।१३।इति शङ्खेन।ॐ अञ्जन्ते
व्यञ्जन्ते समञ्जन्ते क्रतुं रिह
न्ति मध्वाभ्यञ्जते।१४।इति कज्ज
लेन।ॐ आयन्त इव सूर्य्यं विश्वे
दिन्द्रस्य भक्षत वसूनि जाते
जनिमान्योजसा प्रतिभागन्न दी
धिम:।१५।इति रोचनया।ॐ प्र
त्नीउषा अप स्वसुस्तम: सन्ति प्रया
दिवस्तयेवा मश्विना हृहनाद्धः

इति सिद्धार्थेन।सदस [illegible] स
द्भुतं प्रिय मिन्द्रस्य काम्यां स
निं मेधा मयासिषं।इति काञ्च
नेन।१७।ॐ यद्वर्च्चो हिरण्यस्य
यद्वावर्च्चो गवामुत।सत्यस्य ब्र
ह्मणो वर्च्च स्तेन मा संसृजाम
सि।१८।इति रौप्येण।ॐ रत्न
महांअसि सूर्य्य वडादित्य महां
असि महस्ते सतो महिमाप
निष्ट समह्ना देव महां असि
।१९।इति ताम्रेण।ॐ मनज्यो
ति र्जुषता माज्यस्य बृहस्प
ति र्यज्ञ मिमं तनोत्वरिष्टं।यज्ञं
समिमं दधातु विश्वेदेवा:
सइह मादयन्ता मोंप्रतिष्ठ।
२०।इति दीपेन।ॐ आदित्य प्र
यतस्य रेतसो ज्योति: पश्य
न्ति वासरं परोयदिध्यते।
दिवि।२१।इति दर्पणेन।ॐ उ
दुलोकानरोचय प्रभुमुत
मरोचय हीद्दमान् लोका
नरोचय एवाद्य धर्म्मो ज्योतिं
षि।इति प्रशस्तपात्रेण २२
प्रशस्तपात्रं इर्वोक्त सर्वद्रव्य
स्यापि नैकपात्रं।इति साम
वेदीयदुर्गोत्सवपद्धति:॥
॥ ॥ ॥

[illegible]त्र सलज्ज:।नम्रार्थो
य:।अप्रगल्भ: २।इति शब्द
रत्नावली॥शारद: ३ अप्र
तिभ: ४ इति जटाधर:॥अ
धोमुख: त्रि अधोवदन:।न
म्रार्थीय:।अवाङ्मुख: २।
अवाचीन: ३।इति जटाधर:
॥अधोमुखनक्षत्रगणो यथा
।अश्लेष वह्नि यम पित्र वि
शाखयुक्तं पूर्वात्रयं शतभि
षा च नवाप्युडूनिपतान्य
धोमुख गणानि शुभानि नि
त्यं विद्यात्स्थ भूमिखननेषु
च शोभितानि॥इति ज्योति:
सारसंग्रह:॥अप्यशने क्ली
अजीर्णे भोजनं।यथा।अजी
र्णे भुज्यते यत्तु तदप्यशनमु
च्यते।इति भावप्रकाश:॥अ
न च लु प्राणने।च लु इति
ति लोको जीवति इत्यर्थ:।
इति दुर्गादास:॥
अनय ड. प्राणने।य ड. अन्य
ते।इति दुर्गादास:॥अनन्त
व्रतं त्रि भाद्रशुक्लचतुर्द
शीकर्त्तव्य मनन्तदेवस्य व्रतं
।तद्विधि र्यथा।भविष्ये।अन
न्तव्रत मेतद्धि सर्व्वपापहरं

शुभं।सर्व्वकामप्रदं नृणां स्त्रीणा
ञ्चैव युधिष्ठिर॥तथा शुक्ल
चतुर्दश्यां मासि भाद्रपदे भ
वेत्।तस्यानुष्ठानमात्रेण सर्व्व
पापं प्रणश्यति॥ ॥व्रतारम्भ
प्रतिष्ठयो र्वर्ज्यकाल माह ज्यो
तिषे।गुरो र्भृगो रस्त बाल्ये वा
र्द्धके सिंहगे गुरौ।वक्रि जीवा
द्दविंशेह्नि गुर्व्वादित्य दशाह्निके
॥सर्व्वे राशावनाय भातिचारि गु
रुवत्सरे।प्राग्राशिगन्ता जीवस्य
चातिचारे त्रि पत्तके॥कस्याद्य
द्भुत सप्ताहे नीचस्थे ज्य मलि
म्लुचे।भानुलङ्घितके मासि
क्षये राहुयुते गुरौ॥पौषादिके
चन्द्रमासे चरणाङ्कित वर्षणे।
एकेनाह्नाच्चैकदिने द्वितीयेन
दिनत्रये॥तृतीयेन तु सप्ताहे
माङ्गल्यानि शुभान्विता:।वि
द्यारम्भ कर्णवेधौ चूडोपनय
नोद्वहान्॥तीर्थस्नान मनावृ
त्तं तथा माद्यिसुरेक्षणं।परीक्षा
राम यत्तोद्य पुरश्चरण दीक्ष
णं॥व्रतारम्भ प्रतिष्ठे च गृ
हारम्भ प्रवेशने।प्रतिष्ठारम्भ
णो [illegible] देव तृप्सादे वर्ज्जयन्ति
हि॥द्वाविंशं

दिवसा स्वान्ते जीवस्य भार्गव
स्य चाद्दासप्तति र्महत्यस्ते पा
दान्ते द्वादश क्रमात्॥अस्तात्
प्राक् परयोः पक्षं गुरो र्वार्द्धक
बाल्ले।पक्षं ह्रद्धो महास्तेन
भृगु र्बाल्ले दशाह्निकः॥पा
दान्ते तु दशाहानि ह्रद्धो वा
ल्ले दिनत्रयं॥ ॥तत्र मध्याह्ने
भोज्यवेलायां समुत्तीर्य्य सरि
त्तटे।ददर्श शीला सा स्त्रीणां
समूहं रक्तवाससां॥चतुर्दश्यां
मर्च्चयन्तं भक्त्या देवं पृथक् पृ
थक्।इति भविष्योत्तरीयात्म
ध्याह्नव्यापिनी तिथि र्ग्राह्येति
वाच्यं।पूर्वाह्नो वै देवानामिति
श्रुत्यादिभिः पूर्वाह्ने देवकृत्य
विधानात्।विध्यसमभिव्याहृ
तार्थवादेन तद्बाधायोगात्।कि
न्तु तस्यैव गौणकालबोधकं त
त्।कालमाधवीयेप्येवं।भविष्ये
ऽपि पूजा विधायको मध्याह्ने
नोक्तः।षष्ठ्या।कृत्वा दर्भ म
यानन्तं वारिधान्यां निवेश्य
च।पूजयेद्गन्धपुष्पाद्यै र्नैवे
द्यै र्विविधै रपि॥चतुर्दशफ
ले र्मूले र्जलजैः कुसुमैरपि
।यवगोधूमशालीनां चूर्णेनै

कतरस्य च॥कृत्वा [illegible]द्यं म
से द्यादेकं हृतान्वितं।स्वयमे
कन्तु भुञ्जीत करे बद्ध्वा सुडोर
कं॥चतुर्दशग्रन्थियुक्तं कुङ्कु
मेन विलेपितं।स्वविन्यस्तं वि
सुनामग्रन्थिग्रन्थि समन्वितं।च
तुर्दश सूत्रमयं सूत्रं कार्पासमेव
च॥पूजा डोरकवन्दनमन्त्रस्तु
त्वाकरे।अनन्त संसार महासमु
द्रे मग्नान् समभ्युद्धर वासुदेव
।अनन्तरूपिन् विनियोजयस्व
अनन्तरूपाय नमो नम स्ते॥इ
ति मन्त्र मुक्त्वाऽनेन डोरकं ब
द्ध्वा भोक्तव्यं स्वस्थमानसैः॥इ
त्यहं भविष्योत्तरीयं कालको
मुद्यां लिखितमिति॥नत्वा॥पा
पोऽहं पापकर्म्माहं पापात्मा
पापसम्भवः।त्राहि मां पुण्डरी
काक्ष सर्व्वपापहरो भव॥अ
द्य मे सफलं जन्म जीवितञ्च सुजी
वितं।युक्त्वाङ्घ्रि युगाजात्रे मूर्द्धा
मे भ्रमरायते॥इत्याभ्यां नम
स्कुर्यात्।अनन्त कथा मप्यत्र
श्रुणुयात्।इति तिथ्यादितत्वे॥॥
अथ प्रयोगः।आचम्य स्वस्तिवा
च्य सङ्कल्पं कुर्यात्।अद्य भाद्रे
मासि शुक्ले पक्षे चतुर्दश्यां

तिथावारभ्य अमुकगोत्र
श्री अमुकः धनधान्य पुत्र
पौत्राद्यनवच्छिन्न सन्तति प्रा
प्तिकामः श्रीविष्णुप्रीतिकामो
वा चतुर्दशवर्षपर्य्यन्तं भग
वदनन्त भट्टारक पूजाचतुर्द
शग्रन्थियुक्तडोर करमूलब
न्धन कथाश्रवण ब्राह्मणस
त म्प्रदानकानपक्वतण्डुल प्रस्थ
द्वयघटित पूपाद्वैपकल्पन त
दर्द्धोत्सर्ग एकभोजनरूप म
नन्तव्रत महं करिष्ये इति सङ्क
ल्प्य सूक्तं पठेत्॥ततो गोमय
कया अष्टदलपद्मं निर्म्माय
तन्मध्ये घटमारोप्य शाल
ग्रामं वा चतुर्द्दिक्ष्वजा नि
वेश्य यथोक्तविधिनागणे
श नवग्रह दिक्पाल शिव दु
र्गा लक्ष्मीनारायण पूजां कृ
त्वा शक्रं ध्यायेत्।ॐ महेन्द्रं म
त्तैरावत स्कन्धस्थं सहस्रनय
नोज्ज्वलं।मणिकाञ्चनखचित
नानालङ्कारभूषितं वज्रह
स्तं शच्यन्वितं देव गन्धर्व्वग
णै र्वृतं मुनिगणैः स्तूयमानं
।एवं ध्यात्वा महेन्द्राय नमः ए
तेनक्रमेण संपूज्य प्रणमेत्।ॐ
शक्रः सुरपतिश्चैव वज्रहस्तो

महाबलः।ऐरावतगजारूढः स
हस्राक्ष नमोऽस्तु ते॥ततो ह्रदपा
त्रे जलं संस्थाप्य हस्तं दत्वा स
मुद्रमावाहयेत्।ॐ गङ्गे चेत्यादि
नावाह्य समुद्रं पूजयेत्॥ततोऽमृ
तमुद्रादि प्राणमात्रं कृत्वा अ या
नन्तं ध्यायेत्।ॐ दिव्यसिंहासना
सनासीनं देवेशं गरुडध्वजं।शु
क्लवर्णं चतुर्बाहुं नागयज्ञोपवी
तिनं।शंखचक्र गदा पद्मधरं पी
ताम्बरं विभुं।श्रिया वाण्या च सं
श्लिष्टं किरीटादि समुज्ज्वलं।फणा
शत समायुक्तं जगन्नाथं जगद्गु
रुं।अनन्तं चिन्तयेद्देवं नारदाद्यै
रुपस्तुतं॥एवं ध्यात्वा स्वशिरसि
पुष्पं दत्वा मानसोपचारैः संपू
ज्य अर्घ्यं संस्थाप्य।ॐ हृदया
य नमः एवं षडङ्गानि विन्यस्य
पुनर्ध्यात्वावाहयेत्।ॐ आग
च्छानन्त देवेश पत्नीभ्यां वा
हनान्वितं।गन्धर्वादिगणोपेत
सान्निध्य मिह कल्पय॥ततः
पूजयेत्।पाद्यं गृहीत्वा।पा
द्यं गृहाण देवेश सुरासुर न
मोहर।तुष्टो मे भव देवेश
नरसिंह नमोऽस्तु ते॥अर्घ्यं
गृहीत्वा।अर्घ्यं गृहाण देवेश
सुगन्धि कुङ्कुमान्वितं।हर्षोत्स

समायुक्तं नमस्ते विश्वमूर्त्तये
॥आचमनीयं गृहीत्वा।ॐमिद
माचमनीयं त्वे दिव्यतोयोद्ध
वं प्रभो।भक्त्यादत्तं मया नन्त
नमस्ते पन्नगाधिप॥एवं मधु
पर्कं पुनराचमनीयं स्नानीयं
वस्त्रयुग्मंच दद्यात्॥गन्धः।ॐ
गन्धोऽयं देवदेवेश कुङ्कुमागरु
सम्भवः।यथाशक्त्या मयाद
त्तो देवेश प्रतिगृह्यतां॥पुष्पं
।ॐपुष्पं गृहाण भो ऽनन्त स
गन्धिद्रव्य मुत्तमं।पद्मनाभ
नमस्ते ऽस्तु कुशलं कुरु स
र्वदा॥धूपः।ॐ धूपो ऽयं ते
महाभाग दशाङ्गो ऽगरुणा
सह।मयादत्तः प्रभो विष्णो गृ
ह्यतां स्वरनायकः॥दीपः।ॐ
दीपं गृहाण भो ऽनन्त जाज्व
ल्यमान मद्भुतं।त्वं गृहाण स
दादेव रक्ष मां क्षीरसागरात्॥
यज्ञोपवीतं।ॐ ऋग्यजुः सा
मसमन्त्रेण त्रिवृतं पद्मयोनि
ना।सावित्रीग्रन्थिसंयुक्तं उप
वीतं तवानघ॥नैवेद्यं।ॐ
नानाभक्ष्यसमायुक्तं चतुर्द
शफलैर्युतं।भक्त्या सम्पादि
तं देव सर्पं गृह्यतां विभो

॥ ॥ततो बलभद्रं स[...] स्त्व
तिं कुर्यात्।ॐ बलभद्र महा
त्माने हलिने लाङ्गलायुधं।
कादम्बरीमदोन्मत्तं नमामि
बलदेवकं॥ततो आवरणदेवता
पूजयेत्।ॐ गणेशाय नमः।
एवं लोकपालेभ्यः।नवग्रहे
भ्यः।अष्टवसुभ्यः।एकादश
रुद्रेभ्यः।द्वादशादित्येभ्यः।अ
नन्तादिनागेभ्यः।मत्स्यादिद
शावतारेभ्यः।मासेभ्यः।ऋतु
भ्यः।वत्सरेभ्यः।धर्म्माय।अ
धर्म्माय।ज्ञानाय।अज्ञानाय।
वैराग्याय।अवैराग्याय।ऐश्व
र्याय।अनैश्वर्याय।शिवा
या।दुर्गायै।पृथिव्यै।गङ्गायै।
यमुनायै।महालक्ष्म्यै।सर
स्वत्यै।गरुडाय।शङ्खाय।च
क्राय।गदायै।पद्माय।कौस्तु
भाय।सूर्य्यमण्डलाय।सोम
मण्डलाय।वह्निमण्डलाय।
वायुमण्डलाय।सर्वेभ्यो देवे
भ्यः॥सर्वेभ्यो देवेभ्यः॥ ॥
ततः स्तुतिं पठेत्।ॐ अनन्त
संसार महासमुद्र मग्नं सम
भ्युद्धर वासुदेव।अनन्तरूपि
न्विनियोजयस्व अनन्तसूत्राय न

मो नमस्ते॥नमो ऽस्त्वनन्ताय
सहस्रमूर्त्तये सहस्रपादाक्षि
शिरोरुबाहवे।सहस्रनाम्ने पुरु
षाय शाश्वते सहस्रकोटीयुग
धारिणे नमः॥हृदिस्थं सर्वदे
वानां इन्द्रियाणां गुणानिगं।स
र्वपापहरं देवं प्रणमामि जना
र्दनं॥अनन्तरूपेण बिभर्षि पृ
थ्वी अनन्तलक्ष्मी विदधासि
तुष्टैः।अनन्तभोगान् भक्ष्यासि
तुष्टो अनन्तमोक्षं पुरुषे प्रह
ष्टः॥प्रणमामि हृषीकेशं वासुदे
वं जगद्गुरुं।सृष्टि स्थिति विनाशा
नां कर्त्तारं प्रणमाम्यहं॥गद
सानां मरिं नौमि नौमि दैत्य
विमर्दकं।जगतो हितकर्त्तारं नौ
मि पङ्केरुहेक्षणं॥जन्म जन्म
कृतं यच्च बाल्य यौवन वार्द्धके
।हृदि मामौन तत्पुण्यं पापं हर
हलायुध॥भक्तिहीनं क्रियाही
नं मन्त्रहीनं यदर्च्चितं।यद्योहि
ष्टा मिमां पूजां परिपूर्णां कुरुष्व
मे॥पापो ऽहं पापकर्माहं पा
पात्मा पापसम्भवः।त्राहि मां
पुंडरीकाक्ष हरे संसारसाग
रात्॥ ॥ततो घटस्थजलेन
संप्रोक्ष्य करमूले डोरकं

समर्पयेत्।ॐ इदं डोरमनन्ता
ख्यं चतुर्दश गुणात्मकं।सर्वदेव
मयं विष्णो स्वकरे धारयाम्यहं॥
ततो भोज्य मुत्सृजेत्॥ ॥ततः
कथां शृणुयात्।यथा।अरण्य
वासमुषितो युधिष्टिरनृपो वशी
।भ्रातृभिर्लोकनाथेन कृष्णेन
परमात्मना॥कथोपकथने जाते
तयो स्तत्र प्रियाप्रियं।विशेषे
ण च गोविंदं पप्रच्छ च युधि
ष्टिरः॥ ॥युधिष्टिर उवाच।के
न व्रतेन देवेश वाञ्छितं प्राप्यते
फलं।निष्पापाः सकला लो
काः भवन्ति जन्म जन्मनि॥
श्रीकृष्ण उवाच।अस्ति व्रतम
नन्ताख्यं सत्कृतं सुरसत्तमैः
इन्द्राद्यै र्लोकपालैश्च तन्मेक
थयतः शृणु॥शुक्लपक्षे चतुर्द
श्यां मासि भाद्रपदे तथा।तस्या
नुष्ठानमात्रेण सर्वपापं प्रणश्य
ति॥ ॥युधिष्टिर उवाच।कृष्ण को
यं त्वया ख्यातो यो ऽनन्त इ
ति संज्ञितः।को ऽयं शेषश्च
नागश्च अनन्त स्तक्षकः स्मृ
तः॥परम ज्योतिर्म्म वापि उता
हो ब्रह्म उच्यते।कएषो ऽना
न्तसंज्ञोवै तन्मे ब्रूहि जनार्दन

॥ ॥श्रीकृष्ण उवाच॥अनन्त
इत्यहं पार्थ मम रूपं निबोध
तत्।आदित्य गतिरूपेण यः
काल उपपद्यते॥कला काष्ठा
मुहूर्त्तादि दिनरात्रि व्यवस्थया।
पक्षोमास ऋतु वर्षो युगकल्प
व्यवस्थया॥सोहंकालो ऽवतीर्णो
ऽस्मिभुवो भारावतारणात्।दान
वानां विनाशाय वसुदेवकुलोद्भ
वं॥अनन्तं विद्धिमां पार्थ कृष्णं
विष्णुं हरिं शिवं ब्रह्माणं भा
स्करं शेषं सर्व्वव्यापिन मीश्वरं॥
प्रत्ययार्थं मया पार्थ विश्वरूपं
निबोध तत्।पूर्व्वमेव महाबाहो
योगिध्येयमनूपमं॥ ॥युधिष्ठिर
उवाच।अनन्तव्रतमाहात्म्यंवि
धिंविधिविदाम्वर।किं पुण्यं किं
फलं तस्य अनुष्ठानञ्च तस्य
किं॥केन वा तत्कृतं पूर्व्वं लोके
केन प्रकाशितं।तत्सर्व्वं बहु वि
स्तार्य्य ब्रूहि नारायण प्रभो॥
॥श्रीकृष्ण उवाच॥आसीत् पुरा
कृतयुगे सुमन्तुर्नाम वै द्विजः
वसिष्ठगोत्रजः विद्वान् शील
वान्विजितेंद्रियः॥पत्नी तस्या
भवद्दीक्षा सती सत्यव्रते स्थिता
।चरित्र शील सम्पन्ना सद्रूपा भृगु

वंशजा॥तस्याः कालेन संजा
ता दुहिता सर्व्वलक्षणा।शीलाना
म्ना सुशीला सा वर्द्धते पितृवे
श्मनि॥माता तस्यास्तु कालेन
ज्वरदाह प्रपीडिता।समभात्य न
दीतोये मृता स्वर्गपुरं ययौ॥कृ
तं सुमन्तुना तस्याः कर्म्म यत्पा
रलौकिकं।ततः सुमन्तुः संत्य
ज्य दुःखं शोकं क्रमात्पुनः॥
नापत्नीको गृही धर्म्मं कर्त्तुं मर्हे
ति वै क्वचित्।इति सञ्चिन्त्य म
नसा विवाहोत्सुक मानसः।देव
तस्य मुनेः कन्यां कर्क्कशां परि
णीतवान्।सा कर्क्कशाति दुःशी
ला सदा निष्ठुरभाषिणी॥कोपना
प्रतिकूला च निर्ल्लज्जा कलहप्रि
या।अदत्ता गृहकृत्येषु दक्षा भो
जनकर्म्मणि॥कलहेन तु सन्तु
ष्टा कृष्टा वन्दुजनान् प्रति।सा तु शी
लापि तु गेहे वर्द्धिता च दिने दि
ने॥करोति सखिभिः सार्द्धं शिशु
क्रीडा मनुत्तमां।गृहान्तरे स्थल
द्वारदेहली तोरणादिषु॥चतुर
ङ्गकवर्णैश्च रक्त पीत सितासि
तैः।स्वस्तिकं पद्मशंखौ च मण्ड
यन्तीपुनः पुनः॥कुर्वन्ती प्रत्यहं
बाला देवतातिथिपूजनं।गृह

57

कृत्ये सदा दक्षा पितृ रत्यन्त व
ल्लभा॥कालेन कियता विप्र स्ता
दृष्ट्वा यौवनोद्गतां।कस्मै देया
मया कन्या इति चिन्तान्वितो ऽ
भवत्॥ततो दैववशा तत्र कौ
ण्डिन्यः समुपागतः।मुनिश्रे
ष्ठो महाभागः कुलीनो धर्म्म
तत्परः॥मनसा चिन्तयामास
सुमन्तुः सुतपाः सुधीः।अ
स्मै भाग्यवशाच्छीला प्रतिपा
द्या प्रयत्नतः॥इति कृत्वा म
तिं विप्रो ददौ कन्यां शुभे दिने।
कन्यामलङ्कृतां साध्वीं शीलां
चंद्रनिभाननां।गृह्योक्त वेदवि
धिना विवाहमकरोत्तदा।ततो
होमादिकं कर्म्म समाप्य समये
मुनिः॥सुमन्तुः कर्कसां प्राह
जामात्रे देहि दक्षिणां।सकलं कु
रु मेदानं प्रिये मुनिकुलोद्भवे
॥दक्षिणा रहितं कर्म्म निष्फ
लं जायते यतः॥सा तु तद्वचनं
श्रुत्वा कर्कसा कुपिता भवत्॥
सुमंतं भर्त्सयामास कर्कसे वेच
नैः पतिं।अलङ्कारं समानीय स्व
कीयञ्चापि वर्द्धनं॥निःक्षिप्य वि
भृतेस्थाने कर्कसा तु गृहं ययौ॥सु
मन्तु श्चातिदीनात्मा लज्जितश्चाभ

वत्तदा।यत् किञ्चिदर्थयोग्यञ्च
द्रव्य मानीय यौतकं।जामात्रे
प्रददौ विप्रः परितोष्य पुनः पु
नः॥ततो विवाहं निर्वृत्य कौ
ण्डिण्योपि निजाश्रमं।गोयाने
तां समारोप्य शीला मादाय
वै ययौ॥ततः सा पथि गच्छ
न्ती शीला चन्द्रनिभानना।मध्या
न्हे भोज्यवेलायां समुत्तीर्य्य
सरित्तटे॥ददर्शशीला नारीणां
समूहं व्रतचारिणां।पुंसां हृद
ञ्च तत्रैव रक्तपीताम्बरासनं॥च
तुर्द्दश्यां मर्च्चयन्तं भक्त्यानन्तं
पृथक् पृथक्।दृष्ट्वा समूहं नारी
णां सती पप्रच्छ सादरं॥विनया
वनता साध्वी प्रणिपत्य सुरेश्व
रं।किमिदं क्रियते कार्यं भवती
भिस्तदुच्यतां॥ ॥स्त्रिय ऊचुः।
भाद्रेमासि सिते पक्षे ऽथवे वा
सवध्वजे।आराधिते महेन्द्रे च
ध्वजाकारा सुयष्टिसु॥तत्ता सर
सि यः स्नात्वा अनन्तार्चन मारभे
त्।कृत्वा दर्भमयं देवं वारि वाज
समन्वितं॥अनन्तं देवदेवेशं च
तुर्बाहुं किरीटिनं।अनसी पुष्पसं
काशं काञ्चनाङ्गदभूषणं॥
शङ्ख चक्र गदा शार्ङ्ग विविधा

पुष्पधारिणं॥ एह्येहि भगवन्क
ष्ण मवयत्तः प्रवर्त्तते॥ वारिधान्यां
तथानन्तं भगवन्तं नियोजयेत
।मण्डले पुष्प नैवेद्यं धूप वस्त्रा
नुलेपनं॥ दत्वा च पूजयेद्भक्त्या
अनन्तं विश्वरूपिणं॥ पिष्टकार्थं
व्रीहिचूर्णं यव गोधूमयोश्च वा॥
एतेषां प्राप्यते यत्र तद् ग्राह्यं प्र
स्थसंज्ञितं॥ अर्द्धं विप्राय दात
व्यं अर्द्ध मात्मनि योजयेत्॥ पू
जयित्वा तथा देवं गन्धपुष्पै
र्यथाक्रमं॥ श्रुत्वा कथां ततस्त
स्य ऊर्द्धमाङ्के स्वडोरकं॥ चत
ईशग्रन्थियुक्तं नारी वामकरे
न्यसेत्॥ पुमांस्तु दक्षिणे बाहौ
तदानन्तं प्रपूजयेत्॥ निर्वेद्य पू
जां देवस्य सर्पं भक्त्या यथासुखं
।विसृज्य दक्षिणां दत्वा प्रणम्य
च यथासुखं॥ शीला श्रुत्वा व्र
तासो यथानामि रुदाहृतं॥ व्रतं
चकारसा बाहौ बद्धा डोरक मुत्त
मं॥ पूपप्रस्थञ्च सा कृत्वा भक्त्या
चैव तथैव च॥ पुन र्जगाम तेनैव
गोरथेन समन्विता॥ तेनानन्त
प्रसादेन गृहं गोधन सङ्कुलं।
तदाश्रमं श्रिया युक्तं धनधा
न्यसमन्वितं॥ विविधातिथिसंपूर्णं

नानारत्नै र्विभूषितं॥ वराश्वमत्त
मातङ्ग महिषै र्गोधनान्वितं॥
शीला च मणि काञ्चीभि र्मु
क्ताभरण भूषिता॥ दिव्याङ्गी शी
लसम्पन्ना सावित्री प्रतिमा य
था॥ कदाचिदुपविष्टा सा वह्नि
कुण्ड समागता॥ कौण्डिन्योपि
विशेषात् दृष्ट्वा डोर मनन्तकं
।शीलायाः करमूले च बद्ध मे
व प्रयत्नतः॥ पप्रच्छ कोपवच
सा भृकुटी कुटिलं मुखं॥ किमि
दं डोरकं हस्ते बद्धा मार्य्ये त्व
तिष्ठसि॥ प्रमेयः कस्य देवस्य उ
द्वहे ब्रूहि सत्वरं॥ ॥शीला वा
चानन्तं देवदेवस्य प्रमेयं डो
रकं शुभं॥ करे बद्धं प्रिया तेन
शृणुमे वचनं प्रभो॥ प्रसादाद्
यस्य देवस्य भुंक्ते संविपुलं ध
नं॥ न जानासि कथं नाथ तदे
वं जगदीश्वरं॥ शीला वाक्यं
ततः श्रुत्वा कौण्डिन्यः कु
पितो ऽभवत्॥ को ऽसावनन्त
संज्ञो वै न श्रुतोपि वराणने
॥इत्युक्ता क्रोध कुपितो सजा
डोर मनन्तकं॥ क्षिप्त ज्वा
लाकुले वह्नौ निर्भर्त्स्य व
हुधा प्रियां॥ ततः सा संभ

मात् शीला हाहा कृत्वा प्र
धाविता॥ वह्नेः सूत्रं समादाय
क्षीरमध्ये ततो क्षिपत्॥ तत स
थाकरे वामे पुन र्बद्धं सडोरकं।
अनन्तात्तपदोषेण दारिद्र्यं प
तितं गृहे॥ न केश्चित् वर्ण्यते
शोकैः सोपि विप्रो युधिष्ठिरः
।गात्रे मलिनता प्राप्ता चक्षुर्नि
द्रा तथैव च॥ शून्यानि गृहद्र
व्याणि दग्धानि वह्निना क्वचित्
।निरीक्ष्य स्वपुरं विप्र श्चिन्तयामा
स चेतसा॥ अथ शीला विवर्णा
सा दुःखिता पतिदोषतः॥ विच
चार पुरी सर्वा शून्यागार समन्वि
ता॥ अथ कौण्डिन्यविप्रस्य सं
जाता बुद्धिरुत्तमा॥ ममापि दुष्कृ
तं कर्म्मकृतं वामेविगर्हितं॥ अ
नन्तात्तेप दोषेण ममापि गति
रीदृशी॥ अनन्तं यत्र पश्यामि
तत्र यास्यामि दुर्मतिः॥ ततो
जगाम कौण्डिन्यो वनं व्याघ्रा
दि संकुलं॥ वनस्यान्वेषणं क
र्त्तुं पादौ दृष्टं तथा हरेः॥ विकल
ः सयसौ मार्गे जनजन्तुविवर्जि
ते॥ तत्रापश्यच्च तं वृक्षं फलपुष्प
समन्वितं॥ वर्जितं पक्षिसंघातैः
कीटै श्चैव विशेषतः॥ तमपृ

च्छत् तथानन्तः कश्चिद्दृष्टो म
हाद्रुम॥ स चोवाच महाहन्ता ना
नन्तं वेद्मि भो द्विज॥ ततो गच्छ
न् ददर्शाग्रे तृणमध्ये सवत्सकां
॥तृणमध्ये प्रधावन्ती न खाद
ति न जिघ्रति॥ हे महाधेनुके ब्रु
हि किमनन्त स्त्वयेक्षितः॥ सतत्
सात मुवाचाथ नानन्तं वेद्मि हे
द्विज॥ ततो गच्छन् ददर्शाग्रे वृ
षभेन्द्रं वनेस्थितं॥ तमपृच्छद्दयं
विप्रो अनन्तो वीक्षितस्त्वया॥ वृ
षभस्त मुवाचेदं विषण्णं ब्राह्मणं
प्रति॥ यद्यनन्त महं जाने तदा
मे गति रीदृशी॥ ततो व्रजन् द
दर्शाग्रे गर्दभं कुञ्जरं तथा॥
नाना माया प्रचरन्तं मदगर्जन
दर्पितं॥ स तं दृष्ट्वा द्विजो ऽपृच्छ
दनन्तं दृष्टवान् किमु॥ प्रत्युत्त
र मुवाचेदं नानन्तं वेद्मि हे द्वि
ज॥ ततो व्रजन् ददर्शाग्रे रम्यं
पुष्करिणीद्वयं॥ अन्योन्य जल
संघातै र्वीचिभि रुपशोभितं।
शुभैः कुमुद कल्हारैः कम
लोत्पल शोभितं॥ भ्रमरैः श्च
क्रवाकैश्च हंस कारण्डवैर्यु
तं॥ न मपृच्छत् द्विजो ऽनन्तो
भवतीभ्यान्तु लक्षितः॥ पुष्क

रिएयाहूवचनं सं नजानीवो हरिं
कश्चित्।निपपात ततो विप्रो हा
हाकृत्वा रुदन् भुवि॥किंकरो
मि क्व गच्छामि कथं पश्यामि तं
विभुं॥ततः कृपार्द्रहृदयो देवे
शो देवपूजितः॥तत्क्षणाद्भग
वान् विप्रर्हिजमनन्यस्तु माग
तः।वृद्धब्राह्मणरूपेण प्रोवाच
वचनं द्विजं॥उत्तिष्ठोत्तिष्ठ विप्रे
न्द्र त्यज दुःखं सुखी भव।अन
न्तं दर्शयिष्यामि कुरु विषाण
हरिं शिवं॥ब्राह्मणं तं समा
दाय पाताल वर्त्मना पुरीं।तां
पुरीं दर्शयामास तत्र ब्रान्तर्दे
धेद्विजः॥स तां ददर्श कौण्डिन्यः
पुरीं त्रैलोक्य दुर्लभां॥दिव्य
नारी नरै र्युक्तां मणिरत्नविभू
षितां॥स्वर्णैरचितां सर्वां वे
ष्टितां भक्तकारिभिः॥तत्राप
श्यत् स कौण्डिन्यो देवदेव
मनन्तकं॥विश्वरूपं जगन्नाथं
चतुर्बाहुं किरीटिनं।शंख चक्रग
दापद्मधारिणं गरुडध्वजं॥दक्षि
णे विलसल्लक्ष्मी वामे क्रीडत् स
रस्वतीं॥सप्तफणसमायुक्तं दिव्य
सिंहासनेस्थितं॥एवंरूपं जग
न्नाथं दृष्ट्वा भक्त्या स्तुतिः कृता

॥जगाम भूमौ शिरसा अनन्त
स्यसमीपतः॥नमो ऽस्त्वनन्ताय
सहस्रमूर्तये सहस्र पादाक्षिशि
रोरु बाहवे।सहस्रनाम्ने पुरुषा
य शाश्वते सहस्रकोटीयुगधारि
णेनमः॥अज्ञानेन मया देव य
त्कृतं पापकर्मणा।तत्सर्वं हि
पयाशंस त्वमस्य मधुसूदन॥॥
अथ कौण्डिन्य विप्रस्य स्तुतिं
श्रुत्वा जनार्दनः।प्रसन्नो भग
वान्देव आनन्तो ऽनन्तरूपधृक
॥कथं मेप्रिय मागत मिहा
गच्छेति भूसुर॥अनन्त उवाच
।तुष्टोहं ब्राह्मणश्रेष्ठ भक्त्या त
व विशेषतः।वरं गृहाण विप्रे
न्द्र तुष्टोस्मि त्यज विस्मयं॥
कौण्डिन्य उवाच।स्वकर्म
फलभोगेन यां यां योनिं व्र
जाम्यहं।तस्यां तस्यां हृषी के
श हरिभक्ति र्दृढास्तु मे॥अति
प्रमोदान्मोहाद्वा यन्मया दुष्कृ
तं कृतं।तदागः क्षम्यतां नाथ
प्रणमामि पुनः पुनः॥श्रुत्वा
नन्त स्तदाक्यं तदो तस्मै वर
त्रयं।दारिद्र्यनाशनं धर्मं विस्नु
लोकं तथाक्षयं॥ ॥कौण्डिन्य
उवाच॥ हर्षो मनोरथो ॥

देव मम चाद्य विशेषतः।कि
ञ्चित् पृच्छामि देवेश तन्मे ब्रू
हि जगत्पते॥कस्तुतः को वृषः
का गौः किन्तत् पुष्करिणीद्वयं
।कः खरः कुञ्जरः कोवा को
वा वृद्धद्विजोत्तमः॥कृपया कथ
यस्वाद्य पथिदृष्टो मया विभो।
श्रीअनन्त उवाच।यस्त्वाम्रवृक्षो
दृष्टोहि विप्रो विद्यास्व गर्वितः
।उपस्थिताय शिष्याय विद्या
यस्मान्न दत्तवान्॥तेन कर्मवि
पाकेन वृक्षत्वं प्राप्य तिष्ठति॥वृष
भोय स्त्वया दृष्टो लोभकर्म कृ
तः पुरा॥दत्तं पर्युषितं द्रव्यं
स्वादु उक्तं स्वयं यतः।वृषभं त्वं
समासाद्य तत्र तिष्ठति निर्जे
ने॥विप्राय वसुधा दत्ता निष्फ
लं शस्यवर्जितं।तेना सौ गौ
त्व मासाद्य तृणमध्ये स्थिता
वति॥धर्माधर्मौ विजानीयात्
यत्तत्पुष्करिणीद्वयं।गर्दभो
ऽज्ञानसम्पन्नः कुञ्जरो मदग
र्वितः॥ब्राह्मणो ऽसावनन्तोऽहं
य स्त्वया दर्शितो मुने।एतत्ते
कथितं सर्वं गच्छविप्र निजा
श्रमं॥पुनः समृद्धि स्ते विप्र भवि
ष्यति न संशयः।भुक्त्वा भोगा

न्स विपुलां संप्राप्स्यसि मद्गत
पदं॥इति दत्वा वरं तस्मै तत्रै
वान्तरधीयत।कौण्डिन्योपि
गृहं गत्वा करोति व्रतमुत्तमं॥
अनन्ताख्यं महापुण्यं वर्षाना
ञ्च चतुर्दश।शीलया सह
धर्मात्मा सर्वं भुक्त्वा मनोर
थान्॥विष्णुलोकं समासाद्य
रराज शीलयासह।अनन्ताख्य
व्रतेनेह सम्प्राप्तेनैव पार्थिव॥
सर्वपापविनिर्मुक्ता यास्यन्ति
परमां गतिं।एवमेवं हि निया
मात् स्त्रियो ऽनन्तव्रतान्वय
॥पुत्र पौत्र धनै र्युक्ता भुक्त्वा
भोगान् मनोरथान्॥विष्णुलो
कमाप्नुवंति यावच्चंद्रदिवाक
रौ॥इति भविष्यपुराणे अन
न्तव्रतं समाप्तं॥ ॥अनव
रतं चि सततं।तत् पर्य्यायः।
प्रसक्तं १० आसक्तं ११ अनद्धं
१२।इति जटाधरः॥अनसू
या स्त्री असूयाभावः।तस्या
लक्षणं यथा बृहस्पतिः।न
गुणान् गुणिनो हन्ति स्तोति
मंदगुणानपि।नान्यदोषेषु रमते
सानसूया प्रकीर्तिता॥इत्ये
कादशीमत्तं॥अत्रिमुनि

पत्नी। इति गारुडे २९ अध्या
यः॥
अनहंवादी त्रि गर्व्वरहितः।
यथा श्रीभगवद्गीता। मुक्तस
ङ्गोऽनहंवादी धृत्युत्साहसम
न्वितः। सिद्ध्यसिद्ध्योर्निर्व्विका
रः कर्त्ता सात्त्विक उच्यते॥
अनहंवादी गर्व्वरहितः। इत्या
ह्निकतत्त्वं॥
अनायासः पुं अक्लेशः। तस्य
लक्षणं यथा बृहस्पतिः। शरी
रं पीड्यते येन शुभेनापि क
र्म्मणा। अत्यन्तं तन्न कुर्व्वीत
अनायासः स उच्यते॥ इत्ये
कादशीतत्त्वं॥
अनुव्य पुनरर्थे। इति मुग्ध
बोधटीकायां दुर्गादासः॥
अनुक्रमः पुं प्रतिसंक्रमणं।
अनुक्रमणिका। यथा। द्वादशे
तु पुराणोक्त सर्व्वार्थानुक्रमः
कृतः प्रथमस्कन्दमारभ्य शाखा
न्येन समासतः॥ इति श्रीभा
गवते १२ स्कन्धे १२ अध्याय
टीकायां श्रीधरस्वामी॥
अनुगमनं क्ली सहगमनं। य
था। अष्टौ लोकपाला आदित्य
चन्द्रानिलाग्न्याकाश भूमिजल
हृदयावस्थितान्तर्यामिपुरुष
यमदिनरात्रिसन्ध्या धर्म्मा एवं
साक्षिणो भवन्त्वत्विनारो
हणेन भर्त्तुः शरीरानुगमनम
हं करोमि॥ इति शुद्धितत्त्वं॥
अनुजः पुं कनिष्ठभ्राता। तत्प
र्य्यायः। यवीयान् २ कनीयान्
३ यविष्ठः ४ इति जटाधरः॥ ज
घन्यः ५ इति शब्दरत्नावली
॥ अनुमतकर्म्मकारी त्रि लि
खितपत्राद्यनुसारेण कर्म्मक
र्त्ता। अकी इति आरवी भाषा॥ इ
ति व्यवहारकाण्डं॥ आज्ञया
कार्य्यकर्त्ता च॥
अनुशायी स्त्री क्षुद्ररोगान्तर्गत
पादरोगविशेषः। तच्चिकित्सा
यथा। हरेदनुशयीं वैद्यः क्रि
यया श्लेष्मविद्रधेः। इति भा
वप्रकाशः॥
अनूपदेशः पुं जलप्रायदेशः।
तस्य लक्षणं यथा। नदीपल्व
ल शैलाढ्य कल्लोल पल्व
लैर्युतः। हंससारस कारण्डच
क्रवाकादि सेवितः॥ सरो वरा
ह महिष रुरु रोहितकुलाकुलः
। प्रभूतद्रुमसम्बाधो नानाश
स्य फलान्वितः॥ अनेक

शालि केदार कदलीक्षुविभू
षितः। अनूपदेशो ज्ञातव्यो
वातश्लेष्मामयान्वितः॥ इति
भावप्रकाशः॥
अनृणी त्रि ऋणाभावविशिष्टः।
यथा। यक्ष उवाच। को मोदते
किमाश्चर्य्यं कः पन्थाः का च
वार्त्तिका। वद मे चतुरः प्रश्ना
न् मृता जीवन्तु बान्धवाः॥
युधिष्ठिर उवाच। पञ्चमेऽहनि
षष्ठे वा शाकं पचति स्वे गृहे।
अनृणी चाप्रवासी च स वारिच
र मोदते॥ अहन्यहनि भूता
नि गच्छन्तीह यमालये। शे
षाः स्थिरत्वमिच्छन्ति किमा
श्चर्य्यमतः परं॥ तर्कोऽप्रतिष्ठः
श्रुतयो विभिन्ना नैको मुनि
र्यस्य मतं प्रमाणं। धर्म्मस्य
तत्त्वं निहितं गुहायां महाज
नो येन गतः स पन्थाः॥
अस्मिन् महामोहमये कटाहे
सूर्य्याग्निना रात्रिदिवेन्धनेन।
मासर्त्तुदर्व्वीपरिघट्टनेन भूता
नि कालः पचतीह वार्त्ता॥ इति
श्रुद्धाङ्कितमहाभारते वनपर्व्व
णि ३११ अध्यायः॥ अपि च।
देवाना मृणतो जन्तु र्यैस्ते
र्भवति मानवः। इत्यादि शुद्धि
तत्त्वं॥
अन उ गति प्रजनयोः।
इति मुग्धबोधे वोपदेवः॥
अन्व उ श्लिष्टाङ्को॥ गतौ। उ
अन्वितः अङ्कः। श्लिष्टोक्ति र
व्यक्तशब्दः। इति दुर्गादासः॥
अन्व को व्यक्तौ। व्यक्ति रिह
विशेषणं। क अन्वयति बुद्धिं
सुधीः। विशिनष्टीत्यर्थः। इति
दुर्गादासः॥
अ उ य क्ति व्यक्तिगति
म्रक्षणेषु उ अञ्जिष्यति अङ्क्ति
। य अनक्ति। क्ति अक्तोऽस्ति। व्य
क्तिः स्फुटीकरणं। शरीरभाजां
भवदीयदर्शनं व्यनक्ति काल
त्रितयेऽपि योग्यतां। इति
माघः। अनक्ति गात्रं तैलेन
जनः। इति दुर्गादासः॥
अन्तः पुराध्यक्षः पुं राज्ञो मन्तः
पुररक्षकः। तल्लक्षणं यथा।
वृद्धः कुलोद्भवः शक्तः पितृपै
तामहः शुचिः। राज्ञामन्तःपु
राध्यक्षो विनीतश्च तथेष्यते
॥ इति युक्तिकल्पतरुः॥
अन्त्यजातिः पुं चाण्डालादिः
। यथापस्तम्बः। अन्त्यजोऽपि शैव

त्तातो निवसेद्यस्य वेश्मनि स
वेत्तात्वा न कालेन कुर्य्यात्तत्र
विशोधनं॥चान्द्रायणं पराको
वा द्विजातीनां विशोधनं।प्रा
जापत्यन्तु शूद्राणां तथा सं
सर्गदूषणे॥ये स्तत्र भुक्तं प
क्वान्नं हव्यकं तेषां विनिर्दिशे
त्।तेषामपि च यैर्भुक्तं तेषा
मर्द्धं विधीयते॥तेषामपि च
यैर्भुक्तं हव्यपादो विधीय
ते॥इति प्रायश्चित्ततत्त्वं॥
अन्त्येष्टिः स्त्री चरमसंस्कारः
।स तु शवदाहादिरूपः।य
था।सपिण्डादिभिराशौचसं
त्तेऽपोन्त्येष्टिपद्धतिः।इति मु
हितमप्रतिज्ञायां स्वात्मेभदा
चार्य्यः॥तत्र प्रयोगो दाह
शब्दे द्रष्टव्यः॥तदनन्तरं द
रकपिण्ड प्रमाणं पिण्डश
ब्दे द्रष्टव्यं॥तस्य प्रयोगो
ऽत्रलिख्यते।ततः पिण्डदा
नं तत्क्रमः।तण्डुल प्रसृ
तिद्वयं द्विः प्रक्षाल्य पेषण्यां
दिशि स्वस्तिन्वं पठेत्।ततः पवि
त्रपाणिः प्राचीनावीती पाति
तवामजानुर्दक्षिणामुखो हस्त
प्रमाणां चतुरङ्गुलोच्छ्रायां द

क्षिणाग्रवां पिण्डिकां कृत्वा त
दुपरि रेखां कृत्वा दर्भानास्तीर्य
तिलान् प्रक्षिप्य।ॐ अमुकगो
त्र प्रेतामुकदेवशर्म्मन्नवनेनि
क्ष्व इत्यास्तीर्णकुशोपरि सति
लजलेनावनेजयेत्।ततस्ति
लमधु घृतादिमिश्रं तत्पिण्डं
गृहीत्वा अद्यामुकगोत्रस्य प्रेत
स्यामुकदेवशर्म्मणः एतत्प्र
थमं पिण्डं पूरकं इत्यवनेजन
स्थाने दद्यात्।ततः पिण्डपात्र
क्षालनजलेन पुनरवनेजये
त्।ॐ अमुकगोत्र प्रेतामुकदे
वशर्म्मन्नेतत्ते ऊर्णान्तु मयं
वासः।ततः आममृण्मयपात्रे ज
लाञ्जलिं पिण्डसमीपे स्थापये
त्।गन्धं माल्यञ्च यथाशक्ति
दद्यात्।वासःपर्य्यन्तं पिण्डं प्रक्षे
प्येत्।ततः पिण्डादिकं जले
क्षिपेत्।कालेऽप्यकृतचूडोपन
यनानां अष्टकत्यानान्तु ऊ
स्तरणं विनेति विशेषः।एवं कृत
चूडानामुपनयनकालात्प्राक्
दर्भोपरि पिण्डदानं।उपनयन
काले आगते त्वकृतोपनयना
नां दर्भोपरि पिण्डदानं।एवं
अष्टवर्षे विवाहकाले आगते ऊ

ढस्त्रीणां दर्भोपरि पिण्डदानं
।तत्रावाचम्य दक्षिणामुखः प्रा
चीनावीती पातितवामजानुः
त्रिकाष्ठिकोपरि मृण्मयपात्रे उ
दकं तथा पात्रान्तरे क्षीरं निधा
य प्रेतात्र स्नाहि पिब चेदं क्षी
रमिति क्रमात्।तदेकरात्र माव
श्यकं दशरात्रं फलभूयस्त्वार्थ
मिति।द्वितीय पिण्डादिषु द्विती
यं पिण्डपूरकं इत्यादि विशेषः।
द्वितीयपिण्डे मृण्मयपात्रद्वयेज
लाञ्जलिद्वयं।तृतीयादिपिण्डे पा
त्रादिवृद्धिः।येन पञ्चपञ्चाशत्
पात्राण्यञ्जलयश्च तावन्त।त्र्य
हाशौचे प्रथमदिने पिण्डानां त्र
यं।द्वितीयदिने चतुष्टयं।तृतीये
त्रयं।प्रथम मेकं द्वितीये चतु
ष्टयं।तृतीये पञ्चमं वा कल्पः।
चतुरहाशौचे प्रथम चतुर्थयो
र्द्वौ द्वौ।द्वितीय तृतीययो स्त्रय
स्त्रयः।पञ्चाहाशौचे तु प्रथमप
ञ्चमदिनयो रेकैकशः पिण्डः।
द्वितीय चतुर्थयोः द्वौ द्वौ।तृती
ये चत्वारः।षडहाशौचे द्विती
य चतुर्थदिनयो स्त्रय स्त्रयः।
शेषेष्वेकेकः।सप्ताहाशौच तृती
य चतुर्थ पञ्चम दिनेषु द्वौ द्वौ

शेषेष्वेकैकः।अष्टाहाशौचे च
तुर्थे पञ्चमदिनयो र्द्वौ द्वौ।शे
षेष्वेकैकः।नवाहाशौचे तु प
ञ्चमदिने द्वौ।शेषेष्वेकैकः।प
क्षिणी द्व्यहाशौचयोस्तु आद्य
द्वितीय दिनयोः पञ्च पञ्च पि
ण्डाः।द्वादशाहाद्यशौचे नवदिने
षु नवपिण्डाः।शेषदिने दशमः।
सद्यः शौचैकाहयो रेकाह एव
दशपिण्डाः।अशौचान्तमध्ये
पिण्डा देयः रात्रावपि॥ ॥ग
ङ्गाम्भस्यस्थिप्रक्षेप प्रयोगस्तु
।ततः स्नात्वाचम्य उदङ्मुखः
कुशत्रय जलान्यादाय ॐ तत्सद
न्युत्तार्य्ये अद्यामुकेत्यादि अमु
कस्य एतदस्थि समसंख्यक व
र्षसहस्रावच्छिन्न स्वर्गाधिकरण
क महीयमानत्वकामो अमुक
स्येतान्यस्थि खण्डानि गङ्गायां
प्रक्षिपामीति सङ्कल्प्य अपस
व्यं कृत्वा अस्थीनि पञ्चगव्येन
सिक्त्वा हिरण्य मध्वाज्यतिलैः
संयोज्य मृत्तिकापुटे स्थापयित्वा
दक्षिणहस्तेन तत्पुटक मादाय
दक्षिणां दिशं पश्यन् ॐ नमोऽस्तु
धर्मराजायेति वदन् जलं प्रवि
श्य समेष्टीतो भवन्त्विमुक्तास्थि

प्रक्षिपेत्।ततो मज्जनं कृत्वाभ्या
यसूर्य्यं दृष्ट्वा दक्षिणा मुत्सृजेत्
।इति शुद्धितत्वं॥किञ्च।साता
तपः।जल मेकाह माकाशे
स्थाप्यं क्षीरञ्च मृण्मये।पार
स्करः।मृण्मये तां रात्रिं क्षीरो
दके विहायसि निदध्युः।प्रेता
त्र स्नातीत्युदकं पिबेचेदं क्षी
रेञ्चेदं रात्राविति गौडाः।गारु
डे तु।अपक्वे मृण्मये पात्रे
दुग्धं दद्यात् दिनत्रय मित्यु
क्तं।हेमाद्रौ पाद्मेतु दशाह मु
क्तं।तस्मान्निधेय माकाशे द
शरात्रं पयो जलं।सर्वतापोप
शान्त्यर्थं मध्वश्रम विनाशनं
॥देवजानीये कारिकायां।त
त्र शैत्योपकृतये दशरात्र म
खण्डितं।कुर्य्यात् प्रदीपं तैले
न वारिपात्रञ्च मार्त्तिकं॥भो
ज्यात् भोजनकाले तु भक्तमु
ष्टिञ्च निक्षिपेत्।नामगोत्रेण
सम्बुध्य यथिस्थांपितृयज्ञवत्।
॥इति निर्णयसिन्धो ५ परिच्छे
दः॥ ॥
अन्त्रवृद्धिः स्त्री पुं रोगविशेषः।
तन्निदानादि यथा।वातकोपि
भि राहारैः शीततोयावगाह

नैः।धारणोरण भारोक्ष विषमा
ङ्ग प्रवर्त्तनैः।क्षोभणैः क्षोभिता
न्यैश्च क्षुद्रान्त्रावयवं यदा।पव
नो द्विगुणीकृत्य स्वनिवेशा द
धो नयेत्॥कुर्य्याद्वङ्क्षण सन्धि
स्थो ग्रन्थ्याभं श्वयथुं तदा।धार
णं उपस्थितस्य वेगस्य धरणं
अनुपस्थितस्य वेगस्य प्रेरणं।
विषमाङ्गप्रवर्त्तनं वक्रत्वेनाङ्ग
मोटनं।अन्यानि क्षोभणानि
च बलवद्विग्रह कठोर यत्नाक
र्षणादीनि।तैः क्षोभितः सं ह
ष्य सञ्चालितः पवनः यदा
क्षुद्रान्त्रावयवं द्विगुणीकृत्य
स्वनिवेशादधोनयेत्।तदा वं
क्षणसन्धिस्थः सन् वंक्षणसन्धौग्र
न्थिरूपं श्वयथुं कुर्य्यात् इत्यर्थः
॥उपेक्षितावस्था अन्त्रवृद्धे रवस्था
माह।उपेक्ष्यमाणस्य मुष्कवृद्धि-
र्हि माध्मान रुक स्तम्भवतीञ्च
कुर्य्यात्।सपीडितो ऽन्तः स्वनवा
न् प्रयाति प्रध्मापयन्नेति पुनश्च
मुष्कः॥उपेक्ष्यमाणस्य वृद्धि मि
त्यर्थः।मुष्कवृद्धिं मुष्कवृद्धिमा
ध्मान रुक स्तम्भवती कुर्य्यात्
तथाध्मान मुदरे रुक मुष्कयो र्मु
ष्कयोः स्तम्भो गात्रे तद्युक्तां

कुर्य्यात् इत्यर्थः।तेजोप्याह।
अन्त्रं द्विगुण मादाय वातो न
यति वंक्षणं।वंक्षणान्मुष्का मु
क्तं फलकोष्ण्या प्रपद्यते॥मुष्क
वृद्धिः।अन्त्रः उदरे प्रध्मापयन्
आगमन मार्गे मुच्छूनं कर्ष्वेत् ए
ति प्रयाति॥असाध्य माह।य
आन्त्रावयवश्लिष्टान्मुष्कयो र्वा
तसञ्चयात्।स्यादन्त्रवृद्धिः सो
ऽसाध्यो वातवृद्धिः समाकृतिः॥
सकीटक स्यादित्याकाङ्क्षाया मा
ह।वातवृद्धि समाकृतिः॥सामी
प्यादन्नैव त्रय माह।अत्यभिष्य
न्दि गुर्वन्न मुष्क हत्याभिघाश
नात्।करोति ग्रन्थिवच्छोथं दो
षो वंक्षण सन्धिषुज्वर शूलाङ्ग
सादाढ्यं तं ब्रध्न मिति निर्द्दिशेत्
॥अथ वृद्धे श्चिकित्सा।वृद्धाव
न्यासनं मार्ग मुपवासं गुरूणि
च।वेगाघातं दृढयानं व्याया
मं मैथुनं त्यजेत्॥वातवृद्धौ पि
बेत् स्निग्धं यथाप्राप्तं विरेचनं
सक्षीरंवा पिबेत् तैलं मास मे
रण्डसम्भवं॥गुग्गुल्वेरण्डजं
तैलं गोमूत्रेण पिबेन्नरः।वा
तवृद्धिं जयत्याशु चिरका
लानुबन्धिनीं॥पित्तग्रन्थ्य

कर्म्मैणैतं पित्तवृद्धि मुपाचरेत्।
जलौकाभि र्हरेद्रक्तं वृद्धौ पित्त
समुद्भवे॥चन्दनं मधुकं पद्म
मुशीरं नीलमुत्पलं।क्षीरपिष्ट
प्रलेपेन दाह शोथ रुजापहं॥
त्रिकटुः त्रिफलाक्वाथं सक्षारं
लवणं पिबेत्।विरेचन मिदं
श्रेष्ठं कफवृद्धि विनाशनं॥ले
पनं कटुतीक्ष्णोष्णं स्वेदनं रु
क्षमेवच।परिषेकोप नाहो च
सर्व्वमुष्ण मिहोष्यते॥मुहर्मुह
र्जलौकोभि शोणितानं रक्तजे ह
रेत्।पिबेद्विरेचनं वापि शार्कर
क्षौद्र संयुतं॥शीत मालेपनं
सर्व्वं सर्व्वं पित्तहरं तथा।पित्तव
द्धिक्रमं कुर्य्यादामे पक्वे च
रक्तजे॥स्वेदो मेदः समुत्थे तु
लेपयेत् सुरसादिना।शिरो
विरेचनद्रव्यैः सुखोष्णै र्मूत्र
संयुतैः॥संस्वेद्य मूत्रसम्भवं
वस्त्रपट्टेन वेष्टयेत्।सीवन्याः
पार्श्वतो ऽधस्तात् विध्येद्व्रीहि
मुखेन वै॥मुष्कशोथ समाकु
न्या मेदवृद्धौ चिकित्सा।व्री
हिमुखेन शस्त्रविशेषेण।अ
गच्छन्त्या अस्तवर्त्ता।तैलमे
रण्डजं पीत्वा बलासिद्धं पयो।

न्मितं।आध्मान शूलोपचिता म
न्त्रवृद्धिं जयेज्ज्वरः॥रास्ना यष्ट्यमृ
तैरण्ड बलारग्वध गोक्षुरैः।पटो
लेन वृषेणापि विधिना विहितं
शृतं॥रुबुतैलेन संयुक्तं मन्त्र
वृद्धिं व्यपोहति।रास्नादिक्वाथः
॥गन्धर्वहस्ततैलेन वृषेणापि
युतं पिबेत्।विशालामूलजं
चूर्णं वृद्धिं हन्यान्न संशयः॥
विशाला इन्द्रवारुणी॥वचा
सर्षप कल्केन प्रलेपः शोथ
नाशनः।शिग्रुत्वक् सर्षपैः पि
ष्टैः शोथ श्लेष्मानिलापहः॥मु
स्तं हियागन्धं मृतान्येता
नि योजयेत्।लोहं रङ्गं तथा ता
म्रं कांस्यं क्वाथ विशोधितं॥
तालकं तुत्थकं वापि तथा श
ङ्खं वराटकं।त्रिकटु त्रिफला च
व विडङ्गं वृद्धदारकं॥कर्च्चूरं
मागधीमूलं पाठां सहवुषं
वचां।एलाबीजं देवकाष्ठं त
था लवणपञ्चकं॥एलादि
समभागानि चूर्णयेदथ कारये
त्।कषायेण हरीतक्या वटि
कां कर्कसम्मितां॥एकैका वटि
का यस्तु निगिलेद्वारिणा सह
अण्डवृद्धिरसाध्योपि नश्यत्यपि निश्चि

तं॥वृद्धिवाधिका वटी॥ ॥
अथ ब्रध्नस्य चिकित्सा।भृष्टे
रण्डतैलेन सम्यक् कल्को भ
याभवः।कृष्णा सैन्धव संयुक्तो
ब्रध्नरोगहरः परः॥अजाजी हु
वुषा कुष्ठं गोमेद बदरान्वितं।
काञ्जिकेन तु संपिष्टं तल्लेपो
ब्रध्नजित् परः॥गोमेदं पत्रे।त
थाच निघण्टौ धन्वन्तरिः।प
त्रं हल्लीढ्कयं।इति वृद्धि ब्रध्नाधि
कारः।इति भावप्रकाशः॥ ॥
अन्द न क द कत्तये।दकत्त
यो दृष्टिरहितो भावः।तेनाक
र्मको ऽयं।सत्ता जीवन दर्प
भीति शयन क्रीडा निवास
तयाव्यक्तध्वान नभागति
स्थितिज्वर लज्जा प्रमादोदये
।मोह लोटन वेग युद्ध दहन
ख्याति तरोन्मादके शुद्धि
खेद पलायन भ्रमणके
शान्तौ स्मृतौ मज्जने॥ दृप्तौ
जागर शोष वक्रगमनोत्
साहे मृतौ संशये ग्लानौ
मन्दगतौ च नृत्य पतने चे
ष्टा कृथौ रोदने।हेडौ हाव
कृतौ च सिद्धि विरतौ
हर्षोपदेशे वलेक

हृष्यं वाग् गोमेदं वग्ना

म्योद्वेग निमेष भङ्ग वतनो
द्ये धातवो ऽकर्मकाः॥दो
वैस्यादिषु चार्थेषु वर्त्तमानास्त
धातवः।वाचका भावमात्रस्य
यत स्तस्मादकर्मकाः॥कौ
टिल्यादिषु चार्थेषु प्रोक्ता ये
ते तु धातवः।तद्भावे ऽकर्म
काः स्यु स्तदन्यकृत्या सकर्म
काः॥इति।अन्नयति अन्नाप
यति हृद्यः।इति दुर्गादासः॥
अन्नं क्ली सिद्धतण्डुलो।यथा।
शास्यं क्षेत्रगतं प्राहुः सतुषं धा
न्य मुच्यते।आमं वितुष मित्यु
क्तं स्विन्न मन्न मुदाहृतं॥इति
आह्निकतत्वधृतवशिष्ठवचनं॥त
त्पर्य्यायः।अन्धः १ कशिपुः २ जी
वातुः ३।इति जटाधरः॥कूरं
४ आहपिकं ५ जीवन्ति ६
प्रसादनं ७ इति शब्दरत्नाव
ली॥ ॥अन्नसाधनं यथा स
यौतां स्तण्डुलान् स्फीतां स्तोये
पञ्चगुणे पचेत्।तद्भक्तं प्रस्रुतं
चोष्णं विशदं गुणवन्मतं॥तद्
गुणाः।भक्तं वह्निकरं पथ्यं ते
र्पणं रोचनं लघु।अधौत म
स्रुतं शीतं गुर्व्वरुच्यं कफप्रदं
॥इति भावप्रकाशः॥ ॥

तद्दानफलं यथा।वारिद स्तृ
प्तिमाप्नोति सुख मक्षय्य मन्नदः
॥अन्नस्य प्रजापति दैवतात्व
क्षयमक्षयप्राप्तिं फलं।प्रतिग्रहे
मृष्टिग्रहणं।इति श्राद्धतत्वं॥
अपिच।ब्रह्महत्याकृतं पापं
अन्नदानात् प्रणश्यति।अन्नदः
पापकर्म्मापि हतः स्वर्गे मही
यते॥इति प्रायश्चित्ततत्वं॥ ॥
अथ प्रजापतिदैवतात्वदानाव
र्तः।तत्र अन्नदानस्तुतिः।ब्रह्मपु
राणे।अन्ने प्रतिष्ठिता लोकास्त्र
यास्तत्वं परं।तस्मादन्नं प्रशंस
न्ति सदैव पितृमानवाः॥अन्नस्य
हि प्रदानेन नरो याति परां ग
तिं।सर्व्वकामसमायुक्तः प्रेत्य
चेहाधिकं शुभं॥तथा।अन्न
मूर्जस्करं लोके दत्वोर्जस्वी
भवेन्नरः।सतां पन्थान माश्रि
त्य सर्व्वपापैः प्रमुच्यते॥महाभा
रते।अन्नदः पशुमान् पुत्री ध
नवान् भोगवानपि।प्राणवां
श्चापि भवति रूपवांश्च तथा
नृप॥तथा।अन्नदस्य मनुष्य
स्य बल मोजो यशांसि च की
र्त्तिश्च वर्द्धते नित्यं त्रिषु लोकेषु
पार्थिव॥आग्नेयपुराणे।अन्न

न्मितं॥आध्मान मूलोपचिता म
न्त्र हिंहिंनयेच्चरः॥रास्ना यष्ट्यमृ
तैरण्ड बलारग्वध गोक्षुरैः॥एरं
डतैलेन हपेणापि विधिना विहितं
स्रुतं॥रुवुतैलेन संयुक्त मन्त्र
हिंहिं व्यपोहति॥रास्नादिक्वाथः
॥गन्धर्वहस्ततैलेन हपेणापि
युतं पिवेत॥विशालामूलज
चूर्णं हिंहिं हन्यान्न संशयः॥
विशाला इन्द्रवारुणी॥वचा
सर्षप कल्केन प्रलेपः शोथ
नाशनः॥शिग्रुत्वक सर्षपैः पि
ष्टैः शोथ श्लेष्मानिलापहः॥मु
ष्कमूलं हियागन्दं मूत्रान्येता
नि योजयेत्॥लोहं रङ्ग तथा ता
म्रं कांस्य क्वाथ विशोधितं॥
तालकं तवकं वापि तथा श
ङ्खं वराटकं॥त्रिकटु त्रिफला च
व्य विडङ्ग देवदारुकं॥कर्चूरं
मागधीमूलं पाठा सहवुषा
वचा॥एलावीजं देवकाष्ठं त
था लवणपञ्चकं॥एलादि
समभागानि चूर्णयेदथ कारये
त॥कषायेण हरीतक्या वटि
कां दद्यात् समिता॥एकांका वटि
का यस्य निगुलेद्धारिता सह
अण्ड वृद्धिरसाध्योपि नश्यनश्यत्यसं

शयं॥वृद्धिवाधिका वटी॥ ॥
अथ ब्रध्नस्यचिकित्सा॥भृष्टं चै
रण्डतैलेन सम्यक कल्को ऽभ
याभवः॥कृस्ना सैन्धव संयुक्तो
ब्रध्नरोगहरः परः॥अजाजीह
वुषा कुष्ठं गोमेद बदरान्वितं॥
काञ्जिकेन तु संपिष्टं तल्लेपा
ब्रध्नजित परः॥गोमेदं पत्रं॥त
थाच निचसेठा धन्वन्तरिः॥प
र्वंहलाञ्छयो॥इति हरि ब्रध्नादि
कारः॥इति भावप्रकाशः॥ ॥
अद त क हकत्तये॥हकत्त
यो हष्टिरहितीभावः॥तेनाक
र्मिको ऽयं॥सत्ता जीवन दर्प
भीति शयन क्रीडा निवास
त्याख्यानकथ्यान नभागति
स्थितिजरा लज्जा प्रमादोदये
॥मोह लोटन वेग युद्ध दहन
ख्याति त्रासोन्मादके शुद्धि
खेद पलायन भ्रमणके
श्रान्तौ स्तुतौ मज्जने॥ दर्पे
जागर शोष वक्रगमनोत्
साहे मृतौ संशये ग्लानौ
मन्दगतौ च नृत्य पतने चे
ष्टा क्रुधौ रोदने॥हर्षो हाव
कृतौ च सिद्धि विरतौ
हर्षोपदेशे बलेक

हृद्यं वातं गोमेदं वृषला

ष्मोद्वेग निमेष भङ्ग वततो
द्वे धातवो ऽकर्म्मकाः॥दो
ह्स्यादिषु चार्थेषु वर्त्तमानास्तु
धातवः॥वाचका भावमात्रस्य
यत स्तस्मादकर्म्मकाः॥को
टिल्यादिषु चार्थेषु प्रोक्ता ये
ते तु धातवः॥तद्भावे ऽकर्म्म
काः स्यु स्तद्वत्कृत्या सकर्म्म
काः॥इति॥अन्नयति अन्याप
यति हठः॥इति दुर्गादासः॥
अन्नं क्ली सिक्थतण्डुलौ॥यथा॥
शास्य लेत्रगतं प्राहुः सतुषं धा
न्य मुच्यते॥आमं वितुष मित्यु
क्तं स्विन्न मन्न मुदाहृतं॥इति
आह्विकतत्व धृतवशिष्ठवचनं॥तत्
पर्यायः॥अन्नं १ कशिपुः २ जी
वातुः ३॥इति जटाधरः॥कूरं
४ आहपिकं ५ जीवनं ६
प्रसादनं ७ इति शब्दरत्नाव
ली॥ ॥अन्नसाधनं यथा सु
धौतां स्तण्डुलान् स्थलीं स्तोये
पञ्चगुणे पचेत॥तद्भक्तं प्रसृतं
चोत्स विषदं गुणवन्मतं॥तद्
गुणाः॥भक्तं वह्निकरं पथ्यं त
र्पणं रोचनं लघु॥अधौत म
स्रुतं शीतं गुर्वरुच्यं कफप्रदं
॥इति भावप्रकाशः॥ ॥

तद्दानफलं यथा॥वारिद स्तृ
प्तिमायाति सुख मक्षय्य मन्नदः
॥अन्नस्य प्रजापति र्देवता॥अ
क्षयमन्नप्राप्तिंफलं॥प्रतिग्रहे
मष्टिग्रहणं॥इति शुद्धितत्वं॥
अपि च॥ब्रह्महत्याकृतं पापं
अन्नदानात् प्रणश्यति॥अन्नदः
पापकर्म्मापि हतः स्वर्गे मही
यते॥इति प्रायश्चित्ततत्वं॥ ॥
अथ प्रजापतिर्देवतान्नदानाव
र्तः॥तत्र अन्नदानस्तुतिः॥ब्रह्मपु
राणे॥अन्ने प्रतिष्ठिता लोकास्त्र
यस्तस्मात्पर॥तस्मादन्नं प्रशंस
न्ति सदैव पितृमानवाः॥अन्नस्य
हि प्रदानेन नरो याति परां ग
तिं॥सर्वकामसमायुक्तः प्रेत्य
चेहाधिकं सुभं॥तथा॥अन्न
मर्जेखिलं लोके दत्वोर्जस्वी
भवेन्नरः॥सतां पन्थान माश्रि
त्य सर्वपापैः प्रमुच्यते॥महाभा
रते॥अन्नदः पशुमान् पुत्री ध
नवान् भोगवानपि॥प्राणवां
श्चापि भवति रूपवांश्च तथा
नृप॥तथा॥अन्नदस्य मनुष्य
स्य बल मोजो यशांसि च॥की
र्त्तिश्च वर्द्धते शश्वत्त्रिषु लोकेषु
पाण्डव॥आग्नेयपुराणे॥अन्न

स्तत्यनन्तरं तस्मादन्नं सदा दे
हि श्रद्धया नृपसत्तम।ब्रह्महत्या
दिकंपापं अन्नदस्य प्रणश्यति॥
तथा।अन्नदानात् परंदानं नभू
तं न भविष्यति।पुण्यं यशस्य मा
युष्यं बल पुष्टि विवर्द्धनं॥सर्व्वम
न्नस्य दानेन भवतीति विनिश्च
यः।महाकाञ्चन चित्राणि सेवि
तान्यप्सरोगणैः॥अन्नदस्योपति
ष्ठन्ति विमानानि सुरालये।भ
क्ष्यभोज्यमयाः शैला दिव्यह
र्म्यालङ्कृताः हृष्टपुष्ट जनानि
त्य मुपतिष्ठन्ति चायतः।हस्त्य
श्वरथयानैश्च क्रीडमानाश्च ते
नराः॥पद्मपुराणे।आपर्व्वत स
री वापी पृथिवी सर्व्वकामदा।
विधिना तेन सा दत्ता योऽन्नं द
दाति सर्व्वदा॥स्थविरे यः प्र
यच्छेत अन्नं श्रद्धासमन्वितः।
ब्रह्मणो भवने स वै ब्रह्मणा स
हमोदते॥चान्द्रवारुण लोका
श्च याम्याः कौवेरका स्तथा।गो
लोको ब्रह्मलोकश्च सर्व्वे चा
न्ने प्रतिष्ठिताः॥ददत् कन्या
मलङ्कृत्य हस्त्यश्वञ्च महाधनं
।अन्नदानस्य चैतानि कलां नार्ह
न्ति षोडशीं॥विस्मयश्चान्तरे।

।यौवनो ग्रसते ग्रासान् विद्वान्
विप्रः सुसंस्कृतः।अन्नप्रदस्य
तावन्तः क्रतवः परिकीर्त्तिताः
॥अथान्नदानधर्म्मः।यमः।आ
दरेणच भक्त्या च यदन्न मुपदी
यते।तत् प्रीणयति पात्राणि मा
मृतं मानवर्ज्जितं॥दुर्लभस्तु सु
दा दाता सुदा भोक्ता च दुर्लभः
।सुदा दाता च भोक्ता च तावुभौ
स्वर्गगामिनौ॥योऽन्नं बहुमतं
यश्चान्नं नावमन्यते
भुङ्क्ते यस्मान्नं प्रीतितो दद्यात्
तस्मान्नमुपतिष्ठते॥प्रीतितोऽ
न्नञ्च यो दद्यात् गृह्णीयात् यो
ऽभिपूज्य चाप्रीतितोऽस्य म
श्नाति दूजितः स्वर्गमश्नुते॥यो
दद्याद्विप्रियेणान्नं यश्चान्नं ना
भिनन्दति।तावुभौ नरके मग्नौ
वसेतां शरदः शतं॥ ॥अथा
न्नदानविशेषफलविशेषपरि
भाषा।कूर्म्मपुराणे।गृहस्था
यान्नदानेन फलं नाप्नोति
मानवः।आम मेवास्य दा
तव्यं दत्वाप्नोति
परां गतिं।अन्नदानेन पक्वा
न्न दानेन फलं नाप्नोति नि.
गृहस्थायामान्नदानेन यादृशं
फलं तादृशं पक्वान्नदानेन ना

प्नोतीत्यर्थः।गृहस्थस्यामान्न
दानेसति तस्य पञ्चयज्ञ निष्प
त्तेः॥ ॥अथ सामान्यान्नदानं।न
न्दिपुराणे।अन्नाद्भूतानि जाता
नि देवा ह्यन्नाद्यकांक्षिणः।तत
स्य पात्रादिविधि र्विना श्राद्धे प्र
कीर्त्तितः॥तथा।अपि कीट पत
ङ्गानां शुनां चाण्डालयोनिनां
।दत्वान्नं लोके माप्नोति प्राज्ञा
पत्यं समासतः॥बान्धवेभ्योऽ
तिथिभ्यो ऽन्नं पुत्रेभ्योऽन्नं प्र
यच्छतः।दीनानाञ्च कृपणानाञ्च
स्वर्गः स्यादन्नदायिनां॥ग्रासमा
त्रं नरोदत्वा अन्नाना मन्नगृध्नवे
।स्वर्गेवसेत् समानान्तु शतं भोगै
र्म्मनोरमैः॥ग्रासे ग्रासे फलं ह्ये
तद्विधिवत् परिकीर्त्तितं।एत
द्देवायतने प्रोक्तं द्विगुणं गुणय
गौरवं॥अन्नं विना कृशाङ्ग
स्य दत्वान्नं देशकालतः।फलं
पञ्चगुणं प्रोक्तं सर्व्वभावसम
न्वितं॥सर्व्वभावसमन्वित इति स
ङ्कल्पनं।अत्र यजमानः प्राणिमा
त्रेभ्यो गृहीतदक्षिणताम्रपात्रः
उदङ्मुखः सङ्कल्प यथेष्ट का
लावधि अन्नं दद्यात्।तद्यथा।
ॐ नन्दिपुराणोक्त प्राणिमात्रा

न्नदान फलप्राप्तिकामोऽहं प्राणि
भ्यो ऽन्नंदास्ये।तदवधि यथा स
म्भवं प्राणिमात्रेभ्यः स्वगृहे आ
न्यत्र वा भक्तशालां कृत्वा अवि
च्छिन्न मन्नं देयं।अतएव धार्म्मि
कास्ताम्रपट्टलिखितां भूमिं सम्
प्रकल्प्य आचन्द्रार्कस्थायिनीं भ
क्तशालां ददाति॥वायुपुराणे।
त्रिष मन्नम मक्लिष्टं दद्यादन्नं
बुभुक्षिते सैञ्जनं सदास्निग्धं भ क्ष
क्ष्यं सत्कृत्य यत्नतः॥त्रिश मति
थिप्राप्त्यनन्तर मेव।अक्लिष्ट मनु
पतन्।भक्ष्य मप्रतिषिद्धं॥तरुणा
दित्य सङ्काशं विमानं हंसवाहनं
।अन्नदो लभते नित्यः कल्पको
टी स्तथैव च॥अन्नदानात् परं
दानं नभूतं न भविष्यति।अन्ना
द्भूतानि जायन्ते जीवन्ति च न
संशयः॥जीवदानात् परं दानं न
किञ्चिदपि विद्यते।अन्नाज्जीव
ति त्रैलोक्यं त्रैलोक्यस्येह तत्फ
लं॥बुभुक्षितेभ्योऽन्नं पूर्व्ववत्
सङ्कल्प्य दद्यात्।ॐ वायुपुराणो
क्तान्नदानफलप्राप्तिकामोऽहं
बुभुक्षितेभ्यः सव्यञ्जनं स्निग्ध
मन्नं दास्ये।एवं सङ्कल्प्य बुभु
क्षितानन्विष्य तेभ्यो य

योक्त मन्त्रं दद्यात्॥महाभारते
आन्नाय स्थितायान्नं यः प्रय
च्छति भूमिप।स्वायम्भुवं महत्
स्थानं स गच्छति नराधिप॥आ
न्नायस्थितायान्नं पूर्ववत् सङ्क
ल्प्य दद्यात्।ॐस्वायम्भुवस्थान
प्राप्तिकामोऽहं आन्नाय स्थिताया
न्नंदास्ये।इति संकल्प्य यथाकाले
आन्नं स्थित मनुसन्धायान्नं त
स्मै दद्यात्॥तथा।सद्यो ददाति
यश्चान्नं सदैकाग्रमना नरः।न
स दुर्गाण्यवाप्नोति ह्येवमाह
पराशरः॥अतीतसमयेसद्ब्राह्म
ण क्षत्रिय वैश्य शूद्रेभ्यो ऽन्नं
पूर्ववत् सङ्कल्प्य दद्यात्।ॐम
हाभारतोक्तसद्योवरान्नदान
फल प्राप्तिकामोऽहं सद्यो ऽन्नं
दास्ये।ततः प्रभृति अभिमतका
ले सद्योब्राह्मणादिभ्यो ऽन्नंद
द्यात्॥ ॥तथा।यो दद्यादप
रिक्लिष्ट मन्न मध्वनि वर्त्तते।
आन्तायादृष्टपूर्वाय तस्य पुण्य
फलं महत्॥अपरिक्लिष्ट मन्नप
हतं।यथोक्तप्राणेन ऽन्नं पूर्वव
त् सङ्कल्पयेत्।ॐमहापुण्यफ
लप्राप्तिकामो ऽहं आन्ताया ध्व
गाय अदृष्टपूर्वायान्नं दास्ये।

इति सङ्कल्प्य यथाकाल मध्व
ग मन्विष्य यथोक्तमन्नं तस्मै द
द्यात्।अत्राध्वनि वर्त्तते इति शात
विदेशात् पथिगच्छते पथिका
य वर्त्मनि कुटीं कृत्वा तरुतले
वान्नं दद्यात्॥विस्नुधर्म्मोत्तरोक्तमृ
ष्टान्नं मानवो दत्वा मृष्टान्नार्थि
निकाङ्क्षिते।अक्षयं फल मा
प्नोति स्वर्गलोकञ्च गच्छति॥मृ
ष्टं संस्कृतं।सव्यञ्जनमन्नं पूर्वव
त्सङ्कल्प्य तदर्थिभ्यो दद्यात्।विस्नु
धर्म्मोत्तरोक्त मृष्टान्नकाङ्क्षिगोचर
मृष्टान्नदानफलप्राप्तिकामो ऽहं
यथाशक्ति मृष्टान्नार्थिभ्यो मृष्टम
न्नं दास्ये।इति सङ्कल्प्य मृष्टान्ना
र्थिनो ऽनुसन्धाय तेभ्यो यथा
शक्ति मृष्टान्नं दद्यात्॥तथान्न
दानप्रकरणे।सहस्र परिवेष्टा
स्तु नरकन्तु न गच्छति।विमा
नेनार्कवर्णेन स्वर्गलोके महीं
यते॥सहस्रपरिवेष्टा सहस्राय
मनुष्येभ्यो ऽन्नप्रदः।यथासम्भवं
सहस्राय मनुष्येभ्यो नित्य मन्नं
पूर्ववत् सङ्कल्प्य दद्यात्।ॐ
विस्नुधर्म्मोत्तरोक्त सहस्रपरिवे
ष्टानफलप्राप्तिकामोऽहं यथा
सम्भवं सहस्राय मनुष्येभ्यो अ

न्नमादिसहितमन्नंदास्ये।इति
सङ्कल्प्ययथाशक्तिनानादिनैः
सहस्रं मनुष्यान् भोजयेत्।दे
वलः।कृत्वापि पातकं कर्म्म यो
दद्यादन्न मीप्सितं।ब्राह्मणानां
विशेषेण स निहन्त्यात्मन स्तमः
विशेषेण इत्यभिधानात् अ
ब्राह्मणेपि फलमेतद्भवत्येव
एवञ्च सामान्येनान्नदान मिदं
।इप्सित मित्यर्थिन स्पृहा यथा
यथ मभिमत मन्नमुत् पाद्य ते
भ्यः पूर्ववत् सङ्कल्प्य दद्यात्।
ॐब्राह्मणप्रमुख नानावर्णेभ्य
आत्मीयतमः क्षयकामोऽहं य
थासम्भवं इप्सित मन्नं दास्ये
।ततः प्रभृति यथायथ मुप
स्थितेभ्य इप्सित मन्नं दद्यात्
।इत्यादि वल्लालसेनकृत दा
नसागरे अन्नदानावर्त्तः॥
अन्नपूर्णा स्त्री स्वनामख्यातेदे
वीविशेषः।तन्मन्त्रादि यथा।
माया हृद्भगवत्यन्ते माहेश्वरि
पदं ततः।अन्नपूर्णे दयुगलं
मनुः सप्तदशाक्षरः॥कल्पे च
।प्रणवाद्या यदा देवी तदा स
म्पद्प्रदात्तरी।अन्नप्रदा बोत्तरा
च सदा विभवदायिनी॥माया

द्या च यदा देवी तदा सा सक
लेष्टदा।श्रीबीजाद्या यदा देवी
तदा सर्वविवर्द्धिनी॥वाग्बीजा
द्या यदा विद्या वागीशत्व प्रदा
यिनी।कामाद्या च यदा विद्या स
र्वकामप्रदायिनी॥तारमायादि
काविद्या भोगमोक्षैकदायिनी।
माया श्रीयुग्मबीजाद्या सदा वि
भवदायिनी॥श्रीमाया युग्मबी
जाद्या सर्वसम्पत्तिकारिणी॥ एषां
पूजाप्रातः कृत्यादिपीठन्यासान्तं
विधाय हस्त्यस्य केशरेषु मध्ये
षु च भुवनेश्वरी पीठमन्त्रन्तं पी
ठशक्तीन्यस्य ऋष्यादिन्यासंकु
र्य्यात्।यथा शिरसि ब्रह्मणे ऋ
षयेनमः।मुखे पंक्तिछन्दसेनमः
।हृदि अन्नपूर्णायै देवतायैनमः
।तत्रैव।एतेषां मन्त्रराशीनां ऋ
षिर्ब्रह्मा उदाहृतः। पंक्तिः छ
न्दः समाख्यातं देवता चान्नपूर्णि
का॥ततः कराङ्गन्यासो।ह्रीं
अङ्गुष्ठाभ्यां नमः।ह्रीं हृदयाय
नमः।इत्यादिसर्वत्र मायाबी
जेनकुर्य्यात्।तथा च निबन्धे।
अङ्गानि मायया कुर्य्यात् ततो
देवीं विचिन्तयेत्।कल्पे च।
यद्बीजाद्या भवेद्विद्या तदी

जोनाङ्गकल्पना॥ ॥ततो ध्यानं
।रक्तां विचित्रवसनां नवचन्द्रचू
डा मन्नप्रदाननिरतां स्तनभार
नम्रां।नृत्यन्त मिन्दु सकलाभर
णं विलोक्य हृष्टां भजे भगवती
भवदुःखहन्त्री॥एवं ध्यात्वा मा
नसैः संपूज्य शंखस्थापनं कु
र्य्यात्।ततः सामान्योक्तपीठपू
जां विधाय भुवनेश्वरी मन्त्रोक्त
जयादि पीठमन्त्रैः पीठपूजां
विधाय पुनर्ध्यात्वा आवाहनादि
पंचपुष्पाञ्जलि दानपर्य्यन्तं वि
धाय आवरणपूजा मारभेत्।आग्नेय
या केशरेष्वग्निकोणे ह्रीं हृदया
यनमः।नैरृते ह्रीं शिरसे स्वाहा
।वायव्ये ह्रूं शिखायै वषट् ऐशान्यां
ह्रैं कवचाय हुं।मध्ये ह्रौं नेत्रत्रया
य वौषट्।चतुर्दिक्षु ह्रः अस्त्राय फ
ट्।अष्टदलेषु पूर्वादिषु ब्राह्म्यै मा
हेश्वर्य्यै कौमार्य्यै वैष्णव्यै वारा
ह्यै इन्द्राण्यै चामुण्डायै महाल
क्ष्म्यै प्रणवादि नमोन्तेन पूजये
त्।तद्बहिर्वा दलेषु पूजयेदेता
आस्याद्याः क्रमशः
स्वधीः। भृद्रस्य प्रणव श्च
न्तर्दशास्वरो विन्दुयुक्तः।
कालिकापुराणे मन्त्र

स्य सेवकरणे उक्तत्वात्।तत
इन्द्रादीन् वज्रादींश्च पूजयित्वा
धूपादि विसर्जनान्तं कर्म समा
पयेत्॥ ॥अस्य पुरश्चरणजपः
षोडशसहस्रसंख्याः।तथा च।
यथाविधि जपेन्मन्त्रं वसुयुग्म
सहस्रकं।साज्येनान्नेन जुहु
यात्दशांशं मनन्तरं।अयंमन्त्रः
प्रणवादि रष्टादशाक्षरः।मायादिः
श्रीबीजादिश्च।तथा मायां विना
प्रणवादिः कामादिः श्रीबीजा
दिः वाग्भवादिश्च सप्तदशाक्ष
रः।कवचे तथा प्रतिपादनात्।
विशेषस्तु यच्छ्रीबीजादिका मन्त्र
स्तेनैवाङ्गप्रकल्पना॥अथान्नपू
र्णास्तोत्रं।नमः कल्याणदे देवि
नमः शङ्करवल्लभे।नमो भक्त
प्रिये देवि अन्नपूर्णे नमोस्तु ते
॥नमो मायागृहीताङ्गि नमः
शङ्करवल्लभे।माहेश्वरि नम
स्तुभ्य मन्नपूर्णे नमोऽस्तु ते
॥महामाये शिवधर्म्मपत्नीरू
पे हरप्रिये।वाञ्छादात्रि सुरेशा
नि अन्नपूर्णे नमोऽस्तु ते॥उद्य
द्भानुसहस्राभे नयनत्रयभूषि
ते।चन्द्रचूडे महादेवि अन्नपूर्णे
नमोऽस्तु ते॥ विचित्रवसने

देवि अन्नदानरते ऽनघे।शिव
नृत्यकृतामोदे अन्नपूर्णे नमो
ऽस्तु ते॥साधकाभीष्टदे देवि
भवदुःखविनाशिनि।कुच भार
नते देवि अन्नपूर्णे नमोस्तु ते
॥षट्कोणपद्ममध्यस्थे षडङ्ग
युवतीमये।ब्रह्माण्यादि स्वरूपे
च अन्नपूर्णे नमोऽस्तु ते॥दे
वि चन्द्रकृतापीडे सर्वसाम्रा
ज्यदायिनि।सर्व्वानन्दकरे देवि
अन्नपूर्णे नमोऽस्तु ते॥इन्द्राद्य
र्चितपादाब्जे रुद्रादि रूपधारि
णि।सर्व्वसंपत्प्रदे देवि अन्नपूर्णे
नमोस्तु ते॥पूजाकाले पठेद्य
स्तु स्तोत्र मेतत् समाहितः।त
स्य गेहे स्थिरालक्ष्मी जायते
नात्र संशयः॥प्रातःकाले प
ठेद्यस्तु मन्त्रजाप पुरःसरं।त
स्य चान्नसमृद्धिः स्याद्वर्द्धमाना
दिने दिने॥यस्मै कस्मै न दातव्यं
न प्रकाश्यं कदाचन।प्रका
शात् कार्य्यहानिः स्यात्तस्मा
द्यत्नेन गोपयेत्॥इत्यन्नपूर्णा
स्तोत्रं समाप्तं॥अथ अन्नपूर्णा
कवचं॥कथिता आन्नपूर्णीया
याः विद्याः सुदुर्लभाः।कृप
या कथिताः सर्व्वाः श्रुताश्चाधिग

तामया॥साम्प्रतं श्रोतु मिच्छा
मि कवचं यत्पुरोदितं।त्रैलोक्य
रक्षणं नाम कवचं मन्त्रविग्रहं
॥ईश्वर उवाच।शृणु पार्व्वति व
क्ष्यामि सावधानावधारय।त्रै
लोक्यरक्षणं नाम कवचं ब्रह्म
रूपकं॥ब्रह्मविद्यास्वरूपञ्च म
हदैश्वर्य्यदायकं।पठनाद्धारणा
न्मर्त्यै स्त्रैलोक्यैश्वर्य्यभाग्भवेत्॥
त्रैलोक्यरक्षणस्यास्य कवच
स्य ऋषिः शिवः।छन्दो विराडन्न
पूर्णा देवता सर्व्वसिद्धिदा॥धर्म्मा
र्थकाम मोक्षेषु विनियोगः प्रकी
र्त्तितः।ह्रीं नमो भगवत्यन्ते माहे
श्वरिपदं ततः।अन्नपूर्णेततः
स्वाहा चैषा सप्तदशाक्षरा॥पा
तु मां अन्नपूर्णा सा या ख्याता भु
वनत्रये।विमाया प्रणवाद्यैषा त
था सप्तदशाक्षरी।पात्वन्नपूर्णा
सर्व्वाङ्गं रत्नकुम्भान्नपात्रदा।श्री
बीजाद्या तथा चैषा द्विरष्टार्णा त
था मुखं।प्रणवाद्या क्रूं वो पातु क
ण्ठं वाग्बीजपूर्विका।कामबीजा
दिका चैषा हृदयन्तु महेश्वरी।ता
रं श्रीं ह्रीं नमोस्ते च भगवति प
दं ततः।माहेश्वरिपदं चान्नपूर्णे
स्वाहेति पातु मे।नाभिमेकोन

विंशार्णा पायान्माहेश्वरी सदा ।
तारं माया रमा कामः षोडशार्णा
स्ततः परं॥ शिरःस्था सर्वदा
पातु विंशत्यर्णात्मिका च या।
करौ पादौ सदा पातु रमा का
मोऽवस्तथा॥ ध्वजन्तु सर्वदा
पातु विंशत्यर्णात्मिका च या।
अन्नपूर्णा महाविद्या ह्रीं पातु भुव
नेश्वरी॥ शिरः श्रीं ह्रीं तथा क्लीं
त्व त्रिपुरा पातु मे गुदं। षडक्षरी
वैभाजा बीजेन षडङ्गानि पुन
न्तु मां॥ इन्द्रो मां पातु पूर्वे च वह्नि
कोणे ऽनलो ऽवतु। यमो मां द
क्षिणे पातु नैऋत्यां निर्ऋति
स्तु मां॥ पश्चिमे वरुणः पातु वा
यव्यां पवनो ऽवतु। कुबेरश्चोत्त
रे पातु मामैशान्यां शिवो ऽवतु
॥ ऊर्द्ध्वाधः सततं पातु ब्रह्मान
न्तौ यथाक्रमात्। वज्राद्याश्चा
युधाः पान्तु दशदिक्षु यथाक्र
मात्॥ इति ते कथितं पुण्यं त्रै
लोक्यरक्षणं परं। यद्धृत्वा पठ
नाद्देवाः सर्वैश्वर्य्य मवाप्नुयुः॥
ब्रह्माविष्णुश्च रुद्रश्च कवचं धार
णाद्यतः। सृजन्त्यवन्ति हन्त्येव क
ल्पे कल्पे पृथक् पृथक्॥ पुष्पा
ञ्जल्यष्टकं देव्यै मूलेनैव प

ठेत्ततः। युगायुत कृतायास्तु पू
जायाः फलमाप्नुयात्॥ प्रीति
मन्योन्यतः कृत्वा कमला निश्च
ला गृहे। वाणी वक्त्रे वशेत्तस्य स
त्यं सत्यं न संशयः॥ अष्टोत्तरशतं
चास्य पुरश्चर्य्याविधिः स्मृतः। भु
र्जे विलिख्य गुलिकां स्वर्णस्थां
धारयेद्यदि॥ कण्ठे वा दक्षिणे
बाहौ सोपि सर्वतपोमयः। ब्रह्मा
स्त्रादीनि शस्त्राणि तद्गात्रे प्राप्य
पार्वति॥ माल्यानि कुसुमान्ये
व भवन्त्येव न संशयः॥ इति भै
रवतन्त्रे भैरवभैरवीसंवादे अ
न्नपूर्णाकवचं समाप्तं। इति त
न्त्रसारे॥ ॥ तस्याः स्तवन्त्वरं
यथा। ॐ नमो ऽन्नपूर्णायै। ॐ
नित्यानन्दकरी वराभयकरी
सौंदर्य्यरत्नाकरी निर्द्धूताखिल
घोरपावनकरी प्रत्यक्षमाहेश्व
री। प्रालेयाचलवंशपावनक
री काशीपुराधीश्वरी भिक्षांदे
हि कृपावलम्बनकरी माताऽन्न
पूर्णेश्वरी॥ १॥ नानारत्नविचि
त्रभूषणकरी हेमाम्बराडम्ब
री मुक्ताहारविलम्बमानविल
सद्वक्षोजकुम्भान्तरी। काश्मी
रागुरुवासिताङ्गरुचिरी काशीपु

राधीश्वरी भिक्षांदेहि कृपावल
म्बनकरी माताऽन्नपूर्णेश्वरी॥ २॥
योगानन्दकरी रिपुक्षयकरी ध
र्मैकनिष्ठाकरी चन्द्रार्कानलभा
समानलहरी त्रैलोक्यरक्षाकरी
। सर्वैश्वर्य्यकरी तपःफलकरी
काशीपुराधीश्वरी भिक्षांदेहि
कृपावलम्बनकरी माताऽन्नपू
र्णेश्वरी॥ ३॥ कैलाशाचलकन्दरा
लयकरी गौरी उमा शंकरी कौ
मारी निगमार्थगोचरकरी ॐ
कारबीजाक्षरी। मोक्षद्वारकवाट
पाटनकरी काशीपुराधीश्वरी भि
क्षांदेहि कृपावलम्बनकरी माता
न्नपूर्णेश्वरी॥ ४॥ दृश्यादृश्यविभू
तिभावनकरी ब्रह्मांडभाण्डोदरी
लीलानाटकसूत्रभेदनकरी वि
ज्ञानदीपाङ्कुरी। विश्वाधीशमनः
प्रमोदनकरी काशीपुराधीश्वरी
भिक्षांदेहि कृपावलम्बनकरी
माताऽन्नपूर्णेश्वरी॥ ५॥ उर्वीसर्व्व
जनेश्वरी जयकरी माताऽन्नपू
र्णेश्वरी नारीनीलसमानकुन्त
लधरी नित्यान्नदानेश्वरी। सर्व्वा
नन्दकरी सदाशिवकरी काशी
पुराधीश्वरी भिक्षांदेहि कृपावल
म्बनकरी माताऽन्नपूर्णेश्वरी॥ ६॥

आदिक्षान्तसमस्तवर्णनकरी च
न्द्रप्रभा भास्करी काश्मीरा त्रिपुरे
श्वरी त्रिलहरी नित्याङ्कुरी शा
र्वरी। कामाकाङ्क्षकरी महोत्स
वकरी काशीपुराधीश्वरी भि
क्षांदेहि कृपावलम्बनकरी मा
ताऽन्नपूर्णेश्वरी॥ ७॥ चन्द्रार्कान
ल कोटि पूर्णवदना बालार्क
वर्णेश्वरी चन्द्रार्काग्नि समान
कुण्डलधरी चन्द्रार्कबिम्बाध
री। माला पुस्तक पाशकाङ्कुश
धरी काशीपुराधीश्वरी भिक्षांदे
हि कृपावलम्बनकरी माताऽन्नपू
र्णेश्वरी॥ ८॥ दर्वीपाक सुवर्णरत्न
घटिका दक्षे करे संस्थिता वामे
चारु पयोधरी रसभरी सौभाग्यमा
हेश्वरी। भक्ताभीष्टकरी फलप्र
दकरी काशीपुराधीश्वरी भिक्षा
न्देहि कृपावलम्बनकरी माता
न्नपूर्णेश्वरी॥ ९॥ सर्व्वत्राणकरी
महाभयहरी माता कृपासागरी
दाक्षानन्दकरी निरामयकरी
विश्वेश्वरी श्रीधरी। साक्षान्मोक्ष
करी सदाशिवकरी काशीपुरा
धीश्वरी भिक्षांदेहि कृपावल
म्बनकरी माताऽन्नपूर्णेश्वरी॥ १०॥
अन्नपूर्णे सदापूर्णे शङ्करप्राण

वल्लभे।ज्ञानवैराग्यसिद्ध्यर्थं
भिक्षान्देहि नमोस्तु ते॥११॥
इति श्रीशङ्कराचार्य्यविरचित
मन्नपूर्णास्तोत्रं समाप्तं॥क्वचि
त्पुस्तके शङ्कराचार्य्यस्थाने
वेदव्यास इतिपाठः॥
अन्नप्राशनं क्ली बालकस्य प्र
थमान्नभक्षणरूपसंस्कारः।त
स्यविहितदिनादि यथा।ततोऽन्न
प्राशनं षष्ठे मासि कार्य्यं यथा
विधि।अष्टमे वाथ कर्त्तव्यं यद्वे
ष्टं मङ्गलं कुले॥षष्ठ इति मुख्य
:कल्पः प्रागुक्तन्यायात्।कृ
त्यचिन्तामणौ।अन्नस्य प्राशनं
कार्य्यं मासि षष्ठेऽष्टमे बुधैः।
स्त्रीणान्तु पञ्चमे मासि सप्तमे
प्रजपोमुनिः॥द्वादशी सप्तमीन
न्दा रिक्तास्तु पंचपर्वसु।बल
माधुर्य्यशो हन्यात् शिशूनाम
न्नभक्षणं॥भुजबलभीमे।षष्ठे
मासिनिशाकरे सुभकरे रिक्ते
तरे वा तिथौ सौम्यादित्यसि
तेन्दुजीवदिवसे पक्षे च कृष्णेत
रे।प्राजेशादिति पौष्ण वैष्णव
युगे हस्तादि षट्कोत्तरे राध्रे
वाप्युति शिशोर्नेष्ठु नितरां म
न्नादि भक्त शुभं।युगेरिति

प्राजेशादौ प्रत्येकं सम्बध्य ते
तथात्रापि तिष्यादिविद्धमृक्षं
विवर्ज्जयेत् द्वष द्वन्द्व यत्कुम्भीन
कन्यालग्ने ऽन्नभक्षणं।त्रिको
णाष्टक एकान्त्यग्रहा यद्वत्तथा
फलं॥दृष्टः शशधरो लग्नात्
षष्ठाष्टस्थो ऽन्नभक्षणे।मार्क
ण्डेयः।देवता पुरतस्तस्य पि
तु रङ्कगतस्य च।अलङ्कृतस्य
दातव्यमन्नं पात्रे च काञ्चने
॥मध्वाज्यकनकोपेतं प्राशयेत्
पायसं ततः।कृतप्राशनमुत्सङ्गे·
मातुर्बालं तं न्यसेत्॥देवाग्र
तोऽथ विन्यस्य शिल्पभाण्डा
नि सर्वशः।शास्त्राणि चैव शस्त्रा
णि ततः पश्येत्तु लक्षणं॥प्रथमं
यत् स्पृशेद्बालः शिल्पभाण्डं
स्वयं तथा।जीविका तस्य बाल
स्य तेनैव तु भविष्यति॥इति
ज्योतिस्तत्त्वं॥
अन्यः त्रि भिन्नः।तत् पर्य्यायः।
विलक्षणः २ इति जटाधरः॥
एकतरः ८ नेमः ९ इति शब्द
रत्नावली॥
अन्वष्टका
स्त्री अष्टकापश्चात्तिथिः।
तत्र साग्निककर्त्तव्यमा

न्वष्टक्यश्राद्धं।यथा शाह्नः।पि
त्रादित्रिकपत्नीषु भोज्यामातृः
प्रति द्विजाः स्त्रीणामेव तत्र न
घस्मान्मातृश्राद्धमिहोच्यते
॥एतच्चान्वष्टकाश्राद्धं साग्नि
मात्रेण कर्त्तव्यं।तथा च विष्णुः
।अन्वष्टकाष्टकावदग्नौहुत्वा
मात्रे पितामह्यै प्रपितामह्यै पू
र्ववद्ब्राह्मणान् भोजयित्वा इ
ति।अत्र होमस्तावदेवाग्निमात्रे र
ग्निग्रहणं तन्नियमार्थं।न चा
ग्नौकरणहोमे विप्रपाण्यादे
र्विधानादत्रापि तथेतिवाच्यं।
प्रकृतीभूतश्राद्धे विप्रकृतस्या
धारान्तरस्य विकृतीभूतश्राद्धे
विशेषविहिताधारेणबाधात्।
शरमयबर्हिषा कुशमयबर्हि
र्बाधवत्।नवा लौकिकाग्नौ
होमः।न पैत्र यत्तियो होमो
लौकिकाग्नौ विधीयते।इति
मनुवचनेन निषेधात्।श्राद्ध
चिन्तामणावप्येवं।इति
श्राद्धतत्त्वं॥ ॥
अपघातः पुं अपहननं।अपकृ
ष्टमृत्युफलकव्यापारः।अपहं
न्यते इति व्युत्पत्त्या अपमृर्द
क इत्यातो भीवे यत्र

प्रत्ययेन निष्पन्नः॥
अपमानं क्ली अमर्य्यादा।तत्प
र्य्यायः।स्यादवज्ञा परीहारः प
रिहारः पराभवः।अपमानं परि
भव स्तिरस्कारस्तिरस्क्रिया॥अव
अवहेला च हेला स्यादवहेलन
हेलनं।तेषां निकार धिक्कारौ
पर्य्यायः स्यादनादरे॥इति शब्द
रत्नावली॥ ॥तस्य अप्रकाश
नं यथा।अर्थनाशं मनस्तापं
गृहे दुश्चरितानि च।वञ्चनञ्चा
पमानञ्च मतिमान्न प्रकाश
येत्॥इति चाणक्यं॥अपरपक्षः
पुं कृष्णपक्षः।सत्वपितृपक्षः।
यथा।पूर्वःपक्षो देवाना मपरः
पक्षः पितॄणां मिति श्रुतिः॥प
क्षौ पूर्वापरौ शुक्लकृष्णौ मास
स्तु तावुभौ।इत्यमरः॥मनुः।अथ
श्राद्ध ममावास्यायां पितृभ्योदद्या
त् पञ्चमीप्रभृति वापरपक्षस्य
यदह वी सम्पद्यते।इति श्राद्धत
त्त्वं॥अपराङ्मुखः पुं अविमु
खः।संमुखीभूतः।यथा।आहवेष्व
मिथोऽन्योऽन्यं जिघांसन्तो म
हीक्षितः।युध्यमानाः परं शक्त्या
स्वर्गं यान्त्य
पराङ्मुखाः॥इति

मानवे ७ अध्याये ८९ श्लोकः॥
अपराधः पुं आगः। स च द्वात्रिं
शद्विधो यथा। आगमे। यानैर्वा
पादुकैर्वापि गमनं भगवद्गृहे
। देवोत्सवाद्यसेवा च अप्र
णाम स्तदग्रतः॥ उच्छिष्टे वा
प्यशौचे भगवद्दर्शनादि
कं। एकहस्तप्रणामश्च तत्पु
रस्तात् प्रदक्षिणं॥ पापप्रसार
णं चाग्रे तथा पर्य्यङ्कबन्धनं।
शयनं भक्षणं वापि मिथ्याभा
षणमेव च॥ उच्चैः भाषा मिथो
जल्पो रोदनानि च विग्रहः।
निग्रहानुग्रहौ चैव नृषु च क्रू
रभाषणं॥ कम्बलावरणं चैव प
रनिन्दा परस्तुतिः। अश्लीलभा
षणं चैव अधोवायुविमोक्षणं
॥ शक्तौ गौणोपचारश्च अनिवे
दितभक्षणं। तत्तत्कालोद्भवाना
ञ्च फलादीनामनर्पणं॥ वि
नियुक्तावशिष्टस्य प्रदानं व्य
ञ्जनादिके। पृष्ठीकृत्यासनं चै
व परेषामभिवादनं॥ गुरौ मौ
नं निजस्तोत्रं देवतानिन्दनं त
था। अपराधा स्तथा वि
ष्णो द्वात्रिंशत् परिकीर्त्तिताः
॥ ॥ वाराहे।

द्वात्रिंशदपराधा ये कीर्त्यन्ते व
सुधे मया। वैष्णवेन सदा ते त
वर्जनीयाः प्रयत्नतः॥ ये वै न
वर्जयन्त्येतान् अपराधान् मयो
दितान्। सर्वधर्म्मपरिभ्रष्टाः प
च्यन्ते नरके चिरं॥ राजान्नभक्ष
णञ्चैकमापद्यपि मयावहं।
ध्वान्तागारे हरेः स्पर्शः परं स
कृतनाशनः॥ तथैव विधिमुत्सृ
ज्य सहसा स्पर्शनं हरेः। द्वारो
द्घाटो विना वाद्यं क्रोडमांसनि
वेदनं॥ पादुकाभ्यां तथा विष्णो
र्मन्दिरोच्छिष्टकलनं मौनभ
ङ्गो ऽच्युतार्च्चने॥ तथा पूजन
काले च विड्त्सर्गाय सर्पणं।
श्राद्धादिकमकृत्वा च न
वान्नस्य च भक्षणं॥ अदत्त्वा
गन्धमाल्यादि धूपनं मधुघा
तिनः। अकर्म्मण्य प्रसूनेन
पूजनञ्च हरेस्तथा॥ अकृत्वा
दन्तकाष्ठञ्च कृत्वा निधुवनं
तथा। स्पृष्ट्वा रजस्वलां दीपं त
था मृतकमेव च॥ रक्तं नीलम
धौतञ्च पारक्यं मलिनं पटं। परि
धाय मृतं दृष्ट्वा विमुच्यापानमा
रुतं॥ क्रोधं कृत्वा श्मशानञ्च
गत्वाभुक्त्वाप्यजीर्णभुक्काभसयिना
कोऽ

नांसं पिण्याकं जालपादकं॥
तथा कुसुम्भशाकञ्च तैलाभ्य
ङ्गं विधाय च। हरेः स्पर्शो हरेः
कर्म्मकरणं पातकावहं॥ किंच
तत्रैव। मम शास्त्रं बहिष्कृत्य
अस्माकं यः प्रपद्यते। मुक्त्वा च
मम शास्त्राणि शास्त्रमन्यत् प्र
भाषते॥ मद्यपस्तु समास्वाद्य
प्रविशेद्भवनं मम। यो मे कुसु
म्भशाकेन आपणं कुरुते नरः
॥ अपि च। मम दृष्टेरभिमुखं ता
म्बूलं चर्वयेत्तु यः। कूटवक प
लाशस्थैः पुष्पैः कुर्य्यान्ममा
र्च्चनं॥ ममार्च्चां मासरे काले यं
करोति विमूढधीः। पूजा पर्यु
षितैः पुष्पैः ष्ठीवनं गर्व्वकल्प
नं॥ तिर्य्यक् पुण्ड्रधरो भू
त्वा यः करोति ममार्च्चनं।
धावितैस्त्रिपाणिभ्योः पु
यः करोति ममार्च्चनं॥
अप्रक्षालितपादो यः
प्रविशेन्मम मन्दिरं।
अवैष्णवस्य पक्वान्नं यो
मह्यं विनिवेदयेत्॥ अ
वैष्णवेषु पश्यत्सु म
मपूजां करोति यः। अ
पूजयित्वा विघ्नेशं संभाषेच्च

कपालिनं॥ नरः पूजान्तु यः कु
र्य्यात् स्नपनञ्च नखाम्भसा। अमो
नी धर्म्मलिप्ताङ्गो मम पूजां करो
ति यः॥ ज्ञेयाः परेऽपि बहवो ऽप
राधाः सदसम्मतैः। आचारैः शा
स्त्रविहितनिषिद्धानि क्रमादिभिः
॥ ॥ अथापराधशमनं। सम्वत्स
रस्य मध्ये चतुर्थी शोकरके मम।
कृतोपवास स्नानेन गंगायां शुद्धि
माप्नुयाम्॥ मथुरायां तथा येवं
सापराधः शुचिर्भवेत्। अनयो
स्तीर्थयो रेकं यः सेवेत् सुकृ
ती नरः॥ सहस्रजन्म जनिता
नपराधान् जहातिसः। स्कान्दे।
अहन्यहनि यो मर्त्त्यो गीताध्या
यन्तु संपठेत्। द्वात्रिंशदपराधै
स्तु अहन्यहन्मिमुच्यते॥ अत्र
कार्त्तिकमाहात्म्ये। तुलस्या कृ
तं यस्तु शालग्रामशिलार्च्चनं। द्वा
त्रिंशदपराधांश्च क्षमते तस्य के
शवः॥ तत्रैवान्यत्र। द्वादश्यां
जागरे विष्णोः यः पठेत्तुल
सी स्तवं। द्वात्रिंशदप
राधानि क्षमते तस्य
केशवः॥
यः करोति हरेः
पूजां कृष्णशास्त्राङ्कितो

नरः। अपराध सहस्राणि नित्यं
हरति केशव इति॥ इति श्री ह
रिभक्तिविलासे ८ विलासः॥ अ
पविष्कृतं त्रि अमार्जितं। यथा।
मलश्रुति समायुक्तं श्लेष्म विण्मू
त्र पिच्छिलै रेतो निष्ठीवमाना
भिः स्रवद्भि रपविष्कृतं॥ इति
कालिकापुराणे ६८ अध्यायः
॥ ॥ ॥
अपर्युषितं क्ली अव्युष्टं। सद्यो
भवं। यथा नारसिंहे। अपर्यु
षित निश्छिद्रैः प्रोक्षितै र्जन्तु
वर्जितैः। स्वीयारामोद्भवै र्वा
पि पुष्पैः संपूजयेद्धरिं॥
इत्याह्निकाचारतत्त्वं॥ ॥

अपवादः पुं रज्जुविवर्त्तस्य स
र्पस्य रज्जुमात्रत्ववत् वस्तुविवर्त्त
स्यावस्तुनो ऽज्ञानादेः प्रपञ्च
स्य वस्तुमात्रत्वं। तदुक्तं। सात
त्वतो ऽन्यथा प्रथा विकार इत्यु
दीरितः। अतत्त्वतो ऽन्यथा प्र
था विवर्त्त इत्युदाहृतः॥ अस्य
फलं। आभ्यां अध्यारोपाप
वादाभ्यां तत्त्वम्पदार्थशोधन
मपि सिद्धं भवति इति वे
दान्तसारः॥

अपस्मारः पुं रोगविशेषः। त
स्य चिकित्सा यथा। तैलेनत्ल
शुनः सेव्यः पयसा च शतावरी
। ब्राह्मीरसश्च मधुना सर्वापस्मा
रभेषजं॥ ॥चूर्णैः सिद्धार्थका
दीनां भावितै रथवापितैः। गो
मूत्रपिष्टैः सर्वाङ्गलेपैः शाम्य
त्यपस्मृतिः॥ सिद्धार्थकादिः
उन्मादोक्तः॥ ॥शिग्रु कट्फल
किणिही निम्ब त्वग्रस पाचि
तं। चतुर्गुणे गवां मूत्रे तैल मभ्य
ङ्गे हितं॥ कट्फलः श्योनाप
डा। किणिही चिरिचिरा॥ ॥
निर्गुण्डीभववन्दाक नावना
स्य प्रयोगतः। उपैति सहसा
नाशमपस्मारो महागदः॥ म
नोह्वा तार्क्ष्य विष्ठा वा शकृत
पारावतस्य च। अञ्जनाद्धन्त्य
पस्मार मुन्मादञ्च विशेषतः॥
मनोह्वा मनःशिला। तार्क्ष्यो ग
रुडः। शकृत् विष्ठा॥ ॥यःखा
देत् क्षीरभक्ताशी माक्षिकेण
वचारजः। अपस्मारं महाघो
रं चिरोत्थं सजयेत् ध्रुवं॥ वचा
चूर्णं॥ ॥कूष्माण्डकफलोत्थे
न रसेन परिपेषितं। अपस्मार
विनाशाय यष्ट्याह्वञ्च पिबेन्नरः

83

॥लोह मिति एतस्य पानादिव
सत्रयेणैवापस्मारोपशमो भव
तीत्यभिप्रायः॥ ॥ब्राह्मी रस
वचा कुष्ठ शङ्खपुष्पी शृतं हृ
तं। पुराणं स्यादपस्मारोन्मादग्र
हहरं परं॥ एतस्य प्रक्रिया। पुरा
णं गोघृतं प्रस्थमितं वचाकुष्ठ
शङ्खपुष्पीणां समुदितानां कुड
वमितानां कल्केन प्रस्थमित
ब्राह्मीरस पिष्टेन पचेत्। ब्रा
ह्मीघृतं॥ ॥कूष्माण्डकरसे स
र्पि रष्टादशगुणे पचेत्। यष्ट्या
ह्वकल्कं तत्पान मपस्मार वि
नाशनं॥ कूष्माण्डकघृतं॥ ॥
द्वौ कीटमेयो विधिवदानीय
रविवासरे कण्ठे भुजे वा सं
धार्य्य जयेदुग्रा मपस्मृतिं॥ अ
यन्तु कीटो नदीतीरे सिकताम
य्येतिष्ठति॥ ॥शिग्रु कुष्ठ ज
लाजाजी लशुन व्योष हिङ्गु
भिः। वस्तमूत्रे शृतं तैलं नाव
नं स्यादपस्मृतौ॥ जलं वाल
कं। अजाजी जीरकः। वस्तः
छागः। नावनं नस्यं॥ ॥
इत्यपस्माराधिकारः। इति
भावप्रकाशः॥
अपानं क्ली मलद्वारं। तत् प

र्य्यायः। गुह्यं ४ गुदवर्त्म ५। इ
ति जटाधरः॥ तच्छेदः ८। मार्गः
७। इति शब्दरत्नावली॥ अपो
गण्डः त्रि स्वभावतो न्यूनाधि
काङ्गैः। तत्र विंशत्यङ्गुलीकेकवि
ंशत्यङ्गुलीकादौ जने वर्त्तते इ
त्यर्थः। विकलं स्वभावहीनं अ
ङ्गमस्य विकलाङ्गः। अपकृष्टं
गच्छति अपोगण्डः। नाम्नीति ग
मेर्डः। निपातनात् पस्य पोभावः
। अपोगण्डस्तु शिशुके विक
लाङ्गे च भीरुके। इति विश्वः
॥ निपातनादपस्यादिलोपे
पोगण्डोपि। पोगण्डो वि
कलाङ्गे स्यादिति हलायुधः
। पोगण्डो विकलाङ्गकः।
इति रत्नकोषः। इति
भरतः॥
॥
अप्रावरः त्रि प्रावरणा
शून्यः। इति नञ् समास
निष्पन्नः॥
अप्रतिपक्षः त्रि प्रतिपक्ष
रहितः। नास्ति प्रतिपक्षो
यस्य इति बहुव्रीहिसमास
निष्पन्नः॥
अप्रतिमं त्रि प्रतिमारहितं।

काङ्गविशिष्टः। तत्पर्य्यायः। विकलाङ्गः २
इत्यमरः॥ है स्वभावतो न्यूनाधिका

यथा॥हयशीर्षपञ्चरात्रीय शाङ्क
षेणकाण्डे।सर्व्वमुक्तेष कर्त्तव्या
प्रतिष्ठा विधिना बुधैः।फलार्थि
भि स्सप्रतिष्ठं यस्मान्निष्फल मु
च्यते॥इति मठादिप्रतिष्ठातन्त्रे
॥ ॥
अप्राप्तव्यवहारः पुं व्यवहाय
नभिज्ञः।अप्राप्तवयस्कः।ना
बालग इति आरबीभाषा।य
था।अप्राप्तव्यवहाराणांधनं
व्ययविवर्ज्जितं।न्यसेयुर्बन्धु
मित्रेषु प्रोषितानां तथैवच॥
इति दायतत्त्वधृत कात्यायन
वचनं॥किञ्च।गर्भस्थैः स
दृशो ज्ञेयः अष्टमात् वत् स
रात् शिशुः।बाल आषोडशा
त् वर्षात् पोगण्डोपि निगद्य
ते॥परतो व्यवहारज्ञः स्वत
न्त्रः पितरावृते॥इति व्यव
हारज्ञः स्वतन्त्रः पितराहते॥इ
ति व्यवहारतत्त्वधृत नारदवच
नं॥अव इ क शब्दाद् इ अस्यते
क अस्यते अस्यां कुत्रः।इति
चतुर्भुजः।इति दुर्गादासः॥
अभ इ क ध्वनौ इ अस्यते।
क अस्यते।इति दुर्गादासः॥
अभिचारः पुं उपपातकविशे
षः।स तु श्येनादियज्ञेना

नपराधस्य मारणं।इति कुल्लूक
भट्टः॥यथा।हिंसौषधीनां स्त्र्या
जीवो ऽभिचारो मूलकर्म्म च।
इति मनौ ११ अध्यायः॥ ॥
अथाभिचारः।ओं विरुद्धे रूपिणि
चण्डिके वैरिणं अमुकं देहि
देहि स्वाहा।इति खड्गमभिम
न्त्र्य खड्गमन्त्रोश्च पठित्वा खड्गं
संपूज्य छागादिकं अमुकोसि
इति वैरिनाम्नाभिमन्त्र्य रक्तसू
त्रेण त्रिधा सुवेष्ट्य बद्ध्वा वैरिना
म्ना प्राणप्रतिष्ठां कृत्वा ओं
अयं स वैरी यो द्वेष्टि तमिमं
पशुरूपिणं विनाशय महादेवि
स्फें स्फें खादय खादय।इति
पठित्वा बलिशिरसि पुष्पं दत्वा
बलिमन्त्रं पठित्वा बलिं संपूज्य
आद्याश्विने मासि महानवम्यां
अमुकगोत्रो ऽमुकदेवशर्म्मा
अमुकशत्रुनाशाय इमं छागं
महिषं वा अमुकदैवतं भगव
त्यै दुर्गायै तुभ्यमहं सम्प्रददे।
इत्युत्सृज्य ओं हूं फट्
इति छित्वा मूलं पठित्वा एतद्
धिरं दुर्गायै नमः।इति रक्तं
शिरश्च दत्वा अष्टांगमांसे
होमं मूलमन्त्रेण कुर्य्यादिति।

इति तन्त्रसारः॥
अभिमानः पुं अर्थादिनादर्पः
।तत् पर्य्यायः स्मयः ४ अवले
पः ५ दर्पः ६ अवष्टायः ७ टंकः
८।इति जटाधरः॥अपिच।ग
र्व्वो मदो ऽभिमानः स्यादहङ्का
र स्त्वहङ्कृतिः।स्यादुद्धतमनस्क
त्वे मान श्चित्तसमुन्नतिः॥अह
ङ्कारस्य पर्य्याय इति केचित्
प्रचक्षते।इति शब्दरत्नावली॥
अभिलाषः पुं लोभः।तत् प
र्य्यायः।काङ्क्षा १२ कान्तिः १३
हृत् १४ रुचिः १५ दोहदः
१६ अभिलाषः १७।इति शब्द
रत्नावली॥श्रद्धा १८ तृष्णा १९
मतिः २० छन्दः २१ इति जटा
धरः॥
अभिलाषुकः त्रि लोभयुक्तः।
तत्पर्य्यायः।लोभी ६ विलास
विभवानसः ७ इति जटाधरः
॥ ॥
अभिष्यन्दः पुं नेत्ररोगविशेषः
।तस्य चिकित्सा यथा।द्वेपाद
मध्ये पृथुसन्निवेशे शिरागते
द्वे बहुधा त्रि नेत्रे।ताः
प्रोक्षणोत्सादन लेपना
दीन् पादप्रयुक्तान्नयने नयन्ति

प्रोक्षणं सेचनं उत्सादनं उ
द्वर्त्तनं॥मलोष संघट्टने पी
डनाद्ये स्ता दूषयन्ति नयनानि
दृष्टाः।भजेत्सदा दृष्टि हितानि
तस्मादुपानदभ्यञ्जन धावना
नि॥मलं धूल्यादि।मलादिभि
र्दृष्टाः ताः शिरा नयनानि दूष
यन्ते इत्यन्वयः॥चक्षुष्याः शा
लयो मुद्गा यवा मांसन्तु जाङ्ग
लं।पत्तिमांसं विशेषेण वास्तू
कं तण्डुलीयकं॥पटोल क
र्कोटक कारवेल्ल फलानि स
र्पिः परिपाचितानि।तथैव वा
र्त्ताकुफलं नवीनं दृशो हितः
स्वादु तथापि तिक्तः।कट्वम्ल
गुरु तीक्ष्णोष्ण माष निष्पाव
मैथुनं॥मद्य वल्लूर पिण्याक मत्
स्य शाक विरुढजं।विदाहीन्यन्न
पानानि न हितान्यक्षिरोगिनः॥
सेक आश्चोतनं पिण्डी बिडाल
स्तर्पणं तथा।पुटपाको ऽञ्जनं
चैभिः कल्कै र्नेत्र मुपाचरेत्
॥ ॥कल्कविधिः।तत्र सेकवि
धिः।सेकस्तु सूक्ष्मधाराभिः स
र्व्वस्मिन्नयने हितः।मीलिताक्ष
स्य मर्त्यस्य प्रदेयश्चतुरङ्गुलः॥स
चापि स्नेहनो वाते पित्ते र

क्ते च रोपणः। लेखनस्तु क
फे कार्य्यस्तस्य मात्राविधीय
ते॥ षड्विंशच्चाशनैः स्नेहे चत्व
रिंशस्तु रोपणे। त्रिंशद्भि लेख
ने कार्य्यः सेको नेत्रप्रसादने॥
निमेषोन्मेषणं पुंसां मन्दुल्या
च्छोटिका तथा। गुर्व्वक्षरोच्चार
णं वा वाङ्मात्रेयं स्मृता बु
धैः॥ छोटिका तुटकी इति
लोके॥ सेकस्तु दिवसे कार्य्यो
रात्रौ चात्यन्तिके गदे। स यथा
। एरण्डदलमूलत्वक् शृत मा
जं पयो हितं। सुखोष्णं नेत्रयोः
सिक्तं वाताभिष्यन्द नाशनं॥
पथ्याक्षामलत्वक्सवल्क
ल कल्केन सूक्ष्मवस्त्रेण कृत्वा
पोटलिकां तां मर्द्दकेनावद्ध
वेणाक्तां॥ निदधीत लोचने स्या
त्सर्व्वाभिष्यन्दसंक्षयः शीघ्रं॥ यो
गोऽयमृषिभिरुक्तो जगदुपका
राय कारुणिकैः॥ शुक्ला पाणित
लं दृष्ट्वा चक्षुषी यदि दीयते।
अचिरेणैव तद्धन्ति तिमिराणि
व्यपोहति॥ स्नानं हस्मतैले
नापि चक्षुष्य मनिलापहं। आम
लैः सततं स्नानं परं दृष्टिबला
वहं॥ त्रिफलायाः कषायस्तु

धावनान्नेत्ररोगजित्। कवला
न्मुखरोगघ्नः पानतः कामलाप
हः॥ ॥अथाश्चोतनविधिः॥
क्वाथ क्षीर द्रव स्नेह बिन्दूनां
यत्र पातनं॥ द्व्यङ्गुलोन्मीलिते
नेत्रे प्रोक्तं माश्चोतनञ्च तत्।
बिन्दवोऽष्टौ लेखनेषु रोपणे
दशबिन्दवः॥ स्नेहने द्वादश
प्रोक्ता स्ते शीते कोष्णरूपिणः।
उष्णे तु शीतरूपाः स्युः सर्व्वत्रै
वेष निश्चयः॥ वाते तिक्तं तथा
स्निग्धं पित्ते मधुर शीतलं। कफे
तिक्तोष्ण रूक्षं स्यात् क्रमादा
श्चोतनं हितं॥ आश्चोतनानां
सर्व्वेषां मात्रा स्याद्वाक्शतो
न्मिता। ततः परं लोचनाभ्यां
भेषजाय नयो मतः॥ आश्चो
तनं न कर्त्तव्यं निशायां केन
चित् क्वचित्। तद्यथा॥ बिल्वादि
पञ्चमूलेन वृहत्येरण्ड शिग्रु
भिः। क्वाथ आश्चोतने कोष्णो वा
ताभिष्यन्दनाशनः॥ त्रिफला
श्चोतनं नेत्रे सर्व्वाभिष्यन्दना
शनं॥ ॥अथ पिण्डीविधिः॥ उ
क्तभेषजकल्कस्य पिण्डी च
कोलमात्रया। वस्त्रखण्डेन संबद्धाभि
ष्यन्द व्रणनाशिनी॥ स्निग्धोष्णा

पिण्डिका वाते पित्ते सा शीत
ला मता। रूक्षोष्णा श्लेष्मणि
प्रोक्ता विधि रुक्तो बुधै रयं॥
सा यथा। एरण्ड पत्र मूल त्व
ग्भिः सिद्धा वातनाशिनी। धात्री
विरचिता पित्ते शिग्रुपत्र कृता
कफे॥ निम्बपत्र कृता पिण्डी पि
त्तश्लेष्महरी भवेत्। शुण्ठी नि
म्बदलैः पिण्डी सुखोष्णा स
सैन्धवा॥ धार्य्या नेत्रेऽनिल
श्लेष्मशोथ कण्डू व्यथाहरी।
त्रिफला पिण्डिका नेत्रे वातपि
त्तकफापहा॥ पथ्याक्षामल त्व
क्सवसवल्कल कल्का ऽहि
फेन जलयुक्तः। तेन विरचि
ता पिण्डी शमयति सकलान
भिष्यन्दान्॥ इति भावप्रकाशः॥
अभ्युदयः पुं इष्टलाभः। वि
वाहादिः। इति आभ्युदयिक
शब्दार्थे श्राद्धतत्त्वं॥ सर्व्वतो
वेनोदयः। सूर्य्योदयजनादिवृ
द्धिः। यथा। राजन्नभ्युदयोऽस्तु
बल्लनकवे हस्ते किमास्ते त
व श्लोकः कस्य कवे रमुष्य
कृतिन स्तत्पठतां पठ्यते।
किन्त्वासा मरविन्दसुन्दरदृशां
द्राक् चामरान्दोलनाद्वेल्लद्भुजव

ल्लि कङ्कणझनत्कारः क्षणं वा
र्य्यतां॥ इत्यस्य श्लोकार्द्धे बल्लन
कविकर्णाटराजयो र्वाक्यं शे
षार्द्धं कालिदासस्य॥
अभ्युदितः त्रि उदयप्राप्तः। यथा
। माघे मासि रटन्त्यापः किञ्चि
दभ्युदिते रवौ। ब्रह्मघ्नमपि चा
ण्डालं कं पतन्तं पुनीमहे॥
इति तिथ्यादितत्त्वं॥
अभ्युषः पुं ईषत् पक्वं। यथा।
आपक्व मवपक्वं स्यादभ्युषः
पोलि पोलिके। अभ्यूषो भ्योष
इत्येते ईषत्पक्व यवादिषु॥
इति शब्दरत्नावली॥
अभ्र गत्यां। उष्टवर्गे चतुर्थो
पधः। अभ्रति। इति दुर्गा
दासः॥
अभ्रं क्ली उपधातुविशेषः। त
स्योत्पत्ति नाम लक्षण गुणाः।
। पुरा बधाय वृत्रस्य वज्रिणा व
ज्र मुद्धृतं। विस्फुलिङ्गा स्ततस्त
स्य गगने परिसर्पिताः॥ ते निपे
तुर्घनध्वानाच्छिखरेषु महीभृ
तां। तेभ्य एव समुत्पन्नं तत्तद्गि
रिषु चाभ्रकं॥ तद्वज्रं वज्रजात
त्वादभ्र मभ्ररवोद्भवात्। गग
नाद्विलितं यस्मात् गगनञ्च

ततो मतं॥ विप्र क्षत्रिय विट्शूद्र
भेदात्तत् स्याच्चतुर्विधं। क्रमेणै
व सितं रक्तं पीतं कृष्णञ्च वर्ण
तः॥ प्रशस्यते सितं तारे रक्तं त
न्त्र रसायने। पीतं हेमनि कृष्ण
ञ्च गदेषु भृतयेपि च॥ पिनाकं
दर्दुरं नागं वज्रञ्चेति चतुर्वि
धं। मुञ्चत्यग्नौ विनिःक्षिप्तं पि
नाकं दलसञ्चयं॥ अज्ञानाद्भ
क्षणात्तस्य महाकुष्ठं प्रदायकं
। दर्दुरं त्वग्निनिःक्षिप्तं कुरुते द
र्दुरध्वनिं॥ गोलकान् बहुशः
कृत्वा स स्यान्मृत्युप्रदायकः।
नागन्तु नागवद्वह्नौ फूत्कारं परिमु
ञ्चति॥ तद्भक्षितमवश्यन्तु विदधा
ति भगन्दरं। वज्रन्तु वज्रवत्तिष्ठे
त्तन्नाग्नौ विकृतिं व्रजेत्॥ सर्वाभ्रे
षु वरं वज्रं व्याधिवार्द्धक्यमृत्यु
हृत्॥ अभ्रमुत्तरशैलोत्थं बहुस
त्वं गुणाधिकं॥ दक्षिणाद्रिभवं
स्वल्पसत्वं मल्पगुणप्रदं॥ ॥
मारिताभ्रगुणाः॥ अभ्रं कषायं म
धुरं सुशीतं मायुष्करं धातुविव
र्द्धनञ्च। हन्यात्त्रिदोषं व्रण मेह
कुष्ठं प्लीहोदरं ग्रन्थि विषकृमी
श्च॥ रोगान् हन्ति दृढयति वपु
र्वीर्यवृद्धिं विधत्ते। तारुण्या

ढ्यं रमयति शतं योषितां नित्य
मेव॥ दीर्घायुष्कान् जनयति सु
तान् विक्रमैः सिंहतुल्यान् मृ
त्योर्भीतिं हरति सततं सेव्यमा
नं मृताभ्रं॥ ॥ अशोधिताभ्रदो
षाः। पीडां विधत्ते विविधां नरा
णां कुष्ठं क्षयं पाण्डुगदञ्च
शोथं। हृत्पार्श्वपीडाञ्च
करोत्यशुद्धमभ्रं ह्यसिद्धं गुरु
तापदं स्यात्॥ अस्य शोधनवि
धि र्यथा। कृष्णाभ्रकं धमेद्वह्नौ
ततः क्षीरे विनिःक्षिपेत्। भिन्ना
पत्रन्तु तत्कृत्वा तण्डुलीयाम्ल
जैर्द्रवैः॥ भावयेदष्टयामं तदेव
मभ्रं विशुद्ध्यति॥ ॥ तस्य मार
णं यथा। कृत्वा धान्याभ्रकं त
च्च शोषयित्वाथ मर्द्दयेत्। अर्क
क्षीरैर्दिनं खल्वे चक्राकारञ्च
कारयेत्॥ वेष्टयेदर्कपत्रैश्च
सम्यग्गजपुटे पचेत्। पुनर्म्मर्द्यं
पुनः पाच्यं सप्तवारान् पुनः पु
नः॥ ततो वटजटाक्वाथैस्तद्व
देयं पुटत्रयं। म्रियते नात्र स
न्देहः प्रयोज्यं सर्व्वकर्म्मसु॥
तुल्यं घृतं मृताभ्रेण लौहपा
त्रे विपाचयेत्। घृते जीर्णे
तदभ्रन्तु सर्व्वयोगेषु योजयेत्

॥ ॥ तत्र धान्याभ्रस्य विधिः।
पादांश सलिलं युक्तमभ्रं ब
द्धाथ कम्बले त्रिरात्रं स्थापये
त् क्षीरे तन्निःसृतं मर्द्दयेत् करैः॥
कम्बलाद्गलितं सूक्ष्मं वालुका
रहितञ्च यत्। तद्धान्याभ्रमिति
प्रोक्तमभ्रमारणसिद्धये॥ इति
भावप्रकाशः॥
अम गतौ॥ भजने॥ शब्दे। अम
ति। इति दुर्गादासः॥ अम क
रोगे। क आमयति व्याधि लो
कं। इति दुर्गादासः॥ अमङ्ग
लं क्ली अशुभसूचकं। तद्य
था। सांढ सैन्यसमूहेषु वाय
भाण्डे रसह्यकैः। दृष्टोऽमङ्ग
लं राजा पुरा वर्त्मनि वर्त्मनि॥
ययौ तथापि समरे नजगाम
गृहं पुनः। मुक्तकेशीं छिन्नना
सां रुदन्तीञ्च दिगम्बरां॥ कृ
ष्णवस्त्रपरीधाना मपरां विध
वामपि। अस्पृष्टां योनिदुष्टां
व्याधियुक्ताञ्च कुट्टनीं॥ पति
पुत्रविहीनाञ्च डाकिनीं पुंश्च
लीं महा। कुम्भकारं तैल
कारं व्याधं सर्पोपजीविनं॥
कुचेलं मलिरुक्ताङ्गं
नग्नं काषायवासिनं ॥ ॥

अङ्गविक्रयिणञ्चैव कन्याविक्र
यिणं तथा॥ चितां दग्धशवं भस्म
निर्व्वाणाङ्गार मेव च। सर्पहतं न
रं सर्पं गोधाञ्च शशकं विषं॥
श्राद्धपात्रञ्च पिण्डञ्च मोटकं एउ
वानरं तथा। देवलं वृषवाहञ्च
शूद्रश्राद्धान्नभोजिनं॥ शूद्राच
पाचकं शूद्रयाजकं ग्रामया
जकं। कुशपुत्तलिकाञ्चैव श
वदाहनकारिणं॥ शून्यकुम्भं
भग्नकुम्भं तैलं लवणमस्थि
चाकार्पासं कच्छपं चूर्णं कुक्कु
रं शब्दकारिणं॥ दक्षिणे च शृ
गालञ्च कुर्व्वन्तं भैरवं रवं। कप
र्द्दकञ्च लोरञ्च छिन्नकेशं न
खं मलं॥ कलहञ्च विलापञ्च
विलापकारिणं जनं। अमङ्गलव
दनञ्च रुदन्तं शोककारिणं॥
मिथ्यासाक्षिप्रदातारं चौरञ्च
नरघातिनं। पुंश्चलीपतिपुत्रञ्च
पुंश्चल्योदनभोजिनं॥ देवतागु
रुविप्राणां वस्तु वित्तापहारि
णं। दत्तापहारिणं दस्युं हिंस
कं सूचकं खलं॥ पितृमातृवि
रक्तञ्च द्विजाश्वत्थविघातिनं।
सत्यघ्नञ्च कृतघ्नञ्च स्थाप्यापहा
रिणं जनं॥ विश्वद्रोहं मित्रद्रो

हं त्वतं विषामय्यानकं। गरुडे
व हिजानाञ्च निरकं मङ्गचा
नकं॥ जीवानां घातकञ्चैव सा
ङ्गहीनञ्च निर्दयं। व्रतोपवास
हीनञ्च दीक्षाहीनं नपुंसकं॥
गलितव्याधिगात्रञ्च काणं व
धिरमेव च। उत्कासं छिन्नलिङ्ग
ञ्च स्तरामत्तं स्तरं तथा॥ क्षिप्तं व
मन्तं रुधिरं महिषं गर्दभं तथा।
मूत्रं पुरीषं श्लेष्माणं कोष्ठ्यं
नकपालिनं॥ उन्मत्तावानं रक्ते
ष्टिं वान्याञ्च दन्तपातनं। ह
कञ्च सूकरं गृध्रं श्येनं कङ्कं
ञ्च भल्लूकं॥ पाशञ्च मुक्त का
ष्टञ्च वायसं गन्धकं तथा। अ
ग्रदानिक्षाम्रणञ्च नक्रमन्त्रोप
जीविनं॥ वैद्यञ्च रक्तपुष्पञ्चै
वौषधं तप मेव च। ऊर्ध्ववार्त्ती मृ
तवार्त्ताञ्च विपन्नापञ्च दारु
णं॥ दुर्गन्धिवातं दुःशब्दं राजा
संप्राप्य वर्त्मनि। मनञ्च क्रान्ति
तं प्राणाः क्षुभिताश्च निरन्त
रं॥ वामाङ्गस्पन्दनं देहजाङ्ग्य
राज्ञो बभूव ह। तथापि रा
जा निःशङ्को दर्पी दर्पी म
मङ्गलं॥ इति ब्रह्मवैवर्त्ते गण
पतिखण्डे ३४ अध्यायः॥

अमरः पुं अमरसिंहः। स चा
दिशाब्दिकः नामलिङ्गानुशासन
नामककोषकारः विक्रमादित्य
राजसभीय नवरत्नान्तर्गत रत्न
विशेषश्च। यथा॥ इन्द्रश्चन्द्रः का
शकृत्स्ना पिशली शाकटायनः
। पाणिन्यमर जैनेन्द्रा जयन्त्यष्टा
दि शाब्दिकाः॥ इति कविकल्प
द्रुमः॥ धन्वन्तरि क्षपणक अमर
सिंह शङ्कु वेतालभट्ट घटकर्प
र कालिदासाः। ख्यातो वराहमि
हिरो नृपतेः सभायां रत्नानि
वै वररुचि र्नवविक्रमस्य॥ इति
नवरत्नं॥ सएव बौद्धमतावलम्बी
ति केचित्॥

अमरावती स्त्री इन्द्रनगरी। इ
त्यमरः॥ अमराः सन्ति अस्या मि
ति मोऽङ्गुरूपादिति वत नाम्न
स्यर्थे इति दीर्घः। इति भरतः॥
तत्पर्यायः। सुबभाषा २ देव
पूः ३। इति जटाधरः॥ महेन्द्रन
गरी ४ अमरा ५ स्वरपुरी ६।
इति शब्दरत्नावली॥ तद्वर्ण
नं यथा। शिवशर्म्मोवाच। रम
यन्ती मनोनीव केयं कस्यय
मीक्षितः। नयनानन्द सन्दोह

दायिनी ह रत्नत्रमा॥ गणाञ्चतुः
। शिवशर्म्मन्महाभाग स्त्वतीर्थ
कल्पितद्रुमा। लोकोत्र रमते विप्र
सहस्रास्तपुरी त्विषं॥ तपोबले
न महता निर्म्मिता विश्वकर्म्म
णा। दिवापि कौमुदी यस्याः सौ
ध श्रेणीश्रियं श्रयेत्॥ यदा क
लानिधिः क्वापि दर्शे गृहस्य
त्व मावहेत्। तदा स्वप्रेयसी ज्यो
त्स्नां सौधेषु निगूहयेत्॥ षद्
क्रुभित्तौ वीक्ष्य स्व मन्येयोषि
द्विशङ्किता। मुग्धा नास्तु विशे
षित्रमपि स्वां चित्रशालिकां॥
हर्म्येषु नीलमणिभि र्निर्म्मि
तेषूत्रानिर्भयं। स्वनीलिमान माधा
य तमो ऽहःस्वपि तिष्ठति॥ चन्द्र
कान्त शिलाजाल स्रुत मत्रा
मलं जलं। तत्र चादाय कलसै
र्वैच्छन्त्यजलं जनाः॥ क्रीडन्
न च सन्त्यत्र न च ते पशवोहरा
। चलाञ्चलद्रुमी रत्र यतः कल्प
द्रुमो ऽप्ययेत्॥ गणका नात्र वि
द्यन्ते चिन्ताविद्या विशारदाः
यतो जानाति सर्वेषां चिन्ता
चिन्तामणिद्रुमं॥ सूपकारा न स
न्त्यत्र रसकर्म्मविचक्षणाः। दुग्धे
सर्वरसानेका कामधेनुरतो ऽ

त्रिशं॥ कीर्त्ति रुच्चैःश्रवा यस्य स
वैतो वाजि राजिषु। रत्नमुच्चैःश्रवा
स्थात्र हयानां पौरुषाधिकः॥ ऐ
रावतो दन्तिराज चतुर्दन्तोत्र
राजते। द्वितीय इवकैलासो जङ्ग
मः स्फाटिकोज्वलः॥ तरुरत्नं
पारिजातः स्त्रीरत्नं सोर्वशी
त्विह। नन्दनं वनरत्नञ्च रत्नं
मन्दाकिनी ह्यपां॥ त्रयस्त्रिंशत्
पुराणां या कोटिः प्रतिसमी
रिता। प्रतीक्षते सावसरं सेवार्थे
प्रत्यहं त्विह॥ स्वर्गेष्विन्द्रपदाद
न्यन्न विशिष्येत किञ्चन। यत्र
त्रैलोक्य मैश्वर्य्यं न तत्तुल्य
मनेन हि॥ अश्वमेध सहस्रस्य
लभ्यं विनिमयेन यत्। किन्ते
न तुल्य मन्यत् स्यात्स्वर्ग
मथ वा महत्॥ अर्च्चिष्मती संप
मती पुण्यवत्यमलावती। गन्ध
वत्यलकैशी च नै ततस्या मह
र्द्धिभिः॥ अय मेव सहस्राक्ष स्त
थमेव दिवस्पतिः। शतमन्यु रय
न्देवो नामान्येतानि नामतः॥
सप्तापि लोकपाला ये तएते स
मुपासते। नारदाद्यै र्मुनिवरै र
यमाशीर्भि रीड्यते॥ एतत् सैय
र्य्येण सर्वेषां लोकानां सैय

र्य्यं सिध्यते।पराजयान्महेन्द्रस्य
त्रैलोक्यं स्यात् पराजितं॥मनु
जा दनुजा दैत्या स्तपस्यन्त्युग्र
संयमाः।गन्धर्व यक्ष रक्षांसि म
हेन्द्रपदलिप्सवः॥सगराद्या म
हीपाला वाजिमेधविधायकाः।
कृतवन्तो महायत्नं शक्रैश्वर्य्य
जिहीर्षवः॥निष्प्रत्यूहं क्रतुशतं
यः कश्चित् कुरुते ऽवनौ।जिते
न्द्रिया ऽमरावत्यां स प्राप्नोति
पुलोमजां॥असमाप्तक्रतुशता
वसन्त्यत्र महीभुजः।ज्योति
ष्टोमादिभिर्यागै र्ये यजन्त्यपि
ते द्विजाः॥तुलापुरुषदानादि
महादानानि षोडश।ये यच्छ
न्त्यमलात्मान स्ते लभन्ते ऽम
रावतीं॥अक्लीववादिनो धीराः
संग्रामेष्वपराङ्मुखाः।विक्रान्ता
वीरशयने नेत्र निषीदन्ति भूभुजः
॥इन्द्रद्वेशात् समाख्याता महेन्द्र
नगरीस्थितिः।यायजूका व
सन्त्यत्र यज्ञविद्याविशारदाः
॥एतस्या दक्षिणेभागे ये यं
दृश्येत ऽरः शुभा।इमा मौर्व्वि
वसतीं वीक्ष्य वीतिहोत्रपुरीं
शुभां॥इति स्कान्दे काशीख
ण्डे ९ अध्यायः॥

अमात्यः पुं मन्त्री।तत् परीक्षा
यथा।शान्तो विनीतः कुशलः
सत्कुलीनः शुभान्वितः।शा
स्त्रार्थतत्त्वगो ऽमात्यो भवेद्भू
मिभुजामिह॥इति युक्तिक
ल्पतरुः॥
अमावस्या स्त्री कृष्णपक्षान्त
तिथिः।तद्व्यवस्थादि यथा।अ
मावस्या।सा च प्रतिपद्युता ग्रा
ह्या शुभमात्।ब्राह्मपुराणे चाण्डा
लशपथे।षष्ठ्यष्टम्यप्यमावास्या उ
भेपक्षे चतुर्द्दशी।अस्नातानां ग
तिं यास्ये यद्यहं नागमे पुनः॥
अतो ऽत्र स्नानमावश्यकं।
अतो ऽत्र जीवत् पितृकेणापि
स्नातव्यं।अमास्नानं गयाश्राद्धं
दक्षिणामुखभोजनं।न जीवत्
पितृकः कुर्य्यात् कृते च पितृ
हा भवेत्॥इति वचनं गयाश्राद्ध
स्नाननिषेधकं।त्रयोदशीप्रक
रणोक्त भोगाय क्रियते यत्तु
स्नानं यादृच्छिकं नरैः।तन्नि
षिद्धं दशम्यादौ नित्यनैमित्ति
के न तु॥इति वचनाच्च॥ ॥
पैठीनसिः।न पर्व्वसु तैलं चौ
रं मांसं मभ्युपेयात्।नामा
वास्यायां हरित मपि छिन्द्यात्।

इति॥ ॥पुष्ये तु जन्मनक्षत्रे
व्यतीपाते च वैधृतौ।अमायां
च नदीस्नानं पुनात्यासप्तमं
कुलं॥अत्र दहन्त्याजन्मदुष्कृत
मिति ज्योतिषे पाठः॥ ॥व्यासः
।अमावास्या भवेद्वारे यदि भू
मिसुतस्य च।गोसहस्रफलं द
द्यात् स्नानमात्रेण जाह्नवी॥
सिनीवाली कुहू र्वापि यदि सो
मदिने भवेत्।गोसहस्रफलं
दद्यात् स्नानं यन्मौनिना कृतं॥
सिनीवाली चतुर्द्दशीयुक्तामावा
स्या व्यस्तापि प्रशस्ता एव मन्व
त्रापि वारविशिष्टविधौ न युग्मा
दरः निरवकाशत्वेन संशयाभा
वात्।एतच्च मौन मरुणोदय
कालमारभ्य स्नानपर्य्यन्तं न
तु स्नानकालमात्रे।तत्र उच्चारे
मैथुने चैव प्रस्रावे दन्तधावने
।स्नाने भोजनकाले च षट्सु
मौनं समाचरेत्॥इति स्कान्दे
न तस्य सामान्यतः प्राप्तत्वात्
।उच्चारे पुरीषोत् सर्गे॥ ॥
स्मृतिः।करतोया जले प्राप्य
यदि सोमयुता कुहूः।अरुणो
दयवेलायां सूर्य्यग्रहशतैः समा
॥स्नानमन्त्रः।करतोये सदानी

रे सरित्श्रेष्ठे सुविश्रुते।पौण्ड्रान्
प्लावयसे नित्यं पापं हर करो
द्भवे॥पौण्ड्रान् देश विशेषान्॥
॥ ॥मरीचिः।मासे न तस्यामावा
स्या तस्यां दर्भेव योमतः।अया
तयामा स्ते दर्भा विनियोज्याः
पुनः पुनः॥अत्र दर्भा कृष्णाजि
न मन्त्रा ब्राह्मणा हविरग्नयः।
अयातयामान्येतानि नियोज्या
नि पुनः पुनः॥इति गृह्यपरि
शिष्ट वचनेनैव सिद्धो श्रावणा
मावस्याया उपादानं।वार्षि
का श्चतुरो मासा न्नाहरेत् कु
शमृत्तिकाः।आर्द्रा तदभाव
पि सैषा यस्योपयोजनं॥इति
संवत्सरप्रदीपधृतं षिवरह
स्यीयस्यापवादक मिति॥
विद्याकरधृतं।संग्रहादस्तं
यावत् शुद्धिः स्यादिश्म वर्हिषां
ततः परं न गृह्णीयात् जपादौ
यज्ञकर्म्मणि॥ ॥संवत्सरप्रदी
पे।अमावास्यान्तु कन्यार्के
तीर्थप्राप्ते तथा नृपाहन्त श्रा
द्धं विधानेन दद्यात् षोडशापि
एडकं॥तत्प्रमाण प्रयोगी षो
डशीशब्दे द्रष्टव्यो॥ ॥
अमावास्यायामपि मलमासेश्रा

द्धाभावमाह कौथुमिः। सम्वत्स
रातिरेको वै मासो यः स्यात्त्रयो
दशः। तस्मिंस्त्रयोदशे श्राद्धं न
कुर्य्यादिन्दुसंक्षये॥ सम्वत्सरप्र
दीपे। एकराशिस्थिते सूर्य्ये य
दि दर्शद्वयं भवेत्। दर्शश्राद्धं त
तदादौ स्यात् परत्र मलिम्लुचे॥
यत्तु। जातकर्मणि यत् श्राद्धं द
र्शश्राद्धं तथैव च। मलमासेऽपि त
त्कार्य्यं व्यासस्य वचनं यथा॥ इ
ति व्यासवचनं तत् पिण्डपितृय
ज्ञाख्य श्राद्धपरं॥ ॥ अमावा
स्याश्राद्धकालमाह छन्दोगप
रिशिष्टं। पिण्डान्वाहार्य्यकं श्राद्धं
क्षीणे राजनि शस्यते। वासरस्य
तृतीयांशे नातिसन्ध्यासमीप
तः॥ पिण्डानां पितृणां अन्वा
हार्य्यं श्राद्धं मासेकर्त्तमनन्त
कं यत्तत्तथा। तथा च मनुः। पि
ण्डानां मासिकं श्राद्धं मन्वाहा
र्य्यं विदुर्बुधाः। राजनि चन्द्रे। श
स्यत इत्यनेन कचिच्चन्द्रक्षयाभा
वेऽपि अमावास्याश्राद्धं सूचितं। ए
तादृशवृत्तपत्रेः साग्नि निरग्नि
साधारणत्वाद्वक्ष्यमाण कात्याय
नोक्त रीत्या क्षीणा लम्भिता व
र्द्धमाना भेदः साधारणः॥ ॥ यत्तु

पितृयज्ञन्तु निर्वर्त्य विप्रश्चन्द्र
क्षये ऽग्निमान्। पिण्डान्वाहार्य्यकं
श्राद्धं कुर्य्यान्मासानुमासिकं॥
इति मनुवचनं तत् साग्निः पिण्ड
पितृयज्ञं निर्वर्त्य मासानुमासिकं
प्रतिमासिकं श्राद्धं कुर्वीतेति
क्रमविधायकं। अत्रानुशब्द
स्य वीप्सार्थकत्वात्। तथा चामर
णे वीप्से—त्थंभूताभि भागे पौ
प्रती। अन्वरेषु सहार्थे च हीने उ
पस्तु कथ्यते॥ चन्द्रक्षये ऽमावा
स्यायां तत् कात्यायनोक्तक्षये
तथात्वे वर्द्धमानादौ प्रतिमासानु
पपत्तेः। एवमेव श्राद्धविवेकः।
अतएव तन्त्रेवामावास्याव्यतिरि
क्त कृष्णपक्ष विहित पार्वणश्रा
द्धे यथास्थितिं वचनाद्यवस्थि
त्युक्तं। तत्र साग्निक कर्तव्यत्वाविशे
षितामावास्याव्यतिरेकाभिधाना
त् क्षीणादिभेदेन व्यवस्था साग्नि
निरग्निसाधारणीत्यवगम्यते। एव
म्वामावास्यायां मृताहनिमित्त
क औरस दौहित्र कर्तव्य पार्व
णे क्षीयमाणादिना न व्यवस्था
किन्तु यथास्थित्यनेन। एतद्द
र्शनं मलमासतत्त्वे॥ यत्तु दशम
मुहूर्त्तस्य मत्स्यपुराणोक्तापरा

ह्निकत्वेपि श्राद्धे तस्य त्यागः।
पिण्डपितृयज्ञार्थ एवेति वासर
तृतीयांशाभिधानं साग्निपर मे
वेति परिशिष्टप्रकाशोक्तं तन्न
युक्तं। पूर्व्वाह्णो वै देवानां मध्यं
दिनं मनुष्याणां अपराह्णः पितृ
णां इति श्रुत्या तन्मुहूर्त्तस्य
मनुष्यकर्म्माङ्गत्वेन चोदनादेव
श्राद्धे परित्यागः। एतच्छ्रुति मू
लक मेव वासरस्य तृतीयांशे इ
त्युक्तं। वासरस्य तृतीयांशे त्रि
धाविभक्तस्य दिनस्य तृतीयभागे
नातिसन्ध्यासमीपत इति सन्ध्या
समीपैकमुहूर्त्ते आपद्यपि वर्ज्ज
नीय इत्यर्थः। तेन प्रातःकालो
मुहूर्त्तांस्त्रीन् सङ्गव स्तावदेव
तु। मध्याह्नस्त्रिमुहूर्त्तः स्यादप
राह्ण स्ततः परं॥ सायाह्नस्त्रिमुहू
र्त्तः स्यात् श्राद्धं तत्र न कारयेत्।
राक्षसी नाम सा वेला गर्हिता
सर्व्वकर्म्मसु॥ इति मत्स्यपुराणे
निषिद्ध मुहूर्त्तत्रये आपदि मुहू
र्त्तद्वय मभ्यनुज्ञातं अतिशब्दस्व
रसात्। त्रिमुहूर्त्तापि कर्तव्या पू
र्व्वा दर्शाच बह्वृचैः। इति हारी
त वचनाच्च। तेन पूर्व्वदिने मु
हूर्त्तत्रयमात्र लाभे परदिने वा

सरस्य तृतीयांशालाभे पूर्व्वदि
ने एव श्राद्धं। एतेन नातिसन्ध्या
समीपत इत्यनेन राक्षसीवेला
मात्रं निषिध्यत इति मैथिल
मत मपास्तं। सर्व्वकर्म्मसु स्नान
दानादिष्वपि अनापदीत्यर्थः।
इति श्राद्धविवेकः। तेनाप
क्तो तस्या मपि तत् करणं। अत
एव पराशरः। दिवाकरकरैः पू
तं दिवास्नानं प्रशस्यते। अप्र
शस्तं निशिस्नानं राहो रन्यत्र
दर्शनात्॥ इति॥ ॥ दर्शाहे
ये कुत्र श्राद्ध मित्याह छन्दोग
परिशिष्टे कात्यायनः। यदा च
तुर्द्दशी यामं तुरीय मनुपूरये
त्। अमावास्या क्षीयमाणा तदैव
श्राद्ध मिष्यते। चतुर्द्दशी यामं च
तुर्द्दशीसम्बन्धिदिनयाम मिति
तद्दिनस्यामावास्या सम्बन्धेपि
चतुर्द्दशी निर्द्देशो आधिक्येन व्यप
देशो भवन्तीति न्यायात्। तेन
यदा अमावास्या चतुर्द्दशी स
म्बन्धिदिनस्य चतुर्थं प्रहरं कृ
त्स्नं किञ्चिन्न्यूनं वा अनुपूरयेत्
अत्रानुपूरयेदित्यभिधानात्
तुरीयमानस्य पादोनसार्द्धदं
यान्यून प्रथममुहूर्त्तस्य वहका

त्वं प्रतीयते।एतेन प्रहरत्रयाभ्य
न्तरे किञ्चिदधिक प्रहरत्रये वा
चतुर्दशीप्रतीयते।ततश्चोभयथा
सरीयतृतीयांशसम्बन्धि पंचधावि
भक्तापराह्णे मुहूर्त्तयोर्मुहूर्त्ता
न्यून दर्शलाभे द्वैधं तत्वेकदिन
मात्रे तल्लाभे।तत्र पूर्व्वोक्तेन वा स
स्य तृतीयांश इत्यनेनैव द्वैधा
नुदयात्।अतो यदिनेवासर तृ
तीयांशे नाहशादर्शलाभ स्तत्रै
वश्राद्धं।मुहूर्त्तेन निषेधस्तु क
र्म्मानर्हत्वान्न द्वैधापरः।तथा
च भविष्ये।व्रतोपवास नियमे
घटिकैका यदा भवेत्।सा तिथिं
सकलाज्ञेया पित्र्यर्थे चापराह्णि
की।इति।अत्रच प्रागुक्त जा
वालिवचनोक्ता मुहूर्त्तात्मि
का घटिका ग्राह्या।योग्यत्वात्
नत्वेकदंडात्मिका वक्ष्यमाणरो
हिण्यादिग्रहणे तथा दृष्टत्वात्।
ततश्च पूर्व्वोक्तद्वैधे तद्दिवसीय
चतुर्दश्यपेक्षया परदिने अमावा
स्याक्षीयमाणा न्यूनकालव्यापि
नी नतु पूर्व्वापरद्दिवसीय यावच्च
तुर्दश्यपेक्षया अनुपस्थितः।एवंक्ष
यिभाववर्द्धमानयोरपि।तदेव पूर्व्वेद्
युरेव श्राद्धं।स्वोक्तचन्द्रक्षयानुरो

धात्।यदात्रिंशद्दण्डात्मकदिवसेच
तुर्दश्यधिक चतुर्थयाम स्पर्शेण मु
ख्यापराह्णीय किञ्चिन्न्यून मुहूर्त्त
लाभ स्तदापि तदैवेत्यनेन चन्द्रक्ष
यानुरोधात् पूर्व्वेद्दिने श्राद्धं न तु
मुख्यापराह्णीय मुहूर्त्तलाभेऽपि
परदिने।अत्र चन्द्रक्षयश्चतुर्दश्य
ष्टमयामात् प्रभृति अमावास्या
सप्तमयाम पर्य्यन्त मितिवक्ष्यते।
तदैवेत्येव श्रवणात्तिथिद्वैधे ख
ण्डविशेषो नियम्यते कर्म्मणि
खण्डान्तर व्युदासाय।एवञ्च
यत्र पूर्व्वापरदिने वासर तृतीयां
शीय मुख्यापराह्णे मुहूर्त्तौ न द
र्शलाभ स्तत्रापि पूर्व्वदिन एव
श्राद्धं वासर तृतीयांश चन्द्रक्षया
तिशब्द स्वरसात्।त्रिमुहूर्त्तो पीत
नुरोधाच्च।।यत्र तु पूर्व्वदिने त्रिमु
हूर्त्तमात्र व्यापिन्यमावास्या पर
दिने तृतीयांश मुहूर्त्त व्यापिनी
सती क्षीयमाणा तत्र परदिने
चन्द्रक्षयाभावेऽपि मुख्यापराह्ण
लाभात् श्राद्धं।अन्यथा यदा
चतुर्दशीयामे तुरीये मनुसरेयेत्।
इति विशेषाभिधानं व्यर्थं स्या
त्।। ।।अथ यत्र पूर्व्वाह्णे
श्राद्धं तत्र यदहस्त्वेव चन्द्रमा

97

न दृश्येत ता ममावास्यां कुर्व्वी
त इति गोभिलविरोधः।तथावि
धचतुर्दशीयुक्तामावास्यायाः
सिनीवालीत्वेन प्रातश्चन्द्रदर्शना
त्।तत्राह सएवायदुक्तं यदहस्त्वे
व दर्शनं नेति चंद्रमाः।तत्क्षया
पेक्षया तेयं क्षीणे राजनि चेत्य
पि।यदहस्त्वेव चन्द्रमा नदृश्ये
त ता ममावास्यां कुर्व्वीत इति
यद्गोभिलसूत्रं तच्चन्द्रक्षयाभि
प्रायिकं।अन्यथा गोभिलीय
तादृश सूत्रान्तरेण सह पौनरु
क्त्यापत्तेः।तस्मात् प्रथमसूत्रं
कुहूपरं तच्च वर्द्धमानापेक्ष नि
यतं।क्षीण स्तिम्भितयोस्तु य
था योग्य मनुसरणीयं।एवञ्च
यदहस्त्वेव चन्द्रमा नदृश्येत
ता ममावास्यां कुर्व्वीत इति सू
त्रेण तत् समानार्थकं सूत्रान्तरं
वा तदपि वर्द्धमानाभिपरं न तु
कात्यायन वचनात्तत्र क्षयलक्ष
ण। कस्यनरुप्रभृतिभिरुक्तायु
क्ता।श्रुतिस्मृति विरोधे तु श्रुतिरे
व गरीयसीति विरोधात्।क्षीणा इ
ति कात्यायनेन मया यत्क्षीणे रा
जनीत्युक्तं तदपि क्षयाभिप्रायकं
।अथैवं दृश्यमानेप्येकदा इति

यद्गोभिलस्य सूत्रान्तरं तदर्थं।
यदहस्त्वेव इत्यादि द्वितीयसूत्र
प्राप्ततिथेः सिनीवालीत्वेनैव
चंद्रदर्शनप्राप्ते रित्यत आह स
एव।यच्चोक्तं दृश्यमानेपि तच्च
तुर्दश्यपेक्षया।अमावास्यां प्रा
तीतेन तदन्येवापि निर्व्वपेत्।।
दृश्यमाने प्येकदेति यदुक्तं त
च्चतुर्दश्यां आदाय पूर्व्वसूत्रे म
मावास्यापदोपादानाच्चन्द्रक्षये
सत्यमावास्याविषयं।इदं पुनरि
त्थम्भूतचतुर्दशीविषय मिति आ
ह विवेकः।ननु किममावास्याव
च्चतुर्दशीत्यत्राह अमावास्यां
प्रतीतेन उभयतिथि प्राप्तौ आ
द्यायामावास्या प्रतीतव्या।
यत्र पूर्व्वदिने दिवा सार्द्धमुहूर्त्त
मात्रे अमावास्या परदिने च सा
र्द्धदशमुहूर्त्तमात्रे तत्र चोभय
दिने श्राद्धयोग्यामावास्या न प्रा
प्यते तत्र तदन्ते चतुर्दश्यान्ते
निर्व्वपेत् इत्यात्।। ।।अत्रैव विष
ये साग्निनिरग्नि विशेषमाह
कालमध्यवीय जावालिः।अप
राह्ण द्वयाव्यापी यदि दर्शस्तिथि
क्षये।आहिताग्नेः सिनीवाली
निरग्न्यादेः कुहूर्म्मता।।आदि

णाद्वादनुपनीत मूद्रयो ग्रेहणं।
॥तत्र माह कात्यायनः।अष्ट
मे ऽंशे चतुर्दश्याः क्षीणो भव
ति चन्द्रमाः।अमावास्याष्टमांश
च ततः किल भवेदणुः॥चतु
र्दश्यष्टमे यामे चन्द्रमाः क्षीणः
चतुर्थभागेन कलावशिष्टो भ
वति।अत्रेन्दु राद्यप्रहरे ऽवतिष्ठ
ते इत्यादि स्वरसात्।अमावास्या
ष्टमे यामे चाणु भवति पुन
रुत्पद्यते किल त्यागमवाक्षीया
तेन अमावास्यायाः सप्तमे या
मे कृत्स्नस्तस्य दृश्यवगास्यते।त
त अन्त्यकला वयवमाशोत्य
ति रेव क्षयः सा च सूक्ष्मता
यां विनाशोप्यस्तीति श्राद्धवि
वेकः॥उत्पत्ति राद्य क्षणस्मृ
न्यः तेन विनाशस्यानन्त्येपि
नातिव्याप्तिः॥ ॥अत्रविशेष मा
ह सएवा।आग्रहायण्य मावा
स्या तथा ज्येष्ठस्य या भवेत्।वि
शेषमाभ्यां ब्रुवते चन्द्रचारवि
दो जनाः॥आभ्या मिति
ल्यब्लोपे पञ्चमी इमे प्रा
प्येत्यर्थः।चन्द्रचारविदो ज्योति
र्विदः।अत्र पौर्णमास्यन्तमास
इति परिशिष्टप्रकाशः॥अत्र

बीजं ब्रह्मपुराणीय निषिद्धत्वं।
तथा च श्राद्ध मधिकृत्य ब्रह्मपु
राणं।पयो मूल फलैः शाकैः कृ
ष्णपक्षे च सर्वदा।अत्र कृष्णप
क्षे चतुर्दशीव्यतिरिक्तायां यस्यां
कस्याञ्चित् तिथौ श्राद्धविधाना
दमावास्यापि लभ्यत इति॥ ॥
कोविशेष इत्यत्राह सएव।अत्रे
न्दु राद्यप्रहरेऽवतिष्ठते चतुर्थभा
गोनकलावशिष्टः।तदन्त एव
क्षय मेति कृत्स्न मेवं ज्योति
श्शास्त्रविदो वदन्ति॥अत्र याम
द्वये अमावास्यायां चतुर्थभागे
ना या कला तयावशिष्टः क
लाभागत्रयमात्रः सन्नाद्ये प्र
हरे ऽवतिष्ठते।अर्थात् चतुर्दश्यष्ट
मयामे क्षयारम्भ इति।तदन्त एव
अमावास्यान्त्ययाम एव क्षयं कृ
त्स्नमेति।अन्यत्रामावस्या सप्तम
याम इति विशेषः।तेन मार्गशी
र्षं ज्येष्ठयो स्तुत्यादिने चन्द्रक्षय
लाभे यद्यपि यदा चतुर्द
शीयाममिति वचनात् प्र
थमदिने एव श्राद्धं प्राप्नोति
तथापि तद्वचनं चन्द्रक्षयानु
रोधमूल मिति।कृत्स्न क्षयानु
रोधात् क्षीणायां मपि पर

त्रापराह्णलाभे श्राद्धं अन्यथैत
द्विशेषाभिधानं व्यर्थं स्यात्॥
अत्रापि विशेषान्तर माह सएव
।यस्मिन्नब्दे द्वादशैकश्च यत्र
स्तस्मिंस्तृतीयया परिदृश्येण नोप
जायते यव्योमासः।तृतीयया
मात्रया चतुर्थभागेन कलया
परिदृश्यश्चन्द्रो न भवति किन्तु
तदधिक न्यून कलयेति।तेन म
लमासयुताब्दे अन्यमासवदनयो
रपि चतुर्दश्यन्तयामादि दर्श सप्त
मयामपर्यन्तं क्षय इति।मलमा
सयुताब्दस्तु एकस्मान्मलमासाद
द्वितीयान्तराब्दस्तृतीये ऽब्दे मल
मासस्यावश्यम्भावादिति॥चन्द्र
क्षयानुरुद्धं क्षीणपक्ष मुपसंहर
ति सएवा।एवं चारं चन्द्रमसो विदि
त्वा क्षीणे तस्मिन्नपराह्णे च दद्या
त्।एवं चारं गतिविशेषं॥ ॥
सिनीवाल्याद्यवस्था माह सएव
।सिनीवाली या चतुर्दश्या अमावा
स्या भवेत् क्वचित्।वर्द्धिता नो वि
दुः केचिदुपेयु मिति चापरे॥
क्षीणायाः पूर्वं मुक्तत्वात् वर्द्धमा
नायाश्च वक्ष्यमाणत्वात् अस्य वच
नस्य सिनीवालीपरत्वं।वर्द्धिता नी
तां पितृलोक प्रापणान्नर्हौ

केचित् यजुर्वेदिनः।अपरे ऋग्वे
दिनः तामेव उपेयु मुपगच्छन्त
श्राद्धायेति शेषः।उपेयुमित्यत्र
गताध्वा मितिपाठे गतः प्राप्तः
पितृलोकप्रापणाय अध्वा अना
येति गताध्वा प्रशस्तेत्यर्थः।तस्मा
च्छन्दोगा उभयानुरोधादिच्छन्त
उभयादरं कुर्वन्ति इति कात्याय
नस्वरसः॥ ॥अत्र माह लघुहा
रीतः।त्रिमुहूर्त्तापि कर्त्तव्या पूर्वा
दर्शी च बह्वृचैः।ऊहु रध्वर्युभिः
कार्या यथेष्ट सामगीतिभिः॥अ
त्र त्रिमुहूर्त्ते भ्युपादानात् सिनी
वाल्याः पूर्वदिने त्रिमुहूर्त्तमात्रला
भेपि बह्वृचानां श्राद्धं।न तु मुख्या
पराह्ण लाभादपि परदिने।साम
गानां तत्राप्यनियमः।एतद्
विषय एव उभयत्रापराह्णालाभे
पीयं व्यवस्थेति श्राद्धविवेकः॥
मुख्यापराह्णस्य एकदिनमात्रलाभे
तूभयदिनालाभात्॥ ॥
वर्द्धमानायां व्यवस्था माह
कात्यायनः।वर्द्धमाना ममावा
स्यां लक्षये दपरे ऽहनि।यामां
स्त्रीनधिकान् वापि पितृयज्ञ
स्ततो भवेत् ॥
यामांस्त्रीनिति सर्वदिवसीय

यामत्रयन्न्यूनचतुर्दश्यपेक्षया।
अथैवं वासरतृतीयांशात् ऐधे
न श्राद्धविधानात् कथममावा
स्याश्राद्धे पर्य्युदस्तरात्र्यादीत
र कालपरिग्रहः।सत्यं।तिथिद्वै
धे त्रीण्यादिभेदेन खण्डविशेषप
रिग्रहाय वासरतृतीयांशापेक्षा
अन्यथोभयदिने वासरतृतीयां
शाप्राप्तौ श्राद्धलोपापत्तेः।
प्रागुक्त निरुक्त्यादेः कुहूर्म्मिते
त्यस्य निर्विषयतापत्तेश्च अतः
पर्य्युदस्तेतरकालस्यापि परिग्र
हः।यदा तु सर्व्वापर खण्डयो र
न्यतरस्यैव परिग्रहः तदा य
थायोग्यं तत्रैव सायाह्नकुहू
त्वेहय पर्य्युदस्तेतरकाल कु
तपादि मुहूर्त्तपञ्चक रौहिण
दि मुहूर्त्तचतुष्टय वासरतृतीयां
शीयापराह्न मुहूर्त्तद्वयकालाः
।यथाक्रम माप्तत् सामान्यप्र
शास्तेतर प्रशस्ततमत्वेन ज्ञेयाः
एव मखण्डतिथावपि नाति
सन्ध्यासमीपत इति सर्व्वोक्त
त्वात्।सायाह्न स्त्रिमुहूर्त्तः स्या
त्।श्राद्धं तत्र न कारयेत्।इति
मत्स्यपुराणात्।राक्षसी श्राद्धं न कु
र्वीत राक्षसी कीर्त्तिता हि सा

सन्ध्ययो रुभयो श्चैव सूर्य्ये चै
वाभिरोदिते।।इति मनुवचना
भ्यां ऊर्द्ध मुहूर्त्तात् कुतपात्
यन्मुहूर्त्तचतुष्टयं।मुहूर्त्तपञ्च
कं वापि स्वधाभवन मिष्यते।।
इति मत्स्यपुराणात् मुहूर्त्तपञ्च
क मित्यत्र कुतपादिति ल्यब्
लोपे पञ्चमी कुतप मारभ्येत्य
र्थः।तत स्तत्रैव।अपराह्णे तु
सम्प्राप्ते अभिजिद्रौहिणोदये
।यदत्र दीयते जन्तो स्तदक्षय
मुदाहृतं।।इत्युक्तं।सर्व्वाह्णो
वै देवानां मध्यन्दिनं मनुष्या
णां अपराह्णः पितॄणां।इतिश्रु
तिः।वासरस्य तृतीयांश इति
कात्यायनवचनं सायाह्न स्त्रि
मुहूर्त्तः स्यात् श्राद्धं तत्र न कार
येदिति पामेकवाक्यत्वात् वासरतृ
तीयांशीयापराह्नमुहूर्त्तद्वयस
लाभः।इति तिथ्यादितत्त्वं।।
अमृतं क्ली पीयूषं।तत्पर्य्या
यः।निर्जरं ५ समुद्रनव
नीतकं ८।इति शब्दर
त्नावली।।
अमृतफलं क्ली फलविशेषः।
नासपाती इति पारस्यभा
या।यथा।अमृतफलं।
षा

यदहकसान कादिल प्रभृति दे
शेषु नासपाती इति प्रसिद्धं।अ
मृतफलं लघु वृष्यं सुस्वादु त्री
न् हरेद्दोषान्।देशेषु सभ्यता
नां बहुलं तल्लाभे लोकैः।।
इति भावप्रकाशः।।
अमृताष्टकं क्ली हरीतक्यादिष्ट
द्रव्यं।यथा।अमृता कटुकारिष्ट
पटोल घन चन्दनं।नागरेन्द्रय
वञ्चैतदमृताष्टक मितीरितं।।
कथितं सकणाचूर्णं पित्तश्ले
ष्मज्वरापहं।हृल्लासारोचक
च्छर्द्दि तृष्णा दाह निवारणं।।
इति भावप्रकाशः।।
अम्व गतौ।उष्म वर्गशेषोप
धः।अम्बति।इति दुर्गादासः।।
अम्बुवाची स्त्री ऋतुमती पृथ्वी
।यथा।यद्वारे यत्काले मिथु
नसंक्रमणं भूत् तद्वारभ्य तत्त
द्वारे तावत्कालावधि दिनत्रय
दिवसाधिकदिनत्रय मम्बुवा
ची।तत्राध्ययनं बीजवपनं न
कार्य्यं।सर्पभयोपशमनाय दु
ग्धं पेयं।इति कृत्यतत्त्वं।।
अपि च।ज्योतिषे।वजेत्तु
कुत्राम्बुवाची च रौद्राद्यपा
दगे रवौ।तस्यां पाठो

बीजवापो माङ्गल्यीः दुग्धपान।
तः।।मृगशिरसि निवृत्ते रौद्रपा
दे स्वुरणी ऋतुमती खलु पृथ्वी
वर्ज्जयेत्ती अपहानि।यदि वपति
कृषाणः क्षेत्र मासाद्य बीजे न
भवति फलभागी शस्य चाण्डाल
पाकः।।रजोयुक्ता ऋतुमती
पृथ्वी।।मन्त्रस्तु केऽथ रण्या मृत।
मन्या ञ्च भूमिकम्प तथैव च।
अन्नाराधने चैव विद्यां नैव पठेद्बु
धः।।ज्योतिषे।यस्मिन् वारे सह
स्रांशुर्येत् काले मिथुनं व्रजेत्
अम्बुवाचीभवेन्नित्यं पुनस्तत्
काल वारयोः।।इदन्तु प्रायिकं
।इति तिथ्यादितत्त्वं।। ।।अन्य
च्चायदादैर्त्ते समादाय भानो
र्म्मिथुनगामिनः।पुनस्तस्येव
मादाय।यजनं त्रिदिनं त्यजेत्।।
काम्यं नैमित्तिकञ्चैव यात्रा म
ङ्गलक्रियास्तथा।ऋतुमत्यां न कु
र्वीत सर्व्वसङ्कल्पिताहते।।न कु
र्य्यात् खननं भूमेः सूच्यग्रेणापि
शाङ्करि।बीजानां वपनञ्चैव
चतुर्विंशति यामकं।।
समाद्वाहपनं कृत्वा गाव स्त
त्र प्रचारयेत्।कार्त्तिकुर्य्यात्
तन्तु दोषाच्च खनना न्नित्य

कान्वनं॥इति मत्स्यसूक्ते म
हानन्त्रे ५८ पटलः॥ ॥अपर
न्त्र।रवौ रुद्राद्यपादस्थे भूमेः
संजायते रजः।तस्मादिनत्रयं
यावत् वीजवापं परित्यजेत्॥
चत्वारिंशाद्विभिक षड्भागयुतो
रवि र्यदा भवति।तत्राम्बुवाची
ज्ञेया शिवक्षेपादस्थितो याव
त्॥द्विभागमभ्युत्क्षिप्तो गणि
तेन भवति रवि र्यदा साम्रः।
स भवति निर्गुणकालो द्विती
यपादाश्रयाद्रौद्रे॥न स्वाध्या
यं वषट्कारं न देव पितृतर्पणं
।हलानां वाहनञ्चैव वीजानां
वपनंतथा॥इति राजमार्त्तण्डः
॥ ॥अत्र पाकनिषेधो यथा
।यतिनो ब्रतिन श्चैव विधवा
च द्विज स्तथा।अम्बुवाचीदि
ने चैव पाकं कृत्वा न भक्षये
त्॥स्वपाकं परपाकं वा अ
म्बुवाचीदिने तथा।भक्षणं
नैव कर्त्तव्यं चाण्डालान्नस
मं स्मृतं॥इति सम्वत्सरप्रदी
पे विस्तुरहस्यं॥

अम्ललोणिका स्त्री चाङ्गेरी।
तत्पर्य्यायगुणाः।चाङ्गेरी।चु
क्रिया दन्तशठाम्बष्ठाम्ललोणिका
।अश्मन्तकस्तु शाकरी कुश
ली चाम्लपत्रकः॥कचित्पुस्त
के कुशलीस्थाने शाकली इति
च पाठः॥चाङ्गेरी दीपनी रुच्या
लघुस्था कफवातनुत्।पित्तलाम्ला
ग्रहण्यर्शः कुष्ठातीसारनाशि
नी॥इति भावप्रकाशः॥

अम्लवेतसः पुं अम्लरसवृक्षवि
शेषः।तत्पर्य्यायगुणाः।स्यादम्ल
वेतस श्चुक्रः शतवेधी सहस्र
जित्।अम्लवेतस मत्यम्लं भेद
नं लघु दीपनं॥हृद्रोगशूल
गुल्मघ्नं पित्त लोहितदूषणं।
रूक्षं विट्मूत्रदोषघ्नं प्लीहोद
रवन्निनाशनं॥हिक्कानाहारुचि
श्वास कासाजीर्ण वमिप्रणुत्
।कफ वातामयध्वंसि छागमां
सद्रवत्वकृत्॥चणकाम्लगु
णं ज्ञेयं लोहसूचीद्रवत्वकृत्
इति भावप्रकाशः॥

अयन इ·गतौ।उ·अयते।
इति दुर्गादासः॥

अयनं क्ली रविसंक्रान्तिविशे
षः।यथा भविष्य मात्स्ययो।
र्मिथुनान्मृग कर्कोट संक्रान्ती
द्वे तदक दक्षिणायने।विषुव
ती तुला मेष गोलम

ध्ये तथापराः॥मृगो मकरः।
गोलो राशिचक्रं॥देवीपुराणे
।यावद्विंशकला भुक्ता तत्
पुण्यं चोत्तरायणे॥निरंशे भा
स्करे दृष्टे दिनान्तं दक्षिणायने
॥तत्र स्नानदानादौ कोटिगुण
फलं भवति।यथा मात्स्ये।अ
यने कोटिगुणितं लक्षं विसु
पदीषु चाइत्यादि॥अयने वि
षुवे चैव शयने बोधने हरेः।
अनध्यायस्तु कर्त्तव्यो मन्वा
दिषु युगादिषु॥इति तिथ्या
दितत्त्वं॥

सूर्य्यगतिविशेषः।यथा।मृग
संक्रान्तितः सूर्य्ये पश्चात्तारादि
नान्तरेणैकवर्षे चतंपञ्चप
लमानक्रमेण तु॥षट्षष्टिव
त्सरानेकदिनं स्यादयनं रवेः।
एवं चतःपञ्चदिन मयनार
म्भणं क्रमात्॥व्युत्क्रमेण च
तद्वत् स्यादुदग्यानं रवे र्ध्रुवं।
कर्कशंक्रमणे तद्वदभितो द
क्षिणायनं॥इति ज्योतिस्तत्त्वं
॥अयनांशः पुं सूर्य्यगतिविशे
षस्यभागः।अथायनांश लग्नस्या
यनं।लग्नंलग्नान्तरं कृत्वा अय
नांशैः प्रकल्पयेत्।वामस्ते
हरेत भागं विभजित्वा दिने दि
ने॥अस्यार्थः।लग्नं रोमागवेदै
रित्यादिफलं लग्नान्तरं कृत्वा यथा
मेषलग्नं ३४० लग्नान्तरं वृषल
ग्नं ४१० अत्रान्तरेण द्वयो राशि।
केयन ३० त्रिंशत्पलं तत्रायनांशैः
प्रकल्पयेत्॥अयनांशस्तु जानकार्ण
कोक्तः।यथा।शाक मेकाग्नि
वेदोनं द्विः कृत्वा दशाति हरेत्
लब्धं हीनञ्च तत्रैव षष्ट्याप्ता
श्चायनांशकाः॥इति।लब्धस्था
ने लब्धेन इति पाठः सिद्धान्त
रहस्ये॥ते च इदानीं चैत्रस्ये।
कादशाहे सम्भवात् ऊनविं
शति संख्यकैः।ते च पुनः रवा
नलैः ३० त्रिंशता हरेत्।भाग
लब्धिस्तु ऊनविं १९।तत्र मेष
लग्ने निश्चयित्वा ४।८ षट्पला
धिकं दण्डचतुष्टयात्मकं मे
षलग्नं भवति।एवं वृषादिक
मूह्यं।किन्तु लग्नान्तरेण यत्रा
धिकं लभ्यते तत्राधिकं ल
ग्नं भवति।एवं यत्र लग्नान्तरे
ण हानि स्तत्र लग्नेपि हानि
रिति निष्कर्षः॥ ॥इदानीं
स्पष्टतानार्थं पद्येन लिख्यते।
वाणे वेदे ४५ ऽष्टवेदैः कृति

५।४८ रित नयने रिन्द्रियं ५।२८
खोम्भुनेषु ५।८ · वीणा वेदान्तैः
५।३४ खाग्निभि रिषु ५।३ · रिषुर
ङ्गाग्निने ५।३६ ष ऊवेदे ५।४२।
वीणा नागेन्दुभिस्त ५।१८ क्ष्मानि
रपि रसरामे ५।३६ गुणाः सप्त
वाणो ३।५० रामोऽब्धाङ्गिस्त ३।
४० सिद्धान्तजमत मयनांशादिदं
लग्नमानं॥एतच्च नमोलिप्तादि
देशीयं प्राग्लङ्कायनांशादिदं ल
ग्नमानं॥एतच्च नमोलिप्तादि दे
शीयं प्राग्लङ्कायनांशसाधितं॥
अङ्केन वेदो ५।२६ मेषः स्यात् व
सुवेदैः स्वरं ५।४८ वृषः।स्वनि
युग्मैः शरो ५।२० द्वन्द्वः व्योमा
द्विवाण ५।५४ कर्कटः॥वेद रा
मैः शरः ५।३४ सिंहः कन्याङ्कं
युग्मपंचकः ५।२५।तुला ऋ
षि राम पञ्च ५।३० वृश्चिकः
खाद्रिपञ्चकः ५।५४।नव वन्द्र
वाण ५।१८ यन्तु वेद रामैः स्वरं
५।३४ मृगः।वसुपञ्चत्रयः ३।५८
कुम्भः ऋषि वेद त्रयो ३।४० कुम्भ
:॥शक्र वेदच ५।२६ मेषो नव स
ख ५।४८ गो नृपयुग्मैः शिवा
स्या ५।२८ द्वन्द्वोऽङ्काब्धि नवा
णा ५।३१ हिमकरभवनो रामरामैः

कलम्वः ५।३३।सिंहः कन्याज
रामे रिषु ५।३२ रिषुज सुखामीषु
५।३४ युको गैलि हृष्यी ५।४२ वे
देशासो ऽष्ट हृष्यी स्वरहर मुख
५।२८ कोदण्ड माहुर्वेराहाः॥व
न्दू रामस्य वेदा ५।३४ रविसुनभ
वनः पर्वतः पञ्चरामः ३।५० जे
मो मीनस्य भूङ्के गिरि सुखदृ
ने ३।४० प्रत्यहं प्रक्रमेणाम्ब
लं याभिश्चराशाव तदिन मवसा
यञ्च राजीवनाथो ययाति
स्फुटं स्पादुदय मन्हदिवारा
त्र माहुर्वेराहाः॥लग्नं लग्नान्त
रं क्रान्त्येति प्रकारान्तरेण यडङ्क
नदपि पद्येन लिख्यते यथा।
वेदो ऽङ्के ५।२६ रिभवेदैः क्षितिः ५।
४८ सिषुरिभपदैः ५।२८ ऊवेदेषु
वाणो ५।४२ वाणा रामानले ५।३
३ रिन्द्रियमपि नवाद्ने ५।२१ रिषु
रामरामे ५।३० वाणाः शून्याद्वि
ने ५।५४ · पूर्वतिथि ५।२८ रिषुग
लो नद्वि ५।३४ रसेषुलाम्भी ३।५८
रामो ऽब्धाङ्गिस्त ३।४० सिद्धान्तज
मत मयनांशादिदं लग्नमानं॥चैत
स्येकादशाहे तु विषुवारम्भणं
यदा।तदैवलग्नमानं हि ज्ञेय मन्य
त्रसायनात्॥इति ज्योतिषसंग्रहः॥

अयानयीनः उं शारः।यथा।अ
नुपद् सर्वान्नायानयं वद्धा भ
स्तयति नेयेषु।अयानयः स्यात्
विशेषः।तन्त्रेयः।अयानयीनः
शारः।इति सिद्धान्तकौमुदी
॥ ॥
अयोध्या स्त्री श्रीरामनगरी।
सा तु मोक्षदा पुरी।यथा।अयो
ध्यामथुरा माया काशी काञ्ची
अवन्तिका।पुरी द्वारावती चैव
सप्तैता मोक्षदायिकाः॥एतास्तु
पृथिवीमध्ये न गण्यन्ते कदा
चन।श्रीरामधनु रग्रस्था अ
योध्यासामहापुरी॥इति भूत
शुद्धितन्त्रं॥ ॥उद्धरणं यथा।
कोशलो नाम मुदितः स्फीतो
जनपदो महान्।निविष्टः सरयू
तीये प्रभूत धनधान्यवान्॥अ
योध्या नामनगरी तत्रासील्लोक
विश्रुता।मनुना मानवेन्द्रेण या
पुरी निर्मिता स्वयम्॥आयता
दशच द्वे च योजनानि महापु
री।श्रीमती त्रीणि विस्तीर्णा सु
विभक्त महापथा॥राजमार्गे
ण महता सुविभक्तेन शोभि
।मुक्तपुष्पावकीर्णेन जलसि
क्तेन नित्यशः॥तान्तु राजा

दशरथो महाराष्ट्र विवर्द्धनः।पु
री मावासयामास दिवि देवपति
र्यथा॥कपाट तोरणवतीं सुवि
भक्तान्तरापणां।सर्वयन्त्रायुधव
तीं मुषितां सर्वशिल्पिभिः॥सूत
मागध सम्बाधां श्रीमती मतुल
प्रभां।उच्चाट्टाल ध्वजवतीं शत
घ्नी शतसंकुलां॥वधूनाटकसंघै
श्च संयुक्तां सर्वतः पुरीं।उद्यानाम्र
वणोपेतां महतीं शालमेखलां॥दु
र्गगम्भीर परिखां दुर्गां मन्यै र्दुरा
सदां।वाजि वारणसम्पूर्णां गोभि
रुष्ट्रैः खरै स्तथा॥सामन्त राज
संघैश्च बलिकर्मभिरावृतां।नाना
देशनिवासैश्च वणिग्भिरुपशो।
भितां॥प्रासादै रत्नविकृतैः प
र्वतैरिव शोभितां।कूटागारैश्च।
सम्पूर्णां मिन्द्रस्येवामरावतीं॥
चित्रा मष्टापदाकारां वरनारी
गणै र्युतां।सर्वरत्न समाकीर्णां
विमान गृहशोभितां॥गृह
गाढा मविच्छिद्रां समभूमौ नि
वेशितां।शालितण्डुल सम्पूर्णा
मिक्षुकाण्डरसोदकां॥
दुन्दुभीभि र्मृदङ्गैश्च वी
णाभिः पणवै स्तथा॥
नादितां भृशमत्यर्थं पृ

यिव्यां ता मनुत्तमां॥विमान
दिव सिद्धानां तपसाधिगतं दि
वि॥सुनिवेशित वेश्मान्तां नरो
त्तमसमावृतां॥ये च बाणैर्न वि
ध्यन्ति विविक्तमपरापरं।शब्द
वेध्यञ्च विततं लघुहस्ता विशा
रदाः॥सिंहव्याघ्रवराहाणां म
त्तानां नदतां वने।हन्तारो निशि
तैः शस्त्रैर्बलाद्बाहुबलैरपि॥ता
दृशानां सहस्रैस्ता मभिपूर्णां महा
रथैः।पुरीमावासयामास राजा
दशरथस्तदा॥तामग्निमद्भिर्गु
णवद्भिरावृतां द्विजोत्तमैर्वेद
षडङ्गपारगैः।सहस्रदैः सत्य
रतैः महात्मभिर्महर्षिकल्पै
र्ऋषिभिश्च केवलैः॥इत्यार्षे
रामायणे वाल्मीकीये बाल
काण्डे पंचमः सर्गः॥तस्यां पु
र्यामयोध्यायां वेदवित् स
र्वसंग्रहः।दीर्घदर्शी महाते
जाः पौरजानपदप्रियः॥इक्ष्वा
कूणामतिरथो यज्वा धर्मपरो
वशी।महर्षिकल्पो राजर्षिस्त्रि
षु लोकेषु विश्रुतः॥बलवान्नि
हतामित्रो मित्रवान् विजितेन्द्रि
यः।धनैश्च सञ्चयैश्चान्यैः श
क्रवैश्रवणोपमः॥यथा मनुर्म
हातेजा लोकस्य परिरक्षिता॥त
था दशरथो राजा लोकस्य परि
रक्षिता॥तेन सत्याभिसन्धेन
त्रिवर्गमनुतिष्ठता।पालिता सा
पुरी श्रेष्ठा इन्द्रेणेवामरावती॥त
स्मिन् पुरवरे हृष्टा धर्मात्मानो
बहुश्रुताः।नरास्तुष्टा धनैः स्वैः
स्वैरलुब्धाः सत्यवादिनः॥ना
ल्पसन्निचयः कश्चिदासीत्तस्मि
न् पुरोत्तमे।कुटुम्बी यो ह्यसि
द्धार्थोऽगवाश्वधनधान्यवान्
॥कामी वा न कदर्यो वा नृशं
सः पुरुषः क्वचित्।द्रष्टुं शक्यम
योध्यायां नाविद्वान्न च नास्ति
कः॥सर्वे नराश्च नार्यश्च धर्म
शीलाः सुसंयताः।मुदिताः शी
लवृत्ताभ्यां महर्षय इवामलाः
॥नाकुण्डली नामुकुटी नास्रग्वी
नाल्पभोगवान्।नामृष्टो न नलि
प्ताङ्गो नासुगन्धश्च विद्यते॥ना
मृष्टभोजी नादाता नाप्यनङ्गद
निष्कधृक्।नाहस्ताभरणो वापि
दृश्यते नाप्यनात्मवान्॥नाना
हिताग्निर्नायज्वा न क्षुद्रो वा न
तस्करः।कश्चिदासीदयोध्यायां
न चावृत्तो न सङ्करः॥स्वकर्मनि
रता नित्यं ब्राह्मणा विजि

तेन्द्रियाः।दानाध्ययनशीला
श्च संयताश्च प्रतिग्रहे॥नास्ति
कोनानृती वापि न कश्चिदबहु
श्रुतः।नासूयको न चाशक्तो ना
विद्वान् विद्यते क्वचित्॥नाषडङ्ग
विदत्रास्ति नाव्रतो नासहस्रदः
।न दीनः क्षिप्तचित्तो वा व्यथितो
वापि कश्चन॥कश्चिन्नरो वा ना
री वा नाश्रीमान्नाप्यरूपवान्।
द्रष्टुं शक्यमयोध्यायां नापि
राजन्यभक्तिमान्॥वर्णेष्वग्र्य
चतुर्थेषु देवतातिथिपूजकाः।
कृतज्ञाश्च वदान्याश्च शूरा विक्र
मसंयुताः॥दीर्घायुषो नराः स
र्वे धर्मं सत्यञ्च संश्रिताः।सहि
ताः पुत्रपौत्रैश्च नित्यं स्त्रीभिः
पुरोत्तमे॥क्षत्रं ब्रह्ममुखं चा
सीद्वैश्याः क्षत्रमनुव्रताः।शूद्राः
स्वकर्मनिरतास्त्रीन् वर्णानुप
चारिणः॥सा तेनेक्ष्वाकुनाथेन पु
री सुपरिरक्षिता।यथा पुरस्तान्म
नुना मानवेन्द्रेण धीमता॥योधा
नामग्निकल्पानां पेशलानाममम
र्षिणां।सम्पूर्णा कृतविद्यानां गु
हा केशरिणामिव॥काम्बोज वि
षये जातैर्बाह्लीकैश्च हयोत्तमैः।
वनायुजैर्नदीजैश्च पूर्णा
हरिहयोत्तमैः॥विन्ध्यपर्वतजै
र्मत्तैः पूर्णा हैमवतैरपि।मदा
न्वितैरतिबलैर्मातङ्गैः पर्वतो
पमैः॥ऐरावतकुलीनैश्च महा
पद्मकुलैस्तथा।अञ्जनादपि
निष्क्रान्तैर्वामनादपि च द्विपैः॥
भद्रैर्मन्द्रैर्मृगैश्चैव भद्र मन्द्र मृ
गैस्तथा।भद्रमन्द्रैर्भद्रमृगैर्मृग
मन्द्रैश्च सा पुरी॥नित्यमत्तैः सदा
पूर्णा नागैरचलसन्निभैः।सा
योजने द्वे च भूयः सत्यनामा
प्रकाशते॥तां पुरीं स महातेजा
राजा दशरथो महान्।शशास
शमितामित्रो नक्षत्राणीव चा
न्द्रमाः॥तां सत्यनामां दृढतोर
णार्गलां गृहैर्विचित्रैरुपशो
भितां शिवां।पुरीमयोध्यां
नृसहस्रसंकुलां शशास वै
शक्रसमो महीपतिः॥
इत्यार्षे रामायणे वाल्मीकी
ये बालकाण्डे षष्ठः सर्गः॥
अरण्यषष्ठी स्त्री ज्येष्ठस्य
शुक्लषष्ठी।वाँडाषष्ठी इति भाषा
।यथा राजमार्तण्डे।
ज्येष्ठे मासि
सितेपक्षे षष्ठी
चारण्य संज्ञिता।व्य

जनैककरा स्तस्या मदास्ति विपि
ने स्त्रियः॥नां विन्ध्यवासिनीं स्क
न्द षष्ठी मारभ्ययन्ति चाकन्दमू
ल फलाहारा लभन्ते सन्ततिं मु
भां॥कन्दं सूरणादि।मूलं तरित
रत्।इति तिथ्यादितत्त्वं॥अरन्धनं
स्त्री पाकाभावः।तत्र कन्यासं
क्रान्त्यां हतनञ्चेत् हस्तारन्धनं
कथ्यते।सौरभाद्रस्य यस्मिन्
कस्मिन् दिने हतनञ्चेत् इच्छा
च रन्धन मित्युक्ते।इति लोकप्रसि
द्धं।तत्र प्रमाणं।कर्कीच मध्या
त् सिंहाद्दे सिंहान्ते सिंहकन्य
योः।मनसापोषनागेभ्यो दन्वी
सद्वै निशोथितं॥इत्याचारमात्रे
एउद्धृतवचनं॥

अराजकः पुं राजशून्यदेशादिः।
यथा।अराजके हि लोकेस्मिन्
सर्व्वतो विद्रुते भयात्।रक्षार्थ
मस्य सर्व्वस्य राजान मसृजत्
प्रभुः॥इति मानवे ७ अध्याये ३
श्लोकः॥

अरुणोदयसप्तमी स्त्री
माघशुक्लसप्तमी।माकरी
सप्तमी।यथा।भविष्ये
।सूर्य्यग्रहणतुल्या हि शु
क्ला माघस्य सप्तमी।अरुणोद
यवेलायां तस्यां स्नानं महाफलं
॥माघे मासि सिते पक्षे सप्तमी
कोटिभास्करा।दद्यात् स्नानार्घ्यदा
नाभ्या मायु रारोग्य सम्पदः॥अ
रुणोदयवेलायां शुक्ला माघस
प्तमी।गङ्गायां यदि लभ्येत
सूर्य्यग्रहशतैः समा॥कोटिभा
स्करा कोटिसप्तमीतुल्या।सूर्य्य
ग्रहणफलं स्नानजं सन्निहिते
बुद्धि रन्तरङ्गा इति न्यायात्।ते
न बहुशतसूर्य्यग्रहणकालीनग
ङ्गास्नानजन्यफलसमफलप्राप्तिः
फल मत्र ज्ञेयं।अत्र बहुशतसू
र्य्यग्रहणानां प्रत्येकादिकरणता
संसर्गेणान्वयात् कालानां स्ना
नानां तत्फलाना मपि बहुशत
त्वं लभ्यते।अतो नाप्रसिद्धिः॥
षष्ठीसप्तम्योः पूर्व्वापरयो र्यत्रारुणो
दयकाले सप्तमी तत्र पूर्व्वदिने त
त्काले स्नानं।ततस्त्रो घटिका प्रा
त रुणोदय उच्यते।यतीनां
स्नानकालो ऽयं गङ्गा
म्भः सदृशः स्मृतः॥त्रियामां
रजनीं प्राहु स्त्यक्त्वाद्यन्तचतु
ष्टयं।नाडीनां तदुभे सन्ध्ये
दिवसाद्यन्तसंज्ञिते॥इति का
लमाधवीय

एत ब्रह्मवैवर्त्तीयेन पूर्व्वस्य तत्
कालस्य पूर्णतिथिसम्बन्धित्वेन
कर्त्तव्य कर्म्माङ्गत्वेन परस्य चेत
राङ्गत्वेनाभिधानात्।अत एव द
क्षेण तत्काल मारभ्याह्निककृ
त्य मभिहितं॥॥अत्रारुणोदयका
ले मुहूर्त्तान्तनतिथिलाभे एव
स्नानं।व्रतोपवासस्नानादौ घटि
कैका यदा भवेत्।उदये सा ति
थि र्ग्राह्या श्राद्धादावस्तगामि
नी॥इति विष्णुधर्म्मोत्तरात्।अत्र
घटिका मुहूर्त्ते श्राद्धयोग्यका
लानुरोधादिति वक्ष्यते।ब्रह्मवै
वर्त्तवचने घटिका दण्डरूपा।प
रवचने नाडीना माद्यन्त चतुष्ट
य मित्येकवाक्यत्वात्॥येन सू
र्य्योदयात् प्रागपि प्रातःस्नान वि
धानात् तत्रैव माघसप्तम्याख्य
गुणफलविधि र्लाघवादित्याङ्ग
लचिन्त्यं।प्रकरणान्यत्वे प्रयोज
नान्यत्वं इति जैमिनिसूत्रेण प्र
करणभेदे गुणविध्यसिद्धेः।अत
एव कल्पतरु रत्नाकरयोः।य
इच्छेद्विपुलान् भोगान् चन्द्रसूर्य्य
ग्रहोपमान्।प्रातःस्नायी भवे
न्नित्यं द्वौ मासौ माघफाल्गुनौ
॥इति विष्णूक्तो।यथाहनि
तथा प्रात र्नित्यं स्नायादतन्द्रितः।
इति नित्यस्नानप्रकरणात् प्रकर
णान्तरम्नानात् प्रकरणान्तरापि
करणन्यायेन काम्यस्नानान्तरमि
दमप्युक्तं।न तु गुणफलविधिः।
किन्तु काम्यकरणे प्रसङ्गान्नित्य
सिद्धिरिति॥अत्र माघमासनिमित्त
क माघसप्तमी निमित्तक काम्य
स्नानयोः प्राप्तविधानात् नैमित्ति
कत्वेन प्रायश्चित्तवत् सकृदनुष्ठा
नं।प्रधानस्याक्रिया यत्र साङ्गं त
त् क्रियते पुनः।तदङ्गस्याक्रिया
यान्तु नावृत्ति र्नैव तत्क्रिया॥इ
ति कात्यायनवचनात्।न स्नान
माचरेद्भुक्त्वा नातुरो न महानि
शि।न वासोभिः सहाजस्रं नावि
ज्ञाते जलाशये॥इति मनुवचने
नैकदाजस्रस्नाननिषेधात्।धर्म्म
विन्नाचरेत् स्नान माह्निकञ्च
पुनःपुनः।इति मनुवचनाच्चाऽत्र
तएव नान्दीमुखप्रकरणशेषे प्र
धानाना मपि काम्यानां तत्तद्देश
कालविहितानां तन्त्रेणैव सिद्धि
रिति श्राद्धचिन्तामणिः।निष्का
म विष्णुप्रीतिकामयोः पुनः
सहस्रकृत्वःस्नानं।गुणतारतम्यात्
फलतारतम्यं इति न्यायेन फलं

वोध्यं। तत्र इक्षुक्षीर गुडादि
माधुर्य्यमेववर्ज्जितेषु मृशा
कं। पक्षान्तरेऽपि कन्यास्थ
रवौ श्राद्धं प्रशस्यते। कन्यागते
पञ्चमे तु विशेषेणैव कारयेत्
इति हेमाद्रिधृतादित्यपुराणो
क्तवत्। एतद्वचनं प्रागर्द्ध का
र्त्तिकममासाद्विषयं। देश
कालाश्रय होत्र द्रव्यदाति म
तो गुणाः। स्वल्पस्यापि दान
स्य फलातिशय हेतवः॥ इति
ब्रह्मपुराणोक्तवच्च॥ ॥तीर्थ भे
दे त्वेकदापि नानास्नानं। विषु
वद्दिवसे प्राप्ते पञ्चतीर्थी वि
धानतः॥ इति ब्रह्मपुराणादिवच
नात्। तीर्थभेदे तत्प्रसङ्ग्येऽर
सम्भवाच्च। अतएव गङ्गावाक्या
वली तीर्थचिन्तामण्योः। यत्तु
प्रयागे अरुस्नाने कोटीकृतोऽपि
माघसप्तमी स्नानादावसाधार
णा सङ्कल्पेन पुनस्तथैव प्रातःस्ना
नाचरणं तदयुक्तं तदा सकृत्स्ना
नस्यैव विहितत्वात्। अन्यथा तत्
स्नानफलकामनायां तदानन्त्याप
त्तेरित्युक्तं॥ ॥स्नाने परिपाटी मा
ह कृत्यकल्पलतायां विष्णुः। स
प्तबदरपत्राणि सप्तार्कपत्राणि

च शिरसि निधाय। यद्यज्जन्मकृ
तं पापं मया सप्तसु जन्मसु। तन्मे
रोगञ्च शोकञ्च माकरी हन्तु
सप्तमी॥ इत्युच्चार्य्य स्नायादिति
शेषः। रोगं छिद्रं। तिथिकृत्यस्य
पौर्णमास्यन्तमासाङ्गत्वात्
माकरीपदं मकरार्करहितचान्द्रमा
सीयतिथिपरं। तिथिकृत्ये च कृ
ष्णादिं व्रते शुक्लादिमेव च।
विवाहादौ च सौरादिं मासं कृत्ये
विनिर्द्दिशेत्॥ इति ब्रह्मपुराणा
न्मन्वन्तरादित्वेन तथा युक्तत्वा
च्च। यथा मत्स्यपुराणे। यस्मान्म
न्वन्तरादौ तु रथं प्राप दिवाकरः
। माघमासस्य सप्तम्यां तस्मात्
सा रथसप्तमी॥ अरुणोदय वेला
यां तस्यां स्नानं महाफलं। अतए
व नारसिंहे रथाख्यायामित्युक्तं।
यथा। महानवम्यां द्वादश्यां भर
ण्यामपि चैव हि। तथाक्षयतृ
तीयायां शिष्यान्नाध्यापयेद्बुधः
॥ माघमासे तु सप्तम्यां रथा
ख्यायान्तु वर्ज्जयेत्। द्वादश्यां
श्रवणोपेतद्वादश्यां। भरण्यां
शाकव्यञ्जनपातभरण्यां पितृकल्प
तरुः॥ अत्र महानवम्यादि सा
हचर्य्याच्चान्द्रत्वं प्रतीयते।

अतएव चतुर्द्दशमन्वन्तरादिग
णने क्वापि न रथशब्दोल्लेखः। यथा।
भविष्यमत्स्ययोः। अश्वयुक्छु
क्लनवमी द्वादशी कार्त्तिकी तथा
। तृतीया चैत्रमासस्य तथा भाद्रप
दस्य च॥ फाल्गुनस्याप्यमावास्या
पौषस्यैकादशी तथा। आषाढस्या
पि दशमी तथा माघस्य सप्तमी॥
श्रावणस्याष्टमी कृष्णा तथाषा
ढस्य पूर्णिमा। कार्त्तिकी फाल्गु
नी चैत्री ज्यैष्ठी पञ्चदशी सिता॥
मन्वन्तरादयस्त्वेता दत्तस्याक्षय
कारिकाः॥ अत्र अमावास्याष्टमी
व्यतिरिक्ताः शुक्लाः पुनःपुन स्त
थापदोपादानात्। उपक्रमो पसं
हारयोः शुक्लत्वकीर्त्तनाच्च॥ अ
त्र कामधेनौ तृतीया चैव माघे
स्येति। कल्पतरौ तु तृतीया चैत्र
मासस्येति लिखितं। अत्र पाठ
द्वैधे श्रीपतिरत्नमालायां अ
श्वयुजि शुक्लनवमी द्वादश्यूर्ज्जे
मधौ तृतीया च। इति पाठश्चैत्र
तृतीयैव ग्राह्या। श्रीदत्तोऽप्येवं।
माघसप्तम्याश्चान्द्रत्वं सौरागमे
पि। अर्कपत्रैः सबदरैर्द्दूर्व्वाक्ष
त सचन्दनैः। अष्टाङ्गविधिना
चार्घ्यं दद्यादादित्यतुष्टये॥

माघेऽथ फाल्गुने वापि भवेद्दे
माघसप्तमी। माकरीति च यत्
प्रोक्तं तत्प्रायो हृत्तिदर्शनात्॥
अष्टाङ्गविधिना। योऽष्टाङ्गमर्घ्य
मादित्ये भानो मूर्द्ध्नि निवेदयेत्।
ताम्रपात्रार्घ्यदानेन पुण्यं दश
गुणं स्मृतं॥ इति भविष्यपुराणी
येन। आदित्यपुराणे। कृत्वा
शिविशेषेणायन कर्म्म विहितं
नरैः॥ दैवं वाप्यथ वा पैत्र्यं तद
न्यचापि हृष्यते॥ ॥अर्घ्यम
न्त्रस्तु। जननी सर्व्वभूतानां सप्त
मी सप्तसप्तिके। सप्तव्याहृति
के देवि नमस्ते रविमण्डले॥ प्र
णाममन्त्रस्तु। सप्तसप्तिवह प्री
त सप्तलोकप्रदीपन। सप्तम्यां
हि नमस्तुभ्यं नमोऽनन्ताय
वेधसे॥ सप्तिरश्वः। इति ति
थ्यादितत्त्वं॥
अरोचकः पुं रोगविशेषः। अरु
चिरोग इति भाषा तत्र सन्निपा
त मरोचकमाहुर्वातादिभिः
शोक भयातिलोभात् क्रोधै
र्मनोघ्नाशन रूपगन्धैः। अरो
चकाः स्युः परिहृष्टदन्तः क
षायवक्त्रश्च मतोऽनिलेन॥
अरोचकाः न भोजने

रुचि मुन्नदयन्तीत्यरोचका
व्याधयः पञ्च वातजादिभेदैः
॥वातिकस्य लक्षणमाह।परि
हृष्टदन्तः अम्लभक्षणेनेव परिह
ष्टादन्तो यत्र सः।तथा कषा
यवक्त्रः।कषायरसं वक्त्रं यत्र सः
पैत्तिक माह।कट्वम्ल मुखं विर
सञ्च पूति पित्तेन विद्यात्लवणं
ञ्च वक्त्रं।कट्वम्ल मित्यादिना
विद्यादित्यन्तेन पैत्तिकस्य लक्षणं
॥श्लैष्मिक माह।लवणञ्च वक्त्रं
कफज लक्षणेन पठनीयः।य
तो विदग्धः श्लेष्मा लवणभाव
मुपैति।माधुर्य्यपैच्छिल्य गुरुत्व
शैत्य स्निग्धत्व दौर्गन्ध्ययुतं क
फेन।पैच्छिल्यं मृदस्याभ्यन्तरे।लि
प्तत्वं वदेत्॥आगन्तुजमाह।अरो
चके शोक भयातिलोभात् क्रो
धाद्यहृद्याशुचिगन्धजे स्यात्।
स्वाभाविकं चास्य मथारुचिश्च
त्रिदोषजे नैकरसं भवेच्च॥
क्रोधादीत्यादिशब्देनाहृद्ययो
रशान रूपयो ग्रहणं।स्वाभा
विकं प्रकृतरसं॥ ॥त्रिदो
षज माह।नैकरसं अनेक
रससमास्यं स्यात्।वातजादिभे
देन सर्वे विकृति मभिधा

यान्यदेशे विकृति माह।हृच्छू
लपीडनयुतं पवनेन पित्तात् तृट्
दाह चोषबहुलं सकफप्रसेकं।
श्लेष्मात्मकं बहुरुजं बहुभिश्च
विद्याद्वैगुण्य मोह जडताभि रथा
परञ्च॥हृच्छूलपीडनयुतं हृदि
शूलेन पीडनं तेन युतं।चोषः पा
र्श्वस्थितान्त्रिदेन सन्तापः।बहु।
भि स्त्रिभि र्दोषैः।बहुरुजं उक्त
वातादिरोगयुक्तं।वैगुण्यं मनसो
व्याकुलत्वं।जडता मूर्च्छाद्गता।
अपरं आगन्तुजं।भक्तद्वेषाभक्त
च्छन्दो चरके सुश्रुताभ्या मरो
चकत्वेनैव संगृहीतौ॥ ॥द्वद्व
भोज स्त्वेषां लक्षणानि पृथगा
ह।प्रक्षिप्तन्तु मुखेचान्नं यत्र
नास्वादते नरः।अरोचकः स
विज्ञेयो भक्तद्वेष मतः शृणु॥
आस्वादने अन्नस्य मिष्टता न
प्राप्नोति।तदन्नं मिष्टं न लगति
इति यावत्।चिन्तयित्वा तु मन
सा दृष्ट्वा स्पृष्ट्वा च भोजनं।द्वे
षं मायाति यो जन्तु र्भक्तद्वेषः
स उच्यते।ऊर्ध्वितस्य भयार्त्तस्य
तथा भक्तविरोधतः।यत्रनान्ने
भवेच्छद्धो सो भक्तच्छन्द उच्य
ते॥ ॥अथारोचकस्य

चिकित्सा।भोजनाग्रे सदा पथ्यं
लवणार्द्रकभक्षणं।रोचनं दी
पनं वह्ने र्जिह्वा कण्ठ विशो
धनं॥१॥शृङ्गवेररसञ्चापि म
धुना सह योजयेत्।अरुचि
श्वासकासघ्नं प्रतिश्याय कफाप
हं॥२॥गङ्काम्लिका सिता शीत
वारिणा वस्त्रगालिता।एला लवङ्ग
कर्पूर मरिचै रवधूलिता॥पान
कस्यास्य गण्डूषं धारयित्वा मुखे
मुहुः।अरुचिं नाशयत्येव पित्तं
प्रशमयेत्तथा॥अम्लिकापानं॥
३॥राजिकी जीरको भृष्टो भृष्टं
हिङ्गु सनागरं।सैन्धवं दधिः
गोः सर्वं वस्त्रपूतं प्रकल्पयेत्
॥तावन्मात्रं क्षिपेत्तत्र यथा
स्याद्रुचि रुत्तमा।तत्र मेतद्भवेत्
सद्यो रोचनं वह्निवर्द्धनं॥तक्रं॥
४॥गव्य मावर्त्तितं दुग्धं निवद्धं
दधि माहिषं।एकीकृत्य पटे क्षु
ष्टं शुभ्रशर्करया समं॥एला
लवङ्ग कर्पूर मरिचैश्च समन्वि
तं।नाम्ना शिखरिणी ऊर्ध्वात् रु
चिं सकलवैद्यसा॥शिखरिणी॥५
॥द्वे पले दाडिमाद्दृष्टो खण्डाद्दो
षे पलत्रयं।त्रिसुगन्धि पलञ्चै
कं चूर्णं मेकत्र कारयेत्॥तच्चू

र्णं मात्रया भुक्त मरोचकहरं
परं।दीपनं पाचनंच स्यात् पी
नस ज्वर कासजित्॥दाडिमा
दिचूर्णं॥६॥लवङ्ग कक्कोल
मुशीर चन्दनं नतं सनीलोत्
पल कृष्णजीरकं।जलं सकृ
ष्णा गुरु भृङ्ग केसरं कणा स
विश्वा मलदं सहैलया॥तुषार
जातीफल वंशरोचना सिताश्च
भागाः सकल विचूर्णितं।स्व
रोचनं तर्पण मग्निदीपनं वलप्र
दं वृष्यतम त्रिदोषजित्॥उरो
विबन्धं तमकं गलग्रहं सका
स हिक्कारुचि यक्ष्म पीनसं।ग्र
हण्यतीसार मुरःक्षतं तृषां तथा
प्रमेहान्निखिलान्निहन्ति हि॥
कक्कोलं फलं स्वगन्धविशेषः
।नतं तगरं।जलं बालकं।भृङ्ग
त्वक्।नलद मुशीरं।तुषारः
कर्पूरः।लवङ्गादिचूर्णं॥७॥इ
त्यरोचकाधिकारः।इति भा
वप्रकाशः॥ अर्क के ताप
स्तम्भो:।एककारः प्रकृतिः
पश्चाद्देकतिमिनकहितं विभा
षया बक्रम।तेन क अर्का
यति अर्कयति एवं सर्वत्र।
इति दुर्गादासः॥

अर्कः पुं वृक्षविशेषः। आक
व इति भाषा। तस्य पर्यायगुणाः
। श्वेतार्को गणरूपः सान्मन्दा
रो वसुकोपि च। श्वेतपुष्पः स
दापुष्पः स बालार्कः प्रतापसः
॥ रक्तो ऽपरो ऽर्कनामास्यादर्क
पर्णो विकीरणः। रक्तपुष्पः सु
क्लफलस्तथास्फोतः प्रकीर्त्ति
तः॥ अर्कद्वयं सरं वातकुष्ठ क
ण्डु विष व्रणान्। निहन्ति प्ली
ह गुल्मार्शः श्लेष्मोदर यकृत्
कृमीन्॥ सुक्लार्ककुसुमं वृष्यं
लघु दीपन पाचनं। अरोचक प्र
सेकार्शः कास श्वास निवारणं
॥ रक्तार्कपुष्पं मधुरं सतिक्तं कु
ष्ठ क्रिमिघ्नं कफनाशनञ्च। अ
र्शोविषं हन्ति च रक्तपित्तं संग्र
हि गुल्मे श्वयथौ हितं तत्॥
क्षीरं अर्कस्य तिक्तोष्णं स्निग्धं
सलवणं लघु। कुष्ठ गुल्मोदरहृ
रं श्रेष्ठमेतद्विरेचनं। इति भाव
प्रकाशः॥ ॥
निर्यासविशेषः। आरक इति
आरखी भाषा। तस्य विधिर्यथा।
द्रव्यकल्पः पञ्चधा स्यात् कल्कं
चूर्णं रसस्तथा। तैल अर्कः क
माज्ज्ञेयं यथोत्तरगुणाप्रियो॥

पृथक् द्वन्द्वे सन्निपाते सङ्करे ऽ
साध्यरोगिणि। क्रमादेते प्रयो
क्तव्या अन्यथा तु विनाशकाः
॥ आद्ये गुणा गुणाः सर्वे द्विती।
यञ्च ततो लघु। तृतीयं शीघ्रका
रि स्यात् चतुर्थं नातिदोषकृत्॥
पञ्चमं दोषरहितं गुणाढ्यः
प्रकाशकं। पञ्चमस्य तु सामर्थ्यं
स्वयं पञ्चाननो ऽब्रवीत्॥ वर्षा
णान्तु सहस्राणि कथ्यते ऽर्हनि
शं मया। सम्पूर्णो नैव जायेत
कल्पो ऽर्कस्य दशानन॥ ॥ पुं
वारे पुरुषर्क्षे च दिवाकौ यस्तु
निर्म्मितः। रमणीयं प्रदातव्यो
विलोमात् पुंस्तयोजयेत्॥ लो
ह चूर्णं गैरिकञ्च खटिका
भस्मसृत्तिका। मृत्तिकास्थि भवं
चूर्णं काचं कीकसजं रजः॥ ए
तानि समभागानि सह तत्त्वा
च मृत्तिका। मर्दनीया पंचमूत्रैः
खराश्च महिषोष्ट्रैः॥ अजाज स
म्भवाभ्याञ्च शोधितं नहि शोषये
त्। यथा गन्धविनाशः स्यात् त
था संमर्दयेत्ततः। लघुहस्तः कु
लालो ऽस्य कुर्य्याद्यन्त्रं स्वनि
र्म्मितं। यथेष्टां स्थालिकां कुर्य्या
त् अङ्कुलमानसारिकां॥

पृथु वृभोदराकारां अङ्गुलोन
सेथवेष्टनीं। सारिकान्ते तु परि
धिं त्वङ्गुलोत्सेधशोभितं॥
विनिर्मायाथ सार्ध्येन्ते यथाशि
ल्पविनिर्म्मितं। छिद्रं कृत्वा न
लं दद्यात्कजसुण्डसमं वृधः॥
सारिका परिधे रंभस्तस्य कुर्य्या
त् पिधानकं। अर्द्धनिम्नफलस
मं परिधिं तस्य चान्ततः॥ वेदा
ङ्गुलं मस्तकोर्द्धं कार्य्यं तोयस्य
धारणे। समर्थो तत्र नलिकां कु
र्य्यात्तोयविमोचनीं॥ तस्यैवान्तर
तोलप्या जीर्णास्थी मृत्तिकास्तुना
अथवा श्वेतकाचन्तु सर्वदोषा
मनुत्तमं॥ अथ वस्त्रे तु जीर्णास्थि
मृत्तिकाकरणं प्रिये। शिलाजतु
स्थले कुर्य्यात् दीर्घगर्ते मनोहृ
रं। निक्षिपेत्तत्र नानास्थिसञ्च
यं हि चतुष्पदां। सञ्जितारं म
हातारं मृत्तारं लवणानि च॥ ग
न्धकोसजलं लेप्य नानामूत्रा
णि तत्र वै। एवं कृत्वा मासषट्कं
दद्यात् पाषाणमृत्तिकां॥ कङ्क
स्यार्द्धे तद्दहन्तु कुर्य्याद्दश्रीहि
कां शुभां। विवर्षाज्जायते सर्वं भ
कीभूतं दृशान्सं॥ ततो निष्का
श्य तच्चूर्णं कृत्वा पात्राणि नि

र्मिमीत। प्रशस्तं भोजनं तत्र सू
चयेदन्न दूषणं॥ महाविषस्य सं
योगात्तस्य भङ्गः प्रजायते। सू
ची विषादि संयोगात् यत्र स्फो
टा भवन्ति च॥ तत्र क्षिप्तं त्वङ्ग
विषं पात्रं हासं प्रजायते। एवं
ज्ञात्वा तत्र दद्यान्न कदाचिद्विषा
दिकं। विषादीना मर्कसिद्धो कु
र्य्यात् पात्रन्तु लोहजं। स्वर्णजं
रौप्यजं वापि कुर्य्यात् पात्र म
कल्मषं॥ अथवा ताम्रं कुर्य्याद जं
न्तर्वङ्ग विलेपितं। पात्रन्तु बुद्धि
कुर्वीत कषायो न भवेद्रसः॥ द्र
व्यान्तरस्य संयोगादर्कं तैलञ्च
गर्भितः। सर्वेषां निःसरत्येव पा
षाणस्यापि किं पुनः॥ अनन्त्व
र्कस्तथा तैलं गन्ध तालादि सम्भ
वं। वेधकं सर्वधातूनां देहस्या
पि च सिद्धिदं॥ य स्तैलकरणा
द्दत्त अर्कनिःसारणा समन्त
न्त्रसेवाकरो नित्यं स रोगै
नैव बाध्यते॥ कुमिनार्कस्तु
यामेन द्विमायाभ्यान्तु मध्यमः
। त्रिभि यामै भवेच्छ्रेष्ठः स एवार्क
स्तु सिद्धिदः॥ द्रवादथिकसाग
न्धं घासितकं प्रदह्यते। जीर्णा
स्थि पात्रसङ्गुलो द्रव्यवर्णः प्रह

प्रयते॥शंख कुन्देन्दु धवलो ऽम्
या पात्रान्तरे स्थितः॥जिह्वोप
रि गतः स्वादं दद्याद्द्रव्य भवन्त
यः॥तमेवार्कं विजानीयादन्यज
ज्ञेयं रसादिवत्।कृत्वा सुगन्धं दु
र्गन्ध मर्कं पुष्पादिभिः सुधीः॥
गुणार्थं पश्चात् सेवन द्रव्यस्या
पगुणो भवेत्।दुर्गन्धं भक्षयेद
र्कं यदि मोहात् कथञ्चन॥त
दास्य जायते ग्लानि वान्ति राल
स्यकं तथा।तद्दोषस्य विनाशाय
कुर्य्याद्वान्ति प्रयत्नतः॥द्वीपो
त्कमप्रसूनानां पिबेदर्कपलं ज
नः।चमेल्यर्कपलं वापि पीत्वा
र्त्तो मालतीभवं॥ ॥अर्कनिष्का
शनार्थाय कुम्भाज्ज्ञेयाः षडग्न
यः॥धूमाग्निश्चैव दीपाग्निर्म
न्दाग्नि र्मध्यम स्तथा॥खराग्निश्च
भडाग्निश्च तेषां वक्ष्यामि लक्षणं॥
॥निर्ज्वालो यो धूमशिखो धूमा
ग्निः स उदाहृतः॥ससारमग्निस्थ
एकं यत् चुल्लिमध्ये समेध्यति तत्
काष्ठं काष्ठमित्याहुः खदिरादि
समुद्भवं।ताभ्यां तस्य चतुर्थाभ्यां
यो ऽग्नि दीपाग्नि रुच्यते।चतुर्
थांश तैनैव मन्दाग्निः परिकीर्त्ति
तः॥षष्ठीकाभ्यां ताभ्यान्तु म

ध्यमाग्नि रुदाहृतः॥अर्द्धैः स्तैः प
ञ्चभिः प्रोक्तः खराग्निः सर्व्वकर्म्म
सु॥मलकावधि पात्रस्य चतुर्दि
क्षु क्रमेण च।प्रसरन्ति यदा ज्वा
लाः स भडाग्नि रुदीरितः॥सार्द्धं
यामञ्च यामञ्च याममेकं मु
हूर्त्तकं।भक्तैमात्र क्षिन्येव मर्का
र्थे वह्नयः स्मृताः॥जारणोऽस्थिपा
त्रे गृह्णीयादर्कं वा काचसम्भवे।
पाषाणसम्भवे पात्रे कांस्यजे ऽथ
हिमस्थले॥पिबेदर्कं मनिर्वापं
पीत्वा ताम्बूलभक्षणं।कुर्य्याद
तुक्तताम्बूले लवङ्गं भक्षयेत्ततः
॥मर्द्दनादिषु सर्व्वत्र द्रव्यमेलं प्र
योजयेत्।अर्कमेव प्रयोक्तव्यो
भक्षणे न तु मर्द्दने॥ये ये द्रव्यग
णाः प्रोक्ताः सर्व्वे ते ऽर्के समाश्रि
ताः।सेवेतार्कं प्रिये तस्माद्राजा
परमधार्म्मिकः॥स्वस्थोऽपि वा
रोगिणो वा याच्यते ऽर्कस्तु येन
वा।ज्ञात्वा तल्लक्षणं दद्यादन्य
था ब्रह्महा भवेत्॥ ॥वर्णास्व
राणां प्रमितिं हुतोकस्य तु का
रयेत्।प्रोक्ते युक्ता द्विगुणिता
त्रिभिर्भागं समाहरेत्॥एकशे
षे गुणाः क्षीणं द्विशेषे वर्द्धते
गदः।त्रिशेषे मरणं वाच्य

स्वार्थं वाचयते यदि॥अर्कं न
दैतत् वित्ताय दद्यादर्कं न चा
न्यथा।गदिना न यदा हृतः प्रोष
न श्रेष्ठि चार्प्यते॥नपुंसकान्त्ये
हणास्तु स्वरा एकादश प्रिये।
वर्णा स्तत् सङ्ख्यका लेख्याः क
ठ वायाश्च तत्तेल॥एकादशस्व
कोष्ठेषु क्रमादङ्कान् प्रविन्यसेत्
।रसा स्तथा द्वयं वेदाः पर्व्वता अ
नवः क्रमाः॥वह्नयः पृथिवी शू
न्यं चन्द्रमा इति च क्रमात्।वि
हाय जीवं हृतस्य नामाङ्कान्तर
योजनं॥एव मेवान्तरे कृत्वा ह
यो रष्टावशेषितं।कृत्वाङ्कयोगं
गदिना ऽधिके शेषे शुभं भवेत्॥
समशेषे दीर्घरोगः न्यून शेषे च
तन्मृतिः।एतद्विचार्य्य दातव्य
मन्यद्योषधं बुधैः॥चक्रद्वय
न्तु यो ऽज्ञात्वा दद्यादर्कं वि
मोहितः।जायते त्वयशस्तस्य
यथा मम मृते सति॥इति श्री
लङ्कानाथकृतार्कचिकित्सा
यां यन्त्रविधि शतकं प्रथमं॥
अथातः संप्रवक्ष्यामि निर्म्मा
ऽर्कस्य भामिनि।पञ्चप्रकार
द्रव्यस्य कुर्य्यान्निष्काशनं भिष
क्॥अत्यन्तकठिनं चाद्यं कठिनञ्च

द्वितीयकं।आर्द्रं तृतीय मुद्दि
ष्टं चतुर्थं तुलुलं भवेत्॥पञ्च
मञ्च द्रवद्रव्यं तेषां विधि रथो
च्यते॥समवच्चूर्णयेत् द्रव्य मत्य
न्तकठिनन्तु यत्॥द्विगुणे निः
क्षिपेत्तोये छायायां स्थापयेच्च
तत्।यावच्छुष्कं भवेत्तोयं द्र
व्यञ्च शिथिलं यथा॥ततः पु
नः क्षिपेत्तोयं षड्द्रव्यसमं भि
षक्।कृत्वाष्टप्रहरं तत्र सूर्य्यच
न्द्रकरैः रतं॥संपूज्य गणपतिं
सूर्य्यं भैरवं कुलदेवतां॥निः
क्षिपेदर्कयन्त्रे तत् त्रिमासार्कं
समाहरेत्॥वक्षोथिकन्तु यत्
द्रव्य मत्यन्त कठिनन्तु तत्।च
न्दनादीनि सर्व्वाणि अत्यन्तक
ठिनानि च॥कीटै र्भक्षै र्घुणै र्युष्ट
यच्च गन्धविवर्जितं।रहितं स्वर
से नापि नार्ककर्मणि योजयेत्॥
यथार्के संस्थितं द्रव्यं कुर्य्यात्ते
लो तथा बधुः।अर्कं तरुणा भे
षजं तस्मात् संयोजयेत् प्रिये॥
॥यवान्यजाजी त्रिकटु भूनि
म्बादिक मौषधं।ज्ञेयं तत् क
ठिनं द्रव्यं तदर्कस्य विधिं शृणु
॥द्विगुणं निःक्षिपेत्तोयं द्रव्यत
कठिने सते।अष्टप्रहरिकं

तच्च कुर्य्यात् पर्य्याय मेककं॥
रत्नेत् द्रव्यं द्विगुणितं दृष्ट्वा देशे
त कौतुकं। पश्चात् दत्वार्कय
न्त्रे तत अर्कं निष्काशयेच्छनैः॥
आर्द्रद्रव्यं द्विधा प्रोक्तं सरसं नी
रसं तथा। सदुग्धं गुप्तरसकं द्वि
धा नीरस मुच्यते॥ वास्तूकं शा
दीपं शाकं निर्गुण्डेरण्ड मार्षकं।
धत्तूराद्य मिदं सर्वं मार्द्रं सरस
मुच्यते॥ एषां नालान् चूर्णयि
त्वा विंशांशं निःक्षिपेज्जलं। य
न्त्रे मुखे संस्थाप्य ग्राह्योऽ
र्को विधुयोन्नमैः॥ पत्राणान्तु
शतांशेन तत्तोयेन सेचयेत्
। दद्यात् चटी मर्ककरां ततोऽ
र्कं फलयेच्छनैः॥ वटाम्राण्ड
करीराद्य मार्द्रद्रव्यन्तु नीरसं।
विंशांशं निःक्षिपेत्तोयं जलं च
र्म्मे च धारयेत्॥ ततो निष्का
शयेदर्कं क्रमहृद्यादिनौकव
त॥ सदुग्धन्तु द्विधा प्रोक्तं मृदुती
क्ष्ण मितिक्रमात्॥ सातला वज्र
सेहुण्ड सेरिण्याद्यास्तु तीक्ष्ण
काः॥ खण्डानि तेषां कृत्वाथ निःक्षि
पेत् पुष्कले जले॥ दिनत्रयन्तु नि
काश्य तोयादीयस्य ऊरुयेत्पान
दान दृष्टाने दुग्धं दद्यात्तोयं र

दंशार्कं॥ निष्काशयेच्छनैः रंकं श
त तीक्ष्णार्कं संतिकः। दुग्धका
र्कं तीरिण्याद्या मृदुदुग्धाः प्रकी
र्त्तिता॥ जले चतुर्गुणे दद्यात्तान्
चर्म्मे विनिवेशयेत् यावज्जलसो
सता स्यात् ततो यन्त्रे विनिः
क्षिपेत्॥ [illegible]
षडंशजलसंयुतं। एवं द्रव्यं त
त्यक्त्वा स्वयुक्त्यार्कं विनिर्हरे
त॥ आदावीक्षूणां पित्वा षष्ठां
शजलसंयुतं। एवं द्रव्यं लत्तयि
त्वा स्वयुक्त्यार्कं विनिर्हरेत्॥ ख
एडीकृत्वा च आमानां फलानां
मृदुकाषिनां। सरसानान्तु शु
ष्कीयादर्कं तोयेन वर्जितं॥ का
ष्ठोदुम्बरिकादीनां आमानां
दार्ढ्यभागिनां। कृत्वा खण्डानि
खण्डानि अष्टांशं प्रदापये
त्॥ पृथक्पृथक् च त्वर्वरी स
र्जितास्तु सैन्धवं दत्वा वि
मर्द्दयेत् सर्वं चत्वारिंशांशकं ज
लं॥ तिप्त्वा तत् कलशं चर्म्मयाः
ऽर्द्दतोसता भवेत्। ततो यन्त्रेन तद्
त्वा शुष्कीयादर्कं मुत्तमं॥ अतिपक्व फ
लानान्तु वीर्य्येन शार्कं माहरेत्॥ पुष्पा
कीर्षी षोडशांशं जलं पुष्पेषु दापयेत्॥
वकुलारफलादीनि विल्लिकादीनि या
नि चासेव्याणि कोरके तानि कुत्कुलं

नस्य धान्यपे॥ तत स

त्वारिंशदंशं जलं दत्वा समाहरे
त्॥ तेषा मर्क मथ द्रावद्रव्यार्को
पाय उच्यते॥ द्रवद्रव्योत् क्षेप
शान्त्यै प्रोच्यते वापकल्पना
॥ पिधानानि विचित्राणि तेषा
मन्तो न विद्यते॥ शतपत्रप्रसू
नैर्वा जात्युद्भेर्मालतीभवैः।
गुलाव पारिजातैश्च केतकी
जैः समाचरेत्॥ दुग्धे दधि रसे
तक्रे क्षौद्रे तैले च सर्पिषि॥ मूत्रा
दौ देह तोये च चम्वेल्यादि पि
धानकं॥ कान्त पाषाणखल्वस्य
कृतं यन्त्र मनुत्तमं। निष्काशये
त् सर्वेषामर्कं द्रवद्रव्यस्य तात्त्व
या॥ अथवा लम्भकं द्रव्यं दध्न
स्तु नवनीतकं। वर्षवल्ली जल
सोत्का मध्वच्छिष्टन्तु सर्पिषः॥
गोकण्टकन्तु दुग्धस्य तथा म
धुस्य किण्वकं। तैलस्य तस्य पि
ण्याकं स्वेदं दुग्धसमन्वितं॥ यन्त्रे
दत्वा द्रवद्रव्यं पश्चास्थालीं निवेश
येत्। तथा स्थलं स्थापयित्वा द्रवे
र्यन्त्रं प्रक्षरयेत्॥ आकाचं सारकैं
घटीं स्थाली दद्याद्धोमुखीं। त
था वार्कषिनः सर्वो द्रवः फेणं
परित्यजेत्॥ दुर्गन्धि यो भवेद
र्कस्तं कुर्य्यात् सुविगन्धकं।

सर्वेषा मेव मांसानां दुर्गन्धानां
न्तु सर्वशः॥ चूर्णाभ्यक्ता हिंगु
क्षीर मेथिका राजिका कृता॥ नवी
नायां हण्डिकायां दद्यात् द्रव्यं
पुनः पुनः॥ तत्र दद्यात्तदर्कन्तु
यथा दुर्गन्धतां व्रजेत्। तथा पु
नः पुनः कार्य्ये जायते गन्धवार
णं॥ आयाति रोचको गन्धो भ
वेत्तद्वह्निदीपनं॥ सर्वेष्वर्के प्र
योगेषु गन्धपाषाणवासना॥ अ
र्कीणान्तु प्रदातव्या ते भवन्त्य
र्कसंभवाः। सर्वत्र वातरोगेषु म
हिषाक्षादि वासना॥ महिषाक्ष
स्तथा शले निर्यासः सर्जकस्य च॥
कृष्णागुरुः कदम्बन्तु महिषाक्षा
दिपञ्चकं॥ सर्वेषु पित्तरोगेषु
चन्दनादिक वासना। सर्वेषु कफ
रोगेषु जटामांस्यादि वासनं॥ च
न्दनन्तु तथोशीरं कर्पूरं गन्ध
वालुकी। एला कर्चूर गोह्लाः
सर्व्वेते चन्दनाद्यः॥ जटामांसी
नलदं पत्री लवङ्गं नगरं रसः।
शिलाया गन्धपाषाणः सप्त मां
स्यादिका अमी॥ वासयेद्दा द
शाङ्गेन त्रिदोषघ्नेन चार्ककं।
नश्यन्ति यस्य धूपेन अवग्रहपि
शाचकाः॥ पञ्चाशद्गुग्गुलपाषा

णात् तावन्महिषगुग्गुलुः। चन्
दनं चन्दनञ्च जटामांसी च ना
वती॥ त्रिभागः सर्जकः सार स्ता
वदेव हि एलकं। उशीरं तु द्विभा
गं स्यात् चतुर्भागं नखं समं॥ क
र्पूरो मृगनाभिश्च एकभागौ प्र
कीर्त्तितौ। एषो दशाङ्गधूपस्तु रु
द्रस्यापि मनो हरेत्॥ ॥पला
ण्डुलशुनादीनां निर्गन्धीकरणं
मृगणं। उत्पाद्यान्नविधिं सम्यक् त
क्रमध्ये विनिःक्षिपेत्॥ पर्य्याय
मेकं मत्यन्त मध्ये अस्मिन् विरसे
सति। दद्यान्निःकाश्यान्यतक्रे
कुर्य्यात्तच्चाष्टमांशकं॥ द्रोणपुष्पी
रसेप्येवं मूली पत्ररसे पिवा। त्रिप
र्य्यायोत्तरं तत्र रसोनं क्षालयेत्
सुधीः॥ हरिद्रा राजिका तोये
स्थाप्यं पर्य्याय मेककं। उसीर
केन संक्षाल्य पर्य्यायं वासये
त्ततः॥ सहस्रपत्री पुष्पे वा अ
भावे पल्लवैरपि। आलोडयेद्द
शांशेन पञ्चांशेन च मस्तु
ना॥ युक्तं कृत्वा याममात्रं स्था
पयेत् प्रकटातपे। ततो निः
काशयेदर्के ज्यान्यादिकपि
धानिनं॥ अस्यार्कस्य सुगन्धे
न एकदा मोहितो हरः। को

जानाति रसोनस्य ह्यर्को ऽस्ति
ति भूतले॥ एकतः सर्व्व एवार्को
मांसार्कस्तु तथैकतः। मयास्य
गैर्गृहीतस्तु प्राप्ते तत्र च नामृते
॥तदा प्रोक्तं शिवस्याग्रे मम धि
ग्जीवितं प्रभो। नीतावाप्य प्रभु
का वा सुधा देवै मया कृतं॥
न दृष्टा तत्र देवेश शिरश्छेदं
करोम्यहं। ततः प्रसन्नो गिरि
शो वाक्यं मां प्रति सो ऽब्रवीत्
॥दत्तं मया समस्तं ते देवावध्य
त्व मेव वा। किन्ते कार्य्यन्तु स
थया सुधातोधिकरोचनं॥ ॥
संप्रवक्ष्यामि मांसार्कं मद्यस्सा
र्कं तथैव चाङ्गुलाणां विजया
दीनां लभ्यते यैः सुखं महत्
॥मांसन्तु त्रिविधं ज्ञेयं मृडलं
कठिनं घनं। तेषामर्कं यथा
प्रोक्तं यन्त्रान्निःकाशयेच्छनैः
॥मृडलं यद्भवेन्मांसं चत्वारिंशा
शार्कं पदुः। स्थूलखण्डीकृते
तस्मिन् दत्वा तत्क्षालयेच्छनैः॥
षष्ठांशेनाष्टगन्धेन तद्विलोड्य
च निःक्षिपेत्। रस मिश्रो रष्ठ
मांसं तदभावे पयः क्षिपेत्॥
जाती पत्रं लवङ्गञ्च त्वगेला
नागकेशरं। मरिचं

मृगनाभिश्च विड गन्धाष्टकं त्विदं
॥कार्य्यं पुष्पपिधानाय मर्कं नि
कासयेत् ततः नायते ऽसो महा
स्वादुः सुधासमरसः प्रिये॥ द
ढमांसस्य खण्डानि लघून्येव
प्रकल्पयेत्। दद्याच्च त[illegible]त्र
लवङ्गं प्रोक्तया दिशा॥ क्षाल
ये दारनालेन त्रिवारं कोसवारि
णा। क्षालयेत् सप्तवाराणि हरे
दर्कन्तु पूर्ववत्॥ दृढमांसस्य ख
ण्डानि कुर्य्यादति लघूनि च।
आलोड्य शङ्खद्रावेण क्षालयेत्
पयसा पुनः॥ सप्तवाराणि लव
णं चयेत् पूर्ववदेव हि। तद्दत्वा
यन्त्रमध्ये तु हरेत् पूर्ववदर्ककं
॥सर्ज्जिक्षारं यवक्षारं स्वर्णक्षार
ञ्च टङ्कणं। सौभाग्यक्षारकं सोर
क्षारं शङ्खभवं तथा॥ अर्कं से
हुण्ड पालाशक्षारश्च तरवी त
था। अपामार्गभवं क्षारं तथाष्टौ
लवणानि च॥ लवणाष्टकमेत
त्र सैन्धवञ्च सवर्चलं। विड स
मुद्रसंजातं उद्भिदं रोमकं गडं॥
कृत्वा सर्वाणि चैकत्र निम्बु वी
रेण भावयेत्। एकविंशतिवा
राणि काचकूप्यां विनिःक्षिपेत्॥
नवांशं निम्बुरसकैः सहेमाहीक

तञ्च ततः। अथः सच्छिद्रपीठरी
मध्ये कूप्यां निवेशयेत्॥ मृत्तक
र्पटसमायुक्तां सहेदग्निं यथा
विधि। तस्याग्रे कूपिका योज्या
दीर्घकण्ठा मनोहरा॥ सा कूपि
का तले स्थाप्या मेलयेच्च द्वयो
र्म्मुखं। जल मुक्तं यथा तस्यात्
तथा चापरकूपिका॥ अग्नयः कृ
मतो देया यामं यामञ्च पञ्च वा
अनेनैव प्रकारेण क्षाराकोणा
समुद्भवः॥ दद्यादस्थीनि मांसा
नि शङ्खशुक्त्यादिकान्यपि। सर्व्वा
ण्यपि विलीयन्ते शङ्खद्रावे न
संशयः॥ ॥पारावताजचटक
शश सूकर तित्तिभाः। लुद्रम
त स्यादिकाः सर्व्वे मांसेषु मृड
लाः स्मृताः॥ मृगरोहितकाद्या
श्च मत्स्याः शालकि सम्वराः।
एते कठिनमांसाः स्युः पक्षिणो
जलचारिणः॥ गजङ्गभीर च
एडकाः खगन्धा वर्करादयः।
गोधाहो ऽब्यालूलापाद्याः च
तम्मांसाः प्रकीर्त्तिताः॥ ॥अ
त्रादिसम्भवो यो ऽर्कस्तस्यैव
परिकीर्त्तितं। तस्य भेदान् प्रव
क्ष्यामि घटितं तत् समुद्भवेत्
तदास्वनानि हन्त्यर्थ सम्भवन्त्यं प्र

योजयेत्॥ सर्वौकैः र्पयेत्तुषे
जायते गन्धवर्जितं॥ अर्कं तत्र
जलं देयं सिद्धे देयो ऽथ गन्ध
कः॥ तुषोदके यवे रामैः स
तुषैः सकलीकृतैः॥ सौवीर
तुयवैः रामैः शाह्नैः सकली
कृतैः। गोधूमे रपि सौवीरं जा
यते स्वल्पमादकं॥ आरना
लन्तु गोधूमे रामैः स्यान्निस्तु
षीकृतैः। धान्याम्लं शालि चू
र्णादि कोद्रवादिकृतं भवेत्॥ शा
ण्डाकी राजिका युक्तैः स्यान्मू
लकदलद्रवैः। सर्षपे स्वरसे
र्वापि शालिपिष्टक संयुतैः॥ कन्द
मूलफलाद्यैश्च सस्नेह लवणान्वि
ताः। कीकृता कृतो ऽर्को य स्तन्तु
कामभिधीयते॥ पक्षौषधास्तु
संसिद्धो यो ऽर्कः स तु स्यादरिष्टकः।
अरिष्टस्तु पाकेन सर्वतस्तु गुणा
धिकं॥ शालि पिष्टक पिष्टादिकृ
तो यो ऽर्कः सुरा तु सा॥ पुनर्नवा
शिवापिष्टे विहिता वारुणी स्मृता
॥ इक्षोः पक्वैः रसैः सिद्धः सीधुः
पक्वरसस्तु सः। आमैस्तैस्तु यः
सिद्धः स च शीतरसः स्मृतः॥ प
र्यीया वाक्यभेदेन स्यं तामसं रा
जसमिश्रं मदिरा वाथ जसन्तत्

हृंहुं सात्विकं भवेत्॥ सात्विके
गीत हास्यादि राजसे साहसादि
कं। तामसे निन्द्य कर्म्माणि निद्रा
ञ्च मदिरा चरेत्॥ भङ्गादि मत्त
द्रव्याणां यवानी पादयोगतः।
अर्कं निष्काशयेद्धीमान् बोधकः
स्यान्मदस्य सः॥ धुस्तूरादिक वी
जानि तक्रं पयसि निक्षिपेत्।
कल्कशोष विवन्धादि रहितो ऽर्को
भवेत् स हि॥ इति श्रीलङ्कानाथ
यकृतार्कचिकित्सायां यन्त्र शत
कं द्वितीयं॥ ॥ अथातः संप्रव
क्ष्यामि केवलार्क गुणान् प्रि
ये। हरीतक्याः शूल हृच्छ का
मलानाह नाशनः॥ विभीतक
स्य तृट् छर्दि कफ कास विना
शनः। आमलस्य त्रिदोषास्त्र पि
त्त मेहान् विनाशयेत्॥ पिप्पल्याः
श्वास कासामवातार्शो ज्वर शूल
हृत्। मरीचस्य कृमीन् श्वासं हरे
त् सर्वान् गदानपि॥ ग्रन्थिकं
स्य प्लीह गुल्म कफ वातोदराप
हः। चव्यार्को ऽप्यनल रुचिकृत् वि
शेषात् हृद्रुजापहः। अर्कस्तु गजपि
प्पल्या वात श्लेष्माग्निमान्द्यनुत्।
चित्रक स्याग्निकृत् कास ग्रहणी कृ
मि शोथहा॥ यवान्याः पाचनो

रुच्यो दीपनः शुक्र शूलहृत्
अजमोदोद्भवो वात कफहा वस्ति
शोधनः॥ पारसीकयवान्यास्तु
ग्राही पाचन मादनः। जीरकस्य
व संग्राही गर्भाशयविशुद्धि कृ
त्॥ कृष्णजीरस्य चक्षुष्यो गुल्म
च्छर्दीति सारजित्। कारव्या बल
कृत् ह्यर्को ज्वरघ्नः पाचनः सरः
॥ धान्यार्कस्य तृषादाह वमि श्वा
स त्रिदोषहृत्। शोथ ज्वरानिल
श्लेष्म व्रण शूलादिरोगहृत्॥
मिश्रेयाया वह्निमान्द्य योनिशूल
कृमीन् हरेत्। ज्वालामरीचक
स्यापस्मार भूत त्रिदोषहृत्॥
मेथिकायाः श्लेष्म वातज्वरघ्न
कफनाशनः। वनमेथ्याः सर्वरो
गान् हरेत् कुञ्जर वाजिनां॥
चन्द्रशूरस्य हिक्कासृक वातहृ
त् पुष्टिवर्द्धनः। हिङ्गुनः पाचनो
रुच्यः कृमिकृत् विवन्धाध्मा
न शूलहृत्। पारसीकवचायास्तु
भूतोन्माद वलं हरेत्॥ कुलिञ्ज
नस्य स्वरकृत् हृत् कण्ठ मुखशो
धनः। स्थूलग्रन्थिभव श्वा
की विशेषात् कफ कास
नुत्॥ द्वीपान्तरवचायास्तु
हरेच्छूलं फिरङ्गकं। हपुषा

यो हरेत् प्लीहं विषं मोहज्व दाह
णं॥ हपुषायाः समीराग्नी ग्रह
णी गुल्म शूलहृत्। विडङ्गस्यो
दर श्लेष्म कृमि वात विवन्धनु
त्॥ तुम्बरो रुरुता श्वास कास
प्लीह कृमीन् हरेत्। वंशरोचनज
स्त्वर्को क्षयकास ज्वरान् हरेत्॥
समुद्र फेनजः शीतो लेखनः
कफहृत्सरः। जीवकोत्थः शुक्र
कफबल कृच्छ्रीतलः समः॥
ऋषभः पित्तदाहास्र कास वात
क्षयापहः। महामेदोद्भवो ऽर्कस्तु
वृष्य स्तन्यः कफावहः॥ महामे
दोद्भवः शीतो रक्तपित्त ज्वरप्रण
ताकाकोल्याः शुक्रलः शीतः
पित्तशोथ ज्वरापहः॥ क्षीरका
कोलिकाजातो वृंहणो दाह वा
तहा। ऋद्धया वल्य स्त्रिदोषघ्नो र
क्तपित्त विनाशनः। वृद्धया गर्भप्र
दः शीतः क्षत कास क्षयापहः
॥ मधुयष्ट्याः केशकरः स्वर्यः
पित्तानिलास्रजित्। ज्वलयष्ट्या
विषच्छर्दि तृष्णा ग्लानि क्षयाप
हः॥ कम्पिल्लस्य विरेकी स्यात्
मेहानाह विकारनुत्॥ आरग्व
धस्य पित्तास्त्र वातोदावर्त्त शूल
हृत्॥ कद्दा मेह श्वास कास कृ

मि कुष्ठ ज्वरापहः।भूनिम्बस्य
तृषा कुष्ठ ज्वर व्रण कृमिप्रणुत्॥
भद्राया वस्त पित्तास्र कृमि वीसर्प
कुष्ठनुत्॥मदनोत्थः छर्दनेन चा
तर्थे ज्वरकादिहृत्॥रास्नोद्भवः
समीरास्र वात शूलोदरापहः।
नागभिन्नोद्भवो भोगि लूताद्या
खु विकारहृत्॥माचिकाजस्तु
पित्तास्र पक्वातीसारहा लघुः।
तेजस्विन्याः श्वास कास कफहृ
द्वह्निदीपनः॥ज्योतिष्मत्या वा
न्तिकरो वह्नि बुद्धि स्मृतिप्रदः।
कुष्ठस्य हन्ति वातास्र कास कु
ष्ठ महत् कफान्॥पौष्करस्यारुचि
श्वासान् विशेषात् पार्श्वशूलनुत्
।हैमाह्वाया रेक वान्तिकरः क
ण्डूविनाशनः॥शृङ्ग्या हरेद्दैवा
नद्धिक्का तृष्णा क्षय स्वरान्॥क
टफलोत्थः श्वासकास प्रमेहा
र्शो ऽरुचीन् हरेत्॥भार्ग्या हरेत्
कफ श्वास पीनस ज्वर मारुता
न्॥पाषाणभेदजो योनिरोग कृ
च्छ्रास गुल्म हा॥धातकीज स्तृषा
सार विष कृमि विसर्पजित्॥म
ञ्जिष्ठाजो विष श्लेष्म रक्तातीसार
कुष्ठहा॥कुस्तुम्बजो वर्णकरो र
क्तपित्त कफापहः।लाक्षाजः

कृमि वीसर्प व्रणोरस्तन कुष्ठहा
॥हरिद्राया मेह शोथ त्वद्दोष व्र
ण पाण्डु नुत्।आरण्यकहरिद्रा
याः कुष्ठ वातास्र नाशनः।कर्पू
रकहरिद्रायाः सर्वकण्डू विनाश
नः।दार्व्या विशेषतो लेपात् ने
त्र कर्णास्य रोगनुत्॥रसाञ्जनो
द्भवो नेत्रविकार व्रणदोषहृत्।
वाकुच्याः कृमि विष्टम्भ पाण्डु
शोथ कफापहः॥प्रपुन्नाटस्य
हन्त्येव कण्डू दद्रु विषानिला
न्।विषाजो दीप्तिकृत् पाके कफ
पित्तातिसारहा॥लोध्रजः शीत
लो ग्राही चक्षुष्यः कफ पित्त
नुत्।हरेत् पद्मोद्भवो नेत्र्यो द
रातीसार शोथहृत्॥भल्लातको
द्भवो हन्यात् ज्वरोदर कृमि
व्रणान्।गुडूच्या दीपनो ग्राही
कास पाण्डु ज्वरापहः॥ताम्बू
ल्या मुखदौर्गन्ध्य मल वातश्र
मापहः।बिल्वः श्लेष्महरो बल्यो ल
घुरुष्णश्च पाचनः॥गम्भारीजो भ्रम
तृष्णा शूलार्शो विष दाहहृत्॥
पाटल्या छर्दि शोथास्र तृट् श्वे
सारुचि दाहहा।अग्निमन्थोद्भवः
शोथ कृमिपाण्डु बलासनुत्।
श्योनाकजस्तु गुल्मार्शः कृमि

हृद्रुचि दीप्तिकृत्॥शालपर्ण्याः
तन्त्र कृमि ज्वर छर्द्यतिसारहा॥पृ
श्निपर्णी ज्वर श्वास रक्तातीसारहा
हृज्जित्॥वार्त्ताक्याज्ज्वर वैरस्य म
लारोचक शूलहा॥कण्टकार्या
गर्भकरः पाचनः कफ कासहा॥
गोक्षुरस्याश्मरी मेह कृच्छ्र हृद्रो
ग वातहा।जीवन्त्याः सार हृन्ने
त्र दोषत्रितयनाशनः॥मुद्गप
र्ण्याः शोथ दाह ग्रहण्यर्शोति
सारहृत्।माषपर्ण्या शुक्रकरो
वात पित्त ज्वरास्रजित्॥पञ्चा
ङ्गुलोद्भवः शूल शिरःपीडोदरा
पहः।रुबुकोत्थो भ्रम श्वास
कास कुष्ठाम मारुतान्॥मन्दार
जो वात कुष्ठ कण्डू व्रण विषाप
हः।अर्कार्कः श्लीह गुल्मार्शः श्ले
ष्मोदर कृमीन् हरेत्॥वज्रीजो
लेपनो हन्या व्रण शोथोदर व्र
णान्।सातलोत्थः कफानाह पि
त्तोदावर्त्त शोथहा॥लाङ्गल्या
लेपतो हन्यात् शोफास्र व्रणारु
गजितः।करवीरोद्भवो नेत्र को
प कुष्ठ व्रणापहः॥चण्डालो
त्थस्तु विषवत् भक्षणे लेपनेस्तु
हन्त्।धत्तूरजो हरेत् क्लेश सूका
कृमि विषादिकं॥वासोद्भवो

ज्वर च्छर्दि मेह कुष्ठ क्षयापहः।
पार्पटो हन्ति पित्तास्र भ्रम तृष्णा
कफ ज्वरान्॥निम्बजो भ्रम तृट्
कास ज्वरारुचि वमिप्रणुत्॥म
हानिम्बोद्भवो गुल्म मूषिका विष
नाशनः॥पारिभद्रोऽनिल श्लेष्म
शोथ मेद कृमि प्रणुत्।काञ्च
नारो गण्डमाला गुदभ्रंश व्रणा
पहः॥कोविदारस्तु पित्तास्र
प्रदर क्षयकासहा।शोभाञ्ज
नाकों रुचिकृत् शुक्रलो ग्राहि
दीपनः॥मधुशिग्रूद्भवो हन्या
त् विद्रधि श्वयथु क्रिमीन्।शिग्रु
जो विषहृन्नेत्र्यो नस्येनास्यादि
रोगहृत्॥गिरिकर्ण्याः कुष्ठ
शूल शोथ व्रण विषापहः।सिन्धु
वारोद्भवो हन्ति शूल शोथाम
मारुतान्॥निर्गुण्ड्यर्को हरेज्ज
न्तु व्रण कुष्ठारुचीन् लघुः।को
टजो दीपनः शीतः कफ तृष्णाम
कुष्ठजित्॥कारञ्जः कफ गुल्मा
र्शो व्रण कृमि विषापहः।चुक्रका
रञ्जका भेदी वातार्शः कृमि कु
ष्ठजित्॥करञ्ज्या वमि वातार्शः
क्रिमि कुष्ठ प्रमेहजित्।उच्च
टार्कः केशकरो वात पित्तक
फापहः॥गुञ्जाया हरेत् श्वास

मुखशोष भ्रम ज्वरान्॥कपि
कच्छूद्भवो हृष्या हंहगो वाजिक
र्म्मकृत॥मांसरोहिण्युद्भवस्तु ह
ष्या दोषत्रयापहः।विल्वः कुर्य्या
द्वातवृष्टिं तत्फलान्मारयेज्ज
नान्॥पुस्तकान्तरे चेल्लड्रिति
चपाठः॥काण्डकाण्ड्यो दीपनः
श्लेष्म शोफोदररुजं हरेत्।
वेतसो हरते दाहं शोथार्शो यो
निरुग्व्रणान्॥जलवेतसजो
ग्राही शीतो वातप्रकोपनः।इ
जलार्कस्तु हरते चराचर वि
षं स्फुटं॥अङ्कोठकस्य मूलाम
शोथ ग्रह विषापहः।वलार्को
ग्राही वातास्र पित्तास्र क्षत ना
शनः॥अतिबलार्कस्तु मूत्रा
तीसारनाशनः।महाबलार्को हर
ते कृच्छ्रं वातानुलोमनः॥नागब
लार्कस्तु मूर्छा मोहहरः प
रः।लक्ष्मणार्केन्तु सेवेत वन्ध्या
पि लभते सुतं॥स्वर्णवल्याः शि
रःपीडा त्रिदोषान् हन्ति दुग्धदः
।कार्पासार्कः कर्णसंस्थः कर्ण
रोगान् विनाशयेत्॥वंशजः
कफ पित्तघ्नः कुष्ठास्र व्रण शो
थजित्॥नलार्को बस्ति योन्यर्त्ति
दाहपित्त विसर्पहृत्॥पाठा ज

येत् ज्वर छर्दि कुष्ठातीसार हृ
द्रुजः।ग्रंथिहस्तोद्भवो रेकी पित्तगु
ल्मोदरापहः॥शरपुंख्या भवः
प्लीहान् गुल्म व्रण विषापहः।
जवासजो मद भ्रान्ति पित्तास्रक्
कुष्ठ कासजित्॥मण्डजोन्त्य।
न्नवलकृत् प्लीह मोहानिला
न्निजित्।अपामार्गभव छर्दि कफ
मेदो ऽनिलापहः॥आरक्तापामा
र्गभवो वान्तस्तम्भनकारकः।को
किलाक्षभवः शीघ्रं सेकाच्छो
कान्निवारयेत्॥अस्थिसंहारि
कायास्तु भग्नसन्धानकृच्छिवे।
कुमारिकाया उत्थो ऽग्निदग्ध वि
स्फोटकान् जयेत्॥पुनर्णवायाः
श्वेतायाः सर्वनेत्रामयापहः।पु
नर्णवाया रक्तायाः ग्राही पित्तं स
नाशनः॥प्रसारिण्या वातहरो
हृष्यः सन्धानकृत् स्वरः।मारि
षाया वह्निमान्द्य कासाम विष
नाशनः।भृङ्गराजस्य दन्तो ऽर्कः
केश्य स्त्वच्यः शिरो ऽर्त्ति हृन्नाश
न।ताम्बूलीलतायास्तु अर्कः पित्त
कफान्तकः॥चापस्यार्कः शूल
विषविलेपी ज्वरनाशनः॥मूर्वा
यामोह हृद्रोग कण्डु कुष्ठ ज्वराप
हः॥काकमाच्या नेत्रहित छर्दिह

द्रोगनाशनः।काकनासाभवो
वामी शोथार्श श्वित्रकुष्ठहृत्॥
काकजङ्घोद्भवो हन्यात् ज्वर
कण्डु विष क्रिमीन्।नागिन्या
स्तु हरेच्छूल योनिदोष वमि कृ
मीन्॥मेषशृङ्ग्या श्वासकास व्रण
श्लेष्माक्षि शूलहा।हंसपाद्या हृ
ल्लिशूल भूत रक्त विष व्रणान्॥
सोमवल्या स्त्रिदोषघ्नः क्षीरहृच्च
रसायनः।आकाशवल्या शीतो
ऽर्कः पित्त श्लेष्मामनाशनः।पा
तालगरुडीजातो ऽर्को हृष्यः प
वनापहः।हन्दाहस्तोद्भवो ऽ
र्कस्तु विष रक्तो व्रणापहः।व
टपत्रीभव श्वासो योनि मूत्र ग
दापहः।हिङ्गुपत्र्या विकन्धार्शः
श्लेष्म गुल्मानिलापहः॥वंशप
त्र्याः पावनोऽसौ हृद्वस्ति गदसं
घहृत्।मत्स्याक्ष्यर्को ग्राहि शी
त कुष्ठ पित्त कफास्त्रजित्॥सर्पा
क्षा रोपणः सर्व वृश्चिकोन्दुरदं
शहृत्।शङ्खपुष्प्या विषहरः स्मृ
ति कान्ति बलाग्निदः॥अर्कपुष्प्या
कृमि श्लेष्म मेह पित्त विकारजि
त्।लज्जालुकाया भगरुक् रक्त
पित्तातिसारहृत्॥अलम्बुषा स
म्भवो ऽर्कः कृमि पित्त कफाप

हः।दुग्धिकायाः कफहरो हृष्य
स्तम्भी क्रिमिप्रणुत्॥भूम्यामल्याः
कास तृष्णा कफ पाण्डु क्षताप
हः।ब्राह्म्या बुद्धिप्रद श्चार्कः प
ण्मासाभ्यासतः कविः॥ब्रह्मम
ण्डूकिका पाण्डु विष शोथ ज्वरान्
हरेत्।द्रोणपुष्प्या ज्वर श्वास
कामला शोथ जन्तुजित्॥सूर्य
मुख्या हरेत् स्फोट योनिरुक्
कृमि पाण्डुताः।वन्ध्याककोटिका
जातः सर्पदर्प व्रणापहः।मार्क
ण्डिकाया दुर्गन्धि विष गुल्मोदरा
श्मापहः।देवदाल्याः शूल गुल्म
श्लेष्मार्शो वातजित् परः॥धत्तूरजो
ग्राहि हिमो वह्निकृद्व्रणदाहहृत्॥
गोजिह्वाया मेह कासव्रणसार ज्व
रापहः॥नागपुष्प्याः सर्पविष
सर्वग्रह निवारणः।वेलन्तरो
मूत्राघातास्मरी योन्यनिलार्त्ति
जित्॥छिक्कन्या वह्नि रुचि
कृद्दर्शः कुष्ठ कृमिप्रणुत्।को
कन्दरो ज्वरं रक्तं मुखशोषं क
फं हरेत्॥सुदर्शनार्क श्वात्तु
सः कफ शोथास्र वातजित्।
इति लङ्कानाथकृतार्कचिकित्
सायां औषध्यर्कविधानं तृतीय
शतकं॥ ॥अतः परं ना

नौषधविधानं चतुर्थशतकं।
नानारोगनिवारणार्थं पञ्चम
शतकं।विस्फोटकनिवारणा
र्थं षष्ठशतकं।त्वग्रोगादे नि
वारणं सप्तमशतकं।कार्म्मणं
नामाष्टमशतकं।गणसंख्या न
वमशतकं।धातुसिद्धि र्दशमश
तकं।एतत्सर्व्वं अर्कप्रकाशेरा
वण मन्दोदरी संवादे अस्तिवा
द्रत्याभि धान लिखितं॥
अर्कपुष्पी स्त्री वृक्षविशेषः।
तत् पर्य्यायगुणाः।अर्कपुष्पी क्ष
रकर्म्मी पयस्या जलकान्तुका।
अर्कपुष्पी क्रिमि श्लेष्म मेह पित्त
विकारजित्॥इति भावप्रकाशः
॥राजनिर्घण्टोक्तपर्य्यायगुणाः
कुटुम्बिनीशब्दे द्रष्टव्याः॥
अर्गलं क्ली स्त्री देवीमाहात्म्य
पाठस्यादौ पाठ्यस्तोत्रविशेषः
।यथा।मार्कण्डेय उवाच।ब्रह्म
न् केन प्रकारेण दुर्गामाहात्म्य
मन्त्रमं।धीत्रं सिद्धाति तत्सर्व्वं
कथयस्व महाप्रभो॥ब्रह्मो
वाच।अर्गलं कीलकञ्चादौ
पठित्वा कवचं पठेत्।जपेत्
सप्तशती पश्चात् क्रम एष शि
वोदितः॥अर्गलं दुरितं

हन्ति कीलकं फलदं तथा।क
वचं रक्षते नित्यं चण्डिका त्रित
यं दिशेत्॥अर्गलं हृदये यस्य
स चानर्गलवाक् सदा।कील
कं हृदये यस्य वशकीलित
मानसः॥कवचं हृदये यस्य
स वज्रहृदयः खलु।ब्रह्मणा
निर्म्मितं सर्व्वं विनिश्चित्यापि वे
तसा॥इत्यादि।तदाद्यश्लोको
यथा।जयत्वं देवि चामुण्डे जय
भूतापहारिणि।जय सर्व्वगते
देवि कालरात्रि नमोस्तु ते॥
तस्य शेषश्लोको यथा।इदं
स्तोत्रं पठित्वा च महास्तोत्रं
पठेन्नरः।सप्तशती समाराध्य
वर माप्नोति सम्पदं॥इत्यर्गला।
स्तोत्रं॥
अर्घे मूल्ये।अर्घति गं गोपः।
इति दुर्गादासः॥
अर्द्ध क दृजे।क अर्चयति।
गोवर्द्धन क्लिम मात्मनेपदित्वं
मत्वा विभ्राजसे मकरकेतन म
र्च्चयन्तीत्यादि स्वलित मित्याह।
इतिदुर्गादासः॥
अर्ज्ज ज दृजे।ज अर्ज्जति
अर्ज्जते।इति दुर्गादासः॥
अर्जि अर्जने।अर्जन मलब्धस्य

लाभः।यशश्चार्जितियः स्थिर
मिति हलायुधः।इति दुर्गा
दासः॥
अर्जि क संस्कारे।क अर्जयति
किमपि लोकः संस्करोतीत्य
र्थः।प्रतियत्ने शाब्दः।अर्जय
ति धनं परिजनः।इति रमाना
थः।इति दुर्गादासः॥
अर्ज्जुनः पुं वृक्षविशेषः।तत्
पर्य्यायगुणाः।ककुभोऽर्ज्जुन
नामाख्यो नदीसर्ज्जश्च कीर्त्ति
तः।इन्द्रद्रु वीरवृक्षश्च वीरश्च ध
वलः स्मृतः॥ककुभः शीतलो
भग्न क्षत क्षय विषास्रजित्।मे
दो मेह व्रणान् हन्ति तुवरः क
फ पित्तहृत्॥इति भावप्रका
शः॥
अर्णः पुं वर्णः।यथा।वर्णो ऽक्ष
रं रश्मि वर्णः स्वरास्तु कथिता
अचः।व्यञ्जनानि हलो वर्णाः
कादयो ऽष्टौ प्रकीर्त्तिताः॥इति
वीजवर्णाभिधानं॥
अर्थ त क ङ याचने।ङ अर्थ
यते अर्थापयते।प्रार्थयत्यल्प
मूल्यानीत्यादौ प्रार्थनं प्रार्थः
पश्चात् प्रार्थं करोति इति
सो परस्मैपदं।इति दुर्गा

दासः॥
अर्थवादः पुं विध्यसमभिव्या
हृतवाक्यं।यथा।अर्थवादश्च
विध्यसमभिव्याहृतवाक्यरूपः
सोपि त्रिविधः।गुणवादानुवा
द भूतार्थवादभेदात्।यथा।वि
रोधे गुणवादः स्यादनुवादो ऽ
वधारिते।भूतार्थवादस्तद्धाना
दर्थवाद स्त्रिधा मत इति॥अय
मर्थः।विरोधे विशेष्य विशेष
णयोः सामानाधिकरण्येनान्व
यविरोधे गुणवादः अङ्ककथ
न रूपत्वात्।यथा यजमान
स्वस्तर इति।अत्र स्वस्तरः कु
शमुष्टिः तस्य यजमाने ऽभेदा
न्वयवाधात् यजमानस्य कुश
मुष्टि धारण रूपार्थ वाद रूपत्वा
त् गुणवादः।अवधारिते प्रमा
णान्तरसिद्धे ऽर्थे योवादः।
यथा नान्तरीक्षे ऽग्नि श्चेतव्यः
अग्नि र्हिमस्य भेषजं इत्यादि
वाअन्तरीक्षे ऽग्निचयनस्यास
म्भवेन तदभावस्य अग्ने र्हिम
नाशकत्वस्य च लौकिक प्र
माण सिद्धत्वात् अनुवादः।तद्धा
नो तेषां विरोधावधारणयो रभा
वे भूतार्थवादः।यथा इन्द्रो

इत्यह्नि इत्यादि। सोऽपि द्विविधः।
स्तुत्यर्थवादो निन्दार्थवादश्च। य
था। सन्ध्यामुपासते ये च इत्या
दि स्तुत्यर्थवादः। स्त्री तैलमां
ते स संभोगी पर्वस्वेषु वै पुमान्।
विण्मूत्र भोजनं नाम प्रयाति
नरकं मृतः॥ इत्यादि निन्दार्थ
वादः इति श्राद्धविवेकटीका
यां श्रीकृष्णतर्कालङ्कारः॥ ॥
प्रकरणप्रतिपाद्यस्य तत्र तत्र
प्रशंसनं। इति वेदान्तसारः॥ त
द्विवरणं यथा। अर्थवादादि
करणं। तत्रार्थवादाश्च बहुश श्रू
यन्ते ते किं प्रमाणं न वेति सं
शये पूर्वपक्षसूत्रं। आम्नायस्य
प्रवर्त्तकत्वं तदर्थमेव तद्वत्ता
दादिति। अस्यार्थः। आम्नायस्य
वेदस्य प्रवर्त्तकत्वं विधेयं इति
शेषः। तदर्थं वेदाभिधानात्।
नच प्रवर्त्तकत्वं कार्य्यताज्ञान
द्वारैव तद्विना प्रवृत्त्यभावात्।
अतः सिद्धार्थकानां स्तुत्यर्थवा
दानां कार्य्यतावाचकपदाभा
वात् न कार्य्यताधीजनकत्वं। अ
तोऽप्रामाण्यमेव। अत्र लोपा म
र्थवादानां प्रवर्त्तकत्वार्थमवश्यं
विधिकल्पनं क्रमविशेषणत्व
म्साय

कं। अत एव सिद्धान्तसूत्रं। विधि
ना त्वेकवाक्यत्वात् स्तुत्यर्थेन
विधीनां स्युरिति। अस्यार्थः। अ
र्थवादानां स्तुतिपरत्वेन विधि
नासह एकवाक्यत्वात् ते अ
र्थवादाः प्रमाणानि स्युः। तथा
च विधेय प्रवृत्तावेव तेषां तात्
पर्य्ये तत्रैव प्रामाण्यं यत् परश
ब्दः स शब्दार्थ इति सिद्धान्तात्
न स्वार्थे स्तुत्यादौ तत्र तात्पर्य्या
भावात्। तर्हि यन्न दुःखेन संभि
न्नमित्यादेः स्वतन्त्रार्थवादानां
का गतिरित्यत्राह भूतार्थानां
क्रियार्थेन समाम्नायः। अस्या
र्थः। भूतार्थानां सिद्धार्थानां
क्रियार्थेन कार्य्यबोधकेन वि
धिना इति यावत्। समाम्नायः
पाठः कार्य्य इतिशेषः। ततश्च
विधिवाक्याकाङ्क्षापूरकत्वेन का
र्य्यान्वितबोधकतया तेषां प्राम
ण्यं। यथा लिखिष्यमाण यूपाह
वनीयवाक्यानां यूपाहवनीय
परिचयाय कार्य्यान्वितबोधकत्वे
न स्वार्थबोधकत्वे प्रामाण्यं। तथा
स्वर्गकामो यजेतेत्यत्र स्वर्गरूप
परिचयाय स्वर्गबोधकत्वेन य
न्न दुःखेन संभिन्नं न च ग्रस्तमन

न्तरं श्रुतिलायोपनीतं यत् न
त् सुखं स्वःपदास्पदं। इत्यादि
वाक्यानामपि प्रामाण्यं। अन्य
था यूपादि पदार्थापरिचये च
तत्तद्विधिवाक्यानां प्रवृत्तिर्न
स्यात्। तो विधिनैकवाक्यत्वात्
सिद्धार्थकानामपि प्रामाण्यं।
यत्र तु विधिना सह विरोधः तत्र
न स्वार्थे प्रामाण्यं। यथा अह
सीत इत्यादौ सत्न्या ... पा
हः सन्ध्यामुपासते ये तु नियतं
संशितव्रताः। विधूतपापास्ते या
न्ति ब्रह्मलोके मनामयमित्या
द्यर्थवादानां। अतो नित्ये कर्म्म
णि फलश्रुतिरर्थवाद एव सो
पि रुच्युत्पादनपरः। अतोऽत्र
कार्य्यताज्ञानादेः प्रवृत्तिरिति
दिक्। इति धर्म्मदीपिका॥
अर्थशास्त्रं क्ली नीतिशास्त्रं।
यथा। वृहस्पति प्रभृतिभिः प्र
णीतन्त्वार्थशास्त्रकं। तेनैव द
ण्डनीतिः स्यादत्र ज्ञेयान यान
ये॥ इति शब्दरत्नावली॥ अष्टा
दशविद्यान्तर्गतविद्याविशेषः। य
था विष्णुपुराणं। अङ्गानि वेदा
श्चत्वारो मीमांसा न्यायविस्त
रः। धर्म्मशास्त्रं पुराणञ्च विद्या

ह्येता श्चतुर्दश॥ आयुर्वेदो ध
नुर्वेदो गान्धर्व्वश्चेति ते त्रयः।
अर्थशास्त्रं चतुर्थञ्च विद्या
ह्यष्टादशैव ताः॥ इति प्रायश्चि
त्ततत्त्वं॥ यथा। स्मृत्यर्थेन विरो॰ धर्म्मशास्त्रेणार्थशास्त्रस्य बाधनं
धे हि अर्थशास्त्रस्य बाधनं। प
रस्परं विरोधे तु न्याययुक्तं प्र
माणवत्॥ अर्थशास्त्रस्य मन्वा
दिप्रणीत राजनीत्यादिविषय
त्वा यदाह। अनागतमन्त्र यो भु
ङ्क्ते बह्वन्यद्दशनान्यपि। चोरद
ण्डेन ते पापं दापयेत् पृथिवी
पतिः॥ इत्यनयो धर्म्मशास्त्रा
र्थशास्त्रयो र्विप्रतिपत्तौ धर्म्म
शास्त्रेण दण्डविधायक मर्थशा
स्त्रं बाध्यते। तत्र अर्थशास्त्रस्य
विप्रकृष्टीयेतर परत्वेन सङ्को
चः। इति मलमासतत्त्वं॥
अर्द याचने गति याचनयोः। या
चना नाडनं। अर्दति पुत्रं पिता
। शारदूत्तं नार्दति चातको।
पि। न याचतीत्यर्थः। इति दु
र्गादासः॥
अर्द ज बधे। ज अर्दति अर्द
ते। रक्षः सहस्राणि चतुर्दशा
र्दीत्। अत्र भाल्लनेपदीत्य

न्ये। इति दुर्गादासः॥
अर्द्द क वधे। क अर्द्दयति। अ
य मात्मनेपदीत्यन्ये। इति दुर्गा
दासः॥
अर्द्दितं क्ली वायुरोगविशेषः।
तस्य निदान संप्राप्तिश्चैकं
लक्षणमाह। उच्चै र्व्याहरतो ऽ
त्यर्थं खादतः कठिनानि वा ह
सतो जृम्भतो भाराद्विषमाच्छय
नासनात्॥ शिरो नासौष्ठ चिबु
क ललाटेक्षण सन्धिगः। अर्द्द
यत्यनिलो वक्त्र मर्द्दितं जनये
त्ततः॥ वक्रीभवति वक्त्रार्द्धं ग्री
वा चाप्यपवर्त्तते। शिर श्चलति
वाक्सङ्गो नेत्रादीनाञ्च वैकृतं
॥ ग्रीवा चिबुक दन्तानां तस्मि
न् पार्श्वे च वेदना। तमर्द्दित मि
ति प्राहु र्व्याधिं व्याधिविशारदाः
॥ व्याहरतः वदतः। कठिनानि
पूगफलादीनि। विषमाच्छय
नासनात् ग्रीवादि वैपरीत्येन
शयनादासनाच्च। अर्द्दयति पी
डयति। ततः तदनन्तरं अर्द्दितं
जनयेत्। अर्द्दिते जाते किं स्या
त्तदाह। वक्रीभवतीत्यादि।
अपवर्त्तते वक्रीभवति। च
लति कम्पते। वाक्सङ्गः वा

ङ्निरोधः। नेत्रादीना मित्यादि
शब्देन क गण्ड नासिकादीनां
ग्रहणं। वैकृतं वेदना स्फुरणं
वक्रत्वादि। ग्रीवेत्यादि यस्मिन्
पार्श्वे अर्द्दितं तस्मिन् पार्श्वे ग्री
वादीनां वेदना॥ ॥ वातात् पि
त्तात् कफाच्च स्यात् त्रिविधं तत्
समासतः। लालास्रावो व्यथा
कम्पः स्फुरणं हनुवाग्ग्रहः॥
उभयोः श्वयथुः शूल मर्द्दिते
वातजे भवेत्। पीत मास्यं ज्वर
स्तृष्णा पित्तजे मोहधूपने॥ गण्डे
शिरसि मन्यायां शोथः स्तम्भः
कफात्मके॥ ॥ तस्यासाध्यस्य
लक्षण माह। क्षीणस्यानिमिषा
क्षस्य प्रसक्ताव्यक्त भाषिणः। न
सिध्यत्यर्द्दितं गाढं त्रिवर्षं वेपन
स्य च॥ अनिमिषाक्षस्य निमेषा
समर्थचक्षुषः। प्रसक्तं प्रकर्षेण
लग्नं अव्यक्तञ्च भाषितं शील
यस्य। तस्य अर्द्दितं न सिद्ध्यति।
त्रिवर्षं अतीतवर्षत्रयं। अथ वा
त्रयाणां चक्षु र्नासा मुखानां
वर्षः स्रावो यत्र तत्। वेपनस्य
कम्पनशीलस्य च। गाढमतिशये
न न सिध्यति इत्यन्वयः॥ ॥
अथ तस्य चिकित्सा। स्नेहपान

नि नस्यञ्च भोज्यान्यनिलहानि
वा उपनाहाश्च शस्यन्ते स्वेदनं
वस्तयो ऽर्द्दिते॥ दत्त्वा रक्त शिरो
वस्ति रेवा दशमूली कषायेण
मातुलुङ्ग रसेन वा। वल्लया प
ञ्चमूल्या वा क्षीरं वातात्मके
हितं॥ पिष्टं माषकृतं जग्ध्वा न
वनीतेन सो ऽर्द्दिती। क्षीरं मांसर
से भुक्त्वा दशमूलीरसं पिबेत्॥
अर्द्दिते पित्तजे शीतान् स्नेहां
श्चैव विनिर्द्दिशेत्। घृतवस्तिश्च
सेकञ्च क्षीरसेकं तथैव च॥
जिह्मीभूताननो मूको दाहवान
यो ऽर्द्दिती भवेत्। ऊर्द्ध्वात् प्र
तिक्रियां तस्य वातपित्तविना
शिनीं॥ श्लेष्मभागे त्वयं नी
ते हृद्गतेः समुपाचरेत्। अर्द्दि
ते शोथसंयुक्ते वमनञ्च प्र
शस्यते॥ रसोनकल्कं तिल
तैलमिश्रं यादेन्नरो यो ऽर्द्दि
तरोगयुक्तः। तस्यार्द्दितं नाश
मुपैति शीघ्रं वृन्दं घनाना
मिव वायुवेगात्॥ इति भा
वप्रकाशः॥

अर्द्धनारीश्वरः पुं उमामहेश्वरः
। स च शिवः। यथा॥ विस्मयस्मेरान्त

रे। अष्टमी नवमी युक्ता नवमी
चाष्टमीयुता। अर्द्धनारीश्वरप्रा
या उमामाहेश्वरी तिथिः॥ इति
तिथ्यादितत्त्वं॥ अपि चाब्जेशः
सर्व्वैः सोमेश स्तथा लाङ्गलि
दारुकौ। अर्द्धनारीश्वरे श्रीमा
कान्त श्चाषाढि दण्डिनौ॥ इति
तन्त्रसारे शिवमन्त्रे श्रीकण्ठा
दिन्यासः॥ अस्य मन्त्रादिकं
यथा। अग्निसंवर्त्तकादित्य रा
निलो यष्ठ बिन्दुमत्। चिन्ताम
णि रिति ख्याते बीजं सर्व्वसमृ
द्धिदं॥ अग्नी रेफः। संवर्त्तकः क्ष
कारः। आदित्यो मकारः। रेफः
। अनिलो यकारः। ओं स्वरूपाष
ष्ठस्वर ऊकारः॥ प्रपञ्चसारे।
अनल क य म रेफ प्राणसत्वा
न्त वामश्रुति बिम्बसौच खण्डे
र्म्मौलितो मन्त्रराजः। इति तव
नान् रेफ एव न तु वकारः। रँ·
हँ· मँ· क्षँ· यँ· ऊँ· ऊँ·। इति म
न्त्रः। अस्य पूजा प्रातःकृत्यादि
शैवोक्त पीठमन्त्रान्तं विन्यस्य ऋ
ष्यादिन्यासं कुर्य्यात्। यथा शि
रसि कश्यपाय ऋषये नमः। मु
खे ऽनुष्टुप्छन्दसे नमः। हृदि
अर्द्धनारीश्वराय देवतायै नमः।

ततः कराङ्गन्यासौ कुर्य्यात्।अं
अङ्गुष्ठाभ्यां नमः।कं तर्जनीभ्यां
स्वाहा।यं मध्यमाभ्यां वषट्।मं
अनामिकाभ्यां हुं।रं कनिष्ठा
भ्यां।वौषट्।यं करतलपृष्ठाभ्यां
फट्।एवं हृदयादिषु।तथा च
निबन्धे रेफादि व्यञ्जनैः ष
ड्भिः कुर्य्यादङ्गानि षट् क्रमा
त्।ततो ध्यानं।नीलप्रवालरु
चिरं विलसत्त्रिनेत्रं पाशारु
णोत्पल कपालक शूलहस्तं
।अर्द्धाम्बिकेशमनिशं प्रविभक्त
भूषं बालेन्दुबद्धमुकुटं प्रणमा
मि रूपं।।एवं ध्यात्वा मानसैः सं
पूज्यार्घ्यस्थापनं कृत्वा शैवोक्त
पीठपूजां विधाय पुनर्ध्यात्वा
वाहनादि पंचपुष्पाञ्जलिदान
पर्य्यन्तं विधाय आवरणपूजा
मारभेत्।यथा।केशरेष्वग्न्यादि
कोणेषु मध्ये दिक्षु च रं इत्या
दिना षडङ्गानि पूजयेत्।ततः
पत्रेषु पूर्ववत् वृषभादीन् पू
जयेत्।पत्राग्रेषु पूर्वादितः
ब्राह्मी माहेश्वरी कौमारी वैष्ण
वी वाराही इन्द्राणी चामुण्डा
महालक्ष्मीञ्च पूजयेत्।त
द्बहिः इन्द्रादीन् वज्रादींश्च सं

पूज्य धूपादि विसर्जनान्तं कर्म्म स
मापयेत्।।अस्य पुरश्चरणं लक्षज
पः।तथा चाक्षलक्षमेकं जपेन्मन्त्र
मि– मन्त्री विजितमन्त्र।अयुतं
मधुरासिक्तैर्जुहुयात्तिलतण्डुलैः
।।इति तन्त्रसारः।।अर्द्धरात्रः पुं रा
त्र्यर्द्धभागः।मध्यरात्रिः।तत्पर्या
यः।निसम्पातः ३ अवसरात्ययः
४।इति शब्दरत्नावली।।महाज
नः ५।इति जटाधरः।।
अर्द्धलक्ष्मीहरिः पुं विष्णुः।यथा
।गौतमीये।ऋषिः प्रजापतिश्छ
न्दो गायत्री देवता पुनः।अर्द्धल
क्ष्मीहरिः प्रोक्तः श्रीबीजेन षडङ्ग
कं।।अस्य मन्त्रादि यथा।तारं
नमःपदं ङयान्तरो दीर्घे समन्वि
तो।पवनोणाय मन्त्रो ऽयं प्रोक्तो
वस्वक्षरः परः।।अस्य पूजा प्रयोगः
प्रातः कृत्यादि स्नानान्तं
कर्म्म कृत्वा पूजामण्डप
मागत्य वैष्णवाचमनं कुर्य्यात्
।तद्यथा।गौतमीये।केशवाद्यै
स्त्रिभिः पीत्वा द्वाभ्यां प्रक्षा
लयेत् करौ।द्वाभ्यां
मोष्ठौ द्वि
रुन्मृज्य द्वाभ्यां मृज्यान्मु
खं ततः।।एके

न हस्तं प्रक्षाल्य पादावपि न
योर्ततः।संप्रोक्ष्यैकेन मूर्द्धानं
ततः सङ्कर्षणादिभिः।।आस
नासाक्षि कर्णांश्च नाभ्युरस्क
भुजौ क्रमात्।स्पृशेदेवं तेवरा
चमनञ्च वैष्णवान्वये।।एव
माचमनं कृत्वा साक्षान्नाराय
णो भवेत्।केशवादयस्तु के
शवनारायण माधव गोविन्द
विष्णु मधुसूदन त्रिविक्रम वा
मन श्रीधर हृषीकेश पद्मनाभ
दामोदर सङ्कर्षण वासुदेव प्रद्यु
म्नानिरुद्ध पुरुषोत्तमा ऽधोक्षज
नृसिंहाच्युत जनार्द्दनो पेन्द्र
हरि विष्णवः।।वाक्यन्तु ॐ के
शवाय नमः।इत्यादि।तथा च
।सचतुर्थ्यन्तनमोऽन्तेश्च नामभि
र्विन्यसेत् सुधीः।ततः सामा
न्यार्घ्यादि मातृकान्यासान्तं क
र्म्म विधाय केशवकीर्त्त्यादिन्या
सं कुर्य्यात्।अस्य ऋष्यादिन्या
सः।शिरसि प्रजापतये ऋषये
नमः।मुखे गायत्रीछन्दसे नमः
।हृदि अर्द्धलक्ष्मीहरये देवता
यै नमः।ततः कराङ्गन्यासौ श्रीं
अङ्गुष्ठाभ्यां नमः।इत्यादि श्रीं
हृदयाय नमः।इत्यादि।तथा च

गौतमीये।ऋषिः प्रजापतिश्छ
न्दो गायत्री देवता पुनः।अर्द्ध
लक्ष्मीहरिः प्रोक्तः श्रीबीजेन
षडङ्गकं।।ततो ध्यानं।उद्यत्प्र
द्योतन शतरुचिं तप्तहेमाव
दातं पार्श्वद्वन्द्वे जलधिसुतया
विश्वधात्र्या च जुष्टं।नानार
त्नोल्लसित विविधाकल्पमापी
त वस्त्रं विष्णुं वन्दे दरकमल
कौमोदकी चक्रपाणिं।।इत्या
दि।इति तन्त्रसारः।।
अर्द्धोदयः पुं योगविशेषः।स
च रविवार व्यतीपात श्रवण
नक्षत्रैर्युक्ता चेत् पौष माघ
यो रमावास्या स्यात्तदा भवति
।यथा।पाद्मान्त्यनिर्णयामृते।
अमार्कपात श्रवणै र्युक्ता चे
त्माघ पौषयोः।अर्द्धोदयः स
विज्ञेयः कोटिसूर्य्यग्रहैः समः
।।अत्र सूर्य्यपर्वशताधिक इ
ति कृत्यचिन्तामणौ पाठः।त
था।दिवैव योगः शस्तो ऽयं न
च रात्रौ कदाचन।भक्तं दृष्टवाणो
।अर्द्धोदये तु सम्प्राप्ते सर्व्वे गङ्गा
समं जलं।शुद्धात्मानो द्विजाः
सर्व्वे भवेयु र्ब्रह्मसन्निभाः।।
यत्किञ्चित् क्रियते दानं तद्दा

नं श्वेतसन्निभं।शिव विस्तृता
न प्रशस्तकालोपि।हहस्त्वार
दीयं।अर्द्धोदये च पुष्यार्के ह
स्ताके रोहिणीबुधेऽइति ति
थ्यादितत्वं॥ ॥
अर्पणं क्ली अर्पणं।समर्पणं।
यथा।यत् करोमि यदश्नासि
यज्जुहोषि ददासि यत्।यत्तप
स्यसि कौन्तेय तत् कुरुष्व म
दर्पणं॥इति श्रीभगवद्गीता
यां ९ अध्यायः॥
अर्ब हिंसे॥गतौ।अर्बति।इ
ति दुर्गादासः॥
अर्बुदः पुं क्ली रोगविशेषः।
मांसकीलः।आबु इतिभाषा
।तस्य संप्राप्तिपूर्वकं सामा
न्यलक्षणमाह।गात्रप्रदेशे क
चिदेव दोषाः संमूर्छिता मांस
मसृक् प्रदुष्य।वृत्तं स्थिरं मन्द
रुजं महान्तमनल्पमूलं चिर
वृद्ध्यपाकं।कुर्वन्ति मांसोच्छ्र
यमत्यगाधं तदर्बुदं शास्त्रविदो
वदन्ति।महान्तं ग्रन्थ्यपेक्षया
चिरेण वृद्धिरपाकश्च यस्य तत्
चिरवृद्ध्यपाकं।अपाक मिति
ग्रन्थेः सकाशादस्य भेदज्ञाप
कं।अत्यगाधं हस्तप्रविष्टं॥

॥निदानपूर्वकाणि विशिष्टानि
लक्षणान्याह।वातेन पित्तेन
कफेन वापि रक्तेन मांसेन च
मेदसा चात्तज्जायते तस्य च ल
क्षणानि ग्रन्थेः समानानि सदा
भवन्ति॥ग्रन्थेः समानानि वा
तिक पैत्तिक श्लैष्मिक मेदोजा
नां ग्रन्थीनां लक्षणैः वातिक
पैत्तिक श्लैष्मिक मेदोजानां मर्बु
दानां लक्षणानि तुल्यानि भव
न्ति॥ ॥रक्तार्बुद माह।दोषः
प्रदुष्टे रुधिरं शिराश्च संकोच्य
संपीड्य ततस्त्व पाकं।सस्राव
मुन्नह्यति मांसपिण्डं मांसाङ्कु
रै राचितं आशु वृद्धिं॥स्रवत्यज
स्रं रुधिरं प्रदुष्ट मसाध्य मेत
द्रुधिरात्मकन्तु।रक्तक्षयोपद्रव
पीडितत्वात् पाण्डु र्भवेदर्बुदपी
डितस्तु॥दोषो ऽत्र पित्तं रुधि
रं शिराश्च संकोच्य संपीड्य सं
हतीकृत्य मांसास्रजो सर्वेष
र्बुदेषु दुष्यन्ते रक्तजेन्तु विशेष
तो रक्तदुष्टिः।एवं मांसार्बुदे
विशेषतो मांसदुष्टि र्बोद्धव्या।
ततो मांसपिण्ड मुन्नह्यति
उन्नतं करोति।अपाकं
ईषत्पाकं यथा

स्यादेव मिति क्रियाविशेषणं।
ईषत्पाकश्च एकदेशपाकेन
रक्तक्षयोप द्रवपीडितत्वात्।
।रक्तक्षयोपद्रवाः सक्षतेनो
क्ताः।तैः पीडितत्वात्।अर्बुद
पीडितः रक्तार्बुद पीडितः॥
मांसार्बुदस्य संप्राप्ति माह।
मुष्टिप्रहारादिभि रर्दिते ऽङ्गे मां
सं प्रदुष्टं प्रकरोति शोथं।अ
वेदनं स्निग्ध मनन्यवर्ण म
पाक मश्मोपम मप्रचाल्यं
॥मांसं प्रदुष्टं वातेन।अवेद
नं वेदनारहितं ईषद्वेदनं
वा।अपाकं पाकरहितं ईष
त् पाकं वा अश्मोपमं पाषा
णवत् कठिनं।अप्रचाल्य स्थि
र।यद्यपि रक्तमांसार्बुदयो
रक्तमांसार्बुदयो र्हेतुत्वेनो
क्तिः तथापि रक्तजे पित्तं।मां
सजे वायुरारम्भकः॥ ॥
निदान माह।प्रदुष्टमांसस्य
नरस्य गाढ मेतद्भवेन्मांसपरा
यणस्य।मांसाशनाभ्यासेन
यः प्रदुष्टमांसस्तस्यैव भव
ति इत्यर्थः॥ ॥असाध्य
माह।मांसार्बुदं त्वेतदसाध्य
माहुः साध्येष्वपीमानि विव
र्जयेच्च।संप्रस्रुतं मर्म्मसु यच्च

जातं स्रोतःसु वा यच्च भवेद
चाल्यं॥साध्येष्व वातजादिष्व
पि इमानि वक्ष्यमाणानि संप्रस्रु
तादीनि॥अपरासाध्य माह।य
ज्जायते ऽन्यत् खलु पूर्वजाते
ज्ञेयं तदध्यर्बुद मर्बुदज्ञैः।यत्
द्वन्द्वजातं युगपत्क्रमाद्वा द्वि
रर्बुदं तच्च भवेदसाध्यं॥अर्बु
दानां पाकाभावे हेतुमाह।न
पाकमायान्ति कफाधिकत्वा
न्मेदोबहुत्वाच्च विशेषतस्तु।दो
षस्थिरत्वात् ग्रथनाच्च तेषां सर्वा
र्बुदान्येव निसर्गतस्तु॥ग्रथनात्
ग्रन्थिरूपत्वात्।तत्त्वपथ्या कफ मे
दसो रायिकेऽपि पाको दृश्यते
तथात्र कथं न पाक इत्याह नि
सर्गात् स्वभावात्॥ ॥अथा
र्बुदस्य चिकित्सा।ग्रन्थ्यर्बुदा
नां न यतो विशेषः प्रदेशहेत्वा
कृति दोषदुष्टेः।अतश्चिकित्
सेद्भिषगर्बुदानि विधानविद्
ग्रन्थिचिकित्सितेन॥हरिद्रा
लोध्र पतङ्ग गृहधूम मनःशिला
मधुप्रगाढो लेपोऽयं मेदोऽ
र्बुदहरः परः॥१॥मूलकस्य क्ष
तेः क्षारो हरिद्राया स्तथैव च।
शंखचूर्णेन संयुक्तो लेपः सि

द्वो ऽर्बुदापहः॥२॥वटदुग्धयुक्त
ष्टरोमक लिप्तं वद्धं वटस्य पत्रे
ण।अर्घ्यास्थि सप्तरात्रान्महद
प्युपशान्ति मर्बुदं गच्छेत॥३॥
शिग्रु मूलकयो र्बीजं रक्तोघ्नं
सुरसा यवाः तक्रेण पिष्ट्वापि
ष्ट्वा लिम्पेदर्बुदशान्तये॥४॥
रक्तोघ्नं सर्षपं।सुरसा तुलसी।य
वं इन्द्रयवं।अपिष्टं कस्वीरं।
इत्यर्बुदाधिकारः॥इति
भावप्रकाशः॥
अर्द्द वधे।अर्द्दति।इति दुर्गादा
सः॥अन्तस्थवकारान्तो ऽयं॥
अर्शः क्ली स्वनामख्यातपायु
रोगः।यथा।अथाशोऽधिकारः
।तत्राशंस: सन्निकृष्टनिदान
म्याह।पृथग्दोषैः समस्तैश्च शो
णितात् सहजानि च।अर्शांसि
षट्प्रकाराणि विद्याद् गुदव
लित्रये॥केचिद्दुष्टस्यापि दो
षत्वं मन्यन्ते।तन्मत माश्रित्या
ह।शोणितादिति।सहजानि
शरीरेण सहजातानि।सहा
प्याह।षट्प्रकाराणीति।गु
दवलित्रये सार्द्धचतुरङ्गुल
गुदस्य मानं तस्मा त्रयस्त
मूता स्तिस्रो वलयः शङ्खा

वर्त्तनिभा उपर्युपरि सन्ति।ता
सां नाम प्रवाहिणी विसर्जनी
संवरणी चेति।तत्र गुदोष्ठा ऽर्धा
ङ्गुलमान स्तदूर्ध्वं मङ्गुलमात्रा
प्रथमा वलिः।सार्द्धैकाङ्गुलमाना
द्वितीया।तृतीया च तावती।उक्त
ञ्च।अर्द्धाङ्गुलप्रमाणेन गुदोष्ठं
परिचक्षते।गुदोष्ठादङ्गुले चै
कं प्रथमान्तु वलिं विदुः॥सा
र्द्धैकाङ्गुलमानेन पृथगन्ये प्र
कीर्त्तिते॥ ॥अथ वातार्शसो
विप्रकृष्टं निदान माह।कषाय
कटु तिक्तानि रुक्ष शीत लघूनि
च।प्रमिताल्पाशनं तीक्ष्ण मद्यं
मैथुनसेवनं॥लङ्घनं देशका
लौ च शीतौ व्यायामकर्म्म च।
शोको वातातपस्पर्शो हेतुर्वा
तार्शसां मतः॥प्रमितमपरि मितं
।तीक्ष्णमिति मद्यविशेषणं।पै
ष्ट्यादिमुद्यमद्यस्य वातसमका
त्।आतप स्तूष्णवीर्य्योप्य ड्डुत
रौक्ष्याद्वातप्रकोपे हेतुः वाता
र्शसां।ननुर्शांसि सर्व्वाणि त्रिदो
षजानि।यत आह।पञ्चात्मा
मारुतः पित्तं कफो गुदवलि
त्रयं।सर्व्वएव प्रकुप्यन्ति गुद
जानां समुद्भव इति॥

तथा सति कथं वातार्शसा मिति
उच्यते।तत्रदोषाधिक्याद्व्यपदेशभे
द इति न दोषः।अत एव ग्रन्थे व
क्ष्यते।पित्तोल्वणाना मिति तथा
च चरकः।अर्शांसि नाम जायन्ते
नासंनिपतितै स्त्रिभिः।दोषै र्दो
षविशेषात्तु विशेषः कल्प्यते ऽ
र्शसा मिति॥ ॥अथ पित्तार्शसो
विप्रकृष्टनिदान माह।कट्वम्ल
लवणोष्णानि व्यायामाग्न्यातपप्र
भाः।देशकालावशिशिरौ क्रोधो
मद्य मसूयनं॥विदाहि तीक्ष्ण
मुष्णं यत् तत् सर्व्वं पान भोज
नं।पित्तोल्वणानां विज्ञेयः प्र
कोपहेतु रर्शसां॥उष्णद्रव्यस्प
र्शनादि वोद्धव्यं उष्णपान भो
जनस्यार्थे वक्ष्यमाणत्वात्।अ
ग्न्यातपप्रभा अग्न्यातपयोः प्र
भा तेजः।अथ वा अग्न्यातपे
तर तेजस्वि द्रव्यस्य दीप्तिः।
अशिशिरो देशो मरुः।असू
यनं परसम्पत्तिद्वेषः।पान
भोजनं पीयत इति पानं।
भुज्यते इति भोजनं। प्र
कोपे उत् पत्तौ॥ ॥
॥अथ कफार्शसो विप्रकृष्टं
निदान माह।मधुर स्निग्ध शी

तानि लवणाम्ल गुरूणि च।अव्या
याम दिवास्वप्न शय्यासनसुखे
रतिः॥प्राग्वातसेवा शीतौ च दे
शकालावचिन्तनं।श्लैष्मिकानां
समुद्दिष्ट मेतत् कारण मर्शसां
॥अचिन्तनं निश्चिन्तता॥ ॥अ
थ त्रिदोषार्शसो विप्रकृष्टं निदा
नमाह।सर्व्वोहेतु स्त्रिदोषाणां स
हजे लक्षणं समं।जनकत्वेन त्र
यो दोषा येषां तानि त्रिदोषा ऽ
र्शांसि तेषां सर्व्वो हेतुः।पृथक्
वात पित्त कफार्शोहेतुः।त्रिदोषा
र्शसां लक्षणञ्च सहजैः सहजा
र्शोभिः समं सदृशं।ननु त्रिदोषा
णां इति विशेषणं व्यर्थं।यतः
सर्व्व एव व्याधय स्त्रिदोषजाः उ
क्तञ्च।द्रव्यमेकरसं नास्ति न रो
गो ऽस्त्येकदोषजः।एकस्तु कुपि
तो दोष इतरावपि कोपयेत्॥इ
ति।युक्ति मप्याह।स्वकारणा
द्धतो वायुः शैत्याद्धीनत्वं
श्लेष्मणो लाघवात्तेजोरूपं पि
त्तं वर्द्धयते।तथा पित्तं कटुक
त्वात् वातं द्रवत्वात् कफं
वर्द्धयते।श्लेष्मा च शैत्याद्वा
युं द्रवत्वात् पित्तं वर्द्धयते इति
।उच्यते।यत्र स्वस्वकार

णात्रयो दोषाः कुप्यन्ति तत्र त्रि
दोषजव्यपदेश इति न दोषः॥
अथार्शसां पूर्वरूपमाह। विष्टम्भो
ऽन्नस्य दौर्बल्यं कुक्षे राटोप
एव च। कार्श्यमुद्गार बाहुल्यं
सक्थिसादो ऽल्पविट्कता॥ग्रह
णीदोष पाण्डुर्त्तेः प्रशङ्का चो
दरस्य च। पूर्वरूपाणि निर्दिष्टा
न्यर्शसामभिवृद्धये। दौर्बल्य
मावल्यं। आटोपः गुडुगुडाशब्दः
। अभिवृद्धयेऽत्पत्तये ॥ ॥अ
थार्शसां संप्राप्तिपूर्वकं सामान्य
लक्षणमाह। दोषास्त्वङ्मांस
मेदांसि संदूष्य विविधाकृतीन्।
मांसाङ्कुरानपानादौ कुर्वन्त्यर्शां
सि तान् जगुः॥त्वङ्मांसपदेन
त्वङ्मांसाश्रितं रक्तमपि गृह्यते
। चिकित्सायां रक्तस्रावणोपदे
शात्। अपानं गुदं। आदिशब्दा
त्रासा नेत्र नाभि मेढ्रादिष्वपि
कुर्वन्ति॥ ॥अथ वातार्शोल
क्षणमाह। गुदाङ्कुरा बह्वनिला
: शुष्काश्चिमिचिमान्विताः। म्ला
ना श्यावारुणास्तब्धा विशदाः
परुषाः खराः। मिथो विसदृशा
वक्राः तीक्ष्णा विस्फुटिताननाः
॥बिम्बी कर्कन्धु खर्जूर कार्पासीफ

लसन्निभाः। केचित् कदम्बपुष्पा
भाः केचित् सिद्धार्थकोपमाः॥शि
रः पार्श्वांस कट्यूरु वंक्षणाभ्य
धिकव्यथाः। क्षवथूद्गार विष्टम्भ
हृद्ग्रहारोचकप्रदाः॥कास श्वा
साग्निवैषम्य कर्णनादभ्रमावहाः
। तैरार्त्तो ग्रथितं स्तोकं सशब्दं
सप्रवाहिकं॥रुक्फेन पिच्छा
नुगतं विबद्ध मुपवेश्यते।कृष्ण
त्वङ् नख विण्मूत्र नेत्र वक्त्रश्च
जायते॥गुल्म प्लीहोदराष्ठीला
सम्भवस्तत एव च। बह्वनिलाः
वातोल्बणाः। चिमिचिमान्विताः
चिमिचिमा व्यथाविशेषः चम्च
राव इति लोके तदन्विताः। श्या
वारुणाः धूपावा धूम्रवर्णाः। अ
रुणाः ईषद्रक्ताः स्तब्धाः कठि
नाः। विशदाः अपिच्छिलाः। प
रुषाः गोजिह्वावत् स्पर्शे कर्क
शाः। खराः कर्कोटकफलवत्
सूक्ष्मानेककण्टकाचिताः। वि
म्ब्यादिफलसन्निभाः आकृत्या
। अत्र विकल्पबोधकं वल्प्रमा
णं केचित् केचिदिति पदं
सम्बन्धनीयं। कदम्बपुष्पाभाः
स्थूला अनेकसूक्ष्मशिखराः
। सिद्धार्थकोपमाः पीन

141

सूक्ष्मपिडकाश्रिताः। तैरार्त्त इ
ति अर्शोभिः पीडितः। तैरार्त्तो
विडुपवेश्यत इत्यन्वयः। ग्रथि
तकर्कशः कम्मितार्थितः। ग्रथि
तं मलगुटिकाग्रथितं विड्रू
रूपं। पिच्छा पिच्छिला द्रवभागं
। बद्धं संहतं। विप्रशब्दो नपुंस
केऽप्यस्ति। उपवेश्यते त्यज्यते
। तत एव वातार्शस एव गुल्मा
दीनां सम्भवः। अष्ठीला नाभे
रधोभागे पाषाणपिण्डिका
वद्दानव्याधिविशेषः॥ ॥
अथ पित्तार्शसां लक्षणमाह। पि
त्तोत्तरा नीलमुखा रक्तपीता
सितप्रभाः। तन्वस्रस्राविणो
विस्रास्तनवो मृदवः श्लथाः॥शु
कजिह्वा यकृत् खण्ड जलौ
कावक्त्रसन्निभाः। दाहपाक
ज्वर स्वेद तृषा मूर्छारुचिप्रदाः॥
सोष्माणो द्रव नीलोष्ण पीत र
क्ताम वर्चसः। यवमध्या हरित्पीत
हारिद्रत्वङ्नखादयः॥पित्तोत्तराः पि
त्तोल्बणाः। तनु अयतं। श्लथा ल
म्बिताः। सन्निभाः आकृत्या। पाको
गुदस्य। सोष्माणः उष्णस्पर्शाः। ह
रिद्धा कवर्णं। पीतं हरितालवर्णं
। हारिद्रं हरिद्रावर्णं। आदिशब्दा

न्मलमूत्र मुखानां ग्रहणं। अ
थ केचिद्रुधिरस्यापि दोषत्वं मन्य
न्ते तन्मते मात्रिन्य रक्तार्शोल
क्ष माह। रक्तोल्बणा गुदे कीलाः
पित्ताकृति समन्विताः। वटप्ररो
हसदृशा गुञ्जा विद्रुम सन्नि
भाः॥ते ऽत्यर्थं दुष्टमुष्णञ्च गा
ढ विट्क प्रपीडिताः। स्रवन्ति स
हसा रक्तं तस्य चाति प्रवृत्तितः
॥भेकाभः पीड्यते दुःखैः शोणि
तक्षय संभवैः। हीनवर्ण बलोत्
साहो हतौजाः कलुषेन्द्रियः॥
विट् श्यावं कठिनं रूक्ष मधो वा
युर्न वर्त्तते। तनु चारुणवर्णञ्च
फेणिलञ्चासृगर्शसां॥कट्यूरु
गुद शूलञ्च दौर्बल्यं यदि वाधि
कं। तत्रानुबन्धो वातस्य हेतुर्य
दि च रूक्षणं॥शिथिलं श्वेत पी
तञ्च विट् स्निग्धं गुरु शीतलं।
यद्यर्शसां घनञ्चासृक् तन्तुम
त् पाण्डु पिच्छिलं॥गुदं सपि
च्छं स्तिमितं गुरु स्निग्धञ्च
कारणं। श्लेष्मानुबन्धो विज्ञेय
स्तत्र रक्तार्शसां बुधैः॥गुदे की
ला अर्शांसि। पित्ताकृति सम
न्विताः पित्तार्शोलक्षणयुक्ताः
। आकारेण च वटप्ररो

हादि सदृशाः।ङःखे रोगः।नक
पारुषाम्बु शीत प्रार्थनादिभिः।
कलुषेन्द्रियः व्याकुलसर्वेन्द्रियः
॥रक्तजस्यापि वातोल्बणस्य ल
क्षण माह।तत्र रक्तार्शसि।अनुव
न्यः उल्बणत्वं।वृत्तणं वृत्तयती
ति वृत्तणं वृत्तं द्रव्यं।पित्तोल्बण
स्य तु लक्षणं।रक्तोल्बणा गुदे
कीलाः पित्ताकृति समन्विताः।
इत्यादिनैवोक्तं।रक्तपित्तयोः स
मानलिङ्गत्वात्॥कफोल्बणस्य
लक्षण माह।सपिच्छं पिच्छिलादं
।स्तिमित मार्द्रचर्मीव गुणिढतामि
व॥अथ श्लेष्मार्शोलक्षण माह
।श्लेष्मोल्बणा महामूला घना
मन्दरुजः सिताः।उत्सन्नोपचिताः
स्निग्धाः स्तब्धवृत्त गुरुस्थिराः।
पिच्छिलाः स्तिमिताः श्लक्ष्णाः
कण्ड्वाढ्याः स्पर्शनप्रियाः।करीर
पनसास्थ्याभा स्तथा गोस्तनस
न्निभाः।वङ्क्षणानाहिनः पायु
वस्ति नाभि विकर्षिणः।सका
सश्वास हृल्लास प्रसेका रुचि पी
नसाः।मेह कृच्छ्र शिरोजाड्य
शिशिरज्वरकारिणः।क्लैब्याग्नि
मार्दव च्छर्दि रामप्रायविकार
दाः।वसाभ सकफ प्राज्य

पुरीषाः सप्रवाहिकाः।न स्रव
न्ति भिद्यन्ते पाण्डु स्निग्ध त्वगाद
यः।उत्सन्नाः उन्नताः।उपचिताः
स्थूलाः।स्निग्धाः सस्नेहाः।स्थिरो
निश्चलाः।पिच्छिला कफावृतत्वात
।स्तिमिताः आर्द्रवस्त्रगुणिढताइ
वा।श्लक्ष्णा मसृणाः।करी
रो वंशाङ्कुरः।पनसास्थि गोस्त
नाः तदाकृतयः।वङ्क्षणाहिनः
वङ्क्षणयो रानाहकारिणः।पाय्वा
दिषाकर्षणवत्पीडाकारिणः।कृ
च्छ्रे मूत्रकृच्छ्रे।शिरोजाड्यं शिरसो
भाराक्रान्तत्वमिव।क्लैब्यं स्त्रीष
निच्छा।अत्र छर्दिशब्दः सान्त।
आर्षत्वात्।आमप्रायविकारदाः
आमबहुला व्याधयो ऽतीसार
ग्रहण्यादयः तान् ददाति॥ ॥
अथ द्वन्द्वजार्शोलक्षण माह॥
हेतुलक्षण संसर्गाद्विद्यात् द्व
न्द्वोल्बणानि च॥अत्र त्रिदोषा
र्शसः सहजार्शसश्च लक्षण मा
ह।सर्वैः सर्वात्मकान्याहुः लक्ष
णैः सहजानि च।सर्वैः लक्षणै र्वा
तपित्त श्लेष्मार्शोलक्षणैः प्रागुक्तैः
।सर्वात्मकानि सान्निपातिकान्य
र्शांस्याहुः।तथा तै रेव लक्षणैः
सहजानि चार्शांस्याहुः॥ ॥ ॥

तत्रान्तरे सहजार्शोलक्षणं ह्य
गाह।अर्शांसि सहजातानि दा
रुणानि भवन्ति हि।दुर्दर्शनानि
पाण्डूनि परुषाण्यरुणानि च।अ
न्तर्मुखानि तै रार्तः क्षीणः क्षीण
स्वरो भवेत्।क्षीणानलः क्षीण
रेताः शिरासन्ततविग्रहः॥अस्व
पूजः क्रोधशीलः सन्तानाल्प स
न्वितः।शिरो हृत्कर्णी नामास्व
रोगी हृल्लेप सेकवान्॥अथ
सुखसाध्यार्शोलक्ष माह।बा
ह्यायान्तु वलौ जातान्येकदोषो
ल्बणानि च।अर्शांसि सुखसा
ध्यानि न चिरोत्पतितानि च॥
बाह्यायां वलौ सम्वरण्यां।न चि
रोत्पतितानि अनतिक्रान्त सम्व
त्सराणि।एतानि लक्षणानि मि
लितानि सुखसाध्यत्व बोधका
नि।अथ कष्टसाध्यार्शोलक्षण
माह।द्वन्द्वजानि द्वितीयायां व
लौ यान्याश्रितानि च।कृच्छ्र
साध्यानि तान्याहुः परिसम्वत्स
राणि च।द्वितीयायां वलौ विस
र्जन्यां।परिसम्वत्सराणि परिग
तः सम्वत्सरो येषां तानि।अति
क्रान्तसम्वत्सराणि इति या
वत्।एतानि प्रत्येक कष्ट

साध्यलक्षणानि॥ ॥अथासा
ध्यार्शोलक्षण माह।सहजानि
त्रिदोषाणि यानि चाभ्यन्तरां व
लिं।जायन्ते ऽर्शांसि संश्रित्य ता
न्यसाध्यानि निर्दिशेत्॥आभ्य
न्तरां वलिं प्रवाहिनीं।एतान्यपि
प्रत्येक मसाध्यलक्षणानि।शे
षत्वादायुष स्तानि चतुष्पादस
मन्वये।याप्यन्ते दीप्तकायाग्नेः
प्रत्याख्येयान्यतोन्यथा॥याप्या।
युषः शेषे वर्तते चिकित्साया
श्चत्वारः पादा स्ते यथा।वैद्यश्च
नकारी धनवान्दाता जितेन्द्रियो
रोगी।१।शास्त्रे कर्मणि च कुश
लो वैद्यः।२।अनलस आप्तः
प्रियः परिचारकः।३।नवं रसवी
र्यादियुक्तं मौषधं।४।एषां सम
न्वये संयोगे सति दीप्तकायाग्नेः
पुरुषस्य।तानि अर्शांसि।याप्य
न्ते चिकित्सया।अतोन्यथा प्रत्या
ख्येयानि न चिकित्स्यानीत्यर्थः
॥ ॥अथार्शसो ऽरिष्ट माह।
हस्ते पादे मुखे नाभ्यां गुदे वृ
षणयो स्तथा।शोथो हृत्
पार्श्वशूलञ्च यस्यासाध्यो ऽर्श
सो हि सः॥असाध्यः सन्निहि
तमरणो बोद्धव्यः।अर्शसः

अर्शोरोगयुक्तः।एतल्लिङ्गित
मरिष्ट लक्षणं।हन्त पार्श्वशूलं सं
मोह छर्दि रुजस्य तृषा ज्वरः।त
स्मा गुदास्यपाकश्च निहन्तु गुद
जान्तरं॥गुदस्य यदास्य मोष्ठ दे
शस्तस्य पाकः।हन्त पार्श्वशूला
दि समस्तं अस्तं चारिष्टलक्षण
।तस्यारोचक शूलार्त्त मतिप्रस्नुत
शोणितं।शोकातीसारसंयुक्त म
र्शांसि क्षपयन्ति हि॥ ॥अथ मे
ढ्रादिजार्शो लक्षणं माह।मेढ्रा
दिष्वपि वक्ष्यन्ते यथास्वं नाभि
जानि चागण्डुपदास्यरूपाणि
पिच्छिलानि मृदूनि च॥यथा
स्वं यथात्मीयलक्षणं।न चात्रो
क्त निदान पूर्वरूप संप्राप्ति लक्ष
णयुक्तं।तत्र तत्रार्शः पदं व मांसा
ङ्कुरस्तात्पर्यात्।गण्डूपदः किञ्चु
लकः॥अत्र मांसाङ्कुरस्तात्पर्यात्स्त्री
विकारे चर्मकीलस्य संप्राप्ति
पूर्वकं लक्षणमाह।व्यानो गृही
त्वा श्लेष्माणं करोत्यर्शस्त्वचो ब
हिः।कीलोपमं स्थिरं खरं च्चर्म
कीलन्तु तद्विदुः॥चर्म्मी इति लोके
प्रवरं कर्कशं॥ ॥तस्यैव वाता
दिभेदेन लक्षणमाह।वातेन
तोद पारुष्यं पित्तादसित

रक्तता।श्लेष्मणा स्निग्धता तस्य
ग्रथितत्वं सवर्णता।सवर्णता शरी
रसमानवर्णता॥ ॥अथ सामान्य
तो अर्शसि चिकित्सा।यद्वायो
रानुलोम्याय यदग्नि बलवृद्धये
।अन्नपानौषधं सर्वं तत्सेव्यं
नित्य मर्शसैः।अर्शसैः अर्शोरो
गयुक्तैः॥शालि षष्टिक गोधूम
यवाग्रानि घृतैः सह।अजाक्षी
रेण वा निम्ब पटोलानां रसेन
वा॥कन्दैश्चोत्तीक्ष्ण मूलोत्थैः रसै
र्मांसरसैः न वा।जीवन्तुपोदिका
शाके स्तण्डुलीयक वास्तुकैः॥
कन्दो ऽत्र सूरणः।अत्र मूलं मू
लकं।अन्येश्च सृष्टविण्मूत्र म
रुद्भि र्वह्निदीपनैः।अर्शांसि भि
न्नवर्चांसि हन्याद्वातानिसारव
त्॥घातकं लवणं दद्याद्वातव
र्च्चो ऽनुलोमनं।न प्ररोहन्ति गुद
जाः पुन स्तक्रसमाहताः॥त
क्राभ्यासोर्शसैः कार्य्यो बल
वर्णाग्नि वृद्धये।स्नेहनः स तक्र
स्तु हेय सम्यक् चलति यद्रसः
तेन पुष्टि स्तथा तुष्टि र्बलं
वर्णश्च जायते।वातश्लेष्म
विकाराणां शतञ्च विनिवर्त्त
येत्।स्त्रीलिङ्गं प्रोयतं कन्द

पक्काग्नौ पुट पाकवत्।अथात्
सतैल लवणं दुर्न्नामविनिवर्त्तये॥
२॥चित्रिविल्वाग्नि सिन्धूत्थ नागरे
द्विखवारत्त्र।तक्रेण पिबतो ऽ
र्शांसि निपतन्त्यसृजा सह॥चिरि
विल्वः करञ्जः तस्य फलस्यात्र
मज्जा ग्राह्यः।अस्त्वः शोणकः
।करञ्जादिचूर्णं॥३॥लेपं रज
निचूर्णेन स्नुद्याडुग्धयुतेन चात्र
र्शोरोगनिवृत्त्यर्थं कारयेत्तद्वि
चिक्षकः॥४॥पिप्पली सैन्धवं
कुष्ठं शिरीषस्य फलं तथा।स्नुक्
दुग्ध मर्कदुग्धं वा लेपो ऽयं गुद
जान् हरेत्॥५॥हरिद्रा जालि
नी चूर्णं कटुतैलसमन्वितं।एष
लेपो वरः प्रोक्तो ह्यर्शसा मन्त्र
कारकः॥जालिनी कडु तरइ
इतिलोके॥६॥असितानां ति
लानान्तु पलं शीतजलेन तु।
खादतो ऽर्शांसि शाम्यन्ति दृढा द
न्ता भवन्ति हि॥७॥शस्त्रे शोय ज
लौकाभिः प्रोच्छून कठिनार्शसः
।शोणितं सञ्चितं दृष्ट्वा हरेत्
प्रातः पुनः पुनः॥८॥कासीसं
सैन्धवं कृत्स्ना शुण्ठी कुष्ठञ्च ला
ङ्गली।शिलाभिदश्मारश्च दन्ती
जन्तुघ्न चित्रकं।तालकं कनटी

स्वर्णक्षीरी चैतैः पचेद्भिषक्।
तैलं स्नुह्यर्कपयसा गवां मूत्रे च
तद्गुणं।एतदभ्यङ्गतो ऽर्शांसि
क्षारेणैव पतन्ति हि।क्षारकर्म
करं ह्येतन्न च संदूषयेद्वलिं॥का
सीसं कासीस इतिलोके।ला
ङ्गली करहारी इतिलोके।शि
लाभित् पाषाणभेदः।अश्वमा
रः कनैल इतिलोके।स्वर्णक्षी
री चोक इतिलोके।दृह्यका
सीसाद्यतैलं॥९॥शुण्ठी कणा
मरिच नाग दल त्वगेलं चूर्णी
कृतं क्रमविवर्द्धित मूर्द्ध मन्त्या
त्॥खादेदिदं समन्वितं गुद
जाग्निमान्द्य गुल्मारुचि श्वसन
कण्ठ हृदामयेषु॥तद्यथा।एला
त्र सूक्ष्मा ग्राह्या।यत आह मद
नपालः।एला सूक्ष्मा कफ श्वास
कासार्शो मूत्रकृच्छ्रहृदित्यादि।त
स्या बीजभागः १ तजभागः २
दलं पत्रं।यत आह निघण्टौ ध
न्वन्तरिः।तमालपत्रकं पत्रं स्या
त् पलाशं दलाह्वय मिति तस्य
भागः।३।नागो नागकेशरं।य
त आह निघण्टौ धन्वन्तरिः।ना
गपुष्पं मतं नागं केशरं नागके
शर मित्यादि।तस्य भागः

४ मरीचभागः ५ पिप्पलीभागः
६ शुण्ठीभागः ७ चित्रभागः २४
समशर्करं चूर्णं॥१०॥त्रिफले श्रृङ्ग
वेरस्य चतुष्क मरिचस्य च। पिप्प
ल्याः कुडवार्द्धञ्च चव्यायाः पल
मेव च॥तालीशपत्रस्य पलं प
लार्द्धं केशरस्य च। द्विपलं पिप्प
लीमूलं मर्द्धकर्षञ्च पत्रकात्॥
सूक्ष्मैलाकर्ष मेकन्त कर्षञ्च न
द. मृणालयोः॥गुडात् पलानि त्रिं
शच्च चूर्णमेकत्र कारयेत्॥अत
प्रमाणागुटिका प्राणदा चेति सा
स्मृता॥श्वेत भक्तञ्च पश्चाच्च भो
जनस्य यथावलं॥मद्यं मांसरसे
यूषं त्वारनालं पिबेदनु॥हन्याद
र्शांसि सर्वाणि सहजान्यस्रजा
नि च॥वात पित्त कफोत्थानि
सन्निपातोद्भवानि च॥पानात्या
मूत्रकृच्छ्रे उरोरोगे गलग्रहे॥वि
षमज्वरे पित्ते च पाण्डुरोगे त
थैव च॥कृमि हृद्रोगिणाञ्चैव
गुल्मशूलार्त्तिनां तथा॥वक्ष्ये
नीसारोगिणां कामला हिक्कि
नां तथा॥शुण्ठीस्थाने ऽभया
देया हृद्वृद्धे पित्तजे गदे॥प्राण
देयं मिता दत्ता गुडमानाच्च त
गुणा॥अस्रपित्ताग्निमान्द्यारो

प्रयोज्या गुडजा नरे॥अनुपा
ने प्रयोक्तव्या व्याधौ श्लेष्मभ
वे पलं॥पलद्वयं त्वनिलजे पि
त्तजे तु पलत्रयं॥फलाम्ल था
न्याम्लरसास्य शान्ता मद्यं मरु
द्रोगिणि चानुपाने॥तक्रो रसो
त्तार हिमाम्बु पित्ते उष्णाम्बु यूषे
कफजे विदध्यात्॥गण्डूषमात्र
मादेयं मृदौ क्रूरे च पञ्च वा॥
अनुपाने प्रयोक्तव्यं देशकाल
मवेक्ष्य वा॥इति प्राणदा गुटि
का॥१०॥त्रिकत्रयं वचा हिङ्गु. पा
ठा क्षारौ निशाद्वयं। चव्य तिक्ता
कलिङ्गानि शताह्वा लवणा
नि च॥ग्रन्थि बिल्वाजमोदा च
गणो ऽष्टाविंशति स्मृतः॥एतानि
समभागानि सूक्ष्मचूर्णानि का
रयेत्॥चूर्णं विडालपदकं पिबे
दुष्णेन वारिणा॥एरण्डतैलयुक्तं
वा लिह्याच्चूर्णमिदं नरः॥ह
न्यादर्शांसि सर्वाणि श्वास शोषभ
गन्दरान्॥हृच्छूले पार्श्वशूलञ्च
वात गुल्मं तथोदरं॥हिक्कां कासं
प्रमेहाश्च पाण्डुरोगं सकामलं
।आमवात मुदावर्त्तं मन्त्रवृद्धिं
गुदक्रमीन्॥अन्ये च ग्रहणीदो
षा विषमस्थ ये प्रकीर्त्तिताः॥विज

यो नाम चूर्णो ऽयं तान् सर्वान्
शु नाशयेत्॥महाज्वरोपसृष्टा
नां भूतोपहतचेतसां॥अप्रजा
नाञ्च नारीणां हितमेतद्धिमे
षजं॥त्रिकत्रयं त्रिफला त्रिक
टु त्रिसुगन्धीनि॥क्षारौ स्वर्जि
का यवक्षारश्च॥लवणानि पञ्च
॥ग्रन्थिः पिप्पलीमूलं॥विडालपद
कं कर्षं॥विजयचूर्णं॥११॥मरिच
महौषध चित्रक सूरणभागा य
थोत्तरं द्विगुणाः॥सर्वसमो गुड
भागः सेव्यो ऽयं मोदकः प्रसि
द्धफलः॥ज्वलनं ज्वलयति जा
ठर मुन्मूलयति शूल गुल्म गदा
न्॥निःशेषयति श्लीपद मर्शांसि
विनाशयत्याशु॥तद्यथा॥मरिच
भागः १ शुण्ठीभागः २ चित्रभागः
४ सूरणभागः ८ गुडभागः १५।
लघुसूरणमोदकः॥१२॥षोडश
सूरणतो ऽंशा वह्ने रष्टौ महौष
धस्याथ॥अर्द्धेन भागयुक्ता मरि
चस्य ततो ऽपि चार्द्धेन॥त्रिफला
कणा समूला तालीशारुष्करक
मिघ्नानां॥भागा महौषधसमा द
हनांशा तालमूली च॥भागाः सूर
णतुल्या दातव्या वृद्धदारकस्या
पि॥भृङ्गेले मरिचांशे सर्वा

ण्येकत्र कारयेत् चूर्णं॥द्विगु
णेन गुडेन पुनः सेव्या ऽयं मो
दकः प्रकामथनैः॥गुरुः हृष्य
भोज्य निरते निरेश्वपद्वं कु
र्यात्॥भस्मक मेनेन जनितं
पूर्व्वमगस्त्यस्य योगराजेन॥भी
मस्य मारुतेरपि महाशनो येन
तो जातौ॥अग्निबलमात्रहेतु ने
केवलं सूरणो महावीर्य्यः॥हृ
ल्लाशस्तु तारानेले विनाप्यशेषा
मेषः॥श्वयथु श्लीपदगदहृद्रह
णीञ्च कफानिलोद्भूतां॥नाशय
ति वलीपलितं मेधां कुरुते ज
रां हरते॥हिक्कां कासं श्वासं
सराजरोगान् प्रमेहांश्च॥प्लीहा
नञ्च तथोग्रं हन्यादाशु रसाय
नं पुंसां॥एषां भागो यथा॥सू
रणभागः १६ चित्रभागः ८
सोंठिभागः ४ मरिचभागः २।
हरेरे वहेरा अवरा॥पीपर पि
परामूल॥तालीशं तालीश प
त्रं॥अरुष्करं भल्लातकं॥तदस
ह्लाने रक्तचन्दनं॥विडङ्गं प्र
त्येकं भागः ४ तालमूली मूष
ली तस्याभागः ८ विधारभागः
१६ नज्ञभागः २ एलाहेच को
टीबीजभागः २ गुडभागः ४।

१२।हरस्त्वरणो मोदकः॥२३॥
त्रिहस्तेजोवती दन्ती श्वदंष्ट्रा चि
त्रकं शटी।गवाक्षी सुस्त बिल्वा
द्र विडङ्ग हरीतकी॥पलो
न्मितानि चैतानि पलान्यष्टाव
रुस्करात्।हृद्दारात् पलान्य
ष्टौ सूरणस्य तु षोडश॥जल
द्रोणद्वये क्वाथ्य चतुर्भागाव
शेषितं।शृतं तु तं रसं भूयः क्वा
थेभ्यः त्रिगुणं गुडं।लेह्य पचे
त् पुन स्तावद्यावद्दर्वीप्रलेपनं
।अवतार्य ततः पश्चात् चूर्णी
नीमानि दापयेत्॥त्रिहस्तेजोव
ती कन्द चित्रकान् द्विपलांशि
कान्।एला त्वङ्मरिचं चापि
नागाह्वं चापि षट्पलं॥द्वात्रिं
शश्च पलान्यत्र चूर्णयित्वा नि
यापयेत्।ततो मात्रां प्रयुञ्जी
त जीर्णे क्षीररसाशिनः॥तेजो
वती तेजवती तेजवल्कल इति
चाकन्दः सूरणः॥हन्यादर्शां
सि सर्वाणि तथा सर्वो दराणि
पि।गुल्मानपि प्रमेहांश्च पाण्डुरो
गं हलीमकं॥दीपयेदनलं मंद
यक्ष्माणं चापकर्षति।आद्यश्वा
ते प्रतिश्याये पीनसे ऽयं हितो म
तः॥भगवान्येन पुरुषाः शतं

वर्षाण्यनामयाः।दीर्घायुषः प्रज
नना वलीपलितवर्जिताः।गुडःश्री
बाहुशालो ऽयं रसायनवरो मतः
।उन्नोमात्तकरो ह्येष दृष्टो वार
सहस्रशः॥यावद्दर्वीप्रलेपः
स्याद्यावद्धा तथाङ्गुली भवेत्।तो
यपूर्णे यदा पात्रे क्षिप्तो न प्लव
ते गुडः॥क्षिप्तस्तु निश्चलस्तिष्ठे
त् पतितस्तु नशीर्यते।एवंपा
कः समस्तानां गुडानां परिकी
र्तितः॥सार्द्धे पले पलञ्चार्द्धे भक्त
येद्गुडखण्डयोः।श्रेष्ठा तु मध्यम
हीना मात्रोक्ता मुनिभिस्त्रिधा॥
बाहुशालो गुडः॥२४॥तिला भ
ल्लातकं पथ्या गुडस्त्वेति समांश
कं।उन्मोमि श्वास कासघ्नं प्लीह
पाण्डु ज्वरापहं॥पित्त श्लेष्मशम॥
मनी कच्छू दद्रु रुजापहा।गुदजा
न्नाशयत्याशु भक्षिता सगुडाभया
॥२५॥प्रणम्य शङ्करं रुद्रं दण्ड
पाणिं महेश्वरं।जीवितारोग्य म
निच्छन्नारदो ऽपृच्छदीश्वरं॥
स्वदोषायेन हेनाथ शास्त्रता।
राशिभिः हिंता।चिकित्सा मर्श
सां नृणां कारण्याद्वक्तु महेश
॥नारदस्य वचः श्रुत्वा नरा
णां हितकाम्यया।अर्शसां

नाशनं श्रेष्ठं भैषज्यं शङ्करो ऽ
वदत्॥पाण्डु वन्नादि लोहानां
मादायान्यतमं शुभं।कृत्वा निर्म
ल मादौ तु ऊनद्यो माक्षिकेण
वा॥पञ्चमूल कल्केन लिम्पेद्
मधुतेन वाऊनदी मनःशिला।
माक्षिकं स्वर्णमाक्षिकं।पत्ररं
ङ्कम इति लोके।शालिञ्चा इ
ति रसेन्द्रचिन्तामणौ।रसः पारदः
॥वह्नौ निःक्षिप्य विधिवत् सारा
ङ्गारेण निर्दमेत्।ज्वाला च तस्य
रोद्धव्या त्रिफलाया रसेन वा॥सा
रः काष्ठसारः।शालाङ्गारेण इ
ति रसेन्द्रचिन्तामणौ पादः॥त
तो विज्ञाय गलितं शङ्कुनोद्धृत्य स
मुत्क्षिपेत्।त्रिफलाया रसे शृते
तदाकृष्य तु निर्वापेत्॥न स
म्यग् गलितं यत्र तेनैव वि
धिना पुनः।ध्मातं निर्वापयेत्त
स्मिन् लोहं तत्त्रिफलारसे॥य
ल्लोहं न मृतं तत्र पाच्यं भेषा
ऽपि हर्षवत्।मारणान्नमृतं य
त्तु तत्पक्तव्य मलोहवत्॥ततः
संशोध्य विधिवत् चूर्णयेल्लोह
भाजने।लोहेनैव तथा वत्स द
षदा सूक्ष्मचूर्णितं॥कृत्वा लोह
मये पात्रे माहें वा लिमरडके

।रसैः पञ्चोपमं कृत्वा ते पचे
ञ्चोमयाग्निना॥पुटानि क्रमशो
दद्यात् पृथगेवं विधानतः।
त्रिफलार्द्धक भृङ्गाणां केशरा
जस्य बुद्धिमान्॥माणकन्दक
भल्लात वह्नीनां सूरणस्य चार्द्र
स्विकर्णपलाशस्य कुलिशस्य
तैथैव च॥भृङ्ग भङ्गरिया।केशरा
जः केशराज इति हि॥कुलिशं
स्नुहीक्षीरं।पुटे पुटे चूर्णयित्वा
लोहात् षोडशिकं पलं।तस्मा
त् त्रिफलायाश्च पलेनाधिक
माहरेत्॥अष्टभागावशिष्टे तु
रसे तस्माः पचेद्बुधः।अष्टौ प
लानि दत्वा च सर्पिषो लोहभा
जने॥ताम्रे वा लोहदर्व्या तु
चालयेद्विधिसहितं।ततः पा
कविधानज्ञः सन्धे चार्द्धे च सर्पि
षि॥मृदु मध्यादि भेदेन गृह्णी
यात् पाकमाज्यतः।आरम्भे वि
धानज्ञः कृतकौतुकमङ्गलः॥
भास्करं पूजसंयुक्तं विलिख्याकृति
का क्रमात्।वर्द्धमानानुपानञ्च ग
व्यक्षीरेण संयुतं॥गव्याभावे तु
जायाश्च स्निग्ध दुग्धादिभोजनं
।सद्यो वह्निकरं ह्येव भस्मकं
च नियच्छति॥हन्ति वातं तथा

पित्तं कुष्ठानि विविधं ज्वरं। गुल्
मादि पाण्डुरोगांश्च निखिलस्य
मरोचकं॥ शूलञ्च परिणामञ्च
प्रमेह मववाहुकं। श्वयथुं रुधिर
स्रावं दुर्न्नामानं विशेषतः॥ बल
कुङ्कुमपाण्ड्येव कान्तिदं स्वरवर्द्धे
नं। शरीरलाघवकर मारोग्य पु
ष्टिवर्द्धनं॥ आयुष्यं श्रीकर ञ्चै
व वयस्तम्भकरं शुभं। सश्रीक
पुत्रजननं वलीपलितनाशनं॥
दुर्न्नामारि रयं नाम्ना दृष्टो वा र
सहस्रशः। अनेनार्शांसि दह्य
न्ते यथा तूलञ्च वह्निना॥ सो
ऽश्मार्थीस्यकापत्यान्मद्यसेवी
यथा नरः। जीर्णमद्यादि शुक्तादि
भोजनैः सह दापयेत्॥ रसेन्द्रचि
न्तामणौ यथास्थाने यदा तती
य चरणस्थाने जीर्णे मद्ये प्रये।
क्ष्य क्षिति पाव॥ लाव तित्तिर
वर्त्तीर मयूर शशकादयः। चट
कः कलविङ्कश्च वर्त्तका हरि
तालकः॥ श्येनकश्च हहलावो
वनविष्किरकादयः। पारावत
मृगादीनां मांसं जाङ्गलकं
शुभं॥ वर्त्तीरः वगेरा इति लो
के। चटको वन्यचटकः। क
लविङ्को गृहचटकः। वर्त्तका व

टङ्क इति लोके। हरितालकः हरि
ताल इति लोके। विष्किरा वर्त्तका
दयः। मद्गुरो रोहितः श्रेष्ठः शृङ्ग
लश्च विशेषतः। मत्स्यराजा इमे
प्रोक्ता हितमत्स्याय देहिने॥ ह
न्नाकस्य फलं शस्तं पटोलं हर
तीफलं। प्रलेवानीरु वेत्राग्रं ना
लकस्तण्डुलीयकं॥ प्रलम्बा ल
म्बालावुः। अभीरुः शतावर्य्याः
पत्रशाकं। नालकः देवदाली।
तथा च निघण्टौ धन्वन्तरिः। जी
मूतको देवताडो हन्नकोषा गरा
गरी। प्रोक्ता खुविषहृद्वेणी देवा
दाली च ताडकः॥ देवदाली से
तिका कफार्शः शोथ पाण्डुताः
नाशयेदित्यादि। वास्तुकं धान्य
शाकञ्च केमुकं चक्रवर्त्तिना। च
क्रवर्त्तिनं चकवत शाकं। नारिके
लञ्च खर्ज्जूरं दाडिमं लवलीफ
लं। शृङ्गाटकञ्च पक्वाम्रं द्राक्षा
तालफलानि च। जातीकोशं
लवङ्गञ्च शुण्ठं नाम्बूल पत्रकं॥
हितान्येतानि वस्तूनि लोह
मेतत्समश्नतां। नाश्नीयात्कू
ष्माण्डं कोलं कर्क्कन्धु वदराणि
वाजश्वीरं वीजपूरञ्च तिन्ति
डी करमर्द्दकं॥ कोलं

स्त्वद्रवदरं। कर्क्कन्धु वदराणि म
हान्ति। आनूपानि च मांसानि
ककरं पुण्डकानपि। हंस सारस
दात्यूह शङ्ख कङ्क वलाकि
काः॥ माणकन्द करीराणि कत
कञ्च कलिङ्गकं। कूष्माण्डकञ्च
कर्क्कोटं केमुकञ्च विशेषतः॥
कटुकं कालशाकञ्च कशेरुं क
र्क्कटी तथा। ककारादीनि सर्व्वा
णि द्विदलानि च वर्ज्जयेत्॥ शङ्क
रेण समाख्यातं चूर्णराजो ऽनुक
म्पया। जगता मुपकाराय दुर्न्ना
मारि रयं ध्रुवं॥ स्थानादपैति मे
रुश्च पृथ्वी पर्य्येति वायुना। पत
न्ति चन्द्रताराश्च मिथ्या चेदह
मध्रुवं॥ ब्रह्मघ्नाश्च कृतघ्नाश्च
क्रूरा ये ऽसत्यवादिनः। वर्ज्जनी
याः स्वयत्नेन भिषजा गुरुनि
न्दकाः॥ सुनिरसपिष्टविडङ्ग सु
निरसलीढं चिरंस्थितं चर्म्मे।
द्रावयति लोहदोषान् वह्नि र्न्न
वनीतपिण्ड मिव॥ सुनि रश्वाग
स्तिः॥ कोले मलप्रवृत्ति लाघव
मुदरे विशुद्धि रुद्गारो। अङ्गेषु ना
वसादो मनः प्रसादो ऽस्य परि
पाके॥ कृमिरिपुचूर्णं लीढं सहि
तं लवसेन वङ्गसेनस्य। त्रपय

त्यचिरात्रिभयं लोहाजीर्णोद्भवं
शूलं॥ वङ्गसेनस्य अगस्त्येः॥ जी
र्णे लोहे पतति चूर्णं भुञ्जीत
सिद्धसाराख्यं। लोहव्यापन्नस्य।
नि विवर्द्धते जाठरो वह्निः॥ न
घयां। पथ्या सैन्धव सुण्ठी माग
धिकानां पृथक् समो भागः। त्रि
वृतो भागो निम्बभागं तत् सि
द्धसाराख्यं॥ भवेद्यत्निसारस्तु
डूम्बं पीत्वा रुजं जयेत्॥ शुञ्जा
द्वादशकाहहे ह्रहि रस भयप्र
दा॥ शङ्करप्रणीतं लोहं। इति सा
मान्यक्रिया॥२६॥ अथ रक्तार्शसां
चिकित्सा। रक्तार्शसा मुपेक्षेत
रक्तमादौ स्रवद्भिषक्। दुष्टास्र
निग्रहीते स्युः शूलानाहास्र
गामयाः॥ चन्दन किरातनिक्त
क धन्व यवासाः सनागराः क्वथि
ताः॥ रक्तार्शसां प्रशमना दार्वी
त्व गुशीर निम्बा वा॥ चन्दन मत्र
रक्तचन्दनं। चन्दनादि क्वाथः॥२१॥
नवनीत तिलाभ्यासात् २ केस
र नवनीत शर्कराभ्यासात् ३।
दधिसर मथिताभ्यासात् ४ गुद
जाः शाम्यन्ति रक्तावहाः॥ दध्न
स्त्रपरि यो भागो घनः स्नेहयुतः
सरः। मथितं सररहितं निर्जलं

वस्त्रपूतं दधि॥सपत्रके सरं तो
द्रं नवनीतं नवं लिहन्।सिता
केशरसंयुक्तं रक्तार्शसः सुखी
भवेत्॥५॥पयसा शृतेन श
षेः सती न मुद्गाढकी मसूरा
णां।उदन मद्यादस्ते मधुरै
रीषत् सुगन्धैश्च॥६॥समङ्गो
त् पल मोचाह्व तिरीट तिल
चन्दनैः।सिद्धं छागीपयो र
क्तार्शुरुजे शोणितात्मके॥
समङ्गा लज्जालुः।मोचाह्वो मो
चरसः।तिरीटो लोध्रः।चन्दन
मत्र रक्तं।समङ्गादिदुग्धं॥७॥
भावितं रजनीचूर्णं स्नुहीक्षीरैः
पुनः पुनः।बन्धनात् सुदृढं
सूत्रं छिनत्यर्शो भगन्दरं॥त्ता
रसूत्रं॥८॥नासा नाभि समुत्थे
षु तथा मेढ्रादिजेष्वपि।क्रि
यामर्शःसु कुर्वीत तत्र तत्र
यथोदितां॥चर्मकीलन्तु सं
छिद्य दहेत् क्षारेण चाग्निना।
वेगावरोध स्त्री पृष्ठयानान्युत्
कटकासनं॥यथास्वं दोषल
ञ्चान्नमर्शसः परिवर्जयेत्।
इत्यर्शो ऽधिकारः॥ ॥
इति भावप्रकाशः॥
अर्ह योग्यत्वे ॥ पूजने

अर्हति विप्रो वेदं पठितुं।सक
लैकोपि।यत्र दान तपो स्य
स्य कलां नार्हन्ति षोडशीं।
इति दुर्गादासः॥
अर्ह क पूजने।क अर्हयति।
इति दुर्गादासः॥
अल म वारण पर्य्याप्ति भूष
णे।म अलति अलते पापं
गङ्गा निवारयतीत्यर्थः।पर्य्या
प्तिः सामर्थ्यं।पर्य्याप्तन्तु यथे
ष्टं स्यात् तत्र शक्ते निवारणे
।इति विश्वप्रकाशात्।
अलति घोटको धावितुं सम
र्थः स्यादित्यर्थः।अलति हारो
जनं भूषयति इत्यर्थः।इति
दुर्गादासः॥
अलक्तः पुं लाक्षा।तत् पर्य्यायः
।अरक्तः ५इत्यमरटीका भर
तः॥जतुकं ६ यावकः १०
अलक्तकः ११ रक्तः १२।इति श
ब्दरत्नावली॥पलङ्कषा ७
कृमिः १४ वरवर्णिनी १५।इति
जटाधरः॥तस्यगुणादिः।लाक्षा
पलङ्कषा लक्तो यावो द्रुतामयो जतु।लाक्षा वर्ण्या हिमा ब
ल्या स्निग्धा च तुवरा लघुः।अनु
ष्णा कफ पित्तास्र हिक्का कास

ज्वरप्रणुत्।व्रणोरःक्षत वीसर्प
कृमि कुष्ठगदापहा॥अलक्तको
गुणौ स्तद्वद्विशेषाद्व्यङ्ग नाशनः।
इति भावप्रकाशः॥
अलङ्कारः पुं आभरणं।तत् प
र्य्यायः।अलङ्क्रिया ६ भूषा ७
अलङ्करणं ८ भूषणं ९।इति
शब्दरत्नावली॥कलापः १०।
इति जटाधरः॥ ॥अथालङ्का
रयुक्तिः।तद्धारणादिन सूच्यते।
रैवत्यश्वि धनिष्ठास हस्ता दि
ष्वपि पञ्चस।गुरु शुक्र बुध
स्याह्नि वस्त्रालंकारधारणं॥
अनिष्टेष्वपि निर्दिष्टं वस्त्रालङ्का
रधारणं।उद्वाहे राजसम्माने
ब्राह्मणानाञ्च सम्मते॥शिर
स्त्रं मुकुटं हारः कुण्डलञ्च
गुरुत्तया।कङ्कणं बालकञ्चैव
मेखलाष्टाविति क्रमात्॥अथा
नभूषणान्येषु यथासंख्यानि
निश्चयः।पद्मरागश्च वज्रञ्च
विजयो गोविदा स्तदा॥मुक्ता
वैदूर्य्य नीलञ्च तथा मरकतं
क्रमात्।आदित्यादि दशाजानां
सर्व्वसम्पत्तिदायकाः॥सुवर्णे
नापि घटना सर्व्वेषा मुपयु
ज्यते।प्रधानभूषणेष्वेव मप्र

धाने न निर्णयः॥प्रधानभूषणं
प्रायः शिरसो ह्यभिधीयते।तस्य
प्रधानभूषत्वा [illegible] दित्याह भूप
नन्दनः॥सुखदा मणयः सुद्धा दुः
खदा दोषशालिनः।अतो मणी
नां वक्ष्यामि लक्षणानि यथाक्र
मं॥इति युक्तिकल्पतरुः॥ ॥
मणिविशेषाणां लक्षणानि
तत्तच्छब्दे द्रष्टव्यानि॥
अलशः त्रि आलस्ययुक्तः।त
त्पर्य्यायः।शीतलः ७ कुण्ठः
८ मुखनिरीक्षकः ९।इति शब्द
रत्नावली॥
अलसः पुं पादरोगभेदः।पाँकु
ई इति भाषा।तल्लक्षणं यथा।
क्लिन्नाङ्गुल्यन्तरौ पादौ कण्डू
दाह समन्वितौ।दुष्टकर्दम सं
स्पर्शादलसं तं विभावयेत्॥अ
लसं कादङ्ग इति लोके।अथ
तस्य चिकित्सा।पादौ सिक्ता
र नालेन लेपनं तलसे हितं।
पटोल कुनटी निम्बरोचना म
रिचै स्तिलैः।सुद्धासवस्त्रसिद्धे
न कटुतैलेन लेपयेत्।पुनः
कासीस कुनटी तिलचूर्णे
र्विचूर्णयेत्॥अवचूलयेत्॥
करञ्जबीजं रजनी का

सीसं पद्मकं मधु।रोचना हरि
तालञ्च लेपो ऽयं मलसे हितः
।इति भावप्रकाशः॥
अलसकः पुं उदररोगविशेषः।
इति माधवकरः॥अस्य लक्ष
णं चिकित्सा च अजीर्णशब्दे
द्रष्टव्या॥
अलक्ष्मीः स्त्री निरृतदेवता।
तत् पर्य्यायः।कालकर्णी १ न
हरकदेवता २ इति शब्दरत्नावली
॥कालकर्णिका ३॥इति जटाध
रः॥ज्येष्ठादेवी ४॥इति पाद्मोत्त
रखण्डं॥तस्या विवरणं ज्येष्ठा
शब्दे द्रष्टव्यं॥ ॥दीपान्वि
तामावास्यायां तस्याः पूजा
विधि र्यथा।तत्र प्रदोषे आद्रे
आचारादलक्ष्मीपूजनं।कृत्या
चार्य्यचूडामणि प्रभृतयः॥गो
मयपुत्तलिकां निर्म्माय वाम
हस्तेन कृष्णपुष्पं गृहीत्वा ध्या
येत्॥अलक्ष्मीं कृष्णवर्णां द्विभु
जां कृष्णवस्त्रपरीधानां लौहा
भरणभूषितां शर्कराचन्दनच
र्च्चितां गृहसम्मार्ज्जनीहस्तां ग
र्द्दभारूढां कलहप्रियां।इति
ध्यात्वा विमुखेन ॐ अलक्ष्म्यै
नमः इत्यनेन निर्म्माल्येन क

ष्णपुष्पेण संपूज्य प्रणमेत्।ॐ अ
लक्ष्मी त्वं कुरूपासि कुत्सित
स्थानवासिनी।सुखरात्रौ मया
दत्तां गृह्ण पूजाञ्च शाश्वतीं॥दा
रिद्र्य कलह प्रिये देवि त्वं ध
ननाशिनी।याहि शत्रो र्गृहे
नित्यं स्थिरा तत्र भविष्यसि॥
यदि त्वं मे महाभागे प्रीता भ
वसि सर्व्वदा।पुत्र बन्धु कलत्रे
षु कदाचिन्नागमिष्यसि॥ग
च्छ त्वं मन्दिरं शत्रो र्गृहीत्वा
वाशुभं मम।मदाश्रयं परित्य
ज्य स्थिता तत्र भविष्यसि॥त
तः शूर्पवाद्येन सीमान्ते तां वि
सृजेत्।इति कृत्यचन्द्रिका॥ ॥
किञ्च।एवं गते निशीथे तु ना
री च स्वगृहाङ्गनात्।अलक्ष्मी
श्च बहिष्कार्य्या अमन्त्रञ्च य
थाविधि॥इति कृत्यतत्त्वार्णव
धृत ब्रह्मपुराणं॥ ॥एवं गते
निशीथे तु जने निद्रार्द्ध लोच
ने।तावन्नगर नारीभिः शूर्पडि
ण्डिमवादनैः।निष्कास्यते प्रह
र्षाभि रलक्ष्मीः स्वगृहाङ्गणात्
॥इति निर्णयसिन्धौ मदनर
त्नधृत भविष्यपुराणं॥अला
बुः स्त्री तुम्बी।तत् पर्य्यायः

।तुम्बिका ११ तुम्बिः १२ अलाबुः
१३।इति शब्दरत्नावली॥अस्या गु
णाः।अलाबूः कथिता तुम्बी द्वि
धा दीर्घा च वर्त्तुला।मिष्टं तुम्बी
फलं हृद्यं पित्त श्लेष्मापहं गुरु
॥वृष्यं रुचिकरं प्रोक्तं धातु पु
ष्टि विवर्द्धनं।इति भावप्रका
शः॥ ॥
अलिन्दः पुं गृहस्य द्वाराद्बहिः
प्रकोष्ठः॥गृहद्वारपिण्डकः॥
अलिन्दः नास्तीति अलञ्च इन्दं
इत्यादिः।यस्या मलिन्देषु न च
कुरैवेति माघः।स्वार्थे के आ
लिन्दो दीर्घादि रपि।गृहे कदे
शे आलिन्दः प्रघाणः प्रघण
स्त्वेत्यमरदत्तः।अथ पिण्डक
आलिन्द इतिहट्टुः।इह मूभय
मेव श्लेषादिति सारुकः।इत्यम
रटीकायां भरतः॥ ॥अन्यच्च।
प्रघाण प्रघणालिन्दा द्वारबा
ह्यप्रकोष्ठके।गृहाभ्यन्तर श
य्यार्थपिण्डिकाया मपि त्रयं॥
आलिन्दः स्यादलिन्दोपि स्याद
लिन्दक इत्यपि।इति शब्दरत्ना
वली॥
अलब्धः त्रि लोभरहितः।यथा
मनुः।एकोप्यलब्धः साक्षी

स्यात् बह्व्यः शुच्योपि न स्त्रियः।
स्त्रीबुद्धे रस्थिरत्वात्तु दोषै श्चान्ये
पि ये हताः॥एको ऽलुब्ध स्तु
साक्षी स्यादिति कुल्लूकभट्टधृ
तपाठः।इति व्यवहारतत्त्वं॥ ॥
अलोभः पुं लोभाभावः।यथा॥
इज्याध्ययन दानानि तपः
सत्यं धृतिः क्षमा।अलोभ इति
मार्गो ऽयं धर्म्म स्याष्टविधः स्मृ
तः॥इति महाभारतं॥
अलोभी त्रि लोभशून्यः।ना
स्ति लोभो यस्य इति बहुव्रीहि
समासादिनप्रत्यय निष्पन्नः॥
अलौकिकः त्रि लौकिकप्रत्य
क्षाविषयः।यथा।अलौकिक
त्वादमरः स्वकोषे न यानि ना
मानि समुल्लिलेख।विलोक्य
तै रप्यधुना प्रचार मयं प्रयत्नः
पुरुषोत्तमस्य॥इति त्रिकाण्ड
शेष द्वितीयश्लोकः॥
अल्पं त्रि किञ्चित्।तत् पर्य्यायः
।क्षुल्लं २१ क्षुल्लकं २२ खुल्लं २३
कणा २४ इति शब्दरत्नावली॥
अल्लः पुं परमेश्वरः।एत
अल्ला स्त्री नाम्ना यवना उ
पासते।यथा।ॐ अस्मल्लां इ
ल्ले मित्रावरुणो दिव्यानि धत्ते

।इळहे वरुणो राजा पुनर्देहुः।
इयमि मित्रो इळां इळहोति इ
ळाहळो वरुणो मित्रो तेजकामाः
।होवार मिन्द्रो होतार मिन्द्रो मा
हासुरिन्द्राः।अहो ज्येष्ठं श्रेष्ठ
परमं रहो ब्रह्माण महो अहो
रस्तर मह मदरकं वरस्य अहो
अहो आदह्लावुक मेककं।
अहो वुकं निवोनकं।अहो
यहेन इतक्रतुः अहो सूर्य
चन्द्र सर्वनक्षत्राः अहो क
षीणां सदिव्या इन्द्राय रुद्रे
मायापरमन्तमन्तरिक्षाः।अ
हो पृथिव्या अन्तरिक्ष विश्व
रूपं दिव्यानि यत्रे इळहे
वरुणोराजा पुनर्देहुः। इ
ळाकवर इळाकवर इळहे
नि इळाहळाः इळा इळहा
अनादिस्वरूपा अथर्वाणी
द शाखां के ह्रीं जनान् अष्ट ऊरु
ऊरु फट्।अस्तर संहारिणी
हुं अहो रस्तर महमदरकं वर
स्य अहो अहो इळहेति इ
ळहेः।इत्याथर्वणसूक्तं॥

अव रक्षे गतौ कान्तौ
प्रीतौ तृप्तौ रक्षौ स्तनौ

शामौ श्रवणे ऽर्थने वेशभागे वृद्धौ
गृहे वधे॥सामर्थ्ये ऽवगमे कामे
वृत्तौ।कनविंशति रर्थाः।कान्ति
रिच्छा।द्युतिः शोभा।काम इति
ज्यन्ताक्रन्यते रिच्छोत्पादना
इति भेदः।श्लेष आलिङ्गनं।सा
मर्थ्यं शक्तिः।रक्षणे प्रसिद्धो ऽ
यं।प्रीतो त्वान मा भवति स
द्वीपा रत्नस रपि मेदिनी।
इति रघुः।अन्यत्र विरलप्र
योगः॥ केचित्तु स्तुति भाग
ग्रह काम वृत्ती ने पठित्वा
क्रियाश्रवण दहन भावानाहुः
।अवति। इति दुर्गा
दासः॥
अवकरः पुं सम्मार्जन्यादि नि
क्षिप्तधूल्यादिः।तत्पर्यायः
।अवस्करः २ इत्यमरटीकायां
मथुरानाथः॥सङ्कारः ४ इति
शब्दरत्नावली॥
अवकाशः पुं व्याप्तिरहितस्था
नं।इत्यन्तरशब्दटीकायां भर
तः॥अपिच।एवञ्च षडशीत्या
दिष्ववकाश मलभमानं।इति
तिथ्यादितत्त्वं॥अन्यच्च।अव
काशेषु चोक्षेषु नदीतीरेषु चै
व हि।विविक्तेषु च तुष्यन्ति

दत्तेन पितरः सदा॥इति मान
वे ३ अध्याये २०७ श्लोकः॥अव
कृष्टः त्रि निष्काशितः।तत्पर्या
यः।निःसारितः २ इति जटाध
रः॥निर्गमितः ४ इति शब्दर
त्नावली॥ ॥
अवकेशी त्रि फलकालेप्यनुत्प
न्नफलकवृक्षादिः।इत्यमरः॥
अवक्तव्यं त्रि अकथनीयं।न
वक्तव्यं अवक्तव्य मिति नञ्स
मासनिष्पन्नं।यथा।असमर्थ्ये
नवक्तव्यं प्रत्यक्ष मपि दृश्यते
।इति चाणक्यं॥
अवगतं त्रि विदितं।तत्पर्या
यः।प्रमितं ८ मतं ९ प्रतीतं १०
ज्ञातं ११।इति जटाधरः॥

अवगाहनं क्ली शिरःस्नानं।
अम्भसि मज्जनं।यथा।अवगाह
नन्तु वक्तः कर्णौ नासिका म
ङ्गुलीभि राच्छाद्य कुर्यात्।अ
ङ्गुलीभिः पिधायैवं श्रोत्र दृङ्ना
सिका मुखं।निमज्जेत प्रागस्रो
त सिः पठेदघमर्षणं॥इति स
मुद्रकरस्नानात्।अत्रानुद्धते
वारत्रय मेवावगाहनं।नाभि
मात्रजले गत्वा कृत्वा

केशान् द्विधा द्विजः।निरुध्य क
र्णौ नासाञ्च त्रिकृत्वो मज्जनं
ततः॥इति वामनपुराणात्।इत्या
ह्निकाचारतत्त्वं॥अन्यत् स्नान
शब्दे द्रष्टव्यं॥ ॥आहीयश्रास्त्र
णस्य श्राद्धकर्त्तुरपि अवगाह
नस्नानकर्त्तव्यत्वं।यथा गोभि
लः।स्नातान् शुचीन् आचान्
तान् इत्यादि।स्नातान् अवगा
हितान् न तु मन्त्रादिस्नानान्।
स्वयमपि सूतकादिरहितः स्ना
तः।इति श्राद्धतत्त्वं॥
अवगोरणं क्ली ताडनार्थदण्डो
द्यमः।यथा प्रायश्चित्तविवेके
।दण्डनिपातप्रायश्चित्तेनैव गु
रुणा तन्नान्तरीयकावगोरण
प्रायश्चित्त मपि सम्पद्यत इत्यु
क्तं।ननु दण्डनिपात प्रायश्चि
त्तान् तदनन्तःपातिनो ऽवगो
रणप्रायश्चित्तस्य कथं सिद्धिः
।तथाहि मनुः।अवगूर्य्य च
रेत् कृच्छ्र मतिकृच्छ्रं निपा
तने।अवगूर्य ब्राह्मणताडनार्थं
दण्ड मुद्यम्य शतवात्सरा ज
नकं यत् पाप मुत्पादितं तत्
क्षयकामः कृच्छ्रं प्राजापत्य
व्रतं चरेत्।ताडके संस्रुथि

करणे। शंयोः प्रजापतेः पार्थ
नया देवैर्ब्राह्मणावगोरणक
त्वेन शतयातनाभिहिता। त
थाच श्रुतिः। शंयुः प्रजापतिः
प्रजाविनेता प्रजाहिते रतश्च
देवानां हवि र्वहन् आशिषो
ऽयाचत। देवा स्त्ववगोरणे श
तयातनास्त्वित्याशिषो ऽदद
न्निति। शास्त्रदीपिकादौ दर्श
पौर्णमास प्रकरणे। दिवा वै शं
यु वार्हस्पत्य मब्रुवन् हव्यं
नो वहेति किं मे प्रजाया इति
ते ऽब्रुवन् यो ब्राह्मणायावगु
रेत्तं शतेन यातयेत् यो निहन्या
त् तं सहस्रेण यो लोहित
मकरोत् यावतः पांशून् व्य
नक्ति तावतः परिवत्सरान्
स स्वर्गात् प्रच्यवेत। तस्मात्
ब्राह्मणान् नावगुरेत् न हन्या
त् न लोहितं कुर्य्यात् इति।
इति ह्रासात्मकं ब्राह्मणञ्च
इति प्रायश्चित्ततत्त्वं॥

अवघातः पुं आघातविशेषः
। कण्डनं। यथा। चरुविधौ वि
द्याकरवाजपेयी। शास्त्रार्थार
णवेलायां हि यत्र प्रयोजना
भावादिनिश्चय स्तत्रैव तदुपा
दानादिलोपः शास्त्रार्थः। यथा
कुसले ऽवघातादिलोपः। यत्र
तदनुष्ठानवेलाया मेव पुरुषदो
षेण प्रयोजनाभावो। जायते
तत्र प्राक् तन्निश्चयाच्छास्त्रश
यितः पदार्थो नियमापूर्व्वमात्रार्थे
मनुष्ठेय मेव। अतएव प्रकृता
वपि आलस्यादिना व्रीह्यादि
स्थाने तण्डुलादिषु गृहीते अ
वघातादि समाचरन्ति याज्ञिकाः
। याते न्यूने तथा छिन्ने सान्ना
य्ये मान्त्रिके तथा। यत्ते मन्त्राः
प्रयोक्तव्या मन्त्रा यत्रार्थ साध
काः॥ साम्नाय्ये हविषि मान्त्रि
के मन्त्रसाध्ये अवघातादौ
तत्काले मन्त्रपाठाभावे ऽपिम
न्त्राः प्रयोक्तव्याः। इति शुद्धि
तत्त्वं॥

अवचस्करः त्रि अवचनस्थः।
न वचः करोतीत्यर्थे वचःशब्द
पूर्व्वक कृधातोः टप्रत्ययेन
निष्पन्नः॥

अवच्छिन्नं त्रि अवच्छेदाश्र
यः। यथा। प्रतियोग्यसमानाधि
करणं यत्समानाधिकरणं त
त्त्वाभाव प्रतियोगितावच्छेद
कावच्छिन्नं यन्न भवति तेन

समं तस्य सामानाधिकरण्यं
व्याप्तिः। इति सिद्धान्तलक्षण
चिन्तामणिः॥

अवच्छेदकः त्रि विशेषणं। अ
वच्छिद्यते ऽनेनेति। यथा। अव्या
प्यवृत्ते रवच्छेदकत्व मपि स्व
रूपसम्बन्धविशेषः तदाश्रया
वच्छेदकः। इति न्यायशास्त्रं॥

अवच्छेदकत्वं क्ली स्वरूपसम्ब
न्धविशेषः। यथा। घटकत्वाव
च्छेदकत्वं स्वरूपसम्बन्धविशे
षः। इत्यवच्छेदकत्वनिरुक्तौ
शिरोमणिः॥ अनतिरिक्तवृत्ति
त्वं। यथा। अवच्छेदकत्वञ्च इ
हानतिरिक्तवृत्तित्वं। तेनविशि
ष्टस्यासत्वेपि भ्रमात् प्रतिबन्धे
पि न क्षतिः। इति सामान्यनि
रुक्तौ शिरोमणिः॥ अन्यूना
नतिरिक्तवृत्तित्वं। यथा। नन्वेत
द्दशप्रतियोगितान्यूनानतिरि
क्तवृत्तित्वं वाच्यं। वह्नित्वं न त
द्वृत्तितादशप्रतियोगितान्यू
नानतिरिक्तवृत्ति अत आह ता
णीतरौति। इत्यवच्छेदकत्वनिरु
क्तौ जगदीशः॥ अनतिरिक्तवृ
त्तित्वरूपावच्छेदकत्वं पारिभा
षिकं। यथा। तदवच्छि
न्नाभाववदसम्बद्ध स्वविशिष्टसा
मान्यकत्वं स्वविशिष्टसम्बन्धि
निष्ठाभाव प्रतियोगितानवच्छेद
कतत्कत्वम्वा तदनतिरिक्तवृ
त्तित्वं वक्तव्यं। इति अवच्छेदकत्व
निरुक्तौ शिरोमणिः॥ अव्याप्य
वृत्ते रवच्छेदकत्व मपि स्वरूपस
म्बन्धविशेषः तदाश्रयावच्छेदकः
। तच्चावच्छेदकत्वं इह शिखरि
णि नितम्बे हुताशनो न शिखरे
इत्यादि प्रतीतिवलात् क्वचिद
व्याप्यवृत्त्यधिकरणदेशविशेषा
दिदानीं गोष्ठे गौर्न तु गृहे इत्या
दिप्रतीतिवलात् क्वचित् का
लवृत्तितया देशे अप्यस्ति। इ
ति न्यायशास्त्रं॥

अवज्ञानं क्ली अवज्ञा। यथा।
अवज्ञानं अवज्ञा आनो अन्तः
श्रुडे शिति ङः। सम्पादित्वात्
क्विपि मधुः। तन्मते गोपा
वरूपं। इत्यमरटीकायां भर
तः॥

अवतंसः पुं शिरोभूषणं। तत्
पर्य्यायः। मुकुटं ४ मकुटं ५
मौलिः ६ मौलीकः ७
शेखरं ८ उस्तीषकः ९
कोटीरकं १०

कोटीरं ११ किरीटं १२ चूडाम
णिः १३ शिरोरत्नं १४ शिरोम
णिः १५॥ कर्णभूषणानां प
र्यायः। वतंसः २ कर्णपूरः ३
कुण्डलं ४ कर्णवेष्टनं ५ उत्तंसः
६ रत्नपत्रं ७ कर्णिकं ८॥ इति
शब्दरत्नावली॥
अवतारः पुं विष्णोर्मूर्त्यन्तरेण
पूर्णांशावेशरूपेण पृथिव्या
मवतरणं। यथा। स एव प्रथ
मं देवः कौमारं सर्गमाश्रितः।
चचार दुश्चरं ब्रह्मा ब्रह्मचर्य्य
मखण्डितं॥ द्वितीयन्तु भवायास्य
रसातलगतां महीं उद्धरिष्य
न्नुपादत्त यज्ञेशः शौकरं वपुः
॥ तृतीय मृषिसर्गं वै देवर्षित्व
मुपेत्य सः। तन्त्रं सात्वत माच
ष्ट नैष्कर्म्यं कर्म्मणां यतः॥ तु
र्य्ये धर्म्मकला सर्गे नरनारायणा
वृषी भूत्वात्मोपशमोपेत मक
रोद्दुश्चरं तपः॥ पञ्चमः कपि
लो नाम सिद्धेशः कालविप्लुतं
। प्रोवाचासुरये सांख्यं तत्त्वग्रा
म विनिर्णयं॥ षष्ठ मत्रे रपत्य
त्वं वृतः प्राप्तो ऽनसूयया। आ
न्वीक्षिकी मलर्काय प्रह्लादादि
भ्य ऊचिवान्॥ ततः सप्तम आकू
त्यां रुचेर्यज्ञो ऽभ्यजायत। स
यामाद्यैः सुरगणैरपात् स्वाय
म्भुवान्तरं॥ अष्टमे मेरुदेव्यान्तु
नाभेर्जात उरुक्रमः। दर्शयन्
वर्त्म धीराणां सर्वाश्रमनमस्कृ
तं॥ ऋषिभिर्याचितो भेजे नव
मं पार्थिवं वपुः। दुग्धेमामोष
धीर्विप्रास्तेनायं स उशत्तमः
॥ रूपं स जगृहे मात्स्यं चाक्षु
षोदधिसंप्लवे। नाव्यारोप्य म
हीमय्यामपाद्वैवस्वतं मनुं॥
सुरासुराणामुदधिं मथ्नतां म
न्दराचलं। दध्रे कमठरूपेण पृष्ठ
एकादशो विभुः॥ धान्वन्तरं द्वाद
शमं त्रयोदशम मेव च। अपाय
यत् सुरानन्यान् मोहिन्या मोह
यन् स्त्रिया॥ चतुर्दशं नारसिंहं
बिभ्रद्दैत्येन्द्र मूर्जितं। ददार क
रजै रूरावेरकां कटकृद्यथा॥
पञ्चदशं वामनकं कृत्वागादध्व
रं बलेः। पदत्रयं याचमानः प्रत्या
दित्सुस्त्रिपिष्टपं॥ अवतारे षो
डशमे पश्यन् ब्रह्मद्रुहो नृपा
न्। त्रिःसप्तकृत्वः कुपितो निः
क्षत्रामकरोन्महीं॥ ततः सप्तद
शे जातः सत्यवत्यां पराशरात्
। चक्रे वेदतरोः शाखा दृष्ट्वा

पुंसो ऽल्पमेधसः॥ नरदेवत्व
मापन्नः सुरकार्य्यचिकीर्षया
। समुद्रनिग्रहादीनि चक्रे वीर्य्या
ण्यतः परं॥ एकोनविंशे विंशति
मे वृष्णिषु प्राप्य जन्मनी। राम
कृष्णाविति भुवो भगवानहरद्
भरं॥ ततः कलौ संप्रवृत्ते सं
मोहाय सुरद्विषां। बुद्धो ना
म्नाजिनसुतः कीकटेषु भवि
ष्यति॥ अथासौ युगसन्ध्यायां द
स्युप्रायेषु राजसु। जनिता वि
ष्णुयशसो नाम्ना कल्किर्जग
त्पतिः॥ अवतारा ह्यसंख्येया
हरेः सत्वनिधे र्द्विजाः। यथावि
दासिनः कुल्याः सरसः स्युः स
हस्रशः॥ ऋषयो मनवो देवा
मनुपुत्रा महौजसः। कलाः सर्वे
हरेरेव सप्रजापतयः स्मृताः
॥ एते चांशकलाः पुंसः कृष्ण
स्तु भगवान् स्वयं। इन्द्रारिव्या
कुलं लोकं मृडयन्ति युगे
युगे॥ इति श्रीभागवते १ स्क
न्धे ३ अध्यायः॥
अवतीर्णः त्रि अवतरणविशि
ष्टः। यथा ज्योतिषे नीलग्रीव सु
भग्रीव सर्व्वकामफलप्रद। पृथि
व्यामवतीर्णोसि रुद्रवीर नमो
स्तु ते॥ इति तिथ्यादितत्त्वं॥
अवधारणं क्ली निश्चयः। यथा।
हि हेतावधारणे। इत्य
मरः॥
अवधार्य्यः त्रि अवधारणीयः
। अवश्यंक यथातो ज्ञेयप्रत्य
येन निष्पन्नः॥
अवधारितः त्रि कृतावधारणः।
यथा। त्वया सम्मुखे किं प्रोक्तं
न मया ह्यवधारितं। विवेचय म
हाभागे शङ्कितो वर्त्तते वत्स।
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मख
ण्डे २० अध्यायः॥
अवधीर तक अवज्ञायां। आव
धीरयत् साधु मसाधुः। इति
दुर्गादासः॥
अवधूतः पुं सन्न्यासाश्रमी। त
द्विधानं सन्न्यासिशब्दे द्रष्टव्यं॥
तद्भेदो यथा। देव्युवाच। द्वि
धावाश्रमौ प्रोक्तौ गार्हस्थ्या
भैक्षुकं तथा। किमिदं श्रू
यते चित्र मवधूता श्चतुर्विधाः
॥ एतद्वेदितु मिच्छामि तत्त्वतः
कथय प्रभो। चतुर्विधावधूतानां
लक्षणानि विशेषतः॥ सदाशिव
उवाच। ब्रह्ममन्त्रोपासका ये
ब्राह्मणक्षत्रियादयः। गृहाश्रमे

वसन्तोपि सेव्या स्ते यतयः प्रिये
॥पूर्णाभिषेकविधिना संस्कृता
ये च मानवाः।शैवावधूता स्ते
सेव्याः पूजनीयाः कुलार्च्चिते॥
ब्रह्मावधूतः शैवाश्च साग्निमा
चारवर्ज्जिताः।विदध्युः सर्व्वक
र्म्माणि शास्त्रदीरित वर्त्मना॥वि
ना ब्रह्मार्पितं ब्रैते तथा चक्रा
र्पितं विना।निषिद्ध मन्नं तोय
ञ्च न गृह्णीयुः कदाचन॥ब्रह्मा
वधूत कौलानां कौलाना म
भियोक्तृणां।प्रागेव कथितो य
स्मै आचारश्च वरानने॥स्नानं सं
न्यासनं पानं दानञ्च दारग्रहणं
।सर्व्वे मागमसार्गेण शैव ब्रह्मा
वधूतयोः॥इति महानिर्व्वाणत
न्त्रे १४ उल्लासः॥ ॥अन्यच्च।श
ङ्कर उवाच।शृणु देवि प्रवक्ष्या
मि अवधूतो यथा भवेत्।वीर
स्य मूर्त्तिं जानीयात् सदा तत्त्व
परायणः॥यद्रूपं कथितं सर्व्वं
सन्न्यासधारणं परं।तद्रूपं सर्व्व
कर्म्माणि प्रकुर्य्यादीरवल्लभे॥
दशदिने मुण्डनं चामावास्यायां
माचरेद्यया।तथा नैव प्रकुर्य्या
न्न वीरस्य मुण्डनं प्रिये॥असं
स्कृतं केशजालं मुक्तालम्बिक

चोच्चयं।अस्थिमाला विभूषा
वा रुद्राक्षानपि धारयेत्॥दि
गम्बरो वा वीरेन्द्र श्चाथ वा कौपि
नी भवेत्।रक्तचन्दनसिक्ताङ्गं कु
र्य्यादङ्गस्य भूषणं॥इति निर्व्वा
ण तन्त्रे ४ पटलः॥ ॥अपिच।
नृकरोटिं विधार्य्यञ्च काश्वर
एडं तथा प्रिये।परस्य व्याघ्राजिन
ञ्चैव योगीव धारयेत्सदा॥सहा
ङ्कं धारयेद्योगी वासरूपकवास
सी।कपाले धारयेच्चन्द्र चन्दना
द्यै विशेषतः॥इष्टलिङ्गं लकं व
क्षे धारयेत् सर्व्वदासुतः।सुत शक्ति
शिवस्य सम्बाधनं।सुदर्शनाख्य
यन्त्रकं तन्त्र संधारयेद्बुधः॥वि
पञ्ची कपिलञ्चैव मड्डु डिण्डि
मकफेरान्।वादयन् डमरुं योगी
यत्र कुत्राश्रमे स्थितः॥इति यो
गसारे २ परिच्छेदः॥ ॥अपरञ्च
।क्षमा दानं ततो ध्यानं वाल
भावेन शैलजे।शिवो ऽहं भैर
वानन्दो मुक्तो ऽहं कुलनाय
कः॥एवं भावपरो मन्त्री हेत
युक्तः सदाशिवः।सम्विदासे
वनं कुर्य्यात् सदा कारणसेवनं॥
भवेत् साक्षात् स पुरुषः शंभुरू
रूपो न संशयः॥इति निर्व्वाणतन्त्रे

॥ ॥किञ्च।ब्राह्मणः क्षत्रियो
वैश्यः शूद्रः सामान्य एव च॥
कुलावधूतसंस्कारे पञ्चाना
मधिकारिता।इति महानिर्व्वाण
तन्त्रे॥ ॥अन्यच्च।निर्व्वाण मुक्ति
माप्नोति ब्राह्मणो वीरभावतः।
अवधूतः क्षत्रियस्तु महायोगी न
संशयः॥स्वरूपो ऽपि भवेद्वैश्यः
शूद्रो ऽपि सहलोकवान्।सम्पू
र्णफल माप्नोति विप्रो निर्व्वा
णान्तां व्रजेत्।त्रिभागं फल मा
प्नोति क्षत्रियो वीरभावतः।
पादद्वयन्तु वैश्यस्य शूद्रस्य
चैकपादकं॥ ॥दशानामावधू
तानां प्रत्येकं नाम प्रागुक्त मि
दानी मपि तेषां प्रधानत्वेना
ङ्गीकरणार्थं संज्ञा कथनगर्भे
लक्षणविशेष माह।अवधूत
स चाख्यानं श्मशाने पर्व्वताल
ओवनारण्ये भारती च गिरिश्च पु
रीरेव च।एकस्थाने न संस्थित्य
इष्टध्यानादिकं ञ्चरेत्।यो मंत्र
दानं तपसा स वनः परिकीर्त्ति
तः॥अलकेशो जटाजूटः सदा
वातलवद्भवेत्।अन्तयोगी म
हावीरो ऽरण्यसंज्ञस्तु शैलजे।
नानाशास्त्रेषु यो विज्ञो ना

नाकर्म्मविशारदः।सदेष्टदेवी
भावेन भावयेद्यो हि चावलां॥
सएव भारती वीरा महात्मानी
जितेन्द्रियः।सदोद्ध्वबाहु र्योवीरो
मुक्तकेशो दिगम्बरः॥सर्व्वत्र
समभावेन भावयेत् योनरोत्तमः
।इष्टदेवीं विना नास्ति स गिरिः
परिकीर्त्तितः॥नानादेशेषु
पीठेषु क्षेत्रेषु तीर्थभूमिषु भ्र
मणं कुरुते नित्यं कुर्य्यात्स्वे
न पूजनं॥देवतायाः सदा ध्या
नं श्रीगुरोः पूजनं तथा।अन्त
र्यागेषु यो निष्ठः स वीरः पुरि
रेव च॥अच्युताश्रमे देवि यस्य
भक्तिः सुनिश्चला।तस्य त्वष्टा
भवेत् काली किंन सिध्यति भू
तले॥अवधूतं समालोक्य प्र
भुवत् पूजनं चरेत्।शक्तितः
पञ्चतत्त्वानि यत्नेनैव निवेद
येत्॥अशक्तः परमेशानि भ
क्तितः परितोषयेत्।इति निर्व्वा
णतन्त्रं॥ ॥अपिच।भक्तावधूतो
द्विविधः पूर्णापूर्णो विभेदतः।
पूर्णः परमहंसाख्यः परिव्रा
डपरः स्मृतः॥कृतावधूत सं
स्कारो यदि स्याज्ज्ञानदुर्ब्बलः।
तदा लोकालये तिष्ठन्नात्मानं

मत्र शोधयेत्॥रत्तन् स्वजाति
विद्वस्त्व कुर्व्वन् कर्म्माणि केवलं
सदा ब्रह्मपरो भूत्वा साधयेत्तत्
न सुत्तमं॥इति महानिर्व्वाणतन्त्रे
॥अपि चावधूतः शिवः सा
त्तादवधूतः सदाशिवः।अव
धूती शिवादेवी अवधूताश्रमं
शृणु॥चतुराश्रमिणां मध्ये
अवधूताश्रमोमहान्।अवधूत
श्च द्विविधो गृहस्थश्च विनात्त
गः॥सचेल श्चापि दिग्वासावि
धियोनि विहारवान्।सदारः स
द्वेदारस्थो ऽट्टहासो दिगम्बरः।
गृहावधूतो देवेशि द्वितयस्तु स
दाशिवः।इति मुण्डमालातन्त्रे
२पटलः॥ ॥अवधूतस्योम् तत
सदिति मन्त्रेण कर्म्म कर्त्तव्यता
माह।ओँ तत् सन्मन्त्र मुच्चार्य्य
सो ऽहमस्मीति चिन्तयन् कुर्य्या
दात्मोचितं कर्म्म सदा वैराग्य मा
स्थितः॥कुर्व्वन् कर्म्माण्यनासक्तो
नलिनी दलनी दलनीरवत्।यते
तात्मान मुद्दिश्य तत्वज्ञानविवेकतः
॥ ॥सद्देष्यां मोम् तत सदिति
निर्द्देशेन कर्म्मफल माह।ओँ त
त्सदिति मन्त्रेण यो यत्कर्म्म
समाचरेत्।गृहस्थो वाप्युदासीन

स्तस्याभीष्टाय तद्भवेत्॥ ॥
तन्मन्त्रक्रियमाणकर्म्मणः सम्पू
र्णत्व मपिजप होम प्रतिष्ठा च सं
स्काराद्यखिलाः क्रियाः।ओं तत् स
दिति निष्पन्नाः संपूर्णाः स्यु र्न सं
शयः॥किमन्यै र्बहुभि र्मन्त्रैः
किमन्यै र्भूरिसाधनैः।ब्राह्म्य
णानेन मन्त्रेण सर्व्वकर्म्माणि सा
धयेत्॥सुखसाध्य मनायासं
संपूर्णफलदायकं।नास्त्यतस्मा
न्महामन्त्रा दुपायान्तर मम्बिके
॥पुरप्रदेशे देहे वा लिखित्वा
धारयेदिमं।गेहे तस्य महातीर्थं।
देहः पुण्यमयो भवेत्॥निगमा
गमतन्त्राणां सारात् सारतरो म
नुः।ओं तत्सदिति देवेशि तवाग्रे
सत्यमीरितं।चतुर्व्विधानां त
न्त्राणा मन्येषा मपि वस्तुतां।म
न्त्रान्यैः शोधने नालं स्याच्चेदेते
न शोधितं॥पश्यन् सर्व्वत्र सद्रू
पं जपंस्तत् सन्महामनुं।स्वे
च्छाचारः शुद्धचित्तः स एव भु
विकौलराट्॥जपादस्य भवेत्
सिद्धो मुक्तः स्यादर्थचिन्तनात्।
साक्षाद्ब्रह्ममयो देही सार्थमेतं
जपेन्मनुं॥त्रिपदो ऽयं महामन्त्रः
सर्व्वकारणकारणं।साधनादस्य

मन्त्रस्य भवेन्मृत्युंजयः स्वयं॥पु
मयुग्मपदं वापि प्रत्येकं पद मे
व वा।जपेत्तस्य महेशानि साध
कः सिद्धिभाग्भवेत्॥इति मन्त्र
प्रशंसा॥ ॥शैवावधूतस्य सर्व्व
कर्म्मानधिकार माह।शैवाव
धूत संस्कार विधूताखिलकर्म्म
णः।नापि दैवे न वा पित्रे नार्षे ह्य
स्त्यधिकारिता॥ अथ परमहं
सः।चतुर्णां मवधूतानां तुरीयो
हंस उच्यते।त्रयो ऽन्ये योग भो
गाढ्या मुक्ताः सर्व्वे शिवोप
माः॥हंसो न कुर्य्यात् स्त्रीसङ्गं
न विधत्ते परिग्रहं।प्रारब्ध म
श्नन् विहरेत् निषेध विधिव
र्ज्जितः॥त्यजेत् स्वजातिचिह्ना
नि कर्म्माणि गृहमेधिनां।तुरी
यो विचरेत् क्षोणीं निःसंक
ल्पो निरुद्यमः॥सदात्मभावस
न्तुष्टः शोकमोह विवर्ज्जितः।
निर्निकेत स्तितिक्षुः स्यान्निःश
ङ्को निरुपद्रवः॥नार्पणं भक्ष्य पे
यानां न तस्य ध्यान धारणा॥मु
क्तो निर्द्वन्द्वो हंसाचारपरो यतिः
॥इति ते कथितं देवि चतुर्णां
कुलयोगिनां।लक्षणं स वि
शेषेण साधनां मत्स्वरूपिणां

एतेषां दर्शनात् स्पर्शादालापात्
परितोषणात्।सर्व्वतीर्थफलावा
प्ति र्जायते मनुजन्मनां॥इति म
हानिर्व्वाणतन्त्रे॥
अवध्यः त्रि वधानर्हः।यथा।
अवध्याश्च स्त्रियः प्राहु र्तिर्य्यग्यो
निगतास्वपि।शत्रुस्त्रीणा मवध्य
त्व माह मत्स्यपुराणे।किं त्वया
न श्रुतं लोके अवध्याः शत्रु
योषितः।इति प्रायश्चित्ततत्वं॥
आत्मन अवध्यत्वं यथा।देही
नित्य मवध्यो ऽयं देहे सर्व्वस्य
भारत।तस्मात् सर्व्वाणि भूतानि
न त्वं शोचितु मर्हसि॥इति श्री
भगवद्गीतायां २ अध्यायः॥ ॥
तद्वधे पापं यथा।यावानवध्य
स्य मोक्षणे।अधर्म्मो नृपते र्दृ
ष्टो धर्म्मस्तु विनियच्छतः॥इ
ति मानवे ९ अध्याये २४९
श्लोकः॥

अवनेजनं क्ली पिण्डदानार्थ
मास्तृतकुशोपरि जलसेचनं
।यथा।ब्रह्मपुराणे।सपुष्पं
जलमादाय तेषां पृथक् पृथक्
पृथक्।अप्रदक्षिणं नेनिज्यात्
गोत्रनामानुभाषितं।पित्रे स्व

नेजनं मूलदेशे पितामह प्रपिता
महयोस्तु अवनेजनं मध्यदेशा
ग्रदेशयोः। मातामहादीनां म
प्येवं। इति॥ पिण्डोपरि जलसे
चनं। यथा ब्रह्मपुराणे। ततो द
र्भेषु विधिवत् सम्मार्ज्य च कर
नतः। प्रक्षाल्य च जलेनाथ
त्रिराचम्य हरिं स्मरेत्॥ तेभ्यः
संस्रवपात्रेभ्यो जलेनैवाव
नेजनं। दत्वाच पितरश्चेति
पठेच्चोदङ्मुखस्थितः॥ इति
च श्राद्धतत्त्वं॥

अवन्तिः पुं देशविशेषः। यथा
। प्राग्ज्योतिषाः कामरूपा मा
लवाः स्युरवन्तयः॥ इति हेमच
न्द्रः॥ अपि च। अरूपा स्त्रीराज्ये
राष्ट्र वीतिहोत्रा अवन्तयः॥
एते जनपदाः ख्याता विन्ध्य
पृष्ठनिवासिनः॥ इति मत्स्य
पुराणे ११८ अध्यायः॥

अवन्ती स्त्रि मालवदेशस्य नगरी
यथा। ताम्रपर्णीं समासाद्य शै
लाद्रिशिखरोद्गतः। अवन्ती सं
ज्ञको देशः कालिका तत्र तिष्ठ
ति॥ इति शक्तिसङ्गमतन्त्रे ७ प
टलः॥ अस्याश्च। उत्पन्नोऽर्कः

कालिन्द्ये च यमुनायाञ्च चन्द्रमाः
। अवन्त्याञ्च ऊर्जो जातो माग
धे च हिमांशुजः॥ इति संस्कार
तत्त्वधृत मत्स्यपुराणं॥ अन्यत्
पृषेल्लिखितं॥
अवमं क्ली तिथ्यन्तद्वयस्पृष्टै
कदिनवारः। यथा। तिथ्यन्तद्वा
यमेकोदिनवारः स्पृशति यत्र
तद्धवन्यवमदिनं। त्रिदिनस्पृक्
तिथित्रयस्य स्पर्शनात्र्यहः॥ इ
ति ज्योतिस्तत्त्वं॥
अवमानं क्ली अपमानं। यथा
सम्मानाद्ब्राह्मणो नित्य मुद्वि
जेत विषादिवामृतस्येव चा
काङ्क्षेदवमानस्य सर्व्वदा॥
इति मानवे २ अध्याये १६२ श्लो
कः॥ मानावे स्नानदन्तसहित
न्त मनेन विधीयते। इति कु
ल्लूकभट्टः॥
अवमाननं क्ली अपमानं। यथा
। अवमाननं अवमानना मान
कि चार्ड्ढे अवमर्द्दः जीपि अ
न्यीति भरतः॥ इत्यमरटीकायां
भरतः॥

अवमान्यः त्रि अवमाननीयः।
यथा। या रोगिणी स्यात्तु हिता
सम्पन्ना चैव शीलतः। मातु

साध्याधिवेत्तव्या नावमान्या च
कर्हिचित्॥ इति मानवे ९ अध्या
ये ८२ श्लोकः॥
अवमूर्द्धशायी त्रि अधोमुखे
शायी। अवमूर्द्धं यथा स्यात्तथा
शयितुं शीलमस्य इत्यर्थे
णिन् प्रत्ययेन निष्पन्नः॥
अवरः त्रि कनिष्ठः। यथा। श्री
शैशेन विना शम्भुः पृथग्विश्वे
न तत्पुनः। न नाना शम्भुना रा
माद्वैष्णवयोस्त्वजो स्वरः॥ इति
मुग्धबोधव्याकरणे वोपदेवः॥
निकृष्टः। यथा। दूरेण ह्यवरं
कर्म्म बुद्धियोगाद्धनञ्जय। बुद्धौ
शरणमन्विच्छ कृपणाः फल
हेतवः॥ इति भगवद्गीतायां २
अध्याये ४९ श्लोकः॥

अवरोधकः त्रि अवरोधकार
कः। अवपूर्व्वक रुधधातोः ण
क प्रत्ययेन निष्पन्नः॥
अवरोधनं क्ली अवरोधकरणं।
यथा। कस्त्वदीय पदपङ्कज
पञ्जरान्ते अद्यैव मे विशतु मा
नसराजहंसः। प्राणप्रयाणस
मये कफवातपित्तैः कण्ठाव
रोधनविधौ स्मरणं कुतस्ते॥

इति पाण्डवगीता॥
अवलम्बः पुं अवलम्बनं। अव
पूर्व्व लम्बधातो रल्प्रत्ययेन
निष्पन्नः॥
अवलम्बनं क्ली आश्रयः। यथा
। प्रतिकूलतामुपगते हि विधौ
विफलत्वमेति बहुसाधनता। अ
वलम्बनाय दिनभर्त्तुरभूत्त्र प
तिष्यतः करसहस्रमपि॥ इति
माघे ९ सर्गः॥
अवलिप्तः त्रि धनादिगर्व्वितः। य
था। न संवसेच्च पतितैर्न चाण्डा
लैर्न पुल्कसैः। न मूर्खैर्नावलि
प्तैश्च नान्त्यैर्नान्त्यावशायिभिः
॥ इति मानवे ४ अध्याये ७९ श्लो
कः॥ अवलिप्ता धनादिगर्व्विता
इति कुल्लूकभट्टः॥ अवलिप्ता
सि मैवं त्वं देवि ब्रूहि ममाग्र
तः। इति देवीमाहात्म्यं॥

अवलीढं त्रि भक्षितं। यथा मनुः
। पतत्रिणावलीढञ्च शुनास्पृ
ष्टमेव चाप्यादि। पतत्रिणाव
लीढं काकादिना भक्षितं। इ
त्यादिकुल्लूकः॥
अवलीला स्त्री अनायासः। हे
ला। यथा। रभिरं तनं

प्राप्य विपतन्तं पुराननं। कान्ते
दृष्ट्वा हिनस्त्येव सोपायेनाव
लीलया॥ इति ब्रह्मवैवर्त्ते श्री
कृष्णजन्मखण्डे ८३ अध्यायः॥
अपि चावलम्ब्य भ्रमणं कृत्वा
पपात दानवोपरि। चकार भस्म
सात्तञ्च सखञ्चावलीलया॥
इति च तत्रैव प्रकृतिखण्डे १८
अध्यायः॥
अवलगनं क्ली लग्नम्। अव
पूर्व्वक लगधातो रनट्प्रत्ययेन
निष्पन्नं॥
अवलेपनं क्ली विलेपनं। अवपू
र्व्वक लिपधातो रनट्प्रत्ययेन
निष्पन्नं॥
अवलेहः पुं लेह्यौषधं। यथा
। कट्फलं पौष्करं शृङ्गी व्या
घ्रं यासश्च कारवी। एतत्चू
र्णीकृतं चैतन्मधुना सह लेह
येत्॥ एषावलेहिका हन्ति स
न्निपातं सुदारुणं। हिक्कां श्वा
सञ्च कासञ्च कण्ठरोगञ्च ना
शयेत्॥ एतद्योज्यं कफोद्रेके चू
र्णी माद्रकजे रसैः। तन्त्रान्तरे च
उक्तं। अष्टाङ्गं मधुना लिह्या
दार्द्रकस्य रसेन वा। संमोहं
दारुणं हन्यात्तन्द्रा कास

समन्वित मिति॥ सर्व्वेषु सन्निपा
तेषु न लेहं मवचारयेत्। शीतो
पचारि लेहं स्याच्छीतञ्चात्र
विरुध्यते॥ अय मभिप्रायः। स
न्निपातज्वरेषु श्लेष्मनिग्रहार्थं
सर्व्वदा स्वेदो हित उक्तः। तत्रापि
सम्बन्धाद्देहस्योसना निषेदेव। उ
ष्णेन मधुना विरोधः। उष्णञ्च स्व
स्रुतेन। उष्णे विरुध्यते सर्व्वं विषा
न्वयतया मधु। उष्णार्त्ते मुष्णे रु
क्षञ्च तन्निहन्ति यथा विष
मिति॥ शीतोपचारि लेहं मि
ति। शीतेनोपचारो ऽस्यास्तीति
शीतोपचारि। शीतञ्चात्र सन्नि
पाते विरुध्यते। अय मवलेहः
प्रायेणोर्द्धजत्रुज रोगहरत्वात्
सायं मुपयुज्यते। यत उक्तं चा
रकेण। ऊर्द्धजत्रुगदघ्नी या
सा सायं मवलेहिका। अधो
रोगहरी या सा भोजनात्
प्राक् प्रयुज्यते॥ पौष्करं पुष्क
रमूलं तदलाभे कुष्ठं देयं।
शृङ्गी कर्कटशृङ्गी। व्याघ्री भ
ण्टाकी पिप्पली मरिचानि चाया
सोयवासः। केचित् यासस्थाने य
वानी मत्ति पन्ति। कारवी मगरेला
इति लोके। अष्टाङ्गावलेहिका

॥ ॥बिल्व मामलकं पिष्ट्वा द्रा
क्षया सह मेलयेत्। विषमेष
ज्वरयुक्तं मधुना सह लेहयेत्
॥ तेनास्य शाम्यति श्वासः का
सो मूर्च्छारुचि स्तथा॥ इत्यव
लेहः॥ ॥ अन्यत् यथा पि
प्पली त्रिफलाञ्चापि समभा
गां ज्वरी लिहन्। मधुना सर्पि
षा वापि कासी श्वासी सुखी
भवेत्॥ कट्फलं पौष्करं शृङ्गी
कृष्णा च मधुना सह। श्वास
कास ज्वरहरो लेहो ऽयं कफ
नाशनः॥ चातुर्भद्रिका॥ ॥
कट्फलं पौष्करं शृङ्गी यवानी
कारवी तथा। कटुत्रयञ्च स
र्व्वाणि समभागानि चूर्णयेत्॥
आर्द्रकस्य रसे लिह्यान्मधुना वा
कफज्वरी। कासश्वासारुचिच्छर्दि
श्लेष्मानिलनिहन्तये॥ अष्टावले
हः इति भावप्रकाशः॥
अवलेहनं क्ली अवलेहः। अ
वपूर्व्वलिहधातो र्भावे ऽनट्
प्रत्ययेन निष्पन्नं॥
अवशः त्रि अवशीभूतः। यथा।
श्लेष्माक्त वाच्येवे मुक्तं प्रेतो
भुङ्क्ते यतो ऽवशः। अतो न
वर्त्तितव्यञ्च क्रिया कार्य्या वि

धानतः॥ इति शुद्धितत्त्वं॥
अवशिष्टः त्रि अवशेषाश्रयः।
उद्धृतः। यथा। वल्मीक मूषिको
त्खातां मृदं मम्भर्जलां तथा। शो
चावशिष्टां गेहाच्च नादद्यात्
लेपसम्भवां॥ इत्याह्निकतत्त्वं॥

अवशक्थिकः त्रि वस्त्रादिना
पृष्ठजानुजङ्घाद्वयदृढबन्धनपृ
ष्ठेकोपविष्टः। फाँडवान्धियाव
सा इति भाषा। यथा। कात्याय
नः। आसनारूढपादस्तु जानु
नो र्जङ्घयो स्तथा। कृतावशक्
थिको यस्तु प्रौढपादः स उच्य
ते॥ आसनारूढपादः आसना
रूढपादतलः। जानुनो र्जङ्घयोः
कृतावशक्थिको वस्त्रादिना
कृतपृष्ठजानुजङ्घा बन्धः। इत्या
ह्निकतत्त्वं॥
अवसन्नः त्रि अवसादप्राप्तः।
यथा। महिम्नः पारन्ते परमवि
दुषो यद्यसदृशी स्तुति र्ब्रह्मादी
नां मपि तदवसन्ना स्त्वयि गिरः।
अथावाच्यः सर्व्वः स्वमति परिणा
मावधि गृणान् ममाप्येष स्तोत्रे
हर निरपवादः परिकरः॥ इति
पुष्पदन्तकृतशिवस्तोत्रे॥ ॥

अपि वा। आचारेणावसन्नोऽपि
पुनः प्रार्थयते यदि। इति व्यव
हारतत्त्वं॥
अवसरः पुं अवकाशः। यथा।
गोवधे एका चेद्बह्वीभिरल्पप दे
शेन दण्डवत् प्रायश्चित्तानि भ
वन्तीत्यतिदेशानवसरात्। तद
वसरत्वे प्रत्येकं पूर्णप्रायश्चित्त
द्वैगुण्यं स्यात्। इति प्रायश्चि
त्ततत्त्वं॥
अवसानं क्ली क्रियासमाप्तिः।
तत्पर्य्यायः। विरामः ३। इति
जटाधरः॥
अवस्कन्दः पुं अवगाहनं। य
था। ललनानुतापं ऊरुमान्य गृ
ह्णान् स मय्यवस्कन्दमुपास्पृश
त्। ऊरुहल्लाख्यरुशिलोपवेशं
काकस्य ईषत् स्मयमान
आस्त॥ इति भट्टौ २ सर्गे ११
श्लोकः॥ नद्यामवस्कन्दोऽवगा
हो यत्र स्नानक्रियायां। इति
नटीकायां भरतः॥
अवस्कन्दनं क्ली अवगाहनं।
अवपूर्वस्कन्दधातोः स्नट् प्र
त्ययेन निष्पन्नं॥
अवस्थानं क्ली स्थितिः। यथा।
परः सन्निकर्षे उपपत्तेऽथा

वापन्नं सममृत्त्रपानन्यायेनैका
श्यवच्छेदेन सहावस्थानरूपः।
इति तिथ्यादितत्त्वं॥
अवस्थितः त्रि कृतावस्थानः। य
था। यानेव हत्वा न जिजीविषाम
स्तेऽवस्थिताः प्रमुखे धार्त्तरा
ष्ट्राः। इति श्रीभगवद्गीतायां २ अ
ध्याये ६ श्लोकः॥
अवस्थितिः स्त्री अवस्थानं। अ
वपूर्वक स्थाधातोः क्तिप्रत्ययेन
निष्पन्ना॥
अवहार्य्यः त्रि समर्पणीयः।
यथा। आधिश्चोपनिधिश्चोभौ
न कालात्ययमर्हतः। अवहा
र्य्यौ भवेतां तौ दीर्घकालम
वस्थितौ॥ इति मानवे ८ अ
ध्याये १४५ श्लोकः
अवहेलितं त्रि कृतावहेलन
वस्तु। अवहेलं जातमस्य इत
र्थे इतप्रत्ययेन निष्पन्नं॥
अवक्षुतं क्ली उपरिक्षुतान्नं।
यथा मनुः। द्विषदन्नं नगर्य्यन्नं
पतितान्नमवक्षुतं। इत्याह्नि
कतत्त्वं॥
अवाक्शिराः पुं अधोमुखः।
यथा। अवाक्शिरास्तमस्यन्धे
किल्बिषी नरकं व्रजेत्। यः प्र

ऽर्थं वितथं कुर्य्यात् स्वहः सन्नय
र्मनिश्चये॥ इति मानवे ८
अध्याये ९४ श्लोकः॥
अवाङ्मुखः त्रि अधोमुखः।
यथा। तत् श्रुत्वा स बलः खे
दहर्ष दुःख न्यपाकुलः। अवा
ङ्मुखः प्राप्तकालां तामुवाच
मृगाङ्गदं॥ इति कथासरित्सा
गरे अलङ्कारवतीलम्बके २
१ तरङ्गः॥ अवाच्यं क्ली दुर्वचनं।
इत्यमरः॥ वचनानर्हं अनक्षरं
गालिप्रभृति इति मथुः। निरि
तान्यक्षराणि अत्र अनक्षरं
अवाप्यानामनेकार्थत्वात् नञ्म
निन्दायां। एवमवाच्यं वक्तुम
योग्यं वह्नो वाचि हस्तयोस्मि
ति चाए भुजवचेति क निषे
धः। इति भरतः॥
अवाच्यं त्रि वचनानर्हं। यथा।
अनक्षरं मवाच्यन्तु वचनार्हं
न यद्वचेत्। एष वन्ध्यास्तनो या
ति खपुष्पकृतशेखरः। मृग
तृष्णाम्भसि स्नातः शशशृङ्गध
नुर्द्धरः॥ इति शब्दरत्नावली॥
अवादी त्रि अविवादी॥ अव
क्ता। वदधातोर्णिनिप्रत्ययान
न्तरं नञ्समासनिष्पन्नः॥

अवाध्यः त्रि बाधानर्हः। नबा
ध्यः अवाध्य इति नञ्
समास निष्पन्नः॥
अवान्तर त्रि प्रधानान्तःपाति
। इयं फलश्रुतिर्न श्रेयः पर
मपुरुषार्थसाधनपरा न भव
ति। किन्तु बहिर्म्मुखानां मोक्षवि
वक्षया अवान्तरकर्म्मफलैः क
र्म्मस्वरुच्युत्पादनमात्रं। यथा।
भैषज्ये औषधे रुच्युत्पादनं।
यथा। पिब निम्बं प्रदास्यामि
खलु ते खण्डलड्डुकान्। पित्रैव
मुक्तः पिबति तिक्तं मध्यतिबा
लकः॥ अत्र तिक्तनिम्बादिपान
स्य न खलु खण्डादिलाभः एव
प्रयोजनं किन्त्वारोग्यं तथा वे
दोऽप्यवान्तरफलैः प्रलोभयन्
मोक्षायैव कर्म्माणि विधत्ते।
इति मलमासतत्त्वं॥
अवारितः त्रि अकृतवारणः।
यथा। अवारितद्वारतया तिर
श्चामन्तःपुरे तस्य निविश्य
राज्ञः। गतेषु रम्येष्वधिकं विशे
षमध्यापयामः परमाणुमध्याः
इति नैषधे ३ सर्गे ४२ श्लो
कः॥
अवार्य्यः त्रि अनिवार्य्यः। यथा

।नम स्ते नित्य विलसद्दे सव
स्वनिकेतन।अवाच्यै वीर्यवद्रू
पं विस्ता येन प्रणामाम्य हं॥इ
न्सुनकल्पखण्डे २७ अध्यायः
अवान्तरं त्रि अयथार्थे।न वा स्त
वं अवान्तर मिति नञ समास
विष्पन्नं॥
अवास्तः।त्रि परिरक्तकः।अव
पूर्व्वकात्तयातो रक्तप्रत्ययेन नि
ष्पन्नः॥
अविकटः त्रि अविशालः॥अ
करालः॥अविस्तारः।न विक
टः अविकटः इति नञ समा
सनिष्पन्नः॥
अविकारी त्रि विकाराजनकः
।यथा बृहस्पतिः।कन्द मूल
फलैः पुष्पैः शाकैः शुक्ररस
न्न यत्।अविकारि भवेन्मध्य
मभक्ष्य तादृकारकत्॥इत्या
ह्निकाचारतत्त्वं॥
अविलीनं त्रि अविच्छिन्नं।य
था।नापि मङ्गलं सकलं म
विगीत शिष्टाचार विषयत्वादशे
वत्।इति मङ्गलवादचिन्ता म
णिः॥
अविचारः पुं अन्यायः॥विचा
ररहिते त्रि यथा।अवि

चारेण सर्व्वाभि रनुष्ठेयन्तु त
त् पुनः।संसारोत्तारणाल मेत
द्धेदविदो विदुः॥इति मत्स्य
पुराणे॥
अविचारितः त्रि अकृताविचारः
।अविचारशब्दादितप्रत्ययेन
निष्पन्नः॥
अविच्छिन्नं क्ली विच्छेदाभाव
वत्।अनिष्पन्निमत्।यथा।अ
विच्छिन्ने कथम्भावे यत् प्रथा
नस्य पठ्यते।अविज्ञानफलं
कर्म्म तस्य प्रकरणाङ्गता॥इति
मलमासतत्त्वं॥
अविज्ञः त्रि अनभिज्ञः।यथा।
एते सर्व्वे गुणाः कान्त सन्ति
कान्ते त्वयि ध्रुवं।त्वां न वाञ्छ
न्ति याः कान्ता स्ता अविज्ञाश्च
वञ्चिताः॥इति ब्रह्मवैवर्त्ते श्री
कृष्णजन्मखण्डे २९ अध्यायः॥
अविज्ञेयं क्ली दुर्ज्ञेयं।यथा।
आसीदिदं तमोभूत मप्रज्ञात
मलक्षणं।अप्रतर्क्य मविज्ञेयं
प्रसुप्त मिव सर्व्वतः॥इति मान
वे १ अध्यायः॥
अविद्यः त्रि विद्यारहितः।वि
द्याहीनः।यथा।अविद्यो वा
सविद्यो वा ब्राह्मणो मामकी

ततुः।अपिच।कात्यायनः।ना
विद्यानान्तु वैद्येन देयं विद्या
धनात् क्वचित्।इति दायतत्त्वं
॥अन्यच्च।अविद्यानान्तु सर्व्वे
षा मीहातश्चेद्धनं भवेत्।सम
स्तत्र विभागः स्यात् पित्र्या
इति धारणा॥इति मानवे ९
अध्याये २०५ श्लोकः॥
अविद्यमानः त्रि अवर्त्तमानः।
यथा।नारदः।अविद्यमाने पि
त्र्यर्थे स्वांशादुद्धृत्य वा पुनः।अ
वश्यकार्य्याः संस्कारा भ्रात
भिः पूर्व्वसंस्कृतैः॥इति दाय
तत्त्वं॥
अविधिः पुं अविधानं।यथा।
ये ऽप्यन्यदेवताभक्ता यजन्ते
श्रद्धयान्विताः।ते ऽपि मा मेव
कौन्तेय यजन्त्यविधिपूर्व्वकं॥
इति श्रीभगवद्गीतायां ९ अ
ध्याये २३ श्लोकः॥अपिच।या
ज्ञवल्क्यः।वसेत् स नरके घो
रे दिनानि पशुरोमभिः।अमि
तानि दुराचारो यो हन्त्यविधि
ना पशून्॥इत्याह्निकतत्त्वं

अविनयः पुं विनयाभावः।
यथा।बहवो ऽविनयान्नष्टा रा

जानः सपरिच्छदाः।वनस्था
अपि राज्यानि विनयात् प्रतिपे
दिरे॥वेणो विनष्टो ऽविनया
न्नहुष श्चैव पार्थिवः।सुदासो
यवन श्चैव सुमुखो निमिरेव
च॥इति मानवे ७ अध्याये ४०
।४१ श्लोकौ॥
अविनाभावः पुं तत्पदार्थे तत्
पदार्थाभाववद्वृत्तित्वाभावः।
यथा।केय माकाङ्क्षा न तावद
विनाभावः।नीलं सरोज मित्या
दौ तदभावात्।विमलं जलं
नद्याः कच्छे महिष इत्यत्र
जलान्वितनद्या अविनाभावात्
कच्छे साकाङ्क्षतापत्तेश्च।इत्या
काङ्क्षा चिन्तामणिः॥अविना
भाव इति।तत् पदार्थेन विना
यो भावः सत्त्वं तदभावा इत्यर्थः
तत् पदार्थे तत् पदार्थाभाव
वद्वृत्तित्वाभाव स्तत्पदार्थे
तत्पदार्थाकाङ्क्षा इति भावः
।इति तट्टीकामाथुरी॥
अविभक्तः त्रि अपृथक्।यथा
।कात्यायनचिन्तामणौ।विभक्ता अ
विभक्ता वा कुर्य्युः श्राद्ध मदै
विकंमघासु च तथान्यत्र नाधि
कारः पृथग्विना॥इति मल

मासतत्वे॥
अविभाज्यं त्रि विभागायोग्यं।
अथ विभाज्याविभाज्ये। तत्र
व्यासः।अनाश्रित्य पितृद्रव्यं
स्वशक्त्याप्नोति यद्धनं।दायादे
भ्यो न तद्दद्यात् विद्यालब्धञ्च
यद्भवेत्॥ ॥विद्याधन माह
कात्यायनः।उपन्यस्ते तु यल्ल
ब्धं विद्यया पणपूर्वकं।विद्या
धनन्तु तद्विद्यात् विभागे न
नियोजयेत्॥शिष्यादार्त्विज्यतः
प्रश्नात् सन्दिग्धप्रश्ननिर्णयात्
।स्वज्ञानशंसनाद्वादाल्लब्धं प्रा
ध्ययनाच्च यत्॥विद्याधनन्तु
तत्प्राहु र्विभागे न प्रयोजयेत्
।शिल्पेष्वपि हि धर्मोऽयं
मूल्याद्यच्चाधिकं भवेत्॥परं
निरस्य यल्लब्धं विद्यया द्यूतपू
र्वकं।विद्याधनन्तु तद्विद्यात्
न विभाज्यं बृहस्पतिः॥ ॥यदि
भवान् भद्र मुपन्यस्यति तदा
तावदेव मयैतद्देय मिति पणि
तं यत्रोपन्यासे निस्तीर्णे लभ
ते तच्च विभाज्यं।शिष्याद्ध्या
पितात्।आर्त्विज्यतः यजमाना
द्दक्षिणया लब्धधनं न प्रति
ग्रहलब्धं वेतनरूपत्वात्।

तथा यत् किञ्चिद्विद्याशास्त्रे नि
र्णीतेऽपि पणिते यदि कश्चित्प
रितोषाद्ददाति।तथा यो ऽस्मिन्
शास्त्रार्थे अस्माकं संशय मपन
यति तस्मै धन मिदं ददानीत्यु
पस्थितस्य संशय मपनीय यल्ल
ब्धं वादिनो द्वौ सन्देहे न्यायकर
णार्थं मागतयोः सम्यङ्निरूपणे
न यल्लब्धं पणांशादिकं।तथा शा
स्त्रादि प्रकृष्टताने संभाव्य यत् प्र
तिग्रहादिना लब्धं।तथा शास्त्रता
न विवादे अन्यत्रापि यत्र कुत्र
चिदन्योन्यज्ञानविवादे निर्जित्य
यल्लब्धं।तथा शिल्पादिविद्यया
चित्रकर स्वर्णकारादिभि र्य
ल्लब्धं।तथा द्यूतेनापि परं निर्जि
त्य यल्लब्धं।तत्त सर्वे मविभाज्य
मितरैः।तस्मात् यया कयाचिद्विद्य
या लब्धमेकस्यैव तच्चेतरेषा
मिति।प्रदर्शनार्थञ्च कात्यायनेन
विस्तारित मिति दायभागः।नार
दः।कुटुम्बं विभृयाद्भ्रात
र्यो विद्याधनात्तस्मात् स ल
भेताश्रुतो ऽपि सन्॥
विभृयादित्ये
कवचननि
ईशानव

तथैकस्मिन् देवे बहूनामुपस्थे येनप्रहृष्टायत्तं

हरः।यदि विद्या मभ्यस्यतो भ्रा
तः कुटुम्ब मपरो भ्राता स्वधनेन
यशरीरायासाभ्यां सम्वर्द्धयति त
दा तद्विद्यार्जितधने तस्याधिका
रः।अकृतो मूर्खैः।कल्पतरु मित
ता दीपकलिकास्तु।कात्यायनः
।परभक्तोपयोगेन विद्या प्राप्ता
न्यतस्तु या।तया लब्धं धनं य
त्तु विद्यालब्धं तदुच्यते।अन्य
तः पितृमातृकु लव्यतिरिक्ता
त्॥ ॥अत्र विशेषयति स एव।
नाविद्यानान्तु वैद्येन देयं विद्या
धनात् क्वचित्।समविद्याधि
कानान्तु देयं वैद्येन तद्धनं॥
तत्रोच्चरितविद्यापद मुभाभ्यां
सम्बध्यते तेन समविद्याधिक
विद्यानां भागो न तु न्यूनविद्यावि
द्ययोः।वैद्येन विदुषा॥ ॥पुन
र्विशेषयति।कुले विनीतविद्या
नां भ्रातृणां पितृतो ऽपि वा।शौ
र्यप्राप्तञ्च यद्वित्तं विभाज्यं तद्बृ
हस्पतिः॥कुले स्वकुले पिता
मह पितृव्यादिभ्यः।पितृतएव
वा।शिक्षितविद्यानां भ्रातृणां।
यद्विद्याशौर्य्यप्राप्तं धनं तद्विभ
जनीय मिति कल्पतरु रत्नाक
रौ।पुनः कात्यायनः।ध्वजाहृतो

ऽर्द्धहरो वा पुत्रवित्तार्जनात् पि
ता।पुत्रवित्तार्जनात्ता।कृदीमा
हितभारो द्रव्यवत् प्रकाशत इ
ति न्यायात् पुत्रार्जितवित्तात्
पितृ द्व्यंशित्वं पितृधनानुपघात
विषयं भ्रातृधनोपघातविष
यत्वादर्जकस्य तु द्व्यंशित्वं भ्रातृ
धनोपघाते तु तेषा मध्ये को पि
तु वक्ष्यमाणव्यासवचनात्।पि
तुरर्द्धहरत्वञ्च पितृद्रव्योपघाता
द् गुणवत्ताद्वेति दायभागः।अ
नुपघाते पिता द्व्यंशहरः अर्जे
कन्तात् स्वय मपि द्व्यंशहरः इत
रेषा मनेषामंशं।भ्रातृद्रव्योपघाते
न तस्याप्येकांश इति द्व्यंशादि
शायो भेदकथने॥ ॥पुनः का
त्यायनः।गोप्रचारश्च रथ्या च व
स्त्रं यच्चाङ्गयोजितं।प्रयोज्यं न
विभज्येत शिल्पार्थेन्तु बृहस्प
तिः॥प्रयोज्यं यद्यस्य प्रयोज
नार्हं पुस्तकादि न तत्सर्वादि
भिः सह परिज्ञादिभि विभज
नीयं एव मेव दायभाग मदन
पारिजातादयः।याज्ञवल्क्यः।
पितृभ्याञ्चैव यद्दत्तं तत्तस्यैव य
तं भवेत्।पुत्र ईदृशो यैर्लङ्का
रादि दत्तं तत्तस्यैवेति मूल

पाण्युपाध्यायाः॥नारदः॥शौर्य्य
भार्य्याधने चोभे यच्च विद्याधं
न भवेत्॥त्रीण्येतान्यविभाज्या
नि प्रसादो यश्च पैतृक भ्रा
तुश्च सह भार्य्ययेति भरद्वा
जवचनात् भार्य्याप्राप्तिकाले
लब्धं धनं भार्य्याधन मौद्वाहिक
मित्यर्थः।चोभे इत्यत्र हित्वे
ति पाठे एतत्रिकं हित्वान्यद्वि
भजेदित्यनुवर्त्तते अत एता
न्यविभाज्यानीति।न वास्तुवि
भागो नोदकपात्रालङ्कारो प
युक्त स्त्रीवाससा मपां प्रचार
रथ्यानां विभागस्तु इति प्रजा
पति रिति।यस्मिन् वास्तुनि
येन गृहोद्यानादिकं कृतं अ
परेणापि स्थानान्तरे तथा कृत
ञ्चेत् तदा येन यत्कृतं तत्तस्यैव।
अन्यत्राप्येवं॥साधारणधनार्ज्जि
तेपि विशेषमाह व्यासः।साधा
रणं समाश्रित्य यत्किञ्चिद्वाह
नायुधं।शौर्य्यादिनाप्नोति धनं
भ्रातरः स्तत्र भागिनः॥तस्य भा
गद्वयं देयं शेषास्तु समभागिनः
।अत्र भ्रातर इत्युपलक्षणं
पितृव्यादयोपि बोद्धव्याः।त
स्यार्जकस्य।साधारणोपघा

ते यस्य यावतो ऽंशस्यात्यस्य
महतो वा उपघात स्तस्य तदनु
सारेण भागकल्पना कार्य्येति
दायभागः॥याज्ञवल्क्यः॥क्रमा
दभ्यागतं द्रव्यं हृत मभ्युद्धरेत्तु
यः।दायादेभ्यो न तद्दद्यात् वि
द्यया लब्ध मेव च॥पितृपिता
महागतं बलादन्यै र्हृतं यो ऽं
शयन्तराणां मनुज्ञया उद्धरति
तदंशयन्तरेभ्यो न दद्यात्॥ ॥
भूमौ तु विशेष यति शङ्खः॥पू
र्व्वनष्टाञ्च यो भूमि मेक एवो
द्धरेत् श्रमात्।यथाभागं भज
न्त्यन्ये दत्वांशन्तु तुरीयकं॥
एतद्वचनं स्मृति महार्णव का
मधेनु पारिजात प्रभृतिष्वलि
खनादयुक्त मेवेति रत्नाकरः
।तन्न दायभाग मिताक्षरा प्रभृ
तिभि र्धृतत्वात्।इति दायत
त्वे॥

अविमुक्तं क्ली वाराणसीक्षेत्रं।
यथा।कृते प्रलयकालेपि न त
त् क्षेत्रं कदाचन।विमुक्तं न
शिवाभ्यां यदविमुक्तं ततो वि
दुः॥अविमुक्तं तदारभ्य क्षेत्र
मेतदुदीर्य्यते।अस्यानन्दवनं
नाम पुरा कारि पिनाकिना।

क्षेत्रस्यानन्दहेतुत्वादविमुक्त
मनन्तरं॥आनन्दकन्दबीजाना
मङ्कुराणि यतस्ततः।ज्ञेयानि
सर्व्वलिङ्गानि तस्मिन्नानन्दका
नने॥अविमुक्त मिति ख्यात
मासीदित्थं घटोद्भव।इति का
शीखण्डे ३६ अध्यायः॥ ॥
अविरोधः पुं विरोधाभावः।य
था।श्रुति स्मृति विरोधे तु श्रु
तिरेव गरीयसी।अविरोधे स
दा कार्य्यं स्मार्त्तं वैदिकवत्
सदा॥इति आह्निक तत्वधृत जा
बालवचनं॥अपि च।अपस
र्पन्तु ते भूता ये भूता भूमि
पालकाः।भूतानां मविरोधेन
पूजाकर्म्म करोम्यहं॥इत्या
ह्निकतत्वं॥

अविलम्बितं त्रि त्वरायुक्तं।
तत्पर्य्यायः।अवलम्बितं ३।
यथा।अविलम्बि मत्तगण्डं
केषाङ्कुरवलम्बितं।इति ज
टाधरः॥

अविवादः पुं विवादाभावः।
यथा।यमो वैवस्वतो देवो य
स्तवैष हृदि स्थितः।तेन चेद
विवाद स्ते मा गङ्गां मा कुरून्
गमः।इति मानवे ८ अध्याये
९२ श्लोकः॥

अविवादी त्रि निर्व्विवादी।नञ्
पूर्व्वविवादशब्दादिन् प्रत्यये
न निष्पन्नः॥

अविवाहितः पुं स्त्री अनूढः।
नञ्पूर्व्वविवाहशब्दादितप्रत्य
येन निष्पन्नः॥

अविवाह्या स्त्री विवाहानर्हा।
यथा।सुमन्तुः।मातृपितृसम्ब
न्धा आसप्तमादविवाह्याः कन्या
भवन्ति।आपञ्चमादन्येषां मते
।नारदोपि।आसप्तमात् पञ्च
माच्च बन्धुभ्यः पितृमातृतः।
अविवाह्या सगोत्रा च समानप्र
वरा तथा॥सप्तमे पञ्चमे वापि
येषां वैवाहिकी क्रिया।ते च
सन्तानिनः सर्व्वे पतिताः शू
द्रतां गताः॥ ॥सवर्णः पितृ
पत्न्या मातुल स्तद्भ्रातरो मा
तुला स्तद्दुहितरो भगिन्य
स्तदपत्यानि भागिनेयानि ता
अविवाह्याः अन्यथा शङ्कस्मा (?)
रिण स्तथाप्यापयितु रेतद्देवे
नि।तास्तु यथा।पितृपितामहा
दीनां सप्तानां सन्ततिः सप्त
मीपर्य्यन्ता नोद्वाह्या।एवं पि
तृबन्धुप्रभृति सम्बन्धघटकानां

सप्तानां सन्ततिः सप्तमीपर्य्य
न्तानोद्वाह्या। एवं मातामह प्र
मातामहानां पञ्चानां सन्ततिः
पञ्चमीपर्य्यन्ता मोद्वाह्या। ए
वं मातृबन्धु प्रभृति सम्बन्धघट
कानां पञ्चानां सन्ततिः पञ्चमी
पर्य्यन्ता नोद्वाह्या। बन्धु तन्मा
त्रो रसन्तेपि पितृमातामह मातृ
मातामह प्रभृत्युपरितनानां प
ञ्चानां त्रयाणां सप्तमी पञ्चमी
पर्य्यन्ता नोद्वाह्येति। एवञ्च
पितृस्वसीतस्य मातामहकन्या
न्तरसंवेता मादाय सप्तमी प
ञ्चमीपर्य्यन्तायाः परीहारः।
एवं बन्धन्तरेप्यूह्यं। बन्धुपेतृ
या त्रिगोत्रगणने परतः सप्तैव
। स्र्वैतन्तु पितृ स्वसीतस्य मातुल
पुत्रस्यूपबन्धो ऽपि स्वापेतया अ
न्येषां बन्धूनां मातामहगोत्रा पे
तया त्रिगोत्रगणनं सर्व्वसाम
ञ्जस्यं स्यात्। अन्यथा पितृ पि
तामहदौहित्रीकन्यायाः पिता
महभगिनीपुत्र बन्धुपेतया
त्रिगोत्रात् परायाः विवाहः प्र
सज्येत स चायुक्तः पितृगोत्रा
पेतया तस्या स्त्रिगोत्रमध्यव
र्त्तित्वात्। एवं पितुः प्रमा
तामहदौहित्रीकन्यायाः पिता
महीभगिनीपुत्रबन्धुपेतया
त्रिगोत्रात् परायाः विवाहः प्रस
ज्येत स चाप्ययुक्तः पितामही
भ्रातृपुत्रबन्धुपेतया तस्या
स्त्रिगोत्रमध्यवर्त्तित्वात्। एवं
मातुः प्रपितामहदौहित्रीकन्या
या मातामहभगिनीपुत्र बन्धुपे
तया त्रिगोत्रात् परायाः विवाहः
प्रसज्येत स चायुक्तः वरस्य
मातामहापेतया तस्या स्त्रिगोत्र
मध्यवर्त्तित्वात्। एवं मातुः प्रमा
तामहदौहित्रीकन्याया माताम
हीभगिनीपुत्र बन्धुपेतया त्रि
गोत्रात् परायाः विवाहः प्रसज्ये
त स चायुक्तः। मातामहीभ्रातृ
पुत्र बन्धुपेतया तस्या स्त्रिगोत्रम
ध्यवर्त्तित्वात्। इति। एवं मातृस
पत्नीभ्रातृसन्ततिः। पितृ मातृस
गोत्रादयो ऽप्यविवाह्याः॥ ॥
॥असवर्णाया अविवाह्यत्वं
यथा। कलौ तु सवर्णाया अवि
वाह्यत्वमाह बृहन्नारदीये। अ
मुद्वयाज्ञास्वीकारः कमण्डलु
विधारणं। द्विजानां असवर्णासु
कन्यासूपयमस्तथा इत्यादि
। इत्युद्वाहतत्त्वं॥

अविवेकः पुं सदसद्विवेचना रा
हित्यं। यथा। देहात्मनो रविवे
कादस्यैवं शोको भवतीति तद्वि
वेकप्रदर्शनार्थं श्रीभगवानुवा
च अशोच्यानित्यादि। इति श्रीभ
गवद्गीता २ अध्यायस्य ११ श्लो
कटीका॥ तद्वति त्रि॥
अविवेकी त्रि विवेकशून्यः। य
था। तस्मादविवेकिनः सुखमा
त्रलिप्सवो नानाधिकारिणः। इ
ति मुक्तिवादस्य गादाधरीटी
का॥ अपि च। अस्मिन् प्रसन्ने दे
वेन्द्र परमं धाम लभ्यते। मया
विवेकिना तस्य हृदये जनिता
व्यथा॥ सर्व्वपापहरो विष्णुः स
मया व्यथितः कृतः। इति पा
द्मे क्रियायोगसारे ११ अध्या
यः॥
अविवेचकः त्रि विवेचनारहितः
। न विवेचकः अविवेचकः इति
नञ्समासनिष्पन्नः॥
अविशेषः त्रि विशेषाभावः। य
था। पितरो यत्र पूज्यन्ते तत्र
मातामहा ध्रुवं। अविशेषेण
कर्त्तव्यं विशेषान्नरकं व्रजेत्॥
इति श्राद्धतत्त्वं॥
अविश्रान्तः त्रि विश्रामरहितः
विश्रब्धे अमथानोः कश्यपयाना
न्तरं नञ्समास निष्पन्नः॥
अविश्रामं क्ली विश्रामराहित्यं।
यथा। अविश्रामं वहेत् भारं शी
तोसज्ञं न विन्दति। स सन्तोष
स्तथा नित्यं त्रीणि शिक्षेत गर्द्द
भात्॥ इति चाणक्यं॥
अविश्वस्तः त्रि विश्वासानर्हः।
यथा। न विश्वसेदविश्वस्ते विश्व
स्ते नातिविश्वसेत्। विश्वासात् भ
य मुत्पन्नं मूलान्यपि निकृन्तति
॥ इति चाणक्यं॥
अवीचिः पुं नरकशेषः।
अवीचिमत् क्ली यथा वैतरणी
ष्वयोदः प्राणरोध्यो विशसनं ला
भाभक्षः सारमेयादन मवी
चि रयःपान मिति। यस्त्विह वा
अनृतं वदति साक्ष्ये द्रव्यविनि
मये दाने वा कथञ्चित् स वै प्रे
त्य नरके अवीचिमत्यधः शि
रा निरवकाशे योजनशतोच्छ्रा
यात् गिरिमूर्द्धः संपात्यते। य
त्र जलमिव स्थल मश्मपृष्ठ
मवभासते तदवीचिमत् तिल
शो विशीर्य्यमाणशरीरो न म्रि
यमाणः पुन रारोपितो निपत
ति। इति श्रीभागवते

प स्कन्धे २६ अध्यायः॥
अवीरा स्त्री निष्पतिसुता। इत्य
मरमेदिन्यौ॥ तदन्नभोजने दो
ष प्रायश्चित्ते यथा। योविप्रोऽ
वीरान्नभोजी ऋतुस्नातान्न
भोजकः। भृगजीवी वार्द्धुषि
को विषहीनो यथोरगः॥ इति
ब्रह्मवैवर्त्ते प्रकृतिखण्डे २१
अध्यायः॥ ॥अपि च। अवीरा
न्नञ्च यो भुङ्क्ते योनिजीवी च
ब्राह्मणः। यः त्रिसन्ध्याविही
नश्च स गोहत्यां लभेत् ध्रुवं॥
इति च तत्रैव २७ अध्यायः॥
॥विष्णुः। गण गणिका स्तेन
गायनकान्नानि भुक्त्वा सप्तरात्रं
पयसा वर्त्तेत। अवीरास्त्री स्वर्ण
कार संसर्गपतितानाञ्च। इति
प्रायश्चित्तविवेकः॥ ॥सामा
न्येनाभोज्यान्नभोजनप्रकरणे
मनुः। नाश्रोत्रियकृते यज्ञे ग्रा
मयाजिकृते तथा। इत्यादि। अ
नर्चितं वृथामांसमवीरायाश्च
योषितः। इत्यादि कल्पोपक
म्य भुक्त्वा त्वन्यतमस्यान्नम
मत्या क्षपणं त्र्यहं। मत्या भु
क्त्वा चरेत् कृच्छ्रं रेतो विण्मू
त्रमेव च॥ इति। अवीरा

पतिपुत्रविहीना निःसम्बन्धिनी
। स्वसम्बन्धिन्याश्च श्राद्धादिना
भ्यनुज्ञानात् व्यवहारात् धना
धिकमोक्ष। इति च प्रायश्चित्तविवे
कः॥ ॥अस्या धनाधिकारो यथा
। याज्ञवल्क्यः। पत्नी दुहितरश्चै
व पितरौ भ्रातरस्तथा। तत्सुतो
गोत्रजो बन्धुः शिष्यः सब्रह्मचा
रिणः॥ एषामभावे पूर्वस्य ध
नभागुत्तरोत्तरः। स्वर्यातस्य ह्य
पुत्रस्य सर्ववर्णेष्वयं विधिः॥
तथा विष्णुः। अपुत्रस्य धनं प
त्न्यभ्यगामि तदभावे दुहितृ
गामि। इत्यादिना तेन अपौत्रपर्य्य
न्ताना मभावे पत्नी धनाधिका
रिणी। यथा कात्यायनः। भर्त्तुर
यं मृते पत्न्यो विन्यसेत् स्त्री यथे
ष्टतः। विद्यमाने तु संरक्षेत् क्ष
पयेत् तत्कुले ऽन्यथा॥ अपुत्रा
शयनं भर्त्तुः पालयन्ती व्रते
स्थिता। भुञ्जीतामरणात् क्षा
न्ता दायादा ऊर्द्ध माप्नुयुः॥ य
थेष्टत इति धर्म्मार्थं। तथा च
व्यासः। लोकान्तरस्थं भर्त्तार
मात्मानञ्च वरानने। तारयत्युभ
यं नारी नित्यं धर्म्मपरायणा॥
मदनपारिजातधृता स्मृतिः। य

थोदितमं लोके यच्चान्यत् पत्युः
समीहितं। तत्तद्गुणवते देयं प
तिप्रीणनकाम्यया॥ भर्त्तुः शय
नं पालयन्ती नान्यगामिनी। अ
तएव हरिवंशीयपुण्यकव्रतो
पाख्याने। दानोपवास पुण्यानि
सहितान्यप्यरुन्धति। निष्फ
लान्यसतीनां हि पुण्यकानि त
था शुभे॥ तथा बृहन्मनुः। अपु
त्राशयनं भर्त्तुः पालयन्ती व्रते
स्थिता। पत्न्येव दद्यात् तत् पिण्ड
कृत्स्न मंशं लभेत च। तत् पिण्ड
मित्यत्र तदित्यनुषज्यते। तच्छे
द्वेन भर्त्तुः परामर्शात् भर्त्तुः कृ
त्स्न मंशं यावदंशं हरेत् तत्र
वर्त्तेनोचितमात्रे। इति दायत
त्त्वं॥ ॥अस्याः पतिश्राद्धाधि
कारो यथा। पुत्रपौत्र प्रपौत्रा
भावे पत्नी। तथा च शङ्खः। पि
तु ~~पत्नी स्यात् तदभावे सहोद~~
देताकर्त्तव्यता पिण्डदानादिकक्रिया तदभा
वे। भा~~र्य्या पिण्डं पति~~ दद्यात्
वे पत्नी स्यात् तदभावे सहोदरः
॥ भार्य्या पिण्डं पतिर्दद्यात् भर्त्रे
भार्य्या तथैव च। श्वश्र्वादेश्च स्नु
षा चैव तदभावे द्विजोत्तमः॥
इत्यादि। अपुत्रा स्त्री यथा पु
त्रः पुत्रवत्यपि भर्त्तरि। पिण्डं

दद्यात् जलञ्चैव जलमात्रन्तु
पुत्रिणी॥ इति निर्म्मूले समूलते
पि वालदेशान्तरितपुत्र सद्भाव
विषयमिति श्राद्धविवेक प्रभृत
यः। इति॥ ॥अस्या भर्त्रादितर्पणा
धिकारो यथा स्मृतिः। तर्पणं प्र
त्यहं कार्य्यं भर्त्तुः कुश तिलोद
कैः। तत् पितुस्तत् पितुश्चा
पि नाम गोत्रादिपूर्वकं॥ एतत्त
र्पणं पुत्र पौत्राद्यभाव विषय
मिति मदनपारिजातः। इति॥ ॥
मृताया स्तस्या आद्यश्राद्धादिप
ञ्च दशश्राद्धं कर्त्तव्यं तत्र सपि
ण्डनं। यथा। अत्र सपत्नीपुत्रस्य
पुत्रत्वाभिदेशात् तत्सत्वेपि
स्त्रीणां सपिण्डनं मैथिले रुक्तं
तच्च। पुत्रेणैव न कर्त्तव्यं सपि
ण्डीकरणं स्त्रियाः। पुरुषस्य पुन
स्त्वन्येभ्यः पुत्रादयोपि येषु इति
लघुहारीतवचने एवकारेण अ
निदिष्ट पुत्रनिषेधात्। पुत्रेणेति।
तत्सत्वमात्र विवक्षितं। सपि
ण्डीकरणं तासां पुत्राभावे
न विद्यते। इति मार्कण्डेय पुरा
णोक्त वाक्यत्वात्।
यानि पञ्च दशाद्यानि
अपुत्रस्येतराणि च

एकस्यैव न दातव्य मपुत्राया
श्च योषितः॥ इति छन्दोगपरि
शिष्टेन आ युग्मच्च दश आद्धैः
प्रेतत्व परीहारोक्तत्वाच्च। एत
त्पत्नु रभावे द्रष्टव्यं। ततश्च
शिशो पुत्रे अन्येनापि सपि
ण्डनं। एवं पतिसत्त्वेपि। अत
एव मैथिलै रवीरायाः सपि
ण्डनं नास्तीत्युक्तं। इति च
शुद्धितत्वं॥
अवेला स्त्री अपराह्नः॥ इति लो
कप्रसिद्धं। वेलाशब्देपि॥
अवेक्षणं क्ली दर्शनं। यथा।
कृताकृतावेक्षणावत् स्वयं न
तु जपोपवेशनस्य कर्त्तव्यता
ता। इति संस्कारतत्वं॥
अवेक्षितं त्रि दृष्टं। यथा मनुः।
केशकीटावपन्नञ्च पदा स्पृष्ट
ञ्च कामतः। भ्रूणघ्नावेक्षितञ्चै
व संस्पृष्टञ्चाप्युदक्यया॥ इत्या
ह्निकाचारतत्वं॥
अवोक्षणं क्ली प्रोक्षणविशेषः
। न्युब्जहस्तेन जलक्षेपणं। यथा
हारीतः। तस्मादद्भिरवोक्ष्य मद्
यादालभ्य एव च। अवोक्ष्य
प्रोक्ष्य इति रत्नाकरः॥ तत्र
वर्द्धमानधृतं। उ
त्तानेन तु हस्तेन प्रोक्षणं सम्
दाहृतं। न्युब्जेनाभ्युक्षणं प्रोक्तं
तिरश्चावोक्षणं स्मृतं॥ इति शु
द्धितत्वं॥
अव्यक्तरागः पुं ईषल्लोहितव
र्णः। तत्पर्य्यायः। ताम्रः ३ गौ
रः ४ इति जटाधरः॥
अव्यङ्गः त्रि व्यङ्गरहितः॥ अवि
कलाङ्गः। यथा। तत्र आहूय ध
र्म्मज्ञं ब्राह्मणं वेदपारगं। अव्यङ्गा
वयवं पूज्य गन्धस्रगाद्यैर्नादि
भिः॥ इति मत्स्यपुराणे ९९ अ
ध्यायः॥
अव्यङ्गा स्त्री शूकशिम्बी। इति
कोचित्॥ अमरकोषे अव्यण्डा
इति भट्टीकायां अव्यण्डा इति
च पाठः॥
अव्यङ्ग्यं क्ली व्यङ्ग्यालङ्काररहि
तकाव्यं। यथा। सव्यङ्ग्य मुत्तम
काव्य मव्यङ्ग्य मधमं स्मृतं।
किञ्चिद्व्यङ्ग्यसमायुक्तं मध्यमं
परिकीर्त्तितं॥ इति काव्यचन्द्रि
का॥
अव्यथिः पुं अश्वः। संग्रामेन
व्यथतीति अव्यथिः। व्यथभय
सञ्चलनयोः सर्व्वधातुभ्य इ
नि इन् प्रत्ययः ततो नञ्

समासः। वेदप्रयोगोयं॥
अव्यथः त्रि अमोघः। यथा।
दुर्निवार्य्यञ्च दुर्द्धर्षं मव्यथं वैरि
घातकं। तेजसा चक्रतुल्यञ्च स
र्व्वशस्त्रास्त्रघातकं॥ इति ब्रह्मवै
वर्त्ते प्रकृतिखण्डे ९ अध्यायः॥
अव्यवस्था स्त्री शास्त्रविरुद्धव्यव
स्था। इति नञ्समासनिष्पन्ना॥
अव्यवस्थितः त्रि नीतिशास्त्रा
दि व्यवस्थानभिज्ञः। यथा। क्वचि
द्रुष्टः क्वचित्तुष्टो रुष्टस्तुष्टः क्ष
णे क्षणे। अव्यवस्थितचित्तस्य
प्रसादोपि भयङ्करः॥ इति हि
तोपदेशः॥
अव्यवहार्य्यः त्रि व्यवहारायो
ग्यः। यथा। ज्ञानत आण्डाला
न्त्यस्त्रीगमने तत्तुल्यतया द्विगु
णव्रताचरणे कृतेपि न व्यवहा
र्य्यः। यथा याज्ञवल्क्यः। प्राय
श्चित्ते रपैत्येनो यदज्ञानकृतं भ
वेत्। कामतो ऽव्यवहार्य्यस्तु
वचनादिह जायते॥ पापान्तरे
ष्वव्यवहार्य्यत्वं याज्ञवल्क्योक्तं
। शरणागतबालस्त्रीहिंसकान्
संवसेन्न तु। चीर्णव्रतानपि सदा
कृतघ्नसहितानिमान्॥ अत्र च
कामतो महापातकादि हन्तृत्
पापकर्त्तुरव्यवहार्य्यत्वदर्शनात्
कामतो बहुतरगुणयुक्तशरणा
गतादिहन्तृणामव्यवहार्य्यत्वं न
तु हीनतरहन्तृणां अन्यथा विष
मशिष्टतापत्तिः स्यात्। इति प्रा
यश्चित्ततत्वं॥
अव्यवहितं क्ली व्यवधानशून्यं।
तत्पर्य्यायः। लग्नं १ इति श
ब्दरत्नावली॥
अव्यवहृतः त्रि अकृतव्यवहारः
। इति नञ्समास निष्पन्नः॥
अव्याजः पुं छलाभावः॥ यथा
इदं किलाव्याजमनोहरं वपुः
तपः क्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति
॥ इत्यभिज्ञानशाकुन्तलनाट
के १ अङ्कः॥ शीघ्रं। यथा। सेक्त
व्यो यदि मारव स्तरु रयं पाथो
द पाथोलवै स्त्वव्याजं परिषिञ्च
किं विरमसे कालः परिक्राम
ति। मूले सिक्त रसे दले विग
लिते शीर्णे तथा वल्कले न
स्यादस्य परिस्थितेः प्रभु रहो
धारापि वारां तव॥
इत्युद्भटः॥
अव्यापं त्रि व्याप्तिरहितं।

यथा।नापि साध्यव्यापकाव्या
प्यत्वेन व्याप्तिविरहोऽन्यायकत
या साध्यव्याप्य व्यापकत्वेनोपा
ध्ये रेव साध्यव्यापकत्व साधना
त्।तस्मादुपाधि र्हेत्वा भासान्त
र मिति।इत्युपाधिवादचिन्ता
मणिः।अपिच।अव्याप्यवृत्ति
त्वादिको विशेषगुण इष्यते।इति
भाषापरिच्छेदः॥अव्याहतं त्रि
व्याघातशून्यं।यथा।यस्य त्रि
कालमप्यलं ज्ञानमव्याहतं स
दा।वेत्ति विद्यामविद्याञ्च स
वाच्यो भगवानिति॥इति शब्द
माला॥किञ्च।विष्णुपुराणे
।अन्ते बलाय मे भूमेरणा मध्य
विलस्य चाभवेत्ततत् पारिण
तो ममास्त्वव्याहतं सुखं॥प्रा
णापान समानानामुदान व्या
नयो स्तथा।अन्ने तुष्टिकरञ्चा
स्तु ममास्त्वव्याहतं सुखं॥
इत्याह्निकाचारतत्त्वं॥

अव्याहतः त्रि अकथितः।न
व्याहतः अव्याहतः नञ् समा
सनिष्पन्नः॥
अश ऊ उ· न व्याप्ति संहत्योः।
ऊ उ· अशिष्यते क्ता

त्यते।न अश्नोति।संहतिः समू
हः।इति दुर्गादासः॥
अश ग भोजने।अश्नात्यन्नं
बुभुक्षितः।इति दुर्गादासः॥
अशक्तः त्रि असमर्थः।यथा।
मनुः।विभृयादेच्छतः सर्वान्
ज्येष्ठो भ्राता यथा पिता।भ्राता
शक्तः कनिष्ठो वा शक्त्यपेक्षा
कुले स्थितिः॥इति दायतत्त्वं
॥उपवासेष्वशक्तानां नक्तं भो
जनमिष्यते।इति तिथ्यादितत्त्वं
॥ ॥

अशक्यं त्रि असाध्यं।यथा।
अशक्ये अध्यवसायः समर्थना
।इति मुग्धव्याकरणं॥
अशिक्षितं त्रि शिक्षारहितं।य
था।यत्र सारथेरकौशल्यात्
यानमन्यथा गच्छति तत्र हिं
सायामशिक्षितसारथिनियो
गात् स्वामी द्विशतं दण्डं दाप्यः
स्यात् इति कुल्लूकभट्टव्याख्या
नात्।इति प्रायश्चित्ततत्त्वं॥अ
शीतः त्रि शीताभावयुक्तः।य
था।अशीता स्तथा माघे फा
ल्गुने पशु पक्षिणो।चैत्रे जल
चराः सर्वे वैशाखे नरवानरौ
॥इति पुराणं॥

अशीतिः स्त्री सङ्ख्याविशेषः।आ
शी इति भाषा।यथा मनुः।अ
शीतिभागं गृह्णीयात् मासात् वा
र्द्धुषिकः शतात्।द्विकं शतं वा
गृह्णीयात् सतां धर्म्ममनुस्मर
न्॥इत्याह्निकाचारतत्त्वं॥
अपिच।अशीति र्यस्य वर्षाणि
बालो वाप्यूनषोडशः।प्राय
श्चित्तार्द्ध मर्हन्ति स्त्रियो रोगिण
एवच॥इति प्रायश्चित्ततत्त्वं॥

अशुद्धं त्रि अपवित्रं॥अकृतशो
धनं।अशौचयुक्तं।यथा।शङ्खः
।ततः श्राद्धमशुद्धो न कुर्य्या
देकादशे तथा।कर्त्तुस्तात्का
लिकी शुद्धि रशुद्धः पुन रेव सः
॥इति शुद्धा भर्त्तु श्चतुर्थेऽह्नि
अशुद्धा दैवपैत्रयोः।दैवे कर्म्म
णि पैत्रे च पञ्चमेऽहनि शुद्ध्य
ति॥इति च शुद्धितत्त्वं॥

अशुभं क्ली अमङ्गलं।यथा।
सर्व्वाशुभानां परिमोक्षकारि स
ज्जनं देववरस्य विष्णोः।इति
ज्योतिस्तत्त्वं॥अपि च।मदन
पारिजातधृतं।अशुभं स्वप्न
नं दृष्ट्वा देवब्राह्मणपूजनं।

।दानं कुर्वीत कुर्य्याच्च स्नानं स
र्व्वौषधीजलैः।इति तिथ्यादि
तत्त्वं॥
अशून्यशयनव्रतं क्ली श्रावणकृ
ष्णद्वितीयाकर्त्तव्यव्रतविशेषः।
यथा।ब्रह्मोवाच।भगवन् पुरु
षस्येह स्त्रियाश्च विरहादिकं।
शोक व्याधि भयं दुःखं न भवे
द्येन तद्वद॥भगवानुवाच।
श्रावणस्य द्वितीयायां कृष्णायां
मधुसूदनः।क्षीरार्णवे सलक्ष्मी
कः सदा वसति केशवः॥तस्यां
संपूज्य गोविन्दं सर्व्वान् कामा
न समश्नुते।गो भू हिरण्य
दानानि सप्तकल्पशतानुगं॥
अशून्यशयना नाम द्वितीया
या प्रकीर्त्तिता।तस्यां सम्पूजये
द्विष्णु मेभि र्मन्त्रै र्विधानतः॥
श्रीवत्सधारिन् श्रीकान्त श्री
धाम श्रीपते ऽव्यय।गार्हस्थ्य
मा प्रणाशं मे यातु धर्म्मार्थका
मद॥अग्नयो मा प्रणश्यन्तु दे
वताः पुरुषोत्तम।पितरो मात
रो मा प्रणश्यन्तु मत्तो दाम्पत्य
भेदतः॥लक्ष्म्या वियुज्यते देवो
न कदाचित् यथा भवान्।त
था कलत्रसम्बन्धो देव मा मे

विधुन्ध्वज॥लक्ष्म्या न शून्यं वर
द यथा ते शयनं सदा।शय्याम
माप्यशून्यास्तु तथैव मधुसूदन
॥गीत वादित्र निर्घोषं देवस्या
ग्रे तु कारयेत्।घण्टा भवेदश
क्तस्य सर्ववाद्यमयी यतः॥एवं
सम्पूज्य गोविन्द मश्नीयात्तैलव
र्जितं।नक्तं मक्षारलवणं याव
न्मत् स्याच्चतुष्टयं॥ततः प्रभाते
संजाते लक्ष्मीपतिसमन्वितं।
दीपान्नभाजनैर्युक्तां शय्यां द
द्यादिलक्षणां॥पादुकोपानह
च्छत्र चामरासन संयुतां।अभी
ष्टोपस्करैर्युक्तां शुक्लपुष्पाम्ब
राहृतं॥सोपधानकविश्रान्तां
फलैर्नानाविधैर्युतां।तथाभर
णं धान्यैश्च यथाशक्त्या सम
न्वितं॥अव्यङ्गाङ्गाय विप्राय
वैस्नवाय कुटुम्बिने।दातव्या
वेदविदुषे न बकव्रतिने क्वचित्
॥तत्रोपवेश्य दाम्पत्य मलंकृ
त्य विधानतः।पत्न्या स्तु भाज
नं दद्यात् भक्ष्य भोज्यसमन्वितं
ब्राह्मणस्यापि सौवर्णीं मुपस्कर
समन्वितां।प्रतिमां देवदेवस्य
सोदकुम्भां निवेदयेत्॥एवं य
स्तु पुमान् कुर्यादशून्यशयनं
हरेः।वित्तशाठ्येन रहितो नारा
यणपरायणः॥न तस्य पत्न्या
विरहः कदाचिदपि जायते।नारी
वा विधवा ब्रह्मन् यावच्चन्द्रा
र्क तारकं॥न विरूपं नशोकार्त्तं
दाम्पत्यं जायते क्वचित्।न पुत्र
पशुरत्नानि क्षयं यान्ति पितामह
ह॥सप्तकल्पशतानि चाऊर्द्ध
मशून्यशयने विस्नुलोके मही
यते॥इति मत्स्यपुराणे अशून्य
शयनव्रतं ८० अध्यायः॥

अशोकः पु स्वनामख्यातपुष्प
वृक्षविशेषः।अस्य पर्य्याय ग
णः।अशोको हेमपुष्पश्च व
ञ्जुल स्ताम्रपल्लवः।कङ्केलिः
पिण्डपुष्पश्च गन्धपुष्पो नट स्त
था॥अशोकः शीतल स्तिक्तो
ग्राही वर्ण्यः कषायकः।दोषा
पची तृषा दाह कृमि शोष विषा
स्रजित्॥इति भावप्रकाशः॥अ
स्य कलिकाभक्षणविधि रशो
काष्टमीशब्दे द्रष्टव्यः॥
अशोकः त्रि शोकरहितः।यथा
त्वा मशोक हराभीष्ट मधुमा
ससमुद्भव।पिबामि शोकसन्त
प्तो मा मशोकं सदा

कुरु॥इति तिथ्यादितत्त्वं॥
अशोकषष्ठी स्त्री चैत्रस्य शुक्ला
षष्ठी।तस्यां षष्ठीपूजा यथा।चै
त्रे मासासिते पक्षे षष्ठ्यां षष्ठीं
समर्च्चयेत्।सुखाय पुत्रलाभा
य शुक्लपक्षे तथैव च॥इत्युत्त
रकामाख्यातन्त्रे ११ पटलः॥ ॥
प्रसूत्या द्वादशे मासि सम्पूज्या
पत्यहृदये।सुते जाते तथा षष्ठ्यां
षष्ठीद्वादश रूपिणी॥वैशाखे
चान्दनी षष्ठी ज्यैष्ठे चारण्यसं
ज्ञिता।आषाढे कार्दमी ज्ञेया
श्रावणे लुण्ठनी मता॥भा
द्रे चपेटी विख्याता दुर्गाख्या
श्वयुजे तथा।नाडाख्या का
र्त्तिके मासि मार्गे मूलकरूपि
णी॥पौषे मास्यान्नरूपा च शी
तला तपसि स्मृता।गोरूपिणी
फाल्गुने च चैत्रे ऽशोका प्र
कीर्त्तिता॥इति स्कन्दपुरा
णं॥
अशोकाष्टमी स्त्री चैत्रमासीय
शुक्लाष्टमी।तत्राष्टसंख्यकाशो
ककलिकायुक्तजलपानं कर्त्त
व्यं।यथा।अथाशोकाष्टमी
स्कान्दे।मीन मघौ शुक्लपक्षे
अशोकाख्या तथाष्टमी। पि
वेदशोककलिकाः स्नायाद्धौ
हित्यवारिणि॥अशोकाख्यतु
पादानात्तिथिमात्रेपि तत्पा
ने।फलन्तु मन्त्रलिङ्गात् शोक
राहित्य मवगन्तव्यं।लौहित्यवा
रिणी ब्रह्मपुत्राख्यनदजले।पु
नर्वसुयोगे तु फलाधिक्यं।आह
लिङ्ग गरुडपुराणयोः।अशोक
कलिका ह्याष्टौ ये पिबन्ति पुन
र्वसौ।चैत्रे मासि सिताष्टम्यां
न ते शोक मवाप्नुयुः॥पानम
न्त्रस्तु।त्वा मशोक हराभीष्ट मधु
मासस मुद्भवे।पिबामि शोकस
न्तप्तो।मा मशोकं सदा कुरु॥
स्त्रीशूद्रकर्त्तृक पानेपि प्रागुक्त
युक्तेः स्वयं मन्त्रः पठनीयः।
स्त्रीपक्षे ऊहोपि नास्ति विहित
मेकादशीतत्त्वे।अशोकपानन्तु
पञ्चमादिप्रहरव्यापिण्या मष्ट
म्यां भावात् द्वितीयोक्तवत् इति
तिथ्यादितत्त्वं॥ ॥अपि च।अत्र
स्नानोजले बुधवारे पुनर्वसु
नक्षत्रयुक्तशुक्लाष्टम्यां वाजपे
यसहस्रजन्यफलसमफलप्राप्ति
कामः स्नायात्।ब्रह्मपुत्रे तु सर्व्व
पापक्षयपूर्व्वक सर्व्वतीर्थस्नान
जन्यफलसमफलप्राप्तिकामः

स्नायात्। स्नानेतिकर्त्तव्यतां वि
धाय। ॐ ब्रह्मपुत्र महाभाग सा
न्तनोः कुलनन्दन। अमोघागर्भसं
भूत पापं लौहित्य मे हर॥ इति
पठित्वा स्नायात्। केवलशु
क्लाष्टम्यां ब्रह्मपदगमनफलं
। पञ्चमार्द्धप्रहरव्यापिन्यां पुन
र्वसुयुक्तायां केवलायाञ्चा
शुक्लाष्टम्यां शोकरहितत्वका
मः अष्टावशोककलिका अ
हं पिबे इति सङ्कल्प्य त्वामशो
क हराभीष्ट मधुमाससमुद्भ
व। पिबामि शोकसन्तप्तो माम
शोकं सदा कुरु॥ इति पठित्वा वि
ष्णुपदजलमिश्रिता अशोकक
लिका अष्टौ पिबेत्। स्त्रीशूद्रानुप
नीतै रपि मन्त्रः पठनीयः पौरा
णिकत्वात्। स्त्रीपक्षे लिङ्गोहो
नास्ति प्रकृतेः समवेतार्थत्वा
त्॥ इति कृत्यतत्त्वं॥

अशोच्यं त्रि शोकायोग्यं। अशो
च्यानन्वशोचस्त्वं प्रज्ञावादां
श्च भाषसे। गतासूनगतासूं
श्च नानुशोचन्ति पण्डिताः॥
इति श्रीभगवद्गीतायां २ अ
ध्याये ११ श्लोकः॥

अशौचं क्ली वैदिककर्म्मानर्हत्व
प्रयोजकीभूतसंस्कारविशेषः।
यथा। वैदिककर्म्मानर्हत्वप्रयो
जकसंस्कारविशेषरूपमशौचं।
वैदिककर्म्मार्हत्वप्रयोजकसं
स्काररूपं शौचं। न चाशौचाभाव
एव शुद्धि र्न संस्कारविशेष इति
वाच्यं। अशुचानां यागपर्य्येति ति
न वर्द्धये द्दत्तानि इत्येताभ्यां म
शौचे पापपर्य्यायत्वप्रदर्श
नात् अशौचपदस्य यथाभाव
रूपत्वं। तथा। देवाश्च पितर श्चै
व पुत्रे जाते द्विजन्मनां। आया
न्ति तस्मात्तदहः पुण्यं पक्षञ्च
सर्व्वदा॥ इत्यादित्यपुराणीयेना
शौचे पुण्यपददर्शनात् शौच
स्यापि भावरूपता प्रतीयते॥ इति
शुद्धितत्त्वं॥

मन्त्रदगुरुमरणे अशौचं यथा।
गृहीतो देवतामन्त्रः सावित्री
ग्रहणे कृते। यस्मात्तस्य त्रिरात्र
न्तु ब्रह्मविद्याग्रहो यतः॥
उपनीयाध्यापको यस्तस्मि
न्नपि त्रिरात्रकं। वेदवेदाङ्ग
शास्त्राणां व्याख्याने शिक्षितं
यतः॥ ज्ञानं प्रतिष्ठितं येन

वेदाभ्यासो यतः कृतः। तस्मि
न्मृते चैकरात्रं गुरौ शिष्ये तथै
व च॥ इति मत्स्यसूक्ते महातन्त्रे
२१ पटलः॥ अपि च त्रिरात्रं प
रते चैव त्र्यहाणि शिष्यसन्त
तौ॥ इति विज्ञानतत्त्वं॥ ॥अ
यत् पूर्व्वलिखितं॥ अश्मरी
स्त्री रोगविशेषः। पातरी इति
भाषा। यथा। अथाश्मर्य्यधिका
रः। अत्राश्मर्य्याः सन्निकृष्ट
निदानं सङ्ख्याञ्चाह। वातपित्त
कफैस्तिस्रश्चतुर्थी शुक्रजा
मता। प्रायः श्लेष्माश्रयाः सर्व्वा
अश्मर्य्यः स्यु र्यमोपमाः॥ श्ले
ष्माश्रयाः श्लेष्मसमवायिका
रणाः। शुक्रजायास्तु शुक्रस्यै
व समवायिकारणत्वात्। अन्य
त् शुक्राश्मर्य्या मपि कफका
रणत्व मिच्छन्ति। प्रायःशब्द
श्चात्र विशेषार्थः। यमोपमा श्चि
कित्सां विना॥ ॥सम्प्राप्ति मा
ह। विशोषयेद्वस्तिगतं सशुक्रं
मूत्रं सपित्तं पवनः कफं वा
। यदा तदाश्मर्य्युपजायते तु
क्रमेण पित्तेष्विव रोचना गोः
॥ पवनो वस्तिगतं सशुक्रं
मूत्रं सपित्तं कफं

वा शोष मुपनयेत् यदा तदा
अश्मरी क्रमेण क्रमशो वर्द्धमा
ना। यथा गोः पित्तेषु रोचनेव
त्यन्वयः॥ ॥पूर्व्वरूप माह।
नैकदोषाश्रयाः सर्व्वा अथासां
पूर्व्वलक्षणं। वस्त्याध्मानं तदास
न्नदेशेषु परितोऽतिरुक्॥ मूत्रे
वस्तसगन्धत्वं मूत्रकृच्छ्रं ज्वरो
ऽरुचिः। वस्तः छगलकः॥ ॥
सामान्यलक्षण माह॥ सामा
न्यलिङ्गं रुङ्नाभि सेवनी वस्ति
मूर्द्धसु। विशीर्णधारं मूत्रं स्यात्
तया मार्गनिरोधने॥ तद्व्यपाया
त् सुखं मेहेदच्छं गोमेदकोप
मं। तत् संक्षोभात् क्षते सास्र
मायासाच्चाति रुग्भवेत्॥ वस्ति
मूर्द्धा नाभे रुर्द्धदेशः। विशीर्ण
धारं सविच्छेदधारं। तया अ
श्मर्य्या। मार्गः मूत्रवाहिस्रोतः
। तद्व्यपायात् कदाचित्तद्धुना
अश्मर्य्या मूत्रमार्गादन्यत्र ग
मनात्। सुखं मेहेत् मूत्रयेत्।
गोमेदकोपमं गोमेदको मणिः
किञ्चिल्लोहित स्तद्वर्णं। तत्
संक्षोभात् तस्या अश्मर्य्याः स
ञ्चारात्। घर्षणेन मूत्रवहे स्रोत
सि क्षते जाते सास्रं सरक्तं

मेहेत।आयासात् प्रवाहनादि
जनितात्॥ ॥वातोल्वणा माह
।तत्र वाताद्भृशं त्वार्त्तो दन्तान्
खादति वेपते।मृद्नाति मेहनं
नाभिं पीडयत्यपि सङ्कृणन्॥सा
निलं मुञ्चति शकृन्मुहुर्मेहति
बिन्दुशः।श्यावारुणाश्मरी चास्य
स्याच्चिता कण्टकैरिव॥शङ्कृण
न् आर्त्तनादं कुर्वन् नाभिदेशं पी
डयति।शकृत् पुरीषं सानिलं मु
ञ्चति।मुहुर्वारंवारं।बिन्दुशः
बिन्दुं बिन्दुं मेहति मूत्रयेत्।श्या
वेत्यादि श्यावा किञ्चित्कृष्णामा
।अरुणा किञ्चिद्रक्ता।एवं चा
श्मर्य्या वर्णाकार कथनं आ
कृष्याणां प्रत्यक्ष संवादि शा
स्त्रप्रामाण्य ख्यापनार्थं माह।
।चिता कण्टकैरिव बदरीबीज
वत् खराङ्कुरैर्वेष्टिता॥ ॥पित्तो
ल्वणा माह।पित्तेन दह्यते व
स्तिः पच्यमान इवोष्मवान्।भल्ला
तकास्थि संस्थाना रक्ता पीता सिता
श्मरी॥दह्यते सात्ताद्ग्निनेवावस्ति
रिति मूत्रकोशः।पच्यमान इव
क्षारेणेव।ऊष्मवान् उष्णस्पर्शः
॥ ॥कफोल्वणा माह।वस्तिर्नि
स्तुद्यत इव श्लेष्मणा शीतलो गुरुः

।अश्मरी महती श्लक्ष्णा मधुवर्णा
थवा सिता॥महती कुक्कुटाण्डव
त्।मधुवर्णा ईषत् पिङ्गलशुक्ला॥
एता भवन्ति बालानां तेषा मेवहि
भूयसा।आश्रयोपचयाल्पत्वात् ग्र
हणाहरणे सुखाः॥एताः दोषत्र
यजनिताः बालानां स्युः।यतः
सर्वा एवाश्मर्य्यो विशेषतः श्ले
ष्म समवायिकारणाः।बाला स्तु
विशेषत स्तन्निदान सेविनो भव
न्ति।उक्तञ्च खरनादेन।प्रायेणैता
अश्मर्य्यो दिवास्वप्न समशनाध्य
शन स्निग्ध शीत गुरु मधुराहार
प्रियत्वात् विशेषेण बालानां भ
वन्तीति।भूयः पदोपादानात्
महतामपि त्रिदोषजनिता भव
न्ति।तेषा मेव बालाना मेवाग्रह
णाहरणे सुखाः ग्रहणं निष्का
सनार्थ मङ्गुलिभ्यां।आहरणं पा
त्रनाडिशस्त्रैकं निष्कासनं तत्र सुखाः
सुखदाः।तत्र हेतु माह।आश्रयो
पचयाल्पत्वा दिति आश्रयो बस्तिः
तस्योपचयः स्थौल्यं तस्याल्प
त्वात्॥ ॥शुक्राश्मरी माह।
शुक्राश्मरी तु महतां जायते
शुक्रधारणात्। स्थानच्युत
मनेकार्थत्वात् तु शब्दो

ऽवधारणार्थः।तेन महता
मेव न तु बालानां।तेषां वस्ति
मात्र सम्प्राप्ते रसम्भवात्।न
तु शुक्राभावो वाच्यः।शुक्रधा
रणात् वेगात् व्यवमानस्य शु
क्रस्य धारणात्॥शुक्राश्मर्य्याः
सम्प्राप्ति माह।स्थानाच्च्युत मशु
क्रं हि मुष्कयो रन्तरे ऽनिलः।
शोषयत्युपसंहृत्य शुक्रं तच्छु
क्र मश्मरी॥अनिलः मैथुनेवे
गधारणेन च्युतं शुक्रं।मुष्क
योः मेढ्रसहितयोः।मेढ्र वृष
णयो रन्तर इति सुश्रुत वचना
त्।तेन मेढ्र वृषण मध्यगत
वस्तिमुखे उपसंहृत्य एकीकृत्य
शोषयति।तच्छुक्र मश्मरी तथा
भूतं शुक्रमेवाश्मरी॥अस्या ल
क्षणमाह।वस्तिरुङ् मूत्रकृच्छ्रत्व
मुष्कश्वयथुकारिणी।तस्यामुत्प
न्नमात्रायां शुक्रमेति विलीयते॥
पीडिते त्ववकाशे ऽस्मिन्नश्मर्य्ये
व च शर्करा।तस्यां शुक्राश्मर्य्यां
उत्पन्नमात्रायां यदा सा कथमपि
विलीयते विलयं याति।तदा शु
क्रमेति मूत्रमार्गेण प्रवर्त्तते।पी
डिते त्ववकाशेऽस्मिन् तु शब्दो
॥ ॥ ॥ ॥

ऽवधारणे।तेन अस्मिन्नेव अव
काश स्थाने मेढ्र वृषणयो रन्त
रे पीडिते सति सा विलीयते अ
न्तर्लीना भवति।अवस्थाभेदा
दश्मरी शर्करा सिकता भवती
त्याह।अश्मर्य्येव च शर्करा च
कात्त् सिकता च भवति।शर्क
रतयोश्च भेदो महत्वाल्पत्वा
भ्यां बोद्धव्यः॥कथं अश्मरी
शर्करा भवतीत्याह।सा भिन्न
मूर्त्ति र्वा तेन शर्करेत्यभिधीय
ते।सा अश्मरी॥शर्करायाः पा
त मवरोधश्च सहेतुक माह।अ
णुशो वायुना भिन्ना सा तस्मिन्न
नुलोमगे।निरेति सहमूत्रेण प्र
तिलोमे विबध्यते॥मूत्रस्रोतः प्र
वृत्ता सा सक्ता कुर्य्यादुपद्रवान्।
सा अश्मरी।तस्मिन् वायौ।अ
नुलोमगे मूत्रस्रोतःसु सम्यक्
प्रवृत्ते मूत्रेण सह सा शर्करा
निरेति पतति।प्रतिलोमगे ऊ
र्द्ध्व प्रवृत्ते वायौ विबध्यते।तदा
मूत्रस्रोतःस्थिता सक्ता लग्ना
स्यात्तदा उपद्रवान् कुर्य्यात्।
तानेवोपद्रवानाह।दौर्बल्यं स
दनं कार्श्यं कुक्षिशूल मथारु
चिं।पाण्डुत्व मुष्णवातञ्च तृष्णा

हृत्पीडनं वमिं ।। दौर्बल्यमिं-
द्रियाणां ।। सदनं अवसन्नत्वं ।। का-
र्ष्यं मङ्गानां ।। उदरैकदेशे शूलं
।। उपवातं मूत्राघात विशेषं ।।
।। अश्मरी शर्करा सिकता ना-
मरिष्टमाह ।। प्रसूत नाभि वृष-
णं वद्धमूत्रं रुजान्वितं ।। अश्मरी
त्वपयात्याशु शर्करा सिकता-
न्विता ।। शर्करा सिकतेति च नाम
द्वयमन्वर्थं ।। ।। अथाश्मर्य्याश्चि-
कित्सा ।। शुण्ठ्यग्निमन्थ पाषाण-
भिद्वरुण गोक्षुरैः ।। अभयार-
ग्वधफलैः क्वाथं कृत्वा विचक्षणः
।। रामठ क्षार लवण चूर्णं क्षिप्त्वा
पिवेन्नरः ।। अश्मरी मूत्रकृच्छ्रञ्च
नाशमायाति निश्चितं ।। क्वाथः शु-
ण्ठ्यादिनामायं दीपनः पाचनः परं
। हन्ति कोष्ठाश्रितं वातं कण्ठ
रुग्गाद मेहजं ।। हृत् क्रुष्ठो ।। शु-
ण्ठ्यादिक्वाथः ।। ।। एलोपकुल्या
मधुकाश्मभेद कौन्ती श्वदंष्ट्रा
वृषकोरुबूकैः ।। शृतं पिवेदश्म
जतु प्रगाढं सशर्करं मूत्रगदे
ऽश्मरीषु ।। उरुबूक एरण्ड सत्या
च मूत्रं मूत्रगदे मूत्रकृच्छ्रे ।। एला-
दिक्वाथः ।। ।। कुष्माण्डकरसं हिङ्गु
यवक्षारयुतं पिवेत् ।

वस्तौ मेढ्रे शूलयुक्ते अश्मरी श-
र्करान्वयेत् ।। ।। वरुणत्वक् शि-
लाभेद शुण्ठी गोक्षुरकैः कृतः ।।
कषायक्षारसंयुक्तः शर्करां पात-
यत्यथ ।। क्षारो यवक्षारः ।। त्रि-
कण्टकस्य बीजानां चूर्णं मा-
क्षिकसंयुतं ।। अवीक्षीरेण सप्ताह-
दश्मरीनाशनं पिवेत् ।। अवी मेषी
।। ।। वरुणत्वक् कषायस्तु पीतो
गुड समन्वितः ।। अश्मरीं पातय-
त्याशु वस्तिशूलञ्च नाशयेत् ।।
क्वाथो वरुणमूलस्य तस्य कल्के-
न संयुतः ।। शिग्रुमूलस्य च क्वाथः
कदुष्णश्चाश्मरीं हरेत् ।। ।। शृङ्गि-
वेर यवक्षार पथ्या कालीयकान्वि-
तः ।। दीप्यमण्डो भिनत्त्याशु अश्मरी
मास्तु पानतः ।। शृङ्गिवेरं नागरं ।।
को दुग्धं कृमिभि र्येन सतरुणं
क्षिप्त्वं शुचिस्थानजे वस्ते पुण्ये
गिरीडिने वरुणं छित्वा त्वलं
ग्राहयेत् । संगृह्यास्य चतुर्गुण-
मपि पचेत् पादावशेषं जलं त-
त्तुल्येन गुडेन वै दृढतरे भाण्ड
पचेन्नत् पुनः ।। तस्मिन्नेवं घनतां
गुडे परिणते प्रत्येकमेषां प-
लं शुण्ठ्येर्वारुक बीज गोक्षु-
र कणा पाषाणभिच्छीतला

कुष्माण्ड त्रपुषात्तबीज कुनटी
वास्तूक शोभाञ्जनं द्राक्षैलाग्नि
शिलाभया कृमिहरं चूर्णीकृता
नां क्षिपेत् ।। पथ्याशी प्रतिवासरं
गुडममुं यो ऽक्ष प्रमाणं नरः खा-
देत्तस्य समस्तदोषजनिताश्मर्य्यः
पतन्ति ध्रुवं ।। एर्वारुक बीजं कर्क-
टीबीजं ।। पाषाणभित् हाथाजो-
डीति लोके ।। शीतला नीलदूर्वा
।। तथा च ।। नीलदूर्वा स्मृता शस्य
साहलं हरितं तथा ।। शतपर्वा शी-
तकुम्भी शीतला वामनी तथा ।।
इति निघण्टौ धन्वन्तरिः ।। कुन-
टी धान्यकं ।। गिरिजं शिलाजतु
।। कृमिहत् विडङ्गं ।। वरुणादि-
गुडः ।। ।। मञ्जिष्ठा त्रापुषं बी-
जं जीरकः शतपुष्पिका ।। धात्री
फलं वदरकं गन्धकञ्च मनः-
शिला ।। एतेषां समभागानां चूर्णं
टङ्कमितं नरः ।। भक्षयेन्मधुना
सार्द्धं पतेत्तस्याश्मरी ध्रुवं ।। ।।
पलद्वय मिते कांसे कुलत्थस्य
शृते तु यः ।। लवणं शरपुङ्खस्य
सार्द्धमाषद्वयोन्मितं ।। क्षिप्त्वा पि-
वेत् पतेत्तस्य मूत्रेण सममश्मरी
।। शर्करा सिकता चापि दृष्ट मेतद-
नेकधा ।। इत्यश्मर्य्यधिकारः

।। ।। इति भावप्रकाशः ।। अश्रद्द-
धानः त्रि श्रद्धाहीनः ।। यथा दे-
वलः ।। प्रत्ययो धर्मकार्य्येषु त-
था श्रद्धेत्युदाहृता ।। नास्ति ह्य-
श्रद्दधानस्य धर्मकृत्ये प्रयोज-
नं ।। इति श्राद्धतत्त्वं ।। ।। अश्रद्धा
स्त्री शास्त्रार्थे अदृढप्रत्ययः ।। य-
था ।। विधिहीनं भावदुष्टं कृतम-
श्रद्धया च यत् ।। तद्धरन्त्यसुरा-
स्तस्य मूढस्य दुष्कृतात्मनः ।। इति
श्राद्धतत्त्वं ।। ।। अश्रद्धेयं त्रि
श्रद्धानर्हं ।। शास्त्रार्थादृढप्रत्यय
योग्यं ।। अश्रच्छब्द एवैक थायानो
र्थी प्रत्यये पश्चान्नञ्समासेन नि-
ष्पन्नं ।।

अश्राद्धभोजी त्रि श्राद्धान्नाभक्ष-
कः ।। यथा ।। दुर्गसिंहोऽपि अश्राद्ध-
भोजीत्यस्य सति भोजने श्रा-
द्धमेव भुङ्क्ते न श्राद्धमिति न
नियमः ।। तथात्वे व्रतलोपः स्या-
त् ।। इति प्रायश्चित्ततत्त्वं ।।

अश्राद्धी पुं श्राद्धपञ्चयज्ञशून्यः
।। यथा मनुः ।। नाद्यात् शूद्रस्य
पक्वान्नं विद्वानश्राद्धिनो द्विजः ।।
आददीताममेवास्मादवृत्तावेक-
रात्रिकं ।। अश्राद्धिनः श्राद्ध

आश्राद्धिनः श्राद्धपञ्चयज्ञशून्यस्य
इत्याह्निकाचारतत्त्वं॥
अश्राद्धेयः पुं श्राद्धानर्हः।श्रा
द्धायोग्यब्राह्मणः।यथा।अत्रि
काश्यपौ।पितुर्गेहे च या कन्या
रजः पश्यत्यसंस्कृता।भ्रूणह
त्या पितुस्तस्याः सा कन्या वृष
ली स्मृता॥यस्तु तां वरयेत् क
न्यां ब्राह्मणो ज्ञानदुर्बलः।अ
श्राद्धेयमपाङ्क्तेयं तं विद्याद्वृषली
पतिं॥इत्युद्वाहतत्त्वं॥अश्रान्तः
त्रि श्रमरहितः।यथा।अश्रान्त
श्रुतिपाठपूतरसना विर्भूत भूरि
स्तवा जिह्मब्रह्ममुखौघ विघ्नि
तनवस्वर्गक्रियाकेलिना।इत्थं
गोधिस्वनेन मास्ति चटिता मुक्ता
नु मन्दाकिनी यत् प्रासाद दुकूल
वल्लि रनिलान्दोलै रखेलद्दि
वि॥इति नैषधे १ स्वर्गः॥
॥ ॥
अश्रु क्ली चक्षुर्जलं।तत् पर्य्या
यः।लोचनं पश्यति जटाधरः॥
॥
अश्रुतं त्रि अकृतश्रवणं।य
था।कृतार्थस्य परित्यागात् अ
कृतार्थस्य कल्पनात्।श्राप्तस्य
वाधादित्येवं परिसंख्या

विशेषिका॥इति प्रायश्चित्ततत्त्वं
॥
अश्लेषा स्त्री अश्विन्यादिसप्तविंश
तिनक्षत्रान्तर्गतनवमनक्षत्रं।तस्या
कृति चक्राकारा।इति मुहूर्त्तचि
न्तामणिः॥तस्याधिदेवता सर्पः।
यथा।अश्वि यम दहन कमल
ज शशि शूलभृददिति जीव फ
णि पितरः।इत्यादि ज्योतिस्तत्त्वं
॥सा केतुग्रहस्य जन्मनक्षत्रं॥
यथा।विशाखानलतोयानि वैस्र
वं भगदैवतं।पुष्या पौलं यमः स
र्पो जन्मभान्यर्कमः क्रमात्॥इ
ति दीपिका॥सा च अधोमुखग
णः।यथा।अश्लेष वह्नि यम पि
त्र्य विशाखयुक्तं स्वर्वात्रयं शत
भिषा च नवाप्युडूनि।एतान्यधो
मुखगणानि शिवानि नित्यं वि
धार्य भूमि खननेषु च शोभिता
नि॥इति ज्योतिस्तत्त्वं॥ ॥तस्या
मस्तकोपरि उदये रात्रिलग्ननि
रूपणं यथा।मौलिगे भुजगते
अपुच्छके भङ्गुराकृतिनि स
न्नतारके।मारकेलि रसिके
न लोदयात् निर्ययु जल
धि खोर्ध्विलिप्तिकाः ॥
॥ ३ ॥२४॥इति का

लिदासकृतरात्रिलग्ननिरूपणं॥
अश्वगन्धा स्त्री स्वनामख्यातवृक्षं
।तत्पर्य्यायगुणाः।गन्धान्तावा
जिनामादि रश्वगन्धा हयाह्वया
।वाराहकर्णी वरदा वरदा कुष्ठग
न्धिनी॥क्वचित् पुस्तके अन्त्य
वरदास्थाने वदरीति पाठः।अ
श्वगन्धानिल श्लेष्म श्वित्र शोथ
क्षयापहा।बल्या रसायनी तिक्ता
कषायोष्णातिशुक्रला॥इति
भावप्रकाशः॥
अश्वगोष्ठं क्ली अश्वस्थानं।आ
स्तवल् इति आरभीभाषा।यथा
।पशुभ्यः स्थाने हि षट्के गो
ष्ठ गोयुग यङ्‌वं।इत्यनेन अ
श्वशब्दात् गोष्ठप्रत्ययेन निष्पन्नं
।इति मुग्धबोधव्याकरणं॥

अश्वत्थः पुं स्वनामख्यातवृक्षः
।तत् पर्य्यायगुणाः।बोधिद्रुः
पिप्पलो ऽश्वत्थ चलपत्रो गजा
शनः।पिप्पलो दुर्जरः शीतः
पित्त श्लेष्म व्रणास्रजित्॥गुरु
स्तुवरको रूक्षो वर्ण्यो योनि
विशोधनः॥ ॥अथ पिप्पल
भेदः।गजहण्ड इति हिन्दीभाषा
।पारिशोन्थः फलीशश्च

कपिचूतः कमण्डलु गर्द्दभाण्डः
कन्दराल कपीतन सुपार्श्वकाः
॥फलीशो दुर्जरः स्निग्धः क्रिमि
शुक्र कफप्रदः।फले ऽम्लमधुरो
मूले कषायः स्वादुमज्जकः॥ ॥
अथ वेलियापिप्पलः।नन्दीवृ
क्षो ऽश्वत्थभेदः प्ररोही गजपाद
पः।स्थालीवृक्षः क्षयतरुः क्षीरी
च स्याद्वनस्पतिः॥नन्दीवृक्षो ल
घुः स्वादु स्तिक्तस्तुवर उष्णकः।
कटुपाकरसो ग्राही विष पित्त क
फास्रनुत्॥इति भावप्रकाशः॥

तस्य विष्णुस्वरूपत्वं यथा।ऋषय
ऊचुः।कथं त्वयाश्वत्थ वटौ गो ब्रा
ह्मणसमौ कृतौ।सर्व्वेभ्योपि तरु
भ्य स्तौ कथं पूज्यतमौ कृतौ॥
सूत उवाच।अश्वत्थरूपो भगवान्
विष्णुरेव न संशयः।रुद्ररूपो
वटस्तद्वत् पलाशो ब्रह्मरूप
धृक्॥दर्शन स्पर्श सेवासु ते वै
पापहराः स्मृताः।दुःखा पद्या
धि दुष्टानां विनाशकारिणो ध्रु
वं॥ऋषय ऊचुः।कथं वृक्षत्व
मापन्ना ब्रह्म विष्णु महेश्वराः
।एतत् कथय सर्व्वज्ञ संशयोत्र
महान् हि नः॥सूत उवाच।पाद्मे

नी शिवयो र्देवैः सुरतं कुर्वतोः
किल।अग्निं ब्राह्मणवेशेन प्रेष
विघ्नं कृतं पुरा॥ततस्तु पार्वती
क्रुद्धा शशाप त्रिदिवौकसः।
रेतःसेकसुखभ्रंशकस्मा माना
तदा रुषा॥पार्वत्युवाच।हामि
कीटाद्यैः पेते जानन्ति सुरतेः
सुखं।तस्मान्मम सुखभ्रंसात्
यूयं वृक्षत्व माप्स्यथ॥सूत उवा
च।एवं सा पार्वती देवी अशपत्
क्रुद्धमानसा।तस्माद्वृक्षत्व माप
न्ना ब्रह्म विष्णु महेश्वराः॥तस्मा
दिमो विष्णु महेश्वरावुभौ बभूव
तु वैधि वटौ मुनीश्वराः।बोधि
स्त्वयं चार्किदिने विनैव नसंस्पृ
श्यता मर्कजवारयोगात्॥इति
पाद्मे उत्तरखण्डे १९० अध्यायः॥
॥ऋषयऊचुः।अश्वत्थत्वं कथं
जातं सूत बोधितरुः स्वयं।स्पर्श
त्वञ्च कथं प्राप्त स्त्वयार्के शनि
वासरे॥सूत उवाच।समुद्रमथ
नाद्यानि रत्नान्यापुः सुरोत्तमाः
।श्रियञ्च कौस्तुभं तेषु विष्णु
वे प्रददुः सुराः॥यावदङ्गीच
कारासौ लक्ष्मी भार्य्यार्थ मा
त्मनः।तावद्विज्ञापयामास त
क्ष्मीस्तं चक्रपाणिनं॥लक्ष्मी रु

वाच असंस्कृत्य कथं ज्येष्ठां
कनिष्ठां परिणीयते।तस्मान्मम
ग्रजा मेना मलक्ष्मी मधुसूदन
विवाह्योद्वाह मां पश्चात् एष ध
र्मः सनातनः।तस्मात् धर्म्मव्य
ति क्रमं न कुर्य्या मधुसूदन॥इ
ति तद्वचनं श्रुत्वा स विष्णु लो
कभावनः।उद्दालकाय मुनये
सदीर्घतपसे तदा॥आप्तवाक्या
नुरोधेन ता मलक्ष्मीं ददौ किल
।स्थूलौष्ठी शुष्कवदनां विरूपां
विभ्रती तनुं॥स्वरदारक्तनयनां
वृद्ध पिङ्ग-शिरोरुहां।स मुनि
विष्णुवाक्यात्ता मङ्गीकृत्य स
माश्रमं।वेदध्वनि समायुक्त मा
नया मास धर्म्मवित्।होम धूपस
गन्धाढ्यं वेदघोषेण नादितं॥आश्र
मं तं विलोक्याथ व्यथिता साब्र
वीदिदं।ज्येष्ठोवाच।नहि वासा
नुरूपोयं वेदध्वनि युतो मम॥
नात्रागमिष्ये भो ब्रह्मन् नया।
स्वान्यत्र मां ध्रुवं।उद्दालक उ
वाच।कथं नायासि किञ्चात्र
वर्त्तते स्वमतं तव॥तव योग्या
च वसतिः का भवेत्तद्वदस्व मां
।ज्येष्ठोवाच।वेदध्वनि र्भवेद्य
स्मिन् अतिथीनाञ्च पूजनं॥

यत्र दानादिकं यत्र नैव तत्र व
साम्यहं।परस्परानुरागेण दाम्प
त्यं यत्र विद्यते॥पितृ देवार्च्चनं
यत्र तत्र नैव वसाम्यहं।दानशौ
चे न विद्यते परद्रव्यापहारिणः
॥परदाररता यत्र तत्र स्थाने
रतिर्मम।वृद्ध सज्जन विप्राणां
यत्र स्यादवमाननं॥निष्ठुरं भा
षणं यत्र तत्र सम्यग्वसाम्यहं।
सूत उवाच।इति तद्वचनं श्रुत्वा
विषण्णवदनो ऽभवत्।उद्दालक
स्ततो वाक्यं ता मलक्ष्मी मुवा
च ह॥उद्दालक उवाच।अश्व
त्थवृक्षमूलेस्मिन् अलक्ष्मीः अ
यतां क्षणं।आश्रमस्थान मालो
क्य यावदायाम्यहं पुनः॥सूत उ
वाच।इति तां तत्र संस्थाप्य जगा
मो द्दालको मुनिः।प्रतीक्षन्ती
चिरं तत्र यदा न तं ददर्श सा॥त
दा रुरोद करुणं भर्त्तृत्यागेन दुः
खिता।तत्रस्याः क्रन्दितं लक्ष्मी र्वै
कुण्ठभवने ऽशृणोत्॥तदा वि
ज्ञापयामास विष्णु मुद्विग्नमानसा
।लक्ष्मी रुवाच।स्वामिन् मद्भगि
नी ज्येष्ठा स्वामित्यागेन दुःखि
ता।तां मास्वासयितुं याहि कृ
पालो यद्यहंप्रिया॥सूत उ

वाच।लक्ष्म्या सह ततो विष्णु स्त
त्रागात् कृपयान्वितः॥आश्वासय
न्न लक्ष्मी ता मिदं वाक्य मथाब्र
वीत्॥विष्णुरुवाच।अश्वत्थवृक्ष
मासाद्य सदालक्ष्मीः स्थिरा भव॥
ममांशसम्भवो ह्येष आवास स्ते
मया कृतः।मन्दवारे सदा नूनं
लक्ष्मी रत्रागमिष्यति॥अश्वत्थे या
ऽसौ भवेत्तस्मात् मन्दवारं विना
किल।इति पाद्मे उत्तरखण्डे १९
१ अध्यायः॥ ॥वैशाखमासे
तस्य सेचनफलं यथा।वैशाखे
सिञ्चयेन्नित्यं विष्णु मश्वत्थ
रूपिणं।चतुर्वर्गफलावाप्ति
र्हेतवे वैष्णवो जनः॥गण्डयमा
न्तेनोयेन कुर्य्याद्यो ऽश्वत्थसेच
नं।सोपि याति परं स्थानं विमुक्तः
पापकोटिभिः॥अश्वत्थमूले वि
प्रर्षे यो बध्नाति शिलादिभिः।अ
श्वत्थरूपी भगवान् किं तस्मै
न हि यच्छति॥अश्वत्थ द्रुम मा
लोक्य प्रणामं कुरुते तु यः।आयु
र्वृद्धि र्भवेत्तस्य वर्द्धते सर्वसम्प
दः॥यथाश्वत्थतले विप्र धर्म्म
कर्म्म विधीयते।न्यूनातिरिक्तता
न स्यात्तस्मिन् कर्म्मणि जैमिने॥
तत्र तीर्थानि सर्वाणि तिष्ठन्ति

ष्टीति जैमिनेः॥यत्राश्वत्थतरुस्ति
ष्ठेत् एकोपि शाखिनां वरः॥अ
श्वत्थपूजको यस्तु स एव हरि
पूजकः॥अश्वत्थमूर्त्तिर्भगवान्
स्वयमेव यतो द्विज॥तरुस्ता
नार्द्दिजश्रेष्ठ यो ऽश्वत्थं हन्ति
मूढधीः।संसारे नास्ति तत् क
र्म्म यत्कृत्वा स च शुध्यति॥अ
श्वत्थो हतराजो ऽयं हरिमूर्त्तिः प्र
कीर्त्तितः तस्मादश्वत्थहन्तॄणां
त्राता कोपि न विद्यते॥अश्वत्थं
पश्यतो विप्र स्पृशतः स्मरतस्त
था।देहस्थं पातकं तस्य हरेत्
प्रणमतो हरिः॥विलोक्याश्वत्थ
हन्तारं यः शक्तो न निवारयेत्
तन्नेत्रयुगलं चण्डि यमेनोत्
पाट्यते स्वयं॥अश्वत्थच्छेदनं
मूढ मा कुर्विति वदेन्न यः।तस्य
जिह्वां क्षुरिकया स्वयं हन्तीति
भास्करिः॥अश्वत्थशाखामेकां
यः स्वल्पमपि निहन्ति यः।स को
टि ब्रह्महत्यायाः फलं प्राप्नोति मा
नवः॥यत् पापं ब्रह्महत्यायां गु
रुस्त्रीगमने च यत्।सुरापाने
तथा स्तेये न्यासापहरणे तथा
यत् पापं भ्रूणहत्यायां गोहत्या
यां द्विजोत्तम।स्त्रीहत्यायाञ्च

यत्पापं परस्त्रीगमने तथा॥
शरणागतहत्यायां हत्यायां सु
हृदां तथा।विश्वासवाक्यका
रणे परहिंसाविधौ च यत्॥यत्
पापं परनिन्दायां हरिवासर भोज
ने।अश्वत्थच्छेदनाद्घोरं तत् पापं
प्राप्यते जनैः॥विष्णुमूर्त्तेर्ज्जनो मो
हादश्वत्थस्य निहन्ता यः।तस्मा
त्स्यः पातकी कोपि न भूतः
क्षितिमण्डले॥वदाम्यश्वत्थमा
हात्म्यं सर्व्वपापप्रणाशनं।साक्षा
देव स्वयं विष्णुरश्वत्थो ऽखिल
विश्ववाट्॥तद्भक्तिं कुर्व्वतः
पुंसो विद्यते नाशुभं क्वचित्।
अश्वत्थं सेवते यस्तु विष्णुबुद्ध्या
नरोत्तमः॥तस्य प्रसन्नो भगवा
न् ददाति परमं पदं॥इति पाद्मे
क्रियायोगसारे अश्वत्थसेवनं
नाम ११ अध्यायः॥

अश्वपालः पुं हयरक्षकः
साइस इति पारसीभाषा।
इति आश्वपालिकशब्दटीका
यां इति दुर्गादासः॥
॥ ॥

अश्वमेधः पुं यागविशेषः।य
था।आपस्तम्बः।राजा सार्व्वभौ
मो ऽश्वमेधेन यजेत ना

प्यसार्व्वभौमः इति॥प्रायश्चि
त्तमश्वमेधो यथा।विष्णुः।अ
नुपातकिनस्त्वेते महापातकि
नो यथा।अश्वमेधेन शुध्य
न्ति तीर्थानुसरणेन वा॥अपि
चाश्वमेधेन शुध्यन्ति महापा
तकिनस्त्विमे।इति विष्णूक्ताश्व
मेधस्य प्रायश्चित्तत्वात् पापक्षय
स्वर्गोभयसाधकस्य तु तस्यापि
न प्रायश्चित्तत्वं।इति प्रायश्चित्त
तत्त्वं॥ कलौ तस्य निषेधो य
था।बृहन्नारदीये।दीर्घकालं
ब्रह्मचर्य्यं नरमेधाश्वमेधकौ।
महाप्रस्थानगमनं गोमेधञ्च
तथा मखं॥इमान् धर्म्मान् क
लियुगे वर्ज्यानाहुर्म्मनीषिणः॥इ
शुद्धितत्त्वं॥अन्यच्च।ब्रह्मपुराणे।
नराश्वमेधौ मद्यञ्च कलौ वर्ज्यौ
द्विजातिभिः।इति तिथ्यादितत्त्वं॥
तत्फलजनककर्म्माणि यथा।
वैशाखे मासि यः कुर्य्यात् प्र
पां माधवतुष्टये।दिने दिने ऽ
श्वमेधस्य फलं प्राप्नोति मान
वः॥इति पाद्मे क्रियायोग
सारे ११ अध्यायः॥अपि च।ब्र
ह्माण्डे।स्नानन्तु भक्त्या गङ्गायां
कर्त्तुकामस्य गच्छतः।पदे पदे

ऽश्वमेधस्य फलं मर्त्यस्य जाय
ते॥इति प्रायश्चित्ततत्त्वं॥

अश्ववैद्यः पुं घोटकचिकित्
सकः।सालोत्री इति हिन्दीभा
षा।अश्वस्य वैद्यः इति षष्ठीतत्
पुरुषसमासनिष्पन्नः॥

अश्वशाला स्त्री घोटकगृहं।
यथा।वाजिशाला तु मन्दुरा।
इत्यमरः॥हे अश्वावस्थानगृहे।
वाजिनो ऽश्वस्य शाला गृहं वा
जिशाला।अश्वशालादि च।इति
भट्टीकायां भरतः॥

अश्वारूढः पुं अश्वारोहः।
यथा।अश्वारोहास्तु सादिनः।
इत्यमरः॥हे अश्वारूढे।अश्वमा
रोहन्ति अश्वारोहाः टान् यण
।सादयन्ति भ्रमयन्ति अश्वान्
सादिनः ग्रहादित्वाणिन्।इति
भट्टीकायां भरतः॥

अश्वारोही त्रि अश्वारोहणशीलः
।घोडसवार इति भाषा।अश्व
मारोहितुं शीलमस्येत्यर्थे णि
न् प्रत्ययेन निष्पन्नः॥

अश्विनी स्त्री सप्तविंशतिनक्ष
त्रान्तर्गतप्रथमनक्षत्रं।तस्य मस्त
के पर्य्युदये कर्कटेत्यस्य १३०

त्रिंशत् पलाधिकदण्डैको गतो
भवति। यथा। तन्वि त्रोटकमुख्ये
क्रान्ते त्रिभे मस्तकोर्द्ध्वं पयभा
जि वाजिनि। चारुचन्द्रमुखि
कर्कटोदयात् निर्गता गगण
रन्ध्र लिप्तिका:॥ इति श्रीका
लिदासकृतरात्रिलग्ननिर्णय:
॥ अश्विनीकुमारौ ७ अश्विनी
सुतौ। तत्पर्य्याय:। नासिक्यौ
२ गदागदौ ३। इति जटाधर:॥
पुष्करस्रजौ ४। इति शब्दर
त्नावली॥
अथ न दीप्तौ॥ गृहे॥
गतौ। न अथति अथते। इति
दुर्गादास:॥
अष्टकं त्रि अष्टसंख्याविशिष्टं
। यथा। गङ्गाष्टकं पठति य: प्र
यत: प्रभाते वाल्मीकिना विर
चितं सुखदं मनुष्य:। इति वा
ल्मीकीय गङ्गाष्टकं॥ अपि च।
अच्युतं केशवं विष्णुं हरिं स
त्यं जनार्द्दनं। हंसं नारायणं
चैव एतन्नामाष्टकं शुभं॥ इ
ति ब्रह्मपुराणे श्रीविष्णुनामा
ष्टकं स्तोत्रं॥
अष्टका स्त्री गौणचान्द्रपौष
माघफाल्गुनमासीयकृष्णाष्ट

आश्विनकृष्णाष्टमी च एतासु
श्राद्धमावश्यकं। यथा। आग्र
हायण्या ऊर्द्ध्वं तिसृषु कृष्णाष्ट
मीषु श्राद्धानि नित्यानि। यथा
गोभिल:। अष्टका योर्द्ध्वं माग्र
हायण्या स्तमिश्राष्टमी। इति॥
ब्रह्मपुराणे। पितृदानाय मूले
स्युरष्टकास्तिस्र एव वा कृ
ष्णपक्षे वरिष्ठा हि पूर्व्वा चैन्द्री
विभाव्यते॥ प्राजापत्या द्विती
या स्यात् तृतीया वैश्वदेविकी।
आद्या पूपै: सदा कार्य्या मां
सैरन्या भवेत्तथा॥ शाकै: का
र्य्या तृतीया स्यादेष द्रव्यगतो
विधि:। मूले प्रधानस्थाने अमा
वास्यायां अमावास्या हि श्राद्ध
स्य प्रधानकालस्तद्दीनं याव
त्। ऐन्द्री सा च इन्द्रदेवताका या
गस्य तन्त्रत्वात्। एवं प्राजापत्या वै
श्वदेविकी चा। मांसै: पशो:। त
था च गोभिल:। यद्युवास्यत
रसम्भव: स्यात्तदापि पशुनैव
कुर्य्यात् इति। यद्युवेति निपात
समुदायो यद्यर्थे पशुरपि छा
ग एव। छागो ऽनादेशे पशु:।
इति गौतमात्। न च मेष्या ऊर्द्ध्व
मष्टम्यां गो:। इति गोभिलसू.

त्रेण गवोपदेशात् कथमनुप
दिष्टत्व मिति वाच्यं। तदसम्भवे
पशुरित्यनेन य: पशुरुपदिष्ट
स्तस्य विशेषतो ऽनुपदिष्टत्वात्
। तेषां पोषी। वस्तुतस्तु हरिवंशे
मृगोपी विहित:। यथा। इक्ष्वाक
स्तु विकुक्षिं वै अष्टकायां मया
दिशत्। मांस मानव श्राद्धाय मृ
गं हत्वा महाबल:॥ इति॥ क्रि
या वथाभाव माह स एव अव
श्यान्नु त्रियं प्राङ् स्तिर्य्यग्योनिभ्य
स्तेषपि। एतदर्द्धं ब्रह्मपुराणेऽपि।
अरण्यान्ना मृगास्याप्रीतितं व
हुते। पश्वभावे स्थालीपाकेन।
यथा गोभिल:। अपि वा स्थाली
पाकं कुर्व्वीत इति। तद्विधानन्तु।
स्थालीपाकं पशुस्थाने कुर्य्यात्
द्याद्यानुकल्पिकं। श्रपयेत्तं सवत्
साया स्तरुण्या गो: पयसस्तु॥
इति छन्दोगपरिशिष्टोक्तं यद्या
द्य। अन्विति उदनचरो: पश्चा
त्। अतएव सानातप:। नवोद
के नवान्ने च गृहप्रच्छादने न
पा। पितर: स्पृहयन्त्यन्नमष्ट
कासु मघासु च। तस्माद्यात्
सदा युक्तो विद्वत्सु ब्राह्मणेषु च
। तस्मादन्नं प्रधानं। मृ पादिका

न्नुपकरणान्तेन शाकाना माव
श्यकं उभयत्र सदैव श्रवणा
त्। तथा चानित्यं सदा यावदा
युर्न कदाचिदतिक्रमेत्। उपेत्या
तिक्रमे दोषश्रुते रत्यागदर्श
नात्॥ फलश्रुते र्वीप्सया च
तन्नित्य मिति कीर्त्तितं। इति
निष्पादितन्तु॥
अष्टम: त्रि अष्टानां पूरण:। य
था। कात्यायन:। अष्टमे ऽशौच
तद्दिश्या: क्षीणो भवति चन्द्र
मा:। अमावास्याष्टमांशे च त
त: किल भवेदणु:॥ इति श्रा
द्धतत्त्वे॥ अपि च। सावर्णि: सूर्य्य
तनयो यो मनु: कथ्यते ऽष्टम:
। निशामय तदुत्पत्तिं विस्तरा
द्गदतो मम॥ इति देवीमाहा-
त्म्यं॥
अष्टमङ्गलघृतं क्ली अष्टौषध
पुक्तपक्वघृतं। यथा। वचा कुष्ठं
तथा ब्राह्मी सिद्धार्थकमथापि
च। सारिवा सैन्धवञ्चैव पिप्पली
घृत मष्टमं॥ सिद्धं घृत मिदं मेध्यं
पिवेत् प्रातर्द्दिने दिने। दृढस्मृ
ति: कुमाराणां पिवता मष्टम
ङ्गलं॥ इति भावप्रकाश:
अष्टमी स्त्री तिथिविशेष:।

सा चन्द्रस्याष्टमकलाक्रियारूप
।तदुपलक्षितकालरूपा चासा
च शुक्ला नवमीयुता ग्राह्या यु
ग्मात्।कृष्णा च सप्तमीयुता।यथा
निगमः।कृष्णपक्षे ऽष्टमी चैव
कृष्णपक्षे चतुर्द्दशी।पूर्व्वविद्धैव
कर्त्तव्या परविद्धा न कुत्रचित्
।।उपवासादि कार्य्येषु एष ध
र्म्मः सनातनः।। ।।भविष्य पु
राणे।चतुर्द्दश्यां तथाष्टम्यां प
क्षयोः शुक्लकृष्णयोः।योऽब्द
मेकं न भुञ्जीत शिवार्च्चनपरो
नरः।।यत्पुण्य मस्तयं प्रोक्तं
सततं सत्रयाजिनां।तत् पुण्यं
सकलंतस्य शिवलोकञ्च ग
च्छति।।ततश्च सततसत्रयाज्य
स्य पुण्यसमपुण्यप्राप्तिः शिव
लोकगतिश्च फलं।फाल्गुण शु
क्लाष्टमी चतुर्द्दश्युपवासव्रतं
।। ।।कालिकापुराणे।येषाल
श्री
लितकान्ताख्या देवी मङ्गलच
ण्डिका।वरदाभयहस्ता च द्वि
भुजागौरदेहिका।।रक्तपद्मास
नस्था च मुकुटकुण्डलमण्डि
ता।रक्तकौषेयवस्त्रा ने
स्मितवक्त्रा शुभान ना
।।नवयौवनसम्पन्ना

चार्व्वङ्गी ललितप्रभा।।उमयाभा
षितं मन्त्रं यत् पूर्व्वं नेक मत्तरं
।।मन्त्रमस्यास्तु तच्छ्रेयं तेन
देवीं प्रपूजयेत्।एकमक्षरं शा
क्तिबीजरूपं।तथाष्टम्यां नवम्या
ञ्च पूजा कार्य्या विहरुये।।घटे
षु प्रतिमायाम्वा घटे मङ्गलच
ण्डिकां।यः पूजयेद्भौमवारे शु
भे हृष्टोत्तमैः शिवां।।सततं सा
धकः सोपि काम मिष्ट मवाप्नु
यात्।।ज्योतिषे।शनैश्चरस्य वा
रेण वारेणाङ्गारकस्य च।कृष्णा
ष्टमी चतुर्द्दश्यो पुण्यात् पु
ण्यतरे स्मृते।।तथा।सोमवारे
ऽप्यमावास्या आदित्ये तु सप्
तमी।चतुर्थ्यङ्गारवारे च अष्ट
मी च बृहस्पतौ।।अत्र यत् क्रिय
ते पाप मथ वा धर्म्म सञ्चयः।
षष्टिजन्मसहस्राणि प्रतिजन्म
तदक्षयं।। इति तिथ्यादितत्त्वं।।
कृष्णजन्माष्टमीव्रतं अष्टका
श्राद्धं भीष्माष्टमीकृत्यञ्च
तत्तच्छब्दे द्रष्टव्यं ।।
महाष्टमीकृत्यं
महाष्टमीशब्दे द्रष्टव्यं ।।
अष्टवर्गः
पुं ओषधाष्टकं ।।

प्रयो रास्य वर्षे यावतप्रत्यष्टमी प्रतिचतुर्द्द ४.२

203

तस्य नामगुणाः।जीवकर्षभको
मेदे काकोल्यौ ऋद्धि वृद्धिके।
अष्टवर्गो ऽष्टभि र्द्रव्यैः कथित
श्चरकादिभिः।।अष्टवर्गो हिमः
स्वादु र्बृंहणः शुक्रलो गुरुः
भग्नसन्धानकृत् वल्यः शरीर
वलवर्द्धनः।।वात पित्तास्र तृट्
दाह ज्वर मेह क्षयप्रणुत्।इ
ति भावप्रकाशः।। ।।ज्यो
तिःशास्त्रोक्तगणनया रेखा
विन्दुभ्यां शुभाशुभफलसूचक
जन्मकालीनाष्टग्रहसमुदा
यः।यथा।अथाष्टवर्गः।जन्म
कालग्रहस्थित्या फलं वदे
शुभाशुभं।स्वादिनकृत् शुभदः
क्षिति पक्ष समुद्र नगारिकप
र्व्वगतो १।२।४।७।८।९।१०।११
ऽथविभावरिभर्त्तु स्यङ्गदेशग
गतो ३।६।१०।११।ऽथ कुजा
द्रविवत् १।२।४।७।८।९।१०
।११।अथ सोमसुता त्रिश
रर्त्तु नवाब्धि यातः।३।५।६
।९।१०।११।१२।देवगुरो र्वि
षयर्त्तु नवेषुगतो ५।६।९
।११।ऽथ सुरारिगुरोः सम
याचल भास्करयातः।६।७
।१२।तीक्ष्णमरीचिसुतादपि

भास्करवत्।१।२।४।७।८।९
।१०।११।अथ लग्नग्रहात् त्रि
कृताङ्ग दशादिषु यातः ३।४।
६।१०।११।१२।रविरेखाः।४८।भु
जङ्ग विलासाभिधान मालाद
ण्डकेनादित्याष्टवर्गः।। ।।चन्द्रः
शुभो ऽकीर्त्ति कालाद्धिदन्ताव
लाशा शिवस्थ।३।६।७।८।
१०।११।स्तनः स्वात् कुराम नेगा
शा शिवस्थः।१।३।६।७।१०।
११।१२।तालाजाद्विवह्नीषु यङ्गे
दिगीशेषु।२।३।५।६।९।१०।
११।ऽथ ज्ञात् कुरामाब्धिवाण
ग दन्तावलाशा शिवस्थः १
३।४।५।७।८।१०।११।जीवात्
कु दृग्वेदशैले भ काष्ठा शिव
स्थो १।२।४।७।८।१०।११।ऽथ
शुक्रात् वेदेषु शैलग्रहाशा
शिवस्थः ३।४।५।७।९।१०।११
।तीक्ष्णांशुदेहोद्भवाद्वामवा
णार्त्तु शम्भुस्थितो ३।५।६।११
ऽथो दयाद्दव्यवाहर्त्तु काष्ठा
शिवस्थः।३।६।१०।११।चन्द्र
रेखाः।४९।कामवाणाभिधा
न मालादण्डकेन चन्द्राष्टवर्गः
।। ।।कुजो ऽकीच्छुभो वह्नि वा
णार्त्तु दिक् सम्भगो ३।५।६।

१०।११।ऽथेन्दुतो राम कालेशग
३।६।११।स्ततः स्वात् ऊद्दग्वेद
सप्ताष्ट दिक् सम्भुगः स्यात् ।१।
२।४।७।८।१०।११।निशानाथपु
त्राद्गुणेषड्ङ्ग रुद्रोप यातः।३।
५।६।११।ततो जीवतः काल
काष्टा शिवार्कोपयातो ६।
९।१०।११।ऽथ देवारि सृज्याद
नेहो गजेशार्कसंस्थः।६।८
।१०।११।ततः सूर्य्यपुत्रात् ऊ
वेदाग नाग ग्रहाशा शिवस्था
२।४।७।८।९।१०।११।ऽथ
लग्नात् ऊरामाङ्ग दिक् शम्भु
यातः।१।३।६।१०।११।कुजरे
खाः ३९।सिंह विलासाभिधा
न मालादण्डके भौमाष्टवर्गः
॥ ॥ततः सुभो ऽर्कतः शर द्वि
गो शिवार्कगो ५।६।९।११।
१२।ऽथ चन्द्रतो द्वि वेद काल
नाग दिग्महेश्वरेषु।२।४।६।
८।१०।११।भूमिजात् ऊ द्दक्
हुताग नाग गो दशेशगः।१।
२।४।७।८।९।१०।११।ततः
स्वतः ऊ वह्नि पञ्च यण्णवा
दिकेषु।१।३।५।६।९।१०।११।१२।
वाक्पते रसाष्ट शम्भु सूर्य्यगो
६।८।११।१२।ऽथ सुक्रतः ऊवा

बाङ्ग वन्हि वेद पञ्च नाग गो
शिवेषु।१।२।३।४।५।८।९।११।१
२।ततः ऊ द्दक् हुताग नाग प
ञ्चकस्थितो ऽथ।१।२।३।४।७।८।
९।१०।११।१२।लग्नतः त्रिति द्वि
वेद काल नाग दिग् शिवेषु।१।
।२।४।६।८।१०।११।बुधरेखाः
।५५।अशोकमञ्जरी संज्ञक
मालादण्डकेन बुधाष्टवर्गः
॥ ॥सराजगुरुः सुभदो रवि
तः ऊ यमानल वेद नगादि
कपञ्चगतो।१।२।३।४।७।८।
९।१०।११।ऽथ विधो द्वि शर
चल गो शिवगो २।५।७।९।११
।वसुधातनयात् यमाद्वि नगा
ष्ट दशेश गतो १।२।४।७।८।
१०।११।ऽथ बुधात् त्रितियुग
क्रतेषु रस ग्रह दिक् गिरि शो
पगत १।२।४।५।६।९।१०।११
।स्तदनु स्वत एक यमानलवा
रिधि पर्वत नाग दशेशगतो
१।२।३।४।७।८।१०।११।ऽथ
सितायम पञ्च रस ग्रह दिक्
शिवगो १।५।६।९।१०।११।१२
विनन्दनतो दहनेषु रसार्कगत
३।५।६।१२।स्तथ लग्नगृहात
ऊ यमाद्वि शरर्तु नग ग्रह दिग्

दिशोपगतः १।२।४।५।६।७।
९।१०।११।गुरुरेखाः ५६ ऊम
मत्त वकाभिधान मालादण्ड
केन बृहस्पतेरष्टवर्गः॥ ॥
भृगुः सुभो रवे र्गजेश सूर्य्य
गो।८।११।१२।ऽथ चन्द्रतः
त्रादि पञ्चकाष्ट गो शिवार्क
गः।१।२।३।४।५।८।९।११।
१२।ऊजात् त्रि वेद काल गो
शिवार्कगो।३।४।६।९।११।१२।
ऽथ बोधनात् त्रि बाण काल
रन्ध्र रुद्र संस्थितः।३।५।६।
९।११।गुरोः शराष्ट रन्ध्र दिङ्म
हेशगो ५।८।९।१०।११।स्ततः
स्वतः ऊ पञ्चकाष्ट रन्ध्र दिक्
शिवोपगः।१।५।८।९।१०।११।
शने र्गुणाब्धि पञ्च नाग गो
दशेशगो।३।४।५।८।९।१०।
११।ऽथ लग्नतः ऊ पञ्चका
ष्ट गो शिवस्थितः।१।२।३।
४।५।८।९।११।सुक्ररेखाः
५२।मत्तनङ्ग शेखराभिधान
मालादण्डकेन भार्ग वाष्ट
वर्गः॥ ॥सुभः षडङ्ग रस्कात्
त्रा यमाम्भोधि शैलाष्ट दिक्
शम्भुगः।१।२।४।७।८।१०।११।
इन्दुतो राम कालेश ग

तः।३।६।११।त्रास्वनाद्वह्नि वा
णर्तु काष्टा शिवार्कोपगो।३।
५।६।१०।११।१२।ऽथ स्वतः का
ल दन्तावलादिस्थितो।६।८।
९।१०।११।१२।जीवतो बाण
कालेश मार्त्तण्डयान।५।६।११
।१२।स्ततो दैत्यपूज्यादनेहः
शिवार्कोपयातः।६।११।१२।
स्ततो वीतिहोत्रेष कालेश।
यान।३।५।६।११।स्ततो लग्न
तः त्रा गुणाम्भोधि षड्दि
ङ्महेश स्थितः।१।३।४।६।१०।
११।शनिरेखाः ३९।मत्तमातङ्ग
लीलाभिधान दण्डकेन श
नैश्चराष्टवर्गः॥इति दीपिका
॥राहुः सुभो ऽर्कोद्भुज वह्नि
वेदर्तु रन्ध्रगो।१।२।३।४।६।९।अ
थ चन्द्रात् ऊ राम वेदाङ्गगा।१
।३।४।६।स्ततः ऊजाद्वह्नि वा
णाङ्ग रन्ध्रगतो।३।५।६।९।ऽ
थ बुधाच्छशि पक्ष वह्नि बाण
रन्ध्रगा।१।२।३।५।९।स्ततो जीवा
द्धव्यवाह वेदाङ्ग रन्ध्रगा।३।४।
६।९।स्ततः सुक्रात् पक्ष वह्नि
बाण रन्ध्रगतः।२।३।५।९।स्ततः
सौरात् पक्षबाणाङ्गगा।२।५।६।
स्ततः स्वतः शशि वेद बाण रिपु

रन्त्यगो।५।४।५।६।१।ऽथ ल
ग्नादेव रन्ध्र शिशुदू सूर्य्यगतः।
४।१।१०।११।१२।१।६रेखाः ३१।
मृगेन्द्रविलासाभिधानदण्ड
केन राहो रष्टवर्गः॥ ॥स्वय्यी
देक द्वि च तः सप्ताष्टदशैकाद
शेषु।१।२।४।७।८।१०।११।सो
मात्रि षड्दशैकादशेषु।३।६।
१०।११।भौमात्रि पञ्च षडेकाद
शेषु।३।५।६।११।बुधात् षड
ष्ट नव दशैकादशेषु।६।८।१।
१०।११।गुरोः पञ्च षडेकाद
श द्वादशेषु।५।६।११।१२।
शाने स्त्रि पञ्चाष्ट दशैकाद
शेषु।३।५।८।१०।११।लग्ना
देक त्रि षतः षड् दशैकादशे
षु।१।३।४।६।११।एवं लग्न
रेखाः ३०॥ ॥इति निगदि
त मिष्टं नेष्ट मन्यद्विशेषाद
धिक फलविपाकं जन्मभात्र
त्र दद्युः।ऽौपचय गृह
मित्रस्वोच्चगाः पुष्ट मिष्टं
त्वपचय गृहनीचाराति
भेनेष्टसम्पत् ॥ याव
ती रेखा ग्रहाणां मष्टव
र्गके। तावती द्विगुणी
कृत्य ऋक्षाभिः परि

शोधयेत्॥अष्टोपरि भवेद्रेखा
अष्टाभ्यन्तरविन्दवः।अष्टाभिस्तु
समो यत्र तत्र समं परिकीर्त्तितं
॥रेखा ग्रहाक्रमेदेया विन्दव
श्चान्तरत्र तु।रेखा विन्दू समानौ
चेत् समस्तत्र विगद्यते॥रेखा
धिक्ये शुभं ज्ञेयं तद्विन्दो
रप्याशुभं।स्त्री राजन्द स्तथा श्रे
योभोगो राज्यं भवेत्तथा॥मलि
नो ऽथ विपक्षेव हानि स्त्वेन्तु
र्भवेत्तथा॥द्यादिरेखा द्यादि
विन्दोः फलान्येतान्य नुक्रमा
त्।रेखायां वत्सरो ज्ञेयः सार्द्ध
सप्तदिनं समे।अष्टवर्ग दशा।
युः स्यात् दिनं चतुष्टु विन्दुषु॥
इत्याद्युद्दीयः।इत्य ष्टवर्गः॥
नन्दी।अष्टवर्गस्तुभेः श्रीमा
न् कर्म्म कुर्य्यान्नभस्वरेः।
गोचरस्थे स्तदभावे तदष्टा
ष्ट्रौ च वेदगैः॥व्रता रम्भे वि
वाहे च यात्रायां क्षुरकर्म्म
णि।अविशुद्धाष्टवर्गस्य सम
स्ता निस्फलाः क्रियाः॥सततं
दिशति नराणां राशेर् मध्येष्ट व
र्गफलं निखिलं।भावफलं प्र
थमाद्दं दृष्टिफलान्यद्भुते भुक्तेषु
॥इत्यष्टवर्गाद्येकथनं।इति

ज्योतिस्तत्त्वं॥
अष्टमूर्त्तिः पुं शिवः।यथा।
अष्टमूर्त्ति र्निधीशस्य ज्ञानचक्षु
स्तमोमयः।इति वटुकभैरवस्तो
त्रे॥तस्याष्टमूर्त्तयो यथा।अ
ग्नि रवि रिन्दुश्च भूमि रापः
प्रभञ्जनः।यजमानः खम
ष्टो च महादेवस्य मूर्त्तयः॥
इति शब्दमाला॥
अष्टापदः पुं क्ली धुस्तूरः।य
था।धुस्तूरः कनकाह्वयः।इ
त्यमरदर्शनात्।अष्टापदशब्दस्य
कनकवाचकत्वाच्च॥
असत्ल भावे।भावः सत्ता।सा
चेह विद्यमानत्वेवा।ल अस्ति
विस्तुः।इति दुर्गादासः॥
असय ऊँ इर क्षेपे।य अ
स्यति।ऊँ असित्वा अस्त्वा।
इर् आस्यत् आसीत्।अस्य
मानं महागदा इतिभट्टो ना
कोल्य शान्तः शानः।इति
दुर्गादासः॥
अस न अर्थार्थे अथार्थी
दीप्ति ग्रहण गतयः॥वासुदे
वं परित्यज्य योन्यदेव मुपास
ते।उपगच्छतीत्यर्थः।लावण्य
उत्पाद्य इवास यत्न इत्यादि

सिद्धे अनेकार्थत्वात् सत्तार्थो
ऽय मपीति रमानाथः।अनुप्रयो
गादन्यत्रापि परोत्ताया मस्ते
र्भुभावं केचिन्नेच्छन्तीति धातु
प्रदीपः।इति दुर्गादासः॥असं
ख्यः त्रि अगणनीयः।यथा।
असंख्य द्विपराद्धीदि पुद्गला
न्माद्यनन्तकं।इति हेमचन्द्रः॥
अपि चाशनयोजन विस्तीर्णैः
शतस्कन्ध समन्वितैः।असंख्य
शाखानिकरै रसंख्यफलसंयु
तैः॥इति ब्रह्मवैवर्त्ते गणपति
खण्डे ४२ अध्यायः॥
असंख्यातं त्रि संख्यारहितं।यथा
मदनपारिजाते।अङ्गुल्यग्रेण
यज्जप्तं यज्जप्तं मेरुलङ्घितं।अ
संख्यानञ्च यज्जप्तं तत्सर्व्वं नि
ष्फलं भवेत्॥इत्याह्निकाचा
रतत्त्वं॥
असंस्कृतः त्रि संस्काररहितः।
यथा आपस्तम्बः।असंस्कृतः
स्तनः श्रेष्ठो नापरो वेदपारगः।
इति शुद्धितत्त्वं॥अन्यच्च।असं
स्कृतप्रमीतस्य पिता न श्राद्ध
माचरेत्।यदि स्नेहाच्चरेच्छ्रा
द्धं सपिण्डीकरणं विना॥इति
।असंस्कृतौ न संस्कार्यौ

द्वौ पौत्र प्रपौत्रकैः।पितरं न
त्र संस्कुर्य्यादिति धर्मोव्यव
स्थितः॥इति च श्राद्धतत्वं॥ अ
संस्थानं क्ली असंस्थितिः।न
संस्थान मसंस्थान मिति नञ
समासनिष्पन्नं॥
असंहतः त्रि असंलग्नः।संहतो
लग्नः न संहतः असंहतः इ
ति नञसमासनिष्पन्नः॥
असङ्कल्पितः त्रि सङ्कल्पाविषयः
।यथा॥विष्णुपुराणे।कर्म्माण्यस
ङ्कल्पित तत्फलानि संन्यस्य वि
ष्णो परमात्मरूपे।अवाप्यतां क
र्म्ममही मनन्ते तस्मिल्लयं ते त्व
मलाः प्रयान्ति॥इति मलमा
सतत्वं॥
असङ्गतः त्रि सङ्गतिरहितः।
यथा॥वस्तुतस्तु जिज्ञासु मेक
पुरुषं प्रति सङ्गत मपि अनाद
श मन्यं प्रति असङ्गत मिति ये
प्रतिपादयितु मानन्तर्य्याभिधा
नं नादृशाभिधानप्रयोजक त
त् पुरुषीयजिज्ञासाजनकज्ञा
नविषयो ऽर्थः तं प्रतिसङ्गति
रिति पुरुषविशेष नियन्त्रितं
सङ्गतित्वं वाच्यं।इत्यनु मिति
ग्रन्थीय गादाधरी।अथ

कः।यथा देवीपुराणे चसड्ढये
जन्मतिथि र्यदि स्यात् इज्या
तदा जन्मभसंयुता च।असङ्गता
तेन दिनद्वयेपि इज्या परा या
भवतीह यत्नात्॥इति तिथ्या
दितत्वं॥
असती स्त्री भ्रष्टा।तत्पर्य्यायः
धृष्टा ९ कुलटा १० इत्वरी ११ ध
र्षिता १२।इति शब्दरत्नावली॥
लङ्का १३ निशाचरी १४ अपार
(दा) १५।इति जटाधरः॥
असतीसुतः पुं कुलटापुत्रः।त
त् पर्य्यायः।बन्धुलः कौलटे र
श्च कौलटेयो ऽसतीसुतः।त
था वान्धकिनेयस्तु स्यात् कौ
लकेय इत्यपि॥अथ सत्यान्त
भिक्षुकी पुत्रो भवति यः अ
।तत्र कौलटिनेयः स्यात् कौ
लटेयोपि सम्मतः॥इति शब्द
रत्नावली॥अपि च।असतीसुतः
कौलटेरश्च वन्धुलः।अपि वा
न्धकिनेयः स्यात् कौलटेयो
ऽतिभिक्षुकी॥कुलटापि सती
सा चेत् कौलटेय स्तदात्मजः
।अपि कौलटिनेयः स्यात्।इ
ति जटाधरः॥
असतीसुतः पुं कुलटापुत्रः।

इति जटाधरः॥
असत् त्रि जडवर्गः।यथा।य
च्च किञ्चित् क्वचिद्वस्तु सदसद्वा
खिलात्मिके।तस्य सर्व्वस्य या
शक्तिः सा त्वं किं स्तूयसे तदा॥
इति देवीमाहात्म्ये १ अध्यायः॥
सत् चेतनवर्गः।असत् जडवर्गः
।तस्य सर्व्वस्य या शक्तिः सा यदा
त्वं तदा कथं स्तव्येत्यर्थः।इति
भट्टीकायां नागोजीभट्टः॥ ॥
निष्फलं।यथा।अश्रद्धया हुतं
दत्तं तप स्तप्तं कृतञ्च यत्।अ
सदित्युच्यते पार्थ न च तत् प्रे
त्य नो इह॥इति श्रीभगवद्गी
तायां १७ अध्याये २८ श्लोकः॥
॥निन्दितः।यथा।असत्कुलप्र
सूता या कान्तं वित्तात् मत्तमा।
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे॥
अनित्यं।यथा।अज्ञानन्तु सद
सद्भ्यामनिर्व्वचनीयं।इत्यादि
वेदान्तसारः॥

असदृशः त्रि अनुल्यः।यथा।
ब्रह्मवैवर्त्ते।विनश्यति मङ्गली
णः सम्यक्फल मवाप्नुयात्।कु
र्व्वाणो विनश्यत्येव लभते ऽसदृशं
फलं॥इति तिथ्यादितत्वं॥

असनपर्णी स्त्री वृक्षविशेषः।
तत् पर्य्यायः।शीतः ७ शीतकः
८ सनपर्णी ९।इति शब्दरत्नावली
॥असन्तुष्टः त्रि सम्यक्तुष्टिरहि
तः।यथा।असन्तुष्टाः द्विजा नष्टाः
सन्तुष्टा इव पार्थिवाः।इति चा
णक्य॥
असन्मानं क्ली असाधुमानं।अ
सच्च तत् मानञ्चेति कर्म्मधारय
समासनिष्पन्नं॥
असभ्यः त्रि सभानुपयुक्तः।अ
समानाजिकः।न सभ्य असभ्य इ
ति नञसमासनिष्पन्नः।खलः।
यथा।अयन्त्वसभ्य स्तव जन्मनो
गृहे कृत्वा ऽग्रजो स्ते न्यवधीत्
सुरेश्वर।स ते ऽवतारं पुरुषेः स
मर्पितं पुरुषेः समर्पितं कृत्वा धुने
वाभिसरन्युदायुधः॥इति श्रीभा
गवते १० स्कन्धे ३ अध्याये २०
श्लोकः॥असभ्यः खलः सम
र्पितं कथितं॥इति श्रीधरस्वा
मी॥
असमः त्रि विषमः।अतुल्यः।
यथा।इत्येषा सहकारि शक्ति र
समा माया दुरुन्नीतितो मूलत्वा
त् प्रकृतिः प्रबोधभयतो ऽवि
द्येति यस्योदिता।इति

ऊरुमाम्नलौ १ स्तवकः॥
असमयः पुं अकालः॥दुःसम
यः।यथा॥एतान् जनांश्च सेवेत
व्याधिसङ्घस्य दुर्ज्जयः।सर्व्वे वा
ऽप्यसमये काले सर्व्वं ग्रसिष्य
ति॥इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे
१८ अध्यायः॥
असमर्थः त्रि अशक्तः।दुर्ब्बलः
।यथा।ब्रह्मवैवर्त्ते।उपवासास
मर्थे श्चेदेकं विप्रन्तु भोजयेत्
।तावद्धनानि वा दद्याद्यद्भक्ता
द्विगुणं भवेत्॥इति तिथ्या
दितत्त्वं॥
असमानं त्रि अतुल्यं।विजा
तीयं।सजातीयभिन्नं।यथा
शङ्खः।समानार्षेयोश्च प्रथमे
प्रथमेन समापयेत्।असमानं
द्वितीयेन धर्म्मराजवचो यथा
॥इति शुद्धितत्त्वं॥
असमाप्तं त्रि समाप्तिरहितं।
असम्पूर्णं।यथा।स्मृतिः।अ
समाप्ते व्रते पूर्व्वे नैव कुर्य्या
द्व्रतान्तरं॥इति तिथ्यादितत्त्वं॥
असम्मानं क्ली अमर्य्यादा।स
म्यङ्मानाभावः।न सम्मानं अ
सम्मानमिति नञ्समासनिष्पन्नं
॥असह्यः त्रि असहनीयः।यथा।

वरं रामशराः सह्या न च वैभी
षणं वचः।असह्यं तानि दुर्व्वा
क्यं मेघान्तरितरौद्रवत्॥इति
महानाटकं॥तानि दुर्व्वाक्यमित्य
त्र दुर्व्वचांसीति च पाठः॥

असाधारणं त्रि साधारणभिन्नं।
असामान्यं।यथा।यत्तु प्रयागे
ऽर्द्धहस्ताने कोटीहते माघस
प्तमी स्नानादवसाधारणसङ्क
ल्पेन तु तस्यैव प्रातःस्ना
चरणं।इति तिथ्यादितत्त्वं॥
किञ्च।असाधारणं शरीरव्या
पाराजितं अविरुद्धो दाने मति
रुक्तेन्न दद्यात्॥इति दायभागः॥
अतुल्यं।इति मुग्धबोधे साधारण
शब्दार्थदर्शनात्॥
असाध्यं त्रि असाधनीयं।अ
साधितव्यं।यथा।सहजानि
त्रिदोषाणि यानि चाभ्यन्तरा व
लिं।जायन्ते ऽर्शांसि संगृह्य ता
न्यसाध्यानि निर्द्दिशेत्॥
इति भावप्रकाशः॥अपि चाय
द्यं अपठेन्नित्यं दुर्गानामशता
ष्टकं।नासाध्यं विद्यते तस्य
त्रिषु लोकेषु पार्व्वति॥इति
विश्वसारतन्त्रे दुर्गाशतना

मात्मकं स्तोत्रं॥
असाध्वी स्त्री अपतिव्रता॥यथा
।कन्या तुलाद्वन्मिथुने च साध्वी
शेषेष्वसाध्वी धनवर्ज्जिता च।
निन्द्यापि लग्ने द्विपदांश इष्टः
कन्यादिलग्नेष्वपि नान्यभागः॥
इति ज्योतिस्तत्त्वं॥
असारं त्रि सारहीनवस्तु।तत्
पर्य्यायः।निःसारं २ निष्फलं ३
।इति शब्दरत्नावली॥वार्त्तं ४
इति जटाधरः॥
असाक्षात् व्य अप्रत्यक्षं।अ
तुल्यं।इति साक्षात् शब्दार्थ
दर्शनात्॥
असिः स्त्री नदीविशेषः।सा च
काशीदक्षिणदिकस्थिता।य
था।तस्मात् विश्वेश्वरात्सैव का
शीवासे ऽत्र कारणं।असिश्च व
रणा यत्र क्षेत्ररक्षाकृतौ कृते
॥वाराणसीति विख्याता तदा
रभ्य महामुने।असेश्च वरणा
याश्च सङ्गमं प्राप्य काशिका
॥वाराणसीह करुणामय दि
व्यमूर्त्ते रुत्सृज्य यत्र तु तनुं
तनुभृत् सुखेन।विश्वेश्वरात्स्व
हसि यत् सहसा प्रविश्य रूपे
णानं विनतनुना पदवीं दधाति

॥जातो मृतो वहुषु तीर्थवरेषु
रे त्वं जन्तो न जातु भवशान्ति
रभून्निमज्य।वाराणसीति गद
तीह मृतो ऽमृतत्वं प्राप्याधुना
ममवलात् स्मरशासनः स्या
त्॥इति काशीखण्डे ३० अध्या
यः॥
असिः पुं अस्त्रविशेषः।खाँडा
इति तरवाल इति च भाषा।तत्
पर्य्यायः।प्रवालकः १० भद्रात्म
जः ११ रिष्टिः १२ रिष्टः १३ ऋष्टिः
१४ धाराविषः १५ कौक्षेयः १६
तरवारिः १७ तरराजः १८ कृपा
णकः १९ करवालः २० कृपा
णी २१ शास्त्रः २२।इति शब्दरत्ना
वली॥विषसनः २३।इति त्रिका
ण्डशेषः॥॥तस्य स्तुतिर्यथा॥अ
सि विंशसनः खड्गः तीक्ष्णधारो
दुरासदः।श्रीगर्भो विजयश्चै
व धर्म्मपाल नमो ऽस्तु ते॥इ
त्यष्टौ तव नामानि स्वयमुक्ता
नि वेधसा।नक्षत्रं कृत्तिका ते
तु गुरु र्देवो महेश्वरः॥हिरण्य
ञ्च शरीरन्ते धाता देवो जनार्द्दनः
।पिता पितामहो देव त्वं मां
पालय सर्व्वदा॥नीलजीमूत
संकाश तीक्ष्णदंष्ट्रः कृशो

दरः।भावसुद्धो ऽमर्षणश्च अ
तितेजा स्तथैव च॥इयं येन
हृता सोणी हतश्च महिषासुरः
।तीक्ष्णधाराय शुद्धाय तस्मै ख
ड्गाय ते नमः॥इति बृहन्नन्दिके
श्वरपुराणीयदुर्गोत्सवपद्धति
धृतवाराहीतन्त्रं॥
अस्त्रभृत् त्रि प्राणी।जीवः।
यथा।हतय इव श्वसन्त्यसुभृ
तो यदि ते ऽनुविधा महदहमा
दयो ऽण्डमसृजन् यदनुग्रहतः।
इति श्रीभागवते दशमस्कन्धे
८७ अध्याये १४ श्लोकः॥
अस्त्रं क्ली प्रहारस्योपायुधं।तन्
निरूपणं यथा।दण्डसाध्ये यतो
राज्ये स दण्डः शास्त्रसंश्रितः।
अस्त्राणि भूमिपालानां निरूप
न्ते ततः क्रमात्॥अथ गणना।
खड्ग चर्म्म धनुर्बाणो पाशश्च भ
ल्लो तथापरो।अर्द्धचन्द्रश्च ना
राचः शक्तियष्टी तथा परे॥पर
सु श्चक्र शूले च परिघ श्चैव
मादयः।अस्त्रभेदाः समुद्दि
ष्टाः श्रीमद्भोजमहीभुजा॥वा
त्यास्तु।अस्त्रन्तु द्विविधं प्रो
क्तं निर्म्मायं मायिकं तथा।ख
ड्गादिकन्तु निर्म्मायं मायिकं
दहनादिकं॥दहनो ऽथ जलं
काष्ठं लोष्टं शब्दादय स्तथा।
तप्ततैलादिकञ्चैव मायिकमस्त्र
मुच्यते॥खड्गादीनान्तु गण
ना पूर्व्वमेव निदर्शिता।अस्त्राल
नैव निर्दिष्टः कवचादि रपीष्य
ते॥इति युक्तिकल्पतरुः॥
खड्गचर्म्मादिपरीक्षा तत्तच्छ
ब्दे द्रष्टव्या॥
अस्त्रागारं क्ली अस्त्ररक्षणगृहं।
सेलाखाना इति पारस्यभाषा।त
त्पर्य्यायः।आयुधागारं २।य
था।स्थापना जातितत्रस्तः सत
तं प्रतिजागृता।ततः स्यादायुधा
गारे दक्षः कर्म्मसु चायतः॥इ
ति मात्स्ये १८९ अध्यायः॥
अस्थायं त्रि अगाधं।स्थीयते य
त्रेत्यधिकरणवाच्ये घञि कृते
पश्चादादन्तात् यत् प्रत्यये स्थायं
ततो नस्थाय मस्थाय मिति
नञ्समासनिष्पन्नं॥
अस्थायी त्रि स्थितिरहितः।तस्थ
रः।स्थातुं शील मस्येति शीला
र्थे णिनि स्थायी न स्थायी अ
स्थायीति नञ्समासनिष्पन्नः॥
अस्थावरं क्ली स्थावरेतरद्रव्यं

।जङ्गमवस्तु।न स्थावरं अस्था
वरं इति नञ्समासनिष्पन्नं॥अ
स्थि क्ली शरीरस्य सप्तधातवन्त
र्गतधातुविशेषः।हाड इति भा
षा।तत् सङ्ख्यादि शारीरशब्दे
द्रष्टव्यं॥
अस्थिकुण्डं क्ली अस्थिपूर्णनर
ककुण्डविशेषः।यथा।पितृणां
यो विसृपदे पिण्डं नैव ददाति च
।स च तिष्ठत्यस्थिकुण्डे स्वलोममा
नं महेश्वरि॥इति ब्रह्मवैवर्त्ते
प्रकृतिखण्डे २७ अध्यायः॥
अस्थिरमतिः त्रि चञ्चलबुद्धिः।
यथा।विक्रान्तं कुलमुख्य मस्थि
रमतिं वित्तेश्वरं साङ्गिराः।इति
ज्योतिस्तत्त्वे हि ग्रहयोगफलं
॥ ॥
अस्थिरविभूतिः स्त्री चञ्चलैश्व
र्य्यं।यथा।अस्थिरविभूतिमेवं
वल मटनं स्खलितनियम मपि
वृत्ते।इति ज्योतिस्तत्त्वे राशिफ
लं॥
अस्थिसंहारकः पुं हस्तिविशेषः
।हाडभङ्ग इति हाडयोडा इति
च भाषा।तत्पर्य्यायगुणाः।
ग्रन्थिमानस्थिसंहारी वज्राङ्गी
चास्थिशृङ्खला।अस्थिसंहारकः
प्रोक्तो वातश्लेष्महरो ऽस्थियुक्
॥उष्णः सरः कृमिघ्नश्च दुर्नाम
घ्नो ऽक्षिरोगजित्।रूक्षः स्वादु
र्लघु र्वृष्यः पाचनः पित्तलः
स्मृतः॥काण्डं त्वग्विरहितं म
स्य शृङ्खलावा माषार्द्धं द्विदल
मकञ्चुकं तदर्द्धं।संपिष्टं स्वतनु
ततः स्तिलस्य तैले संपक्वं वट
क मतीव वातहारि॥इति भाव
प्रकाशः॥
अस्थैर्य्यं क्ली अस्थिरता।स्थिरस्य
भावः इत्यर्थे ष्यप्रत्यये स्थैर्य्यं
न स्थैर्य्यं मस्थैर्य्य मिति नञ्
समासेन निष्पन्नं॥
अस्पष्टं त्रि अव्यक्तं।यथा।स्प
ष्टं मस्पष्टं।इति मुग्धबोधव्याक
रणं॥
अस्पृहा स्त्री इच्छाभावः।यथा।
यथोत्पन्नेन सन्तोषः कर्त्तव्यो
ऽप्यल्पवस्तुना।परस्याचिन्तयि
तार्थे सास्पृहा परिकीर्त्तिता॥
इत्येकादशीतत्त्वं॥
अस्मद् त्रि आत्मवाचि सर्व्वनाम
शब्दः।एकविंशतिविभक्तियु
तस्य रूपाणि यथा।अहं १ आ
वां २ वयं ३।१।मां ४ आवां ५
अस्मान् ६।२।मया

७ आवाभ्यां ८ अस्माभिः ९॥
३॥मह्यं १० आवाभ्यां ११ अस्म
भ्यं १२॥४॥मत् १३ आवाभ्यां
१४ अस्मत् १५॥५॥मम १६ आ
वयोः १७ अस्माकं १८॥६॥म
यि १९ आवयोः २० अस्मासु
२१॥७॥एतानि त्रिषु लिङ्गेषु
समानानि॥द्वितीया चतुर्थी ष
ष्ठीनां एकवचन द्विवचन बहु
वचन विभक्तिषु तस्य रूपान्तरा
णि यथा॥द्वितीयैकवचने मा॥च
तुर्थी षष्ठ्यो रेकवचने मे॥आसां
द्विवचने नौ॥आसां बहुवचने
नः॥श्लोक पाद वाक्यादौ ए
तानि रूपाणि न स्युः॥च वा
हा ह एव शब्दयोगे अदर्शना
र्थे दृष्यर्थे धातुयोगे च न
स्युः॥इति व्याकरणं॥ अस्व
म्नी चतुर्जेलं॥तत्पर्य्यायः
॥लोचं॥इति जटाधरः॥अ
स्वामिकं त्रि स्वामिरहितवस्तु
॥यथा॥एतच्च अग्रदान स्वधु
मो अस्वामिकायाच्च न दद्यात्
अस्वामिकान्याह यमः॥अटव्यः
पर्वताः पुण्या नद्य स्तीर्थानि
यानि च॥सर्वाण्यस्वामिकान्याहु
र्न हि तेषु परिग्रहः॥पुण्या

इति विशेषणात् अटव्योः नैमि
षाद्योः॥पर्वता हिमालयाद्याः
॥नद्यो गङ्गाद्याः॥तीर्थाणि पु
रुषोत्तमादि क्षेत्राणि॥वाराण
स्याद्यायतनानि चास्वाम्यभावे
हेतु माह न हि ते षिति॥इति
प्राहुतत्वं॥
अस्वामिविक्रयः पुं अस्वामिक
र्त्तृकविक्रयः॥यथा॥स्म्वत्यस्वा
मिविक्रयाख्य व्यवहारपद मुप
क्रमते॥तस्य च लक्षणं नारदे
नोक्तं॥निक्षिप्तं वा परद्रव्यं नष्टं
लब्ध्वापहृत्य वा॥विक्रीयते सम
क्षं यत् स ज्ञेयो ऽस्वामिविक्र
य इति॥तत्र किमित्याह॥स्वं
लभेतान्यविक्रीतं क्रेतु र्दोषो
ऽप्रकाशिते॥हीनाद्रहो हीन
मूल्ये वेला हीने च तस्करः॥
स्वं आत्मसम्बन्धिद्रव्यं अन्या
विक्रीत मस्वामिविक्रीतं यदि
पश्यति तदा लभेत गृह्णीया
त्॥अस्वामिविक्रयस्य स्वत्वहेतु
त्वाभावात्॥विक्रीतग्रहणं
दत्ताहितयो रुपलक्षणार्थं॥
अस्वामिकृतत्वेन तुल्यत्वात्
॥अत एवोक्तं॥अस्वामि विक्रयं
दत्त माधिश्च विनिवर्त्तये

येदिति॥क्रेतुः पुन रप्रकाशिते
गोपिते क्रये दोषो भवति॥तथा
हीनात् द्रव्यागमोपायहीनात्
॥रहसि चैकान्ते॥सम्भाव्यद्रव्याद
पि हीनमूल्ये अल्पतरेण मूल्ये
न क्रये॥वेलाहीने वेलया ही
नो वेलाहीनः क्रयो रात्र्यादौ
कृतः तत्र च क्रेता तस्करो भव
ति॥तस्करवत् दण्डभाक् भव
तीत्यर्थः॥यथोक्तं॥द्रव्य मस्वामि
विक्रीतं प्राप्य स्वामी तदाप्नु
यात्॥प्रकाशक्रयतः शुद्धिः
क्रेतुः स्तेयं रहः क्रयादिति॥
स्वाम्यभियुक्तेन क्रेत्रा किं क
र्त्तव्य मित्यत आह॥नष्टापहृत
मासाद्य हर्त्तारं ग्राहयेन्नरं॥देश
कालातिपत्तौ च गृहीत्वा स्वय
मर्पयेत्॥नष्ट मपहृतं वा न्य
दीयं क्रियादिना प्राप्य हर्त्तारं
ग्राहयेत् चौरोद्धरणकादिभिः
॥आत्मविशुद्ध्यर्थं राजदण्डा
प्राप्त्यर्थञ्च॥अथाविदितदेशा
न्तरं गतः कालान्तरे वा विप
न्नस्तदा मूल्यसमाहरणाशक्ते
र्विक्रेतार मदर्शयित्वैव स्वय मेव
तद्धनं नाष्टिकस्य समर्पयेत्॥
तावतैवासौ शुद्धो भवतीति

श्रीकराचार्य्येण व्याख्यातं॥तदि
दमनुपपन्नं॥विक्रेतु र्दर्शनाच्छु
द्धि रित्यनेन पौनरुक्त्यप्रसङ्गात्॥
अतो ऽन्यथा व्याख्यायते॥नष्टाप
हृत मिति नाष्टिकं प्रत्यय मुपदे
शः॥नष्ट मपहृतं वा आत्मीयं द्र
व्य मासाद्य क्रेतृहस्तस्थं ज्ञात्वा
तं हर्त्तारं क्रेतारं स्थानपालादि
भि र्ग्राहयेत्॥देशकालातिपत्तौ
देशकालातिपत्तौ देशकालाति
क्रमे स्थानपालाद्यसन्निधाने त
द्विज्ञापनकालात् प्राक् पलायना
शङ्कायां स्वय मेव गृहीत्वा तेभ्यः
समर्पयेत्॥ ॥ग्राहिते हर्त्तरि किं
कर्त्तव्य मित्यत आह॥विक्रेतु र्दर्श
नाच्छुद्धिः स्वामी द्रव्यं नृपो दमं॥
क्रेता मूल्य मवाप्नोति तस्माद्य
स्तस्य विक्रयी॥यदासौ गृहीतः
क्रेता न भवेद मपहृतं अन्य
सकाशात् प्राप्त मिति वक्ति त
दा तस्य क्रेतु र्विक्रेतृदर्शनमात्रे
ण शुद्धि र्भवति॥न पुन रस्याव
ति योज्यः॥किन्तु तत्प्रदर्शि
तेन विक्रेत्रा सह नाष्टिक
स्य विवादः॥यथाह वृहस्
पतिः॥मूले समाहृते क्रेता
नाभियोज्यः कथञ्चन

मूलेन सह वादस्तु नाष्टिकस्य
विधीयते इति॥ तस्मिंश्च विवादे
यद्यस्वामिविक्रयनिश्चयो भवति
तदास्य नष्टापहृतस्य गवादिद्र
व्यस्य यो विक्रयी विक्रेता तस्य
सकाशात् स्वामी नाष्टिकः स्वी
यं द्रव्य मवाप्नोति नृपश्चापरा
धानुरूपं दण्डं क्रेता च मूल्य
मवाप्नोति। अथासौ देशान्तरं
गतः तदा योजनसंख्यया तद
नार्थे कालो देयः। प्रकाशं वा
क्रयं कुर्य्यात् मूलं वापि सम
र्पयेत्। मूलानयनकाल श्च
देय स्तत्राध्वसङ्ख्ययेति स्मरणा
त्॥ अथाविज्ञातदेशतया मूल
माहर्तुं न शक्नोति तदा क्रयं
शोधयित्वैव शुद्धो भवति। अस
माहार्य्यमूलस्तु क्रय मेव विशो
धयेदिति मनुवचनात्। यदा पुनः
साक्ष्यादिभि र्दिव्येन वा क्रयं न
शोधयति मूलञ्च न प्रदर्शय
ति तदा स एव दण्ड भाग्भवतीति
। अनुपस्थापयन्मूलं क्रयं वाप्य
विशोधयन्। यथाभियोगं धनिने
धनं दाप्यो दमञ्च सः॥ इति स्मर
णात्। स्वं लभेतान्यविक्रीत मि
त्युक्तं॥ ॥ तल्लिप्सुना किं

कर्त्तव्य मित्यत आह। आगमे
नोपभोगेन नष्टं भाव्य मतो ऽन्य
था। पञ्चबन्धो दम स्तस्य राज्ञे ते
नाविभाविते॥ आगमेन रिक्थ
क्रयादिना उपभोगेन च मदी
य मिदं द्रव्यं तच्चैवं नष्टमपहृतं
वेत्यपि भाव्यं साधनीयं तत्
स्वामिना अतोन्यथा तेन स्वा
मिना अविभाविते पञ्चबन्धो
नष्टद्रव्यस्य पञ्चमांशो दमो ना
ष्टिकेन राज्ञे देयः॥ ॥ अत्रै
वायं क्रमः। स्वहस्वामी नष्ट मा
त्मीयं साधयेत् ततः क्रेता चौ
र्यपरिहारार्थं मूल्यलाभाय च
विक्रेतार मानयेत्। अथानेतुं न
शक्नोति तदान्यदोषपरिहाराय
क्रयं शोधयित्वा नाष्टिकस्य स
मर्पयेदिति॥ तस्करस्य प्रच्छाद
कं प्रत्याह। हृतं प्रनष्टं यो द्रव्यं
परहस्तादवाप्नुयात्। अनिवेद्य
नृपे दण्ड्यः स तु षण्णवतिं प
णान्॥ हृतं प्रणष्टं वा चौरादि
हस्तस्थं द्रव्य मनेन मदीयं
द्रव्यमपहृत मिति नृपस्यानिवे
द्यैव दर्पादिना यो गृह्णाति असौ
षडुत्तरान् नवतिपणान् दण्ड
नीयः। तस्करप्रच्छादकत्वेन उ

ष्टत्वात्॥ ॥ राजपुरुषानीतं प्र
त्याह। शौल्किकैः स्थानपालै र्वा
नष्टापहृत माहृतं। अर्वाक् सम्व
त्सरात् स्वामी हरेत् परतो नृपः
॥ यदा तु शुल्काधिकारिभिः स्था
नरक्षिभि र्वा नष्ट मपहृतं द्रव्यं
राजपार्श्वे प्रत्यानीतं तदा संव
त्सरादर्वाक् प्राप्त श्चेत् नाष्टि
क स्तद्द्रव्य मवाप्नुयात्। ऊर्द्ध्वं पु
नः संवत्सराद्राजा गृह्णीयात्
स्वपुरुषानीतञ्च द्रव्यं जनसमू
हेषूद्घोष्य यावत् संवत्सरं राज्ञा
रक्षणीयं। यथाह गौतमः। प्रण
ष्ट मस्वामिक मधिगम्य राज्ञे
प्रब्रूयु र्विख्याप्य संवत्सरं राज्ञा
रक्ष्य मिति। यत्तु मनुना विष
न्तर मुक्तं। प्रणष्टस्वामिकं द्रव्यं
राजा त्र्यब्दं निधापयेत्। अर्वा
क् त्र्यब्दात् हरेत् स्वामी परतो
नृपति र्हरेत्॥ इति। तच्छ्रुत
वृत्तसम्पन्नब्राह्मणविषयं। र
क्षणनिमित्तं षड्भागादि ग्रह
णञ्च तेनैवोक्तं। आददीताथ
षड्भागं प्रनष्टाधिगतान्नृपः
। दशमं द्वादशं वापि सतां धर्म्म म
नुस्मरन्॥ इति। तृतीय द्वितीय
प्रथम वत्सरेषु यथाक्रमं षष्ठा

दयो भागा वेदितव्याः॥ प्रपञ्चि
तञ्चैतत् पुरस्तात्॥ ॥ मनूक्तष
ड्भागादि ग्रहणस्य द्रव्यविशे
षे अपवाद माह। पणानेकशफे
दद्यात् चतुरः पञ्च मानुषे। महि
षोष्ट्र गवां द्वौ द्वौ पादं पाद मजा
विके॥ एकशफे अश्वादौ प्रण
ष्टाधिगते तत् स्वामी राज्ञे रक्षा
निमित्तं चतुरः पणान् दद्यात्
। मानुषे मनुष्यजातीये द्रव्ये
पञ्च पणान्। महिषोष्ट्रगवां र
क्षणनिमित्तं प्रत्येकं द्वौ द्वौ प
णौ। अजाविके पुनः प्रत्येकं
पादं पादं दद्यादिति सर्वत्रानुष
ज्यते। अजाविक मिति समा
सनिर्देशेपि पादं पाद मिति
वीप्साबलात् प्रत्येकं सम्बन्धो
गम्यते॥ इत्यस्वामिकाविक्रय
प्रकरणं। इति मिताक्षरायां
व्यवहाराध्यायः॥

अस्वामी त्रि स्वामिभिन्नः। य
था। बृहस्पतिः। अस्वामिना तु
यद्भुक्तं गृह क्षेत्रापणादिकं।
सुहृद्बन्धु सकुल्यस्य न तद्भोगे
न हीयते॥ इति दायतत्त्वं॥ ॥
अस्वाम्य स्त्री स्वामित्वाभावः।

यथा देवलः। असाम्यं हि भवे
देषां निर्दोषे पितरि स्थिते। इ
ति दायतत्त्वं॥
अस्वास्थ्य क्ली स्वस्थताभावः
।स्वास्थ्यस्याभावः अस्वास्थ्य मि
त्यव्ययीभावसमासनिष्पन्नं॥
अह इ क भासे। इ क अंहयति।
भासो दीप्तिः। इति दुर्गादा
सः॥
अह इ उ· गतौ। इ अंहते। उ·
अंहते। इति दुर्गादासः॥
अहं त्रि अस्मदशब्दस्य प्रथमा
न्तरूपं। अस्मि इति भाषा। यथा
।अहं देवो न चान्योऽस्मि ब्रह्मै
वास्मि न शोकभाक्। सच्चिदा
नन्दरूपोऽहं नित्यमुक्तस्वभा
ववान्॥ इत्याह्निकतत्त्वं॥ अ
हङ्कारः पुं अभिमानात्मिका
अन्तःकरणवृत्तिः। इति वेदा
न्तसारः॥ अहमित्यभिमानः।
स च शरीरादिविषयको मि
थ्याज्ञानमुच्यते। इति गीता
मस्तवृत्तिः॥ अहमित्यव्यय
स्य करणं। अहमिति कि
ति अनेति वा अहङ्कारः। केरी
तेः किरते वा संज्ञा। कारक
त्यय इत्यन्ये। इत्यमरटीका।

यां भरतः॥ तत्पर्य्यायः। मदः
४ स्मयः ५ अवलेपः ६ दर्पः ७।
इति जटाधरः॥ अहङ्कृतिः ८ उ
द्धतमनस्कत्वं ९ मानः १० चित्त
समुन्नतिः ११। यथा। गर्व्वो मदो
ऽभिमानः स्यादहङ्कारस्त्वहङ्कृ
तिः। स्यादुद्धतमनस्कत्वे मान
श्चित्तसमुन्नतिः॥ अहङ्कारस्य
पर्य्याय इति केचित् प्रवदन्ते।
इति शब्दरत्नावली॥
अहङ्कारवान् त्रि गर्व्वयुक्तः।
तत्पर्य्यायः। अहंयुः २। इत्य
मरः॥ अहङ्कारान्वितः ३। इति
शब्दरत्नावली॥ गर्व्वितः ४। इति
जटाधरः॥
अहङ्कारी त्रि गर्व्वयुक्तः। अह
ङ्कारो विद्यतेऽस्येति अस्त्यर्थे
णिन्प्रत्ययेन निष्पन्नः॥
अहर्ज्जरः पुं संवत्सरः। यथा।
यथापः प्रवता यन्ति यथा मासा
अहर्ज्जरं। एवं मां ब्रह्मचारिणः
धातरायन्तु सर्व्वतः स्वाहा। इति
तैत्तिरीयोपनिषदि शिक्षावल्ली
॥ यथा लोके आपः प्रवता प्र
वणवता निम्नवता देशेन यन्ति
गच्छन्ति। यथा च मासा अह
र्ज्जरं संवत्सरोऽहर्ज्जरो अ

होभिः परिवर्त्तमानो लोकान्
जरयतीति अहानि वा अस्मि
न् जीर्य्यन्ति अन्तर्भवन्ति इत्य
हर्ज्जरः। तञ्च यथा मासा यन्ति
एवं मां ब्रह्मचारिणः हे धातः
सर्व्वस्य विधातः मा मायन्तु स
र्व्वतः सर्व्वदिग्भ्यः। इति तस्य श
ङ्कराचार्य्यकृतभाष्यं॥
अहल्या स्त्री गौतममुनिपत्नी
।सा च महासाध्वी। प्रातःकाले
तस्या नामस्मरणे महापातक
नाशो भवति। यथा। अहल्या
द्रौपदी कुन्ती तारा मन्दोदरी
तथा। पञ्चकन्याः स्मरेन्नित्यं
महापातकनाशनं॥ इति पुरा
णं॥ सत्ययुगे इन्द्रः गौतमरूप
धारणं कृत्वा तस्याः सतीत्वं
नाशितवान्। ततो गौतम शा
पेन सा पाषाणदेहा बभूव। ता
त त्रेतायुगे श्रीरामचन्द्रस्य पा
दस्पर्शात् शापाद्विमुक्ता सती
पुनः स्वरूपा मानवी भूता।
इति रामायणं॥
अहस्पतिः पुं सूर्य्यः। इत्यम
रः॥ अर्कहस्तः। अमरे तत्प
र्य्याये अर्काह्व इति दर्शनात्।
अहिच्छत्रा स्त्री ऊर्व्वीविशेषः।

यथा हद्दगार्ग्यः। केशव मान
न्तपुरं पाटलिपुत्रं पुरी माहिच्छ
त्रां। दिति मदितिञ्च स्मरन्ता
त्तौरविधौ भवति कल्याणं॥
इति ज्योतिस्तत्त्वं॥
अहिनकुलता स्त्री अहिनकु
अहिनकुलिका लयो वैरता।
नित्यविरोधितेति यावत्। अ
हिश्च नकुलश्च अहिनकुलौ
तयोः भाव इति भावार्थे त
लिक प्रत्यययोः स्त्रिया माप
निष्पन्ना॥
अहिस्तनः पुं क्षुद्ररोगविशेषः
तल्लक्षणं यथा। शकृन्मूत्र स
मायुक्ते ऽधौते ऽपाने शिशो
र्भवेत्। स्विन्ने वा स्नाप्यमानस्य
कण्डू रक्त कफोद्भवा॥ कण्डू
यनात्ततः क्षिप्रं स्फोटः स्राव
श्च जायते। एकीभूतं व्रणै
र्घोरं तं विद्यादहिस्तनं॥ ॥
तच्चिकित्सा यथा। तत्र संशो
धनैः पूर्व्वं धात्री स्तन्यं विशो
धयेत्। त्रिफला खदिरक्वाथै
र्व्रणानां क्षालनं हितं॥ शङ्ख
सौवीर यष्ट्याह्वै लेपः कार्य्यो
ऽहिस्तने। इति भावप्रका
शः॥ ॥

अक्ष ऊ व्याप्तिसंहत्योः। न अक्ष्णोति धनं लोकः। व्याप्नोति राशी करोति वा इत्यर्थः। ऊ आक्षिष्टां आष्टां। इति दुर्गादासः॥

अक्ष ऊ व्याप्तिसंहत्योः। अक्ष्णोति धनं लोकः। व्याप्नोति राशीकरोति वा इत्यर्थः। ऊ आक्षिष्टां। आष्टां। इति दुर्गादासः॥

अक्षक्रीडा स्त्री द्यूतक्रीडा। पाशकक्रीडा। यथा। अक्षक्रीडायां व्यासयुधिष्ठिरसंवादं प्रचरन्ति। इति तिथ्यादितत्त्वं॥ तद्विवरणं चतुरङ्गशब्दे द्रष्टव्यं॥ ॥कार्त्तिकशुक्लप्रतिपदि अर्थात् द्यूतप्रतिपदि तत्क्रीडाविधि र्यथा। ब्रह्मपुराणे। शङ्करश्च पुरा द्यूतं ससृजे सुमनोहरं। कार्त्तिके शुक्लपक्षे तु प्रथमेऽहनि भूपते॥ जितश्च शङ्कर स्तत्र जयं लेभे च पार्वती। अतो दुःखी शङ्करो दुःखी गौरी नित्यं सुखोषिता॥ तस्मात् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः। तस्मिन् द्यूते जयो यस्य तस्य संवत्सरः शुभः ॥पराजयो विरुद्धस्तु लब्धनाशकरो भवेत्। द्यूतञ्चाक्षादिभिः क्रीडनं। यथा मनुः। अप्राणिभि र्यत् क्रियते तल्लोके द्यूतमुच्यते। इति तिथ्यादितत्त्वं॥ ॥दशम्यां द्वादश्यां तत्करण निषेधो यथा। स्मृतिः। शाकं माषं मसूरञ्च पुनर्भोजनं मैथुने। द्यूत मत्यम्बुपानञ्च दशम्यां वैष्णव स्त्यजेत्। कूर्म्मपुराणे। कांस्यं मांसं सुरां क्षौद्रं हिंसां तैलं मसत्यतां। द्यूतक्रीडां दिवानिद्रां व्यायामं क्रोधमैथुनं॥ द्वादश्यां द्वादशैतानि वैष्णवः परिवर्ज्जयेत्। इत्येकादशीतत्त्वं॥ ॥अन्यत् द्यूतशब्दे द्रष्टव्यं॥ ॥

अक्षमः त्रि क्षमतारहितः॥ क्षमाशून्यः। यथा। विष्णुसेवी च श्वपचो वंशानां कोटि मुद्धरेत्। हरेरभक्तो विप्रश्च स्वञ्च रक्षितु मक्षमः॥ इति ब्रह्मवैवर्त्ते ३३ अध्यायः॥

अक्षमाला स्त्री वर्णमाला। यथा। गौतमीये। पञ्चाशल्लिपिभिर्म्माला विहिता जपकर्म्मसु। अ

कारादि क्षकारान्ता अक्षमाला प्रकीर्त्तिता॥ क्षार्णं मेरुमुखं तत्र कल्पयेन्मुनिसत्तम। अनया सर्व्वमन्त्राणां जपः सर्व्वसमृद्धिदः॥ इति तन्त्रसारः॥ ॥अन्यत् मालाशब्दे वर्णमालाशब्दे च द्रष्टव्यं॥

अक्षयं त्रि क्षयरहितं। कल्पान्तस्थायि। यथा। अक्षयाणि फलान्याहु रमरांस्त्रिदशानिव। कल्पान्तस्थानसंबन्धात् तेषां नाशवर्जितः॥ इति मीमांसककारिका॥ अपि च। भविष्यपुराणे। चतुर्दश्यां तथाष्टम्यां पक्षयोः शुक्लकृष्णयोः। यो अब्द मेकं न भुञ्जीत शिवार्च्चनपरो नरः॥ यत् पुण्य मक्षयं प्रोक्तं सततं सत्रयाजिनां। तत्पुण्यं सकलं तस्य शिवलोकञ्च गच्छति॥ इति तिथ्यादितत्त्वं॥ ॥पापपुण्याक्षयजनकयोगविशेषः। यथा। ज्योतिषे। सोमवारेऽप्यमावास्या आदित्याह्ने तु सप्तमी। चतुर्थ्यङ्गारवारे तु अष्टमी च बृहस्पतौ॥ अत्र यत् क्रियते पापमथ वा धर्म्मसञ्चयः। षष्टि जन्मसहस्राणि प्रतिजन्म तदक्षयं॥ इति तिथ्यादितत्त्वं॥

अक्षयतृतीया स्त्री वैशाखीशुक्लतृतीया। यथा। स्मृतिः। वैशाखे मासि राजेन्द्र शुक्लपक्षे तृतीयिका। अक्षया सा तिथिः प्रोक्ता कृत्तिका रोहिणीयुता॥ तस्यां दानादिकं पुण्य मक्षयं समुदाहृतं। इति तिथ्यादितत्त्वं॥ ॥ विवरणन्तु वैशाखशब्दे द्रष्टव्यं॥

अक्षरं क्ली अकारादिक्षकारान्तैकपञ्चाशद्वर्णाः॥ अस्योत्पत्तिकारणं यथा। बृहस्पतिः। षाण्मासिके तु समये भ्रान्तिः सञ्जायते नृणां। धात्राक्षराणि सृष्टानि पत्रारूढान्यतः पुरा॥ इत्याह्निकतत्त्वं॥ तच्च पञ्चविधं। यथा। मुद्रालिपिः शिल्पलिपि लिपि र्लेखनिसम्भवा। गुण्डिका घुणसम्भूता लिपयः पञ्चधा स्मृताः॥ इति वाराहीतन्त्रं॥ ॥अन्यत् मुद्राशब्दे वर्णशब्दे च द्रष्टव्यं॥ अक्षरः त्रि अक्षरणीयः। अच्युतः। यथा। तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय। येनाक्षरं पुरुषं

वेद सत्यं प्रोवाच तं तत्वतो ब्रह्मविद्यां॥ इति वेदान्तसारधृता श्रुतिः॥ अपि च। द्वाविमौ पुरुषौ लोके क्षर अक्षर एव च। क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते इति श्रीभगवद्गीतायां १५ अध्याये १७ श्लोकः॥ क्षर अक्षर इति द्वाविमौ पुरुषौ लोके प्रसिद्धौ। तावेताह। तत्र क्षरः पुरुषो नाम सर्व्वाणि भूतानि ब्रह्मादि स्थावरान्तानि शरीराणि अविवेकिलोकस्य शरीरेष्वेव पुरुषत्वप्रसिद्धेः। कूटो राशिः शिलाराशिः पर्वत इव एक देशस्थ नश्यत्स्वपि निर्विकारतया तिष्ठतीति कूटस्थ आत्मा भोक्ता सत्वक्षरः पुरुष उच्यते विवेकिभिः। इति भटीकायां श्रीधरस्वामी॥

अक्षरजननी स्त्री लेखनी। यथा। लेखन्यक्षरजननी वर्णमाला मसिप्रसूः। इति हारावली ति केचित्॥

अक्षाग्रकीलकः पुं शकटचक्रपुरोवर्त्तिकीलकः। तत्पर्य्यायः। अणिः २ इत्यमरः॥ अणी ३ आणिः ४। इति भरतः॥

अक्षान्तिः स्त्री परामृद्यासहिष्णुत्वं॥ भार्य्यादेः परदर्शनायसहिष्णुत्वं। इति भरतः॥ तत्पर्य्यायः। ईर्ष्या २ इत्यमरः॥ ईर्षा ३ अक्षमा ४। इति शब्दरत्नावली॥

अक्षारलवणं क्ली हविष्यान्नविशेषः। महाहविष्य मिति ख्यातं। यथा। कृत्रिमात् लवणात् भिन्नं मक्षारलवणं मतं। इदं मतन्तु स्मार्त्तस्य रत्नाकरमतं यथा॥ गोक्षीरं गोघृतं चैव धान्य मुद्ग यवा स्तिलाः। सामुद्रं सैन्धवञ्चैव मक्षारलवणं मतं॥ इति नारायणावन्द्यघटीयकृतशुद्धिकारिका॥

अक्षिकूटकः पुं चक्षुर्गोलकः। इति केचित्॥

अक्षुण्णः त्रि अक्षोदितः। अचूर्णितः। इति स्वस्थानवर्यदर्शनात्॥ अच्छिन्नः। यथा। अक्षुण्णं परिरप। इति चूडाकरणे पशुपतिः॥

अक्षुब्धः त्रि अक्षोभितः। इति क्षुभ्यानोः क्तप्रत्यये क्षुब्धस्ततो न क्षुब्धः अक्षुब्ध इति नञ्समासनिष्पन्नः॥ ॥

अक्षेमं क्ली अमङ्गलं। यथा। किन्तु तेषां गृहे क्षेम मक्षेमं किन्नु साम्प्रतं। कथन्ते किन्नु सद्वृत्ताः दुर्वृत्ताः किन्नु मे सुताः॥ इति देवीमाहात्म्ये १ अध्यायः॥

अक्षोटः पुं वृक्षविशेषः। आखरोट इति हिन्दीभाषा। तत्पर्य्यायगुणाः। पीलुः शैलभवो ऽक्षोटः कर्परालश्च कीर्त्तितः। अक्षोटकोपि वातादसदृशः कफपित्तकृत्॥ इति भावप्रकाशः॥

अक्षौरिमं क्ली क्षौरकर्म्मविहितनक्षत्रं। यथा। उत्तरात्रितय याम्य रोहिणी रौद्र सर्प पितृभेषु वारिभे। श्मश्रुकर्म्म सकलं विवर्जयेत् प्रेतकार्य्य मपि बुद्धिमान्नरः॥ चन्द्रशुद्धि र्यदा नास्ति तारायाश्च विशेषतः। अक्षौरिक्षिपि कर्त्तव्यं चन्द्र चन्द्रजयो र्दिने॥ इति ज्योतिस्तत्त्वं॥ ॥

आ

आ आकारवर्णः। अस्य लेखनप्रकारो यथा। अकारस्तपमासाद्य दक्षकोडायता त्वयः। ब्रह्मादय स्तया शक्ति स्तासु तिष्ठन्ति नित्यशः॥ इति वर्णोद्धारतन्त्रं॥ तस्य नामानि यथा। आकारो विजयानन्दो दीर्घच्छायो विनायकः। क्षीरोदधिः पयोदश्च पाशो दीर्घास्य वृत्तकौ॥ प्रचण्ड एकजो रुद्रो नारायण इभेश्वरः। प्रतिष्ठा मानदा कान्तो विघ्नान्तक गजान्तकः॥ पितामहो द्विदान्तो भूः क्रिया कान्तिश्च सम्भवः। द्वितीया मानदा काशी विघ्नराजः कुजो वियत्॥ सुरान्तकश्च हृदयमङ्गुष्ठो भगमालिनी। इति वर्णाभिधानं॥

आः पुं पितामहः॥ वाक्यं। यथा। अ विस्तुः प्रतिषेधः स्यादाः पितामह वाक्ययोः। सीमायामथाव्ययं आ भवेत् संकोच पीडयोः॥ इत्यग्निपुराणे एकाक्षराभिधानं॥

आकम्पितं त्रि कम्पविशिष्टं। तत्पर्य्यायः। कम्पितं ७ धुतं ८ व्याधूतं ९ विसृतं १० रुतं ११ प्रकम्पितं १२ इति शब्दरत्नावली॥

आकर्षः पुं आकृष्यते अनेन। आँकुषी इति भाषा। यथा।

आकर्ष इव स्था आकर्षस्थः।इ
ति मुग्धबोधव्याकरणं॥आकर्षेत
स्य इति ज्ञापनार्थं इवशब्दः।इति
दुर्गादासः॥

आकर्षणं स्त्री बलादानयनं।यथा
॥सा त्वं गच्छ मयैवोक्ता पार्श्वं
शुम्भनिशुम्भयोः।केशाकर्षण
निर्धूतगौरवा मागमिष्यसि॥इ
ति मार्कण्डेये देवीमाहात्म्य॥
॥तन्त्रोक्तकर्म्मविशेषद्वारा यो
षायानयनं॥यथा।अथाकर्षणं
।आकर्षणविधानानि कथयामि
मि समासतः।यदष्टं त्रैपुरे तन्त्रे
यदष्टं भूतडामरे॥श्रीबीजं मा
यं बीजं लज्जाबीजं समुद्धरेत्
।प्रथमं प्रणवं दत्वा विद्यादि
विपदं ततः॥अमुकीति पदं
दत्वा आकर्षय द्वितीयपदं।
स्वाहान्तं मन्त्रमुद्धृत्य ज
पेदष्टसहस्रकं॥षट्कोण
चक्रमालिख्य रक्तचन्दन
कुङ्कुमैः।षडङ्गं कारयेन्मन्त्री
लज्जाबीजसमन्वितं॥षड्दी
र्घभाक् स्वरेणैव नादबिन्दुवि
भूषितं।रक्तपुष्पाक्षत धूपादि नै
वेद्यैः परिपूज्य तां॥ भावयन्
चेतसा देवीं त्रिनेत्रां चन्द्र

शेखरां।बालार्ककिरणप्रख्यां सि
न्दूरारुणविग्रहां॥पद्मञ्च दक्षि
णे पाशे जपमालाञ्च वामके।म
न्त्रस्यास्य प्रभावेण रम्भामपि नयेद्
वशं॥आकर्षयेच्च सन्देहः किं पु
नर्मानवी मिह॥ ॥भूर्जपत्रे समा
लिख्य कुङ्कुमालक्तकादिना॥
काश्मीरागुरु कस्तूरी रोचनामिलि
तेन चाथवा नामा रक्त मिश्रेण कमा
लात्तीमन्त्रं लिखेत्॥ओं ह्रीं कमा
लात्ति अमुकी माकर्ष याकर्षय
ओं फट्।इमं मन्त्रं जपेदादौ सह
स्रैकं ततः पुनः॥तद्भूर्जपत्र माद
य गुलिकां कारयेत् सुधीः।तैं
वं साध्यपादोत्थमृत्तिकापङ्कवे
ष्टितां॥शोषितां तेजसा भानो वै
ष्टयेत् त्रिकटुकैः पुनः।प्रतिमां
स्त्री निर्मां कृत्वा क्षिपेत्तस्या स्त
दो हरे॥गुलिकां पातयेत् पात्रे
प्रतिमां साध्यरूपिणीं।तारुणा
भिमुखो भूत्वा निर्जने निशि
साधकः॥तत्र स्कन्दविन्त्रश्च
तावत् कालं जपेन्मनुं।
यावदायाति सन्त्रस्ता मद
नालसविग्रहा॥ ॥अथा
न्यत्कथयाम्यत्र नृपाकर्षण
हेतवे।देवस्यापि नर

स्यापि मोहिनीमन्त्रजापतः॥अ
थ मन्त्रं महेशान्या स्मार मादौ
तत स्वपां।पञ्चशायकबीजञ्च
दत्वाथ भुवनेश्वरीं॥मोहिनी ति
च नाम्नासे फट्कारं पुनरालिखे
त्।स्वाहान्तमन्त्र मुक्तञ्च मध्य
बीजेन कारयेत्॥षडङ्गान् दी
र्घयुक्तार्थे अष्टदलके यजे
त्।प्रथमं साध्यनामानि लेख्या
नि च कजोदरे॥महारजन रक्ते
न सर्वमन्त्रपदं युतं।मोहिनी प
द्मकिञ्जल्के जृम्भिणीं स्तम्भि
नी तथा॥वशङ्करी कुलेशी
ञ्च ततो वै विश्ववासिनी।आ
कर्षिणीं ततः क्षिप्त्वा मन्त्रये
दष्टपत्रके॥गन्धपुष्पादि धूपै
र्वै भक्तियुक्तेन चेतसा लक्षज
प्येन सर्वेषां शीघ्र माकर्षणं भ
वेत्॥ ॥ह्रीं कालिकायै धीम
हि तन्नः कालि प्रचोदयात्॥
ओं आकर्षिणी वज्रधारिणी ह्रूं
फट्स्वाहा अमुकी माक
र्षय।प्रणवं पूर्वं मुद्धृत्य उग्र
सेनी ततः परं।नित्यक्लिन्नी वह्नि
जाया विद्या परमदुर्लभा॥सिन्दू
रपुत्तलिं कृत्वा तस्या नाम हृदि
विलिख्य पणमूल्येन नाम्बले समा

नीय आमशरावद्वये नैवेद्यं कृ
त्वा कुलाष्टोत्तरशततलस्या मू
लमन्त्रपठिते पुत्तल्या हृदि नाम
स्थाने ताडिते सति सा समायाति
।इति श्रीकृष्णानन्दविद्यावागी
शकृतषट्कर्म्मदीपिका तन्त्रसा
रश्च॥

आकालिकप्रलयः पुं प्रलयवि
शेषः।कपिलशापेन अकाले ज
गत् प्लावनं।तद्विवरणं यथा।श्री
मार्कण्डेय उवाच।आकालिको
ऽयं प्रलयो यतो भगवता कृतः
तत् शृणुष्व महाभागा वाराहं
लोकसंक्षयं॥यथा वा मत्स्यरू
पेण वेदा स्त्राताश्च शार्ङ्गिणा त
दहं संप्रवक्ष्यामि सर्वपाप प्रणा
शनं॥श्रीकपिल उवाच।स्वाय
म्भुव मनुश्रेष्ठ ब्रह्मरूप महामते
।ममैक मीप्सितार्थं त्वं देहि प्रा
र्थयतो ऽधुना॥ जगत्
सर्वं तवैवेदं त्वया च परि
पालितं।त्वया सर्वं जगत्
सृष्टं त्वमेव जगतांपतिः॥
तन्मे देहि रहः स्थानं त्रिषु
लोकेषु दुर्लभं। पुण्यं पाप
हरं रम्यं ज्ञानप्रभव मुत्तमं॥
त्वं हि सर्वभूता

तो भूत्वा प्रत्यक्षदर्शिवान्॥उद्ध
रिष्ये जगज्ज्ञानात् निर्मीय ज्ञान
दीपिकान्॥अज्ञानसागरे मग्न
मधुना सकलं जगत्।ज्ञानदी
पं प्रदायाहं तारयिष्ये जगत्।
ज्ञानदीपं प्रदायाहं तारयिष्ये
जगत्त्वं॥श्रीमनुरुवाच।यदि
त्वयाखिलजगद्धितार्थे ज्ञान
दीपिका।विकीर्णा तपः का
र्य्यं किं स्यात्तार्थेनया भव॥दे
वागाराणि तीर्थानि क्षेत्राणि स
रितस्तथा।वर्षाणि पुण्यभाग्मत्र
तिष्ठन्ति कपिल क्षितौ॥तेषामे
कतमं त्वन्वेदासाद्य कुरुषे त
पः।स्थानं ब्रह्मन् तपःसिद्धो
न भविष्यति तत्र किं॥कपिल उ
वाच।त्वयि विश्रम्भ माधाय तप
सः सिद्धये ऽचिरात्।स्थानेमयाक्ष
र्थितं ते त्वं मां लिप्ससि हेत्वभिं
॥अद्यान्यन्ते वचो मे ऽद्य प्राये
त्यानां विकल्प्यनं।यत्नं वदसि
तस्मात्त्वं फल मेतद्वाप्नुहि॥
इदं त्रिभुवनं सर्वं सदेवासुरमा
नुषं।हत प्रहत विध्वस्त मचिरे
ण भविष्यति॥नचिरात् द्रक्ष्यसि म
नो जलपूर्णं जगत्त्रयं।हत प्रहतविध्व
स्तं तवानेविशाततं॥एवमुक्ता मुनी
न्द्रो ऽसौ कपिल स्त

पसां निधिः।अन्तर्दधे जगामा
पि तदा ब्रह्मसदो मुनिः॥कपि
लस्य वचः श्रुत्वा विसन्नवदनो
मनुः।भावीति प्रतिपद्याशु मनुर्नो
वाच किञ्चन॥विशालां बदरी
यातो गङ्गाद्वारान्तिकं मनुः।
प्रविश्य तपसे यत्न मकरोल्लो
कभावनः।आराधयामास ह
रिं जगत्कारणकारणं॥ॐ नमो
भगवते वासुदेवाय शुद्धज्ञान
स्वभाविने।इति जप्य प्रजपतो
मनोः स्वायम्भुवस्य तु॥प्रससा
द जगन्नाथः केशवो न चिराद
थानतः त्वद्दृशो भूत्वा हृषी
दलसमप्रभः॥कर्द्दरं कलिका
युग्म त्वत्प्रनेत्र युगोज्वलः।तप
स्यन्तं महात्मानं मनुं स्वायम्भुवं
मुनिं॥आससाद तदा त्वक्षमत्स्य
रूपी जनार्दनः।उवाच च महा
त्मानं मनुं स्वायम्भुवं तदा॥त
पोनिधे महाभाग भीतं मां त्रा
तुमर्हसि।नित्यं युद्धे जितं मत्स्यै
र्विशालै र्भक्षितुं प्रति॥अथ प्रभू
तैर्विपुलै द्रावितः प्रचुरो मभिः
।प्राणकाङ्क्षी महात्मानं भव
न्तं शरणं गतः॥आमोर्ह यथा
केऽस्मि प्र मयिमां परिपालय॥

इति तस्य वचः श्रुत्वा मनुः स्वा
यम्भुव स्ततः॥अलिञ्जरे तोयपू
र्णे न्यधाद्विपुलभोगिनि।स त
स्मिन् मल्लिके मत्स्यो वर्द्धमानो
दिने दिने॥सामान्यरोहितप्रा
यदेहो भूत्वा विरादथ।दश्यचट
जलपूर्णे प्रत्यहं स महात्मा॥म
ल्लिकमसति कुर्वन् वर्द्धयामास
मत्स्यं॥सच संविषदेनेओ मत्स्यरा
जो ऽचिरेण मल्लिकशलिलमध्ये
लोमशः मीनदेहः॥इति कालि
कापुराणे ३१ अध्यायः॥ ॥श्री
मार्कण्डेय उवाच।ततस्तथा
पीनतनुं दृष्ट्वा मत्स्यं मनुः स्वयं
गृहीत्वा पाणिना फुल्लनलिनी
सरसीं ययौ॥तत्सरस्तत्र विपु
लं पुण्ये नारायणाश्रमे।एक
योजनविस्तीर्णं सार्द्धयोजनमा
यतं॥नानामीनगणोपेतं शीता
मलजलोत्करं।तदासाद्य सरो
मत्स्यं विनिधाय मनुस्तदा॥
पालयामास सम्भवन् कृपया
परया पुनः।सो ऽचिरेणैव
कालेन पीनो वैसारिणो ऽभ
वत्॥न सम स्तत्र सरसि हृदन्
कायो द्विजोत्तमाः।स एकदा
महामत्स्यः सर्वोपरतटहृये॥

शिरः पुच्छे निधायाशु तद्गदेहः
समुच्छ्रितः।स्वायम्भुवं महात्मानं
त्रुक्रोश चाहि मा मिति॥ते तथा
स मनु र्श्रुत्वा क्रोशन्तं मीनपुङ्ग
वं।आससाद् तदा मत्स्यं जग्राह
च करेण तं॥न शक्नोम्यहं मर्दनं
सुपुरोमाण मद्भुतं।इति सञ्चिन्त
यन्नेवं प्रोद्धार करेण तं॥भगवा
नपि विश्वात्मा मत्स्यरूपी जनार्द
नः।स्वायम्भुवकरं प्राप्य लघिमा
न ममाश्रयेत्॥ततः कराभ्या
मुद्धृत्य स्कन्धे धृत्वा एडजं मनुः
।निनाय सागरं तत्र तोये च नि
दधे ततः॥यथेच्छमत्र वर्द्धस्व न
केऽपि त्वां हनिष्यति।अचिरेणै
व सम्पूर्णदेहत्वं समवाप्नुहि॥इ
त्युक्त्वा स महाभागः सर्वप्राण
भृतां वरः।लघुत्वं चिन्तयंस्तस्य
विस्मयं परमं गतः॥मत्स्योपि
न चिरादेव शृङ्गीकाय स्तदा म
हान्॥सर्वेनः स्वयामास देहा
भोगेन सागरं॥तं शृङ्गीकाय
मालोक्य ततीभ्यामः समुच्छ्रि
तं।घास्तैः शिराभी रचितं मान
साचलसन्निभं॥रुन्धन्तं साग
रं सर्वं देहाभोगाचलीकृतं।स्वा
यम्भुवो मनु र्धीमान् मेने

मत्स्यं गतं तदा॥ततः पप्रच्छ तं
साम्ना मत्स्यं स्वायम्भुवो मनुः।
विचिन्त्य लघिमानञ्च प्रथमन्तु
तं तदाद्भुतं॥श्रीमनुरुवाच॥न
त्वं मत्स्य महं मन्ये कस्त्वं मे वद
सत्तम।महत्त्वं लघिमानन्ते चिन्त
यन् सुमहत्तम॥त्वं ब्रह्मा ह्यथ
वा विष्णुः शम्भुर्वा मीनरूपधृक्
न चेदृशं महाभाग तन्मे वद म
हामते॥श्रीमत्स्य उवाच।आरोध्यो
हं त्वया नित्यं यो हरिः स सनात
नः।तवेष्टकामसिद्ध्यर्थं प्रादुर्भू
तः समाहितः॥यत्त्वमिच्छसि दे
वेश मन्नः शान्तेन मूर्त्तिना।तत्
करिष्येऽद्य तां मूर्त्तिमिमां विद्धि
मत्तो मम॥श्रीमार्कण्डेय उवाच
।इति तस्य वचः श्रुत्वा विष्णो
रमिततेजसः।ज्ञात्वा प्रत्यक्षतो
विष्णुं मनुस्तुष्टाव केशवं॥श्री
मनुरुवाच।नमस्ते जगदव्य
क्त प्रसादरूपते हरे।पावकादि
त्य शीतांशु नेत्रत्रयपराव्य
य॥जगत्कारण सर्वज्ञ जगद्धा
म हरे परे।सर्वेश परमेशान
नारायण सुरेश्वर॥इत्यादि स्तो
त्रे।श्रीमार्कण्डेय उवाच॥स्वा
यम्भुवेन मनुना संस्तुतो मत्

स्यरूपधृक्।वासुदेव सदा प्राह
मेघगम्भीरनिस्वनः॥श्रीभगवा
नुवाच।तुष्टोऽस्मि तपसा तेऽद्य
भक्त्या चापि स्तुतो मुहुः॥सप्र
ख्यया तथानेन वरं वरय सुव्रत
।इष्टार्थं संप्रदास्यामि तुभ्यमा
त्र विचारणा॥वरयाभीप्सितान्
कामान् लोकानां वा हितञ्च
यत्।मनुरुवाच।यदि देयो वरो
मेद्य लोकानां यो हितो भवेत्
।तन्मे देहि वरं विष्णो तं वदा
मि शृणुष्व मे॥प्राशाप कोप
लः पूर्वे मदर्थे भुवनत्रयात्।
न प्रहत विध्वस्तं सकलं तेभ
विष्यति॥येनेयं महता पृथ्वी
येनेयं परिपालिता।संहरिष्य
ति यस्त्वेतां तेऽधुना ज्ञापय
स्विमां॥ततोऽहं दीनहृदय
स्त्वामेव शरणं गतः।न य
थेदं त्रिभुवनं जलप्लुतं भवि
ष्यति।हत प्रहत विध्वस्तं त
थात्वं देहि मे वरं।श्रीभगवानु
वाच।नमतः कपिलो भिन्न स
था न कपिलादहं।यदुक्तं मुनि
ना तेन मयोक्तं विहितं मतो॥
तस्माद्युडहितं तेन तत्सत्यं
नान्यथा भवेत्।करिष्ये तत्र

साहाय्यं स्वायम्भुव निबोध तत्
॥हत प्रहत विध्वस्ते लोयमग्रे
जगत्त्रये।न चिरादेव तत्रायं प्रा
वयिष्यामि वै मनो॥यावज्जल
प्लवस्तावत् यथा कार्य्यं त्वया
मनो।तन्मे निगदितं तथ्यं शृणु
ष्वावहितो ऽधुना॥सर्वे यज्ञिय
काष्ठौघैरेका नौका विधीयतां
।तां महं दृढयिष्यामि यथा नो
भिद्यते जलैः॥दशयोजनविस्ती
र्णां त्रिंशद्योजन मायतां।धारि
णीं सर्वबीजानां भुवनत्रयव
र्त्तिनी॥सर्वेयाज्ञिकद्रुत्राणां भू
रिवल्कलतन्तुभिः।नवयोजन
दीर्घन्तु व्यामत्रयसुविस्तृतां॥
ऊरुस्वयं मनो तूर्णं वहती सौ
रिकां वटीं।जगद्धात्री जगन्मा
या लोकमाता जगन्मयी॥द
ढयिष्यति तां रज्जुं न त्रुसति य
था तथा।सर्वाणि बीज्यान्या
दाय सर्वेदान् सप्त वै ऋषीन्॥
तस्यां नावि निसन्न स्त्वं वर्त्तमाने
जलप्लवे।दक्षेण सह संगम्य
स्मरिष्यसि मनो मम॥स्मृतो ऽहं
भूर्णमायास्ये भवतो निकटं प्र
ति।श्यामलेनाथ शृङ्गेण त्वं मा
ज्ञास्यसि वै तदा॥यावत् प्रहत

विध्वस्तं हतं स्याद्भुवनत्रयं।ता
वत् शृङ्गेन तां नावं वोढाहं ना
त्र संशयः॥जलप्लुवे च संघूर्णे
शृङ्गे मम च तां तरिं।त्वं तया च
टिकया तूर्णं सदा नेष्यसि वै
दृढे॥वद्धायां नावि मे शृङ्गे दैव
मानेन वत्सरान्।सहस्रं प्रेरयि
ष्यामि तां नावं शोषयन् जलं॥
ततः शुष्केषु तोयेषु प्रोन्नते
शिखरे गिरेः।हिमाचलस्य वद्धा
तां तस्मिन्नाव महं मनो॥त्वा
वै गोपयिता नित्यं तावत्र शोष
ये जलं।चिन्तितोऽहं त्वया या
स्ये यदाहं निकटं तव॥शृङ्गेण
श्यामले नैव त्वं मां ज्ञास्यसि पु
ष्करे।पुनः सृष्टिं ततः कृत्वा म
त्प्रसादान्महामते॥त्रैलोकमुद्धे
मा मुहि भवास्यसि सनातनी।अ
ह माराधितो येन जपेन भवता
मनो॥सर्वसिद्धि भवेत्तस्य
य स्तोषयति तेन मां। श्री
मार्कण्डेय उवाच। इति
दत्वा वरं तस्मै मत्स्यस्य स्तेन
नमस्कृतः अन्तर्द्दधे जगन्ना
थो लोकानुग्रहकारकः॥स्वा
यम्भुवो ऽपि भगवानन्तर्द्धो
ने गते हरौ।यथोक्तं ह

रिणा पृष्ठे नावं रज्जुं तथाकरो
त्॥सर्व्वयाति यदृ त्तोवान् छि
त्वास्वायम्भुव स्तदा।उद्धेन कार
यामास नावं दृढतरां ततः॥ते
षां वल्कसमुद्भूतसूत्रसंयैवेदी
रिकां।सहस्त्रैकेन प्रमाणेन का
रयामास वै मनुः॥ततः का
लेन महता वृत्ते युद्धे महाद्भुते
।विसृष्टे येन्नवराहे सरतस्य ह
रस्य च॥ततो जलप्लवे भूते
विध्वस्ते भुवनत्रये।तया रज्ज्वा
तरिं वद्धा वीजान्यादाय सर्व्वशः
॥वेदानृषीन् तथा सप्त दत्तं वा
दाय वै मनुः।तस्यां नावि समाधा
य तोयमग्ने चराचरे॥स्वायम्भुव
स्तदा मत्स्यं हरिं सस्मार वै ततः
।ततो जलानामुपरि सम्ब्रूद्धे इ
व पर्व्वतः॥उद्दीप्त स्त्रैकशृङ्गेण
विस्तु र्मत्स्यस्वरूपधृक्।आग
त स्तत्र न चिरायत्रास्ते स मनु
र्हरिः॥तरि मारुह्य विपुले तो
यराशौ भयङ्करे।यावज्जलाच
लं तोयं तावत् धृष्ठे तरिं यथात्
॥जले प्रकृति मापन्ने शृङ्गे व
द्धा तरिं तदा।तां नावं चोदया
मास सहस्रं देववत्सरान्॥स्व
ये नाव मवष्टभ्य दधार परमे

श्वरः।योगनिद्रा जगद्धात्री समा
सीदद्धटीरिकां॥ततः शनैः श
नै स्तोये शोषं गच्छति वैचिरा
त्।पश्चिमं हिमवत् शृङ्गं सुम
ग्नं तोयमध्यतः॥द्विसाहस्रं यो
जनाना मुच्छ्रितस्य हिमप्रभोः
।पञ्चाशतं सहस्राणि शृङ्गं त
त्रस्य चोच्छ्रितं॥तस्मिन् शृङ्गे
ततो नावं वद्धा मत्स्यान्यधृक्
हरिः।जगाम शोषणां यास्तु
जलानां जगतांपतिः॥एवं हि
मत्स्यरूपेण वेदा स्त्रातास्त्र शा
र्ङ्गिणा।कपिलस्य तु शापेन ह
तो ऽथाकालिकोलयः॥आका
लिको ऽयं प्रलयो यतो भगव
ता कृतः।इति वः कथितं सर्व्वं
यथावत् द्विजसत्तमाः॥इति
कालिकापुराणे ३२ अध्या
यः॥

आकाशः पुं गगणं।तत् पर्य्या
यः।नाकः १९ अनङ्कः २० नभ
सं २१ मेघवेश्म २२ महाविलं २३
।इति जटाधरः॥मरुद्वर्त्म २४
मेघवर्त्म २५ त्रिपिष्टपं २६।इ
ति शब्दरत्नावली॥ ॥आका
शगङ्गा स्त्री स्वर्गगङ्गा।यथा
।आकाशगङ्गासलिलं

श्रृङ्गगणनादिते।जैशएपललि
ते आरुमरुद्भि रुपवीजिते॥इ
ति शिवरात्रिव्रतकथा॥
आकाशदीपः पुं कार्त्तिक मा
से भगवदुद्देशेन नभसि दत्त
प्रदीपः।यथा।कार्त्तिके आका
शदीप उक्तो निर्णयामृते पु
ष्करपुराणे।तुलायां तिलतैले
न सायंकाले समागते।आका
शदीपं यो दद्यात् मास मेकं
हरिं प्रति॥महतीं श्रिय माप्नो
ति रूपसौभाग्य सम्पद मिति।त
द्विधिश्च हेमाद्रौ आदिपुराणे।दि
वाकरे ऽस्ताचलमौलिभूते गृ
हादहूरे पुरुषप्रमाणं।यूपाकृ
तिं यज्ञियवृक्षदारु मारोप्य
भूमावथ तस्य मूर्द्धि॥यवाङ्गु
लच्छिद्रयुतास्तु मध्ये द्विहस्त
दीर्घा अथ पट्टिकास्तु।कृत्वा
वतस्रो ऽष्टदलाकृती स्तु याभि
र्भवेदष्टदिशानुसारी॥
तत्कर्णिकायास्तु महाप्र
काशो दीपः प्रदेयो दलगा
स्तथाष्टौ।निवेद्य धर्म्माय
हराय भूम्यै दामोदरायाप्य
थ धर्म्मराजे॥प्रजापतिभ्यस्त्व
थ सत् पितृभ्यः प्रेते

भ्य एवाथ तमः स्थितेभ्यः।इति
।अपरार्कै तन्त्रो मन्त्रो यथा।दा
मोदराय नभसि तुलायां लोल
या सह।प्रदीपं ते प्रयच्छामि न
मो ऽनन्ताय वेधसे॥इति।इति
निर्णयसिन्धौ २ परिच्छेदे कार्त्ति
कमाहात्म्यं॥
आकाशवल्ली स्त्री लताविशेषः।
तत्पर्य्यायगुणाः।आकाशवल्ली
तु वुधैः कथितामरवल्लरी।खवल्ली
ग्राहिणी तिक्ता पिच्छिलास्याम
यापहा॥तुवराग्निकरी हृद्या पि
त्त श्लेष्मामनाशिनी।इति भा
वप्रकाशः॥
आकीर्णं त्रि व्याप्तं।तत्पर्य्यायः।
समाकीर्णं ४।इति शब्दरत्ना
वली॥
आखुकर्णी स्त्री लताविशेषः।य
था।आखुपर्णी आखुकर्णी क
र्णिका मूदरीभवा।आखुकर्णी कटु
स्तिक्ता कषाया शीतला लघुः॥
विपाके कटुका मूत्र कफामय
कृमिप्रणुत्।इति भावप्रकाशः॥
आख्यानं क्ली कथनं।यथा।क
थितं वसुपाख्यानं ब्रह्मपुत्र
यथागमं।देवी मङ्गलचण्डी या
तदाख्यानं निशामय॥इति

ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४२ अ
ध्यायः॥
आग्रयणं स्त्री नवशस्येष्टिः। य
था। शरद्वसन्तयोः केचिन्नव
यज्ञं प्रचक्षते। धान्यपाकवशा
दन्ये श्यामाको वनिनः स्मृतः॥
इत्यनेन शरद्वसन्तविहितनवश
स्येष्टिः। श्यामाकैर्व्रीहिभिः श्चै
व यवै रन्योन्यकालतः। प्राग
यणं युज्यते ऽवश्यं न त्वनाग्रय
णान्ययः॥ इति कालान्तरदर्श
नात् श्राद्धेपि तथा इति। आग्र
यणं नवशस्येष्टिः। इति मल
मासतत्त्वं॥
आग्रहायणिकः पुं अग्रहाय
णमासः। तत्पर्य्यायः। आग्रहा
यी ५ अलकः ६ सहः ७ मार्ग
शिरः ८। इति शब्दरत्नावली॥
अग्रहायणसम्बन्धिनि त्रि॥
आघूर्णितः त्रि घूर्णितनेत्रादिः
। यथा। आघूर्णितो वा वातेन
स्थितः पोते महार्णवे। इति
देवीमाहात्म्यं॥
आर्च्यं स्त्री मधुविशेषः। यथा
मधूकवृक्षा निर्यासं जरत् काष्ठा
अमीढ्वाः। स्त्रवन्त्यार्च्यं तदा
ख्यातं श्वेतकं मालवे पुनः॥

तीक्ष्णतुण्डास्तया पीता मक्षिकाः
षट्पदोपमाः। आर्च्यं स्यात् तत्कृ
तं यत्तदार्च्यं मित्यपरे जगुः॥ इ
ति भावप्रकाशः॥
आचमनं स्त्री वारत्रयजलपा
नानन्तरतन्नदङ्गस्पर्शरूपशु
द्धिजनकक्रिया। तत्पर्य्यायः।
आचमः २ शुचिवर्णीः ३। इति
शब्दरत्नावली॥ तद्विधानं यथा
। त्रिराचामेदपः पूर्व्वं द्विः प्रमृज्या
त्ततो मुखं। संमृज्याङ्गुष्ठमूलेन
त्रिभिरास्य मुपस्पृशेत्॥ अङ्गु
ष्ठेन प्रदेशिन्या घ्राणं पश्चा
दनन्तरं। अङ्गुष्ठानामिकाभ्या
ञ्च चक्षुःश्रोत्रे पुनः पुनः॥ क
निष्ठाङ्गुष्ठयो र्नाभिं हृदयन्तु
तलेन वै। सर्व्वाभिस्तु शिरः प
श्चाद्बाहू चाग्रेण संस्पृशेत्। ऋग्
वेदो यजूंषि सामानि त्रिः पिवन्
प्रीणयेत् क्रमात्। अथर्व्वाङ्गिर
सौ पूर्व्वं द्विः प्रमार्ष्टी नयेन्मतं
॥ सेतिहासपुराणानि वेदाङ्गा
नि यथाक्रमं। खं मुखं नासि
के वायुं नेत्रे सूर्य्यं
श्रुती दिशः॥ प्राणग्रन्थि
मथो नाभिं ब्रह्माणं
हृदयं स्पृशेत्॥

हृदं मूर्द्धान मालभ्य प्रीणात्यथ
शिखा मृषीन्॥ बाहू यमेन्द्र वरु
णा ऊवेर वसुधानलान्। अप्सु
त्यु वरुणो विष्णु मिन्द्र विष्णू कर
द्वयं॥ वासुकिप्रमुखान् नागान्
जलं क्षिपति यत् क्षितौ। ये ऽन्तरा
विन्दवो यान्ति भूतग्राममव्द्ध ते
द्विज॥ अग्नि वायु सूर्य्येन्द्रा गिर
यो ऽङ्गुलिपर्व्वसु। गङ्गाद्याः सरि
त स्तासु या रेखाः करमध्यगाः॥
तले सोमः सतीर्थश्च स्मृतो ऽतः
पावनः करः। इति गारुडे २१५
अध्यायः॥ ॥ अन्यच्च। अथा
चमनं। पराशरः। कृत्वाथ शौचं
प्रक्षाल्य पादौ हस्तौ च मृज्जलैः
। निवद्धशिख आसीनो द्विज
आचमनं चरेत्॥ आपस्तम्भः।
इत्येव मद्भि राजानु प्रक्षाल्य चर
णौ पृथक्। हस्तौ चामणिवन्धा
भ्यां पश्चादासीन संयतः॥ आ
जान्विति अश्वप्रमादिना तत्
पर्य्यन्त मशौचे आजङ्घान इ
ति हारीतोक्तं सामान्यः। कृत्वो
पवीतं सव्यांशे वाङ्मनः का
यसंयतः॥ ॥ शिखावन्धे
विशेष माह ब्रह्मपुराणं। गा
यत्र्या तु शिखां बद्धा नै

र्ऋत्यां ब्रह्मरन्ध्रतः। त्रुटिकाञ्च
ततो बद्धा ततः कर्म्म समारभेत्॥
याज्ञवल्क्यः। अन्तर्जानु शुचौ दे
शे उपविष्ट उदङ्मुखः। प्राग्वा ब्रा
ह्मेण तीर्थेन द्विजो नित्य मुप
स्पृशेत्॥ अन्तर्जानु जानुनो र्मध्ये
हस्तौ कृत्वेति शेषः। भविष्ये। समौ
तु चरणौ कृत्वा तथा बद्धशिखो
नृप। आचामेत्स्यतुहसो देवलः
। शिखां बद्धा वसित्वा तु निर्णिक्ते
वाससी शुभे। तूष्णीं भूत्वा समा
दाय नोद्गच्छन्न विलोकयन्॥
आह्यावरोधे न मनुः। काय
त्रैदशिकाभ्यान्तु न पित्रेण क
दाचन। मार्कण्डेयः। सपवित्रे
न हस्तेन कुर्य्यादाचमनक्रिया
। नोच्छिष्टं तत् पवित्रन्तु भुक्तो
च्छिष्टन्तु वर्जयेत्॥ उदकग्रहणे
परिमाण माह भरद्वाजः। आय
तं पर्व्वणां कृत्वा गोकर्णाकृति
मत् करं। संहताङ्गुलिना तोयं
गृहीत्वा पाणिना द्विजः॥ मुक्ता
ङ्गुष्ठकनिष्ठाभ्यां शेषेणाचम
नं चरेत्। माषमज्जनमात्रास्तु
संगृह्य त्रिः पिवेदपः॥ याज्ञ
वल्क्यः। अद्भिस्तु प्रकृतिस्था
भि र्हीनाभिः फेनबुद्बुदैः। हृत्

दे:।हस्तकण्ठ तालुगाभिस्तु यथा
संख्यं द्विजातयः॥शुद्धेरन् स्त्रीच
शूद्रश्च सकृत् स्पृष्टाभि रन्ततः।
अन्ततः उष्ठमात्रो।प्रचेताः।अन्त
स्ताभि रफेणाभिः पूताभिर्वीक्ष्य
चक्षुषा।हस्तनाभि रशब्दाभि र्हि
स्त्रर्वद्वाद्भि राचमेत्॥चतुर्वेति
भावस्तुदयपत्तया॥ ॥आचमन
प्रकार माह दक्षः।प्रक्षाल्य हस्तौ
पादौ च त्रिः पिबेदम्बु वीक्षितं।
सम्वृत्याङ्गुष्ठमूलेन द्विः प्रमृज्या
त्ततो मुखं॥संहत्यतिसृभिः पूर्व
मास्य मेव मुपस्पृशेत्।अङ्गुष्ठेन
प्रदेशिन्या घ्राणं पश्चादनन्तरं
॥अङ्गुष्ठानामिकाभ्याञ्च च
क्षुः श्रोत्रे पुनः पुनः।नाभि
कनिष्ठाङ्गुष्ठेन हृदयन्तु तले
नवै ॥सर्वाभिस्तु शिरोदेशं
बाहू चाग्रेण संस्पृशेत्।पुनः
पुनरिति घ्राणादीनां गोलक
द्वयाभिप्रायेण।इति श्रीदत्तः
॥ ॥वीक्षणाङ्गुलयो रपवादमा
ह यमः।रात्रावनीक्षितेनापि
शुद्धिरुक्ता मनीषिभिः।उदके
नोत्तराणाञ्च तथोसेनोसपा
धिनां॥ ॥सुखमार्जनानन्तरं
व्यासः।वामहस्ते पादौ

शिरश्च दक्षिणेन पाणिना जले
नाभ्युक्षयेदिति सामवेदिकमः।
यजुर्वेदिनान्तु गोतमः।पादौ चा
भ्युक्षयेत् खानि चोपस्पृशेत् शी
र्षाणि मूर्द्धि दद्यात् उदकबिन्दून्॥
इन्द्रियस्पर्शे विशेष माह मनुः।
खानि चैव स्पृशेदद्भि रिति।नाभि
स्पर्शे व्यासः।ततः स्पृशेन्नाभिदे
शं पुन रपश्च संस्पृशेत्।इन्द्रिय
स्पर्शनानन्तरं भविष्ये।यदुमाकुरु
कं वीर समुन्नृजति दानवावा
लकि प्रभुत्वान्नागान् तेन शौ
णानि मानवः॥ ॥जलस्थलो
भयकर्म्मानुष्ठानार्थञ्च जलस्थ
लैकचरणेनाचमनं कर्त्तव्य माह
पैठीनसिः।अन्तरुदके आचान्तो
अन्तरेव शुद्धो भवति बहि रुद
के आचान्तो बहिरेव शुद्धः सा
न् तस्मादन्तरेकं बहिरेकञ्च कृ
त्वा पाद माचामेत् सर्वत्र शुद्धो
भवतीति॥ ॥जलमात्रे जानो
रूर्द्धे सुनिष्ठन्नाचमन माह विष्णुः
।जानो रूर्द्धे जले तिष्ठ न्नाचान्तः
शुचिता मियात्।अधस्तात्कृत
शतोपि समाचान्तो न शुद्ध्यति
॥हारीतः।आर्द्रवासा जले कुर्या
त्तर्पणाचमनं जपं।

शुष्कवासाः स्थले कुर्यात्तर्प
णाचमनं जपं॥आचमननिषेधे
देवलः।सोपानत्को जलस्थो
वा मुक्तकेशोपि वा पुनः।उ
ष्णीषी वापि नाचामेद्वस्त्रेणावे
ष्ट्य वा शिरः॥न गच्छन्न शया
न स्थ न चलन्न पतन् स्पृशन्।न
हसन्नैव संजल्पन्नात्मानञ्चैव
वीक्षयन्॥केशान्नीवीमधःका
यमस्पृशन् धरणीमपियदिस्पृ
शति चैतानि भूयः प्रक्षालयेत्
करं॥आत्मानं हृदयं।तथा व्यासः
॥शिरः प्रावृत्य कण्ठं वा मुक्तक
च्छ शिखोपि वा।अकृत्वा पाद
योः शौच माचान्तोप्यशुचि र्भ
वेत्॥मरीचिः।न बहिर्जानु त्वर
या नासनस्थो न चोत्थितः।नपा
दुकास्थो नान्यचित्तः शुचिः प्र
यतमानसः॥भुक्तासनस्थोप्या
चामेन्नान्यकाले कदाचन।जानु
भ्यामूर्द्ध्व माचम्य जले तिष्ठन्न दुष्य
ति॥शातातपः।स्नान माचमनं
होमं भोजनं देवतार्चनं।प्रौढपा
दो न कुर्वीत स्वाध्यायं पितृत
र्पणं॥ ॥द्विराचमन निमित्ता
नि।स्नात्वा पीत्वा क्षुते सुप्ते
भुक्त्वा रथ्योपसर्पणे।

आचान्तः पुनराचामेद्वासो विप
रिधाय च॥ब्रह्मपुराणं।होमे भो
जनकाले च सन्ध्ययो रुभयो र
पि।आचान्तः पुनराचामेदन्यत्रा
पि सकृत् सकृत्॥ ॥अथाचम
न निमित्तानि।निष्ठीवने तथा
भ्यङ्गे तथा पादावसेचने।उच्छि
ष्टस्य च सम्भाषादशुच्युपहतस्य
च॥सन्देहेषु च सर्वेषु शिखां ब
द्ध्वा तथैव च।विना यज्ञोपवीते
न नित्य मेव मुपस्पृशेत्॥उष्ट्र वा
यसंसंस्पर्शे दर्शने चान्त्यवासिनां
।हारीतः।स्त्रीशूद्रोच्छिष्ट सम्भा
षणे मूत्रपुरीषोत्सर्गदर्शने दे
व मभिगन्तुकाम आचामेत्॥
॥ ॥अथ आचमनप्रतिप्रस
व माह स्मृतिः क्षुते निष्ठीवने
सुप्ते परिधाने ऽश्रुपातने।क
र्म्मस्थ एषु नाचामेद्दक्षिणं श्र
वणं स्पृशेत्॥हदशानातपः।वा
तकर्म्मणि निष्ठीवे दन्तश्लिष्टे
तथानृते।क्षुते पतितसंलापे
दक्षिणश्रवणं स्पृशेत्॥मार्कण्डे
यपुराणं।कुर्यादालम्भनं स्प
र्शं गोपृष्ठस्यार्कदर्शनं।कुर्वीता
लम्भनं वापि दक्षिणश्रवणस्य
च॥यथाविभवतो होतत् प

द्विभावे ततः परं॥ आचमने
जलाधारनिषेधमाह उशना।
कांस्यायसेन पात्रेण त्रपु सीस
क पित्तलैः। आचान्तः शतकृ
त्वोपि न कदाचित् शुचि र्भवेत्
इति गोपालपञ्चाननकृता
चारनिर्णयः॥
आचमनीयं क्ली मुखप्रक्षाल
नार्थजलं। तद्दानविधि र्यथा। द
द्यादाचमनीयञ्च सुगन्धिसलि
लैः शुभैः। कर्पूरवासितै र्वापि कृ
ष्णा गुरुसुधूपितैः॥ यथा तथा
सुगन्धै र्वा प्रसन्नैः फेणवर्जितैः
तैजसेन पात्रेण प्राङ्मुखाय प्र
दापयेत्॥ उदकं दीयते यत्तु
प्रसन्नं फेनवर्जितं। आचमना
य देवेभ्य स्तदाचमन मुच्यते॥
केवलं तोय पात्रेण तदाद्या
न्नमिश्रितं। वासितन्तु सुगन्धा
द्यैः कर्त्तव्यं यदि लभ्यते॥
आयुर्बलं यशो हर्षं प्रदाया
चमनीयकं। लभते साध
को नित्यं कामां श्चैव यथे
प्सितान्॥ इति कालिका
पुराणे ६७ अध्यायः॥ आ
चान्तः त्रि कृताचमनः। यथा
। बौधायनः। स्नात्वा पीत्वा क्षुते

सुप्ते भुक्त्वा रथ्योपसर्पणे। आ
चान्तः पुनराचामेत् वासो विप
रिधाय च॥ इत्याह्निकतत्त्वं॥
आचारः पुं स्नानाचमनादिः।
इति मानवे १ अध्याये १०९ श्लो
कटीकायां कुल्लूकभट्टः॥ व्य
वहारः। स तु विचारः। यथा बृ
हस्पतिः। आचारेणावसन्नो
पि पुन र्लेखयते यदि। सोभिधे
यो जितः पूर्वं प्राङ्न्यायस्तु
स उच्यते॥ इति व्यवहारतत्त्वं॥
चरित्रं। एतद्विवरणं सदाचारश
ब्दे द्रष्टव्यं॥
आचार्य्यः त्रि वेदाध्यापकः। त
ल्लक्षणं यथा। उपनीय तु यः
शिष्यं वेद मध्यापयेत् द्विजः।
सकल्पं सरहस्यञ्च त माचा
र्य्यं प्रचक्षते॥ इति मानवे २ अ
ध्यायः॥
आछन्नः त्रि आच्छादितः। य
था। मेघाच्छन्नेह्नि दुर्दिनं। इ
त्यमरः॥
आछ र आयामे। इति कविक
ल्पद्रुमः॥ इत्यादौ ह्रिताभावः
प्रकृतित्वमनिरासार्थः। र आ
छते। आयामो दीर्घीकरणं।
आच्छति करं शिल्पी। इति

दुर्गादासः॥
आत्तप्रः त्रि आत्तप्राप्तः। यथा।
आत्तप्राप्त स्ततो देव्या श्चण्डमु
ण्डपुरोगमाः। चतुरङ्ग-बलोपेता
ययु रभ्युद्यतायुधाः॥ इति देवी
माहात्म्यं॥
आढकं क्ली परिमाणविशेषः।
आढा इतिभाषा। यथा। शतयोज
नविस्तीर्णे त्रिंशद्योजन मायतं।
आढकस्य भवेन्मानं मुनिभिः प
रिकीर्त्तितं॥ अपिच। त्रिंशद्योज
न विस्तीर्णं शतयोजन मायतं।
विंशद्योजन गम्भीर माढकं परि
कीर्त्तितं॥ इति गणपतिभट्टः।
इति ज्योतिस्तत्त्वं॥
॥
आत्मघाती त्रि आत्महननक
र्त्ता। अबैधबुद्धिपूर्वकात्महनन
स्य प्रायश्चित्तं यथा। इन्द्रिये रण
रिभ्यक्ता ये च मूढा विषादिनः
। घातयन्ति स्वमात्मानं चाण्डा
लादिहताश्च ये॥ तेषां पुत्राश्च
पौत्राश्च देयया समभिप्लुताः
। यथा श्राद्धं प्रनश्यन्ति वि
ख्नताम प्रतिष्ठितं॥ तथा ते
संप्रवक्ष्यामि नमस्कृत्य स्व
यम्भुवो इति हेमाद्रौ हृद्

शातातपेनोक्तं॥ आत्मनो घातस्य
शुद्ध्यर्थं चरेच्चान्द्रायणद्वयं। तप्त
कृच्छ्रं चतुष्कञ्च त्रिंशत् कृच्छ्रा
णि वा पुनः॥ अर्वाक् संवत्स
रात् कुर्य्याद्दहनादि यथोदितं॥
कृत्वा नारायणबलि मनित्यता
न्तदायुषः। इदञ्चात्मवधनिमि
त्तं तज्जातिवधप्रायश्चित्तेन समु
च्चितं कार्य्यं। इति निर्णयसिन्धौ
५ परिच्छेदः॥ अन्यत् पतित।
शब्दे द्रष्टव्यं॥ ॥ आत्मत्या
गेषु विशेष माह गौतमः। प्रा
यो ऽनाशक शस्त्राग्नि विषोद
कोद्बन्धन प्रपतनै श्चेच्छता
मिति। प्रायो महाप्रस्थानं। अ
नाशक मनशनं। प्रपतनं शैल
शिखरादवपातनं॥ इत्यादि नि
मित्तैः शास्त्राविहितमार्गेण इ
च्छापूर्वक मृताना मशौचादि
कं न कर्त्तव्य मित्यर्थः। अङ्गिराः।
चाण्डालादुदकात् सर्पात् ब्रा
ह्मणाद्वैद्युतादपि। दंष्ट्रिभ्यश्च पशु
भ्यश्च मरणं पापकर्म्मिणां॥ उद
कं पिण्डदानञ्च प्रेतेभ्यो यत्
प्रदीयते। नोपतिष्ठति तत्सर्व्वं
अन्तरीक्षे विनश्यति॥ मनुः।
वृथा शङ्करजातानां प्रव्रज्यासु

च तिष्ठतो।आत्मन स्त्यागिनां
चैव निवर्त्तेतोदकक्रिया॥ह
याशङ्कुरजातानां मिति हया
जाताः पञ्चमहायज्ञादिरहिताः
।शङ्कुरजाताः प्रतिलोमजाः॥
प्रमादात् शर्वोक्तनिमित्ते स
रणे विधत एवाशौचादिकं।
अतएवाङ्गिराः।अथ कश्चित्
प्रमादेन म्रियेताग्न्युदकादिभिः
।तस्याशौचं विधातव्यं कर्त्तव्या
चोदकक्रिया॥चाण्डालादिस्व
ताहिताग्ने रग्न्यादीनां प्रतिपत्ति
कर्म्म च स्मृत्यन्तरेऽभिहितं
॥वेतानां प्रतिपेदस्य यावस
थ्यं च तथैव।पात्राणि तु देहे
दग्धे यजमाने हयामृते॥हया
मृतः अविहितमार्गेण मृतः॥त
था।आत्मनस्त्यागिनां नास्ति पति
तानां तथा क्रिया।तेषामपि च
गङ्गायाः तीरे संस्थापनं मतं।
गङ्गेति पुण्यनद्युपलक्षणं॥
एवं शर्वोक्तनिन्दितमरणे मृता
नां स्नेहादिनात्माद्यौर्द्ध्वदेहिक
करणे स्मृत्यन्तरे प्रायश्चित्तमा
म्नातं।कृत्वाग्निमुदकं स्नानं स्प
र्शनं वहनं तथा।रज्जुच्छेदाश्रु
पातञ्च तप्तकृच्छ्रेण शुध्यति इति

॥एतच्च बुद्धिपूर्वे प्रत्येक मन्या
दिकरणे।अबुद्धिपूर्वके तु सम
स्तैः।एषा मन्यतम प्रेते यो वहे
त दहेत वा।कटोदकक्रियां कृ
त्वा कृच्छ्रं सान्तपनं चरेत्॥य
त्तु समन्वादिमासं भैक्षाहार
स्त्रिसवनञ्च।तथा एकरात्रोभो
जनादिकं चाभिहितं तदशक्त
विषये देशकालाद्यपेक्षानुसा
रेण योजनीयं॥ ॥यस्तु दहादि
त्वेनाभिषक्क्रिय स्तस्यात्महन
न मपुनज्ञात् मादिपुराणे।इह
शौच स्नाने लोपः प्रत्याख्यान
भिषक्क्रियः।आत्मानं घात
येयस्तु वग्न्यग्नशनाम्बुभिः॥
तस्य त्रिरात्र माशौचं द्वितीये
त्वस्थिसञ्चयः।तृतीये तूदकं
कृत्वा चतुर्थे श्राद्ध माचरेत्॥त
था।गच्छेत महापथं वापि तुषा
र गिरि मादरात्।प्रयागे वटशा
खायां देहत्यागं करोति यः॥स्व
यं देह विनाशस्य काले प्राप्ते
महामतिः।उत्तमान् प्राप्नुयाल्लो
कान्नात्मघाती भवेत् क्वचित्
॥एतेषा मधिकारस्तु सर्वेषां स
र्वजन्तुषु।नराणा मथ नारीणां
सर्ववर्णेषु सर्वदा॥अशौ

चं स्यात् त्र्यहं तेषां वज्रानलह
तेषु च।वाराणस्यां म्रियेयस्तु प्र
त्याख्यातभिषक्क्रियः॥प्रणवं
तारकं ब्रूते नान्यथा कस्यचित्
क्वचित्।विवस्वान्।सर्वेन्द्रिय
विमुक्तस्य स्वव्यापारात्समस्य
च।प्रायश्चित्त मनुज्ञात मग्निप
तो महापथः॥धर्म्मार्ज्जनासमर्थ
स्य द्वादशवार्षिकादिरूप प्राय
श्चित्तासमर्थस्य।एवं शास्त्रविहि
तमार्गेण मृतानां चाण्डालादि मृ
तानां सम्वत् सराद्दूर्द्ध्वं मौर्द्ध्वदेहि
कं कार्य्यं।षट्त्रिंशन्मते।गोब्रा
ह्मणहतानाञ्च पतितानां तथै
व चाऊर्द्ध्वं सम्वत्सरात् कुर्य्यात्
सर्व मेवौर्द्ध्वदेहिकं॥ ॥अत्राप
रं विशेष माह पराशरः।चाण्डा
लेन श्वपाकेन गोभि र्विप्रै र्हे
तो यदि।आहिताग्नि र्मृतो विप्रो
विषेणात्मघातकः॥दहेत
ब्राह्मणं विप्रो लोकाग्नौ मन्त्र
वर्जितं।दग्ध्वास्थीनि पुनर्गृह्य
क्षीरेण क्षालयेत्ततः॥स्वेना
ग्निना स्वमन्त्रेण पृथगेव तत्
पुनर्दहेत्॥ ॥सम्वत् सरा
दर्व्वागपि तत्तत् पापानुसारेण
हिरण्यादि प्रायश्चित्तं विधाय ना

रायणबलिञ्च कृत्वा ऊर्द्ध्वदेहिकं
कार्य्यं।आयुषो अनित्यत्वेन सम्व
त्सरानन्तर मौर्द्ध्वदेहिकादि लोप
प्रसङ्गात्।तच्च नारायणबलिं
कृत्वा।तथाच वृद्धयाज्ञवल्क्यः
।नारायणबलिः कार्य्यो लोकग
र्हाभयान्नरैः।तथा तेषां भवेत्
शौचं नान्यथेत्यब्रवीद्यमः॥नारा
यणबलौ कृते ऊर्द्ध्वदेहिककर
णे भवतीत्यर्थः॥ ॥सर्पहते तु
विशेषः।सम्वत्सरं यावत् पञ्च
म्यां नागपूजां विधाय तदनन्त
रं नारायणबलिं कृत्वा सौवर्ण
नागं प्रत्यक्षां गाञ्च मासोद्देशे
न ब्राह्मणाय दत्वा ऊर्द्ध्वदेहिकं
कुर्य्यात्॥ ॥नारायणबलिस्वरू
पञ्च विष्णुनाभिहितं।एकादशी
समासाद्य शुक्लपक्षस्य वै तिथिं
।विष्णुं समर्च्चयेद्देवं यमं वैवस्व
तं तथा॥दशपिण्डान् घृताभ्य
क्तान् दर्भेषु मधुसंयुतान्।ति
लमिश्रान् प्रदद्याद्वै संयतो द
क्षिणामुखः॥विष्णौ बुद्धौ समा
साद्य नद्याम्भसि ततः क्षिपेत्।
नाम गोत्रग्रहं कृत्वा पुष्पै रभ्य
र्च्चनं ततः॥धूप दीप प्रदान।
ञ्च भक्ष्य भोज्यं तथा

परं।विद्या तपः समृद्धान् वेदज्ञ
शीलान् पञ्चान् समाहितान्।निम
न्त्रयेत विप्रान् वै पञ्च सप्त न
वापि वा।अपरे ऽहनि सम्प्राप्ते
मध्याह्ने समुपोषितः॥विश्वे
भ्यर्च्चनं कृत्वा विप्रान् स्नानुप
वेशयेत्।उदङ्मुखान् यथा
ज्येष्ठं पितृरूप मनुस्मरन्॥म
तो निवेश्य विश्वे वै सर्वे ऽप्यपी
दतन्द्रितः।आवाहनादि यत्प्रो
क्तं देवपूर्वं तदाचरेत्॥दत्त्वान्
स्नात्वा ततो विप्र स्तांस्तु हृष्ट्वा
यथाविधि।हविष्यव्यञ्जनेनैव
तिलादिसहितेन च॥पञ्चापि
ण्डान् प्रदद्याच्च देवरूप मनुस्म
रन्।प्रथमं विश्वे दद्यात् ब्रह्म
णे च शिवाय च॥यमाय सानुसा
राय च तुर्थं पिण्ड मन्त्रैर्जितात्मतं
संकीर्त्य मनसा गोत्रपूर्वं मतः प
रे॥विष्णो नाम गृहीत्वैवं पञ्च
मं पूर्ववत् क्षिपेत्।विप्रानाच
म्य विधिवत् दक्षिणाभिः सम
र्च्चयेत्।गवा वस्त्रा भूम्या च
प्रेतं तं मनसा स्मरेत्॥तत स्ति
लाम्भो विप्रास्तु हस्ते दद्युः स
मन्त्रिते।क्षिपेयुः गोत्रपू
र्वेन्तु

एकं हदनमं विप्रं हिरण्येन समर्च्चयेत्॥

नाम बुद्धो निवेश्य च॥हविर्गन्ध
तिलाम्भस्तु तस्मै दद्युः समाहि
ताः।मित्र भृत्य जनैः सार्द्धं पश्चा
द्भुञ्जीत वाग्यतः॥भविष्यपुरा
णे।सुवर्णतारनिष्पन्नं नागं कृत्वा
तथैव गां।व्यासाय दत्वा विधिव
त् पितृ राऋण्य माप्तवान्॥इति
श्राद्धतत्त्वपारिजाते ५ स्तवकः
॥ ॥
आत्मतत्त्वं त्वी तत्तद्भासकं नित्य
शुद्ध बुद्ध मुक्त सत्यस्वभावं प्र
त्यक् चैतन्य मेवात्मतत्त्वं।पुत्रा
दिभासकंनित्य शुद्धत्वादि स्वरू
प मेवात्मवस्थिति यावत्।एत
द्विवरणं।यथा।इदानीं प्रत्यगा
त्मनि इद मिद मय मय मारोप
यतीति विशेष उच्यते।तथाच।
अतिप्राकृतस्तु आत्मा वै जाय
ते पुत्र इत्यादि श्रुतेः स्वस्मिन्नि
व स्वपुत्रेऽपि प्रेमदर्शनात् पुत्रे
पुष्टे नष्टे ऽहमेव पुष्टो नष्ट श्चे
त्याद्यनुभवाच्च पुत्र आत्मेति
वदति॥१॥चार्वाक स्तु सवा
एष पुरुषो ऽन्नरसमय इत्यादि
श्रुतेः प्रदीप्त गृहात् स्वपुत्रं
परित्यज्यापि स्वस्य निर्गमद
र्शनात् स्थूलो

241

ऽहं कृशो ऽहं इत्याद्यनुभवाच्च
स्थूलशरीर मात्मेति वदति॥२॥
अपर श्चार्वाकः ते ह प्राणाः प्र
जापतिं समेत्य ब्रूयु रित्यादि श्रु
तेः इन्द्रियाणा मभावे शरीर च
लनाभावात् काणो ऽहं बधिरो
ऽहं इत्याद्यनुभवा च्च इन्द्रिया
ण्यात्मेति वदति॥३॥अन्यस्तु
चार्वाकः अन्यो अन्तर आत्मा
प्राणमय इत्यादि श्रुतेः प्राणा
भावे इन्द्रियचलनायोगात् अ
ह मशनायावानहं पिपासावा
न् इत्याद्यनुभवाच्च प्राणआ
त्मेति वदति॥४॥इतरस्तु चा
र्वाकः अन्यो ऽन्तरआत्मा मनो
मय इत्यादि श्रुतेः मनसि सुप्ते
प्राणादे रभावात् अहं सङ्क
ल्पवानहं विकल्पवानित्याद्य
नुभवाच्च मन आत्मेति वदति॥
५॥बौद्धस्तु अन्यो ऽन्तरआ
त्मा विज्ञानमय इत्यादि श्रु
तेः कर्त्तु रभावे करणस्य श
क्त्यभावात् अहं कर्त्ता ऽहं भो
क्तेत्याद्यनुभवाच्च बुद्धि रात्मे
ति वदति॥६॥प्राभाकर तार्कि
कौ तु अन्यो अन्तर आत्मा
आनन्दमय इत्यादि श्रुतेः सु

षुप्तौ बुद्ध्यादीना मज्ञाने लय
दर्शनात् अत मज्ञो ऽहं ज्ञानी
त्याद्यनुभवाच्च अज्ञान मात्मेति
वदतः॥७॥भट्टस्तु प्रज्ञानघन ए
वानन्दमय आत्मेत्यादि श्रुतेः सु
षुप्तौ प्रकाशाप्रकाश सद्भावात्
मा महं न जानामि इत्याद्यनुभवा
च्च अज्ञानोपहितं चैतन्य मात्मे
ति वदति॥८॥अपर बौद्धः अ
सदेवेद मग्र आसीदित्यादि श्रु
तेः सुषुप्तौ सर्वाभावादहं सुषु
प्तौ नासमित्युत्थितस्य स्वा
भावपरामर्श विषयानुभवाच्च
शून्य मात्मेति वदति॥९॥एते
षां पुत्रादीनां शून्यपर्यन्ताना
मनात्मत्व मुच्यते।एतै रतिप्राकृ
तादिवादिभि रुक्तेषु श्रुतियुक्त्य
नुभवाभासेषु सर्वेषां श्रु तो
तियुक्त्यनुभवाभासानां मुत्तरो
त्तर श्रुतियुक्त्यनुभवाभासै र्बा
धबाधदर्शनात् पुत्रादीना म
नात्मत्वं स्पष्ट मेवेति॥ ॥किञ्च
प्रत्यगस्थूलो ऽचक्षु रप्राणो
ऽमना अकर्त्ता चैतन्यं चिन्मा
त्रं सदित्यादि प्रबलश्रुति वि
रोधात् अस्य पुत्रादिशून्यपर्य्य
न्तस्य जडस्य चैतन्यभास्य

तेन घटादिवदनित्यत्वात् अहं
ब्रह्मेति विद्वदनुभव आवस्थाच्च
तत्तच्छ्रुति युक्त्यनुभवाभासानां
बाधितत्वादपि पुत्रादि शून्यप
र्य्यन्त मखिलमनात्मैव। अत स्त
त्तद्भासकं नित्य शुद्ध बुद्ध मुक्त
सत्यस्वभावं प्रत्यक्चैतन्यमेवा
त्मतत्त्व मिति वेदान्तविदनुभ
वः। इति वेदान्तसारः॥
आदिगदाधरः पुं गयास्थदेव
ताविशेषः। यथा। गयाशिरश्छा
दयित्वा गुरुत्वादास्थिता शि
ला। कालान्तरेण व्यक्तश्च स्थि
तस्त्रादिगदाधरः॥ तथा व्यक्तो
ऽव्यक्तरूपी आसीदादौ गदाधरः
। आदिरादौ स्थितो ऽत्र दे
वै ब्रह्मादिभि र्यतः॥ पाद्याद्य
गन्ध पुष्पाद्यै रत आदिगदाध
रः॥ इति गारुडे गयामा
हात्म्ये ८५ अध्यायः॥ अपि च।
गदयादाववष्टभ्य गयासुरशि
रःशिलां। निश्चलार्थं स्थितो
यस्मात्तस्मादादिगदाधरः॥ इति
वायुपुराणीय गयामाहात्म्ये ८
अध्यायः॥
आदितालः पुं तालविशेषः। य
था। एकएव लघु र्यत्र आदि
तालः स कथ्यते। गुरु लत् पुरु
तो वाच्यः प्रायेणैतन्निदर्शने॥
इति सङ्गीतदामोदरः॥
आद्या स्त्री प्रधानाशक्तिः। महा
विद्या। यथा। सत्ये तु सुन्दरी आ
द्या त्रेतायां भुवनेश्वरी। द्वापरे ता
रिणी आद्या कलौ कालीप्रकी
र्त्तिता॥ नामभेदं प्रवक्ष्यामि रूपभे
दं वरानने। न भेदः कालिकाया
श्च तारायाः जगदम्बिके॥ षोड
श्या भुवनायाश्च भैरव्या स्त्रिपु
रेश्वरी। छिन्नाया श्चैव धूमाया
भीमायाः परमेश्वरि॥ ततश्च ब
लामुख्या मातङ्ग्याश्च सुरेश्वरी
। न च भेदो महेशानि विद्याया
वरवर्णिनि॥ इति मुण्डमालात
न्त्रे १० पटलः॥
आदिभूते त्रि॥

आधिक्यं क्ली अधिकत्वं। यथा
। युग्मायामपि रात्रौ चेत् शोणि
तं प्रचुरं नरा। कन्या च पुम्वत्
भवति शुक्राधिक्ये पुमान् भ
वेत्॥ इति ज्योतिस्तत्त्वं॥
आधिदैविकं त्रि दुःखविशेषः।
तद्यथा। आधिदैविकं यक्षरा
क्ष विनायक ग्रहाद्यावेश

निवर्त्तनं। इति सांख्यतत्त्वकौ
मुदी॥
आधिपत्यं क्ली अधिपतेर्भा
वः। ऐश्वर्य्यं। यथा। नहि प्रप
श्यामि ममापनुद्यात् यच्छो
क मुच्छोषण मिन्द्रियाणां। अ
वाप्य भूमावसपत्न मृद्धं राज्यं
सुराणा मपि चाधिपत्यं॥ इति
भगवद्गीतायां २ अध्यायः॥
आधिभौतिकं त्रि दुःखविशे
षः। यथा। बाह्योपायसाध्यं
दुःखं द्वेधा। आधिभौतिक मा
धिदैविकञ्च। तत्राधिभौति
कं मानुष पशु मृग पक्षि सरी
सृप स्थावर निमित्तं। इति सा
ङ्ख्यतत्त्वकौमुदी॥
आधेयं त्रि आधारस्थवस्तु। य
था। शाब्दबोधे चैकपदार्थे अ
परपदार्थसंसर्गः संसर्गमर्य्याद
या भासते। स च क्वचिद्भेदः
क्वचिदतिरिक्त एवाधाराधेय
प्रतियोग्यनुयोगि विषय वि
षयिभावादिः। इति गदाधर
भट्टाचार्य्यकृत प्रथमव्युत्प
त्तिवादः॥ उत्पाद्यः। यथा। सत्त्वे
निविशते ऽपैति स्पृश्यते निः
ष्पद्यते। आधेय श्चाक्रियाज
श्च सो ऽसत्त्वप्रकृति र्गुणः॥
इति वोपदेवकृतमुग्धबोधीयका
रिका॥ आधेय उत्पाद्यः। यथा
पक्वमृण्मयपात्रेषु रक्ततागुणः
स वह्निसंयोगादिना निष्पाद्यते
। इति भट्टीकायां दुर्गादासः॥

आध्मानः पुं वातरोगविशेषः।
पेटकाँपा इति भाषा। तस्य चि
कित्सा यथा। आध्माने लङ्घनं
स्वेदं दीपनं पाचनं ततः। फल
वर्त्तिक्रियां कुर्य्यात् बस्तिकर्म्म
च शोधनं॥ कर्षमात्रा भवेत्
कृष्णा त्रिवृता स्यात् पलोन्मिता
खण्डादपि पलं ग्राह्यं चूर्ण
मेकत्र कारयेत्॥ मधुना ला
मितं लिह्यात् चूर्ण माध्मानना
शनं। नारायणचूर्णं॥ १॥ दारु
हैमवती कुष्ठ शताह्वा हिङ्गु
सैन्धवैः। लिम्पेत् कोसे रम्ल
पिष्टैः शूलाध्मान युतोदरं॥ है
मवती बचा। दारुषट्कलेपः
॥ २॥ अभया रुवयो धात्री
दन्ती तिक्ता स्नुही त्रिवृत्। मुस्ता
ग्रन्थिक मेतानि ग्राह्याणि
पलमात्रया॥ तानि संस्तुत्य
सर्वाणि जलाष्टकयुगे

पचेत्॥तत्र तोये ऽष्टमं भागं क
षाय मवशेषयेत् निस्तुषं जैपा
लबीजानि नवानि पलमात्रया॥
तनुवस्त्रधृतान्येव तस्मिन् क्वाथे
शनैः पचेत्।ज्वालयेदनलं मन्दं
यावत् क्वाथो घनो भवेत्॥त
तः खल्ले क्षिपेत् भागानष्टौ जै
पालबीजतः।भागौ द्वौ च ना
गराद्द्वौ च मरिचात् द्वौ च ता
लीरू यावद्यामं विमर्दयेत्।र
सो नाराचनामायं भक्तितो र
क्तिकामितः॥जलेन शीतले
नैव रोगानेतान् विनाशयेत्
।आध्माने शूलमानाहं प्रत्या
ध्मानं तथैव च॥उदावर्त्तं त
था गुल्म मुदराणि हरत्यसौ
।वेगे शान्ते च भुञ्जीत शर्करा
सहितं दधि॥ततस्तत् सैन्धवं
नापि ततो दध्योदकं मनाक्।
महानाराचो रसः॥३॥इति भा
वप्रकाशः॥
आध्यात्मिकं त्रि दुःखविशेषः
।यथा।दुःखानां त्रयं दुःखत्रयं
तत्र खल्वाध्यात्मिकं चाधिभौ
तिकं चाधिदैविकञ्च ।
तत्राध्यात्मिकं द्विविधं
शारीरं मानसञ्च

।शारीरं वात पित्त श्लेष्मणां नि
मित्तं।मानसं काम क्रोध लोभ
मोहेर्ष्या विषाद विशेषादर्शन
निबन्धनं।सर्व्वं चैतदान्तरोपा
यसाध्यत्वात् आध्यात्मिकं
दुःखं।इति सांख्यतत्त्वकौमुदी
॥
आनतिकरः त्रि पारितोषिकः।
यथा।प्रायश्चित्तोपदेशं च
स्त्र्यादिना ब्राह्म स्योपणीयः।
यथा मिताक्षरायां पराशरः।
पापं प्रख्यापयेत् पापी दत्तं
दत्वा तथा वृषं।एतच्चोपलक्ष
णं।प्रख्याप्य पापं वक्तृभ्यः कि
ञ्चिद्दत्वा व्रतं चरेत्।इति स्मृतेः
।देवलवचने तोषयित्वा द्विजो
त्तमान् इति।अत्र तोषयित्वा इ
ति श्रवणात् आनतिकरत्वेन
तद्ग्रहणान्न दोषः।इति प्राय
श्चित्ततत्त्वं॥
आनुगत्यं क्ली अनुगतत्वं।
अनुगतस्य भाव इत्यर्थे ष्य
प्रत्ययेन निष्पन्नं॥
आनूपः पुं अनूपदेशस्थ जन्तु
मात्रं।तस्य लक्षणं तन्मांसस्य
गुणाश्च।कूलेचराः प्लवा श्चा
पि कोशस्थाः पादिनस्तथा।मत्

स्या एते समाख्याताः पंचधा
नूपजातयः॥आनूपा मधुराः
स्निग्धा गुरवो वह्निमान्द्यदाः।
श्लेष्मलाः पिच्छिला श्चापि मां
सपुष्टिप्रदा भृशं॥तथाभिष्य
न्दिनस्ते हि प्रायो ऽपथ्यतमाः
स्मृताः।इति भावप्रकाशः॥
आन्वीक्षिकी स्त्री दुर्गा।यथा।
आत्मवेदनशीलत्वादन्वीक्षण
पराथ वा।अन्वीक्षं कुरुते यस्मा
त्तस्मादान्वीक्षिकी स्मृता॥इति
देवीपुराणे ४५ अध्यायः॥
आन्दोल क तृ दोलने।इति
कविकल्पद्रुमः॥आन्दो
लत्।इति दुर्गादासः॥
आप ए न क कि व्याप्ते।इ
ति कविकल्पद्रुमः॥ए आपत्
।न आप्नोति कीर्त्तिं ब्रह्माण्डं
।क आप्ता।कि आपयति आ
पति।स्वराज्यं आप्यते भवा
न्।इति गणकृतानित्यत्वात्
।इति दुर्गादासः॥
आपत् स्त्री विपत्।यथा।
आपत्सु मूढो द्युतिमान् यः
सम्यक् प्रतिपद्यते।कर्म्माण्य
वश्यकार्य्याणि न माङ्ः पुरुषे
बुधः॥इति वह्निपुराणं॥ ॥

किञ्च।आपदि किं शरणीयेश
रणीयं चरणयुगलमम्बायाः।त
च्छरणं किं कुरुते ब्रह्मादीनपि
किङ्करान् कुरुते॥इत्युद्भटः॥ ॥
मनुः।विश्वैश्च देवैः साध्यैश्च
ब्राह्मणैश्च महर्षिभिः।आप
त्सु मरणाद्भीतै र्विधिः प्रति
निधिः कृतः॥प्रभुः प्रथम क
ल्पस्य यो ऽनुकल्पेन वर्त्तते।न
साम्परायिकं तस्य दुर्मते र्विद्य
ते फलं॥इत्येकादशीतत्त्वं॥
आपत्काले तु विप्रेण भुक्तं शू
द्रगृहे यदि।मनस्तापेन शुद्ध्ये
त द्रुपदां वा शतं जपेत्॥इति
प्रायश्चित्ततत्त्वं॥
आपदर्थे धनं रक्षेत् दारान्
रक्षेत् धनैरपि।आत्मानं सत
तं रक्षेत् दारैरपि धनैरपि॥इ
ति।जानीयात् प्रेषणे भृत्यान्
बान्धवान् व्यसनागमे।मित्र
ञ्चापदि काले च भार्य्याञ्च
विभवक्षये॥इति
च चाणक्यं॥
आपस्तम्बः पुं धर्म्मशास्त्रप्रयो
जकमुनिविशेषः।यथा।मन्व
त्रि विष्णु हारीत याज्ञवल्क्योश
नोऽङ्गिराः।यमापस्तम्ब सम्वर्त्ताः

कात्यायनबृहस्पती॥पराशर
व्यास शङ्ख लिखिता दक्ष गोत
मौ।शातातपो वशिष्ठश्च धर्म्मशा
स्त्रप्रयोजका:॥इति याज्ञवल्क्य
वचनं॥

आप्यायित: त्रि वर्द्धित:।यथा।
एषा सूर्य्यस्य वीर्य्येण सोमस्या
प्यायता तनु:।पौर्णमास्या स
दृश्येत सम्पूर्णो दिवसक्रमात्
॥इति कौर्म्मे ४-अध्याय:॥आन
न्दित:।इति लोकप्रसिद्धं॥

आभिरूप्यं क्ली अभिरूपस्य भा
व:।यथा।अर्ज्जकस्य तपोयोगाद
र्ज्जनस्याति शायनात्।आभिरूप्या
च्च विम्बानां देव: सान्नि ध्यमृच्छ
ति॥इति तिथ्यादितत्त्वधृतहय
शीर्षपञ्चरात्रीयवचनं॥

आभोग: पुं कविनामयुक्त गा
नसमापककविता।भणिता
इति भाषा।यथा।यत्रैव कवि
नाम स्यात् स आभोग इतीरि
त:।इति सङ्गीतदामोदर:॥आ
भ्युदयिकं त्रि अभ्युदयनिमि
त्तश्राद्धादि।यथा।अथाभ्युद
यिकश्राद्धं।तत्र गोभिल:।

आभ्युदयिके श्राद्धे युग्मानाशा
येत् प्रदक्षिण मुपचार: ऋज
वो दर्भा: यवै स्तिलार्थ:।सम्प
न्नमिति तृप्तिप्रश्न:।दधिबदरा
क्षतमिश्रा: पिण्डा: नान्दीमुखा:
पितर: प्रीयन्ता मिति दैवे वाच
यित्वा नान्दीमुखेभ्य पितृभ्य: पि
तामहेभ्य: प्रपितामहेभ्यो मा
तामहेभ्य: प्रमातामहेभ्य: वृद्ध
प्रमातामहेभ्यश्च प्रीयन्तां मित्य
याञ्च प्रयुञ्जीत इति।अभ्युद
यो विवाहादि स्तदर्थं श्राद्धं आभ्यु
दयिकं।आभ्युदयिके अभ्युदय
निमित्तके।अभ्युदय: इष्टलाभ:
।स च भूत भविष्यद्भेदेन द्विविध:
।तत्र भूतं पुत्रजन्मादि भविष्यत्
विवाहादि।एवञ्च श्राद्धविवेका
दौ श्राद्धभेदगणने वृद्धिश्राद्धत्वे
न कर्म्माङ्गत्वेन च यदुभयत्वमु
क्तं तदुभय मेवाभ्युदयिकत्वे
नोपपन्नं तेनाभिलापे आभ्युद
यिकश्राद्धमिति प्रयोज्यं।अत्र
यवै स्तिलार्थ इत्यनेन पार्व्वणश्रा
द्धप्राप्त तिलस्थाने यवविधानात्
आभ्युदयिकस्यापि पार्व्वणप्रकृति
त्वं प्रतीयते।अन्यथा तिलार्थ इ
त्युपादानं व्यर्थं स्यात्।न

तस्य पार्व्वणप्रकृतिकत्वेन पित्रे
युग्म ब्राह्मणप्राप्तौ नान्विराशा
य पितृपक्षे ब्राह्मणयुग्मत्वोपदेशं
दैवे युग्मत्वस्य पार्व्वणप्राप्तत्वाच्च
तदर्थोपदेश:॥अपसव्यं तत:
कृत्वा पितॄणा मप्रदक्षिणं।इति
याज्ञवल्क्यवचनेन देवकर्म्मोत्त
र पितृकर्म्मकरणे प्राप्तवामोप
चारनिराशाय प्रदक्षिण मुपचार:
तेन देव पितृकर्म्मकरणाय द
क्षिणावर्त्तेन गन्तव्यं।द्विगुणभुग्न
व निराशाय ऋजवो दर्भा इति ऋ
जुत्वोपदेश:।तृप्ता:स्थ इत्यनेन
तृप्तिप्रश्ने सम्पन्न मिति प्रष्टव्य
।योगपन्नान् सुसम्पन्नमिति प्रोक्ते
इति वक्ष्यमाण छन्दोगपरिशि
ष्टवचनाच्च सुसम्पन्नमित्युत्तरा
तद्गर्भमयब्राह्मणप्रश्नेप्यवाधि
तत्वाद्ध्यायं।दधि वदराक्षतमि
श्रा इत्यनेन दध्यादिमिश्रण मा
वश्यकं।अक्षतो यव:।अक्षता
श्च यवा: प्रोक्ता भृष्टा धाना भव
न्ति ते।इति भट्टनारायणधृतात्
।अतएव वक्ष्यमाण छन्दोगपरि
शिष्टवचने अक्षत मत्युक्ता सं
योज्य यव कर्कन्धु दधीभिरि
ति।तिसन्दिग्ध मुक्तं।स्वधावाचनप्रश्न

निवृत्तये नान्दीमुखा: पितर: प्री
यन्ता मित्युपदेश:।तत्र स्वधां वा
चयिष्ये इति पितृपक्षएव प्रश्न:
अतएव तन्निवृत्तये दैव इति श्रा
द्धे देवपक्षे नान्दीमुखा:पितर:
प्रीयन्तां मिति।तत: पितृपक्षे स्व
धावाचनस्यानीयत्वेन वृद्धप्रमा
तामहेभ्यश्च इति चकार निर्द्दे
शेन च स्वधोच्यता मितिवत् प्र
त्येक मेव प्रीयन्ता मिति इच्छे
त् प्रत्युत्तरञ्च अस्तु स्वधा इति
वत् तत्त्रेणैव प्रीयन्ता मिति।अत्र
नान्दीमुखेभ्य: पितृभ्य इति निर्द्दे
शेन च नान्दीमुखं पितृगणमिति
विष्णुपुराणेन च मातामहेभ्यश्च
तथा नान्दीमुखेभ्य एव च इति ब्र
ह्मपुराणेन च नान्दीमुखपदस्कन्ने
स्तद्विशेषण विशिष्टस्यैवाभ्युदयि
के देवतात्वं तत श्राद्धापि प्रीयन्ता
मितिवन्नान्दीमुखेभ्य: पितामहेभ्य इति वाच्यं।न तु नान्दी
मुखविशेषणशून्यं पितामहेभ्य: प्रीयन्ता
मिति पितृदयि
तोक्तं युक्तं ।
नान्दीमुखेभ्य: पितृभ्य:
प्रीयन्ता मित्यत्रान्वितस्य

नान्दीमुखेभ्य इत्यस्य पितामहे
भ्य इत्यादावनन्वयित्वेन प्रागु
क्तयुक्त्या प्राप्तस्य नान्दीमुखवि
शेषणस्य पितामहेभ्य इत्यादाव
पिप्राप्तेः।एतेनात्र मैथिलोक्तं
नत्त्वताविधान मपि निरस्तं।पा
र्वणवत्स्वधाप्राप्तेः तन्निरासा
य न स्वधां प्रयुञ्जीते ति अत्र
विशेषादभिलापे मन्त्रे च स्वधा
पदनिवृत्तिः।अभिलापे नम इ
ति ब्रूयात् अमुकामुकगोत्रेतत्
त्वभ्य मन्त्रे स्वधानमः।इति ब्रह्म
पुराणे श्राद्धे स्वधा नमः पदयो
स्त्यागबोधकत्वेन विकल्पाद
त्राभ्युदयिके स्वधा निषेधाच्च
म एवान्वेति।पितृनमत्र देव
वद्धित्यनेनापि पार्वणोक्त विश्व
देवपत्नीय नम एव प्रतीयते
न तु मैथिलोक्तं स्वाहेतिःश्रा
द्धे तथा प्रयोगे प्रमाणाभावात्
।एवमाश्वलायनगृह्ये यवो
सीति मन्त्रे तु पुष्पा इति स्त्र
ने मन्त्रमात्रे स्वधापदस्थाने
पुष्टिपदप्रयोगः।इति श्राद्ध
तत्त्वं॥अन्यत् नान्दीमुखश्रा
द्धे द्रष्टव्यम्॥
स्त्राने क्ली अपक्वं।यथा।

शमयं लोकगतं प्राज्ञः सततं यान्न
मुच्यते।आमं वितुष मित्युक्तं सि
न्न मन्न मुदाहृतं॥इति श्राद्धतत्त्व
धृतवशिष्ठवचनं॥रोगविशेषः।
तल्लक्षणादि अजीर्णशब्दे द्रष्टव्यं
॥
आमलकी स्त्री फलवृक्षविशेषः
।तस्या उत्पत्ति र्यथा।सत्यावृच
तः उक्तं त्वया महेशानि तल।
सी विल्वसम्भवः।अनयो स्तस्त
एकः कः शिव विष्णु प्रियस्तरुः
॥तदावां श्रोतु मिच्छावः शिव
सुन्दरि कथ्यतां।देव्यु वाच।अति
विल्व तुलसीतरु तुल्यः पुण्य
एक उत विष्णु शिवार्हः।नाम।
तो ऽमलक इत्यपि सर्व्वो रोपि
तः कमलयाथ गयापि॥कदा
चित् देवयात्रायां प्रभासे पुण्य
तीर्थके।सर्व्वे देवाः समायाता
दिने पुण्ये च कुत्रचित्॥तत्राह
ञ्च स्वयं लक्ष्मी रेकस्थाने समा
गते।तत्रावयो र्मतिर्जाता शिव
विष्णु प्रपूजने॥अहं श्रिय मवो
चञ्च सामुद्रि शृणु मे मतिं।
स्वकल्पितेन द्रव्येण पूजयेहं
हरिं प्रभुं ॥ सा

मुवाच ततो लक्ष्मी

र्गिन्द्रादात्तरभाषिणी ममाप्येवं
मति र्जाता त्व मेवाचः स्वयं य
था।स्वकल्पितेन द्रव्येण पूजये
ऽहं त्रिलोचनं देव्युवाच।सज
ये विजने देवि तावेवम्भूतयो
स्तदा।नयनेषु स्वजातानि अ
मलाश्रुजलानि च॥तानि
तो नयनेत्यश्रु निपेतु र्भुवि
हे सखि।ततो जाता द्रुमाः पृ
थ्व्यां चत्वारो विमलप्रभाः।
ख्याता आमल नाम्ना जाता
कादमलाद्यतः॥श्यामलेच्छ
दवृन्दास्ते कर्बुरस्कन्दमूलकाः
।शिराग्रक्षिप्त पत्राली पत्रमा
ता कपत्रकाः।विल्वस्य च तुलस्या
श्च ये गुणाः कथिताः सखि॥ते
ते गुणाः सर्व्व एव आमलक्यां स
माहिताः।पत्रमालादले रम्याः शि
व विष्णु सुरेश्वरौ॥सर्व्वथा पूजि
तौ स्यातां सर्व्वो नास्त्यत्र संश
यः।माघे मासि सितायां तामे
कादश्यां समुद्भवां॥शुभा मा
मलकीं दृष्ट्वा समेताः सर्व्वदे
वताः।ऋषय स्ते सशिष्याश्च हृ
र्षमापुः परं तदा।शिवाच्युतस्व
रूपाञ्च दृष्ट्वा स्तुत्वा स्तदा॥ ॥
आसा नमस्कारमन्त्रादि।नमाम्या

मलकीं देवीं पत्रमालाद्यलङ्कृ
तां।शिव विष्णुप्रियां दिव्यां श्री
मतीं सुन्दरप्रभां॥एतेन खलु
मन्त्रेण सर्व्वा अस्याः क्रिया मताः
।एता मुद्दिश्य तीर्थानि कीर्त्तितानि
नि मनीषिभिः॥विल्ववृक्षवद्दे
वेह पृथिव्या कर्म्मणा स्थले।सि
षिञ्च स्ता मामलकीं सर्व्वतीर्थेज
लै र्द्विजाः॥अथ सर्व्वसुराणाञ्च
मुनीनाञ्च तदाग्रतः।मया सं
पूजितः कृत्स्नः श्रीश शम्भु समू
जयत॥तदा जयजयध्वानो बभूव
क्षितिमण्डले।आकाशे पुष्पवृ
ष्टिश्च शङ्खशब्दाश्च पुष्कलाः॥
दृष्ट्वा ह्यामलकी देवी स्वार
नन्द मुत्तमं।तेन धात्रीति नाम्ना
पि राजत्यामलकी शुभा॥नम
स्कृत्य ह्यामलकीं गता देवा दि
वालयं।ब्रह्म विष्णु शिवाश्चा
पि तत्राधिष्ठान मास्थिताः॥जा
ता ह्यामलकी देवी परमानन्द
दायिनी।मान्या स्थाप्या च पूज्या च
प्रणन्तव्या सदैव हि।इति बृह
द्धर्म्मपुराणे आमलकीप्रादुर्भा
वः १२ अध्यायः॥ ॥एकाद
श्यां तत्र विष्णुप्रीति र्यथा।तत्र
त्यामलके: विष्णु रेवीदृश्यया

विशेषतः।स्त्रीकामः सर्वदा स्ना
ने कुर्वीतामलकै र्न्नरः॥इति गा
रुडे २१५ अध्यायः॥
आमवातः॥ वातव्याधिविशेषः।
तस्य निदानपूर्विकां संप्राप्ति मा
ह।विरुद्धाहार चेष्टस्य मन्दाग्ने नि
श्चलस्य च।स्निग्धं भुक्तवतो ह्य
न्नं व्यायामं कुर्वत स्तथा॥वायु
ना प्रेरितो ह्यामः श्लेष्मस्थानं
प्रधावति।तेनात्यर्थ मपक्वो ऽ
सौ धमनीभिः प्रपद्यते॥वात
पित्त कफै र्भूयो दूषितः सो ऽ
न्नजो रसः।स्रोतांस्य भिष्यन्द
यति नानावर्णोतिपिच्छिलः॥
जनयत्यग्निदौर्बल्यं हृदयस्य
च गौरवं व्याधीना माश्रयो
ह्येष आमसंज्ञो ऽति दारुणः
॥विरुद्धाहारचेष्टस्य विरु
द्धाहारः क्षीरमत्स्यादि।वि
रुद्धा चेष्टा भुक्त्वा व्यायामादि
।तयुक्तस्य।निश्चलस्य निर्व्या
पारस्य।स्निग्धं भुक्तवतो
ह्यन्नं व्यायामं कुर्वत इति
मिलितो हेतुः।श्लेष्मस्थानं
आमाशयसन्ध्यादि। तेन
श्लेष्मस्थानगते नात्यर्थं
अपक्वः।पित्तस्थान गम

नेनपक्वो ऽभिविष्यादित्यभिप्रा
यः।असौ आमः धमनीभिः प्रप
द्यते धमनीमार्गे स्खलति।भूयो
दूषितः अतिशयेन दूषितः।सो
ऽन्नजो रसः।आमः स्रोतांसि अ
भिष्यन्दयति संस्तम्भ्य रसवहसि
रावरोधं कृत्वा स्रोतांसि गुरूणि
करोति।नानावर्णः वातादि
जनित वर्णभेदान्नानावर्णः॥
आमस्य लक्षण माह।अजीर्णान्न
यो रसो जातः सञ्चितो हि क्र
मेण वै।आमसंज्ञां स लभते
शिरो गात्ररुजाकरः॥अजीर्णा
त् भुक्तादजीर्णात्॥ ॥आमवा
तस्य सामान्यं लक्षण माह।
युगपत् कुपितावेतौ त्रिक स
न्धि प्रवेशकौ।स्तब्धञ्च कुरुतो
गात्र मामवातः स उच्यते।।एतौ
वातकफौ।त्रिक सन्धिप्रवेशकौ
वेदनयेति बोद्धव्यौ॥ ॥तत्रान्तरे
तस्य लक्षणान्तर माह।अङ्गम
र्दो ऽरुचि स्तृष्णा ह्यालस्यं गौर
वं ज्वरः।अपाकः शूनताङ्गानां
आमवातस्य लक्षणं॥ ॥अस्य
वातिवृद्धस्य लक्षण माह।स क
ष्टः सर्वरोगाणां यदा प्रकुपितो भ
वेत्।हस्त पाद शिरो गुल्फ त्रिक

जानूरुसन्धिषु॥करोति स
रुजं शोथं यत्र दोषः प्रपद्यते
।स देशो रुज्यते ऽत्यर्थं व्यावि
द्ध इव वृश्चिकैः॥जनयेत्सो
ऽग्निदौर्बल्यं प्रसेकारुचि गौ
रवं।उत्साहहानिं वैरस्यं दाह
ञ्च बहुमूत्रतां॥कुक्षौ कठि
नतां शूलं तथा निद्राविपर्य
यं।तृट् छर्दि भ्रम मूर्च्छाश्च हृ
द्ग्रहं विड्विबद्धतां॥जाड्यान्त्रकूज
मानाह कष्टांश्चान्यानुपद्रवान्।
यदा प्रकुपितो भवेत् प्रकर्षेण
कुपितः स्यात्तदा वक्ष्यमाणानु
पद्रवान् करोति।आनाह हस्ते
त्यादि।यत्र दोषः दुष्टआमः प्र
पद्यते गच्छति।जाड्यं अकर्म
ण्यत्वं।अन्यानुपद्रवान् कलाय
खञ्जवादीन्॥ ॥तस्यैव विशि
ष्ट लक्षणान्याह।पित्तात् दाहं स
रागञ्च सशूलं पवनात्मकं स्ति
मितं गुरुकण्डूकं कफजुष्टं
तमादिशेत्॥गुरुकण्डूकं बहु
कण्डूकं॥तस्यासाध्यत्वादिक
माह।एकदोषानुगः साध्यो द्वि
दोषो याप्य उच्यते।सर्वदेह
चरः शोथः सकष्टः सान्निपाति
कः॥ ॥अथ आमवातस्य

चिकित्सा।लङ्घनं स्वेदनं तिक्तं
दीपनानि कटूनि च।रेचनं स्ने
हन मपि वस्तय श्चाममारुते॥
रुक्षस्वेदो विधातव्यो वालुका
पुटकै रिह।उपनाहाश्च कर्तव्या
स्तेपि स्नेहविवर्जिताः॥ ॥वास्तू
क मत्र हस्त्याकं पटोलं कारवेल्ल
कं।कोरदूषा यवाः पथ्याः षष्टि
काः शालयो ऽनवाः॥अनवाः
पुराणाः।लावकानां तथा मांसं
हितं तक्रेण संस्कृतं॥हितञ्च यू
षः कौलत्थः कलाय श्चणक
स्य च॥चित्रकं कटुका पथ्या ना
गरातिविषामृताः॥चूर्णिताः
कोष्णतोयेन पिबेदामानिलाप
हाः॥५ शाटी शुण्ठी शिवा सो
ग्रा देवाह्वातिविषामृताः॥क्वा
थिताः प्रपिबेदामवाती कृतञ्च
भोजयेत्।देवाह्वा देवदारु।
आमवातगजेन्द्रस्य शरीरवन
चारिणः।एक एव निहन्ताय
मेरण्डस्नेहकेसरी॥३॥एरण्ड
स्नेहयुक्तां हरीतकीं भक्षयेद्वि
पिबेत्।आमानिलार्तियुक्तो यु
क्तो रुच्या च शुभ्रया॥४॥स्विन्नं
पुनर्नवामूलं तेन तैलं प्रसा
धयेत्।आमवातरुजं हन्ति पा

दाम्यञ्जन मर्दनात्॥५॥आरग्व
धस्य पत्राणि भृष्टानि कटुतैल
तः।आमवात प्रशान्त्यर्थं खादे
द्भक्तहितानि च॥६॥शुण्ठी गो
क्षुरक क्वाथः प्रातः प्रात निषे
वितः।आमवाते कटीशूले पा
चनं रुक्प्रणाशनं॥७॥कटीशू
ले पिबेत्तैलं एरण्डफलसम्भ
वं।महौषध गुडूच्योश्च क्वाथ
मागधिकायुतं॥विशाल्येरण्ड
बीजानि पिष्ट्वा क्षीरे विपाच
येत्।तत् पायसं कटीशूले गृ
ध्रस्या परमौषधं॥८॥रास्ना
वानारिमूलञ्च वासकः सऍड
रालडः।शटी दारु वला सु
स्त नागरातिविषाभयाः॥स्वद
ष्ट्रा व्याधिघातश्च मिषि धान्य गु
नरीवा।अश्वगन्धामृता कृष्णा
हृद्दारुः शतावरी॥वचा सहच
रश्चैव चव्यिका हस्तीद्वयं।सम
भागानि सर्वाणि रास्नात् द्विगुणा
मता॥पिवेत् कषाय मेतेषां मष्ट
भागावशेषितं।तिन्त्रा नागरचूर्णे
ञ्च प्रक्षेपो ऽत्र यथामलं॥सर्वे
षु वातरोगेषु सामेषु न विशेष
तः।पक्षाघाते ऽर्दिते कम्प ऊजे
सन्धिगते ऽनिले॥जानु

जङ्घास्थिपीडासु गृध्रस्याञ्च
हनुग्रहे।उरुस्तम्भे वातरक्ते वि
श्वाच्यां क्रोष्टुशीर्षके॥हृदाम
ये च दुर्नाम्नि योनिशुक्रामये
षु च॥डंसा मेदूगते वाते क्षीणा
वन्ध्यामये तथा॥योषितां गर्भ
दं मुख्यं नास्त्यस्मात् परमौष
धं॥महारास्नादिकः क्वाथो
वैद्यसार्य्यैर्विनिर्मितः॥महारा
स्नादिक्वाथः॥९॥अजमोदा
मरिच पिप्पली विडङ्ग सुरदारु
चित्रक शताह्वाः।सैन्धव माग
धिमूलं भागा नवकस्य पलिकाः
स्युः॥शुण्ठी दशपलिका स्यात्
पलानि तावन्ति हृद्दारस्याश्च
भया पलानि पंच श्लक्ष्णं चूर्णं वि
धापयेदेषां॥सम गुडवटकान्द
नचूर्णं वा कोष्णवारिणा पिवतः।
नश्यन्त्यामानिलजाः सर्वे रोगाः
सुदारुणाः शीघ्रं॥आनाह मू
तम्भूनी प्रतिभूनी गृध्रसी गुल्मः
।कटि पृष्ठ परिस्फुटनं स्फुटनं वै
वास्थि जङ्घयो स्लीबं॥श्वयथु
स्तथाङ्गसन्धिषु ये चान्येप्याम
वातजा रोगाः।सर्वे प्रयान्ति शा
न्तिं तमइव सूर्य्यांशुविध्वस्तं॥
अजमोदादि चूर्णमोदकः॥१०॥

आमवाते हितो ऽतीव पथ्यादि
गुग्गुलु र्मतः।तथैव योगराजा
ख्य क्षारकादिचिकित्सिके॥११॥
॥नागरस्य पलान्यष्टौ हृतस्य
कुडवं तथा।क्षीराटकसमायु
क्तं खण्डस्याई शतं पलं॥व्योष
त्रिजातकट्व्यात् प्रत्येकञ्च प
लं पलं।निक्षिपेच्चूर्णितं तत्र खा
देदग्निवलं यथा॥आमवातप्र
शमनं धातुपुष्टिकरं परं।वल्य
मायुष्य मोजस्यं वलीपलित
नाशनं॥शुण्ठीखण्डः॥१२॥मे
थिकायाः पलान्यष्टौ शुण्ठ्या
अष्टपलानि च।तयो श्चूर्णं पचे
ष्ट्रतं द्वयं मृद्वग्निना पचेत्॥ड
ष्याटकयुगे गव्य घृत मष्टपलं
क्षिपेत्।तन्नावत् स्वपचेत् याव
त् भवेदतिघनं पयः॥पुनः प
चेत् शनैः स्तत्र दत्वा टकमितं
सितां।ततः पाके सुविज्ञाते ज्व
लनादवतारयेत्॥मरिचं पिप्प
ली शुण्ठी कणामूलं सचित्र
कं।यवानी जीरको धान्यं का
रवी शतपुष्पिका॥जातीफलं
शटी त्वक्च पत्रकं भद्रमुस्तकं
॥गृह्णीयात् पलमेतेषां सर्वेषांच
पृथक् पृथक्॥षडत्र नागरं तत्र

मरिचं च षडुत्तकं।एषां चूर्णं प
रिक्षिप्य सर्वं संमिश्र्य रक्षयेत्॥
एतत्तु भेषजं श्रेष्ठं मेथिका पा
कसंज्ञकं।भक्षयेत् पलमात्रं त
त्स्वयथा वाग्निवलं तथा॥आम
वातं निहन्त्येतत् सर्वांश्च पवना
मयान्।ज्वरांश्च विषमान् हन्ति
पाण्डुरोगं सकामलं॥हन्त्युन्मा
द मपस्मारं प्रमेहान् वातशोणि
तं।अम्लपित्तं शीतपित्तं शिरःपी
डां हृगामयं॥प्रदरं सूतिकारोगं
हन्यादेतन्न संशयः।वपुषः पु
ष्टिकृद्वल्यं वीर्य्यवृद्धिकरं परं॥
मेथिकापाकः॥१३॥रसोनस्य चि
तुष्पमाणः क्षिपेच्च तत्राज्यमितं
घृतः।पिवेडमे तेन दहत्यवश्यं
शिखीव तूलं हि महामवाते॥
सामान्यवातव्याधिचिकित्सा
यां हि लिखितं रसोनाष्टक मा
मवाते प्रतिशुभदं॥१४॥सैन्धा
वं श्रेयसी रास्ना शतपुष्पा यवा
निका।स्वर्जिका मरिचं कुष्ठं
शुण्ठी सौवर्चलं विडं॥वचाज
मोदा जरणः पौष्करं मधुरं क
णा। एतान्यर्द्धपलांशा
नि सूक्ष्मकल्कानि
कारयेत्॥प्रस्थ मे

शुडतैलस्य प्रस्थो ऽम्बु शतपुष्प
जं।काञ्जिकं द्विगुणं दत्त्वा मस्त
च द्विगुणं तथा॥एतत् संभृत्य
संभारं शनै र्मृद्वग्निना पचेत्।
सिद्धमेतत् प्रयोक्तव्य मामवा
तहरं परं॥पाने चाभ्यञ्जने व
स्तौ कुरुते ऽग्निबलं भृशं।
वातार्त्ते वंक्षणे शूले कटी
जानूरुसन्धिजे॥तथा हृत्पा
र्श्वजे शूले शस्तं श्लेष्मणि पी
डिते।अन्यांश्चापि लजान्रोगा
न् नाशयत्याशु देहिनां॥हृ
हत् सैन्धवाद्यं तैलं॥२५॥द
धि मत्स्य गुड क्षीर पोतकी मा
ष पिष्टकं।वर्जयेदामवातार्त्तो
गुड मांस मनूपजं॥इत्यामवा
ताधिकारः।इति भावप्रका
शः॥

आमान्नं क्ली अपक्वतण्डुलादि
।तद्दानमन्त्रो यथा।आमान्नं ते
प्रयच्छामि फल ताम्बूलसंयुतं।
सघृतं परमं दिव्यं मया भक्त्या
निवेदितं॥इति बृहन्नन्दिके
श्वरपुराणोक्तदुर्गोत्सवपद्धतिः
॥ ॥बलात् चाण्डालादिस्वा
मिकापक्वान्नभोजनप्रायश्चित्तं
यथा।चाण्डालान्नं भुक्त्वा त्रिरा
त्र मुपवसेत् सिद्धं भुक्त्वा परा
कः।इति बलाद्भोजनविषयं।इ
ति प्रायश्चित्तविवेकः।त्रिरात्र
मामान्नविषयं।पक्वसिद्ध मि
त्युक्ते।पराक माह मनुः।य
तात्मनो ऽप्रमत्तस्य द्वादशाह
मभोजनं।पराको नाम कृ
च्छ्रोयं सर्व्वपापापनोदनः॥
तेनात्रामान्ने सिद्धान्न प्राय
श्चित्ततुरीयभागविधानाद
ज्ञानादावपि तत्तुरीयकल्पना
इति।इति प्रायश्चित्ततत्त्वं॥ ॥
आमान्नद्वारा कर्त्तव्य श्राद्धा
नि यथा।आपद्यनग्नौ तीर्थे च
चन्द्र सूर्य्यग्रहे तथा।आमश्रा
द्धं द्विजैः कार्य्यं शूद्रेण तु स
दैव हि॥इति श्राद्ध तत्त्वधृत
प्रचेतोवचनं॥अपि च।योगि
नीतन्त्रे।निरग्ने रामश्राद्धे तु अ
न्नं न ज्वालयेत् क्वचित्।हवि
च ज्वालयेदन्नं संक्रमे ग्रहणे
षु च॥इति तिथ्यादि तत्त्वं॥
॥

आमोदितः त्रि सञ्जातसुगन्धः।
यथा।पारिजातप्रसूनोत्थगन्धा
मोदितदिङ्मुखा।इति शिवरा
त्रिव्रतकथा॥आनर्दितः।

आमोदशब्दादितप्रत्ययेन नि
ष्पन्नः॥
आम्रः पुं फलवृक्षविशेषः।
तत्पर्य्यायः।माकन्दः २४ षट्
पदातिथिः २५ मधुव्रतः २६ व
सन्तद्रुः २७ पिकप्रियः २८
स्त्रीप्रियः २९ गन्धबन्धुः ३०
अलिप्रियः ३१।इति शब्दर
त्नावली मदिरासखः ३२।इ
ति जटाधरः॥
आयात त्रि आयतं।यथा।दृ
ष्ट्युक्तविमानाये सा तत्र
कमण्डलुः।आयाता ब्रह्मणः
शक्ति ब्रह्माणी साभिधीयते॥
इति मार्कण्डेय देवीमाहात्म्यं॥
आयुधागारं क्ली अस्त्रगृहं।
तत्र नियुक्तस्य लक्षणं यथा
स्थापनाजातितत्त्वज्ञः सततं प्र
तिजागृताः।राज्ञः स्यादायुधागा
रे दक्षः कर्म्मसु चोद्यतः॥
इति मात्स्ये १८९ अध्यायः॥
आयुर्वेदः पुं चिकित्साशास्त्रं
।तत्र अथर्व्ववेदान्तर्गतं।यथा।
विधाताथर्व्वसर्व्वस्व मायुर्वेदं प्र
काशयन्।स्वनाम्ना संहितां च
क्रे लक्षश्लोकमयी मृजुं॥इति
भावप्रकाशः॥चरणव्यूहमते
ऋग्वेदस्योपवेदः आयुर्वेदः।अ
थर्व्ववेदस्य शस्त्रशास्त्राण्युपवेदः
॥अथायुर्वेदस्य विवरणं ऋग्
यजुः सामाथर्व्वाख्यान् दृष्ट्वा वे
दान् प्रजापतिः।विचिन्त्य तेषा
मर्थं चैवायुर्वेदं चकार सः॥कृ
त्वा तु पञ्चमं वेदं भास्कराय द
दौ विभुः।स्वतन्त्रसंहितां तस्मा
त् भास्करश्च चकार सः।भास्क
रश्च स्वशिष्येभ्य आयुर्वेदं स्वसं
हितां।प्रददौ पाठयामास ते
चक्रुः संहिता स्ततः॥तेषां ना
मानि विदुषां तन्त्राणि तत्कृता
नि च।व्याधिप्रणाशबीजानि
साध्वि मत्तो निशामय॥धन्व
न्तरि र्दिवोदासः काशीराजो ऽश्वि
नीसुतौ।नकुलः सहदेवो ऽर्कि
श्च्यवनो जनको बुधः॥जाबालो
जाजलिः पैलः करथो ऽगस्त्य
एव च।एते वेदाङ्ग वेदज्ञाः षो
डश व्याधिनाशकाः॥चिकित्सा
तत्त्वविज्ञानं नाम तन्त्रं मनोरमं
।धन्वन्तरिश्च भगवान् चकार
प्रथमे सति॥चिकित्सादर्पणं
नाम दिवोदास श्चकार सः॥चि
कित्साकौमुदीं दिव्यां काशीराज
श्चकार सः॥चिकित्सा

सारतन्त्रञ्च भ्रमघ्नं चाश्विनीसुतौ
तन्त्रं वैद्यकसर्व्वस्वं नकुलश्च
चकार सः॥ चकार सहदेवश्च
व्याधिसिन्धुविमर्द्दनं॥ ज्ञानार्ण
वं महातन्त्रं यमराजश्चकार सः
। च्यवनो जीवदानञ्च चकार भ
गवानृषिः॥ चकार जनको यो
गी वैद्यसन्देहभञ्जनं॥ सर्व्वसा
रं चन्द्रसुतो जाबालस्तन्त्रसार
कं॥ वेदाङ्गसारं तन्त्रञ्च चकार
जाजलिर्मुनिः। पैलो निदानं क
रथस्तन्त्रं सर्व्वधरं परं॥ द्वैधनि
र्णयतन्त्रञ्च चकार कुम्भसंभवः
चिकित्साशास्त्रबीजानि तन्त्राणि
तानि षोडश॥ व्याधिप्रणाशबी
जानि बलाधानकराणि च। मथि
त्वा ज्ञानमन्थाने रायुर्वेदपयो
निधिं॥ ततस्तन्त्राणुज्जहरु नव
नीतानि कोविदाः। एतानि क्र
मशो दृष्ट्वा दिव्यां भास्करसंहि
तां॥ आयुर्व्वेदं सर्व्वबीजं सर्व्वं
जानामि सुन्दरि। व्याधेस्तत्त्वप
रिज्ञानं वेदनायाश्च निग्रहः॥
एतद्वैद्यस्य वैद्यत्वं न वैद्यः
प्रभुरायुषः। आयुर्वेदस्य वि
ज्ञाता चिकित्सासु यथार्थवित्
॥ धर्म्मिष्ठश्च दयालुश्च तेन वैद्यः
प्रकीर्त्तितः॥ इति ब्रह्मवैवर्त्ते
ब्रह्मखण्डे १६ अध्यायः॥ ॥
तस्य लक्षणं यथा। आयुर्हिता
हितं व्याधिनिदानं शमनं त
था। विद्यन्ते यत्र विद्वद्भिः स आ
युर्व्वेद उच्यते॥ तस्य निरुक्ति
र्यथा। अनेन पुरुषो यस्मात्
आयुर्विन्दति वेत्ति च। तस्मा
न्मुनिवरैरेष आयुर्वेद इति
स्मृतः॥ इति भावप्रकाशः॥ ॥
अन्यत् रोगशब्दे वेदशब्दे
वैद्यशब्दे च द्रष्टव्यं॥
आयुष्यसूक्तं क्ली नान्दीश्राद्धा
दौ वसुधारासम्पातनानन्तर
पाठ्यवैदिकमन्त्रविशेषः। सा
मगानां तन्मन्त्रो यथा। ओं आयु
र्विश्वायु र्विश्वं विश्व मायुरश्न
महि। प्रजान्त्वष्टरधिनिधेह्यस्मे
शतं जीवेम शरदो वयन्ते।
आयुषे मे पवस्व वर्च्चसे मे प
वस्व विदुः पृथिव्या दिवो ज
निव्वाः शृण्वन्त्वापोधक्षरन्तीः सो
मोहोऽज्जाय ममायुषे मम ब्रह्मव
र्च्चसाय यजमानस्यर्द्ध्यै अमुष्य
राज्याय। अमुष्य स्थाने यदर्थं
होम्हि तस्य षष्ठ्यन्तनाम प्रयो
ज्यं। इति रघुनन्दनभट्टाचार्य

257

कृतश्राद्धप्रयोगतत्त्वं॥ ॥
यजुर्विदां तन्मन्त्रो यथा। ओं
आयुष्यं वर्च्चस्यं रायस्पोष मौ
द्भिदं इदं हिरण्यं वर्च्चस्व जे
त्रायाविशताडमां। न तद्
रक्षांसि न पिशाचा स्तरन्ति
देवाना मोजः प्रथमजं ह्येत
त्। यो बिभर्त्ति दाक्षायणं
हिरण्यं स देवेषु कृणुते
दीर्घमायुः स मनुष्येषु कृणु
ते दीर्घमायुः। यदा बध्नन् दाक्षाय
णा शं हिरण्यं शतानीकाय सु
मनस्यमानाः। तन्त आबध्नामि
शतशारदाया युष्मां जरदष्टि र्य
थासं॥ इति तत्कृत यजुर्वेदीय
श्राद्धप्रयोगतत्त्वं॥
आयोजनं क्ली आहरणं। द्र
व्यासादनं। यथा। कुत्रचित् त
ण्डुलाः सन्ति क्वच स्थाली क्व
चेन्धनं। तेषामायोजने कुर्वन्
मुखः कर्त्ताभिधीयते॥ इति
गोपीचन्द्रधृतकारिका॥
आरग्वधः पुं वृक्षविशेषः। आ
मलभास इति हिन्दीभाषा। अ
स्य पर्य्यायगुणाः। आरग्वधो
राजवृक्षः सम्पाक चतुरङ्गुलः
आरेवत व्याधिघात कृतमाल
स्वर्णकाः॥ कर्णिकारो दीर्घफ
लः स्वर्णाङ्गः स्वर्णभूषणः। आर
ग्वधो गुरुः स्वादुः शीतलः स्रंस
नोत्तमः॥ ज्वर हृद्रोग पित्तास्र
वातोदावर्त्तशूलनुत्। तत्फलं
स्रंसनं रुच्यं कुष्ठ पित्त कफाप
हं॥ ज्वरे तु सततं पथ्यं को
ष्ठशुद्धिकरं परं॥ इति भाव
प्रकाशः॥ ॥
आरट्टः पुं देशविशेषः। त्रि
काण्डशेषे क्षत्रियवर्गे आरट्ट
जशब्ददर्शनात्॥ तत्र आरट्ट
जोऽपि पाठः॥
आरब्धं त्रि कृतारम्भं। यथा। आ
रब्धं मलमासात् प्राक् यत् क
र्म्म न समापितं। आगते मलमा
सेऽपि तत् समाप्यं न संशयः॥
इति मलमासतत्त्वं॥ ॥
आरब्धकर्म्मण्यशौचाभावो यथा
। व्रत यज्ञ विवाहेषु श्राद्धे होमे
र्च्चने जपे। आरब्धे सूतकं न
स्यादनारब्धे तु सूतकं॥ इति
तिथ्यादितत्त्वं॥
आरम्भः पुं आद्यकृतिः। यथा।
मीनादिस्थो रवि र्येषा मारम्भ
प्रथमक्षणे। भवेत्तेऽब्दे चान्द्र
मासास्तेऽजाद्या द्वादश स्मृताः

॥आरम्भप्रथमक्षणे आयत्तू
त्यायसमेये।इति मलमासतत्त्वं
॥पारिभाषिकारम्भो यथा।आ
रम्भो वरणं यज्ञे सङ्कल्पो व्रत
जापयोः।नान्दीश्राद्धं विवाहा
दौ श्राद्धे पाकपरिक्रिया॥ इ
ति तिथ्यादितत्त्वं॥
आरबी स्त्री आरबनामकम्ले
च्छदेशीयभाषा।यथा।ज्येष्ठा
श्लेषा मघा स्वाती रेवती भर
णीद्वये।विशाखार्द्रोत्तराषाढ
शतभे पापवासरे॥लग्ने स्थिरे
सचन्द्रे च पारसी मारबी पठे
त्। इति गणपतिमुहूर्त्तः॥
॥
आरूढः त्रि कृतारोहणः।
यथा।राम रामेति रामेति कू
जन्तं मधुराक्षरं।आरूढकवि
ताशाखं वन्दे वाल्मीकिकोकि
लं॥इति रामायणपाठस्य प्र
वेपाठश्लोकः॥
आरोग्यशाला स्त्री आरोग्य
दानगृहं।चिकित्सालयः।यथा
।धर्म्मार्थ काम मोक्षाणां मारो
ग्यं साधनं यतः।अत स्त्वारोग्य
दाता च नरो भवति सर्व्वदः॥
आरोग्यशालां कुर्वीत म
हौषधपरिच्छदां॥विदग्धवैद्य।
संयुक्तां वक्तचरससंयुतां॥वैद्य
स्तु शास्त्रवित् प्राज्ञो दृष्टौषध
पराक्रमः।ओषधीमूलतत्त्वज्ञः
समुद्धरणकालवित्॥बलवी
र्य्ये विपाकज्ञः शालिमांसौष
धीगणे।त्यागवद्देहिनां तद्व।
द्वक्तः प्रियम्वदः॥
इति वैद्यकं॥
आरोपः पुं मिथ्याज्ञाने।य
था।असर्पभूते रज्जौ सर्पारोप
वत् वस्तुन्यवस्त्वारोपः अध्या
रोपः॥इति वेदान्तसारः॥मि।
थ्याविष्करणं।यथा।अस्तूया
त्तु दोषारोपो गुणेष्वपि।इत्य
मरः॥
आर्त्तो त्रि पीडितः।यथा।आ
र्त्तानां मार्गमाणानां प्रायश्चि
त्तानि ये द्विजाः।जानन्तो न
प्रयच्छन्ति तेपि तद्दोषभागि
नः॥इति प्रायश्चित्ततत्त्वं॥
आर्द्रकं क्ली कटुमूलविशेषः
।तत् पर्य्यायगुणाः।आर्द्रकं
शृङ्गवेरं स्यात् कटुभद्रं तथा
र्द्रिका।आर्द्रिका भेदिनी गुर्व्वी
तीक्ष्णोष्णा दीपनी तथा॥कटु
का मधुरा पाके रूक्ष वात कफा

पहा।ये गुणाः कथिता शुण्ठ्या
स्तेपि सन्त्यार्द्रके ऽखिलाः॥भो
जनाग्रे सदा पथ्यं लवणार्द्रक
भक्षणं।अग्निसन्दीपनं रुच्यं जि
ह्वा कण्ठविशोधनं॥कुष्ठ पा
ण्ड्वामये कृच्छ्रे रक्तपित्ते व्रणे
ज्वरे।दाहे निदाघ शरदो नैव
पूजितमार्द्रकं॥इति भावप्र
काशः॥
आर्द्रपटी पुं आर्द्ररक्तवस्त्राहृत
कान्ते कशत्रुनाशफलकाभिचा
र कर्म्मविशेषः।यथा।अथार्द्रप
टी।प्रणवो हृदय भगवति चा
मुण्डे रक्तवाससे अप्रतिहतरूप
पराक्रमे अमुकवधाय विचेतसे
वह्निवल्लभा।आर्द्ररक्तपटेना
वृतः समुद्रगामिनीनदीतटे
ऊषरभूमौ वा दक्षिणामुख ऊ
र्द्ध्ववाङ्जपेत् यावत् पटः शु
ष्यति तावत् प्राणाः शुष्यन्ति
शत्रोः।इति तन्त्रसारः॥आर्द्र
पटविशिष्टे त्रि॥
आर्द्रिका स्त्री आर्द्रकं।इति
भावप्रकाशः॥
आर्य्यावर्त्तः पुं देशविशेषः।य
था।आसमुद्रात्तु वै पूर्व्वादा स
मुद्रात्तु पश्चिमात्।तयो रे
वान्तरं गिर्य्यो रार्य्यावर्त्तं विदु
र्बुधाः॥इति मानवे २ अध्या
यः॥अपि च।आर्य्यावर्त्तः पु
ण्यभूमि र्मध्यं विन्ध्य हिमाग
योः।इत्यमरः॥
आलुकं क्ली मूलविशेषः।आ
लु इति भाषा।तद्विवरणं यथा
।आलुकमप्यालुकं तत् क
थितं वीरसेनस्य।काष्ठालुक
शङ्खालुक हस्त्यालुकानि क
थ्यन्ते॥पिण्डालुक मध्वालुक
रक्तालुकानि व्यक्तानि।काष्ठा
लुकं काठिन्ययुक्त कठालुः।श
ङ्खालुकं श्वेततायुक्त शङ्खा
लु।हस्त्यालुकं दीर्घतायुक्त म
हाशारीरं।पिण्डालुकं वर्त्तुलस्व
नी।मध्वालुकं मधुरतायुक्त रो
मान्वित दीर्घखन्नी।रक्तालु
कं रक्ताद्र नरण्डा इति चाप
षां गुणाः।आलुकं शीतलं
सर्व्वं विष्टम्भि मधुरं गुरु।सृ
ष्टमूत्र मलं रूक्षं दुर्जरं रक्तपि
त्तनुत्॥कफानिलकरं बल्यं
वृष्यं स्तन्यविवर्द्धनं।इति भा
वप्रकाशः॥
आलुकी स्त्री दीर्घीकारस्तस्त्वर
कोलु।अरुङ्ग इति नाम।यथा।

रक्तालुभेदो या दीर्घा तन्वी च
प्रथितालुकी। आलुकी बल
कृत् स्निग्धा गुर्वी हृत् कफना
शिनी। विष्टम्भकारिणी तैले न
लिनातिरुचिप्रदा॥ इति भाव
प्रकाशः॥
आवश्यकं त्रि अवश्यकर्त्तव्यं
। यथा। ऋणेणावश्यके। उवर्णा
न्तादावश्यके ऽर्थे घ्यण स्यात्
। इति मुग्धबोधव्याकरणं॥
किन्तु। आवश्यकपदोदितक्रि
यमाणस्य नित्यनैमित्तिकत्वं
इति तिथ्यादितत्त्वं॥
आवाहनं क्ली आह्वानं। य
था। प्रतिस्थानेषुसंस्थौ नावा
हन विसर्जने। इति विनाय
कादीनां व्याहृतिभिरावाह
नमाह मत्स्यपुराणं। विनाय
कं तथा दुर्गां वायुमाकाशमे
व च। आवाहयेद्व्याहृतिभि
स्तथैवाश्विकुमारकौ॥ इति च
तिथ्यादितत्त्वं॥ आवाहनीमु
द्राशब्दे द्रष्टव्या॥
आविर्भावः पुं प्रकाशः। अ
वतरणं। यथा। तदा मे मनसा
ध्यातो दयासिन्धुर्जनार्दनः।
भक्तानामनुकम्पार्थे य आवि
र्भावमिच्छति॥ इति जैमिनिभा
रते आश्वमेधिके पर्व्वणि २ अ
ध्यायः॥
आविर्भूतः त्रि आविर्भावविशि
ष्टः। अवतीर्णः। यथा। उच्चस्थे
ग्रहपञ्चके सुरगुरौ सैन्ये नव
म्यां तिथौ लग्ने कर्कटके पुन
र्वसुदिने मेषं गते पूषणि। निर्द
ग्धुं निखिलाः पलाशसमिधो
मेध्यादयोध्यारणे राविर्भूत
मभूदपूर्वविभवं यत् किञ्चिदे
कं महः॥ इति। तत्राष्टम्यां भद्र
काली दक्षयज्ञविनाशिनी आविर्भू
ता महाघोरा योगिनीकोटि
भिः सह॥ इति च तिथ्यादि
तत्त्वं॥
आवीरचूर्णं क्ली फल्गु। फाग
इति बङ्गभाषा। आवीर इति
हिन्दीभाषा। यथा। चन्दनागुरु
कस्तूरी कुङ्कुमद्रवसंयुतं। आ
वीरचूर्णं रुचिरं गृह्यतां परमेश्व
र॥ इति ब्रह्मवैवर्त्ते श्रीकृष्णज
न्मखण्डे ८ अध्यायः॥
आश्रयः पुं संश्रयणं। अवल
म्बनं। राज्ञां तन्त्रिणीयो यथा।
अस्थिनो यदि कल्याणं भवे
त् संश्रयणं तथा। अवनि

श्रेयसे राज्ञां विपरीतं न कर्हि
चित्॥ उच्छिद्यमानो बलिना
आश्रयेत् बलवत्तरं। विनीतव
त्तत्कालं नयेदिति मतिर्ध्रुवा
॥ दद्यात् बलं वा कोषं वा भूमिं
वा भूमिसम्भवां। आश्रयेदभि
योक्तारं समाश्रयगुणान्वितं॥
वीतव्यसन मश्रान्तं महोत्सा
हं महामतिं। प्रविशन्ति महा
राज मपांपतिमिवापगाः॥ अ
व्यवसायिन मलसं दैवपरं सा
हसाच्च परिहीनं। प्रमदेव हि वृद्ध
पतिं नेच्छन्त्युपगूहितुं कमला
॥ उत्साहाच्च महद्यशः तस्मात्
सर्व्वोपधाशुद्ध मुत्साहं नित्य
माचरेत्॥ अमर्षश्चैव शौर्य्यञ्च
शीघ्रकारित्व मेव च। तत्कर्म्म
णि प्रवीणत्व मित्युत्साहगुणा
मताः॥ वामनस्यागमद्वारमनु
त्साहो महीपतेः। साम दान दण्ड
भेदा इत्युपायचतुष्टयं। साम सि
द्धिं प्रशंसन्ति सर्व्वतन्त्र विप
श्चितः॥ सर्व्वत्रिवामनं वाचा सा
मोपायं समाचरेत्। लब्धे क्षीणे प्र
दानेन सत्कृत्य वशा
मानयेत्। भेदं कुर्व्वीत
यत्नेन मन्त्रामात्य पुरो
धसां॥ यथाबलं प्रकुर्व्वीत दुष्टद
ण्डनिपातनं॥ इति युक्तिकल्प
तरौ १ अध्यायः॥
आस ल ङ त्रि उपवेशने। नि
आसितो हस्ति। ल ङ आस्ते
सिंहासने नृपः। विद्यमानता
या मप्ययं। आकाशमास्ते। इति
दुर्गादासः॥
आसनं क्ली उपवेशनाधारः।
पीठादि। यथा। श्रीभगवानुवा
च। उपचारान् प्रवक्ष्यामि शृणु
षोडश भैरवाद्यैः सम्यक् तुष्य
ते देवी देवोप्यन्या हि भक्तितः
॥ आसनं प्रथमं दद्यात् पौष्पं
दारुज मेव वा। वास्त्रं वा चा
र्म्मणं कौशं माण्डलस्यान्तरे सृजे
त्॥ पौष्पासनं यदि हितं यस्य त
द्यदि गर्भकं॥ निवेदयेत्तदा प
द्मे विपुलं हारिचोत् सृजेत्।
पौष्पं पुष्पोच्च रहितं कुश।
सूत्रादिसंयुतं॥ अतिप्रीतिक
रं देव्या समाप्यन्यस्य भैर
व। यत्तदारुसमुद्भूत मासनं
मसृणं शुभं॥ नोच्छ्रावं ना
तिविस्तीर्णं मासनं विनियो
जयेत्॥ अन्यदारुभवञ्चापि
दद्यादासन मुत्तमं। स्फाटिके

क्षीरवृक्षं दारुसारविवर्जितं।चै
त्य श्मशानसम्भूतं वर्जयित्वा वि
भीतकं॥वास्कलं कोषजं का
लं वस्त्र मेतत्त्रयं मतं।रोमजं क
म्बलञ्चैव तद्देन चतुष्टयं॥
अनेन रचितं दद्यादासनं चेष्ट
भूतये।सिंह व्याघ्र तरक्षूणां
छागस्य महिषस्य च॥गजानां
तुरगाणाञ्च कृष्णसारस्य चर्म्म
णः।स्मरस्याय रामस्य मृगाणां न
वभेदिनां॥चर्म्मभिः सर्व्वदेवाना मा
सनं प्रीतिदं स्मृतं।वास्त्रेषु कम्ब
ले शास्त मासनं देवतुष्टये॥रा
ङ्कवं चार्म्मणं श्रेष्ठं दारवं चन्द
नोद्भवं।यच्चासनं कुशमयं त
दासन मनुत्तमं॥सर्व्वेषा मपि दे
वानां ऋषीणाञ्च यतात्मनां॥यो
गपीठस्य सदृशं मासनं स्यान्न
मुच्यते॥आसनस्य प्रदानेन सौ
भाग्यं मुक्ति माप्नुयात्।स्मरो
रोहितो न्यङ्कुः सम्बरो वङ्कु
णो रुरुः॥शशेव हरिणाश्चे
ति मृगा नवविधा मताः।हरिण
श्चापि विज्ञेयः पञ्चभेदोत्र भे
द॥ऋष्यः खड्गो रुरु श्चैव पृ
षतश्च मृगस्तथा॥एते चर्म्मप्र
दानेषु चर्म्मदाने च कीर्त्तिताः॥

॥सर्व्वेषां तैजसानाञ्च आसनं
ज्येष्ठ मुच्यते।आयसं वर्जयित्वा
तु कांस्य सीसक मेव वा॥शि
लामयं मणिमयं तथा रत्नमयं
मतं।आसनं देवताभ्यस्तु भक्ते
मुक्त्यै समुत्सृजेत्॥ ।अत्रैव
साधकानाञ्च आसनं शृणु भै
रव।यत्रासीनः पूजकस्तु सर्व्व
सिद्धि मवाप्नुयात्॥ऐणञ्च चा
र्म्मणं वास्त्रं तैजसञ्च चतुष्टयं।
आसनं साधकानाञ्च सततं परि
कीर्त्तितं॥सर्व्वोक्तं पञ्चदेवेभ्य
आसनं परिकीर्त्तितं।तत्सर्व्व मा
सनं शस्तं पूजाकर्म्मणि साध
के॥न यथेष्टासनो भूयात् पूजा
कर्म्मणि साधकः।काष्ठादिकास
नं कुर्य्यात् मित मेव सदा बुधः॥
चतुर्व्विंशत्यङ्गुलेन दीर्घं काष्ठा
सनं मतं षोडशाङ्गुल विस्तीर्ण
मुन्नत्यं चतुरङ्गुलं।षडङ्गुलं वा
कुर्य्यात्तु नोच्छ्रितं चात्र कार
येत्॥सर्व्वोक्तं वर्जयेद्वर्ज्य मास
नं पूजनेष्वपि।वास्त्रं द्वि हस्ता
न्त्रो दीर्घं सार्द्धहस्तान्तु विस्त
रं।न त्र्यङ्गुलान्तथोच्छ्रायं पू
जाकर्म्मणि संश्रयेत्।यथेष्टं
चार्म्मणं कुर्य्यात् सर्व्वोक्तं सिद्धि

दायकं॥षडङ्गुलाधिकं कु
र्य्या न्नोच्छ्रितन्तु कदाचन।काम्ब
लं चार्म्मणं चैलं महामाया प्रपूज
ने॥प्रशस्त मासनं प्रोक्तं का
माख्याया स्तथैव च।त्रिपुरा
याश्च सततं विस्त्रा श्चापि कु
शासनं॥बहुदीर्घं बहूच्छ्रायं
तथैव बहुविस्तृतं।दारु भूमि
समं प्रोक्त मधमापि सर्व्वकर्म्म
णि॥पृथक् पृथक् कल्पयेत्तु
शोभनं तादृशासनं।न पत्र मा
सनं कुर्य्यात् कदाचिदपि पूज
ने॥न प्राणङ्गसमुद्भूत मस्थिजं
द्विरदादृते।मातङ्गदन्तसञ्जात
मासनं कामिके चरेत्॥चर्म्म हृ
द्वीदितं ग्राह्यं तथा गन्धमृगस्य
वा।सलिले यदि कुर्व्वीत देव
तानां प्रपूजनं॥तत्राप्यासन मा
सीनो नोत्थितस्तु समाचरेत्।
तोये शिलामयं कुर्य्यादासनं
कौश मेव वा॥दारवं तैजसं वा
पि नान्यदासन माचरेत्।आ
सनारोपसंस्थानं स्थानाभावे
तु पूजकः॥आसनं कल्पयित्वा
तु मनसा पूजयेज्जले।यद्यास
नस्य संस्थानं तोयमध्ये न वि
द्यते॥अन्यत्र वा तदा स्थित्वा

देवपूजां समाचरेत्।इत्येतत्
कथितं पुत्र पूजा पूजकसङ्गतं
॥आसनं पाद्य मधुना शृणु
वेतालभैरव॥इति कालिका
पुराणे ६७ अध्यायः॥
आसुरं त्रि असुरसम्बन्धि।य
था।यस्मिन् नवे पुराणे च वि
श्वदेवा नलेभिरे।आसुरं तद्भ
वेत् श्राद्धं वृषले मन्त्रवर्जि
ते॥इति श्राद्धतत्त्वे ऋग्वेदीय
गृह्यपरिशिष्टं॥अपि च।स्ना
ने दानं तप श्राद्ध मनन्तं रा
हुदर्शने।आसुरी रात्रि रन्य
त्र तस्मात्तां परिवर्जयेत्॥इ
ति श्राद्धतत्त्वधृत यमवचनं॥
आसुरस्सर्गो यथा।द्वौ भूतस
र्गौ लोकेऽस्मिन् दैव आसु
र एव च।दैवो विस्तरशः प्रो
क्त आसुरं पार्थ मे शृणु॥प्र
वृत्तिञ्च निवृत्तिञ्च जना न
विदुरासुराः।न शौचं नापि चा
चारो न सत्यं तेषु विद्यते॥अ
सत्य मप्रतिष्ठं जगदाहु रनी
श्वरं।अपरस्परसम्भूतं किम
न्यत् कामहैतुकं॥एतां दृ
ष्टि मवष्टभ्य नष्टात्मानोऽल्प
बुद्धयः।प्रभवन्त्युग्रकर्म्माणः

तयाय जगतो ऽहिताः॥काम
माश्रित्य दुष्पूरं दम्भमानमदा
न्विताः।मोहाद्गृहीत्वा सद्ग्राहा
न् प्रवर्त्तन्ते ऽशुचिव्रताः॥चिन्ता
मपरिमेयाञ्च प्रलयान्ता मुपा
श्रिताः।कामोपभोगपरमा
एतावदिति निश्चिताः॥आ
शापाशशतैर्बद्धाः काम
क्रोधपरायणाः।ईहन्ते कामभो
गार्थ मन्यायेनार्थसञ्चयान्॥
इदमद्य मया लब्ध मिदंप्राप्स्ये
मनोरथं।इदमस्तीद मपि मे
भविष्यति पुनर्धनं॥असौ म
या हतः शत्रुः हनिष्ये चापरा
नपि।ईश्वरोहमहं भोगी सिद्धो
ऽहं बलवान् सुखी॥आढ्यो
भिजनवानस्मि कोन्योस्ति स
दृशो मया।यक्ष्ये दास्यामि मो
दिष्य इत्यज्ञानविमोहिताः॥
अनेकचित्तविभ्रान्ता मोहजा
लसमावृताः।प्रसक्ताः काम
भोगेषु पतन्ति नरके ऽशुचौ
॥आत्मसंभाविता स्तब्धा धन
मानमदान्विताः।यजन्ते नाम य
ज्ञैस्ते दम्भेनाविधिपूर्वकं॥अहङ्
कारं बलं दर्पं कामं क्रोधंच सं
श्रिताः।मा मात्मपरदेहेषु प्र
द्विषन्तो ऽभ्यसूयकाः॥तान
हं द्विषतः क्रूरान् संसारेषु न
राधमान्।क्षिपाम्यजस्र मशुभा
नासुरीष्वेव योनिषु॥आसुरीं
योनिं मापन्ना मूढा जन्मनि
जन्मनि।मा मप्राप्यैव कौन्ते
य ततो यान्त्यधमां गतिं॥इति
श्रीभगवद्गीतायां १६ अ
ध्यायः॥

आहरणं क्ली आसादनं।यथा
।देवीपुराणे।मृदाहरणं संघट्ट
प्रतिष्ठाह्वान मेव चाप्लवनं प्र
जनञ्चैव विसर्जन मतःपरं॥
इति तिथ्यादितत्त्वं॥

आहूतं क्ली प्रलयपर्यन्तं।य
था।कदम्बानि पटोलानि वृ
न्ताकसंहितानि चान त्यजेत्
कार्त्तिके मासि यावदाहूतनार
की॥आहूतानि आभूतानि प्र
लयपर्यन्तानीति यावत्।इति
तिथ्यादितत्त्वं॥

आहूतः त्रि कृताह्वानः।य
था।प्रगायतः स्ववीर्याणि ती
र्थपादः प्रियश्रवाः।आहूत इ
व मे शीघ्रं दर्शनं याति चेतसि
॥इति श्रीभागवते १ स्कंधे ६
अध्यायः॥

आह्लादः पुं आनन्दः।यथा।
नन्दस्त्वात्मज उत्पन्ने जाता
ह्लादो महामनाः।आहूय वि
प्रान् वेदज्ञान् स्नातः शुचिर
लङ्कृतान्॥इति श्रीभागवते
१० स्कन्धे ५ अध्यायः॥

आह्लादितः त्रि जाताह्लादः।
इतो ऽस्य जाते इत्यनेन आ
ह्लादशब्दात् इतप्रत्ययेन
निष्पन्नः॥

इ

इ इकारवर्णः।तस्य लेखन
प्रकारो यथा।ऊर्द्ध्वाधः कुञ्चि
ता मध्ये रेखा तत्सङ्गता भ
वेत्।लक्ष्मी र्वाणी तथेन्द्राणी
क्रमात्तास्वेव संवसेत्॥शीर्षोर्द्ध्वः
कुञ्चिता रेखा दक्षा ह्री काम
रूपिणी।मात्राशक्तिः कोणयुता
ध्यान मस्य प्रचक्षते॥इति व
र्णोद्धारतन्त्रं॥॥तस्य नामानि
यथा।इः सूक्ष्मा शाल्मली वि
द्या चन्द्रः पूषा स्व गुह्यकः।सु
मित्रः सुन्दरो वीरः कोटरः का
टः पयः॥ह्रस्वा माधव स्तुष्टि
र्दक्षनेत्रञ्च नासिका।शान्तः
कान्तः कामिनी च कामो विघ्न
विनायकः॥नेपालो भरणी
रुद्रो नित्या क्लिन्ना च पावका
।इति वर्णाभिधानतन्त्रं॥

इ गतौ।अयति।ल

इ ल एति।पृथक्पाठसाम
र्थ्यात् वृद्धौ न लित्।शेषस्तु
इन गताविति प्रसिद्धः।
यिनो ऽध्यणावित्यादिषु ग्र
हणमस्यैव।इति दुर्गादासः॥

इल स्मृत्यां।अधिपूर्वो ऽयं।
अधिग्रहणं अन्यपूर्वस्य केवल
स्य च प्रयोगनिरासार्थं।एवं
सर्वत्र।ल अध्येति तव लक्ष्मणः
।इक स्मरणे इति प्रसिद्धोयं।
इनवदिक इत्यत्रास्यैव ग्रह
णं।इति दुर्गादासः॥

इ ङ ल अध्ययने।अधिपूर्वो
यं।अध्ययन मर्थतः शब्द
तश्च गुरुतो ग्रहणं।ङ ल
वेद मधीते विप्रः।इति दुर्गा
दासः॥

इः पुं कामः।यथा।इः का
मे रति लक्ष्म्यो री उः शिवे
ब्रह्मकाश्य ऊः।इत्याद्ये
एकाक्षराभिधानं॥

ईरेजः पुं लाडदेशजात

म्लेच्छजातिविशेषः।यथा।अपि
पा माण्डलानाञ्च संग्रामेषु प
राजिताः।इंरेजा नव षट् प
ञ्च लण्डजा श्चापि भाविनः॥
इति मेरुतन्त्रे २३ प्रकाशः॥
इख गतौ।तृतीयस्वरादिः॥
इखति।इति दुर्गादासः॥
इखि इ गतौ।तृतीयस्वरादिः।
इ इङ्खते।इति दुर्गादासः॥
॥
इग इ गत्यां।
तृतीयस्वरादिः।इ इङ्गते इ
ङ्गितं इति दुर्गादासः
इच्छा स्त्री आकाङ्क्षा।तत्प
र्य्यायः।रुक् १३ इषा १४ स्पृहा
१५ तृष्णा १६ रुचिः १७ मतिः १८
दोहदं १९ छन्दः २० इट् २१
।इति दुर्गादासः जटाधरः॥
इट्यानां।पठति।इति दुर्गादा
सः
इठ स्त्री इच्छा।इति जटा
धरः॥
इत इ बन्धे।इ इन्तयते।इति
दुर्गादासः॥
इद इ परमैश्वर्य्ये।इ इन्दयते
इन्दति इन्द्रः।इति दुर्गादा
सः॥ ॥

इदा स्त्री संवत्सरादि वर्षपञ्च
कान्तर्गततृतीयवत्सरः।इति
मलमासतत्त्वं।अस्या विवरणं
वत्सरशब्दे द्रष्टव्यं॥ इद्वत्सरः
पुं इदावत्सरः।यथा।सम्वत्
सरस्तु प्रथमो द्वितीयः परि।
वत्सरः।इद्वत्सरस्तृतीयस्तु
चतुर्थस्त्वनुवत्सरः॥पञ्चमो
वत्सरोस्तेषां तदेभिः पञ्चभिः
युगं।तेषु सम्वत्सरो ह्यग्निः
सूर्य्यस्तु परिवत्सरः॥सोम
इद्वत्सर स्तेषां वायुश्चैवानुव
त्सरः।रुद्रस्तु वत्सरो ज्ञेयः
पञ्चाब्दा ये युगात्मकाः॥इति
देवीपुराणे कालव्यवस्याना।
माध्यायः॥
इन्द्रः पुं स्वरपतिः।तत्पर्य्यायः
।महेन्द्रः ३६ कौशिकः ३७ शत
क्रतुः ३८ विश्वंभरः ३९ हरिः
४० पुरन्दरः ४१ शतधृतिः ४२
शतनाषाड् ४३ आखिहयः ४
४।इति जटाधरः॥वज्रपाणिः
४५ देवराजः ४६ पर्व्वतारिः ४७
पर्य्यणः ४८ देवनाथिपः ४९
नाकनाथः ५० हर्य्यश्विकपतिः ५१
पुलोमारिः ५२ अर्हः ५३ प्राचीन
वर्हिः ५४ तपस्तक्षः ५५ इति

शब्दरत्नावली॥तस्य चतुर्द्दशना
मभेदा यथा।इन्द्रश्च विश्वभुग्
ज्ञेयो विपश्चित्तदनन्तरं।विभुः
प्रभुः शिखि श्चैव तथैव च म
नोजवः।तेजस्वी साम्प्रतन्त्वि
न्द्रो बलि र्भव्य स्त्वनन्तरं॥अद्भु
त स्त्रिदिव श्चैव दशम स्त्विन्द्र
उच्यते।सुशान्तिश्च सुकीर्त्तिश्च
अतथानादिवस्पतिः॥इति भू
ता भविष्याश्च इन्द्रा ज्ञेया श्च
तुर्द्दश।इति देवी पुराणे काल
व्यवस्थाध्यायः॥ इन्द्रजाल
क्ली मायाकार्य्यं।तद्विवरणञ्च
न्यो यथा।अथातः संप्रवक्ष्या
मि चेन्द्रजाल मनुत्तमं।व्या
धि दारिद्रहरणं जरामृत्यु वि
नाशनं॥इन्द्रस्य यो न जाना
ति जालेशं रुद्रभाषितं।निग्र
हानुग्रहे तस्य का शक्तिः प
रमेश्वरि॥न तेषां जायते सि
द्धि र्गोत्रे क्षेत्रे गृहे पि वा।इन्द्र
जालं न जानाति स क्रुद्धः किं
करिष्यति॥न जीवति वरारोहे
संसारे दुःखसागरे।इन्द्रजालं
न जानाति कुतः सौख्यं भवे
त्ततः॥ कौतूहलं कुत
स्तेषां कुतः

कामान् वरानने।संसारसागरे
घोरे कामस्तव्याश्च मानवाः॥
रुद्रकर्म्म नहि तेषां कुतः सौ
ख्यं विधीयते।यथानदी नदाः
सर्व्वे सागरे समुपागताः॥तथा
सर्व्वाणि शास्त्राणि इन्द्रजाला।
स्थितानि च।तन्त्राणाञ्च यथा
भानुः शीतलानां यथा शशी
।गम्भीराणां यथा सिन्धु र्जाले
न्द्रञ्च तथा प्रिये॥तथा किं ब
हुनोक्तेन वर्णितेन पुनः पुनः।
जालेन्द्रस्य समं शास्त्रं न भूतं न
भविष्यति॥ ॥अथातः संप्रव।
क्ष्यामि ओषधीनां विधिं वरेण्येन
विज्ञानमात्रेण सर्व्वसिद्धि र्भवि
ष्यति॥महाकालस्य बीजानि
प्रस्थमेकं समाहरेत्।धात्रीरसे
न देवेशि सप्तवारान् विभाव
येत्॥गुटिका कर्त्तव्या तां गुटि
कां मुखे निक्षिप्य पारावतो भ
वति॥१॥अथातः संप्रवक्ष्यामि
शृणु त्वं मम वल्लभे।छागस्य
शीर्षे संगृह्य कुसुमृत्तिका स्थ
पित्वा पुन र्धुस्तूर बीजानि वाप
येत् काले तानि पुष्पितानि भ
वन्ति तदा यस्योपरि निक्षिपेत्
स छागो भवति॥२॥मयूर

शीर्षमादाय कृष्णचतुर्दश्यां श्म
शानिकां हरयेत् शणबीजानि वा
पयेत् तदा फलितः पुष्पितो भ
वति तदा शणबीजानि ग्रीवा
यां बन्धयेत् मयूरो भवति॥३॥
कृष्णचतुर्दश्यां मयूरशीर्षमा
दाय कृष्णमृत्तिकां हरयेत् का
र्पास बीजानि वापयेत् तदा
फलिताः पुष्पिता भवन्ति पुष्प
फले संगृह्य समस्तं पेषयित्वाग्र
के विलिप्य पानीयमध्ये प्रवि
श्य तथा जले तिष्ठति यथा
स्थले॥४॥ कृष्णकाकशीर्षमादा
य काकमाचीबीजानि वापयेत् य
था फलिताः पुष्पिता भवन्ति त
त्फलं संगृह्य मुखे प्रक्षिप्य का
को भवति काकवद् गच्छति म
ध्यां उह्रीणे मोक्षः॥५॥ पारावत
शीर्षमादाय कृष्णमृत्तिकां हर
यित्वा तिलबीजानि वापयेत् ली
होदकेन सिञ्चनीय यदा पुष्पि
ता भवन्ति तदा मुखे संस्थाप्य
अन्तर्हितो भवति॥६॥ तेषां फ
लानां चूर्णं कृत्वा तेन चूर्णेन ये
स्पृशति स किङ्करो भवति। सर्वं
स्वं ददाति॥७॥ तानि तिलानि संगृ
ह्य नेत्राञ्जनेन सह पिष्ट्वा क
पिलादुग्धेन गुटिकां कारयेत्
। सप्तरात्रं पाचयेत्। तां गुटिकां
मुखे निक्षिप्य अन्तर्हितो भवति
देवै रपि न दृश्यते मनुष्याणां
का कथा। उह्रीणेन पुरुषो भ
वति। जीवेद्वर्षशतं स्त्रियः सर्वे
जनाश्च वश्या भवन्ति॥८॥ शृभ्र
शिरः समादाय कृष्णचतुर्दश्यां
कृष्णमृत्तिकां निक्षिपेत् लशुनबी
जानि वापयेत् यदा फले पुष्पं
भवति तदा पुष्पफले पुष्पं गृ
हीत्वा अञ्जनेन सह कपिलाघृते
न कज्जलं पातयेत् वस्त्ररञ्जनी
यं लावत योजनशतं पश्यति
मेदिनीं दिवा नक्षत्राण्यपि प
श्यति। लाभस्तस्य। किञ्चित् कर्त्तुं
मिच्छति तत् करोति न संशयः
॥९॥ अन्ये च सर्वे जीवाः एवं
उष्ट्र गर्दभ महिष्यादि लघु दे
हजीवाः। यत्तद्यत्बीजं यस्य शि
रसि वापयेत् यदा पुष्पिता कलि
तो भवति तदा यस्य बीजानि मु
खे निक्षिप्यन्ते सजीवो भवति
नात्र सन्देहः॥१०॥ अथ सर्वेषां
धारणमन्त्रः। ओं ह्रीं क्लीं ह्रूं ऐं
लं लं ओं भैं स्वाहा॥ एकादशा
हस्रो मन्त्रस्य पुरश्चरणं

लक्षजपः। दशांशहोमः तर्पणेन
तर्पणं मार्जनं ब्राह्मणभोजनादि
कं कारयित्वा सिद्धि भवति॥ ॥
अथ वश्याधिकारः। मातुलुङ्ग
स मूलन्तु धुस्तूरबीजकेन चा
पलाशपुष्प मादाय सूक्ष्मचूर्णन्तु
कारयेत्॥ यो ऽस्य गन्धं समाघ्रा
ति स च स्नेहेन पश्यति। दुन्दुभिं
पटहांश्चैव शङ्खांश्चैव तु लेपयेत्
॥ एष भूतोपसृष्टानां कुमारी
णां गृहेषु चाभूपतेः सेव्यमाना
नां तथापत् पापजीविनां॥ न
वाग्र दैस्यै वेषम यत्रैष सो ऽगा
दो भवेत्। अत्र मन्त्रः। ओं रक्त
चामुण्डे अमुकं वशमानय ह्रीं
ह्रीं ह्रूं फट्। अयुतं जप्तव्यं। ओं
नमो ऽस्तु आदित्याय किलि कि
लि चिलि चिलि धर्म लिहि य
क्षिणि मोदने हि शाकिनि स्र
निडरु शूलपाणि स्वाहा॥ व
र्णाः ४ शिलाकृतिके मन्त्रे।
ओं नमो गुहावासिन्यं गुहप
ति गुहिले मनोजवे ओं ऐं ओं
विज्ञे नमः। शिलायाः कृत्वि
करलिखिता खदिरानलस
न्तप्तलिङ्गा यतो नवयोषि
तोपि आकर्षणं। वर्णाः २८
। ओं नमः कपालरुद्राय सर्वलो
कवशंकराय अनाथायाप्रतिहत
बलवीर्यपराक्रमप्रभवाय हा हा
हे हे पच पच मारय मारय कप
ट कपट काट सर्प कर्म्मकीर आ
मुकं मे वशमानय स्वाहा। ऽयु
तजपाद्वशीकरोति॥ ॥ अन्य
प्रकारः। पारावतस्य हृदयं
वस्तुजिह्वा च शोणितं। अञ्जनं
रोचनयुतं वर्णिता वशकृत् परं
॥ तत्र मन्त्रः। ओं नय नय महावि
ग्नि नमो देव्यै स्वाहा॥११॥ एक
विंशतिवारान् परिजप्य सिद्धि
र्भवति॥ ॥ अन्यप्रकारः। कपा
लं मानुषं गृह्य कनकस्य फ
लानि च। कर्पूरं मधुसंयुक्तं नि
घृष्य तिलकेन च॥ नारी वा
पुरुषो ऽनेन वश्या भवति नि
त्यशः। एष कापालिको योगो
वशिकस्य सुभं मतं॥ ॥ अन्य
प्रकारः। पुरुषार्थी। कर्पूरं वा
लुकं लाक्षा रजसा स्वेतभा
षितं। रतिकाले भगं लिप्य
पति दोषो भविष्यति॥ ॥
॥ ॥ अन्यप्रकारः। नर
जिह्वां समुद्धृत्य सूक्ष्मचूर्णं
न्तु कारयेत्। जलेन च सशी

तेन दापयेतद्धि वत्तणः॥पा
ने फले च पुष्पे च भक्ष्ये भोज्ये
च दापयेत्।प्रजापतिकुलोद्भूता
यदि साक्षादरुन्धती॥साभि
मन्त्रो प्रियं याति नान्यं पुरुष
मिच्छति॥ ॥अन्यप्रकारः।क
नक ज्वाप्यपामार्गं श्वेता गौ
रसर्षपाः।तिलतैलेन पिष्टापि
योनिलेपः प्रशस्यते॥अत्र
मंत्रः।ॐनमः श्मशाये दरि वि
दरि यामिनि अमुकं मेवश
मानय स्वाहा॥अन्यप्रकारः।
हरितालं श्मशाने हस्तवत्
देशंपा लिप्त्वा ऊष्टविमिश्रं ग्राह्यं
अवश्यंवशीभवेत् स नरः॥
अन्यप्रकारः।अन्तु नवलोच
ने तालालसाटोद्धराणमा
थितं तैलं सकलमनुजेन्द्र लल
नायशङ्करं मकरालये पुष्पेन
रतैलं प्रेताम्बर वर्त्तिकं कृत्वा
माचे रात्रौ प्रज्वाल्यार्के हस्तस्क
न्धे कज्जलं कृत्वा चक्षुषी अभ्य
ञ्जेत् यंपश्यति स वश्यो भवति
॥अन्यप्रकारः।कर्णादन्तमलं
लाला स्वदेहाश्रि मलत्रयं।ना
सिकोद्भवरकम्बु चूर्णमेतद्
लाद्युतं॥एतत् सर्वं समाहृत्य

गुटिकां कारयेद्बुधः।पानभोज
नके देया वशीकरणमुत्तमं
॥ ॥अन्यप्रकारः।काकजिह्वा
वचाकुष्ठ आत्मनो रुधिरं स्त्रि
यः।तद्भानदन्त मञ्जिष्ठा तग
रं गौरसर्षपाः॥शिवनिर्माल्य
संयुक्तं समभागानि कारयेत्।
भोज्ये पाने ऽथवा देयाः स्त्रीणा
न्तु वशकारकाः।नित्यं पुरुष
मिच्छंती यान मप्यनुगच्छति॥
अन्यप्रकारः॥कृष्णसर्प मष्टाङ्गुल
प्रमाणं शिर छित्वास्यास्य सर्षपा
दिभिः पूरयित्वा छायाशुष्कं शो
षयेत्।परतः सर्षपान् ग्राहयि
त्वा तानि यस्मै दीयते स वश्यो
भवति॥ ॥अन्यप्रकारः।पूगीफ
लं निर्मित्विम्बा पानमार्गे निर्ग
तं गृह्य धुस्तूररसाकरितं कृत्वा
सप्तदिनानि पूजयेत्॥पुनः
कुङ्कुम चन्दनैः रविभाव्य य
स्मै दीयते स वश्यो भवति॥
॥ ॥अन्यप्रकारः।दर्दुरयुग्मं
गृहीत्वा तद्धूमेन दाहयेत्।त
द्भस्म सहपानेन वश्यकृत् पर
मो मतः॥ ॥अन्यप्रकारः॥
अजगन्धस्य पञ्चाङ्गं वचाजु
ष्टेन भावयेत्।श्मशानभस्मसंयुक्तं

चूर्णञ्चैविष दुर्लभं॥अनेनैव
च चूर्णेन जोटयेत् विश्वपादपं।
पुष्पितं फलितं दृष्ट्वा चूर्णं हृत्वा
द्विलप्तयेत्।ततक्षणात् फलेन
वृन्ता नरनारीषु का कथा॥ ॥
अन्यप्रकारः।जिह्वामूले सप्तरा
त्रं सैन्धवेनापि मिश्रितं।दद्या
ति यस्य पानेषु सोपि वश्यो भ
वेत् क्षणात्॥ ॥अन्यप्रकारः
।मोपितं सैन्धवञ्चैव हस्ती
फल मेव चालेपमेतत् प्र
योक्तव्यं नर नारीवशङ्करं॥
अन्यप्रकारः।बाला मूलं चू
र्णयित्वा रक्त रेतः समन्वितं द
द्यात् पानेन प्रमदा क्षिप्रमेव
वशं नयेत्॥पुत्र दार यत्नं न्य
का दासीवत् भवति न संशयः
वा नीयते तत्र पश्चात् भ्रमति
विह्वला॥ ॥अन्यप्रकारः।व
ल्मीकमृत्तिकायाः प्रतिकृतिं
कृत्वा क्षीरेण स्वात्मीयेन वात्य
ज तस्य लवणाहुति मेकविंश
तिवारं जुहुयात्सिराजेण वश्यो भ
वति सप्तरात्रेणाथवा।देवीञ्च
गान्धारी यक्षिणी शक्रस्यापि प
त्नीं वशमानयति॥अन्यप्रकारः
।उद्भूतः पत्र मलिन आत्मनो

रुधिरान्वितं।स्त्री पुंसयोः प्रदा
नवं वशीकरणमुत्तमं॥अत्रम
न्त्रः।त्रिशूलिने त्रिनेत्राय हिलि
हिलि स्वाहा।वर्णाः २४।सप्त
जप्तेन सिद्धिः॥ ॥अन्यप्रका
रः॥कासपत्त चतुर्दश्यां मृत
भस्म तु ग्राहयेत्।स्त्रीणाञ्च म
र्द्धि दातव्यं विद्यया परिजप्तया
॥दह्यते मुह्यते नारी पच्यते मु
ष्यते ऽपि चाङ्गानि चैव भज्य
न्ते यदि तं न समाविशेत्॥अत्र
मन्त्रः।ॐ नमश्चामुण्डे श्मशान
वासिनि स्वाहा।२४।सप्तरात्रेण
प्रेक्षकः॥ ॥अन्यप्रकारः श्वेता
र्कं रोचनायुक्तं आत्मसूत्रेण पे
षयेत्।ललाटेतिलकं कृत्वा
त्रैलोक्यं लोभयेत् क्षणात्।द
ष्टमात्रेण तेनैव सर्वो भवति कि
ङ्करः॥ ॥अन्यप्रकारः।श्वेतार्कं
चन्दनेनैव रमयेत् सहलेपकेत्
।दीयते कस्य किञ्चापि पश्चा
त् दासो भविष्यति॥ ॥अथ
पति वशीकरणं।मधुकं सह
तैलेन सार्षपेण तु पेषयेत्
।एतेन पाणि मभ्यज्य भर्त्ता सा
सहिता स्वपेत्॥ संहत्ते
मैथुनीभावे पति दोषो भ

विष्पति॥ ॥अन्यच्च॥ मनःशि
ला कुङ्कुम सर्षपाश्च तथा च
कुष्ठं सह देवदारु।रक्ताञ्च रक्तं
पलितेन सार्द्धं प्रपेषयेत् सू
क्ष्मतरं महान्तं॥ प्रस्नात हस्ती
भिमुखोपि भूत्वा संस्मृत्य ल
क्ष्मीश्वरुकेण ह्रज्य।ततः प्रकु
र्यात् तिलकं नयेन वामाच्च ह
स्ताच्चतरङ्गस्त्रीभिः॥ पुंदृष्टमात्रे
ण भवेत् स कान्ता दासानिदास
श्च कि मत्र चित्रं॥ ॥अथ लिङ्ग
लेपाधिकारः।हस्तीफलम्
लानि पिप्पली मरिचानि चाभ
वा रोचनया सार्द्धं लिंगलेपो
त्तमो मतः।निःशेषस्त्री जगत्कंपे
नाम्ना स्त्रीहृदयाङ्कुशो।मोहनं
शस्त्र मेतद्धि मदनस्य स्मृतं बुधैः
॥ ॥अन्यच्च।कुष्ठञ्च धातकी पु
ष्पं मरिचानि वचा तथा।अने
न लिङ्गमालिप्य कृत्वा येन
मां वशं नयेत्॥नासाम्भिन्नहरो
पेषा मृत मप्यनुगच्छति।वि
वशा भक्तिभावेन पश्चात् स
हे प्रयच्छति॥ ॥अन्यच्च प
ञ्चरक्तानि संगृह्य स्वभानि च
यथेच्छया।सर्वाणि समभागा
नि प्रियङ्गुश्चापि तत्समं॥नागरे

दशभागेन लेपः कान्ता वशङ्करः
॥ ॥अन्यच्च।देवदारु वचाकु
ष्ठं चतुर्थं वैश्वमेषजं आम्लवी
जरसे युक्तं गौरी श्यामा वशङ्क
रं॥ ॥अन्यच्च हरिद्रा हस्तीमूलं
भद्रमुस्तं तथैव च।विडङ्ग
कुस्तं वेरम्बं समभागानि कार
येत्॥लिङ्गलेपोत्तमो ह्येष रक्तव
ली वशङ्करः॥ ॥अन्यच्च।हरि
द्रा पिप्पलीमूलं पयी मधुक
मेव च।एतानि समभागानि नव
नीतेन पेषयेत्।लिंगलेपोत्तमो
ह्येष गौरीप्रीताय शाङ्करः॥ ॥
कौशिकशोणितं लेपात् से
चनाद्वा दृष्टं भवेत्।तद्दशाले
जस्तं स्म मयः कीलकं भवेत्॥
कौशिकं रुधिरं गृह्य गोमूत्रेण
च पेषयेत्।वीर्य्यं हि स्तम्भयेन्नि
त्यं प्रहरार्द्धं न संशयः॥ ॥सर्व
साधारणोमन्त्रः।ॐ ऐं ह्रीं ह्रीं श्रीं
फट् स्वाहा।अनेन मन्त्रेण सर्वा
योगानभिमन्त्र्य सिद्धिः।इति श्री
पार्वती पुत्र श्री नित्यनाथवि
रचिते सिद्धखण्डे
तन्त्रसारे कौतूहलविद्या
नामइन्द्रजालतन्त्रं॥ ॥
पुस्तकत्रय मेलेन्च यथासा

ध्यं शोधित मेतत्॥ ॥अपि
च।ईश्वर उवाच।इन्द्रजालं वि
नारत्तां न करोतीति निश्चितं।
रक्षा मन्त्रं महामन्त्रं सर्वसिद्धि
प्रदायकं॥ॐ नमो नारायणाय
विश्वंभराय इन्द्रजालकौतुका
नि दर्शय दर्शय सिद्धिं कुरु कुरु स्वा
हा॥अष्टोत्तरशतजपेन सिद्धिः॥
अथ रक्षामन्त्रः।ॐ परब्रह्म परमा
ने मम शरीरे पाहि पाहि कुरु
कुरु॥उलूकस्य कपालेन च
तेनाहतकज्जलं।तेन नेत्राञ्ज
नं कृत्वा रात्रौ पठति पुस्तकं
॥१॥अंकोलबीज निक्षिप्य
गुरुवारे मुखे गते।मन्त्रेण
सिञ्चयेन्नित्यं यावद्बीजफलं
द्रवे॥त्रिलोह वेष्टितं कृत्वा
एकबीजं मुखे स्थितं।मन्त्रमा
नङ्ग वीर्य्यस्य वायुनस्त्यपरा
क्रमः।दशहेम द्विषट्ताम्रं
षोडशं रूप्यभागकं।एवं संख्या
त्रिलोही च ज्ञातव्या सर्वकर्म्म
णि॥२॥यानि कानि च बी
जानि जङ्गमं स्थल मेव च।
अङ्कोलबीजनिक्षिप्ते मुखे
भूमितले ध्रुवं॥तद्बीजं म
खमध्यस्थं त्रिलोहे वेष्टि

तं कुरु।तद्रूपो हि भवेन्मर्त्यो
नान्यथा शङ्करोदितं॥३॥यानि
कानि च बीजानि अङ्कोलतै
ल मेलयेत्।सफलो जायते
वृक्षः सिद्धियोगमुदाहृतं॥४॥
शवस्रते विन्दुमात्रं तैलं निः
क्षिपेद्यदि।एकयामे भवेत् जी
वो नान्यथा शङ्करोदितं॥५॥
शिशुबीजस्थितं तैलं पाराव
तपुरीयकं।वराहस्य वसायुक्तं
हरितालं मनःशिला।एभि
स्तु तिलकं कृत्वा यथा लङ्के
श्वरो नृपः॥६॥उलूविष्ठा गृही
त्वा तु पैरण्डतैल पेषयेत्।यस्या
ङ्गे निक्षिपेत् विन्दुं सप्तितो जा
यते ध्रुवं॥७॥सर्पदन्तं गृहीत्वा
तु कुसुम्भिक काण्डकं।कृक
ला रक्तसंयुक्तं सूक्ष्मचूर्णन्तु
कारयेत्॥यस्याङ्गे निक्षिपेच्चू
र्णं सद्यो याति यमालयं॥८॥
सिंदूरं गन्धकं तालं समं पिष्ट्वा
मनःशिला।तल्लिप्तवस्त्रं शिर
सि अग्निवत् दृश्यते ध्रुवं॥९॥
अर्कक्षीरं वटक्षीरं
क्षीरं डुम्बरसम्भवं। गृही
त्वा पात्रके लिप्ते जलपूर्णं
करोति च।दुग्धं सं जायते

तत्र महाकौतुक कौतुकं॥१०॥
अङ्कोलतैललिप्ताङ्गो दृश्यते रा
क्षसाकृतिः।पलायन्ते नराःस
र्वे पशुपक्षि गजा हयाः॥अङ्को
लस्य तु तैलेन दीपं प्रज्वालये
च्चरः।रात्रौ पश्यति भूतानि खे
चराणि महीतले॥१२॥बुधे वा
शनि वारेवा कृकलां तत्र नि
क्षिपेत्॥निखनेद्भूमिमध्येषु
उद्धृते च पुनः सखी।नपुंसकं
भवेत् सत्यं नान्यथाशङ्करोदि
तं॥१३॥गन्धकं हरितालञ्च
गोमूत्रं च विषंतथा।सूक्ष्मं चू
र्णमयं कृत्वा किञ्चिद्दाङ्कि
विनिक्षिपेत्॥विघ्नाः सर्वे प
लायन्ते यथा युद्धेषु कातराः॥
इति दत्तात्रेयतन्त्रे ईश्वरदत्तात्रे
यसंवादे इन्द्रजालकौतुकद
र्शनं नाम एकादशःपटलः॥
॥ ॥ ॥
अन्यच्च।वश्याकर्षणकर्म्मा
णि वसन्ते योजयेत् प्रिये।ग्री
ष्मे विद्वेषणं कुर्यात् प्रावृषि
स्तम्भनं तथा॥शिशिरे मारणं
ञ्चैव शान्तिकं शरदि स्मृतं॥
हेमन्ते पौर्णमास्याञ्च कृत
कर्मणि शारदः।वसन्ते चैव पू
र्वाह्णे ग्रीष्मे वाह्ने समुच्यते।वर्षा
नैयापराह्णे तु प्रदोषे शिशिरः स्मृ
तः।अर्द्धरात्रे च हेमन्तः शरदं त
त्परं स्मृतं॥ ॥अथ पक्षादिनि
र्णयः।कृष्णपक्षे मारणादि शुक्ल
पक्षे च वर्द्धनं॥द्वादश्यां मारणं
कर्म्म एकादश्यां तथैव चाष्टमी
यां नवम्यां चैव वश्याकर्षणं का
रयेत्।स्तम्भनञ्च चतुर्दश्यां च
तुर्थ्यां प्रतिपद्यपि॥द्वितीयां षष्ठी
सप्तम्यां कारयेत् शान्तिकर्म्म च
।अश्विनी मृग मूलाच पुष्या पु
नर्वसु स्तथा॥वश्याकर्षणं क
र्म्मं कारयेच्च सदा बुधः।ज्ये
ष्ठा च उत्तराषाढा चानुराधा च
रोहिणी॥कारयेन्मारणं शान्तिं
स्तम्भनं विजयं तथा।विधि म
न्त्र सदा युक्त मोषधं सफलं
भवेत्॥ ॥अथ वशीकरणं।
सिन्दूर माक्षिक कपोत मला
नि पिष्ट्वा लिङ्गं विलिप्य रमते
तरुणी नवोढा।शान्तिं नया
ति पुरुषं मनसापि नूनं दासी
भवेदिति मनोहर दिव्यमूर्तिः
॥पुष्ये रुद्रजटामूलं मुखस्थ
कारयेद्बुधः।ताम्बूलादौ प्र
दातव्य वश्या भवति

निश्चितं॥तथैव पाटलीमूलं ता
मूलेन तु वश्यकृत्।नागपुष्पं
प्रियङ्गुञ्च तगरं पद्मकेशरं॥
जटामांसी समं नीत्वा चूर्णये
त् मन्त्रवित्तमः।स्वाङ्गं धूपयते
तेन भजते कामवत् स्त्रियः॥
ॐमूली मूली महामूली सर्वे सं
क्षोभ भयेत्य उपद्रवेभ्यः स्वाहा
।धूपमंत्रः॥पानीयस्याञ्जली
न् सप्त दत्वा विद्या मिमां जपेत्
।सालङ्कारां नवकन्यां लभते
मासमात्रतः॥ॐ विश्वावसुर्ना
म गन्धर्वाः कन्याना मधिपतिः
स्वरूपां सालङ्कारां देहि मे नम
स्तस्मै विश्वावसवे स्वाहा॥क
न्यागृहे शालकाष्ठं क्षिपेदेका
दशाङ्गुलं।कदली च ददेफल्गु
नां यस्तां कन्यां प्रयच्छति॥ ॥
अथ सर्वजनवशीकरणं।शि
ला गोरोचना मूलं वारिणा तिल
के कृते।दृष्टमात्रे वशं याति
नारी वा पुरुषो पिवा॥स्वर्णेन
वेष्टनं कृत्वा तेनैव तिलके कृ
ते।सम्भाषणेन सर्वेषां त्रैलो
क्यवशमानयेत्॥ॐह्रीं क्लीं
ऐं ह्रौं भोगप्रदा भैरवी मान
ह्रीं त्रैलोक्यं वशमानय स्वा
हा।औषधोपरि सहस्रजपं कु
र्य्यात्।पुनः सप्तवारजपेन ति
लकं कारयेत् शत्रुसमीप वा
श्यो भवति।इति कालनाथवि
रचिते इन्द्रजाले १ अध्यायः॥ ॥
अथाकर्षणं।ॐह्रीं चामुण्डे ज्व
ल ज्वल प्रज्वल प्रज्वल स्वाहा।
अनेन मन्त्रेण स्त्रियं दृष्ट्वा जपं
कुर्य्यात् तत्क्षणात् दृष्टतः स
मागच्छति।एवं मेवा युतजपे
न सिद्धिः॥अश्लेषायां समादाय
अर्जुनस्य च दृभकं।अजमूत्रे
ण संपिष्य स्त्रीणां शिरसि दाप
येत्॥पुरुषस्य पश्मूत्रं वा क्षिपे
दाकर्षणं भवेत्॥ ॥अथ जयः
।गोजिह्वा शिखिमूलं वा मुखे
शिरसि संस्थिता।कुरुते सर्वेवा
देषु जयं पुष्ये समुद्धृते॥मार्ग
शीर्षे पौर्णमास्यां शिखिमूलं
समुद्धरेत्॥शिरो शिरसि वा
धार्य्य विवादे विजयी भवेत्॥
गिरिकर्णी शर्मी गुञ्जा श्वेतव
र्णा समाहरेत्।चन्दनेनान्वित
ञ्चैव तिलकेन जयी नरः॥
कणकाक वटा वह्नि विद्रुमः
पञ्चम स्तथा।तिलकं कुरुते
यस्तु पक्षेणैकं पञ्चधा रिपुः॥

आर्द्रायां वटवन्दाकं गृहीत्वा
धारयेत् करे। संग्रामे जय माप्नो
ति जयां स्मृत्वा जयी भवेत्॥
अस्य मन्त्रः। ओं नमो महाबल
पराक्रम समस्तविद्याविशार
द अमुकस्य भुजबलं बन्धय
दृष्टिं स्तम्भय स्तम्भय अङ्गा
नि धूनय धूनय पातय पातय
महीतले ह्रीं॥ ॥अथ सौभाग्य
।पुष्योद्धृतं सितार्कस्य मूलं वा
मेतरे भुजे। बद्धा सौभाग्य मा
प्नोति दुर्भगापि नसंशयः॥२
कृचिताकं मूलन्तु सोमग्रस्ते
समुद्धृतं। होढ्रैः पिष्ट्वा वटी कु
र्यात् तिलकं सुभमङ्गलं॥
॥अथ ईश्वरादिक्रोधोपशम
नं। ओं शान्ते प्रशान्ते सर्वक्रोधो
पशमनि स्वाहा। अनेन मन्त्रेण
त्रिः सप्तधा जपेन मुखं माजे
येत्। ततः क्रोधोपशमनं भव
ति॥ ॥गजनिवारणं। श्वेताप
राजितामूलं हस्तस्थं वारये
त् गजं। मूलं विशल्या वक्त्रस्थं
गजबधकरं भवेत्॥ ॥व्याघ्र
निवारणं। मुखस्थं हहतीमूलं
हस्तस्थं व्याघ्रभीतिजित्। ह्रीं
ह्रीं क्रीं श्रीं श्रो श्रो स्वाहा ॥

इत्यष्टोत्तरमन्त्रेण लोष्टं पठित्वा
क्षिपेत्। तदा मुखं न चालयति
गन्तु मशक्यः॥ मूलं कृष्णचत्
द्रश्यां ग्राहयेत्नाड्लीभवं। हस्त
स्थं व्याघ्रभीतादिभयहृत् परि
कीर्तितं॥ इतीन्द्रजालतन्त्रे व उ
पदेशः॥ ॥अथ स्तंभनं। श्वेत
गुञ्जोन्मितं मूलं मुखस्थं हृष्ट
एडजित्। ओं ह्रीं रक्त रक्त चामुण्डे
तुरु तुरु अमुकं मे वश मानय
वश मानय स्वाहा। अयं चण्डा
मन्त्रः। उक्तयोगसिद्धिः॥ पुष्यो
कें मधुवन्दाकं गृहीत्वा प्रक्षि
पे द्रुयः। सभामध्ये च सर्वेषां मु
खस्तम्भः प्रजायते॥ ॥मेघस्तम्भ
नं। इष्टकाद्वयसंपुटमध्ये मेघसं
ल्लेक चतुरस्रं विलिख्य उद्या
ने स्थापयेत्तदा मेघान् स्तम्भय
स्तम्भय॥ ॥नौकास्तंभनं। नराणां
क्षीरकाष्ठस्य कीलं पञ्चाङ्गुलं
क्षिपेत्। नौकामध्ये तदा नौका
स्तम्भनं जायते ध्रुवं॥ ॥नि
द्रास्तम्भनं। मूलं बृहत्या मधुकं
पिष्ट्वा नस्यं समाचरेत्। निद्रास्त
म्भनमेतद्धि मूलदेवेन
भाषितं ॥ ॥
शस्त्रस्तंभनं। कपि

पित्थस्य च वन्दाकं कृत्तिकायां
समाहरेत्। वक्त्रसंस्थन्तु देवस
शस्त्रस्तंभनकं परं॥ करे स्वदशी
नामूलं वन्धनात् स्तंभनं तथा
।ओं अहो कुम्भकर्ण महाराक्ष
स निकषागर्भसंभूत परसैन्यस्तम्भ
न महाभय रणरुद्र आज्ञापय
स्वाहा। अष्टोत्तरसहस्रजपात् सि
द्धिः॥ गृहीत्वा शुभनक्षत्रे अपा
मार्गस्य मूलकं। लेपमात्रे शरी
राणां शस्त्रशस्त्रनिवारणं॥ पु
ष्यार्के श्वेतगुञ्जाया मूलमुद्धृ
त्य धारयेत्। हस्ते खाण्डभयं
नास्ति संग्रामे च कदाचन॥ ॥
हि गोमेष्यादिस्तम्भनं। उष्ट्रस्या
स्थि चतुर्दिक्षु निखनेत् भूत
ले ध्रुवं। गो मेषी महिषी वाजी
स्तम्भयेत् करिणी मपि॥ ॥
बुद्धिस्तम्भनं। भृङ्गराज मपामा
र्गं सिद्धार्थं सहदेविकां। उलू
वचाञ्च श्वेतार्कं ध्रुव मेषां स
माहरेत्॥ लोहपात्रे विनिक्षि
प्य दिनान्ते समुद्धरेत्। ति
लकैः सर्वभूतानां बुद्धिस्तम्भ
करं परं॥ ओं नमो भगवते वि
श्वामित्राय नमः सर्वमुखीभ्यां
विश्वामित्र आगच्छ आगच्छ स्वाहा

।उक्तयोगस्यायं मन्त्रः॥ ॥चौ
रगतिस्तम्भनं। ओं ब्रह्मवेशिनि
शिवे रक्त रक्त स्वाहा। अनेन म
न्त्रेण सप्तपाशान् गृहीत्वा स्त्री
णि कट्यां बद्धा अपरान् मुष्टिभ्यां
धारयेत्। इति चौराणां गतिस्त
म्भनं। ग्राह्य कृष्णचतुर्दश्यां धुस्तू
रस्य तु मूलकं। कट्यां बद्धा रमे
त् कान्तां न गर्भं पातयेत् क्व
चित्॥ मुक्तेन लभते गर्भं पुरा
नागार्जुनोदितं। तन्मूलचूर्णं
योनिस्थं न गर्भं सम्भवेत् क्वचि
त्॥ सिद्धार्थमूलं शिरसि बद्धा
कान्तां रमेत्तु यां। न गर्भं धारये
त् सा स्त्री मुक्तेन लभते पुनः
॥ ॥शुक्रस्तम्भनं। नीलीमूलं
श्मशानस्थं कट्यां बद्धा तु वी
र्यधारकं। रक्तापामार्गमूलन्तु
सोमवारे निमन्त्रयेत्॥ भौमे
प्रातः समुद्धृत्य कट्यां ब
द्धा तु वीर्यधारकं॥ इति काम
रत्ने ३ उपदेशः॥ ॥
मोहनं। शृङ्गं वचा नलद
सर्जरसं समानं कृत्वा त्रुटिं
मलयजञ्च घटैकमिश्रं।
यो धूपयेन्निजगृहं वसनं शरी
रं तस्यापि दास इव मोह

मुपैति लोकः॥भृङ्गराजः के
शराजो लज्जा च सहदेविका॥ए
भिस्तु तिलकं कृत्वा त्रैलोक्यंमो
हयेन्नरः॥ॐ ग्रं ग्रां ईं ईं उं ऊं
क्रं क्रूं ह्रूं फट्॥अनेनैव तु
मन्त्रेण कृत्वा ताम्बूल भावनं।
साम्प्रस्य मुखे निक्षिप्ते मोह
मायाति तत्क्षणात्॥ॐ भी
ह्रीं भ्रों मोहय॥इमं मन्त्रं वारत्र
यं जपेत्॥मोह माप्नोति मान
वः॥ ॥देहरञ्जनं॥कदम्बपत्रं
लोध्रञ्च अर्जुनस्य च पुष्पकं।
पिष्ट्वा गात्रोद्वर्तनाच्च कायदु
र्गन्धनाशनं॥एला शटी पत्र
क चन्दनानि तोयानया शिग्रु
घनाम्भयानि॥ससीरतोयं खररा
जयोगः स्नानः सुगन्धो नरस्य
न्नयोगः॥ ॥सुखरञ्जनं॥रक्ता
ल जम्बूफल गर्भसारः सकर्कटो
मात्तिकसंयुतस्य॥स्थितो मुखा
न्ते पुरुषस्य रात्रौ करोति पुंसां सु
खवासमिष्टं॥चूर्णं मुरा केशर
कुष्ठकानां प्रातर्दिनान्ते परि
लेढि यास्त्री॥अप्यर्द्धमासेन सु
खस्य वासः कर्पूरतुल्यो भव
ति प्रकाशं॥ ॥केशकृष्णीकरणं
दिलोहकिट्टं जवापुष्पं पिष्ट्वा

धात्रीफलं समं॥त्रिदिनं लेपये
त् शीर्षे त्रिमासं केशरञ्जनं॥इ
ति कृष्णीकरणं॥ ॥केशशुक्ली
करणं॥वज्रीक्षीरेण सप्ताहं
अश्वहं भावयेत्तिलं॥तत्तैलालि
प्ताः केशास्तु शुक्लाश्च नात्र सं
शयः॥इति कामरत्ने ४ उपदेशः
॥ ॥अथ वाजीकरणं॥अश्व
न्यां वटवन्दाकं क्षीरैः पिष्ट्वा म
हाबलः॥पुष्याहेन पिबेन्मूलं
श्वेतार्कस्य प्रयत्नतः॥सप्तरात्र
न्तु गोक्षीरे वृद्धोपि तरुणायते॥
चूर्णं विदार्याः स्वरसेन तस्या वि
भावितं भास्कररश्मिजालेन म
ध्वाज्य संमिश्रितमेव लीढ्वा द
शस्त्रियो गच्छति निर्विशङ्कः॥
जन्मवन्ध्याचिकित्सा॥समूलपत्रं
सर्पाक्षीं रविवारे समुद्धरेत्॥ए
कवर्णगवां क्षीरैः कन्याहस्ते
न पेषयेत्॥ऋतुकाले पिबेत्
वन्ध्या पलार्द्धं तद्दिने दिने॥क्षी
र शाल्यन्नं मुद्गञ्च लघ्वाहारं
प्रदापयेत्॥एवं सप्तदिनं कु
र्यात् वन्ध्याभवति गर्भिणी॥उ
द्वेगं भयं शोकञ्च दिवानिद्रां
विवर्जयेत्॥न कर्म कारयेत्
किञ्चित् वर्जयेत् भारवाहनं।

पतिसङ्गं चरेत्सा च नात्र का
र्या विचारणा॥कृष्णापराजिता
मूलं छागीक्षीरेण संपिबेत्॥ऋ
तुकाले समायाते भुक्त्वा गर्भं ध
रा भवेत्॥गोक्षुरस्य तु बीजन्तु
पिबेन्निर्गुण्डिकारसैः॥त्रिरात्रं स
प्तरात्रं वा वन्ध्या भवति गर्भिणी
इतीन्द्रजाले जन्मवन्ध्याचिकित्सा
॥ ॥अथ काकवन्ध्या चिकित्
सा॥अश्वगन्धीय मूलन्तु ग्राह
येत् पुष्यभास्करे॥पेषयेन्माहिषी
क्षीरैः पलार्द्धं भक्षयेत् सदा॥
सप्ताहाल्लभते गर्भं काकवन्ध्या
चिरायुषं॥इतीन्द्रजाले काक
वन्ध्याचिकित्सा॥ ॥अथ मृत
वत्सा चिकित्सा॥आरुष्करः क
तिका ऋतौ वन्ध्याककोटकी ह
रेतानत् कन्दं पेषयेत्तोयैः कर्ष
मात्रं सदा पिबेत्॥या बीजपूरं
द्रवमूलमेकं क्षीरेण पक्वं प्रपि
बेत् विमिश्रं। ऋतौ निजं
या तु पतिं प्रयाति दीर्घायु
षं सा तनयं प्रसूते॥ सौन्द
धो मधुकं कुष्ठं त्रिफला श
र्करा वला।मेदा पयस्या काको
ली मूलञ्चैवाश्वगन्धजं॥अजमोदा
हरिद्रे द्वे हिङ्गुः कटुकरो

हिणी॥उत्पलं कुमुदं द्राक्षा काको
ल्यौ चन्दनद्वयं॥एतेषां कर्षके
भागे घृतप्रस्थं विभावयेत्॥शता
वरी रसं क्षीरं घृतस्यैदं चतुर्गुणं
॥संपिबेन्नियतं नारी नित्यं स्त्रीषु
च शस्यते॥पुत्रान् जनयते नारी
मेधाढ्यान् प्रियदर्शनान्॥या
चैवास्थिरगर्भा स्यात् या नारी
जनयेत् मृतं॥अल्पायुषञ्च जन
येत् या च कन्याः प्रसूयते॥योनि
दोषे रजोदोषे गर्भस्रावे च शस्य
ते। प्रजावर्द्धनमायुष्यं सर्वग्रह
निवारणं॥नाम्ना फलघृतं ह्येत
दायुष्यं परिकीर्तितं॥नोक्तञ्च
लक्ष्मणामूलं वदन्त्यत्र चिकित्
सकाः॥जीववत्सा एकवर्णा
घृत मत्र तु दीयते॥अरण्यगोम
येनात्र वह्नेर्ज्वाला प्रदीयते॥अ
त्र पयस्या क्षीरशुक्लभूमिकुष्मा
ण्डं।उत्पलं नीलं। इतीन्द्रजा
ले मृतवत्साचिकित्सा॥ ॥
अथ गर्भस्रावचिकित्सा ।
प्रथमे मासि।गोक्षीरैः पेष
येत्तुल्यं पद्मकेसर चन्दनं।
पतने तं पिबेन्नारी महागर्भः
स्थिरो भवेत् ॥ अथ वा
मधुकं दारु शाल्मलस्य बीज

कं।संपिष्य क्षीरकाकोली पिबे
त् क्षीरैश्च गोर्भवेः॥१॥नीलोत्
पलं मृणालञ्च षष्टी कर्कटशृ
ङ्गिका।गोक्षीरैश्च द्वितीये च पी
त्वा शाम्यति वेदना॥२॥श्रीखण्ड
तगरं कुष्ठं मृणालं पद्मकेशरं।
पिवेत् शीतोदकैः पिष्ट्वा तृतीये
वेदना वती॥अथवा क्षीरका
कोली वत्सानन्ता पयः पिवेत्।
३।शीतोत्पलं मृणालानि गो
क्षीरकशेरुकं।तृतीयमासे गवां
क्षीरं पिवेत् सो वेदनापरा॥अथ
वा मधुकं रास्ना श्यामा ब्राह्मण
यष्टिका।अनन्ता पेषयित्वा तु
गवांक्षीरैः समं पिवेत्॥४॥पुन
र्णवा च काकोली तगरं नील
मुत्पलं।गोक्षीरं पञ्चमे मासि
गर्भक्लेशहरं भवेत्॥अथ वा बृ
हतीयुग्मं यष्ट्याङ्गं कट्फलं
त्वचः।गोघृतं क्षीरसंयुक्तं पिवे
त् पिष्ट्वा च पञ्चमे॥५॥सिता
काशाखुमज्जा च शीततोयेन
पेषयेत्।षष्ठे मासि गवां क्षी
रैः पिवेत् क्लेशं निवर्त्तयेत्॥
अथवा गोक्षुरं शिग्रु मधुकं
पृश्नि पर्णिका॥वत्सायु
क्तां पिवेत् पि
ष्ट्वा गोदुग्धैः षष्टमासके॥६॥
काश्मर्यं पौष्करं मूलं शृङ्गाटं
नील मुत्पलं।पिष्ट्वा च सप्तमे
मासि क्षीरैः पीत्वा प्रशाम्यति॥
अथवा मकरन्द्राक्षां शृङ्गाटञ्च
सकेशरं।मृणालं शर्करायुक्तं
क्षीरैः पेषन्तु सप्तमे॥७॥षष्टी प
द्माक्षं मुस्तं केशरं गजपिप्प
ली।नीलोत्पलं गवां क्षीरैः पि
वेदष्टममासके॥अथवा विल्वमू
लञ्च कपित्थं बृहती शमीरस
पाटलयो र्मूलं एभिः क्षीरं प्रसा
धयेत्॥तत्क्षीरं मष्टमे पीत्वा ग
र्भेशाम्यति वेदना॥८॥विशालावी
जं कक्कोलं मधुना सह लेपये
त्।वेदना नवमे मासि शान्ति
माप्नोति नान्यथा॥अथवा मधु
कं श्यामा ह्यनन्ता क्षीरकाक
ली।एभिः सिद्धं पिवेत् क्षीरं
नवमे वेदनावती॥९॥शर्करा
गोस्तनी द्राक्षा सच्छद्रं नील मु
त्पलं।पाययेत् दशमे मासि ग
वां क्षीरैः प्रशान्तये॥अथ वा
मुद्गसंसिद्धं गोक्षीरं दशमे पिवे
त्।अथवा मधुकं दारु मुद्गं।
क्षीरेण संपिवेत्॥१०॥सौद्रं
दर्पं चन्दन सिन्धुजातं मरेन्द्र

राजं पयसा स्वपिष्टं।गर्भे क्षर
न्तं प्रतिहन्ति शीघ्रं योगो वि
भुञ्जन् किल मूलदेवैः॥इति
इन्द्रजाले गर्भस्रावचिकित्सा
॥ ॥अथ गर्भस्तम्भ।गोक्षीरं
शर्करायुक्तं गर्भस्तम्भ प्रशान्त
ये।पिवेद्वा मधुकं चूर्णं गाम्भा
री फल चूर्णकं॥समासे गवाण्ड
येन गर्भिणी च प्रशान्तये॥ ॥
अथ सुखप्रसवयोगः।श्वेतं
पुनर्णवा मूलं चूर्णं योनौ प्रवे
शयेत्।तत्क्षणात् प्रसवते ना
री गर्भे सति प्रपीड्यते॥वास
कस्य तु मूलन्तु चान्तरस्थं समु
द्धरेत्।कट्यां बद्ध्वा सप्तसूत्रैः सु
खं नारी प्रसूयते॥सहदेव्याश्च
मूलं वा कटिस्थं प्रसवेत् सुखं
।अपामार्गस्य मूलन्तु ग्राहयेच्च
तरक्षुत्वं।द्वारि प्रवेशयेत् यो
नौ तत्क्षणात् सा प्रसूयते॥ ॥
अथ स्तनवर्द्धनं स्तनोत्थापन
ञ्च।तैलं वचा दाडिमकल्कसि
द्धं सिद्धार्थजं लेपनयो नितान्
तं।नारी कुचौ चारुतरौ स्वपी
नौ कुर्य्यात् दृढौ योगवरः प्रदि
ष्टः॥श्रीपर्णिकाया रसक
ल्कसिद्धं तिलोद्भवं तै
लवरं प्रदिष्टं।तूलेन वक्षोजयुगे
प्रदेयं प्रयाति वृद्धिं पतितोपि
नार्य्याः॥अथ ऋतुसमकाले न
स्य योगेन पीतं सनियम मम रा
स्य तण्डुलाम्भो युवत्याः।कुचयु
गल स्वपीनं क्वापि नो याति पा
तं कथित इति पुरैव चक्रदत्तेन
योगः॥अथ योनिसंस्कारः।प्रक्षा
लयेन्निम्बु कषाय नीरैः स्विन्ना
ज्य कुष्ठागुरु गुग्गुलूनां।धूपेन
योनिं निशि धूपयित्वा नारी प्रमो
दं विदधाति भर्तुः॥ ॥अथ लोम
शातनं।पलाश भस्मान्वित ताल
चूर्णैः रम्भाम्बुमिश्रैः परिलिप्य भू
यः।कन्दर्पगेहे मृगलोचनानां
रोमाणि रोहन्ति कदापि नैव॥
इति इन्द्रजालतन्त्रसंग्रहः॥

इन्द्रयवः पुं क्ली स्वनामख्यातति
क्तबीजविशेषः।कुडचिरविचि इ
ति भाषा।तन्नामगुणाः।उक्तं
कुटजबीजन्तु यव मिन्द्रयवं त
था।कलिङ्गञ्चापि कालिङ्गं त
था भद्रयवं स्मृतं॥इति क्लीबे
अमरः प्राह। क्वचिदिन्द्रस्य
नामैव भवेत्तदभिधायकं।
फला नीन्द्रयवा स्तस्य तथा

भद्रयवाअपि॥ इति धन्वन्तरिः॥ प्रा
हा। ऐन्द्रं यवं त्रिदोषघ्नं संग्राहि क
टु शीतलं। ज्वरातीसार रक्तार्शः
कृमि वीसर्प जाष्टतुत्॥ दीपनं गु
दकीलास्रवानास्र श्लेष्मशूल
जित्। इति भावप्रकाशः॥

इन्द्रलुप्तं क्ली केशरोगविशेषः।
टाक इति भाषा। अथेन्द्रलुप्तस्य
चिकित्सा। तिक्तपटोलीपत्रस्वर
से घृष्टा शम याति। चिरकालजा
पि रुज्या नियतं दिवसत्रयेण वा।
गोक्षुर तिलपुष्पाणि तुल्यान्य
मधुसर्पिषः। शिरः प्रलेपितं तेन
केशैः समुपचीयते॥ हस्तिदन्त
मषीं कृत्वा छागीदुग्ध रसाञ्जनं
नैः। लोमान्यनेन जायन्ते लेपा
त् पाणितलेष्वपि॥ यष्टीन्दीवर
मृद्वीका तैलाज्य क्षीरलेपनैः। इ
न्द्रलुप्तं शमं याति केशाः स्युश्च
घना दृढाः॥ जाती करञ्ज कर
ण करवीराग्निपाचितं॥ तैलम
भ्यञ्जनाद्धन्ति इन्द्रलुप्तं न संश
यः॥ स्नुहीपयः पयो
ऽर्कस्य लाङ्गली
मार्कवो विषं॥ ॥
अजामूत्रं स

गोमूत्रं रतिका सेन्द्रवारुणी॥
सिद्धार्थक लीनगन्धा सम्योगि
विपाचितं। तैलं भवति नियमात्
खालित्यव्याधिनाशनं॥ स्नुही
दुग्धादि तैलं। इति भावप्रकाशः
॥ ॥

इन्द्रवारुणी स्त्री लताविशेषः।
राखालससा इति भाषा। तत्
पर्यायः। चित्रफला ३७। इति
जटाधरः॥ अपिच। ऐन्द्रीन्द्रवा
रुणी चित्रा गवाक्षी च गवा
दनी। वारुणी च परापुष्पा सा।
विशाला महाफला॥ श्वेतपुष्पा
मृगाक्षी च मृगैर्वारु मृगादनी।
गवादनीद्वयं तिक्तं पाके कटु
सरं लघु॥ वीर्य्योष्णं कामला
पित्त कफ प्लीहोदरापहं। श्वास
कासापहं कुष्ठ गुल्म ग्रन्थि व्र
णप्रणुत्॥ प्रमेह मूढगर्भाम ग
ण्डामय विषापहं। इति भाव
प्रकाशः॥

इन्द्रवृद्धा स्त्री व्रणरोगविशेषः।
तस्याश्चिकित्सा॥ विद्धत्ता मूत्र
वृद्धाञ्च गर्दभी जालगर्दभं। पै
त्तिकस्य विसर्पस्य क्रियया सा
धयेत् भिषक्॥ पाके तु शोष
येदान्ये पक्वे मधुरभे

षज्रैः। इति भावप्रकाशः॥

इन्द्रसुरिसः पुं वृक्षविशेषः। नि
सिन्धा इति भाषा। तत् पर्यायः।
। विसन्धकः ८ सिन्धकं ९ सुरसं
१० सिन्धुवारितः ११ इन्द्रालिका
१२ सिन्धुवारकः १३। इति श
ब्दरत्नावली॥

इन्द्राणी स्त्री दुर्गा। यथा। ऐश्व
र्ये परमं यस्या वशे चैव सुरा
सुराः। इदि परमैश्वर्ये च इन्द्रा
णी तेन सा शिवा॥ इति देवी
पुराणे ४५ अध्यायः॥ ॥

इन्द्रपत्नी। तत् पर्यायः। शत
क्रताई ५। इति जटाधरः॥ माहे
न्द्री ६ जयवाहिनी ७ ऐन्द्री ८ श
तावरी ९। इति शब्दरत्नावली॥

इन्ध ई ङ थ नि द्युतौ। इन्स्वा
दिः। ईन्धि इन्धो ऽग्निः। ङ थ
इन्धे। इति दुर्गादासः॥

इन्धनं क्ली अग्निसन्दीपनका
ष्ठादि। ज्वालानीकाठ इति भा
षा। तत् पर्यायः। समिन्धनं २।
इति शब्दरत्नावली॥

इतस्ततः व्य अत्र तत्र।
एखाने सेखाने इति भाषा।
यथा। द्वे सहस्रे रथानां स ग
ताना मधुनं रणे। इतस्ततो

धावमानः स्वरथो रथिनां वरः
॥ इति जैमिनिभारते आश्वमेधि
के पर्वणि २० अध्यायः॥ अपि
च। ताडिता स्तेन वीरेण फणी
न्द्रा स्त्रासमागताः। इतस्तत
स्ते नन्मक्ता गताः पातालमु
ज्ज्वाः॥ इति पाद्मे पातालख
ण्डे ४४ अध्यायः॥ अयं शब्दः
इनयानोः परे लोप्यः॥

इरम्मदः पुं वज्राग्निः। तत्पर्य्या
यः। मेघाग्निः २। इति जटाधरः
॥ ॥

इरा स्त्री कश्यपपत्नीविशेषः।
यथा। धर्म्मपत्न्यः समाख्याताः
कश्यपस्य वदाम्यहं। अदितिर्दि
तिर्दनुः काला अनायुः सिंहि
का मुनिः॥ कद्रुः प्राधा इरा
क्रोधा विनता सुरभिः खशा।
तस्याः सृष्टिर्यथा। इरा वृक्ष ल
ता वल्ली तृणजातिश्च सर्वशः।
खशाश्च यक्ष रक्षांसि मुनि रप्स
रस स्तथा॥ इति गारुडे ६
अध्यायः॥

इरिवेल्लिका स्त्री मस्तकोद्भव
क्षुद्ररोगविशेषः। तल्लक्षणं सु
बेल्लिक्तितं। चिकित्सा यथा। पै
त्तिकस्य विसर्पस्य या चिकित्सा

प्रकीर्त्तिता।तथैव मिषगेताश्च
चिकित्सेदिति वै हितकां ॥इति
भावप्रकाशः॥
इल श शये॥क्षेपे॥गतौ श
इलति।शयः शयनं।इति दु
र्गादासः॥
इल क क्षेपे।कृस्वादिः।क
एलयति।इति दुर्गादासः
॥ ॥
इल्लिशः पुं मत्स्यविशेषः।तत्
पर्य्यायः।इल्लीशः २ राजश
फरः ३ इल्लीशः ४ जलतापी
५।इति शब्दरत्नावली॥अस्य
गुणाः।इल्लिशो मधुरः स्निग्धो
रोचनो वह्निवर्द्धनः।पित्तकृत्
कफकृत् किञ्चित् लघु र्वृष्यो
ऽनिलापहः॥इति भावप्रका
शः॥
इव इ व्याप्ति प्रीणनयोः।कृ
स्वादिः।इ इन्वते।दन्त्यवकार
परत्वान्नानुस्वारः।प्रीणनं के
चिन्न मन्यते।इति दुर्गादा
सः॥
इष ग आभीक्ष्ण्ये।आभीक्ष्ण्यं
पौनःपुन्येन करणं।ग इष्णाति
पण्डितः।पुनः पुनः क
रोतीत्यर्थः।इति दुर्गादासः॥

इष उ श वाञ्छे।उ एषित्वा
इष्ट्वा।वेम सह त्वमेत्यादि सू
त्रेणैव इष्टसिद्धे एष्यस्येदनुबन्ध
त्वात् सूत्रे इषगाभीक्ष्ण्ये इष्यस
र्पणे इत्यनयो रप्राप्तये विशे
षणार्थः।न च पिवादि ग्रहणा
वत्तत्र इच्छ इति ग्रहणेनैवेष्ट
सिद्धिरिति वाच्य लाघवाभावे
प्राचीनमतस्यैव न्याय्यत्वात्।
श इच्छती इच्छन्ती।अस्यैव इ
च्छादेशः।इच्छति यत्न लोकः
।इति दुर्गादासः॥
इष य सर्पणे।कृस्वादिः।य इष्य
ति।सर्पणं गतिः।इति दुर्गादा
सः॥
इष्टका } स्त्री गृहादिनिर्म्माणार्थं
इष्टिका } दग्धमृत्तिकाखण्डः।इट
इति भाषा।इति चितिव्यवहारे
लीलावती॥तद्गृहगुणाः।कू
पोदकं वटच्छाया श्यामास्त्री
इष्टकालयं।शीतकाले भवेदु
ष्णं उष्णकाले च शीतलं॥इति
चाणक्यं॥ ॥तद्रचितस्थाने
पितृकर्म्मनिषेधो यथा।शङ्ख
लिखितौ।नेष्टकारचिते पितॄन्
सन्तर्पयेत्।इति श्राद्धतत्त्वं॥ ॥
देवो हैष्यकेष्टकामय गृहदान

फलं यथा।मृन्मयात् कोटि
गुणिते फलं स्यात् दारुभिः कृते
।कोटिकोटि गुणं पुण्यफलं स्या
दिष्टकामये॥द्विपरार्द्ध गुणं पु
ण्यं शैलजे तु विदु र्बुधाः।स्फटि
कयोः समं ज्ञेयं फलमाद्य दारि
द्र्योः॥इति मत्स्यादिप्रतिष्ठा त
न्त्रं॥
इक्षुः पुं स्वनामख्याततृणं।तत्
पर्य्यायः।कोशकारः ४ इक्षुकः
५।इति शब्दरत्नावली॥पयो
धरः ६।इति जटाधरः॥ ॥अ
थेक्षुवर्गः।तत्रेक्षोर्नामभेद गुणा
श्च।इक्षुर्दीर्घच्छदः प्रोक्त स्त
था भूरिरसोपि च।गुडमूलो ऽ
सिपत्रश्च तथा मधुतृणः स्मृतः
॥इक्षवो रक्तपित्तघ्ना बल्या वृष्याः
कफप्रदाः।स्वादुपाकरसाः स्नि
ग्धा गुरवो मूत्रला हिमाः॥ ॥
अथेक्षुभेदाः।पौण्ड्रको भीरु
कश्चापि वंशकः शतपोरकः।
कान्तारस्तापसेक्षुश्च काण्डेक्षुः
सूचिपत्रकः॥नैपालो दीर्घपत्र
श्च नीलपोरो ऽथ कोशकृत्।
इत्येता जातय स्तेषां क
थयामि गुणानपि॥ ॥
॥ ॥अथ पौण्ड्रक

भीरुकयो र्गुणाः।वातपित्त प्रश
मनो मधुरो रसपाकयोः।सुशी
तो बृंहणो बल्यः पौण्ड्रको भी
रुक स्तथा॥ ॥अथ कोशकारो २ गुणाः।कोशका
गुरुः शीतो रक्त पित्त क्षयापहः॥
अथ कान्तारेक्षुगुणाः।कान्तारे
क्षु र्गुरु र्वृष्यः श्लेष्मलो बृंहणः
सरः॥ ॥अथ दीर्घपोर वंशक
यो र्गुणाः।दीर्घपोरः सुकठिनः
सक्षारो वंशकः स्मृतः॥ ॥
अथ शतपोरकगुणाः।शतपर्वा
भवेत् किञ्चित् कोशकारगुणा
न्वितः।विशेषात् किञ्चिदुष्णश्च
सक्षारः पवनापहः॥ ॥अथ म
नोगुप्तागुणाः।मनोगुप्ता वातह
री तृष्णामयविनाशिनी।सुशीता
मधुवातीव रक्तपित्तविनाशिनी
॥ ॥अथ तापसेक्षुगुणाः।ताप
सेक्षु र्भवेत् मृद्वी मधुरा श्लेष्म
कोपना।तर्पणी रुचिकृच्चापि
वृष्या च बलकारिणी॥ ॥
अथ बाल युव वृद्धेक्षु गुणाः
।बालइक्षुः कफं कुर्य्यान्मेदो
मेहकरश्च सः।युवा तु
वातहृत् स्वादु रीषत्तीक्ष्णा
श्च पित्तनुत् ॥ रक्तपित्त
हरो वृद्धः क्षतहृत् बल वीर्य्य

क्षत॥ ॥अथाङ्गभेदेन भेदः।मू
ले तु मधुरो ऽत्यर्थं मध्येऽपि म
धुरः स्मृतः।अग्रे ग्रन्थिषु च श्रे
यं इक्षुः पटुरसो जनैः॥ ॥अ
थ दन्तपीडितेक्षुरसगुणाः॥दन्त
निष्पीडितस्येक्षो रसः पित्तास्र
नाशनः।शार्करासमवीर्यस्स्या
दविदाही कफप्रदः॥ ॥अथ
यन्त्रपीडितस्येक्षुरसस्य गुणाः।
मूलाग्रजन्तुग्रन्थ्यादि पीडना
न्मलसंकरात्।किञ्चित्काल
विधृत्या च विकृतिं याति यान्त्रि
कः॥तस्माद्विदाही विष्टम्भी
गुरुः स्याद्यान्त्रिको रसः॥ ॥
अथ पर्युषितस्येक्षुरसस्य गु
णाः।रसः पर्युषितो नेष्टो ह्य
म्लो वातापहो गुरुः।कफ
पित्तकरः शोषी भेदन स्यादि
मूत्रलः॥ ॥अथ पक्वस्ये क्षु
रसस्य गुणाः।पक्वो रसो गुरुः
स्निग्धः स्यात्तीक्ष्णः कफवात
नुत्॥गुल्मानाहप्रशमनः किञ्चि
त्पित्तहरः स्मृतः॥अथेक्षुरसस्य
विकाराणां गुणाः।इक्षो र्विका
रा स्तृड्दाह मूर्च्छा पित्तास्र ना
शनाः।गुरवो मधुरा बल्याः
स्निग्धा वातहराः सराः॥वृष्या

मोहहराः शीता बृंहणा विषहा
रिणः।इति भावप्रकाशः॥

ई·

ई ईकारवर्णः।तस्य लेखनप्र
कारो यथा।ऊर्द्ध्वगः कुञ्चिता
मध्ये त्रिकोणाधोगता पुनः।
अधोगता कोणशीर्षा कुञ्चिता
दक्षजः सुभा॥शीर्षाद्दते को
णयुक्ता कुञ्चितोर्द्ध्वगता पुनः।च
तुस्रूर्ध्वाग्निरूपा सा मात्राशक्तिः
प्रकीर्तिता॥इति वर्णोद्धारतन्त्रं
॥ ॥अस्य नामानि यथा।ई
स्त्रिमूर्त्तिर्महामायालोलाक्षी
वामलोचनं।गोविन्दः शेख
रः पुष्टिः सुभद्रा रत्नसंज्ञकः
॥विष्णु र्लक्ष्मीः प्रहासश्च वा
मिश्रुद्धः परापरः।कान्तोत्तरी
यो भेरुण्डा रतिश्च पौण्ड्रवर्द्ध
नः॥शिरोनमः शिवा
तुष्टि श्चतुर्थी बिन्दुमालिनी।
वैष्णवी वैन्दवी जिह्वा काम
कला सनादका॥पावकः को
टरः कीर्त्ति र्मोहिनी कालका
रिका।कुचद्वन्द्वं तर्जनी च शा
न्तिस्त्रिपुरसुन्दरी॥इति तन्त्रो
क्तवर्णाभिधानं॥

ई ल कान्तौ॥गतौ॥व्याप्तौ॥
क्षेपे॥प्रजने॥खादने॥कान्ति
रिच्छा।प्रजनो गर्भग्रहणं।स
एति यो गर्भं गृह्णाति इत्यर्थः
।नहि तरणि रुदीते दिक् परा
धीनहृत्तिः।इति गणकृतानित्य
त्वादात्मने पदं।धात्वर्थ्यं के
चिन्न मन्यते इति दुर्गादा
सः॥
ई ङ य गत्यां।ङ य ईयते।इ
ति दुर्गादासः॥
ईख इ गतौ।दीर्घादिः।इ ई
ङ्खते।इति दुर्गादासः॥
ईज इ कुत्से॥गतौ॥इ ईञ्ज
ते।कुत्सः केचिन्न मन्यते।इ
ति दुर्गादासः॥
ईज ङ कुत्से॥गतौ॥दीर्घा
दिः।ङ ईञ्जते ईजते।कुत्सः
केचिन्न मन्यते।इति दुर्गा
दासः॥
ईड ल ङ स्तुतौ।ल ङ ईट्टे
।इति दुर्गादासः॥
ईड क स्तुतौ।क ईडयति।इ
ति दुर्गादासः॥
ईत इ बन्धे।इ ईन्तते।इति
दुर्गादासः॥
ईर ङ ल कम्पगत्योः।

दीर्घादिः।ङ ल ईर्त्ते लता वायु
ना।इति दुर्गादासः॥
ईर कि गतौ॥नुदि॥कि ईरय
ति ईरति।नुदि प्रेरणे।इति दु
र्गादासः॥
ईरिका स्त्री वृक्षविशेषः।यथा।
इरिकारणे।इति गणप्रकरणे
दुर्गादासः॥
ईर्ष्य ईर्ष्ये।दीर्घादिः।रेफयुक्तः।
ईर्ष इति ईर्ष्यस्य वान्ति हसाल्लो
प इति य लोपे सिद्धं।ईर्षा प
राभ्युदयासहिष्णुत्वं।परदोषा
सहिष्णुत्व मिति केचित्।ईर्ष्य
ति खलः साधवे।यद्वयान्तः
इत्येके।इति दुर्गादासः॥
॥
ईर्ष्य ईर्ष्ये।दीर्घादिः।रेफयुक्तः
ईर्षो पराभ्युदयासहिष्णुत्वं।पर
दोषासहिष्णुत्व मिति केचित्।
ईर्ष्यति खलः साधवे।यद्वया
न्त इत्येके।इति दुर्गा दासः॥
॥
ईलिका स्त्री ह्रस्वगदाकारहस्तद
ण्डः।सोटा इति ख्यातः।इति भ
रतः॥एकधारेलीति स्वामी॥त
त्पर्यायः।ईलिः २ ईली ३ क
करपाली ४ गोप्निका ५ करपा

लिका ६। इति शब्दरत्नावली॥
ईश ल उ. ऐश्वर्य्ये। दीर्घादिः
ऐश्वर्य्य मीश्वरीभावो ऽधीनी
करणञ्च। उ. ल ईष्टे यनी। मा
यानां मीशिषेण बाधन्ते क
र्म्माणि षष्ठी। इति दुर्गादासः॥
ईशादण्डः पुं आदित्यागयोः स
न्यारुणार्थो दण्डः। यथा। योज
नानां सहस्राणि भास्करस्य र
स थो नवाइषादण्ड स्तथैवाँ द्विगु
णो मुनिसत्तम॥ इति विष्णुपुरा
णे २ अंशे ८ अध्यायः॥
ईश्वरः पुं ऐश्वर्य्यशाली। तत्
पर्य्यायः। राड्डी २ अर्य्यः २ नियु
त्वान् ३ इनइनः ४। इति वेदनि
घण्टौ २ अध्यायः॥ श्रीहरिः। य
था। रुद्रोवाच। हरे कथय देवेश
देवदेवक ईश्वरः को ध्येयः क
श्च वै पूज्यः के व्रते स्तुष्यते
परः॥ इत्यादि। श्रीहरिरुवाच
। शृणु रुद्र प्रवक्ष्यामि ब्रह्म
णा च सुरैः सह। अहं हि दे
वो देवानां सर्व्वलोकेश्वरेश्वरः
॥ अहं ध्येयश्च पूज्यश्च स्तुत्यो
ऽहं स्तुतिभिः सुरैः। अहं प्र
पूजितो रुद्र ददामि परमां
गतिं ॥ इत्यादि

च गारुडे २ अध्यायः॥ ॥
ईष उ. दाने हिंसे॥ सपैरो
॥ दीर्घादिः। उ. ईषते। ईक्षो द
शनैः। इति दुर्गादासः॥
ईष ऊञ्छे ऊञ्छनशस्य शेषाप
हरणं। ईषति धान्यं दीनः। इति
दुर्गादासः॥
ईह उ. चेष्टे। दीर्घादि रकर्म्मकः।
उ. ऐहिष्ट तं कारयितुं कृतात्मा
कान्तं नृप इति भट्टिः। सकर्म्मको
ऽपि। ग्रामं भूमादपि नेहते। इ
ति जयदेवः॥ सर्व्वः स्वार्थं समी
हते इति माघः। इति दुर्गादा
सः॥
ईक्ष उ. दर्शने। दर्शन मिह चा
क्षुषज्ञानं प्रणिधानञ्च। उ. ई
क्षते चन्द्रं लोकः। न कामहा
त्रि र्वचनीय मीक्षते। इति का
लिदासः। निरीक्षिष्यामि पन्थ
नीन् इति गणकृतानित्यत्वा
दिति रमानाथः। वस्तुतस्तु
निरीक्षते निरीक्षः पचादित्वाद
न् ततो निरीक्ष इवाचरतीति
क्वौ साध्यं। इति दुर्गादासः॥

उ.

उ उकारवर्णः। अस्य लेखन

प्रकारो यथा। ऊर्द्धोयो मध्य
तः कुण्डा रेखा वामगता सुभा
। तिष्ठन्ति वायु वह्नीन्द्राः शक्ति
मात्रा परा स्मृता॥ इति वर्णोद्धा
रतन्त्रं॥ अस्य नामान्तराणि य
था। उः शङ्करो वर्त्तुलाक्षी भू
तः कल्याणवाचकः। अमरेशो
दत्तकर्णः षड्वक्त्रो मोहनः शि
वः॥ उग्रः प्रभुर्धृति र्विष्णु र्विश्व
कर्म्मा महेश्वरः। शम्भुश्चण्डि
का पुष्टिः पञ्चमी वह्निवासि
नी॥ कामघ्नः कामना चेशो मो
हिनी विघ्नहन्मही। उष्ठहः
जटिला श्रोत्र पारदीपो हषो
हरः॥ इति तन्त्रोक्तवर्णाभि
धानं॥
उ उ. शब्दे। उ. अवते गौः।
इति दुर्गादासः॥
उख गतौ। पञ्चमस्वरी। उख
ति। इति दुर्गादासः॥
उख इ गतौ। पञ्चमस्वरी।
इ उङ्खते। इति दुर्गादासः॥
उग्रचण्डा स्त्री देवीभेदः। य
था महिषासुरं प्रति भगवती
वाक्यं। उग्रचण्डेति या मूर्त्ति
र्भद्रकाली ह्यहं पुनः। ययाम्
मीत्वां हनिष्ये सा दुर्गेति प्रकी

र्त्तिं॥ एतासु मूर्त्तिषु सदा पादल
ग्नो नृणां भवान्। भजेत्वा भविष्यसि
त्वं वै देवानामपि रक्षसां॥ आदि
सृष्टावुग्रचण्डामूर्त्त्या त्वं निहतः
पुरा। द्वितीयसृष्टौ तु भवान् भ
द्रकाल्या मया हतः॥ दुर्गारूपेण
धुना त्वां हनिष्यामि सहानुगं।
इत्यादि॥ ॥तस्याः प्रादुर्भावो
यथा। श्रीभगवानुवाच। उग्रच
ण्डा तु या मूर्त्ति रष्टादशभुजा
भवेत्। सा नवम्यां पुरा कृष्णप
क्षे कन्यां गते रवौ॥ प्रादुर्भूता
महाभागा योगिनी कोटिभिः
सह॥ ॥ अनया मूर्त्त्या दक्षय
ज्ञभङ्गः कृतः। यथा। आषाढ
स्य तु पूर्णायां सत्रं द्वादश
वार्षिकं। दक्षः कर्त्तुं समारेभे
हूताः सर्व्वे दिवौकसः॥ ततो
ऽहं नहूतः तेन दक्षेण स्व
महात्मना। कपालीति सती
चापि नजायेति च नो हृता
॥ ततो रोषसमायुक्ता प्राणां
स्तत्याज सा सती। त्यक्तदेहा स
ती चापि चण्डमूर्त्ति स्तदा
भवेत्॥ ततः प्रवृत्ते यज्ञे
तु तस्मिन् द्वादशवार्षिके। नव
म्यां कृष्णपक्षे तु कन्या

यो चाउमूर्तिरुक॥योगनिद्रा म
हामाया योगिनी कोटिभिः सह।
सतीरूपं परित्यज्य यज्ञभङ्गं म
याकरोत्॥शङ्करस्य गणैः सर्वैः
सहिता शङ्करेण चाखयं वभञ्ज
सा देवी महासत्रे महात्मनः॥
ततो देव्या महाक्रोध वनीते वि
दिवौकसः।पूजयाम्बक्रे रत्ना
देवीं हयोदितेन वै॥हयोदितेव
यानेन पूजा मस्या दिवौकसः।
कृत्वेव परमा माउ निर्वृतिं दुःख
हानये॥एव मन्यैरपि सदा का
र्य्यं देव्याः प्रपूजनं॥विभूति मतुला
प्राप्तुं चतुर्वर्गप्रदायकं॥यो मो
हादथवालस्याद्देवीं दुर्गां महोत्स
वे।न पूजयति दम्भाद्वा द्वेषाद्वा
प्यथ भैरव॥क्रुद्धा भगवती त
स्य कामानिष्टा न्निहन्ति वैः।
परत्र च महामाया वलिं भूत्वा
स जायते॥ अष्टम्यां रुधिरैः
र्मांसै र्महामांसैः सुगन्धिभिः
।पूजयेद्वहुजातीयै र्वलिभिः
भोजनैः शिवां॥ इत्यादि॥॥
तन्मन्त्रो यथा। भद्रकाली
उग्रचण्डी महामाया
महोग्र सर्व । नेत्र
बीजन्त सर्वी ॥ ॥

सा पूजने परिकीर्त्तितं॥तन्त्रं न
योग्रचण्डायाः पृथक् त्वं श्रृणु
भैरव॥आद्यद्वयं नेत्रबीजं मन्त्र
स्योपान्त्य मन्तुरे॥वह्निनान्तस्वरे
णेन्दुविन्दुभ्यां तन्त्र मोग्रकं॥इ
त्यादि च कालिकापुराणे प॥
९० अध्यायो॥ ॥उग्रतारा स्त्री
देवीविशेषः।अस्या उत्पत्ति
यथा।सर्वेषा मेव देवानां यज्ञ
भागानपाहरत्।स्वयं शुम्भो
निशुम्भश्च दिक्पालत्वं तथा
गतौ॥सर्व्वे सुरगणाः सेन्द्रा
स्ततो गत्वा हिमाचलं।गङ्गाव
तारनिकटे महामायां प्रतुष्टु
वुः॥अनेक संस्तुता देवी तदा
सर्व्वामरोत्करैः।मातङ्गव
नितामूर्त्तिं भूत्वा देवानपृच्छ
त॥युष्माभि रमरैः रत्र स्तूय
ते का च भाविनी॥किमर्थं मा
गता यूयं मातङ्गस्याश्रमं प्रति
॥एवं ब्रुवन्त्या मातङ्ग्या स्त
स्यास्तु कायकोषतः।समु
द्भूताब्रवीद्देवी मां स्तुवन्ति ह
रा इति।शुम्भो निशुम्भो ह्यसुरौ
बाधेते सकलान् सुरान्।तस्मा
न्नयो वैधायाहं स्तूये ऽद्य स
कलैः सुरैः॥विनिःसृतायाः

देव्यास्तु मातङ्ग्याः कायत
स्तदा॥भिन्नाञ्जननिभा कृसा
साभूद्गौरी त्वरणादपि॥कालिका
ख्याता वत् सापि हिमाचलकृताश्र
याता गुग्रतारा मुनयो वदन्तीह म
नीषिणः॥उग्रादपि भयात्त्राति य
स्मात् भक्तान् सदाम्बिका॥एतस्याः
प्रथमं बीजं कथितं तन्त्र मेवच
॥ ॥एषैवेकजटा ख्याता यस्मात्त
स्या जटायिका॥श्रृणुत्व चिन्तनं
यस्याः सम्यक् वेताल भैरवौ॥
यथा ध्यात्वा महादेवीं भक्तः
प्राप्नोत्यभीप्सितं।चतुर्भुजां
कृष्णवर्णां मुण्डमालाविभूषि
तां॥खड्गं दक्षिणपाणिभ्यां
विभ्रतीन्दीवरं त्वयः।कर्त्रीञ्च
खर्परञ्चैव क्रमाद्वामेन विभ्र
तीं॥द्यां लिखन्ती जटा मेकां
विभ्रतीं शिरसा स्वयं।मुण्डमा
लाधरां शीर्षे ग्रीवायामपि स
र्वदा॥वक्षसा नागहारन्तु वि
भ्रतीं रक्तलोचनां।कृष्णवस्त्र
धरां कट्यां व्याघ्राजिनसमन्वितां
॥वामपादं शवहृदि संस्थाप्य द
क्षिणं पदं।विन्यस्य सिंहपृष्ठे
तु लेलिहानां शवं स्वयं॥सा
ट्टहासां महाघोरां रावयुक्तां ति

भीषणां॥चिन्त्योग्रतारा सततं भक्ति
मद्भिः सर्वेष्टुभिः॥ ॥एतस्याः
संप्रवक्ष्यामि या श्रेष्ठा योगिनी
स्तु ताः।महाकाल्यथ रुद्राणी
उग्रा भीमा तथैव चाघोरा च भ्रा
मरी चैव महारात्रि श्च सप्तमी॥भै
रवी चाष्टमी प्रोक्ता योगिनी स्त्वाः
प्रपूजयेत्॥इति कालिकापुरा
णे ९० अध्यायः॥ ॥अपिच।
ब्रह्मशैलस्य पूर्वस्यां भूमिपीठे
व्यवस्थिता।चारुनिम्न स्वभाव
त्रैं कामाख्या नाभिमण्डलं॥य
त्रो ग्रतारारूपेण रमते परमेश्वरी
।तत्र तेनैवरूपेण पूजितव्या शु
भात्मिका॥तस्यास्तु बीजं पूर्वोक्ति
न् उत्तरे प्रतिपादितं।रूपं श्रृणु
नरश्रेष्ठ येन ध्येया सदा शिवा॥
कृसा लम्बोदरी दीर्घा विरला
रक्तदन्तिका।चतुर्भुजा कृशा
ङ्गी तु दंष्ट्रे कर्तृक खर्परी॥
खड्गं चेन्दीवरं वामे शीर्षे त्वे
कजटा पुनः। वामपादं श
वस्याद्धौ निधायोत्थाय दक्षि
णं॥ शवस्य हृदये न्यस्य
साट्टहासं प्रकुर्वती। नाग
हार शिरोमाला भूषिता
कामदा परा।त्रिकोणं माण्ड

लं चास्या ह्रंकार मध्यबीजकं
।द्वारे नानायोगिनीनां नामान्य
स्यास्तु तन्त्रके॥ज्ञेयानि वरशा
ङ्कल तत्प्रोक्तं वाच्यगोचरे।इ
ति कालिकापुराणे कामाख्याद्
पनिर्णये ८२ अध्यायः॥ ॥सा
च वशिष्ठशापात् वामा भूताय
था।ऊर्द्ध उवाचाएतद्विप्रो द्वेचः
क्रत्वा विधि ना सहितः स तोष्य
ङ्कीचकार हृदये तद्वचः साध्यस
यते॥विसृज्य तान् ब्रह्म विस्तु य
मात् वृषभवाहनः।आदाय सग
णान् सर्व्वान् कामरूपान्तरं ययौ
॥उग्रतारां ततो देवीं गणांश्च प्राह
शङ्करः।उत्सारयन्तु सकलान्
इमान् लोकान् गणाङ्गना॥उग्र
तारे महादेवि त्वञ्चाप्युत्सारय
द्रुतं।ततो गणाः कामरूपाद्देवी
चाप्यपराजिता।लोकानुत्सा
रयामासुः पीठं कर्त्तुं रहस्यकं॥
उत्सार्य्यमाने लोके तु चतुर्व
र्णे द्विजातिभिः।सन्ध्याचलोग
तो विप्रो वशिष्ठः कुपितो
मुनिः॥सोप्युग्रतारया देव्या
उत्सारयितुमीप्सया।ग
णैः सह हतः प्राह शा
पं कोपेन सुदारुणं।

यस्मादहं हतं वामे त्वयोत्सार
यितुं मुनिः॥तस्मात्त्वं वामभा
वेन पूज्या भव समन्ततः।कामत
स्त्वन्ति म्लेच्छवत् यस्मान्मामेते
मन्दबुद्धयः।भवन्तु म्लेच्छास्त
स्माद्धि भवत्या कामरूपके॥महा
देवोपि यस्मान्मां निःसारयितु
मुद्यतः।तपोबलं मुनिं दान्तं
म्लेच्छवद्वेदपारगं॥तस्मात् म्ले
च्छप्रियो भूयात् शङ्कर स्त्वास्थि
भस्मधृक्।एतत्तु कामरूपाख्ये
म्लेच्छे गुप्तं भवद्धतः।स्वयं वि
स्तु ने चायाति यावत् कालमि
दं पुनः।विरला आगमाः सन्तु
यत्र तत् प्रतिपादकाः॥विरलं
यस्तु जानाति कामरूपागमं
बुधः।सएव प्राप्तकालेपि
पूर्णं फलमवाप्स्यति॥एवमु
क्ता वशिष्ठस्तु तत्रैवान्तरधीय
ताते गणाः म्लेच्छतां याताः
कामरूपे सुरालये॥वामाभू
दुग्रतारापि शम्भु म्लेच्छर
तो ऽभवत्॥इति च कालिका
पुराणे ८३ अध्यायः॥
उञ्छ इ य समवायने।कृत्सा
दिः।इट् उञ्छत् औञ्छीत्।य
स्मात् पुष्पादिमात्रं निन्यं ठ.

इत्यन्ये।य उच्यते केशः स्नाना
त्।इति दुर्गादासः॥
उच्चारणं स्त्री कथनं।यथा।इ
से अकार उच्चारणार्थः।इति मु
ग्धबोधव्याकरणं॥अपि च॥क
र्मोच्चारणमात्रेण स्पष्टमात्रानुव
र्त्तनः।इति कविकल्पद्रुमः॥
॥ ॥
उञ्छ इ श उञ्छे।कृत्स्वादिः।इ
उञ्छति।श उञ्छती उञ्छन्ती।
उञ्छ उद्धृतशस्यस्य शेषापहर
णं।स्वल्पं शस्य मुञ्छन्ति य
द्देशे व्रतिनो द्विजाः।इति ह
लायुधः।उञ्छः स्फोटन मित्ये
के।इति दुर्गादासः॥
उञ्छ ई श वन्धे॥समापने॥वर्जे
ने॥अतिक्रमे॥ई उष्टः।श उञ्छ
ती उञ्छन्ती।चत्वारो ऽर्थाः।स
मापने।उञ्छति रात्रिः।भरणपा
पुष्टाया पुष्टि जनयामास त
नयंपुष्टायां कामा माया मि
सर्गः।इति दुर्गादासः॥

उच्छिष्टं त्रि भुक्तावशिष्टं।तज्ञो
जनप्रायश्चित्तं यथा।विस्तुः।
अप्रयाद्वाशने त्रिरात्रं पयसा
वर्त्तेत ब्राह्मणः सू

द्रोच्छिष्टाशने च वचनं कृ
त्वा सप्तरात्र मुपवसेत् इति।
एवंउच्छिष्टे यः पराक उक्तो ऽ
ङ्गिरसा सोपि प्रागुक्तसकृद
पदादिविषये बोध्यः।विस्तुना
पि अनुच्छिष्टे पराकोक्तेः।त
थाचाङ्गिराः।चाण्डाल पतिता
दीनां मुच्छिष्टान्नस्य भक्षणे।
द्विजः शुद्ध्येत् पराकेण शूद्रः कृ
च्छ्रेण शुध्यति॥यत्तु मिताक्ष
रायामापस्तम्बः।अन्त्यानां भु
क्तशेषन्तु भक्षयित्वा द्विजातयः।
चान्द्रं कृच्छ्रं तदर्द्धन्तु ब्रह्मक्षत्र
विशां विधिः॥चान्द्रं चान्द्रायणं
।कृच्छ्रं तप्तकृच्छ्रं।एतच्च ब्रा।
ह्मणस्य सकृदज्ञानविषयं वक्त
न् कारणत्वारेप्यन्येतर नाम्
लाकुत्सष्टपरत्वं।तत्राज्ञाने
आपस्तम्बेन औच्छिष्टे चान्द्राय
णविधानात्।अङ्गिरसा अत्या
वसायिनामित्यादि प्रागुक्तवच
ने सामान्यतः तप्तकृच्छ्रविधाना
त् अनुच्छिष्टेपि तथात्वादेव सर्व्वे
षांनुच्छिष्टाउच्छिष्टे हेतुरपि बो
ध्यः।प्रायश्चित्तविवेके संसर्गप्रक
रणेप्येवं।तत्रैव विशेष आपदि
दि ज्ञेयं॥ ॥सर्व्वोच्छिष्टे

न ब्रतदैशुण्यं आपदस्तान्मृ
क्तोऽन्तरिते मासयावकव्रतेन
दशाक्तो धेनुद्वयं षट्कार्षाप
णा वा देयाः तत्रोच्छिष्टान्ने प
ाक इति।अभ्यासमेदेतावृत्ति
द्दहलीया।इति प्रायश्चित्ततत्त्वं
॥ ॥अथोच्छिष्टस्य चाण्डाला
दिस्पर्शे प्रायश्चित्तं।आपस्तम्बः
।भुक्तोच्छिष्टस्त्वनाचान्तः चा
ण्डालैः श्वपचेन वा।प्रमादात्
स्पर्शनं गच्छेत् तत्र कुर्याद्विशो
धनं॥गायत्र्यष्टसहस्रन्तु द्रुपदां
वा शतं जपेत्।त्रिरात्रोपोषितो
भूत्वा पञ्चगव्येन शुद्ध्यति॥
भुक्तोच्छिष्टोऽन्त्यजैः स्पृष्टः
प्राजापत्यं समाचरेत्।अर्द्धो
च्छिष्टे स्मृतः पादः पादम
माशने तथा।प्राजापत्यं स्नाने
अर्द्धोच्छिष्टो येनाद्यग्रास
आस्ये निक्षिप्तः न तु निगी
र्णः।दक्षः।पाने मैथुन संस
र्गे तथा मूत्रपुरीषयोः।सं
स्पर्शो यदि गच्छेत शावोदक्या
न्त्यजैः सह॥दिनमेकं चरेन्मू
त्रे पुरीषे तु दिनद्वयं।दिनत्र
यं मैथुने स्यात् पाने स्याच्च
तुष्टयं॥काश्यपः।ग्रामसूकरा

न्त्य चाण्डाल मद्यभाण्ड रजस्वलाः
।यद्युच्छिष्टः स्पृशेत्तत्र कृच्छ्रं सान्त
पनं चरेत्॥एतत् ज्ञानाभ्यासे सा
न्तपने धेनुद्वयं॥ब्रह्मपुराणे।उच्छि
ष्टेन तु शूद्रेण विप्रः स्पृष्टस्तु नाह
ाः।उपवासेन शुद्धिः स्यात् शुना
संस्पृष्ट एव वा॥उच्छिष्टे न तु विप्रे
ण विप्रः स्पृष्टस्तु नाहशः।उभौ
स्नानं प्रकुरुतः सद्य एव समाहि
तौ॥अनुच्छिष्टशूद्रस्पर्शे उच्छिष्ट
ब्राह्मणस्य नक्तमिति प्रायश्चित्त
विवेकः॥इति प्रायश्चित्ततत्त्वं॥
॥ञ्छ॥
उञ्छ श त्यागे।जोपध इत्येके।
उज्झित्रियते।ओजिञ्छत्।
श उञ्छती उञ्छन्ती।इति
दुर्गादासः॥अन्यत् उद्ज
धातौ द्रष्टव्यं॥

उञ्छं क्ली पतितकणादानवत्
शस्यग्रहणं।यथा।उपात्तशस्यात्
क्षेत्रात् शेषावचयने।उञ्छेन
पतितकणादानवद्गुणे न शि
स्यते सञ्चीयते उञ्छशिलं उ
च्छिष्टोञ्छ शिलमञ्छे हलो रि
त्युक्तेः कणशेति इत्थं उज्ज्वात कः
उञ्छशिलं।संचाने विप्र

ह्लीतं विपर्य्यस्तञ्च नामा शक्या
नवेदुञ्छे शिले नह्रीतिः फलेन
मूलेन च वारिणा च।इति।समाहा
रद्वन्द्वे उञ्छशिलञ्च।उञ्छे मे
तञ्च यद्धान्यन्नत् परिग्रहण
मुक्तं।इति निगमाभिधाने क्लीवं
।पुमानुञ्छः कृतशिलं इति वोपा
लिते पुं सुञ्छः।भवभूतिकृत
शिलोञ्छे इति गोवर्द्धनः।केचि
दुञ्छशिलयो भेद माहुः।प्रति
ग्रहात् शिलं श्रेयस्ततो ऽप्युञ्छः
प्रशस्यते।इति।तत्र शास्त्रादे
र्निपातित परित्यक्त मञ्जरीणां
आदानं शिलं।शिलं धान्यमञ्ज
रीसंग्रहः।इति स्वामी चाणक्यैक
शः कणजवहान्यकणोद्धरणे मु
ञ्छः।तडक्तं उञ्छे।धान्यकणा
द्युय इति।शिलं तालव्यादि द
न्त्यादि चाधर्म्मपत्वात् सत्यमिति
ज्ञेतं।इति उञ्छशिलशब्दटी
कायां भरतः॥ उटजः पुं
क्ली मुनीनांपत्र रचितगृहं।त
त्पर्य्यायः।पर्णोटजः ३ ।इ
ति शब्दरत्नावली॥
उठ उपघाते।ह्रस्वादिः।उठति
खलः साधुं।इति दुर्गादासः
॥ ॥ ॥

उड संहतौ।उडुपः।इति दुर्गा
दासः॥सौत्रधातु रयं॥
उडूपः पुं क्ली प्लवः।तत् प
र्य्यायः।तेलकः ४ उडूपः ५
तरणः ६ तारणः ७ तारकः ८
।इति शब्दरत्नावली॥ ॥
उडुम्बरः पुं वृक्षविशेषः।तत्
पर्य्यायः।हेमदुग्धी ६ यज्ञफ
लः ७ यज्ञोडुम्बरः ८ इति श
ब्दरत्नावली॥सदाफलः ९ ही
रवृक्षः १० सुवृक्षः ११ श्वेतव
ल्कलः १२ इति जटाधरः॥अस्य
गुणाः।उडुम्बरो हिमो रूक्षो गुरुः
पित्त कफास्रनुत्।मधुरस्तुवरो
वर्ण्यो व्रणशोधन रोपणः॥इ
ति भावप्रकाशः॥अन्यत् उडु
म्बरशब्दे द्रष्टव्यं॥उत्कृष्ट त्रि
उत्कर्षयुक्तः।यथा॥उत्कृष्ट
मध्यम निकृष्टजनेषु मैत्री य
द्वत् शिलासु सिकतासु जले
षु रेखा।वैरं क्रमादधम म
ध्यम सज्जनेषु यद्वत् शिलासु
सिकतासु जलेषु रेखा॥
इत्युद्भटः॥
उत्तरतारं क्ली उत्तरतीरं।इति
सिद्धान्तकौमुदी॥
उत्तरीयं क्ली प्रावारवस्त्रं।

तत् पर्यायः। कत्ता ८। इति
जटाधरः॥
उत्थानं स्त्री गात्रोत्तोलनं। उठ
न इति भाषा। यथा। निशि स्वा
पो दिवोत्थानं सन्ध्यायां परि
वर्त्तनं। अन्यत्र पादयोगेऽपि द्वा
दश्या मेव कारयेत्॥ इति
तिथ्यादितत्त्वं॥
उत्थानैकादशी स्त्री कार्त्तिकशु
क्लैकादशी। अथ विष्णूत्थानं।
तत्रदिवसे रेवत्यन्त्ययुक्तायां द्वा
दश्यां। रात्रौ रेवत्यन्त्यपादयोगे
त्व दिवातृतीयभागे रेवतीयु
क्तद्वादश्यां। द्वादश्या मुक्ता
भावे एकादशीप्रभृति पौर्णि
मास्यन्तान्यतमतिथौ रेवत्य
न्त्यपादयोगे। तदभावे केवला
यां द्वादश्यां सन्ध्यायां विष्णुं सं
पूज्य। ॐ महेन्द्र रुद्रै रभिनूय
मानो भवानृषि र्वन्दित वन्द
नीयः। प्राप्ता भवेयं किलकौ
मुदाख्या जागृष्व जागृष्व च लो
कनाथ। मेघागता निर्मल पूर्ण
चन्द्रः शारद्य पुष्पाणि च लो
कनाथ। अहं ददानीति च पुण्य
हेतो जागृष्व जागृष्व च लोक
नाथ॥ ततश्च। ॐ उत्तिष्ठोत्तिष्ठ

गोविन्द त्यज निद्रां जगत्पते।
त्वया चोत्थीयमानेन उत्थितं
भुवनत्रयं॥ इति पठेत्। इति कृ
त्यतत्त्वं॥
उत्पत्तिः स्त्री जन्म। तत् पर्यायः
। संसारः २ भवः ३ जातिः ४।
इति जटाधरः ॥ प्रभवः ५ भा
वः ६ सम्भवः ७ जनुः ८ जनुः
९। इति शब्दरत्नावली॥
॥ ॥
उत्पलं क्ली कुवलयं। तत्पर्या
यः। कुवलं ३। इति जटाधरः॥
कुवेलं ४। इति शब्दरत्नावली॥
॥ ॥
उत्साहः पुं ध्रुवकविशेषः॥ त
ल्लक्षणं यथा। उत्साहः स्यात् र
से हास्ये ताले केन्दुक संज्ञके।
वेशाहद्धिकरः पादै स्त्रयोदश मि
तात्तरः॥ इति संगीतदामोदरः
॥ ॥
उदकपरीक्षा स्त्री दिव्यविशेषः। य
था। अथोदकपरीक्षा। पितामहः।
तोयस्याथ प्रवक्ष्यामि विधिं य
र्म्मं सनातनं। मण्डलं पुष्पधू
पाभ्यां कारयेत् स्वविचक्षणः
॥ शरान् संपूजयेत् पूर्वं वेणु
वञ्च धनुस्तथा॥

तत्र प्रथमतो वरुणं पूज
येत्। यथा नारदः। गन्धमाल्यैः
सुरभिभि र्मधु क्षीर घृतादिभिः
। वरुणाय प्रकुर्वीत पूजा मादौ
समाहितः॥ ततो धर्म्मावाहना
दि सकलदेवतापूजा होम
समस्तकप्रतिज्ञापत्र शिरोनि
वेशान्त कर्म्म कुर्यात्। कात्या
यनः। शरां स्त्वनायसाग्रांस्तु
प्रकुर्वीत विशुद्धये। वेणुं का
ष्ठमयंश्चैव क्षेप्ता च स्वरढं
क्षिपेत्॥ पितामहः। क्षेप्ता च क्ष
त्रियः कार्य्य स्तद्वृत्ति ब्राह्मणः
ऽथवा। अक्रूरहृदयः शान्तः सो
पवासं स्तथा शुचिः॥ इदमेव प
क्षिपेद्धीमान् मारुते वाति वा
भृशं। विषमे तरुदेशे च हृच्छ
स्थाणु समाकुले॥ ॥नारदः।
क्रूरं धनुः सप्तशतं मध्यमं ष
ट्शतं मतं। मन्दं पञ्चशतं प्रो
क्तमेष ज्ञेयो धनुर्विधिः॥ अ
ङ्गुलीनां सप्ताधिकं शतं य
स्य धनुषः परिमाणं तत्सप्तशतं
। एवं षट्शतादिकं॥ पिताम
हः। मध्यमेन तु चापेन प्रक्षिपे
त्तु शरत्रयं। हस्तानान्तु शतं सा
र्द्धं लक्षं कृत्वा विचक्षणः। तेषांच

प्रेषितानां स्तु शराणां शमसंदे
शनात्। मध्यमस्तु शरो ग्राह्यः
पुरुषेण बलीयसा। शराणां प
तनं ग्राह्यं सर्पणं परिवर्जयेत्।
सर्पन् सर्पन् शरो याति हराद्द
रतरं ततः॥ पतनं ग्राह्य मिति
शरपतनस्थानपर्य्यन्तं गच्छेदि
त्यर्थः। तेन प्रसरणप्रदेशेऽपि प
तनस्थानकशरग्रहणं ततश्च
प्रथमतः पुरुषान्तरेण तत्स्था
ने शर आनेतव्यः॥ ॥नारदः।
नदीषु नातिवेगासु तडागेषु
सरस्सु च। हृदेषु स्थिरतोय
षु कुर्य्यात् देसौ निमज्जनं
॥ नातिवेगासु स्थितिविरोधि
वेगशून्यासु॥ ॥ विष्णुः। प
ङ्क शैवाल दुष्टग्राह मत्स्य ज
लौकादि वर्ज्जिते तस्य नाभि मा
त्रजले मग्नस्यारागद्वेषिणः पु
रुषस्यान्यस्योरु गृहीत्वा अभि
मन्त्रितान्तः प्रविशेत्। तत् सम
कालञ्च नातिक्रूर मृदुना धनु
षा पुरुषोऽपरः शरमोक्षं कुर्य्या
दिति तस्य शोध्यस्यान्यथैः। अन्य
था तस्मिन् वीर्यस्यात्॥ ॥ अ
न्यपुरुषस्य स्तम्भधारणमाह स्त
तिः। उदके प्राविशत् क्लिष्टकर्म्म

स्थूणां प्रगृह्य च॥प्राड्विवाक
कर्त्तृकजलाभिमंत्रणमाह पि
तामहः॥तोय त्वं प्राणिनां प्राणः
सृष्टेराद्यन्तु निर्म्मितं।शुद्धेश्च
कारणं प्रोक्तं द्रव्याणां देहिनां
तथा॥अतस्त्वं दर्शयात्मानं शु
भाशुभपरीक्षणे॥शोध्यक
र्त्तृकाभिमन्त्रणमाह याज्ञव
ल्क्यः॥सत्येन माभिरक्षस्व वरु
णेत्यभिशाप्यकं।नाभिमात्रोदक
स्थस्य गृहीत्वोरू जले विशेत्॥मा
नं।अभिशाप्य शपथं कारयित्वा।
केजलं।विशेत् निमज्जेत्॥ ॥
तोरणं च निमज्जनसमीपे समे
स्थाने शोध्यकर्णप्रमाणोच्छ्रितं
कार्यं।यथा नारदः।गत्वा तु त
जलस्थानं तटे तोरणमुच्छ्रितं।
कुर्वीत कर्णमात्रन्तु भूमिभागे
समे शुचौ॥शरमोक्षे विशेषमा
ह स एवाह हस्सनी।शरप्रक्षे
पण स्थानात्कृत्वा जवसमन्वितं
।गच्छेत् परमया शक्त्या यत्रासौ
मध्यमः शरः॥मध्यमं शरमादाय
पुरुषो ऽन्यस्तथाविधः।अन्यागम
च्छेत्तु वेगेन यतः स पुरुषो ग
तः॥आगतस्तु शरग्राही न प
श्यति यदा जले।अन्तर्ज्जलगतं

सम्यक् तदा शुद्धिं विनिर्दिशेत्
॥अन्यथा न विशुद्धः स्यादेका
ङ्गस्यापि दर्शनात्।स्थानाद्वा
न्यत्र गमनाद्यस्मिन् पूर्व्वं निवे
शयेत्॥जविनौ विशेषयति
नारदः।पंचाशतो धावकानां
यौ स्यातां मधिकौ जवे।तौ
च तत्र नियोक्तव्यौ शरानय
नकर्म्मणि॥एकाङ्गस्य दर्शना
दिति कर्णादिनिप्रायेण शिरो
मात्रन्तु दृश्येत न कर्णो नापि
नासिका।अप्सु प्रवेशने यस्य शु
द्धं तमपि निर्दिशेत्॥इति वि
शेषाभिधानात्।कात्यायनः।
निमज्जेत् प्लवते यस्तु दृष्टश्चे
त् प्राणिना नरः।पुनस्तत्र नि
मज्जेत देशचिह्नविभावितः।ज
लान्तर्गत मत्स्य जलौकादिना
दष्टः सस्तु तत्प्लवते यदि तदा द
ष्टे दृष्टे पुनर्निमज्जनीय इत्यर्थः
॥ ॥पितामहः।गन्तुश्चापि च
कर्त्तुश्च समं गमनमज्जनात्।ग
च्छेत्तोरणमूलात्तु शरस्थानं ज
वीनरः॥तस्मिन् गते द्वितीयोपि
वेगादादाय शायकं।गच्छेत्तोर
णमूलन्तु यतः स पुरुषो गतः
॥आगतस्तु शरग्राही न पश्यति

यदा जले।अन्तर्ज्जलगतं सम्य
क् ततः शुद्धिं विनिर्दिशेत्॥अ
त्र मज्जनसमकालगमनाभिधा
नात् शरमोक्षसमकालं गमने
मूलपाठ्युक्तमयुक्तं।मज्जन सम
कालत्वेन मध्यमं शरमादाय
तत्पर मुक्त मपि प्रामाणिकत्वं।
ततश्च त्रिषु शरेषु मुक्तेषु ए
को वेगवान् मध्यमशरपतन
स्थानं गत्वा तमादाय तत्रैव
तिष्ठति।अन्यस्तु पुरुषो वेगवा
न् शरमोक्षस्थाने तोरणमूले
तिष्ठति एवं स्थितयोस्तृतीया
यां करतालिकायां प्राड्विवाक
दत्तायां शोध्यो निमज्जति तत्स
मकालमेव तोरणमूलस्थितोपि
द्रुततरं मध्यमशरपतनस्थानं
गच्छति शरग्राही च तस्मिन्प्रा
प्ते द्रुततरं तोरणमूलं प्राप्यान्त
र्जलगतं यदि न पश्यति तदा
शुद्धो भवतीति वर्त्तुलार्थः॥ ॥
तत्र प्रयोगः।उक्तलक्षणजला
शयनिकटे तथा तोरणं विधा
य उक्तदेशे लक्षं कृत्वा तोरण
समीपे सशरं धनुः संस्थाप्य ज
लाशये वरुणमावाह्य पूजयित्वा
तत्तीरे धर्म्मादींश्च देवान् हवना

न्मिष्ठां दक्षिणां कृत्वा शोध्यस्य
शिरसि प्रतिज्ञापत्रं बद्ध्वा प्राड्विवा
को जलमभिमन्त्रयेत्।ॐ तोयत्वं
प्राणिनां प्राणः सृष्टेराद्यन्तु
निर्म्मितं।शुद्धेश्च कारणं प्रोक्तं
द्रव्याणां देहिनां तथा॥अतस्त्वं
दर्शयात्मानं शुभाशुभपरीक्षणे
।इति मन्त्रेण।शोध्यस्तु ॐ सत्ये
न माभिरक्षस्व वरुणेत्यनेन
जलमभिमन्त्र्य गृहीतस्थूणास्य
शोध्यनाभिमात्रोदकावस्थित
स्य बलीयसः प्राङ्मुखस्य पुरुष
स्य समीपं जलमध्ये गच्छेत्।त
तः शरेषु त्रिषु मुक्तेषु मध्यम
शरपातस्थाने मध्यमशरं गृही
त्वा जविनोरेकस्मिन् पुरुषे
स्थिते अन्यस्मिंश्च तोरणमूला
स्थिते प्राड्विवाकेन तालत्रये द
त्ते शोध्यो गृहीतस्थूणा प्राङ्मु
ख पुरुषस्योरू गृहीत्वा निम
ज्जति तत्समकालमेव तोरण
मूलस्थोपि मध्यमशरस्थानं द्रुतं
गच्छति।ततः शरग्राही च तस्मि
न् प्राप्ते द्रुतं तोरणमूलं प्राप्य
जलान्तःस्थं यदि न पश्यति त
दा शुद्धः।कर्णाद्यङ्गं विना शिरो
मात्र दर्शनेपि शुद्धः।मज्जन

स्थानादन्यत्रगमनेप्यस्तुदः॥ त
तो दक्षिणादिकं दद्यात्॥ इति
दिव्यतत्त्वं॥
औदय आचाते सौत्रधात्वर्थं।
पंचमस्वरादिः॥ औदय्यः॥ इति
दुर्गादासः॥ पाठबन्ध औदथा
त रयं भ्रमवशात् औदयेति
लिखितः॥
औदयः पुं ग्रहाणामुद्गमः॥ त
त्र सूर्य्यस्योदयविवरणं यथा
॥ औदयास्तमने चैव सर्वकाल
न्तु संमुखे॥ दिशास्वशेषासु त
था मैत्रेय विदिशासु च॥ ये यैत्र
दृश्यते भास्वान् स तेषा मुदयः
स्मृतः॥ तिरोभावञ्च यत्रैति त
त्रैवास्तमनं रवेः॥ नैवास्त म
न मर्कस्य नोदयः सर्वदा स
तः॥ औदयास्तमनाख्यंच दर्श
नादर्शनं रवेः॥ शक्रादीनां पुरे
तिष्ठन् स्पृशत्येष पुरत्रयं॥ वि
कर्णौ द्वौ विकर्णस्थ स्त्रीन् को
णान् द्वे पुरे तथा॥ औदितो व
र्द्धमानाभि रामध्याह्नात्तपन्
रविः॥ ततः परं ह्रसन्तीभि र्गो
भि रस्तं नियच्छति॥ औदयास्त
मनाभ्यांच स्मृते पूर्वापरे दि
शौ॥ यावत् पुरस्तात्तपति ता

वत् पृष्ठेच पार्श्वयोः॥ ऋते अ
मरगिरे र्मेरो रुपरि ब्रह्मणः स
भां॥ ये ये मरीचयो र्कस्य प्रया
न्ति ब्रह्मणः सभां॥ ते ते निरस्ता
स्तद्भासा प्रतीप मुपयान्ति वै॥
तस्माद्दिश्युत्तरस्यां वै दिवारा
त्रिः सदैव हि॥ सर्वेषां द्वीपव
र्षाणां मेरु रुत्तरतो यतः॥ इ
ति विष्णुपुराणे २ अंशे ८ अध्या
यः॥ ॥ औदयास्तमने च सर्व
काले भवतः॥ ते च परस्परं सम
वे समानसूत्रस्थे भवतः॥ तत्र
हेतु माह॥ वै यैत्रेति॥ रवे रुद
यास्तमयौ सर्वकाले
व सतो ऽर्कस्य नस्त एव अनेः
वे रुदयास्तमयत्वं दर्शनादर्श
नमात्रमेव॥ दर्शनादर्शनयो रव
धि माह॥ शक्रादीनामिति॥ इन्द्रा
द्यन्य तमस्य पुरे मध्याह्ने तिष्ठन्
देकं पुरं अभितः परद्वयं चेत्येवं
परद्वयं तदन्तरालस्थौ द्वौ च
विकर्णौ कोणौ उदयाद्यवस्था
भिः स्पृशति स्वरश्मिभि र्भासय
तीत्यर्थः विकर्णस्थः अग्न्याद्यन्य
तमकोणे मध्याह्ने स्थितस्तं को
णं अभितः स्थितं कोणद्वयं चेत्ये
वं त्रीन् कोणान् तन्मध्यवर्त्ति द्वे

301

च पुरे तथैवोदयाद्यवस्थाभिः
स्पृशति॥ भूवलयस्यार्द्धं प्रतपन्
दृश्यते तावदहः॥ अर्द्धं त न दृ
श्यते तावद्रात्रि रित्यर्थः॥ तथा
हि ऐन्द्रे पुरे मध्याह्ने यदा तिष्ठ
ति तदा सौम्य पुरस्यानास्त
मयः॥ ऐश कोणस्यानां तृती
यो यामः॥ आग्नेयकोणस्थानां प्रथ
मः॥ याम्येस्थितानां मुदयः॥ एवं य
दा याम्ये मध्याह्ने तिष्ठति तदा
ऐन्द्रे अस्तमयः॥ अग्निकोणे तृ
तीयो यामः॥ नैरृतकोणे प्र
थमो यामः॥ वारुणे उदयः॥ य
दाच वारुणे मध्याह्नः तदा या
मे अस्तमयः॥ नैरृतकोणे तृ
तीयो यामः॥ वायव्ये प्रथमः॥ सौ
मे उदयः॥ यदा सौम्ये मध्या
ह्ने तदा वारुणे अस्तमयः॥ वा
यव्ये तृतीयो यामः॥ ऐश कोणे
प्रथमः॥ ऐन्द्रे उदयः॥ एवं अ
ग्निकोणे यदा मध्याह्ने तदा ऐ
शकोणे अस्तमयः॥ इन्द्रपुरे तृ
तीयो यामः॥ यमपुरे प्रथमः॥
नैरृतिकोणे उदयः॥ इत्यादि
योज्यं॥ एवं मेरोः सर्वतः परि
भ्रमन् सूर्य्यो ऽर्द्धं भूवलयं प्र
काशयन् दर्शनादर्शनाद्यपेक्षयो

अहोरात्रव्यवस्थाकारणं तु कं
भवति॥ सन्निधानं व्यवधानहे
तं मेव रश्मीनां वृद्धि ह्रास तीव्र
त्व मन्दत्वादिक मपीत्याह॥ उदित
इति गोभि रश्मिभिः॥ दिग्वि
भागोप्युदयास्तमयनिमित्तएवे
त्याह उदयेति॥ यत्र यस्योदेति
सा तस्य पूर्वा दिक्॥ यत्रास्तमे
ति सा अपरा प्रतीची॥ तथा
श्रुतिः॥ तस्मादसावादित्यः सर्वाः
प्रजाः प्रत्यगुदेति॥ तस्मात् स
र्व एवान्यतः प्रत्युदगादिति॥ उ
रस्तादुदयन्तं सूर्य्यं पश्यतश्च द
क्षिणवामपार्श्वभागौ दक्षिणो
त्तरे दिशाविति दर्शयन् रश्मि
विस्तारावधि माह॥ यावदिति॥ च
तुर्दिक्षु लोकालोकाचलपर्य्य
न्तं तपतीत्यर्थः॥ मेरौ तु विशेष
माह॥ ऋते इति॥ ब्रह्मसभावर्ज्जं
मेरौ रुपर्य्यपि सर्वत स्तपति त
तु ब्रह्मसभां भासयति॥ तत्र हेतु
माह॥ ये ये मरीचय इति॥ मेरोः
सर्वतोपि विशेषान्तरमाह॥
तस्मादिति॥ यतो यस्मात् सर्वे
षां द्वीपानां वर्षाणाञ्च मेरुरु
त्तरत एव स्थितः॥ तस्मान्मेरो रु
त्तरस्यां दिशि सदा दिवापि

अन्येषां द्विनेऽपि नित्यं रात्रिरेव।
अयंभावः। मेरु प्रदक्षिणी कु
र्व्वन्तं सूर्य्यं ये यत्र पश्यन्ति ते
व तेषां प्राची। तेषांच वामभा
ग एव मेरुः। अतः सर्व्वेषां
सर्व्वदा मेरु रुत्तरतएवाद
क्षिणभागे च लोकालोका
चलः। तस्मादुत्तरस्यां दिशि स
दा रात्रिः। दक्षिणस्यांच दिशि
सदा दिनमिति। यथा। भारत
दिवर्षस्थानां सन्मुखे सूर्य्यमु
द्यन्तं पश्यतां मुत्तरस्यां दिशि
वामभागे मेरो रेकतः सदा
दिनं। अन्यतश्च सदा रात्रिः। द
क्षिणभागे तु सदा दिनमेवेत्य
र्थोऽप्युक्तं भवति। इति तट्टीका
यां श्रीधरस्वामी॥
उद श्वित्। इत्यादि ह्रेनयव
गोलनीयोपयः। किप्पिरमुत्
सम्युदभ्यां। स्यादीनवद् इति
अंक्तिकिषति अञ्जिकृत्। श्
अञ्जकती अञ्जकन्ती। इति दुर्गा
दासः॥
उद्वाहितः त्रि विवाहितः।
यथा। राजमार्त्तण्डे देवलः
बाले वृद्धे तथैवाले कृते
देवमीवाणो। उद्वाहिता या क
न्यायां दम्पत्यो रेक नाशने॥ इ
ति मलमासतत्वं॥
उदरः पुं उदरस्थरोगविशेषः।
उदरी इति भाषा। यथा। अथो
दराधिकारः। तत्रोदरस्य निमि
त्तमाह। रोगाः सर्व्वेऽपि मन्देऽ
ग्नौ सुतरा मुदराणि च। अजी
र्णान्मलिनै श्चान्नै र्जायन्ते
मलसंचयात्। अग्नौ मन्दे
सर्व्वे रोगा जायन्ते किन्तु सुत
रा मतिशयेन उदराणि जाय
न्ते। अपरानपि हेतूनाह। अजी
र्णान्मलिनै श्चान्नैः अन्यान्न
दोषजनकैः मलसंचयात् म
लानां दोषाणां पुरीषस्य चा
तिवृद्धेः अत्रोदरशब्देनोदर
स्था रोगा उच्यन्ते। यत आह।
तात्स्थ्य उदरस्थताभ्यान्च तत्स
मीपतयापि वा तत्साहचर्य्यात्
शब्दानां हीति रुक्का चतुर्विधा
॥ संप्राप्तिमाह। रुद्धाः स्वेदाम्बु
वाहीनि दोषाः स्रोतांसि सं
चिताः। प्राणाग्न्यपानान् संदू
ष्य जनयन्त्युदरं नृणां॥ सा
मान्यरूपमाह। आध्मानं ग
मनेऽशक्ति दौर्ब्बल्यं दुर्ब्बला
ग्निता। शोथः सदनमङ्गानां

सङ्गो वात पुरीषयोः॥ दाहश्च
तन्द्रा च सर्व्वेषु जठरेषु भवन्ति हि
॥ ॥ सविकल्पनिदानपूर्व्विकां
संख्यामाह। पृथक् दोषैः सम
स्तैश्च प्लीहवद्ध क्षतोदकैः। सं
भवन्त्युदराण्यष्टौ तेषां लिङ्गं
पृथक् शृणु॥ ॥ वातो दरस्य
लक्षणमाह। तत्र वातोदरे
शोथः पाणि पान्नाभिकुक्षिषु।
कुक्षि पार्श्वोदर कटी पृष्ठरुक्
पर्व्वभेदनं॥ शुष्ककासोऽङ्गमर्द
श्च गुरुता मलसंग्रहः। श्यावा
रुण त्वगादित्व मकस्मान्मासह
सतोद भे   र तनुकृ
ष्ण सिरानतं। आध्मानादतिव
च्छद माहतं प्रकरोति च॥ वायु
श्चात्र सरुक् शब्दो विचरेत् स
र्व्वतो गतिः। पाणिपादस्यत्र वज
नान्तः पाश्चत्व आर्षन्तान्। कुक्षि
पार्श्वोदरेष्वत्र कुक्षिशब्द उदर
स वामदक्षिणभागद्वयवाची
। सर्व्वतोगतिः सकलकोष्ठ संच
रः॥ पैत्तिक माह। पित्तोदरे
ज्वरो मूर्च्छा दाह स्तृट् कटु
कास्यता। भ्रमोऽतिसारः पीतत्वं
त्वगादावुदरं हरित॥ पीतता
म्रसिरानद्धं सस्वेदं सोष्म
दह्यते। धूमायते मृदुस्पर्शी क्षि
प्रपाकं प्रदूयते॥ हरित श्याक
वर्णा। सोष्म अन्तस्तापयुक्तं। द
ह्यते वहिर्दाहयुक्तं। धूमायते
धूममिवोद्वमति। क्षिप्रपाकं क्षि
प्रपाकात् जलोदरतां याति।
प्रदूयते व्यथते॥ कफोदर मा
ह। श्लेष्मोदरेऽङ्गसदनं स्वाप
श्वयथुगौरवं। तन्द्रोत्क्लेशो ऽरु
चिः श्वासः कासः शुक्लत्वगादि
ता॥ उदरं स्तिमितं स्निग्धं शुक्ल
राजीततं महत्। चिराभिवृद्धि
कठिनं शीतस्पर्शं गुरु स्थिरं॥
स्वापः स्पर्शाज्ञता। गौरव मङ्गा
नां। तन्द्रा निद्राबाहुल्यं। उत्क्ले
शो हृल्लासः। शुक्लराजी ततं
शुक्लशिराव्याप्तं॥ ॥ सन्नि
पातोदर माह। स्त्रियो ऽन्नपानं
नख लोम मूत्र विडार्त्तवै र्यु
क्तं मसाधुवृत्ताः। यस्मै प्रयच्छ
न्त्यरयो गराश्च दुष्टाम्बुदूषी वि
षसेवनाच्च॥ तेनाशु रक्तं कुपि
ताश्च दोषाः कुर्य्युः सुघोरं
जठरं त्रिलिङ्गं। तच्छीतवाते
भृशदुर्द्दिने च विशेषतः कुप्य
ति दह्यते च॥ स चातुरो मूर्च्छ
ति हि प्रसक्तं पाण्डुः कृशः

सुष्यति तस्यया चा दूष्योदरं
कीर्त्तितं मेतदेव प्लीहोदरं की
र्त्यते निबोध॥ स्त्रिय इत्य
विवेकिसंनिहितजनोपलक्षणं
।नाश्च सर्वो भाग मिछन्त्यः।
विट् मार्जारादीनां। आर्त्तवं र
जः। आरयो वा मारात् संयोग
जानि विषाणि। दुष्टाम्बु सविष
मत्स्य तृण पर्णादियुतं शटितंच
॥दूषीविषं विष मेवाम्नायुपद्या
तेन स्वल्पप्रभावं। यत उक्तं। जी
र्णं विषघ्नौषधिभि र्हतं वा दा
वाग्नि वातातप शोषितंच। स्व
भावतो वा गुणविप्रयुक्तं विषं
हि दूषीविषता मुपैति॥ गुण
विप्रयुक्तं गुणवियुक्तं तत्। उ
दरं शीततनादिषु ऊष्याति। दूषी
विषयस्य कोपात्। मूर्छांनिवि
षयोगात्। प्रसक्तं निरन्तरं ए
तदेव सन्निपातोदरं। तन्त्रान्त
रे दूष्योदरं कीर्त्तितं। अथवा
परस्परं दूषयन्तीति दोषा ए
व दूष्या तैः कृत मुदरं दूष्यो
दरं॥ ॥प्लीहोदर माह। वर्द्धते
प्लीह ह्यधा यद्धिप्यात् प्लीहो
दरं हि तत्। तद्धामे वर्द्धते पा
र्श्वे निमित्तं तस्य तत्र यत्

प्रवृद्ध प्लीहलिङ्गानि यान्युक्तानि
भिषग्वरैः। प्लीहोदरेपि दृश्यन्ते
तानि सर्वाणि देहिनां॥ प्लीहो
दरस्यैव भेदो यकृद्दाल्युदरं
न पुन रधिक मित्याह। सव्या
न्यपार्श्वे यकृति प्रवृद्धे ज्ञेयं स
कृद्दालयति दोषे भेदयतीति
यकृद्दाल्युदरं तदेव उदर मेव
॥ ॥वद्धगुद माह। यस्यान्त्र म
न्नैरुपलेपिभि र्वा वालाश्मभि
र्वा पिहितं यथावत्। संचीयते
यस्य मलः सदोषः शनैः शनैः श
करवच्च नाड्यां॥ निरुध्यते यस्य
गुदे पुरीषं निरेति कृच्छ्रादपि
चाल्प मल्पं। हृन्नाभिमध्ये परिवृ
द्धि मेति तस्योदरं वद्धगुदं वद
न्ति॥ उपलेपिभिः पिच्छिलै रन्नैः
शाक शालूकादिभिः। वाला
श्मभिः वालुकाभिः कर्कशै र्वा
वालैः केशैः अश्मभिः पाषाणै
र्वा। यथावत् यस्य यत् संभवति।
मलः पुरीषं। शंकरवत् संमा
र्जनीलिप्तस्तृणधूल्यादिवत्
। शंकरो ऽवकरः प्रमान्
दृत्यमरः इत्यमरः। शंके
रो क्षुण इतिलोके। नाड्यां
अन्त्रनाड्यां। हृन्नाभिमध्ये

हृन्नाभ्यो र्मध्ये॥ क्षतोदर मा
ह। शल्यं यथान्नोपहृतं
यदन्त्रं भुक्तं भिनत्त्यागत मन्य
था वा। तस्मात् क्षतोत्थात् स
लिलप्रकाशः स्रावः स्रवेद्दे
गुदतस्तु भूयः॥ नाभेरध श्चोद
र मेति वृद्धिं निस्तुद्यते दाल्य
ति चातिमात्रं। एतत् परिस्राव्यु
दरं प्रदिष्टं दकोदरं कीर्त्त्यते नि
बोध॥ शल्यं कण्टकादि। अ
न्नोपहृतं अन्ननिहितं। भुक्तं य
दन्त्रं भिनत्ति। तथा अन्यथा आ
गतं भोजनं विना आगतं शरादि
तदपि यदन्त्रं भिनत्ति एतदुप
लक्षणं। जृम्भन मभ्यशनं वा
यदन्त्रं भिनत्ति। यत उक्तं चरके।
शर्करा तृण काष्ठास्थि कण्टकै
रन्नसंयुतैः। भिद्येतान्त्रं यदा भु
क्तं जृम्भयात्यशनेन वा। तस्मा
त् भिन्नात् रन्ध्रात्। गुदतस्तु भूयः
अन्त्रात् संस्रवन्नपि गुदतः स्रवे
दित्यर्थः। दाल्यति विदीर्य्यत इ
व। परिस्राविहिरार्थत्वात्। एतत् दको
दरं तन्त्रान्तरे परिस्राव्युदरं प्रदि
ष्टं॥ उदकोदर माह। यत् स्नेह
पीतो ऽप्यनुवासितो वा वान्तो
विरिक्तो ऽप्यथवा निरूढः।

पिवेज्जलं शीतल माशु तस्य
स्रोतांसि दुष्यन्ति हि तद्वहानि
॥ स्नेहोपलिप्तेष्वथवापि तेषु
दकोदरं पूर्व्ववदभ्युपैति॥ स्नि
ग्धं महत्तत् परिवृत्तनाभिः स
मानतं पूर्ण मिवाम्बुना च। य
थादृतिः क्षुभ्यति कंपते च शब्दा
यते चापि दकोदरं तत्॥ स्नेह
पीतः पीत इत्यत्राध्यवसितादि
त्वात् कर्त्तरि क्तः पश्चात् स्नेहं
पीतः स्नेहपीत इति तत् पुरुषः
।तेन स्नेहं पीतवानित्यर्थः। अ
नुवासितो वा गृहीतानुवास
नवस्तिः। वान्तः अत्रापि पूर्ववं
त् कर्त्तरि क्तः तेन वान्तवानित्य
र्थः। एवं विरिक्तः विरिक्तवान्
।तथा निरूढः गृही निरूहवस्तिः
।स चेदाशु शीतलं जलं पिवेत्।
तस्य तद्वहानि जलवहानि स्रो
तांसि दुष्यन्ति स्वकर्म्मदुष्टानि
भवन्ति जलवहेषु स्रोतःसु दुष्टे
षु सत्सु अन्नरसे ऽपस्नेहत्वा
त्तेन वहिर्भूते दकोदर मायाति
।अथवा तेषु उदक वहेषु
स्रोतःसु स्नेहोपलिप्तेषु पूर्व्व
वत् यथास्वं। अन्नरसो उप
स्नेहत्वायेन वद्धितैः स्रुते

दकोदर मायाति॥तथा जले
पि वहिर्निःसृते दकोदर माया
ति॥तत् उदरं परिहृतनाभिः ग
म्भीरनाभिः समाततं सर्वं॥य
थादृतिः चर्ममये जलाहरण
भाजने सम्भृति स्यन्दजेत दोल
नेन सम्प्लवति कम्पते वहिः
शब्दायते कंपमाने सत् शब्द
करोति॥साध्यासाध्य लक्षण
माह॥जन्मनैवोदरं सर्वं प्रायः
कृच्छ्रतमं मतं॥वलिनस्तदजा
ताम्बु यत्नसाध्यं नवोत्थितं॥व
लिनः अजाताम्बु नवोत्थितं च
यत्नसाध्य मित्यन्वयः॥पक्षाद्व
द्धगुदं तद्धि सर्वं जातोदकं त
था॥प्रायो भवत्यभावाय छिद्रा
न्त्रञ्च दकोदरं॥छिद्रान्त्रं शरा
दिना छिद्रमन्त्रं यस्य तदुदरं
अभावाय भवति॥जातोदक
मोदरस्य लक्षणमाह॥चरकः
॥पादः शूलादीनि शिव स्याभे श
ब्दकरं मृदु॥अव्यक्तशिराःस्प
र्शे निताम्बु मुदरं महत्॥आल
स्य मास्येदेशं मूत्रबद्ध सक्तको
ते॥जातोदकस्य लिङ्गः स्यान्म
न्दः अग्निः पाण्डुताऽपि च॥शूला
द्दे ऊरिस्तोपस्थं नुपलिवनन्नुत
वं

चिरकालमभिवृद्धिमागतं वृद्धिमागतोदरं अचिरेण विवर्जयेत्॥

।वल शोणित मांसाग्नि परि
क्षीणञ्च वर्जयेत्॥शूलातस्या
ने शूनाक्षमिति च पाठः॥ऊरि
लोपस्थं वक्रमेहनं॥उपक्लिन्न
त्वचं उपरि आर्द्रातन्वीमिव त्वस्य
।ते उदरिणं॥पार्श्वभङ्गान्नविद्वेष
शोकातीसारपीडितं॥विरिक्तं चा
प्युदरिणं पूर्यमाणं विवर्जयेत्
॥ ॥अथोदरस्य चिकित्सा॥
ऐरण्डतैलं दशमूलमिश्रं गो
मूत्रयुक्तं त्रिफलारसो वा॥नि
हन्ति वातोदर शोथ शूलान् क्वा
थः समूत्रो दशमूलजश्च॥कुष्ठ
दन्तीयवक्षाराः पाठा त्रिलवणं
वचा॥शुण्ठी चोसाम्बुना पीतं
वातोदरं रुजापहा॥कुष्ठादि
चूर्णं॥ ॥लशुनस्य तुला
मेकां जलद्रोणे विपाचयेत्
।त्रिकटु त्रिफला दन्ती हि
ङ्गु सैन्धव चित्रकं॥देवदा
रु वचा कुष्ठं मधु शिग्रुः
पुनर्नवा॥सौवर्चलं विडङ्गा
नि दीप्यको गजपिप्पली
॥एतेषां पलिकां भागां त्रि
वृतः षट्पलानि च।पि
ष्ट्वा कषायेणैतेन तैलं
महिषाम्लं पचेत्॥ततपि

वेत् प्रातरुत्थाय यथाग्निवलमा
त्रया॥निहन्ति सकलान् रोगान्
उदराणि विशेषतः॥मूत्रकृच्छ्रं मु
द्रावर्त्तं मन्त्रहार्दि गुदक्रमीन्॥पा
र्श्वऊरुत्रिभवं शूलं मासशूलं म
रोचकं॥यकृद्प्लीहिकानाहान
प्लीहानं चाङ्गवेदनां॥मासमात्रे
ण नश्यन्ति अशीति वातजा ग
दाः॥रसोनतैलं॥ ॥पित्तोदरेषु
वलिनं पूर्वं मेव विरेचयेत्॥उ
र्द्धं हन्तुवाम्यादौ शोधयेत्
सोरवल्लिना॥संजातवलं का
याग्निं पुनःस्निग्धं विरेचयेत्
॥पयसाच त्रिवृत् कल्कं रुवुकं
स मूत्रेन च॥पिप्पल्यादिगणेना
जं पाचितं पाययेद्विषकानरं प
यभुजे नित्यं कफोदरनिवृत्तये
॥नागरे त्रिफला कल्कं दध्यम्बु
परिपेषितैः॥पाचितं तैलमाज्य
ञ्च पिवेत् सर्वोदरापहं॥नाग
रादितैलं घृतञ्च॥ ॥शालि
षष्टिक गोधूम यवानीवारभो
जनं॥निरुहो रेचनं श्रेष्ठं सर्वे
षु जठरेषु च॥आनूप मादन
मांसं शाकं पिष्टकृतं तिलाः।
व्यायामाञ्च दिवास्वप्न पा
न पानानि वर्ज्ये

येत्॥अथोग्र लवणोस्रानि विदा
हीनि गुरूणि चा॥नाद्यादन्नानि
जठरे तोयपानञ्च वर्जयेत्॥उद
राणां मलाढ्यत्वादवृशः शोध
नं हितं॥क्षीरेणैरण्डतैलं वा पिवे
न्मूत्रेण वा सकृत्॥ ॥वातोद
री पिवेत्तक्रं पिप्पलीलवणान्वि
तं॥शर्करामरिचोपेतं स्वादु पि
त्तोदरी पिवेत्॥यवानीहपुषा
जाजी व्योषयुक्तं कफोदरी॥स
न्निपातोदरी युक्तं त्रिकटु क्षार
सैन्धवैः॥यवानी हपुषा धान्य
त्रिफला चोपकुञ्चिका॥कार
वी पिप्पलीमूलमजगन्धा शटी
वचा॥शताह्वा जीरकं व्योषं स्व
र्णक्षीरी च चित्रकं॥द्वौ क्षारौ पौ
ष्करं मूलं कुष्ठं लवणपंचकं॥वि
डङ्गञ्च समांशानि दन्त्याभागत्र
यं भवेत्॥त्रिवृद्विशाल्ये द्विगुणे
सातला स्याच्चतुर्गुणा॥एष नारा
यणो नाम्ना चूर्णो रोगगणापह
ः॥एनं प्राप्य निवर्त्तन्ते रोगा वि
ष्णुमिवासुराः॥तक्रेणोदरिभिः
पेयो गुल्मिभिर्वदराम्बुना॥आ
नह्यवाते सुरया वातरोगे प्रसन्न
या॥दधिमण्डेन विड्वन्धे दा
डिमाम्बुभिरर्शसे॥परिक

नैषु हस्तामे रुसामुभि रजीर्णे। के॥भगन्दरे पाण्डुरोगे कासे श्वासे गलग्रहे।हृद्रोगे ग्रहणीरोगे कुष्ठे मन्दे ऽनले ज्वरे॥दंष्ट्राविषे मूलविषे सगरे कृत्रिमे विषे।यथार्हं स्निग्धकोष्ठेन पेयमेतद्विरेचनं॥उपकुञ्चिका कारवी च ह्रस्वजीरकः।यस्य मगरेला नाम इति लोके।तस्य मागद्वयं ग्राह्यं पुनरुक्तेः। स्वर्णक्षीरी चोक इति लोके। विशाला इन्द्रवारुणी।सातला सीहुण्डभेदः सातलेत्येव प्रसिद्धा।परिकर्त्ती गुदे परिकर्त्तनवत् पीडा।इति नारायणचूर्णं॥स्नुक्क्षीर दन्ती त्रिफला विडङ्ग सिंही त्रिवृच्चित्रक सूर्यकल्कैः।चूर्णं विपक्वं कुडवप्रमाणं तोयेन तस्मात् समेन कर्षं।पीतो नरः सम्यगनुपिवेद्विरेक पेयं रसं वा प्रपिवेद्धितं सः।नाराचमेनं जठरामयाणां युक्त्या प्रयुक्तं प्रवदन्ति सन्तः॥नाराचचूर्णं॥वज्राण्ड्याः कर्षमात्रा घाः कल्कं दध्यादिवेष्टितं।निगिलेद्धारिणा नित्य मुदरव्याधिशान्तये॥वज्राण्डी स्नुक्पत्रा माणभेदः।वज्राण्डी इति लोके॥पुनर्नवा दारु निशा सविश्वा पटोल पथ्या पिचुमन्दमुस्तैः सनागर छिन्नरुहेन सर्वैः कृतः कषायो विधिना विपेयः॥गोमूत्रयुक्तः गुग्गुलुनाच युक्तः पीतः प्रभाते निघनं नराणां। सर्वाङ्गशोथोदर पार्श्वशूल श्वासान्वितं पाण्डुगदं निहन्ति॥पुनर्नवादिकाथः।इत्युदराधिकारः।इति भावप्रकाशः॥

उदरव्याधिः।पुं उदररोगविशेषः।यथा।कदली यवक्षारसि पानीयेन प्रसाधितं।तदास्वादनाच्छमयन्ति उदरव्याधयो ऽखिलाः॥इति गारुडे १९४ अध्यायः॥

उद्रुज श त्यागे।इत्यादिर्दन्त्य वर्गान्तोपधः।क्विप समुत्समुद्भ्यां।स्वादो नवट इति उज्झिषति उज्झन्त।श उज्झती उज्झन्ती।इति दुर्गादासः॥

उद्वर्त्तनं क्ली एकविधेलालवङ्ग कर्पूर कस्तूरी मरिच नवक्षेणी।इति पाकराजेश्वरः॥

309

उद्भूतः त्रि उत्पन्नः।यथा।ईशानसंहितायां।माघे कृष्ण चतुर्दश्यां मादिदेवो महानिशि।शिवलिङ्गतयोद्भूतः कोटिसूर्यसमप्रभः॥इति तिथ्यादितत्त्वं॥

उद्रेकः पुं उपक्रमः।आद्धिः।यथा।सुधैव कौरवति जहार जगतां मनः।न जाने यौवनोद्रेके जीवनस्यापि का गतिः॥इत्युद्भटः॥हरिस्ते साहस्रं कमलवलिमाधाय पदयोर्यदेकोणे तस्मिन्निज मुदहरन्नेत्रकमलं।गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा त्रयाणां रक्षायै त्रिपुरहर जागर्त्ति जगतां॥इति महिम्नःस्तोत्रं॥

उद्वाहितः त्रि विवाहितः।यथा।राजमार्त्तण्डे देवलः।बाले हृदे तथैवास्ते कुरुते देहमन्त्रिणा।उद्वाहितायां कन्यायां दम्पत्यो वैकनाशनं॥इति ज्योतिषतत्त्वं॥

उद्विग्नः त्रि उद्वेगयुक्तः।यथा।ते हेम्नरूप्य संभग्न तन्त्र भिन्न विपन्न कैः।निमग्नोद्विग्न संक्षीणैः पक्षे दीनैश्च मेदिनी॥इति भट्टिकाव्ये ८ सर्गः॥

उद्विवर्हणं क्ली उद्धारकरणं।यथा।कः श्रद्दधीतान्यतमस्तव प्रभो रसाङ्गताया भुव उद्विवर्हणं।इति श्रीभागवते ३ स्कंधे १३ अध्यायः॥उद्विवर्हणं उद्धरणं।इति तट्टीकायां श्रीधरस्वामी॥

उध्रस ग उञ्छे।एतत्सादो पञ्चमस्वरः।मध्ये केवल थकारस्याधो रेफः।कादावुध्रस उञ्छ इत्यन्यत्र मुद्रिसोरादिकः पक्षे तस्य ध्रासयतीत्यपरं अस्मात्तिष्ठेतां ध्रसः उध्रसेस गणद्वयेपि पठन्ति तेषां मते धावित्यावुध्रसाति निगद्यते लिपिविकृते ऽप्युध्रासयत्यन्यतः।अत्र उध्रसेसति त अत उकारः न तूपसर्गः।ग उध्रसाति शास्यं दीनः॥इति दुर्गादासः॥

उध्रस क उत्क्षिपि॥उञ्छे।क उध्रासयति धूलिं वायुः।इति दुर्गादासः॥

उन्द ध ई क्लेदे।क्लसादिः।क्लेद आर्द्रीभावः।ध उनत्ति

वत्तं पयसा॥६ उन्द्रः उन्नः।उन्नि
दिषति।इति दुर्गादासः॥
उन्दुरः पुं जन्तुविशेषः।तत्
पर्य्यायः।मूषकः ६ मूषः ७ मू
षीकः ८ उन्दूरुः ९ खनकः १०
वृकः ११ वृषः १२ आखनिकः १३
वृशः १४ दीना १५ मूषीका १५
मूषा १६ मूषीका १७ मूषिका १८
।इति शब्दरत्नावली॥बिलेशयः
१९ सुषिरः २० इन्दूरः २१।इति
जटाधरः॥छुछुन्दरस्य तस्य पर्य्या
यः।चिक्कः २२ वेश्मनकुलः
२३ चिक्का २४।इति च शब्द
रत्नावली॥हालाहला २५ ग्र
न्थिका २६ इति च जटाधरः
॥
उन्नतः त्रि वर्द्धितः।तत्पर्य्या
यः।उच्चैः २ इति शब्दरत्नाव
ली।तुङ्गः ३ इति जटाधरः॥
उन्नु प श एत्नैौ।क्लेदने।प
श उन्नत्ति कुम्भं जलेन लो
कः।उन्नामास।इति दुर्गादा
सः॥
उन्मत्तः त्रि उन्मादरोगविशिष्टः
।तस्यौषधं यथा।कूर्म्ममत्स्या
खु महिष गो शृगाल श्व वा
नराः।विडाल बर्हि का

काश्च वराहोलूक कुक्कुटाः
हंस एषाञ्च विन्मूत्रं मांसं वा
रोम शोणितं।धूपं दद्याज्ज्वरा
र्त्तस्य उन्मत्तेभ्यश्च शान्तये॥
एतान्यौषध जातानि धूपिता
नि महेश्वर।निघ्नन्ति यानि रो
गाणि बृन्त मिन्द्राशनि र्यथा॥
इति गारुडे १९५ अध्यायः॥
॥ ॥उद्वाहप्रामाण्ये यथा॥
उन्मत्तानाञ्च यागाथा शिशू
नां चेष्टितं च यत्।स्त्रियो यत्र
प्रभाषन्ते नास्ति तत्र व्यतिक्रमः
॥आदौ गच्छति देवेषु पश्चात्
गच्छति मानुषान्।नादेशिता
वाग्वदति सत्या ह्येषा सरस्वती
॥इति मलमासतत्त्वं॥
उन्मादः पुं मानसरोग विशेषः
।तस्यौषधं यथा॥वचा त्रिकटु
कञ्चैव करञ्जं देवदारु च।म
ञ्जिष्ठा त्रिफला श्वेता शिरीषो
रजनीद्वयं॥प्रियङ्गु निम्ब त्रिक
टु गोमूत्रेणावघर्षितं।नस्य मा
लेपनञ्चैव स्नानमुद्वर्त्तनं तथा
॥अपस्मार विषोन्माद शोषा
लक्ष्मी ज्वरापहा।भूतेभ्यश्च भ
यं हन्ति राजद्वारे च शासनं॥
इति गारुडे १९५ अध्या

यः॥अथ उन्मादाधिकारः।अत्र
उन्मादस्य निरुक्तिमाह।मदय
न्त्युद्धता दोषा यस्मादुन्मार्ग
मास्थिताः।मानसो ऽयं मनो
व्याधि रुन्माद इति कीर्त्तितः
॥अयमर्थः।यस्माद्धेतो रुद्धताः
प्रवृद्धा दोषा उन्मार्ग मास्थिताः
मदयन्ति चित्तं विक्षिपन्त्यस्मि
न्नास्त्रतो ऽय मुन्माद इति की
र्त्तितः।स उन्मादः मानसो व्याधिः
मनोविकृत्यकरणात्॥ ॥तस्यैवा
वस्थाभेदेन नामान्तर माह।स
चाप्रवृद्ध स्तरुणो मदसंज्ञा बिभ
र्त्ति च।स उन्माद स्तरुणो नवी
नः॥ ॥उन्मादस्य विप्रकृष्ट
निदान माह।विरुद्धदुष्टाशुचि
भोजनानि प्रधर्षणं देवगुरु
द्विजानां।उन्मादहेतु र्भयह
र्षपूर्वो मनोभिघातो विषमा
श्च चेष्टाः॥दुष्टं धत्तूरबीजादि
सहितं।अशुचि रजस्वलादि
स्पृष्टं।प्रधर्षणं मभिभवः।विष
माश्च चेष्टाः बलवद्विग्रहादयः
॥सन्निकृष्टं निदान माह।एकै
कशः सर्वशश्च दोषै रत्यर्थ मु
च्छितैः।मानसेन च दुःखेन
स पञ्चविध उच्यते ॥

विषाद्भवति षष्ठञ्च यथास्वं तत्र
भेषजं॥ ॥तस्य सम्प्राप्ति माह।
तैरल्पसत्वस्य मलाः प्रदुष्टा बु
द्धे र्निवासं हृदयं प्रदूष्य।स्रोतां
स्यधिष्ठाय मनोवहानि प्रमोह
यन्त्याशु नरस्य चेतः॥अल्पसत्व
स्य अल्पसत्वगुणस्य।मलावाता
दयः।बुद्धे र्निवासं हृदयं प्रदुष्ये
ति।एतेनाश्रयस्य दुष्या तदाश्रिता
या बुद्धे रपि दुष्टि रुक्ता।मनोवहा
नि स्रोतांसि।हृदयाश्रितानि दश
।एतानि विशेषतो बोद्धव्यानि।
यत स्वरूपेण सकलशरीरस्रोतां
स्येव मनोधिष्ठानत्वेनोक्तानि।प्र
मोहयन्ति विकृतं कुर्वन्ति॥ ॥
उन्मादस्य सामान्यं रूपमाह।
धीविभ्रमः सत्वपरिप्लवश्च प
र्य्याकुला दृष्टि रधीरता च।अ
बद्धवाक्त्वं हृदयञ्च शून्यं
सामान्यमुन्मादगदस्य लिङ्गं॥
धीविभ्रमः शुक्तिकायां रजतज्ञा
नं।सत्वपरिप्लवः सत्वं मन स्तस्य
चाञ्चल्यं।अबद्धवाक्त्वं अस
म्बद्धभाषित्वं।शून्यं स्फुतिशून्यं
॥ ॥वातिकोन्मादस्य निदा
नपूर्व्विकां सम्प्राप्ति माह।
रूक्षाल्पशीतान्न

विरेकयात्र त्वयोपवासै रनिलो
तिहद्धः। चिन्ताभिदुष्टं हृदयं प्र
दूष्य बुद्धिं स्मृतिं वा प्युपहन्ति
शीघ्रं॥ प्रदूष्य प्रकर्षेण दूषयि
त्वा॥ तस्यैव रूपा। अस्थानहास
स्मित नृत्यगीत वागङ्ग विक्षेप
ण रोदनानि। पारुष्य कार्श्यारु
णवर्णताश्च जीर्णे बलञ्चानि
लजस्य रूपं॥ अस्थाने अनवस
रे हास्यादीनि रोदनान्तानि। जी
र्णे आहारे बलं व्याधेः॥ पैत्तिक
स्य निदानपूर्विकां संप्राप्तिमा
ह। अजीर्ण कट्वम्ल विदाह्यशी
तै र्भोज्यैश्चितं पित्तमुदीर्णवे
गं। उन्मादमत्युग्र मनात्मकस्य
हृदिस्थितं पूर्ववदाशु कुर्यात्
॥ हृदिस्थितं पित्तं चितं सं
चितं। पुनः अजीर्णकट्वम्ल
विदाह्यशीतै र्भोज्यैः उदीर्णवे
गं सत् उन्मादं कुर्यात् पूर्ववत्
हृदयं प्रदूष्य इत्यर्थः॥ ॥तस्य
रूपमाह। अमर्ष संरम्भ विनग्न
भावाः सन्तर्जनाभिद्रवणौष्ण्य
रोषाः। प्रच्छाय शीतान्न जलाभि
लाषः पीताच भाः पित्तकृतस्य
लिङ्गं॥ अमर्षो ऽसहिष्णुता। सं
रम्भः आरम्भटी आडम्बर

इति यावत्। सन्तर्जनं परत्रास
नं। अभिद्रवणं पलायनं। उष्ण
गात्रे। चोषो दाहविशेषः। प्र
च्छाय इत्यादि छायायां शी
तेषां अन्नजलयो रभिलाषः॥
श्लैष्मिकस्य निदानपूर्विकां
संप्राप्तिमाह। सम्पूरणै र्मन्द
विचेष्टितस्य सोष्मा कफो म
र्म्मणि सम्प्रवृद्धः। बुद्धिं स्मृतिं
वा प्युपहन्ति चित्तं प्रमोहयन् सं
जनयेद्विकारं॥ सम्पूरणे भोजना
दिभिः। मन्दविचेष्टितस्य व्याया
म रहितस्य। सोष्मा कफ इति
कफोऽप्युन्मादं करिष्यन् पित्तं
सहाय मपेक्षते व्याधिस्वभाव
त। मर्म्मणि अत्र मर्म्मशब्देन हृ
दयमुच्यते। विकार मुन्मादरू
पं॥ तस्य रूपमाह। वाक्चेष्टि
तं मन्दमरोचकश्च नारीविवि
क्तप्रियता च निद्रा। छर्दिश्च ला
ला च बलञ्च भुक्ते नखादि शौ
क्ल्यञ्च कफात्मके स्यात्॥ वा
क्चेष्टितं मन्दं वचनं मन्दं। नारी
विविक्तप्रियता नारीप्रियता विज
नप्रियता च। भुक्ते सति बलं वा
धेः॥ सान्निपातिकस्य निदान
पूर्विकं लक्षणमाह। यः सन्नि

पातप्रभवोऽतिघोरः सर्वैः सम
स्तैः स तु हेतुभिः स्यात्। सर्वा
णि रूपाणि बिभर्त्ति तादृग्वि
रुद्धभेषज्यविधिः विवर्ज्यः॥ स
सान्निपातिक उन्मादः। सन्नि
पातग्रहणेनैव सर्वात्मकत्वे ल
ब्धे पुनः सर्वैरिति यत्कृतं तद्र
जस्तमः प्रापणार्थं। तेन रजस्त
मो मिलितैः त्रिदोषैः। तेन वामा
दयो रजस्तमोभि र्मनोदोषै र्मि
लिताः समस्तैश्च निदानैः कुपि
ता उन्मादं जनयन्ति। सर्वैर्हेतु
भिः समस्तै र्मिलितैः स्यात्। अय
तोऽन्यो व्याधिः सर्वैर्हेतुभि र्मि
लितैरेव भवतीति नियमो ना
स्ति। अयन्तु व्याधिप्रभावात्
सर्वैर्हेतुभिः मिलितैः स्यात्। ता
दृगुन्मादः विरुद्धभेषज्यविधिः।
विरुद्धभेषज्यविधि रिति कोऽर्थः
। त्रिदोषजे प्रत्येकं वातादि प्र
त्यनीका कार्या। साच परस्प
र विरोधिनी त्रिदोषं हन्ति कि
न्विदेवद्रव्य मामलकादि न
त्रायोगिकं। अतएव विवर्ज्य
ःन चिकित्स्य इत्यर्थः॥ ॥अ
नोडः विजस्य विप्रकृष्ट निदान
माह। चौरै र्नरेन्द्रपुरुषै रिर

भि स्तथान्यै र्विप्रासितस्य धन
बान्धव संक्षयाद्वा। गाढं क्षते म
नसि च प्रियया रिरंसो र्जायेत चो
त्कटतरो मनसो विकारः॥ अ
न्यै र्हिंसादिभिः। गाढ मतिशये
न। क्षते अभिहते। प्रियया प्राप्तु
मशक्यया रिरंसोः पुरुषस्य वि
कारः उन्मादरूपः॥ ॥तस्य रू
पमाह। चित्रं ब्रवीति च मनोनु
गतं विसंज्ञो गायत्यथो हसति
रोदिति चातिमूढः। चित्रमाश्चर्य्य
। मनोनुगतं गोप्यमपि। विसंज्ञो
विरुद्धज्ञानः। अतीवमूढः अती
व ज्ञानशून्यः। अत्र विकल्पो बो
द्धव्यः॥ विषजस्य रूपमाह। रक्ते
क्षणो हतबलेन्द्रियभाः सुदीनः
श्यावाननो विषकृतेन भवेत्परा
सुः। परासुः मृतः॥ अरिष्टमाह।
अवाङ्मुखस्तून्मुखो वा क्षीण
मांसबलो नरः। जागरूको ह्यसन्दे
हमुन्मादेन विनश्यति॥ अथ
देवादिकृतस्योन्मादस्य सामा
न्यलक्षणमाह। अमर्त्य वाग्वि
क्रमवीर्यचेष्टो ज्ञानादि वि
ज्ञान बलादिभिर्युक्तः। प्रकोप
कालो नियमश्च यस्य
देवादिजन्मा स म

नोविकारः॥अमर्त्यवाविक्रम
वीर्यचेष्टः न मर्त्यस्येव मनुष्य
स्येव वागादयो यत्र सः॥विक्रमः
पराक्रमः॥वीर्य्यं शौर्य्यं॥ज्ञानादि
विज्ञान बलादियुक्तः॥ज्ञाने बु
द्धिः॥आदिपदेन तद्भेदा मेधा
विचारणा स्मृत्यादयो गृह्यन्ते
॥विज्ञाने शिल्पादिविषयकं
ज्ञानं॥चेष्टा पाटवं॥आदिपदेना
भिमानादि गृह्यते॥नियतः व
हमाणलिख्यादिभिः॥मनोवि
कार उन्मादः॥तत्रदेवाविष्ट
स्य लक्षणमाह॥सन्तुष्टः शु
चि रतिदिव्यमाल्यगन्धो निस्त
न्द्रो ऽवितथ संस्कृतप्रभावी॥ते
जस्वी स्थिरनयनो वरप्रदाता
ब्रह्मण्यो भवति नरः स देव
जुष्टः॥अतिदिव्यमाल्यगन्धः
अतिशयो दिव्यमाल्यस्येव ग
न्धो यस्य सः॥निस्तन्द्रः निद्रार
हितः॥अवितथं सत्यं॥ब्रह्मण्यः
ब्राह्मणभक्तः॥दैत्याविष्ट मा
ह॥संस्वेदी द्विज गुरु देव दो
षवक्ता जिह्माक्षो विगतभयो
विमार्गदृष्टिः॥सन्तुष्टो भवति
न चान्न पानजाले दुष्टात्मा
भवति स देवशत्रुजुष्टः॥वि

मार्गदृष्टिः कुमार्गरतः॥दुष्टात्मा
दुष्टस्वभावः॥गन्धर्वाविष्ट मा
ह॥हृष्टात्मा पुलिन वनान्तरो
पसेवी स्वाचारः प्रियपरिगीत
गन्धमाल्यः॥नृत्यन् वै प्रहसति
चारु चाल्पशब्द गन्धर्वग्रह प
रिपीडितो मनुष्यः॥हृष्टात्मा
हृष्टजीवात्मा॥पुलिनं तोयोत्थि
तं तटं॥वनान्तरं वनमध्यं॥त
योः सेवी॥स्वाचारः अनिन्दिता
चारः॥प्रियाणि परि समन्ततो
भावेन गीत गन्ध माल्यानि यस्य
स तथा॥चारु चाल्पशब्द मिति
हसनक्रियाया विशेषणं॥यक्षा
विष्ट माह॥ताम्राक्षः प्रियतनु
रक्तवस्त्रधारी गम्भीरोद्रुत ग
ति ह्रस्ववाक् सहिष्णुः॥तेजस्वी
वदति च किं ददामि कस्मै यो
यक्षग्रह परिपीडितो मनुष्यः॥
पित्राविष्ट माह॥प्रेतानां स दि
शति संस्तरेषु पिण्डान् शान्ता
त्मा जल मपि चापसव्यवस्त्रः
।मांसेप्सु तिल गुड पायसाभि
काम स्तद्भक्तो भवति पितृग्र
हाभिजुष्टः॥प्रेतानां मृतानां
पितृणां॥दिशति ददाति॥अप
सव्यवस्त्रः दक्षिणस्कन्धधृत

ज्ञोत्तरीयः॥ नागाविष्ट माह॥
यस्तूर्व्यां प्रसरति सर्पवत् क
दाचित् सृक्किणी मुहुरपि जि
ह्वयावलेढि॥क्रोधालुः गुड मधु
दुग्ध पायसेप्सु विज्ञेयः सत्व
त्व भुजङ्गमेन जुष्टः॥प्रसरेति
सर्पवत् उदरेण चलति॥सृक्क
णी ओष्ठप्रान्तौ॥ ॥राक्षसाविष्ट
माह॥मांसासृक् विविधसुरावि
कारलिप्सु र्निर्लज्जो भृश मति
निष्ठुरोतिशूरः॥क्रोधालु र्विपु
लबलो निशाविचारी शौच
द्विट् भवति स राक्षसैर्गृहीतः
॥अतिनिष्ठुरो ऽतिनिर्दयः॥ ॥
ब्रह्मराक्षसाविष्ट माह॥देव वि
प्र गुरुद्वेषी वेद वेदाङ्ग विदु
षिः॥आत्मपीडाकरो ऽहिंस्रो
ब्रह्मराक्षससेवितः॥अहिंस्रः
अहिंसाशीलः॥ ॥पिशाचा
विष्ट माह॥ऊर्ध्वहस्तः कृशपरु
षो विरुद्धभाषी दुर्गन्धो भृश
मशुचि स्तथातिलोलः॥बहा
शी विजन वनान्तरोपसेवी
व्याचेष्टन् भ्रमति रुदन् पिशा
चजुष्टः॥ऊर्ध्वहस्तः नग्नः॥दिगम्बर इ
ति विदेह वचनात्॥कृशो निर्मा
सः॥परुषो रूक्षः॥अतिलो

लः सर्वस्मिन् अन्नपाने लोलुपः
॥व्याचेष्टन् विरुद्ध माचेष्टन्॥ग्र
हा हिंसा क्रीडा पूजार्थं गृह्णन्ति
॥अन्नरक्ताः॥अशुचिं भिन्नमर्य्या
दं स्नातं वा यदि वास्नातं॥हिंसु
हिंसा विहारार्थं सत्कारार्थं म
थापि वा॥ ॥तत्र हिंसार्थं गृही
तस्य लक्षणमाह॥स्थूलाक्षो
द्रुत मटनः सफेणवामी निद्रा
लुः पतति च कम्पते च यो ऽ
ति॥यश्चाद्रि द्विरद नगादि वि
च्युतः स्यात् सो ऽसाध्यो भव
ति तथा त्रयोदशेब्दे॥यश्चाद्री
त्यादि यः सद्वैतादि पतितः स
न ग्रहै गृह्यत इत्यर्थः॥आदि
शब्देन भित्तिप्रासादयो गृह्यन्ते
॥त्रयोदशाब्दे सर्वएव देवादिग्र
हीतो ऽसाध्यः॥ ॥देवादी
नामावेशसमय माह॥देवग्र
हाः पौर्णमास्यामसुराः सन्ध्य
योरपि॥गन्धर्वाः प्रायशो ऽ
ष्टम्यां यक्षाश्च प्रतिपद्यपि॥पि
तरः कृष्णपक्षे च पंचम्यामपि
चोरगाः॥रक्षः पिशाचा रात्रौ च
तुर्दश्यां विशन्ति हि॥कृष्णपक्षे
अमायां॥प्रायशः पदादन्यत्रापि
निश्चयामि ॥

धानप्रयोजने लक्षणार्थे तत्र नि
येो वलिदानार्थम्॥ नत्र यदि दे
वादयो विशन्ति तदा विशन्तस्ते
दृश्यन्ते कथं नेत्यत आह। दर्प
णादीन् यथा छाया शीतोष्णे
प्राणिनो यथा। स्वमणिं भास्क
रांश्चिश्च यथा देहं च देहधृक्॥
विशन्ति न च दृश्यन्ते ग्रहास्त
द्वच्छरीरिणं। दर्पणादीन्यादिश
ब्दे नान्यदपि निर्मलं द्रवद्रव्यं
गृह्यते। छाया प्रतिविम्बं। स्वम
णिं सूर्य्यमणिं। देहधृक् जीवा
त्मा॥ अथोन्मादस्य चिकित्सा
वातिके स्नेहपानं प्राक् विरेकः
पित्तसम्भवे। कफजे वमनं का
र्य्ये परो वस्त्यादिकक्रमः॥ य
च्चोपदेक्ष्यते किञ्चिदपस्मारे चि
कित्सिते। उन्मादे तच्च कर्त्तव्यं
सामान्याद्दोषदूष्ययोः॥ जल्ला
दि द्रुम शैलेभ्यो विषमेभ्यश्च ते
सदा। रक्ष्य उन्मादिनं यत्नात् स
द्यः प्राणहरा हि ते॥ ते जला
द्यः॥ ब्राह्मी कुष्माण्डी फल
षड्ग्रन्था शंखपुष्पिका स्वरसाः
दृष्टा उन्मादहृतः प्रयोगे तु
ष्ठ मधुमिश्राः॥ अत्र ब्राह्मीति प
दे ब्राह्मी स्वरसपरं। कुष्माण्डीफले

तद्वीजपरं। षड्ग्रन्थेति यथा कृ
त्यमेवानेनीयमर्थः। वरभी
करस तोला ४ कटुकचूर्ण मासा
२ मधुमासा ८ पेयः। इत्येको यो
गः॥ कोहण्डके वीजकचूर्ण मा
सा २ कटुकचूर्ण मासा २ मधुना
संनीयावलेह्यं। द्वितीयो योगः॥
महाभरीवचकचूर्ण मासा २ कु
टकचूर्ण मासा २ मधुनावलेह्यं।
तृतीयो योगः॥ शंखपुष्पी स्वरस
तोला ४ कुटकचूर्ण मासा २ मधु
मासा ८ पेयः। चतुर्थयोगः॥ ॥
सिद्धार्थको हिङ्गु वचा करञ्जो
देवदारु च। मञ्जिष्ठा त्रिफला
श्वेता कटभी त्वक् कटुत्रिकं॥
समांशानि प्रियङ्गुश्च शिरीषो
रजनीद्वयं। वस्तमूत्रेण पिष्टोऽय
मगदः पानमञ्जने। नस्य माले
पनेष्वेव स्नान मुद्वर्तने तथा
। अपस्मारविषोन्माद कृत्याल
क्ष्मी ज्वरापहः। भूतेभ्यश्च भयं ह
न्ति राजद्वारे च शस्यते। सर्पि रे
तेन संसिद्धं सगोमूत्रं तथार्थहृ
त्। असिद्धार्थकादि॥ ॥ कथा
दिश विनाशश्च दर्शयेदद्भुता
नि च। वद्धं सर्षपतैलाक्तं रक्तेऽ
त्तान मातपे॥ कपिकच्छ्वा

घ्वा तप्तैर्लौह तैल जलैः स्प
र्शात्। कशाभिस्ताडयेत्तं वा सेव
द्धं विजने गृहे। सर्पेण द्धृतद
न्तेन दंष्ट्रैः सिंहै गजैश्च तं त्रा
सयेच्छस्त्रहस्तैश्च शत्रुभिस्त
स्करैस्तथा॥ अथवा राजपु
रुषा वहिर्नीत्वा सुसंयतं। त्रास
येयुर्वधेनैनं तर्ज्जयन्तो नृप
तया॥ देहदुःखभयेभ्यो हि य
तः प्राणभयं महत्। तेन तस्य
शमं याति सर्वतो विप्लुतं म
नः॥ इष्टद्रव्यविनाशेन मनोऽय
स्याभिहन्यते। तस्य तत्सदृश
प्राप्ति सान्त्वाश्वासैः शमं न
येत्॥ ऊषणं हिङ्गु लवणं व
चा कटुकरोहिणी। शिरीषस्य
करञ्जस्य वीजं गौराश्च सर्ष
पाः॥ गोमूत्रपिष्टैरेभिस्तु वर्त्ति
र्नेत्राञ्जने हिता। हन्त्युन्मादं च
पस्मारं तथा चातुर्थकं ज्वरं॥
भूषणाद्यञ्जनं॥ ॥ कुष्ठाश्वग
न्धे लवणाजमोदे द्वे जीरके
त्रीणि कटूनि पाठा। मङ्गल्यपु
ष्पी च समांशभूतं सर्वैः समाना
च वचा विचूर्ण्य॥ ब्राह्मीरसेनाखि
लमेव भाव्यं वारत्रयं शुष्कमिदं
हि चूर्णं। ग्रस्तप्रमाणं मधुना घृतेन

न लिह्यान्नरः सप्तदिनानि याव
त्॥ सारस्वतमिदं चूर्णं ब्रह्मणा
निर्म्मितं पुरा। हिताय सर्वलो
कानां दुर्म्मेधानां विचेतसां॥ ए
तस्याभ्यासतः पुंसां बुद्धिर्मेधा
धृतिः स्मृतिः। सम्पत्तिः कवि
ताशक्तिः प्रवर्द्धेतोत्तरोत्तरं॥
मङ्गल्यपुष्पी शङ्खहूली इति
लोके। सारस्वत चूर्णं॥ ॥ वि
श्वाजमोद रजनीद्वय सैन्धवा
ग्रा षड्ग्रन्थ कुष्ठ मगधोद्भव
जीरकाणां। चूर्णं प्रभातसमये
लिहतः ससर्पि वाग्देवता निव
सति स्वयमेव वक्त्रे। विश्वाद्यं
चूर्णं॥ ॥ क्वाथे विचूर्णिते ति
प्रा तत्र षोडशगुणं जलं। पाद
शेषं प्रकर्त्तव्यमेष क्वाथ विधिः
स्मृतः॥ दशमूली तथा रास्ना
वानारि त्रिवृता वला मूर्वा श
तावरी चैति क्वाथैस्तु कुडवैः
पृथक्॥ तेन क्वाथ हृते प्रस्थ
द्वयं घृतमिना पचेत्। कल्कीकृ
तैः वक्ष्यमाणाद्रव्यैः सम्यक् पु
नः पचेत्॥ विशाला त्रिफला कौ
न्ती देवदार्वेलवालकं। स्थिरान
न्ता रजन्यौ द्वे प्रियङ्गुः सारिवाद्व
यं। नीलोत्पलैला मञ्जिष्ठा

द्रन्ती दाडिम केशरं। विडङ्गं ह्य
म्पिप्पली च कुष्ठं चन्दन पद्मके॥
तालीशपत्रं बृहती मालतीकुसु
मं नवं। अष्टविंशतिभिः कल्कै रे
तैः कर्षमितैः पृथक्॥ चतुर्गु
णं जलं दत्वा पिष्टं सर्पिः पचेद्
बुधः। महाचैतसनामेदं सर्व्वचे
तोविकारहृत्॥ अपस्मारे म
होन्मादे मन्देऽग्नौ ज्वरकासयोः
। वातरक्ते प्रतिश्याये कार्श्ये
तृतीयके॥ मूत्रकृच्छ्रे कटीशू
ले विसर्पाभिहतेषु च। पाण्डौ
मेये तथा कण्ड्वां विषे मेहे गरे
पि च॥ देवादि हतचित्तानां ग
द्गदाना मचेतसां। शस्तं स्त्रीणां
च वन्ध्यानां धन्य मायुर्बलप्रदं
॥ अलक्ष्मी पापरक्षोघ्नं सर्व्वग्र
हनिवारणं। हन्ति भ्रमं मदं मू
र्च्छां मेधा स्मृति मतिप्रदं॥ अ
लक्ष्मी पापरक्षोघ्नं सर्व्वग्रहनि
वारणं। हन्ति भ्रमं मदं मूर्च्छां मे
धा स्मृति मतिप्रदं॥ अग्निप
श्री अभिवर्द्धनी लोके आग
षा इति च। महाचैतसघृतं॥
अथ देवाद्याविष्टानां चिकित्सा। पूजा वल्यु
पहारेष्ट होम मंत्राञ्जनादिभिः जयेदागन्तु
मुन्मादं यथाविधि शुचि भिषक्। कुसुम
रिव क्लिन्न मथ गोरोचनाक्तेन॥

अञ्जनं सर्व्वदेवादिकृतोन्मादहरं
परं॥ कल्याणघृतं॥ ॥ऋक्ष
जम्बुकलोमानि शल्लकी लशुनं
तथा। हिङ्गु मूत्रञ्च वस्तस्य धूप
मस्य प्रयोजयेत्॥ एतेन प्राप्य
ति क्षिप्रं बलवानपि योग्रहः।
ऋक्षलोमादिधूपः॥ कल्याण
कञ्च युञ्जीत महद्वा चैतसं
घृतं। तैलं नारायणं चापि महा
नारायणं तथा॥ अनेन पिशाचाद
यस्तु प्रतिकूले न चाचरेत्। रो
गिणं भिषजं यत्ने क्रुद्धा हन्यु
र्महौजसः॥ इत्युन्मादाधिकारः
। इति भावप्रकाशः॥

उपकरणं क्ली प्रधानाङ्गीभूतो
पकारकद्रव्यं। व्यञ्जनादि। यथा
। तस्यादन्नं प्रधानं सूपादिकन्तु
उपकरणत्वेन शाकानां भाव
प्रपंकं। इति श्राद्धतत्त्वं॥
उपकारी त्रि उपकारकर्त्ता। तत्र
दानादानविधि यथा। हारीतः
। अथ्यासद्व्यदान मस्वर्ग्यं यत्र
दत्ता परितप्यते तद्यदान मफ
लं यश्चोपकारिणो ददाति उप
कारिणो व्यसनोपकारिणोऽपि
तरोपकारिणो न दत्तः।

माता पित्रो गुरौ मित्रे विनीते
चोपकारिणि। दीनानाथ विशि
ष्टेभ्यो दत्तन्तु सफलं भवेत्॥
इति शुद्धितत्त्वं॥ किञ्च। उपका
रिषु यः साधुः साधोः स साधुः सद्भि
रुच्यते। समदृष्टि र्भवास्तु त्वं
सर्व्वभूतेषु केशव॥ इति जैमि
नीये आश्वमेधिके पर्व्वणि ११
अध्यायः॥
उपवक्तः क्ली दिव्यचक्षुं। चश
मा इति पारस्यभाषा। इति लो
कप्रसिद्धं॥
उपदंशः पुं मेढ्ररोगविशेषः।
वाउ इति भाषा। अथोपदंशा
धिकारः। तत्रोपदंशस्य विप्र
कृष्टं निदान माह। हस्ताभिघा
तात् हस्तेन मैथुनात्। नखद
न्तघातात् नखदन्तघातेनस्या
नतैलनाङ्केऽपि मेहने नखदन्त
घातो बलवद्गतो रोगोदयात्। र
उक्तञ्च कामशास्त्रे। शास्त्रस्य
तावदेव दन्तघातादि धारणां
दत्तुपसेवनाद्वा। योनिप्रदोषा
च्च भवन्ति शिश्ने पञ्चोपदं
शा विविधापचारैः॥ हस्ताभिघा
विषयस्नावयोषन्तनरो रमः
। तैलके प्रहते न तु शास्त्र

नापि च क्रमः॥ कलहे दुष्टस्त्री
हतो वा मेहने नखदन्तपातः।
उत्कलादौ स्त्रियो मुखयोन्यो
भवन्ति। ताभि र्वा मेहने नखद
न्तघातः। योनिप्रदोषात् दीर्घ
कर्कशयोनिलोमयोगात्। यो
निच्छिद्रस्यातिसूक्ष्मत्वाद्वा। वा
तादिकृताद्वा योनिदोषात्। वि
विधापचारैः। दुष्टजलप्रक्षालन
ब्रह्मचारिणीगमनादिभिः पञ्चो
पदंशाः। वातिकः पैत्तिकः श्लै
ष्मिकः सान्निपातिकः आगन्तु
जश्चेति॥ ॥तत्र वातिक पैत्तिक
स्य चोपदंशस्य लक्षण माह।
सतोद भेद स्फुरणैः स कृष्णैः
स्फोटै र्व्यवस्येत् खलु वातिकोपदंशं। पी
तै र्बहुक्लेदयुतैः सदाहैः पित्ते
न रक्तैः पिशितावभासैः॥ व्य
वस्येत् जानीयात्। पीतैः रक्तै
र्वेति विकल्पः॥ ॥श्लैष्मिक
सान्निपातिकञ्चाह। सकण्डू
रैः शोकयुतैः महद्भिः शुक्ले
र्घनैः स्रावयुतैः कफेन। नानावि
धस्राव रुजोपपन्न मसाध्य मा
हुस्त्रिमलोपदंशं॥ ॥असाध्य
माह। विशीर्णमांसं क्रिमिभिः प्र
जग्धं मुष्कावशेषं परिवर्ज्जयेत्तं

विशीर्णमांसे गलितमांसे। व्रज
ने खादितं। मृक्षावशेषं विशी
र्णसमस्तमेहनमांसत्वेनावशिष्ट
फलकोषमात्रं॥ ॥उत पञ्चमात्र
चिकित्साया अकरणेदोष माह
।सञ्ज्ञानमात्रे न करोति मूढः
क्रियां नरो योविषये प्रसक्तः।
कालेन शोकक्रिमि दाह पाकैः
प्रशीर्णशिश्नो म्रियते स तेन॥
विषये प्रसक्तः स्त्रीस्त्रीरतः॥
लिङ्गार्शमाह। अङ्कुरे रिव सं
जाते रूपर्युपरि संस्थितैः। क
मेण जायते वर्त्ति स्ताम्रचूड
शिखोपमा॥ कोषस्याभ्यन्तरे
सन्धौ परस्परविभाजितानि चास
वेदना पिच्छिला च दुश्चिकि
त्स्या त्रिदोषजा॥ लिङ्गवर्त्ति रि
ति ख्याता लिङ्गार्श इति चाप
रे॥ लिङ्गवर्त्तिः स्यात्माह।
कोषाभ्यन्तरे अण्डकोषाभ्य
न्तरे। सन्धौ लिङ्गस्याण्डस्यो।
परस्परविभाजिता मांसपिण्डैः
सोद्भूतानि॥ अथोपदंशस्य चि
कित्सा। उपदंशेषु सर्वेषु स्नि
ग्धं स्विन्नस्य देहिनः। मेढ्रम
ध्ये शिरां विध्येत् पातयेद्वा ज
लौकसः। सद्यो निर्ह

तदोषस्य रुक्शोथावुपशाम्यतः
।पाको निवार्य्यो यत्नेन शिश्न
क्षयकरः स यतः॥ वटप्ररोहाज्जम्ब
म्बु लोध्र पथ्या हरिद्रा रचितः
प्रलेपः। व्यथां तथा शोथ मपा
करोति सर्वोपदंशेषु ततोऽहितो
ऽयं॥ उपदंशेषु व्रणप्रक्षालने
हितं। त्रिफलायाः कषायेण
भृङ्गराजरसेन वा॥ नीलोत्पा
लं सकमदं पद्मं सौगन्धिकं
तथा। एषां चूर्णं प्रलेपाय प्र
लेप श्चात्र शस्यते॥ बब्बूलकद
लद्दलोत्थेन रजसा दाडिमत्वचः।
सुचूर्णेन तद्व्रणो ऊर्ध्वालेपं श्रा
फलेन वा॥ देहेन कटाहे त्रि
फला तन्मसी मधुसंयुता। प्रलेप
नोपदंशस्य व्रणे सद्यः प्ररोहय
त्॥ पटोल निम्ब त्रिफला किरा
त क्वाथं पिबेद्वा खदिरासना
भ्यां। सगुग्गुलं वा त्रिफलायुतं
वा सर्वोपदंशापहरः प्रयोगः
॥ भूनिम्ब निम्ब त्रिफला पटो
ल करञ्ज धात्री खदिरासना
नां। कषाय कल्कैः घृतमाशु
पक्वं सर्वोपदंशापहरं प्रदिष्टं
॥ भूनिम्बाद्यं घृतं॥ ॥ द्रुतानि
यानि योगानि ऊर्ध्व

नाडीव्रणे व्रणे। उपदंशे प्रयोज्या
नि मेढ्राभ्यञ्जनभोजने॥ सार
सुत्रेण संछिद्य लिङ्गवर्त्ति मशे
षतः। दहेच्च तां ततस्ताभ्यां चि
कित्सां व्रणवच्चरेत्॥ इत्युपदं
शाधिकारः। इति भावप्रकाशः
॥ ॥ अपिच। पटोल निम्ब त्रि
फला गुडूचीक्वाथ मापिबेत्
सगुग्गुलं सखदिर मुपदंशो
विनश्यति॥ ग्रन्थान्तरे प्रथमा
र्द्धं पटोलनिम्ब गुडूची मरिच
क्वाथ मापिबेत्। इति च पाठः
॥ दहेत् कटाहे त्रिफलां सा म
सी मधुसंयुता। उपदंशे प्रलेपा
द्यं सद्यो रोपयते व्रणं॥ ॥
त्रिफला निम्ब भूनिम्ब करञ्ज
खदिरादिभिः। कल्कैः क्वाथे
र्घृतं पक्व मुपदंशहरं परं॥
इति गारुडे १७५ अध्यायः॥

उपदिष्टः त्रि उपदेशप्राप्तः। यथा
।तत्सूद्रस्यापि सगोत्रा कथं न
निषिध्यते इति चेदत्र उपदि
ष्टातिदिष्टगोत्रस्यैव निषेधो
नातिदिष्टातिदिष्टसूद्रगोत्रा
दे रिति। इत्युद्वाहतत्त्वं॥
॥ ॥ ॥

उपदेष्टा त्रि उपदेशकर्त्ता। यथा।
तथोपदेष्टार मपि पूजयेच्च ततो
गुरुं। न पूज्यते गुरु र्यत्र नरैः स
र्वाफला क्रिया॥ इति तिथ्यादि
तत्त्वं॥ बृहस्पतिः। उपदेष्टानुमन्ता
च लोके तुल्यफलौ स्मृतौ। इ
त्याह्निकतत्त्वञ्च॥

उपधा स्त्री धर्म्मार्थकाममोक्षहा
रापरीक्षा। यथा। धर्म्मार्थ काम
मोक्षेषु प्रत्येकं परिशोधनैः। उ
पेत्य धीयते यस्मादुपधा परिकी
र्त्तिता॥ अर्थ कामोपधाभ्यान्तु
भार्य्याः पुत्रांस्तु शोधयेत्। धर्म्मो
पधाभि र्विप्रांस्तु सर्वाभिः सचि
वान् पुनः॥ इति कालिकापुरा
णे ८५ अध्यायः

उपनदं क्ली नद्याः समीपं
उपनदि। इति मुग्धबोधव्याकर
णं॥

उपनयनं क्ली संस्कारविशेषः।
अध्यापनार्थं माचार्य्यसमीपं नी
यते येन कर्म्मणा तदुपनयनं।
यथा। स्मृतिः। गृह्योक्तकर्म्मणा
येन समीपं नीयते गुरोः। बालो
वेदाय तद्योगा द्बालस्योपनयं

विड्ः॥ ॥अथोपनयनं।उ
पनयनकालस्तु।गर्भाष्टमे ऽ
ष्टमे वाब्दे ब्राह्मणस्योपनाय
नं।राज्ञामेकादशे सैके विशा
मेके यथा कुलं॥ब्रह्मवर्च्चस
कामस्य कार्य्यं विप्रस्य पञ्चमे
।सैके द्वादशे।तत्राशक्तौ प्राय
श्चित्तं कृत्वा तदुत्तरे कार्य्यं।
गृह्योक्तकर्म्मणा येन समीपं
नीयते गुरोः।बालो वेदाय त
द्योद्वात्सोपनयं विदुःअरुक्
सावे तथा शस्त्रलते पाठेन
वियनात्।उपनयनं न तत्र
स्यात् इति मन्वादि सम्मते॥
कृत्यचिन्तामणौ।जन्मोदये
जन्मस्य तारकास्य मासेषु वा
जन्मनि जन्मभे वा।व्रतेन वि
प्रो न बहुश्रुतोपि क्रिया वि
शेषैः प्रथितः पृथिव्यां॥अस्तं
गते दैत्यगुरौ गुरौ वा क्षुद्रेपि
वा पापयुतेप्यनेक्षे।व्रतोपनी
तो दिवसे प्रणाशं प्रयाति दे
वै रपि रक्षितो यः॥उदये ल
ग्ने।व्रतेन उपनयनेन।भुजव
लभीम कृत्यचिन्तामणिः।स्वा
तौ शाक यनाश्वि मित्र करभेपौ
ष्णे चित्रा हरिधनिष्ठा ता

यपतौ भगे दितिसुते भाद्रद्वये
सागरे।केन्द्रस्थे भृगुजे गुरौ
शशिसुते चन्द्रे च तारे सुभे क
र्त्तव्यं व्रतकर्म्म मङ्गलतिथौ वा
रः सितार्कज्यकाः॥तोयपतिः
शतभिषा।अदितिसुत उत्तरफ
ल्गुणी।सागरः पूर्व्वाषाढा॥दी
पिकायां।जीवार्केन्दु सुद्धौ ह
रिशयनविहि भास्करे चोत्तरस्थे
स्वाध्याये वेद वर्णाधिप इह सु
भदे सौरि भे नादितौ च।सुकार्के
ज्यस्ते लग्ने रविमदनतिथि प्रो
क्ते षष्ठाष्टमेन्दु तो जीवा स्त
तिचारेकै सित गुरुदिने काल
सुद्धौ व्रतं स्यात्॥ रवि मदन
तिथि सप्तमी त्रयोदशी॥ ॥
कृत्यचिन्तामणौ।माघे द्रविण
शीलाढ्यः फाल्गुणे च दृढव्र
तः।चैत्रे भवति मेधावी वैशा
खे कोविदो भवेत्॥ज्येष्ठे गरि
ष्ठो नीतिज्ञ आषाढे क्रतु भाजनः
।शेषेष्वन्येषु रात्रिः स्यान्निषिद्धं
निशि च व्रतं॥राजमार्त्तण्डे।ग
र्भाद्वैसौ कृतौ विप्रः पुनः सं
स्कार मर्हति।वृद्धगर्गः।स्नात
शुक्लानध्यायान् सप्तमीञ्च त्र
योदशी।पत्तेया मोचमासस

द्वितीयां परिवर्जयेत्॥चैत्रस्य
शुक्लतृतीया आषाढस्य शुक्लदशमी
मन्वन्तरादित्वेन निषिद्धा वैशाख
शुक्लतृतीया युगादित्वेन निषिद्धे
ति।पक्षमासस्य च स्मार्य्यो रिक्तास
वहुदोषभाक्।शुक्लपक्ष एव वि
हितः आश्वलायनवचना
त्।सामगानां कृष्णपरेऽप्युपन
यनं श्रीपतिरत्नमाला कृत्यचि
न्तामणिधृतवाक्यवचनात्।
यथा।शाखाधिपे वलिनि केन्द्र
गतेथ वासिन् वारेऽस्य चोपन
यनं कथितं द्विजानां।नीचस्थि
ते रिपुगृहगेथ पराजिते वा जी
वे भृगावुपनयनः स्मृतिकर्म्म
हीनः॥अस्य शाखाधिपस्य॥दी
पिकायां।ऋग्वेदाधिपतिर्जी
वो यजुर्वेदाधिपः सितः।साम
वेदाधिपो भौमः शशिजो थ्य
र्ववेदराट्॥वेदाधिपकथनं
॥ ॥ब्राह्मणे शुक्रवागीशौ क्ष
त्रिये भौमभास्करौ।चन्द्रो वै
श्ये बुधः शूद्रे पति मेन्द्रोऽन्त्य
जे जने॥वर्णाधिपकथने॥पश
जयत्वात् बस्य यत्नायां।अत्रा
पि विवाहवद्दशयोगभंगवर्ज्जे
नं।विस्यधर्म्मोत्तरे।षोडशा

ब्दो हि विप्रस्य राजन्यस्य द्विविंश
ति।विंशतिः स चतुर्थी च वैश्यस्य
परिकीर्त्तिता॥सावित्री नाति व
र्त्तेत अत ऊर्द्धं निवर्त्तते।अत्र षो
डशवर्षस्य उपनयनाकृता प्रती
यते।पतिता यस्य सावित्री दश
वर्षाणि पञ्च च।ब्राह्मणस्य वि
शेषेण तथा राजन्य वैश्ययोः॥
प्रायश्चित्तं भवेदेषां प्रोवाच वद
तो वरः।इति यमवचने तदन
न्तरं प्रतीयते।अन्यो गर्भे जा
न्मप्रभृति गणनाभ्या मविरुद्धा
र्थेता।तथाच माण्डव्यः।व्रतब
न्ध विवाहे च वत्सरपरिकल्पन
माङ्गराचार्य्याः।आधान पूर्व्व मेके
प्रसूतिपूर्व्वं सदान्ये तु॥ ॥
यत्तु द्विजानुपक्रम्य पैठिनसिव
चनं द्वादश षोडश विंशति रष्ट
नीता अवकृष्टकाला भवन्ति इ
ति द्वादशवर्षाद्युपरि ब्राह्मणा
दीनां महाव्याहृतिहोम प्रायश्चि
त्तार्थं।षोडशोपरि तु ब्रात्यहोमा
दि गुरुप्रायश्चित्तार्थ मिति।इ
त्युपनयनं।
इति ज्योतिस्तत्वे॥

उपनायकः पुं नायकगुणोत

कर्षकथकः। यथा। नायकस्य गु
णैन कर्षकथका उपनायकाः।
इति सङ्गीतदामोदरः॥ ॥
उपपत्तिस्त्र॥
उपपत्तिः स्त्री प्रकरणप्रतिपा
द्यार्थसाधने तत्र तत्र श्रूयमा
णा युक्तिः। इति वेदान्तसारः॥
हेतुः। यथा। श्रोतव्यः श्रुति
वाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।
इत्यत्र उपपत्तिभि र्हेतुभिः हेतु
भि रिति पत्तनाग्रन्थमाथुरी॥
सङ्गतिः। यथा। लक्षणा शक्य
सम्बन्धस्तात् पर्य्यानुपपत्तितः
। इति भाषापरिच्छेदः॥
॥ ॥
उपपुराणं क्ली व्यासकृताष्टाद
शपुराणसदृशानानामुन्यादिप्र
णीताष्टादशपुराणं। यथा। अन्या
न्युपपुराणानि मुनिभिः कथिता
न्यपि। आद्यं सनत्कुमारोक्तं ना
रसिंहं ततः परं। तृतीयं वाय
वीयन्तु कुमारेण च भाषितं।
चतुर्थं शिवधर्म्माख्यं साक्षान्न
न्दीशभाषितं। दुर्वाससोक्त
माश्चर्य्यं नारदीयमतः परं। न
न्दिकेश्वरयुग्मञ्च तथैवोशन
सेरितं। कापिल

वारुणञ्चैव कालिकाह्वयमेव
च। माहेश्वरं तथा शाम्बं दैवं सर्व्वा
र्थसिद्धिदं। पराशरोक्त मपरं
मारीचं भास्कराह्वयं। दैवं देवी
पुराणं। इति मलमासतत्त्वधृत
कूर्म्मपुराणं॥
उपभूषणं क्ली घण्टाचामरादि
। यथा। घण्टा चामर कुम्भादि पा
त्रोपकरणादिकं। तद्भूषणान्तरे
दद्याद्यस्मात्तदुपभूषणं। इति।
प्रावारः पानपात्रञ्च गेण्डुको
गृह मेव च। पर्य्यङ्कादि यदन्य
च्च सर्व्वं तदुपभूषणं॥ इति च
कालिकापुराणे ६८ अध्यायः॥
उपमा स्त्री सादृश्यं। तस्य वैदिक
पर्य्यायः। इदमिव १ इदं यथा
२ अग्निर्णाये ३ चन्द्ररश्मिर्द्दमा
नात् ४ ब्राह्मणाव्रतचारिणः ५
हलस्यनुनेपुरस्तवयाः ६ जार
आभगं ७ मेषोभूतोऽभीषन्न
पः ८ तद्रूपः ९ तद्वर्णः १० तद्व
त् ११ तथा १२। इति द्वादशो पमाः
इति वेदनिघण्टौ ३ अध्यायः
॥
उपमालङ्कारः पुं साम्यालङ्कारः
। यथा। उपमा माह। साम्यवाच्य
मवैधर्म्यं वाक्यैक्य उ

पमानयोः। तद्भेदाः। सा द्विवि
धा। पूर्णा लुप्ता च। तल्लक्षणं य
था। सा पूर्णा यदि सामान्य धर्म्म
उपमवाचि च। इये पुनः श्रौत्या
र्थी च। तल्लक्षणन्तु। श्रौती यथे
व वाशब्दा इवार्थो वा वति र्य
दि। आर्थी तुल्य समानाद्यास्तु
ल्यार्थो यत्र वा वतिः। द्वे तिधा
तद्धिते समासेऽथवाक्ये। उदा
हरणं। सौरभमम्भोरुहवन्मुख
स कुम्भाविव स्तनौ पीनौ। हृ
दयं मदयति वदनं तव शरदि
न्दुर्यथा बाले॥ अत्र क्रमेण
त्रिविधा श्रौती। मधुरः सुधाव
दधरः पल्लवतुल्यो ऽतिपेल
वः पाणिः। चकितमृगलोचना
भ्यां सदृशी चपले च लोचने
तस्याः॥ अत्र क्रमेण त्रिविधा आ
र्थी पूर्णा षडेव तत्। लुप्ता सा
मान्यधर्म्मादे रेकस्य यदि वा
द्वयोः॥ त्रयाणां वानुपादाने
श्रौत्यार्थी सापि पूर्ववत्। इय
न्तु तद्धिते श्रौत्या असम्भवान्न
द्वैविध्यरीत्या पञ्चप्रकाराः। उदा
हरणं। मृदुवत्मिन्दु र्येया पाणिःप
लवेन समः प्रिये। वाचः सुधाइ
वोष्ठस्ते बिम्बतुल्यो मनोऽश्म

वत्॥ सा लुप्ता पञ्चधा पुनः। आ
धार कर्म्मविहिते द्विविधे च क्य
चि क्यङि। कर्म्मकर्त्रोर्णमुलि च
स्यादेवं पञ्चधा पुनः॥ उदाहरणं।
अन्तःपुरीयसि रणेषु सुतीयसि
त्वं पौरं जनं तव सदा रमणीयते
श्रीः। दृष्टः प्रियाभि रमृतद्युतिद
र्शे मिन्द्रसञ्चार मत्र भुवि संचर
सि क्षितीश॥ तदेवं दशप्रकारा
लुप्ता। सा पुनर्द्विधा। वाक्यगता
समासगता च। यथा। उपमानानु
पादाने द्विधा वाक्यसमासयोः।
श्रौत्यार्थीत्वभेदेन चतुर्विधत्वस
म्भवे ऽपि प्राचीनरीत्या द्विप्रका
रत्व मेवोक्तं। पुनर्द्विधा। औपम्य
वाचिनो लोपे समासे क्विपि च
द्विधा। उदाहरणं। वदनं मृगशा
वाक्ष्याः सुधाकरमनोहरं। गर्द
भति श्रुतिपरुषं व्यक्तं निनद
न्महात्मनां पुरतः॥ तत्र धर्म्मो
पमानयो र्लोपे द्विधा। तद्यथा।
द्विधा समासे वाक्ये च लोपे ध
र्म्मोपमानयोः। उदाहरणं। त
स्या मुखेन सदृशं रम्यं ना
स्ते नवा नयनतुल्यं। पुन
द्विधा। क्विप समासगता
द्वेधा धर्म्मेवादिविलोपने

।उदाहरणं।विषवति सुखाङ्ग मस्या इत्यादि।उपमेयस्य लोपे तु स्यादेका प्रत्यये क्वचि।उदाहरणं।अरातिविक्रमालोकविकस्वरविलोचनः।कृपाणोदग्रदोर्दण्डः स सहस्रायुधीयति॥धर्म्मोपमेय लोपे ऽन्या च।उदाहरणं।यशसि प्रसरति भवतः क्षीरोदीयन्ति सागराः सर्व्वे।त्रिलोपे च समासगा।यथा।राजते मृगलोचनेत्यादि।तेनोपमाया भेदाः स्युः सप्तविंशति संख्यकाः।पूर्णा षड्विधा।लुप्ता चैकविंशतिविधेति मिलित्वा सप्तविंशतिप्रकारोपमा।इति साहित्यदर्पणे १०. परिच्छेदात् संगृहीतः॥

उपरामः पुं निवृत्तिः।तत्पर्य्यायः।विरामः २ उपरमः ३ ।इति भरतः॥आरामः ४ उपरतिः ५।इति हेमचन्द्रः॥

उपरूपकं क्ली नाटकविशेषः।स तु अष्टादशविधः।यथा।नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकं।प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा॥संल्लापकं श्रीगदितं शिल्पकञ्च विलासिका।दुर्म्मल्लिका प्रकरणी हल्लीशो भाणिकेति च॥अष्टादश प्राहुः रुपरूपकाणि मनीषिणः।विना विशेषं सर्व्वेषां लक्ष्म नाटकवन्मतं॥इति साहित्यदर्पणे ६ परिच्छेदः॥

उपष्टम्भः पुं आधिक्यं।यथा।उच्चैःश्रवादीन् तेजो भागोपष्टम्भकतया प्रत्यक्तयोज्यत्वात्।इति बौद्धाधिकारे चिन्तामणिः॥

उपसंहारः पुं अन्तः।शेषः।यथा।उपक्रमोपसंहारयोः प्रक्रान्तकीर्त्तनात्।इति सप्तमी प्रकरणे तिथ्यादितत्त्वलिखने

उपसद् पुं अग्निविशेषः।यथा।गार्हपत्यो दक्षिणाग्निस्तथैवाहवनीयकः।एते त्रय स्तयो मुख्याः शेषाश्चोपसदस्त्रयः॥इति वह्निपुराणे गणभेदनामाध्यायः॥

उपसर्य्या स्त्री ऋतुमती गौः।तत्पर्य्यायः।कालप्राप्ता २ इहपरता ३।इति शब्दरत्नावली॥

उपाख्यानं क्ली विशेषकथनं।यथा।सर्व्वाख्यानं श्रुतं ब्रह्मन्

अतीव परमाद्भुतं।अधुना श्रोतुमिच्छामि दुर्गोपाख्यानमुत्तमं॥इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४४ अध्यायः॥श्रुणु नारद वक्ष्यामि स्वधोपाख्यानमुत्तमं॥इति च तत्रैव ३८ अध्यायः॥ ॥ ॥ ॥

उपान्तं त्रि प्रान्तं।यथा।त्वयं केविदुपान्तस्य दुरितस्य प्रवर्त्ततोऽप्यनुमतिं तथा चान्ये प्रत्यवायस्य मन्यते॥नित्यक्रियां तथा चान्ये ह्यनुपजफलां क्रतुं।इति प्रायश्चित्ततत्त्वीय जावाल भविष्यपुराणवचनं॥

उपाध्यायः पुं वेदैकदेशाध्यापकः।यथा।एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः।योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते॥इति भविष्य २ अध्यायः॥मानवे २ अध्यायश्च॥

उपानत् स्त्री चर्म्मपादुका।पादव्यतिरेकेणान्योपानद्वहननिषेधो यथा।नाक्षैः क्रीडेत् कदाचित्तु स्वयं नोपानहौ वहेत्।शयनस्थो न भुञ्जीत न पाणिस्थं न चासने॥इति मानवे ४ अध्याये ७४ श्लोकः॥स्नेहं विना कदाचिदपि परिहासेनापि नाक्षादिभिः क्रीडेत्।स्वयमित्यभिधानात् आत्मोपानहौ पादव्यतिरिक्तेन हस्तादिना देशान्तरं न नयेत्।शय्यावस्थितश्च न भुञ्जीत हस्ते च प्रभूत मन्नं कृत्वा क्रमेण न खादेत्।आसने भोजनपात्रं निधाय न भुञ्जीत।इति भट्टीकायां भट्टः॥

उपायः पुं स्वार्थसम्पादकः।साधनं।यथा।उपायतः समारम्भाः सर्व्वे सिद्ध्यन्त्युपक्रमाः।उपाय प्रश्न येन त्वं धारयेथाः प्रजा नृप॥इति वह्निपुराणे ह सूपाख्याननामाध्यायः॥

उपोद्घातः पुं सङ्गतिविशेषः।यथा।सेश्वरसङ्गतिरुपोद्घातो हेतुतावसरस्तथा।निर्वाहकैककार्य्यत्वे षोढा सङ्गतिरिष्यते॥तल्लक्षणं यथा।चिन्तां प्रकृतसिद्ध्यार्थामुपोद्घातं विदुर्बुधाः।इत्यनुमितौ जगदीशतर्कालङ्कारः॥

उपोषितः त्रि कृतोपवासः।
यथा।उपोषितो द्वितीयेऽह्नि पू
जयेत् पुनरेव तां।इति दुर्गोत्
सवप्रकरणे तिथ्यादितत्त्वं॥

उप्तं त्रि कृतवपनं।यथा।तद्दे
वनस्त दृषवः स रथ्यो हया स्ते
सोऽहं रथी नृपतयो यत आन
मन्ति।सर्वं क्षणेन तदभूदस
दीशरिक्तं भस्मन् हुतं कुहक
राद्ध मिवोप्तमूष्यां॥इति श्री
भागवते १ स्कंधे १५ अध्यायः
॥श्रीकृष्णवियोग एवात्र हेतुः
नान्य इत्याह तद्वै इति।यतो ये
न ईशेन रिक्तं शून्यं असत् का
र्यानतम सम्यक्त्वविधाने रोप
भस्मनि हुतमिव भस्मन्निति
त्वप्रसप्रयोगमपन्नं पदं।ऊप्तिमी
तादृपि कुहकाद्मायाविनः
सकाशाद्गृहीतं लब्धं यथा।स
म्यक् कर्षणादिनापि ऊषरभू
मो उप्तं बीज मिव।इति तट्टी
कायां श्रीधरस्वामी॥ ॥
कृतश्मश्रुकर्मे।यथा।शिशिरे वप
ने कार्यो माघ्यानाब्रह्मचारिणा
।इति कात्यायनकृत छन्दोगप
रिशिष्टेऽप्येवं।तदेकत्र

निमूलकत्वात्।तद्भूत पारस्करी
ये।पर्युप्तशिरस्त मिति सूत्रे ऽ
पि तथैवार्थः तद्भाष्यकृता हृ
रिशर्मणापि परि सर्वतोभावेन
प्तशिरस्तं मुण्डितशिरस्त मिति
व्याख्यातं।इति प्रायश्चित्ततत्त्वं
॥ ॥

उप्त शा ग्राजैवे।हृस्वादिः।उ
इपवकारोपधः।तेन कथंचन
दीति दीर्घो न स्यात्।स्वादौ तत्व
दृ इति अंग्ठां जयति।ऊर्णोजो
दीर्घपाठसामर्थ्यात् स्वरादे तं
दीर्घ इति केचित्।ऊक्ष्मसवका
रत्वान्न उज्जती उज्जन्ती।ग्राजैव
मवक्रीभावः।उज्जति साधु स्व
कः स्यादित्यर्थः।इति दुर्गा
दासः॥

उभ शा संभे।हृस्वादिः।श उ
भति कुम्भं जलेन लोकः।उबे
भ।इति दुर्गादासः॥
उमा स्त्री दुर्गा।तन्नामव्युत्पत्ति
र्यथा।यतो हि तपसे पुत्रि व
नं गच्छत्व मेनका।उमेति
तेन सोमेति नाम प्राप तदा
सती॥इति कालिकापुराणे
४२ अध्यायः॥

उमावत्सर्यी स्त्री ज्येष्ठशुक्लच
तुर्थी।यथा।ज्येष्ठशुक्लचतु
र्थ्यां तु जाता पूर्वं उमा स
ती।तस्मात् सा तत्र संपूज्या
स्त्रीभिः सौभाग्यवृद्धये॥इति
संवत्सरकौमुदीधृतब्रह्मपुरा
णवचनं॥उर गतौ।सोऽत्र यथा
तुरंग।पंचमस्वरादिः।उरसः
।इति दुर्गादासः॥
उरु त्रि वृहत्।तत्पर्यायः।
विस्तीर्णं १ विकट ११।इति
जटाधरः॥
उर्द उ. मिति क्रीडा स्वादे।ऊ
स्वादी रेफमध्यः।दीर्घोस्य नि
त्यत्वात् दीर्घादि रिति केचित्
।मिति: परिमाणं।ऊ. उर्द्दते क
तके वीणक।इति दुर्गादासः
उर्ब ई हिंसे।हृस्वादिः।अन
न्तयोति दीर्घे ऊर्वति।कि
पि राल्लोपः इति वलोपे
ऊः ऊरौ ऊरः।एवं सर्वत्र।ई
ऊर्णौ।इति दुर्गादासः॥
उल दाहे।सोऽत्र यथान्तरं॥
उल्का उल्पं।इति दुर्गादासः
॥उल्पः पुं क्ली विस्तीर्णाल्प
तृणं।तत्पर्यायः।प्रतानाः ४।इ
ति जटाधरः॥प्रतानिन्नी पवीरु

धा ८ वरुत् ॥ इति शब्दर
त्नावली॥
उलूकी स्त्री नाम्नायाः सुता
शुकी तस्याः कन्या।यथा।प
दूरवतास्तु महासत्त्वा ताम्रा
याः परिकीर्तिताः।शुकी श्ये
नी च भासीच सुग्रीवी शुचि
गृध्रिका॥शुकी शुकानज
नयत् उलूकी प्रत्युलूककान्
।श्येनी श्येनान् तथा भासी
भासान् गृध्रांश्च गृध्र्यपि।शु
चिरौदकान् पक्षिगणान् सु
ग्रीवी तु व्यजायत।अश्वान् उ
ष्ट्रान् गर्दभांश्च ताम्रावंशः
प्रकीर्तितः॥इति विष्णुपुराणे
१ अंशे २१ अध्यायः॥ताम्राया
वंश माह षडिति त्रिभिः।स्व
ताः कन्याः ताएवाह शुकीति।
सुग्रीवी च शुचिश्च गृध्रिका
च ताः।उलूक प्रत्युलूकका
न् तत्र प्रतिपक्षान् काकांश्च
उलूकीति पाठे ऽपि उलूकी
प्रत्युलूककांश्च सेवाजनयदि
त्यर्थः न पुनः उलूकीसंज्ञा अ
न्या स्त्रीति द्रष्टव्यं।शुकी शु
कान् जनयत् उलूक प्रत्युलू
ककानिति मान्याकेः।शुचो

दकात् सुचिरेव सुचीमा उद
कात् जलजात् पतिगणात्
व्यजायत। सुपीवी न सुप्रादीन्
रवेश्छाया न विशेदग्रजन्मनः॥
तं दृष्ट्वा विलयं यान्ति पुण्यौघा
श्च पुरातनाः॥ शंखः॥ अङ्गुष्ठ
मात्र सुषिरौ कर्णौ न भवतो
यदि॥ तस्मै श्राद्धं न दातव्यं दत्त
ञ्चेदासुरं भवेत्॥ इति निर्णय
सिन्धुः॥
कर्णशूलः पुं कर्णरोगविशेषः
॥तस्यौषधं यथा॥ हिङ्गु तुम्बुरु
शुण्ठीभिश्च साध्यं तैलं तु सार्ष
पं तन्निहन्ति हरेच्च श्रेष्ठं कर्णशूल
पहं परं॥१॥शुष्कमूलकशुण्ठी
नां क्षारो हिङ्गुल नागरं॥ शत
चतुर्गुणे रसे तैलं मेतेर्विपा
चयेत्॥ बाधिर्य्यं कर्णशूलं।
च पूयस्रावञ्च कर्णयोः॥ क
मयश्च विनश्यन्ति तैलस्यास्
य प्रपूरणात्॥२॥शुष्कमूलक
शुण्ठीनां क्षारो हिङ्गुल नाग

रं । शतपुष्पी वचा कुष्ठं दारु
शिग्रु रसाञ्जनं ॥ सौवर्चलं यव
क्षारं सामुद्रं सैन्धवं तथा । भू
जग्रन्थि विडं मुस्तं मधु सुक्त
ञ्चतुर्गुणं ॥ मातुलुङ्गरसञ्चै
व कदलीरसमेव च । तैलमे
तद्विपक्वञ्च कर्णशूलापह
हं परं ॥ बाधिर्य्ये कर्णनादस्य
पूयस्रावस्य दारुणः ॥ पूरणादस्य
तैलस्य क्रिमयः कर्णयोः खि
लाः ॥ क्षिप्रं विनाशमायान्ति शा
शाङ्कं शेखरभाषितं तैलमिदं
श्रेष्ठं मुखदन्तामयापहं ॥ ३ ॥ अ
श्वस्य हृद्गन्धमालभ्ना काथये
त् द्रोणमम्भसा । चतुर्भागाव
शेषेण तैलप्रस्थं विपाचयेत्
॥ काञ्जिकस्याढकं दत्वा पि
ष्टान्येतानि दापयेत् । पुनर्णा
वा गोक्षुरकं सैन्धवं सुवर्णं
वचा ॥ सरलं सुरदारुञ्च हरि
द्री कटुकारिका । तस्य पाना
दहन्त्येव कर्णशूलं दुरुत्सहं ॥
बाधिर्य्यं सहैरीणाञ्च अभ्यङ्गा
च्च महेश्वर ॥ ४ ॥ इति गारुडे
१८८ अध्यायः ॥
कर्णी पुं बाणविशेषः । यथा ।
करोति कर्णिनो यस्तु यस्तु

खड्गादिकृन्तनः । प्रयान्ति ते वि
शसने नरके भृशदारुणे ॥
इति विष्णुपुराणे २ अंशे ६ अ
ध्यायः ॥ कर्णिनो बाणविशे
षान् । इति भट्टीका ॥
कर्त्ति तक शैथिल्ये । रेफस्याप
स्लकारः । कर्त्तयति कर्त्तोपय
ति धृति जैलेन । इति दुर्गादा
सः ॥
कर्त्तः पुं भेदः । यथा । सपुत्र नि
यम्य यन्तेयाय मकर्त्तहेति ज
स्तुः स्वराडिव निपानवे नित्र
भिन्नः । इति श्रीभागवते २ स्कं
धे ७ अध्यायः । कर्त्तो भेदः
तन्निरासो अकर्त्तः तत्र हेतिं
साधनं जघ्नुः । इति तट्टीका
यां श्रीधरस्वामी ॥
कर्त्तव्यः त्रि करणयोग्यः । यथा
। हीनसेवा न कर्त्तव्या कर्त्तव्या
महदाश्रयः । अजा सिंहप्रसादे
न वने चरति निर्भयः ॥ इति
चाणक्यः ॥
कर्त्ता पुं क्रियानुकूलकृतिमा
नाम च विविधः । यथा । विधेय
तायते कर्त्ता विशेषण प्रीति
क्रिया । योग्यत्व श्रुतिसिद्धत्व
विशेषणपदान्वयैः ॥ अस्या

र्थः । क्रियां प्रति प्रकारत्रयेण
कर्त्ता विज्ञायते तस्य विवरणं ।
साध्याया योग्यत्वेन इत्यत्र योग
त्वेन लब्धविच्छेदवर्णिकः ॥ १ ॥
अहरहः देयात् दीक्षितो न ददा
तीत्यत्र प्रतिषिद्धत्वेन दीक्षितेन
दत्तः ॥ २ ॥ स्वर्गकामो यजेतेत्य
त्र विशेषणपदान्वयेन स्वर्गका
मः कर्त्ता जायते ॥ ३ ॥ नित्ये निषे
धे च यच्चन्न साधनं तदभावस्त
दभावसाधनं इत्यनुभवसिद्धा
नित्याकरणं निषिद्धाचरणञ्च
प्रत्यवायसाधनं शास्त्रावगतं
मतस्तदभावो नित्याचरणं नि
षिद्धाकरणञ्च प्रत्यवायाभाव
साधनमिति प्रत्यवायपरिहा
रार्थी नियोज्योऽन्वेति तद्बोध
कविशेषणपदाध्याहारादिति
बोध्यं तत्र श्रेयं विधिवाक्य
शाब्दधीः । यथा । काम्ये स्वर्ग
कामो यजेतेत्यत्र स्वर्गकामस्य
कर्त्तृ यागविषयकं कार्यं नित्ये
अहरहः सन्ध्यामुपासीत इत्यत्र
प्रत्यवायपरिहारार्थिनः कर्त्तुः
प्रत्यहं सन्ध्यावन्दनविषयकं का
र्यं न कलञ्जं भक्षयेदित्यत्रापि

प्रत्यवायपरिहारार्थिनः कर्त्तुः क
लञ्जभक्षणाभावविषयकं कार्य्य
मित्येवं ह्येषं । इति धर्म्मदीपिका ॥
कर्त्त तक शैथिल्ये । रेफस्ययुक्त
स्लकारः । कर्त्तयति कर्त्तोपय
ति धृति जैलेन । इति दुर्गादा
सः ॥
कर्द कुत्सितेरवे । एको ऽर्थः ।
कर्द्दति काकः । रमानाथस्त्व
कोऽस्त्र कर्द्दतीति भट्टमल्लदर्शि
नाडुदरसंवन्धिशब्द एवास्य
प्रयोग इति मन्वानः कर्द्दति
शिशुरिति यदुदाजहार तद्देयं
। यत्तन्मते कर्द्दत्युदरमित्येव स्या
त् । इति दुर्गादासः ॥
कर्द्दमः पुं छाया । यथा । वेदेषु
कर्द्दमः शब्दश्छायायां वर्त्तते
स्फुटं । कश्यपः कर्द्दमाद्यालः क
र्द्दमस्तेन कीर्त्तितः ॥ इति ब्र
ह्मवैवर्त्ते ब्रह्मखण्डे २२ अ
ध्यायः ॥
कर्पटः पुं पर्व्वतविशेषः । यथा
। नीलशैलस्य पूर्व्वस्मिन् स्वरू
पं प्रतिपादितं । नाभिमण्डल
पूर्व्वस्यां भस्मकूटस्य दक्षिणे ॥
पूर्व्वस्यां कर्प्पटो नाम पर्व्वतो

यमरूपधृक् । तत्र याम्यशिला कृष्णा नीलाञ्जनसमप्रभा ॥ अथीनकायां राजेन्द्र याम्यपस्त्वस्त विस्तृता । पूजयेत्तत्र शमनं पाणौ दण्डं सदैव यः ॥ यत्र न प्राणिनां नित्यं प्राणदण्डस्य साधनं । कृष्णवर्णञ्च द्विभुजं किरीटमुकुटोज्ज्वलं ॥ दधन् स्वापि पुत्री न्व वामपाणौ सदैव हि । कृष्णवस्त्रं स्थूलपदं वहिर्निःसृतदन्तकं ॥ वराभयकरं नित्यं चरणं महिषवाहनं । पूजयेत् परया भक्त्या याम्यबीजेन साधकः ॥ उपान्त्यवर्गस्यादि यो वर्णो बिन्दुसंयुतः । यमबीजमिति ख्यातं यमस्य प्रीतिकारकं ॥ अनेनैव तु मन्त्रेण शमनं यस्तु पूजयेत् । कपोताख्येऽस्थलवरे नापमृत्युं समाप्नुयात् ॥ इति श्रीकालिकापुराणे ८२ अध्यायः ॥

कर्पूरः पुं क्ली स्वनामख्यातसुगन्धिद्रव्यं । काफूर इति पारस्यभाषा । तत्पर्य्यायः । रक्षः २६ हिमाह्वयः २७ वर्षमस्थः २८ वेधयः २९ रोगसारकः ३० इति शब्दरत्नावली ॥

कर्व गर्व्वे । रेफोपधः । कर्व्वति । इति दुर्गादासः ॥

कर्म्म क्ली क्रिया । तच्च पञ्चविधं । नित्य नैमित्त काम्य प्रायश्चित्त निषिद्ध भेदात् । तत्र आद्यानि चत्वारि धर्म्माणि । अन्त्यम् अधर्म्मं । तच्च जन्मभेदात् त्रिविधं । सञ्चितं प्रारब्धं क्रियमाणञ्च । इति वेदान्तमतं ॥ सात्त्विकादिभेदेन त्रिविधं यथा । नियतं सङ्गरहितमरागद्वेषतः कृतं । अफलप्रेप्सुना कर्म्म यत्तत् सात्त्विकमुच्यते ॥ यत्तु कामेप्सुना कर्म्म साहङ्कारेण वा पुनः । क्रियते बहुलायासं तद्राजसमुदाहृतं ॥ अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषं । मोहादारभ्यते कर्म्म यत्तत्तामसमुच्यते ॥ ॥ ब्राह्मणादीनां स्वाभाविककर्म्माणि यथा । शमो दमस्तपः शौचं क्षान्तिरार्ज्जवमेव च । ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म्म स्वभावजं ॥ शौर्य्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनं । दानमीश्वरभावश्च ॥ ॥

क्षात्रकर्म्म स्वभावजं ॥ कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म्म स्वभावजं । परिचर्य्यात्मकं कर्म्म शूद्रस्यापि स्वभावजं ॥ ॥ स्वकर्म्माभिरतस्य फलं यथा । स्वे स्वे कर्म्मण्यभिरतः संसिद्धिं लभते नरः ॥ स्वकर्म्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥ यतः प्रवृत्तिर्भूतानां येन सर्व्वमिदं ततं । स्वकर्म्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात् स्वनुष्ठितात् । स्वभावनियतं कर्म्म कुर्व्वन्नाप्नोति किल्बिषं ॥ सहजं कर्म्म कौन्तेय सदोषमपि न त्यजेत् ॥ सर्व्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥ असक्तबुद्धिः सर्व्वत्र जितात्मा विगतस्पृहः । नैष्कर्म्यसिद्धिं परमां सन्न्यासेनाधिगच्छति ॥ इति श्रीभगवद्गीतायां १८ अध्यायः ॥

कर्म्मयोगः पुं चित्तशुद्धिजनकवैदिककर्म्म । यथा । निष्कामकर्म्मणात्मज्ञानमिच्छुकं यथा । अयमेव क्रियायोगो ज्ञानयोगस्य साधकः । कर्म्मयोगं विना ज्ञानं कस्यचिन्नैव दृश्यते ॥ सोऽपि दुरितक्षयद्वारा न साक्षात् । इति मलमासतत्त्वं ॥ ॥ तदस्य ज्ञानस्यावश्यकत्वं यथा । श्रीभगवानुवाच । लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ । ज्ञानयोगेन साङ्ख्यानां कर्म्मयोगेन योगिनां ॥ न कर्म्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते । न च सन्न्यसनादेव सिद्धिं समधिगच्छति ॥ न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्म्मकृत् । कार्य्यते ह्यवशः कर्म्म सर्व्वः प्रकृतिजैर्गुणैः ॥ कर्म्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् । इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते ॥ यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्ज्जुन । कर्म्मेन्द्रियैः कर्म्मयोगमसक्तः स विशिष्यते ॥ नियतं कुरु कर्म्म त्वं कर्म्म ज्यायो ह्यकर्म्मणः । शरीरयात्रापि च ते न प्रसिद्ध्येदकर्म्मणः ॥ यज्ञार्थात् कर्म्मणोऽन्यत्र लोकोऽयं कर्म्मबन्धनः । तदर्थं कर्म्म कौन्तेय मुक्तसङ्गः समाचर ॥ सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः । अनेन प्रसविष्यध्वमेष वोऽस्त्विष्ट

कामधुक्॥देवान् भावयतानेन
ते देवा भावयन्तु वः।परस्परं
भावयन्तः श्रेयः परमवाप्स्यथ॥
इष्टान् भोगान् हि वो देवा दास्य
न्ते यज्ञभाविताः।तै र्दत्तानप्र
दायैभ्यो यो भुंक्ते स्तेन एव सः
॥यज्ञशिष्टाशिनः सन्तो मुच्य
न्ते सर्व्वकिल्विषैः।भुञ्जते ते त्व
घं पापा ये पचन्त्यात्मकारणा
त्॥अन्नाद्भवन्ति भूतानि प
र्ज्जन्यादन्नसम्भवः।यज्ञाद्भव
ति पर्ज्जन्यो यज्ञः कर्म्मसमुद्भवः
॥कर्म्म ब्रह्मोद्भवं विद्धि ब्रह्माक्ष
रसमुद्भवं।तस्मात् सर्व्वगतं ब्र
ह्म नित्यं यज्ञे प्रतिष्ठितं॥एवं प्र
वर्त्तितं चक्रं नानुवर्त्तयतीह
यः।अघायु रिन्द्रियारामो मो
घं पार्थ स जीवति॥यस्त्वात्म
रति रेव स्यादात्मतृप्तश्च मान
वः।आत्मन्येव च सन्तुष्ट स्त
स्य कार्य्यं न विद्यते॥नैव तस्य
कृतेनार्थो नाकृतेनेह कश्चन
।न चास्य सर्व्वभूतेषु कश्चिद
र्थव्यपाश्रयः॥तस्मादसक्तः स
ततं कार्य्यं कर्म्म समाचर।अस
क्तो ह्याचरन् कर्म्म परमाप्नोति
पूरुषः॥कर्म्मणैव हि संसि

द्धि मास्थिता जनकादयः।लोक
संग्रहमेवापि संपश्यन् कर्त्तु म
र्हसि॥यद्यदाचरति श्रेष्ठ स्तत्त
देवेतरो जनः।स यत् प्रमाणं कु
रुते लोक स्तदनुवर्त्तते॥न मे
पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु
किञ्चन।नानवाप्त मवाप्तव्यं
वर्त्त एव च कर्म्मणि॥यदि ह्यहं
न वर्त्तेयं जातु कर्म्मण्यतन्द्रितः।
मम वर्त्मानुवर्त्तन्ते मनुष्याः पा
र्थ सर्व्वशः॥उत्सीदेयु रिमे लोका
न कुर्य्यां कर्म्म चेदहं।सङ्करस्य
च कर्त्ता स्या मुपहन्या मिमाः प्र
जाः॥सक्ताः कर्म्मण्यविद्वांसो य
था कुर्व्वन्ति भारत।कुर्य्याद्विद्वां
स्तथासक्त श्चिकीर्षु र्लोकसंग्र
हं॥न बुद्धिभेदं जनयेदज्ञानां
कर्म्मसङ्गिनां।जोषयेत् सर्व्वक
र्म्माणि विद्वान् युक्तः समाचर
न्॥प्रकृतेः क्रियमाणानि गुणैः
कर्म्माणि सर्व्वशः।अहङ्कारवि
मूढात्मा कर्त्ताहमिति मन्यते॥
तत्त्ववित्तु महाबाहो गुणक
र्म्मविभागयोः।गुणा गुणेषु व
र्त्तन्त इति मत्वा न सज्जते॥प्रकृ
ते र्गुणसंमूढाः सज्जन्ते गुणक
र्म्मसु।तानकृत्स्नविदो मन्दा

न् कृत्स्नविन्न विचालयेत्॥
मयि सर्व्वाणि कर्म्माणि संन्यस्या
ध्यात्मचेतसा।निराशी र्निर्म्ममो
भूत्वा युध्यस्व विगतज्वरः॥ये
मे मत मिदं नित्य मनुतिष्ठन्ति
मानवाः।श्रद्धावन्तोऽनसूयन्तो
मुच्यन्ते तेपि कर्म्मभिः॥ये त्व
तदभ्यसूयन्तो नानुतिष्ठन्ति मे
मतं।सर्व्वज्ञानविमूढांस्तान् वि
द्धि नष्टानचेतसः॥सदृशं चे
ष्टते स्वस्याः प्रकृते र्ज्ञानवान
पि।प्रकृतिं यान्ति भूतानि नि
ग्रहः किं करिष्यति॥इन्द्रिय
स्येन्द्रियस्यार्थे रागद्वेषौ व्य
वस्थितौ।तयो र्न वशमागच्छे
त्तौ ह्यस्य परिपन्थिनौ॥श्रेया
न् स्वधर्म्मो विगुणः परधर्म्मा
त् स्वनुष्ठितात्।स्वधर्म्मे निध
नं श्रेयः परधर्म्मो भयावहः॥
इति श्रीभगवद्गीतायां कर्म्म
योगो नाम ३ अध्यायः॥ ॥
अस्य भगवन्नन्दिरादिकरणे
वह्निपुराणे यमानुशासनना
माध्याये द्रष्टव्यं॥
कर्म्मविपाकः पुं सदसत्कर्म्म
जनाफलं।तद्विवरणं यथा।नर
कात् प्रतिमुक्तस्तु पापयोनिषु

जायते।पतितात् प्रतिगृह्याथा
वरयोनि र्व्रजेद्बुधः॥नरकात् प्र
तिमुक्तस्तु क्रमि र्भवति पातकः
।उपाध्यायव्यलीकन्तु कृत्वा
श्वा भवति द्विजः॥तज्जायां म
नसा वाञ्छं स्तद्द्रव्यं वाप्यसंशयं।
योगद्रव्ये जायते जन्तु र्मित्र
स्यैवापमानकृत्॥मात्सर्य्यात्
मात्रकस्य शारिका संप्रजायते।
पितरौ पीडयित्वा तु कच्छप
स्तु जायते॥भर्त्तुः पिण्ड मुपा
श्नन्तो हित्वान्यानि निषेवयेत्।
सोपि मोहसमापन्नो जायते
वानरो मृतः॥न्यासापहर्त्ता
नरकात् विमुक्तो जायते कृ
मिः।असूयकश्च नरकान्मुक्तो
भवति राक्षसः॥विश्वासहर्त्ता
च नरो मीनयोनौ प्रजायते।य
वधान्यानि हृत्वा तु जायते
मूषिको मृतः॥परदाराभिम
र्षी तु वृको घोरोऽपि जायते।
भ्रातृभार्य्याप्रसङ्गे तु कोकिलो
जायते नरः॥गुर्व्वीद्विभार्य्याग
मनात् शूकरो जायते नरः।य
ज्ञदानविवाहानां विघ्नकर्त्ता
भवेत् क्रमिः॥देवता पितृ
विप्राणामदत्वा योऽन्न मश्नु

ते।प्रमुक्तो नरकाद्वापि वायसः
स प्रजायते॥ ज्येष्ठभ्रातृवमा
नाच्च क्रौञ्चयोनौ प्रजायते।
शूद्रश्च ब्राह्मणीं गत्वा कृमि
योनौ प्रजायते॥ तस्यां मपत्य
मुत्पाद्य काष्ठान्तः कीटको भ
वेत्॥ कृतघ्नः कृमिकः कीटः
पतङ्गो वृश्चिक स्तथा॥ अशस्त्र
पुरुषं हत्वा नरः संजायते खरः
। कृमि स्त्रीवधकर्त्ता च बालह
न्ता च जायते॥ भोजनं चोरयि
त्वा तु मक्षिका जायते नरः॥ हृ
त्वाच चैव मार्ज्जार स्तिलहृच्चैव
मूषिकः॥ घृतं हत्वा च नकुलः
काको मद्गुर मामिषम्॥ मधु हृत्वा
नरो दंशः पूपं हत्वा पिपीलिकः
॥ अपो हत्वा तु पापात्मा वायसः
संप्रजायते॥ हृते कांस्ये च हारी
तः कपोतो वा प्रजायते॥ हृत्वा
तु काञ्चनं भाण्डं कृमियोनौ
प्रजायते। कार्पासिके हृते क्रौ
ञ्चो वह्निहृद्बकस्तथा॥ म
यूरो वर्णकं हत्वा शाकं पत्र
ञ्च जायते। जीवञ्जीवकतां
याति रक्तवस्त्रापहन्नरः॥ छु
च्छुन्दरिः शुभान् गन्धान् वंशं
हृत्वा शशो भवेत्। षण्डः कला

पहरणे काष्ठहृत् काष्ठकीटकः
॥ पुष्पापहृद्दरिद्रस्तु पङ्गुर्यो वा
पहृन्नरः। शाकहृन्ना च हारीत
स्तोयहृत्ता च चातकः॥ भूहृत्
नरकान् गत्वा रौरवादीन् सुदा
रुणान्॥ तृण गुल्म लता वल्ली त्व
क्सार तरुतां व्रजेत्॥ एवमेव क
र्म्म दृष्टो गोसुवर्णादि हारिणा॥
विद्यापहारी मूकश्च गत्वा च न
रकान् बहून्॥ असमिद्धेग्नौ हु
ते च मन्दाग्निः संप्रजायते। पर
निन्दा कृतघ्नत्वं परमर्म्मावघात
नं॥ नैष्ठुर्य्यं निर्घृणत्वञ्च परदा
रोपसेवनं। परस्वहरणाशौचं
देवतानाञ्च कुत्सनं॥ निकृत्या
वञ्चनं नृणां कार्पण्यञ्च नृणां
वधः। उपलक्षणानि जानीया
त् मुक्तानां नरकादनु॥ दयाभू
तेषु संवादः परलोके प्रतिक्रि
या। सत्यं हितार्थमुक्तिश्च वेद
प्रामाण्यदर्शनं॥ गुरुदेवर्षिशा
च केवलं साधुसङ्गमः॥ सत्क्रि
याभ्यसनं मैत्री स्वर्गिणां लक्ष
णं विदुः॥ अष्टाङ्गयोगविज्ञा
नात् प्राप्नोत्यात्यन्तिकं फलं।
इति गारुडे कर्म्मविपाकः २२
२ अध्यायः॥ ॥ ॥

कल ङक गतिसंख्ययोः॥ अं
तस्थस्वतीयोपधः। कलयति
कालं धीरः। इति दुर्गादासः
॥
कल ङ संख्याकृतोः। ङ क
लते दिवसं हद्दः गणयतीत्य
र्थः। कृत शब्दः। इति दुर्गादासः
कल क नुदे। क कालयति।
चौरं रिति नुद आश प्रेरणे इ
त्यस्य रौणादिक किप्रत्यये रू
पं। इति दुर्गादासः॥
कलसः पुं कुम्भः। अस्योत्प
त्त्यादि यथा। सागरे मथ्यमाने
तु पीयूषार्थं सुरासुरैः। पीयू
षधारणार्थाय निर्म्मितो विश्व
कर्म्मणा॥ कलाः कलास्तु देवा
नां यस्मिन् स्थिताः पृथक् पृथक्।
यतः कृतास्तु कलसा स्तेन ते
परिकीर्त्तिताः॥ नवैव कलसाः
प्रोक्ता नामत स्तान्निबोधत॥ गो
पगोहा मरुतो मयूखश्च
तथापरः॥ मनोहा कृषिभद्रश्च
विजय स्तनुशोषकः। इन्द्रियघ्नो
ऽथ विजयो नवमः परिकीर्त्ति
तः॥ तेषामेव क्रमाद्रूप नव
नामानि यानि तान्यपि तान्य
पराण्येव शान्तिदानि सदेव

द्वि॥ क्षितीन्द्रः प्रथमः प्रोक्तो द्वि
तीयो जलसम्भवः। पवनाग्नी
तृतीयौ तु यजमान स्ततः परः
। कोशसम्भवनामा तु षष्ठः स
परिकीर्त्तितः॥ सोमस्तु सप्तमः प्रो
क्त आदित्यस्तथाष्टमः। विजयो
नाम कलसो यो ऽसौ नवम उच्यते
॥ स तु पञ्चमुखः प्रोक्तो महादे
वस्वरूपधृक्। चतुस्र पञ्चवक्त्रे
षु पञ्चवक्त्रः स्वयं तथा॥ यथा
काष्ठास्थितः सम्यक् वामदेवा
दि नामतः। मण्डलस्य च मध्या
त्तः पञ्चवक्त्रघटं न्यसेत्॥ क्षि
तीन्द्र प्रथमो न्यस्य पश्चिमे जल
सम्भवं। वायव्ये वायवं न्यस्य आ
ग्नेये ह्यग्निसम्भवं॥ नैरृत्ये यज
मानन्तु ऐशान्यां कोशसम्भवं। सो
म मुत्तरतो न्यस्य सौरं दक्षिणतो
न्यसेत्॥ न्यसेवं कलसां श्चैव
तेषु चेतान् विचिन्तयेत्। कल
सानां मुखे ब्रह्मा ग्रीवायां श
ङ्करः स्थितः। मूले तु संस्थितो
विष्णु र्मध्ये मातृगणाः स्थिताः
॥ दिक्पाला देवताः सर्व्वे वे
ष्टयन्ति दिशो दश। कुक्षौ तु
सागराः सप्त सप्त द्वीपाश्च
संस्थिताः॥ नक्षत्राणि ग्रहाः

सर्वे तथैव कलपर्वताः॥ गं
गाद्याः सरितः सर्वा वेदाश्चत्वा
र एव च॥ कलसे संस्थिताः स
र्वे तेषु तानि विनिक्षिपेत्॥ रत्ना
नि सर्वबीजानि पुष्पाणि च फ
लानि च॥ वज्रं मौक्तिकं वैदूर्य्यं
महापद्मेन्द्रस्फाटिकैः॥ सर्वथा
ममये बिल्व नागरोडुम्बरं तथा
॥ बीजपूरक जम्बीर काम्राम्रा
तक दाडिमानायवं शालिञ्च
नीवारं गोधूमं सितसर्षपा॥ कु
ङ्कुमागुरु कर्पूर मदने रोचने
तथा॥ चन्दनञ्च तथा मांसी मे
ला कुष्ठं तथैव च॥ कर्पूरपत्र
चण्डञ्च जले निर्यासकाम्बुदं
॥ शैलेयं बदरं जाती पत्रपुष्पे
तथैव च॥ कालशाकं तथा ह
क्कां देवीं पर्णकमेव च॥ वचां
धात्रीं समञ्जिष्ठां तरकं मङ्ग
लाष्टकं॥ दूर्वां मोहनिकां भ
द्रां शतमूलीं शतावरीं॥ पर्णी
नां माषवल्लीं दूर्वां सहदेवीं ग
जाङ्कुशां॥ सर्पकोषां सितां
पांवां सम्भां तरीक्षिकां सहसां॥
यामकं गजदन्तञ्च शतपुष्पी
पुनर्नवां॥ ब्राह्मीं देवीं शिवां
रुद्रां सहेसन्यानिकां तथा॥

समाहृत्य शुभानेतान् कलशे
षु निधापयेत्॥ कलशस्य य
था देवान् विधिं शम्भुगदा
धरं॥ यथाक्रमं स्थापयित्वा
शंभुं स्वच्छतया यजेत्॥ प्रा
सादेन तु मन्त्रेण शम्भुतन्त्रेण
शङ्करं॥ प्रथमं पूजयेन्मध्ये
नानानैवेद्य वेदनैः॥ दिक्पा
लान् घटेष्वथ दिक्पालानेव
पूजयेत्॥ सर्वेबहिः स्थापिते
षु महाणां कलसेषु च॥ नव
ग्रहान् पूजयेत्तु मातृ मीन
घटेषु चा सर्वे देवा घटे स्वा
घटे स्वेषां पृथक् पृथक॥ न
वैव तत्र पूर्वोक्ताः स्वना मुख
तमा नृप॥ भक्ष्यैर्भोज्यैश्च पे
येश्च पुष्पैर्नानाविधैः फलैः॥
यावकैः पायसैश्चापि यथा
सम्भवयोजितैः॥ पुष्पस्नाना
य नृपतिः पूजयेत् सकलान्
सुरान्॥ इति कालिकापुराणे
पुष्पाभिषेकः ८७ अध्यायः॥
॥ अन्यत् घास्कशब्दे द्रष्टव्य
॥ ॥
कलिः पुं अन्त्ययुगं तस्योत्
पत्तिर्यथा॥ प्रलयान्ते जगत्
स्रष्टा ब्रह्मा लोकपिता

महः॥ ससर्ज घोरं मलिनं पृष्ठ
देशात् स्वपातकं स चाधर्म्म इ
ति ख्यातस्तस्य वंशानुकीर्त्तना
त्॥ श्रवणात् स्मरणाल्लोकः स
र्वपापैः प्रमुच्यते॥ अधर्म्मस्य
प्रिया रम्या मिथ्या मार्ज्जारलो
चनातस्याः पुत्रो ऽतितेजस्वी द
म्भः परमकोपनः॥ स मायायां
भगिन्यान्तु लोभं पुत्रञ्च कन्य
कां॥ निकृतिं जनयामास तयोः
क्रोधः सुतो ऽभवत्॥ स हिंसा
यां भगिन्यास्तु जनयामास तं
कलिं॥ वामहस्तधृतोपस्थं तै
लाभ्यक्ताञ्जनप्रभं॥ काको
दरं करालास्यं लोलजिह्वं
भयानकं॥ पूतिगन्धं द्यूतम
द्यस्त्रीसुवर्णकृताश्रयं॥ भ
गिन्यान्तु दुरुक्त्यां स भयं पुत्र
ञ्च कन्यकां॥ मृत्युं स जनयामा
स तयोश्च निरयो ऽभवत्॥ या
तनायां भगिन्यान्तु लेभे पुत्रा
युतायुतं॥ इत्थं कलिकुले जा
ता बहवो धर्म्मनिन्दकाः॥ इति
कल्किपुराणे १ अध्यायः॥ ॥
कलिधर्म्मो यथा॥ यदा सत्यानृ
ते तन्द्री निद्रा हिंसा विषादनं॥
शोक मोह भय दैन्य स क

लिस्तदा स्मृतः॥ यस्मिन् ज
नाः कामिनः सुः शश्वत् कटुक
भाषिणः॥ दस्युकृष्टा जनपदा
वेदाः पाषण्डदूषिताः॥ राजान
श्च प्रजाभक्ष्याः शिश्नोदरपरा
द्विजाः॥ अव्रता बटवो ऽशौचा
भिक्षवश्च कुटुम्बिनः॥ तपस्वि
नो ग्रामवासा न्यासिनो ह्यर्थलो
लुपाः॥ ह्रस्वकाया महाहारा
श्चौर्य्यमायामहासहसाः॥ त्यक्ष्य
न्ति भृत्याश्च पतिं तापसास्त्यारव
लं भुक्तं शूद्राः प्रतिग्रहीष्यन्ति
तपोवेशोपजीविनः॥ उद्विग्ना
श्चानलङ्काराः पिशाचसदृशाः
प्रजाः॥ अस्नानभोजनेनाग्निदेव
तातिथिपूजनं॥ करिष्यन्ति क
लौ प्राप्ते न च पित्रोदकक्रि
या॥ स्त्रीपराश्च जनाः सर्वे शू
द्रप्रायाश्च शौनक॥ बहुप्रजा
ल्पभाग्याश्च भविष्यन्ति कलौ
स्त्रियः॥ शिरःकण्डूयनपरा आ
ज्ञां भेत्स्यन्ति स्वपतेः॥ विस
न श्रद्धास्यन्ति पाषण्डापहृ
ता जनाः॥ कलेर्दोषनिधे र्वि
प्र अस्ति ह्येको महान् गुणः
॥ कीर्त्तनादेव कृष्णस्य मुक्त
बन्धः परं व्रजेत॥ इति

यच्चायतो विस्नुं त्रेतायां यज
नः फलं॥ द्वापरे परिचर्य्यायां
कलौ तद्धरिकीर्त्तनात्॥ तस्मा
द्ध्येयो हरिर्नित्यं ध्येयः पूज्य
श्च शौनक॥ इति गारुडे युग
धर्मे २२७ अध्यायः॥
कलिका स्त्री पदसन्ततियुक्त
रचनाविशेषः। तद्विवरणं य
था। स्तम्भेष्वा कलिकारेखा श्लो
कास्तु पृगशः स्मृताः। अन्त्या
सां कलिकानान्तु भवन्त्येकैक
शो हिते॥ छन्नी द्वौ कलिका
भिस्तु विरुदास्तत्वसंख्यकाः
॥ कलिकालक्षणं। कला नाम
भवेत्तासां नियता पदसन्ततिः।
कलाभिः कलिका प्रोक्ता न
भेदाः षट् समीरिताः॥ कलि
का चण्डवृत्ताख्या द्विगादिग
णात्मिका। तथा विभङ्गी वृत्ता
ख्या मध्या मिश्रा च केवलेति॥
केवला स्त्री दशधा संयुक्तवर्णाः
श्चसंयुक्तवर्णानां नियमो दश
धा च नेमयुरं श्लिष्ट विश्लिष्ट
शिथिल कोमल स्वमी॥ भिद्य
ते हस्वदीर्घाभ्यां ते द्वैधेन स
दे यथा॥ हस्वान्ययुक्त संयोगाः
शाङ्क्ष राङ्कु श्रीकिङ्कराः॥ तस्मात्

श्लिष्टसंयुक्ता दर्प कर्पर सर्पवत
। तनो विश्लिष्टसंयुक्ता भल क
ल्याण बिल्वयः॥ तथा शिथिल
संयुक्ताः पक्षप कश्यप वश्यव
। प्रोक्ता ह्यादियुता मह्यं मह्यं
ह्यं प्रसह्यवत्॥ गह्वरीन ह्रौ
संयुक्त भेदान कोविन समीर
। दीर्घा त्रुङ्गाङ्ग कार्पास वाल्ल
वैशण्य वाह्यक भित्ति॥ कला
परिमाणं युक्तं। अधिका श्रेष
तः षष्टि न्यूना द्वादश नाः क
लाः। एताभ्यो नाधिकाः का
र्य्या न्यूना अपि न पण्डितैरि
ति॥ तत्र तावच्चण्डवृत्तकलि
का द्विविधा। तत्रा विशाख
श्चेति भेदान्। तत्र रणादि विं
शति भेदस्य नव स्पर्व वद्धि।
नादयो नव भेदा गृहीताः। व
ढ्डिते वीरभद्रस्य समग्रा उच्यु
त उत्पलो। तस्मात्: श्रीगुणरति
स्तथा मातङ्ग खेलितं॥ तिल
कस्येति कलिका नवस्पैशोर
ता नव इत्युक्ताः॥ ॥अथ
विशिखः। पद्म अम्बुद चम्पक
वञ्जुल वकुल भेदात् पंचवि
धः। तेषादिम पुष्प पंकेरुह कि
कंजपाण्डूल पल्लवी वनकमलाम्भोरुह

कल्हार भेदात् षड्विधं। अन्ति
मं कोकिल भासुर मङ्गल भे
दात् द्विविध मित्येकादशभेदा
विशिखः॥ पङ्केरुह सितकञ्ज
तथा पाण्डुतपत्र परं इन्दीवरा
कुणाम्भोजे कल्हारश्चेति षड्
॥ पङ्केरुहेन कथितं पद्ममेव
मनीषिभिः। चम्पकं वञ्जलं कु
न्दं वकुलं द्विविधं तथा॥ इति
पञ्चविधस्यापि विशिखस्येश
संख्यका इत्युक्ताः। एवं चण्डवृ
त्तकलिका विंशतिधा गृहीताः
॥ अथ पञ्चधा द्विगादिगणवृत्त
का कलिका मंजरीत्यभिहिता कु
मार कोरक गुच्छक सेफल कु
सुम गन्धाख्या। तस्या अत्र कोर
क गुच्छ कुसुमानि गृहीतानि।
कोरके गुच्छ कुसुमे मञ्जरी वि
विधा चान्त्युक्ताः। विभङ्गी कलि
का त शिखरिण्यादिष्वी योढा
। तस्या अत्र दण्डकस्त्री विद
ग्धस्त्री चा गृहीता। दण्डकाख्या
विदग्धाख्या विभङ्गेह द्विधामता
प्रोक्ताः। अथ मिश्रकलिका त
कलिका गद्यसंयुक्ता सप्तवि
भक्तिका वाक्सुमयी संवेल
ही चेति द्विभेदा केवला चेत्स

चेत्यष्टौ। तदेवं षड्पा महाकलि
काभ्यो अष्टाविंशतिरिह कलि
का गृहीताः। रणादय एकादश
नवभेदाः। स्फुलगन्धौ मुग्ध्ने।
ही भेदौ। शिखरिण्यादयः त्रिभ
ङ्गी भेदा मध्यकलिका च त्या
क्ता अरुनायिकाविरहात्।
इति रूपगोस्वामिकृते गोविन्द
विरुदावली भाष्ये वेदवविद्या ल
भूषणः॥
कलियुगं स्त्री चतुर्थयुगं। तस्यो
त्पत्त्यादि यथा। माघी पूर्णिमा
यां शुक्रवारे कलियुगोत्पत्तिः
। तत्र अवतारः कल्की। पुण्य
मेकपादं। पापं त्रिपादं। गङ्गा ती
र्थं। ब्राह्मणो निर्गमिः। अन्नगताः
प्राणाः। सार्द्धे त्रिहस्त परिमितो
मनुष्यदेहः। अष्टाधिकशतव
र्षं परमायुः। भोजनपात्रस्य नि
यमो नास्ति। इति कलियुगस्य
लक्षणं॥ कलियुगाब्दाः ४३
२०००॥ आद्यो कलिराजा पा
ण्डुपुत्रो युधिष्ठिरः। हरिश्चन्द्रः
मणिश्चन्द्रः तेजश्चन्द्रः विक्र
माहित्यः। विक्रमसेनः लाउ
सेनः बल्लालसेनः देवपालः
भूपालः महीपालः। पेन राज

चक्रवर्त्तिनः॥तन्माहात्म्यं यथा
।धर्म्मः सङ्कुचितस्तपो विरहि
तं सत्यञ्च दूरं गतं।लोको ध
र्म्मरता द्विजाश्च खलिता नारी
वशा मानवाः॥तत्र तारकब्र
ह्म नाम।हरे कृष्ण हरे कृष्ण कृ
ष्ण कृष्ण हरे हरे।हरे राम हरे रा
म राम राम हरे हरे।इति केचि
त्॥

कलियुगाद्या स्त्री माघी पौर्णि
मासी।तत् प्रमाणं युगाद्यास्व
दे द्रष्टव्यं॥

कल्किः पुं विष्णो र्दशमावता
रः।तस्योत्पत्ति र्यथा।स्तुत्वा
प्राह पुरो ब्रह्मा देवानां हृद
येप्सितं।तत् श्रुत्वा पुण्डरीका
क्षो ब्रह्माणमिद मब्रवीत्॥स
म्भले विष्णुयशसो गृहे प्रादु
र्भवाम्यहं।सुमत्यां मातरि वि
भो कन्यायां त्वन्निदेशतः॥च
तुर्भि र्भ्रातृभि र्देव करिष्यामि
कलि क्षयं।भवन्तो बान्धवा
देवाः स्वांशेनावतरिष्यथ॥इ
यं मम प्रिया लक्ष्मीः सिंहले
संभविष्यति।वृहद्रथस्य भूप
स्य कौमुद्यां कमलेक्षणा।
भार्य्यायां मम भार्य्येषा पद्मा
नाम्नी जनिष्यति॥यात यूयं
भुवं देवाः स्वांशावतरणे रताः
।राजानौ मरु देवापी स्थापयि
ष्याम्यहं भुवि॥पुनः कृतयुगं
कृत्वा धर्म्मान् संस्थाप्य पूर्व
त्।कलिव्यालं संनिरस्य प्रया
से स्वालयं विभो॥इत्युदीरित
माकर्ण्य ब्रह्मा देवगणै र्वृतः
।जगाम ब्रह्म सदनं देवाश्च
त्रिदिवं ययुः॥मही माघ्यस
भगवान् निजजन्मकृतोद्यमः
।संभलग्राममविप्रर्षि माविवेश
परात्मकः॥सुमत्यां विष्णुयश
सा गर्भमाधत्त वैष्णवं।ग्रह नक्ष
त्र राश्यादि सेवित श्रीपदाम्बुजं॥
सरित् समुद्रा गिरयो लोकाः
सस्थाणुजङ्गमाः।सहर्षा ऋष
यो देवा जाते विष्णौ जगत्पतौ
॥बभूव सर्व्वसत्वाना मानन्दो
विविधाश्रयः।नृत्यन्ति पितरो
हृष्टास्तुष्टा देवा जगुर्यशः॥च
क्रु र्वाद्यानि गन्धर्वा ननृतु श्चाप्स
रोगणाः॥द्वादश्यां शुक्लपक्षे मा
धवे मासि माधवः।जातो ददृश
तुः पुत्रं पितरौ हृष्टमानसौ॥
धात्री माता महाषष्ठी नाडी
छेत्री तदम्बिका।गङ्गोदक

क्लेदमोक्षा सावित्री मार्ज्जने
यता॥तस्य विष्णो रनन्तस्य
वसुधा पायत् पयः सुधामात्
कामाङ्गल्यवचः कृष्णजन्मनि
ते ऽभवत्॥ब्रह्मा तदुपधार्य्याशु
स्वाशुगं प्राह सेवकं॥या
हीति सूतिकागारं गत्वा विष्णुं
प्रबोधय॥चतुर्भुजमिदं रूपं
देवानामपि दुर्लभं।त्यक्त्वा मा
नुषवद्रूपं कुरु नाथ विचारि
त॥इति ब्रह्मवचः श्रुत्वा प
वनः सुरभिः सुखं।सशीतः
प्राह तरसा ब्रह्मणो वचना
दतः॥तच्छ्रुत्वा पुण्डरीकाक्ष स्त
त्क्षणाद्द्विभुजो ऽभवत्।तदा त
त्पितरौ दृष्ट्वा विस्मयापन्नमा
नसौ॥भ्रमसंस्कारवत्तत्र मेना
ते तस्य मायया।ततस्तु शम्भल
ग्रामे सोत्सवा जीवजातयः॥म
ङ्गलाचार बहुलाः पापताप वि
वर्ज्जिताः।सुमति स्तं सुतं लब्ध्वा
विष्णुं जिष्णुं जगत्पतिं॥पूर्णका
मा विप्रमुख्यानाहूयादात् गवां श
तं।हरेः कल्याणकृद्विष्णुयशाः
शुद्धेन चेतसा॥सामर्ग्यजुर्भि र्वि
प्राग्र्यै र्नामकरणं ततः।तदा
रामः कृपो व्यासो द्रौणि
भिक्षुः शरीरिणः॥समायाता
हरिं द्रष्टुं बालकत्वमुपागतं।ता
नागतान् समालोक्य चतुरः
सूर्य्यसन्निभान्॥हृष्टरोमा द्वि
जवरः पूजां चक्रे स ईश्वरान्।
पूजिता स्ते स्वासनेषु संविष्टाः
स्वस्वाश्रयाः॥हरिं क्रोडगतं
तस्य ददृशुः सर्व्वमूर्त्तयः।तं बा
लकं नराकारं विष्णुं नत्वा मुनी
श्वराः॥कल्किं कल्कविनाशा
र्थ माविर्भूतं विदु र्बुधाः।नामा
कुर्व्वं स्ततस्तस्य कल्कि रित्य
भिविश्रुतं॥कृत्वा संस्कारकर्म्मा
णि ययुस्ते हृष्टमानसाः।ततः स
ववृधे तत्र सुमत्या परिपालितः॥
कालेनाल्पेन कंसारिः शुक्लपक्षे
यथा शशी।कल्केर्ज्येष्ठास्त्रयः शू
राः कवि प्राज्ञ सुमन्त्रकाः॥तात
मातृ प्रियकरा गुरुविप्रप्रतिष्ठि
ताः।कल्केरंशाः पुरो जाताः
साधवो धर्म्मतत्पराः॥गार्ग्य भ
र्ग्य विशालाद्या ज्ञातय स्तदनु
व्रताः।विशाखयूप भूपाल पा
लिता स्तापवर्जिताः॥ब्राह्मणाः
कल्कि मालोक्य परां प्रीति मु
पागताः।ततो विष्णुयशाः पु
त्रं धीरं सर्वगुणाकरं॥कल्कि

कमलपत्राक्षं प्रोवाच पद्मना
दत्ताजान ते ब्रह्मसत्कारयुक्त
सुत मनुमम॥सावित्री वाच
यिष्यामि ततो वेदान् पठिष्य
सि॥इति श्रीकल्किपुराणे ऽनु
भागवते भविष्ये कल्किजन्मो
पनयने २ अध्यायः॥
कल्पपादपदानं श्री महादान
विशेषः॥तद्विधानं यथा॥कल्प
पादपदानाख्यं मतः परमुत्त
मं महादानं प्रवक्ष्यामि सर्व
पातकनाशनं॥पुण्यदिनम
थासाद्य तुलापुरुषदानवत्॥
पुण्याहवाचनं कृत्वा लोकेशा
वाहनं तथा॥कृत्विक्मण्डपसंभा
रभूषणाच्छादनादिकं॥कांचनं
कारयेद्वृक्षं नानाफलसमन्वि
तं॥नानाविहगवस्त्राणि भूष
णानि च कारयेत्॥शक्तितस्त्रि
पलादूर्ध्वं मा सहस्रात् प्रकल्प
येत्॥अर्द्धेकार्णं सुवर्णस्य कार
येत् कल्पपादपं॥गुडप्रस्थोपरि
ष्टाच्च सितवस्त्रयुगावृतं॥ब्रह्म
कं च यावदुपानत्सवर्णस्याई
न निर्मितं॥ब्रह्मविष्णुशिवोपे
तं पंचशाखं सभास्करं॥काम
देवमधस्ताच्च सकलत्रं प्रक

ल्पयेत्॥सन्तानं पूर्वतस्तद्व
तीयांशेन कल्पयेत्॥मन्दारं द
क्षिणे पार्श्वे श्रिया सार्द्धं घृतो
परि॥सन्तानं पूर्वतस्तद्वदर्द्धेन
गुडप्रस्थस्य सितवस्त्रयुगाहि
तिन्यथैः॥कामदेवमथस्ताच्चाप्ति
सन्तानवृक्षसाथवस्मात् सके
वं कामदेवं प्रकल्पयेद्दीपदी
जनं॥मन्दारादिकैकैकदेवना
मन्यकृतेः॥पश्चिमे पारिभ
द्रन्तु सावित्र्या सह जीरकोप
रि भीसंयुतं नहरिचन्दनं हरीच
न्दनं॥तृतीयांशेन कुर्वीत सौ
म्येन फलसंयुतं॥कौषेयव
स्त्रसंयुक्तानि च मास्य फला
विनानि॥तृतीयांशेन सन्ता
नवटनावस्थितं सुवर्णाद्भुतीय
भागेन॥सौम्येन उत्तरे दिग्भागे
न॥तथाष्टशाकलशान पादुका
सनभाजनान्नदीपिकोपानह
च्छत्रचामरासनसंयुतं॥पादुका
सनभोजनान् पादुकासनभाज
नसहितानि न्यस्यैः॥आसनपद
न्यासन्नसावस्यानोवितानमत
वं॥चामरासनसंयुतमिति पुनरा
सनपदस्थवसाकः॥फलपत्रयुतं
नहडपरिसहितानकं॥तथा

शाद्दशाधान्यानि समन्तात् परिक
ल्पयेत्॥होमाधिवासनान्ते न
स्नापितो वेदपुङ्गवैः॥त्रिः प्रद
क्षिणमाहत्य मंत्रमेतमुदीरयेत्
॥नमस्ते कल्पवृक्षाय चिन्ति
तार्थप्रदाय च॥विश्वम्भराय देवा
य नमस्ते विश्वमूर्तये॥यस्मात्त्व
मेव विश्वात्मा ब्रह्मस्थाणुदि
वाकरः॥मूर्तामूर्तं परं बीजमतः
पाहि सनातन॥त्वमेवामृतसर्व
स्वमनन्तः पुरुषोऽव्ययः॥सन्ताना
द्यैरुपेतः सन् पाहि संसारसा
गरात्॥एवमामन्त्र्य तं दद्यात्गुर
वे कल्पपादपं॥चतुर्भ्यश्चापि
ऋत्विग्भ्यः सन्तानादीनि कल्प
येत्॥एतेन चत्वार एव द्विजः
कर्तव्याः॥कृशाणया स्वल्पाशे व्र
ह्मणा इत्युक्तसंभवति॥स्वल्प
स्वेकाग्निवत् कुर्यान्न गुरुरेव
च्छिश्रितः॥न विप्रशाखं कुर्वीत
न च विस्मयवान् भवेत्॥न च
विस्मयवान् इदमयादत्रेति
ति नाहङ्कारवान् भवेदित्यर्थः॥
अनेन विधिना यस्तु महादाने
निवेदयेत्॥सर्वपापविनिर्मुक्तः
सोऽश्वमेधफलं लभेत्॥अप्सरो
भिःपरिवृतः सिद्धचारणकिन्नरैः

भूतान् भव्यांश्च मनुजो स्तारये
दात्मसंमितान्॥स्तूयमानो दि
वः पृष्ठे पुत्रपौत्रप्रपौत्रवान्॥
विमानेनार्कवर्णेन विष्णुलोकं
स गच्छति॥दिवि कल्पशतं
तिष्ठन् राजराजो भवेत्ततः॥नारा
यणबलोपेतो नारायणपरा
यणः॥नारायणकथासक्तो
नारायणपुरं व्रजेत्॥यो वा पठे
त् कनककल्पतरुप्रदानं यो
वा शृणोति पुरुषोऽल्पधनः स
देहात्सोऽपीन्द्रलोकमधिगम्य स
हाप्सरोभिर्मन्वन्तरं वसति पा
पविमुक्तदेहः॥अत्र यजमानः
समुपज्ञात कल्पपादपमहा
दानदानेच्छु स्तुलापुरुषलिखि
ते त्वेङ्कर्मेमयाच्छन्न सन्ताह
नलास्थाप्य हरिप्रतिमालंकार
नलाहस्तग्राह्य प्रतिमा कर्णिक
चतुष्टय वरणादि दानणसाम
ग्रीवीहिः सर्वसंभारमथिकवेन
पलत्रयाद्दूर्ध्वं सहस्रपलावधि
यथेष्टकांचनमुपादाय तस्यार्द्धे
न कल्पपादपमपरार्द्धेन समभा
गेन सन्तानं मन्दारं पारिभद्रं ह
रिचन्दनमेवं पंचतरून् एंचशा
खान् सोवर्णान्नानाफलपत्र

हेम निर्म्मिता नेकवस्त्राकारसहि
तान् केयूरकुण्डलाद्याभिमताल
ङ्कारभूषितान् पश्चामाछादनार्थं
श्वेतवस्त्रयुगपञ्चकं तद्गुणा सव
स्थापनार्थं गुडप्रस्थद्वयं प्रत्येकं
प्रस्थपरिमितान् पात्रस्थ घृत जीर
कतिलौ च कल्पवृक्षाधः स्थाप
नार्थं मभीष्टस्वर्णान्तरयन्त्रोत्वा
दिता ब्रह्म विष्णु शिव भास्करप्र
तिमाः यथोक्तकम तरु वृक्षस्यार्थं
स्थापनार्थं मभिमतस्वर्णान्तरय
न्त्रान् कोटिमाः सरति कामदेव ल
क्ष्मी सावित्री सुरभि प्रतिमाश्च क
ल्पतरु पार्श्वस्थापनार्थं मष्टौ कु
म्भान् तदुपस्थापनार्थं कुशादि नि
र्म्मिता सनाष्टकं कुम्भाछादनार्थं
कौषेय वस्त्राष्टकं कुम्भपार्श्वस्थाप
नार्थं मिक्षुदण्डाष्टकं पुष्पमाला
ष्टक सामग्री यथेष्ट फलाष्टकं पा
दुकायुगाष्टकं कांस्यभाजनाष्टक
मन्ने कल्पतरु पार्श्वार्पणार्थं दीप
कोपानद्युग छत्र चामरासनाष्टा
दशधान्यानि चोत् पादयेत्।ता
न कल्पाङ्कुरोक्तसमयाना म
न्तनमस्य दशमेदिने यजमानगु
रुर्त्विग्जापका ऋत्विक्पुरुषवद्धवि
ष्यभोजनादिकं कृत्वा निवेदन

सङ्कल्पवाक्येयो तुलापुरुषपद
स्थाने कल्पपादपपदं प्रक्षिप्य यथा
यथ निवेदनं सङ्कल्पनञ्च कुर्य्युः।
ततोऽपरदिने यजमान तुलापुरु
षवद्गोविन्दाद्याराधनादि मधुप
र्कदानान्तं गोविन्दाद्यभ्यर्च्चन
ब्राह्मणानुज्ञापन दान सङ्कल्प
पुण्याहादिवाचन वरणवाक्येषु
तुलापुरुषपदस्थाने कल्पपाद
पपदं प्रक्षिप्य कुर्य्युस्ततो गु
रुर्त्विग्यजमानजापका उपवसे
युः। अपरदिने च कृतनित्यास्तु
लापुरुषवदग्निस्थापनादिम
ध्यब्राह्मणवाचनान्तं कर्म्म यथा
यथं कुर्य्युः। एवञ्च मध्यब्राह्मण
वाचनान्तं कर्म्म तुलापुरुषग्र
न्थमनुसन्धायानुष्ठानन्ततस्त
ऋत्विजः कल्पतरु मानीय प्रधा
नवेद्यां लिखित चक्रमध्ये गुडप्र
स्थं दत्वा तदुपरि स्थापयेयुः। तत
स्तस्याधो गुडप्रस्थोपरि पीतकौशे
या स्वर्णयन्त्रोत्वादिता ब्रह्म वि
ष्णु शिव भास्कर प्रतिमाः स्थाप
येयुः। ततः पूर्वेणोत्पलादारोपि
त सरति कामदेव प्रतिमा गुड
प्रस्थोपरि सन्तानं कल्पतरु
दक्षिणातो ऽधः समारो

417

पित लक्ष्मीप्रतिमां घृतप्रस्थो
परि मन्दारं कल्पतरोः पश्चिम
तोऽधः समारोपित सावित्रीप्र
तिमां जीरकप्रस्थोपरि पारिभ
द्रं कल्पतरूत्तरतोऽधः समारो
पित सुरभिप्रतिमां तिलप्रस्थो
परि हरिचन्दनञ्चारोपयेयुः।
सर्वांश्च वृक्षान् प्रत्येकं सित
वस्त्रयुगेनाछादयेयुः। अष्टा
स्वदिक्षु प्रत्येकं कौषेयवस्त्रा
छादितानिक्षुदण्डफलान्वि
तान् माल्यालङ्कृतानष्टौ पूर्वेक (?)
म्भान् पार्श्वारोपित पादुकायुग
भोजनानासनेष्वारोप्य कल्पत
रुपार्श्वे पूर्वोक्तदीपिकाचम (?)
कारणमारोपयेयुः। ततो मङ्ग
लतूर्य्य गीत वन्दि घोषपुरस्स
र ऋत्विजः कुण्डसमीपस्थ
कुण्डचतुष्टयजलेन यजमानं
स्नापयेयुः। ततो यजमानः शु
क्लमाल्याम्बरधरो धृतसर्वाल
ङ्कारः पुष्पाञ्जलिमादाय क
ल्पपादपं त्रिः प्रदक्षिणीकृत्य
नमस्ते कल्पवृक्षायेत्यादि पाठितस (?)
मानसागरोदित मन्त्रान् पठित्वा
पुष्पाञ्जलिनाभ्यर्च्य गुरुर्त्विग्भ्योऽप
यथायथं दद्यात्तो ब्रह्माद्युक्तकस (?)

गोत्रेभ्योऽमुकामुकवेदामुका
मुकशाखाध्यायिभ्योऽमुकामु
कदेवशर्म्मभ्यो युष्मभ्य मत्स्यपु
राणोक्तकल्पपादपमहादानज
न्यफलप्राप्तिकामोऽहं मत्स्यपुरा
णोक्तभागवस्थया एत गुड (?)
प्रस्थारोपित सौवर्ण ब्रह्म विष्णु
शिव भास्कर प्रतिमा सितवस्त्र
युगान्वित गुडप्रस्थारोपित सौ
वर्ण सरति कामदेवप्रतिमा सि
तवस्त्रयुगान्वित सौवर्णसन्ता
नसहितं घृतप्रस्थारोपित सौव
र्णलक्ष्मी प्रतिमा सितवस्त्रयुगा
न्वित सौवर्णमन्दारसहितं जीर
कप्रस्थारोपित सौवर्णसावित्री
प्रतिमा सितवस्त्रयुगान्वित सौव
र्णपारिभद्रसहितं तिलप्रस्थारो
पित सौवर्णसुरभिप्रतिमा सित
वस्त्रयुगान्वित सौवर्णहरिचन्दन
सहितं कौषेयवस्त्रयुगवेष्टित ग्री
वेक्षुमाल्य फलान्वित कुशासन
पादुकायुग कांस्यभाजनयुत ह
र्णकुम्भाष्टक दीपिकोपानद्युग छ
त्रचामरासन फल माल्य युत प
ञ्चवर्णवितानकाष्टादशधान्ययुतं
कल्पपादप महादान महं ददानि।
प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सा

विंशी पदिता यथायथं अमु
कपादपोयं विस्रुदैवत मिस्तु
क्ता यथाशास्त्र कामस्तुतिं प
ठेयुः।ततो दक्षिणादानं।ॐ
अद्य हीने तद्दानप्रतिष्ठार्थं यु
ष्मभ्य महन्दक्षिणामिमां य
दुत्पत्तियोग्या भूमि मेतानि
च रत्नानि ददानि।प्रतिग्रहीता
रः स्वस्तीत्युक्ता प्रत्येकं तरुन्
मूलेषु स्थापयेयुः।ततो यजमान
स्तत्तत्पुरुषवत्तापकेभ्यो द
क्षिणादानं दीनानाथादिभ्य प
णे ब्राह्मणवाचनञ्च कुर्यात
।ततः कल्पपादपं गुरवे सन्ता
नकादीन्तरेभ्यो हुत्वान् ऋत्वे
ग्यादिक्रमेण चतुर्भ्यं ज्योतिस्भ्यो
निवेदयेत्।स्वस्वकल्पपादप
दाने तु गुरु रेवैकाग्निवत स्वर
होत्रक्रविधिना संधे ब्रह्माण्डदान
वत् कुर्यात्।इति कल्पपादप
महादानेसमाप्तं।इति महाराजा
धिराज निःशङ्कशङ्कर श्रीमद
ल्लालसेन देव विरचिते श्रीदा
नसागरे महादानदानावर्तः।।
कल्पलतादानं श्री महादान
विशेषः।तस्य विधि यथा।
अथातः संप्रवक्ष्यामि महादान

मनुत्तमं।महाकल्पलतं नाम
पातकौघविनाशनं।।पुण्यान्ति
थि मथासाद्य होत्वा ब्राह्मणवा
चनं।अलङ्कृत्य त्रसंभार भूषणा
च्छादनादिकं।।तत्त्वापुरुषवत् ऊ
ध्यात् लोकेशवाहनादिकं।चा
मीकरमयीः कुर्यादेशकल्पल
ताः शुभाः।।नानाकुसुम फलोपेता
नानांशुक विभूषिताः।विद्या
धर सुपर्णानां मिथुनैरुपशो
भिताः।।सुपर्णानां किन्नराणां
।।हारानादिनस्भिः सिद्धैः फ
लानि च विहङ्गमैः।लोकपा
लानुसारिण्यः कर्तव्या स्ताश्च
देवताः।।लोकपालानुसारि
ण्य इति लोकपालसमानाहि
तयः।।ब्राह्मी मनन्तशक्तिञ्च
लवणोपरि न्यसेत्ताः।।मध्यतो
च तथा मेध्ये महाखड्गधरे श
भे।।पद्मशंखकरे इति केचित्
पाठः।।स्वर्णासनस्था माहेन्द्री
ह्रस्वेतः कुलिशायुधा।रजनीसं
स्थिताग्नेयी स्रुवपाणि स्याचला।।
रजनीहरिद्रा।।याम्या च महिषारूढा
गदिनी तण्डुलोपरि।।नैर्ऋती नो
र्त्रौ स्थाप्या शावढ़ा च चूर्णोप
रि।।वारुणी वारुणी चीरे सर्प

स्था नागपाशिनी।।पिनाकिनी च
वायव्ये मृगस्थ्या शर्करोपरि।।
सौम्या तिलेषु संस्थाप्या कौवे
रीदिशि संस्थिता।।माहेश्वरी वृ
षगता नवनीते त्रिशूलिनी।।
मौलिभ्यो वरदा स्त्रहस्त कर्तव्या
बालकान्विताः।।साक्षा पञ्चप
लार्द्ध मासहस्रान् प्रकल्पये
त्।।मौलिभ्यो मुकुटवन्तः।।वर
दाः प्रसन्नमूर्तयः।।बालकान्वि
ताः क्रोडनिहितपुत्रकाः।।एतेन
क्रोडनिविष्ट वामकरस्थेन पुत्रि
का दक्षिणहस्तविधृत यथोक्त
शस्त्राः प्रसन्नमूर्तयो वरमुकु
टाः सवाहना वटनीयाः।।अनुक्त
वाहनानाम्न ब्राह्माग्नेयी नैर्ऋती
नान्त्रलोकपालवाहनानि।।लो
कपालानुसारिण्य इति श्रुतेः।।ते
न हंसारूढा ब्राह्मी छागारूढा
ग्नेयी नरारूढा नैर्ऋती वटनी
या।।अनन्तस्य तु कविद्वाहना
दर्शनात् अनन्तशक्तिं वाहन
शून्यैव कर्तव्या।।सर्वासां तप
शिखा पञ्चवर्णवितानकं।
धेनवो दश कुम्भाश्च वस्त्रयुग्मा
णि चैव हि।।मध्यमे हेतु गुरु
वे कनिष्ठ्यान्या स्तथैव चान

ते मङ्गलशब्देन स्नानः शुक्ला
म्बरो बुधः।।त्रिः प्रदक्षिणं माहन
मन्त्रमेन मुदीरयेत्।।नमो नमः
पापविनाशिनीभ्यो ब्रह्माण्डलो
केश्वरपालनीभ्यः।।आसीशाना
धिकफलप्रदाभ्यो दिश्य लया
कल्पलतावधूभ्यः।।इति सकल
दिगङ्गनाभ्यसान भवभयसूदन
कारि यः करोति।।अभिमतफल
दे स नाकलोके वसति पितामह
हवत्सराणि विंशति।।पितृशत
मघ नारयेत्भवाद्धे गेह दुरितौघ
विघात शुद्धदेहः।।सुरपतिवनि
तासहस्रसंख्यैः परिवृतमम्बुरु
होद्भवाभिनन्द्यः।।इति विधान
मिदं सदिगङ्गना कनककल्प
लताविनिवेदने।पठति यः स्म
रतीह तथेक्षते स पदमेति पुर
न्दरसेवितं।। ।।अत्र यजमानः
समुपजातमहाकल्पलतामहा
दानदानेच्छ स्तत्पुरुषविधि
ने विङ्कवर्मेमयाक्रन्वसन्नाह
न्तत्पुरुष स्थापनीय हरिप्रति
मा सालङ्कारा तुलाहस्थापा प्र
तिमा वहिः सर्वेसम्भारमधिक
मेन पलपञ्चकाद्हर्द्ध पलसहस्रा
वधि यथेष्टहेमनिर्मिताः स्थान

चरित विद्याधर किन्नर मिथुन
सिद्धगणाः पल्लवाग्रनिर्मित य
येऽग्रभागानि फलपुष्पफलप्रदेशा
भित पक्षिगणाः सिद्धहस्ताशक्र य
येऽपि शङ्ख शृङ्गारादि सहिता ना
नाविधवित्रनेत्रादिवस्त्रोपशोभि
ता दश लताः। तासां मध्ये स्थाप
नार्थं यथोक्त हेममयं ब्रह्मवाटि
ना यथोक्तरूपा ब्राह्म्यादि दशप्र
तिमाः। तदारोपणार्थं लवण
गुड हरिद्रा तण्डुल हेम क्षीर श
र्करा तिल नवनीतानि। लतापा
र्श्वस्थापनार्थं धेनुदशकं कुम्भ
दशकञ्च वस्त्रयुगदशकञ्चाप
पादयेत्। ततो यजमान स्नात्वा
पुरुषोक्तसमयानां मन्त्रतमस्त
हवन दिने गृहे विप्रयजमान
जापकाः स्नात्वा पुरुषवद्विप्रो
जनादिकं कृत्वा निवेदन सङ्क
ल्पवाक्येन स्नात्वा पुरुषपदस्था
ने महाकल्पलतापदं निवेदप
निवेदनं सङ्कल्पञ्च कुर्युः। अपर
दिने च यजमानः द्विजैर्नाडिन्ना
नारोधनादि मधुपर्कदानान्त क
र्मणो विनायक पूजन ब्राह्मणाद्य
र्चन दानसङ्कल्प आशाहारिका
चनवारणानि कृत्वा स्नात्वा पुरुषपदस्था

ने महाकल्पलतापदं शोभय कु
र्षीत। ततो गृहे विप्रयजमान जा
पका ओं पवसेयुः। अपरदिने ह
तेन स्नात्वा पुरुषवदाग्र स्था
पनादि मध्य ब्राह्मणवाचनान्त
कर्म यथायथं कुर्युः। एवंच म
ध्य ब्राह्मणवाचनान्त कर्म तत्ता
पुरुषग्रन्थ मत्स्यपुराणाद्य
। ततश्चत्विजः प्रधानवेद्या लि
त चक्रोपरि लतानां मध्ये पूर्वा
दिक्रमेणाष्टौ लताः समारोप्य ल
तामण्डलमध्ये लताद्वयञ्चारो
प्य तद्धो लवणं दत्वा तत्र ब्रा
ह्मी मनन्त शक्तिञ्चारोप्य पूर्वा
दि दिक्क्रमारोपितानाष्टलतामूलः
क्रमेण गुडादिद्रव्याणि दत्वा तेषु
क्रमात् कुलिशायुधादिशक्तिप्र
तिमाः समारोपयेयुः। लतापा
र्श्वे दशधेनूः पूर्वकुम्भदशकं
दश वस्त्रयुगानि च स्थापयेयुः।
ततो मङ्गलगीतवाद्य वन्दि घो
षु सत्सु कुण्डसमीपस्थकुम्भ च
तुष्टयजलेन यजमानं स्नापयेयुः। त
तो यजमानः शुक्लमाल्याम्बरध
रो धूपस्नात्वालङ्कारः पुष्पाञ्जलि
मादाय लता स्थितः प्रदक्षिणीकृत्य
नमो नमः पापविनाशिनीभ्य

इत्यादि मन्त्रेण पुष्पाञ्जलिनाभ्य
र्च्य गृहीत्वा दद्यात्। तत्प्रयो
गः ओं अद्यामुकामुकसगोत्रेभ्यो ऽ
मुकामुकवेदामुकामुकशा
खाध्यायिभ्यो ऽमुकामुकदेव
शर्मभ्यो युष्मभ्यं मत्स्यपुराणो
क्त कल्पलतामहादान दान
फलप्राप्तिकामोऽहं मत्स्यपुरा
णोक्तभागधेयस्थ्येता लव
ण गुड हरिद्रा तण्डुल हेम क्षीर
शर्करा तिल नवनीतार्पित सो
वर्णीब्रह्मानन्त कुलिशायुधा
ग्नियमनिर्ऋति वरुण वायुसो
ममहेश्वर शक्तिप्रतिमासहिताः
पञ्चवर्णवितानक धेनुदशकं
भद्रशकवस्त्रयुगदशकोन्विता
दशकल्पलता ददानि। प्रतिगृही
तारः स्वस्ति ब्रूयुः। सावित्री पठे
युः। ततो गुरुः कल्पलतेयं वि
श्वदेवतेति कुर्युः। ततो यथाश
क्ति कामस्तुतिं पठेयुः। ततः ओं अद्य
कृतैतद्दानप्रतिष्ठार्थं युष्मभ्य म
हं दक्षिणा मिमां यदुक्तयोतये
गां भूमिमेतानि च रत्नानि
ददानि। ब्राह्मणाः स्वस्ति
सक्ता क ॥ ॥

मात्र। ऋत्विजस्तु प्रत्येकं कल्पलतेयं विश्वदेवतेति क्र

स्वलताः स्पृशेयुः। ततस्तत्पु
रुषवज्रापकेभ्यो दक्षिणां दीना
नाथादिनर्पणे ब्राह्मणवाचनं
तत्या कल्पलतानां यथायथ
प्रतिपादनंच कुर्य्यात्। इति क
ल्पलता महादाने समाप्ता इति
दानसागरः॥

कल्ल उ. कूजने॥ शब्दे॥ अश
ब्दे॥ लइयान्तः। इ. कल्लते लो
कः अव्यक्तशब्दं करोति शब्दे
न करोति वेत्यर्थः। कूजने इति
चान्द्रा जौमराश्च। शब्दमात्रे इ
ति केचित्। अशब्दे इति का
श्यपाः। इति दुर्गादासः॥

कव उ. स्तुतौ॥ वर्णे॥ उक्
अवकावत्। उ. कवते। इति
दुर्गादासः॥

कवकं क्ली कवाकं। यथा। देव
तार्थं हविः शिग्रु लोहितान्
व्रश्चनां स्तथा। अनुपाकृतमां
सानि विड्जानि कवकानि च
॥ कवकानि छत्राकाणि। आव
र्जयेदिति प्रत्येकमभिसम्बध्य
ते। इति मिताक्षराया माचा
राध्यायः॥

कवचः पुं क्ली वर्म। तत्पर्य्या

यः। कटकः ११ योगः १२ सन्ना
हः १३ कञ्चुकः १४। इति जटा
धरः॥ ॥तस्य युक्तिर्यथा। खड्गा
दीनान्तु गणना सर्व्वमेव निद
र्शिता। अस्ताभिरेव निर्द्दिष्टक
वचादि रूपीष्यते॥ तल्लक्षणं सं
ग्रहेण प्रवक्ष्यामि निबोधत। का
यं वर्म्म च सकलं जयमेतत्त्र
दुस्तरे॥ यथोत्तरं गुणाढ्यं तत् तथा
पूर्व्वन्तु निन्दितं। शरीरावरक
त्वन्तु तत्तुल्यं दृढता तथा॥ उ
भे ये तेन कथितः कवचे गु
णसंग्रहः। सच्छिद्रतातिगुरु
ता तत्तुल्या सुखभेद्यता॥ कव
चानां विनिर्द्दिष्टः समासाद्दो
षसंग्रहः। अत्र वर्णा विनिर्द्दि
ष्टाः क्रमादेव चतुर्व्विधः॥ सितो
रक्तस्तथा पीतः कृष्णो ब्रह्मा
दिषु क्रमात्। केचित् जगदन्ति
कुशलाः कवचं धातुसम्भवं॥
कनकं रजतं ताम्रं लोहं तेषु
यथाक्रमं॥ इति युक्तिकल्पत
रुः॥ ॥यथा शस्त्रप्रहाराणां
कवचं प्रतिवारणं। तथा
दैवोपघातानां शान्तिर्भ
वति वारणं॥ इति मत्स्य
सूक्तं॥
कवरी स्त्री केशविन्यासः। तत्

पर्य्यायः। कवरः ३ केशगर्भकः
४। इति शब्दरत्नावली॥
कविः पुं कल्किदेवस्य ज्येष्ठभ्रा
ता। यथा। कल्केर्ज्येष्ठास्त्रयः
शूराः कविप्राज्ञसुमन्त्रकाः।
तान मातृप्रियकरा गुरुविप्रप्र
तिष्ठिताः॥ इति कल्किपुराणे
२ अध्यायः॥ ॥अपि च। विशा
खयूपभूपालः श्रायात् साधु
जनप्रियः। कल्किं द्रष्टुं हरेरंश
माविर्भूतन्तु शम्भले॥
कविं प्राज्ञं सुमन्त्रञ्च पुरस्कृत्य
महाप्रभं। गार्ग्य भर्ग्य विशाले
श्च ज्ञातिभिः परिवारितं॥ वि
शाखयूपो ददृशे चन्द्रं ताराग
णै रिव॥ इति तत्रैव ३ अध्यायः
॥ ॥चोरयोरा। यथा।
वेदस्थाने रोगा भञ्जेत् दुर्गे ख
लैः प्रजायते। कविप्रवेश
नेन तत्र वै॥ इति सर्व्वतोभद्रच
क्रे ज्योतिस्तत्त्वं॥

कश शब्दे। कशति। इति दुर्गा
दासः॥
कश्यपः पुं मुनिः। यथा। ब्रह्मणो
मानसो योऽभूत् मरीचिरिति
विश्रुतः। कश्यपस्तस्य पुत्रो

ऽभूत् कश्यपानात् स कश्यपः
॥ इति मार्कण्डेयपुराणे विश्व
कर्म्मकृत सूर्य्यस्तवाध्यायः॥
कष वधे। कषति। अय मनय
पदीति चन्द्रभुजंगमे। रमान्ता
थाप्सौ तु इष्टं परस्मैपदिने स
ता उभयपदिनं गोतव्यांच स्य
न्दमानेता॥ इति दुर्गादासः॥
॥
कषायः पुं लयविक्षेपाभावेपि
चित्तहृते रागादिवासनया स्त
ब्धीभावात् अखण्डवस्त्वनव
लम्बनं। इति वेदान्तसारः॥
कषीका स्त्री पक्षिजातिः। यथा
। कषीका पक्षिजातौ स्यात्
दूषिका नेत्रयोर्मले। इत्युणा
दिकोषः॥
कष्टं क्लीं पीडा। तत्पर्य्यायः।
अर्त्तिः १५ आर्त्तिः १६ पीडनं
१७ बाधनं १८ आमनस्यं १९
विबाधनं २० विहेठनं २१ वि
धानकं २२ पीडितं २३। इति श
ब्दरत्नावली॥ कायः २४ अ
शर्म्म २५। इति जटाधरः॥
कस ज गतौ। जकारः कस्तः।
विसर्गोऽयं अकम्पीभावे।
तथा च। प्रकल्पात् फल सं

फुल्ल वाकोच विकच स्फुटाः। फु
ल्लश्चैते विकसिते इत्यमरः। वि
कसति पङ्कजकोलिका। इति
दुर्गादासः॥
कस इ ल ड. शासने चारु कंसे
तोल्लु ड. कंसते हरिः कंसाच
कशात् गतौ चाशात इह ध्वं
सना। इति दुर्गादासः॥
कस्तूरी स्त्री मृगनाभिद्रव्यभेदः
। तत्पर्य्यायः। कस्तूरिका २४
कस्तुरिका २५ नाभी २६ लता
२७ योजनगन्धा २८ मार्गः २९
गन्धचेलिका ३० कालाङ्गी ३१
मृगमञ्जारी ३२ मिश्रा ३३ गन्ध
शिशाचिका ३४। इति शब्दरत्ना
वली॥
कस्ता स्त्री क्षुद्ररोगविशेषः। त
च्चिकित्सा यथा। कस्ताञ्च ग
न्धनाभीञ्च चिकित्सेत् चि
कित्सकः। पैत्तिकस्य विसर्प
स्य क्रियया सर्व्वे मुक्तया॥ इति
भावप्रकाशः॥
कसल ड. शासने चाल ड. कसे
हरिः कंसं। चकारात् गतौ
चाशात इह ध्वंसना। इति दु
र्गादासः॥
काकः पुं पक्षिविशेषः।

काग इति भाषा। तत्पर्य्यायः। करटकः ३१ नागवीरकः ३२ गृहमेधिनः ३३ लुपकः ३४ श्रावकः ३५ आत्मघोषः ३६ रतज्वरः ३७ इति शब्दरत्नावली॥ ॥अथ शाकुने काकचरितं तद्यथा। अथोच्यते काकरुतं रुतानां मूर्द्धि स्थितं शाकुनभाषितानाम्। अविज्ञातावेदि न कार्य्यसिद्धिं स्वर्वादि काष्ठा प्रहरक्रमेण॥ ये ब्राह्मण क्षत्रिय वैश्य शूद्राः काका भवन्त्यत्र च पञ्चमास्ते। वर्णाकृतिभ्यो ऽथ विभाषितास्ते नाम्ना सदाभियुक्तैरुपलक्षणीयाः॥ बृहत्प्रमाणो गुरुदीर्घतुण्डो दृढस्वरः कृष्णवपुः स विप्रः। पिङ्गाक्ष नीलाक्ष विमिश्रवर्णाः स्यात् क्षत्रियस्तीक्ष्णरवो ऽतिशूरः॥ यः पाण्डु नीलः सितनीलचञ्चु र्नात्यन्त दूरो रटितश्च वैश्यः। भस्मच्छवि र्भैरिककारवः शूद्रः कृशाङ्गः चपलो निकृष्टः॥ क्लि न हृस्वासनस्थ विषङ्को यः कन्यरादीप्तरवे विभक्तिः स्थिरारवः स्थैर्य्यसमेतबुद्धिः काकोऽन्त्यजातिः खलु पञ्चमोऽत्र॥

द्रोणाभिधः कृष्णवपुर्द्विजो यो ग्राह्यः स काकः खलु मुख्य एव। तस्माटने प्रथमागतो निरीक्ष्यः श्रेतश्च निन्द्यो ऽद्भुतदर्शनो ऽसौ॥ विप्रः स्फुटं जल्पति पृच्छमाने ऽत्र ततः क्षत्रियजाति रुग्रः। आख्याति वैश्यस्त्वधिवासनेन प्रीति शूद्रो बलिदानलोभात्॥ प्रश्ने कृते जल्पति कृष्णवर्णः सादा समस्तं विहगोऽन्त्यजातिः। सर्य्य स्त्रिसप्ताह दशाह पक्षैः पान्थापि काकाः फलदाः क्रमेण॥ प्रशान्ते प्रदीप्ते च रटन् विहङ्गः शुभप्रदो दीप्त पराङ्मुखः सन्। न कापि रौद्रो रटितः प्रशस्तः सदैव शस्तो मधुरस्वरश्च रुक्तः॥ दीप्तस्थितो यः परुषस्वरेण विरौति दीप्ताभिमुखः स कार्य्यं निष्पाद्य विनाशयते च सम्यक्। प्रोन्मुखः शान्तरवो हि सिद्धै॥ शान्तप्रदीप्ताभिमुखो विधाय शब्दं प्रविश्याथ पुनः प्रदीप्तां यो रौति काको मधुरस्वरेण हृत्वा विरुद्धं स ददाति सिद्धिं॥ विधाय दीप्ताभिमुखो विरावं ततः प्रशान्ताभिमुखो विरौति।

यो वायसो ऽसौ विनिहन्त्य सम्यक्कार्य्याणि सर्व्वाणि पुनः करोति॥ सूर्य्योदये पूर्व्वदिशि प्रशस्तस्थाने स्थितो यो ऽभिमुखं विरौति। नाशं रिपोश्चिन्तितकार्य्यसिद्धिं स्त्रीरत्नलाभं स करोति काकः॥ ध्वांक्षः प्रभाते यदि वह्निभागे विरौति तिष्ठन् रमणीयदेशे। शत्रून् प्रणाशयत्यचिराद्दिशकः प्रयाति योषितं समवाप्यते तत्॥ तवत् प्रभाते दिशि दक्षिणस्यां काकः समावेश्यते ऽतङ्कः खरोगार्त्ति मृत्युं परुषस्वरेण रमाणं च घृगमम योषिद्भुविभ्रमैने र्ऋत्यभागे यदि च प्रभाते करोति काकः सहसा विरावं। क्रूरं ततः कर्म्म समभ्युपैति दूतागमो मृष्टभुक्का च सिद्धिः॥ प्रातः प्रतीच्यां यदि रौति काको ध्रुवं तदा वर्षति वारिवाहः। स्त्री वस्त्र भूषण्य पुरुषमास च कालिः कलहेण समं तदा स्यात्॥ ध्वांक्षस्य शब्दे पवनात्त यस्य वस्तान्ते यानाभिमतागमो सुः। पान्थागमः शाकुनेष्वति नाशः स्यादन्यदेशे गमने स्व

देशात्॥ दिक्षुत्तरस्यां स्वरवः प्रभाते निरीक्षमाणो बलिभुक् नराणां। ददाति दुःखं भुजगाच्च भीतिं दरिद्रतां नष्टधनेष्टलाभं॥ दिशीशवन्या यदि रौति काक आगच्छन्तस्य विनात्मजातौ। ख्याय निर्म्मिते प्रियवस्तु लाभो भवेत्तदा रोगवलाऽवसाने॥ ब्रह्मप्रदेशे स्थितवायसस्य प्रभातकाले मधुरस्वरेण। अभीप्सितार्थागमनं ध्रुवं स्यात् स्वामिप्रसादो द्रविणस्य लाभः॥ अग्नि वसन्तराजेदिक प्रहरे सूर्य्योदयः॥ ॥पूर्व्वत्र यामे प्रथमे सशब्दः काको भवेद्वाञ्छितकार्य्यसिद्धेः। अभीष्टलोकागमनं तथाग्नौ च द्वार्थलाभो नियतं नराणां॥ याम्यभागे यदि वायुयामे स्त्रीलाभं विद्वेषिवधो भवेत्ता। कृतान्तभागे बलिभुग्विरावः स्त्रीलाभ सौख्य प्रियसङ्गकारी॥ नैर्ऋत्यकोणे प्रियर्योषिदाप्तिर्मिष्टाशने सिद्ध्यति चिन्तितोर्थः॥ दिशि प्रतीच्यां विरुते भवेत् मन्मथश्रीर्यागमनात्सुहृद्भ्यो॥ वायव्यकोणे करटः

शुभः स्यात् नृपप्रसादो ऽध्वय
दर्शने च॥सौम्ये च भीस्तस्कर
शोकवार्त्ता सौम्या च वार्त्ता य
न्नलाभवार्त्ता॥ईशानदेशे ऽ
भिमतेन शंसं स्यात्सौ ऽद्भुतनाशा
द्बन्धुलेकसङ्गः॥ब्रह्मप्रदेशे स
त्वकामभोगः सम्मान सम्पद्
विशिष्टसिद्धिः॥इति प्रथमप्र
हरः॥प्राच्यां द्वितीये प्रहरे वि
रावैः काकस्य कश्चित् पथि
को ऽभ्युपैति॥चोरद्वयं व्याकु
लता च वह्नी जायते कोपि न
महती च शङ्का॥हुताशदेशे
नियतं कलिः स्यात् प्रियागमा
कोणे न योषिद्वाम्भि॥याम्ये तु ह
हि महती च भीतिः प्रियस्य चे
ष्टस्य समागमः स्यात्॥नैर्ऋते दि
शि प्राणभयं नद्यास्तुः स्त्री भो
ज्य लाभो तिल रुक्मलाभाः॥प
भवेत् प्रतीच्यां प्रवलाम्बुलाभ
यौवागमो हृद्धि जलवर्षणं चाम्ब
मीरभागे ध्वजचौरभङ्गो हुताशम
स्त्री पिशितान्नलाभः॥सौम्ये ग
तोष्टागमनं जयं च रम्ये रवे चौ
रभयं त्वरसेप॥महेश्वराशा वि
रुतश्च काकः स्पोरोति सर्वा
से विरुद्धवार्त्ताः ब्रवीति रु

दैरुटनै रटतैः सदार्थे गुर्वी॥
गमनं जयं च॥ब्रह्मप्रदेशे प्रह
रे द्वितीये काकः सशब्दो नृ
पतिप्रसादं॥मिष्टान्नभोज्यं च
ददाति पुंसां करोत्यसौ चौरभयं
कुशब्दः॥इति द्वितीयप्रहरः
॥ ॥ऐन्द्र्यां विरुतः प्रहरे द्वि
तीये हृद्धिं तथा चौरभयं ब्र
वीति॥कुलस्य राजा गमनं ज
यं च करोति यात्रा शुभकार्य
सिद्धिं॥आग्नेये विभागे ऽग्निभयं
कलिश्च विरुद्धवार्त्ता विफला
च यात्रा॥भवेद्विरुद्धे त्वतिभ
क्षिरावैः जयादिवार्त्ता च भवे
द्विसिद्धिः॥काकुम्भवाच्यां
कुरुते ऽतितृष्णी रोगं तथाप्रा
गमनं विहङ्गः॥त्वष्ट्राशि का
र्याणि च यान्ति सिद्धिं सर्वा
णि तन्तुस्वतथा नृपाणां॥कु
व्यादेशे जलदागमः स्यान्नि
ष्टान्नलाभो रिपवो न सन्ति॥पू
ष्ठागमः स्यानिविरुद्ध वार्त्ता भ
वन्ति यात्रासु च कार्यनाशः॥
स्यात् पश्चिमे नष्टधनस्य लाभो
दुःखाधयाने सुहृदागमश्च॥यो
यागमो ऽभीष्ट जयादिवार्त्ता या
त्रासु रम्ये रटितेऽर्थसिद्धिः॥

वानालये ऽर्दिन मेव वार्त्ता चौ
राग्नितप्तार्थं समागमश्च॥सन्ध्यो
षवार्त्ता वरयोषितापि यात्रा र
तेस्यान्मधुरं प्रशस्ता॥याम्ये तु
तीये विरुवन्नुदीच्यां कार्य्या
र्थलाभो नृपसेवकानां॥भो
ज्य प्रहृष्टे शुभदा च वार्त्ता गु
र्वागमे वेश्यसमागमश्च॥दि
शुम्नकारेः कुरुते स्वशब्दे भो
ज्ययहानि कली कुशब्दे।
ब्रह्मप्रदेशे तिलतण्डुलाभ्यां
भोज्यं च तांबूलयुतं ददाति॥
इति तृतीयप्रहरः॥ऐन्द्र्यां
तुरीयप्रहरे ऽर्थलाभो भूमी
शपूजा भयहृद्धि रोगाः॥वह्नै
र्विभागे भय रोग मृत्युः॥शिष्टा
गमो वायसराशितेन॥याम्ये
रवे तस्कर वैरिभीतिः स्यात्तो
विशिष्टागम रोग मृत्युः॥स्यान्
नात्पुयान्या महती प्रहृष्टि र
भीष्टसिद्धिः पथि चौरयुद्धं॥
दिशि प्रतीच्यां प्रहरे चतुर्थे
द्विजाति रभ्येति ततो ऽर्थलाभः
आयाति योषिद्विजयाम्बुवृष्टि
ष्टिः सिद्धिः प्रयाणे नृपतेर्द्वार
श्री॥वायव्यभागे करटस्य श
ब्दे याति योषित् प्रियमानि

नी या॥ध्रुवं प्रवासो दिनसप्तकेन
शीघ्रागमः स्यात् गमने कृते च॥
कुबेरभागे पथिको ऽभ्युपैति ता
म्बूललाभः कुशलस्य वार्त्ता॥वे
श्याङ्गनापि स्त्ररगाद्विरुद्धा यात्रा
विरुद्धे म्रियते च रोगी॥स्यानेन
स्थितः स्याद्धोलभुग्विरावैः स्व
र्णाम्बवार्त्ता सरुजा विनाशः॥ब्र
ह्मप्रदेशे प्रहरे चतुर्थे वार्त्ताभ
वेन्मध्यमिका च सिद्धिः॥इति
चतुर्थप्रहरः॥षड्राषितं शोक
निके द्विमिश्रं शुभाशुभं दिक्
प्रहरक्रमेण॥तत्राशुभं यच्छति
दीप्तशब्दः श्रेयस्करः शान्तरव
श्च काकः॥रम्ये रवे दीप्तदिशि
प्रसर्पन् शान्तां दिशं याति फलं
ददाति॥तदेव नष्टं विततस्यसौ
वै दीप्तस्थितः पश्यति दीप्तका
ष्ठां॥यथोपदिष्टं फलमत्र दृष्टं
तथैव तद्दीप्तदिशि स्थितः स
न्॥ध्वांक्षोत्थितः ऽशद्वौ विरुवन्
करोति निरीक्षमाणाः कक्कु
भं प्रदीप्तां॥काकः प्रशान्ता
भिमुखो विभुङ्क्ते दीप्ताश्रितो
दुष्टफलं ददाति॥शान्ताश्रिताः
शान्तदिगीक्षणेन हन्तारवो
ऽस्वं कथयन्त्यनिष्टं॥शान्त

स्वरः शान्तककुप्प्रदेशनिषण्
प्रदीप्तो ककुभञ्च पश्यन्। ददा
त्यभीष्टं फलमेव मुक्तो दीप्ता
सु पश्यंस्तु न देव तूर्णं॥ आका
रवेष्टा रवभाग विज्ञा चत्वारि
काष्ठा दिनयोः क्रमेण। सदाभि
युक्ताश्च निरूपयन्ति यस्माच्च
ते काकरुतं मनुष्याः॥ इति का
करुते दिक्चक्रप्रकरणं॥ ॥
वर्षकाले मथिहन्त किञ्चिन
प्राच्यते वलिभुजो यथाक्रमात्
। आलपाण्डक विचारस्तरं शा
कुनं सकलशाकुनोत्तमं॥ वै
शाखमासे निरुपद्रवेषु द्रुमेषु
काकस्य शुभाय नीडं। निन्द्ये
षु शुष्केषु सकण्टकेषु द्रुमेषु
दुर्भिक्षभयाय हेतुः॥ प्रशस्त
हस्ते यदि वृक्षशाखो माश्रित्य
काकेन कृतं कुलायं। न वृष्टि
रिष्टा शकुनप्रमोदो नीरोगता
स्याद्विजयश्च राज्ञः॥ आग्नेयशा
खो रचिते च नीडे स्यादृष्टि रि
ष्टाग्निभयं कलिश्च। दुर्भिक्ष
शत्रुद्रववेशभङ्गा भवन्ति रो
गाश्च चतुष्पदानां॥ याम्यास्तु
शाखासु च वायसेन नीडे कृ
ते ऽस्मिं जलपात माहुः।

व्याधिप्रकोपं मरणं समन्ताद्
वनत्तयं शत्रुविरोधिनो च। नैर्ऋ
त्यशाखारचिते च नीडे यस्मात्कु
ते वर्षति वर्षकाले। पीडा नृणां
विड्वरचौरभीति दुर्भिक्ष युद्धानि
भवन्त्यवश्यं॥ नीडे कृते पश्चिम
हस्तशाखा माश्रित्य काकैः स
थिता च वृष्टिः। नीरोगता क्षेम
सुभिक्षवृद्धि सम्पत् प्रमोदा
श्च भवन्ति लोके॥ वायव्यशा
खासु कृते च नीडे प्रभूतवा
तास्वजलाश्च मेघाः। स्वमूष
कोपद्रव शस्यनाश पत्तहयो
द्वेग महाविरोधाः॥ कौवेरशा
खो मथिकम नीडे कृते भवेत्
प्राज्यस्य वृष्टिरिष्टा। भवन्ति च
क्षेम सुभिक्षसौख्य नीरोगता
वृद्धि समृद्धयोस्मिन्॥ ईशान
शाखासु च वृष्टि रल्पा वैरं
प्रजानां नृपसर्गदोषः। साह
न्यवानां कलहः प्रवृत्तिः स
स्योदयो हीयत एव लोकः।
॥ हस्तायनीडे नाति वर्षकाले
मध्ये पुनर्मेध्यमतोयपातः।
तत्क्वापि वृष्टि नं प्रवत्यथस्ता
त्॥ सदं दिशो कं न दिशः
स्फुटन्तं॥ अत्रापि रोगादि भ

याद्विवृद्धिं विद्याच्च भूमौ वलि
भुक्कुलाये। शुष्के च वृक्षे द्रुम
वनाशो प्राकाररन्ध्रेषु भयं
प्रभूतं॥ निम्नप्रदेशे तरुकोट
रे वा वल्मीकरन्ध्रे वनतिष्यी
काकस्य नीडे रुग्वृष्टि दोषै
र्भवन्ति भूम्या नियमेन देशाः
इति वसन्तराजे काकरुतप्र
करणं॥ ॥ अथ काकाण्डवि
चारः। एकं भवेद्वारुणमस्मि
संतद्वितीयकं मारुतजं तृ
तीयमैन्द्रं तथा नाम चतुर्थ
मेवमण्डानि काक्याः परिकी
र्तितानि॥ काक्या भवेद्वारुणम
ण्डकं चेत् पृथ्वी मदा नन्दति स
र्वशस्यैः। मन्दप्रवृष्टी अनलस्त
के ऽण्डे नोप्तस्य वीजस्य भवेत्
प्ररोहः॥ जातानि शस्यानि
समीरणे ऽण्डे खादन्ति कीटाः
शलभाः शुकाद्याः। क्षेमं सु
भिक्षं सुखिता धरित्री माहेन्द्र
के ऽण्डे ऽभिमतार्थ सिद्धिः॥ इ
त्यण्डप्रकरणं॥ ॥ यात्रानि
मित्तानि च कीर्त्तयामः सकृत्
प्रजानां शकुनानि नान्निवि
ज्ञाय यानि प्रजहात्यनर्थान
योधश्च सर्वान् कुरुते ऽध्वनीनः॥

भुंक्ते वलिं पतितु मेत्वरतं त्वं प्राणि
षु प्राणिषि वर्षलन्ते। गृहेन च सं
भजसे नमो ऽस्तु तुभ्यं खगेन्द्र
सकृतप्रजाय॥ विलोक्य काके
विनिवेद्य तस्मै मन्त्रेण पूजा द
धिमत्स्ययुक्ता। उदीर्य्य कार्य्यं नि
जं मध्यगेन विलोकनीयं शकु
ने नदर्थं॥ वामेन शब्दं मधुरं
विमुञ्चन् व्रजन् स्ववामेन करो
ति काकः। सर्व्वार्थसिद्धिं पुन
रागमञ्च शुभप्रदेशे तु तदन्य
रूपः॥ प्रदक्षिणं यः प्रविधा
य मार्गे वामेन काको विनिव
र्त्तते ऽसौ। यातुः करोतीह हि तत्का
र्य्यसिद्धिं क्षेमञ्च शीघ्रं पुनरा
गमञ्च॥ वामेकाले रौत्यनुलो
मयायी यो वायसो ऽसौ सकृ
लार्थसिद्ध्यै। स्यात् तं क्रमाद्दक्षि
णवामशब्दौ सिद्धौ विरुद्धौ वि
परीतभूतौ॥ पृष्ठे विरावं मधुरं
विमुञ्चन्ननुव्रजे स्वापि मनो
हिताय। प्रायेण यातार मनु
व्रजन्तः सर्वेऽपि काकैः कथि
ता विहङ्गाः॥ कृत्वा रवं यः
पुरतः प्रयाति उपस्थितो यो
मुद्मारयाति। काण्डयते
यः स्वशिरो ऽङ्घ्रिणासौ कुर्वी

तदाभीष्टफलं ददाति॥ तृणमे
गजानां नियतं गजाग्रे गजेऽपि
रूढः पृथिवीपतित्वं। तुरङ्गमे
वाहनभूमिलाभं करोति का
को विजयं ध्वजेन॥ धनेष्टला
भं विजयं च कूपे क्षिपे नदी
तोयस्थि कार्य्यसिद्धिं। हर्म्ये घटे
न्ने च धनाप्तिं हृद्धिं धान्ये ऽथ
रूढः कुरुते सशब्दः॥ प्रासा
द धान्योच्चय हर्म्यपृष्ठ निष्प
न्नशाखावनि शाड्वलादौ। धा
न्ये ऽथ हृष्टो धनसाधनाय रौ
ति श्रियं यच्छति युग्मरावः॥
पृष्ठे पुरो वा यदि गोमयस्थो न
द्या वदत्येष नरस्य पीडां। स्थि
तो रुवन् भोजनपानमिष्टं वि
द्यां च कुर्वन् विनयस्य वश्यं॥ अ
न्नाद्यविष्ठाफलमूलपुष्पम
त्स्यादिभिः सम्मुखः सदैव।
मेदृश्यमाणो ऽभिमतार्थसिद्धेः
मिष्टान्नभोज्याय सदैव काकः
॥ नारीशिरः सम्मुखदृश्यमानस्य
काकस्य शब्दे हि निनाद धनाप्तिः॥
शय्याधिरूढस्य च नस्य शब्दैः
समागमः स्यात् स्वजनेन सार्द्धं
॥ गोपृष्ठ रूढो नरगोमयेषु न
ताडानि कुर्वन्नवलोकितो ऽथ।

स्याहारमन्नस्य तथा ददाति द
दाति भोज्यं वलिभोग्यवित्तं॥
याने यमे वा दधि चापि चान्न
विरोति पश्यन्नपि लाभकारी॥
करोति लाभं प्रातः सहृष्टो य
स्यास्ति वक्त्रे तृणमप्यमुष्य॥
हृष्टेषु रम्याङ्कुरपत्रपुष्पफल
फलान्वितेषु संततं नगस्य। शब्दे
न सिद्ध्यन्त्यनेकतरूणां सदैव
सर्व्वाणि समीहितानि॥ प्रशान्त
नादः शिखरे तरूणां स्त्रीसङ्गमो
ऽस्य करोति ऽभियत्नं। यान्यादि
कृतेषु तथान्नलाभो गोपृष्ठगो
गोवनिताधनाप्तिं॥ स्तेमं वि
यन्ते करभस्य पृष्ठे खरस्य पृ
ष्ठे ऽरिभयं वधञ्च। क्रोडस्य पृ
ष्ठे तनलग्नपङ्कः॥ सेया ज्वरं
सौरिपृष्ठसंस्थो मृताङ्गसंस्थो म
रणं करोति। काष्ठेतांते रिक्त
घटस्य संस्थः काकः कलिं का
ष्ठ मोषितस्य॥ यो दक्षिणं इ
जति दक्षिणेन प्रयाति यस्याभि
मुखो ऽभ्युपैति। यो याति पृष्ठे
प्रतिलोमगत्या कृतारवः पा
तयते स रक्तं॥ वामे रवो दक्षि
णेन रुतेऽथवा यः सो ऽनर्थहेतु

वधमर्थलाभं तस्यैव पृष्ठे ,९,हरि

431

र्वलिभोजनस्य। वामप्रदेशे प्र
तिलोमयानं विद्याय लाभो गृ
ह एव तेन॥ प्रयाति पृष्ठे यदि
दक्षिणेन कृतावरस्तुष्टिं पु
रः स्यात्। वल्ली वरत्रादि च यो
गृहीत्वा प्रदक्षिणं याति स सर्प
भीत्यै॥ गोपुच्छ वल्मीक हताना
सदस्य रुवन् भवेत् सर्पविला
कनाय। स्यान्मृत्यवे ऽङ्गारविना
शि संस्थः काकः प्रकुर्वन् कर
वर्षाणां च॥ रुवन् पुरो हानिरु
तो करोति मृत्युं पुन निष्ठुरस्य
शब्दः। प्रसार्य्य रिक्तं वदनं य
ख्यात्स सर्वत्र निन्द्यो वलिभोज
नो ऽसौ॥ वामो ऽप्यसहृत्कयानभ
यं मूर्त्तिं वा संताडयित्वा रसञ्च
मांखडा वेचुस्थिभङ्गः ध्रुव मोक्ष
भंगं वंधे वंधं जल्पति युध्यमानः
॥ वामेऽपि रोगं कुरुते विमुक्ते
तिक्तोऽपि वृक्षे कलिकार्य्यनाशौ
। एवं विधुन्वन् विरुवंश्च वृक्षे
संकाण्टके मृत्युमुपादधाति॥
वधो भवेत् क्रूरहतप्रशाखे वधो
लताभिः परिवेष्टिते स्यान्तारम्भ
तरौ कारकयुक्तवृक्षे सदा भ
वेत् कलिकार्य्यसिद्धी॥ छत्रा
धिरूढो न वरेण यायात् प्रेया

ति चेत् स्यात् खलु रक्तपातः॥ अव
स्करे भस्मतृण काष्ठ कूप भस्मादि
संस्थो विनिहन्ति कार्य्यं॥ वल्ली
वरत्रा कच शुष्ककाष्ठ चर्म्मास्थि
जीर्णाम्बर वल्कलानि। अङ्गार र
क्तोत्पल कर्परापि हृष्टानि चेत्
काकमुखे तदानीं॥ पुराण्यत्ययः
पापसमागमश्च महद्भयं रोगस
मुद्भवश्च। वन्धो वधः सर्व्वधना
पहार इत्यादिकं स्यात् पथि
मन्दिरे च॥ उड्डीनेन ग्रम्बलप
त्युग्मः काकः कर्णौ विद
धाति मृत्युं। काष्ठायुध छत्र च
टास्थि यान वादित्रकाष्ठादिक
कुड्मलानि॥ सङ्कोचितैकाङ्घ्रि
रूपैन विनो दीप्रस्वरो भास्करे
मीक्षने च। काष्ठादिकं कुटयते
ऽथवा यो युद्धार्थिकानर्थकरः
खगो ऽसौ॥ तुण्डेन पिच्छं वि
लिखन् रवेण यो रौति नृणामुद्ध
निरीक्षते च। एकेन पादेन त
थोपविष्टो कुर्ने स वन्ध्यं पुरतो
जनस्य॥ विष्ठामयो न्यसति
यस्य मूर्द्ध्नि तस्यानलत्रासरुजो
भवेत्तां। यस्यास्थिखण्डं विसृ
जत्यसौ न प्रयाति नूनं नगरी
यमस्य॥ ब्रह्मप्रदेशे विरुवन्ति

योसौ: कलहदोषं जनयत्यवश्यं
मनुष्यमातङ्ग-तुरङ्गमानां शिरो
विरुद्धो नियनाय तेषां॥ निर्दीन
टे राथ रटन्नटव्यां खरस्वरो व्या
घ्रभयाय गन्तुः॥ नैवान्तरः क्वापि
मतो हिताय न दुष्टचेष्टा विन
नोति शान्तिं यात्राक्षमे सैन्य
वधाय काको दृष्टो रथे साश्व
नृमस्तकेषु॥ आयाति यस्याभि
मुखो बलस्य युद्धोद्यमे तस्य
पराजयः स्यात्॥ स्पृष्ट कङ्कैः
कटके नृपस्य काकैः प्रविष्टैः
शिबिरं विनाशि॥ संयुध्यमाने
शरीभिः समं स्यान्महाहवः स
न्यि रथयुध्यमानैः॥ विद्धध्वज
छत्रकुन्तादिरोहो समुद्यतं घा
तुवले प्रपश्यन्॥ प्राज्ञो जयं ज
ग्धश्लेष्मणश्च प्रवर्द्धनं युद्धा
द्यैः साहसैस्तैस्तैः सेवितैरय
थाबलं उरस्यन्तःक्षतो वायुः
पित्तेनानुगतो बली कुपितः कु
रुते काशं कफं तेन सशोणितं
पीतं श्यावं च शुष्कं च ग्रथितं कु
णितं बहु ष्ठीवेत् कण्ठेन रुजता
विभिन्नेनेव चोरसा। सूचीभि
रिव तीक्ष्णाभिस्तुद्यमानेन।

मूत्रिणा। पर्वभेदज्वरश्वास
तृष्णावैस्वर्य्यकंपवान् पारा
वत इवोत्कूजन् पार्श्वशूली
ततोस्य च कफोच्चये वमने प
क्षिर्बलं वर्णश्च हीयते क्षीण
स्य सासृङ्मूत्रत्वं स्याच्च पृष्ठ
कटीग्रहः वायुप्रधानाः कु
पिता धातवो राजयक्ष्मणः
कुर्वंति यक्ष्मायतनैः काशं ष्ठी
वेत् कफं ततः पूतिपूयोपमं
पीतं विस्रं हरितं लोहितं।
लुप्यते इव पार्श्वे हृदयं पव
तीव च अकस्मादुष्णशीतेच्छा
वह्न्याशित्वं बलक्षयः स्निग्धप्र
सन्नवक्त्रत्वं श्रीमद्दर्शननेत्रता
ततोस्य क्षयरूपाणि सर्वाण्या
विर्भवंति च इत्येवं क्षयजः काशः
क्षीणानां देहनाशनः याप्यो वा
बलिनां तद्वत् क्षतजोऽपि नवौ च
तौ सिद्ध्येतामपि सामर्थ्यान्नरा
णां वै च पथ्यक्रमः सिद्ध्याया
प्याश्चये सर्वे जरसः स्थविरस्य
च काशश्वास क्षयच्छर्द्दिस्वरसा
दादयोगदाः भवंत्युपेक्षया य
स्मात्तस्मात्तांस्त्वरया जयेत् इ
ति गारुडे काशरोगनिदानं
१५४ अध्यायः ॥ अथ काशस्य

चिकित्सा तत्र वातकाशस्य चि
कित्सा वास्तुका वायसीशाकं
मूलके सुनिषण्णके स्नेहा स्ति
लदध्यो भक्ष्याः क्षीरेक्षुरसगौ
डिकाः दध्यारनाललफलं
प्रसन्नापानमेव च। श्वासेनैवा
नकाशेषु स्वाद्वम्ललवणानि च
वायसी काकमाची कवई इ
ति लोके। सुनिषण्णकं सिन
याति इति लोके शाकविशे
षः। चांगेरी सदृशा च तत्पत्रा
सजलदेशे भवति। चौपत्ति
इति लोके ॥ ग्राम्यानूपौदकैः
शालि यव गोधूम षष्टिकान्
रसैर्माषात्मगुप्तानां यूषैर्वा भो
जयेद्धितान् ॥ ग्राम्यानूपौदकैः
रसैरित्यन्वयः। आत्मगुप्ता
किवांछ इति लोके ॥ दशमू
ली कुलत्थ काशश्वास हिक्का
रुजापहा यवागूर्दीपनी हृ
द्या वातरोगविनाशिनी रसः
कर्कटकानां वाद्धनभस्मः स
नागरः वातकाशप्रशमनः श्रे
ष्ठी मन्त्रस्य वाप्नुनः अथ पित्त
काशस्य चिकित्सा कंटकारी
गुडूची द्राक्षा वासा कर्चुर बालकैः
नागरेण च पिप्पल्या क्वथितं स

लिलं पिबेत्॥ शार्करामधुसंयु
क्तं पित्तकाशहरं परं ॥ अथ
कफकाशस्य चिकित्सा पि
प्पली कट्फलं शुण्ठी शृंगी
भार्गी तथैव च। कारवी कं
टकारीच सिंधुवारो यवानि
का चित्रको वासकश्चैषां क
षायं विधिवत् कृतं कफका
शविनाशाय पिबेत् कृस्मार
नोयुतं पिप्पल्यादिक्वाथः॥
अथ क्षतजकाशस्य चिकित्
सा इक्षुवालिका पद्मसूत्रं
लोत्पलचंदनं मधुकं पिप्पली
द्राक्षालाक्षाशृंगीशतावरी द्वि
गुणा चात्र गोक्षीरी सिता सर्वैश्चत
गुणा लिह्यान्मधुसर्पिर्भ्यां
क्षतकाशनिवृत्तये इक्षुवालि
का इक्षुभेदः खेर इति लोके प
द्मपद्मकाष्ठ मृणालं विषं उत्
पलं कमलं चंदनं मधुकं
चूर्णितात् शृंगी कर्कटशृंगी।
तुलाक्षीरी वंशलोचना सावे
लो द्विगुणा अथ क्षयकाशचि
कित्सा चूर्णीकाकुभमिश्रं वासक
रसभावितं वहुशवारान् मधु
घृतसितोपलाभिर्लेह्यं क्षयका
शनृत्पित्तहरं। काकुभं चूर्णीकृ

भक्षवचूर्णं अथ काशस्य
सामान्यतश्चिकित्सा नाम्य
मानस्य काशेन नासास्रोत
स्वरेजेद् क्षवथोर्गंधनाघोषा
धूमपानं प्रयोजयेत् मनः
शिलालमविरं मांसीमुस्तं
गुदैः पिबेत् धूमभ्रमक्षचतस्र
नुपयस्य सगुडं पिबेत् पञ्च
काशान् पृथक् हंति सर्वदो
षसमुद्भवान् शनैरपिमया
गाणामसाध्यान् साधयेत्भि
वे अपालं हरितालं॥ इंगुदमि
दूध्रजीवकफलं वदरीर
लमालिमंशिलाया चार्मम्मेषा
षितं तद्धूमपानं सक्षीरमद्धा
काशनिवारणं कंटकारिकृत
क्वाथः सकृष्णः सर्वकाशहा
कंठकार्याकणायाश्च चूर्णं स
मधुकाशहृत् लवंगजातीफ
लं पिप्पलीनां भागान् प्रकल्प्य
क्षसमानमरीचां पलाद्धमान
मविरं प्रदेयं पलानि चत्वारि महौष
धस्य सितासमस्तेन समाश्चूर्णं
रोगानिमानाशु बलान्निहंति का
शज्वरारोचकमेहगुल्मश्वासाग्नि
मांद्यग्रहणीविकारान् समस्तं
रेचूर्णवटिकावा कुनटी सैंधव

ओष विडंगामय हिंगुभिः
लेहः साज्यमधुः काशश्वा
सहिक्कानिवारणः हरीत
कीकणा शुंठी मरिचं गुडसं
युतं। काशघ्नो मोदकः प्रोक्तः
परं वह्नेः प्रदीपनः कर्षः क
र्षांशो पलं पलद्वयं स्यात्तथा
द्धकर्षश्च मरिचस्य पिप्पली
तोदाडिम गुड यावश्च कार्ना
सर्वौषधैरसाध्याः काशाये
वैद्यनिर्मुक्ताः अपि प्रयत्नेन
दृष्टांतेषामिदमौषधं पथ्यं
वांसेनस्रक्कर्षांशश्च निशाठे
कर्षांशः कर्षाद्धमितिनिष्ठाच
द्वे मरिचं कार्षमात्रे स्यान् पि
प्पली कर्षसंमिता अर्द्धकर्षा
यवक्षारः कर्षयुग्मं च दाडिमं
एतच्चूर्णीकृत्य गुडमष्टकर्ष
गुडेन हि प्राणप्रमाणगुटि
कां कृत्वा वक्त्रे विधारयेत् अस्याः
प्रभावात् सर्वेपि काशा यांति
वसंतं दाडिमे दाडिमफल
वल्कलं ग्राह्यं। मरिचादिवटि
का समूलवल्कक्वाथ दशकट
कार्यास्तुलां तत्तो द्रोणमितं ज
लेच हरीतकीनां शतमेक पाके
विपचेत्कूर्याच्च स्वरसं व शेषे त

स्मिन् कषाये तनुवस्त्रपूते हरीत
तकीतिः सहिते गुडस्य तुलां
विनिःक्षिप्य पचेत् सुपक्वमेत
त् समस्तार्द्धसर्पीततैलेच पलं
पलं चापि कटुत्रयं च तथा चतु
र्जातपलं विचूर्ण्य फलानि षट्
पुष्परसस्य चापि विनिःक्षिपेत्
त्रविमिश्रयेच्च प्रयुज्यमानो वि
धिनेव लेहो यथाबलं चापि
यथानलं च वातात्मके पित्तकृ
तं कफोत्थं द्विदोषजातान् पिच
त्रिदोषं हतोऽस्ववेच तक्षयजं च का
शंश्वासं च हन्यात् सहपीनसे
न यक्ष्माणमेकादशरूपमुग्र
गृहीतकीभेऽगुलोपदिष्टा॥
पुष्परसो मधु। चतुर्जातं त्वगे
लापत्रनागकेशराः अगुहरी
तकी कंटकारीतुलामीर द्रो
णे पक्वा कषायकं। पादशे
षं गृहीत्वा च तच्चूर्णेन दा
पयेत् पृथक् पलांशान्यता
नि गुडूची चव्य चित्रकाः मुस्त
कर्कटशृंगी च अग्निमंथत्वया
सकः भार्गी रास्ना सठी चैव श
र्करा पलविंशतिः प्रत्येकं च
पलान्यष्टौ प्रदद्याद्घृततैलयोः
पक्वाहृत्य समानीय शीते मधु।

पलाष्टकं। चतुष्पलं तुगाक्षीर्याः
पिप्पलीं च चतुष्पलं ॥ सिता।
निरष्पात् सहके मन्मये भाजने
शुभे लेहोऽयं हन्ति हिक्कार्त्ति
कास श्वासानशोषतः ॥ कं
ठकार्य्यावलेहः। इति कासा
धिकारः इति भावप्रकाशः ॥
अपिच हरीतकीकणाशुंठी
मरिचं गुडसंयुतं कासघ्नोमोद
कः प्रोक्तस्तथारोचकनाशनः
कंटकारीगुडूचीभ्यां पृथक्
त्रिंशत्पलाद्रसे प्रस्थसिद्धो
घृताद्दानकाशाग्निदीपनः
इति गारुडे १७४ अध्यायः ॥
मनःशिला वलामूलं काकप
र्णी च गुग्गुलं जातिपत्रं कोलि
पत्रं तथाचैव मनःशिला पभि
श्चैव कृत्वा वर्त्तिर्बदराग्ने महेश्व
र धूमपानं काशहरं नात्र का
र्य्या विचारणा इति च गारुडे
१९४ अध्यायः ॥ कनकस्यफ
लं पांखं सैधवं श्रयणं वचा फे
नो रसांजनं नक्षौद्रं वर्त्तिर्गानि म
नःशिला यथा वर्त्तिं हन्ति का
शं तिमिरं पटलं तथा। इति।
तत्रैव १९८ अध्यायः अभ
यामलकं द्राक्षा पिप्पलीकंठ

कारिका। शृंगं पुनर्नवाशुं
ठी जरधाकार्पा निहन्ति वै इति
च तत्रैव १९९ अध्यायः ॥
काशी सी स्वनामख्यात ती
र्थं तत्र कर्त्तव्य यात्राविधानं
यथा सूत उवाच यात्रापरिक्र
मं ब्रूहि जनानां हितकाम्यया।
यथावत् सिद्धिकामानां सम
वन्ताः सुतोत्तम ॥ व्यास उवाच
निशामय महाप्राज्ञ लोमह
र्षण वच्मि ते यथा प्रथमतो
यात्रा कर्त्तव्या यात्रिके मुदा ॥
सचेल मादौ संस्नाय चक्रपु
ष्करिणीजले संतर्प्य देवान्
सपितॄन् ब्राह्मणांश्च तपस्वि
नः आदित्यं द्रौपदीं विष्णुं द
ण्डपाणिमहेश्वरं नमस्कृत्य
ततो गच्छेत् द्रष्टुं ढुंढिविना
यकं ज्ञानवापीमुपस्पृश्य न
न्दिकेशं ततोऽर्चयेत् तारके
शं समभ्यर्च्य महाकालेश्व
रं ततः ॥ ततः पुनर्दण्डपाणि
मित्येषा पंचतीर्थिका दैनं
दिनी विधातव्या महाफल
मभीप्सुभिः ॥ ततो वैश्वे
श्वरी यात्रा कार्य्या सर्वार्थसि
द्धये। द्विसमायतनानां च ॥

कार्य्या यात्रा प्रयत्नतः ॥ कृष्णप्र।
तिपदं प्राप्य भूतावधि यथा विधि
अथवा प्रतिभूतं च क्षेत्रशुद्धि म
भीप्सुभिः ॥ तत्र तीर्थकृतस्नान
स्तल्लिंगकृतार्च्चनः। मौनेनया
ओंकर्वाणः फलं प्राप्नोति यात्रिकः
ओंकारं प्रथमं पश्येत् मत्स्योदर्य्यां
कृतोदकः। त्रिविष्टपं महादे
वं ततो वै कृत्तिवाससं ॥ रत्ने
शं चाथ चंद्रेशं केदारं च ततो
व्रजेत्। धर्मेश्वरं च वीरेशं गच्छे
त् कामेश्वरं ततः ॥ विश्वकर्मे
श्वरं चाथ मणिकर्णीश्वरं ततः
अविमुक्तेश्वरं दृष्ट्वा ततो विश्वे
शमर्च्चयेत् ॥ एषा यात्रा प्रय
त्नेन कर्त्तव्या क्षेत्रवासिभिः यस्तु
क्षेत्रमुषित्वापि नेतां यात्रां समा
चरेत् ॥ विघ्नास्तस्योपजायन्ते
उच्चाटनसूचकाः। अष्टायतन
यात्राऽपि कर्त्तव्या विघ्नशान्तये ॥
दक्षेशः पार्वतीशश्च तथा पशुप
तीश्वरः। गंगेशो नर्मदेशश्च गभ
स्तीशः सतीश्वरः ॥ अष्टम।
स्तारकेशश्च प्रत्यष्टमि विशे
षतः। दृष्टव्यान्येतानि लिंगानि
महापापोपशान्तये ॥ अपरापि
शुभा यात्रा योगक्षेम करी सदा

सर्वविघ्नापहारी च कर्त्तव्या
क्षेत्रवासिभिः ॥ शुक्लपक्षे प्रथ
मे वीत्य वरणास्नान पूर्वकं
स्नानस्तु संगमे कृत्वा दृष्ट
व्यः संगमेश्वरः ॥ स्वर्लीनती
र्थे स्नातः पश्येत् स्वर्लील
मीश्वरं स्नात्वा मंदाकिनीतीर्थे
दृष्टव्यो मध्यमेश्वरः ॥ पश्येद्धि
रण्यगर्भेशं तत्र तीर्थकृतोदकः
पंचचूडाह्रदे स्नात्वा ज्येष्ठस्थाने त
तोऽर्चयेत् चतुःसमुद्रकूपे त
स्नात्वा देवं ततोऽर्चयेत्। देव
स्याग्रे तु यावापी तत्रोपस्पर्शने
कृते ॥ शुक्रेश्वरं ततः पश्येत् तत्
कूपविहितोदकः। दण्डखाते न
रः स्नात्वा व्याघ्रेशं पूजयेत्ततः ॥
शौनकेश्वरकुण्डे तु स्नानं कृत्वा
ततोऽर्चयेत्। जंबुकेशं महा
लिंगं कृत्वा यात्रामिमां नरः। क्व
चिन्न जायते भूयः संसारे दुः
खसागरे। समारभ्य प्रतिपदं
यावत् कृष्णा चतुर्दशी ॥
एतत् क्रमेण कर्त्तव्यान्यतदा
यतनानि वै। इमां यात्रां नरः
कृत्वा न भूयोऽप्यभिजायते
॥ ॐ ॥ अन्या यात्रा प्रकर्त्तव्या
कारणायतनोद्भवा। अष्टम

कुण्डे स्नात्वा ततः पश्येद्ग्रीष्मी
श्वरं ॥ उर्वशीशं ततो गच्छे
त्ततस्तन्नकुलीश्वरं। आषा
ढीशं ततो दृष्ट्वा भारभूते
श्वरं ततः॥ लांगलीश म
थालोक्य ततस्त्रिपुरांत
कं। ततो मनःप्रकामेशं प्री
तिकेश मथो व्रजेत्॥ मदाल
सेश्वरं तस्मात् तिलपर्णेश्व
रं ततः॥ यात्रैकादश लिंगा
नामेषा काश्यां प्रयत्नतः इ
मां यात्रां प्रकुर्वाणो रुद्रत्वमा
प्नुयान्नरः अतःपरं प्रवक्ष्या
मि गौरीयात्रां मनुत्तमां॥ शु
क्लपक्षतृतीयायां या यात्रा वि
श्वहृद्धिका। गोप्रेक्ष्यतीर्थे स
स्नाय मुखनिर्मालिकां व्रजेत्
ज्येष्ठवाप्यां नरः स्नात्वा ज्येष्ठां।
गौरीं समर्चयेत् सौभाग्यगौ
रीं संपूज्य ज्ञानवाप्यां कृतोदकैः
ततः शृंगारगौरीं च तत्रैव च
कृतोदकः। स्नात्वा विशालगं
गायां विशालाक्षीं ततो व्रजेत्॥
सुस्नातो ललितातीर्थे ललितां
पूजयेत्ततः। स्नात्वा भवानीती
र्थेन भवानीं परिपूजयेत्॥
मंगलां च ततोऽभ्यर्च्य विंदती

र्थकृतोदकैः। ततो गच्छेन्म
हालक्ष्मीं स्थिरलक्ष्मीसमृद्धये
इमां यात्रां नरः कृत्वा क्षेत्रेस्मिन्
मुक्तिजन्मनि। नदुःखैरभिभू
येत इहामुत्रापि कुत्रचित्॥ अ
र्थात प्रतिचतुर्थीह दृष्ट्वा विघ्ने
शितः सदा। ज्ञात्वालोभ्य स्तुते
हेम्बाद्या वै मोदका मुदे॥ भै
मे भैरवयात्रा च काश्यां पातक
हारिणी रविवारे रवे यीत्रां
षष्ठी वा रविसंयुजि॥ तथैव र
वि सप्तम्यां सर्वविघ्नोपशांतये
नवम्यामथवा षष्ठ्यां चंडी यात्रा
शुभावहा॥ अंतर्गृहस्य यात्रा
वै कर्तव्या प्रतिवत्सरं। प्रा
तः स्नाने विधायादौ नत्वा पंच
विनायकान्॥ नमस्कृत्याथ
विश्वेशं स्थित्वा निर्वाणमंडपे।
अंतर्गृहस्य यात्रां हि करिष्येऽ
होच शांतये॥ गृहीत्वा नियमं
चेति गत्वाथ मणिकर्णिकां।
स्नात्वा मौनेन चागत्य मणिक
र्णीशं मर्चयेत्॥ कम्बलाश्वत
रौ नत्वा वासुकीशं प्रणम्य च।
पर्वतेशं ततो दृष्ट्वा गंगाकेशव
मप्यथ॥ ततस्तु ललितां दृष्ट्वा
जरासंधेश्वरं ततः। ततो वै॥

सोमनाथं च वराहं च ततो व्र
जेत्॥ ब्रह्मेश्वरं ततो नत्वा न
गस्तीश्वरं ततः। कश्यपेशं
नमस्कृत्य हरिकेशवनं ततः
वैद्यनाथं ततो गत्वा ध्रुवेशं म
थ वीक्ष्य च। गोकर्णेशं ततो
ऽभ्यर्च्य हाटकेशमथो व्रजेत्
अस्थिक्षेपतडागं च दृष्ट्वा वैकी
कशेश्वरं। भारभूतं ततो न
त्वा चित्रगुप्तेश्वरं ततः॥ चित्र
घंटां प्रणम्याथ ततः पशुपती
श्वरं। पितामहेश्वरं गत्वा ततस्तु
कलशेश्वरं॥ चंद्रेशं त्वथ वीरे
शो विद्येशोऽग्नीशएव च नागे
श्वरो हरिश्चंद्र चिंतामणि वि
नायकः॥ सेना विनायकश्चाथ
दृष्टव्यः सर्वविघ्नहृत्। वशिष्ठ
वामदेवौ च मूर्त्तिरूपधरावुभौ॥
दृष्टव्यो यत्नतः काश्यां महावि
घ्नविनाशनौ। सीमाविनायकं ना
थं करुणेशं ततो व्रजेत्॥ त्रिसंध्ये
शो विशालाक्षी धर्मेशो विश्वबा
हुका। आशाविनायकश्चाथ।
वृद्धादित्यस्ततः पुनः॥ चतु
र्वक्त्रेश्वरं लिंगं ब्रह्मेशाख्यं ततः
परं। ततो मनः प्रकामेशमी
शानेशस्ततः परं॥ चंडीं च

ण्डेश्वरो दृष्ट्वा भवानीशंकरौ त
तः। ढुंढिं प्रणम्य च ततो रा
जराजेश मर्चयेत्॥ लांगलीशं
ततोऽभ्यर्च्य ततस्तु नकुलीश्व
रं। परान्नेश मथो नत्वा परद्रव्ये
श्वरं ततः॥ प्रतिग्रहेश्वरं चापि
निष्कलंकेश मेव च। मार्कंडे
येश मभ्यर्च्य ततो अप्सरसे
श्वरं॥ गंगेशोऽर्च्यस्ततो ज्ञानवा
प्यां स्नानं समाचरेत्। नंदिके
शं तारकेशं महाकालेश्वरं त
तः॥ दंडपाणिं महेशं च मो
क्षेशं प्रणमेत्ततः। वीरभद्रेश्व
रं नत्वा अविमुक्तेश्वरं ततः॥
विनायकांस्ततः पंच विश्वना
थं ततो व्रजेत्। ततो मौनं विसृ
ज्याथ मंत्रमेनमुदीरयेत्॥ अ
न्तर्गृहस्य यात्रेयं यथावत् या
मया कृता। न्यूनातिरिक्तया शं
भुः प्रीयतामनया विभुः॥ इति
मंत्रं समुच्चार्य क्षणं वै मुक्तिम
ण्डपे। विश्राम्य यायात् भवनं
निष्पापः पुण्यवान् नरः॥ सं
प्राप्य वासरे विष्णोर्विष्णुतीर्थे
षु सर्वतः। काश्यां यात्रा प्रयत्ने
न महापुण्यसमृद्धये॥ ततस्त
पंचदश्यां च ऊलस्तंभं समर्चयेत्

उः खरुद्रपिशाचत्वं न भवेद्य
स्य पूजनात् ॥ अन्याश्चैव मिमा
यात्राः कर्तव्याः क्षेत्रवासिभिः
पर्वस्वपि विशेषेण काश्यां या
त्रास्तु सर्वतः न वृथा दिव
सं कुर्य्याद्विना यात्रां क्वचित्कृ
ती। यात्राद्वयं प्रयत्नेन कर्त्त
व्यं प्रतिवासरं आदौ स्वर्गतरं
गिण्यां स्नातो विश्वेशितुर्ध्रुवं
यस्यतं प्यादिनं यातं काश्यां
निवसतः सतः ॥ निराशाः
पितरस्तस्य तस्मिन्नेव दिने भवे
न्न सदृष्टः कालसर्पेण सदृष्टो
ऽस्तु नास्फुटं ॥ स मृष्टस्तत्र
दिवसे विश्वेशो यत्र नेक्षितः
सर्वतीर्थेषु सस्नौ स सर्वयात्रा
व्यधात्स च ॥ मणिकर्णीत
यः स्नातो यो विश्वेशं निरैक्षत
सत्यं सत्यं पुनः सत्यं सत्यं
पुनः पुनः ॥ कृष्णा विश्वे।
श्वरो नित्यं स्नानं चामणिक
र्णिका। इति श्रीस्कन्दपुराणे
काशीखण्डे १०० अध्यायः ॥
कास अ उ. कशाद्रे। उ
णह इह रोगशब्दकुत्सन ॥
सिनशाहः। अ अचकासत्।
उ. कासते हृदः। इति दुर्गा

दासः ॥
कासमर्द्दः पु पेषितः जलसि
क्तः वस्त्रगलितः वेसवारः।
इति पाकराजेश्वरः ॥
काहारकः पु शिविकावाहक
जातिः। काहार इति वेहारा
ति च भाषा। यथा। तथा गारु
डिकावीराः स्वर्णकर्मोपजीवकाः
व्याधाः काहारकाः पुष्पाः कृ
स्से संवाहयन्ति ये ॥ इति जै
मिनिभारते आश्वमेधिके प
र्वणि १० अध्यायः ॥
काद ई कांदणे। ई कां
दति धनं लोकः। तमथ
पाठेनैवेष्टसिद्धे इदन्त्वं धोवे
देष्टुच्चारणभेदार्थः। इति
दुर्गादासः ॥
कि र लि ज्ञाने। रवै
दिकः। लि चिकेति। इति
दुर्गादासः ॥
किकीदिविः पु स्वर्णचातकः
तत्पर्याय। किकीदिवः १
स्वर्णचूडः २ इति जटाधरः।
किंकिणी स्त्री कट्याभरणविशे
षः तत्पर्य्यायः क्षुद्रघंटी १
प्रतिसरा २ किंकिणीकः ३ कं
कणिका ४ क्षुद्रिका ५ इतिशब्द

रत्नावली ॥ चर्चरी ११। इति
जटाधरः ॥
किंकिरातः पु पुष्पवृक्ष
विशेषः। तत्पर्य्यायगुणाः।
किंकिरातो हेमगौरः पीत
कः पीतभद्रकः किंकिरातो
हिमस्तिक्तः कषायश्च हरेद
सौ ॥ कफपित्तपिपासास्रद
ह शोषवमिक्रिमीन्। इति
भावप्रकाशः ॥
किंजल्कः पु पद्मकेशरः।
तत्पर्य्यायगुणाः। किंजल्कः
केशरः प्रोक्तः श्वास्येयश्चापि
स स्मृतः। किंजल्कः शीतलो
रूक्षः कषायो ग्राहकोऽपि सः ॥
कफपित्ततृषादाहरक्तार्शो
विषशोफजित्। इति भा
वप्रकाशः ॥
किट गतौ ॥ भयभीषयोः। भी
षा स्वतो भयोत्पादना। केट
ति जनो व्याघ्राद्बिभेति इत्यर्थः
केटति व्याघ्रो जनं भीषय
तीत्यर्थः। इति दुर्गादासः
कित संशये च्छावासारोगये
विचिकित्सति मनः संश
ते इत्यर्थः ॥
आरोग्ये चिकित्सत्यातुरं वै

द्यः। इच्छानिवासयोस्तु केतती
ति वोपदेवः। तत्र निवादयो
न प्रयुज्यते। इति रमानाथः।
इति न वनिता मेतां हन्त मनो
विचिकित्सते इति तु अन्तर्भ
तेण्यार्थतया कर्मकर्त्तरि सन्
अथ ग्रन्थ इत्यादिना यकृन्निषे
धे सिद्धं इति दुर्गादासः ॥
कित २ लि मतौ। र वै
दिकः। लि चिकेति। इति
दुर्गादासः ॥
किन्नरः पु स्त्री स्वनामख्यातदे
वयोनिः। तत्पर्य्यायः। अश्व
मुखः ५ गीतमोदी ६ हरिण
नर्त्तकः ७। इतिशब्दरत्नावली
किमिच्छकः पु व्रतविशेषः।
तद्विवरणं यथा। मार्कण्डेय उ
वाच। अथ सावित्रितो माता
वीरा वीरप्रजावती। पुत्रेप्सुर्हू
ति समाहूय प्राह पुत्रमवी
दिते पुत्राहमभ्यनुज्ञाता तव
पित्रा महात्मना। उपवासं करि
ष्यामि दुष्करोऽयं किमिच्छकः
सचायमत्र तव पितृ तथा सा
ध्वोमयापि वा। प्रतिज्ञाते।
तया पुत्र तत्र तत्र यता
स्मह ॥ इत्यस्यार्द्धं महाको

षात् तव दास्याम्यहं पितः। यत्तं
ते पितरायात मनुज्ञातास्मि ते
न च ॥ क्लेशसाध्यो ममायातः
सहि श्रेयो भविष्यति। साध्याभ
विष्याय दिते कश्चिद्बलपराक्र
मैः॥ सते साध्योऽन्यथा वापि
दुःखसाध्यो भविष्यति। तत्त्वं
प्रतिज्ञां कुरुष्व यदि पुत्रात्र वै
व्रते ॥ तदेतदहमास्थाय क
थ्यतां यन्मतं तव। अवीक्षिदु
वाच। विद्धे मे पितृ रायत्ते ममे
पात्व न तत्र वै। यन्मच्छरीरनि
ष्पाद्यं तत्करिष्ये त्वयोदितं॥
किमिच्छकं व्रतं मातर्निश्चिन्त्या
भवनिर्वृता राज्ञा पित्राभ्यनु
ज्ञातं यदि विस्मरेण मे॥ मा
र्कण्डेय उवाच। ततः सा राज
महिषी तद्व्रतं समुपोषिता।
यथोक्तं साकरोत्पूजां राजरा
जस्य संयता॥ निधीनामप्य
शेषाणां निधिपालवलस्य च।
लक्ष्म्याश्च परया भक्त्या तथा
कृकायमानसा॥ विविक्ते त
गृहासनः स्थः सोऽथ राजा करं
धमः आसीनउक्तः सचिवै
र्नीतिशास्त्रविशारदैः॥ स
चिवा ऊचुः। राजन् वयः परि

णतं तवैवं शासतो मही।
एकस्ते तनयो वीक्षिन्नस्माक
दारपरिग्रहः। अपुत्रः सवेत
स्मिन् यदा भूप गमिष्यति।
तदारिपदं पृथिवी निश्चितं
तव यास्यति॥ वंशच्छेदस्ते भ
विता पितृपिण्डोदकक्षयः प
तन्महत्ते विवरं क्रियाह्यन्याभ
विष्यति तस्मात् कुरु तथा भू
प यथा तेन तनयः पुनः। किरोति
सततं बुद्धिं पितृणा मुपकारि
णी॥ मार्कण्डेय उवाच। एतस्मि
न्नेनतरे शाहं शुश्राव जगतीप
तिः। पुरोहितस्य वीराया ग
दतोऽर्थिजनं प्रति॥ कः किमि
च्छति दुःसाध्यं कस्य किं साध्य
तामिति। करंधमस्य महिषी कि
मिच्छकमुपोषिता॥ राजपुत्रो
ऽप्यवीक्षित् श्रुत्वा पौरोहितं वच
स्तद्वाचार्थिनः सर्वान् राजद्वा
रमुपागतान्॥ मया साध्यं श
रीरेण यस्य किंचित् ब्रवीतु सः।
मम माता महाभागा किमि
च्छकमुपोषिता॥ शृण्वन्तु मे
र्थिनः सर्वे प्रति ज्ञातं मया
वचः। किमिच्छथ ददामि च
क्रियमाणे किमिच्छके॥

मार्कण्डेय उवाच। ततो राजा
निशम्येतत् वाक्यं पुत्रमुखा
दुद्गतं। समुपेत्याब्रवीत् पुत्र
महमर्थी प्रयच्छ मे अवीक्षि
दुवाच। तात देयं यन्मया तत्
भवते तद्ब्रवीहि मां। कर्तव्यं
दुष्करं वापि साध्यं दुःसाध्यमे
व च॥ राजोवाच। यदि सत्यप्र
तिज्ञस्त्वं दाता सि च किमिच्छकं
पौत्रस्य दर्शय मुखं ममोत्
संगगतस्य तत्। अवीक्षिदुवा
च। अहं तवैव तनयो ब्रह्म
चर्यं च मे नृप। न मे पुत्रोऽस्ति
पौत्रस्य दर्शयामि कथं मुखं
राजोवाच। पापाय ब्रह्मचर्यं
ते यदिदं धार्यते त्वया तस्मा
त्वं मोचयात्मानं मम पौत्रं प्र
दर्शय॥ अवीक्षिदुवाच। विर
मास्मान्महाराज यदन्यत्तन्म
समादिश वैराग्येण मया त्य
क्तः स्त्रीसंभोगस्तथा रसः।
राजोवाच बहुभिर्युध्यमान
स्त्वं दृष्टो वैरिभिर्जयः। त
थापि यदि वैराग्यमुपेक्षितवद
र्शितः किं वा तेन बहुनोक्तेन
ब्रह्मचर्यं परित्यज। मातस्त्व
मिच्छया वत्स पौत्रस्य मम।

दर्शय॥ मार्कण्डेय उवाच। यदा
स बहुशस्तेन प्रोक्तः पुत्रेण
पार्थिवः। नान्यत् प्रार्थयते किं
चित् तदा पुत्रोऽब्रवीत् पुनः
दत्त्वा किमिच्छकं तम्भ प्राप्तो
हं तात संकटं। तत्करिष्या
मि निर्लज्जो भूयो दारपरिग्र
हं॥ स्त्रियाः समस्तं विजितः
पतितो धरणीतले। स्त्रीप
तिर्भविता भूय स्तातेनेदमति
दुष्करं। तथापि किंकरोऽस्मि ष
सत्यपाशवशं गतः॥ क
रिष्यामि यथास्थं त्वं भुज्यतां
निजशासनं॥ इति श्रीमार्क
ण्डेय पुराणे अवीक्षिच्चरितं ना
माध्यायः॥
किरणः पुं चंद्रसूर्यरश्मिः।
तत्पर्यायः। त्विट् १२ द्युतिः
१३ आभा १४ प्रभा १५ विभा १६
रुक् १७ रुचिः १८ भाः १९ छ
विः २० दीप्तिः २१ रश्मिः २२
अभीषुः २३ महः २४ ज्योतिः २५
सरः २६ रोचिः २७ शोचि २८
त्विषा २९ घृष्णिः ३० प्रकाशः ३१
आतपः ३२ द्योतः ३३। इति
शब्दरत्नावली॥
पादः ३४ आलोकः ३५ वसुः ३६

ऋषिः ३७ भामः ३८ घर्म्मः ३९ लो
कः ४० अर्च्चिः ४१ भासः ४२ वी
चिः ४३ हेतिः ४४ धाम ४५ वर्च्चः
४६ मयूख ४७ तेजः ४८ ओजः
४९। इति जटाधरः॥ किरात
तिक्तः पुं भूनिम्बः। तत्
पर्य्यायः। किरातकः २।
इति जटाधरः॥ चिरतिक्तः ३
विरातिक्तः ४ तिक्तकः ५ सु
तिक्तकः ६। इति शब्दरत्नाव
ली कटुतिक्तः ७ रामसेनकः ८
किरातकोऽन्यो नैपालः सो
ऽर्द्धतिक्तो ज्वरान्तकः किरातः
सारको रूक्षः शीतलस्तिक्तको
लघुः॥ सन्निपातज्वर श्वास।
कफपित्तास्रदाहनुत्। कास
शोथ तृषा कुष्ठज्वर व्रण कृमि
प्रणुत्। इति भावप्रकाशः॥
किल क नैरो क केलयति।
नदि रिति राद नाशा प्रेरणे
इत्यस्य औणादिक कि प्रत्यये
रूपं। इति दुर्गादासः॥
किल श शैत्ये॥ क्रीडे॥ श
किलति प्रासादः शिम्बवी।
केलिता। इति दुर्गादासः॥
किष्क क उ. वधे। मूर्द्धन्योप
धः। क उ. किष्कयते। इति
दुर्गादासः॥
कीट क बंधकर्णयोः। क
कीटयति कीटः। वर्णः कैश्चि
न्न मन्यते। इति दुर्गादासः॥
कील बन्धे। चतुर्थ्यस्वरी॥
कीलति। इति दुर्गादासः।
कु उ. शब्दे। उ.
कवते। इति दुर्गादासः।
कु ल शब्दे। ल कौति।
इति दुर्गादासः॥
कु पि उ. आर्त्तस्वरे।
पि उ. कुवते अकुत। इति
दुर्गादासः॥
कुकु उ. आदाने। उ.
कोकते। इति दुर्गादासः।
कुकुन्दरः पुं कुक्कुरडुः। कु
कुरोदा इति हिंदीभाषा तत्
पर्य्यायगुणाः। कुकुंदर स्ताम्र
चूडः सूक्ष्मपत्रो। मृदुच्छदः कु
कुन्दरः कटुस्तिक्तो ज्वर रक्त
कफापहः तन्मूल मार्द्रं नि:
क्षिप्तं वदने मुखशोषहृत्।
इति भावप्रकाशः॥
कुक्कुटः पुं स्त्री पक्षिविशेषः
कुकुडा इति भाषा तत्पर्य्यायः
ताम्रशिखी ३। इति जटाधरः
रात्रिवेदः ४ उषाकरः ५।

वृन्तादः १२ कालज्ञः १३। इति
शब्दरत्नावली॥ दक्षः १४ याम
नादी १५ शिखंडिकः १६। तन्मां
सगुणाः। कुक्कुटो बृंहणः स्नि
ग्धो वीर्य्योष्णोऽनिलहृद्गुरुः। च
क्षुष्यः शुक्रकफकृत् वल्यो वृ
तः कषायकः। आरण्यकुक्कुटः
स्निग्धो बृंहणः श्लेष्मलो गुरुः
वातपित्तक्षयवमी विषमज्वर
नाशनः इति भावप्रकाशः॥
कुक्कुटीव्रतं क्ली भाद्रशुक्लस
प्तमीकर्त्तव्यनियमविशेषः। त
द्विवरणं ललितासप्तमीश
ब्दे द्रष्टव्यं॥
कुक्कुरः पुं पशुविशेषः।
कुकुर इति भाषा। तस्य प
रीक्षा यथा। मृगयार्थं शशा
नार्थं कौतुकार्थं महीक्षिता।
श्वानः पोष्याः स्तन स्तेषां मत्र
वक्ष्यामि लक्षणं गुण जाति
प्रभेदेन शुनो भेदो ह्यनेकधा
तद्यथा। सात्त्विका राजसा श्वे
तामसाश्च त्रिधा मताः॥ श्र
ान्ता अपरिहीनाः पवित्राः
स्वल्पभोजिनः। श्वान स्ते सात्वि
काः प्रोक्ता हर्षपते च क्वचित्
क्वचित्॥ १॥ क्रुद्धा वक्र भुजो
दीर्घा गुरुवक्त्र स्तनस्तराः। जं
गलस्था जांघिकाश्च श्वानस्ते
राजसा मताः॥ २॥ अल्पश्रमे
णापि श्रान्ता ललज्जिह्वा गुरूद
राः। श्वानस्ते तामसा ज्ञेयाः सं
ध्यावनसमाश्रयाः॥ ३॥ ब्राह्म
द्विजातिभेदेन चतस्रः सर्व एव
हि। शुभ्रा दीर्घा स्वल्पकर्णा ल
घुपुच्छास्तनूदराः सशुङ्कावरे
ताश्वश्वानस्ते ब्रह्मजातयः॥१॥ र
क्ताङ्गा स्तब्धलोमानो ललत्कर्णा
स्तनूदराः॥ दीर्घा दीर्घानखरदाः
श्वानस्ते क्षत्रजातयः॥२॥ येपी
तवर्णा मृदव स्तनुलोमान प्
व च॥ क्रुद्धा क्रुद्धा ललज्जिह्वास्ते
श्वानो वैश्यजातयः॥३॥ कृष्ण
वर्णास्तनुमुखा दीर्घरोमाण
एव च॥ अक्रुद्धाः श्रमयुक्ताश्च
तेश्वानः शूद्रजातयः॥४॥ लघु
श्रमाणास्तु गुरूदरा ये ये मध्य
तता वक्रपृष्ठकाश्च। मध्यहृच्छा
लघुसत्वमंतास्ते चान्त्यजाः कु
क्कुरजातयः स्मृः ५॥ द्विजातिवि
ष्कसंसर्गात् द्विजातिः स्यादथाव
रः। लक्षणत्रयसेवयात् त्रिजा
तिर्धनजापनः॥ ओजोपि। द्वि
जाति र्वा त्रिजातिर्वा विजातिः

स्मा महीभृतां । भयं धन त्वयं शोकं विदधाति यथा क्रमं ॥ इति भोजराजकृतयुक्तिकल्पतरुः ॥

कुंकुमं क्ली स्वनामख्यात गन्धद्रव्यं । तत्पर्य्यायः । हरिचंदनं १४ फलं १५ रजं १६ दीपकं १७ लोहितं १८ सौरभं १९ चंदनं २० । इति शब्दरत्नावली ॥

कुच ज रोध पर्क कौटिल्य लेखने । ज कोचः कुचः रोधः क्रियारोधः जडीभावः इत्यर्थः । अस्मिन्नर्थ एव प्रायो वर्त्तते । यस्मिन् प्रमुदिते रश्मि नमः संकोचति स्त्रियो पर्कः सम्पर्कः इति दुर्गादासः

कुच नादशब्दे नादशब्दः उच्चैः शब्दः । कोचति टक्का भडमल्लतारे शब्दे च कोचति इति नानार्थ पठति । तन्मते तार स्त्रिकणता कोचति कांचीं वणिक् चिकणयतीत्यर्थः । इति दुर्गादासः ॥

कुच शि संकोचे । प्रायः संपूर्वस्य प्रयोगः । शि संकुचति अकुचीत् चुकोच । इति दुर्गादासः ॥

कुज उ स्तेये । उ कोजित्वा कुक्त्वा । स्तेयं चौर्य्यं इति दुर्गादासः ॥

कुजः इ अव्यक्तशब्दे । इति चेद्रः ॥ कुंजति कुंजरः । इति दुर्गादासः ॥

कुट इ वैकल्ये पंचमस्वरी । इ कुंट्यते । वैकल्यमिह विकलीकरणं । कुण्टति जनं शोकः । इति दुर्गादासः ॥

कुट शि कौटिल्ये । शि कुटति अकुटीत् चुकोट । कौटिल्यमिह कटिलीभावः कुटिलीकरणं च । इति दुर्गादासः ॥

कुट क उ प्रतापने । पंचमस्वरी । क उ कोटयते । पक्षोऽन्यै र्न मन्यते । इति दुर्गादासः ॥

कुटजः पुं पुष्पवृक्षविशेषः तत्पर्य्यायः पांडुरः २० इति शब्दरत्नावली ॥ अपिच कुटजः कुटजः कौटो वत्सको गिरिमल्लिका । कालिंगः शक्रशाखी च मल्लिकापुष्प इत्यपि ॥ इन्द्रो जवफलः शक्रो वृक्षकः पाण्डुरद्रुमः । कुटजः कटु ॥

को वृक्षो दीपन स्तुवरो हिमः ॥ इति भावप्रकाशः ॥

कुटिलः त्रि वक्रः । बाँका इति भाषा । तत्पर्य्यायः । भंगुरं १३ वेल्लं १४ वितनं १५ उन्दुरं १६ । इति शब्दरत्नावली ॥

कुटुंब क उ धृत्यां । ओष्ठवर्गीयोपधः । क उ कुटुंबयते । अयं केश्चिन्न मन्यते । इति दुर्गादासः ॥

कुटुंबिनी स्त्री पतिपुत्रादिमती । तत्पर्य्यायः । पुरंध्रिका ४ इति शब्दरत्नावली ॥

कुट्ट क उ प्रतापने । पंचमस्वरी । दहयांतः । क उ कुट्टयते । पक्षोऽन्यै र्न मन्यते । इति दुर्गादासः ॥

कुट्ट क कुत्सा छिदोः । क कुट्टयति । इति दुर्गादासः ॥

कुठ ० छिदि । सौत्रधातुरयं । कुठेरः कुठारः कुठाकुः । इति दुर्गादासः ॥

कुठ इ खोटन वैकल्यालस्ये । पंचमस्वरी । इ कुण्ठ्यते । वैकल्यं विकलीभावः । आलस्यं मंदीभावः । कुण्ठति खंजः शोकार्त्तो हठो वा । इति दुर्गादासः ॥

कुठारः पुं स्त्री अस्त्रविशेषः कुडुल् इति भाषा तत्पर्य्यायः कुठारकः ९ द्रुघनः १० इति जटाधरः ॥

कुड शि बाल्ये ॥ अदने । पतदाद्या स्त्रत्वारः पंचमस्वरिणः । बाल्यमिह शिशुव्यापारः । शि कुडति अकुडीत् शिलाभिः शिशुः । इति दुर्गादासः ॥

कुड इ उ दाहे । इ कुण्ड्यते । उ कुण्डते । इति दुर्गादासः ॥

कुड इ वैकल्ये । इ कुण्ड्यते कुण्डति जनं दैवः विकलं करोतीत्यर्थः । इति दुर्गादासः ।

कुड इ क रक्षे । इ क कुण्डयति । इति दुर्गादासः ॥

कुण त कु आभाषमंत्रयोः । कुल्वी मूर्द्धन्योपधः । कुणयति मंत्रोऽभिमुखीकरणं । शुभोक्तिरित्येके । इति दुर्गादासः ॥

कुण शा उपकरणे ॥ शब्दे । उपकरणं दानादिना पोषणं । शा कुणति दीनं दयालुः । कोणिता

इति दुर्गादासः ॥
कुण्डली स्त्री मिष्टान्नविशेषः
जिलेबी इति भाषा । इति पाक
राजेश्वरः ॥ कुलकुण्डलिनी
शक्तिः । यथा । त्रिकोणं त
त्र विज्ञेयं शक्तिपीठं मनोहरे
रे । तत्रकूरे कामवायु जीव
रूपो निरंचलः ॥ अधोमु
खस्तत्र लिंगः स्वयंभूस्तेन
चाल्पने नीवारशूकवत्तन्वी
कुण्डलीपरदेवता शंखवत्त्व
निभा देवी सार्द्धत्रिवलयान्वि
ता । मुखेनाक्रम्य ब्रह्मास्यं त
या संवेष्टितः प्रभुः डाकिनी
तत्र वसति द्वारपालीसयष्टि
का यः साधकोऽत्र मनेसद्धिा
नैव मानुषः इति संमोहनतंत्रे
कुण्डाशी त्रि कुण्डान्नभोजी ।
तस्य नरको यथा । रंगोपजी
वी कैवर्त्तः कुण्डाशी गरदस्त
था । सूची माहिषिकश्चैव प
र्वकारी च यो द्विजः ॥ अ
गारदाही मित्रघ्नः शाकुनिग्रा
मयाजकः रुधिरांधे पतंत्ये
ते सोमविक्रयिणे च ये ॥ इ
ति विष्णुपुराणे २ अंशे ६
अध्यायः ॥ रंगोपजीवीन

टमल्लादिवृत्तिः । कैवर्त्तः धी
वरवृत्तिः । यस्यो जीवति जारा
ज्जातः कुण्डः तदन्नभोजी कुण्डा
शी । सूची पिशुनः । माहिषो म
हिषोपजीवी । यद्वा । माहिषीस्त्र
च्यते भार्य्या भगेनोपार्जितं ध
नं । उपजीवति यस्तस्याः सवै
माहिषकः स्मृतः ॥ इति स्मृ
तिप्रोक्तः । पर्वकारी धनादि
लोभेनापर्वस्य अमावस्यादिक्रि
याप्रवर्त्तकः । पर्वगामीति पा
ठे पर्वस्य स्त्रीगामी । शाकुनिः
पक्षिजीवी । अभक्ति मित्रशाकु
नोपजीवी वा । ग्रामयाजकः
ग्रामार्थे यज्वा । इति तट्टीकायां
श्रीधरस्वामी ॥
कुतपः पु दिवसस्याष्टममुहू
र्त्तः यथा । अह्नो मुहूर्त्ता विख्या
ता दश पंच च सर्वदा तत्राष्टमो
मुहूर्त्तो यः सकालः कुतपः स्मृ
तः ॥ इति श्राद्धतत्त्वे मत्स्यपुरा
णवचनं ॥ पारिभाषिककुतपा
यथा । मध्याह्नः खड्गपात्रंच त
था नेपालकम्बलः । रौप्यं दर्भा
स्तिलागावो दौहित्रश्चाष्टमः ।
स्मृतः ॥ पापं कुत्सितमित्या
हुस्तस्य संतापकारिणः ॥

नैनैवेष्टसिद्धे इदन्तवंधो वेदे
शुद्धारणभेदार्थः । इति दु
र्गादासः ॥
कुंच ० वक्रणे ॥ तोच्छोपं
वमस्वरी । वक्रणमिति वक्रंर
काचरतीति क्वो वक्रं करोती
ति गौ च रूपं । तेन कुटिली
भावः कुटिलीकरणंच । तो.
च्छा मल्पीभावः अल्पीकरणं
च कुंचति खलः कुटिलोल्पी
वास्यादित्यर्थः । कुंचति लतांवा
पुः कुटिला मल्पां वा करोती
त्यर्थः । इति दुर्गादासः ॥
कुंतलः पु अवकभेदः । यथा
वर्णैः षोडशभिः कार्य्यः कुंतलो
लघुशेखरे । मृगांगरे चरसे प्रो
क्त मानंदफलदायकः ॥ इ
ति संगीतदामोदरः ॥
कुन्थ ग क्लिषि ॥ क्लिषि ।
पंचमस्वरी । क्लिपि दुःखानुभ
वे गकु स्थाति दुभक्ताभेः इति रु
लाघुधः चुकुंथ । इति दुर्गादासः
कुन्दः पु स्त्री पुष्पवृत्त वि
शेषः । तत्पर्य्यायः । वोरटं १२
वरटं १४ । इति शब्दरत्नावली ॥
अपिच । कुंदन्तु कथितं मा
घ्यं सदापुष्पंच तत्स्मृतं । कं

दर्शीतं लघु श्लेष्मशिरोरुग्वि
ष पित्तहृत् ॥ इति भाव प्र
काशः ॥
कुंदुरुः पु स्त्री स्वनामख्यात
सुगंधिद्रव्यं । तत्पर्य्यायः ।
तीक्ष्णगंधः १८ वली १९ । इति
जटाधरः ॥ अपिच । कुंदुरुस्त
मुकुंदः स्यात् सुगंधः केर इ
त्यपि । कुंदुकर्मधुरस्तिक्तस्ती
क्ष्णस्त्वच्यः कटुर्हरेत् । ज्वरस्वे
दग्रहालक्ष्मी मुखरोगकफा
निलान् ॥ इति भावप्रकाशः ।
कुप य इर कोपे ।
कोपो नेत्रलौहित्यादिहेतु
श्चित्तविकारः । य कुप्यति
माता शिशवे । इर अकुपत्
अकोपीत् अस्मात् पुषादित्वा
त्रित्य ङ. इत्यन्ये । कदाचित्
कुप्यते माता नोदरस्था हरीत
की । इतित कुप्यतीति कुप्
ततः स इवाचरति इति उ
साध्यं । इति दुर्गादासः ॥
कुप क दुतौ । क
कोपयति । इति दुर्गादासः ॥
कुप इ कि स्तनेः । पंच
मस्वरी । इ कुम्पते । किकुं
पयति कुंपति । स्तुति तास्का

दनं। इति दुर्गादासः॥
कुब इ कि स्तृत्यां। प
चमस्वरी। इ कुंब्यते। कि
कुंबयति। स्तृति राच्छादने
इति दुर्गादासः॥
कुब्जः त्रि वायुनोन्नतहृदयः
उन्नतपृष्ठश्च। कुजा इति भाषा
तत्पर्यायः। गडुलः २। इ
त्यमरः॥ न्युब्जः ३ गडुरः ४
गडुः ५। इति शब्दरत्नावली
कुईषत् उब्ज आर्जवे मस्यकु
ब्जः उब्ज आर्जवे च अ मनीषा
दित्वाद्लोपः। गडुः पृष्ठगुड
को विद्यते अस्येति गोत्वरणे
त्यादिना चूडादित्वात् लेग
डुलः इति नहीकायां भरतः।
तस्य लक्षणमाह। हृदयं यदि
वा पृष्ठ मन्नतं क्रमशः सरुक्
क्रुद्धो वायुर्यदा कुर्यात्तदा तं
कुब्ज मादिशेत्॥ यद्देत्न्युब्जा
यदिवेति विकल्पार्थ स्तेन न
पुनरुक्तिदोषः। तत्र तत्रान्तराया
मः कोऽन्तनतो भवति बहिरा
यामः पृष्ठनतो भवति ता
भ्यामस्य को भेदः। उच्यते
अन्तरायाम बहिरायामयोः म
हतैवैतान् शरीरस्य बहिः
शरीरस्यावनमनमन्तर्हृद
यं पृष्ठं वा शरीरा हृदि र्भवती
ति भेदः॥ अथ चिकित्सा।
बाह्यायामेंऽन्तरायामेथनुस्तंभे
चकुब्जके। योज्यं प्रसारिणी तै
लं तेन तेषां शमो भवेत्। वा
तव्याधिषु सामान्या याः क्रि।
याः कथिताः पुरा। कर्त्त
व्याः पवनाः सर्वाः स्तैल मेत।
द्विशेषतः॥ इति भाव।
प्रकाशः॥
कुब्जकः पुं पुष्पवृक्षविशेषः।
तत्पर्यायः। वाटिकारकः २।
इति त्रिकाण्डशेषः। अपिच।
कुब्जको भद्रतरणीर्हेरम्ब्यो
तिकेशरः। महासहा कण्टका
ढ्या नीलालिकुलसंकुला राज
निर्घण्टे महासहेत्यादिशब्दाः॥
पुंल्लिंगाः॥ अस्य गुणाः। कुब्ज
कः सुरभिः स्वादुः कषायानुर
सः सरः। त्रिदोषशमनो वृष्यः
पीनहर्षीच सस्तनः॥ इति भा
वप्रकाशः॥
कुमार त् क केलौ। कसी।
अचुकुमारत्। इति दुर्गादासः॥
कुमाल त् क केलौ। कसी।
अचुकुमालत्। इति दुर्गादासः॥

अस्त्रेवैते यत स्तस्मात् कुन्त
पा इति विश्रुताः॥ इति मि
ताक्षरायामाचाराध्यायः॥
कुतूहलं क्ली कौतूहलं। तत्
पर्यायः। चित्रं ५। इति श
ब्दरत्नावली॥
कुत् ० अस्ति। सौत्रधात
रयं। इति कविकल्पद्रुमः। कु
तयः। इति दुर्गादासः॥ कुत
पस्य: कुतपः कालविशेषः
कृतिरविचित्स्वरूपाच्च। इ
तिकेचित्॥
कुत्स उ. क म अवक्षेपे।
पंचमस्वरी। दंत्यवर्गाद्योपधः
अवक्षेपो निंदा। उ. क यो न
कुत्सयते कुत्सयिति ह
लायुधः॥ म कुत्सयति कु
त्सयते। अय मात्मनेपदीत्य
न्ये। कदाचित् परस्मैपदार्थो
त्वकारः। इति दुर्गादासः॥
कुत्सा स्त्री निंदा। तत्पर्यायः
गर्हा ॥ निंदनं १२ कुत्सनं १३
परिवादः १४ जुगुप्सनं १५
अपक्रोशः १६ भर्त्सनं १७
अपवादः १८ इति शब्दरत्ना
वली उपरागः १९ अवध्वंसः २०
हेला २१ धिक् २२ सामि २३
इति जटाधरः॥
कुत्सितः त्रि निंदितः। तत्
पर्यायः। कुप्रियः १८। इति ज
टाधरः॥ आविद्धः १९ रेपसः
२० काणः २१ गर्हितः २२ अ
पकृष्टकः २३ इति शब्दरत्ना
वली॥
कुथ इ क्लेशे॥ वधे। पंचम
स्वरी। इ कुंथ्यते। क्लेश इह
दुःखानुभवः। शीतार्त्तस्तन
कुंथतीति हलायुधः। इति
दुर्गादासः॥
कुथ य पूतिभावे। पूतित्वं
दुर्गन्धीभावः। य कुथ्यति मी
नोऽदुर्गन्धः स्यादित्यर्थः चुकोथ
इति दुर्गादासः॥
कुथः स्त्री गजपृष्ठस्यचित्र
कंबलः। तत्पर्यायः। वोलः
१ आस्तरः ११। इति शब्द र
त्नावली॥
कुथोदरी स्त्री निकुंभदुहिता।
कुंभकर्णपौत्री। सा च कल्कि
देवेन हता। यथा। मुनय कु
चुः। मृणु विस्मयथाः पुत्र कुं
भकर्णात्मजात्मजा। कुथोदरी
ति विख्याता गगनार्द्धसमुच्छ्रि
ता॥ कीलकंजस्य महिषी वि

कुंजजननी च सा। हिमालये
शिरः कृत्वा पादौच निषधाचले
शेते स्तनं पाययंती विकुंजे प्र
स्तुतस्तनी। तस्या निश्वा सवा
तेन विवशा वय मागताः॥
दैवेनैवसमानीताः प्रामास्त
व पदांबुजं। मुनयो रक्षनीया
स्ते रक्षःस्व च विपत्सुच॥
इति तेषां वचः श्रुत्वा कल्किः
परपुरंजयः। सेनागणैः परि
वृतो जगाम हिमवद्गिरिं इ
त्यादि॥ सा कुथोत्थाय सहसा
ननर्द परमाद्भुतं। तेन नादेन
महता वित्रस्ताश्चाभवन् ज
नाः॥ निपेतुः सैनिकाः सर्वे
मूर्छिता धरणीतले। सारथा
श्च गजाश्चापि विहतास्या भ
यानका। जग्रास मश्वासवा
तैः समानीय कुथोदरी॥ से
नागणं सकुंदरं प्रविष्टाकल्कि
नासह। यथर्क्षमुखवातेन प्र
विशंति पिपीलिकाः तद्दृष्टादे
वगंधर्वाहाहाकारमचक्रिरे।
तत्रस्था मुनयः शेषु जैपुश्चा
न्ये महर्षयः॥ निपेतू रसे ह्र
खो जीवालणा ब्रह्मवादिनः रु
द्रः एष्योधायेजट्ठभुस्तनि

प्राचराः जगतांकदनं दृष्ट्वा
सस्मारात्मान मात्मना। क
ल्किः कमलपत्राक्षः सुराराति
निसूदनः। बाणाग्नि चेलचर्म
भ्यां कम्बले यौनदारुभिः प्र
ज्वाल्योदवमध्येन करवालेस
मादरे तेनखङ्गेनमहता कु
क्षिं निर्भिद्य बंधुभिः। वलिभि
श्चीन्द्रमि वीरे हैतः शाखासपा
णिभिः॥ वहिर्बभूव सर्वशः
कल्किः कल्कविनाशनः सर
स्वातोयथाहृत्रकृद्दिंदनोलि
नेभिना योनिरंध्राद्गजरथास्त
रगाश्चाभवन् वहिः। नासि
का कर्णविवरात् केपि तस्या
विनिर्गताः तेनिर्गतास्ततस्त
स्याः सैनिकाः रुधिरोक्षिताः।
तांविक्ष्युर्निः क्षिपंतीं तरसा
चरणौ करौ। ममार सा भिन्न
देहा भिन्नकुक्षिशिरोधरा।
नादयंतीदिशोद्योः खचूर्णय
तीच पर्वतान्। इति कल्कि
पुराणे १६ अध्यायः॥
कुद्द ३ क मिथ्याक्रोः। पं
चमस्वरी। दंत्यवर्गात्तीयो
पधः। ३ क कुंद्दयति नीचः
मिथ्यावदतीत्यर्थः कुंद्दस्य

पीतदारुकषायंच पिबेन्मूत्रेण
संयुतं स्विन्नो मेदः समुत्थांतले
पयेत् सुरसादिना शिरोविरेक
द्रव्यैर्वा सुखोष्मैः मूत्रसंयुतैः
सस्वेद्य मूत्रप्रभवं वस्त्रपट्टेन
वेष्टयेत् सेवन्याः पार्श्वतोः
पत्नाद्विध्यद्व्रीहिमुखेन वै।
फलकोपरि च कस्मीते त्यक्त्वा।
सेवनिं मादरात्। वात्यासा
द्रा स्त्रियां विध्येद्द्व्रद्विनिहिम
ये। अंगुष्ठमध्ये त्वक् छित्वा
दहेंगाविपर्यये॥ रास्नाषस
मतैरंड वला गोक्षर साधितः
काथोंत्रवृद्धिं हंत्याशु रुबुतै
लेन मिश्रितः तैलमेरण्डजं
पीत्वा बलासिद्धपयोन्वितं। श्मा
भानमूलोपचितं मेत्रवृद्धिंज
येन्नरः॥ हरीतकीमूत्रसिद्धां
सतैलं लवणान्वितां। प्रातः
प्रातस्तुसेवेतकफवातामयापहां
गोमूत्रपिष्टां रुकतैलं।
भृष्टां हरीतकीं सैधवचूर्णयु
क्तां। खादेन्नरः कोस्लजलानु
पानां निहंति वृद्धिं चिरजां प्र
वृद्धां त्रिफलाकाथगोमूत्रं पि
वेत् प्रातरतंद्रितः। कफवातो
द्भवं हंति श्वयथुं वृषणोत्थि

तं॥ सरला गुरुकष्टानिदे
वदारु महौषधं। मस्तारना
लंसंपिष्टं प्रोत्थसं कफवात
जन् त्रिफलाक्काथगोमूत्रं
कल्कः पथ्यासमन्वितः कृत्वा
वसंयुक्तो वृद्धिरोगहरः परः
गव्यंहृतंसैंधवसमं प्रयुक्तं पो
कभाण्डे निहितं प्रयत्नात्
सप्ताहमादित्यकरे विपक्वं
निहंति कुरंडमति प्रवृद्धं॥
पेंद्रीमूलभवंचूर्णं रुबुतैले
नमर्दितं। त्रहाज्ञोपयसापी
तं सर्ववृद्धिनिवारणं रुद्दजं
सोमलंलिप्ता करटवांगचर्म
णा वद्धा वृद्धिः शमं याति
चिरजापिन संशयः तिपिष्ट
नारनालेन शूषिकामूलवल्क
लं। लेपो वृद्ध्या मयं हंतिवद्ध
मूलमपि दृढं। वचा सर्षपक
ल्केनलेपो वृद्धिविनाशनः॥
लज्जा गृध्रमलाभ्यां लेपो वृद्धि
हरः परः मूलंविल्वकपित्था
यो रसकस्याग्नेर्दहन्या हंयो।
पपामा पूतिकरंजि शिग्रुकन
रो विष्णुधायाफष्कं कृत्स्नाग्र
शिकवचा पंचलवणं ताराज्रमो
दान्वितं। पीतं कांजिककोस्लतो

य मथिते चूर्णीकृतं ब्रह्मजि
तं अवीदीरेण गोमूत्र कल्कं
कटुतुम्बकस्य वा। प्रलेपनेन
खोऽस्य स्यात् ब्रह्ममूलहरं प
रं मृत्पात्रे तैलकाकोदरे
तत्र प्रवेशयेत्। ब्रह्मभृङ्ग
मेधावीनतत्तृणादरुजो
भवेत् अजाजीहवुषाकुष्ठंगो
मूत्रवत्सादनीच। कौशिके।
नस्तमं पिष्टाकर्ष्याङ्गहृब्रह्मले।
पनं सैन्धवमदनं कुष्ठं शाता।
कटिकुलवचो क्वीवेरं मधु
केभार्गीदेवदारु सनागरं॥
कटफलं पौष्करं मेदां चवि
कां चित्रकं शठी विडङ्गातिवि
षे पूर्वा सारेण कौनीलिंनीस्थि
रो विल्वाजमोदां कल्कां चवहं नी
रास्नां च पिप्पलीं च। साध्य मेरण्डजं
तैलं तैलं वा कफवातनुत्। ब्र
ध्मोदरार्तिगुल्मार्शः प्लीहमेहा
ध्व मारुतान्। आनाह मश्मरीं
चैव हन्यात् सद्यस्तु वासनात्। हर
ने सैन्धवाद्यं तैलं॥ सोरेष्वर
हंतं योगं ब्रह्म हृदि निहन्त
ये इति ब्रह्म हृद्व्यधिकारः इतिच
क्रपाणिदत्तः भावप्रकोक्त चि
कित्सादिः ग्रंथ हृदि शोथे द्रष्टव्यः

करण्डेत्रीयोगः पुं करण्डेत्रे स्थस्य
योगः। यथा। पञ्चग्रह युते
स्तौ लग्नसंस्थे हृदस्थितो।
सौमदृष्टा गतेलग्ने करण्डेत्रे
स्तिर्भवेत्॥ इति जातकाम
तसंग्रहे योगाध्यायः॥
करट उ. क्रीडायां। पञ्चमस्वरी
दीर्घिणः पृथक् पाठ सामर्थ्या
त् पूर्वस्य दीर्घचूनयीति दीर्घो
न स्यात्। उ. करटते। इति
दुर्गादासः॥
कल जं वंधु संहन्त्याः। जको
लः कलः। कोल त कलीनः
सर्वेषां वंधुः स्यादि त्यर्थः। सं
हती राशीकरण मिति चतुर्भु
जः। केचित् संहति स्थाने सं
स्थाने पठिता कोलति कला
लः गणयति इत्यर्थः इत्या
कः। संस्थान पठिता संस्था
न उपचयः। इति रामः। अ
न्ये त वंधुषु जातिषु वर्त्तमा
नोऽयं अन्यत्रास्ता न प्रयो
गः। गति गणे इति विदित्वा
कः। इति दुर्गादासः॥
कलं क्ली वस्त्रः तन्त्राशाकार।
णं यथा। गोभिश्च दैवतैर्वि
प्रकृष्या राजोपसेवया॥

कुमुदं क्ली सुगन्धोत्पलं। तत
पर्यायः। गन्धसोमं २। इति
शब्दरत्नावली॥ अपिच। श्वेते
कुवलयं प्रोक्तं कुमुदं कैरवं।
तथा। कुमुदं पिच्छिलं स्निग्धं
मधुरं ह्लादि शीतलं॥ इति
भावप्रकाशः॥
कुमुदः पुं ध्रुवकभेदः यथा
एकविंशतिवर्णोद्भि भवेत्
शृंगारकेरसे। कुमुदोऽभीष्ट
दश्चैव तालेनुरगलीलके॥
इति संगीतदामोदरः॥
कुम्भिका स्त्री जलतृण विशेषः
पाना इति भाषा। तत्पर्यायः।
वारिमूली १ खमूलिका २ प
र्णी॥ ३ प्लवी ४ खमूली ५ खम
लिः ६ वारिकर्णिका ७ इति
शब्दरत्नावली कुमुदा ८ दला
ढकः ९ इति जटाधरः अस्य
गुणाः वारिपर्णी शब्दे द्रष्टव्याः
कुम्भीरः पुं जलजन्तुविशेषः
तत्पर्यायः। वार्भटः २ अन्वकि
रातः ३ अम्बुकण्टकः ४। इति
शब्दरत्नावली॥
कुर पा शब्दे। पा करति।
कोरिता इति दुर्गादासः॥
कुरण्डः पुं मुष्कवृद्धिरोगः॥

कुरण्ड इति भाषा। तस्य निदा
नादि यथा। क्रुद्धोऽनूर्द्धगतिर्वा
युः शोथशूलकरश्चरन्। मु
ष्कौ वंक्षणतः प्राप्य फलकोषा
भिवाहिनीः। प्रपीड्य धमनी।
वृद्धिं करोति फलकोषयोः।
दोषास्त्रमेदोमूत्रान्त्रैः स वृद्धिः
सप्तधा मतः॥ मूत्रान्त्रजावप्य
निलाद्धेतुभेदस्तु केवलं। वा
तपूर्णदृतिस्पर्शो रूक्षो वाता
दहेतुरुक्॥ पक्वोदुम्बरसंका
शः पित्ताद्दाहोष्मपाकवान्।
कठिनोऽल्परुक्॥ कफात् श्यामस्फो
टाहतः पित्तवृद्धिलिङ्गभृद्रक्त
जः। कफवन्मेदसा वृद्धि र्मृदु
स्तालफलोपमः। मूत्रधारण
शीलस्य मूत्रजः स तु गच्छतः।
अम्भोभिः पूर्णदृतिवत् क्षोभं
याति सरुङ् मृदुः॥ मूत्रकृ
च्छ्रमधश्च स्याच्चलयन् फलको
षयोः। वातकोपितिराहारैः
शीततोयावगाहनैः॥ धा
रणेरणभाराध्व विषमाङ्ग
प्रवर्त्तनैः क्षोभणैः क्षुभितो
ऽन्यैश्च क्षुद्रान्त्रावयवं यदा॥
पवनो विगुणीकृत्य स्व
निवेशादधो नयेत्॥ कु

ष्णोहृद्गतस्संधिस्थो ग्रंथ्याभंस्य
यथु तदा ॥ उपेक्ष्यमाणस्य चम
ष्कवृद्धि माध्मानरुक्स्तंभवंती
सवायुः । प्रपीडितो ऽन्तःस्वनवान्
प्रयाति प्रध्मापयन्नेति पुनश्च प
कः ॥ अस्त्रवृद्धि रसाध्यो ऽ
यं वानवृद्धिसमाकृतिः । इ
ति वृद्धिनिदानं । इति माध
वकरः ॥ तस्यौषधं यथा ।
द्विजयष्ट्याश्च वै मूलं पिष्टं तं
डुलवारिणा । गण्डमालीहरे
ल्लेपात् कुरण्ड गलगण्डकं ॥
रसांजनं हरीतक्या क्वाथं तेनैव
गण्डनान् । नश्येद्धे पुरुषव्याधिं
नात्र कार्या विचारणा ॥ इति
गारुडे १९० अध्यायः ॥ ॰
अन्यच्च । गव्यं घृतं सैंधवसंप्र
युक्तं शंबुकभाण्डे निहितं त
देव । सप्ताहमादित्यकरैर्विप
क्कं हन्यात् कुरण्डं चिरजं प्र
वृद्धं ॥ गव्यघृत कर्ष ११ सैंध
व मा ४ । शंबुकभाण्डे कृत्वा
सप्तदिनं यावत् रौद्रे भाव ।
येत् तेन कुरण्डस्थलं सैं
धवंच घृताश्चकं ताम्रभाजन
आतपे । ततः स्रूर्णया घृष्टेन
म्लेन समाहरेत् कुरण्डस्य

तयेनेन स निर्विघ्नं दिवानिशं
कुरण्डं तेन संलिप्तं नास्तीत्या
ह पुनर्वसुः ॥ ताम्रभाजने
घृतं सैंधवं दत्वा रौद्रे तप्तं
कृत्वा मेषलोमलतिकया
घृष्ट्वा मलग्रहं कृत्वा तेन स्व
येत् वरुवारस्य बीजं च पिष्ट्वात्
क्वाथैः सह कुरण्डं नाशयेत् स्वे
लेपनामात्र संशयः । घृतेनैलो
त्पलं मूलं पिष्ट्वा लिप्तेन कुरण्
कं । अथवा लेपनं कुर्यात् गृ
हमंडूक शोणितैः । इति भैष
ज्यरत्नावली ॥ अपरंच । गुग्गु
लं रुबुतैलेन स्वा गोमूत्रेणापि
वेत्ररः । वातवृद्धिं निहन्त्याशु
चिरकालानुबंधिनीं ॥ सक्षीरं
वापि वेत्तैलं मासमेरण्डसंभवं ।
पुनर्णवाया स्तैलं वा तैलं नारा
यणं तथा पाने बस्तौ करो स्त
ले पेयस्याद्वाकोभसा । चंद
नं मधुकं पद्मं स्वीरं नीलमुत्
पलं क्षीरपिष्टैः प्रदेहः स्याद्वा
हशोथरुजापहः । पंचवल्क
लकल्केन सघृतेन प्रलेपनं ॥
सर्वपित्त हरंकार्यं रक्तजे स्क
मोत्तरो । श्लेष्मवृद्धि तु सर्वौ
स्नैत्रपिष्टैः प्रलेपयेत् ॥ ।

कुलान्यकुलतां यान्ति यानि ही
नानि वृत्ततः ॥ कुविवाहैः क्रि
यालोपै र्वेदानध्ययनेन च ।
कुलान्यकुलतां यान्ति ब्राह्मणा
तिक्रमेण वै ॥ अनृतात् पारदा
र्याच्च तथाभक्ष्यस्य भक्षणात् ॥
अश्रौतधर्माचरणात् क्षिप्रं न
श्यति वै कुलं । अश्रोत्रियेषु वै
वेदानां वृषलेषु तथैव च वि
हिताचारहीनेषु क्षिप्रं नश्यति
वै कुलं ॥ इति कूर्मपुराणे उ
परिभागे १५ अध्यायः ॥
कुलकुण्डलिनी । स्त्री मूलाधार
कुलकुण्डली । पद्मस्थितशिव
शक्तिविशेषः । यथा । कुजन्ती
कुलकुण्डली च मधुरं मत्तालि
मालास्फुटं वाचः कोमलका
व्यबंधरचनाभेदा — भेदक्रमैः
श्वासोच्छ्वासविवर्त्तनेन जगतां
जीवो यया धार्यते सा मूला
म्बुजगह्वरे विलसति प्रोद्दाम
दीप्तावली ॥ इति पूर्णानं
दकृतषट्चक्रप्रकाशः ॥ ।
कुजन्तीति सा मूलाम्बुजगह्व
रे इत्यादि सा मूला । व्याख्या
ते । कीदृशी कोमलकाव्यबं
धरचनाभेदाति भेदक्रमैः ।

कोमला कमनीयत्वविशि
ष्टा या काव्यबंधरचनात
स्याः भेदातिभेदक्रमैः भे
दातिशयभेदक्रमैर्विशिष्टा
वाचः मत्तालिमालास्फुटं
मत्ताया अलिमाला भ्रमरस
मूहस्तद्वदस्फुटं यथा स्यात्
एवं मधुरं यथा स्यात् तथा कु
जन्ती अव्यक्तमधुरध्वनिं कुर्वन्ती
त्यर्थः सा का इत्याकांक्षायामा
ह यया कुलकुण्डलिन्या श्वा
सोच्छ्वासविवर्त्तनेन श्वासोच्छ्वा
सयोः परिवर्त्तनेन गमनाग
मनेन जगतां संसारिणां जीवः
प्राणो धार्यते । पुनः कीदृशी
प्रोद्दामदीप्तावली प्रकृष्टोत्तुं
गदीप्तिश्रेणीस्वरूपा । तथा
च मूलाधारपद्मे सर्पाकारसा
र्द्धत्रिवलयवेष्टनविशिष्टा विद्युत्
समहरूपा कुलकुण्डलिनी ति
ष्ठतीत्यर्थः । इति तट्टीका ॥
अन्यत् चक्रे पाठे मूलाधारप
द्मे षट्चक्रपाठेच द्रष्टव्यं कु
लटा स्त्री व्यभिचारिणी । त
त्पर्य्यायः । धृष्टा ॥ ह्रष्टा १२
पर्षिता १३ इति शब्दरत्नाव
ली ॥ लंका १४ निशाचरी १५

उपारेऽगा ६ इति जटाधरः ॥
परकीयान्तर्गतनायिकाविशे
षः। यथा। पते वारि कृणा
न् किरति पुरुषान् वर्षति
नाम्भोधराः शैलाः शाद्वलम
हरन्ति न स्पृशन्त्येते पुनर्नीप
कान् त्रैलोक्ये तरवः कलानि
सुवते नैवारभन्ते जनान् धा
तः कातरमाल्पयामि कुलटा
हेतोस्त्वया किं कृतं ॥ इति र
समञ्जरी ॥ अस्या अत्र भोज
नमायश्चित्तशाहे अभोज्यान्न
भक्षणप्रकरणे द्रष्टव्यं ॥
कुलाचलः पु कुलपर्वतः। य
था अष्टकुलचलसप्तसमुद्रा
ब्रह्मपुरन्दरदिनकररुद्राः न
त्वेवाहं नाथे लोकस्तदपि कि
मर्थं क्रियते शोकः ॥ इति मो
हमुद्गरश्लोकः ॥ सप्तकुलपर्व
ता यथा सप्त ये स्मिन् महाप
र्वीः विस्तृताः कुलपर्वताः।
माहेन्द्रो मलयः सह्यः शुक्तिः
मानृक्षवानपि ॥ विन्ध्यश्च
पारिपात्रश्च इत्येते कुलप
र्वताः। इति मात्स्ये ९५
अध्यायः ॥
कुलाचार्यः पु कुलगुरुः। कु
लीनादीनां वंशोपाख्यानक
र्त्तृब्राह्मणाः। अस्य विवरणं व
रकुशाहे द्रष्टव्यं ॥
कुलीनः पु प्रकृष्टाश्वः। तत्प
र्य्यायः स्वजानेयः ४ जात्यः ५
वालाश्विः ६। इति शब्दरत्ना
वली ॥
कुशः पु स्त्री स्वनामख्याततृ
णं। तत्पर्य्यायः कुतपः २ इ
ति शब्दरत्नावली ॥ अपिच। कु
शो दर्भस्तथा बर्हिः सूच्यग्रो य
ज्ञभूषणः। ततोऽन्यो दीर्घपत्रः
स्यात् क्षुरपत्रस्तथैव च। अस्य
गुणाः। दर्भद्वयं त्रिदोषघ्नं मधुरं
तुवरं हिमं। मूत्रकृच्छ्राश्मरीतृ
ष्णा वस्तिरुक् प्रदरास्रजित् ॥
इति भावप्रकाशः ॥ तस्य धा
रणविधिः स्नानप्रतिनिधिश्च
यथा। पूजाकाले सर्वदैव कु
शहस्तो भवेच्छुचिः। तर्जन्या र
जतं धार्य्यं स्वर्णं धार्य्यमनामया।
कुशाकार्य्यकरं यस्मात्र तद
न्याः कुशाः कुशाः। कुशेन रहि
ता पूजा विफला कथिता म
या। नान्यस्य कृतं स्वर्णं धार्य्यं
हि निजमङ्गले। इति वरदात
न्त्रे १ पटलः ॥ सधवायास्नात

नानस्पर्शनिषेधो यथा। न स्प
शेत्तिलदर्भांश्च सधवा न क
ञ्चन। इति हलायुधकृतब्रा
ह्मणसर्वस्वं ॥ अन्यत् दर्भश
ब्दे द्रष्टव्यं ॥
तन ६ कि युत्यो। पं
वमस्वरी। ६ कुष्पते। किकुं
पाति। इति दुर्गादासः ॥
कुशा य ३२ स्त्रिषि।
य कुष्पति वाला कान्तं। इ
र अकुशात् अक्रोशीत्। अस्या
त् पुष्पादित्वान्नित्यं ड इत्यन्ये
इति दुर्गादासः ॥
कुशण्डिका स्त्री सर्वहोमाधी
ग्निसंस्कारकक्रिया। तत्र सर्वे
षामाकृतिपुरुककर्मणां कुशण्डि
कासंस्कृताग्निसाध्यत्वात् सैव
प्रथममभीधीयते तत्र हस्तप्र
माणं चतुरस्रं स्थण्डिलं शर्करा
ङ्गारास्थिकेशतुषादिरहितं पू
र्वोत्तरप्लवं समं वा छायामण्डप
सहितं गोमयेनोपलिप्य स्नातः
शुचिराचान्तः प्राङ्मुखः कुशास
हितासनोपविष्टः कर्त्ता उत्त
रसादिप्रभृत्यर्थं कुशकुस
मसहितजलपात्रं निधाय दक्षि
णं जानु भूमौ पातयित्वा उ
त्तराग्रकुशोपरि सव्यहस्तप्रा
देशमूलेन वह्निस्थापनप
र्य्यन्तं भूमौ निधाय दक्षिणह
स्तानामिकाङ्गुष्ठगृहीत द्वाद
शाङ्गुलप्रमाणप्रागग्रमुखीरेखा
मुल्लिख्य रेखेयं पृथ्वीदेवता
का पीतवर्णा इति ध्यायेत् तन्मू
लतः प्रभृत्येकविंशत्यङ्गुलप्रमा
णां उत्तराभिमुखीरेखां मुल्लि
खेत् रेखेयं अग्निदेवताका लोहि
तवर्णा इति ध्यायेत्। ततः प्रथ
मरेखायाः उत्तरतः सप्ताङ्गुलो
त्तरितां प्रादेशप्रमाणां पूर्वाभि
मुखीरेखामुल्लिख्य रेखेयं प्रजा
पतिदेवताका कृष्णवर्णा इति
ध्यायेत्। ततः सप्ताङ्गुलोत्तरितां
प्रादेशप्रमाणां पूर्वाभिमुखीं
रेखां मुल्लिख्य रेखेयं इन्द्रदेव
ताका नीलवर्णा इति ध्यायेत्
ततोऽपि सप्ताङ्गुलोत्तरितां प्रादे
शप्रमाणां पूर्वाभिमुखीं रेखा
मुल्लिख्य रेखेयं सोमदेवता
का शुक्लवर्णा इति ध्यायेत्।
ततः क्रमेण दक्षिणहस्ताङ्गु
ष्ठानामिकाभ्यां रेखास्थकंकरादी

त्वा प्रजापतिर्ऋषिः स्तुष्टुप्छन्दो
ऽग्निर्देवता रेखाग्न्युत्कर नि
रसने विनियोगः ओं निरस्तः
परावसुरित्येशान्या दिशि अ
रत्निमात्रान्तरिते देशे प्रक्षिप
त् ततः पूर्वस्थापितजलेन रे
खाभ्युक्षणं कृत्वा दक्षिणादिकु
स्थ कांस्यपात्रस्याग्निनेव धारा
वस्याग्रे वा ज्वलदिंधनं गृही
त्वा प्रजापतिर्ऋषिः स्तुष्टुप्छ
न्दोऽग्निर्देवताग्निसंस्कारे वि
नियोगः ओं क्रव्यादमग्निं प्र
हिणोमि दूरं यमराज्ञो गच्छ
तु रिप्रवाहः। अनेन दक्षिण
पश्चिमकोणे प्रक्षिपेत् ततो
परमग्निं गृहीत्वा प्रजापति
ऋषिर्बृहतीछन्दः प्रजापति
र्देवता अग्निस्थापने विनि
योगः। ओं भूर्भुवः स्वरोम्
इत्यनेनाग्निमात्माभिमुखं
स्वनीयरेखोपरिस्थापयेत् त
तो वामहस्तमुत्संजलिव
दा पठेत्। प्रजापतिर्ऋषिस्तुष्टु
प्छन्दोऽग्निर्देवताग्निस्थापने विनि
योगः ओं इहैवायमितरो जातवे
दा देवेभ्यो हव्यं वहतु प्रजानन् त
तोऽग्रे त्वं विश्वरूपनामासि इति

नाम कृत्वा ध्यात्वा चात्व विश्व
रूपनाम्ने अग्नये नमः इति पा
द्यादिनाभ्यर्च्य ओं सर्वतः पाणि
पादान्तः सर्वतोऽक्षिशिरोमुखं
विश्वरूपो महानग्निः प्रणीतः
सर्वकर्मसु इति पठेत् ततः
प्रादेशप्रमाणान्त्रीनाकाष्ठसमि
धः तस्मिन्नग्नौ कृत्वा ब्रह्मस्थाप
नेऽकुर्यात् समानपंचाशतकु
शोपब्रह्मचित्ते दक्षिणवर्त्मन्
हुमखं दर्भवटुं अधीतवेदब्राह्म
णं वा छत्रमुत्तरासंगं वा कमण्ड
लं वा ब्रह्मत्वेन परिकल्प्याधारा
सहित मृदकपात्रं गृहीत्वाग्ने
रुत्तरतः प्रभृति दक्षिणावर्त्मेन द
क्षिणदेशं गत्वा अरत्निमात्रान्तरिते
देशे पूर्वाभिमुखो वारिधारां दत्वा
तदुपरि प्रागग्रान् कुशानास्तीर्य
पश्चिमाभिमुखो उपविष्टस्तिष्ठे
त्। वामहस्तानामिकांगुष्ठाभ्या
मास्तीर्णकुशात्पत्रमेकं गृहीत्वा प्र
जापतिर्ऋषिः स्तुष्टुप्छन्दोऽग्निर्देव
ता तृणनिरसने विनियोगः ओं नि
रस्तः परावसुरित्यनेन दक्षिणपश्चि
मकोणे प्रक्षिपेत्। ततो उपसर्प्य
दक्षिणपादेन सव्यपादमवष्टभ्य
उत्तराभिमुखो भूम आ ॥

स्तीर्णकुशानद्भिरभ्युक्ष्य प्रजाप
तिर्ऋषिरनुष्टुप्छन्दोऽग्निर्देवता
ब्रह्मोपवेशने विनियोगः। ओं
आवसोः सदने सीद इति। ब्रा
ह्मणं ब्रह्मपदे तत्त्वा ब्राह्मण प
वसीदामीति कुर्यात् अनेन कु
शोपरि पूर्वाग्रं कुशब्राह्मणं वा
ह्मणं ब्रह्मपदेन उत्तराभिमुख
स्थापयित्वा तदुपरि कुशान्द
त्वा अद्भिरभ्युक्ष्य कुशाकुसुमैर
र्चयेत्। ततस्तेनैव पथा प्रत्याव
त्यासने पूर्वाभिमुख उपविष्टो
भूमिजपादिकं कुर्यात्। यदि
तु ब्रह्मत्वेन रोपितो ब्राह्मणो
अयज्ञीयवाचं वदेत्तदा इमं मंत्रं
जपेत्। प्रजापतिर्ऋषिर्गाय
त्रीछन्दो विष्णुर्देवता अयज्ञी
यवाग्वचननिमित्तजपे विनि
योगः ओं इदं विष्णुर्विचक्रमे
त्रेधा निदधे पदं समूढमस्य
पांसुले। इति जपेत्। कुशा
दिब्रह्मपदे तु कर्मकर्तैव
कुर्वाहुतावेक्षणादिब्रह्मकार्यं
कर्तृत्वादयज्ञीयवाग्वचननिमि
त्तं स एव जपेत्। यदि मकरेकर्म
णि चरुहोमास्ति तदा अग्निमेव
समयचरुं श्रपयित्वा तदुपरि

घृतं दत्वा अग्रे हरतः कुशोप
रि संस्थाप्य भूमिजपादिकं कु
र्यात्। दक्षिणजानु भूमौ पा
तयित्वा दक्षिणहस्तोपरि भावे
न अधोमुखौ हस्तौ भूमौ नि
धाय। परमेष्ठी ऋषिरनुष्टु
प्छन्दोऽग्निर्देवता भूमिजपे
विनियोगः ओं इदं भूमेर्भजा
महे इदं भद्रं सुमंगलं। परा
सपत्नान् वाधस्वान्येषां विंद
ते धनं। इति जप्त्वा रात्रौ चे
त् कर्म तदा धनमिति स्थाने
वसु इति प्रयोक्तव्यं। ततो द
क्षिणहस्तेन कुशान् गृहीत्वा
अग्रेरुत्तरतः प्रभृति दक्षिणा
वर्त्मेन लक्षणादिक मनेन मंत्रेण
परिस्तरयेत् त्रयाणां मंत्राणा
मृष्यादयः साधारणाः कौत्स ऋ
षिर्जगतीछन्दोऽग्निर्देवता
स्वबहुरूपस्य षष्टः हन्त्याग्निमारु
ते अग्नेपरिसमूहने विनियोगः
ओं इमं स्तोम मर्हते जातवेदसे
रथमिव संमहेमा मनीषया भ
द्रा हि नः प्रमतिरस्य संसद्यग्ने
सख्ये मा रिषामा वयं तव ओं भ
रामेध्मं कृणवामा हवींषि ते
चितयंतः पर्वणा पर्वणा वयं।

ॐ वाचवन्मेपन्तवांसाधयाधियोः
क्षेमस्तोमारिषाव यंतव ॐ शाके
म त्वा समिधं साधया धियंते
देवा हरिरदन्त्वाऊतेत्वमादित्या
नावहन्तोस्तु एम स्पेम्रे सख्येमा
रिषामा वयंतव ततस्तान कु
शान् पेशान्यो दिशि प्रादेश
त् ततोऽग्रेः पूर्वतः उत्तरा
स्ताद्दक्षिणांते यावत् उपमूल
ल मूलात् एकपञ्चीकृतान्
कुशान् अग्रेण मूलमाच्छादय
न् वारत्रयमास्तरेत् एवं दक्षि
णस्यां पूर्वान्तान् पश्चिमांतं याव
त् प्रतीच्यां च दक्षिणादुत्तरांतं
यावत् एवम् उत्तरस्यां पश्चिमांता
त् पूर्वांतं यावत् क्रमेणास्तरणा
त् ॐ इन्द्राय लोकपालाय स्वा
हा एवं अग्नये इत्यादि ततः प्रा
देशद्वयप्रमाणं पवखदिर प
लाशोदुम्बराणामन्यतमस्य वि
शाति काष्ठिकां मध्ये हुतस्रुव
दत्वा प्रजापतिं मनसा ध्या
त्वा तस्मिं मध्ये जुहुयात् ।
ततः स्तरणकुशादेव समा
ग्रकुशपत्रद्वयं गृहीत्वा प्र
जापति ऋषिः पवित्रे देव
ते पवित्रच्छेदने विनियोगः

ॐ पवित्रे स्थो वैष्णव्यौ इति
मंत्रे प्रादेशप्रमाणं कृत्वा अ
प्रांतरेण वेष्टयित्वा नखव्य
तिरेकेण छित्वा प्रजापति
ऋषिः पवित्रे देवते पवित्रमा
र्जने विनियोगः । ॐ विष्णोर्म
नसा पूतेस्थः इत्यनेनाभ्युक्ष्य
ताम्रादिपात्रे पवित्रमुत्तराग्रं
निधाय तत्र होमार्थ्यहुते नि
क्षिपेत् ततस्तत् कुशपत्रद्व
यं मध्ये दक्षिणहस्तानामि
काङ्गुष्ठाभ्यां मूले च वाम ह
स्तानामिकाङ्गुष्ठाभ्यां गृहीत्वा
दक्षिणहस्तोपरिभावेनाधो
मुखव्यस्तपाणिः प्रजापतिॠ
षि राज्यं देवता आज्योत्पव
ने विनियोगः ॐ देवस्त्वा स
वितोत्पुनात्वच्छिद्रेण पवित्रे
ण वसोः सूर्यस्य रश्मिभिः
स्वाहा । इत्यनेन कुशपत्रद्वय
मध्येन हुत मध्ये सकृज्जुहुया
त् तस्मींवारद्वयं । ततस्तत् कु
शपत्रद्वयं मध्ये रभ्युक्ष्याग्नौ नि
क्षिपेत् ततस्तस्मात् आज्यपात्रस्योद
केनानुमार्जने अग्रे रूपरि नि
धाने उत्तरस्यां दिशि पवनारण
इत्यमेव वारत्रयं संस्कुर्यात् ।

इत्याज्यसंस्कारः । ततो यव
खदिर पलाशोदुम्बराणां म
ध्यतमस्य अरत्निमात्रे प्रमितो
ङ्गुष्ठपूर्वविलं नासाग्रवत्स
ध्यस्थितमर्थ्यादिस्रुवं इत्यमे
व वारत्रयं संमृज्यात् इति स्रु
वसंस्कारः । एवं स्रुवेनत्रणादि
कं संस्कुर्यात् ततो दक्षिणं
जानु भूमौ पातयित्वा उदकाञ्ज
लिं गृहीत्वा प्रजापति ऋषि र
दिति देवता उदकाञ्जलिसेके
विनियोगः ॐ अदितेऽनुम
न्यस्व इत्यनेनाग्नेर्दक्षिणतः प
श्चिमान्तात् पूर्वान्तं यावदुदका
ञ्जलिना सिंचेत् । ततः प्रजाप
ति ऋषि रनुमति देवता उदका
ञ्जलिसेके विनियोगः ॐ अनु
मतेऽनुमन्यस्व इत्यनेनाग्नेः प
श्चिमतो दक्षिणान्तादुत्तरान्तं या
वदुदकाञ्जलिना सिंचेत् । ततः
प्रजापति ऋषिः सरस्वती देवता
उदकाञ्जलिसेके विनियोगः ॐ
सरस्वत्यनुमन्यस्व इत्यनेनाग्ने
रुत्तरतः पश्चिमान्तात् पूर्वान्तं या
वदुदकाञ्जलिना सिंचेत् । ततः
प्रजापति ऋषिः सविता देवता
अग्निपर्युक्षणे विनियोगः ॐ

देव सवितः प्रसुव यज्ञं प्रसुव
यज्ञपतिं भगाय दिव्यो गंधर्वः
केतपूः केतं नः पुनातु वाच
स्पति र्वाचं नः स्वदतु इत्यनेनो
दकाञ्जलिना दक्षिणावर्तेना
ग्निं वेष्टयेत् । ततो दक्षिणं जानु
न्याच्य उपर्यधः स्थितदक्षिण
वाममुष्टिभ्यां फलपुष्पकुशा
न् गृहीत्वा विरूपाक्षजपं कुर्या
त् परमेष्ठी ऋषी रुद्ररूपोऽग्नि
र्देवता विरूपाक्षजपे विनियोगः
ॐ भूर्भुवः स्वरो महान्तमात्मा
नं प्रपद्ये विरूपाक्षोसि दन्ताञ्जि
स्तस्य ते शय्या पर्णे गृहा अन्तरिक्षे
विमितं हिरण्मयं तद्देवानां हृ
दयान्ययस्मये कुंभे अन्तः संनि
हितानि तानि बलभृच्च बलसा
च्च रक्षतोऽप्रमणी अनिमिष
तः सत्यं यत्ते द्वादश पुत्रास्ते
त्वा संवत्सरे संवत्सरे काम
प्रेणा यज्ञेन याजयित्वा पुनर्ब्र
ह्मचर्यमुपयन्ति त्वं देवेषु ब्रा
ह्मणोऽस्यहं मनुष्येषु ब्राह्म
णो वै ब्राह्मणमुपधावत्युपधा
वामि जपन्तं मा मा प्रतिजापीर्जु
ह्वन्तं मा मा प्रतिहौषीः कुर्वन्तं
मा मा प्रतिकार्षीस्त्वां प्रपद्ये त्वया

प्रस्तुत इदं कर्म करिष्यामि तन्मे
राध्यतां तन्मे समृध्यतां तन्मउ
पपद्यतां समुद्रो मा विश्वव्य।
चा ब्रह्मानुजानातु तथो मा वि
श्ववेदा ब्रह्मणः पुत्रोनुजाना
तु श्वात्रो मा प्रचेता मैत्रावरु
णोनुजानातु तस्मै विश्वपाता
य देवाजये समुद्राय विश्वव्य
चसे तथाय विश्ववेदसे श्वा
त्राय प्रचेतसे सहस्राक्षाय ब्र
ह्मणः पुत्राय नमः। इति जपि
त्वा गृहीतकुशान् प्रागुदीच्यां
दिशि क्षिपेत् फलपुष्पवस्त्रा
दीनि निवेदयेत्। अथ काम्यकर्म
णि कुशंडिका तदा प्राणान् सं
यम्य प्रथमं पुटांजलिः गोत्रप
श्च मे जन्म ब्रह्मा च ह्रीश्च सत्यवा
को धनुस्त्यागाश्च धनिष्ठ धर्मश्च
सत्यं च वाक्च मनश्चात्मा च
ब्रह्मचर्याणि प्रपद्ये तानि मा
मवन्तु। इति जपित्वा पश्चात्
विरूपाक्षजपं कुर्यात्। इति सा
मवेदिनां सर्वसाधारणी कुशं
डिका समाप्ता। इति भवदेवभट्टः
श्रीमत्रघुनन्दनभट्टाचार्यकृ
तसंस्कारतत्वे इदश्च यजुर्वेदि
नां कुशंडिका पशुपतिकृतदश

कर्मपद्धतौ ऋग्वेदिनां कुशंडि
का कालेशिकृतदशकर्मपद्ध
तौ चतुर्थ्यां ॥ अथ कुशंडि
कानन्तरं प्रकृतकर्म कर्तव्यं।
तत्र प्रथमं प्रादेशप्रमाणाग्न
तां समिधं तूष्णीमग्नौ कृत्वा
महाव्याहृतिहोमं कुर्यात् प्र
जापतिऋषिर्गायत्रीछन्दोग्नि
र्देवता महाव्याहृतिहोमे विनि
योगः ओं भूः स्वाहा प्रजापति
ऋषिरुष्णिक्छन्दो वायुर्देव
ता महाव्याहृतिहोमे विनियो
गः ओं भुवः स्वाहा प्रजापति
ऋषिरनुष्टुप्छन्दः सूर्यो देव
ता महाव्याहृतिहोमे विनियो
गः ओं स्वः स्वाहा इति स्रुवेण
ज्याहुतित्रयं दद्यात्। यदि प्र
कृते कर्मणि चरुहोमः स्या
त्तदा आज्यतोपक्रमविहित
त्वात् महाव्याहृतिहोमस्य प्रथ
मे महाव्याहृतिहोमो न कर्त
व्यो तेन कर्मण्य पश्चविहितत्वात्
ततः प्रकृतं कर्म समाप्य पुनर्म
हाव्याहृतिहोमं कृत्वा प्रादेशप्र
माणां समिधं तूष्णीमग्नौ कृत्वा
शाट्यायनहोमादि वामदेव्यगा
नांतं उदीच्यं साधारणकर्मकं।

णीयं। तदभिधीयते। तत्र प्रथ
मं ओं अग्नयेत्यादि अज्ञातककर्म
णि यत् किंचिद्वैगुण्यं जातं त
द्दोषप्रशमनाय शाट्यायनहो
ममहं करिष्ये इति संकल्पं कृत्वा
अग्ने त्वं विधुनामासि इति नामक
रणं कृत्वा पुनः हुत्वा प्रादेश
प्रमाणां समिधं तूष्णीमग्नौ कृत्वा
महाव्याहृतिहोमं च पूर्ववत्।
कृत्वा प्रायश्चित्तहोमं कुर्यात्
प्रजापतिऋषिरग्निर्देवता प्रा
यश्चित्तहोमे विनियोगः। ओं पा
हि नो अग्न एनसे स्वाहा। प्रजाप
ति ऋषिर्विश्वे देवा देवताः प्रा
यश्चित्तहोमे विनियोगः ओं पा
हि नो विश्ववेदसे स्वाहा प्रजा
पति ऋषिर्विभावसुर्देवता प्रा
यश्चित्तहोमे विनियोगः। ओं य
ज्ञं पाहि विभावसो स्वाहा। प्रजा
पति ऋषिः शतक्रतुर्देवता प्रा
यश्चित्तहोमे विनियोगः ओं स
र्वं पाहि शतक्रतो स्वाहा। प्रजा
पतिऋषिरनुष्टुप्छन्दो अग्निर्देव
ता प्रायश्चित्तहोमे विनियोगः
ओं पाहि नो अग्न एकया पाह्युत
द्वितीयया पाहि गीर्भिस्तिसृभि
रूर्जां पते पाहि चतसृभि

र्वसो स्वाहा। प्रजापति ऋषि
र्गायत्रीछन्दो अग्निर्देवता प्रा
यश्चित्तहोमे विनियोगः॥
ओं पुनरूर्जा निवर्तस्व पुनर
ग्न इषायुषा पुनर्नः पाहि अंहसः
स्वाहा। प्रजापति ऋषिर्गाय
त्रीछन्दो अग्निर्देवता प्रायश्चि
त्तहोमे विनियोगः ओं सहरूर्जा
निवर्तस्वाग्ने पिन्वस्व धारया
विश्वप्स्न्या विश्वतः परि स्वाहा
प्रजापति ऋषिरनुष्टुप्छन्दो
अग्निर्देवता प्रायश्चित्तहोमे वि
नियोगः ओं अग्ने ज्ञाते यदज्ञा
ते यज्ञस्य क्रियते मिथुः अ
ग्ने तदस्य कल्पय त्वं हि वेत्थ
यथातथं स्वाहा प्रजापति ऋषिः
पंक्तिछन्दः प्रजापतिर्देवता प्रा
यश्चित्तहोमे विनियोगः ओं प्र
जापते न त्वदेतान्यन्यो विश्वा
जातानि परिता बभूव। यत्
कामास्ते जुहुमस्तन्नो अस्तु व
यं स्याम पतयो रयीणां स्वा
हा ततः पूर्ववदेव महाव्या
हृतिहोमः समित् प्रक्षेपश्च
प्रजापतिऋषिर्गायत्रीछन्दो
अग्निर्देवता महाव्याहृतिहोमे
विनियोगः ओं भूः स्वाहा प्रजा

पतिर्ऋषिरुष्णिक्छन्दो वायुर्दे
वता महाव्याहृतिहोमे विनि
योगः ॐ भुवः स्वाहा प्रजाप
तिर्ऋषिरनुष्टुप्छन्दः सूर्यो दे
वता महाव्याहृतिहोमे विनि
योगः ॐ स्वः स्वाहा ॥ ततो
नवग्रहहोमः। ॐ आकृष्णे
न रजसा वर्त्तमानो निवेशय
न्नमृतं मर्त्यं च हिरण्ययेन स
विता रथेना देवो याति भुवना
नि पश्यन् स्वाहा ॐ आप्याय
स्व समेतु ते विश्वतः सोम वृष्ण्यं
भवा वाजस्य संगथे स्वाहा ॐ
अग्निर्मूर्द्धा दिवः ककुत्पतिः
पृथिव्या अयं अपां रेतांसि जि
न्वति स्वाहा ॐ अग्ने विवस्वदुष
स श्चित्रं राधो अमर्त्य आ दाशु
षे जातवेदो वहा त्वमद्या देवां
उषर्बुधः स्वाहा ॐ बृहस्पते
परि दीया रथेन रक्षोहामित्रां
अपबाधमानः प्रभञ्जन् से
नाः प्रमृणो युधा जयन्नस्माक
मेध्यविता रथानां स्वाहा ॐ
शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरू
पे अहनी द्यौरिवासि विश्वा हि
माया अवसि स्वधावन् भद्रा
ते पूषन्निह रातिरस्तु स्वाहा ॐ

शन्नो देवीरभिष्टय आपो भवन्तु
पीतये शंयोरभिस्रवन्तु नः स्वा
हा ॐ कया नश्चित्र आभुवदू
ती सदावृधः सखा कया श
चिष्ठया वृता स्वाहा ॐ केतुं
कृण्वन्नकेतवे पेशो मर्या अपेश
से। समुषद्भिरजायथाः स्वाहा
ततः इन्द्राद्यष्टलोकपालहोमं
प्रत्यक्षदेवताहोमं च कृत्वा ह
स्ताङ्गुलप्रादेशप्रमाणां समिधं
तूष्णीमग्नौ हुत्वा उदकाञ्जलि
सेकं कुर्यात्। प्रजापतिर्ऋ
षिः सविता देवता अग्निपर्यु
क्षणे विनियोगः ॐ देव सवि
तः प्रसुव यज्ञं प्रसुव यज्ञपतिं
भगाय दिव्यो गन्धर्वः केतपूः
केतं नः पुनातु वाचस्पतिर्वा
चं नः स्वदतु। अनेनोदकाञ्ज
लिना दक्षिणावर्त्तेनाग्निं वेष्टये
त्। प्रजापतिर्ऋषिरदितिर्देवता
उदकाञ्जलिसेके विनियोगः ॐ
अदितेऽनुमन्यस्व अनेनाग्नेर्दक्षि
णतः पश्चिमान्तात् पूर्वान्तं याव
दुदकाञ्जलिना सिञ्चेत्। प्रजापति
र्ऋषिरनुमतिर्देवता उदका
ञ्जलिसेके विनियोगः ॐ अ
नुमतेऽनुमन्यस्व अनेनाग्नेः

533

पश्चिमतो दक्षिणान्तादुत्तरान्तं
यावदुदकाञ्जलिना सिञ्चेत्।
प्रजापतिर्ऋषिः सरस्वती देव
ता उदकाञ्जलिसेके विनियो
गः ॐ सरस्वत्यनुमन्यस्व अने
नाग्नेरुत्तरतः पश्चिमान्तात् पू
र्वान्तं यावदुदकाञ्जलिना सि
ञ्चेत्। ततः उत्तानहस्तद्वयेन
कतिपयास्तरणकुशान् गृ
हीत्वा प्रजापतिर्ऋषिर्ब्रह्मा देव
ता दर्भास्तरणाभ्यञ्जने विनियो
गः ॐ अक्तं रिहाणा व्यन्तु वयः
अनेनाग्रमध्यमूलानि घृतेना
भ्यनक्ति वारत्रयमेवमग्रे वारत्र
यमेव पठनीयः ततस्तानग्नौ कु
शान् क्षिपेत् स्रुवं प्रजापतिर्ऋ
षिरनुष्टुप्छन्दो रुद्रः पशुपतिर्दे
वता दर्भाञ्जलिकाहोमे विनि
योगः ॐ यः पशूनामधिपती
रुद्रस्तन्तिचरो वृषा पशूनस्मा
कं मा हिंसीरेतदस्तु हुतं तव
स्वाहा अनेनाग्नौ क्षिपेत् ततः
अग्नेस्त्व मदनामासीति नामकृ
त्वाग्नेयमाल्यवस्त्रनोहुत्वैरग्नि
मभ्यर्च्य प्रजापतिर्ऋषिर्विराट्
छन्द इन्द्रो देवता यशस्कामस्य य
जनीयप्रयोगे विनियोगः। ॐ

पूर्णाहोमं यशसे जुहोमि यो
स्मै जुहोति वरमस्मै ददाति
वरं वृणे यशसा भामि लोके
स्वाहा अनेन पूर्णाहुतिं दद्या
त्। ततो ब्रह्मणे पूर्णपात्रादि
दक्षिणां दत्वा होमदक्षिणां च
कुर्यात् ततः प्रदक्षिणेन दक्षि
णं देशं गत्वा ब्रह्मग्रन्थिं मुक्त्वा
प्रत्याहृत्यासने पुनरुपविश्य
कुशाङ्गुष्ठमध्यसहितजलपात्रे हु
त्वा निधाय महावामदेवऋषि
र्विराड्गायत्रीछन्द इन्द्रो देवता
शान्तिकर्मणि जपे विनियोगः
ॐ कया नश्चित्र आभुवदूती सदा
वृधः सखा कया शचिष्ठया वृ
ता ॐ कस्त्वा सत्यो मदानां मंहि
ष्ठो मत्सदन्धसः दृढाचिदारु
जे वसु। ॐ अभीषुणः सखीना
मविता जरितॄणां शतं भवास्यू
तये। ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः
स्वस्ति नः पूषा विश्ववेदाः स्वस्ति
नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृ
हस्पतिर्दधातु। एता ऋचो गीत्वा
शान्तिं कुर्यात्। गानाशक्तौ प
ता एव ऋचः त्रिराहुस्या पठेदि
ति ततो दक्षिणां दत्वा अच्छिद्रा
वधारणं कुर्यात् इति सर्वक

मीसाधारण मदीचं कर्म स
मासं कुष्ठ ग निष्कर्ष ग
कुस्माति चुकोष। निष्कर्ष
इयत्तापरिच्छेदः। तुलैरवज्ञ
स्मातीति वोपदेवः निष्कर्षो
ऽस्तः प्रकाशन मिति गोविंद
भट्टः। ततो ऽकुस्मात् हयग्रीव
कुट्टः प्राणानववनीकस्मा मि
तिभट्टो अनेकार्थत्वात् निष्का
यणार्थः। इति दुर्गादासः॥
कुष्ठं क्ली ओषधविशेषः कु
ट्ट इति भाषा तत्पर्यायः। ग
दाकं २ गदाह्वयं २१ कौबेरं
२२ भास्वरं २३। इति शब्दरत्ना
वली॥ काकलं २४ नीरुजं
२५ इति जटाधरः। कुष्ठ रोग
कृयं वाप्य पारिभव्यं तथोत्
पलं। कुष्ठमुक्तं कटु स्वादुष्णु
कलं तिक्तकं लघुः। हंति
वातास्रवीसर्पकासकुष्ठमरु
त्कफान्। अथ कुष्ठभेद
पुष्करमूलं उक्तं पुष्करमूले
न पुष्करं पौष्करंच तत्पद्म
पत्रंचकश्मीरं कुष्ठभेद मिदं
जगुः पौष्करं कटुकं तिक्तं
मुष्णं वात कफ ज्वरान्।
हंति शोथारुचि श्वासान् वि

शोषान् पार्श्वशूलनुत्॥ इति
भावप्रकाशः॥
कुष्ठः पुं स्वनामख्यातरोगः
तस्य निदानं पूर्वलिखितं।
औषधं यथा सर्वकुष्ठेषु वम
नरेचनं रक्तमोक्षणं। वचा
वासा पटोलानां निंबस्य फ
लिनीत्वचः कषायो मधुना
पीतो वान्तकृत्स्मरणो वितः
विरेचनं प्रयोक्तव्यं त्रिवृद्दंती
फलत्रिकैः मनःशिला म
रीचानि तैलमर्कपयो हरेत्
सर्वकुष्ठानुलेपो ऽयं शिवाप
च गुडोदकं॥ करंजैडगजो
कुष्ठगोमूत्रेण प्रलेपनः॥
करवीरोद्वर्तनेनच तैलाकस्य
तु कुष्ठहृत् हरिद्रा मलयं
रास्ना गडूच्येडगजस्तथा आ
रग्वधः करंजश्च लेपः कुष्ठ
हरः परः मनःशिला विडं
गानि वाकुची सर्षपस्तथा।
करंजो मूत्रपिष्टोऽयं लेपः कु
ष्ठहरोऽर्कवत् विडंगैडगजाकु
ष्ठ निशा सिंधुत्थ सर्षपैः मूत्रां
बुपिष्टोलेपोऽयं दद्रुकुष्ठविना
शनः॥ प्रपुन्नाटकबीजानिधा
त्री सर्जरसः स्नुही सौवीरपि

ष्टं द्रदुलप मेतद्द्वर्तनं परं॥
आरग्वधस्य पत्राणि आरना
लेन पेषयेत्। दद्रु किट्टिमकु
ष्ठानि हंति सिध्मानमेवच॥
अल्पापीतावाकुची चकुष्ठजित्
क्षीरभोजनः। तिलाज्यं त्रिफला
तोद्र व्योष भल्लातक शर्कराः।
वृष्यः समस्यो मेध्यः कुष्ठह
कामचारिणः विडंगा त्रिफला
कृष्णा चूर्णं लीढं समाक्षिकं हं
ति कुष्ठं कृमीन्मेह नाडीव्रणभ
गंदरान्। यः खादेदभयारिष्टा
मलकानि तथा निशा। स जये
त्सर्वकुष्ठानि मासाद्दर्ध्वं न संश
यः दह्यमानाच्युतः कुंभे मूल
गोक्षुरादिसांकुरः सात्तथा क्षीरस
दो दद्यात्कुष्ठरसायनं। पा
शीरखदिरयोः क्वाथं पीत्वा वल्गु
जसंयुतं शार्ङ्गेष्टपवलं क्षिप्रं र
त्तिलेन न संशयः। पीत्वाभ
ल्लातकं तैलं मासमव्याधिर्भवे
न्नरः सेवितं खादिरं वारि पाना
द्यैः कुष्ठमिनिश्चेत्। वासा गुडूची
त्रिफला पटोलंच करंजकैः॥
निम्बासनं कृष्णवेत्रं क्वाथक
ल्केन ययुतं। वज्रकं तद्घरेत
कुष्ठं शान वर्षाणि जीवति स्व

रसेन च हरीतक्याः पचेत्तैलं चत
र्गुणं। कच्छू विचर्चिका पामा
अभ्यंगादेव नश्यति॥ [illegible]
के कुष्ठानि लवणानिच मसूरकं
गंडोरिका चित्रकैस्तैः सैलं कुष्ठ
व्रणादिनुत् इति गारुडे १७५
अध्यायः कुष्ठेदयव सिद्धार्थ
निशा हरीच कुष्ठजिन्। इति
तत्रैव १७६ अध्यायः करवीरं
भृंगराजे लवणं कुष्ठमर्दकं।
चतुर्गुणेन मूत्रेण पचेत्तैलं रे
चनं। पामा विचर्चिका कुष्ठम
भ्यंगाद्धि व्रणानि वै। इति सैंध
वं च विडंगानि सोमराजीन्तस
र्षपाः रजनी द्वे विषा चैव गोमूत्रे
ण च पेषयेत्। कुष्ठनाशस्य
नतद्वेपा त्रिवपन्नादनात्तथा।
इति च गारुडे १८० अध्यायः
सप्तकं काशमूलं वा वाकुची
मूलमेव वा कांजिकेन च वा
कुच्या मूलं वै कुष्ठरोगनुत्।
इति गारुडे १८८ अध्यायः पी
तेद्ध्वक्षिकमूलेन पर्युषितं ज
लेन वै सार्द्धं विनाशयेद्द्वाहमेरं
च परमेश्वर शिवायाचैव तद्ध
द्धभवेद्देकाह्निकादिनुत्। पत
लकांजिके पीते वातकुष्ठज्वरा

दिव्रुत । इति गारुडे १९३ अ
ध्यायः । निम्ब निंबदलानांच
चूर्णमामलकस्य च प्रसये
भक्षयेन्नैव नस्य कुष्ट विनश्य
ति हरीतकी विडंगंच हरिद्रा
सितसर्षपाः । सोमराजस्य ।
वीजानि करंजस्य च सैंधवं ॥
गोमूत्रपिष्टान्येतानि कुष्ट
रोगहराणिच वीजानिस्या
त्ममूलानिवा पाठः । इतिग
रुडे १९४ अध्यायः चंदनं कुं
कुमंमांसी कर्पूरो जातिपत्रि
का जाती कक्कोल पूगानां
लवंगस्य फलानिच अगुरु
शीरकस्तूर्य्यः कुष्ट नगरना
लिका गोरोचनाप्रियंगुश्चवो
लं मदनकं नखं सरलःसम
पर्णश्च लालाचामलकीतथा
कट्फलः पद्मकंच पनेसैलं
प्रसाधितं प्रस्वेदमलदोर्गंध्य
कंडुकुष्टहरेपरं इतिगारुडे १९५
अध्यायः ॥ अथ वैद्यकम
ते कुष्टचिकित्सा आह वातो
त्तरेषु सर्पिर्वमनं श्लेष्मोत्तरेषु
कुष्ठेषु पित्तोत्तरेषु मोक्षोरक्त
स्य विरेचनं श्रेष्ठं पुराणधा ।
न्यानिच जांगलानिमांसानि

मुद्गाश्च पटोलयुक्ताः । यवार
यश्चात्रहिताः पुराणा सुना
नि शाकानि च तिक्तकानि ।
तेषीनरे । पुराणाः शालिगो
धूम मुद्गयाः कुष्टिनोहिताः
तिक्तशाकं जांगलंच पथ्यान्हे
खदिरोदकं । येलेपाः कुष्टानां
प्रयुज्यंते निर्गतास्रे दोषाणां ।
संशोधिताशयानां सद्यः सि
द्धिर्भवेत्तेषां हरीभया सैंधव
चक्रमर्द कुठेरकाः कांजिकेन
कपिष्टाः । एभिः प्रलेपैः पिव
द्रुमूलाकरुणवरदंडं चनिवार
येति ॥ तस्योरसः शालनतो
लषेण सचक्रमहौषधः भया
विमिश्रः । पानीयमुक्तेनतद
त्रपिष्टो लेपः कृतो दद्रु गजे
द्रसिंहः ॥ विडंगैडगजाकुष्ट
निशा सिंधुत्थ सर्षपैः । धान्या
म्लपिष्टैर्लेपोऽयंदद्रुकुष्टविना
शनः । पंडुगजकुष्टसैंधव सौ
वीर सर्षपैः क्रिमिघ्नैः क्रिमिसि
ध्मदद्रुमण्डलकुष्टानां नाश
नो लेपः ॥ चर्णानि पिष्ठाच
तरे गुलस्यतक्रेण पर्णांम्यथ
काकमाच्याः तैलाक्तगात्रस्यत
रस्य कुष्टान्यतैहीयेरस्य हनक्षरैश्च

॥५॥ विडंगसैंधव शिवाशाग्निरे
खा सर्षप करंज रजनीभिश्च ।
गोजल पिष्टो लेपः कुष्टहरो दि
वसनाश्यसमः ६ कासमर्द्दक
मूलंच कांजिकेन प्रपेषितं ।
दद्रु किटिम कुष्टानि जयेदेतत्
प्रलेपनात् ७ आरग्वधस्य पत्रा
णि आरनालेन पेषयेत् । दद्रु
कटिम कुष्टानि हंति सिध्मान्
मेवच ८ चक्राकृय स्नुहीक्षीरे
भावितं मूत्रसंयुतं । रविनम
हि किंचित् लेपनं किटिमाप
हं ९ शिखरीरसनेसुपिष्टंमू
लकवीजं प्रलेपनः सिध्म । ता
रेणवा कदल्या रजनी मिश्रो
नाशयति ॥ १० ॥ ११ ॥ ।
सत्तारं गंधकं लेपात् कटुतैल
न सिध्मजित् । कासमर्द्दकवी
जानि मूलकानां तथैवच १२ ॥
१३ ॥ गंधश्च चूर्णमिश्राणि सिध्म
नां परमौषधं । उपदेशानतकां ।
जिकपिष्टैर्लेपः १४ गंधपाषाण
चूर्णेनयवक्षारेणलेपितं सिध्मं ।
नाशंव्रजत्याशु कटुतैलेनचेत्र ॥
हयेसमं कटुतैलेन लेपः १५ कुष्ट
मूलकवीजं प्रियंगवः सर्षपास्त

था रजनी पतनकेशारयष्टिर्निरं
निवकुवार्षिकं सिध्म १६ नीलकु
रुण्टकपत्रैरालिप्यगात्रमति
वकुष्टाः लिप्सन्मूलकवीजैः
पिष्टैस्तक्रेण सिध्मनाशाय १७
पंडुगजा तिल सर्षप कुष्ट मा
गधिका लवणत्रय मस्तु पूति
कृतं दिवसत्रय मेतद्धंति विच
र्च्चिक दद्रुककुष्ट १८ सिंहरम
रिच चूर्णं महिषीनवनीतसं
युतंवकुष्टाः लेपात्रिहंति पा
मां तैलं करवीरसिद्धं वा १९ २०
पारदं शंख गंधंच शिलाचोग्र
रवारुणी प्रपुन्नाडश्च सर्पावि
मेचनाशाग्नि लांगली उग्रवा
रुणी शाखालपाषा इतिख्या
ता भल्लातं गृहधूमंच मनिगे
जोस्तु हीपयः । अरिष्टंच गुडः
दोर्द्द वाकुचीवीजनल्पकं गो
मूत्रै शारनालेर्वा पिष्टा लेपं
च कारयेत् दद्रु मंडल कं
डुंच विचर्च्चिंच विनाशयेत्
२१ ॥ मनःशिलालेमरिचं
च तैलमार्कं पयः कुष्टहर ।
प्रलेपः २२ विषवकुणहरिद्रा
चित्रकागारधूम मनल मरिच
हरीतकी रमर्कस्नुही भ्या दहति

पतितमात्रान् कुष्ठजाती र
शेषाः कुलिशमिव सरोषा।
क्षुद्रकुष्ठादिमुक्तं अथ अनन्त
भल्लातकः ३३ भल्लातकाद्वी
पि सधार्कमूलं गुञ्जाफलत्र्य
षणशंखचूर्णं तुत्थं सकुष्ठं।
लवणानि पंच द्वार हरिद्रे लांग
लिकां च पक्त्वा स्नुक्कर्कपयः
सुधनमायसस्थ पलाशकाष्ठेनाहि
तधीतलेपं कुष्ठकिलासतिल
कालकेव अशेषहत्त्वामसच
मकीले भल्लातका द्वीपिवि
नकेतन्मूलं पक्षं समभागमूत्र
र्णं क्षिप्तार्कयोः द्वीरे दत्वा किं
चित् पाकं कुर्यात् अपवा द्वी
रवृक्षवृन्तश्रेणिचूर्णपादिकं।
लेपयोग्यं पाकं कुर्यात्। शाला
कया कुष्ठस्थाने दद्यात् ३४॥
स्नुकूकाण्डशिरीषश्यामा
रूप्यमंससैंधवं। अनुर्ध्वमनै
लयुक्तं लेपाद्धंति विचर्चिकां
सिजनलके सैंधवगृहधूमं स
मभागं मण्डपस्थालम्भं गरहत्वा
पाशवेण पिधाय दग्ध्वा पिष्ट्वा कटु
तैलेन लेपः ३५ स्नुकूकोर संधया
तकल्कः कुकुलान्नपाचितः
लेपाद्विचर्चिकां हन्ति रागवेगरव

त्रपां॥ सिजनलके गाईकल्कं प्रप
ख्यं मुक्त गोमयाग्नौ दग्ध्वा कटुतै
लेन लेपः ३६ नारिकेलोदरेत
स्त्रं स्नुण्डुलः पूतितो गतः
लेपाद्विपादिकां हन्ति चिर
कालानुवेधिनी ३७ तिलकु
सुमलवणं गोजल कटुतैल
लोहभाजने कृत्वा शोषितम
कैमयूखैः पादस्फुटने निर्हंति
लेपेन ३८ उन्मत्तकस्य बीजेन
मानकक्षारवारिणा। कटुतै
लं विपक्वं शीघ्रं हंति विपादि
कां॥ कटुतैलं शं ४ माणनाल
पञ्चाङ्गदारपल ६४ जलशं २४
शेष शं १६ कल्क धुस्तूर बीज
पल ८। उन्मत्ततैलं॥ ३९॥ अ
वल्गुजं काममर्दं च चक्रमर्दं नि
शायुगं। माणिमंथं च तल्यां
शं मस्तु कांजिकपेषितं॥ क
ण्डुकच्छूजयत्याशु सिद्धं प्रथम
योगराट् ४० कोमलं सिंहास्य
लेसनिशा सदशीजलेन पिष्टं।
दिवसत्रयंमनिषधं तपयति
कच्छूं विलेपनतः॥ ४१॥ वा
यसेश्वरगजा कुष्ठ कृत्या भि गु
डिका कृत्वा वस्त्रमूत्रेण सपि
ष्टा लेपाद्श्वित्रविनाशिनी॥।

539

समभागचूर्णं छागमूत्रेण पिष्ट्वा
गुडिका कार्या। तेनैव लेपः॥
४२॥ प्रतिकार्कस्नुक् नेरंडदु
माणांमूत्रैः पिष्टा पल्लवाः सो
मनाख्या। लेपाच्छ्वित्रं हंति दद्रु
व्रणांश्च॥ सोमनो जाती पत्री
सर्वेषां पल्लवान् गोमूत्रेण
पिष्टा लेपो देयः ४३॥ गज
विप्रव्याघ्रचर्म मसी तैल वि
लेपनात्। श्वित्रं नाशं व्रजेत
किम्वा पूतिकीटविलेपनात्
गजचर्म विप्ररोमव्याघ्रचर्म।
अनयो भस्म कटुतैलेन लेपः
अथवा पाडडियाकीट पि
ष्टा लेपः॥ ४४॥ ४५ कडवो
वल्गुजवीजात् हरितालचत
र्थभाग संमिश्रः। गवां मूत्रेण
पिष्टः स्ववर्णकरणः परंश्वि
त्रे आयुर्वेदसारे पि। कडवो।
वाकुचीवीजात् हरितालपला
चितः। गवां मूत्रेण संपिष्य ले
पनात् श्वित्रनाशनं॥ ४६॥
धात्री खदिरयोः काथं पीत्वा
वमधुसंयुतं। शंखकुन्देन्दुधव
लं ज्येयाच्छ्वित्रमसंशयः ४७॥
धात्रीखदिरयोः क्वाथमवल्गुज
रजो ३ श्वित्रे॥ पीत्वा पा।

खेदकुन्दाभं हंति श्वित्रं न संशः
यः ४८॥ द्वारे सदस्ये गज
लण्डजे च गजस्य मूत्रेण च
कुष्ठनेच। द्रोण प्रमाणे दश
भागयुक्ते दत्वा पचेत् बीज
मवल्गुजस्य पतघदा चिक्क
णता मुपैति तदा सुसिद्धां गु
डिकां प्रकुर्यात्। श्वित्रे प्रलि
प्ते दश्नतेन कृष्टे तदाव्रजन्ता
शु स्ववर्णभावं ४९॥ श्वेत
जयन्तीमूलं पीतं पिष्टं च पय
सैव। श्वित्रं निहंति नियतं रवि
वारे वैद्यनाथाज्ञा ५०॥ गुंजा
फलाग्निचूर्णेन लेपितं श्वे
तकुष्ठनुत्। शिलापामार्गभ
स्मापि लिप्ता श्वित्रं विनाशये
त् ५१॥ ५२॥ पवाडतलसीवीज
वाकुची चक्रमर्दकं तिलकौ
यानकौवीजेतस्माको ठस्यवी
जकं गोमूत्र दधि दुग्धेश्च प
वेदयाजमूत्रकैः। कल्कं दत्वा
शिला काष्ठी पथ्या कुष्ठविडं
गाकं कटुतैलेच तल्लेपाद्य
द्योद्धद्वौ विलेपनैः पवानन
सिंदतेलं श्वेतकुष्ठकुलापह
कटुतैलशं ४ कफ्यपरं उवी
जादीनां मिलित्वा शं २ कल्क

शलाकाश्यपादीनां मिलित्वा शं १
श्वित्रे पंचाननतैलं ४२॥ आरग्व
धं वधं कुष्ठं हरितालं मनःशि
ला। रजनीद्वयसंयुक्तं पचेत्तै
लं विधानवित्॥ एते नाभ्यं
जनादेव क्षिप्रं श्वित्रं विनश्य
ति। तिलतैल शं ४ पा शं १६
कल्क मिलित शं ५। आर
ग्वधाद्यं तैलं ४४ मुद्रस
ते समं गंधं त्रिफला भृंग
वाकुची। भल्लातकं तिलः
कुष्ठा निंबबीजं समं समं।
मर्दयेद्भृंगराजद्रावैः शोषये
च्च पुनः पुनः इत्यं कुष्ठानि
समाहरसः श्वेतारिको भवेत्
मध्वाज्यैर्निष्कमात्रेण खादेत्
श्वेतं विनाशयेत् श्वेतारिः ४५
पिबति सकटु तैलं गंधपाषा
णचूर्णं रविकिरणसंतप्त
पामनो यः पलार्द्धं त्रिदिन
तरचुसिक्तः क्षीरभोजी च शी
घ्रं भवति कनकदीप्तिः काम
रूपी मनुष्यः ४६ तीव्रेण कु
ष्ठेन परीतदेहो यः सोमरा
जीं नियमेन खादेत् संवत्स
रं कृष्णतिलद्वितीयां स सोम
राजीवपुषातिशेते॥४७॥

चर्मसेवी करञ्जस्नेन वारिणा वा
गुञ्जीं पिबेत्। क्षीरभोजी च स
माहात् कुष्ठी कुष्ठं व्यपोहति।
४८ अवल्गुजबीजकर्षं पीत्वा
कोष्णेन वारिणा॥ भोजनं स
र्पिषा कार्यं सर्वकुष्ठविनाशनं
छित्त्वा यास्वरसो वापि सेव्यमा
नो यथाबलं जीर्णे हृतेन भु
जीत मुद्गयूषौदनेन च याप
यन्निवारी सोपि दिव्यरूपी भवे
न्नरः ५० यः खादेदभयारिष्ट
मरिष्टामलकानि वा। सजये
न्सर्वकुष्ठानि मासाद्दहेन्नस
शयः ५१॥५२ निंबस्य पत्रं
मूलानि सत्वकं पुष्पफलानि
च चूर्णितानि हन्ते तोद्रसंयु
तानि दिने दिने॥ स्निग्धान्नपिबे
द्गोमूत्रेण संयुक्तमुग्दकेन
वा मदिरामलकितोयेन पयसा
वा यथाबलं भुंजीत च हृतेनयूषा
द्यैः शाल्यन्नं पयसा पिबा सर्वकु
ष्ठविसर्पार्शोनाडीदुष्टव्रणानपि
कामलां च मदान् स्वास्तथापि
तकफास्त्रजान् संवत्सरप्रयोगे
ण सर्वत्वज्जविवर्जितः जयते
तत् पंचनिम्बं रसायनं मनुजमे
पंचनिम्बं॥५२॥ पुष्पकाले।

च पुष्पाणि फलकाले फलानि
च संचूर्ण्य पिचुमर्दस्य त्वङ्मूला
नि दलानि च। द्विरंशानि समा
न्यं भागिकानि प्रकल्पयेत्
त्रिफला त्र्यूषणं ब्राह्मी श्वदंष्ट्रा
रुष्करामिकाः विडंगसारवारा
ही लोहचूर्णमिताः समाः। ह
रिद्राद्वयावल्गुज व्याधिघाताः
सशर्कराः। कुष्ठेन्द्रयवपाठाश्च
चूर्णं वाचूर्णीसंयुते खदिरासन
निंबानां च घनक्वाथेन भावयेत्॥
सप्तधा पंचनिंबच मार्करसेन
तेन च स्निग्धशुद्धतनुर्धीमान्
योजयेच्च शुभे दिने॥ मधुना
तिक्तकविषा खदिरासनवारि
णा सेव्यमस्तु नावापि कोल
वृद्ध्या पलं पिबेत् तिक्तकविषाव
समाप्य पंचतिक्तं हृतेन जीर्णे
च भोजनं कार्यं स्निग्धं लघु हितं
चयत् विचर्चिकोदुंबर पुंडरीक
कपालदद्रु किटिभालसादि॥
शतारुविस्फोटविसर्पपामाकु
ष्ठकोपं विविपं किलासं। भग
दरं श्लीपद वातरक्तं जठरं घ्नताडी
व्रणशीर्षरोगान् सर्वप्रमेहान्
प्रदरांश्च सर्वान् दंष्ट्राविषं मूल
विषं निहंति स्थूलोदरः सिंह

कृशोदरश्च सक्लिष्ट संधि
मधुनोपयोगात् समोपयो
गादपि ये दशन्ति सर्पाद
यो याति विनाश मात्म जीवे
च्चिरं व्याधि जराविमुक्तः शु
भेरत्नश्च इन्दुसमानकांतिः पं
चनिंबः ५४ अमृतानागः पलश
तं दशमूलपा स्तथापाते पाठा
मूर्वा वलातिक्ता दार्वी गंधर्वहरू
स्तकाः पर्पटश्च पलान् भागा
न् विभीतकाः शतं हरेत् द्वेश
ते च हरीतकी आमलकास्त
थाशतं जलद्रोणद्वये पक्त्वा
अष्टभागावशेषितं प्रस्थं गुग्गु
लु मापूतप्रस्थार्द्धं चहृतेन पचे
त् पाकसिद्धे प्रदातव्यं गुञ्जाः
तत्वमेवच पलद्वयंतथाष्टं
याः पिप्पल्याश्च पलद्वयं तेता
मात्रां प्रयुंजीत ममाताद्दोषब
लाबलं अष्टादशसु कुष्ठेषु
वातरक्तगदेषु च कामलामा
म वाते च अग्निमांद्यं भगंदरं॥
पीनसं च प्रतिश्यायं सीहानं
मुदरं तथा पलाग्रामाभिहन्ता
शुभास्करस्तिमिरं यथा अम
तागुग्गुलुः अयं वातरक्तप्रश
मः ५५ निंबामृता हषपटोल

संशोष्य वर्त्तीं कुर्यात् तां तैला
क्तां संदंशिकया ज्वालयित्वा
उपरि तैलं दत्वा ततः पतितं
तैलं अधः पात्रे गृह्णीयात् कु
ष्ठस्थाने दद्यात् कुष्ठकालान
लतैलं ॥८९॥ सिन्दूरामृत ताल
गैरिक हलाजाजी गरस्नुषाणो
हृत् पाषाण रसोन बाण टङ्क
न स्नुग्यर्कदुग्धे र्निशा। राजी
गंधक शिग्रुभिः परिमितैः म्
त्रा पचेत् सार्षपं तैलं मस्य
मितं हृतस्य कुडवं पात्रं तथा
कोद्रसं ॥ हृत् पाषाणं मनः
शिला गोमूत्रंच तथा विनीय
सकलं पूतं प्लुतं रोगिणे दद्या
त् कुष्ठ विचर्चिकादिषु भिषः।
कृ नाम्ना तु षड्बिन्दुकं। षड्बिन्दु
तैलं ॥९१॥ सर्वकुष्ठे सर्वव्रणे
सर्वत्र गलितेष्वपि ॥ नक्त मा।
लेहरिद्रे द्वे अर्कं तगर मेवच
करवीर वचा कुष्ठ आस्फोता र
क्तचंदनं मालती सिंधुवारंच
मंजिष्ठा सप्तपर्णकं पृथामर्द
पलान् भागान् विषस्य द्विप।
लं तथा। चतुर्गुणे गवां मूत्रे तै
लप्रस्थं विपाचयेत् श्वित्र विस्फो
ट किटिम कीट लूता ॥
विचर्चिकाः ॥ कण्डु कच्छु वि
कायाश्च ये व्रणा विषदूषिताः
ते सर्वे नाशमायान्ति तमः सूर्यो
दये यथा ॥ विषतैलं मिदं ना
म्ना सर्वव्रण विशोधनं। विष
तैलं ९२ सोमराजी हरिद्रे द्वे
सर्षपाः कुष्ठ मेवच। करंजैड
गजबीजं पत्राण्यारग्वधस्य
च विपचेत् सार्षपं तैलं नाडीदु
ष्टव्रणापहं। अनेनाशु प्रणा
श्यन्ति कुष्ठान्यष्टादशैवतु ॥ नी
लिका पिडका व्यंगा गंभीरं वा
तशोणितं कण्डु कच्छु प्रशम
नं दद्रुपामा निवारणं सोमरा
जी तैलं ॥९३॥ सोमराजीतुला
क्वाथ्येत्तथा दद्रुहन्तस्य च। गोमू
त्रस्य तथा पात्रे कल्कं दत्वा विच
क्षणः। विपचेत् कार्षिकै र्भागैः
कुष्ठतैलाष्टकं भिषक्। चित्र
कं लाङ्गलाख्यां च नागरं कुष्ठ
मेवच हरिद्रा नक्तमालंच ह
रितालं मनः शिला। आस्फो
तार्क करवीरं सप्तपर्णीच गो
मयं खदिरो निंबपत्रंच मरि
चं कासमर्दकं एतानि समं पिष्ट्वा
नि कल्कं दत्वा विचक्षणः हन्ति स
र्वाणि कुष्ठानि क्रिमि दुष्टव्रणानि

च किटिमं दद्रुजातं च गात्रवैव
र्ण्य मेवच विशीर्णचर्म मांसादि
दग्धीकुरणमुत्तमं । पामारोगं
तथा कंडुं विसर्पं हन्ति दारुणं
प्रचान्ये त्वग्गतारोगास्तांस्तंश्री
घ्रं व्यपोहति हन्सोमराजी तै
लं ॥६४ मरिचालशिलाहार्क
पयोः स्यादिजटाविहत । शाक
द्रुमं विशाला रुकूनिशायुक्
दारुचंदनैः ॥ कटुतैलात्पचे
त्प्रस्थं द्वाद्दे त्सदभ्यगाहद्रुश्वि
त्रविनाशनं सर्वदुष्टवि ऊष्ट
घ्न तैलमेतत् प्रशस्यते मरि
चाद्यतैलं ६५ मरिचे त्रिवृता
दंती क्षीरमार्कं शकृद्रसः देव
दारु हरिद्रे द्वे मांसी ऊष्टंसचं
दनं विशाला करवीरं च हरि
तालंमनः शिला । चित्रको
लांगलाख्यश्च विडंगं चक्रम
र्दकं शिरीषं ऊटजो निम्बः स
प्तपर्णः स्नुहाम्रता शम्पाको
नक्तमालोः खदिरं पिप्प
ली वचा ॥ ज्योतिष्मती च
पलिका विषस्य द्विपलं भ
वेत् । आटकं कटुतैलस्य
गोमूत्रं च चतुर्गुणं मृत्पात्रे
लोहपात्रे वा शनै र्मद्वग्निना

पचेत् पक्वा तैलवरं तेनाभ्य
येत् ऊष्टकान् व्रणान् ॥ पामवि
चर्चिका दद्रु कण्डु विस्फोटका
निच । वलयः पलितं छाया न
ली व्यंगं तथैवच ॥ अभ्यंगेन प्र
शमंति सौकुमार्यं च जायते । प्र
थमे वयसि स्त्रीणां यासां नस्य
तु दीयते ॥ यदा मपि जरां प्राप्य
न स्तना यांति नम्रतां । वली
वर्द्दः स्तुरंगो वा गजो वा वायु
पीडितः ॥ त्रिभिरभ्यंजनैर्गाढं
भवेन्मारुतविक्रमः । कटु तैल
९८ शेर गोमूत्र ३४ प्रोरकल्का
र्थं मरिचादीनां प्रत्येकं १ पल
विष २ पल । बृहन्मरिचाद्यं
तैलं ॥६६॥ सप्तपर्णं स्तथाका
ली गुडूची पिचुमर्दकं । शिरीषं
च महानिंबा जयन्तावीसगाद
नी ॥ काली कालियालता ॥ नि
शा दश पलान् भागान् जलद्रो
णे विपाचयेत् । तैलप्रस्थं समा
दाय गोमूत्रं च चतुर्गुणं ॥ आर
ग्वधो भृंगराजो जया धूस्तूरा
त्रयः । इंद्राशनाग्नि खर्जूरं गो
मयार्कं स्नुहीक्षुरं ॥ तैलतुल्य
प्रदातव्यं स्वरसं च पृथक् पृथ
क् । महाकाल वचा व्राली तथ

ग्रिहरुधित्रिका । ऊचेला ऊत्सका
रात्रिर्मेचनामा च ग्रंथिका स
प्ताक मर्कक्षीरं च कासंदेस्य
रमूलकं ॥ कासंदमूलकंका
लकासंदामूलं कासंदः खरम
र्दकमितिक्त चित्रपाठः तस्मै
भ्यरमूलस्थाने अपामार्गमूल
प्राचूर्णिंगी महानिंबा विशाला
द्युपिपत्रकं पूतिकास्फोतम्र्र्वा
वस्तमपर्णी शिरीषकं छोपिपत्र
कं विद्या त्रिपत्र । ऊटजं पिचुमर्द
कं तंडुरुभृंगराजस्याक केटकंक
टुरोहिणी पाटी दार्वी त्रिवृतप
ग्रंग्रंथिकागुरुपुष्करं ॥ कर्ष्टं
कटुफलंमांसीमुरैलाटरुषाभ
यं । एतेषां कार्षिकैः कल्पैर्नीम्ना
कल्पे उच्यते । अष्टादशविधं
ऊष्ट ग्रंथिमज्ञगात तथा हस्त
पादांगुली संधि गलितं सर्व
संधिषु ॥ ग्रंथिकानि च मांस
नियस्य गात्रे भविष्यति । ना
साकर्णास्येवेकल्प भेकाका
रवपुस्त्वंच ॥ श्वेतरक्तं त
था ऊष्ट नानावर्णं विपादि
कं । श्वित्रंवक्र विपंचैव वा
तशोणित मेवच ॥ कापा
लं किमिजं ऊष्ट रूपगु दद्रु

विचर्चिकां । पामादि स्फोट
कादीनि क्रिमिवृद्धिं तथैवच
कटीदद्रु मसूरीं च किटिमं र
क्तमण्डलं । कुष्ट मोदुम्बरं प
द्मं महापद्मं तथैवच ॥ गल
गंडार्बुदं हन्याद्गंडमालां भग
दरं वातजे पित्तजे चैव श्लेष्म
जे सान्निपातिकं पकोल्वणं
द्युल्वणं च ऊष्ट हन्यात्ससंशयः
कंदर्पसारतैलं ६७ ॥ ॥
भल्लातकानां पवनोद्धतानां
हंतव्यदानां च यदाटकं स्यात्
तच्चेष्टकाचूर्णकणैर्विघृष्य
प्रक्षाल्य पित्वा विसृजेत् पवा
ते शुष्कमुनस्तान्द्विदलीकृतं च
ततः पचेदप्सु चतुर्गुणास्ततं
तपादशेषं परिपूतशीतं क्षीरे
णतुल्येन पुनः पचेत् ॥ तदर्द्ध
या शर्करया विकीर्णं ततः ख
जेनोन्मथितं विधाय । तन्मम
मात्राकुम्भजातवीर्यं सुधारसा
दप्यधिकं त्वमेति ॥ प्रात र्विबु
द्धः कृतदेवकार्य्यो मात्रांच लो
देत् स्वशरीरयोग्यां । नचात्र
पाने परिहार्य्यमस्ति न चा
तपे चाध्वनि मैथुने च ॥ यथ
पचेष्टा विहितोपयोगाड्व

नरः कांचनराशिगौरः ।अन
न्यमेधा नरसिंहतेजा हृष्टेंद्रि
योऽव्याहतबुद्धिसत्वः ॥दंता
श्च शीर्णाः पुनरुद्भवंति के
शाश्च शुक्लाः पुनरेव दि
व्याः । नीलांजनालिप्रतिमा
भवंति त्वचो विवर्णाः पुनरे
व दिव्याः ॥ विशीर्णकर्णां
गुलिनासिकोऽपि कृम्यार्दि
तो भिन्नगलोऽपि कुष्ठी ।
सोऽपि क्रमादंकुरिताग्रशा
खस्तरुर्यथा भाति नभोऽम्बु
सिक्तः उष्ट्रान् मयूरान् जय
ति स्वरेण बलेन नागस्तुरंगो
जवेन रसायनस्यास्य नरः प्र
सादाद्दूरस्य नेत्रे गृध्रपिकोऽपि
शुद्धा ग्रंथान् विशालान् पुन
रुक्तिदोषान् गृह्णाति शीघ्रन
चनष्टपतेन सर्वान्निमेकल्पम
नल्पबुद्धिर्जीवेन्नरो वर्षशता
नि पंच ॥ रसायनस्य सर्वरसा
यनानां चकार योगं भगवानग
स्त्यः । श्वेतभल्लातकं ९८ निंबं
गोपालकर्णिकर्णी श्वायंती त्रिफला
चनं पर्पटारिष्टं नामेनावचाव
दिरं चंदनं श्वेतरुजं ह्यारुचवीजं ॥
यावाश्वगंधीश्वठीभार्गी वासाभृनि

म्ब वनसर्कं । शपामेंद्रवारुणी
मूर्वा विडंगोंद्र विषानलं हरि
कर्णमस्ता देका पटोलं रजनी
द्वयं । कर्णारसवपसमाहृत्य
वेत्रोच्चटाफलं ॥ देका मह
निंबं । कर्णाश्वगंधः शाणानि
फलमज्जा ॥ शूकंदं रूणपर्णीच
जिंगायष्याह्न मूषली । विषमुसे
नाचकंटार्ये पुनर्नवा तीरकंठु
की ॥ एषांद्विपलिकान्भागान्
जलद्रोणे विपाचयेत् । अष्टभा
गावशेषेन कषाय मवतारयेत्
भल्लातकसहस्त्राणि जीर्णानि छि
न्नानि गोऽम्भसि । चतुर्भागावशे
षेन तु कषाय मवतारयेत् तौ क
षायौ समाहाय वस्त्रपूते च
कारयेत् । गुडस्य तुलाना भ्यां
कषायं विपचेत् भिषक् भल्ला
तकसहस्त्राणां मज्जानं तत्र दा
पयेत् । त्रिकटु त्रिफलामुस्ता
सैंधवानां पलं पलं दीपकस्य
पलं चैव चार्कजानि पला शि
कं । सेचूर्ण प्रतिपेदत्र ।
कन्दकंच चतुः पलं ॥ ति
लय भाण्डे विनिक्षिप्य प्रयोपये
त् कुशलो भिषक् । महाभ
ल्लातकलेहमहादेवेन निर्मितः जे

गतस्त हितार्थाय जयेच्छीत्र
नंसंशयः । श्वित्र मौदुंवरं दद्
मृष्यजिह्वं सकाकणं पुण्डरी
कं च चर्माख्यविष्फोटमंडलेन
था । कण्डुकपालंकुच पामा
नं सविपादिकं ॥ वातरक्तमुदा
वर्तं पांडुरोगं व्रणं क्रिमीन् अ
र्शांसि षट्प्रकाराणि कासश्वा
सभगंदरं ॥ सदाभ्यासेन पलित
मामवातं सहुस्तरं अनुपाने ।
प्रयोक्तव्य हिमाक्वाथपयोऽ
थवा ॥ भोजने च सदाभोज्य
मुस्त्वाने विशेषतः महाभ
ल्लातकगुडः । ९९ । कृतांश
मृत्वसं मुद्ध पलमेकं रसस्य
वै । पलं लोहस्य ताम्रस्य पलं
भल्लातकस्य च गंधकं च पलं
चैकमभ्रकस्य च गुग्गुलोः हरी
तकी विभीतकं चापूर्णं कर्षद्वय
हयोः अष्टमाक्षाधिकंतमधा
श्वः पाणितलानि षट् । हुतेष
द्यगुणलोहान् द्वात्रिंशत्त्रिफ
लाजलं पंकं कृत्वा पचेत् पात्रे
लोहे च विधिपूर्वकं पाकमे
तस्य जानीयात् कुशलो लोह
पाकवित् विशुद्धः प्रातरुत्थाय
यगुरुदेवद्विजाच्चकः रक्तिका

द्विक्रमेणैव ज्वलन्नामरमर्द्दितं ॥
लोहे लोहस्य हरणेन जर्ध्यादेन
रसायनं । अनुपाने च जीवनना
रिकेलोदकं पयः सर्वकुष्ठ ह
रं श्रेष्ठं वलीपलित नाशनं ॥
पांडुमेहामवातघ्नं वातरक्तरु
जापहं क्रिमिशोष्यापस्मारीप्लू
लहृत्नीम वातरोगान् तथ
हंति महाश्वास मत्यर्थं शुक्र
वर्द्धनं ॥ अग्निसंदीपनं स्थूयेको
न्यायुर्बलपुष्टिकृत् विवर्ज
शाकं अम्लमपि स्त्रियं च सेव्यार
सो जोगलजा विकारान् पाल्यो
दनं यष्टिकमांस मुद्गदोद्दं गु
डः क्षीरमिद्दक्रियायां शालिच
गुर्वादिद्विदलन करंजशिलाजतु
दीप्तगृतपयस्य सर्पिर्गुतं भग
यत्नो विद्दंगान प्रस्यमेतद्रव
लदे द्यानुः । कृत्स्नस्य पतस्य
सितेन पचेत् त्रिपचरात्रेण य
थापाशांकः । पाकलक्षणं ।
यथा । वस्त्रेनिष्पीडितस्त्स्ये
स्य लतेनोच्चेन दर्फ । समाइ
जायते स्थाकं न निःसरति संधि
भिः न च शाहायनेवके नेदा
सिद्धिं विनिर्दिशेत् अस्तनां
ज्ञरलोह १ । गंधकेन हतेनाम्नं

दशभागंगमुद्धरेत् उषणं पंच
भागंस्याद्रसेनैव द्विभागिकं ॥
सानवंकुष्ठिने सम्यगनुपानस
योगतः गलिते स्फुटिते चैव वि
पुलेमण्डले तथा विचर्चिका
दद्रु पामा सर्वकुष्ठप्रशान्तये।
उदयभास्करः ७१ तालकं वं
शपत्राख्यं कुष्माण्डसलिले
क्षिपेत्। सप्तधा वा त्रिधा वापि
दत्वाम्लेन तथैव च शोधयि
त्वा पुनः सूक्ष्मचूर्णयेत् मण्डला
कृतिः ततः शरावके यंत्रे स्था
पयेत् कुशलो भिषक् वदरीप
लवेनाम्येन लेपनं कारयेत् ततः
अरुणाममधःपात्रे तावज्ज्वाला
प्रदीयते स्वांगशीतं समुद्धृत्यामा
णिक्याभो भवेद्रसः। घृतेनोद्ध
ता समर्थ्य खादयेद्रक्तिकाद्वय
संख्यं देवदेवेशो कुष्ठरोगादि
मुच्यते। स्फुटितं गलितं कु
ष्ठं वातरक्तं भगन्दरं॥ नाडी
व्रणं व्रणं दुष्टं सुपदंशं वि
चर्चिकां। नासास्यसंभवा
न्रोगान् दन्तान् हन्यात् स
दारुणान् पुंडरीकं च चर्माख्यं
विस्फोटं मण्डलं तथा रसमाणि
क्य ११ कुष्माण्ड त्रिफला तैल

कन्या कांजिकभावितं। भाल
कं तुल्यगंधस्यात् द्वैपारदम
र्दितं॥ मज्जातीरेण निंबुक
कन्यातोये दिनत्रयं। प्रत्ये
कं भावयेत् सूक्ष्मं चक्रिका
रंतोगतं॥ विपचेत् हण्डिका
मध्ये पलशतारमध्यगे या
मान् द्वादश शीतेऽस्मिन्प्र
योज्यं रक्तिकाद्वयं हन्त्यष्टाद
श कुष्ठानि रोगविध्वंसनं तथा
द्विविधवातरक्तं च नाडीदुष्टव्र
णानि च॥ तालकेश्वरः ७३॥
दद्रुघ्नवाणाग्निरसैर्दन्तैर्नाल
सचूर्णितं। पुनः पुनश्च संम
र्द्य सूक्ष्मं कन्यापुटैर्दहेत् वाण
ग्निरसं शारदुग्धपत्ररसं। हर
स्यात्तालकं तेन तारं पालाशं चाप्य
पामार्गः ततोज्वालाप्रदानतस्त्रि
दिनं रात्रौ भस्म भवेत्॥ सूक्ष्मेक
णीयदा चसाद्भेषो दमे तथ
मकं। तदा स्नाने स्नेन तालं सर्व
कुष्ठविनाशनं॥ गलत्कुष्ठवा
तरक्तं ताम्रवर्णं च मण्डलं।
पीनपित्तमहाकुष्ठकंडूदद्रुवि
नाशनं॥ पक्ष्मसरस्वचाणकं
शुद्धरूपं पञ्चकोष्ठा तालके
श्वरः॥७४॥ अन्ति दृष्टफला

थं॥ संमर्द्य तालकं सूक्ष्मं वं
शपत्राख्यं सूक्ष्मकैः कुष्माण्ड
नीरे संभाव्य त्रिदिनं शोधयेत्
पुनः॥ घृतकन्याद्रवे भूयो भा
वयेच्च दिनत्रयं। संमर्द्य कां
जिकेनैव दधाम्लेन विमर्दये
त्॥ संमर्द्य चूर्णसलिले रसेपो
तलीवे पुनः त्रिदिनं मर्दयि।
त्वा तु कारयेत् चंद्रिकाकृति॥
स्थाल्यां हृद्धनसायां तु पलाश
क्षारसंचयं। उपर्यधस्तालक
स्य क्षारदत्वा शरावकैः पिधा
य लेपयेत् यत्नात् पूरयेत्
क्षारसंचयं। पुनरूर्द्ध शरावेण ले
पयेत्तत् दृढं ततः द्वात्रिंशद्यामप
र्यन्तं वह्निज्वाला प्रदीयते। प
वं सिद्धेन तालेन गंधतुल्ये न
मेलयेत्॥ द्वयोस्तुल्यं जीर्णता
म्रं वालुका यंत्रेण पचेत्। अयं
तालेश्वरो नाम रसः परमदु।
र्लभः॥ हन्त्यष्टादश कुष्ठानि
वातशोणितनाशनः। वक्रमं
डलमस्रं स्फुटितं गलितं न
श्येत्॥ वक्रं रूपं सर्वजातं नाश
येत् विकल्पनः दुष्टव्रणं च वी
सर्पं लगदोषं च विनाशयेत् दृष्टा
वारसहस्रं च रोगवारणकेशरी महा

तालकेश्वरः॥७५॥ कुष्माण्ड
त्रिफला तैल कन्या कांजिक भा
वितं। तालकं तुल्यगंधास्या
द्द्वीपारदमर्दितं॥ मज्जाती
रेण निंबुक कन्यातोयैर्दिन
त्रयं। प्रत्येकं भावयेत् सूक्ष्मं
चक्रिकाकारतांगतं॥
विपचेत् हण्डिकामध्ये पला
शक्षारमध्यगं। यामान् द्वाद
शशीतेऽस्मिन् प्रयोज्यं रक्ति
काद्वयं हन्त्यष्टादशकुष्ठानि
रोगविध्वंसनाधिकं। ताल
केश्वरः॥७६॥ इति गोवि
न्दविशारदकृतभैषज्यरत्नाव
ल्यां कुष्ठचिकित्सा समाप्ता॥
कुष्माण्डः पुंसि वृहत्फलत्व
नादिपोषः। कुमडा इति कोह
डा इति च भाषा। तत्पर्यायः
कुष्माण्डः ७ पित्तविवर्द्धकः
१८ इति शब्दरत्नावली अपिच
कुष्माण्डस्यात् पुष्पफलं पीनं
पुष्पं वृहत्फलं। कुष्माण्डं ह
हरेणं रुष्य गुरु पित्तास्रवातनु
त् वालं पित्तापहं शीतं मध्य
मं कफकारकं। वृद्धं नातिहि
मं स्वादु सक्षारं दीपनं लघु॥
वस्तिशुद्धिकरं चेतो रोगहृ

न सर्व्वदोषजित् ॥ ॥
अथ कोहण्डी । कुष्माण्डीतनुभ
शं लघ्वी कर्क्कारुरपिकीर्त्तिता
कर्क्कारु र्ग्राहिणी शीता रक्त
पित्तहरा गुरुः । पक्कातिक्ता
ग्निजननी सक्षारा कफवातनु
त् इति भावप्रकाशः ॥
कुस ३ कि भासने इति
कविकल्पद्रुमः पंचमस्वरी
इरङ्कंस्यते । कि कुंसयति कुं
सति । भासनं दीप्तिः । इति
दुर्गादासः ॥
कुस य इर श्लिषि । य
कुस्यति वाला कान्तं । इर
अकुसत् अकोसीत् । अस्मा
त् पुष्यादित्वाभित्य उ. इत्येव
इति दुर्गादासः ॥
कुसीदं क्ली वृद्ध्याजीवनं । य
था । कुसीदं कृषिवाणिज्यं
प्रकुर्व्वीतास्वयंकृतं । आपत्
काले स्वयं कुर्व्वन्नैनसा युज्यते
द्विजः ॥ बहवो वर्त्मनोपाया
ऋषिभिः परिकीर्त्तिताः स
र्व्वेषा मपि चैवैषां कुसीद मपि
के विदुः । अनावृष्ट्या राजभया
न्मूषिकाद्युपद्रवै । कृष्यादि
के भवेद्बाधा सा कुसीदे न विद्य
ते ॥ शुक्लपक्षेन तथा कृष्णे
जन्मादिवसेपि वा । उत्सवर्ष
तिष्ठीतेवा वर्द्धनं न निवर्त्तते ॥
देशं गतानां या वृद्धिर्नानापण्य
पजीविनां । कुसीदं सर्व्वतः स
र्व्वतः सम्यक् संस्थितस्यैव जाय
ते लब्धलाभः पितृन् देवान्ब्रा
ह्मणांश्चैव पूजयेत् । ते तस्मात्
स्य तद्दोषं शमयन्ति न संशयः
वणिक् कुषीदी दद्यात्तु वस्त्रंगो
कांचनादिकं ॥ कृषीवलोऽन्न
पानानि यानं शय्यासनानि च
पण्येभ्यो विंशतिं दत्वा पशु
स्वर्णादिकं शतं । पादेनाय
स्य पारत्र्यं कुर्य्यात् संचयमा
त्मवान् अर्द्धेन चात्मभरणं नि
त्यनैमित्तिकान्वितं । पादं च मा
र्य्यमायस्य मूलभूतं विवर्द्धयेत् वि
द्या शिल्पं भृतिः सेवा गोरक्षं विप
णिः कृषिः । धृतिर्भैक्षं कुसी
दं च दश जीवन हेतवः इति
गारुडे २१५ अध्यायः ॥
गौतमः । कृषिगोरक्षवाणि
ज्यं चास्वयं कुसीदं चेति । कु
सीदस्य पृथक् ग्रहणं स्वयं कृ
तस्याभ्यनुज्ञानार्थं । कुसीदं
वृद्धिकर्मेति प्रदेशान्तरे । भि

551

धानात् इति कल्पतरुः ॥ बृह
स्पतिः कुसीदं कृषिवाणिज्यं प्र
कुर्व्वीतास्वयं कृतं । आपत्काले
स्वयं कुर्व्वन् नैनसा युज्यते द्वि
जः ॥ लब्धलाभः पितृन् देवा
न्ब्राह्मणांश्चैव भोजयेत् तेन्
ते तस्य तद्दोषं शमयन्ति न
संशयः वणिक् कुसीदी दद्या
त्तु वस्त्रगोकांचनादिकं कृषी
वलोऽन्नपानानि यानशय्यास
नानि च ॥ पण्येभ्यो विंशकं दत्वा
पशुस्वर्णादिकं शतं ॥ वणि ।
क् कुसीदे दोषः स्यात् ब्राह्मणा
नां च पूजनात् । राज्ञे दत्वा तु ष
ड्भागं देवतानां च विंशकं । त्रिं ।
शद्भागं च विप्राणां कृषिं कृत्वा
न दोषभाक् ॥ मनुः । अशीति
भागं गृह्णीयात् मासाद्वार्द्धुषि
कः शतात् द्विकं शतं वा गृह्णी
यात् सतां धर्म्ममनुस्मरन् ॥ द्वि
कं शतं च गृह्णानो न भवत्यर्थ
किल्बिषी । शतकार्षापणोऽष्ट
शीति भागं विंशतिपणान् द्वि
कं पुराणद्वयं । एवं विधनियम
तिक्रम्य चानापदि स्वयमसत्
रावायः स्वाकृष्टेन व्यवहरति
तस्यैव प्रायश्चित्तं । आपदि तु
स्वयंकरणे नियमातिक्रमे च
न दोषः । इति प्रायश्चित्तविवेकः
इत्याह्निकाचारतत्त्वं ॥
कुसीदिकः त्रि वृद्धिजीवी ।
तत्पर्य्यायः । कुसीदः ५ इ
ति शब्दरत्नावली ॥ कुसीदी ६
यथा वणिक् कुसीदे दोषः
स्यात् ब्राह्मणानां च पूजना
त् । इत्याह्निकतत्त्वं ॥
कुस्म क उ. मत्सीदिते ॥
कुस्मिति । कुत्सी इत्येपधः
मत्सीदितं बुद्धिपूर्वकदर्शनं
कुस्मितः कुत्सितमीषद्धास्य ।
क उ. कुस्मयते जनः । बुद्ध्या
पश्यति कुत्सितं स्मयते वे
त्यर्थः । इति दुर्गादासः ॥
कुहन् क उ. विस्मायने
इत्सी । विस्मायनमन्यतो वि
स्मयोत्पादनं । उ. कुहयते
कुहकेनेन्द्रजालिको लोकं
विस्मापयति इत्यर्थः स्मातो
कुहयते विस्मापयते हेतौ
भयमिति भट्टमल्ल दर्शनादि
स्मापने इति पाठ इत्येके । इति
दुर्गादासः ॥
कुहकः पु तालभेदः । यथा
द्रुतद्वंद्वं लघुद्वंद्वं ताले कुह ।

कू हृत्तके। इति संगीतदा
मोदरः ॥
कू उ. ग शब्दे। अ ग
कूनाति कूनीते। कूत्वानो
ऽयमिति जैमिनिः। हृस्वोनो
पधोपि। नकाररहितो कूत्वा
न इति रमानाथः। टीकान्त इ
ति जोमराः। इति दुर्गा
दासः ॥
कू शि उ. आर्त्तस्वरे। शि
उ. कुवते अकुविष्ट। इति
दुर्गादासः ॥
कूज हिक्काने। दीर्घी।
हिक्कान मव्यक्तशब्दः कूज
तिकोलिकः इति दुर्गादासः
कूट न. क दाहे ॥ मन्त्रे।
दीर्घी। अचकूटत्। इति दु
र्गादासः ॥
कूट क उ. अप्रसादाप्र
दो अप्रदा दानाभावः। क
उ. कूटयते खलः कूटमप्प
र्थयतत्रे नकरोति किंचिन्न
ददाति वेत्यर्थः इति दु
र्गादासः ॥
कूटसंक्रान्तिः स्त्री अर्द्धरात्रात्री
ते सूर्य्यस्य राश्यन्तरगमनं।
यथा। संक्रान्ति द्विविधा यत्र

पूर्वन्तत्र परित्यजेत्। कर्म्मकूट
टसंक्रान्तो स्नान दान जपो व
तं॥ अर्द्धरात्रव्यतीतेन यदा सं
क्रमते रविः। सा सेयाकूटसं
क्रान्तिर्मुनिभिः परिकीर्त्तित
इति विद्यानिधिकृतज्योतिः
सागरसारधृते वचने ॥
॥ अपिच। अर्द्धरात्रौ विनी
तेन संक्रान्ति र्यदि भवेत्॥
पूर्वं स्नानादिकं कुर्य्यात् परेद्युः
स्नानदानयो रिति भीमपराक्र
मीये ॥ स्नानदानयोरित्यत्र
सप्तमी निर्द्देशात् परदिवसी
य स्नान दान निमित्तकं पूर्व
दिने उपवास संयमनरूपं वृत्ता
दिकं कुर्य्यादित्यर्थः ॥ इति ति
थ्यादितत्त्वं ॥
कुड शि चाल्ये ॥ मते ॥ षष्ठ
स्वरी। फलाभावे ऽप्यस्य कू
डादौ पाठः प्राचां मनुरोधात्
प्राचां पितामहस्तु वादिमं।
कूटादौ पठितवंतः। णिकू
डनी कूडंती। चाल्ये चलनीभा
वः। कूडति कुत्र्य वह्नियोगा
त्। कुडत्यलं लोकः। इति
दुर्गादासः ॥
कूण त क संकोचे। दीर्घी।

मूर्द्ध्योपधः। अचुकूणच्चवक्त्रः
संकुचित मभूदित्यर्थः। इति
दुर्गादासः ॥
कूण क उ. संकुचि। षष्ठस्वरी
क उ. कूणयते चक्षुः संकुचि
तं स्यादित्यर्थः। पंचमस्वरीत्य
इति दुर्गादासः ॥
कूपः पुं स्वनामख्यातजला
धारः। कूया इति पातकूया इति
च भाषा तत्पर्य्यायः। अवटः
५ कोहारः ६। इति जटाधरः॥
कार्त्तः ७ कर्म्मः ८ वभ्रः ९ काटः
१० खातः ११ अवतः १२ त्रिविः
१३ सूदः १४ उत्सः १५ क्रू
पादात् १६ काकोनदाम १७
कूपोषः १८ केवटः १९। इति
वत्र्द्देश कूपनामानि इति वे
दनिघण्टौ ३ अध्यायः ॥
कूपी स्त्री पात्रविशेषः। यथा।
भावयेत् सप्तकृत्व स्तच्चूर्णका
ष्ठजलेन च। ततः संशोष्यसं
पिष्य कूपीमध्ये निधापयेत्
इत्यजीर्णचिकित्सायां भावप्र
काशः ॥
कूर्च्चं क्ली मल्लापकर्षणार्थके
शादिमयूखिः। कूचि इति भाषा
यथा। नरसिंहपुराणे। ततः स

मर्पयेत् कूर्च्चं मणीरादि कि
निर्म्मितं। मल्लापकर्षणार्थं
श्रीमन्मूर्त्यांगसंस्थितः ॥ विस्त
धर्म्मोत्तरे च। उशीरकूर्च्चकं दत्त्वा
सर्वपापैः प्रमुच्यते। दत्त्वा गो
वालजं कूर्च्चं सर्वा स्तापा न्व्य
पोहति ॥ दत्त्वा चामरकं कूर्च्चं
श्रिय माप्नोत्यनुत्तमां। इति
श्रीहरिभक्तिविलासस्य ६
विलासे ४८ श्लोकः ॥
कूर्द्द उ. क्रीडायां। षष्ठ।
स्वरी। उ. कूर्द्दते। इति दु
र्गादासः ॥
कूल ० आवृतौ। षष्ठस्व
री कूलति वारी प्राचीरं। इति
दुर्गादासः ॥
कूलं क्ली नदीतीरं। तत्प
र्य्यायः। रोधः २। इति शब्द
रत्नावली ॥ वेला ३। इति
जटाधरः ॥
कृ अ न वधे। अ ना
कृणोति कृणुते। इति दुर्गा
दासः ॥
कृ अ कृतौ। अ करति क
रते। अयं केषांचित् न मन्यते
इति दुर्गादासः ॥
कृ अ द उ कृतौ ॥

न्त द करोति कृन्तते। कृ
त्रिमं। अस्मात् कृत्रिमकारोऽप्य
गुणो वा वक्तव्य इति वररु
चिः। तेन किं करोमि कथं कृ
र्मि क्वानुगच्छामि माधव।
दुर्य्योधन विहीनेन शून्यं सर्व
मिदं जगत्॥ इति दुर्गादासः॥
कृत ई ध वेष्टे। ईकृ
तः। ध कृणत्ति चकर्त्त। इ
ति दुर्गादासः॥
कृत ई श य छिदि। ई
कृत्तः। श्य कृन्तति तत
कृत् वृदित्यादि सूत्रेण वेम
त्वादेव निष्ठायां अनिमत्वे सि
द्धे अस्य हृत्वं च ईदन्तवेधो
नेम् ऊष्मीतस्य व्यभिचारस्त
चनार्थः तेन धावुन्त जवेस
जीवादीनां धाविताः पाथसा
र्थी इत्यादि सिद्धमिति रमाना
थः मतेन धृतिने इत्यादि सि
द्धमिति क्रमदीश्वरः। ईदित्क
रणमाभ्या षट्लकि निष्ठावा
इम् निषेधार्थ इति केचित् च
रीकृन्त इति किंचैतन्मते धावि
तादीनां धावनं धावः धारोऽ
स्य जातः धावित इत्यादि स
माधानं विरहितिकृन्तते कृत

मुखोकृति केनकि दंतविता
प्तो इत्यत्र निकृन्तत इति जयदे
वोक्ते निकृन्तं करोति इति श
ब्देनात् ण्यौ तेथ्यादि त्वादते सा
ध्यं। इति दुर्गादासः॥
कृत्तांजलिः त्रि येनांजलिः
कृतः सः यथा। छेदोपरि
शिष्टे। नदसंयुक्तपार्श्विबी
पकपादईपादपि। ऊर्थ्यात्
कृन्तांजलि वीथिकृदह्वा रु र
थ्या पिबा॥ इति सूर्योपस्था
नेच्छाक्रिकाचारतत्वं॥
कृप तृक दौर्बल्ये।
सममस्वरी। कृपयति। घट्टस
रीति त्रिलोचनः। इति दुर्गा
दासः॥
कृप कि युतौ॥ चित्रे॥
कल्पने। सममस्वरी। कि क
ल्पयति कल्पति। कृपः क्लृ
पोऽकृपादाविति क्लृपादेशः
इति दुर्गादासः॥
कृप ऋ ङ व ल कल्पने।
सममस्वरी। कल्पनं सामर्थ्य
ऊ अकल्पिष्ट अक्लृप्त।
ङ कल्पते कल्पहृत्नवदिति
हलायुधः॥
व कल्पस्यति विक्लृप्सति। क्ल

अक्लृपत्। इति तस्मिन् प्रियं
कृत्वा कल्मा प्रीतिं परां प्रभु
रिति अनेकार्थत्वेऽन्तर्भूतण्य
र्थत्वात् जनयितेत्यर्थः॥ इ
ति दुर्गादासः॥
कृमिः पुं उदरजातकीट
रोगः। तस्यौषधं यथा। वद
री कारवी मूलं गुडाज्येन तत्स
मन्वितं। अग्निना साधितं ज
ग्धा कृमीन् सर्वान् हरेच्छिव
इति गारुडे १९४ अध्यायः॥
अन्यत् क्रिमिशब्दे द्रष्टव्यं॥
कृव इ न कृतौ॥ हिंसे।
कृण्वी। न कृणोति। इ कृ
ण्वते। इति दुर्गादासः॥
कृश इर ष कार्श्ये।
कार्श्यं कृशाकरणं। इर अ
कृशत् अकशीत्। अस्मात् यू
यादित्वात् निष्ठे ङ इत्यन्ये। य
कृश्यति चेद्दं कृशपतः। इ
ति दुर्गादासः॥
कृश ओ आकृषि॥ विलेख
ने ओ आकाक्षीत् आकृक्षत्
अक्राक्षीत्। आकृषि आक
र्षणं कर्षति नरनारयं इति
दुर्गादासः॥
कृष औ श विलेखे॥

आकर्षणे। श अ कृषति कृ
षते भूमिं कृषकः। ओ अ
कार्क्षीत् अक्राक्षीत् अकृक्षत्
इति दुर्गादासः॥
कृष्णः पुं कालवर्णः। तत्
पर्य्यायः वकुलः ८ रामः ९
शितिः १० इति जटाधरः भगवद
वतारविशेषः तस्य जन्मसम
यो यथा उच्चस्थाः शशिभौम
चंद्रिशनयो लग्नं वृषो लाभ
गो जीवः सिंहतुलालिषु क्र
मवशात् पूषोशनो राहवः
नैशीथः समयो ऽष्टमी बुध
दिनं ब्रह्मर्क्षमत्र क्षणे श्रीकृ
ष्णाभिधमंबुजेक्षणमभूदा
विः परं ब्रह्म तत् इति खमा
णिक्य नामज्योतिर्ग्रन्थः॥
कृष्णकलिः } स्त्री स्वनाम
कृष्णकेलिः } ख्यात पुष्पवृक्षः
तस्यशाखा रक्तं कृश्लीयनाल
वद्धूम्रियुक्ता पत्रं तद्वत्तांबुल
वद्भवति तस्य पुष्पं श्वेतरक्त
पीत पाटलवर्ण मिलितं पव
दलं षट्केशरमध्यं स्वल्पसु
गंधयुक्तं अपराह्ने प्रस्फुटति
तस्य बीजं कृष्णमरीचवत् तुल्यं।
पुष्पं सर्वकाले सुलभं वर्षा

कालेप्रचुरं भवति। तदुत्प
त्ति तस्य मूलतो वीजतश्च।
इति लोकप्रसिद्धं॥
कृष्णचूडा स्त्री स्वनामख्यातस
कंटकपुष्पवृक्षः तस्य पत्रं व
कुलदलवद्भवति तस्य पुष्प
पीतरक्तवर्णं उपर्य्युपरि स्थूल
सूक्ष्मदशदलं दीर्घवृन्तं दश
दीर्घकेशरमध्यं ईषत्सुगंधयु
क्तंच जायते। तत्फलं शिंवीस
दृशं पुष्पं सर्वकाले सुलभं व
र्षाकाले प्रचुरं भवति। तदुत्प
त्ति तस्य शाखाया वीजाश्च
भवति। इति लोकप्रसिद्धं॥
कृष्णजीरकः पुं कृष्णवर्ण
स्थूलजीरकः तत्पर्य्यायः।
सुषवी १ पृथुका २ पृथ्वी ३
भेदने ४ इति शब्दरत्नावली॥
अपिच। कृष्णजीरः सुगंधश्च
तथैवोद्गारशोधनः। कण
जी तु सुषवी कालिका चो
पकालिका॥ पृथ्वीका कार
वी पृथ्वी पृथुः कृष्णोपकुंचि
का उपकुंचीच कुंचीच बृह
ज्जीरक इत्यपि॥ जीरकत्रितयं
रूक्षं कटूष्णं दीपनं लघु सं
ग्राहि पित्तलं मेध्यं गर्भाशय

यविशुद्धिकृत् ज्वरघ्नं पा
चनं वल्यं वृष्यं रुच्यं कफा
पहं। चक्षुष्यं पवनाध्मान गु
ल्मच्छर्द्यतिसारहृत्। इति भा
वप्रकाशः॥
कृष्णागुरु स्त्री कृष्णवर्णा
गंधिकाष्ठविशेषः। तत्पर्य्याय
गुणाः। अथ अगुरु कृष्णागुरु।
अगुरु प्रवरं लोहं राजार्हं योग
जं तथा। वंशिकं कृमिजं चा
पि कृमिजग्धमनार्य्यकं॥ अगु
रूष्णं कटु त्वच्यं तिक्तं तीक्ष्णं च
पित्तलं। लघु कर्णाक्षिरोग
घ्नं शीतवातकफप्रणुत्॥
कृष्णं गुणाधिकं तत्तु लोह
वद्वारि मज्जति। अगुरुप्रभ
वः स्नेहः कृष्णागुरुसमः स्मृ
तः इति भावप्रकाशः॥
कृष्णिका स्त्री रूपामायपति
णी तस्या नामानि रूपामा
वराही शकुनी कुमारी दुर्गा व
देवी चंडिका तथोमा। त्वं पा
तकी पांडविका त्वमेव त्वं कौ
लिका त्वं मित्रपादिणी च त्वं ब
लवज्री शाकुनेकदेवी धनुर्द्धरी
पान्यसमूहमाला। प्रत्यक्षम
भगवत्यहोमानमोऽस्तु तुभ्यं॥

557

कृत्मेऽर्थसिद्धिं॥ इति वसं
तराजशाकुने॥
कृष्णेक्षुः पुं इक्षुभेदः का
जलीआऊ इति भाषा। तस्य
पर्य्यायः। कांतारकः ५ इति म
दः अस्य भावप्रकाशोक्त गु
णाः कांतारशब्दे द्रष्टव्याः।
कृ श्व गि हिंसे। श्न शिकृ
णाति कृणीते कीर्णो कीर्णिः
इति दुर्गादासः॥
कृश विक्षेपे। श किरति
अस्यापि निष्ठायां कीर्णं इ
ति सूत्वाद्योदित्त्वत्रमूर्छे
वर्जनसामर्थ्यात् येनकेना
पिप्रकारेण रेफांतान्निष्ठात
स्न इति व्याख्यानात् कृदिर
णाविति इदिउपि च कृते रांत
त्वात् निष्ठातस्य न स्यात् एव
मुप निगरणे इत्यादेरपिगी
र्णा इत्यादि बोध्यं। इति दु
र्गादासः॥
कृ क उ विज्ञाने। क उ
कारयने। इति दुर्गादासः॥
केत क संपाहे। टीकी।
कृकीर्त्तयंतिच गोष्टीषु य
कृशानप्रयोगणाः कीर्तिदे
शस्य नित्यत्वेपि कृतपाठः

कीर्तिदेशस्य व्यभिचारसूचना
र्थः तेन अचीकृततदिति सिद्धं दु
र्गादासः॥
केत न क मंत्रणे॥ मिश्रा
वली। मंत्रणे निमंत्रेण। अवि
केतत्। निष्ठावर्णासमयोज्ञा
षणं इति दुर्गादासः॥
केतुः पुं नवग्रहांतर्गतग्रह
विशेषः। अयं पापग्रहः।
यथा अर्द्धेनेंदुर्कसौरारा:
पापायुक्तो बुधः पापो राहु
केतुच पापदौ॥ इति॥ अयं
तु जन्मराशेरपेक्षया षष्ठ त्रि
दशमैकादश स्थानस्थितश्चे
त् शुभः। यथा। केतुरपस्व
भौम मंदगानयः षष्ठ त्रि सं
स्थाः शुभा शुक्रार्कीवपि नैव
नीच दशमौ चेंदुः पुनः सप्त
मः जीवः सप्तनवद्वि पंचम
गतो युग्मेषु सौमात्मजः शु
क्रः षट्दश सप्तवर्ज्जितरे
सर्वे शुभान्य शुभाः॥ इति।
अस्य त्रिकोण उच्च स्वगृह
शत्रु मित्र सम नीचा यथा
सिंहस्त्रिकोणं धनु रुच्च
संज्ञं मीनो गृहं शुक्र
पानी विपदौ सूर्य्यार

चंद्राः सरुद्रः समानोजीवेंद्र
ज्ञो षट् शिखिनः परांशाः ॥
इति ॥ स्वोच्चाद्य सप्तमं नीचं
प्राग्वद्भावं विनिर्दिशेत् । इति
॥ अस्य दिष्टि यथा ।
केतु यस्मिन्नहे ऽभ्युदितस्त
स्मिन् प्रसूयते जंतुः । रौ
द्रे सर्पमुहूर्तेवा प्राणैः संत्य
ज्यतेचाएउ ॥ इतिच ज्योति
स्तत्वे ॥ अस्य दशाफलं
केरलीनामग्रंथेद्रष्टव्यं ॥
अथातः केतुचाराध्यायोव्या
ख्यायते । तत्रादावेवागम प्र
दर्शनार्थमाह । गार्गीयंशि
खिचारं पाराशर मसितदे
वलकृतंच । अन्यांश्च बहून्
दृष्ट्वाक्रियतेऽयमनाकुलश्चारः
गार्गीयं गर्गप्रोक्तं केतूनांचार
तत्पराशरेणकृतं असितना
माचार्येण कृतं देवल विर
चितं एतान् केतुचारान् अव
लोक्य तथान्यानपि कश्यप
ऋषिपुत्रनारदवज्रादिरचिता
न्बहून्दृष्ट्वामयाग्रंथश्चानाकु
लोनिःसन्देहः केतुचारः क्रि
यते ॥ अथोदयास्तमयलक्ष
णंमाह । दर्शनमस्तमयोवान

गणितविधिनास्य शक्यते ज्ञा
तं । दिव्यांतरीक्ष भौमास्त्रिवि
धाः स्युः केतवो यस्मात् अ
स्यकेतोर्दर्शने उदयः अस्तम
योऽदर्शने गणितविधानेन
ज्ञातुं न शक्यते । यस्मात् केत
वस्त्रिविधास्त्रिप्रकाराः । दिवि
आकाशेभवा दिव्या । अंतरीक्षेभ
वा अंतरीक्षाः । ग्रहनक्षत्रस्थानं
विहायान्यत्र आकाशे ये दृश्यन्ते
तेऽन्तरीक्षाः । भूमौ भवाः भौ
माः । इतिहेतोरुक्तयातद्रूप
त्वात् एषामुदयास्तमयोन
ज्ञायेते इति ॥ अथ केतूनां
दिव्यवर्जितानां अन्येषां स्वरू
पमाह । अहुताशेऽनलेरूप
यस्मिंस्तत् केतुरूपमेवोक्तं
खद्योतपिशाचालयमणिरत्ना
दीन् परित्यज्य ॥ अहुताशेऽ
नलवर्जिते यस्मिन् देशे अ
नलरूपमग्निरूपं दृश्यते यत
तदेव केतुरूपमुक्तं । किंतु ख
द्योतेंद्रगोपकमितिविशेषः ।
पिशाचालयं यक्षस्थानं । मण
यश्चंद्रकांतप्रभृतयः । रत्नानि
मरकतप्रभृतीनि । आदिग्रहणा
दन्यान्यपि काष्ठप्रभृतीनि ते

ऽग्निरूपाणि एतान् त्यक्त्वा य
त एषां स्वभावादेवानलरूप
महुताशे दृश्यते अनेनतत
केतुरूपमिति ॥ अथदिव्यांत
रीक्ष भौमानां केतूनां लक्षण
माह । ध्वजशस्त्रभवनतरुतु
रगकुंजराद्येष्वंतरीक्षास्ते दिव्या
नक्षत्रस्था भौमाः स्युरतोन्यथा
शिखिनः ॥ ध्वजश्चिह्नं । शस्त्रमा
युधादि भवनंगृहं । तरुर्वृक्षः
तुरगोऽश्वः । कुंजरो हस्ती । आ
दिग्रहणादन्येषु चतुष्पदेषु
ये दृश्यंते ते अंतरीक्षाः । दि
व्यानक्षत्रस्थाः । अतोऽस्मादु
क्तादन्यथा भूमौ ये दृश्यंते ते
भौमाः शिखिनः केतवः इति
अथकेतूनांसंख्यानं मतांतरे
णाह । शतमेकाधिकमेके
सहस्रमपरे वदंति केतूनां
बहुरूपमेकमेव प्राह मुनि
र्नारदः केतुं ॥ एके पराशराद
यः एकाधिकं शतं केतूनांक
थयंति तथा च पराशरः श
तमेकोत्तरं केतूनां भवंति ते
षां षोडश मृत्युनिश्वासजाः ।
द्वादशादित्यसंभवाः । दश द
क्षमखविलयेन रुद्रकोपजाः ।

सप्तपैतामहाः । पंचदशाङ्ग
षैरौद्दालिकस्य पुत्राः । सप्त द
शमरीचिकश्यपललाटजाः । प
च च प्रजापतिहस्तजाः । त्रयो वि
भावसुजाः धूमाश्च श्वेतकः ।
चतुर्दश मथ्यमानेऽमृते सोमे
सहसंभूताः । एकस्तु ब्रह्म
कोपजाः इति ॥ अपरे गर्गाद
यः सहस्रं केतूनां वदंति । त
थाच गर्गः । अनित्योदय चा
राणामशुभानां च दर्शने आ
गंतूनां सहस्रं स्यात् ग्रहाणां
स निबोधमे ॥ बहुरूपमेक
मेवेति नारदाख्यो मुनिरेक
मेव केतुं बहुरूपं प्राह । तस्मा
ते एक एव केतुस्तस्य बहूनि
रूपाणि स एव दिव्यस्त्वंतरीक्ष
भौम इत्यर्थः । तथा च नारदः
दिव्यान्तरीक्ष भौमस्य एकः
केतुः प्रकीर्तितः । शुभाशुभफ
लं लोके दर्शनास्तमयोदयैरि
ति ॥ एवं मतांतराण्युक्त्वा स्व
सिद्धांतमाह । यद्येको यदि ब
हवः किमनेन फलेन सर्वथा
वाच्यं । उदयास्तमयैः स्थानैः स्प
र्शैराधूपने वर्णैः ॥ यद्येक
एव केतुः यदि वा बहवः ।

केतवः। किमनेन। सर्वथा ते
षां मृदयास्तमयैः स्थानैः स्प
र्शैरायुपने वर्णैश्च शुभाशुभं
फलं पुनर्वक्ष्ये। उदयः कस्मि
न् दिशि उदितः। अस्तमयः कस्मिं
श्चास्तमितः। स्थानं यथा कस्मिन्
काष्ठाभागे कस्य नक्षत्रस्य वा स
मीपे उदितोऽस्तमितश्च स्प।
र्शनं कस्तेन ग्रहो नक्षत्रं वा
स्पृष्टं। आधूपने कोपि शिखे
याभिधूपितः। वर्णाः सितर
क्तपीतकृष्णादिकाः। एवमा
दिभिस्तस्य फलं वाच्यं तस्मादे
कोवक्तव्यो वा भवंतका नःत्वति
रिति ॥ अथ केतुचारे येषां केतू
नामभिदृष्टानां कियन्तं कालं
यावत् फलपाको भवति तेषां
फलपाकनियमार्थमाह यावं
त्यहानि दृश्यो मासान् तावत्प
चफलपाकः मासैरब्दांश्च वदे
त् प्रथमात् पक्षत्रयात् परतः
दृश्यः केतुर्दिनसंख्यया ।
फलस्य पाकः फलपाकः ।
यः केतुर्यावन्त्यहानि दृश्यो भ
वति तस्य तावन्तो मासास्तस्य के
तोस्तावन्तो मासान् फलपाको
ब्रूयात् यावत् संख्यकानि दि

नानि दृष्टो भवति तत्तुल्यानमा
सान् तस्य फलपाकं वदेत्।
मासैस्तु पुनरहान् संवत्सरा
न् ब्रूयात्। मासस्संख्यादर्शने
मासतुल्यानि वर्षाणि च वदेत्
यावत् संख्यान्मासान् दृश्यो भ
वति तावत् संख्यानि वर्षाणि
तस्य फलपाकं वदेत् कस्मात्
कालात् प्रभृति दिनत्रयाद् प्र
थमात् पक्षत्रयात् परतः सर्वेषां
केतूनां दिनसाम्यत्वं। यावंति दि
नानि दृश्यः केतुस्तस्माद्दिना
दूर्ध्वं प्रथमे पक्षत्रये पंचचत्वा
रिंशद्दिनानि यावत् निष्फला
नि तस्मात् पक्षत्रयात् परतः
तावतो मासान् फलपाकः अ
थमासान् दृश्यते तदा तस्मादे
वदर्शनात् परतः पक्षत्रयम
तिक्रम्य मासतुल्यानि वर्षाणि
वदेत्। प्रथमात् पक्षत्रयात् प
रतः तत्रापक्षमध्ये यावद्दिनसंख्या
गृहीते पक्षत्रयादूर्ध्वं यदा दृश्य
ते केतुस्तदा मासतुल्यानि वर्षा
णि वदेत्। अत्र संदेहकृदासा
र्धगर्गोक्तं नियमकं नाभिलि
ख्यते तथाच गर्गः। यावन्मा
नि दृश्यः स्यात्तावन्मासान्फलं

वेत्। मासांस्तु यावद्दृश्येत ता
वतोऽब्दांस्तु वेकूनान् ॥ त्रिप
क्षात् परतः कर्म पच्येत्तस्य शु
भाशुभं। यदि ह मृदिने केतो।
फलं नेहादिशेद्बुधः॥ तथा
वृद्धगर्गः। यावतो दिवसां
स्तिष्ठेत् तावन्मासान् विनि
र्दिशेत्। त्रिपक्षात् परतश्चा
पि कर्म केतोः प्रपच्यते॥ तस्मा
त् कालात् परं ब्रूयात् फलम
स्य शुभाशुभं। यदि ह मृदये
केतोः फलं नेहादिशेद्बुधः॥
यद्येवं तदा द्वितीयव्याख्यान
मत्र न घटते प्रथमव्याख्यान
मेव न्याय इति। यथा प्रथमा
त् पक्षत्रयात् परतः दर्शनादू
र्ध्वं पक्षत्रये यावन्निष्फलं पक्षत्र
यात् परतः फलपाकस्य काल
संख्या प्रवर्तते। तस्मादुक्तं यदि
ह मृदये केतोः फलं नेहादिशे
द्बुधः इति। यदुक्तं मासै रब्दा
श्च वदेत् तदेकदेशेनापि प्रति
मासमेक द्वि त्रि दिनदर्शने
न मासंख्या लभ्यते एवेत्य
र्थः। सर्वथा किमनेनास्मा क
मसद्विकल्पेन। दिवसैः पक्ष
त्रयात् परतो मासान् वदेत्॥

मासैस्तस्मादेव पक्षत्रयात् प
रतोऽब्दान् वदेत्। मासात् पर
तो दिनाधिक्यं दृष्टानुपातव
शात् वाच्यं। यथा यदि द्विनत्रि
शता वर्षं लभ्यते तदष्टादिने
केन मासैकमिति। तथाच स
मासंहितायां। केचित् केतु
सहस्रं शतमेकसमन्वितं वदन्ति
के। नारदमतमेकोऽयं त्रिस्था
न समुद्भवो विविधरूपः॥ दि
व्या ग्रहर्क्षजाता स्तीव्रफलकरा
भौमाः। प्राणिभुजादित्यो शुचा
न्तरीक्षा नचात्यशुभाः। उदया
स्तमयाधूपन संयोगाकारमा
र्गादिकूपातैः। फलानि दिवसै
र्मासान् मासैस्तु वर्षाणि संदि
शेत् केतोः॥ अथ शुभस्य
केतोर्लक्षणमाह। ह्रस्वत
नुः प्रसन्नः स्निग्धऋजुरचिर
संस्थितः शुक्लः। उदितो वा
प्यभिदृष्टः सुभिक्षसौख्याव
हः केतुः ऋजुः अकुटिलः अ
चिरसंस्थितः शीघ्रमेवादर्शनं
याति। शुक्लः श्वेतः। उदितो वा
प्यभिदृष्टः अथवोदित एवाभि
दृष्टः तस्मिन्नुदितमात्रे यदि
दृष्टिर्भवति तदा शुभः अथाशु

शुभः ॥ अशुभस्य केतोर्ल
क्षणमाह । उक्तविपरीतरू
पोऽशुभकरो धूमकेतुरुत्प
न्नः इन्द्रायुधानुकारी विशेषतो
द्वित्रिचूलो वा ॥ उक्तस्तनुः प्रस
न्न इत्यस्मादुक्तात् यो विपरीत
रूपः केतुरुत्पन्नः स धूमके
तुः स च न शुभकरः पापक
रोऽतीत्यर्थः । इन्द्रधनुःसदृशो
ऽशुभकर एव । तथा द्विशिखस्
त्रिशिखश्च विशेषतः पापफ
लदः । तथा च समाससंहिता ।
योऽचिरस्थितोऽभिदृष्टः स्निग्धः
सितः स्थिरप्रमूर्त्तिरुदगुदितः कृ
स्वतनुः प्रसन्नः केतुर्लोकस्य भ
वाय । न शुभोऽविपरीतो विशेष
तः शक्रचापसंकाशः द्वित्रि
चूलश्च शूलो वा दहति लोकसंस्थश्च
स्तकरः ॥ अधुना केतुस्वरू
प लक्षणं विवक्षुस्तावदेव
रविजाः पञ्चविंशतिः केतवो भ
वन्ति तेषां लक्षणमाह । हारम
हेमरूपाः किरणाख्याः पञ्चविं
शतिः सशिखाः प्रागपरदिशो
र्दृश्यन्ते नृपतिविरोधावहा रवि-
जाः । हारो मुक्ताहारः मणयश्च
हुकाञ्चनप्रभृतयः हेमसुवर्णं त

त् समानवर्णा ये केतवस्ते कि
रणाख्याः किरणसंज्ञाः । सशि
खाः सचूलाः । ते च पञ्चविंशतिः
रविजाः सूर्यसुताः प्रागपरयोश्च
दिशोर्दृश्याः । प्राक् पूर्वस्याम
परस्यां पश्चिमायां दिशि दृश्य
न्ते एतेषां मध्यादेक एव दृश्य
ते न सर्वे युगपदिति । सर्वत्रे
यं परिभाषा । ते च दृश्यन्ते
राज्ञो विरोधप्रदाः अनिष्टा
इत्यर्थः । तथा च गर्गः । शु
द्धस्फटिकसंकाशा मृणालर
जतप्रभाः मुक्ताहारसुवर्णाभाः
सशिखाः पञ्चविंशतिः किरणा
ख्या रवेः पुत्रा दृश्यन्ते प्रागपरदिशि स्थि
ताः । तथा च परभागस्था दृश्यन्ते
भयदास्तु ते ॥ अथाग्निपुत्रास्ता
वन्त आह । शुक दहन बन्धु
जीवकलाक्षा क्षतजोपमा हु
ताशसुताः । आग्नेय्यां दृश्य
न्ते तावन्तस्तेऽपि शिखिनो भयदाः
शुकपक्षी नीलपीतवर्णः । दह
नोऽग्निः । बन्धुजीवकः पुष्पवि
शेषो तिलोहितः लाक्षा वृक्ष
निर्यासः । क्षतजं रक्तं । तदु
पमास्तत्तुल्यवर्णाः । ते च तावन्तः
पञ्चविंशतिराग्नेय्यां दिशि दृ ।

सिग्धे

श्यन्ते । ते च हुताशसुताः अग्निपु
त्राः अग्निभयदाः । तथा च गर्गः
नानावर्णाग्निसंकाशास्तीक्ष्णांश
वोऽपि चूलिनः । स्वजन्माग्निवि
नाशान्ताः सर्वज्योतिर्विनाशनाः
तेऽग्निपुत्रा ग्रहा ज्ञेया लोकेऽ
ग्निभयवेदिनः । आग्नेय्यां दिशि
दृश्यन्ते पञ्चविंशाः प्रकीर्त्ति ।
ताः ॥ अथ मृत्युसुतास्ता
वन्त एवाह । वक्रशिखा मृत्यु
सुता रूक्षाः कृष्णाश्च तेऽपि ता
वन्तः । दृश्यन्ते याम्यायां जन
मरकावेदिनस्ते च ॥ वक्रशि
खाः अस्पष्टचूडाः । ते च रूक्षाः अ
स्निग्धास्तेऽपि पञ्चविंशतिरेव ।
ते च मृत्योः पुत्रा दक्षिणस्यां दि
शि दृश्यन्ते । ते च जनानां मरकं
आवेदयन्ति तथा च गर्गः । कृष्णा
रूक्षा वक्रशिखा दृश्यन्ते याम्य
दिक्स्थिताः । पञ्चविंशा मृत्यु
सुताः प्रजाक्षयकराः स्मृताः ॥
अथ भूपुत्रा द्वाविंशतिरेवा
ह । दर्पणवृत्ताकारा विशिखाः
किरणान्विता धरातनयाः क्षुद्
भयदा द्वाविंशतिरैशान्याम्बु
तैलनिभाः ॥ दर्पणवत् वृत्त
वर्त्तुलाकारो येषां ते विशि ।

खा विचूलाः रश्मिसंयुक्ताः भू
मेः पुत्राः ते च द्वाविंशतिरैशान्यां
दृश्यन्ते । जलस्य तैलस्य च स
दृशकान्तयः । एते दृष्टाः क्षुद्भि
क्षं ददाति तथा च गर्गः समन्त
वृत्ता विशिखा रश्मिभिः परिवा
रिताः अम्बुतैलप्रतीकाशा द्वा
विंशाभूसुताः स्मृताः ऐशान्यां
दिशि दृश्यन्ते दुर्भिक्षभयदास्तु ते
अथ चन्द्रसुतान् आह । श
शिकिरणहिमरजतकुमुदकु
न्दकुसुमोपमाः सुताः शशिनः
उत्तरतो दृश्यन्ते त्रयः सुभिक्षा
वहाः शिखिनः ॥ एते सौ
म्यायां दिशि दृश्यन्ते । ते च सु
भिक्षं कुर्वन्ति । तथा च गर्गः ।
चन्द्ररश्मिसवर्णाभा हिमकुन्दे
न्दुसप्रभाः त्रयस्ते शशिनः
पुत्राः सौम्याशास्थाः शुभावहाः
अथ ब्रह्मदण्डाख्यस्य लक्षण
माह । ब्रह्मसुत एक एव त्रिशि
खो वर्णैस्त्रिभिर्युगान्तकरः अ
नियतदिक्संप्रभावो विज्ञेयो
ब्रह्मदण्डाख्यः ब्रह्मपुत्र एक एव
स च त्रिचूडः । वर्णैः सितादिभि
रुपलक्षितः सत्त्वब्रह्मदण्डस
ज्ञोऽसौ ज्ञेयः अनियतायां अनिश्चितो

याम्यदिशि संप्रभवः। उत्पद्यते स
र्वा सदैव दृश्यत इत्यर्थः। स त
युगस्यान्तं करोति सर्वलयक
र इत्यर्थः। तथा च गर्गः। एको
ब्रह्मसुतः क्रूरस्त्रिवर्णस्त्रिशि
खोन्वितः। सर्वास्वाशासु दृश्यः
स्यात् ब्रह्मदण्डः क्षयावहः। ए
काधिकं शतं कथितं अन्यानि न
वशतान्येकोनानि कथनीयानि
इत्यत आह। शतमभिहितमेक
मेतमेकाधिकाच्छतात्परतः
एकोनानि नवशतानि केतू
नां स्पष्टैर्लक्षणैः कथयिष्ये
प्रागमभिहितमेकसमेतं ए
केनाधिकं केतूनां शतमभि
हितमुक्तं। तस्मादेकाधिका
च्छतात् परतः एकोनानि एके
नाविरहितानि नवशतानि केतू
नां स्पष्टैर्व्यक्तैर्लक्षणैश्चिह्नैः क
थयिष्ये॥ अथ शुक्रपुत्रांश्च
तुरशीतिसंख्याश्चाह॥ शुक्र
सुता विसर्पकाः सौम्यैशान्यो
रुदयं यान्ति चतुरशीतिसंख्याः
विपुलसिततारकास्ते स्निग्धा
श्च भवन्ति तीव्रफलाः। सौम्या उ
त्तरा। ऐशानी ईशानदिक्। त
योरुदयं दर्शनं गच्छन्ति। तेच

नाह। दहनजानलानुरूपास्त्रिचूल
ताराः कुजात्मजाः षष्टिर्नाम्नाच
कौंकुमास्ते सौम्याशया संस्थि
ताः पापाः। कौंकुमनामानः
षष्टिकेतवो मंगलपुत्राः रक्त
प्रभाः। अर्चिष्मन्तमसंज्ञाश्च ते
वेणुचसवान्विताः॥ एते विस
र्पकानाम शुक्रपुत्राः पुरोदयाः
अशीतिश्चतुरश्चैव लोकक्षय
कराः स्मृताः॥ अथ षष्टिं श
नैश्चरपुत्रानाह। स्निग्धाः प्रभा
समेता द्विशिखाः षष्टिः शनै
श्चरांगरुहाः। अभिकष्टफला
दृष्याः सर्वत्रैते कनकसंज्ञाः
ईदृशाः षष्टिः शनैश्चरपुत्राः
कनककेतवः सर्वत्र सर्वास्वदि
क्षु दृष्टाः अत्यशुभफलास्ते
तथाचगर्गः। स्निग्धाराश्मि
संयुक्ता द्विशिखाः सिततार
काः। षष्टिस्ते कनकाश्चोराः
शनैश्चरसुता ग्रहाः॥ अथ गु
रुसुताः पंचषष्टिमाह विकचा
नामगुरुसुताः सितैकताराः
शिखापरित्यक्ताः। षष्टिः पं
चभिरधिकाः स्निग्धा याम्याश्रि
ताः पापाः॥ पंचषष्टिः केतवो
विकचा नाम बृहस्पति॥

पुत्राः। तेच सितः श्वेतः एक
तारका येषां चूडा रहिताः।
तेच दक्षिणस्यां दृश्यन्ते पापा
अनिष्टफलदा इत्यर्थः तथा
च गर्गः। स्निग्धाः शुक्ला प्रस
न्नाश्च महारूपाः प्रभान्विताः ए
कतारा वपुष्मन्तो विशिखा रश्मि
भिर्वृताः एते बृहस्पतेः पुत्राः
प्रायसो दक्षिणाश्रयाः नामतो
विकचा घोराः पंचषष्टिर्भया
वहाः॥ अथैकपंचाशत् बुधपु
त्रानाह। नातिव्यक्ताः सूक्ष्मा
दीर्घाः शुक्ला यथेष्टदिक्प्रभ
वाः बुधजास्तस्करसंज्ञाः पाप
फलास्त्वेकपंचाशत्। तस्करना
मान एकपंचाशत् केतवो बु
धपुत्राः नातिस्फुटाः अल्पदे
हाः यथेष्टायां दिशि प्रभव उत्प
त्तिर्येषां सर्वासु दिक्षु दृश्यन्त इ
त्यर्थः ते चानिष्टफलाः तथा
च गर्गः। अरुन्धति समाव्यक्ताः
केचिद्व्यक्ततारकाः पाण्डुवर्णाः
ह्रदीर्घाश्च सूक्ष्मा रश्मिभिरावृताः
एते बुधात्मजा ज्ञेया स्तस्कराख्या
भयावहाः। एकाधिकास्ते पं
चाशद्यो घ्नन्तिचरा ग्रहाः॥
अथ षष्टिं भौमपुत्रानाह।

दहनजानलानुरूपास्त्रिचूलताराः
कुजात्मजाः षष्टिः। नाम्नाच
कौंकुमास्ते सौम्याशा संस्थिताः
पापाः॥ कौंकुमनामानः ष
ष्टिकेतवो मंगलपुत्राः रक्त
रक्तवह्निसदृशाः लोहिता इत्यर्थः
त्रिचूला त्रिशिखास्तारा येषां
तेच उत्तरस्यां दृश्यन्ते तापफ
लाश्च। तथाचगर्गः। त्रिशि
खाश्च त्रितारास्त्र रक्ता लोहित
रश्मयः प्रायसस्त्तरामाशां
सेवन्ते नित्यमेव ते॥ लोहिता
गात्मजा ज्ञेया ग्रहाः षष्टिः स
मासतः। नामतः कौंकुमा
ज्ञेया राज्ञां संग्रामकारकाः
अथ त्रयस्त्रिंशद्राहुपुत्रानाना
ह त्रिंशत् अधिका राहोस्ते
तामसकीलका इति ख्याताः
रविशशिगा दृश्यन्ते तेषां फ
लमर्कचारोक्तं त्रयस्त्रिंशत्
स्वर्भानुपुत्रास्ते च नामतः ता
मसकीलका इति प्रसिद्धाः।
ते च अर्कचन्द्रमण्डलस्थाः दृश्य
न्ते येषां च फलं सूर्यचारे कथि
तं नामसकीलकसंज्ञाराहुसु
ता इति। तथाचगर्गः। कृष्णाभाः
कृष्णपर्यन्ताः संकुलाः कृष्णरश्मय

यः राहुपुत्रास्त्रयस्त्रिंशत् कील
कास्तातिदारुणाः ॥ रविमंडल
गास्तेन दृश्यन्ते चंद्रगा स्तथा ।
तथाच पराशरः । अपर्वण्येव हि
दृश्यन्ते संस्थिताः काककीलकाः
रवेस्त्रिंशता मध्ये सुभयाः
काककीलको ग्रिगाः स्तथा
वापि दृश्यन्ते पुरुषाकृतिः का
कः काकाकृतिर्चौरस्त्रिकोण
वाध्यलक्ष्यन्ते मंडले कीलकोम
ध्ये मंडलस्यासितो ग्रहः महा
न्तपविरोधाय यस्यार्द्धं तस्यम
त्यवे इति ॥ अथ विंशास्थि
कं शात मग्निपुत्रानाह विं
शास्थिक मन्यक्तेन मग्निवि
ख्याद्रूपमस्तानां तीव्रानलभय
दानां ज्वालामालाकुलतनूनां
अग्न्यरूपं शातं विंशास्थिकके
तूनामग्नेः स्तानां विम्बरूप
नाम्नां कीदृशानां ज्वाला मा
लाभिराकुलात्मास्तनवो
मूर्तयो येषां तथातीव्र घोर
मग्निभयं ददति तथाच गर्गः
नानावर्णकृताग्राभाः दीप्तिम
न्तो विचुलिनः । स्तजंत्यग्नि मि
वाकाशे सर्वज्योतिर्विनाशनाः
तेऽग्निपुत्राग्रहा ज्ञेया स्तो ।

केऽग्निभयवेदिनः विंशं ग्रह
शतं घोरं विम्बरूपेति विज्ञेत
अथ सप्तसप्तति वायुपुत्राना
ह । सपादारुणा विताराश्याम
रूपा विकीर्णदीधितयः ।
अरुणाख्या वायोः सप्तसप्ततिः
पापदाः परुषाः अरुणस्ता
वायोः पुत्राः सपाव लोहितव
र्णाः तारकवर्जिताः चामररू
पावालव्यजनाकृतयः व्याधि
मरप्रभयः रूक्षाः दुःखफलप्रदाः
अत्र येषांदिनियमो नास्तितेः
नियतदर्शनाः सर्वास्वपि दिक्षु
दृश्यन्ते तथा च गर्गः अतारूप
प्रतिमाः सपाव रूक्षसवर्णिनः
वालरूपा इवाभान्ति रूक्षविली
र्णरश्मयः सप्तसप्ततिश्चैवाम्य
वायोः पुत्राः प्रचन्दते लोकवि
ध्वंसनाहस्ता नामतस्त्वरुणाग्रहाः
अथाष्टौ प्रजापतिसुतानाह चश
ते चतुरस्रके ब्रह्मणः पुत्रा
स्तानाह । तारापुञ्ज निकाशा ग
णका नाम प्रजापते रष्टौ । द्वे
च शते चतुरस्रके चतुरस्रा
ब्रह्मसंतानाः अष्टौ केतवो ग
णकानाम प्रजापतेः पुत्राः ।
तेच तारागणनदमाणां पुञ्जः

समूह स्तदाकाराः तेच अशुभ
दायिनः । तथा चा द्वे शते चतु
रस्रके केतूनां ते चतुरस्रसंस्थाः
चतुराकृतय स्ते च ब्रह्मणः
पुत्राः पापफला एव ज्ञेयाः
तेचाग्नेयदिग्भवाः । तथा च
गर्गः । तारापुञ्जप्रतीकाशा ।
व्योममंडलसंस्थिताः प्राजाप
त्या ग्रहा स्त्वष्टौ गणका भयवे
दिनः अस्राश्च चतुरस्रा वाम
शिखाः श्वेतरश्मयः द्वे शते च
तुरस्रे ब्रह्मजा भयदाश्च ते
अथ द्वात्रिंशद्वरुणपुत्राना
ह कंकानामवरुणजा द्वात्रिं
शत् गुल्मसंस्थानाः शशिव
प्रभासमेता स्तीव्रफलाः के
तवः प्रोक्ताः ते वरुणपुत्राः
वंश गुल्मवत् संस्थानमाकृ
तिर्येषां गुल्मपकस्मल्लेजो ल
तासमूहः । शशिवत् चंद्रवत्
प्रभयाकान्त्या समेता स्तेवतीव्रफ
लाः कष्टफलाः प्रोक्ताः कथिता
स्तेचानियतदिक्प्रभवाः तथा
च गर्गः वंश गुल्मप्रतीकाशा
महान्तः पूर्णरश्मयः काकत
एतनिभश्चापि रश्मिभिः केचिद्
वृताः मयूखानुन्नतं तीव स्निग्ध

त्वात् सौम्यदर्शनाः पते कष्ट
फलाः कंका द्वात्रिंशद्वारुण
ग्रहाः ॥ अथ षण्णवतिः काल
सुतानाह षण्णवति कालसुताः
कबंधसंज्ञाः कबंधसंस्थानाः
पुण्डभयप्रदाः स्युः विरूपताराः
स्ते शिखिनः कालपुत्राः कबंध
संस्थानाः षण्णवतिः कबंध छि
क्षेत्रस्य पतिना चैव भूतानां
पतये तथा॥ रक्षोघ्नेनैवमंत्रे
ण होतव्यं विधिपूर्वकं। हु
ताज्याभिः समिद्भिश्च तिलहो
मं ततः परं॥ दशैकं प्रतिवा
कुर्यात् दश विंशतिमेव च। प
केकं प्रति पूर्णास्यात् तदत्र ऋ
षिसत्तमाः॥ बालहृतोऽदेवो
ऽस्थस्तथा हवींकरोद्भवाः
होतव्याल्लक्षहोमे तु सायप्याः
कामिकं परं श्रीसूक्तं पावमा
नं च पौरुषं गणं तथा रौद्रमैं
द्रवासमेव सूक्तं स्तुतं॥
महान्यस्तु होमान्ते कुर्यात् वै
सर्वसिद्धिदं। सम्यक् पूर्णाततो
दद्यात् समते अभिमंत्रितेन। न
मोब्रह्मणेति चामंत्रस्तस्मिन्
चैतवंचते। रत्नैर्वीजैः शुभैर्व
स्त्रैर्हेम्ना चैव तत्संयुतं॥ त
ज्जलेनाभिषिंचेत देवस्य त्व

तिवैतदा। यस्तु नानादिभिर्मं
त्रैरभिषिंचेत्ततः क्रमात्॥ प
वंयः कुरुते राजा लक्षहोमं यत
व्रतः। न तस्य शत्रवः सर्वेऽप्य
ग्रेग्रे तिष्ठंति कर्हिचित्॥ न
चैव मरको देशो व्याधिर्वा जाय
ते तथा। अतिवृष्टिरनावृष्टिर्मू
षकाः शलभाः शुकाः॥ रा
क्षसाद्या विनश्यंति सर्वास्तत्र न
श्यंतयः। रक्षंति च तोयानि श
स्यं च निरुपद्रवं॥ जायते यस्य
वेशाय भिषासान किंभवेत्।
कोटिहोमंतु यो राजा कारये
द्विधिपूर्वकं॥ न तस्य मान
सो दाह इहलोके परत्र च।
कोटिहोमेन वरयेत् ब्राह्मणान्
विंशतिं नृप॥ शक्रेनैव सह
स्रं वा यईछंति मात्मनः। को
टिहोमस्वयं यस्तु कुरुते श्रद्धया
द्विजः। क्षत्रियो वाप्य वैश्यो वा त
स्य पुण्यफलं महत्। यद्यदिच्छ
ति कामांस्तांस्तदाप्नोत्यसंशयं
सशरीरोऽपि चेद्धतं दिव्यमिच्छेत
दाप्नुयात्। सावित्री परमा देवी
सावित्री पावनं परं॥ सर्वका
मप्रदायेव सावित्री क ॥

थितातव। अभिचारेषु तां
देवीं विपरीतां विचिंतयेत्॥
कार्या व्याहृतयश्चात्र विप
रीतास्तथा। विपरीताच
रं कार्याषिरश्च ऋषिसत्तम॥
आदौ शिरः प्रयोक्तव्यं प्रणवो
ऽन्तेन वै न्यसेत्। मतिस्यनेवफ
ट्कारं मध्येनाम प्रकीर्तितं॥
गायत्रीं चिंतयेत् दीप्तामनल
सम प्रभां। घातयंतीं त्रिशूले
न भ्रुकुटी भूषिताननां। उच्चा
टनेत्वतां देवीं वायुभूतां विचिं
तयेत्॥ धावमानंतथासाध्य
तस्माद्देशात्तु हरन्तः। अभिचा
रेषु होतव्या राजिका विषमि
श्रिताः॥ स्वरक्तमिश्रं होतव्यं
कटुतैलमथापिवा। तथापिच
विषं देयं होमकाले प्रयत्नतः
क्रोधेन महतो विष्टः परामभि
चरेद्बुधः। न जलात् यदि क्रोधे
न सर्वं न पूयेत् स पचति प्रता
गक्षिन कर्तव्यमभिचारमतो
बुधैः स्वल्पागासिन कर्तव्या ह
चारो महामुने॥ महापराधं
विभिनं देव ब्राह्मणकण्ठकं
अभिचारेण ॥

योहन्या ग्रसदोषेण लिप्यते॥
धर्मप्रधाने तत्तथा स्वल्यागसि
तथैव च। अभिचारं न कुर्वीत
बहुपापविचक्षणः॥ बहूनां
कंवकं यस्तु पापात्मानं सदुर्मा
ति। हन्यात्स्वाम्यपराधं तु तस्य
पुण्यफलं महत्॥ ये भक्ताः पुं
डरीकाक्षे वेदयज्ञे द्विजे जने।
न तानभिचरेत् जातु तत्र नहि
फलं भवेत्॥ नहि केशवभक्ता
ना मभिचारेण कर्हिचित्॥ वि
नाश मभिपद्येत तस्मात्तत्स
माचरेत्॥ सेयं धात्री विधात्री
च सा विश्वं चैव विनाशिनी। प्रा
णायामेन जप्येन तथा चान्त
र्जलेन च॥ सव्याहृतीकप्रणवा
जप्तव्या शिरसा सह। प्रणवेन
तथा न्यस्ता वाच्या व्याहृतयः प्र
थक्॥ देवतं सविता प्रस्या गा
यत्रं छंद एव च। विश्वामित्र ऋ
षिश्चैव प्रोच्यते ऋषिसत्तम॥
कर्मेंद्रियाणि पंचैव पंच बुद्धींद्रि
याणि च। पंचेंद्रियार्थाः सम्मह
न्भूतानां पंचपंचकं॥ मनो
बुद्धिस्तथैवात्मा अव्यक्तमृषि
सत्तम। चतुर्विंशत्यथैतानि
गायत्र्या अक्षराणि तु॥ प्राणे।

वेपुरुषंविद्धिसंगतं पंचविंशकं
समलोकाश्च येचेह महात्मा
दृ नयसत्तथा॥ शिरश्चतन्तथा
काद्यः पुरुषः परमेश्वरः। प
र्वविधाच गायत्री जप्तव्या रा
जसत्तम॥ होतव्या च यथा
शक्त्या सर्वकामसमृद्धिदा।
सावित्रीसारमात्रोपि वरं वि
प्रः सुयंत्रितः॥नीयंत्रितश्चतु
र्वेदी सर्वाशी सर्वविक्रयी।
गायत्रीजपतेयस्तु त्रिकालं।
ब्राह्मणःसदा॥ अर्थीप्रतिग्रही
वापिसगच्छेत्परमांगतिं।
गायत्रीजपतेयस्तु कल्पमुच्या
ययोद्विजः॥ सलिप्यतिनपा
पेनपद्मपत्रमिवाम्भसा। का
मकामीलभेत्कामान्गति
कामश्चसद्गतिं॥ अकामःस
मवाप्नोतितद्विष्णोःपरमंप
दं। इत्याद्ये वह्निपुराणेगाय
त्रीकल्पनामाध्यायः॥
गारुडं क्ली गरुडपुराणं।
यथा गरुड उवाच ममताता
च विनतानागेर्हीसीक्षताहरे
यथाहंदेवतान्जित्वाचा।
मृतंस्थानयामितत्॥ दास्या
द्विमोचयिष्यामियथाहंवार

नंतव। महाबलोमहावीर्यःस
र्वज्ञोनागदारणः। पुराणसं
हिताकर्त्ता यथाहंस्यांतथाकुरु
विष्णुरुवाच। यथा त्वयोक्तंगरु
डतथा सर्वंभविष्यति। देवा
दीन्सकलान्जित्वाचामृतं
त्वानयिष्यसि। नागदास्यान्मा
तरंस्वांविनतां मोचयिष्यसि।
महाबलो वाहन त्वं भविष्य
सिविषार्द्दन॥ पुराणंमत्प्रसा
दात्त्वं मममाहात्म्यवाचकं
यदुक्तंमनसस्त्वंपंचमवचाविभ
विष्यति॥ गारुडंतवनाम्नातत्
लोकेख्यातिंगमिष्यति। यथाहं
देवदेवानांश्रीःख्यातोविनता
त्मज। तथाख्यातिंपुराणेषुगारु
डंगरुडैष्यति। यथाहंकीर्त्तनी
योऽयतथात्वंगरुडात्मना॥
मांध्यात्वापठितंमुख्योऽदंपुराणं
गदगारुडं। इत्युक्तोगरुडोरुद्रक
श्यपायात्स्वपने॥ कश्यपोगरु
डंश्रुत्वाहृदंदग्धमजीवयत्। स
पंचाप्यमलोभूत्वाविद्ययान्यान्
जीवयत्। पक्षीडं त्वाहाजापी
विद्येयंगारुडीपरा। गारुडोहं गा
रुडं हि श्रृणु रुद्र महात्म
के॥ इत्याद्ये॥

महापुराणेगारुडे प्रश्नाध्या
योनाम द्वितीयः॥ गारुडी
विद्या गरुडपुराणे २.२॥
अध्यायादौ द्रष्टव्या॥
गालोडनं क्ली उन्मादः॥
रोगः॥ मूर्खत्वं। इति वस्मा
णशब्दर्शनात्॥
गालोडितः त्रि उन्मत्तः रुग्नः
मूर्खः यथा। उन्मादशीलेरो
गार्तेमूर्खे गालोडितः स्मृतः
इति दुर्गासिंहकृतकलापह
त्तिटीकायांत्रिलोचनदासः
गोलोहितोपि पाठः॥
गावौ पुं ग्रामः। यथा। प
केकेन तथा द्वाभ्यां वचनै
स्त्रिभि रेवच। साकांक्षत्वप्र
युक्तेननाम पंचविधंस्मृतं॥
एकवचनसाकांक्षत्वमुक्तंप
कविंशत्यादिशब्दे। उभयपदद्वि
पदंपुष्पवनपदंसर्वेयेप्सि
तादिपदंभूस्त्वयोरस्मादि
पदंग्रामेगोपदंचद्विवचनमाके
णकांक्ष। इति। तदा गावौ
ग्राम इत्यादाविवसाधुत्वार्थ
कमेव तत्र द्विवचनमिति
वदंति। इति च शब्द श।
क्तिप्रकाशिका॥

गारु ड उ. विलोड़े।
ड. गारूत्तो महिषा निपान
पालिल मिति शाकुन्तले। ऊ
अगाहिष अगाढ। इति दुर्गा
दासः॥
गीतासारः पुं अर्जुनं प्रति
श्रीकृष्णोक्तमुक्त्यर्थाष्टांगादि
योगः। यथा। श्रीभगवानुवाच
गीतासारंप्रवक्ष्याम्यर्जुनायो
दितंपुरा। अष्टांगयोगयुक्तात्मा
र्थसर्ववेदान्तसारगं॥ आत्म
लाभपरोनान्य आत्मा देहा
दिवर्जितः। रूपादिमान्हि
देहोऽतः करणत्वादि लोचनं
करणत्वान्मनोऽपीनो न प्राणो
ऽचेतनोयतः। विज्ञानरहितः
प्राणः सुषुप्तेहि प्रतीयते। नाह
मात्मा चहंकृत्वादि संसाराभिस
मन्वयात्। विधूमइवदीपार्च्चि
रादित्यइवदीप्तिमान्वैद्युतोऽ
ग्निरिवाकाशे हृत्स्थो ज्ञेयात्म
नात्मनि। श्रोत्रादीनिन पश्यति
स्वंस्वमात्मानमात्मना॥ सर्व
ज्ञः सर्वदर्शीच क्षेत्रज्ञस्ता
नि पश्यति। स्वानीह म
नसा रश्मीन्यदासंगाड़ नि

स्यइ. निगच्छति तदाप्रकाशतेस्या
त्माघटेदीपोज्वलन्निव। ज्ञानमु
त् पद्यतेपुंसांक्षयात् पापस्यक
र्मणः॥ यथादर्शतलप्रख्ये
पश्यत्यात्मान मात्मनि। इंद्रिया
णींद्रियार्थाश्च महाभूतानि पं
चम। मनोबुद्धि महंकार मव्यक्तं
पुरुषंतथा। प्रसंख्यायपरावा
प्तोविमुक्तोवंधनै र्भवेत्॥
इंद्रियग्राम मखिलंमनसाभि
निवेश्यच। मन श्चैवाप्यहंका
रे प्रतिष्ठाप्य च पाण्डव॥
अहंकारंतथाबुद्धौबुद्धिंचप्र
कृतावपि। प्रकृतिंपुरुषेस्था
प्यपुरुषंब्रह्मणिन्यसेत्। अहं
ब्रह्मपरंज्योतिः प्रसंख्यायवि
मुच्यते। द्विद्वादशेभ्यः स्थानेभ्यः
पुरुषः पंचविंशकः॥ विवे
कात्केवलीभूतः षड्विंश
मनुपश्यति। नवद्वार मिदं
गेहंत्रिस्थूणंपंचसाक्षिकं॥ दे
वज्ञाधिष्ठितंविद्वान्योवेदसव
रः कविः। अश्वमेधसहस्राणिवा
जपेयशतानिच। ज्ञानयज्ञस्य
सर्वाणिकलांनार्हन्तिषोडशीं।
इति गारुडे २३३ अध्यायः।
श्रीभगवानुवाच। यमाश्च।

नियमाः पार्थआसनंप्राणसं
यमः। प्रत्याहारस्तथाध्यानं
धारणार्जुनसप्तमी॥ समाधिर
ष्टमःप्रोक्तोयोगउक्तोविमुक्तये
कर्मणामनसावाचासर्वभूतेषु
सर्वदा॥ अक्लेशजननं प्रोक्तंभू
तानांयदहिंसनं। अहिंसापर
मोधर्मोह्यहिंसापरमंसुखं
विधिनायाभवेद्धिंसासात्वहिंसा
प्रकीर्तिता। यथा नागप
दे ऽन्यानिपदानिपदगामिनां
सर्वाण्येवापिधीयन्तेपदजाता
निकौंजरे। एवंसर्वहिहिंसा
यांधर्मार्थ मपिधीयते॥
यद्भूतहित मत्यन्तंवचः सत्य
स्यलक्षणं। सत्यं कथयात्प्रियं
कथयान्नकथयात् सत्य मप्रियं
प्रियंचनानृतंकथयान्नएषधर्मः
सनातनः। यच्च द्रव्यापहरणं चौ
र्याद्वाथ बलेनवा॥ स्तेयंत
स्यानाचरणमस्तेयंधर्मसाधनं।
कर्मणामनसावाचासर्वावस्था
सुसर्वदा सर्वत्र मैथुनत्यागंब्र
ह्मचर्यंप्रचक्षते। द्रव्याणामप्य
नादानमापद्यपियथेच्छया॥
अपरिग्रहमित्याहुस्तंप्रयत्नेन
वर्जयेत्। द्विधाशौचमजला।

भ्यांवाह्यमाभ्यन्तरं॥ य
दृच्छालाभतस्तुष्टिः संतोषः सु
खलक्षणं। मनसश्चेन्द्रियाणांच
ऐकाग्र्यंपरमंतपः॥ शरीरशो
षणंवापिकृच्छ्रचान्द्रायणादि
भिः। वेदान्तशतरुद्रीयप्रणवा
दिजपंबुधाः॥ सत्वशुद्धिकरंपुं
सांस्वाध्यायं परिचक्षते। स्तु
तिस्मरणपूजादिवामनःका
यकर्मभिः। सुनिश्चला हरेर्भ
क्तिरेतदीश्वरचिंतनं। आसनं
स्वस्तिकंप्रोक्तंपद्ममर्द्धासनंतत
था॥ प्राणः स्वदेहजोवायुरा
यामस्तन्निरोधनं प्राणायामं
निरोधस्तु प्राणायाम उपस्थि
तः॥ इंद्रियाणां विचरतांविष
येष्वस्वभावतः। नियमः प्रोच्य
तेसद्भिः प्रत्याहारस्तु पाण्डव
मूर्तामूर्तंब्रह्मरूप चिन्तनं
ध्यानमुच्यते। योगारंभेमूर्त्तंहरिं
हि ममूर्तं मथ चिंतयेत्॥ ना
भिकन्देस्थितंनालंदशांगुल
समायुतं। नालेनाष्टदलंपद्मं
द्वादशांगुलविस्तृतं। सकर्णि
केकेशराले सूर्यसोमाग्निमण्ड
लं। अग्निमण्डलमध्यस्थो वासुदे
वश्चतुर्भुजः॥ शंखचक्रगदापद्म

युक्तः कौस्तुभसंयुतः। वनमा
लीकौस्तुभेन युतोः हृद्ब्रह्मसु
क्तं॥ धारणोच्यते चेयं ध्या
ध्येन यन्मनोमये। प्राङ्गाभ्यां
हृदयेचान्तर्तीयाच तथोर।
सि॥ कण्ठेमुखे नासिकाग्रेनेत्र
भ्रूमध्य मूर्द्धसु। किंचितस्मा
त् परस्मिंश्च धारणोदशकीर्त्ति
ताः। अहंब्रह्मेत्यवस्थानः समा
धिः स्याद्देशलक्षणवर्जितः।
इतिगारुडे २३४ अध्यायः॥
श्रीभगवानुवाच ब्रह्मगी
तांप्रवक्ष्यामियांज्ञात्वा मुच्य
तेभवान्। अहंब्रह्मास्मीतिवा
क्यज्ञानान्मोक्षो भवेन्नृणां
वाक्यज्ञानंभवेज्ज्ञानादहंब्रह्म
पदार्थयोः। पदद्वयार्थौहि वि
धौ वाच्यौ लक्ष्यौ स्मृतौ बुधैः।
वाच्यौ दशावलौ ज्ञेयौ लक्ष्यौ
शुद्धौ प्रकीर्तितौ। प्राणपिण्डा
त्मकार्य्येण चेतनं शरणन्तु।
यत्॥ तथा वै देवपर्यन्त महं
शब्देन नोच्यते। प्रत्यग्रूप म
द्वितीयमहं शब्देन भण्यते
अहद्वयानंदचेतन्य परोक्षस
हितपरं। प्राणपिण्डात्मका
पार्थसद्वितीयविभागकं।

गोजति। कूजन मव्यक्तशब्दः इति दुर्गादासः ॥

गुज इ कूजने। पंचमस्वरी इ गुंज्यते। कूजनमव्यक्तशब्दः। गुंजति भ्रमरः कुंजे इति दुर्गादासः ॥

गुज शि ध्वनौ। शि गुजति अगुजीत् जुगोज। इति दुर्गादासः ॥

गुठ इ क वेष्टे। कस्वी। इ क गुण्ठयति अजुगुण्ठत्। इति दुर्गादासः ॥

गुड इ क वेष्टे ॥ रक्षे। पंचमस्वरी। इ क गुण्डयति अनेकार्थत्वाच्चूर्णीकरणेपि गुण्डयति हिंगुलं लोकः। इति दुर्गादासः ॥

गुड शि रक्षे॥ अद्यान्ते। शि गुडति अगुडीत्। इति दुर्गादासः ॥

गुण न क मंत्रे। कस्वी अदन्तोपधः। गुणयति। इति दुर्गादासः ॥

गुणः पुं धनुराकर्षणरज्जुः। छिला इति भाषा। तत्पर्यायः। शिंजा १ ज्या २ ... ६ पतंचिका ७ इति शब्दरत्नावली॥ जीवा ८। इति जटाधरः ॥

गुद उ खेलने। उ गोदते। इति दुर्गादासः ॥

गुदभ्रंशः पुं मलद्वारनिर्गमरोगः। तच्चिकित्सा यथा। गुदभ्रंशे गुदं स्विन्नं स्नेहेनाक्तं प्रवेशयेत्। प्रविष्टं रोधयेच्च त्वाहृव्यासक्तिद्वर्मणा ॥ पद्मिन्याः कोमलं पत्रं यः खादेत् शर्करान्वितं। एतन्निश्चितनिर्दिष्टं नन्स्य गुदनिर्गमः॥ मूषकाणां वसाभिर्वा गुदभ्रंशे प्रलेपनं। सुस्विन्नं मूषिकामांसेनाथ वा स्वेदयेद्गुदं ॥ हत्वाम्लानलं चांगेरी विल्व पाठा यवाग्रजं। तक्रेण शीलयेत् पायुभ्रंशार्त्तो ऽनलदीपनं ॥ मूषकान् दश मूलानि गृह्णीयाद्भयं समं। तयोः क्वाथेनकल्केन पचेत्तैलं यथोदितं अभ्यंगात्तस्य तैलस्य गुदभ्रंशो विनश्यति। विनश्यति तथा तेन गुदभ्रंशभगंदरः॥ मूषकतैलं। इति भावप्रकाशः ॥

गुद इ क क्रन्दे। पंचमस्वरी। इदन्त्यवर्गान्तनीयोपधः।

कुन्द्रो मिथ्योक्तिः। इ क गुंदयति नीचः मिथ्या वदतीत्यर्थः। गुन्द्र इत्यनेनैवेष्टसिद्धेइदन्त्यवर्णो वेदेषूच्चारणार्थः। इति दुर्गादासः ॥

गुध उ. क्रीडे। उ. गोधते। इति दुर्गादासः ॥

गुध य वेष्टे। य गुध्यति जुगोध। इति दुर्गादासः ॥

गुध ग रुषि। ग गुध्नाति जुगोध। इति दुर्गादासः ॥

गुन्फ श ग्रन्थे। पंचमस्वरी। श गुफति मालां मालिकः जुगुम्फ। इति दुर्गादासः ॥

गुप उ. गोपनकुत्सयोः। गोपनमपह्नवः। उ. कंकणं कनत्कारं च किं गोपसे। अत्र त्वाद्यो नस्त इति रमानाथः। कुत्सा निंदा। साजुगुप्सां प्रचक्रेऽस्मत्। इति भट्टिः। इति दुर्गादासः ॥

गुप य इर व्याकुलत्वे। व्याकुलत्वं व्याकुलीभावः स्तम्भकरणं च। य धीरो न गुप्यति महत्यपि कार्यजाते। इति हलायुधः। गुप्यति गां तृषितः। व्याकुलीकरोतीत्यर्थः। इति चतुर्भुजः। इर अगुपत् अगोपीत्। अस्मात् पुषादित्वात् नित्य उ. इत्यन्ये। इति दुर्गादासः ॥

गुप ऊ रक्षे। आयन्तत्वादुभयपदमिति वोपदेवः। गोपायति गोपायते। अरेतु आयस्याप्राप्तिपक्षे परस्मैपदमेव। अगोपीत्। जुगोप गोरूपधरामिवोर्वीमिति रघुः। ऊ गोपिष्यति गोप्स्यति। इति दुर्गादासः ॥

गुप क भासि। क गोपयति। भासि दीप्तौ। इति दुर्गादासः ॥

गुफ प श ग्रन्थे। पंचमस्वरी। प श गुम्फति मालां मालिकः। जुगोफ। इति दुर्गादासः ॥

गुर उ ई शि उद्यमे। कस्वी। उ. शि गुरते अगुरिष्ट। ई गुर्णः। इति दुर्गादासः ॥

गुरुः पुं मंत्रदाता। तस्य वर्जनीयत्वं यथा। अभिशप्तमपुत्रं च सन्नद्धं कितवं तथा। क्रियाहीनं कल्पाङ्गं वामनं गुरुनिंदकं॥ सदा मत्सरसंयुक्तं

गुरुं मन्त्रेषु वर्ज्जयेत्। गुरुर्म्मन्त्रस्य मूलं स्यात् मूलशुद्धौ सदा शुभं॥ इति कालिकापुराणे ५४ अध्यायः॥ अपि च क्रियासारसमुच्चये। श्वित्री चैव गलत्कुष्ठी नेत्ररोगी च वामनः। कुनखी श्यावदन्तश्च स्त्रीजितश्चाधिकाङ्गकः। हीनाङ्गः कपटी रोगी बह्वाशी बहुजल्पकः। एतैर्दोषैर्विहीनो यः स गुरुः शिष्यसंमतः। इति तन्त्रसारः। गुरुवर्गो यथा। उपाध्यायः पिता ज्येष्ठभ्राता चैव महीपतिः। मातुलः श्वशुरस्त्राता मातामहपितामहौ। वर्णज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः। मातामही मातुलानी तथा मातुश्च सोदरा॥ श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रीषु। इत्युक्तो गुरुवर्गोऽयं मातृतः पितृतो द्विजाः। अनुवर्त्तनमेतेषां मनोवाक्कायकर्म्मभिः। गुरुं दृष्ट्वा समुत्तिष्ठेदभिवाद्य कृताञ्जलिः। नैतैरुपविशेत् सार्द्धं विवदेन्नात्मकारणात्। जीवितार्थमपि द्वेषाद्गुरुभिर्नैव भाषणं॥ उदितोऽपि गुणैरन्यैर्गुरुद्वेषी पतत्यधः। गुरूणाञ्चैव सर्व्वेषां पूज्याः पञ्च विशेषतः। तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता। यो भावयति या सूते येन विद्योपदिश्यते॥ ज्येष्ठभ्राता च भर्त्ता च पञ्चैते गुरवः स्मृताः। आत्मनः सर्व्वयत्नेन प्राणत्यागेन वा पुनः। पूजनीया विशेषेण पञ्चैते भूतिमिच्छता। यावत् पिता च माता च द्वावेतौ निर्व्विकारिणौ। तावत् सर्व्वं परित्यज्य पुत्त्रः स्यात्तत्परायणः। पिता माता च सुप्रीतौ स्यातां पुत्त्रगुणैर्यदि॥ स पुत्त्रः सकलं धर्म्मं प्राप्नुयात्तेन कर्म्मणा॥ नास्ति पितृसमं दैवं नास्ति मातृसमं गुरुः॥ तयोः प्रत्युपकारोऽपि न कथञ्चन विद्यते। तयोर्नित्यं प्रियं कुर्य्यात् कर्म्मणा मनसा गिरा॥ न ताभ्यामननुज्ञातो धर्म्ममन्यं समाश्रयेत्। वर्ज्जयित्वा मुक्तिफलं नित्यं नैमित्तिकं तथा। धर्म्मसारः समुद्दिष्टः प्रेत्यानन्तफलप्रदः। सम्यगाराध्य वक्तारं विसृष्टस्तदनुज्ञया।

शिष्यो विद्याफलं भुङ्क्ते प्रेत्य वा पद्यते दिवि॥ यो भ्रातरं पितृसमं ज्येष्ठं मूढोऽवमन्यते। तेन दोषेण स प्रेत्य निरयं घोरमृच्छति॥ पुंसां वर्त्मनि तिष्ठेत पूज्यो भर्त्ता तु सर्व्वदा। अपि मातरि लोकेऽस्मिन्नुपकाराद्धि गौरवं॥ ये नरा भर्त्तृपिण्डार्थे स्वान् प्राणान् संत्यजन्ति हि। तेषामथाक्षया लोकाः प्रोवाच भगवान् मनुः। मातुलांश्च पितृव्यांश्च श्वशुरांस्त्वृत्विजो गुरून्। असावहमिति ब्रूयात् प्रत्युत्थाय यवीयसः॥ इति कूर्म्मपुराणे उपविभागे ११ अध्यायः॥ तस्य परीक्षा यथा। सदाचारः कुशलधीः सर्व्वशास्त्रार्थपारगः। नित्यनैमित्तिकानाञ्च कार्य्याणां कारकः शुचिः। अपर्व्वमैथुनपरः पितृदेवार्च्चने रतः। गुरुभक्तो जितक्रोधो विप्राणां हितकृत् सदा। दयावान् शीलसम्पन्नः सत्कुलीनो महामतिः। परदारेषु विमुखो दृढसङ्कल्पको द्विजः। अन्यैश्च वैदिकगुणैः कार्य्यो गुरुर्नृपैः। एतैरेव गुणैर्युक्तः पुरोधाः स्यान्महीभुजां॥ इति युक्तिकल्पतरुः॥ शिष्यकृतपापं गुरुः स्पृशति यथा। मन्त्रिपापं च राजानं पतिं जाया यथाकृतं तथा। तथा शिष्यकृतं पापमाद्यो गुरुमपि स्पृशेत्॥ प्राय इति गुरुणा शिष्यः सम्यग्बोधितोऽपि तदाकारमनादृत्य पापं वेदाचरति तदा तत्पापं गुरौ न व्याप्नोतीत्यर्थः॥ वर्णाश्रमाणां सर्व्वेषामाचारः सद्गतिप्रदः। गुरुः शिवाश्रमाचारं बोधयेत् कलनाधिके॥ न स्पृशन्ति हि शिष्यस्य तदा पापं गुरोर्न हि। इति कलार्णववचनात्। इति शिवार्च्चनचन्द्रिका॥ गुरुतालः पुं तालविशेषः। यथा। एकपत्रगुरुर्यत्र गुरुतालः स कथ्यते। अपरं नियमं विना। इति सङ्गीतदामोदरः॥ गुर्द क निकेतने॥ कुर्द दीर्घिणो वक्ष्यमाणत्वादस्य न दीर्घः। क गुर्दयति। निकेतनं निवासः। इति दुर्गादासः॥ गुर्द उ कुर्दे। दीर्घिणो वक्ष्यमाणत्वादस्यापि न दीर्घः। उ गुर्दते। कुर्दः क्रीडा। इति।

दुर्गादासः ॥
गुर्व ई उद्यमे । ऋस्वी ।
गुः गुरौ गुरः । ई गुर्णः
गुर्वति पन्तिः खङ्ग । इति
दुर्गादासः ॥
गुल्मः पुं उदरजरोगविशेषः
तच्चिकित्सा यथा । वातात्
तैलेन पयोघृतेन पथ्याश
नेनैतेन विरेचनेन हि । संस्वेदनैः
स्निग्धमतिप्रशस्तं प्रभञ्जन
क्रोधकृतेन गुल्मे । स्वर्जिका
कुष्ठसहितः क्षारः केतकसं
भवः । पीतस्तैलेन शमयेद्गु
ल्मं पवनसंभवं ॥ तित्तिरांश्च
मयूरांश्च कुक्कुटान् क्रौञ्चवर्त्त
केकान् । सर्पिःशालिप्रसन्नां
च वातगुल्मे प्रयोजयेत् ॥
पित्तगुल्मे त्रिवृच्चूर्णं पातव्यं त्रि
फलाम्बुना । विरेकाय सिताक्षौ
द्रं कम्पिल्लं वा समाक्षिकं ॥ त्रि
फलाम्बुना त्रिफलाक्वाथेन ।
कम्पिल्लं कपिला इति लोके ।
अभयां द्राक्षया खादेत् पित्त
गुल्मी गुडेन वा । योगैश्च वा
तगुल्मोक्तैः श्लेष्मगुल्ममुपा
चरेत् । अपरैश्च बलासघ्नैः
क्रियायोगैः प्रशमनयत् ॥ ।

हिङ्गु ग्रन्थिक धान्य जीरक व
चाचव्याग्निपाठा शटी वृक्षाम्ल
लवणत्रयत्रिकटुकंक्षारद्वयं दा
डिमं । पथ्या पौष्करवेतसाम्ल
तुषाजाज्यस्लेदभिः कृतं चूर्णं
भावितमेतदार्द्रकरसैः स्याद्बी
जपूरद्रवैः ॥ गुल्माध्मानगुदा
कारान् ग्रहणिकोदावर्त्तसंज्ञा
नदोषत्स्याध्मानगरोदराश्मरिषु
नोस्तनीहृद्यारोचकान् । उरुस्त
म्भमतिभ्रमं वमनं सोवाधिष्ठी
मष्टीलिकां प्रत्यष्टीलिकयाप्स
हापहरनेयाकुपीतमुष्णाम्बुना
हन्त्यतिवंदत्तणकटीजठरान्त
रेषु वस्तिस्तनांशफलकेषु च पा
र्श्वयोश्च । शूलानि नाशयति वा
तबलासजानि हिङ्ग्वाद्यमाद्यमि
दमाश्विनसंहितोक्तं ॥ हिङ्ग्वादि
चूर्णं ॥ धीमानुपचरेद्गुल्मं प्रत्या
ख्याय त्रिदोषजं । सन्निपातो
त्थिते गुल्मे त्रिदोषघ्नो विधिर्हि
तः ॥ क्षारषट्कवस्त्रलवणं पथ्या
चूर्णं समं द्वयं ॥ शाणप्रमाण
मश्नीयाच्चूर्णं गुल्मगदापहं ॥
स्वर्जिका शाणमाना स्यात्ताव
देव गुडं भवेत् । अभयो र्वटिकां
खादेद्गुल्मामयविनाशिनीं ॥

पलाश वज्री शिखरि चिञ्चा
र्कतिलनालजाः । यवजः स्व
र्जिका चेति क्षारा अष्टौ प्रकी
र्त्तिताः ॥ गुल्मशूलहराः क्षा
रा अजीर्णस्य च पाचनाः । क्षा
राष्टकं ॥ सामुद्रं सैन्धवं का
चं यवक्षारः सुवर्चलं । टङ्क
णं स्वर्जिकाक्षारस्तुल्यं चूर्णं
प्रकल्पयेत् ॥ वज्रीक्षीरे रवि
क्षीरे सातपे भावयेत् त्र्यहं । वे
ष्टयेदर्कपत्रेण रुद्ध्वा भाण्डे पु
टे पचेत् ॥ ततः क्षारं चूर्णयेत् प
श्चात् त्र्यूषणं त्रिफला तथा य
वानीजीरकौ वह्निचूर्णमेषां च
कारयेत् । सर्वचूर्णसमः क्षारः स
र्वमेकत्र कारयेत् । उच्चूर्णं ह
कपुगलसलिलेन प्रयोजयो
जयेत् । गुल्मशूले तथाजीर्णे शो
थे सर्वोदरेषु च । मन्दे वह्नावुदाव
र्त्ते प्लीह्नि चापि परं हितं ॥ वातेषि
केजल्लैः कोष्ठे हितं पित्तेः पि
के ह्युतैः । गोमूत्रेणकफाधि
के काञ्जिकेन त्रिदोषजे वज्र
क्षार इति ख्यातः प्रोक्तः पूर्व
स्वयम्भुवा । सेवितो हरते ऽ
जीर्णं तथाऽजीर्णभवान् ग
दान् । वज्रक्षारः ॥ ॥

सुवर्च्चिकाटंकमिता शाणमा
नार्द्रिका पिच । उभे भुञ्जीत यु
गपद्गुल्मामयनिवृत्तये ॥ सु
वर्च्चिका सोरा इति लोके शा
लिकाचूर्णगदिकोटकमात्रा
सुवेष्टयेत् । गुडेन शाणमाने
नतां गिलेत् गुल्मरोगवान् ॥
गुल्मीऊष्मातिकामां संकर्षार्द्ध
गोदुग्धलिनं । गिलेत् चोषा
भयासिंधुसूक्ष्मचूर्णावधूलि
तं कुमारिका घिउ कुँआरी इ
ति लोके ॥ वल्लूरं मूलकं म
त्स्यं शुष्कशाकानि वैदलं ।
न खादेदालुकं गुल्मी मधुराणि
फलानि च ॥ वैदलानां निषेधे
पि माष कुलत्थयो र्नात्र नि
षेधः । इति सुश्रुतटीका ।
इति गुल्माधिकारः । इति
भावप्रकाशः ॥
गुल्मशूलः पुं रोगविशेषः
तस्यौषधं यथा । नारीदुग्ध
दिने पीत्वा गोक्षीरेण पक्वास
नः । श्वेतार्कस्य तु वै मूल
तस्मात् गुल्मशूलमुत इ
तिगारुडे १९३ अध्यायः ॥
गुल्मिनी स्त्री विस्तृतलता ।
तत्पर्य्यायः । वीरुधा ४ प्रवः

रुतं ५ । इति शब्दरत्नावली ॥
गुरु उ म संवृतौ ।
ऋसी । ऊ अगूहीत् । गृहोद
२ न्तान् गूहति गुहते । गुहो गुणो
ऋदिति दीर्घः । इति दु
र्गादासः ॥
गुरुषष्ठी स्त्री मार्गशीर्षमा
सीयशुक्लषष्ठी । यथा भविष्ये
ये ये मार्गशिरे मासि षष्ठी भरत
सत्तम गुरुपापहरा पुण्या शि
वा पांतां गुहप्रिया ॥ शुक्लपक्षे गु
हषष्ठी । इति तिथ्यादितत्त्वं ॥
गु ओ पि विहृत्सर्गे ।
ओ गूनः । पि गुवति य
गुवीत् । विट्सर्गि हदनं । इ
ति दुर्गादासः ॥
गुरु उ क उद्यमे । दी
र्घी । इ क अग्रेषु नो गुरय
ते महोरगाः । इति दुर्गा
दासः
गृ ई य उ वधे ॥
गर्त्या । दीर्घी । तथा च । दीपि
पूरिजनि गरि पूरयः का
शि वा पि पदि शूरि तृरयः
चुरि जरि खिदि वियति स्कि
ति स्फूरि स्फुधातिमनो दिवा
दिषु अतरघोदनायां चेश्वरः ।

इति दुर्गादासः ॥
गर्द क निकेतने ॥
कूर्दे । क गर्दयति । इति
दुर्गादासः
गर्द उ कूर्दे । उ गर्दते
इति दुर्गादासः ॥
गृ सेके । गरति नक्षमे
चः । इति दुर्गादासः ॥
गृज धनौ । सममस्वरी
गर्जति । इति दुर्गादासः ।
गृञ्ज इ धनौ । सममस्वरी ।
इ गृञ्जते । इति दुर्गादासः ।
गृध इर य उ लिप्से ।
इर अगृधत् अगर्धीत् । अ
स्मात् क्तादिक्त्वात् नित्य उ
इत्यने । य गृध्यति धनं ।
लुब्धः । उ गर्द्धित्वा गृद्धा ।
इति दुर्गादासः ॥
गृध्रसी स्त्री वातरोगविशेषः
तल्लक्षणं यथा स्फिक्पूर्वा
कटीपृष्ठजानुजङ्घापदं क्र
मात् गृध्रसी स्तम्भरुक्तो
दैर्गृह्णाति स्पन्दते मुहुः वाता
द्वातकफाभ्यां सा विज्ञेया द्वि
विधा पुनः । वातजायां भवेत्तो
दो देहस्यातीव वक्रता ॥
जानुजङ्घोरुसन्धीनां स्फुरणं ।

स्तम्भता भृशं । वातश्लेष्मोद्
भवायां तु गौरवं वह्निमार्दवं ॥
तन्द्रा मुखप्रसेकश्च भक्तद्वेषस्त
थैव च । गृध्रसीवातनाम्नः केव
लात् स्फिगादिपर्य्यन्तेस्तनरु
कोतोदैर्गृह्णाति । क्रमात् इहद्वि
मात् । तेन यथा यथा वर्द्धते त
था तथा स्फिगादीन्याक्रामति ।
नात्र ग्रहणे निर्द्दिष्टक्रमनिय
मः । तथा मुहुः स्पन्दते स्फिगा
दिषु शिराकम्पं करोतीत्यर्थः
अथ तस्याश्चिकित्सा । गृध्र
स्या पुनरेरसम्यक् रेकेणवम
नेन वा । ज्ञात्वा निरामदीप्ताग्निं
वस्तिभिः समुपाचरेत् नादौ
वस्तिविधिं कुर्य्यात् वहइंनष्ट
द्याति । स्नेहा निरर्थकः सस्मा
त् स्नेहमेव कृतो यथा ॥ तैल
मैरण्डजं वापि गोमूत्रेण पिबेन
रः । मासमेकं प्रयोगोऽयं गृ
ध्रस्यां ग्रहापहः ॥ १ ॥ तै
लं तु तत्सार्द्दकमात्रं गुरस
मं चुक्रं सगुडं पिबेद्वा । कप्पु
हस्पृशिकमूलगुल्मगृध्रस्य
दावर्तहरः प्रयोगः ॥ २ ॥
निकुञ्जैरण्डबीजानि पिष्ट्वा क्षीरेवि
पाचयेत् । तत्पायसं कटी
शू

ले गृध्रस्यापस्मोषधं ॥ एरण्ड
मूलं बिल्वं च बृहती कण्ट
कारिका । कषायो रुचकोपे
तः पीतो वृषणबस्तिजे ॥ गृध्र
सीजं हरेच्छूलं चिरकालानुबन्धि
च । रुचकं सौवर्चलं ॥ ४ ॥
गोमूत्रैरण्डतैलाभ्यां कृष्णाचूर्णं
पिबेन्नरः । दीर्घकालोत्थि
तां हन्ति गृध्रसीं कफवातजां ॥ ५
सिंहास्य दन्ती कृतमालकानां
पिबेत् कषायो रुबुतैलमिश्रं ।
यो गृध्रसीनष्टगतिः प्रसन्नः
स प्रीतिगः स्याद्धि किमत्र चित्रं
६ बृहत् त्रिवृत् नरोः सारोवा विराग
परिपेषितः । स पीतो नाशये
त् क्षिप्रमसाध्यामपि गृध्रसीं
७ ॥ शेफालिकादलैः क्वाथो
मृद्वग्निपरिपाचितः । दुर्निवारं
गृध्रसीरोगं पीतमात्रः प्रणा
शयेत् ॥ शेफालिका निर्गुण्डी
८ ॥ रास्नायास्तु पलं चैकं
पञ्चकार्षो गुग्गुलोः सर्पि
षा वटिकां कृत्वा भक्षयेत् गृध्र
सीहरी ॥ रास्नागुग्गुलुः ९ रा
स्नामृतारग्वधदेवदारु त्रिकण्ट
कैरण्डपुनर्नवानां । क्वाथं पिबेत्ना
गरचूर्णमिश्रं जंघोरुपृष्ठत्रिक

पार्श्वशूली ॥ रास्नासप्तककाथः
॥१०॥ पथ्या विभीतामलकी
फलत्वगाश्वतकमेण द्विगुणाभि
वृद्धं। एरण्डेन शृतंच पलैक
याणारोगेजलेसंस्थित मे।
करात्रे ॥ अर्द्धावशेषं क्वथितं
कषायंभाणरपचेततः पुनरे
वलोहे। अमृतविकरेरखनार्थ्य
द्यात्। दत्त्वातिसचूर्णपल
द्विकानि॥ विडंगदन्ती त्रिफ
ला गुडूची कृष्णाविषमागरको
षणानि। पथ्येश्चेहस्यनरस्य
प्रीह्रेर्हिमोदपानानिचभोज
नानि॥ निषेव्यमाणो विनि
हन्तिरोगान् स गृध्रसीं तेनन
खेजतांच। लीहान मूत्रजवरा
णि गुल्मपाण्डुत्वकएठ वमिवा
तरक्तं॥ पथ्यादिकोगुल्गुलुरे
षनाम्नाख्यातःस्त्रिनावप्रमि
तप्रभावः। बलेननागेनसमं
मनुष्याजवेनऊर्ध्वान्हुरगेणतु
ल्यं॥ आयुःप्रकर्षं विदधाति
चेदृशंबलं तथा पुष्टिकरोविषि
ष्टः तस्यसंधानकरोविशे
षाद्रोगेषुशस्तःसकलेषु त
ष्टेः॥ पथ्यादिगुग्गुलुः॥११
इति भावप्रकाशः॥

गृह न क उ. ग्रहे।
सप्तमस्वरी। क उ. गृहयते।
गृह्णोग्रहणं। इति दुर्गादासः।
गृहं क्ली इष्टकादिरचितवा
सस्थानं। तत्पर्य्यायः। गयः ३९
कृदरः ४० गर्त्तः ४१ हर्म्यं ४२
अस्तं ४३ दुरोणं ४४ नीडं ४५
दुर्य्याः ४६ स्वसराणि ४७ अ
मा ४८ दमे ४९ कृत्तिः ५० योनिः
५१ शरणं ५२ वरूथं ५३ छर्दिः
५४ छदिः ५५ छाया ५६ शर्म ५७
अज्म ५८ इति वेदनिघण्टौ
३ अध्यायः॥

गृहस्थः पुं गृही। द्वितीया
श्रमी। तद्धर्मो यथा। सर्वेषा
माश्रमाणान्तु द्वैविध्यंतु च
तुर्विधं। ब्रह्मचार्य्युपकुर्वाणो
नैष्ठिकोब्रह्मतत्परः॥ योऽधी
त्यविधिवद्वेदान् गृहस्थाश्रम
माव्रजेत् उपकुर्वाणकोज्ञेयो नै
ष्ठिकोमरणान्तिकः॥ अग्नयो
ऽतिथिशुश्रूषा यज्ञोदानं सुरा
र्च्चनं गृहस्थस्य समासेनध
र्म्मोऽयंद्विजसत्तमाः। उदासीनः
साधकश्च गृहस्थोद्विविधो
भवेत्। कुटुम्बभरणे युक्तः
साधकोऽसौगृही भवेत्॥ ऋणानि

त्रीण्यपाकृत्य त्यक्त्वाभार्य्याध
नादिकं। एकाकी विचरेद्यस्तु
उदासीनः समौलिकः इति
गारुडे ४९ अध्यायः॥ वहुल्प
त्तु तत्रैव ५०।५१ अध्याययो
र्द्रष्टव्यं॥ - गृहस्थब्राह्मण
धर्मो यथा। चतुर्थमायुषो
भागमुषित्वाद्यंगुरौद्विजः।
द्वितीयमायुषोभागंकृतदा
रोगृहे वसेत्॥ अद्रोहेणैव
भूतानामल्पद्रोहेनवापुनः
याहत्तिस्तांसमास्थाय वि
प्रोजीवेदनापदि॥ यात्रामा
त्रप्रसिद्ध्यर्थं स्वैःकर्म्मभि
रगर्हितैः। अक्लेशेनशरीर
स्यकुर्वीतधनसंचयं॥ ऋता
मृताभ्यांजीवेत्तुमृतेनप्रमृ
तेनवा। सत्यानृताभ्यामपि
वानश्ववृत्त्याकदाचन॥ ऋत
मुञ्छशिलंज्ञेयममृतंस्यादया
चितं। मृतंतुयाचितंभैक्षं
प्रमृतंकर्षणंस्मृतं॥ सत्यानृ
तंतुवाणिज्यंतेनचैवापिजीव्य
ते। सेवाश्ववृत्तिराख्याता तस्मा
त्तांपरिवर्जयेत्॥ इत्यादि मा
नवे ४ अध्यायः॥
गॄ श निगरणे। निगरण

भक्षणं। श गिरत्यन्नं लोकः।
दैवात्ततो विगलितो गिलितो
वकेन इति त्र अस्मात् कृद्वाः
कभावे इति भावे क प्रत्यये
ॠदिरणाविति इति वक्तव्यात्
फस्यलकारे गिल इति स्थिते
लेः क्वत्याख्याने इति म्ये क
र्म्मणि क्ते सिद्धं। इति दु
र्गादासः॥
गृ क उ. विज्ञापे॥
विज्ञाने। विज्ञापो विज्ञापनं।
क उ. गारयते सूक्ष्ममर्थं
सुधीः इति दुर्गादासः॥
गॄ गि शब्दे। शब्द इहव्य
क्तवाक्यं। गि गृणाति वा
चं लोकः। गीर्णिः गीर्णिः
इति दुर्गादासः॥
गेप उ. ऋ गतिचाल्ययोः।
उ. गेपते। ऋ अजिगेपत् उ
इति दुर्गादासः॥
गेव ऋ उ. सेवे। ऋ
अजिगेवत्। उ. गेवते।
इति दुर्गादासः॥
गेष ऋ उ. अन्वेषे। ऋ अ
जिगेषत्। उ. गेषते। जिगे
षे। अन्वेषोऽनुसन्धानं। इति
दुर्गादासः॥

गै गाने । गीतं गायति गा
यनः ॥ इति दुर्गादासः ॥
गोचर्म्म क्ली गवां त्वक् । कर्म्म
विशेषे तदासनविधि र्यथा
मेषासनं तु वर्णार्थमाकृष्टे
व्याघ्रचर्म च । प्रोक्तो मृगाजिनं
प्रोक्तं मोक्षार्थं व्याघ्रचर्म च ॥
गोचर्म्मस्तम्भने देवि संभवे वा
जिचर्म च । इति समयाचारतन्
त्रे २ पटलः ॥ परिमाणवि
शेषः ॥ यथा । तत्किंचित्
कुरुते पापं ज्ञानतो ऽज्ञानतो
ऽपि वा । अपि गोचर्म्ममात्रेण भू
मिदानेन शुद्ध्यति । गोचर्म्म
लक्षणञ्च वृहस्पतिनादर्शि
तं । सप्तहस्तेन दण्डेन त्रिंश
द्दण्डैर् निवर्त्तनं । दश तान्येव
गोचर्म्म दत्त्वा स्वर्गे महीयते ॥
इति मिताक्षरायां आचा
राध्यायः ॥
गोजिका स्त्री क्षुपविशेषः ।
तत्पर्य्यायः । दर्व्वी १ गोजि
ह्विका ॥ ॥ इति शब्दरत्नावली
अपिच । गोजिह्वा गोजिका ।
गोभी दार्व्विका खरपर्णिनी ।
गोजिका वातला शीता ग्रा
हिणी कफपित्तनुत् ॥ हृद्या
प्रमेह कासास्र व्रण ज्वरह
रील घुः । कोमला तु वरी ति
क्ता स्वादुः पाकरसा स्मृता इति
भावप्रकाशः ॥
गोथापदी स्त्री लताविशेषः
तत्पर्य्यायः गोथापदिका २
इति शब्दरत्नावली ॥ हिरला १
हंसवती २ । इति जटाधरः
गोधूमसारः पुं गोधूमस्य
सारभागः । पालो इति भाषा
तत्करणविधि र्यथा । निस्तु
षगोधूमं उदूखले कण्डयि
त्वा संध्याकाले स्नातकादिपा
त्रे जले मग्नं कारयित्वा परदि
ने प्रभाते उपरिस्थजलं क्रमे
ण हरीकृत्वा नीचस्थसारं
रौद्रे शुष्कं कृत्वा पात्रान्तरे स्था
पयेत् । इति पाकराजेश्वरः ।
गोनसः पुं सर्पविशेषः ।
तत्पर्य्यायः । घोङ्गः १ इति
शब्दरत्नावली ॥
गोवधः पुं गोहत्या । स च
उपपातकविशेषः । यथा । गो
वधो ऽयाज्यसयाज्य पारदार्य्या
त्मविक्रयाः । इत्याद्युपपातक
गणेन मानवे ११ अध्यायः ॥
तत्प्रायश्चित्ते प्रायश्चित्त ।

657

शब्दे द्रष्टव्यं ॥
गोम न क लेपने ।
अज्ञ गोमहोमयेनस्याने चे
टी । इति दुर्गादासः ॥
गोमांसं क्ली गवां पिशितं ।
तद्भक्षणप्रायश्चित्तं यथा ।
सुमन्तुः । गोमांसभक्षणे प्रा
जापत्यं चरेत् । इदं मत्यानतः
सकृद्भक्षणविषयं । पराशरः
अगम्यागमने चैव मद्य गोमां
सभक्षणे । शुद्ध्यै चान्द्रायणं कु
र्य्यान्नदीं गत्वा समुद्रगां ॥ चा
न्द्रायणे ततः क्षीणे कुर्य्याद्ब्राह्म
णभोजनं । अनडुत्सहितां गां
च दद्याद्विप्राय दक्षिणां ॥
इदं ज्ञानतो ऽभ्यासे । शंखः गा
मध्यं कुञ्जरोष्ट्रौ च सर्व्वं पञ्चनखं
तथा । क्रव्यादं कुक्कुटं ग्राम्यं ।
कुर्य्यात् संवत्सरं व्रतं पतस्त्रिव
कालाभ्यासे । संवत्सरकृच्छ्रव्र
ते पंचदशधेनवः । तत्रूपन
यनं च यथा विष्णुः । विड्वराह
ग्रामकुक्कुट नर गोमांसभक्षणे
सर्व्वेष्वेव द्विजातीनां प्रायश्चि
त्तान्ते भूयः संस्कारं कुर्य्यात् ।
इति प्रायश्चित्तविवेकः ॥
गोवरं क्ली गोखुरक्षुण्णगोष्ठ
स्थशुष्कगोमयचूर्णं । यथा । गो
ष्ठान्तर्गोखुरक्षुण्णं शुष्कं गोमय
चूर्णितं । गोवरं तत् समाख्यातं
वरिष्ठं रससाधने ॥ इति भा
वप्रकाशः ॥
गोवर्द्धनः पुं श्रीवृन्दावनस्थप
र्व्वतविशेषः । तस्य पूजाकाला
दि र्यथा प्रातर्गोवर्द्धनं पूज्य द्यू
तं चैव समाचरेत् । भूषणीया
स्तथा गावः पूज्याश्च दोहवाह
नाः ॥ श्रीकृष्णदासवर्य्यो ऽयं
श्रीगोवर्द्धनभूधरः । शुक्लप्रति
पदि प्रातः कार्त्तिके ऽर्च्यो ऽत्र
वैष्णवैः ॥ प्रातर्गोवर्द्धनं पूज्य
रात्रौ जागरणं चरेत् । इति क्व
चित्पाठः । तस्मात्तदिदं कर्म्म
गोवर्द्धनप्राधान्येन गोप्राधान्ये
न च ख्यातमप्येकमेव ज्ञेयं ।
तद्दिननिर्णयः । तदाह देवलः ।
प्रतिपद्दर्शसंयोगे क्रीडनन्तु गवां
मतं । परविद्धासु यः कुर्य्यात् पु
त्रदारधनक्षयः ॥ निर्णयामृतधृ
तं पुराणान्तरवचनं । याकुहूः
प्रतिपन्मिश्रा तत्र गाः पूजयेन्नृप ।
पूजामात्रेण वर्द्धन्ते प्रजा गावो

मद्दीपते॥ ततः प्रातर्गोवर्द्धनं प्र
णमति पूर्वोक्तनात् पर्ष्मके। द्वि
तीयासमये तु सर्वस्वानिषिद्धं।
तद्यथा। नंदायांदर्शनेरत्ना व
लिदानदशासु च। भद्रायांगो
कुलक्रीडा देशनाशाय जा
यते॥ पुराणसमुच्चये तु स
भावितचंद्रोदयद्वितीयासंयो
गएव निषिध्यते। गवांक्रीडा
दिनेयत्र रात्रौ दृश्येत चंद्रमाः।
सोमो राजा पशून्हन्ति सुर
भी पूजकांस्तथा। तदुदय
संभावनेव निर्णयास्ते ति
ष्ठीते। प्रतिपद्यापराह्णिक
त्रिमुहूर्त्तव्यापिन्यां द्वितीयायांचं
द्रदर्शनं संभाव्यते। तत्क्रमप्रा
धानविषये हृदृष्टानानपेन।
द्वितीया त्रिमुहूर्त्ता चेत्प्रतिप
द्यापराह्णिकी॥ अन्नाधानेश्व
तद्दृश्यं परतः सोमदर्शनादि।
ति अपराह्णस्य पंचधाविभक्तस्या
ह्नस्तत्र्यो भागः तत्र प्रथमप्रतिप
दियन्मुहूर्त्तव्यापिनी द्वितीयातत्र चं
द्रदर्शनसंभावनमिति अन्यदा तु
ऽदेवप्रतिपत्त्रयहीना तथैव पुराण
समुच्चये वर्द्धमानतिथौ नंदा यदा
सार्द्धत्रि।

यामिका। द्वितीयावृद्धिगामि
न्याऽप्यत्र चोच्यते॥ किंच।
यदा पूर्णप्रतिपत् परत्र निष्क्रा
मति तदाप्पूर्तैरेव कार्य्या। यथा
ऋक्षभविष्योत्तरे। यथा द्वादशभि
र्मासैर्मासो ह्येको मलिम्लुचः
तथैवाहोरात्रिवृद्धा तिथिः
प्रोक्तो मलिम्लुचः॥ यथा म
लिम्लुचः पूर्वो मासो देवस्तथा
परः। त्याज्यातिथिस्तथा पूर्वा
ग्राह्याचैव तथा परेति निर्ण
यामृतमते॥ किंच। वंजली
न्यायेन पूर्वैव मेत्त शाकाने त
दृदशापि देवलादिवचनप्रामा
ण्यमस्तीति॥ अथ गोवर्द्धन
पूजाविधिः। पाद्मे तत्रैव। मथु
रायां तथा स्यत्र कृत्वा गोवर्द्धनं
गिरिं। गोमयेन महास्थूलं त
त्र पूज्यो गिरिर्यथा॥ मथुरायांत
था साक्षात् कृत्वा चैव प्रदक्षि
णं वैष्णवंधाम संप्राप्य मोदते हरि
सन्निधौ॥ पूजामंत्रः। गोवर्द्धनधरा
धार गोकुलत्राणकारक। विष्णु
बाहुकृतोच्छ्राय गवां कोटिप्रदो
भव॥ इति गोपूजामंत्रः। स्कान्दे
तत्रैव। लक्ष्मीर्या लोकपालानां
धेनुरूपे॥

णसंस्थिता। घृतं वहति यज्ञार्थे
मम पापं व्यपोहतु॥ अग्रतः
संतु मे गावो गावो मे संतु पृष्ठ
तः। गावो मे पार्श्वतः संतु
गवांमध्ये वसाम्यहं॥
अथ गोक्रीडा। तत्रैव।
क्रीडापयेद्वावयेच्च गोमहि
ष्यादिकं ततः। वृषान्क
र्षापयेत्तोपे स्कृक्तिप्रलक्ति
वादनात्॥ पाद्मे च तत्रैव
एवं गोवर्द्धनं गाश्च पूज
यीया विधानतः। गोवर्द्धन
महोरम्यः कृष्णसंतोषका
रकः॥ इति श्रीहरिभक्तिवि
लासे कार्त्तिककृत्ये १६ विला
सः गोविंदः पु परमब्रह्म
यथा। तत्र यद्यसमर्थस्त्वज्ञा
नयोगमते। क्रियायोगैर्दिवा
रात्रौ तत्परः सततं भव॥ क
रोषि यानि कर्म्माणि तानि देवे
जगत्पतौ। समर्पयस्व भद्रं
ते ततः कर्मप्रहास्यसि॥
शुभाशुभफलत्यागी दीर्घे
निःशेषकर्मणि। त्वय
माप्स्यसि गोविंदं तद्ब्रह्म।
ल परम म॥

हत्॥ इति। तन्नामसमाहात्म्यं य
था। येतिष्ठंतः स्वपंतश्च ग
च्छन्तश्च स्खलितेस्तथे। संकीर्त्तयं
ति गोविंदं ते वस्याज्याः महर्ष
तः॥ इति च वह्निपुराणेय
मन्त्रप्रासननामाध्यायः॥
गोविंदद्वादशी स्त्री फाल्गु
नशुक्लद्वादशी। यथा। फाल्गु
ने द्वादशी शुक्ला या पुष्यर्क्षेण सं
युता। गोविंदद्वादशी नाम सा स्या
द्गोविंदभक्तिदा॥ तस्यामुपो
षाविधिना भगवंतं प्रपूजयेत्
लिखितः पापनाशिन्यां विधियो
ऽत्रापि संस्मृतः। तन्माहात्म्यं
च ब्रह्मपुराणे श्रीवशिष्ठमान्धा
तृसंवादे। फाल्गुनामलपक्षे
तु पुष्यर्क्षे द्वादशी यदि। गो
विंदद्वादशीनाम महापातकना
शिनी॥ तस्यामुपोष्य विधिवन्न
रः संक्षीणकल्मषः। प्राप्नोति म
नसा सिद्धिं पुनरावृत्तिदुर्लभा।
मिति॥ आमर्द्दकीद्वादशीति लो
केख्यातेयमेव हि। यत्र आमर्द्द
कीपूजा व्रतमस्या विशेषतः॥ त
दुक्तं तत्रैव पापनाशिनीमा
हात्म्यप्रसंगे। फाल्गुने तु वि।

प्रोषण विशेषः कथितोऽत्र प
अमर्दकावनेऽरण्ये विस्तृतो
कपर्दलक्षणे। प्रभासखण्डे च
श्रीदेवीमहेशसंवादे। फाल्गु
णस्य सिते पक्षे एकादश्याम
पोषितः। स्नात्वा तथा तत्र
गत्वा वाप्यां कूपे गृहेऽपि वा।
गत्वा गिरौ वने वापि यत्र साक्षा
प्ते शिवा। द्वीपे देवमध्यमा
तेन यदा हरः समुत्थितः।
आमर्दाद्देवदैत्यानां तेन साम
र्दकी स्मृता। शिवा लक्ष्मीः।
स्मृतो हरः सेव्यते सरसात्मभिः
देवैर्ब्रह्मादिभिः सर्वैर्हरितोः
मोदेसवः स्मृतः। तत्र गत्वा
हरिस्तत्र हरमूले पवाशि
वा॥ पूजा पुष्पैः शुभैः रात्रौ
कार्य्यं जागरणं हरेः। करकं
जलपूर्णन्तु कर्त्तव्यं पात्रसंयुतं।
हविष्यान्नकृतं भक्ष्यैश्च कार्य्यो
विधानतः। एवं जागरणं कार्य्यं
पाश्रवणतत्परैः। मन्त्रैर्वेदैर्द्विजैः
पापैककलिजैः कामसंततैः। दर्श
नेचनराः सर्वे पूज्यन्ते हरिम
न्दिरे॥ इति श्रीहरिभक्ति
विलासे १४ विलासः॥

गोष्ठ उ. संघाते संघातो
राशीकरणं। उ. गोष्ठे तथा
न्य लोकः। इति उ।
गोदासः॥
गोष्ठाष्टमी स्त्री गोपाष्टमी
सा च कार्त्तिकशुक्लाष्टमी य
था। पाद्मे तथैव कूर्मपुराणे च
शुक्लाष्टमी कार्त्तिके तु स्मृता
गोपाष्टमी बुधैः। तद्दिने वासु
देवोऽभूद्गोपः पूर्वन्तु वत्सपः।
तत्र कुर्य्याद्गवां पूजां गोग्रास
गोः प्रदक्षिणं। गवानुग
मनं कुर्य्यात् सर्वान् का
मानभीप्सता॥ इति श्री
हरिभक्तिविलासे १६ विला
सः। भीमपराक्रमे कार्त्तिक
शुक्लपक्षमधिकृत्य। गोष्ठाष्ट
म्यां गवां पूजां गोग्रासं गोप्र
दक्षिणं। गवानुगमनं कुर्य्या
त् सर्वपापविमुक्तये। इति
तिथ्यादितत्त्वं॥ गोसहस्री स्त्री
मङ्गलवारयुक्तामावास्या तत्र गं
गास्नाने सहस्रगोदानफलं।
यथा व्यासः। अमावास्यां भवे
द्वारे यदि भूमिसुतस्य च। गोस
हस्रफलं दद्यात् स्नानमात्रेण

जाह्नवी॥ इति तिथ्यादितत्त्वं
सोमवारयुक्तामावस्या। त
त्रारुणोदयकालमारभ्य
स्नानकालपर्य्यन्तं मौनीभू
त्वा स्नानात् गोसहस्रदानफ
लं। यथा व्यासः। सिनीवा
लीकुहूर्वापि यदि सोमदिने
भवेत्। गोसहस्रफलं दद्या
त् स्नानं यन्मौनिना कृतं॥ इ
ति च तिथ्यादितत्त्वं॥
गोहत्या स्त्री गोवधः। तत्
प्रायश्चित्तादि प्रायश्चित्तशब्दे
द्रष्टव्यं॥ पारिभाषिक गोह
त्या यथा। सावित्र्युवाच। वि
प्रहत्या च गोहत्या किंविधा मा
तृदेशिकी। का वा नृणां।
मगम्या वा को वा संध्याविहीन
कः॥ एतेषां लक्षणं सर्वं वद।
वेदविदांवर। यम उवाच॥ गा
माहारप्रकुर्वन्तीं पिवन्तीं यो निवार
येत्। याति गोविप्रयोर्मध्ये गो
हत्याञ्च लभेत् सः॥ दण्डैर्गां ताड
यन्मूढो यो विप्रो वृषवाहकः।
दिने दिने गवां हत्यां लभेत नात्र संश
यः॥ ददाति गोभ्य उच्छिष्टं।
भोजयेद्वृषवाहकं॥

भोजयेद्वृषवाहान्नं स गोह
त्यां लभेत् ध्रुवं॥ वृषलीप
तिं याजयेत् यो भुंक्ते चान्नं त
स्य यो नरः। गोहत्याशतकं
सोपि लभेत नात्र संशयः॥
पादं ददाति वह्नौ यो गाञ्च
पादेन ताडयेत्। गृहं विशेद
धौताङ्घ्रिः स्नात्वा गोवधमा
लभेत्॥ यो भुंक्ते स्निग्धपा
देन शेते स्निग्धाङ्घ्रिरेव च।
सूर्य्योदये च द्विर्भोजी स गो
हत्यां लभेत् ध्रुवं॥ अवीरान्नं
च यो भुंक्ते योनिजीवी च ब्रा
ह्मणः। यस्त्रिसंध्याविहीनश्च
स गोहत्यां लभेत् ध्रुवं पितॄंश्च
सर्वकाले च तिथिकाले च दे
वताः। न सेवते तिथिं यो हि
स गोहत्यां लभेत् ध्रुवं॥ स्व
भर्त्तरि च कृष्णे वा भेदबुद्धिं क
रोति या। कटूक्त्या ताडयेत् कां
तेन सा गोहत्यां लभेत् ध्रुवं॥
गोमार्गे खनने कृत्वा ददाति
शस्यमेव च। तडागे च तदूर्द्धे
वा स गोहत्यां लभेत् ध्रुवं।
प्रायश्चित्तं गोवधस्य यः करोति
व्यतिक्रमं। अर्थलोभादथाज्ञानात्

स गोहत्यां लभेत् ध्रुवं । राजके
देवके यत्नात् गोस्वामी गां न पा
लयेत् । दुःखं ददाति यो मूढो
गोहत्यां लभते ध्रुवं ॥ प्राणि
नं लंघयेद्यो हि देवार्च्चामनले
जले । नैवेद्यं पुष्पमन्नं च स
गोहत्यां लभेत् ध्रुवं ॥ प्र
म्मत्रास्तीति यो वादी मि
थ्यावादी प्रतारकः । देवद्वे
षी गुरुद्वेषी स गोहत्यां ल
भेत् ध्रुवं । देवताप्रतिमां
दृष्ट्वा गुरुं वा ब्राह्मणं सति । न
संभ्रमान्नमेत् यो हि स गोह
त्यां लभेत् ध्रुवं ॥ न ददात्याशि
षं कोपात् प्रणताय च यो
द्विजः । विद्यार्थिने च विद्यां च
स गोहत्यां लभेत् ध्रुवं ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे
२७ अध्यायः ॥
गोदालिया स्त्री लताविशेषः
गोयालिया इति भाषा । यथा
पीते गोदालियामूले तिल
दध्यान्नसंयुते । निबद्धमूत्रं
कथितं प्रवर्त्तयति शङ्कर ॥ इति गा
रुडे १९० अध्यायः ॥ गोदारः पुं कुद्दा
लविशेषः तत्पर्य्यायः गोखुरः २६

विकटः २७ त्रिकः २८ क्षुरः
२९ इति शब्दरत्नावली ॥
गोः पुं स्त्री स्वनामख्यातप
शुः स्त्री गोः पर्य्यायः गौरी २०
सुरभिः २१ मही २२ निलिना
चिः २३ सुरभी २४ अनड्वाही २५
द्विजा २६ अघ्न्या २७ । इति श
ब्दरत्नावली वकुला २८ मही
२९ सरस्वती ३० । इति जटाधरः
अघ्न्या ३१ उस्रा ३२ उस्रिया
३३ अही ३४ अदिति ३५ इ
ला ३६ जगती ३७ शक्करी
३८ इति वेदनिघण्टौ २ अ
ध्यायः ॥ गौर्मङ्गलत्वादि ।
यथा देवलः । लोकेऽस्मिन्
मङ्गलान्यष्टौ ब्राह्मणो गौर्हुता
शनः । हिरण्यं सर्पिरादित्य आ
पो राजा तथाष्टमः ॥ एतानि
सततं पश्येन्नमस्येदर्च्चयेद्यः
प्रदक्षिणं च कुर्वीत तथा चा
युर्न हीयते ॥ अभिप्रेतार्थसि
द्धिर्मङ्गलं तद्धेतुत्वात् तथा ब्राह्म
णादयः ॥ गोप्रशंसा ब्रह्मपुरा
णे सदा गावः प्रशस्याः मङ्गलाने
नपार्थिव । नमो गोभ्यः श्रीमतीभ्यः
सौरभेयीभ्य एव च ॥ नमो ।

ब्रह्मसुताभ्यश्च पवित्राभ्यो न
मो नमः । मन्त्रस्य स्मरणादेव
गोदानफलमाप्नुयात् ॥ भ
विष्ये । गामालभ्य नमस्कृत्य
कृत्वा चैव प्रदक्षिणं । प्रदक्षि
णीकृता तेन सप्तद्वीपा वसुंध
रा गवामस्थि न लंघेत न मृत्ते गां
धं न वर्जयेत् । यावदाघ्राति त
द्गन्धं तावत् पुण्येन युज्यते ॥
विष्णुः । गोमूत्रं गोमयं क्षीरं
सर्पिर्दधि च रोचना । षडङ्गमे
तन्माङ्गल्यं पवित्रं सर्व्वदा ग
वां ॥ षडङ्गं षट्प्रकारं इति
श्राद्धतत्त्वं ॥
गौणः पुं गौणीवृत्तिबोधि
तः । यथा । शाकस्य साहस्रप
गुणः तदधीना लक्षणा सा
त्रकः संबन्धे गौणी तद्योगात्
गौणः इति दायभागटीकायां
श्रीकृष्णतर्कालंकारः ॥
गौणकालः पुं मुख्यकालक
र्त्तव्यकर्म्मकरणयोग्यकालोत्त
रः । यथा । यद्वा गामिक्रियामु
ख्यकालस्याप्यन्तरालवेत् ।
गौणकालत्वमिच्छन्ति केचित्
प्रारब्धकर्म्मणि ॥ यद्वेति पक्षा
न्तरं प्रारब्धकार्य्यमध्यकाल
वत् आगामिक्रियाया मु

ख्यकालस्यापि गौणकालत्वं ।
तेन सायंसन्ध्याया रात्रिः प्रातः
सन्ध्याकालस्य गौणकाल इत्य
र्थः ॥ इति मलमासतत्त्वं ॥
गौणचान्द्रः पुं कृष्णप्रतिपदा
दिपौर्णमास्यन्तमासः । यथा ।
गौणचान्द्रेण भाद्रता मुख्यचा
न्द्रेण श्रावणता । इति जन्माष्ट
मीप्रकरणे तिथ्यादितत्त्वं ॥
अपि च । चान्द्रोऽपि द्विविधः प्रो
क्तो मुख्यगौणविभेदतः । गौ
णः कृष्णप्रतिपदादिपौर्णमा
स्यन्त ईरितः ॥ इति शब्दर ।
त्नावली ॥
गौणी स्त्री अशीतिप्रकारल
क्षणान्तर्गतलक्षणाविशेषः ।
यथा । सादृश्येतरसंबन्धाः शु
द्धास्ताः सकला अपि । सादृश्या
त्तु मता गौण्यस्तेन षोडश भेदि
ताः । इति साहित्यदर्पणे २ परि
च्छेदः ॥ अस्यास्तु सर्व्वलक्षणा
शब्दे द्रष्टव्यं ॥
गौतमः पुं शाक्यवंशावती
र्णो बुद्धमुनिविशेषः । तत्प
र्य्यायः । खजित् ८ श्वेतके
तुः ९ धर्म्मकेतुः १० महा
मुनिः ११ पञ्चज्ञानः १२

सर्व्वदर्शी १३ महाबोधिः १४
महाबलः १५ वकृतमः १६
त्रिमूर्त्तिः १७ सिद्धार्थः १८ शा
कः १९ । इति शब्दरत्नावली ॥
गौरः पुं पीतवर्णः । गोरो
इति भाषा । तद्गुणकरणोपयं
यथा कूष्माण्डनालक्षारलस
गोमूत्रस्य तन्त्वचः । जलपिष्टार
विद्वाचसिद्धा मंदानलेनदि ॥६
मामाहिषेण पुरीषेण वेष्टिताह
षभयुज । अस्या उद्वर्त्तनं कुर्य्या
दंगगौरत्व मीश्वर ॥ इति गा
रुडे १९४ अध्यायः ॥
ग्रथ इ ङ. जैत्ये । रेफयु
क्तः । जैत्म्यमिह कुटिलीभा
वः कुटिलीकरणंच । ३ ग्रथ्य
ते । ङ. ग्रथ्यते काष्ठं कुटिलस्या
दित्यर्थः । ग्रथ्यते लता वायु
वायुः कुटिलां करोतीत्यर्थः ।
इति दुर्गादासः ॥
ग्रन्थ कि ग दर्भे । रेफयु
क्तः । दर्भो ग्रन्थनं । किं ग्रन्थ
यति ग्रन्थति । ग ग्रन्थाति मा
लां मालिकः । ग्रन्थि मङ्कुर्थापि
तन्त्वदयेशाः । इति माधवि
त्यं । इति दुर्गादासः ॥
ग्रथिः पुं रोगविशेषः तन्नि
दानं सर्व्वलिखितं । तस्य चिकि
त्सा यथा । स्वर्जिकामूलकक्षा
रः शंखचूर्णसमन्वितः । पते
न विद्विनो लेपो हन्ति ग्रथिं तथा
र्बुदं ॥ ग्रथिं नियोनश्यति भेषजे
न निष्कासणं तं शास्त्रविचिकित्
सकेन । ज्ञात्वा विपक्कें नच्छेते
नवैद्यो व्रणेन चान्येन च
सं विचिकित्सेत ॥ ग्रन्थीनुहुत्स
पक्ष्यान्नवरोगेककममाचरेत
शिरा ग्रन्थिं विहायाने शोष
शस्त्रं प्रयुञ्जते । अन्ये आचा
र्य्याः । इति भावप्रकाशः ॥
ग्रस कि ग्रासे । रेफयुक्तः
कि ग्रासयति फलं लोकः ।
ग्रसति नव मूर्त्तिउ पूर्णचंद्र
विहाय । इमं ग्रहणे पठंति
केचित् इति दुर्गादासः
ग्रस उ ङ. भक्षे । रेफयुक्तः
उ ग्रसित्वा ग्रस्त्वा । ङ. ग्रस
ते । हिमांशु माशु ग्रसते इति
माघः । इति दुर्गादासः ॥
ग्रह ग ञ आदाने । ग ञ
गृह्णाति गृह्णीते । इति दु
र्गादासः ॥
ग्रह ऊ कि आदाने ।
उ अग्रहीत् अजग्रहीत् । कि

ग्रहयति ग्रहति । पक्षोक्तादि
रेव मन्यते तन्त्रापात्मनेपदी
एव । इति दुर्गादासः ॥
ग्रहः पुं सूर्य्यादिनव । तेषां
कामरूपस्थानानि ध्यान मं
त्रादिश्च यथा । पूर्व्वे समदना
यास्तुब्रह्मक्षेत्रस्य पश्चिमे म
हालेत्रं यत्रदेवश्चादित्यसन्तत
स्थितः ॥ भैरवस्य ह्रिताद्यीय
यदा सर्व्वे सुराः स्थिताः । का
मरूपे महापीठे ब्रह्लेइव हणा
दयः ॥ तदा तत्राकये शैले
श्रीसूर्य्योपिप्यवस्थितः । त्रि
स्रोता नामतस्यास्ति नदी पूर्व्वा
दिग्गिरिस्थिता ॥ कापोतकूरणं
पश्चाद्यस्य कूरण्डह्यंस्थित । का
पोतकूण्डे विधिवत् स्नात्वा क
रणकूण्डके । तत्राचलं समारु
ह्य संपूज्यचदिवाकरं । सकृद्दे
वनवेद्यानि भास्करस्यगृहं प्रति
सूर्य्यरश्मिसमद्भूतकापोतक
रणास्रत । पुण्यतोयमहाघो
रपापंकापोत मे हर ॥ इत्य
नेनतु मन्त्रेण स्नात्वाकापोत
पुष्करे । करणं समुपंस्पृश्य
तत्रशैले रविं यजेत् ॥
त्रिविधं ब्रह्मबीजंतु सह ।
सपर मंततः । रूपमये ति चत
र्थ्यान्तं देवतायाः स्मृचेस्ततः ॥
अंगबीजमिदंप्रोक्तमादित्यस्या
तिकामदं । ध्यानं यथा । पद्मा
सनः पद्मकरः पद्मगर्भसम
द्युतिः ॥ सप्ताश्वः सप्तरज्जुश्च
द्विभुजो भास्करः सदा । वर्त्तुले
मण्डले चास्य अष्टपत्रसमन्वि
ते ॥ अंगुष्ठाद्येगुली नान्तु रुद्रा
दीनां तथा वषट् । अंगमंत्रेण स
पुटकंड पांत्यो वह्निसंयुतः । सर्व्वे
न्यासे समुद्दिष्टो मंत्रः सर्व्वफल
प्रदः । हृच्छिरस्तु शिखा वर्म
नेत्रास्यो दरपृष्ठतः । बाह्वोः ।
पाण्योर्जन्वोः पादयोश्चापि
विन्यसेत् । जपेनैनतुसमस्ता
नि कर्मान्मसाद् साधयेत् ॥
कर्मश्चान्नरतेजोकः पूजने स्या
त्प्रकीर्त्तितः विसर्जनं लघ्येशा
नो विद्याद्यादल्पशक्तयः । नि
र्मोल्यधूप्रग्रहणे माठराद्या
स्तु पार्षदः । बीजमन्तरं तेन त्र
सा पूर्व्वतः प्रतिपादितं अनेन
विधिना तत्र पूजयित्वा सरोरुम
सकामान् निखिलान् प्राप्य इह लो
के सुखमश्नुते ॥ सावीशेषेन तोम
खेज्ञास्करस्यालयं प्रति ॥ १ ॥

इति कालिकापुराणे ८८ अ
ध्यायः ॥ पूर्वद्वारगिरेः शै
ल मध्ये हंसकूटे इति स्मृतः। त्रि
कोणं सम्यसंकाशं लडूहैं
चेदमंडलं ॥ द्वितीयवर्गस्या
द्येन विंदिद्भ्याम सेकृते चेद
वीजमिति प्रोक्तं तेन चंद्रं प्रपूज
येत् ॥ अथाप्युपतिदृष्टांतपर्व
तं तेन निशापतिः। प्रदक्षिणीक
रोतेवदशाभिस्माम्य भिर्युतः
तस्यैव पूर्वभागेन सोमकुण्डं
कृपसरः। तत्र स्नात्वा च पीत्वा
च नरः कैवल्यमश्नुते। स्व
र्गादवस्तत्र स्वेदः कामाख्ये
भेवने यदा। तदा तद्विषम स
वाभिः स्नात्वा तोयपराशयः ते
ह्लोय्यैर्वासवः कृत्यमकरोदि
न्द्रंदेवयोः मध्ये तु एतन्मस्या
ने स्वयं स्वस्ति शिलोपरि। चंद्र
रश्मिसमस्तूलचेदकोटसमहोद
ये सथास्वकर्मा सात्काल्व
द्रकल्पं हरं ॥ इत्येनेन तमेव
त्ययः स्नात्वा वेद्रपापेभिः।
चेद्रकूटं समारुह्य पूजयेद्यस्तु तं
नरः अविच्छिन्नसंततिस्सकाल
तस्य जायते परत्र चेद्रभवनं भि
त्वायाति परं पदं ॥ ध्यानं यथा। श्वेतः

श्वेतांवरधरो दंष्ट्रा मोदे मत
स्थितः। गदापाणिर्द्विवाहुश्च
सर्वाशोवरदः शशी २॥
पूर्वस्यां कपटाख्योतु शैला
द्विस्तत्र इति स्मृतः। यः पूर्वभागः
प्रोक्तः मद्दिष्टपायाः प्राच्यां व्यवस्थि
तः॥ पीठस्य चालयाव स्तत्र
वीक पर्वत उच्यते तस्मिन् व
संति सततं ग्रहा राजानयथेश्व
या तत्रतान् पूजयेद्यस्तु सत
प्रोत्यापदं कवित्। रूपमेतत्त
सूर्यस्य चेद्रस्य प्रतिपादितं स
म्प्रानामित्येतपासमे चेत्रपं श्व
णामुमे। रक्तांवरधरः शाली
शालिकर्मांसश्च गदाधरः। चत
र्भुजो मेषरथो वरदो मंगलो
मतः ३ पीताम्बरधरः शू
ली पीतमाल्यानुलेपनः।
खड्गचर्मगदापाणिः सिंहस्था
वरदोवुधः ४ स्वर्णगौरः पीत
वासाः स्वर्णपंकजसंस्थितः।
मालां कमंडलुं दंडं वामेन वरदा
यकं॥ चतुर्भुजस्सर्वदेव वित
योहेवतीर्थकं। सर्वैर्देवगणै
र्नित्यं नमस्यमानं मनोहरं ५ शु
क्रश्वेतः शुक्लवर्णो शोव।
नागोपरिस्थितः। चतुर्भुजं

वादमालांपुस्तकंच वराभ
ये॥ क्रमाद्दक्षिणवामाभ्यां ध
त्तेदैत्यगुरुः सदा ६॥ इंद्रनी
लनिभः शूली वरदो गृध्रवा
हनः। पाशवाणासनधरो ध्या
तव्यो र्कसुतः सदा॥ ७ काम
कामदेवस्य वीजेन मंत्रभौम
स्य कीर्तितं। मं। उग्रायानेत्र
वीजस्य पञ्चमध्यान्तरेपुभे।
तन्मंत्रं शशिपुत्रस्य सर्वका
मफलप्रदं॥ बु॥ भकारपंच
मोयस्तु चतुर्थस्वरसंयुतः
गणेशवीजेन दिष्टं गुरोर्मंत्रम
कीर्तितं। वृ॥ विंदिंदुसंयुतं वा
पिपूर्ववर्णद्वयं पुनः। सप्तम
स्वरसंयुक्तो भकारस्तादिरत्नरे
प्रान्तवर्णाद्यदन्तस्तु विंदिदुभ्या
समन्वितं। भवेच्छुक्रस्य वीजेन
सर्वकामसमृद्धिदं। शु। प्रान्त
वर्णाद्यदंतं च चेद्रविंदुसमन्वितं
प्राद्यमन्त्यस्वरोपेतं तद्वेदा
दिसंयुतं। शनैश्चरस्य मंत्रो ऽ।
यं सर्वदोषविनाशनः॥ श्र।
विंदुचंद्रसमायुक्तं नामाद्यद
र पववा। तेषां सर्वग्रहाणां वे
मंत्रसंघः प्रकीर्तितः॥ शा
तिके पौष्टिके हुतौ पभि।

मंत्रैर्ग्रहानिमान्। पूजयेत्तस
र्वदार्थी रोभूतिकामो महाम
तिः वरदाभयहस्तश्च खड्गंच
मथरत्नथा। सिंहासनगतः कृ
ष्णो राहुर्धीरैः प्रचक्ष्यते। ८ धू
म्रवर्णो विशालाक्षः पुच्छरूपी
चतुर्भुजः। खड्गचर्मगदावाण
पाणिः केतुः शवासनः ९ उपा
न्त्यादि द्वादशेन स्वरेण सहितः
पुनः। उपान्त्य पंचमेनेंदुविंदु
भ्यां सहितावुभौ॥ मंत्राः यम
तु सोमेन राहोः केतो र्विलोम
तः आद्यान्तरे विंदुमहामंत्र
मुक्तं तथैतयोः॥ रा॥ के॥
एवं चित्रे शैलवरे पूजयित्वा न
वग्रहान्। अभीष्टान् लभते
कामान् नरः शान्तिं तथोत्तमां
इति कालिकापुराणे ८९ अ
ध्यायः॥ तेषां दशा तत्फला
दिच दशाशाहे गरुडपुराणे
६ अध्याये च द्रष्टव्यं॥ नव
ग्रहयागविधानादि यथा। या
ज्ञवल्क्य उवाच। श्रीकामः शां
तिकामो वाहृष्याद्युरभिचारवा
न् ग्रहयज्ञं समं कर्याम ग्रहाश्च
तेवुधैः स्मृताः॥ सूर्यः सोमो मं
गलश्च वुध मेव वृहस्पतिः

शुक्रः शनैश्चरो राहुः केतुः
कार्यान् ग्रहा स्तथा ॥ ताम्र
कात् स्फटिकाद्रक्तचंदनात्
स्वर्णकादुभौ । रजतादयसः
सीसात्कांस्यात्तु वर्णान् निवे
यत ॥ रक्तः शुक्लस्तथा रक्तः
पीतः पीतः सितोऽसितः ।
कृष्णः कृष्णः क्रमाद्वर्णा द्रव्या
णि मन्त्रयस्ततः ॥ स्थापयेद्ग्रह
वर्णानि होमार्थं प्रलिखेत्पटे ।
सुवर्णानि प्रदेयानि वासांसि कु
सुमानि च ॥ गंधाश्च बलयश्चै
व धूपो देयश्च गुग्गुलुः । कर्त्त
व्यास्तत्र मंत्रैश्च चरवः प्रतिदैव
तं ॥ आकृष्णेन इमं देवा अग्नि
र्मूर्द्धा दिवः ककुत् उद्बुध्यस्वेति
ज ऋचाद्भिरेव यथाक्रमं ॥ बृह
स्पते ऽतियदर्य्येति सर्वे ऽन्नात्
परिस्रुतः । शन्नोदेवीस्ततः
काण्डात्केतुं कृण्वन्निति क्रमात्
अर्कः पलाशः खदिरश्चापामा
र्गः पिप्पलः । उदुम्बरः शमी
दूर्वाकुशाश्च समिधः क्रमात् ॥
होतव्या मधुसर्पिर्भ्यां दध्ना चैव
समन्विताः । गुडौदनं पायसं च ह
विष्यं क्षीरषाष्टिकं । दध्योदनं ह
विः चूर्णमांसं चित्रान्न मेव च
दद्याद्ग्रहक्रमादेतान् ग्रहेभ्यो
भोजनं ततः ॥ धेनुः शंखस्त
थानड्वान् हेम वासो हयस्त
था । कृष्णा गौ रायसश्छाग ए
ता वै दक्षिणाः क्रमात् ॥ ग्र
हाः पूज्याः सदा यस्माद्राज्या
दि प्राप्यते फलं । इति गारु
डे १०१ अध्यायः ॥
ग्रहणी स्त्री स्वनामख्यातरोगः
तस्य निदानादि पूर्वं लिखितं ।
तस्य चिकित्सा यथा । चिकि
त्साथ ग्रहण्यस्तु ग्रहणी
चाग्निनाशिनी । चित्रकक्वाथक
ल्काभ्यां ग्रहणीघ्नं शृतं हविः ॥
इति गारुडे १७४ अध्यायः ॥
हरिरुवाच । मरीचं शृंगवेरं च
कुटजत्वच मेव च । पानाद्ग्र
हणीनष्टेपन्न प्राशंककृतेशाव
द्वं ॥ इति तत्रैव १८७ अध्यायः ॥
अंकोठमूलकर्षार्द्धं पिष्टं तण्डु
लवारिणा । सर्वातीसारग्रहणी
पीतं हरति भूतप ॥ मरीच शुं
ठीकुटजत्वक् चूर्णं तु गुडान्वि
तं । क्रमात्तत् द्विगुणं पीतं ग्र
हणीव्याधिनाशनं ॥ इति
तत्रैव १८८ अध्यायः ॥
॥ अथ सामान्यग्रहणी

रोगस्य चिकित्सा । ग्रहणीमा
श्रितं रोगमजीर्णवदुपाचरेत् ।
लंघनैर्दीपनीयैश्च सदातीसार
भेषजैः ॥ दोषं सामं निरामं च ।
विद्यादत्रातिसारवत् । अतीसारो
क्तविधिना तस्यामं च विपाचयेत्
त् ॥ पेयादि पट्लघु चान्नं पंचको
लादिभिर्युतं । दीपनानि च त
क्रं च ग्रहण्यां योजयेद्भिषक् ।
कपित्थ बिल्व चांगेरी तक्र
दाडिमसाधिता । यवागूः पा
चयत्यामं शकृत् संवर्तयत्य
पि ॥ संवर्तयति चलीकरोति
अथ तक्रं । तत्र गोदधिगुणाः
गव्यं दधि उत्तमं बल्यं पाके स्वा
दु रुचिप्रदं । पवित्रं दीपनं ।
स्निग्धं पुष्टिकृत् पवनाप
हं । उक्तं दध्नामशेषाणां मध्ये
गव्यं गुणाधिकं ॥ अथ माहि
षीदधिगुणाः । माहिषं दधि प्र
स्निग्धं श्लेष्मलं वातपित्तनुत् ॥
स्वादुपाकमभिष्यन्दि वृष्यं गुर्व
स्रदूषणं ॥ अथ छागीदधिगु
णाः । आजं दधि उत्तमं ग्राहि लघु
दोषत्रयापहं । शस्यते श्वासका
सार्शः क्षयकार्श्येषु दीपनं उम
मे ग्राहिणां मध्ये श्रेष्ठस्त्वर्थः ॥
अथ तक्रस्य भेदाः । तक्रं तु
घोलं मथितं मथितं तक्रप्रभे
दतः । सस्नेहतये मे निश्चेष्टे
श्वेतं हि परिकीर्तितं ॥ ससर
रं निर्जलं घोलं मथितं तत्र
सरोदकं । तक्रं पादजलं प्रो
क्तमुदश्विदर्द्धवारिकं ॥ वात
पित्तहरं घोलं मथितं कफपित्त
नुत् । उदश्वित्कफदं बल्यं श्र
मघ्नं परमं मतं ॥ अथ तक्रस्य
गुणाः । तक्रं ग्राहि कषायाम्लं
मधुरं दीपनं लघु । वीर्योष्णं ब
लदं वृष्यं प्रीणनं वातनाशनं ॥
यान्युक्तानि दधीन्येषां तद्गुणा
तक्रमादिशेत् । ग्रहण्यादिम
ते तक्रं पथ्यं संग्राहि लाघवात् ।
वातं च मम्लसान्द्रत्वात् सद्य
स्कं तु विदाहि च । किंच स्वादुवि
पाकित्वात् च पित्तप्रकोपनं ॥
कषायोष्णविकाषित्वाद्रौक्ष्याच्चैव
कफे हितं । अथोद्धृतस्नेहोद्धृता
नुद्धृतस्नेहस्य तक्रस्य गुणाः ।
समुद्धृतघृतं तक्रं पथ्यं लघु
विशेषतः । स्तोकोद्धृतघृतं तस्मा
द्गुरु वृष्यं कफापहं ॥ अनुद्धृतघृ
तं सान्द्रं गुरुपुष्टिकफप्रदं
॥ अथ दोषविशेषे तक्रं

विशेषाः। वातेऽम्लं सैंधवो
पेतं पित्ते स्वादु सशर्करं ॥
पिबेत्तक्रं कफे चापि क्षारत्रि
कटुसंयुतं ॥ हिंगुजीरयुतं
घोलं सैंधवेनावचूर्णितं ॥
ग्रहण्यर्शोऽतिसारघ्नं भवेद्वा
तहरं परं। रोचनं पुष्टिदं ब
ल्यं वस्तिशूलविनाशनं ॥
अथामपक्वतक्रगुणाः।
तक्रमामं कफं कोष्ठे हन्ति कं
ठे करोति च। पीनसश्वासका
सादौ पक्वमेव विशिष्यते ॥
अथ तक्रस्य निषेधः।
नैव तक्रं क्षते दद्यान्नोष्णकाले
न दुर्बले। न मूर्छाभ्रमदाहेषु
न रोगे रक्तपैत्तिके ॥ अथ त
क्रस्य गुणोत्कर्षः। न तक्र
सेवी व्यथते कदाचिन्न तक्रद
ग्धाः प्रभवंति रोगाः। यथा
सुराणाममृतं सुखाय तथा
नराणां भुवि तक्रमाहुः ॥ सु
त्र्यूषणसैंधवधान्यजीरकसं
युतं। सैंधवेनान्वितं दद्यात्
षड्यूष मिति कीर्तितं ॥ रसे
लघुर्ग्राही मासभव रसः। षड्यू
षः ॥ कर्षं गंधक मर्दयाद्वद
मुभे कुर्याच्छुभां कज्जली।

त्रातं त्र्यूषणानस्य पंचलवणं
सार्द्धं च कर्षं पृथक्। रसहिंगु
च जीरकद्वययुतं सर्वार्द्धभंगा
न्वितं खादेद्देहकमितं ग्रहणिगद
वांस्तक्रस्य विलेन च ॥ इति ल
घुलाई चूर्णं ॥ त्रिकटु त्रिफला
चैव विडंगं जीरकद्वयं। भल्लात
कं यवानी च हिंगुं लवणपंच
कं ॥ गृहधूमं वचा कुष्ठं रसगं
धकमभ्रकं। दारुत्रयाजमोदा
च चित्रकं गजपिप्पली। मु
स्ता मोचरसं पाठा लवंगं जा
तिपत्रकं ॥ समभागकृतं चै
षां चूर्णं श्लक्ष्णं विनिर्मितं। शक्रा
शनस्य चूर्णं च चूर्णं तुल्यं प्रदा
पयेत्। मंदाग्निकासङ्ग्रोमल्ली
हपाण्डुरुचिज्वरान्। विष्टंभं
गृहं शूलं हन्यान्नानातिसारजा
न् ॥ आमवातापहं स्वल्पसूतिका
रोगनाशनं। वर्जनीयं माषम
त्स्यान्नं पिशितभोजनं पथ्यं
कांजिकमत्राग्निदीपितक्रमथा
पिबा। वृहल्लाई चूर्णमिदं लाई
भाषितमनुत्तमं ॥ इति वृहल्लाई
चूर्णं ॥ जातीफललवंगैला
पत्र त्वङ्नागकेशरैः। कर्पूर
चंदन तिल त्वक्क्षीरी तगरा

मल्लैः ॥ तालीस पिप्पली प
थ्यास्थूलजीरक चित्रकैः। शु
ण्ठीविडंगमरिचैः समभागवि
चूर्णितैः। यावंत्येतानि सर्वाणि
दद्यात्त्वगां च तावती। सर्वचूर्णस
मांशेन प्रदेया शुभ्रशर्करा
कर्षमात्रमिदं खादेन्मधुना
स्याविनंजनः। नाशयेत्तग्रह
णीकासं दाहं श्वासमरोचकं
जातीफलादि चूर्णं ॥ चित्रकं
पिप्पलीमूलं क्षारौ लवणप
चकं। व्योषहिंगवजमोदा च च
व्यं चैकत्र चूर्णयेत् ॥ वटिका
मातुलुंगस्य रसेन वा दाडिमस्य
वा कृता विपाचयत्यामं प्रदी
पयत्याशु चानलं ॥ क्षारौ स्वर्जिका
यवक्षारश्च। लवणपंचकमि
ति सैंधवं रुचकं चैव विडं सामु
द्रिकं गडमिति। व्योषं शुण्ठी
पिप्पली मरिचानि। अजमोदा
त्रयवानिका। मातुलुंगबीज
पूरकं। चित्रकादि वटिका ॥
श्रीफलशलाटुः कल्कोनागं
रचूर्णेन मिश्रितः सगुडः ग्रह
णीगदमत्युग्रं तक्रभुजा शीलि
तोजयति श्रीफलशलाटुः वि
ल्वस्यामफलं। गुडस्यात्र भागद्व
य

विल्वकल्कः ॥ चतथ्यलंस्तथा
काणं त्रिपलं लवणत्रयं वार्ता
कोः कुडवश्चार्कमूलाद्विल्वे न
ध्यानलाभ ॥ दग्धा द्रवेण वार्ता
कोर्गुटिकाभोजनोत्तरं। भुक्ता
भुक्तं पचत्याशु नाशयेद्ग्रहणी
गदं ॥ कासं श्वासं तथार्शांसि
विसूचीं च हृदामयं। वार्ताकु
गुटिका ॥ मुस्तकातिविषा
विल्व कोरजं सूक्ष्मचूर्णितं।
मधुना च समालीढं ग्रहणीस
र्वजां जयेत् ॥ कोरजं इंद्रयवः मु
स्तकादि चूर्णं ॥ श्वेताश्वा यदि
वातिकः सपक्को ग्रहणी गदः
गुडेनाधिकसर्जेन भक्षितेना
शु नश्यति ॥ सर्जः राल इति
लोके। सर्जरसचूर्णं ॥
विल्वाह् शक्र यव वालक मो
चरसिद्धमाज पयः पिबतियोदि
स त्र्यहेण। सोऽतिप्रवृद्धचिर
ग्रहणीविकारं सामं सशोणि
तमसाध्यमपि द्विणेति मो
चोमोचरसः। द्विणोति। ह
ति प्रस्थत्रयं त्वामलकीरसस्य
शुद्धस्य दत्वार्द्धतुला गुडस्य चूर्णी
कृतैर्ग्रंथिकजीरचव्यव्योषभल्ला
स्तातवृषाजमोदैः। विडंगसिंधु

त्रिफला यवानी चाग्निर्धान्ये
च पलप्रमाणैः। दत्त्वा त्रिवृच्चूर्णं
पलानि चाष्टावष्टौ च तैलस्य
चैव यथावत्॥ तन्मन्त्रयेत्तत्फल
प्रमाणं यथेष्टचेष्टस्त्रिसुगन्धि
युक्तं। अनेन सर्वे ग्रहणीविका
राः सश्वासकासस्वरभेदशो
थाः। शाम्यन्ति चायं विषमज्वरघ्न
हृत्पाण्डुगुल्मस्य च वह्निदीप्तेः स्त्री
णां तु वन्ध्यामयनाशनः स्यात्
कल्याणको नाम गुडः प्रसिद्धः
तैलेमनाक्त्रिवृतस्त्रिसुगं
धिपलं पलं। सिद्धं नियेय म
त्रैव गुडे कल्याणपूर्वके ॥
कल्याणगुडः ॥ पिप्पली
पिप्पलीमूलं चित्रकं गजपिप्प
लीधान्यकं च विडङ्गानि यवानी
मरिचानि च। त्रिफला चाजमो
दा च नलिनीजीरकस्तथा। सैं
धवं रोमकं चापि सामुद्रं रुच
कं विडं। आरग्वधस्त्वक्पत्रं
सूक्ष्मैला चोपकुञ्चिका। श्रेणी
शक्रयवाश्चैव प्रत्येकं कर्षसं
मिताः। मृद्वीकायाः पलान्यष्ट च
त्वारि कथितानि हि। त्रिवृतायाः
पलान्यष्टौ गुडस्यार्द्धतुला तथा
तिलतैलपलान्यष्टौ वामलका
रसस्य तु। प्रस्थत्रयमिदं
सर्वं शनैर्मृद्वग्निना पचेत्
उडुम्बरं चामलकं बादरं वा
यथाफलं। तावन्मात्रमि
दं खादेत्तत्येहायथानलं। नि
खिलान् ग्रहणीरोगान् प्रमेहां
श्चैव विंशतिं। उरोघातप्रतिश्या
यदौर्बल्यवह्निसदनं ज्वरा
न पि हरेत् सर्वान् कुर्य्यात्कां
तिं मतिं वरं। पिचुप्रायान्वया
हन्ति रक्तपित्तं च विग्रहं। धात
क्षीणवयः क्षीणः स्त्रीषु क्षीणः
क्षयी च यः॥ तेभ्यो हितस्तु वन्ध्या
यै महाकल्याणको गुडः॥ कू
ष्माण्डानां सुपक्वानां स्विन्नानां
निष्कुलत्वचां। सर्पिः प्रस्थे पल
शतं ताम्रपात्रे शनैः पचेत्॥ पि
प्पलीपिप्पलीमूलं चित्रकं गज
पिप्पली धान्यकानि विडङ्गा
नि नागरं मरिचानि च॥ त्रिफ
ला चाजमोदा च कलिङ्गाजाजि
सैन्धवं एकैकस्य पलं चैकं त्रि
वृतोऽष्टौ पलानि च। तैलस्य च
पलान्यष्टौ गुडात् पञ्चाशदेव
तु। आमलक्या रसः।
स्यात्र प्रस्थत्रयमुदीरितं।
तावत् पाकं प्रकु ॥

र्वीत मृदुना वह्निना भिषक्
यावत् दर्वीप्रलेपः स्यात्तदैन
मवतारयेत्॥ उडुम्बरं चाम
लकं बादरं वा यथाफलं। ताव
न्मात्रमिदं खादेज्जत्येहायथा
नलं॥ अनेनैव विधानेन प्र
युक्तश्च दिने दिने। निहन्ति
ग्रहणीरोगान् कुष्ठान्यर्शो
भगन्दरान्॥ ज्वरमानाहहृ
द्रोग गुल्मोदरविसूचिकाः
कामलापाण्डुरोगांश्च प्रमेहां
श्चैव विंशतिं॥ वातशोणि
तवीसर्पदद्रु पत्म हलीम
कान्। वातपित्तकफान्स
र्व्वानुष्णान्मुद्धान् समाचरे
त् व्याधिक्षीणवयः क्षीणः
स्त्रीषु क्षीणाश्च ये नराः। ते
भ्यो हितो गुडोऽयं स्याद्वन्ध्या
नामपि पुत्रदः। वृष्यो बल्यो
बृंहणश्च वयसः स्थापनः प
रः कुष्माण्डकल्याणकगुडः
अतीसाराधिकारलिखितं
बिल्वतैलं चात्र हितं। इति ग्रह
णीरोगाधिकारः इति भावप्र
काशः॥
ग्रामणीः पुं विष्णुः। यथा
अग्रणीर्ग्रामणीः श्रीमान्न्या
योनेता समीरणः। इति तस्य
सहस्रनामस्तोत्रं॥ यक्षः। य
था सरथाधिष्ठितो देवे रादि
त्ये ऋषिभिस्तथा। गन्धर्व्वरप्स
रोभिश्च ग्रामणीसर्पराक्षसैः॥
इति विष्णुपुराणे २ अंशे १०
अध्यायः॥ देवे रादित्ये आ
दित्याख्यदेवास्तेः। ग्राम।
णीर्यक्षः। इति तट्टीका ॥
ग्लुच इर उ चौर्य्ये ॥
गतौ। रेफयुक्तः। पंचमस्वरी
इर् अग्लुचत् अग्लोचीत् उग्लो
चित्वा ग्लुक्त्वा। इति दुर्गा
दासः॥
ग्लसु उ उ भक्षे। अन्तस्थ
स्तृतीययुक्तः। उ ग्लसित्वा ग्ल
स्त्वा। ड. ग्लसते। इति दुर्गादासः
ग्लह ऊ कि आदाने। अ
न्तस्थतृतीययुक्तः। ऊ अग्ल
हीत् अग्लाहीत्। कि ग्लाहय
ति ग्लहति। पक्षः केचित्तम
न्यते। इति दुर्गादासः॥
ग्लुच इर उ चौर्य्ये ॥
गतौ। अन्तस्थतृतीययुक्तः।
पंचमस्वरी। इर् अग्लुचत् अ
ग्लोचीत्। उ ग्लोचित्वा ग्लुक्त्वा
इति दुर्गादासः॥

ग्लुच उ इर गतौ ।
अन्तस्थतृतीयवर्गादिः । पंच
मस्वरी । उ ग्लुचित्वा ग्लुक्त्वा ।
इर अग्लुचत् अग्लोचीत् ।
इति दुर्गादासः ॥
ग्लेप ङ उ. दैन्ये ॥ गति
चालनयोः । अन्तस्थतृतीयवर्गः
उ. ग्लेपते निर्धनः सदा ॥
ङ अजिग्लेपत् इति दुर्गा
दासः ॥
ग्लेव ङ उ. सेवे । अ
न्तस्थतृतीयवर्गः । ङ अजि
ग्लेवत् । उ. ग्लेवते । इति दु ।
र्गादासः ॥
ग्लेष ङ उ. अन्वेषे ।
अन्तस्थतृतीयवर्गः । ङ अ
जिग्लेषत् । उ. ग्लेषते जिग्लेषे ।
अन्वेषो अनुसंधाने ग्लेषते
यः सतां मार्ग मिति हलायुधः
इति दुर्गादासः ॥
ग्लै क्लमे । अन्तस्थतृतीय
वर्गः । क्लमो हर्षक्षयः ग्ला
यति लोकः शोकात् । अनु
पसर्गस्य मोऽज्वलकलहल
इत्यादिना वा ह्रस्वः । ग्लपय
ति ग्लापयति सोपसर्गस्य तु
प्रग्लापयति । इति दुर्गादासः ।

चः चकारः । तस्य लेखनप्र
कारादि यथा । सत्यिरूपा वा
मरेखा किंचिदाकुंचिता ततः
कुण्डलीरूप मास्थाय ततो
ऽधोगता दक्षतः ॥ अत ऊर्द्ध्व
गता रेखा शम्भुर्नारायणस्त
योः । ब्रह्मस्वरूपिणी देवि मा
त्राशक्तिः प्रकीर्तिता ॥ इति ।
अस्य ध्यानं यथा मालतीपु
ष्पवर्णाभां षड्भुजां रक्तलो
चनां । शुक्लाम्बरपरीधानां शु
क्लमाल्यविभूषितां सदास्मे
रमुखीं रम्यां लोचनत्रयराजि
तां । एवं ध्यात्वा चकारं तत्म
न्त्रं दशधा जपेत् ॥ तत्प्रणाम
मन्त्रो यथा । निर्गुणं त्रिगुणो
पेतं सदा त्रिगोलसंयुतं । सर्व
गं सर्वदा शान्तं चकारं प्रणमा
म्यहं ॥ इति च वर्णोद्धारतन्त्रं ।
तस्य नामानि यथा । चः खञ्ज
चुन्द्री रोहिणी चेदी शास्त्रिपुरान
कः वायुः पिवो जमः । सम्मा
किंकिणी चोरनायकः म
ही चिर्वह्नलो मेधा काल
रूपी च दा ॥

त्मकः । लम्बोदरा ज्वालमल्लं
नन्देशो हननं धृतिः ॥ त्रैलो
क्यविद्या संहर्त्री कामाख्यम
न्त्वामयः । इति नानातन्त्राणि
चग्च हसने । केचवर्ग
तृतीयोपधः । चग्चति । इ
ति दुर्गादासः ॥
चट य म उ. चेष्टे । य
चटा । उ. चटते पठितेषि
धः । म चटयति चटतीति च
टो ज्ञेया नाचटत् चटता मि
यादिति त चटते चटः पचा
दित्वादन् । ततो चट इवाचरे
तीति क्वौ साध्यं । इति दु
र्गादासः ॥
चट क हिंसे ॥ संघाते ॥
द्युतौ । क चाटयति कवाटं
हारिजनः संयोजयतीत्यर्थः
इति दुर्गादासः ॥
चट इ कि द्युतौ । इ
चण्ट्यते । कि चण्टयति च
ण्टति । द्युतिर्दीप्तिः । द्युत्यर्थ
त्वेन पाठिकचूरादित्वसिद्धे
कि करणमर्थान्तरे ऽपि पाठि
कचूरादित्वार्थं । तथा च । क्रिया
वाचित्व माख्यातुं प्रसिद्धोऽर्थः
प्रदर्शितः । प्रयोगतो ।

ऽन्यमन्तव्या अनेकार्था हि धातवः
॥ इति वोपदेवः । प्रसिद्धार्थक
थनं धातूनां प्रसिद्धोऽर्थः प्र
दर्शितः । किन्तु महाकविप्र
योगं दृष्ट्वा ऽन्ये ऽप्यर्था मन्त
व्याः हि यस्मात् धातवो ऽने
कार्था भवन्तीत्यर्थः ।
तेन हिंसार्थत्वात् पठितस्या
पि शंसतेः कथनार्थत्वे नेमद्धि
या शंसति किंचिदीप्सितमिति
रघौ कथयतीत्यर्थः । एवं
दीप्त्यर्थपठितस्यापि तर्कधातो
र्वितर्कणार्थत्वे तर्कयत्यनागु
णं सुधी रित्यादिः । इति दु
र्गादासः ॥
चटकः पुं कुलाचार्यः । तस्या
स्पृष्टत्वं यथा । वरं चाण्डालसं
स्पर्शीऽकुर्यात् साधको नमः
तथाप्यस्पृश्यगात्मकं सर्वदा
तं परित्यजेत् ॥ दूषिताः क
लिकालेषु भारते विविधाः
प्रजाः । अत एव महेशानि स
र्वसर्गदूषिताः । चटकं ब्रा
ह्मणं देवि संस्पर्शी यत्नतस्त्य
जेत् । इति शाक्तानन्दतरंगि ।
ण्यां षोडशोल्लासे महिषम
र्द्दिनीतन्त्रवचनं ॥

घट्ट क चाले। इहयान्तः।
चालश्चलनं। क घट्टयति मे
घो वायुना। इति दुर्गादासः॥
घट्ट उ. चाले। इहयान्तः।
उ. घट्टते। इति दुर्गादासः॥
घण्ट द उ म दीप्तौ। द म
घण्टयति घण्टते। उ घण्टित्वा
घण्ट्वा। इति दुर्गादासः॥
घण्टा स्त्री कांस्यनिर्म्मितवाद्य।
विशेषः। अथ घण्टामाहात्म्यं।
उक्तञ्च स्कान्दे श्रीब्रह्मनारदसं
वादे। स्नानार्च्चनक्रियाकाले
घण्टानादं करोति यः। पुरतो
वासुदेवस्य तस्य पुण्यफलं
शृणु॥ वर्षकोटिसहस्राणि व
र्षकोटिशतानि च। वसते देव
लोके तु अप्सरोगणसेवितः।
सर्ववाद्यमयी घण्टा केशव
स्य सदा प्रिया। वादनाल्ल
भते पुण्यं यज्ञकोटिसमुद्भ
वं॥ वादित्रनिनदैः तूर्य्यगीत
मङ्गलनिःस्वनैः। यः स्नाप
यति गोविन्दं जीवन्मुक्तो भवे
द्धि सः। वादित्राणामभावेतु।
पूजाकाले हि सर्व्वदा। घ
ण्टाशब्दो नरैः कार्य्यः सर्व्ववा
द्यमयी यतः॥ सर्ववाद्यमयी
घण्टा देवदेवस्य वल्लभा। त
स्मात् सर्व्वप्रयत्नेन घण्टानादं
तु कारयेत्॥ मन्वन्तरसहस्राणि
मन्वन्तरशतानि च। घण्टानादेन
देवेशः प्रीतो भवति केशवः।
विष्णुधर्म्मोत्तरे श्रीभगवत्
प्रह्लादसंवादे। शृणु दैत्येन्द्र
वक्ष्यामि घण्टामाहात्म्यमुत्त
मं। प्रह्लाद त्वत्समो नास्ति
मद्भक्तो भुवनत्रये॥ मम ना
माङ्किता घण्टा पुरतो मम तिष्ठ
ति। अर्च्चिता वैष्णवगृहे तत्र मां
विद्धि दैत्यज॥ वैनतेयाङ्किता
घण्टा सुदर्शनयुता यदि।
ममाग्रे स्थापयेद्यस्तु देहे तस्य
वसाम्यहं॥ यस्तु वादयते घ
ण्टां वैनतेयेन चिह्नितां। धूप
नीराजने स्नाने पूजाकाले वि
लेपने॥ ममाग्रे प्रत्यहं वत्स
प्रत्येकं लभते फलं। मखा
युतं गोयुतञ्च चान्द्रायणशतो
द्भवं॥ विधिवाह्यकृता पूजा स
फला जायते ध्रुवं। घण्टाना
देन तुष्टोऽहं प्रयच्छामि स्वकं
पदं॥ नागारिचिह्निता घण्टा
रथाङ्गेन समन्विता। वादनात्
कुरुते नाशं जन्ममृत्युभयस्य च

॥ गरुडेनाङ्किता घण्टा दृष्ट्वाहं
प्रत्यहं सदा। प्रीतिं करोति
दैत्येन्द्र लक्ष्मीं प्राप्य यथाध
नः॥ दृष्ट्वा स्मृते यथा देवाः।
प्रीतिं कुर्वन्त्यहर्निशं। सुपर्णे
च तथा प्रीतिं घण्टाशिखर मा
स्थिते॥ स्वकरेण प्रकुर्वीत घ
ण्टानादं सुभक्तिदः। मदीयार्च्च
नकाले तु फलं कोटिसैन्दवेक
लौ। अन्यत्र च। घण्टादण्डस्य।
शिखरे सचक्रं स्थापयेत्तु यः। ग
रुडं वै प्रियं विष्णोः स्थापितं भु
वनत्रये॥ सचक्रघण्टानादेन
सन्ध्याकाले शृणोति यः। पाप
कोटियुतस्यापि नश्यन्ति यम
किङ्कराः॥ सर्वेदोषाः प्रलीय
ते घण्टानादे कृते हरौ। देवता
नां मुनीन्द्राणां पितॄणामुत्स
वो भवेत्। अभावे वैनतेयस्य।
चक्रस्यापि न संशयः
घण्टानादेन भक्तानां प्रसादं कु
रुते हरिः॥ गृहे यस्य भवेन्नि।
त्यं घण्टा नागारिसंयुता। न स
र्पाणां भयं तत्र नाग्निविद्युत्स
मुद्भवं॥ यस्य घण्टा गृहे नास्ति
शङ्खञ्च पुरतो हरेः। कथं भा
गवतं नाम गीयते तस्य देहि
नः इति। अतो भगवतः प्री
त्यै घण्टा श्रीगरुडान्विता सं
ग्राह्या वैष्णवैर्यत्नाच्चक्रेणाप
रिमण्डिता॥ स्नाने प्रोक्षादिवा
द्येन नामसंकीर्त्तने हरेः।
गीतेन्द्रस्य पुराणादि पठनेच
प्रशस्यते। इति श्रीहरिभक्ति
विलासे ६ विलासः॥
घम्ब गतौ। ओष्ठवर्गशेषो
पधः। घम्बति। इति दुर्गा।
दासः॥
घर्ब्ब गतौ। रेफोपधः।
घर्ब्बति। इति दुर्गादासः॥
घर्म्मः पुं स्वेदः। तत्पर्य्याय
स्तिमः ४। इति जटाधरः॥
स्वर्णं ५ इति शब्दरत्नावली।
घर्म्मदोषः पुं स्वेदस्य विकारः।
तस्यौषधं यथा। मदोस्म लोध्र
नीवारचूर्णं तकनकस्य च।
तेनोद्वर्त्तितदेहस्य हरेद्धीष्म
प्रसारिकां॥ नश्योष श्रीवदेवे
द्रू घर्म्मदोषश्च नश्यति। इति
गारुडे १९४ अध्यायः॥
घष इ उ. हवे। आद्यस्वरी
इ घंष्यते। उ. घंषते।
उ. घंषते। अयं केश्चिन्नमन्य
ते। इति दुर्गादासः॥

चस ल ऊ भदे। ल
अचसत्। ऊ चस्ता। इति दु
र्गादासः॥
चस इ उ. क्षरणे। इचं
स्यते। उ. संचते। अचं कें
श्चित्र मन्यते। इति दुर्गा
दासः॥
चारिकः पुं चाक्रिकः। इ
त्यमरः॥ अन्यच्च। मिलिता
वहवोयेनभवेयुः स्तुतिकार
काः। चाक्रिकास्ते निगदिता
श्चाक्रिकाप्रपिकृच्चचित्॥ चं
टावाद्यस्तावकाये चारिका
श्चारिकाश्च ते। इति शब्दर
त्नावली॥
चारः पुं गवाद्यदनीयतृणं।
विशेषः। तत्पर्य्यायः। यवासं ५
इति शब्दरत्नावली॥
चिण इ उ. ग्रहणे। इ
चिस्यते। उ. चिस्नते। जेचि।
स्यते। इति दुर्गादासः॥
चु उ. ध्वनौ। उ. चवते।
इति दुर्गादासः॥
चुट उ. ल परिवर्त्ते। प
रिवर्त्तो गतवतः प्रत्यागमनं
विनिमयो वा। उ. चोटते न
दी। ल अचुटत्। इति दु
र्गादासः॥
चुट श्चि प्रतिहतौ। श्चि चु
टति अचुटीत् शात्रं प्यूरः।
जचोट। इति दुर्गादासः॥
चुड श्चि आच्छादने। श्चि चु
डति अचुडीत्। इति दुर्गा
दासः॥
चुण इ उ. ग्रहणे। इ चु
स्यते। उ. चुस्नते ज्योचुस्यते
इति दुर्गादासः॥
चुण उ. भ्रमणे। उ. चोण
ते। इति दुर्गादासः॥
चुण श भ्रमणे। श चुण
ति चोणिता। इति दुर्गादासः
चुर श ध्वनौ॥ भीमार्थे।
भीमो भयानकरसस्तस्यार्थो
निमित्तं हेतुरिति यावत् भी
मार्थः। श चुरति व्याघ्रो म
नुष्याणां भयहेतु र्भवतीत्यर्थः
चुर भीमार्थोनिशब्दयो रितिप्रा
चः। कानिइति शब्दविशेषण
मितिरमानाथः। चुरत्यार्त्ते
च कुरुते इति। शाहानुहतौ
महमल्लः। चोरिता।
इति दुर्गादासः॥
चुष कि इर स्नेतो॥
विशब्दे। विशब्द इह कथनं

आविष्करणं नानाशब्दकरणं वा
कि चोषयति चोषति गूढम
र्थं मभियुक्तः। नानाशब्दं वा
यं चोषयति द्वारि यस्य क
श्चिज्जडतः। इति हलायुधः
इर अचुषत् अचोषीत्। आ
उः सततक्रन्दे। चुष किर
नुवर्त्तते। कि आचोषयति
आचोयति। शोकार्त्तः सततं
क्रन्दतीत्यर्थः। इति दुर्गादा
सः॥
चुष इर वधे। इर अचुष
त् अचोषीत्। इति दुर्गा
दासः॥
चुष इ उ. पृशे। पृशः
कान्तिकृतिः। इ चुष्यते। उ.
चुषते चंदनो गात्रं। इति दु
र्गादासः॥
चुर य उ. ई हिंसाज्यान्योः
दीर्घी। य उ. चुर्य्यते। ई
चुर्णः ज्यानि र्गतवऊवयोभा
वः। इति दुर्गादासः॥
चुर्ण भ श भ्रमणे। भ
चुर्णति चूर्णते। श चुर्णती चू
र्णती इति दुर्गादासः॥
चू सेके। चूरति तरुमे।
चः। इति दुर्गादासः॥
चू रलि भासि॥ सेके।
रवैदिकः। लि जचर्ति चूत
दीप्यते त्वरति वेत्यर्थः।
इति दुर्गादासः॥
चू क सेके॥ छादने। क
चारयति। इति दुर्गादासः॥
चूण द उ ञ दीप्तौ। द ञ
चूर्णोति चर्णोति। चूर्णते च
र्णते। उ चर्णित्वा चूर्त्वा। इति
दुर्गादासः॥
चूण इ उ. ग्रहणे। इ चू
स्यते। उ. चूस्नते जरी चूस्यते
इति दुर्गादासः॥
चूतः पुं स्त्री पक्वनवनीतं।
तत्पर्य्यायः। आज्यं १२।
यथा। चूतो ऽस्त्री चाज्य माज्य
च सर्पिः स्यादमृतं हविः। इ
ति जटाधरः॥
चूततैलादिकल्पः पुं रोगाना
शकनानौषधिपक्वचूततैला
दिवर्गः। यथा। धन्वन्तरिरुवाच
चूततैलादिवस्तामिश्रणसंस्कृ
नरोगान्नुत्। पांसवपुष्पीवचासो
मा ब्राह्मी बलसर्वर्च्चला॥ अभया
गुडूची चैव अटरूषक वाकुची।
पले रक्तसमे भागे हीन प्रस्थं
विपाचयेत्॥ कणककोर्य्या।

रसप्रस्थ क्षीरप्रस्थसमन्विते।
पचेद्धात्रीहतंनामघृतमेतत्पाक
रंपरं॥१॥त्रिफलाचित्रकबला
निर्गुण्डीनिंबवासकाः।पुनर्ण
वागुडूचीच बृहतीच शतावरी
एतैर्घृतं यथालाभंसर्वरोग
विमर्द्दनं॥२॥ बलामातक
षायेन तैलस्याद्धाढकंपचेत्
कल्कैर्मधुकमंजिष्ठाचंदनान्
पलपमकैः।सूक्ष्मैलापिप्पली
कुष्ठत्वगेलागुरु केशरैः।गंधा
श्मजीवनीयैश्च क्षीराटकसमा
श्रितं।एतन्मृदग्निनापक्वंस्थाप
येद्राजतेशुभे।सर्ववातविका
रांस्तुसर्वधातुगताश्रयान्।तै
लेमेतन्नमयत्येतद्बलाख्यंराज
वल्लभं॥३॥ शतावरीरसप्र
स्थंक्षीरप्रस्थंतथैवच।शतपु
ष्पादेवदारु मांसी शैलेयकं
बला॥चंदनंतगरंकुष्ठमा।
लाचांशुमती तथा।एतैः क
र्षसमैः कल्कैस्तैलप्रस्थंवि
पाचयेत्॥कुब्जवामन पंगू
नांबधिरव्यंगकुष्ठिनां।वायुना
भग्नगात्राणांयेचक्षीणेन्द्रियेषु
ते।जराजर्जरगात्राणां नाध्मा
नमुखशोषिणां।नरााणांनाशि

येवातात्पिरासक्ताश्चगताश्च ये॥
सर्वास्तान्नाशयत्याशु तैलमेवमा
हृशंगकं। नारायणमिदं तै
लं विष्णुनोक्तंरुगर्हणे॥४॥
पृथक् तैलं घृतं कुर्यात् स
मस्तै रौषधैः पृथक्।शताव
र्य्या गुडूच्या वा चित्रकैरोचना
युतः॥ निर्गुण्ड्या वा प्रसार
ण्याः कंटकार्य्यारसादिभिः।
वर्षावानलयावापि वासकेन
फलत्रिकैः॥ब्राह्म्या चैरण्डके
नापि भृंगराजेन मुण्डिना।
मषल्यादशमूलेनखदिरेण
वरादिभिः।वटिकामोदकोवापि
चूर्णस्यात्सर्वरोगनुत्।घृतेन
मधुनावापि युक्तं खण्डगुडा
दिभिः॥लवणैः कटुकैर्युक्तं
यथालाभंच रोगनुत्।५।चि
त्रकंकोरुत्रिवृता मलघ्नहयमा
रकं॥सर्षपाच बाला गणिकास
प्तपर्णसुवर्चिका।ज्योतिष्मतीच
संभृत्य तैलं धीरो विपाचयेत्॥
एतत्विस्यन्दनं तैलं मसृणंदया
त्कोदरे। शोधनं रोचनंचैव
सर्ववर्णकरंपरं॥ चित्रको
द्यं महातैलं सर्वरोगप्रभ
जनं।६। अजमोदः ॥

सर्सिंदरो हरितालं निपाहयं
क्षारद्वयं फेनयुत माद्र्दकं
सरलोद्भवं।इंद्रवारुण्यपा
मार्ग कदलैः कुंदलैः समैः
एभिः सर्षपजं तैल मजमूत्रे
ण योजितं। मृद्वग्निना प
चेदेतदर्कक्षीरेण संयुतं॥
अजमोदादिकं तैलं गण्ड
मालांव्यपोहति।विदग्धस्तु
पचेत्पक्वंपक्वंचैवविशोध
येत्रोपणंसद्भावेच तैले
नानेनकारयेत्।अजमोदा
दिकंतैलंमहावीर्य्यंच रोग
नुत्॥७॥ इत्यादिमहाप
राणे गारुडेघृततैलादिकल्पः
समाप्तः।१९८।अध्यायः॥
घृष ३ संघर्षे।३ च
यित्वा घृष्ट्वा। घर्षति चंदनं
लोकः।इति दुर्गादासः॥
चोटकः पुं स्त्री पशुविशेषः
चोडा इतिभाषा।तत्पर्य्यायः
मृगभक् २८ शालिहोत्रः
२९ लक्ष्मीपुत्रः ३० प्रकीर्ण
कः ३१ इति जटाधरः॥ वा
तायनः ३२ श्रीपुत्रः ३३ चामरी
३४ हयी ३५ शालिहोत्री ३६
महद्दयः ३७ वाजस्कन्धः॥

३८ हरिद्राक्षः ३९ एकशफः
४० किंधी ४१ ललाते ४२ वि
मानकः ४३।इति शब्दरत्ना
वली॥अत्यः ४४ वाजिः ४५ द
धिक्रा ४६ दधिक्रावा ४७ एतग्वः ४८
एतशः ४९ पैद्वः ५० दौर्गहः
५१ उच्चैःश्रवसः ५२ तार्क्ष्यः ५३
आशुः ५४ ब्रध्नः ५५ अरुषः ५६
मांश्चत्वः ५७ अव्यथयः ५८
श्येनासः ५९ सुपर्णाः ६० प
तंगाः ६१ नरः ६२ ह्वार्य्याणां ६३
हंसासः ६४।इति वेदनिघ
ण्टौ १अध्यायः॥हरी इंद्रस्य १
रोहितः अग्नेः २ हरितः।
आदित्यस्य ३ रासभौ अश्वि
नोः ४ अजाः पूष्णः ५ पृषत्यो
मरुतां ६ अरुण्यो गावः उ
षसां ७ श्यावाः सवितुः ८
विश्वरूपा बृहस्पतेः ९ नियु
तो वायोः १०।इति दृष्टादिष्टा
प्रयोजनानि।इतिच वेदनिघ
ण्टौ १अध्यायः॥
चोषकः पुं लताविशेषः त
त्पर्य्यायः।चोषः १ चोषालता ८
इति शब्दरत्नावली॥कोषकोलः ९
इति जटाधरः॥
पीतायाः पर्य्यायः।कोषातकी

८। इति च जटाधरः ॥
चोषणम् स्त्री उच्चैः शब्दः।
तत्पर्य्यायः। निष्ठुरं २ चुष्ट
चोषणं ४ इतिशब्दरत्नावली
घ्रा गन्धग्रहणे। जिघ्रति।
पुष्पलोकः इतिदुर्गादासः
घ्रातः त्रि गृहीतगन्धः। सो
का इतिभाषा। तत्पर्य्यायः
शिङ्घितः ३। इति जटाधर
शब्दरत्नावल्यौ ॥

ङ

ङ ङकारः। तस्य लेखन
प्रकारादि पूर्वलिखितं। ध्या
नं यथा। धूम्रवर्णां महाघोरां
ललज्जिह्वां चतुर्भुजां। पी
तांबरपरीधानां साधकाभीष्ट
सिद्धिदां॥ एवं ध्यात्वा ब्रह्म
रूपां तन्मंत्रं दशधा जपेत्।
इति वर्णोद्धारतंत्रं ॥
तस्य नामानि यथा। ङः शं
खी भैरवश्चण्डो विन्दूत्तंसः
शिशुप्रियः। एकरुद्रो दत्त
नखः खर्परो विषयस्पृहा॥ कां
तिः श्वेतास्या घोरो हि जा
ल्मा ज्वालिनी विघ्नत्। मंत्रश
क्लिष्ट मदनो विघ्नेशी चात्म
नायकः॥ एकनेत्रो महानंदो
दुर्द्धरश्चन्द्रमा यतिः। शिवयो
या नीलकण्ठः कामेशी च मया
ष्टकौ॥ इति नानातन्त्राणि ॥
ङ. ङ. ध्वनौ। ङ. ङ. वते
इति दुर्गादासः ॥

च

च चकारः। तस्य ध्यानं यथा
तयारकुन्दपुष्पाभां नानाल
ङ्कारभूषितां। सदा षोडशव
र्षीयां वराभयकरां परां ॥
शुक्लवस्त्राहृतकटिं शुक्लवस्त्रो
त्तरीयिणीं। वरदां शोभनां र
म्यां महावाक्यसमन्वितां॥ एवं
ध्यात्वा चकारन्तु तन्मंत्रं दशधा
जपेत्। इति वर्णोद्धारतंत्रं ॥
तस्य नामानि यथा।
चः पुष्करो ह्ली वाणी चात्म
शक्तिः सुदर्शनः। चर्मभुण्डध
रो भूतो महिषाचारसंविनी ॥
एकरूपो रुचिः कूर्म श्चामुण्डा
दीर्घबालुकः। वामवाहुमूल
मायाचतर्षिस्वरूपिणी दयित

श्च द्विनेत्रश्चलक्ष्मी स्त्रिनयलो
चनः। चेदनं चंद्रमा देव श्चेत
नो हृच्छ्रिकोदुपः॥ देवीकेरम
खेच्छात्मा कौमारी पूर्वफा
ल्गुणी। अनंगमेखला वायु
मेदिनी च मूलावती। इति
नानातन्त्राणि ॥
चक इ भ्रान्तौ। सौत्र धा
तु रयं। इ चंकुरः रथे।
इति दुर्गादासः ॥
चक म उ. म प्रतीघात
तृप्त्योः। म चकति चकते
खलः साधुं। उ. चकते जन
स्तृप्तीत्यर्थः। म चकयति
इति दुर्गादासः ॥
चक्क क ऋगौ। कोपधः
आद्यस्वरमध्यः। आर्त्तिःपी
डनं। क चक्कयति शत्रुं शूरः
इति दुर्गादासः ॥
चकास ऋ द ल दीप्तौ।
ऋ अचीचकसत् अचचकास
अनेकस्वरात् सन्वद्भावविक
ल्पः। द चकासति। ल चकास्ति
इति दुर्गादासः ॥
चक्रं क्ली सुदर्शनचक्रं। तस्य
भगवन्मंदिरेस्थापनविधिर्यथा
अन्यानि चेह द्विजदेव देवैः।
कृतानि नानायतनानि विष्णोः
प्रत्यंगमुख्यांकितमंदिराणि य
द्दर्शनात् कृष्ण मनुस्मरंति ॥
इतिश्रीभागवते १ स्कंधे १ अ
ध्यायः २३ श्लोकः॥ द्विजदे
वैः ऋषिभिर्देवैश्च कृतानि श्रा
ग मंगो प्रति वर्त्तते इति प्रत्यं
गाग्रोपधानि तेषु मत्स्ये चक्रे
तेनांकितानि मूर्द्धस्य हेमकुं
तेषु चिह्नितानि मंदिराणि ये
षुतानि नानाविधानि विष्णोरा
यतनानि क्षेत्राणि तीर्थानि च
आसिषेवे। येषां चक्रांकितमं
दिरकलशदर्शनात् श्रीकृष्ण स्म
रणंभवति। इति तट्टीकायांश्री
धरस्वामी॥ अथ चक्रलक्षणं
द्वादशारन्तु षट्कोणं वलयत्र
यसंयुतं। चक्रं स्याद्दक्षिणावर्त्तः
शंखश्च श्रीहरेः स्मृतः॥ इति
श्रीहरिभक्तिविलासे ५ वि
लासः ॥
चच्च न ज्ञातने। नचक्षोति
इति दुर्गादासः ॥
चच्चत्पुटः पुं तालप्रभेदः।
यथा। ताले चच्चत्पुटे ज्ञेयंगु
रुद्वन्द्वंलघुप्लुतं। इति संगीत
दामोदरः॥ चंचत् पुटोपि

त्रचितपावः ॥
चंचुः स्त्री पट्टशाकविशेषः।
तत्पर्य्यायगुणाः। चिंच श्चंचु
श्चिंचुकीचदीर्घपत्रा सतिक्तिका
चंचुः शीता सरा रुच्या स्वाद्वी
दोषत्रयापहा ॥ धान्यपुष्टक
रीवल्यामेध्यापिच्छिलिका।
स्मृता। इतिभावप्रकाशः ॥
चट क वधे ॥ भेदे। कचाट
यति इतिदुर्गादासः ॥
चट भेदे। चटति। इति
दुर्गादासः ॥
चटकः पु कलविंकपक्षी।
तत्पर्य्यायः। कालकंठकः ८
कामचारी। ९ इति जटाधरः ॥
कलाविकलः १० इति शब्द
रत्नावली ॥
चड इ क रोषे। इ कच
ण्डयति। इति दुर्गादासः ॥
चड इ ङ. रोषे। इ च
ण्डते। ङ. चण्डते। इति दु
र्गादासः ॥
चण शब्दे। चणति। इति
दुर्गादासः ॥
चण मि गतौ ॥ हिंसे।
मि चणयति चाणयति। इ
तिदुर्गादासः ॥

चण म दाने। म चणयति
इति दुर्गादासः ॥
चत प ञ याचे। प अचती
त्। ञ चतति चतते। इति
दुर्गादासः ॥
चतरक्रमः पु समयाद्रूपका
न्तर्गतरूपकभेदः। यथा। द्रु
तद्वन्द्वं लतद्वंद्वं तथा प्लुतेगु
रु भवेत्। द्वाविंशात्यक्षरैर्युक्तः
शृंगारे चतरक्रमः ॥ इति
संगीतदामोदरः ॥
ततरम्ला स्त्री चतुर्विधाम्लद्र
व्या। यथा आम्लवेतसहत्ताम्ल
हलजंवीरनिंबुकैः। चतरम्ल
मिदं चाम्लवीजपुरयुतंभवेत् ॥
इतिभावप्रकाशः ॥
चद प ञ याचे। प अ
चदीत्। ञ चदति चदते।
इति दुर्गादासः ॥
चद इ ह्लादे ॥ दीप्तौ। इ चं
द्यते। ह्लादो हर्षः। इति।
दुर्गादासः ॥
चन शब्दे। चनति। इति
दुर्गादासः ॥
चन म हिंसे। म चनय
ति। इतिदुर्गादासः ॥
चन्व उ इतौ। उ चंवित्वा।

वक्का। इति गीतिः। इति दु
र्गादासः ॥
चंदनः पु स्त्री स्वनामख्या
तवृक्षः। तत्पर्य्यायः पटीरः २५
वर्णकः २६ भद्राश्रयः २७ सेव्यः
२८ रौहिणः २९। इति शब्दरत्ना
वली॥ याम्यः ३० पीतसारः ३१
इति जटाधरः ॥
चंदनधेनुः स्त्री पतिपुत्र व
त्स्वतनार्यै्हेपपकोनस्यचंद
नांकितसवत्सगौः तत्प्रमा
णप्रयोगो लिख्यते। तत्रा पि
वंचंदनचर्च्चितायां धेनोः प्र
दाने सविधिप्रयोगं। रत्नाक
रादेर्लिखितंविलोकयतेनोति
वाचस्पतिरयमत्रबुद्धिः। अथचंद
वि
नधेनुदानविधि तत्ररत्नाकरे देवलः। जीवद्भ
र्त्रीक यानारी पुत्रिणी म्रियतेयय
दि सवत्सा मंकितांधेनुमाचा
र्य्याय प्रदापयेत् ॥ पतिपुत्रव
तीनारी म्रियतेयाग्रतस्तयोः
वृषेनचोत्सृजेत पुत्रः पितायाव
च्चजीवति ॥ तथा कर्म्मोपदे
शिन्यां ब्राह्मणसर्वस्वेच ह
लायुधप्रतानि वचनानि।
यथा स्मृतिः। पतिपुत्रवतीनारी

म्रियते भर्त्तुरग्रतः। चंदनेनां
कितांधेनुं तस्याः स्वर्गाय क
ल्पयेत् ॥ तथा जातकर्णः धे
नुंचंदन माल्याभ्यांयोरघ्यान्मा
त्वहेतवे। यदि पापपातेर्युक्ता
तथापिस्वर्गमाप्नुयात् ॥ तथाव
शिष्टः। नयुक्तस्य वृषोत्सर्गो
यावत् पितरि जीवति। चंदने
नांकितांधेनुं मात्रार्थायप्रदा
पयेत् ॥ चतर्हस्तो भवेद्यूपोय
ज्ञहस्तसमुद्भवः। वर्त्तुलः प्रो
भनः स्थूलः कर्त्तव्यो धेनुमौ
लिकः ॥ बिल्वस्य वकुलस्यैव
कल्योयूपः प्रशस्यते। अभावे
वारुणेनापि यूपं कुर्य्याद्विधा
नतः वृषोत् सर्गेतु वृषमौलि
कः तरुणीरूपसंपन्नासुशी
लाचयस्विनी। न्यायार्ज्जिता
गृहेजाता देया सा श्रोत्रिया
यगौः नदीतीरेवने गोष्ठे दे
वतायतनेषुच। श्रीहरेर्वेमेऊ
शादेशे राजद्वारेचतध्यय ॥ इ
त्यादि एष वचनेषु वृषोत्सर्प
निषेध चंदनधेनुतसर्गविध्यार्थ
गवउपसंहारदर्शनात् वृषोत्
सर्गस्थाने प्रधानतया चंदनधे
नुतसर्गः प्रतीयते। अतो स्व

वृषोत्सर्गकार्य्याकारित्वात् तत्फलहेतुत्वं लभ्यते। एकोद्दिष्टं न कुर्वीत त्यासिनां चैव सर्वदा अहन्येकादशे प्राप्ते पार्व्वणं तु विधीयते॥ इति श्राद्धविवेकधृतोशनोवचने त्रिदण्डसंन्यासिनां एकोद्दिष्टनिषेधपार्व्वणविध्योर्युगपदुपसंहारात् एकोद्दिष्टस्थाने पार्व्वणमिव। यद्वा पतिपुत्रवतीत्वप्रत्तिविशेषविधिकृतवृषनवोत्सृजेदिति निषेध चंदनधेनूत्सर्गविधिभ्यामेतन्मात्राधिकृतसामान्यवृषोत् सर्गविधावगत फलभावनाकरणीभूत वृषकर्मकत्यागमनुषत्तत्कर्मीभूतवृषमपहाय तत्स्थाने धेनुमात्रगुणविधि। र्लाघवादवगम्यते। यथाग्ने सामान्यविध्यवगतापः प्रणयनीयाधिकरणीभूतचमसस्थाने गोदोहनापः प्रणयेदिति विशेषविधिना गोदोहगुणविधिवत् नालाभेपि प्रवेशिनी उपोष्यद्वादशीं तत्र त्रयोदश्यां तु पारणमित्यत्र एकादशीस्थानिमित्तस्थाने द्वादशीमात्रगुणविधिवत्त अन्यथा धेनूत्सर्गस्य स

यद्ककर्मत्वे फलभावना तत्करणनियोज्यानां पृथक्कल्पनेगौरवं स्यात्। उक्तविधिनिषेधयोरुपसंहारे वैयर्थ्यं च स्यात् तत्प्रकरणेकात् फलैकामिति। चंदनधेनूत् सर्गेपि प्रेतत्वविमुक्तिपूर्वकस्वर्गप्राप्तिः फलं। एवं कपिलमंत्रस्यापाप्यपगमस्वर्गप्रार्थनायामपि तथैव तात्पर्य्यं। तथाजातकर्णवचनस्यपाप स्वर्गपदयोरपि तथैवतात् पर्य्यं बोध्यं। मूलार्थानां विधिशेषिणामेव जैमिन्युक्तप्रामाण्येन प्रकृते सिद्धे विधिशेषित्वे लाघवात्। पापिष्ठमपि प्रहृष्टेन प्रहृष्टपापकृतापि वेति कात्यायनवचनस्यपापपदस्य प्रेतत्व एव तात्पर्य्यदर्शनाच्च। अत्र यद्यपि पतिपुत्रवतीत्वत्र पतिपुत्रवत्त्वस्य विशेषीभूतकर्तृत्वविमरणान्वयित्वेन न विशेषणत्वं किंतु पतलक्षणमेव तत्तत्कालकवंतोदेवदत्तस्य गृहाद्दतिवत् कादाचित्कतद्धर्माश्रयापि पतिपुत्रवतीति प्रयोगाउपपद्यते। तथापि अत्र तत्रत्योर्भर्तरुपात इत्याभ्यां ॥ ॥

मरणकालिकी पतिपुत्रसत्त्वावगम्यते। गवां गोष्ठे इतिवत्। अथवा पराह्नान्वयेन धेनूत्सर्गकालिकीति। नचापुष्पिता स्त्रता काचित् तस्या धेनुर्विगर्हिता। इति कपिलवचने अपुष्पितायाः पुत्रकर्तृकधेनूत्सर्गनिषेधस्याप्रसक्ततया सपत्नीपुत्रकर्तृकधेनूत्सर्गनिषेधप्राप्तेन दृष्टा पतिपुत्रवतीत्वस्य सपत्नीपुत्रवतीपरत्वं अवश्यं वाच्यं। नदेकवाक्यतया पुत्रिणीत्यादावपि तथात्वमिति वाच्यं। अपुष्पितेति कपिलार्द्धस्य प्रसक्तिपूर्वकतार्थ्यं पतिपुत्रवत् निहृर्त्तस्त्रकाया धेनूत्सर्गनिषेधार्थत्वात् गर्भासत्त्वलक्षणाया वीजाभावात्। मतियोगिवत्सस्मागभावयो रपि अपत्याभावविरोधित्वमते न अनातपुष्पत्वीपरत्वं वा भवतु तथात्वेपि तस्या धेनुर्विगर्हितेति अप्रसक्तार्थापि अपुष्पिता धेनुदाननिंदा पतिपुत्रवत्या चंदनधेनुदानस्तुतिपरा। यथा हरेरुत्थाने योत्सर्शेषण किंतेन प्रति यद्यच्छा यो निशीत्यप्रसक्तापि ॥

निंदा एकादश्यादिपौर्णमास्यन्तपंचके रेवमन्त्यपादयोगविधिस्तुतिपरा। यथा वा वेदगानेयोगिरामिरेति कुर्यात् स आत्मानमपिगिरेत् इत्यप्रसक्तनिंदा एवं कृत्वा अवगिरेदिति विधेः स्तुतिपरा। अत एव उक्तं शाबरभाष्ये। नहि निंदा निंद्यं निंदितुं प्रवर्त्तते अपि तर्हि तरत् स्तोतुमिति। स्तुतौ हि अप सिद्धगुणदोषारोपणं दोषाभावः। नचात्र काम्यस्यैव कार्त्तिकादिवृषोत्सर्गस्य स्थाने धेनुदानं विधीयते इति वाच्यं। तन्मात्रपरत्वे मानाभावात्। प्रत्युत क्रियत इति वर्त्तमानार्थकविभक्त्या वर्त्तमानसामीप्येनाचिरप्रमीता पस्थितेरुक्तं। ये तु वक्तीना मेकपत्नीनामेका चेत् पुत्रिणी भवेत्। सर्वा स्तास्तेन पुत्रेण प्राहुपुत्रवती र्मनुरिति मनुनापुत्रवतीत्वाभिधानादेव पतिपुत्रवतीत्यत्र सपत्नीपुत्रवती प्रतीयते इति वचने तेः तीवश्रीताः पुत्रवतीति पदस्यावेगड. तया मनया पतिपदस्यान्वये तदस्पत्वापत्तेः॥ ननु वृष॰

तत्स्ववयो वर्णोवृषः स्यादृष्टि
णाहिताः। वृषोत्सर्गे तथा
पुंसां स्त्रीणांस्त्रीगो विशिष्य
ते॥ इति भविष्यसंवादाद्धेनु
दानमिदं पतिपुत्रवत्या वृषो
त्सर्गेदक्षिणादानस्य विशे
षरूपं। नतु प्रधानकर्मान्तरं
गौरवात्। नच दक्षिणायाश्र
गत्वेन फलासंगतिः। यस्य प
र्णामयीजन्तु भवति न स पाप
श्लोकं शृणोतीतिवचनेऽपपत्ते
रितिचेन्न। वृषोत्सर्गदक्षिणा
त्सुचन्दनांकितधेनुदानस्य प्रक
रणान्तराम्नायेन प्रकरणान्तर।
न्यायतः प्रधानत्वसिद्धेः। वृषो
त्सर्गस्थानीयत्वेनानुवर्त्तमाना
च्छिष्टाचारात् धेनुदानयुगानद्ध
वृषोत्सर्गनिषेधानामसंगतेः
कपिलपंचराने चंदनधेनुदान
स्यापीतिकर्त्तव्यतायां वृषरूप
दक्षिणादानविधानाच्च॥ यथा
कपिल उवाच। अतःपरं प्रव
क्ष्यामि धेनुदानमनुत्तमं पति
पुत्रावती नारी म्रियते भर्त्तुरग्र
तः। चंदनेनांकितां धेनुमा
चार्य्याय निवेदयेत्। तथाजी
वद्भर्त्री तथा नारी पुत्रिणी।

म्रियते यदि। सवत्सां मंकि
तां धेनुमाचार्य्याय निवेदयेत्
साध्वी पतिव्रता नारी म्रियते या
ग्रतस्तयोः। वृषं नैवोत्सृजेत्
पुत्रो यावत् पितरि जीवति॥
सतपुत्रा च या नारी संगृहीता
तया भवेत्। तस्या धेनुर्न दात
व्या वृषोत्सर्गो विधीयते॥
अपुष्पिता मृता का चित्तस्या धेनु
र्विगर्हिता। द्वयोरेकं सुतो ज्ये
ष्ठः कनिष्ठो वृषमुत्सृजेत्॥
द्वयोः सोदरयोरेको भवेत् ज्ये
ष्ठः प्रधानतः। त्रयाणां द्वौ स
तौ ज्येष्ठौ चतुर्णां च त्रयः स्मृ
ताः। पंचानां सोदराणां च त्रयो
ज्येष्ठाः प्रकीर्त्तिताः ज्येष्ठेनैव तु
कर्त्तव्यं धेनुदानं विधानतः हेम
शृंगीरूप्यखुराः सुशीला वस्त्र
संयुता। कांस्यपात्रीनाम्नपृष्ठांघ्रं
राचामरभूषिता॥ प्रवालमालि
कां दद्यात् कर्णयोरुभयोरपि
चंदनेनांकितां धेनुमाचार्य्याय
निवेदयेत्॥ गवां लोकमवा
प्नोति दिवि देवैश्च मोदते। चं
दनेनांकितां धेनुं दत्त्वा गच्छे
त् स्वरालयं॥ तावत्तिष्ठति

स्वर्लोके यावदाहूतसंप्लवं।
नचोत्सर्गो वृषस्यात्र वत्स
तर्य्याविनस्य च॥ वृषोत्सर्ग
विधानेन कर्त्तव्यं सर्वकर्म च।
मानस्तोकेतिमंत्रेण दत्ते वृषा
ज्यसीतिच॥ धेनोश्च सक्थिदे
शेत्रिशूलांकं समालिखेत्।
वामभागेविशेषोऽयं दद्याच्चक्रं
समालिखेत्॥ तत्राप्यहर्ज्जये
द्विद्वानाचार्य्यस्तु विधानवित्
ततो वै संलिखेच्चक्रं पंचांगु
लप्रमाणकं मूले षडंगुले
कार्य्यं दक्षे वामे यथाविधि।
पूर्वाशाभिमुखीं धेनुं यजमा
नोत्तरामुखः मस्तकादिक्रमे
णैवप्रतिमंत्रैः प्रपूजयेत्।
शिरसि ओं ब्रह्मणे नमः। ललाटे
ओम् वृषभध्वजाय नमः। क
र्णयोः ओम् अश्विनीकुमाराभ्यां
नमः। चक्षुषोः ओं शशिभास्क
राभ्यां नमः। जिह्वायां ओम् सर
स्वत्यै नमः। दंतेषु ओम् वसुभ्यो
नमः। ओष्ठयोः ओम् संध्यायै न
मः। ग्रीवायां ओम् नीलकण्ठा
य नमः। हृदि ओम् स्कन्दाय नमः
रोमकूपेषु ओम् ऋषिभ्यो नमः
दक्षिणपार्श्वे ओम् कुबेरा।

य नमः। वामपार्श्वे ओम् वरु
णाय नमः। रोमाग्रेषु ओम् र
श्मिभ्यो नमः ककुत्सु ओम् धर्म्माय
नमः। जंघासु ओं अधर्म्माय नमः
श्रोणितटे ओम् पितृभ्यो नमः
खुरमध्ये ओं गंधर्वेभ्यो नमः।
खुराग्रे ओम् अप्सरोभ्यो नमः।
लांगूले ओम् द्वादशादित्येभ्यो
नमः। गोमये ओम् महालक्ष्म्यै
नमः। गोमूत्रे ओम् गंगायै नमः
पयोधरेषु ओं चतुःसागरा
य नमः। एवमंगानि संपूज्य
पठेन्मंत्रं समाहितः॥ ओं इंद्र
स्य च त्वमिंद्राणी विष्णोर्लक्ष्मी
श्च या स्मृता। रुद्रस्य गौरी या
देवी सा देवी वरदास्तु मे॥ ओं
या लक्ष्मीर्लोकपालानां या च
देवेष्ववस्थिता। धेनुरूपेण सा
देवी तस्याः पापं व्यपोहतु॥
ओं देहस्था या च रुद्राणी शंकर
स्य सदा प्रिया। धेनुरूपेण सा
देवी तस्याः शांतिं प्रयच्छतु॥
ओम् सर्वदेवमयी दोग्ध्री सर्व
लोकमयी तथा। धेनुरूपेण सा
देवी तस्याः स्वर्गं प्रयच्छतु॥
गृहीत्वार्घ्यं च पाद्यं च उत्सृजेन्मा
मलंकृतां। दीयते ब्राह्मणाय

आम्राचार्याय महात्मने एवं विशिष्टांतापेनं दत्वा तर्पण मारभेत्। पुच्छं गृहीत्वा पित्रा दीन् वृषोत्सर्गविधानतः। प श्चाच्चालयेत् किंचित् आचा र्याय च दक्षिणां। वृषमेव त तो दद्यादाचार्याय गुणान्विते॥ पूजयेद्ब्राह्मणांश्चैव वस्त्रमाल्या दिभिस्ततः। कांस्यपात्रं वस्त्रयु ग्मं स्वर्णं च विशेषतः आचा र्याय प्रदातव्यं ब्राह्मणेकतनके तथा। आगतान् पूजयेद्भक्त्या यथाशक्तिविधानतः दीनान्ध कृपणादीन् अन्नाद्यैः परितोष येत् इति कापिलेयेनुदानप्रमा णं॥ पुस्तकांतरे पातकिकां यथा। एकादशाहे प्रेतायाः यण्मासे चाब्दिके तथा। त्रिप। क्षे मासिके वापि दद्याद्गां चंदनां कितां॥ तथा वराहपुराणे। अयने विषुवे ह्यमावास्यायां पूर्णिमासु च। दर्शे मन्वंतरे चैव धेनुं दद्यात् सुपूजितां॥ ननु आद्यश्राद्धे त्रिपक्षे वे त्यादिना आद्यश्राद्धकर्तव्य नित्यवृषोत्सर्गकालस्य प रापरकालो गौणः। नवा स

र्वे कालाः स्युः। तत्र नाद्यः त्रि पक्षादौ शिष्टाचारविरोधात्। नापि द्वितीयः त्रिपक्षादौ नि त्यत्वबोधकाभावात्। वस्तुतः आद्यश्राद्धे वृषोत्सर्गस्य नि त्यत्वं त्रिपक्षादौ काम्यत्वं। आद्यश्राद्धपदं अशौचांतद्वि तीयेह्नीत्याद्येकवाक्यत्वात्। अत्र च आद्यश्राद्धस्य विच्छित्ति तत्वेन एकादशाहादौ क्रियमा णत्वे वृषोत्सर्गमपि न कुर्यात् आद्यश्राद्धदिने वृषोत्सर्गाक रणे त्रिपक्षाद्यन्यतमकालेपि वृषोत्सर्गस्यावश्यप्रेतत्वपरि हारकत्वेन तस्य पुनः संभवात्॥ सर्वस्यास्य सकृत्कृतस्य नि त्ये कल्प्य। एवं धेनुदानस्यापि। अत एव पूर्णे संवत्सरे मलमा सपातेपि प्रागकृतश्चेत् कार्य एव इति नवीना जगुः। एकक र्तृकानेकवृषोत्सर्गोपि शि ष्टाचार एकदिनेपि। तथा हि स्व र्गलोकगमनफलकेन का म्यत्वेनैवोभय आरभते त स्मिन् फले विशेष इति न्या याद्विरोधः॥ ननु नैमित्ति कत्वात् कथं साहित्यः स

कृत् कृते कृतः शास्त्रार्थ इति न्यायात्। न चैकत्र क्रि याद्वयमिति वचनाच्च। अ त्रायं विशेषः। काम्यनैमित्ति कफलविशेषार्थं भूयः कार्यं नैमित्तिकमात्रं सकृदेव। किं च संक्रान्त्यादिनिमित्तकश्रा द्धमपि पुनः पुनः स्यात् मैवं तत्रापि तत्तन्निरूप्यप्रधानफ लस्य सत्वेन चरितार्थ इति॥ अत्रोक्तानि सर्वाण्येतानि वच नानि तिर्यगाधिकरण्यायमू लानि। तथा हि तिर्यगाधिकर णे तिर्यक्पंग्वाद्यैर्यदेवता नामनधिकार इति यागमात्रे उक्तं तत्र हेतवः तिरश्चां विशि ष्टांतःकरणविरहात् पंगोः प्रचरणविरहात् अन्धानां अन्धवधिरमूकानामवेक्षण श्रवणोच्चारणविरहात् सांगाया गस्यासमर्थत्वेनैषामधिकारो न कारस्तद्वदत्रस्वपितुः पितृकृत्ये ष्वधिकारो न विद्यते। इति छ दोगपरिशिष्टे अग्निषोमाद्य स्तोर्गेण सुतो जीवत्पितृक श्चैत्यनन्यपात्रेतर इति कात्या। यनसूत्रे च जीवत्पितृकस्यापि र

तर्पणनिषेधात् वृषोत्सर्गो न दंगाभूततत्तत् पुच्छगलितोदकत र्पणविरहात् सांगाकरणासाम र्थ्याद्वृषोत्सर्गानधिकारः। अत एव वेदेन निर्णयेपि। अत्र वितस्त्रिया करणीभूततत्स्वधायेन यागवद्वृ षोत्सर्गस्य बाधः उक्तो वाचस्पति मिश्रेण। धेनुदानाकृतर्पणेन प्रधानाधिकारश्रुतेः जीवत्पि तृकाधिकृतविशेषविधानाच्चा धिकार एवाभ्युदयिकश्राद्धवत् जन्ममासस्नपनयनागसशिलैव तवच्च। अयत्नसामान्यशास्त्रोप जीवित्वेन निषेधः पर्युदास ए व। सत्त्वयदि पतिपुत्रवद्भार्याया वृषोत्सर्गं कुर्यादित्येव मात्र स्तदापुत्रेष्वादिवचनभागवैय र्थ्यं स्यात्। यदि च जीवत्पितृ कश्चिन्नो वृषोत्सर्गं कुर्यात्॥ इत्येवमाजस्तदा पूर्वभागवैय र्थ्यं स्यात्। यदि वा पतिपुत्रव त्या जीवत्पितृकपुत्रभिन्नो वृ षोत्सर्गं कुर्यादिति विशिष्य एतस्यापि पतिपुत्रवत्याः स्त उभयवदितायाश्च जीवत्पितृ कपौत्रादिना वृषोत्सर्गः स्या त् सचापुक्त एव आगमवचनेना

यविरोधात्। तस्मात् समुदायव
चनस्यार्थक्याय पतिपुत्रवद्भिन्ना
यां वृषोत्सर्गं कुर्य्यात्। तथा जी
वत्पितृकभिन्नो वृषोत्सर्गं कु
र्य्यात् इति वचनन्याय संवादात्।
द्वाक्यद्वय मेव सिद्ध्यति। प्रमाण
वद्भोरवस्य सर्वांगीकृतत्वात्।
दर्शपौर्णमासयोः षट्प्रधाना
पूर्ववत्। अथ वोक्तदेवलादि
वचने ज्येष्ठेनैव न कर्त्तव्यं धे
नुदानं विधानात् इत्यन्तकापि
लसकलवचनपर्य्यालोचन
या कनिष्ठपुत्रवतीभिन्नपति
पुत्रवतीतरजनस्य कापिल
प्रतिप्रसूतकनिष्ठपुत्रभिन्नजी
वत्पितृकान्योजनो वृषोत्स
र्गं कुर्य्यात्। इति सामान्यत एव
वृषोत्सर्गविधिः। तथा पति
पुत्रवत्या ज्येष्ठपुत्र एव चंदनां
कितयेन मृतस्येतिविधि
स्य सिद्ध्यति। ततश्च पतिपुत्रव
त्याः कनिष्ठपुत्रस्यैवतेनत
दन्यस्य तत्पितृकेनवा वृषोत्सर्गः
कार्य्यः। कनिष्ठपुत्राभावेनत
केनापि। एवं पत्यादिना चंद
नयेनुदान मिति। प्रतिप्रसूत
कनिष्ठान्यजीवत्पितृकेन क

स्यापि वृषोत्सर्गः कार्य्य इत्य
पि च पर्य्यवसितं॥ वस्तुतस्तु
पतिपुत्रवत्या वृषोत्सर्गनि
षेधेन तत्पुत्रस्य जीवत्पितृक
त्वेनानधिकार एव हेतुः ततस्त्रि
याः पतिसत्वपुत्रसत्वा मृतपु
त्रेत्यादि प्रागुक्तकापिलवचने
पतिसत्वे कनिष्ठपुत्रसत्वे च हे
योत्सर्गावगतेः। तत्पुत्रस्य
पितुः सत्व एवानधिकारात्स्या
तन्मरणे वृषोत्सर्गावगमाच्च।
नवा तदुभयसत्वं मिलितं उक्त
न्यायावगततत्पुत्रस्य जीवत्
पितृकत्वहेतो रेव तादृशनि
षेधप्राप्तेः पतिपुत्रसत्वयोर्नि
षेधहेतुत्वकल्पनानौचित्यात्
तयोर्वाचनिकहेतुत्वे न ग्रह
हकल्पनाया अन्याय्यत्वात् सि
द्धजीवत्पितृकनिषेधप्रपंचत
या पतिपुत्रवत्या निषेधोपपत्तौ
अधिकनिषेधकल्पने गौरवाच्च
यस्तु जीवत्पितृकवृषोत्सर्ग
निषेधे पतिपुत्रवत्याः एषप्र
पंसहारः सोपितस्याः पुत्रान
धिकारमात्रप्रयुक्तसिद्धवृषोत्स
र्गाभावमात्रानुवादः। एवं वा
कावगतयेनुदानस्य वृषोत्

सर्गस्थानीयत्वज्ञापनार्थ एवे
ति प्रागपि निरूपितं। ततश्चोक्त
वचने तिर्य्यगधिकरणन्याय
प्राप्त जीवत्पितृकस्य वृषोत्
सर्गकर्त्तृत्वाभाव मनूद्य सप
तिकाया वृषोत्सर्गस्थाने चं
दनांकितयेनुत्सर्ग एव वि
धीयते। एतेन वृषोत्सर्गक
र्त्तृ वि कापिलप्रतिप्रसूतसप
का वृषोत्सर्गकृतिमत्कनि
ष्ठपुत्रान्यजीवत्पितृकेतर
त्वविशेषणं सपतिकायावृ
षोत्सर्गस्थाने ज्येष्ठपुत्रस्यैव
चंदनांकितयेनूत्सर्गमात्र
स्य लभ्यते। अतो जीवत्पितृ
केन काम्यो वृषोत्सर्गः प
तितेप्रव्रजितेवापितरिजीवति
पितामहादि वृषोत्सर्गश्च नैका
र्य्यः। एवं सपतिकाया अपि
पुत्रस्य कर्म्मयोग्यत्वे असत्वे
वा पत्या कन्यादिना वा वृषोत्
सर्गः कार्य्य एवेति स्थितं। इ
दं रत्नाकरहलायुधाचार्य्य।
चूडामणिविद्याभूषणप्रभंक
रमहादेवभट्टाचार्य्यप्रभृतीनां
मपि संमतं तेषां पृथक्पृथक्
पद्धतिरपि प्रचरति। कश्चिद्देश
स्थाने भट्टाचार्य्यस्यापि समूलप

इति दृश्यते। अतएवात्र विशेषा
दर्शिना मनाचारोऽनाचार एव।
अथ भविष्योक्तप्रकारस्तु वैक
ल्पिक एव। स्मृतिशास्त्रे विकल्पा
दि आकांक्षापूरणे सतीति जै
मिन्युक्तेः। तत्रत्यप्रजाहोमाद्य
गेषु विशेषमंत्रतंत्रोक्तेः। का
पिलकल्पेन वृषोत्सर्गधर्मा
तिदेशेन विशेषोक्तनिराशाच्च।
संप्रति विचारितकापिलकल्प
प्रयोगोऽभिधीयते यथा।
गोष्ठादौ वितानप्रोक्ते प्रागुद
कप्लवने देशे गोमयेनोपलि
प्य कृतनित्यक्रिय आचान्तः
कुशहस्तो द्विवासाः प्राङ्मुखः
ॐ तद्विष्णोः परमं पदं इति
विष्णुः स्मृत्वा नत्वा च उदङ्मु
खः ॐ तत्सदित्युच्चार्य्य कु
शतिलजलपूर्णताम्रपात्र
मादाय विशेषानुपदेशा
त् सत्यचाद्यमासोल्लेखेन
अद्यामुके मासि अमुक
पक्षे अमुकतिथौ अमुक
गोत्रायाः प्रेताया अमुकाया
अशौचान्त द्वितीयेऽह्नि अ
मुकगोत्रायाः प्रेताया अ
मुकायाः प्रेतलोकविमुक्त
व स्वर्गलोकगमनकामः

चंदनांकितसवत्सधेनुदानकर्म्मा
हं करिष्यामीति संकल्पयेत्। त
तस्तज्जल मैशान्यां क्षिपेत्। ततः
स्वस्वरीत्या संकल्प सूक्तं पठेत्
ततः प्रथमं ब्रह्मवरणं। तत्र उ
त्तरामुखं ब्रह्माणमुपवेश्य त
त्समीपं आसनमानीय प्राङ्मु
खो यजमानः प्राञ्जलिः ॐ सा
धु भवानास्तामिति वदेत्। ॐ सा
धु अहमासे इति प्रतिवचनं दत्वा
ब्रह्मा तदासने उपविशति।
ततः कर्त्ता ॐ अर्च्चयिष्यामो भ
वन्तं इति वदेत्। ॐ अर्च्चयेति
प्रतिवचनं। ततो गंध पुष्प
तांबूल वस्त्रालंकारैर्ब्रह्माणं सं
पूज्य तद्दक्षिणं जानुस्पृष्ट्वा ॐ
अद्यामुके मासि अमुके पक्षे
ऽमुकतिथौ अमुक गोत्रायाः
प्रेताया अमुकाया अक्षयलो
काहितीयेऽग्नि अमुक गोत्रो।
याः प्रेतायाः अमुकायाः अक्षो
त्तान्ताद्धितीयेऽग्नि अमुक
गोत्र ममुकप्रवरं श्रीअमुक
देवशर्म्माणं त्वामस्मिन् चंदना
किंतधेनुदानांगहोमकर्मणि
ब्रह्मकर्मकरणाय गंधादिभिर
भ्यर्च्च्य त्वामहं वृणे इति ब्रह्माणं वृण
यात्। ॐ वृतोस्मीति प्रतिवचनं

ॐ यथाविहितं ब्रह्मकर्म्म कुरु। ॐ
यथाज्ञानं करवाणीति प्रतिवच
नं। स्वयं गानाशक्तौ चेत् ब्रह्मकर्मक
रणायैतत्र ब्रह्मादिकर्मकरण
येति वदेत्। स्वयं होमासामर्थ्ये
होतारं वृणुयात्। तत्र होतृकर्म
करणायेति विशेषः। एवं तत्रा
स्वकाचार्य्यमपि। आचार्य्यान्तरा
भावे ब्रह्मैवाचार्य्यत्वेनापि व
रणीयः। तत्र ब्रह्माचार्य्यकर्म
करणायेति विशेषः। एवं प्राग्
वत् सदस्यवरणमपि। हस्त
गुल्फादिमानं तु यजमानिकमे
व सर्वत्रग्राह्यं। ततः पुण्याह
स्वस्तिवाचनं कृत्वा चंदनांकि
तधेनुदानान्निमित्तक होमीयद
विरस्त्यजकामो भारतनामोत्त
रणं जप्यीत्। ततो यजमानो हो
तो वा गायत्र्या गोमूत्रं ॐ गंधद्वारे
त्यादिना गोमयं ॐ आप्यायस्वे
त्यादिना दुग्धं ॐ दधिक्राव्ण इत्या
दिना दधि ॐ तेजोसीत्यादिनाज्य
ं ॐ देवस्यत्वा सवितुः प्रसवेऽश्वि
नोर्बाहुभ्यां पूष्णो हस्ताभ्यामा
ददे इति कुशोदकं च प्रोक्षि
त्वा गायत्र्या सर्वमेकीकृत्य
तेन वेदी मभ्युक्ष्य तत्र घटा
न् संस्थाप्य ग्रहांश्च ॥

ग्रहान् विसृज्य संपूजयेत्।
ततो हस्तप्रमाणं स्थण्डिलं
शर्करागारास्थिकेशतुषा
दिरहितं पूर्वोत्तरप्लवं समं
वा गोमयेनोपलिप्य तत्र स्व
गृह्योक्तविधिनाग्निं संस्थाप्य
स्वस्वगृह्योक्तहविषा तत्संगोपह
तिक्रमेणैककर्मकृत्वा प्राङ्मुखो
यजमानग्निसमीपे नीत्वा ॐ मा
नस्तोके तनये मा न आयुषि मा
नो गोषु मा नो अश्वेषु रीरिषः वीरान्मा नो
रुद्र भामितो वधीर्हविष्मन्तः
सदमित्त्वा हवामहे। इति मंत्रे
णाधेनोर्वामसक्थि निषद्गुले
त्रिशूलं चंदनेन कृशेन लिखेत्।
वीरान्मानं इति सामगानां। य
जुषां तु मानो वीरानिति मंत्रभा
गे पाठः। ततः ॐ वृषोऽसि भा
नुना युमंतं त्वा हवामहे पवमा
नः स्वर्दृशं। इति मंत्रेण दक्ष
क्षिणपंचांगुले अरहीनं चक्रं
चंदनेनैवाचार्य्यो लिखेत्। अस्मि
न्नवसरे अग्रे कुमारे सवत्सधेनु
मौलिकं पुष्प मारोपयेत्। ततः
स्वस्वगृह्योक्तविधिना वृषवद्
तुत्थापयेत्। ततः सितवास
सा जलमपनीय गंध चंदन

पुष्पांजन सिंदूर गोरोचना दू
र्वाः स्वर्णशृंगाभ्यां रूप्यशफेस्त्र
वस्त्रेण कांस्यक्रोडेन ताम्रपृष्ठे
न घंटाचामराभ्यांश्च यथा यो
ग्य तथा कर्णयोः प्रवालमा
लिकाभ्यांच धेनुं भूषयित्वा
पाद्यादिभि रभ्यर्च्य स्वस्वगृह्यो
क्तआत्ममंत्रान् श्रावयित्वा च
प्राङ्मुखीं धेनुं शुक्लवाससायुप
वधीयात्। ततो यजमान उत्त
राभिमुखः धेनोर्मस्तकादिक्रमे
णातन्मंत्रैः पूजयेत्तथा शिर
सि ॐ ब्रह्मणेनमः एवं ललाटे
वृषभध्वजायनमः कर्णयोरश्वि
नीकुमाराभ्यां चक्षुषोः श
शिभास्कराभ्यां। जिह्वायां सर
स्वत्यै। दंतेषु वसुभ्यः। ओष्ठयोः
संध्यायै। ग्रीवायां नीलकंठाय
हृदि स्कंदाय। रोमकूपेषु ऋ
षिभ्यः। दक्षपार्श्वे कुबेराय।
वामपार्श्वे वरुणाय। रोमाग्रे
रश्मिभ्यः। ऊरुषु धर्माय जं
घासु अधर्माय। श्रोणितटेपि
तृभ्यः। खुरमध्ये गंधर्वेभ्यः।
खुराग्रेषु अप्सरोभ्यः। लांगु
ले द्वादशादित्येभ्यः। गोमये
महालक्ष्म्यै। गोमूत्रे गंगायै
पयोधरेषु चतुःसागराय।

एवं संपूज्य पठेत्। ॐ इंद्रस्य च त्वमिंद्राणी विष्णोर्लक्ष्मीश्च या स्मृता। रुद्रस्य देवी या गौरी सा देवी वरदास्तु मे। ॐ या लक्ष्मी लोकपालानां या च देवेष्ववस्थिता। येन रूपेण सा देवी ममापं व्यपोहतु। ॐ देहस्था या च रुद्राणी शंकरस्य सदा प्रिया। येन रूपेण सा देवी तस्याः शांतिं प्रयच्छतु। ॐ सर्वदेवमयी दोग्ध्री सर्वलोकमयी तथा। येन रूपेण सा देवी तस्याः स्वर्गं प्रयच्छतु। ततः ॐ आचार्य्याय नमः इत्यनेनोद्देशं संप्रदानब्राह्मणं पाद्यादिभिः संपूज्य एवं ॐ रुद्राय नमः इति तद्देवतां संपूज्य ॐ चंदनांकितसवत्सधेन्वे नमः इत्यनेन पाद्याद्याचमनीयांतैः गंधपुष्पैर्धेनुं संपूज्य संप्रोक्ष्य च ब्राह्मणहस्ते जलं दत्वा कुशतिलजलान्यादाय ॐ तत् सदद्यामुकेमासि अमुके पक्षे अमुकतिथावमुकगोत्रायाः प्रेतायाः अमुकाया अपोचान्नादितीयेहि अमुकगोत्रायाः प्रेतायाः ॥ ।

अमुकायाः प्रेतलोकविमुक्तस्वर्गलोकगमनकामोऽहं एतां सालंकारां चंदनांकितसवत्सधेनुं रुद्रदेवताकां अमुकगोत्राय श्रीअमुकदेवशर्मणे आचार्य्यब्राह्मणाय तुभ्यं ददानीति ब्राह्मणहस्ते जलं दद्यात्। ततः संप्रदानब्राह्मणः पुच्छं धृत्वा ॐ मित्युक्त्वा प्रतिगृह्य स्वस्तीत्युक्त्वा प्रतिगृह्य स्वस्तीत्युक्त्वा च सावित्रीं पठेत्। ततो येनद्रियं रुद्रदेवताकेति वदेत्। यथाशाखं कामस्तुतिं च पठेत्। यथा सामवेदे। ॐ क इदं कस्मा अदात् कामः कामायादात् कामो दाता कामः प्रतिग्रहीता कामः समुद्रमाविशत् कामेन त्वा प्रतिगृह्णामि कामैतत्ते। यजुर्वेदे। ॐ द्यौस्त्वा परिददातु पृथिवी त्वा प्रतिगृह्णातु कोऽदात् कस्मा अदात् कामः कामायादात् कामो दाता कामः प्रतिग्रहीता कामेनैतत्तेव कामशतो भुनजामहे॥ ऋग्वेदे। सामगामगोत्रे। ॐ हिरस्मियो त्वा परिददातु पृथिवी त्वा प्रतिगृह्णातु इदमधिकं ततो यजमानः ॐ अद्येत्यादि

कृतैतत् सालंकारचंदनांकितसवत्सधेनुदानकर्मणः सांगतार्थं दक्षिणामिमां हिरण्यं तन्मूल्यं वा विष्णुदैवतं अमुकगोत्राय। श्रीअमुकदेवशर्मणे आचार्य्याय ब्राह्मणाय तुभ्यमहं ददान आचार्य्याय ब्राह्मणाय तुभ्यम। हं ददानीत्याचार्य्याय दद्यात्। आचार्य्यस्तु ॐ मिति गृहीत्वा स्वस्तीति वदेत्। ततो वृषोत्सर्गवत्सद्रोहेण स्वस्वगृह्योक्तश्राद्धादि। शेषकर्म समापयेत्। ततः सदस्यदक्षिणां दत्वा आहूतान्। वस्त्रमाल्यादिभिः पूजयेत्। सामगाश्चेदिदानीं ब्रह्महोत्राचार्य्यसदस्येभ्यो ब्राह्मणेभ्यो दक्षिणां वृषोत्सर्गवद्दद्यात्। अन्यवेदी तु स्वस्वगृह्योक्तरीत्या यथास्थाने दक्षिणां वृषोत्सर्गवद्दद्यात्। शूद्रस्तु यजुर्वेदिवत् सर्वं कुर्य्यात्। किंतु मंत्रपाठं ब्राह्मणेन कारयेत्। दीनानाथादींश्च वस्त्राद्यैस्तोषयेदिति इति श्रीचंद्रशेखरवाचस्पतिमहाचार्य्यविरचितश्राद्ध। नांकितधेनुदानसविधिप्रयोगः समाप्तः। चंद्रः पुं शशी। तस्य वीणात्व

प्रणीत्वयोः कालो यथा। कृष्णाष्टमीदिनादूर्द्धं यावच्छुक्लाष्टमीदिनं। तावत्कालं शशी क्षीणः पूर्णस्तत्रोपरि स्मृतः॥ इत्यग्निपुराणे ज्योतिःशास्त्रं॥ चंद्रकुंडः पुं कामरूपस्य सरोवरविशेषः। तस्य प्रमाणं वक्ष्यमाणशब्दे द्रष्टव्यं॥ चंद्रकूटः पुं कामरूपस्य पर्वतभेदः। यथा। पूर्ववायुदिशोः शैलः चंद्रकूट इति स्मृतः। त्रिकोणं साम्यमकाष्ठा तत्र हृद्धं चंद्रमंडलं॥ द्वितीयवर्गस्याद्यं तु विंदिंदुभ्यामलंकृतं। चंद्रबीजमिति प्रोक्तं तेन चंद्रं प्रपूजयेत्॥ अथापि प्रतिदर्शे तु पर्वते तु निशापतिः। प्रदक्षिणीकरोत्येव दर्शाभी रश्मिभिर्युतः॥ तस्यैव पूर्वभागे तु सोमकुंडाख्यसरः। तत्र स्नात्वा च पीत्वा च नरः कैवल्यमश्नुते॥ स्वर्गादवभ्रतः शिवः कामाख्यासेवने यदा। तदा तद्रश्मिसंघातनिःसृताम्भो वराशयः॥ तेस्तोये वीसवः कुंडे मकरो दिक्चंद्रयोः। मध्ये पुण्यतमस्थाने स्वयं

ब्रह्मशिलोपरि ॥ चंद्ररश्मिसम
न्वितचंद्रकुण्डे महोदधे । तथा
स्नवणमाह्लाद त्वंचंद्र कल्मषं
हर ॥ इत्यनेन तु मंत्रेण स्नात्वा
त्वा चंद्रपाप्स्यसि चंद्रकूटं समा
रुह्य पूजयेद्यस्तु नेनरः ॥ अवि
छिन्ना संततिस्तस्य स्वकांता त
स्य जायते । यत्र चंद्रमवंतमभि
त्वायानिपरं पदं ॥ तीरेतु चंद्र
कूटस्य नंदनो नाम वै गिरिः ।
तस्मिन्नू वसति शाकल्ल कामा
ख्यासेवने रतः ॥ न्यचभावे स
मासाद्य सर्वदेवेश्वरो हरिः ।
सेवितं त्रिदशेशानी संततं व
तेनेनरः ॥ चंद्रकूटस्य तु गिरे
नंदनस्यतथा गिरेः ॥ प्रतिदर्शं
तथा चंद्रः प्रदक्षिणयति त्रिधा
चंद्रकुण्डजले स्नात्वा समारु
ह्याथ नंदनं । आराध्य शाकल्लं
केशं महाफलमवाप्नुयात् ।
इति कालिकापुराणे कामा
ख्याकूपनिर्णये ८८ अध्यायः
चंद्रभागः पुं पर्वतविशेषः
यथा । ऋषय ऊचुः । चंद्रभागा
कथं सिंधु स्त्वयोक्ता महा
गिरेः । कीदृक् सरस्तद्विप्रेंद्र ।
दृहलोहितसंज्ञकं ॥ कथं सप

र्वतश्रेष्ठ श्चंद्रभागाह्वयोऽभ
वत् । चंद्रभागाह्वयाकस्मान्न
दीजाता सुखोदका ॥ एतन्नः श्रो
ष्यमाणानां जायते कौतुकं
महत् । माहात्म्यं चंद्रभागा
याः कासारस्य गिरेस्तथा ॥
मार्कंडेय उवाच । श्रृणुतं चं
द्रभागाया उत्पत्तिं द्विजसत्त
माः । श्रुणुष्वाभि श्चंद्रभागस्य मा
हात्म्यं नाम कारणं ॥
हिमवत्गिरिसंसक्तः शतयोजन
विस्तृतः । योजनत्रिंशतोच्छ्रायः
कुन्देंदुधवलो गिरिः ॥ तस्मिन्
गिरौ पुरा वेधा श्चंद्रं मुक्तं स
पातिथिं । विभज्य कल्पयामा
स देवार्थं स पितामहः ॥
पित्रर्थं च तथा तस्य तिथिद्व
द्वित्वयात्मकं । कल्पयामा
स जगतां हिताय कमलासनः ।
विभक्तश्चंद्रमा यस्मात्तस्मिन्
पर्वतसत्तमे । अतो देवाश्चंद्र
भागं नाम्ना चक्रुः पुरा गिरिं
इत्यादि कालिकापुराणे ७
अध्यायः ॥
चंद्रभागा स्त्री नदीवि
शेषः । तस्या उत्पत्ति
र्यथा । मार्कंडेय उवाच

यत्र देवसभाभूता सानौ तस्य
महागिरेः । तत्र जाता देवनदी
शीताख्यावचनाद्धि ये ॥
स्नापयित्वा यथा चंद्रं शीतातो
यैर्मनोहरैः । चंद्रपदं ब्रह्मवा
क्यात् सर्वे ते त्रिदिवौकसः ।
तदा शीताजलं चंद्रस्नानयो
गाच्च सामृतं । भूत्वा निपति
तं तस्मिन् ह्रदस्तो लोहितसंज्ञके
तद्धिहूदं तदा तोयं तस्मिन् स
रसि निर्मलं । तद्दर्शी स्वयंब्र
ह्मा विहृद्धं साधु तज्जलं ॥ तद्
शीताजलात्तस्मात् स्थिता कन्य
कोत्तमा । चंद्रभागेति तन्नाम
विधि श्चक्रे स्वयं ततः ॥ भा ।
र्यार्थं सागरस्यात्त तज्जग्राह ब्रह्म
संमते । ततैवा पिहितं तोयं गदा
ग्रेण निशापतिः निर्भिद्य पश्चि
मे पार्श्वे गिरिं तत्प्रवाहयत् ।
तत् सास्ततज्जलं भित्वा ह्रदलो
हितसंज्ञकं ॥ कासारं सागरं जात
चंद्रभागा नदी तु सा । सागरोऽपि
तदा भार्यां चंद्रभागां महानदीं
तेन तोयप्रवाहेणानिनाय भ
वनं स्वकं । एवं तस्मिन् समु
त्पन्ना चंद्रभागाह्वया नदी ॥ च ।

चंद्रभागे महापोले गुणे गं
गासमा सदा । इति कालिका
पुराणे २२ अध्यायः ॥
चंद्ररेखा स्त्री वाकुची । हा
कुच इति भाषा । इति भैष
ज्यरत्नावली ॥
चंद्रशेखरः पुं करवीरपुर
राजा । स च पौष्यराजपुत्रः ।
यथा । अथ काले व्यतीते तु
सर्वज्ञो वृषभध्वजः । तज्ञावि
कर्मज्ञस्तन्वेव मानुषो ह्यभवत्
स्वयं । ब्रह्मणो दक्षिणांगुष्ठा
द्दक्षो ब्रह्मसुतोऽभवत् । अदि
तिस्तु तस्य तनोजाता तत्तः पुषा
ह्वयोऽभवत् ॥ पूष्णः पुत्रोऽ
ऽभवत् पौष्यः सर्वशास्त्रार्थ
पारगः । यस्य तुल्यो नृपो भू
मौ न भूतो न भविष्यति ॥
स पुत्रहीनो राजाभूत् पौ
ष्यो नृपतिसत्तमः । पौषवय
सिसंप्राप्ते भार्याभिस्तिसृभिः
सह ॥ पौष्यः परमया भक्त्या
ब्रह्माणं पर्यतोषयत् । तस्य
प्रसन्नो भगवान् ब्रह्मा लोक
पितामहः ॥ तमुवाच सुरा
जानं किं मिच्छसि वदस्व मे ।
प्रसन्नोस्मि नृपश्रेष्ठ प्रदास्या

मि यथेप्सितं ॥ यदिष्टं तव
जायानां तत्तद्दास्यामि सांप्र
तं। पौष्य उवाच। हिरण्यगर्भा
पुत्रोहं पुत्रार्थी त्वां मुपास्म
हे। त्वयि प्रसन्ने पुत्रोमे भवे
ल्लक्षणसंयुतः ॥ एतदर्थं
सभार्योहमस्मात्वांसमुप ।
स्थितः। यथामेजायतेपुत्र
स्तथाकुरु जगत्पते। पुन्ना
म्नोनरकात् पुत्र स्त्रायते पित
रं प्रभो। अतस्तस्माज्जयं वल्लभ
त्वंनाशयितुमर्हसि ॥ ब्रह्मो
वाच शृणु पौष्य यथा भावी पु
त्रस्तवफलोदरः तदहंतेव
दाम्यद्य भार्याभिस्त्वं समाच
र इदं फलं गृहाणत्वं मयादत्तं
त्वं पौषनम। अजीर्णं वफलेका
लेप्राप्तेपि सरससदा ॥ फल
मेतत्प्रसादाद्यथावत्संव
त्सरद्वयं। आराधय महादे
वं स प्रसन्नो भविष्यति ॥ यथा
संभाषते भर्गः फलमेतत्तथा
भवान्। करिष्यति फलं राजन्
भार्याभिः स्त्रिस्त्रिभिः सह तत
स्तल्लक्षणोपेतस्तनयः कुलव
र्द्धनः। भविष्यति च यः प्राप्य
चक्रवर्ती भविष्यति इत्युक्त्वा प्रययौ

ब्रह्मा राजापि सह भीरुभिः।
हर्षेण समारेभे भक्त्या परम
या युतः ॥ नीवारशीर्षनाहा
रः कदाचित् फलभोजनः। ह
षद्वतीनदीतीरे फलं संस्थाप्य
चाथतः ॥ पुष्पार्घ्यधूपदीपाद्यै
र्वृषध्वजमतर्पयत्। स तत्र वर्ष
द्वये तीते महादेवो जगत्पतिः
पौष्यस्यन्त्यपाज्ञेः सम्यक् प्रसन्ना
दार्थसिद्धये प्रसन्नः प्राह
पतिं महादेवो हसन्निव ॥
उपास्से किं मर्त्यमानत्वं वद
स्वामिते। पौष्य उवाच। अपु
त्रोहं पुत्रकामः पूजयामि वृष
ध्वज। यथाहं पुत्रवान् वैस्यां ह
षध्वजतथाकुरु ॥ इति संश्रु
त्य राजा भार्याभिः सहर्षि
तः। प्रणम्यस्तुतिपूर्वेण भक्ति
नम्रात्ममानसः ॥ ततः पुत्रार्थि
नं भूपं प्रसन्नो वृषभध्वजः। ब्रह्म
दत्तफलं हस्ते कृत्वेदं त मुवाच
ह ॥ ईश्वर उवाच। इदं फलं त्र
त्वदर्थं विभज्यत्वपत्नेत्रिधा। भक्ष
येताः स्वनाथाप्ताङ्गल्पः स्वस्थ
मानसः। ततः प्रहृष्टो भवतु पत्ना
सङ्गत्संगमे। आधास्यंति च
गर्भास्ते भार्या ॥

स्ते युगपत्त्रय ॥ काले प्राप्तेच
युगपत् प्रसवो योषितां तव
भविष्यति नृपश्रेष्ठ त्वं एवं
त्वं करिष्यसि ॥ एकस्याजठरे
शीर्षं भार्याया स्ते भविष्यति ।
अपरस्यास्तथा ऊरू मध्यभा
गो भविष्यति ॥ अथोनाभ्यास्तु
योभागः सोऽपरस्या भविष्य
ति। ततः खंडत्रयं भूप यथा
स्थानं पृथक् पृथक् ॥ योजयि
ष्यसि पश्चात्ते पुत्र एको भवि
ष्यति। तस्य शीर्षे चंद्ररेखास
हजा संभविष्यति ॥ तेनैव ना
म्ना सख्यातिं गमिष्यति च भू
पते। इत्युक्त्वा स महादेवस्त्वा
स्तांगतो भान्तस्वयं तदा ॥ सस्कृतं
जाह्नवीतोयमात्मानः शिरसो
व्यधात्। ततः फलेस्वयं देवः प्र
विवेश वृषध्वजः ॥ तत्क्षणात्
तत्फलं भूतत्रिभागस्वयमेवहि
पौष्यस्तत्फलमादाय मुदितः
सह भार्यया ॥ प्रययौ मंदिरं
हृष्टो अनुज्ञाप्य वृषध्वजं। त
तः समुचिते काले प्राप्ते ताभिस्त
भक्षितं ॥ तत्फलं त्वपराह्णेल
गर्भाश्चाप्याहिताः शुभाः ।
सम्पूर्णे गर्भकाले तु ।

गर्भेभ्यः समजायत ॥ अण्डत्र
यं पृथक् राज्ञा यथा गर्भेण भा
वितं। तच्च खंडत्रयं पौष्यो यथा
स्थानं नियोज्यच ॥ एकं पिंडं
चकाराशु तत्र पुत्रो व्यजायत
तस्य शीर्षे तदा राजन् सहजेन्दु
कला शुभा ॥ विरराज यथा
स्वच्छा शारत्कालेकलावि
धोः। तेन सर्वलक्षणोपेतं पी
नोरस्कं सुनासिकं ॥ सिंहग्रीवं
विशालाक्षं दीर्घायतभुजं तदा
दृष्ट्वा पौष्यः स्व भार्याभिः
स्त्रिस्त्रभिः सहसंमुदं ॥ लेभेद
दिह्नः सतकोषप्राप्येव विपुलं
ततः। तस्य नामाकरोद्राजाब्रा
ह्मणैः स्वैः पुरोहितैः। चंद्रशे
खर इत्येवं कोत्पाचंद्रमसः समः
ववृधे स महाभागः प्रत्यहं वा
त्यरूपतः ॥ कलाभिरिवते
जस्वी शारदीव निशाकरः।
एवं तिष्ठण मवानां गर्भजा
तोयतो हरः ॥ अत्र स्त्र्यबक
नामाभूत् प्रथितो लोक देव
योः। स राजपुत्रः कौमारावस्था
प्राप्य यदा तदा सर्वशास्त्रार्थतत्त्व
ज्ञो जिस्को त्वल्पो वभूव ह।
वलेवीर्ये महरशे पाशंसी

पीले च नरसमः ॥ तामोभूत्नृप
प्रगाहल्ल नो वा भूमो भविष्य ।
ति । अभिषिच्याथ तं वालक
मारंवलवत्तरं ॥ दश पंचैकव
र्षीयंसर्वराजगुणैर्युतं । तिस
भिः सहभार्याभिर्वनं पौष्पा
विवेशाह ॥ हृद्धोविन्नक्रियांक
तैराजापरमधार्मिकः गतेपि
तरि राजा सवनवासंमहाबलः
सर्वांक्षितिं वशेचक्रे ः सात्वै ः
स चंद्रशेखरः । सार्वभौमो
न्रपो भूत्वाराजभिः परिषेवि
तः ॥ अमरैः दिव देवेंद्रोवि
जहार श्रियायुतः । एवं पौ
षास्ततोभूत्वा ज्ञामकं ः प्राप्य
निर्वृतिं । वह्लावर्त्ताकये रम्ये
करवीराकये पुरे । दृषोद्वती
नदीतीरेराजाभूत्वामुमोदह ॥
इति कालिकापुराणे ४६ ।
अध्यायः ॥ षोडशाक्षवका
त्ताल नवमाक्षवकः । तद्धि
वरणंाक्षवकशब्दे द्रष्टव्यं ॥ अ
पि च ऊनविंशतिवर्णैश्चिः सि
द्धिदश्चंद्रशेखरः । कथितः कें
ताले भवेत्स्रंगारवीरयोः इ
ति संगीतदामोदरः ॥
चद्रलदेशे महापीठे भैरव

विशेषः । यथा । चहले दत्तवा
ऊर्म्मे भैरवश्चंद्रशेखरः । अम
रूपा भगवती भवानी तत्रदेव
ता विशेषतः कलियुगेवसा
मिचंद्रशेखरे । इति तंत्रचूडा
मणौ ५१ पीठनिर्णयः ॥
चंद्रोदयः पुं आकाशेचंद्रस्य
प्रकाशः । सच यद्दिने सार्द्धप्र
हरद्वयव्यापिनीया तिथि स्तति
थ्यानुसारेण भवति । तस्य प्रमा
णं यथा पुराणसमुच्चये । गवां
क्रीडादिने यत्र रात्रौ दृश्येत चंद्र
माः । सोमो राजा पशून् हंति
सुरभी पूजका स्तथा ॥ तदु
दयसंभावनंच निर्णयामृतेनि
र्णीतं । प्रतिपद्यापराह्निकत्रि
मुहूर्त्तव्यापिन्या द्वितीयायां चं
द्रदर्शनं संभाव्यते । तदुक्तम
भ्याधानविषये वृद्धशातातप
न । द्वितीया त्रिमुहूर्त्ता चेत् ।
प्रतिपद्यापराह्निकी । अन्वाधानं
चतुर्दश्यां परतः सोमदर्शनादि
ति ॥ अपराह्णस्य पंचधाविभक्त
स्याह्नस्तुर्थो भागः । तत्श्र
यत्र प्रतिपदि षण्मुहूर्त्तव्या
पिनी द्वितीया तत्र चंद्र द
र्शन संभावन मिति ॥

इति श्रीहरिभक्तिविलासे ९
विलासः ॥
चप क म कल्के । कल्क
स्थूलीकरणं । क म चपयति
तण्डुलंशिला । इतिदुर्गादासः
चप सांत्वे सांत्वः प्रि
य वचनं उपशमो वा चप
ति पुत्रंमाता । इति दुर्गादा
सः चपेटी स्त्री भाद्रशुक्ल
षष्ठी यथा भाद्रशुक्लषष्ठ्यां अ
त्तयफलप्राप्तिकामः स्नानादि
कं कुर्य्यात् । संतानकामा जल
समीपे षष्ठीं पूजयेत् षष्ठो त
मः इति अरण्यषष्ठीपूजावत्
चापडाषष्ठीयं । इति कृतिचंद्रि
काव्याख्या ॥ अन्यच्च । प्रशस्या
द्वादशमासि संपूज्या पसह
द्रुये । सूते जाते तथा षष्ठ्यां ष
ष्ठी द्वादशरूपिणी । वैशाखे चां
दनी षष्ठी ज्येष्ठे चारण्यसंज्ञि
ता । आषाढे कार्दमी ज्ञेया श्रा
वणे लुण्ठनीमता भाद्रे चपेटी
विख्याता दुर्गाख्याश्चयुजे तथा
नाडाख्या कार्त्तिके मासि मार्गेमू
लकरूपिणी ॥ पौषे मासस्यत
रूपा च शीतला तपसिस्मृ ।
ता । गोरूपि ॥ ।

णी फाल्गुणे च चैत्रेऽशोककाम
कीर्त्तिता ॥ इति स्कंदपुराणं ॥
मथानषष्ठी इति केचित् ॥ चम
न र उ भक्ते । न चं नोति ।
र वैदिकः । उ च मित्वा चां
ता । इति दुर्गादासः ॥
चम उ भक्ते ॥ चमति ।
उ चमित्वा चान्त्वा । इति दुर्गा
दासः ॥
चम्पकचतुर्दशी स्त्री ज्येष्ठशु
क्लचतुर्दशी । यथा । ज्येष्ठमास
मुपक्रम्य । चतुर्दश्यां च शुक्ला
यां चम्पकैः पूजयेत् शिवं ।
अयुतैर्वासहस्रै र्वा शतै र्वा
परमेश्वरि ॥ पायसंच वलिं द
द्यात् ततो नक्तं चरेद्व्रती ।
हर्षक्षेत्र विशेषेण न भूयो
जायते भुवि ॥ त्रिमध्यके श्चम्प
कैश्च सहस्रं जुहुयात्रिशि ।
दद्य षडिन्द्रवान् हंति कृत्वा
ट्रोहाणियानिच ॥ चम्पकच
तुर्दशीव्याता पूजयेद्वा सदाशि
वे दशजन्मकृतं पाप मश्वेनादे
वतपति ॥ इतिमत्स्यसूक्ते ४५
पटलः ॥ अन्यच्च । चतुर्दश्यां
च शुक्लायां ज्येष्ठे मासि म
हेश्वरं । चम्पकैः पूजयेत् ।

भक्त्या शिवलोक मवाप्नुयात्॥
इत्यजनरकामाख्यानतंत्रे ११ पटलः
अपिच। ज्येष्ठस्य शुक्ल चतुर्दश्यां
पुष्ये च श्रवणक संभवैः। अ
र्चयित्वा महादेवं रुद्रलोके
महीयते ॥ इति संवत्सर
कौमुदीधृतब्रह्मपुराण ।
वचनं ॥
चम्ब गतौ। चम्बति। इति
दुर्गादासः ॥
चय ङ. गतौ। ङ. चयते ।
इति दुर्गादासः ॥
चर गमने॥ अदने ॥ आचा
रे। चरति। इति दुर्गादासः ॥
चर क संशीत्यासंशीत्योः ॥
संशीतिः संशयः। असंशी
तिरसंशयः। क विचारयति
योधर्म मिति हलायुधः। चर
असंशये। इतिप्राञ्चः। केचि
त्तु संशये इतिपठित्वा संशये
हि विचारणस्यादित्याहुः ।
इति दुर्गादासः ॥
चरः पुं राष्ट्रादेः शुभाशुभज्ञा
नार्थं राज्ञा गोपने नियुक्तपु
रुषः ॥ परतत्वज्ञानार्थं भ्रम
णकर्त्ता। तत्पर्य्यायः। अपस
र्पकः २ प्रतिष्कः ३ मतिष्क।
सः ९ गूढगतिः १० मंत्रगुह्यः
११ हितप्रणीः १२। इति शब्दर
त्नावली॥ उदास्थितः २४ ।
इति जटाधरः ॥
चरणः पुं क्ली अधमांगं। त
त्पर्य्यायः पदं ॥ पात् १२ ॥
इति जटाधरः ॥
चरणव्यूहः क्ली वेदव्यासवि
रचितचतुर्वेदविवरणशास्त्रं
तत्तु वेदशाखे द्रष्टव्यं ॥
चर्च्च क इ ङ. समः। इ ङ. समः
अध्ययने। क चर्च्चयति वेदं।
विप्रः। इति दुर्गादासः॥
चर्च्च प उक्तौ॥ भर्त्से।
रेफोपधः। प चर्च्चति चर्च्च
तौ। गुणस्थानरहितानां तदा
दिपाठफलंतत् शब्देतानां मा
दीर्घो रिति तुणो विभाषावे
देषुच्चारणभेदश्च। इति दु
र्गादासः ॥
चर्पटा स्त्री भाद्रशुक्लषष्ठी।
चापडाषष्ठी इतिभाषा। अस्या
विवरणंचपेटीशब्दे द्रष्टव्यं॥
चर्व्व गतौ। चर्व्वति। इति दु
र्गादासः ॥
चर्मकीलः पुं गुह्यरोगविशे
षः। हालीश इति हारिस।

इति च भाषा। तस्य निदानं ।
यथा। व्यानो गृहीत्वा श्लेष्माणं
करोत्यर्शो त्वचो वहिः। कीलो
पमं स्थिरखरं चर्मकीलंततंवि
दुः॥ वातेन तोदपारुष्ये पित्ता
दसितरक्तता। श्लेष्मणा स्नि
ग्धता तस्य ग्रथितत्वं सवर्ण
ता॥ इति माधवकरेण रोग
विनिश्चयग्रंथे अर्शोरोगा
धिकारे धृतं। अनेनास्य चि
कित्सा अर्शोरोगचिकित्सा
वत्॥ अपि च। चर्मकीलं।
जतुमणिं मसकान् तिलका
लकान्। उत्कृत्य शस्त्रेण द
हेत् क्षाराग्निभ्यां मशोषतः।
इतिभावप्रकाशः॥
चर्मपुटः पुं चर्मनिर्मित
चर्मपुटकः पात्रविशेषः कूपा
इतिभाषा। यथा। दृति श्चर्मपु
टकः। दृति श्चर्मपुटे मत्स्येवे
तिमेदिनी। इतिपुंलिंगसंग्रह
टीकायां भरतः। तत्पर्य्यायः।
दृतिः खल्ल श्चर्ममयीति ।
हेमचंद्रः॥
चर्व्व कि भदे। कि चर्व्वय
ति चर्व्वति तंडुलंबालकः इति
दुर्गादासः॥
चर्षणिः पुं मनुष्यजातिः। य
था। अर्य्यम्णो मातृका पत्नी त
योश्चर्षणयः सुताः। यत्र वै
मानुषीजातिर्ब्रह्मणा चोपक
ल्पिता॥ इति श्रीभागवते षष्ठ
स्कंधे ६ अध्याये १३ श्लोकः॥
चर्षणयः कृताकृतज्ञानवंतः
पषर्पतिकर्मत्वेन निर्वेदादाबु
क्षेः। यत्र येषु आत्मानुसंधा
नविशेषण मानुषीजातिश्चो
पकल्पिता। तथाच श्रुतिः
पुरुषत्वे चाविस्तरामात्मेति॥
इति तट्टीकायांश्रीधरस्वामी॥
चल ज गतौ। ज चालः
चलः। भिचले इति वक्ष्यमाणे
न पठित्वा इम मेव मानुबंधं
भ्रांताः पठंति तद्देयं। तेना
स्य चालयति हस्तिनं यता
चलमानाः तिल इत्यत्र ता
च्छील्ये शानः शानः। भिच
ले। पूर्वेणान्वयः। चलधातुः
कम्पने मानुबंधः स्यादित्यर्थः
स चलयति लतां वायुः।
चलयन् भृंगरुचस्तवालका
निति रघुः। चालयन् सकलां
पृथ्वीमिति चानेनात् चाल क
रोतीति ण्णौ शत्रन्तं। इति

दुर्गादासः॥

चल श विलासे। श चलती चलन्ती। विलासः क्रीडनं। इति दुर्गादासः॥

चल क भृतौ। क चालयति। दन्त्यवकारादिरयमिति दुर्गासिंहजुमरनन्दी। भृतिरिह पोषणं। इति दुर्गादासः॥

चष ञ भक्षे। ञ चषति चषते। इति दुर्गादासः॥

चष वधे। चषति। इति दुर्गादासः॥

चह न क शाठ्ये। चहयति खलः। इति दुर्गादासः॥

चह क म शाठ्ये। क म चहयति खलः साधुं प्रतारयतीत्यर्थः। इति दुर्गादासः॥

चह शाठ्ये। चहति। इति दुर्गादासः॥

चद ल ङ वदे। वदः कथनं। ल ङ आचष्टे धर्मं धीरः। तृतीयस्वरानुबन्धे। इति प्राञ्चः। इकार उच्चारणार्थ इति केचित्। छन्दसि नुमागमार्थ इति केचित्। वेदेषूच्चारणार्थ इति केचित्। अत्र वस्तुतस्तृतीयस्वरो भ्रमकारितः किंतु चतुर्थस्वरानुबन्धोऽस्ति छाया इम् निषेधार्थः। तेनैव ज्ञेनार्थे ख्याञ् कामाम्नादेश। यो रमाशो आचष्टे वर्जनमित्याहुः। इति दुर्गादासः॥

चक्षुः क्ली दर्शनेन्द्रियः। तत्पर्य्यायः। विलोचनं १२ दृशा १३ वीक्षणं १४ प्रेक्षणं १५ दैवदीपः १६ देवदीपः १७ दृशिः १८ दृशी १९ इति शब्दरत्नावली॥

चाकचक्यं क्ली उज्ज्वलता। चकचक् इति भाषा। यथा। न हि लोकसिद्धासामग्री प्रातिभासिकरजतोत्पादिका किन्तु विलक्षणैव तथाहि। काचादिदोषदूषितलोचनस्य शुरोवतिद्रव्यसंयोगादिदमाकाराचाकचक्याकारा च काचिदन्तःकरणवृत्तिरुदेति। इति वेदान्तपरिभाषा॥

चाचपुटः पुं तालभेदः। यथा। गुरु लघुः प्लुतश्चैव भवेच्चाचपुटाभिधे। इति संगीतदामोदरः॥

चाटः पुं प्रतारकः। यथा। चाट तस्कर दुर्वृत्त महासाहसि

कादिभिः। पीड्यमानाः प्रजा रक्षेत् कायस्थैश्च विशेषतः॥ चाटाः प्रतारकाः विश्वास्य ये परधनमपहरन्ति। प्रच्छन्नापहारिणस्तस्कराः दुर्वृत्ता इन्द्रजालिककितवादयः। सहसैव बलेन कृतं साहसं महच्च तत् साहसं च महासाहसं तेन वर्त्तन्त इति महासाहसिकाः प्रसह्यापहारिणः। आदिशब्दान्मौलिककूटकारादयः। एतैः पीड्यमाना बाध्यमानाः प्रजा रक्षेत्। कायस्थाः गणकाः लेखकाश्च तैः पीड्यमाना विशेषतो रक्षेत्। तेषां राजवल्लभतया अतिमायावितया च दुर्निवारत्वात्। इति मिताक्षरायां आचाराध्यायः॥

चातुर्थकज्वरः पुं प्रतिचतुर्थदिनज्वरः। तस्य मन्त्रौषधं यथा। ओं जम्भनि स्तम्भनि विमोहय सर्वव्याधीन् वज्रेण फट् इति। पुष्पमष्टशतं जप्त्वा हस्लेदम्बाथ न स्पृशेत्। चातुर्थिकोज्वरो रुद्रश्चैव ज्वरास्तथा। जम्बुफलं हरिद्रा च सर्पस्यैव वचकं चुकं। सर्व ॥। ज्वराणां रूपोऽयं हर चातुर्थकस्य च॥ इति गारुडे १८० अध्यायः॥

चातुर्मास्यव्रतं क्ली आषाढशुक्लद्वादश्यादि चातुर्मास्यकर्त्तव्यनियमविशेषः। यथा वाराहे। आषाढशुक्लद्वादश्यां पौर्णमास्यामथापि वा। चातुर्मास्यव्रतारम्भं कुर्य्यात् कर्कटसंक्रमे॥ अभावे तु तुलार्केऽपि मन्त्रेण नियमं व्रती। कार्त्तिके शुक्लद्वादश्यां विधिवत्तत् समापयेत्॥ चतुर्थापि हि तच्चीर्णं चातुर्मास्यव्रतं नरः। कार्त्तिक्यां शुक्लपक्षे तु द्वादश्यां तत् समापयेत्॥ मात्स्ये। चतुरो वार्षिकान् मासान् देवस्योत्थापनावधिः। मधुस्वरो भवेन्नित्यं नरो गुडविवर्जनात्॥ तैलस्य वर्जनादेव सुन्दराङ्गः प्रजायते। कटुतैलपरित्यागात् शत्रुनाशः प्रजायते॥ लभते सन्ततिं दीर्घां स्थालीपाकमभक्षयन्। सदा मुनिः सदा योगी मधुमांसस्य वर्जनात्। निराधिर्नीरुगोजस्वी विष्णुभक्तश्च जायते। एकान्तरोपवासेन

विष्णुलोकमवाप्नुयात् ॥ धार
णाच्च वलोम्नां च गंगास्नानं दिने
दिने । तांबूलवर्जनाद्भोगी रक्त
कंठश्च जायते । घृतत्यागात्सुला
वण्यं सर्वस्निग्धवपुर्भवेत् ॥ फ
लत्यागात्मतिमान् बहुपुत्रश्च
जायते । नमोनारायणायेति ज
प्तानशनजं फलं ॥ पादाभिवंद
नाद्विष्णोर्लभेद्गोदानजं फलं ।
एवमादिव्रतैः पार्थ तुष्टिमाया
ति केशवः ॥ सनत्कुमारः ।
इदं व्रतं मया देव गृहीतं पुरत
स्तवानिर्विघ्नां सिद्धिमायातु
प्रसन्ने त्वयि केशव ॥ गृहीते
ऽस्मिन् व्रते देव यद्यपूर्णे त्वहं
म्रिये तन्मे भवतु संपूर्णं त्वत्
प्रसादाज्जनार्दन ॥ समाप्तेव
इदं व्रतं मया देव कृतं प्रीत्यै त
व प्रभो । न्यूनं संपूर्णतां या
तु त्वत्प्रसादाज्जनार्दन । अ
त्रैव यतिमधिकृत्य काठक
गृह्ये । एकरात्रं वसेद् ग्रामे
नगरे पंचरात्रकं ॥ वर्षाभ्यो
ऽन्यत्र वर्षासु मासांश्च चतु
रो वसेत् ॥ एतद्दशाह विष
ये । ऊर्ध्वं वार्षिकाभ्यां मा
साभ्यां नैक ॥ ॥

स्थानवासी इति शौनकोक्तेः । इ
ति निष्पादितत्वं ॥ अन्यच्च ।
तत्रोपक्रमकालः सनत्कुमा
रेणोक्तः । एकादश्यां तु शुक्ला
यां संक्रान्तौ कर्कटस्य तु ।
आषाढ्यां वा नरो भक्त्या चातुर्मा
स्यादि तु व्रतं ॥ तत्र मंत्रः ।
चतुरो वार्षिकान् मासान् देव
स्योत्थापनावधि । इमं करिष्ये
नियमं निर्विघ्नं कुरु मेऽच्युतेति
अथ चातुर्मास्य नियमाव
श्यकता भविष्ये । यो विना निय
मं मर्त्यो व्रतं वा जप्यमेव वा ।
चातुर्मास्यं नयेन्मूर्खो जीवन्न
पि मृतो हि सः ॥
अथ चातुर्मास्यनियमाः । स्कां
दे नागरखण्डे । श्रावणे वर्जये
च्छाकं दधि भाद्रपदे तथा । दुग्ध
माश्वयुजे मासि कार्तिके चामि
षं त्यजेत् । तत्रैव श्रीब्रह्मनारद
संवादे । निष्पावान् राजमाषां
श्च सुप्ते देवे जनार्दने । यो भ
क्षयति विप्रेंद्र स्वपचादधिको
हि सः । कार्तिकेन विशेषेण
राजमाषांश्च भक्षयन् । निष्पा
वान् मुनिशार्दूल यावदाभूत
नारकी ॥ कलिंगानि पटोलानि

वृंताकसहितानि च । एतानि
भक्षयेद्यस्तु सुप्ते देवे जनार्द
ने ॥ सप्तजन्मार्जितं पुण्यं ह
रते नात्र संशयः । किंच । कृच्छ्र
तत्तत्काललभ्यं फलमूलादि
वर्जयेदिति जपहोमाद्यनुष्ठानं
नामसंकीर्तनं तथा । स्वीकृत्य
प्रार्थयेद्देवं गृहीतनियमो बुधः
इदं व्रतं मया देव गृहीतं पुर
तस्तव । निर्विघ्नां सिद्धिमायातु
त्वत्प्रसादाद्रमाकेशव ॥ गृहीतेऽ
स्मिन् व्रते देव पंचत्वं यदि मे भवेत्
तदा भवतु संपूर्णं प्रसादात्ते जना
र्दनेति ॥ अथ चातुर्मास्यव्रतनि
यममाहात्म्यं । विष्णुरहस्ये ब्रह्म
नारदसंवादे । शृणु नारद का
र्त्स्न्येन चातुर्मास्यव्रतक्रियाः ।
या निर्वर्त्य नरो भक्त्या प्रयाति
परमां गतिं ॥ व्रतानि वैष्णवानी
ह मनसापि चिकीर्षतः । नर
स्य क्षयमाप्नोति पापं जन्मशतो
द्भवं ॥ एकभक्तो नरः शांतो
नित्यस्नायी दृढव्रतः । यो
ऽर्चयेच्चतुरो मासान् हरिं स्व
र्गस्य लोकभाक् ॥ यस्तु सु
प्ते हृषीकेशे भूमिशायी भवे ।

न्नरः । वार्षिकान् चतुरो मासान्
लभते वैष्णवीं गतिं ॥ यस्तु के
शव मुद्दिश्य चांद्रायणपराय
णः । चातुर्मास्यं नयेद्भक्त्या स
विष्णुलोकमाप्नुयात् ॥ भवि
ष्योत्तरे भगवद्युधिष्ठिरसंवादे
चतुरो वार्षिकान् मासान् दे
वस्योत्थापनावधिः । स्त्री वा
नरो वा मद्भक्तो धर्मार्थं सुदृढ
व्रतः ॥ गृह्णीयान्नियमानेतान्
दंतधावनपूर्वकं तेषां फलानि
वक्ष्यामि तत्कर्तॄणां पृथक् पृ
थक् मधुरस्वरसंपन्नो भवेद्गुड
वर्जनात् । लभते संततिं दी
र्घां तैलस्य परिवर्जनात् ॥ अभ्यं
गवर्जनात्सुदेहाः प्रजाय
ते । पक्वतैलपरित्यागाच्छत्रुना
शमवाप्नुयात् ॥ मधुकतैल
त्यागेन सौभाग्यमतुलं भवेत्
योगाभ्यासी भवेद्यस्तु स ब्रह्म
पदमाप्नुयात् । कटुतिक्तम
धुरक्षारकाषायजान् रसान्
यो वर्जयेत् स वैरूप्यं दौर्गंध्यं
नाप्नुयात् क्वचित् । तांबूल
वर्जनाद्भोगी अपक्वादो ऽ
मलो भवेत् ॥ पादाभ्यंग ॥

पादाभ्यंग शिरोभ्यंग परित्या
गाच्च पार्थिव । दीप्तिमान् दी
प्तचरणो यक्षो द्रव्यपति र्भ
वेत् ॥ दधि दुग्ध नक्तनियमा
त् गोलोकं लभतेनरः । इन्द्राति
थित्व मायाति स्थालीपाकवि
वर्जनात् ॥ लभेच्च सन्ततिंदी
दीर्घां तापपक्वस्य वर्जनात्
भूमौ प्रस्तरशायीच विष्णो
रनुचरो भवेत् ॥ सदामुनिः
सदायोगी मधुमांसस्य व
र्जनात् निर्व्याधि र्निरुगोजवी
स्यात् मद्यविवर्जनात् ॥ एका
न्तरोपवासेन ब्रह्मलोके मही
यते । धारणान्नखलोमानां
गंगास्नानं दिने दिने । मौनव्र
ती भवेद्यस्तु तस्याज्ञा स्खलि
ता भवेत् । भूमौ भुंक्ते सदाय
स्तु सपृथिव्याः पतिर्भवेत् ॥
नमो नारायणायेति जप्यादा
नशनेफलं ॥ पादाभिवंदना
द्विष्णो र्भवेद्गोदानजं फल वि
ष्णुपादानजं पर्शान् कृतकृ
त्यो भवेन्नरः । विष्णोर्देवकुले
कुर्यात् उपलेपनमार्जने कल्पस्था
यी भवेद्राजा स नरो नात्र संशयः
प्रदक्षिणात्रयं यस्तु क

रोति स्तुतिपाठकः । हंसयुक्त
विमानेन स च विष्णुपदं व्रजेत्
गीतवाद्यकरो विष्णोर्गांधर्वैर्लो
कमाप्नुयात् नित्यशास्त्रविनो
देन लोकान् यस्तु प्रबोधयेत् ।
स व्यासरूपी भगवानन्ते विष्णु
पुरं व्रजेत् ॥ पुष्पमालाकु
लापूजां कृत्वा विष्णोपुरं व्रजेत्
कृत्वा प्रेतशिकं दिव्यस्थान
मप्सरसां लभेत् ॥ तीर्थास्त्र
सि कृतस्नानो निर्मलं देह
माप्नुयात् । पंचगव्याशनात्
पार्थ चान्द्रायणफलंलभेत् ॥
एकभक्ताशनान्नित्य मग्निहो
त्रफलंलभेत् । नक्तभोजी स
मश्नुत तीर्थयात्राफलं लभेत्
अयाचितेन चाप्नोति वापीकू
प प्रपाफलं । षष्ठकालेऽन्नभो
जीयः स्थायी स्वर्गे नरो भवेत् ।
नित्यस्नायी नरो यस्तु नरकं स न
पश्यति । भोजने वर्जयेद्यस्तु स
स्थानं पौष्करं लभेत् ॥ पत्रेषु यो
नरो भुंक्ते कुरुक्षेत्र फलं लभेत् ।
शिलायां भोजनं नित्यं भवेत्स्ना
ने प्रयागजं यामद्वयजलस्था
गाच्च रोगैः परिभूयते ॥ ।

एवमादिव्रतैः पार्थतुष्टि माया
ति तोषितः ॥ किंच । योगनि
द्रां समास्थाय शेषाहिशयने
स्वपन् । क्षीरोदतोयवीच्यग्रे ।
धौतपादः समाहितः ॥ ल
क्ष्मीकरांबुजैः स्पृष्टे सरोजा
मानपदद्वयः । तस्मिन् का
ले चमहत्को यो मासानरः
क्षिपेत् ॥ व्रतैरनेकैर्नियमैः
पापएव प्रमृष्टमानवः कल्पस्था
यी विष्णुलोके भवेन्मासस्यत्र स
शयः ॥ सत्यव्रत समाप्तौ च
श्रीकृष्णस्य प्रसादतः यद्य
दानादिकंत्यचल्लेख्यनतन्मस्य
कार्तिके ॥ स्नात्वा कृष्णस्य मभ्य
र्च्य प्रसाद्य च पुनः पुनः शेष
शंखोदतीर्थे च स्त्रीकुर्याद्देवल
वैः सह ॥ गीतनृत्यादिना दे
वं परितोष्याथ वैष्णवान् । सं
पूज्य नरयानेन देवं स्वालय
मानयेत् प्रभो नीराजनं कृ
त्वा विसर्ज्यैव तु वैष्णवान् । नि
वेश्य स्वासने देवं प्रार्थीत भवि
तं स्मरन् ॥ एवं च कुर्वतो मासा
श्चत्वारो यान्ति तेसुखं । अन्यथा
प्रभवेद्दुःखमनाहृष्टिश्च जाय
ते । तथा च भविष्ये । मिथुनस्थे

सहस्रांशोन स्नापयति यो हरिं ।
वैष्णवैः सहसम्भूय स्नात्वा हृष्टि
स्तदा भवेत् ॥ किंच । भविष्यो
त्तरे । यो देवशयने पार्थ च
तुर्मास्य समाचरेत् । उत्थाने वा
पि कृष्णस्य स हरेर्लोकमा
प्नुयात् ॥ इति श्रीहरिभक्ति
विलासे १५ विलासः ॥
चांद्रायणं क्ली व्रतविशेषः ।
तद्विधानं यथा । तिथिवृद्ध्यां
क्षयेद्वृद्धा भुक्ते शिख्यण्डसमिता
न् । एकैकं ह्रासयेत् कृष्णे पि
ण्डं चान्द्रायणं चरेत् ॥ यथाक
थंचित् पिण्डानां चत्वारिंशच्छ
तद्वयं । मासेनैवोपभुंजीत चा
न्द्रायणमथापरे ॥ कुर्यात्त्रिषव
णं स्नानं पिण्डं चान्द्रायणं चरे
त् । पवित्राणि जपेत् पिण्डा
न् गायत्र्या चाभि मंत्रयेत् ॥
अनादिष्टेषु सर्वेषु शुद्धिश्चा
न्द्रायणेन च । धर्मार्थी यश्च
रेदेतत् चन्द्रस्यैति सलोकतां
कृच्छ्रकृद्धर्मकामस्तु महतीं
श्रियमश्नुते । इति गारुडे
१५ अध्यायः ॥
अपिच । एकैकं वर्द्धयेत् पि
ण्डं शुक्ले कृष्णे च ह्रासयेत् ॥

उपस्पृष्य त्रिषवणं विपरीता च मर्द्दने ॥ इति तत्रैव २२९ अध्यायः ॥

चामुण्डा स्त्री पार्वतीललाटनिष्क्रान्ता चण्डमुण्डवधकारिणी देवी यथा। देव्या ललाटनिष्क्रान्ता या कालीति च विश्रुता। तस्यास्तन्त्रं प्रवक्ष्यामि कामदं शृणु भैरव ॥ समाप्तिसहितो दन्त्यः प्रान्तस्तस्मात् परः सरः। षष्ठस्वराग्निविन्दुसहितो मादिरेव च ॥ कालीतन्त्रमिति प्रोक्तं धर्मकामार्थदायकं। एतन्मूर्त्तिं प्रवक्ष्यामि वत्स काग्रमनाः शृणु ॥ नीलोत्पलदलश्यामा चतुर्बाहुसमन्विता। खट्वाङ्गं चन्द्रहासञ्च बिभ्रती दक्षिणे करे ॥ वामे चर्म्म कपालञ्च ऊर्द्ध्वाधोभावतः पुनः। दधती मुण्डमालाञ्च व्याघ्रचर्म्मधराम्बरा ॥ कृशाङ्गी दीर्घदंष्ट्रा च अतिदीर्घातिभीषणा। लोलजिह्वा निम्नरक्तनयना नादभैरवा ॥ कबन्धवाहनासीना विस्तारश्रवणानना। एषा तारा कृता देवी चामुण्डेति च कथ्यते ॥ एतस्या योगिनी चाष्टौ पूजयेच्चिन्तयेदपि। त्रिपुरा भीषणा चण्डी कर्त्री हर्त्री विधात्रिका ॥ कराला शूलिनी चेति अष्टौ ताः परिकीर्त्तिताः। यथा कालिकामदा देवी जाप्यदानकरी सदा [illegible] तस्याः सदृशी काचित् कामदा नहि विद्यते। इति कालिकापुराणे ६१ अध्यायः ॥

चाय ञ म निशामे ॥ अचै ञ अचचायत्। ञ चायति चायते। निशाम इति चात्रेषत्ताने। ते पर्वतीयाः प्रमदा अचायिरे। इति माधवः। इति दुर्गादासः ॥

चारः पुं गूढपुरुषः। चरः। तद्विवरणं यथा। कृषिर्दुर्गं च वाणिज्यं खल्यानां करसाधनं ग्रामादानं सैन्यकरयो बंधनं गजवाजिनोः ॥ स्तन्यपप्रमुखानां च भोजनं सन्तिजैनैः। प्रजानां सारसेन्ततो बंधनं चेति चाष्टमं ॥ एतदष्टसु वर्गेषु चारान् सम्यक् प्रयोजयेत्। कार्य्याकार्य्यविभागाय चाष्टवर्गाधिकारिणां ॥ अष्टौ चारान् नियुञ्जीयादष्टवर्गेषु ॥ पार्थिवः। दशास्वेतासु युञ्जीत क्रमतः शृणु तानि मे ॥ स्वामी सचिवराष्ट्राणि मित्रं कोषो बलं तथा। दुर्गेन सप्तमं ज्ञेयं राज्याङ्गं गुरुभाषितं ॥ दुर्गयुक्तं चाष्टवर्गं चारं तात्मनि योजयेत्। तस्मादिमानि शेषाणि पंच चारपदानि तु ॥ मुख्यानेषु च पुत्रेषु सक् सूपादौ महानसे। शत्रूदासीनयोश्चैव बलाबल विनिश्चये ॥ आदौ दशसु चैतेषु चारान् राजा प्रयोजयेत्। प्रयात् प्रकाशं जानीयात्तत्त्वचारैर्निरूपयेत् ॥ निरूप्य तत्प्रतीकारमवश्यं छिद्रतश्चरेत्। यथा नियोगो मेतेषां यो यो यत्रान्यथा चरेत्। ज्ञात्वा तत्र नृपश्चारैर्दण्डयेद्वा नियोजयेत् ॥ चारांस्तु मंत्रिणा सार्द्धं रहस्ये संस्थितो नृपः प्रदोषसमये एकैकदा तीमेव साधयेत् स्वपुत्रेषु चाप्युद्वातयेत्तु चारान्महानसे नियुक्तांस्तान् मध्यरात्रौ एकैकं यश्चापि मंत्रिणि। एतान् चारान् स्वयं पश्येत् नृपतिर्मंत्रिणा विना ॥ अन्यांश्च मंत्रिणा सार्द्धं निरूप्य प्रदिशेत् फलं। नैकवेशधरश्चारो नैकोनोत्साहवर्जितः ॥ संस्त्वेनोनहि सर्वत्र नातिदीर्घो न वा मनः। सततं न दिवाचारी नरोगी नाप्यबुद्धिमान् ॥ न वित्तविभवैर्हीनो न भार्य्यापुत्रवर्जितः कार्य्यश्चारो नृपतिना गुप्ततत्त्वविनिर्णये ॥ अनेकवेशग्रहणक्षमं भार्य्यासुतैर्युतं। वक्रदेशवचोभिज्ञं परात्मिप्रायवेदकं ॥ इत्थम्भूतं प्रकुर्वीत चारं शास्त्रमसाधके। अपि तिष्ठेत् स्वयं राजा कृषिमात्मसमे स्तथा ॥ वणिक्पथे च दुर्गादौ तेषु शक्तान्नियोजयेत्। अन्तःपुरेपि तत्स्वल्पान् धीरान् वृद्धान् नियोजयेत् ॥ षण्ढान् वण्डान् तथा वृद्धान् स्त्रियो या वुद्धितत्पराः। मुख्यान्तद्वारि युञ्जीयात् स्त्रियो वृद्धा मनीषिणीः इति कालिकापुराणे ८५ अध्यायः ॥

चारी स्त्री नृत्याङ्गविशेषः। यथा। नहि चारीं विना किञ्चिन्नृत्यमस्याङ्गं प्रवर्त्तते। मण्डलादि

रसानांतु भावोद्दीपनकारिका
रिका॥ साघुर्य्यो हर्म्मता नित्यं
चारी चारुगतिः स्मृता अन्येन
एकपादप्रचारो यः सा चारी
ति निगद्यते। पादयोश्चारणं य
यच्च सा चारीति निगद्यते॥ क
रणानां समायोगः खण्डकः
परिकीर्त्तितः। त्रिभिः खण्डैश्च
वर्भिर्वा मण्डलं समुदाहृतं
समनखानुपुरविद्धा तिर्य्य
मुखीमवला च। कातराचक
वीराच विलिष्टा रथचक्रिका
पार्श्वि रेचितकानलदर्शिनी
गजहस्तिका। परावित्तनला
चोरुताडिताप्यर्द्धमण्डला॥
संतक्रीडनिका हरिणत्रासि।
का चारुरेचिका। तलोद्वृत्ता
संचरिता स्फुरिकापि तथैव च
लघितजंघा संघट्टिता स्या
दथ मदालसा उतकुंचिता
तिर्य्यक्कुंचिता चापकुंचि
ता॥ षष्ठिंशति भौमचार्य्य इ
त्याख्याता मुनीषिभिः। अन्ये
तु समपादस्थिता वर्णाशकटा
स्याध्यर्द्धिका पिच। विच्यावताडि
ताबद्धाएडकाक्रीडिता तथा ऊरुद्वृ
त्ताकुट्टिताजनिता एसंदिता तथा
सन्दिता वत ॥

समतेवी समोत्सारितमंडिता
उत्क्षेदिता च विज्ञेया अर्ध्यद्वा
दश भूमिगाः। इति भूमिचा
री॥ आकाशचारी यथा।
चारी आकाशगा वृद्धे विद्वे
ध्यत्वचरी तथा। अग्निताडिता
भ्रमरी पुरःक्षेपा च सूचिका
अपक्षेपा जंघावर्त्ता विद्धा च
हरिणप्लुता। डकजंघान्दोलि
ता च जंघा जंघनिका तथा॥
विद्युत्क्रान्ता भ्रमरिका दण्डपा
र्श्वेति षोडश। अन्येन। विभ्रा
न्ताति क्रान्ताः पक्रान्ता पार्श्वक्रा
न्तिका। ऊर्द्धजानु दोलपाद
हेता नुपुरपादिका॥ भुजंगत्रासि
का क्षिप्ताः विद्धा ताला च सूचिका
विद्युत्क्रान्ता भ्रमरिका दण्डपादा
तथैव च आकाशचारिका एताः
षोडशैव निरूपिताः। एताश्चैव
भूमिचारीष्वप्यंतरभेदोस्ति ति
र्य्यक्कुचारी ऊर्द्धचारी अथ आ
रीतिना ऊहनीयाः॥ तैलाभ्य
क्तेन गात्रेण लघ्वाहारो जित
श्रमः। स्तंभे वा भित्ति दे
शेवा प्रथमं ताः प्रयो
जयेत्॥ लघ्वाहारे न
धाम्ले च भक्तो ताने।

समाचरेत्। त्वेकपादस्य वि
न्यास आरी सैवाभिधीयते॥
शृंगारादिरसानांतु भवेद्दीप
नकारणं। माधुर्य्यो भूमका
तिस्र रुयताल त्रयान्विता॥
नियतांगविशेषाणां चारी
संचारतो भवेत्। इति चा
रीलक्षणं। इति संगीत दा
मोदरः॥
चार्च्चिक्यं क्ली चंदनादिना
देहविलेपनविशेषः इत्यमरः
अपिच। स्यास्तकः स्थायकं।
अस्त्री चर्च्चिक्यंच चतस्रयं व
स्त्रादौ कुंकुमादीनां कृतादि
षु निगद्यते॥ इति शब्दरत्नाव
ली॥ चालः पुं स्वनामख्यात
गृहाच्छादनं। तत्पर्य्यायः क
टलं ५। इति शब्दरत्नावली।
छादं ६। इति जटाधरः॥
चालनी स्त्री स्वनामख्यातश
स्यादि चालनपात्रं। तत्पर्य्यायः
पावीरः ५। इति जटाधरः
चि ञ चिन्त्या। ञ चयति
चयते पतं लोकः। इति
दुर्गादासः॥
चि ञ न चिन्त्या। चिति
श्चयनं राशीकरणमित्यया

वत्। न ञ चिनोति चिनुते।
इति दुर्गादासः॥
चि क भि चिन्त्या। क भिच
चययति चाययति। स्वगते न
चपयति चापयतीत्यपि। इति
दुर्गादासः॥
चिकित्सा स्त्री रुक्प्रतिक्रि
या। तत्पर्य्यायः। रोगप्रतिका
रः। इति शब्दरत्नावली॥
चिक्क क अर्म्मो। कोपधः।
तृतीयस्वरमध्यः। आर्त्तिः पी
डने। क चिक्कयति शात्रंमू
रः। इति दुर्गादासः॥
चिट प्रेषे। चेटति भृत्यं स्वा
मी। इति दुर्गादासः॥
चित ई ज्ञाने। ई चितः। ज्ञा
न मिह जागरणं। ज्ञानं च अ
विद्यानिद्रायाक्रांते जगत्येकः
स चेततीति हलायुधः। चि
चेतराम स्लातकुन्छे। इति दु
र्गादासः॥
चित क उ ज्ञाने। क उ चे
तयते। राक्षसस्य चेतयंति
न। इति भट्टी गणकृता नित्य
त्वे मिति रमानाथः। वस्तुत
स्तु चेतयते तत ज्ञानं करोतीति
भौ साध्यः। इति दुर्गादासः

चित ३ क स्तौ। ३ क
चिन्तयति विस्तु सुधीः। इति
दुर्गादासः ॥
चितिः स्त्री दुर्गा। यथा। चिति
रूपेतन्यभावद्वा चेतना वा वि
तिः स्मृता। महान् व्याप्य स्थि
ता सर्वं महत्वा प्रकृति र्मता
इति देवीपुराणे ४५ अध्या
यः ॥ भित्तिस्थेष्टिकादिसं
स्थानार्थकविशेषः। यथा।
चितौ करणसूत्रं साहुहर्तं।
उच्छ्रयेण गुणिते चिते ॥
किल ॥

क्षेत्रसम्भवफलं घनं भवेत्।
इष्टिकाघनहृते घने चिते रि
ष्टिका परिमितिश्च लभ्यते।
इष्टकोच्छ्रयहृदुच्छ्रितिश्चितेः
स्युः स्तराश्च दृषदां चिते र
पि। उदाहरणं। अष्टादशा
ङ्गुलं दैर्घ्यविस्तारो द्वाद
शाङ्गुलः। उच्छ्रिति स्त्र्यङ्गु
ला यस्या मिष्टिका स्ताश्चि
तौ किल। यद्विस्तृतिः
पञ्चकराष्टहस्तं दैर्घ्यं च यस्यां
त्रिकरोच्छ्रितिश्च। तस्यां चितौ
किं फलमिष्टकानां संख्या च
का ब्रूहि कति स्तराश्च ॥



इष्टिकायाः घनहस्तमानं ३/६४ चितेः क्षेत्रफलं ४०। उच्छ्रयेण गुणितं चितेः घनफलं १२०। लब्धा इष्टिकासंख्या २५६०। स्तरसंख्या २४। एवं पाषाणचयेऽपि। इति चितिव्यवहारः। इति लीलावती ॥

चित्र न क स्तगणिकेक्षणे लेखे
मुते। तालिके क्षणं कदाचिद्दर्शी
ने चित्रयति चित्रापयति राकेलो
कः कदाचित् चपूपती न्यष्यः

चित्रयति प्रतिमां लोकैः।
इति दुर्गादासः। चित्रकरः
पुं वर्णसंकरजाति विशेषः
पटुया इति भाषा ॥

तत्पर्य्यायः। रंगजीवकः २
इति शब्दरत्नावली ॥ वर्णी ३
वर्णादः ४ चित्रकारः ५ इति
जटाधरः ॥
चित्रजल्पः पुं वाक्यविशेषः
तल्लक्षणादि यथा। प्रेष्ठस्य
सुहृदालोके गूढरोषाभि
जृम्भितः। भूरिभावमयो ज
ल्पो यस्तीव्रोत्कण्ठितान्तिमः
चित्रजल्पो दशाङ्गोऽयं प्रजल्पः
परिजल्पितं। विजल्पोजल्पस
ञ्जल्पावजल्पोऽभिजल्पितं
आजल्पः प्रतिजल्पश्च सुज
ल्पश्चेति कीर्त्तितः। एषभ्रम
रगीताख्या दशमे प्रकटीकृतः
असंख्यभाववैचित्री चमत्कृ
तिसुदुस्तरः। अपि चेद्विजल्पो
ऽयमनाक् नदर्पिक कथ्यते तत्र प्र
जल्पः। असूयेर्षामदयुजा
योऽवधीरणमुद्रया ॥ प्रियस्या
कौशलोद्गारः प्रजल्पः स तु
कीर्त्यते। यथा। मधुप कितववं
धो मा स्पृशाङ्घ्रिं सपत्न्याः कुच
विलुलितमाला कुंकुमश्मश्रु
भिर्नः। वहतु मधुपतिस्तन्मा
निनीनां प्रसादं यदुसदसि वि
डम्ब्यं यस्य दूतस्त्वमीदृक् ॥ १

अथ परिजल्पितं। प्रभोर्निर्दय
ता शाठ्य चापल्याद्युपपादनात्
स्वविचक्षणताव्यक्ति र्भङ्ग्या स्या
त् परिजल्पितं ॥ यथा सकृदध
रसुधां स्वां मोहिनीं पाययित्वा
सुमनस इव सद्यस्तत्यजेऽस्मा
न् भवादृक्। परिचरति कथं
तत्पादपद्मं नु पद्मा अपि बत
हृतचेता उत्तमश्लोकजल्पैः
२ ॥ अथ विजल्पः। व्यक्तयासूय
या गूढमानमुद्रान्तरालया।
अघद्विषि कटाक्षोक्ति र्विजल्पो
विदुषां मतः ॥ यथा। किमिह
बहु षडङ्घ्रे गायसि त्वं यदूना
मधिपतिमगृहाणामग्रतो नः
पुराणं। विजयसखसखीनां गी
यतां तत्प्रसङ्गः क्षपितकुचरुज
स्ते कल्पयन्तीष्टमिष्टाः ॥ ३ ॥
अथोज्जल्पः। हरेः कुहकताख्या
ने गर्वगर्भितयेर्ष्यया। सासूयश्च
तदाक्षेपो धीरै रुज्जल्प ईर्य्यते ॥
यथा। दिवि भुवि च रसायां काः
स्त्रियस्तद्दुरापाः कपटरुचिरहास
भ्रूविजृम्भस्य याः स्युः। चरणरज
उपास्ते यस्य भूतिर्वयं का अपि
च कृपणपक्षे ह्युत्तमश्लोकशब्दः ४॥

अथ सञ्जल्पः। सोल्लुण्ठया गहन
याक्षेपमुद्रया। तस्याकृ
तज्ञताद्युक्तिः सञ्जल्पः कथितो
बुधैः। यथा॥ विसृज शिरसि पा
दं वेद्म्यहं चाटुकारै रनुनयवि
दुषस्तेऽभ्येत्य दौत्यैर्मुकुन्दात्।
स्वकृत इह विसृष्टापत्यपत्य
न्यलोका व्यसृजदकृतचेताः
किं नु सन्धेयमस्मिन् ५ अथ
अवजल्पः। हरौ काठिन्यका
मित्वधौर्त्यादासक्त्ययोग्यता य
त्र सेर्ष्याभियेवोक्ता सोऽवजल्पः
सतां मतः॥ यथा मृगयुरिव क
पीन्द्रं विव्यधे लुब्धधर्मा स्त्रियमकृत
विरूपां स्त्रीजितः कामयानां।
बलिमपि बलिमत्वावेष्टयद्ध्वा
ङ्क्षवद्यस्तदलमसितसख्यै र्दु
स्त्यजस्तत्कथार्थः ६॥ अथा
भिजल्पितं। भङ्ग्या त्यागौचिती तस्य
खगानामपि खेदनात्। यत्र सा
नुशयं प्रोक्तं तद्भवेदभिजल्पि
तं॥ यथा। यदनुचरितली
लाकर्णपीयूषविप्रुट् सकृदद
नविधूतद्वन्द्वधर्मा विनष्टाः। स
पदि गृहकुटुम्बं दीनमुत्सृज्य दी
ना बहव इव विहङ्गा भिक्षुचर्य्यां च

रन्ति॥ ७॥ अथ आजल्पः।
जैह्म्यं तस्यार्तिदत्वं च निर्वेदा
द्यत्र कीर्तितं। भङ्ग्यान्यसुख
दत्वं च स आजल्प उदीरितः॥
यथा वयमृतमिव जिह्मव्या
हृतं श्रद्दधानाः कुलिकरु
तमिवाज्ञाः कृष्णवध्वो हरिण्यः
ददृशुरसकृदेतत्तन्नखस्पर्श
तीव्रस्मररुज उपमन्त्रिन् भ
ण्यतामन्यवार्ता॥ ८॥ अथ प्र
तिजल्पः। दुस्त्यजद्वन्द्वभावेऽस्मि
न् प्राप्तिर्नार्हेत्यनुद्धतं। दूतसम्मा
ननेनोक्तं यत्र स प्रतिजल्पकः
यथा। प्रियसख पुनरागाः प्रे
यसा प्रेषितः किं वरय किम
नुरुन्धे माननीयोऽसि मेऽङ्ग।
नयसि कथमिहास्मान् दुस्त्य
जद्वन्द्वपार्श्वं सततमुरसि सौ
म्य श्रीर्वधूः साकमास्ते ९ अ
थ सुजल्पः। यत्रार्जवात् सगा
म्भीर्यं सदैन्यं सह चापलं। सोत्
कण्ठं च हरिः पृष्टः स सुजल्पो
निगद्यते॥ यथा। अपि बत
मधुपुर्य्यामार्यपुत्रोऽधुनास्ते स्म
रति स पितृगेहान् सौम्य बन्धू
श्च गोपान्। क्वचिदपि स
कथा नः किङ्करीणां गृणीते

भुजमगुरुसुगन्धं मूर्ध्न्यधास्य
त् कदा नु॥ १०॥ इत्युज्ज्वलनील
मणौ स्थायिभावः॥
चिप्पः पुं नखरोगविशेषः। अं
गुलहाडा इति भाषा। तल्लक्षणं
यथा नखमांसमधिष्ठाय वातः
पित्तञ्च देहिनां। करोति दाह
पाकौ च तं व्याधिं चिप्पमादिश
त्॥ अथ कुनखस्य लक्षण
माह। अभिघातात् प्रदुष्टो
यो नखो रूक्षोऽसितः खरः।
भवेत्तं कुनखं विद्यात् कुशीं
वा विधानतः॥ अथ तयो
श्चिकित्सा चिप्पं रुधिरमो
क्षेण शोधनेनाप्युपाचरेत्।
गतोष्माणमथैनं सेचये
दुष्णवारिणा। शस्त्रेणापि य
था योग्यमुच्छिद्य स्रावयेत्ततः
व्रणोक्तेन विधानेन रोपयेत्तं वि
चक्षणः। स्वरसेन हरिद्रायाः
पात्रे कृष्णायसे भया घृष्टा त
ज्जेन कल्केन लिप्तं चिप्पं पु
नः पुनः। कासमर्द्याः समभिः
पत्रैः कोमलैः परिवेष्टितः
अंगुलीवेष्टकः पुंसामवमा
शु प्रशाम्यति। क्षोभविट्।
विकल्पेन कुनखं समं।

पाचरेत्॥ नखकोटिप्रविष्टेन
टङ्कणेन प्रशाम्यति। कुनख
श्चेत्तदा पीलुः सलिले स्रव
ते पि च॥ इति भावप्र
काशः॥
चिपिटः पुं पृथुकः। चिंडा
इति भाषा। तत्पर्यायः।
चिपीटकः २। इति शब्दर
त्नावली॥
चिरं अव्य दीर्घकालः। त
त्पर्यायः। चिराय २ चिररा
त्राय ३ चिरस्य ४। इत्यमरः॥
चिरेण ५ चिरात् ६ चिरे ७॥
इति भरतः॥ चिरतः ८ इति
शब्दरत्नावली॥
चिरि २ न हिंसे। रेफोपधः
रः वैदिकः। न चिरिणोति
इति दुर्गादासः॥
चिल श वासे। वासः प
रिधानं। शा चिलति वस्त्रं
लोकः परिदधातीत्यर्थः।
चेलिता। इति दुर्गादासः॥
चिल्ल शैथिल्ये॥ हावकरणे
कृत्वी लहयानः चिल्लति चे
चिल्लने। इति दुर्गादासः॥
चिह्न क्ली लक्षणं। तत्प
र्य्यायः। अभिज्ञानं १। इति

जटाधरः ॥
चीक कि मर्षणे। कि
चीकयति। मर्षणं स्पर्शः
तथाच। चंद्रावतीनरेंगाद्री
स्त्रीकयंति च यद्दशरिति
हलायुधः। वायवः स्पृशंती
त्यर्थः। भट्टमल्लस्तु मर्षण
इतिमूर्द्धन्यषमध्यं पठित्वा
क्षमार्थमाह। इतिदुर्गादासः
चीनाककर्पूरः पुं कर्पूरविशे
षः। तद्गुणाः। चीनाकसंज्ञः।
कर्पूरः कफक्षयकरः स्मृतः।
कुष्ठकण्डू वमिहरस्तथा तिक्त
रसस्मृतः इतिभावप्रकाशः॥
चीभ ऋ उ. कत्थे। कत्थः
प्रशंसा। ऋ अचिचीभत्।
उ. चीभते गुणिनं गुणी। ओ
ष्ठवकारादि रय मित्येके। इति
दुर्गादासः॥
चीय ऋ म संहत्यादानयोः
चतुर्थस्वरी। ऋ अचि चीय
त्। म चीयति चीयते।
इति दुर्गादासः॥
चीव ऋ म ग्रह संहतौ।
ऋ अचिचीवत्। म चीवति
चीवते वल्कलं भिक्षुः। गृ
ह्णाति परिदधाति वेत्यर्थः इति
दुर्गादासः॥
चीव क दीप्तौ। क चीवय
ति। इति दुर्गादासः॥
चुक्क क व्यथे। कोपधः।
पचमस्वरमध्यः। व्यथिः पीड
नं। क चुक्कयति शत्रुं शूरः।
इति दुर्गादासः॥
चुक्रं क्ली अम्लद्रव्यविशेषः।
महादा इतिख्याते। तत्पर्य्यायः
चुक्रक ४। इति शब्दरत्नावली
महाम्ल ५। इतिजटाधरः॥
पत्रशाकविशेषः॥ चुका
इति भाषा। तत्पर्य्यायः॥
गुणाः। चुक्रिका स्यात् पत्ता
म्ला रोचनी शतवर्पिनी। चुक्रा
त्वल्पतरा स्वाही वातघ्नी क
फपित्तकृत्॥ रुच्या लघुतरा
पाके हंताके नातिरोचनी।
इति भावप्रकाशः॥
चुच्च ई अभिषवे। तालव्य
वर्गाद्योपधः। पंचमस्वरी।
ई चुक्नः। यद्यपान्त्योऽयमि
त्येके। अभिषवः स्नानं मद्य
ने पीडनं संधानंच। इति दु
र्गादासः॥
चुट क णि छेदे। क चो
टयति। णि चुटेति अचुटीत्

इति दुर्गादासः॥
चुट इ क छेदे। पंचम
स्वरी। इ क चुण्टयति या
वलोकः। इति दुर्गादासः
चुट तच्छने। पंचमस्वरी।
तच्छन मल्पीभावः चोटति
नदी ग्रीष्मे। इति दुर्गादासः
चूट इ तच्छने। पंचम
स्वरी। तच्छन मल्पीभावः
इचूण्टते नदी ग्रीष्मे। इति
दुर्गादासः॥
चूह क तच्छने। टहायां
तः। पंचमस्वरी। पकटका
रइतिरामः। तच्छन मल्पीभा
वः कचुहयति नदी ग्रीष्मे इति
दुर्गादासः॥
चुड इ नौच्छे। इ चु
ण्डते। नौच्छ मल्पीभावः
इति दुर्गादासः॥
चुड इ क छिदि। ब
कह उयति इतिदुर्गा
दासः। चुड इ क रोषे। इ
कचुण्डयति। इतिदुर्गादासः
चुड इ उ. रोषे। इ चु
ण्डते। उ. चुण्डते। इति दुर्गा
दासः॥
चुड हावे। हावे टवर्गी।
तृतीयोपधः। क्किपि संयोगांत
लोपे चुड्। कातंत्रादौ हावकर
ण इत्येकोऽयं पोहृष्यते। अभी
हावाः क्रियाः शृंगारभावजाः
इत्यमरः। भावप्रवाल्प विका
रो हावइष्यते। इति साहित्यदर्पणः
चुडुनिकांताप्यवा कांतः। इ
ति दुर्गादासः॥
चुण णि छिदि। णिचुण
ति अचुणीत चुचोण। इति
दुर्गादासः॥
चुत इर क्षरणे। इर अचु
तत् अचोतीत्। क्षर इह आ
सेचनं। चोतति क्षते वक्त्रो य
ज्वा आसिंचतीत्यर्थः इति
दुर्गादासः॥
चुद क नुदि। नुदि प्रेरणे
क चोदयतिबाणं चापः।
इति दुर्गादासः॥
चुद क नुदि। नुदि प्रेरणे
क चोदयति बाणं चापः।
इति दुर्गादासः॥
चुड्ड हावे॥ हावे। त
वर्गतृतीयोपधः। क्किपि सं
योगान्तलोपे चुड्। कातंत्रा
दौ हावकरण इत्येकोऽयं पोहृष्यते
अभी हावाः क्रियाः शृंगारभाव
जाः। इत्यमरः। भावप्रवाल्पसंल

स्य विकारो ह्रावरुध्यते। इति
साहित्यदर्पणः। चुडु ति कान्ता
यवा कान्तः। इतिदुर्गादासः॥
चुप शनैर्गतौ। चोपति खं
जः। चोपति दुष्टं राजा। इ
तिरमानाथः। इति दुर्गा।
दासः॥
चुब इ कि चुम्बने। चुम्बनं
मुखसंयोगः। इ चुम्ब्यते।
कि चुम्बयतिचुंबति कान्ताधरं
कामी। प्रियामुखं किम्पुरुष
श्चुचुम्ब। इति व्यतीहारे आ
त्मनेपदं। इति दुर्गादासः।
चुर कि स्तेये। कि चोर
यति चोरति धनं चोरः। इ
ति दुर्गादासः॥
चुलम्प लोपे। अन्तस्थात
तीयमध्यः। पंचमस्वरद्वयी।
ओष्ठ्यवर्गप्रथमोपधः चुलु
म्पति। यगादौ चुलुम्प्यते इ
त्यादि। नत्र नकारत्वावनुस्वार
पंचमाविति स्वरसात्मप्रकृतित्वे
यगादौ नल्लोप इति वाच्यं न
हिनोपधस्यैव पवितत्वृवि
नत्वात्। एवं सति अंकादीना
न प्रकृतित्वेऽपि उ. मध्यपाठः
कथं मितिचेत नत्रकस्यविम

तेउ. मध्या पठेति ज्ञापनाय
उ. मध्या पठिताः नचतर्हि इ
दित् पाठे यीप्सिद्धि रिति
वाच्यं। किपि संयोगान्तलो
पे इदित् पाठे चुलुन् चुलु
म्पलोपे चुलुम्। इति भेदात्
एवं सर्वत्र। इतिदुर्गादासः
चुल्ल हावकृतौ। पंचम
स्वरी लद्वयान्तः। एकोर्ध्वः
चुल्लति चारुनायना
सहप्रियेणेति हलायुधः
इति दुर्गादासः॥
चुल्लिः स्त्री पाकार्थ मग्नि
स्थानं चुला इति भाषा इति
च भाषा तत्पर्यायः उद्धानिः॥
इति शब्दरत्नावली॥
चूडा स्त्री शिरोमध्यस्थशिखा
तत्पर्यायः। जटिका ४ जटि
का ५। यथा। शिखा चूडा के
शपाशी व्रतिका व्रतिकेत
पि। शिरोमध्य वद्धचंउभवे
तत्पंचकं इति शब्दरत्नाव
ली चूडामणिः पुं योगवि
शेषः यथा गारुडे. सूर्यग्र
हः सूर्यवारे सोमे सोमग्र
हस्तथा चूडामणिरयं योगस्त
त्रानंतफलस्मृतं॥ अन्यस्मात्

हणात् कोटिगुणमत्र फलं
लभेत्। इति तिथ्यादितत्वं॥
शुभाशुभगणनाविशेषः त
स्य विवरणं गारुडपुराणे २५
अध्याये द्रष्टव्यं॥ वंगदेशीय
पंडितानां मुण्डाधिष्व॥
चूण क संकोचे। तालव्य
वर्गाद्यादिः। षष्ठस्वरी। क
चूणयति वस्त्रः संकुचितं
स्यादित्यर्थः। इति दुर्गादासः
चूरः ई उ. य दाहे।
दीर्घी। य उ चूर्य्यते वह्नि
रिंधनं। ई चूर्णः। इति दु
र्गादासः॥
चूर्ण क पेषे। षष्ठस्वरी
पेष क्षुर्णीकरणं। क चूर्ण
यति शिला। इति दुर्गादासः
चूलः पुं केशः। यथा। मु
क्तकेशाश्च चूलिनः। इति लिं
गपुराणं॥
चूलकः पुं केशः। यथा
गृहीतचूलको विप्रो ब्लेच्छे
नरजकादिना। प्राजापत्येन
शुद्ध्यात् शूद्रः कृच्छेन भा
गतः॥ स्वशिखां निवेशेन के
शंछते चांन्यत्र स्वापितो अ
नतस्त्वशिखावर्जं शूद्रे स्था

नेऽलिदयं॥ इति मत्स्यसूक्ते १८
पटलः॥
चूष पाने। दीर्घी। चूषत्या
म्रं लोकः। इति दुर्गादासः
चृत कि संदीपने। कि चर्त्त
यति चर्त्तति। इति दुर्गा
दासः॥
चृत श हिंसे॥ ग्रन्थे।
श चृतति चर्त्तिता। ग्र
थो ग्रन्थनं। इति दुर्गादासः।
चेल अ चालगत्योः। अ
अचिचेलत्। इति दुर्गादासः
चेल्ल अ चालगत्योः। ल
द्वयान्तः। अ अचिचेल्लत्।
अस्य अदनुबन्धः ऋदन्ते ः
ऋदादिपाठवनिष्फलः वे
दपुच्चारणभेदार्थो वा। अयं
केश्चिन्नमन्यते। इति दुर्गादा
सः चेष्ट ङ. ईहे। ईहा व्या
पारः। ङ. चेष्टते पठितं।
शिष्यः। इति दुर्गादासः॥
चोरः पुं स्त्री चौरः। तत्
पर्य्यायः। तस्करः १९ तक्का २०
विस्रा २१ विशुः २२ विश्का २३
विहायाः २४ ताग्रुः २५ वन
गुः २६ क्रूरस्मित २७ मूषीवान् २८

मल्लिंलच: २९ अयप्रांश: ३१ हृक: ३१। इति वेदनिर्घंटो ३अध्याय: ॥
चोल: पुं कंचुलिका। कॉचुली इति भाषा। तत्पर्य्याय:। कंचुक: २। इति जटाधर: ॥ कुंचुली ४ कुंचुलिका ५। इति शब्दरत्नावली ॥
चोष: पुं पार्श्वज्वाला यथा स्फुटत्ल पीडनयुतं पवनेन पित्तात् उदाह चोषवकूले सकफप्रसेकं। शोष्मात्मक व कृजं वक्रभिस्त्र विघात् वै गुरुणमोह जड्तामिरथाप रेंच चोष:पार्श्वस्थितामिनेव संताप:। इति भावप्रकाश: ॥
च्यु क हासे ॥ सहने अंतस्थायोपध:। क च्यावयति। इति दुर्गादास: ॥
च्यु उ. गत्यां। अंतस्थायोपध:। उ. च्यवते। इति दुर्गादास: ॥
च्युत इर क्षरणे। अंतस्थादियुक्त:। इर अच्युतन अच्योतीत्। क्षर इह श्रासेचने। चोतति हुतं वह्नौ यज्वा। आसिंचतीत्यर्थ:। इति। दुर्गादास: ॥
च्युस क हासे। कश्चित् पुस्तके हासे। अन्तस्थादि पु क:। क च्योसयति। इति दुर्गादास: ॥

छ

छ: छकार:। तस्य लेखन प्रकारो यथा। ऊर्द्धादधोगता रेखा कुंचिता कुण्डली तत: पुन आयोगता तास संति वेलश विस्रव: ॥ ध्यानमस्या: प्रवक्ष्यामि द्विभुजां च त्रिलोचनां। पीताम्बरधरां नित्यां वरदां भक्तवत्सलां ॥ एवं ध्यात्वा छकारेन्तु तन्मंत्रं दशधा जपेत्। इति वर्णोद्धारतंत्रं ॥ तस्य नामानि यथा। छ छेदनं सुषुम्ना च पशु: पशुपति स्मृति: निर्मलं नरल वह्नि र्भूतमाता विलासिनी ॥ एकनेत्रश्च हस्ली द्विशिरा वामकूर्पर:। गोकर्णो लांगली वामकामता सदाशिव: माता निशाचर:पा९

विद्वत: स्थितिशब्दक:। इति तंत्रशास्त्रं ॥
छत्रं क्ली रौद्रवृष्टिनिवारण धीवरणविशेष: तत्पर्य्याय: आतपवारणं ५। राजच्छत्रं। यथा आतपत्रंच रात्रस्तु नृपलक्ष्म सितमतत्। पुण्डरीक मथाभद्रासनं राजासनं तु यत् इति जटाधर:। अपिच। छत्रेकनदण्डेन्दरागम्येण मृदालुतं। नृपलक्ष्म भवेमेतद्यच्छत्रं पृथिवीभुजां ॥ इति शब्दरत्नावली ॥
छद न क संहतौ। छदयति इति दुर्गादास: ॥
छद कि म संहतौ। कि म छादयति छादयते छदति छदते दिशां मेघ:। आच्छादयति इत्यर्थ:। इति दुर्गादास: ॥
छद यति पुत्रं पिता जीवयति वलवंतं करोति वा इत्यर्थ:। इति दुर्गादास: ॥
छप इ क सर्पे। इ क छम्पयति। सर्पो गति:। इति दुर्गादास: ॥
छम उ भदे। छमति। उ छमित्वा छान्त्वा। इति दुर्गादास: ॥
छर्द क वमने। वमनं वांति:। क छर्दयति अन्नं लोक:। इति दुर्गादास: ॥
छर्दि: स्त्री वमिरोग:। तस्यौषधं यथा। अश्वगंधभयाचैव उदकेन समंपिवेत् हरीतकीकृष्णचूर्णं कृत्वा आस्येचपूरयेत् ॥ पीतं पीत्वाथ पानीयं सर्वच्छर्दिनीवारणं। गुडूचीपमकारिष्ट यन्याकं रक्तचंदनं पित्तश्लेष्म ज्वर छर्दि दाहतृष्णाघ्नमग्निकृत्। इति गारुडे १८७ अध्याय: अपिच। विल्वमूलंच समधु गुडूची क्वथितं जले। पीतं हरेच्च त्रिविधां छर्दिं वै नात्र संशय: ॥ पीता दुर्वाच्छर्दिनेत्रपन् पिष्टा तण्डुलवारिणा। इतिच गारुडे १९४ अध्याय: ॥
अथ छर्दिश्चिकित्सा ॥ आमाशयोत्क्लेनभवाहि सर्वाश्छर्द्यो मतालंघनमेवतस्मा विधीयते मारुतजां विनात्मसंशोधनं वा कफपित्तहारि अन्नच्छर्दिशाह: ॥ इत्यानती

गोरकं पीतं छर्दिं पवनसंभवा
मू। मज्जामलकयूषा वा स
र्पिष्कः ससैन्धवः ॥ क्षीरोद
कं नाशितस्य क्षीरसोदकं ॥
गुडूची त्रिफलानिंब पटोलैः
क्वथितं जलं। पिबेत् मधुयुतं
तेन छर्दिर्नश्यति पित्तजा॥ ह
रीतकीनां चूर्णं लिह्यान्मादि
कसंयुतं। अधोमार्गीकृते दोषे
छर्दिः शीघ्रं निवर्त्तते॥ विडंग
त्रिफलाविश्वचूर्णं मधुयुतं पि
बेत्। विडंग लव शुंठीनां चू
र्णं वा कफजां वमिं॥ लवकैव
र्त्तीमुस्तं गुडूत्नजी इतिलोके ॥
पिप्पलीधात्रीफललाजानशार्क
रांश्च पलोन्मितान्। दत्वा मधु
पलं चापि कुडवं सलिलस्य च।
वासमागालितं पीतं हंति छ
र्दिं त्रिदोषजां। गुडूच्या रचितं
हंति हिमं मधुसमन्वितं॥ दुर्नि
वारामपिच्छर्दिं त्रिदोषजनितां
बलात्। एला लवंग गजके
शरकोलमज्जालाजाप्रियंगु
घनचंदनपिप्पलीनां॥ चूर्णा
नि माक्षिकसितासहितानि लीढ्वा
छर्दिं निहंति कफमारुतपित्तजातां
एलादिचूर्णं ॥ अ ॥ ॥

म्रात्यवल्कलं शुष्कं दग्धं निर्वा
पितं जले। तज्जलं पानमात्रेण
छर्दिं जयति दुर्जयां ॥ यष्ट्या
त्रिकटु धान्याक जीरकाणां र
जो लिहन्। मधुना नाशयेच्छ
र्दिं महतीं च त्रिदोषजां ॥ बिल्व
त्वचो गुडूच्या वा क्वाथः क्षौ
द्रेण संयुतः। छर्दिं त्रिदोषजां
हंति पर्पटः पित्तजां तथा ॥
आम्रास्थि बिल्वनिर्यूहः पी
तः समधुशर्करः। निहन्याच्छ
र्दीतीसारं वैश्वानर इवाहुतिं ॥
निर्यूहः क्वाथः ॥ जंब्वाम्रपल्ल
वस्नातं लाजरजः संयुतं शी
तं। शमयति मधुना युक्तं व
मिमतिसारं तृषार्त्तिं मूर्छां ॥
वीभत्सजां हृद्यतमैरिष्टैर्हृ
द्यैर्जयेत् फलैः। लंघनैरामजां
छर्दिं जयेत् सात्म्यैरसात्म्यजां।
कृमिहृद्रोगवद्ध्याद्वमिं कृमि
समुद्भवां। तत्र तत्र यथादोषं
क्रियां कुर्य्याच्चिकित्सकः ॥
इति छर्द्यधिकारः ॥ इति भा
वप्रकाशः ॥ एष न वधेन छ
र्द्यति छ्यते। अयं केश्चित् मन्य
ते। इति दुर्गादासः ॥

छागः पुं स्त्री पशुविशेषः।
तत्पर्य्याय गुणाः। छागलोव
र्करश्छागो वास्तोऽज छेलकः
शुभः। छागमांसं लघु स्निग्धं
स्वादुपाकं त्रिदोषघ्नं ॥ नाति
शीतमदाहि स्यात् स्वादु पी
नसनाशनं। परं बलकरं रु
च्यं बृंहणं बलवर्द्धनं ॥ अजाया
अप्रसूताया मांसं पीनसनाश
नं। शुष्ककासे रुचौ शोषे हि
तमग्नेश्च दीपनं। अजास्तनस
बालस्य मांसं लघुतरं स्मृतं
हृद्यं ज्वरहं श्लेष्मघ्नं स्वादु ब
लदं भृशं॥ मांसं निष्कासिताण्ड
स्य छागस्य कफकृद्गुरु। स्रोतः
शुद्धिकरं बल्यं मांसदं वातपित्त
नुत्॥ वृद्धस्य वातलं रूक्षं त
था चापि रक्तस्य च। ऊर्द्धजत्रु
विकारघ्नं छागमुण्डं रुचिप्र
दं इति भावप्रकाशः ॥
छागलाद्यं क्ली छागलादिघृ
तं। तच्च वातरोगनाशकघृतं। य
था। आमं चर्म विनिर्मुक्तं त
त्यक्तशृंगनखादिकं। पंचमूली
द्वयं चैव जलद्रोणे विपाचयेत्
तेन पादावशेषेण घृतप्रस्थं।

विपाचयेत्। जीवनीयैः सप
शाकैः क्षीरेचैव शतावरी ॥
छागलाद्यमिदं नाम्ना सर्ववात
विकारनुत्। अर्द्दितेकर्णशूले
च वाधिर्य्ये मूकमिम्मिने॥ जड
गद्गदपंगूनां खंजे गृध्रसि कुब्ज
योः। अपतानेऽपतंत्रे च स
र्पिरेतत् प्रशस्यते ॥ पृथग्ग
ह्नीता पंचमूल ह्रस्वाज मांस
योः। निः क्वाथ्य सलिलद्रोणे
क्वाथे पादावशेषिते ॥ स्वल्प
छागलाद्यघृतं ॥ ह्नतारंते मंत्रः
ओं कालि वज्रेश्वरि अमुकस्य
फलसिद्धिं देहि रुद्रवचनेन
स्वाहा। स्नापयित्वा छागमादौ
मधु दत्वा ललाटके उदङ्मुखः
प्राङ्मुखो वाभिषेकेन समालभे
त्। छागमारणमंत्रः। ओं ह्रीं
ओं गां गणपतये स्वाहा॥ छाग
मांसतुला ग्राह्य दशमूल्याः प
लं शतं। अश्वगंधा पलशतं वा
सालकशतं तथा॥ द्रोणाटकं
पचेत्तोये अष्टभागावशेषिते:
क्षीरं स्नेहसमं दद्यात् शताव
र्य्यारसं तथा॥ ताम्रपात्रे दृढे
चैव पाने मृद्वग्निना पचेत्
अश्वैषधस्य कल्कस्य प्रत्येकं

शार्क्किसंमितं ॥ जीवंती म
धुकं द्राक्षा काकोल्यौ नीलमु
त्पलं । मञ्जिसचंदनं रास्ना प
र्णिनीद्वय शारिवे । मेदे द्वे च
तथा कुष्ठं जीवकर्षभकौ श
टी । दार्वी प्रियंगु त्रिफलानतं ।
तालीश पद्मकौ ॥ एलापत्रं
वरी नागजातीकुसुमधान्यकं
मंजिष्ठा दाडिमं दारु रेणुकं ।
शैलवालुकं ॥ विडंगं जीरकं चै
व पेषयित्वा विनिक्षिपेत् । व
स्त्रपूते च शीते च शर्करा प्रस्थ
संयुतं ॥ निधापयेत् स्निग्ध
भाण्डे आर्द्रे वा भाजने शुभे
अस्यौषधस्य सिद्धस्य शृणु वी
र्य्यमतः परं ॥ देवदेवं नमस्कृत्य
संपूज्य गणनायकं । पिबेत् पा
णितलं तस्य व्याधिं वीक्ष्य मु
पानतः ॥ सर्व्ववातविकारेषु
अपस्मारे विशेषतः । उन्मादे
पक्षघाते च आध्माने कोष्ठनि
ग्रहे ॥ कर्णरोगे शिरोरोगे बा
धिर्य्ये चापतंत्रके । भूतोन्मादे
च गृध्रस्यां सोहारे चातिपा
तजे ॥ पार्श्वशूले च रुक्शूले
वाह्यायामार्दिते तथा ।
वातकण्टक हृद्रोग मूत्रकृ
च्छ्रे समंगुले ॥ कोष्ठशीर्षे त
था खंजे कुब्जे चाप्मति निम्नि
ते । अपतानेऽनरायामे रक्तपि
त्ते तथार्द्दिते ॥ आनाहेऽपि वि
कारेषु चातुर्थकज्वरेऽपि च ।
हनुग्रहे तथा शोषे क्षीणे चै
वाववद्धके ॥ दण्डापतानके
भग्ने दाहे चादेपके तथा । जी
र्णज्वरे विषे कुष्ठे शोफः सं
ते महात्यये ॥ आद्य वाते
ग्निमान्द्ये च वातरक्ते गदेषु च
पक्काशयरोगिणे चैव तथा स
र्व्वांगरोगिणे ॥ हस्तकम्पे शि
रःकम्पे जिह्वाकम्पे जडे भ्रमे ।
क्षीणेन्द्रिये नष्टशुक्रे शुक्रनिः
सरणे तथा ॥ क्षीणे वाता
तपाते च पटले चातिस्पन्द
ने तथा । व्याधि पतिते वाते
क्षीणे मर्म्माभिहतके । आभि
चारिकदोषे च धनसंतापसंभ
वे ॥ ये वातप्रभवा रोगा ये च
पित्तसमुद्भवाः । शिरोमध्यग
ता ये च जंघापार्श्वादिसं
स्थिताः ॥ मातृग्रहाभि
भूतस्य शिशु यैश्च विस्ब
घाति । प्रक्षीणबलमांसस्य न

वल्मीगामनत्तमः ॥ घृतेनानेन
सिध्यंति वन्ध्याशुक्रिविवासरान्
निहंति सकलान् रोगान् घृतं
परमदुर्लभं ॥ रसायनं वाजीक
रमङ्गेच वपुःप्रकर्ष विदधाति
रूपां दन्तावलेन्द्रेण समानतेजा
दीर्घायुषं पुत्रशतं करोति प्रौ
ता स्त्रीणां शतं गच्छति वाजि
वेगं न याति तस्मिं सरसः स
मागः । अपुत्रिणी पुत्रशतं
करोति शतायुषं कामसम
वलिष्ठं ॥ महद्धृतं नाम तच्छा
गलाद्यं विनिर्म्मितं वातनिसूद
नं च । शिवं शुभं रोगभयापहं
च चकार हारीतमुनिर्विशिष्टः
शृगालवद्धिणःपाके तु मांस
तत्रहापयेत् । मरुरी जंतुकी
छागी वीर्य्यहीनाः स्वभावतः
भाषितं काशिराजेन छागमे
व नपुंसकं ॥ घृतं १६ शेर ।
काथार्थं छागमांसपल १०
पाकार्थं जलं शं ६४ । शेषः
शं १६ । विल्वादि दशमूलं प्र
पलं १० । जलशं ६४ । शेषः शं
१६ अश्वगंधा १० पलं । जल
शं ६४ । शेषः शं १६ वाट्याल
के १० पलं । जलशं ६४ । शे
षः शं १६ । दुग्धं शं १६ । शत
मूलीरसः शं १६ । कल्कार्थं
जीवंत्यादीनां जीरकपर्य्यन्तानां
कल्कद्रव्याणां प्रतो ४ । व
स्त्रपूते शीते शर्करा शं २ ।
इति छागलाद्यघृतं । इति भै
षज्यरत्नावली ॥

छागी स्त्री छागमाता । पाँठी
इति भाषा । तत्पर्य्यायः । सं
जा १ मुखविलुण्ठिका २ ।
इति शब्दरत्नावली ॥ तदुग्ध
गुणाः । छागं कषायं मधुरं
शीतं ग्राहि पयो लघु । रक्त
पित्तातिसारघ्नं क्षयकासज्व
रापहं ॥ अजानां मल्पकाय
त्वात् कटुतिक्तादिभक्षणात्
स्तोकाम्बुपानाद्व्यायामात् स
र्व्वरोगापहं पयः ॥ इति भा
वप्रकाशः ॥

छात्रकं क्ली छात्रमधु । यथा ।
वरटाः कपिलाः पीताः प्रा
यो हिमवतो वने । कुर्व्वन्ति छ
त्रकाकारं तज्जं छात्रमधु स्मृ
तं ॥ छात्रं कपिलं पीतं स्यात्
पिच्छिलं शीतलं गुरु । स्वादुपा
कं कृमि श्वित्र रक्तपित्त प्रमेह
जित् ॥ भ्रम तृट् मोह विषहृ

नर्पणेव गुणाधिकं। इतिभा
वप्रकाशः॥
छाया स्त्री साद्रूप्यं। यथा
ग्रंगादयोस्यैव जला आघ्राय
शिष्यमूर्द्धनि। वस्त्रादिभि र
लंकृत्य पुत्रछायावद्रूप तं
पुत्रछाया पुत्रसाद्रूप्यं। इ
तिदर्पकचंद्रिका॥
छायापुरुषः पुं आकाशेद
ष्टः स्त्रीयच्छायाद्रूपपुरुषः।
यथा। श्रीदेव्युवाच। भगव
न् देवदेवेश सर्वागमविशा
रद। नराणां पापिनां लोके पा
पनिर्मोचनं कथं॥ कालज्ञा
नं कथं वास्मात् सूक्ष्मोपाये
न न हर। अनानि साधनानीश
त्वयानेकानि सूरिशः॥ तथा
पिनामवुजे रथाक्रान्यल्पबु
द्धिभिः। प्रायेण मनुजा लोके क
लौ स्वल्पायुषोऽध्रुवं॥ अनेक
वर्षसाध्येस्मिन् योगाभ्यासेऽप्र
शक्तयः। शिव उवाच। सा
धु देवि त्वया पृष्टं लोकानां
हितकाम्यया। तादृशं साधनं
वक्ष्ये सर्वसाधारणं लघु॥ गोप
नीयं प्रयत्नेन न वाच्यं वै क
स्यचित्। सिद्धाय भक्तियु
क्ताय सेवकाय सुचेतसे॥ पा
पिने क्रूरवेषाय भक्तिहीनाय
भामिनि। न वदेद्यदि वा मोहात्
वदेत् सिद्धिं न विन्दति॥ तस्मात्
परीक्ष्य वक्तव्यं शिष्याय शालिने
शिवे। स्वच्छायापुरुषं पश्येज्ज्ञा
ने मुदमानसः॥ तस्यावलो
कनात् सद्यः पापराशिर्विनश्य
ति। महापातकसंघैश्च तत्समै
श्चोपपातकैः॥ विमुच्यते च
णार्द्धेन तुलराशि यथानलात्
कालज्ञानं च षण्मासेन तस्मिन् द
ष्टे भवेद्ध्रुवं॥ देव्युवाच। अन
च्छायाकथंयप्रेक्षणे भूत
लक्ष्यितां। षण्मासकालज्ञानं
च तस्मिन् दृष्टे कथं भवेत्॥
शिव उवाच निरभ्रे गगने देवि
यदा भवति निर्मलं। तदा छा
यामुखो भूत्वा निश्चलं प्रयतो
धिया॥ स्वच्छायाकण्ठ मा
लोक्य तद्गुरूक्तक्रमेण वै।
संमुखं गगने पश्येत् निर्निमे
ष स्तस्थैकधीः॥ शुद्धस्फटि
कसंकाशः पुरुषस्तत्र दृश्य
ते। न दृश्यते यदा तत्र पुन स्त
दूत परीक्षयेत्॥ वरूपा दर्श
नेनैव साक्षात्कारो भवेत्

ध्रुवं। कस्यचित् भाग्यतः पश्येत्
यदि विंबोऽक्षिगोचरः॥ भवत्येव
न संदेहो गुरुविम्बा सतः शिवे
गुरुं सम्यक् प्रपूज्य चित्वा पश्येत्।
छायां समाहितः॥ तथा ष
ण्मासपर्यन्तं मरणं लक्षणं वि
धेः। शिरोहीनं यदा पश्येत् ष
ण्मासाभ्यन्तरे मृतिः॥ यदा पा
दौ न दृश्येते भार्याहानिर्न सं
शयः। न दृश्येते यदा पाणी
भ्रातृहानिर्न संशयः॥ एतज्ज्ञा
नार्थी सम्यक् गंगातीरं स
माश्रयात्। योगाभ्यासेन स
ततं प्राणायामेन संस्तः॥
यथा वा सप्तमीपश्यो लक्षं।
मंत्रमेनं जपेत्। योऽत्र भैरव
विद्याशी यतवान् यतमानसः।
मंत्रं जपेत्र सन्देहो अन्यथा म
तु सच्छति। यदा भूमिमलि
नं पश्येत् ज्वरपीडा भवेत्तदा॥
तस्य शान्तिं प्रकुर्वीत शिवसेवां
समाहितः। रक्तवर्णं यदा पश्ये
देश्वर्यं भवति ध्रुवं॥ मध्य
छिद्रं यदा पश्येत् शत्रुघातो
भवेत्तदा। एवं सदर्शने देवि
ज्ञानवान् भवति ध्रुवं देवि ज्ञा
नमभ्यनारदाय पुरा प्रोक्त
मया पुरुषदर्शनं। तत्प्रसादा
महायोगी भूत्वा लोकांश्चरत्य
सौ॥ स्वच्छायादर्शने देवि क
लौ पुरुषलक्षणं। दीर्घायुः स
मवाप्नोति ज्ञानेचापि सुनिर्मलं
इति योगप्रदीपिकायां उमा
महेश्वरसंवादे छायापुरुष
लक्षणं नाम पंचमः पटलः॥
ॐ अस्य श्रीछायापुरुषग्रहण
मंत्रस्य ब्रह्मर्षि र्बृहद्गायत्रीछन्दः
छायादेवी देवता। ह्रां बीजं स्वा
हा शक्तिः पुरुष इति कील
कं सर्वसिद्धिसंदर्शने सिद्ध्य
र्थे जपे विनियोगः। ह्रां मित्या
दि षडङ्गन्यासः॥ माययया मा
यया लो लो ह्रीं माया शिववि
चार्यो ऋषयः ओं ह्रीं अंगास्म
स्वति ॐ नमो भगवते भूतशरी
रमुञ्चनु माकाशे दर्शय दर्शि
य ॐ ग्रौं ग्रौं ह्रीं भैरवाय नमः स्वा
हा इति मंत्रः॥ पादाभावे चपु
त्रो वा करुभावे च बांधवे आत्मा
ने शिरसोऽभावे सर्वाभावे कुल
क्षये॥ विशीर्णे विषते पते
कुंभे धर्मे च विज्वरे। दुर्भिक्ष
जायते घोरे कज्जले च पदा
मृते॥ संस्पर्शेच मृत्वे स्वस्से

हेमलाभं समिद्धये । हीनेर
केजयेपशीतेउस्मेमरस्मर्नेसंशयः
पतिभीतिं शास्त्रज्ञान मिति वे
दविदोविदुः । मृत्युंजयंजप
न्नेव शांति लस्पविधीयते ॥
षण्मासे मरणं तस्य शीर्षी
यपचये विदुः ॥ मृत्युंजय
यंत्रं । प्रथमं प्रणव मालिख्य
तन्मध्ये साध्यनामकं । वहिरष्ट
दलंपद्मं यांतांतं वसुपत्रके ॥
विलिखेत् सहकारंच केशरे
षुस्वशोभितं । तद्बहिः षोडशदले
स्वान् षोडशस्वरकं लिखेत्
हारंभूपुर मालिख्य चतुर्द्वारे
चतुष्कोणं । वाह्येयच चतुष्कोणे
चक्रंमृत्युंजयंभवेत् ॥ ज्वरादिस
वेरोगादिदाहशान्तिकरंपरं ।
मृत्युंजयंमहाचक्रं सर्वरक्षा
करं नृणां ॥ ध्यानं । चन्द्रा
र्काग्नि विलोचनं स्मित मु
खं पद्मद्वयान्तःस्थितं मुद्रा
पाशमृगाक्षसूत्र विलस
त्पाणिंहिमांशुप्रभं । कोटीरें
दुगलत्सुधाप्लुततनुंहारादि
भूषोज्ज्वलं । कान्त्या विश्व
विमोहनंपशुपतिंमृत्युंजयं
भावयेत् ॥ ततानातपुरुषे शि

वं गणपतिं मन्त्रजपेन सर्वदा वे
लदेवेन सततं विलोकनं वंश
मुक्ते रवौ प्रपदं । खे विलो
कन मंत्रस्तु । ॐ क्लीं भूचरी खे
चरी आत्मानं माकाशे दर्शय
सर्वहस्तान्तं कथय कथय हुं
फट् स्वाहा । यः पश्येत सर्व
गं शांतं आत्मानं तस्य मृत्युं
न तेन किंचिद्यानेन ज्ञानसं
वावष्यते ॥ इति योगप्रदीपि
कोंछायापुरुषोपदेशो नाम
षष्ठः पटलः ॥
छायाव्यवहारः ॥ ज्योतिः
शास्त्रोक्तिकविशेषः । अथ
छायाव्यवहारेकरणसूत्रंवृत्त
म् । छाययोः कर्णयो रंतरेय
तयोर्वर्गविश्लेषभक्ता रसाद्री
षवः । सैकलब्धेः पदघ्नंतु
कर्णान्तरं भान्तरेणोनयुक्तं
दले स्तः प्रभे ॥ उदाहरणम्
नंद चंद्रै र्मिते छाययो रंतरं
कर्णयो रंतरं विश्वतुल्यं य
योः । ते प्रभे वक्ति यो यु
क्तिमान् वेत्यसौ व्यक्त म
व्यक्तयुक्तं हि मन्ये खिल
म् ॥ न्यासः ॥



छायान्तरं । १९ । कर्णान्तरं ।
१३ । अनयो वर्गान्तरेण । १९२
भक्ता रसाद्रीषवः । ५७६ । ल
ब्धं । ३ । सैकस्यास्य । ४ । मूलं ।
२ । अनेन कर्णान्तरं । १३ । गु
णितं । २६ । द्विस्थं । २६ । भान्तरे
ण । १९ ऊनयुतं । ७ । ४५ तदर्द्धे
लब्धे छाये ७/२ ४५/२ तत
कृत्वो येगपद मित्यादिना
जातो कर्णौ २५/२ ५१/२
छायांतरेकरणसूत्रं वृत्ता
र्द्धम् शंकुः प्रदीपतलशंकु
तलान्तरघ्ना छाया भवेद्विनरदी
पशिखौच्च्यभक्तः उदाह
रणं । शंकुप्रदीपान्तरभूः ।
त्रिहस्ता दीपोच्छ्रितिः सार्द्ध
करत्रया चेत् शंकोस्तदर्कांगु
लकस्य तस्य प्रभा स्यात् कि
यती वदाशु ॥ न्यासः ॥

शंकुः १/२ प्रदीपशंकुतलान्तरः ३
अनयो र्घातः ३/२ विनरदीपशि
खौच्च्येन । २ । भक्तो लब्धानि
छायांगुलानि । १२ ।
अथ दीपोच्छ्रित्यानयनाय कर
णसूत्रं वृत्तार्द्धम् । छाया
हृतेतुनरदीपतलान्तरेघ्ने शं
कौ भवेन्नरयुते खलु दीपकौ
च्च्यम् । उदाहरणम् । प्रदीप शं
क्वन्तर भूस्त्रिहस्ता छायांगुलैः
षोडशभिः समा चेत् । दीपोच्छ्रि
तिः स्यात् कियती वदाशु प्र
दीप शंक्वंतर मुच्यते मे ॥

न्यासः



शंकुः । १२ । छायांगुलानि । १६ ।

शंकु प्रदीपान्तरहस्ताः।३।त
थांदीपकोच्च्यं हस्ताः $\frac{११}{४}$ नय
प्रदीपशंक्वन्तरभूमाना
नायकरणसूत्रं वृत्तार्द्धम्।वि
शंकुदीपोच्चयसंगुणाभा शंकु
हृता दीपनरांतरं स्यात्।उदाहर
णं।पूर्वोक्त एव दीपोच्छ्रायः
$\frac{११}{४}$ शंक्वंगुलानि।१२। छाया
।१६।लब्धाः शंकु प्रदीपान्त
रहस्ताः।३।

छायाप्रदीपान्तरदीपोच्चानय
नाय करणसूत्रं सार्द्धवृत्तम्।
छायाग्रयोरंतरसंगुणा भाछा
याप्रमाणान्तरहृद्भवेद्भूः भूशं
कुघ्नाः प्रभया विभक्ताः प्रजा
यते दीपशिखौच्च्यमेवं॥त्रैरा
शिकेनैव यदेतदुक्तंव्याप्तंस्वभेदै
र्हरिणेव विश्वं।उदाहरणम्।
शंको भार्कमितांगुलस्य स
मते दृष्टा किलाष्टांगुलाच्छा
याग्राभिमुखे करद्वयमिते।
यत्तस्य देशे पुनः।तस्यैवा
र्कमितांगुला यदि तदा।
छायाप्रदीपान्तरं दीपौच्च्यंच।
कियदद वदत्विति छायाभिधा
नेनसिचेत्॥

न्यासः

भूः $\frac{१५}{२}$ छा $\frac{१}{२}$ भूः २ छा $\frac{१}{२}$

अत्रच्छायाग्रयोरंतरं अंगुला
त्मकं।५२।छायेच।८। १२।
अनयोरंतरा।४। अनेन
न।५२।गुणिता।४१७।छा
याप्रमाणान्तरेण।४।भक्ता
लब्धं भूमानं।१०४।इदं प्रथ
मच्छायाप्रदीपतलयोरंतर
मित्यर्थः।एवं द्वितीयच्छाया
प्रमाणे १५६। भूशंकुघातः
प्रभया विभक्तः इति ज्ञातमु
भयतोपि दीपोच्च्यं सममेव हस्ताः $\frac{१}{२}$

एवमित्यत्र छायाव्यवहारे त्रै
राशिक कल्पनयानयनं व
र्तते तद्यथा।प्रथमच्छाया
तो द्वितीय छाया।१२।
यावताधिका तावता छा
यावयवेन यदिच्छायाग्र
तरन्तस्याभू लभ्यते त
दा छायया किमिति एवं
पृथक्पृथक्छायाप्रदीपतलां
तर

प्रमाणं लभ्यते।ततो द्वितीयं
त्रैराशिकं यदि छाया भुजे
शंकुः कोटि स्तदा भूतलभु
जे किमिति लब्धं दीपकौ
च्च्यमुभयतोपि तुल्यमेव
एवं पंचराशिकादिकमखि
लं त्रैराशिककल्पनयैव सि
द्धं यथा भगवता श्रीनाराय
णेन जनन मरण क्लेशापहा
रिणा निखिलजगज्जननैक
बीजेन सकल भुवन भावने
नगिरि सरित्सुरनरासुरादि
भिः स्वभेदैरिदं जगद्व्याप्तं त
थैवाखिलं गणितजातं त्रैरा
शिकेन व्याप्तं यद्येवं तर्हि
भिः किमित्याशंक्याह।य
त्किंचिद्गुणभागहारविधि
नाबीजं च वा गण्यते तत्त्रै
राशिकमेव निर्मलधियामे
वावगम्यं विदां।एतद्यद्बहुधा
स्मदादिजडधीधीवृद्धिबुद्ध्या।
तद्भेदांस्तदानन्त्यमानविधा
यरचितं प्राज्ञैः प्रकीर्णादिकं॥
इति श्रीभास्कराचार्यविरचि
तायां लीलावत्यां छायाधि
कारः समाप्तिमगात्॥
छिद इ २ धन्म ऊ छेदे।

छेदो द्विधाकरणं।३२ अछिद
त्।अछैत्सीत्।ध न्म छिन्न
त्ति छिन्ने दात्रेण तृणं लो
कः।ऊ छेत्ता।इति दुर्गा
दासः॥
छिद्र त क भेदे। भेदइ
ह रंध्रकरणं।छिद्रयति छि
द्रापयति भाण्डं बालकः।इ
ति दुर्गादासः॥
छिन्नमस्ता स्त्री दशमहावि
द्यान्तर्गतषष्ठमहाविद्या।सा च
प्रचण्डचण्डिका।यथा।प्रचण्ड
चण्डिकां वक्ष्ये सर्वकामफलप्र
दां।यस्याः प्रसादमात्रेण स
दाशिवो भवेन्नरः॥अपुत्रो ल
भते पुत्रं अधनो धनवान् भवे
त्।कवित्वंच सुपाण्डित्यं लभ
ते नात्र संशयः॥अथ प्रचण्ड
चण्डिकामंत्राः।विश्वसारतन्त्रे
मतेच।लक्ष्मीलज्जां ततो
मायामाद्यां द्वादशिकामपि
वज्रवैरोचनीये हमाये फट्
स्वाहया पुनः॥लक्ष्मी बी
जं यदाद्यं स्यात् तदा श्रीः स
र्वतोमुखी।लज्जाबीजेनवा
ग्येन वशयंतो याति योषितः
मायाबीजेन चाद्येन महा।

पातकनाशनं। मायां हादष्टि
कोवीजमायेस्यान्मुक्तिदायकं
भैरवोऽस्य ऋषि र्देवि सम्रा
ट्छंद उदीरितं। छिन्नमस्ता
स्मृता देवी वीजं कूर्च्चद्वयं पुनः
स्वाहा शक्तिरभीष्टार्थे विनि
योग उदाहृतः। अत्र लज्जाप
दं कामवीजपरं। तथाच। अत्र
लज्जापदे देवि कामवीजं वित
न्यते। महाकालमते ज्ञेयं मं
त्रोद्धारं प्रभावहं। एवं माया
पदेति पाठे मायायाः एवं ल
ज्जावीजं तस्मिन्निति पर्य्यः। तथा
च। एवं मायापदेन लज्जावीज
मुच्यते। अन्यथा तान्तिपादिवि
रोधः। तथा वाकामाद्या वाग्भ
वाद्या वामायाद्या वा जपेत् स
धीः। लक्ष्म्याद्या वा जपेद्विद्यां
चतुर्वर्गफलप्रदां॥ अन्येषां
च मुनीनां मते सर्वत्र मायाप
दं हृल्लेखपरं। तथैव। वां तं वह्नि
समायुक्तं रतिविंदु समन्वि
तं। लक्ष्मीवीजमिदं प्रोक्तं
सर्वकामार्थसिद्धये॥ वामा
क्षि वह्नि संयुक्तं विंदुनादविभू
षितं। शिववीजमिहख्यातं ल
ज्जावीजमुदाहृतं॥ ईशानमहस

पुष्यारवीजं सविंदुकं नाद
विभूषितं च। सवामकर्णं प
तितः प्रकल्प मायांवदंतीह
मनीषिणस्तां॥ द्वादशस्वरव
र्णस्यात् नादविंदु विभूषितं
वाग्भववीजमित्युक्तं सर्ववा
क्यविशुद्धये॥ इति मंत्रे चत
वीजव्याख्यानात् अयंतः स
मीचीनः। भैरवमते तु मा
या भुवनेश्वर्य्येव॥ लक्ष्मीः
प्रथमवीजेऽस्ति लज्जावीजे
मनोभवः। तृतीयेऽस्ति स
दा देवी महापातकनाशिनी॥
चतुर्थे तु गुणातीतामुक्तिवि
द्याप्रदायिका। वकारे वरुणः
साक्षात् जकारे तु सुराधिपः॥
येकारे त्रिपुरादेवी रेफे त्रि
पुरसुंदरी॥ त्रैलोक्य विज
या देवी सदैवौकारसंस्थिता।
चकारे चंद्रमा देवो नकारे हि
विनायकः॥ ईकारे कमला
साक्षात् यकारे च सरस्वती
मायायुग्मे सदा देवी प्रकृत्या
सह संगता॥ वैखरी चैव प
हकारे स्वाकारे कुसमायुधः
हाकारे च रति श्चिष्टेदेवं मं
त्रस्य समुच्चयः॥ इति॥

ख्यानाच्च॥ अस्याः पूजाप्र
योगः। प्रातः कृत्यादिकं कृ
त्वा मंत्राचमनं कुर्य्यात्। यथा
लक्ष्मीमाया कूर्च्चवीजैः स्त्रि
भिः पीत्वा तु साधकः। वाग्भ
वेनौष्ठौ संमृज्य मायाभ्यां तु
द्विरुन्मृजेत्॥ कूर्च्चेन तालयेत्
पाणीपभि मंत्रेश्च विन्यसेत्।
श्रीमाया कूर्च्च वाक् काम त्रि
पुराभ गवर्णकैः॥ कामक
लांकुशाभ्यां च वक्त्रं नासादि
कर्णकान्। नाभिरुन्मस्तके
वांसौ स्पृष्ट्वा शम्भुर्भवेत् त
णात्॥ अत्र च मे एवं छिन्नम
स्तां वत् सरामा प्रपश्यति
ततः प्राणायामान्के विधाय
षोढान्यासं कुर्य्यात्। मंत्रषो
ढां ततः कुर्य्यात् त्रैलोक्यवश
कारिणी। श्रीबालात्रिपुरायो
निप्रासादप्रणवेस्तथा॥ का
लीवधुक्रुशेः कामकलाकु
चीस्त्रकैः क्रमात् षोडशीमंत्र
वर्णाश्च पुराष्टादशाक्षरी॥
पञ्चवीजे मातृकार्णान् स्थेषु स्था
नेषु विन्यसेत्। षष्ठावत्सव
रूपादि वीजषोढा प्रकीर्त्ति
ता॥ अस्याः संन्यसनात् स
र्वैवमदेहा भवतिहि। सर्वे

स्वर्य्ययुतासौ हि जीवन्मुक्तो द
शाहतः॥ तत ऋष्यादिन्यासः
अस्य मंत्रस्य भैरव ऋषिः स
म्राट् छंदः छिन्नमस्ता देवता
हूँ कारद्वयं वीजं स्वाहा शक्ति
रभीष्टार्थसिद्धये विनियोगः।
यथा शिरसि भैरवऋषये नमः
मुखे सम्राट्छंदसे नमः।
हृदि छिन्नमस्तायै देवतायै नमः
गुह्ये हूं हूं वीजाय नमः॥
पादयोः स्वाहा शक्तये नमः
ततः करांगन्यासौ। ॐ आं ख
ड्गाय हृदयाय स्वाहा। इति कनी
यसि। ओम् ईं सुखड्गाय शिर
से स्वाहा। इति पवित्रांगुल्योः
ॐ ऊं सवज्राय शिखायै स्वाहा।
इति मध्यमयोः। ॐ ऐं पाशा
यकवचाय स्वाहा। इति तर्ज
न्योः। ओम् ॐ अंकुशायने
त्रत्रयाय स्वाहा। इत्यंगुष्ठ
योः। ओम् अः सुरक्षा रक्षस्व
तायास्त्राय फट्। इति करत
लपृष्ठयोः। एवं हृदयादिषु।
ततोक्तं भैरवतंत्रे। उद्धरेत् पू
र्वमाकारं विंदुलांछित म
स्तकं। खड्गाय हृदयायेति
स्वाहा युक्तं कनीयसि॥ ई
कारं च ततो देवि चंद्र को

दिसमप्रभं । स्त्ववज्राय ततो
वाच्यं शिरसे तदनंतरं ॥ स्वाहा
युक्तं ततो वाच्यं पवित्राग्रलि
संयुतं । ऊंकारंच ततो वाच्यं
विद्युल्लोच्छिन्नमस्तके ॥ स्ववज्रा
यततो वाच्यं शिखायै तदनंत
रं । स्वाहान्तं मध्यमायांच वि
न्यसेत्तदनंतरं ॥ मांसोद्धारशि
कोदेवी विन्यसेच्च ततः परं
पाशायेति समुच्चार्य्य प्रवदेत्
कवचायच ॥ स्वाहान्तं वि
न्यसेन्मंत्रं तर्जन्यां तदनंतरं ।
ऊंकारंच ततो देवि चांकुशं
तदनंतरं ॥ नेत्रत्रयाय स्वाहा
न्त मेगुष्ठे करयो र्द्दयोः । अ
कारंच विसर्गान्तं स्वरत्ना रत्न
संयुतं । अस्त्ररायस्वप्रकेय
स्वाहायेति ततः परं । फट्स्वरस
मायुक्तं विन्यसेत् करयो र्द्द
योः हृदि मूर्द्धि शिखायांच
कवचेनेत्रमंडले । यावदस्त्रंच
तर्द्दिक्षु विदिक्षु च यथाक्रमं ॥
त्रिशक्तितंत्रे भैरववाक्यं उक्त
रेनप्रणवं पूर्वमाकारं विंदुसंयु
तं । इत्यादि वाक्यान्त करां
गेषु प्रणवसम्वलितो न्यासः
ततो मूलेन मस्तकादि ।
पादपर्य्यन्तं पादादि ॥

मस्तकपर्य्यन्तं वारत्रयं न्यसेत्
ततो ध्याने । स्वनाभौ नीरजे ध्या
येद्धृद्दं विकसितं सितं । तत्
पद्मकोषमध्ये तु मण्डलं च
ण्डरोचिषः ॥ जवाकुसुमसं
काशं रक्तबंधुकसन्निभं । र
जः सत्व तमो रेखा योनिमण्ड
लमंडितं ॥ मध्ये ततो महादे
वी सूर्य्यकोटिसमप्रभा । छि
न्नमस्ता करे वामे धारयंती स्व
मस्तकं ॥ प्रसारितमुखी दे
वी लेलिहानाग्रजिह्विका ।
पिवन्ती रौधिरीं धारां निजकं
ठविनिर्गतां ॥ विकीर्णकेशपा
शाच नानापुष्पसमन्विता ।
दक्षिणेच करे कर्त्री मुण्ड
मालाविभूषिता । दिगंवरी
महाघोरा प्रत्यालीढपदे स्थि
ता । अस्थिमालाधरा देवी नाग
यज्ञोपवीतिनी । रतिकामोप
रिष्ठाच सदा ध्यायेति मंत्रिणः
सदा षोडशवर्षीया पीनोन्नत
पयोधरा ॥ विपरीतरतासक्तौ
ध्यायेद्रतिमनोभवौ । डाकि
नी वर्णिनीयुक्ता वाम
दक्षिणयोगतः ॥ देवीग
लोच्छलद्रक्तधारापानं ॥
प्रकुर्वती । वर्णिनी लोहि

ता सौम्या मुक्तकेशी दि
गंवरा ॥ कपाल कर्त्तिकाह
स्ता वाम दक्षिणयोगतः ।
नागयज्ञोपवीताढ्या ज्वल
त्तेजोमयी प्रिय ॥ प्रत्यालीढ
पदा दिव्या नानालंकारभूषिता
सदा द्वादशवर्षीया सास्थि
मालाविभूषिता । डाकिनी वा
मपार्श्वेतु कल्पसूर्य्यानलो
पमा विद्युज्जटा त्रिनयना दन्तपं
क्तिवलाकिनी ॥ दंष्ट्राकराल
वदना पीनोन्नतपयोधरा ।
महादेवीं महाघोरां मुक्तके
शीं दिगंवरां ॥ लेलिहानम
हाजिह्वा मुण्डमालाविभूषि
ता । कपाल कर्त्तिकाहस्ता वा
मदक्षिणयोगतः ॥ देवीगलो
च्छलद्रक्तधारापानं प्रकुर्वती ।
करस्थितकपालेन भीषणेना
तिभीषणा ॥ आभ्यां निषेव्यमा
नांतां ध्यायेद्देवीं विचक्षणः ।
ध्यानमस्या वक्ष्ये कनमार । तंत्रे ।
प्रचण्डचंडिका मेव मथातो
यस्तु पूजयेत् । सर्वस्वस्य शिर
श्छित्वा देवी पिवति शोणितं ॥
पिवन्तीमिति तेनमन्त्रेणेति श्च
षः तथाच । स्वमस्तकं स्वपीर

रक्तधाराभिरुद्दितं । ललज्जिह्वं
महाभीमं दक्षेनवामभुजे तथा ॥
इति भैरवतंत्रे । तत्रैव । सितं
कुर्य्याद्दलं पूर्वमाग्नेयं रक्तव
र्णकं । याम्यं कृष्णमतः पीतम्
रक्तं रक्तं सितासितं ॥ ततः पी
ताम्प्रकुर्वीत कर्णिकां तस्य म
ध्यगां । तन्मध्ये तु प्रकुर्वीत म
ण्डलं चण्डरोचिषः ॥ रजः स
त्वतमो रेखा रक्ताशुक्लासिता
क्रमात् । मायायुग्मं ततो न्य
स्य षट्दलं समन्वितं ॥ वाहितस्य
च चक्रस्य कुर्य्यात् प्राकारवेष्टि
तं । पूर्वं रक्तं ततः कृष्णं सितं पी
तं यथाक्रमं ॥ चतुर्द्वारसमायु
क्तं देवमपाले र्वसिष्ठितं । इत्य ।
स्याः पूजायंत्रं ॥ यथा वा ।
त्रिकोणं विन्यसेदादौ तन्मध्ये
मंडलत्रयं । तन्मध्ये विन्यसेद्यो
निं द्वारत्रयसमन्वितां ॥ वहिरष्ट
दलं पद्मं भूविंवत्रितयं पुनः ।
कुर्वीजं लिखेन्मध्ये त्रिकोणे
फट्समन्वितं ॥ यदा प
नद्योनोक्तं यंत्रं । तथाच ।
अपरंच प्रवक्ष्यामि शृणु दे
वि यथाक्रमं । स्वनाभौ नीर
जंध्यायेत्प्रातन्मण्डलसन्निभं ॥

योनिचक्रसमायुक्तं गुणत्रित
यसंस्थितं। तत्र मध्ये महादेवी
छिन्नमस्ता स्मरेद्यतिः॥ प्रदीप
कालिकाकारा मद्दितीयस्थव
स्थिता। योनिमुद्रासमायुक्ता हृ
दयस्थितलोचना॥ ध्येय मेत
द्यतीनांच गृहस्थानां निशाम
य। यथा। भैरवेश्वशरीरस्थना
भिनीरजसंगतां निर्लिप्तां नि
र्गुणां स्वस्थां बालचंद्रसमप्रभां
समाधिमात्रगम्यांतु गुणत्रित
यवेष्टितां। कलातीतां गुणातीतां
तांमुक्तिमात्रप्रदायिनीं॥ एवं।
ध्यात्वा मानसैः संपूज्य नारिणी
वह्निस्थापनं कुर्यात्। ततः
पीठपूजा। आधारशक्तये। प्र
कृतये कूर्माय। अनंताय।
पृथिव्यै। क्षीरसमुद्राय। रत्न
द्वीपाय। कल्पवृक्षाय। तदधः
स्वर्णसिंहासनाय। आनंदक
दाय। संविन्नालाय। सर्वत
त्वात्मकपद्माय। सत्वाय। र
जसे। तमसे। आं आत्मने
अं अन्तरात्मने। पं परमात्म
ने। क्षीं ज्ञानात्मने नमः। प
द्ममध्ये रतिकामाभ्यां। भैरवम
नेन। आधारशक्तिं समंत्रेनावाह
जी

मतः परं। पद्मनालेच पद्मेच
पूजयेन्मंत्रवित्तरः। मंडलेच
तत्वस्वंच रजःसत्वं तमस्तथा।
रतिकामौ च संपूज्य शक्तिपूजां
समाचरेदिति॥ रतिकामोपरि
वज्रवैरोचनीये देहि देहि ए
हि एहि गृह्ण गृह्ण मम सिद्धिं
देहि देहि मम शत्रून् मारय
मारय करालिके हूं फट् स्वा
हेति पीठमंत्रः। सर्वत्र प्रणवा
दि नमोन्तेन पूजयेत्। पुन
र्ध्यात्वावाहयेत्। सर्वसिद्धिवर्ण
नीये सर्वसिद्धिडाकिनीये वज्रवै
रोचनीये इहावह इहावह पु
न स्त्वंमत्र मुद्रीर्थ इह तिष्ठ
इह तिष्ठ इह सन्निधेहि इह स
न्निरुध्यस्व इत्यनेनावाह्य आं
ह्रीं क्रों हंसः इत्यनेन प्राणप्र
तिष्ठां कृत्वा। ओम् आं वज्राय
हृदयाय स्वाहा इत्यादिना ष
डंगं विन्यस्य यथाशक्ति पूजां
कृत्वा बलिं दद्यात्। यथा वज्र
वैरोचनीये देहि देहि एहि
गृह्ण गृह्ण इमं बलिं मम
सिद्धिं देहि देहि मम शत्रून् मा
रय मारय करालिके हूं फ
ट् स्वाहा इति मंत्रेण। ततो

241

देव्या दक्षिणे ओम् वर्णिन्यै नमः
वामे ओम् डाकिन्यै नमः ॥
ततो देव्या अग्रे षडंगं संपूज्य द
क्षिणे ओम् शंखनिधये नमः
वामे ओं पद्मनिधये नमः। पूर्वा
दिदिक्षु लक्ष्मीं लज्जां मायां वा
णीं च पूजयेत्। विदिक्षु बल
विष्णुरुद्रेश्वरान् मध्ये सदाशि
वं सर्वत्र प्रणवादि नमोन्तेन
पूजयेत्। ततः पंच पुष्पांज
लिं दत्वा आवरणान् पूजयेत्
अग्नीशासुरवायुषु मध्ये दि
क्षु च ओम् आं वज्राय हृदया
य स्वाहा इत्यादिना षडंगानि सं
पूज्य अष्टपत्रेषु पूर्वादिक्रमेण
ओम् क्लीं काल्यै नमः एवं व
र्णिन्यै डाकिन्यै भैरव्यै महा
भैरव्यै इंद्राक्ष्यै पिंगाक्ष्यै संहा
रिण्यै सर्वत्र प्रणवादि नमो
न्तेन पूजयेत्। यथा। एकाना
माभिधां काली वर्णिनी डा
किनी तथा। भैरवी च महा
पूर्वा भैरवी तदनंतरं॥ इंद्रा
क्षीं च पिंगाक्षीं ततः संहार
कारिणीं। पूर्वादिके दलेष्वासां
शाक्तपदं यथाक्रमं॥ प्रणवा
दि नमोन्तेन लज्जाबीजं ॥

समुच्चरन्। पद्ममध्ये हूं हूं फ
ट् नमः स्वाहा नमः। देव्या द
क्षिणे समाह्लेदसे नमः। दे
व्या अग्रे सर्ववर्णेभ्यो नमः
पत्राग्रेषु पूर्वादिक्रमेण ब्रा
ह्म्यै माहेश्वर्यै कौमार्यै वैष्ण
व्यै वाराह्यै इंद्राण्यै चामुंडायै
महालक्ष्म्यै सर्वत्र प्रणवादि
नमोन्तेन पूजयेत्। ततश्च
तद्द्वारेषु ओं करालाय
नमः विकरालाय नमः एवं
अतिकरालाय महाकराला
य। यथा। भैरवीये। पूर्वद्वारे
करालंच विकरालंच दक्षिणे
पश्चिमेऽतिकरालंच महा
करालमुत्तरे॥ ततो धूपादि
विसर्जनेन्तयं विशेषः। संहा
रमुद्रा प्रदर्श्य अंजलावारोप्य
वामनासापुटेन। योनिमुद्रा
समारूढां प्रदीपकलिको
ज्ज्वलां। कुसुमपदे विधुमि
व क्रमेणैतां ततां गतां॥
इमं मंत्रं समुच्चार्य्य चरणरश्मौ
निवेशयेत्। उन्नते शिखरे
इत्यादि। अस्य पुरश्चरणं ल
क्षजपः सिद्धविद्यात्वात्॥ ब
लिदानेन भैरवीये। तत्रो

वलिः प्रदानतो मन्त्र मं
स स्वरादिभिः। अथवा म
धुपानाद्यैर्मधुरैर्विभवक्रमैः
मंत्रस्त्व। उच्चरेत्प्रणवं सर्वस
र्वसिद्धिप्रदेरितं। वर्णिनीये
ततो वाच्यं सर्वसिद्धिप्रदेततः
डाकिनीयेततो वाच्यं देवीनाम
ततः परं प्रेह्यहीतिततो वाच्यं
इमं बलिमनंतरं। शूरू शूरू त
तः प्रोक्ता मम सिद्धि मनंतरं
देहि देहीति मायैव ततः
फट् स्वाहा ह्यपाङ्गतः॥ बलि
मंत्रः समाख्यातः पूजितो
ऽयं महेश्वरीति। मंत्रांतरं भुव
नेशीकामबीजं कूर्चबीजं चवा
ग्भवं। भुवनेशीकूर्चबीजं वा
ग्भवं तदनंतरं॥ वज्रवैरोचनी
येचं हूं फट् स्वाहा ततः परं॥
अस्य पूजाप्रयोगम्यास्य पूजा
दिकं षोडशीवत् कार्य्यं ॥
ह्सौः हस्खा मादनं लक्ष्मी वी
ग्भवं कूर्चमेव च। अस्यां ता।
छिन्नमस्ताया महाविद्या प्रकी
र्त्तिता॥ अस्यापि सहस्रीवि
द्याऽजगन्नस्वापिनविद्यते। षड
वर्णः पंच मन्त्रः साध्यान्मो
क्षदो नात्र संशयः॥

अस्याः ध्यानमहं वक्ष्ये प्रत्या
ष कमलानने। प्रत्यालीढ
पदां सदैव दधतीं छिन्नं शिरः
कर्त्तृकां॥ दिग्वस्त्रां स्वकबंध
शोणितसुधाधारां पिबंतीं मुदा
नागाबद्धशिरोमणिं त्रिनयनां
हृद्युत्पलालंकृतां॥ रत्याशक्त
मनोभवोपरिदृढां ध्यायेज्जवा
सन्निभां। दक्षे चातिसितावि
मुक्तचिकुराकर्त्रीं तथा खर्परं।
हस्ताभ्यां दधतीं रजोगुणभवा
नाम्नापि सा वर्णिनी। देव्याश्छि
न्नकबंधतः पतदसृग्धारां पि
बंतीं मुदा॥ नागाबद्धशिरोम
णिर्मनुविदा ध्येया सदा सा सुरैः
वामे कृष्णतनुस्तथैव दधती ख
ड्गं तथा खर्परं॥ प्रत्यालीढपदा
कबंधविगलद्रक्तं पिबंती मुदा
सैषा या प्रलये समस्तभुवनं भो
क्तुं क्षमा तामसी॥ शक्तिः सा
पि परात्परा भगवती नाम्ना
परा डाकिनी। इति ध्यानं। अ
स्याः पूजादिकं सर्वं षोडशीवत्
कार्यं॥ मंत्रांतरं। तारं लज्जा हृदयं
वज्रवैरोचनीये हुं फट् स्वाहा। अ
स्यापि ध्यान पूजादिकं सर्वं।
षोडशीवत्॥ ॥

विधत्स्व तत्पुतं बिंदुनादयुक्तं
ततः प्रिये। एकाक्षरी महा
विद्या त्रैलोक्यवश्यकारिणी
स्रात्रं दीर्घ ऊकारः॥ ठठान्तेया
महाविद्या त्रैलोक्यमोह का
रिणी। ताराद्येना भवत्येषा
चतुर्वर्ग फलप्रदा॥ मंत्रांत
रं यथा। वज्रवैरोचनीयेच
कूर्चयुग्मस्त फट् ठठः तारा
द्येषा महाविद्या सर्वतेजोप्रदा
यिनी॥ त्रैलोक्याकर्षिणी वि
द्या चतुर्वर्गफलप्रदा। ध्यान
पूजादिकं सर्वं षोडशीवत्स
माचरेत्॥ इदानीं षोडशीवि
द्याप्रशंसामाह। तथा सर्वप्र
यत्नेन सर्वोपास्याच षोडशी
लक्ष्मीविजादिका सैव सर्वैश्व
र्य्यप्रदायिनी॥ लज्जाद्यास्त्वथ भू
ताग योषिदाकर्षिणी परा। कू
र्चाद्या सर्वजंतूनां महापातक
नाशिनी॥ वाग्भवाद्या यदा देवी
वाग्मीशत्व प्रदायिनी। एषात्र
षोडशी विद्या वेद्या समदशाक्षरी
श्रीवीजपुटिता साक्षात् लक्ष्मीरहि
करीसदा। लज्जया पुटिता विद्या
त्रैलोक्याकर्षिणी परा। कूर्चेन पु
टिता सर्वपा॥

पिनी पापहारिणी। वाग्बीज
पुटिता चेता वाग्मीशत्वप्रदा
यिनी॥ चतुर्विधेति विधेया
प्रिये समदशाक्षरी। तारा
द्या षोडशी चान्या भवेत् सप्त
दशाक्षरी॥ एषा विद्या महावि
द्या भुक्ति मुक्तिकरी सदा।
कमला भुवनेशानी कूर्च
बीजं सरस्वती॥ वज्रवैरोच
नीयेच पूर्ववीजानि चोच्चरेत्
फट् स्वाहा च महाविद्या वसु
चंद्राक्षरी परा। ताराद्येकोनविं
शार्णा ब्रह्मविद्या स्वरूपिणी प
ते विद्या त्रमेदेवि भुक्ति मुक्ति प्र
देशुभे॥ लक्ष्म्यादि पुटिता द्
वीरंध्रचंद्राक्षरी भवेत्। चतुर्द्दी
च महाविद्या चतुर्वर्गफलप्र
दा॥ प्रणवाद्या यदा चेषा भो
गमोक्षकरी सदा। विद्यान्तरं प्र
वक्ष्यामि सावधानावधारय।
ह्सौः हस्खा कूर्चं वाग्बीजं वज्रवैरो
चनीयेहूं॥ अस्त्रं स्वाहा। महा
विद्या चतुर्दशाक्षरी मता। स
र्वैश्वर्यप्रदा चेषा सर्वसंमोह
कारिणी॥ भुवनेशीबिंदुतत्त्व
वाग्बीजं प्रणवं ततः। वज्रवैरो
चनीयेच फट् स्वाहा च

तथापरा॥चतुर्दशाक्षरी चै
षाचतुर्वर्गफलप्रदा।एषावि
द्यामहाविद्याजन्ममृत्युविना
शिनी॥तंत्रांतरे।रमाकामस्त
था लज्जावाग्भवंवज्रवैरोचनीये लज्जाहंहं मन्त्रं स्वाहा
समन्वितं॥इयं सा षोडशी
प्रोक्ता सर्वकामफलप्रदा।
कथिताः सकलाविद्याःसा
रात्सारतराःशुभाः॥आसा
मृषिर्भैरवोदेवनाम्नातकोपभू
पतिः।सम्राट्छंदोदेवताच
छिन्नमस्ताप्रकीर्तिता।षड्दी
र्घभाक्स्वरेणैव प्रणवाद्येन
सुंदरि।रवड्गाद्येनवठान्तानि
षडंगानिप्रकल्पयेत्॥नारि
देशादिकं चासां तंत्रात्परतो बुधैः
सुरासुरैः।सकलेषुच व
र्णेषु सकलेषाश्रमेषुच।
श्रुतिमेषुच वर्णेषु भुक्तिमु
क्तिप्रदायिका।प्रणवाद्या
स्त्वयाविद्याःस्मृद्ध्यादीनसमी
रिताः॥अस्यांचैव विद्यायां
येयोषिद्वेत्त समुपासयेत्।
डाकिनीसाभवत्येवडाकिनी
भिःप्रजायते॥पतिहीना पुत्र
हीनायथास्यात्मुत्युसंघयोगिनी॥इ
ति ते कथितं तत्त्वं र ॥

हस्तमखिलंप्रिये॥अतिसेद
नरंगेन भक्त्या दासोस्मितेप्रि
ये।एतासांध्यानपूजादिकंषो
डशीवत्कार्य्यं॥नाभौ शुद्ध
हारविंदं तदुपरिकमलंमंड
लंचण्डरश्मेः संसारस्यैक
कसारां त्रिभुवनजननीं ध
र्मकामोदयाढ्यां।तस्मिन्नम
ध्येत्रिकोणे त्रितयतनुधरां
छिन्नमस्तांप्रशस्तां तां वंदेज्ञा
नरूपां निखिलभयहरां यो
गिनींयोगमुद्रां॥इति छिन्न
मस्ताप्रकरणं।इति तंत्र
सारः ॥

छुट क शि छेदे।क
छोटयति।शि छुटति।अ
च्छुटीत्।इति दुर्गादासः॥
छुप श ञ स्पर्शे।शछु
पति।ञ छोप्ता।इति दु
र्गादासः॥
छुर शि लोपे।शिछुर
ति अच्छुरीत् चुच्छोर।लोप
छेदः।इति दुर्गादासः॥
छुर कि सन्दीपे।सन्दी
पो दीप्तीकरणं।किछोरयति
दीप्तिदीपं लोकः।इति दु
र्गादासः॥

छृद उ न थ इर् देवने॥
दिवि॥वमने।उ छर्दित्वाछ
र्त्वा।न थ छृणत्ति छृन्ते।
इर् अछृदत् अच्छर्दीत्।देव
नं जिगीषेच्छा व्यवहार स्त
ति द्युति क्रीडा गतयः।इति
केचित्।स्वमते न क्रीडन
मेव अन्यथा लिषो ग्रहण
मनर्थकं स्यात्।दिवि दी
प्तौ।इति दुर्गादासः॥
छेद नक छेदे।अचि
च्छेदत्।इति दुर्गादासः।
छो य लवने।लवनं।
छेदः।य छ्यति धान्य लो
कः।इति दुर्गादासः॥
छ्यु उ गत्यां।उ छ्यवते
इति दुर्गादासः॥

ज

जः जकारः। तस्य
ध्यानं यथा।ध्यानमस्याः प्र
वक्ष्यामि शृणुष्व कमलानने नानालंकारसंयुक्तैर्भुजैर्द्वादशभिर्युतां॥वर्णोद्धारत
न्त्रियथा ॥

गीं विचित्राम्बरधारिणीं। त्रि
लोचनां जगद्धात्रीं वरदां भ
क्तवत्सलां॥एवंध्यात्वा ब्रह्म
रूपां तन्मंत्रं दशधा जपेत्।इ
ति वर्णोद्धारतंत्रं॥तस्य पर्य्या
या यथा।जः शिवो वानरः।
मृली भोगदा विजयास्थिरा।
ललदेवो जया जेता धातकी
स्वमुखी विभुः॥लंबोदरीस्मृ
तिः पाता सुप्रभा कर्त्रिका
धरा।दीर्घबाहु रुचि हंसो नंदी
तेजाः सुराधिपः॥जवनो व
सिता वामो मान वातः सदा
त्मकः।हन्मारुतेश्वरो वेगी
चामोदो मदविह्वलः।इतिनाना
तंत्रे॥जगदम्बा स्त्री दुर्गा।यथा
जगदंबापदद्वंद्व मापदां क्षय
साधनं।इति मूलपाणिः ॥
अपिच।विष्णुमायां भगवतीं
दुर्गां दुर्गतिनाशिनीं।प्रकृतिं
जगदंबां च पति पुत्रवतीषु
च इति ब्रह्मवैवर्ते प्रकृतिख
ण्डे ३१ अध्यायः॥
जगदंबिका स्त्री दुर्गा।यथा।
सृष्टि स्थिति विनाशानां वि
धात्री जगदंबिका।अहं सर्वा

न्तरस्याच संसारार्णवतारिणी
इति भगवतीगीतायां ५ अध्या
यः ॥
जगद्धात्री स्त्री दुर्गाविशेषः ॥
तस्याः पूजायाः कालोविधिश्च
यथा। निगमकल्पसारतन्त्रेसा
रस्वतेच "थेदुर्गाकल्पे श्रीशि
वउवाच प्रसीद जगतांमातर्जे
गन्निस्तारकारिणि। अनपवम
हेशानितवाहं शरणंगतः
त्वयायत्कथितं पूर्वं तत्सर्वं
चश्रुतंमया। जगद्धात्रीमहा
दुर्गा चतुर्वर्गफलप्रदा ॥
तस्याः पूजाविधिर्दिने काल
न्नप्रकाशितं। तदेव कथ्यतां.
शान्तिश्चोत लिप्सामि सांप्रत
श्रीदेव्युवाच। कथयामिमहे
शान सावधानावधारय। त
स्याः पूजाविधिर्दिने समयं
भावभेदतः॥ कार्त्तिकेशुक्ल
पक्षेचयादुर्गानवमीतिथिः
साप्रशस्ता महादेव महादुर्गा
प्रपूजने॥ प्रातस्तु सात्विकी
पूजा मध्याह्ने राजसी मता
सायाह्ने तामसी पूजात्रिविधा
परिकीर्त्तिता जपयज्ञादिभिर्दे
व इति मेकालि ॥ ।

कीमता। प्रथमान्त संभव
त्यामि शृणुष्व परमेश्वर।
सप्तम्यादि नवम्यान्तं पूजा
कालमितीरितं॥ त्रिदिने त्रिवि
धा पूजा दशम्यांच विसर्जयेत्।
पूजापरेह्नि देवेशान ज्ञाप्य त्रिवि
सर्जने॥ बोधितायाः प्रकारेण
तत्र पूजा प्रकीर्त्तिता। श्रीशिव
उवाच। त्रिसन्ध्याव्यापिनी सा
तु यदि स्यान्नवमी तिथिः। त्रि
काले त्रिविधा पूजा कथं दे
व्यजगन्मयि॥ कथयस्व महे
शानि इति मे संशयो हृदि।
श्रीदेव्युवाच सा प्रात र्व्यापि
नी यत्र वासरे नवमी तिथिः।
त्रिसंध्यं पूजयेत्तत्र वासरे ज
गदम्बिकां॥ मुहूर्त्तव्यापिनी
वापि तत्र ग्राह्या महेश्वर। ए
ककालेत्रिधा पूजा साधको
नैवकारयेत्॥ इति ते कथितं
वत्स किमन्यत् श्रोतुमिच्छ
सि कथयिष्यामि तत् कान्त
वर्षीत्यां त्रिलोचन॥ श्रीपार्व
त्युवाच दशम्यां बलिदानंतु
निषिद्धं जगदीश्वर। कथं त्रिका
ल पूजा सा संभवेत् परमेश्वर
श्रीशिवउवाच। नवमी तिथि

747

मासृत्य यत्र पूजाविधिर्भवे
त्। निषिद्धं बलिदानन्तु दशम्यां
तत्र शंकरि॥ नवमीदिनमाश्रि
त्य पूजाविधिर्विहितो दिनः दश
म्यां बलिदानन्तु निषिद्धं नात्र पा
र्वति॥ ज्ञानार्णवतन्त्रसारे॥ पूर्ववत्पू
जाप्रकारमुक्त्वा। मुहूर्त्तव्यापि
नीचापिप्रातश्चेन्नवमी तिथिः
तद्दिने पूजनं कार्यं त्रिसन्ध्यं व
रवर्णिनि॥ त्रिकाले पूजयेन्म
न्त्रैनैककाले कदाचन। अथ
कात्यायनीतन्त्रे अष्टसप्तति
पटले। कुम्भराशिगते चेन्द्रे
नवम्यां कार्त्तिकस्य च। उषस
ह्यो दिते भानौ दुर्गा माराध्य
यत्नवान्॥ शुक्लाङ्गरागवल्लेले
भेलोकसाक्षिणमेवच। तां
तिथिं प्राप्य मनुजः शान्तिभो
मद्दिनेयदि॥ प्रपूजयेन्महा
दुर्गां धर्मकामार्थमोक्षदां।
शाक्तिसंगमतन्त्रे। कार्त्तिकस्य
सितेपक्षे नवम्यां जगदीश्वरी।
त्रिकालमेककालं वा वर्षे वर्षे
प्रपूजयेत्॥ निर्माय प्रतिमां
शस्ता जगद्धात्र्या विधानतः
पूजयित्वापरदिने प्रतिमां तां
विसर्जयेत्॥ एवं कृत्वा च कुर्व

ती भवेत् साधकसत्तमः पु
त्रपौत्रधनैश्वर्य्य संयुतास्य
भवेत्पुरी॥ तन्त्रान्तरे कुजवा
रे युगाद्यायां नवम्यान्तु जग
त्प्रसूः। प्रादुर्भूता महेशा
नी तत्रतां परिपूजयेत्॥ त
न्त्रान्तरे। त्रिकालं पूजयेद्दुर्गां
मूलेनैकादरेण च। नाना
रत्नविधानेन गीतवाद्यपुरः
सरः॥ कार्त्तिकस्य सितेपक्षे न
वम्यां च विशेषतः। कृत्वैवं सा
धकश्रेष्ठो लभेद्राज्यमकण्टकं
योगिनीतन्त्रे। कार्त्तिके म
लपक्षेतु नवम्यां च विशेषतः
प्रगल्भेन जगद्धात्रीं पूजये
दीपमालया॥ आगमतत्व
सारे। कार्त्तिके मलपक्षेतु
नवम्यां भूमिवासरे। आविर्भू
ता जगद्धात्री युगादौ देवता
शिनी॥ उत्तरकामाख्यातन्त्रे
कार्त्तिके शुक्लपक्षे तु त्रेतायां
प्रथमेऽहनि। त्रिसन्ध्यं पूजये
द्देवीं दुर्गां संपन्नमहद्वये ॥
कुब्जिकातन्त्रे। कार्त्तिके शु
क्लपक्षेतु नवम्यां जगदम्बि
कां। दुर्गां प्रपूजयेद्यस्तु धर्म
कामार्थसिद्धये॥ दुर्गाक

त्ये विद्योत्पत्तिः। कार्तिकेशु
क्लपक्षे; किं भौमवारे जग
त्प्रसूः। सर्वदेवहितार्थाय
दुर्गमशमनाय च॥ आविरा
सीत् जगद्रूपोऽस्य युगादौ पर
मेश्वरी। व्रतकालविवेकधृत
वचनं। कार्तिके मलपक्षस्य
त्रेतायां नवमेऽहनि। पूजयेत्तां
जगद्धात्रीं सिंहपृष्ठे निषेदुषीं
स्मृतिः। युगाद्या वर्षवृद्धिश्च
सप्तमी पार्वतीप्रिया। रवेरु
दयमीक्षन्ते न तत्र तिथिरु
त्तमा। कृत्यतत्त्वार्णवे। का
र्तिके मलपक्षे तु युगाद्यान
वमी स्मृता। पूर्वाह्नसमये न
त्र पूजा विधिविहिते दिने॥ भवि
ष्यपुराणे कृत्यतत्त्वार्णवयोः
कार्तिके शुक्लपक्षे तु युगाद्या
नवमी स्मृता। पूर्वाह्नसमये
काष्ठाल्मिका परदिने यदि न
त्र पूजादिकं कुर्यात्पिष्टिन्वि
वेपराहते। स्मृतिसागरेका
र्तिकस्य युगाद्यायां महिकामे
श्चियेडमा। इति जगद्धात्री प्र
ताकालव्यवस्था॥ अथ
जगद्धात्रीविद्योत्पत्तिः॥
श्रीपार्वत्युवाच भगवन् प्राण

नाथेश सर्वतत्त्वविशारद। श्रु
त्वा कात्यायनीविद्यासमुत्पत्तिं त्रि
लोचन॥ महादुर्गा जगद्धात्री वि
द्योत्पत्तिर्भवेद्यतः। तत्सर्वं क
हि भगवन् कृपया परमेश्वर॥
यदि न कथ्यते देव विमुञ्चामि
तदाननं॥ श्रीशिव उवाच
शृणु पार्वति वक्ष्यामि रहस्यं
परमाद्भुतं। यत् श्रुत्वा लभ
ते देवि सौभाग्यं सुखमुत्तमं॥
पुरा पुरन्दरमुखाः स्वेश्वरत्वा
भिमानिनः। प्राहुः किमीश्व
रोऽस्मदतिरिक्तः सुरानि
ति। अथ दुर्गा जगन्माता नित्या
चैतन्यरूपिणी। एतेषां धर्म
मेतन्नामिन्द्रादीनां नियन्त्रणं॥
करिष्यामीति निश्चित्य ज्योति
रूपं दधात्मनः। तेषां माविर
भूद्दुर्गा जगद्धात्री जगन्मयी॥
कोटिसूर्यप्रतीकाशं चन्द्रको
टिसमप्रभं। ज्वलत्सत्पर्वतमि
व सर्वलोकभयङ्करं॥ तद्दृ
ष्ट्वा सुराः सर्वे भयमापुर्महा
यसः। किमेतदिति निश्चितेश
क्रोऽस्य भवन् सुराः॥ वायु
माहुः समारुह्य किमेतत्प
रमाद्भुतं। विजानीहि महावीर

मातरिश्वा दिशः पते॥ ततो
वायुरीतं तत्र गत्वा तेजोऽन्ति
कं ततः। तमतिकम्पयायान्त
प्राह तेजोमयीं ततः। बलव
त्कस्त्वमायातो वीर्यं किंचा
स्ति वा त्वयि। आदातुं शक्नुते
सर्वं पृथिवीतलसंभवं॥ इति
प्रश्नकवान् वायुः तृणं तत्रैव
तिष्ठति। आदत्स्वैतत्तृणमि
ति निदधौ वायवे तृणं॥ वायुः
सर्वप्रयत्नेन नादातुं तत्क्षमो
ऽभवत्। ततो देवाः प्राहुरग्निं
भीता उद्विग्नमानसाः॥ अग्ने
एतद्विजानीहि किमेतत्तक
मिचाद्भुतं। इत्युक्तो देवताहेदे
रग्निस्तेजोऽन्तिकं गतः॥ अम।
रो जातवेदा वा तेजो वाग्निरु
वाच तं। स प्रोक्तवानग्निरस्मि
सर्वदाहकशक्तिकः। दहेत
तृणमत्यल्पमिति तस्मै तृणं
ददौ अग्निः सर्वप्रयत्नेन दग्धुं
नैतत्क्षमोऽभवत्। ततो निव
वृते वह्निर्भग्नाशोऽपत्रपान्वि।
एकत्रस्थाः सुराः सर्वे भ्रया
मासुरुत्तमं॥ इयमेवेश्वरीत्युक्त्वे
तेषां मोनेश्वरावयं। इतिनि
श्चित्य स्थिताः सर्वे स्तुष्टुवुः परमे।

श्वरीं॥ प्राहुर्देवगणाः सर्वे
त्वमीशानेश्वरा वयं। ईश्वरत्वा
भिमानेन यदस्माकं समुद्भूतं
तेन मत्तोऽसि नत सर्वकृपया
जगदम्बिके। तव रूपं सुगोप्यं
च मङ्गल्यं सर्वमङ्गले॥ तद्दृष्टुं
यमिच्छामो देहि दर्शनमुत्तमं
इत्युक्ता नान्तर्हिता माविरा
सीच्छिवाम्बरे॥ तेजसोऽन्तर्हि
तेनास्मिन् चमत्कारकलेव
रेऽम्बिकोपरिसृष्टेण सर्वाल
ङ्कारभूषिता॥ चतुर्भुजा महा
देवी रक्ताम्बरधरा शुभा। बाला
र्कसदृशी देहा नागयज्ञोपवी
तिनी॥ त्रिनेत्रा कोटिचन्द्राभा दे
वर्षि मुनि सेविता। दर्शयामा
स देवानामेवं रूपं जगन्मयी॥
ततस्तां सुष्टुवुर्देवा जगद्धात्रीं
महेश्वरीं॥ वरं प्रापुः सुरग
णा युष्मेष्ट त्रिदशालये॥
तस्मै वा तर्हिता देवी महादुर्गा
जगन्मयी। इति ते कथितं भ
द्रे विद्योत्पत्तिं सुदुर्लभां॥
इति कात्यायनीतन्त्रे ३६ पटलः
श्रीशिव उवाच। अथ दुर्गामनुं
वक्ष्ये शृणुष्व हरवल्लभे। य
स्य प्रसादमात्रेण मुच्यते भव

वंधनात् ॥ ध्यात्वर्णासमुद्भूत
वामकर्णविभूषितं। इंद्रविंद्रस
मायुक्तंवीजंपरमदुर्लभं ॥ च
तुर्वर्गप्रदंसाक्षान्महापातक
नाशनं। एकाक्षरीसमाख्याति
विद्यात्रिभुवनेप्रिये कूर्चाद्या
वाजपेद्विद्यांतदंतेवह्निसुंदरी
लज्जाद्यांवाजपेद्विद्याफडंतं
वाजपेत्तथा: ॥ वधूवीजम
न्तांवापिस्वाहान्तांवाजपेत्।
पुन: । लक्ष्म्याद्यांवाजपेद्वि
द्यां चतुर्वर्गफलाप्तये ॥
वाग्भवाद्यांजपेद्वापिप्रणवा
द्यांजपेत् पुन: । कामवीजा
दिकांवापिफडन्तां वा जपे
त्पुन: ॥ अक्षरी विविधावि
द्याकथितावरानना। वि
नांगैर्विनाऋष्यैर्विनाहोम
पुर:सरै: ॥ ध्यानध्यानंविना
देविजपमात्रेणसिद्धिदा म
न्त्रस्यास्यऋषिर्देवीनारद:परि
कीर्त्तित: गायत्रीछन्दआख्या
तंजगद्धात्रीचदेवता। चतुर्वर्ग
प्रदाद्यागासर्वसत्वेषुसंस्थिता
दीर्घस्वरसमायुक्तंनिजवीजानि
पार्वति। विन्यसेद्धात्मनोदेहे
हृदयादिषुपंककरि ॥ एवंन्यासंव
र्णत ॥

पूर्ववत् कर्म चाचरेत्। काली
वदाचरेद्विद्यांजपेद्विद्या मह
र्निशं ॥ लक्षद्वादशकेर्देविपु
रश्चरणमीरितं। यथास्थाने
यथाकालेयथाचारविधान
त: ॥ प्रजपेत् परयाभक्त्या दु
र्गादुर्गतिनाशिनीं। ध्यानमस्या:
प्रवक्ष्यामिश्रृणुष्व नगनंदिनि।
सिंहस्कंधाधिसंरूढां नानाल
कारभूषितां चतुर्भुजांमहादे
वींनागयज्ञोपवीतिनीं। शं
खचक्रधनुर्वाणलोचनत्रित
यान्वितां ॥ रक्तवस्त्रपरीधा
नांवालार्कसदृशीतनुं। नार
दाद्यैर्मुनिगणै:सेवितांभवसु
न्दरीं त्रिवलीवलयोपेतनाभि
नालमृणालिनीं। रत्नद्वीपेमहा
द्वीपेसिंहासनसमन्विते। प्रफु
ल्लकमलारूढांध्यायेत्तांभवगे
हिनीं। एवंध्यात्वाजगद्धात्रीपू
र्वोक्तपूजनंचरेत् ॥ यंत्रमस्या:
प्रवक्ष्यामिश्रृणुष्वहरवल्लभे।
त्रिकोणंत्रितयंचादौ त्रैविन्दु
सहितंतत: ॥ अष्टपत्रं ततोलि
खेच्चिरेखासहितं तत: ॥ व
ज्र भूपुर सयुक्तं विलिखेद्वि
धिनामुना ॥ तत्रतां पूजयेत्।

751

द्देवीं मूलप्रकृतिरूपिणीं। प्र
भाद्या:शक्तय:पूज्याअग्न्याद्ये
र्ष्वकोणके ॥ प्रभामायाजया
सूक्ष्माविशुद्धानंदिनीपुन: ।
सुप्रभाविजयासर्वसिद्धिदान
वशक्तय: ॥ क्रीमाद्या: पूजयेत्ता
स्तुरक्तचंदनदूर्वके: । पांचप
द्मनिधीदेव्यावामदक्षिणयोग
त: पूजयेत् परयाभक्त्यारक्तच
न्दनदूर्वके: । अर्घ्यदानं तत:कु
र्यात् पूजांते नगनंदिनि ॥ अ
गावृति:पुन:पूज्या पत्रकोणे
षुमातर: । वज्राद्यायुधसंयुक्ता
भूपुरे लोकनायका: ॥ इतिका
त्यायनीतंत्रे ७७ पटल: ॥
श्रीशिवउवाच। पूजातिथिवि
शेषेण चतुर्वर्गफलाप्तये। कर्म
णा या तु दुर्गाया स्तां श्रृणुष्व
सुभानने ॥ अष्टम्यांच चतुर्दश्यां
नवम्यांवापियत्नत: । य: पूजये
न्महादुर्गांसोऽभीष्टफलमा ।
प्नुयात्। पौर्णमास्याममायांवा
रविसंक्रमणे तथा। शनिभौ
मदिनेचैव पूजयेत्परमेश्वरीं
सुखं सौभाग्य मारोग्यमैश्व
र्यंलभतेध्रुवं। शनि भौम ।

दिनेचैव यदिस्यादष्टमीतिथि:
तत्रपूज्या जगद्धात्री पुत्रपौत्र
धनप्रदा। सोमवारेप्यमास्या
मघानक्षत्रसंयुता ॥ उत्तरा
सप्तमी शुक्ला आदित्ये हेच
पार्वति। चतुर्थ्यांगारवारेचरो
हिणीसंयुतायदि ॥ शुद्धाष्टम्यां
तथास्वातीयदिस्यात् परमेश्व
रि। एषु पूजामहादेव्या:कर्त
व्यासर्वसिद्धये ॥ मधुमासेसि
ताष्टम्यां वैशाखत्रितये ह
नि। पौर्णमास्यांतथाज्येष्ठेश्र
मायांच महेश्वरि ॥ मिथुने
कैद्वितीयायांश्रावणेद्वाद
श्यांदिने। भाद्रेमासेसिताष्ट
म्यांआश्विनेशुक्लपक्षके ॥
सप्तम्यामेवचाष्टम्यांनवम्यां
चविशेषत: । अमायांकार्त्ति
केचैवनवम्यांशुक्लपक्षके ॥
नक्तंमार्गशिरेभूतेपौषे:ष
म्यांसितेतरे। माघेच सितप
चम्यांफाल्गुणेचमहेश्वरि
पञ्चद्वादशमासेषुतिथिष्वेता
सुपार्वती। पूजयेत् परयाभ
क्त्यायथाविभवविस्तरै: । राजरा
जेश्वरोभूत्वावसेत्कल्पायुतं
दिवि। पुत्रपौत्रधनहीना म

पिपोज्जायते विराट्॥ अनेनैदे
वीश्वरं यान्ति भुक्त्वा भोगान् य
थेप्सितान्॥ श्रीपार्वत्युवाच
देवदेव महादेव विश्वनाथ म
हेश्वर। श्रुतानवमुखांभोजा
दुर्गापूजा महाफला॥ केनवा
पूजिता देवी कस्य वा किंच सि
द्धिति। केन प्रकाशिता मूर्त्ति
स्तन्सर्वं कथय प्रभो। श्रीशि
व उवाच रामरावणयोर्युद्धे दु
र्गा रामेण पूजिता। अवधी
द्रावणं रामश्चैत्रे मासि प्रपूज
नात्॥ तेन लोकाः प्रविष्यन्ति
दुर्गायाः शारदोत्सवं। पद्ममा
राध्य देवेशीमिंद्र जिद्रावणा
त्मजः॥ अभवत् कार्त्तिकेयो
वै दुर्गामेवं समर्चयन्। अमायां
कार्त्तिकेयो वै दुर्गामेवं समर्च्च
यन्। अमायां कार्त्तिके मासि
तारकासुरनाशकः॥ कुंभ
राशिगते चंद्रे नवम्यां का
र्त्तिकस्य च। उवस्यां दिनो भा
नुर्दुर्गामाराध्य यत्नवान्। पूज्या
रोग्यवरं लेभे लोकस्यास्ति च मे
वदामां तिथिं प्राप्य मनुजः शांतिभो मदि
नेयदि मपूजयेन्महादुर्गां धर्मकामार्थमो
क्षदां पूर्वं मार्गशिरे मासि वृषराशिगते वि
धौ

चतुर्दश्यां निशायां तु चेंद्रः सं
पूज्य पार्वतीं। महापापाद्विमु
क्तः सोऽशीशान् भवा पच।
तेन मार्गशिरे मासि चतुर्दश्यां
प्रपूजयेत्। इंद्रत्वमेव मिंद्रो
ऽसौ लेभे दुर्गां समर्च्चयन्॥
ब्रह्मत्व मपि विष्णुत्वं रुद्रत्वं
च महेश्वरि। देवत्वं सर्वदेवा
नां प्रभवच्चण्डिकार्च्चनात्॥
भूतं भव्यं भविष्यत् स्थावरा
णि चराणि च। सर्वं दुर्गाप्रभा
वेन स्वस्वभोग मवाप्नुयुः॥
विना दुर्गां महेशानि न किंचिद्पि
वर्त्तते। इति ते कथितं देवि सं
क्षेपेण तवाग्रतः॥ महादुर्गां ज
गद्धात्रीं विधोत्पत्तिं सदुर्लभं॥
इति कात्यायनीतंत्रे १८ पटलः॥
जंघा स्त्री गुल्फोर्द्ध जान्वधोभा
गः। तत्पर्य्यायः। टंका ३।
टेंकः ४ टंकिका ५। इति श
ब्दरत्नावली॥
जंघाकरिकः पुं जांघि
कः। धावकः। तत्पर्य्या
यः॥ जांघिकः च की २। इतिशब्दर
त्नावली॥
जंघामूले क्ली जंघावेदना। त
त्स्यौषधं यथा। हरी तकी।

शृंगवेरं देवदारुश्च चंदनं। का
थयेत् ज्ञागडुयेन अपामार्गस्य
मूलकं॥ जंघामूल मुरुस्तंभं
सप्तरात्रे न नाशयेत्। इति गा
रुडे १८७ अध्यायः॥
जज युधि। जजति। युधि
योधने। इति दुर्गादासः॥
जञ्ज इ युधि। इ जंज्य
ते। युधि योधने। इति दु
र्गादासः॥
जट संहतौ। जटति
केशाः परस्परं लग्नः स्यादि
त्यर्थः। इति दुर्गादासः॥
जटा स्त्री व्रतिनां शिखा। ल
ग्नकचः। तत्पर्य्यायः। जटिः
३ जटी ४ जटः ५ जुटकं ६ शट
७ कोटीरं ८ जुटकं ९ हस्तं १०
इति शब्दरत्नावली॥ मूलं।
यथा। यदि न समुद्धरति यत
योऽहृदि कामजटादुरपिमो
ऽसतोहृदिगतोऽस्मृतकंठ
मणिः। इति श्रीभागवते श्रुति
स्तवे ८७ अध्यायः॥
जटामांसी स्त्री सुगंधिद्रव्य।
विशेषः। तत्पर्य्यायः। जटा
मांसी २० मिसी २१ मिसिः।
२२ मिसी २३ मिषिका २४ मि

मिषिः २५ इतिशब्दरत्नावली॥
जतु क्ली वृक्षनिर्यासविशेषः
लेपाइति लाइति च भाषा।
तत्पर्य्यायः। जतुकं १३ याव
कः १४ अलक्तकः १५ रक्षः १६
इति शब्दरत्नावली॥ पलंक
षा १७ क्रिमिः १८ वरवर्णिनी १९
इति जटाधरः॥
जतुमणिः पुं त्वद्रोगवि
शेषः। तच्चिकित्सा यथा।
चर्मकीलं जतुमणिं मशकान्
तिलकालकान्। उत्कृत्य श
स्त्रेण दहेत् क्षाराग्निभ्यां मशेष
तः॥ इति भावप्रकाशः॥
जन ई म य उ. जनो।
ई जातः। म जनयति। य
उ. जायते जन्यते। जनिर्ज्ज
न्म। प्रादुर्भावे इति प्रोचः।
प्रादुर्भावः स्फुटीभावः प्र
काशः प्रादुरादिः स्यादित्य
मरः। बीजादंकुरो जायते प
त्रकाण्डादिभेदेन प्रकाशते
इत्यर्थः। प्रादुर्भावो ऽसदुत्
पत्तिरिति केचित्। घटो जा
यते। इति दुर्गादासः॥
जन म लि र जनो। म
जनयति। लि जजंति। र

वैदिकः। इति दुर्गादासः॥
जनार्द्दनः पुं विष्णुः। तन्नाम
व्युत्पत्तिर्यथा। समुद्रान्तवासि
नो जननान्नो नः स्मरात् अर्द्दित
वान् जनार्द्दनः अर्द्द म व धे
अर्द्दक च नेहादित्वादनः।
किं वा जनैर्लोकैरर्थ्यते याच्यते
पुरुषार्थानसौ जनार्द्दनः।
अर्द्द्यात नागतियाचने कर्म
णि अनट्। किं वा जननं जनः
भावे घञ्। जनं जन्म अर्द्दयति
हन्ति भक्तस्य मुक्तिदत्वादिति
जनार्द्दनः। किं वा जनान् लो
कान् अर्द्दति हरस्वरूपेण संहा
रकत्वादिति जनार्द्दनः। किं
वा जनयति उत्पादयति लो
कान् ब्रह्मस्वरूपेण सृष्टिकर्त्तृ
त्वादिति जनः जने अन्यान् प
चाद्यच्। अर्द्दति हन्ति लोकान्।
हरस्वरूपेण संहारकारित्वादिति
अर्द्दनः जनश्चासौ अर्द्दनश्चेति
जनार्द्दनः। किं वा जनान् लो
कान् अर्द्दति गच्छति प्राप्नो
ति रक्षणार्थं पालकत्वादि
ति जनार्द्दनः। इत्यमरटीका
यां भरतः॥ गयायां तस्य
हस्ते जीवितस्य पिण्डदा।

नविधिर्यथा। जनार्द्दनो भस्म
कूटे तस्य हस्ते तु पिण्डदः। आ
त्मनोऽप्यथवान्येषां सव्येनैव
तिलैर्विना॥ जीवतां दधिसंमि
श्रं सर्वे ते विष्णुलोकगाः। य
स्तु पिण्डो मया दत्तस्तव हस्ते
जनार्द्दन॥ स मुक्तिरूपस्तवास्तेय
स्त्वस्मिन् पिण्डे मृते प्रभो। एष
पिण्डो मया दत्तस्तव हस्ते जना
र्द्दन॥ अन्तकाले गते मह्यं त्व
या देयो गयाशिरे। जनार्द्दन
नमस्तुभ्यं नमस्ते पितृमोक्ष
द॥ पितृपात्र नमस्तुभ्यं नम
स्ते पितृरूपिणे। गयायां पि
तृरूपेण स्वयमेव जनार्द्दनः॥
तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च
ऋणत्रयात्। नमस्ते पुण्डरीका
क्ष ऋणत्रयविमोचन॥ लक्ष्मी
कान्त नमस्तेऽस्तु पितृमोक्षप्रदो
भव। वामजानुं च संपात्य नत्वा
भीमो जनार्द्दनं॥ श्राद्धं सपिण्ड
कं कृत्वा आत्मभिर्ब्रह्मलोकभा
क्। पितृभिः सह धर्मात्मा कु
लानां च शतेन च॥ शिलायां
व्यक्तरूपेण व्यक्ताव्यक्तात्म
ना स्थितः। लक्ष्मीशो विष्णु[illegible]सा
र्द्धं तस्माद्देवमयी शिला॥ इति

श्रीवायुपुराणे श्वेतवाराहक
ल्पे गयामाहात्म्ये ४ अध्यायः।
शालग्रामशिलाविशेषः। त
ल्लक्षणं यथा। सशंखचक्राब्ज
गदं जनार्द्दनमिहानमः। उपेन्द्र
गदिनं सावि पद्म शंख नमो
स्तुते॥ इति पाद्मे पाताल
खण्डे ९ अध्यायः॥
जन्म } स्त्री उत्पत्तिः। आ
जन्म } द्यक्षणसंबन्धः। इति ति
तत्वेऽमावस्याप्रकरणे व्याख्या
तं॥ तथा च। अधस्त्वक्षणयो।
गस्य क्षणयोगो जनिर्मता॥
इति सामान्यलक्षणग्रन्थे शि
रोमणिधृत उदयनाचार्यका
रिका॥ मतिजन्मन। अनंतरं।
नाम्नीति म प्रत्यये जन्म मदंत
चाजन्म मदंतमपीत्युणादावि
ति मुकुटः। जन्मे पंच न वस्थिते
कलह रिपु भय मिति ज्यो।
तिषे। इत्यमरटीकायां भरतः
तत्पर्य्यायः। जननं ९ प्रभवः
१० भावः ११ भवः १२ संभवः १३
जनुः १४ प्रजननं १५। इति श
ब्दरत्नावली॥
जातिः १६। इति जटाधरः॥
जन्माष्टमी स्त्री भाद्रकृष्णाष्टमी।

सा च श्रीकृष्णस्य जन्मतिथिः।
तद्व्रतकथा यथा। एकदा श्री
कुलाचार्य्यं वशिष्ठमृषिसत्तमं
राजा दिलीपः पप्रच्छ विनया
वनतः सुधीः॥ दिलीप उवाच।
भाद्रे मास्यसिते पक्षे यस्यां जा
तो जनार्द्दनः। तत्कथां श्रो
तुमिच्छामि कथयस्व महा
मुने॥ कथं वा भगवान् जातः
शंखचक्रगदाधरः। देवकीज
ठरे विष्णुः किं कर्त्तुं केन हेतुना
वशिष्ठ उवाच। शृणु राजन् प्र
वक्ष्यामि यस्माज्जातो जनार्द्दनः
पृथिव्यां त्रिदिवे यत्नाद्भवेत
कथयाम्यहं॥ पुरा वसुंधरा
ऽसीत् कंसाराधनतत्परा।
स्वाधिकारप्रमत्तेन कंसदुष्टेन
ताडिता॥ क्रंदंती लज्जिता सापि
पयोघूर्णितलोचना। यत्र ति
ष्ठति देवेश उमाकान्तो वृषध्व
जः॥ कंसेन ताडिता नाथ इति
तस्मै निवेदितं। बाष्पधारां प्र
वर्षन्तीं विवर्णां भयमानितां
क्रन्दन्तीं तां समालोक्य को
पेन स्फुरिताधरः। उमया
सहितः सर्वैर्देवैर्देवैर्वृतः
आजगाम महादेवो विधातृभ

वंनरुषा। गत्वा चोवाच ब्रह्माणं
कंसध्वंसनिमित्तकं ॥ उपायं
स्रष्टा तां ब्रह्मन् भवता विष्णुना
सह। येष्वरं तद्वचः श्रुत्वा गंतुं
प्राक्रामदात्मभूः॥ क्षीरोदे यत्र
वैकुण्ठः स्वमः समुजगोपरि।
हंसपृष्ठे समारुह्य हरेः रंतिक
मायये॥ तत्र गत्वा हरिं धात्वादे
वहंदे ईशादिभिः। तुष्टाव भग
वान् वाग्भिरर्थ्याभिर्वीरविदा
न्वरः॥ नमः कमलनेत्राय हर
ये परमात्मने। जगतः पालयि
त्रे च लक्ष्मीकांत नमोऽस्तु ते॥
नमः कमलकिंजल्क पीतनि
र्मलवाससे। नमः समस्तदेवा
नामधिपाय महात्मने। नमो ब्र
ह्मण्यदेवाय गोब्राह्मणहिता
य च जगद्धिताय कृष्णाय गोविं
दाय नमो नमः॥ इति तेभ्यः
स्तुतीः कृत्वा प्रत्युवाच जनार्द
नः। देवानम्बुसुतः सर्वे भव
तामागमः कथं॥ ब्रह्मोवाच।
कृपया देव जगन्नाथ यस्मादस्मा
कमागमः। कथयामि सुरश्रेष्ठ
तदहं लोकतारणं॥ भूतिले
त्ववतीर्णः कंसराजोऽसुरः सदा।
व्यथयाताडितानेन पदाघाते।

नम्रुष्टिना॥ वरं दत्वा तदा पृष्टो
मायया स प्रवेचितः। भावि
तेयं विना राज्ञान् शास्ता न
भविता नव॥ तस्मात्कृष्णस्वयं
देवहंतं कंसमसुरं। देवकी
जठरे जन्म लभ गत्वा च गोकु
लं॥ ब्रह्मणा प्रेषितो विष्णुः प्र
त्युवाच पशोः पतिं। पार्वती
देहि देवेश अहं स्थित्वा ग
मिष्यति॥ उमया रमया सार्द्धं शं
खचक्र गदाधरः। उद्दिश्य मथु
रां चके प्रयाणं कंसनाशनं॥
देवकीजठरे जन्म लेभे विष्णु
र्गदाधरः। यशोदाकुक्षिमध्ये त
सर्वाणी मृगलोचना॥ नवमा
सांश्च विश्राम्य कृत्वा नव दिना
धिकान्। भाद्रे मासे सिते पक्षे अ
ष्टमी संज्ञया तिथौ॥ रोहिणी
तारकायुक्ता रजनी घनघोरि
ता। धूमयोनौ तडिद्युक्ते वारि
वर्षति सर्वदा॥ तस्यां जातो ज
गन्नाथः कंसारि वसुदेवजः। वै
राटे नंदपत्नी च यशोदाजीजन
त् सुतां॥ पुत्रं पद्मकरं प
द्मनाभं पद्मदलेक्षणं। र
म्यं चतुर्भुजं शांतं शंख चक्र
गदाधरं॥ तदा कंदितं मा ।

रेभे दृष्ट्वा चानकदुंदुभिः। त
त्रैव वाग्बभूवदेवी देवकीमा
त्रगोचरा॥ पुत्रं दत्वा यशोदा
यै कन्यां तस्याः समानय। कं
सासुरभयान्नेहि उवाच देवकी
तदा॥ वैराटं गच्छ विप्रेंद्र सु
तं प्रत्यर्पितं प्रभो। पुत्रं द
त्वा यशोदायै सुतां तस्याः स
मानय॥ तां दृष्ट्वा कंसराजोपि
सभार्यां न हनिष्यति। तस्या व
चः समाकर्ण्य वसुदेवोऽति
दुःखितः॥ अंके कुमारं मा
दाय वैराटाभिमुखं ययौ॥ य
मुना जलसंस्पर्शेन तत्पथे म
ध्यवर्तिनी॥ अतिस्रोता म
हावीर्या सती देवोऽतिभयाकुला
तां दृष्ट्वा ततटे स्थित्वा यमुनामव
लोकयन् वसुदेवोऽतिदुःखार्त्तो
विलोलचेतनोऽभवत्। किं
करोमि क्व गच्छामि विधिना
त्रापि वंचितः॥ कथमद्यम
मिष्यामि वैराटे नंदमंदिरं। ह
रिणा तत्र समानेदं मायया वंचि
तः पिता॥ तत्क्षणमात्रं तटे स्थि
त्वा यमुनामवलोकयन् तेन
दृष्टा पुनः सापि दीक्षणा जानुव
हाऽभवत्॥ ततः सापि पुरो

दृष्ट्वा धावं तं स्वल्पजंबुकं। क्रो
डे कृत्वा सुतं स्वैरं गंते पारं प्र
चक्रमे॥ तं दृष्ट्वा रुष्ट चित्तं
तं भगवान् यमुनाजले। मा
याकृत्वा जगन्नाथो लोकान्
स पतितः पितुः॥ तं सुतं
पतितं दृष्ट्वा सर्प्याज्जाजीवने
द्विजः। तदा कन्दितु मारेभे
भाले घात्वा करे हृदि॥ वि
धिना वैरिणा सत्रं दुःखितो
ऽहं प्रवंचितः। त्राहि मां जगतां
नाथ पुत्रं देहि सरोजम॥
जनकं कंदितं दृष्ट्वा कंसारिः
कृपया विभुः। जलक्रीडां स
माचर्य पितु रंकेऽवसत्पुनः
पश्चात्तेन द्विजश्रेष्ठो गतवान्त्र
न्दमंदिरं। सुतं दत्वा यशोदा
यै सुतां तस्याः समानयेत्।
सुतामेके तथा सापि गृहीत्वा
नकदुंदुभिः। निजागारं पुनः
प्राप्य प्रत्यर्प्य तां हर्षीसुतां॥
प्रतिपुत्र पदे लोह मासीनप्र
र्वरा हृतः। देवकी च प्रसू
तेति वार्ता प्राप्ता सुरारिणा॥
प्राप्ते तत्र प्रहितो दूतः सुतेन हि
तं सेवया। आगत्य कंसदूतोऽ
सौ सुतां तेन प्रचक्रमे॥ वला

दंकान्तस्माकृष्ण देवकीवसुदे
वयोः। कंसहस्ताद्गृहीत्वा तां कं
सायादर्शयत्पुनः॥ दृष्ट्वा तां
कंसराजोपि सभयोः भूरेरा
सदः। स्फुरत्काचनवर्णाभां
सूर्येन्दुसदृशाननां॥ दृष्ट्वा कं
सो विहस्यंतीं विद्युत्स्फुरित
लोचनां। आदिदेशासुरश्रे
ष्ठांवधानीत्वाशिलोपरि॥
आज्ञांलब्ध्वाः सुरास्तेन नि
क्षेप्तुंतांप्रवर्तिताः। विद्युद्रूप
धरांगौरीजगामखाकुरांतिकं
अंतरीक्षेतत्क्षणंस्थित्वाकंसमो।
वाचशंकरी। त्वांहन्तागोकुले
जातः सर्वशत्रुर्न संशय
तस्मात्तिष्ठजगन्नाथः कंसारिः
सुरकार्यकृत्। क्रीडित्वाबाल
भावेनकंसध्वंसमनोरथौ॥
प्राप्तिमात्रेणतंकंसंजघानज
गदीश्वरः। एतत्तेकथितंरा
जन्कृष्णजन्माष्टमीव्रतं॥
यस्त्वंकुरुतेराजन्यश्चनारीह
रेर्व्रतं। प्राप्नोत्यैश्वर्यमतुल
मिहलोके यथेप्सितं॥ अ
न्तकालेहरेः स्थानंदुर्लभंच
गमिष्यति। एकेनैवोपवासे
नकृतेनकुरुनंदन॥ सप्तजन्म

कृतात्पापान्मुच्यते नात्र संश
यः। वत्सरद्वादशेचैव यत्
पुण्यंसमुपार्जितं॥ विफलंत
द्भवेत्सर्वं पुराख्यानेन भाषि
तं। नदृष्टंयैस्तंतेनैषांनराणां
नचयोषितां॥ जयंतीनकृतायै
स्तु जागरादिसमन्विता। स्या
न् श्वेतेन विज्ञेया जयंती।
विमुखो नराः॥ योषितश्चन
सन्देहः सप्तमे नवसत्वते॥
इतिभविष्यपुराणे वशिष्ठदिली
पसंवादे श्रीकृष्णजन्माष्टमी
व्रतकथा समाप्ता॥

जप व्यक्तायां वाचि।
जिव्होष्ठादिव्यापाररहितं शा
स्त्रार्थयोस्त्रितंनव्यक्तोच्चारः। ज
पति मंत्रं साधकः। इति दुर्गा
दासः॥

जपः पुं विधानेन मंत्रोच्चारणं।
तद्विधिर्यथा। नोच्चैर्जपंच संकु
र्यात् रहः कुर्यान्नदन्तद्विजः।
समाहितमना तूष्णीं मनसा
वपि चिन्तयेत्॥ विधियज्ञात्
जपयज्ञो विशिष्टो दशभिर्गुणैः।
उपांशुः स्याच्छतगुणः साह
स्रो मानसः स्मृतः। वि
ना दर्भैस्तु यत् स्वा ॥

न्यच्चदानंविनोदकं। अ
संख्येयेन यज्जप्तं सर्वं त
दफलंस्मृतं॥ मुक्ताफलैर्वि
द्रुमेण रुद्राक्षैः स्फटिकेन
वा। गणनासर्वथाकार्या
सम्यगंगुल्यस्थिभिः हिरण्य
रत्नमणिभिर्जप्यं शतगुणं
भवेत्। सहस्रगुणमिंद्राक्षैः
पद्माक्षैरयुतंभवेत्॥ नियुतं
वापिरुद्राक्षैर्भद्राक्षैस्तनसं
प्रायः पुत्रजीवकजप्यस्यप
रिसंख्या न विद्यते॥ दशभि
र्जन्मजनितं शतेनचपुरा
कृतं। त्रियुगंतसहस्रेण।
गायत्र्याहन्तिदुष्कृतं दर्भह
स्तस्तथासीनोदर्भेषुस्वकपा
णिना। प्राङ्मुखोवर्त्तयेत्
मालांसहस्रंशतमेववा॥
इत्याद्येवह्निपुराणे नित्या
ह्निकस्नानविधिनामाध्यायः
जपा स्त्री जवापुष्पवृक्षः।
तस्यपर्य्यायगुणाः ओड्रपुष्पं
जपावाद्यात्रिसंध्यासारुणाग्नि
ता। जपासंग्राहिणीकेश्यात्रि
संध्याकफवातजित्। इतिभा
वप्रकाशः॥
जन ३ क नशि। नशीति।

अन्तर्भूतण्यर्थत्वात्सृष्टीकरणे।
इक जनयति पापंगंगा इतिदु
र्गादासः॥
जभ जभने। जभनं मैथुनं।
जभति युवा। इति दुर्गादा
सः॥
जभ इ जभने। जभनं मै
थुने। इ जंभ्यते। इति दु
र्गादासः॥
जभ उ जभे। जृम्भोगा
त्रशैथिल्यमिति गोविंदभ
ट्टः। उ जम्भतेलोकः। नु
णजभोः चौरस्येवमुणआ
त्मनेपदप्रकरणे सूत्रविधा
नसामर्थ्यात्। इतिदुर्गादासः
जभ इ उ जृम्भ। इ ज
म्भ्यते। उ जम्भते। प्रत्यूष
काले भुजंगांगनानांमुखे
षु कामः प्रतिजृम्भतीव। इ
तिगणकृतानित्यत्वात्। इ
ति दुर्गादासः॥
जम उ अदे। उ जमित्वा
जान्त्वा। इतिदुर्गादासः॥
जम्बीरः पुं फलवृक्षविशेषः
जामीर इति लेबु इति च
भाषा। तत्पर्य्यायः दन्तशठ
णः १ गंभीरः॥ जंबिरः २८

न्तकर्षणः १३। इतिशब्दरत्नाव
ली॥ रेवतः १४ वक्रशीर्षी १५
दैतहर्षकः १६। इति जटाधरः
तस्य गुणाः। जंवीरं मस्सं गु
र्वम्लं वातश्लेष्म विबन्धनुत्
शूलकासकफक्लेशच्छर्द्दित्
ष्णामदोषजित्॥ आस्यवैर
स्यहृत्पीडा वह्निमान्द्य कृ
मीन् हरेत्। स्वल्पजंवीरि
कातद्वत् तस्माच्छर्द्दिनिवारि
णी इतिभावप्रकाशः॥
जंभगः पुं राक्षसविशेषः
यथा। देवा यक्षा स्तथा नागा
गंधर्वाप्सरसोऽसुराः। क्रूरा
सर्पाः सुपर्णाश्च तरवो जंब
गाः खगाः॥ विद्याधरा जल
धारास्तथैवाकाशगामिनः
निराहाराश्च ये जीवाः पापे
धर्म्मे रताश्च ये॥ तेषामाप्या
यनायैतद्दीयते सलिलं म
या। इत्याह्निकाचारतत्वधृ
तपद्मपुराणवचनं॥
जयंतः पुं षोडशाक्षरकां
गीतध्रुवकविशेषः। तस्य
लक्षणं यथा। आदितालेन
यतः स्यात्शृंगाररसस्य यु
तो रुद्रसंख्योत्तरपदयापुर्हहि
करःपदं॥

इति संगीतदामोदरः॥
जयमंगलः पुं ध्रुवविशेषः
यथा। चतुर्विंशतिवर्णैश्चि
कथितो जयमंगलः। शृंगार
वीरयोरेव तालेचाचपुटेच।
सः॥ इति संगीतदामोदरः॥
औषधविशेषः। यथा। हिं
गुलसंभवं सूतं गंधकं टंक
णं यथा। ताम्रवंगं माक्षिकं
च सैंधवं मरिचं तथा॥ समं
सर्वं समाहृत्य द्विगुणं स्वर्ण
भस्मकं। तदर्द्धं कांतलोहं च
रूप्यभस्मापि तत्समं॥ तत्
समं पारदसमं॥ एतत्सर्वं
विचूर्ण्याथ भावयेत् कनक
द्रवैः। शेफालीदलजैश्चा
पि दशमूलरसेन च। किरा
ततिक्तककाथैस्त्रिवारं भाव
येत् सुधीः भावयित्वा ततस्त
कार्य्या गुंजाद्वयमिता वटी।
अनुपानं प्रयोक्तव्यं जीरकं म
धुसंयुतं। जीर्णज्वरं महाघोरं
चिरकालसमुद्भवं॥ ज्वरम
ष्टविधं हंति साध्यासाध्यमथा
पि वा। पृथग्दोषांश्च विविधान्
समस्तान् विषमज्वरान् मे
दोगतं मांसगतमस्थिमज्जगतं त

था। अंतर्गतं महाघोरं बहिस्थं
च विशेषतः॥ नानादेशोद्भवं
चैव ज्वरं शुक्रगतं तथा। निखि
लं ज्वरनामानं हंति श्रीशिव।
प्रासनात्॥ जयमंगलनामा
यं रसः श्रीशिवनिर्म्मितः। ब
लपुष्टिकरश्चैव सर्वरोगनिब
र्हणः। श्रीजयमंगलो रसः।
इति भैषज्यरत्नावली॥
जरद्गवः पुं गृध्रपतिविशेषः
यथा। अज्ञातकुलशीलस्य वा
सो देयो न कस्यचित्। मार्जार
स्य हि दोषेण हतो गृध्रो जर
द्गवः॥ इति हितोपदेशे मित्र
लाभपरिच्छेदः॥ जरा स्त्री वार्द्ध
कं। जीर्य्यत्यनया जरा जॄष वयो
हानौ षित्वात् अङ् स्त्रियामिति
गुणः। इत्यमरटीकायां भरतः।
तस्यौषधं यथा। पलाशचूर्णं।
समधुगव्याज्यामलकाविनं स
मधुगव्याज्यामलकान्वितं। स
विडंगपीतमाज्येनकर्षान्नरा
मतिं॥ मासैकेन महा देवज
रामरण वर्जितः। पलाशबीज
सहितं तिल मधुविनं समं।
समाहृ भक्तिनं रुद्रजरांतय
ति संशयं॥ इति।

गारुडे १९६ अध्यायः॥
अपि च। अश्वत्थीकृतभृंगरज
स चूर्णं तिलार्द्धकं चामल
कार्द्धकं च। सशर्करं भक्षय
ते शुद्धेवीन तस्य रोगा न जरा
न मृत्युः॥ अधःपपेपङ्कम
नरहितो मत्तमातंगगामी
मूकोवाग्मी श्रवणरहितो
दूरशब्दानुसारी। नीहं मर्त्यो
भवति पलितो नीलजीमूत
तकेशो जीर्णदंताः पुनर
पि नवाः क्षीरगौरा भवंति॥
इति भृंगराजादिचूर्णं। इति
भैषज्यरत्नावली॥
जर्च्छ श उक्तौ॥ भर्त्से।
श जर्च्छती जर्च्छंती। गुणास्या
नरहितानां तदादिपाठफ
लं तु शत्रंतानां आदीपो वि
तिनुणो विभाषा वेदे इत्या
रणभेदश्च। भर्त्स तर्जनं॥
इति दुर्गादासः॥
जर्ज्ज श भर्त्सकोः॥ श
जर्ज्जती जर्ज्जंती। भर्त्स।
तर्जनं। इति दुर्गादासः॥
जर्झ श वाग्भर्त्सयोः।
श जर्झती जर्झंती। भर्त्स
तर्जनं। इति दुर्गादासः॥

जर्फ श भर्त्सने ॥
श जर्फती जर्फन्ती । भर्त्स
स्तर्जनं । इति दुर्गादासः ॥
जर्ल्स कर्के ॥ रवे । रेफ यु
क्तः दन्त्यवर्गाद्योपधः । ज
ल्सति । कर्को भर्त्सन मकिष्ठ
इति दुर्गादासः ॥
जल क पिधाने । पिधान
माच्छादनं । क जालयति ।
चेदं मेघः । इति दुर्गादासः ।
जल ज धान्ये । ज जा
लः जलः । धीयते अने
नेति धानं तस्य भावः धान्यं
जीवनोपयोगिक्रिया । ज
लति लोकान् जलं । जीव ।
यतीत्यर्थः । धीयते आच्छा
द्यते अनेनेति धानं तस्य भा
वः धान्यं आच्छादनक्रिया
जलति जालेन मत्स्यान् ।
जालिक इति वा । गोविंदभ
ट्टस्तु धनस्य भावः धान्यम
स्ति: जलति धनी समृद्धः
स्यादित्यर्थ इत्याह । इति दुर्गा
दासः ॥ जलं क्ली पानीयं । त
स्य वेदोक्तपर्यायाः । अर्णः
१ क्षोदः २ क्षद्म ३ नभः ४ अंभः
५ कबंधः ६ सलिलं ७ वाः ८ व

नं ९ घृतं १० मधु ११ पुरीषं १२
पिप्पलं १३ क्षीरं १४ विषं १५
रेतः १६ कशः १७ जन्म १८
वृबूकं १९ बुसं २० तुग्र्या २१
वर्बुरं २२ सुक्षेम २३ धरुणं २४
सुरा २५ अरविंदानि २६ ध्वस्म
न्वत २७ जामि २८ आयुधानि २९
क्षपः ३० अहिः ३१ अक्षरं ३२
स्रोतः ३३ तृप्तिः ३४ रसः ३५
उदकं ३६ पयः ३७ सरः ३८ भे
षजं ३९ सहः ४० शवः ४१
यहः ४२ ओजः ४३ सुखं ४४ क्ष
त्रं ४५ आवयाः ४६ शुभं ४७
यादुः ४८ भूतं ४९ भुवनं ५०
भविष्यत् ५१ आपः ५२ महत् ५३
व्योम ५४ यशः ५५ महः ५६
स्वर्णीकं ५७ स्वृतीकं ५८ सतीनं
५९ गहनं ६० गभीरं ६१ गम्भरं
६२ ईं ६३ अन्नं ६४ हविः ६५
सद्म ६६ सदनं ६७ ऋतं ६८ यो
निः ६९ ऋतस्य योनिः ७० सत्यं
७१ नीरं ७२ रयिः ७३ सत् ७४
पूर्णं ७५ सर्वं ७६ अक्षितं ७७
बर्हिः ७८ नाम ७९ सर्पिः ८०
अपः ८१ पवित्रं ८२ अमृतं ८३
इंदुः ८४ हेम ८५ स्वः ८६ स
र्गाः ८७ शंबरं ८८ अभ्वं ८९

भैः

वपुः ९० अंबु ९१ तोयं ९२
तूयं ९३ कृपीटं ९४ शुक्रं ९५
तेजः ९६ स्वधा ९७ वारि ९८
जलं ९९ जलाषं १०० । इदमि
त्येकशत मुदकनामानि । इति
वेदनिघण्टौ १ अध्यायः ॥
अस्य गुणाः । पानीयं श्रमना
शनं क्लमहरं मूर्च्छा पिपासाप
हं तंद्राच्छर्दिविनाशनं बलक
रं निद्राहरं तर्पणं । हृद्यं गुप्त
रसं ह्यजीर्णशमकं । नित्यं
हितं शीतलं लघ्वच्छं रसका
रणं निगदितं पीयूषवज्जीव
नं ॥ अथ तस्य भेदाः । पा
नीयं मुनिभिः प्रोक्तं दिव्यं भौ
ममिति द्विधा । दिव्यं चतुर्विधं
प्रोक्तं धाराजं करकाभवं ॥
तौषारं च तथा हैमं तेषु धा
रं गुणाधिकं । तत्र धारस्य
लक्षणं गुणाश्च । धाराभिः प
तितं तोयं गृहीतं स्फीतवास
सा । शिलायां वा सुधायां वा
धौतायां पतितं च यत् ॥ सौ
वर्णे राजते ताम्रे स्फाटिके का
चनिर्मिते । भाजने मृन्मये वा
पि स्थापितं धार मुच्यते ॥
धारनीरं त्रिदोषघ्नं ॥

मनिर्देश्यरसं लघु । सौम्यं र
सायनं बल्यं तर्पणं ह्लादि जी
वनं ॥ पाचनं मतिकृन्मूर्च्छा
तंद्रा दाह श्रम क्लमान् तृष्णां
हरति तत्पथ्यं विशेषात् प्रावृ
षि स्मृतं ॥ अथ धाराजलस्य
भेदौ । धाराजलं च द्विविधं
गांगं सामुद्र भेदतः । तत्र
गांगं सामुद्रयो र्लक्षणं गु
णाश्च । आकाशगंगासंबंधि
जलमादाय दिग्गजाः । मेघै
रंतरिताः वृष्टीः कुर्वंतीति वचः
समं ॥ गांगमाश्वयुजे मासि
प्रायो वर्षति वारिदः । सर्वथा
तज्जलं देयं तत्पथ्यं चरके वचः ।
स्थापितं हैमजे पात्रे राजते मृ
न्मयेऽपि वा । शाल्यन्नं येन सं
सिक्तं भवेदक्लेदिवर्णवत् ॥
तद्गांगं सर्वदोषघ्नं ज्ञेयं सामु
द्रमन्यथा । तत्र सक्षार लव
णं शुक्र दृष्टि बलापहं ॥ वि
स्रं च दोषलं तीक्ष्णं सर्वकर्मसु
गर्हितं । सामुद्रं त्वाश्विने मासि
गुणैर्गांगवदादिशेत् ॥ यतो
गस्त्यस्य दिव्यर्षेरुदयात् सक
लं जलं । निर्मलं निर्विषं स्वादु
शुक्लं स्यादोषलं ॥ अत

प्रवाह। फूत्कारविषवातेन ना
गानां व्योमचारिणां। वर्षास्तस्
विषं तोयं दिव्यमप्याश्विनं विना
अथानार्तवजलगुणाः। अ
नार्तवं प्रमुञ्चन्ति वारि वारिध
रास्तु यत्। तत्त्रिदोषाय सर्वे
षां देहिनां परिकीर्तितं॥
अनार्तवं पौषादिमासचतु
ष्टयविषयं॥ अथ करक
जलस्य लक्षणं गुणाश्च।
दिव्यवाय्वग्निसंयोगात् संह
ताः खात् पतन्ति याः। पाषा
णखण्डवच्चापस्ताः कारका
स्ततोपमाः। करकाजं जलं रूक्षं
विशदं गुरु च स्थिरं। दारुणं शी
तलं सान्द्रं पित्तहृत् कफवात
कृत्॥ अथ तौषारजल ल
क्षणं गुणाश्च। अपि नद्याः स
मुद्रान्ते वह्निरापश्च तद्भवाः
धूमावयवनिर्मुक्तो स्तुषारा।
ख्यास्तुताः स्मृताः॥ अपि नद्याः
समुद्रान्ते वह्निः। नदीमारभ्य
समुद्रपर्यन्तं वह्निरास्ते।
तद्भवाः वह्निभवाः। धूमावय
वनिर्मुक्ताः धूमांशरहिताः अ
पत्तुषाराख्याः। तत् इति लोके व
र्त्तते च। अपथ्याः प्राणिनां प्रा

यो भूरुहाणां न तां हिताः। त
यारं तु हिमं रूक्षं स्याद्वातल
मपित्तलं॥ कफोरुस्तम्भकण्ठा
ग्निमेहो गण्डादिरोगणुत्।
अथ हैमजलस्य लक्षणं गुणा
श्च। हिमवच्छिखरादिभ्यो द्र
वीभूयाभिवर्षति। यत्तदेव हि
मं हैमं जलमाहुर्मनीषिणः।
हिमांबु शीतलं पित्तघ्नं गुरु वात
विवर्द्धनं। हैमं जलं कुहैमजलं
ग्रीष्मे न। और्वानलधूमेरितम
स्तु समुद्रस्याघनीभूतं। पव
नानीतमुदीच्यां न हिममिति
कथ्यते मुनिभिः। हिमं कुह
स इति लोके। हिमं तु शीतलं
रूक्षं दारुणं सूक्ष्ममित्यपि न
तद्दृष्टं येन वाते न च पित्ते न
वा कफे॥ अथ भौमं जलं
तद्भेदाश्च। भौममम्भो निग
दितं प्रथमं त्रिविधं बुधैः॥
जाङ्गलं पारमानूपं ततः साधार
णं क्रमात्॥ तेषां लक्षणानि
गुणाश्च। अल्पोदकोऽल्पवृक्ष
श्च पित्तरक्तामयान्वितः। ज्ञात
व्यो जाङ्गलो देशस्तत्रत्यं जाङ्गलं
जलं॥ बह्वम्बुर्बहुवृक्षश्च वात
श्लेष्मामयान्वितः। देशोऽनूप

765

इति ख्यातस्त्वानूपं तद्भवं ज
लं॥ मिश्रचिह्नस्तु यो देशः स
हि साधारणः स्मृतः। तस्मिन्दे
शे यदुदकं तत्तु साधारणं स्मृ
तं॥ जाङ्गलं सलिलं रूक्षं लव
णं लघु तन्मनु। वह्निकृत्तक।
फलत्पथ्यं विकारान्हरते ब
हून्॥ आनूपं वार्यभिष्यन्दि स्वा
दु स्निग्धं घनं गुरु। साधारणं
तु मधुरं दीपनं शीतलं लघु॥
तर्पणं रोचनं तृष्णादाहदोषत्र
यप्रणुत्। अथ भौमानामेव
नादेयादीनां लक्षणानि गुणा
श्च। तत्र नादेयस्य लक्षणं गु
णाश्च। नद्या नदस्य वा नीरं ना
देयमिति कीर्तितं। नादेयमु
दकं रूक्षं वातलं लघु दीपनं।
अनभिष्यन्दि विशदं कटुकं क
फपित्तनुत्। नद्यः शीघ्रवहा ल
घ्वः सर्वा याश्चामलोदकाः॥
गुर्व्यः शैवालसंछन्ना मन्दगाः
कलुषाश्च याः। नदीस्वरूपस्तडाग
स्येत्कूप प्रस्रवणादिजे॥ उद
के देशभेदेन गुणान्दोषांश्च
लक्षयेत्। अथौद्भिदस्य लक्षणं
गुणाश्च। विदार्य भूमिं निम्ना
यन्मस्त्या धारया स्रवेत्।

तत्तोयमौद्भिदं नाम वदन्ती
ति महर्षयः॥ औद्भिदं वारि पि
त्तघ्नमविदाह्यतिशीतलं। प्री
णनं मधुरं बल्यमीषद्वातक
रं लघु॥ अथ नैर्झरस्य ल
क्षणं गुणाश्च। शैलसानुस्रव
द्वारि प्रवाहो निर्झरो झरः। स
तत्र स्रवणमप्यापि तत्तमं नै
र्झरं जलं॥ नैर्झरं रुचिकृत्तीरं
कफघ्नं दीपनं लघु। मधुरं क
टुकं पाके वातलं स्यादपित्तलं।
अथ सारसस्य लक्षणं गुणाश्च
नद्याः शैलचराच्छिन्नो यत्र सं
स्त्यम्य तिष्ठति। तत्सारोज
जलछन्नं तदम्भः सारसं स्मृतं॥
सारसं सलिलं बल्यं तृष्णाघ्नं
मधुरं लघु। रोचनं तुवरं रूक्षं
बद्धमूत्रमलं स्मृतं॥ अथ ता
डागस्य लक्षणं गुणाश्च। प्रश
स्तभूमिभागस्थो बहुसंवत्
सरोषितः जलाशयस्तडा
गः स्यात्ताडागं तज्जलं स्मृतं।
ताडागं मधुरं स्वादु कषायं
कटुपाकि च। वातलं बद्धविण्मू
त्रमसृक्पित्तकफापहं॥ अ
थ वाप्यस्य लक्षणं गुणा
श्च। पाषाणैरिष्टकाभि

वी वहद्रूपा हद्दमरा। ससोपा
ना भवेद्वापी तज्जलंवाप्यमुच्य
ते॥ वाप्यंवारियदि क्षारं पित्त
कृत् कफ वातहृत्। तदे
व मिष्टं कफकृत् वात पित्त
हरंभवेत्॥ अथ कौपस्यल
क्षणं गुणाश्च। भूमौ खातो
ऽल्पविस्तारो गंभीरो मंडला
कृतिः। बद्धो ऽबद्धः सरूपः स्या
त्तदंभः कौपमुच्यते॥ कौपंप
योयदि स्वादु त्रिदोषघ्नंहितं
लघु। तत्क्षारंकफवातघ्नं
दीपनं कफकृत्परं॥ अथ
चौञ्ज्यलक्षणं गुणाश्च। शि
लाकीर्णंस्वयंश्वभ्रंनीलांजन
समोदकं। लताविताननसं
छन्नंचौञ्ज्यं मित्यभिधीयते अ
थमादिभिरवद्धंयत्तत्चौञ्ज्यमि
तिचापरे। तत्रत्यमुदकं चौ
ञ्ज्यमितिभिः समुदाहृतं चौ
ञ्ज्यंवह्निकरंनीरंरूक्षंकफहृ
ल्लघु। मधुरंपित्तहृद्रुच्यं
पाचनंविशदंस्मृतं॥ अथ
पाल्वलस्यलक्षणंगुणाश्च
अल्पंसरःपल्वलंस्यात्यत्रचंद्र
र्करश्मयो। नतिष्ठतिजलंकिंचि
त्तत्समंवानिपाल्वलं पाल्वलंवार्य

भिष्यंदिगुरु स्वादु त्रिदोषकृत्।
अथ विकिरस्य जलस्य लक्ष
णं गुणाश्च। नद्यादिनिकटेभू
मिर्या भवेद्वालुकामयी। उद्धा
ट्यते ततोयत्र तज्जलं विकिरं
विदुः॥ विकिरं शीतलंस्वच्छं
निर्दोषंलघु वतस्मृतं। तव
रंस्वादु पित्तघ्नं क्षारं तत् पि
त्तलं मनाक्॥ अथ केदार
स्य लक्षणं गुणाश्च। केदारेवृ
ष्टिबद्धंकेदारं तज्जलं स्मृतं
केदारं वार्यभिष्यंदि मधुरं
गुरु दोषकृत्॥ अथह्रदज
लस्य लक्षणं गुणाश्च। वा
र्धिकंनदहृद्दिष्टभूमिष्वमहि
तंजलं। विराज्ञमुषितं ततस्य
स्तत्र सरस्तोपमं॥ अथ हेमंता
दिकालविशेषे विहितोजल
विशेषः। हेमंते सारसं तोयं
ताडागंवाहितं स्मृतं। हेमंते
सारसंतोयंताडागंवाहितंस्मृ
तं हेमंते विहितंतोयंशिशिरे
ऽपिप्रशस्यते॥ वसंत ग्रीष्मयोः
कौपं॥ विषवहनहृत्ताणां
प्रश्रावे हृषिते यतः॥
ज्ञेज्ञिदं वान्तरीदवा. कौपं
वाप्यंवानैर्झरंजलं। नदेयंवारिनादेयंवसं
ग्रीष्मयोर्द्वयेः॥२४

767

वाप्याह्वषिस्मृतं॥ शास्त्रेशारदिना
देयं नीरमंशूदकं परं। दिवा
दिवारविकरैर्जुष्टंनिशिशीतक
रांशुभिः। ज्ञेयमंशूदकंनाम
स्निग्धंदोषत्रयापहं। अनभि
ष्यंदि निर्दोषमान्तरीक्षज
लोपमं॥ बल्यं रसायनंमेध्यं
शीतंलघुसुधासमं। रविक
रैर्जुष्टमिन्दुके दिवापदेसम
स्तदिवसपाश्यर्थं। शीत
कराङ्शुभिर्जुष्टमिन्दुके नि
शीतिपदंसमस्तरात्रिप्राश्य
र्थे॥ अन्यच्च। शारदिस्वच्छमर
यादगस्त्यस्याखिलंहितं॥ हद
सङ्कृतत्व। पौषे वारि सरो
जातं माघे जलं तडागजं।
फाल्गुणे कूपसंभूतंचैत्रेचौ
ञ्ज्यंहितमतं॥ वैशाखेनैर्झरं
नीरंज्येष्टेशास्तंतथोद्भिदं। आ
षाढे शस्यते कौपंश्रावणे
दिव्य मेव च॥ भाद्रेकौपंप
यःशस्तमाश्विनेचौञ्ज्य मेवच
कार्तिके मार्गशीर्षेच जलमा
त्रंप्रशस्यते॥ अथ जलस्य
ग्रहणकालः। भौमानाममं
भसांप्रायो ग्रहणंप्रात विष्यते
शीतत्वं निर्मलत्वंच यतः

स्तेषांमहान्गुणः॥ अथज
लस्य पाने विधिः अत्यंबुपा
नान्न विपच्यते ऽन्न मनंबुपा
नाच्चसएव दोषः। तस्मान्नरोव
ह्निविवर्द्धनाय मुहुर्मुहुर्वारि
पिबेदभूरि॥ अथ शीतलज
लपानस्य विषयाः। मूर्छापि
त्तोष्णदाहेषु विषे रक्ते मदात्य
ये। श्रमे भ्रमे विदग्धे ऽन्ने तम
के वमथौ तथा॥ ऊर्ध्वगेरक्त
पित्तेच शीतमंभः प्रशस्यते।
अथ तन्निषेधः। पार्श्वशूलेप
तिश्याये वातरोगेगलग्रहे।
अध्माने स्तिमितेकोष्ठे सद्यः
शुद्धौ नवज्वरे॥ अरुचि ग्रह
णी गुल्मश्वास कासेषु वि
द्रधौ। हिक्कायां स्नेहपानेच
शीतांबु परिवर्जयेत्॥
अथाल्पजलपानस्य विषयाः
अरोचके प्रतिश्याये मंदे ऽ
ग्नौ श्वयथौ क्षये। मुखप्रसेके
जठरे कुष्टे नेत्रामये ज्वरे॥
व्रणेच मधुमेहेच पिबेत् पा
नीय मल्पकं॥ अथ जल
पानस्यावश्यकता। जीवा
नां जीवनं जीवो जगत् स
र्वंतु तन्मयं। अतो ऽत्यन्त।

तयास्तत्तोन क्वचित् वारि वार्य्य
ते॥ हारीतश्च। तस्मा गरीयसी
घोरा सद्यः प्राणविनाशिनी
तस्माद्देयं तृषार्त्ताय पानीयं
प्राणधारणं॥ तृषितो मोह
मायाति मोहात् प्राणान् विमु
चति। अतः सर्वास्ववस्थासु न
क्वचित् वारि वारयेत्॥ अथ
प्रशस्तजलं। अथापथ्यमातुर
संस्पर्शीतं तर्षनाशनं। अच्छं
लघु च हृद्यं च तोयं गुणवदुच्य
ते॥ अथ निंदितं जलं। पि
च्छिलं कृमिलं क्लिन्नं पर्णशे
वालकर्दमैः। विवर्ण्णं विरसं
सांद्रं दुर्गंधं न हितं जलं॥
कलुषं छन्नमभोजपर्णनीलि
तृणादिभिः। दुर्देशजमसं
सृष्टं सौर चांद्रमसांशुभिः॥
अनार्त्तवं वार्षिकमपि प्रथमं
तच्च भूमिगं। व्यापन्नं परिह
रेत् सर्वदोषप्रकोपणं॥ तत्र
कुर्यात् स्नानपानाभ्यां तृष्णा
ध्मानोदरज्वरान्। कासाग्निमा
न्द्याभिस्यन्दि कण्डु गण्डादिकं
तथा॥ अथ दुष्टजलस्यापि
दोषीकरणोपायः। निंदितं
चापि पानीयं क्वथितं सूर्य्यता

पितं। सुवर्णरजतं लोह पाषाण
सिकतास्वदं॥ अंशुसंताप
निर्वाप्य समथा स्थापितं तथा
कर्पूरजातिपुन्नाग पाटलादि
सुवासितं॥ शुचि सान्द्रपट
स्रावैः तदजेन विवर्जितं।
स्वच्छं कनकमुक्ताद्यैः शुद्धं
स्याद्दोषवर्जितं॥ पर्णमूलवि
सग्रन्थि मुक्ताकनकशैवलैः
गोमेदेन च वस्त्रेण कुर्यादं
बुप्रसादनं॥ अथ पीतस्य
जलस्य पाकावधिः। आमं
जलं जीर्यति याममात्रेण तदर्द्ध
मात्रेण तु शीतलं च। तदर्द्धमा
त्रं तु तप्तं तेक हस्तं पयः प्रपाके
वपिरेपडकः। इति भावप्र
काशे वारिवर्गः॥ अथ जले
भगवत्स्नानविधिः। उष्णोदः
कीर्ष्णतोजाते शीतलेन स
गंधिना। जलेन पूरिते पात्रे
श्रीकृष्णमुपवेशयेत्॥ नित्या
सीचितिना अभ्यर्च्य स्नापयेत्तथा
स्नुपाद्यश्च। देवं सिंहासने नी
त्वा गंधादिभिः रुपार्च्चयेत्॥
नीराज्य देवं सर्वेभ्यो दत्वा नी
र्थं भजेत स्वयं। द्वादश्यां तु वि
शेषेण रात्रौ तोयस्य मर्द्दे॥

येत्॥ तन्माहात्म्यं यथा। गारु
डे। स्वर्णपात्रेऽथवा रौप्ये ता
म्रे वा स्नानयेऽथवा। तोयस्थं
योऽर्च्चयेत्कृष्णं शालग्राम स
मुद्भवं॥ चक्रांकितं वा भूपा
ल तिष्ठते मधु माधवे प्रति
मासं महाभाग तस्य पुण्य
मनन्तकं॥ यावच्चराचरो लो
के यावच्चंद्र दिवाकरौ॥ तावत्त
स्य कुले कश्चिन्न भवेन्नृप नार
की तस्माज्ज्येष्ठे सदा भूप तो
यस्थं पूजयेद्धरिं। वीततापो
नरस्तिष्ठेद्यावदाभूतसंप्लवं
कृतैः सुशीतलैस्तोयैस्तुल
सीदलवासितैः। शुचिशुक्र
गते काले येऽर्च्चयिष्यंति केश
वं॥ जलस्थं विविधैः पुष्पैः मु
च्यन्ते यमयातनात्। जलस्थश
यनो विष्णोर्जलशायी जलप्रि
यः तस्माद्ग्रीष्मविशेषेण जल
स्थं पूजयेद्धरिं। नीरमध्यस्थितं
कृत्वा शालग्राम समुद्भवं॥ यो
ऽभ्यर्च्चयेन्महाभक्त्या स भवे
त्कुलपावनः। कर्कराशिगते
सूर्ये मिथुनस्थे विशेषतः। ये
नार्च्चितो हरिर्भक्त्या जलमध्ये म
हीपते॥ द्वादश्यां तु विशेषेण ज

लस्थं जलशायिनं। योऽभ्य
र्च्चयेत् कृते तेन यज्ञकोटिश
तं भुवि। पात्रे गंधादिकं कृत्वा
यः क्षिपेत् गरुडध्वजे। द्वादश्यां
पूजयेद्रात्रौ मुक्तिभागी भवेन्न
रः। किंच। यत्नागमे प्रकु
र्वंति जलस्य वेजनाहनं। ये
नरा नृपतिश्रेष्ठ तेषां वै नरकं
ध्रुवमिति॥ तथैवान्यसम
मये कालिंद्यादौ विशेषतः
संपादयेद्भगवतो जलक्रीडाम
होत्सवं॥ इति श्रीहरिभक्तिवि
लासे १५ विलासः॥
जलधेनुः स्त्री दानार्थकृत्रि
मधेनुः। यथा। होतोवाच॥
जलधेनुं प्रवक्ष्यामि पुण्येह्नि
विधिपूर्वकं। गोचर्ममात्रं भू
भागं गोमयेनोपलेपयेत्॥
तन्मध्ये च राजेंद्र पूर्णकुं
भं तु विन्यसेत्। जलपूर्णं सुवा
धाप्यं कर्पूरागुरुचंदनैः॥
वासितां गंधतोयेन तां धेनुं
परि कल्पयेत्। वत्
सं तथापरं कल्प्य हृते
न परिपूरिते॥ वर्द्धनीकं
महा राज पञ्च पुष्पैः
समन्वितं॥ दूर्वाङ्कुरै रुपस्ती

र्धस्त्वदामैश्च विभूषितं ॥ पंच
रत्नानि निःक्षिप्य तस्मिन् कुं
भे नराधिप । मांसीमुशीरं कु
ष्ठं च तथा शैलेयवालकं ॥
आमलां सर्षपांश्चैव ताः सर्वधा
न्यानि पार्थिव । चतुर्दिक्ष्वपि
ज्ञाणि चत्वार्य्येव प्रकल्पये
त् ॥ एवं कृतमयं पार्श्वे हिमी
यं दधिघृतं । ह्नीयमधुत्र
श्चैव चतुर्थं शार्कराहतं ॥
स्ववर्णमुखवत्सं शिंगकं ।
स्मागुरूणि च । महालयपत्रश्च
वर्णं मुक्ताफलमयेक्षणं ।
ताम्रपृष्ठं कांस्यदोहं दर्भरो
मसमन्वितं । पूर्ववत्सूत्रमप्य
कृत्वा कांस्याभरणवर्त्तिकां ।
केवलं पुष्पमाला च गुडास्या
त्कुंकुमं दन्तिकां । शिक्याशर्कर
पाकृत्वा नवनीतेन च स्तनं ॥
इक्षुपादान् राजेन्द्र गंधपु
ष्पोपशोभितां । कृष्णाजिनोप
रिस्थाप्य वस्त्रेणाच्छादितां तु ।
तां गंधपुष्पैः समभ्यर्च्य विप्रा
य विनिवेदयेत् । एवं धेनुं
तदादत्वा ब्राह्मणे वेदपार
गे ॥ साधुवित्ताय राजेन्द्र श्रो
त्रियायाहिताग्नये । तथोल्हेद

वयोरूढ़ेदान्नथावकुण्डं विने
योदद्दातिनरो राजन् यः प
श्यतिशृणोति च । प्रतिगृ
ह्णाति यो विप्रः सर्वे मुच्यं
ति पातकात् ॥ ब्रह्महापितृ
हा गोघ्नः सुरापो गुरुतल्पगः
विमुक्तः सर्वपापेभ्यो विष्णु
लोकं स गच्छति ॥ योऽश्वमे
धेन यजते समाप्तवरदक्षिणः
जलधेनुं च यो दद्यात् सम
मेतन्नराधिप । जलाहारस्त्वे
कदिनं तिष्ठेच्च जलधेनुदः ।
अथवा हविष्यैकदिने यः प
योव्रतमास्थितः ॥ ग्राहकोपि
त्रिरात्रं वै तिष्ठेदेवं न संशयः
यत्र क्षीरवहा नद्यो मधुपायस
कर्दमाः ॥ यत्र चाप्सरसां गीतं
तत्र यान्ति जलप्रदाः । दाता
चदापकश्चैव प्रतिग्राही च
यो द्विजः ॥ ते सर्वे पापनिर्मु
क्ता विष्णुलोकं च प्राप्नुयुः ॥ इ
ति वाराहे जलधेनु माहा
त्म्यनामाध्यायः ॥
जलपिप्पली स्त्री पिप्पली
विशेषः । पानीयसम्भवा इतिलोके
तत्पर्य्यायगुणाः । जलपिप्प
ल्यभिहिता शारदी शकुलादनी

मत्स्यादनी मत्स्यगंधा लांग
लीत्यपि कीर्तिता ॥ जलपिप्प
लिका हृद्या चक्षुष्या शुक्रला
लघुः । संग्राहिणी हिमा रूक्षा
रक्तदाहव्रणापहा । कटुपाका
रसा रुच्या कषाया वह्निवर्द्धिनी
इति भावप्रकाशः ॥
जलमधुकः पुं मधुकवृक्षभे
दः तत्पर्य्यायः गुणाः । अथम
धूयावनमधूया । मधुको गुड
पुष्पः स्यात् मधुवृक्षो मधुस्र
वः । वानप्रस्थो मधुष्ठीलो ज
लजोऽथ मधुलकः ॥ मधुकपु
ष्पं मधुरं शीतलं गुरु बृंहणं ।
बलशुक्रकरं प्रोक्तं वातपित्त
विनाशनं ॥ फलं शीतं गुरु
स्वादु शुक्रलं वातपित्तनुत् ।
अहृद्यं हन्ति तृष्णास्र दाहश्वा
स क्षत क्षयान् । इति भा
वप्रकाशः ॥
जलस्तम्भनं क्ली मंत्रादिद्वारा
जलगतिनिवारणं । तन्मंत्रोय
था । ओम् नमो भगवते जलं स्त
म्भय स्तम्भय सं सं सं कं कं कं
चर । जलस्तम्भनमंत्रोऽयं ज
लं स्तम्भयते शिव ॥
इति गारुडे १९६ अध्यायः ॥

पुस्तकान्तरे १९६ अध्यायः ॥
जल्पवादि । अन्यस्यन्तीयो
पधः । जल्पति । इति दु
र्गादासः ॥
जवनिका स्त्री अवथापकवस्त्र
कानात् इति भाषा । तत्पर्य्या
यः । अन्तस्पटः २ पटी ३ ति
रा ४ काण्डपटः ५ । इति श
ब्दरत्नावली ॥
जय ज्र वधे । ज्र जयति
जयेति । परस्मैपदीत्यन्ये । इ
ति दुर्गादासः ॥
जस उ इर य मोक्षे ।
उ जसित्वा जस्त्वा । इरअ
जसत् अजासीत् । अस्मात्
पुषादित्वात् नित्य उ. इत्य
न्ये । य जस्यति वत्सं गोपः ।
इति दुर्गादासः ॥
जस क वधे ॥ ताडने ॥ क
जासयति । इति दुर्गादासः ।
जस इ क रक्षे । इ क
जंसयति । इति दुर्गादासः ।
जऊः पु अपत्यं । यथा ।
इति कृतानुषंग आसन शा
यनाटन स्नानाशनादिषु
सह यसा जऊन ॥ स्नेहान्तवह्
हृदयआसीत् । इति श्रीभागवते

पंचमस्कंधे आदिभरतचरिते
८ अध्यायः। इत्येवंकृतोऽनु
षंगो आसक्तिर्येन। मृगजहु
ना मृगापत्येन सह। स्नेहानु
बंधेन। इति तट्टीकायां।
श्रीधरस्वामी॥
जह्नुसप्तमी स्त्री वैशाखशुक्ल
सप्तमी। तन्नामकारणं यथा
वाराहे नारदाम्बरीषसंवादे।
वैशाखशुक्लसप्तम्यां जाह्नु
वी जह्नुना पुरा। क्रोधात् पी
ता पुनस्त्यक्ता कर्णरंध्रात्तु
दक्षिणात्॥ तस्यां समभ्यर्च्य
देवीं गंगां भुवनमेखलां।
स्नात्वा सम्यग्विधानेन सध
न्यः सुकृती नरः॥ तस्यां सं
तर्पयेद्देवान् पितॄन् सर्वा
न् यथाविधिः। साक्षात् प
पुण्यतिले गंगास्नानकं गतपा
तकं॥ इति श्रीहरिभक्तिवि
लासे १४ विलासः। अपिच।
शुक्लपक्षस्य सप्तम्यां वैशाखे
जह्नुपुत्रिकां प्रभञ्जयेत्तस्
स्वार्थीयस्वर्गमोक्षफलाप्तये
इष्टानरकामाख्यानेषु ११ प
टलः॥ जत इ म उ. हाने गा
नौ। इ जंहाने। न मध्यपाते॥

नैवेद्यसिद्धे इत्यनुबंधो वेदेषु
च्चारणभेदार्थः। म अजं।
द्वि अजोतिजतं जतं जोतं
जोतं। अनुबंधबलादनुप
धाया अपि दीर्घः। स्वमनेन
अत्र दीर्घविधिरुपधानापेक्ष
ते। उ. जतने। इति दु
र्गादासः॥
जत नि ल च भद हासयोः
केचित्तु विस्मयहासे यत्
रात्रिसोत्पतिप्रसंगे यद्गता
मिति यरूकनेवे यद्गासु यत
णादिति भक्षणार्थस्यैव यद
शब्दस्यानुपादनादेव मन्तव्या
दिमन्यते। तच्च अमरटीकायां
वर्गपंचकारस्योत्तस्य यकार।
क्कांदसोऽदृष्ट इत्युक्तवर्गादि
रयं निर्णीतः। दजक्ति। ल
च अक्षिति। इति दुर्गादासः॥
जागृ न ल जागरे। तजाग्र
ति। ल जागर्ति। दिवो निरी
क्षमाणस्य नास्ति जागरतो भ
यमिति यत्रादिलादन्यज्जाग
र इवाचरतीति क्विपि जाग्रत्
इति दुर्गादासः॥
जातीफलं क्ली सुगंध॥
फल वि॥ ॥

श्लेषः। जायफल इति भाषा।
तत्पर्य्यायः। फलजातिः १२ फ
लजाती १३ कोशः १४ कोषं १५
जातिकोषं १६ कोषकं १७ इ
ति शब्दरत्नावली॥
जायी पु ध्रुवकभेदः। यथा
जायीति नाम्ना ध्रुवको हि वि
शाल्यक्षरान्वितः। सन्निपातेन
तालेन स्मृयाते भीष्टदो रसे
इति संगीतदामोदरः॥
जालगर्द्दभः पुं रोगविशे
षः। तस्य लक्षणं यथा वि
सर्पवत्सर्पति यः शोथस्त
नुरपाकवान्। दाहज्वरकरः पि
त्तात्स ज्ञेयो जालगर्द्दभः॥ अ
पाकवान् ईषत्पाकवान्। अपि
तनुत्वेन सर्वथा पाकाभाव
स्यायुक्तत्वात्। अयमग्निवात
इति व्याख्यातः॥ अथ विकृतेन्द्र
वृद्धा गर्द्दभीका जालगर्द्दभा
नां चिकित्सा। विकृतामिन्द्र
वृद्धां च गर्द्दभीं जालगर्द्दभं।
पैत्तिकस्य विसर्पस्य क्रियया
साधयेद्भिषक्॥ पाकेतु रो
पयेदाज्यः पक्वे मधुरभेषजैः
इति भावप्रकाशः॥
जि जये॥ अभिभवे॥

जय उत्कर्षः स्वीकारश्च।
उत्कर्षः स्वर्मकः। जयति य
मुनाकूले रहः केलयः माधवे
रेसंख्य रजयत सरालय मि
ति कादंबरी। जयति शात्रुवली
प्रतिभिधानादस्मात् तवेत्वोः
प्रयोगाभावः। किंतु तयोः
स्थाने निवंतीति। किंच तपः
स्थाने तान ड. इष्यते। यथा।
भावगम्यलेयः कोपि जयनाहा
गगोचरः। इति दुर्गादासः॥
जिज्ञासा स्त्री ज्ञातुमिच्छा।
यथा। अथातो ब्रह्मजिज्ञासा
इति शारीरकप्रथमसूत्रं॥
तत्पर्य्यायः। अनुयोगः १ प्र
श्नः २ पृच्छा ३ निरूपणा ४।
इति जटाधरः॥
जिज्ञासितः त्रि कृतजिज्ञासः
पृष्टः। जिज्ञासाशब्दादितप्र
त्ययेन निष्पन्नः॥ विचारितः।
यथा॥ जिज्ञासितमधीतं च ब्र
ह्मयत्तत्सनातनं। इति श्री
भागवते १ स्कंधे ५ अध्यायः। किं
च यत्सनातनं नित्यं परं ब्र
ह्म तच्च त्वया जिज्ञासितं विचा
रितं अधीतं अधिगतं प्राप्तं च
त्वयेति श्रीधरस्वामी॥

जिज्ञासुः त्रि आत्मज्ञानेच्छुः
यथा। चतुर्विधा भजन्ते मां ज
नाः सुकृतिनोऽर्जुन। आ
र्त्तो जिज्ञासुरर्थार्थी ज्ञानी च
भरतर्षभ॥ इति श्रीभगव
द्गीतायां ७ अध्यायः १६ श्लो
कः। सामान्यबोधेच्छुकश्च॥
जिज्ञास्यः त्रि जिज्ञासितव्यः।
जिज्ञासनीयः। जिज्ञासधातो
र्ण्यत्प्रत्ययेन निष्पन्नः॥
जिताष्टमी स्त्री आश्विनकृ
ष्णाष्टमी। सैव जीमूताष्टमी
यथा। आश्विनकृष्णाष्टम्यां॥
जीमूतवाहनपूजा। तत्राष्ट
मी प्रदोषव्यापिनी ग्राह्या। भ
विष्योत्तरे। इषे मास्यसिते पक्षे
अष्टमी या तिथिर्भवेत्। पुत्रसौ
भाग्यदा स्त्रीणां ख्याता सा जी
वपुत्रिका॥ शालिवाहनरा
जस्य पुत्रो जीमूतवाहनः।
तस्याः पूजा स्त्रीभिः पुत्र
सौभाग्यलिप्सया॥ प्रदोष
समये स्त्रीभिः पूज्यो जीमूत
वाहनः। पुष्करिणीं विधाय
प्राङ्गणे चतुरस्रिकां किं
च विस्तुधर्मोत्तरे। पूर्वेद्युरप
रेद्युर्वा प्रदोषे यत्र चा
ष्टमी। तत्र पूज्यः सदा स्त्रीभी
राजा जीमूतवाहनः॥ इति।
तथा च। यद्दिने प्रदोषव्यापि
न्यष्टमी तत्रैव व्रतं उभय
दिने चेत् परदिने त्रिसंध्या
व्यापित्वात्। उभयदिने प्रदो
षव्याप्तावुदयगामिन्यां तदुक्तं
निर्णयामृतसिन्धौ। लक्ष्मीव्र
तं चाप्युदिते शशाङ्के यत्राष्ट
मी चाश्विनकृष्णपक्षे। तत्रो
दये वै कुरुते दिनेशः सदा
भवेज्जीवितपुत्रिका सा॥
इति। अस्यामष्टम्यां स्त्रीभि
र्नभोक्तव्यं। आश्विनस्यासि
ताष्टम्यां याः स्त्रियोऽन्नं हि भुञ्ज
ते। मृतवत्सा भवेयुस्ता वैध
व्यं च भवेद्ध्रुवं॥ इति वचनात्
इति वाचस्पतिमिश्रकृतमत
कारचिन्तामणिः॥
जिम उ भदे। उ जिमि त्वा
जिंत्वा। इति दुर्गादासः॥
जिरिः २ न हिंसे रेफोपधः
रवैदिकः ५। न जिरिणोति।
इति दुर्गादासः॥
जिव इ प्रीणने। भ्वा०। इ
जिंव्यते। जिन्वति लोकः पि
तरं। इति दुर्गादासः॥

जिष उ सेके। उ जेषि
त्वा जिष्ट्वा। इति दुर्गादासः॥
जिह्वा स्त्री रसज्ञानेन्द्रियं। जि
व इति भाषा। तत्पर्यायः।
रसालः १ सुधास्रवा २ रसि
का ३ रसना ४। इति शब्दर
त्नावली॥ रसा ११ लोला १२
रसाला १३ रसला १४ ललना
१५। इति जटाधरः॥
जिह्वारोगः पुं मुखरोगा
न्तर्गतरसनाजातव्याधिः त
त्रजिह्वारोगाणां निदानमाम
संख्याः प्राह। वातजः पित्तज
श्चापि कफजोऽलाससंज्ञकः
उपजिह्विका च गदा जिह्वा
यां पञ्च कीर्त्तिताः॥ तत्र वा
तजस्य लक्षणमाह। जि
ह्वानिलेन स्फुटिता प्रसुप्ता
भवेच्च शाकच्छदनप्रकाशा।
स्फुटिता मनागवदीर्णा। प्रसुप्ता
रसानभिज्ञतया सुप्तेव। शाक
च्छदनप्रकाशा शाको महावृ
क्षो द्रुमः तद्दल कण्टकवि
त॥ पित्तजमाह। पित्तात् स
दाहैरुपचीयते च दीर्घैः स
रक्तैरपि कण्टकैश्च। अपरो
गोलोके जलीतिख्यातः।
जाउरीति वङ्गभाषा॥ कफज
माह। कफेन गुर्वी बहला चि
ता च मांसोच्छ्रयैः शाल्मलि
कण्टकाभैः। बहला स्थूला।
मांसोच्छ्रयैः मांसजकण्टकैः॥
अलासमाह। जिह्वातले
यः श्वयथुः प्रगाढः सोऽला
ससंज्ञः कफरक्तमूर्त्तिः॥
जिह्वां सरुक् स्तम्भयति प्रवृ
द्धो मूले च जिह्वा भृशमेति पा
कं॥ प्रगाढः प्रकर्षेण गाढो
दारुणः। कफरक्तमूर्त्तिः कफ
रक्ताभ्यां मूर्त्तिर्यस्य स कफरक्त
ज इत्यर्थः। जिह्वास्तम्भेन वायु
रप्यत्र बोद्धव्यः। भृशं पाकेन
पित्तं च। अत त्रिदोषजोऽयं।
असाध्यत्वं चास्य॥ उपजि
ह्विका माह। जिह्वाग्ररूपः
श्वयथुश्च जिह्वामुन्नाम्य जातः
कफरक्तयोनिः। प्रसेककण्डू
परिदाहयुक्तः प्रकथ्यते
ऽसावुपजिह्विकेति॥ जिह्वा
ग्ररूपः जिह्वाग्राकृतिः॥ अ
थ जिह्वारोगाणां चिकित्सा॥
जिह्वागतविकाराणां शान्तये शो
णितमोक्षणं। गुडूची पिप्पली
निम्बकवलैः कटुभिः स्रावैः ओष्ठ

कोपेः। तिलजे यत् कृतं प्राक् चिकि
त्सितं। कफजे च तिले एव हि
तत्कार्य्यं भिषजा खलु॥ पि
त्तजे परिहृष्टे तु निःसृते दुष्ट
शोणिते। प्रतिसारणगन्डूष
नस्यं च मधुरं हितं॥ कफज
केषु कफाभ्येषु लिखितेषु
स्रजः क्षये। पिप्पल्यादि मधु
युतः कार्य्यस्तु प्रतिसारणे॥
उपजिह्वां तु संलिख्य क्षारेण
प्रतिसारयेत्। शिरोविरेकगं
डूषधूमैश्चैना मुपाचरेत्॥
व्योषक्षाराभया वह्निचूर्णमे
तत् प्रघर्षणं। उपजिह्वाप्र
शान्त्यर्थं मेभिस्तैलं च पाचयेत्
इति भावप्रकाशः॥
जीरकः पुं वणिक्द्रव्यविशे
षः। जीरा इति भाषा। तत्पर्य्या
यः। दीप्यकः २। इति जटा
धरः॥ अपि च। शुक्लजीरा
कृष्णजीरा कलौंजी एषां ना
मानि गुणाश्च। जीरको जरणो
ऽजाजी कणा स्याद्दीर्घजी
रकः। कृष्णजीरः सुगन्धि
श्च तथैवोद्गारशोधनः॥
कालाजाजी तु सुषवी का
लिका चोपका ॥ ।

लिका। पृथ्वीका कारवी पृथ्वी
पृथुः कृष्णोपकुंचिका॥ उप
कुंची च कुंचीच बृहज्जीरक इ
त्यपि। जीरकत्रितयं रूक्षं क
टूष्णं दीपनं लघु॥ संग्राहि पि
त्तलं मेध्यं गर्भाशयविशुद्धि
कृत्। ज्वरघ्नं पाचनं वृष्यं ब
ल्यं रुच्यं कफापहं॥ चक्षुष्यं प
वनाध्मानगुल्मच्छर्द्यतिसार
हृत्। इतिभावप्रकाशः॥
जीर्णः त्रि गतवयाः। जरा
विशिष्टः॥ पक्वः। पाकविशि
ष्टः॥ अथ जीर्णद्रव्याणि।
नारीकेलफलेषु तण्डुलम
च्छीरसाले हितं जंबीरोत्थ
रसो घृते समुचितः सर्पिस्तु
मोचाफले। गोधूमेषु च क
र्कटी हितनमा मासात्यये का
ञ्जिकं नारंगे गुडमग्निमेव क
थितं पिण्डारके कोद्रवः॥
पिष्टान्ने सलिलं प्रियालफल
जे पथ्या हिता माषजे लवणं
क्षीरभवेन्नवं तक्रमुचितं को
शाम्रे कोलवंजे। मत्स्ये च
तकलं तज्जीर्णशमने मधुक
पानात्यये तैलपेष्यकरजे क
टुमत्स्यशमने पोषणस्तु बुद्धा ज

येत्॥ पनसे कदले कदलेच
घृतं घृतपाकविधावपि जंबु
रसः। तण्डुलवर्णनिकरे लव
णं लवणेषु च तण्डुलवारि व
रं नारिकेलफल तालबीजयोः
पाचनं य इह तण्डुलं विदुः
तेवदंति मुनयो ऽथ तण्डुला
न्नक्षीरवारि परिपाचयन्त्यपि
दाडिमामलक ताल तिन्दुकी
बीजपूर लवलीफलान्यपि।
वाकुलेन फलेन च पाचयेत्
पाकमेति बकुलं स्वमूलतः
मधुकमालुर नारु पाटनानांप
नृयस्त्वं बीजकपित्थकानां पाको
ग्रपेयं पिचुमर्द्दबीजचूर्णैः पित्त
कं प्रवदंति पथ्यं। गोधूममाष
द्विमन्यमसीन मुद्ग पाकोभ
वेदिति च मातुलपञ्चकेण।
खर्ज्जूरिकाविशाकशेरुकसिलाह
शृङ्गाटकेमधुफलेष्वपि
भद्रमुस्तं॥ पिशितपनसयोः
स्यादाम्रबीजेन पाकः कुशारम
हिषयोषित्क्षीरयोः सैन्धवेन
चिपिटपरिणतिः स्यात् पिप्प
लीहिंगुकाभ्याम पपुर तिलषा
भो वेत्सना नामजीर्णं॥ कर्पूर
पूगीफल नागवल्ली काश्मीर

जातीफलमातिकोषं। कस्तूरि
का सिल्हक नारिकेलं तैलं पच
त्यम्बु समुद्रफेनः॥ प्रपामा
कनीवारकुलत्थषष्टिनिष्पा
व कंगुदयिमसूरकस्तु। चिंचा
फलस्योत्तिलतैलयोगात् जटा
मुनादस्य निहन्त्यथात्र॥ कपि
त्थशृंगाटमृणालमष्टी खर्ज्जू
रखण्डमपि नागरेण। पला
शभस्माम्बुनथाद्दंजो वा रसो
निहन्यादमृतं सजातं॥ अम्ले
न केनाप्यथ कोषणेन कोष्णा
म्बुनावाहृतमेति पाकं। तिलादि
तैलान्यपि कांजिकेन सर्ज्जस
मज्जा पनसाम्रलकेशे॥ किमत्र
चित्रं बहुमांससमस्तभोजी मस्
स्वीस्यात् परिपीय मूत्रं।
इत्युक्ते केवलवह्निपक्वमा
सैनमत्स्यपरिपाकमेति॥ क
पोतपारावतनीलकण्ठ कपि
ञ्जला शिशिता निजरक्ता। का
शाम्रमूलं परिपीयमुक्तं सुखी
भवेन्नाबकुशेन भुक्तं॥ व्यो
षे रसालास्तरभीयवल्लमेरे
न केशास्फेन विपाकमेति। फेरंव
स्यचूर्णेन हयारि नारी पयोदधि
क्षीरमपैति पाकं॥ वैद्यकं।

सवाराल्लवंगेन फेणी शमं प
र्पटः शिग्रुवीजेन याति। कृष्ण
मूलतो लड्डुका यूपकादे र्विपा
कोऽप्यवेद्धकुली मण्डयोश्च॥
ग्वाविङ्गोथा गण्डका श्चिन्नेते।
लाघावनलातान् कोल कुमीद
योः पि। जीर्यमेवं पायसो।
मुद्गयुषात् सामुद्रादप्यारना
लेस्सुखाय॥ तसेन संदेहमवा
नार मग्रो नोये हिमं समक
त्व स्वदम्भः। पीलावशण दीर्घ
कालोपयत्न मंभो जीर्णं प्री
शीघ्रमेवं जहाति॥ पालेकि
काकेमकका रवल्लीवार्ताकु
वेशांकुरमूलकानां। कपोदका
कुपटोलकानां सिद्धार्थको मे
चवरस्यपका॥ म्फुरणी सलीन
स्वचन्माभारया जंबीरयोः कोद
वको निहंता। जरामिरा गैरि
कचंदनाभ्यामभ्ये लिशीतंव
कृष्णोन मूर्ते॥ पटोलवंशांकुर
तारवल्ली फलान्यलावुनिव
कूनिजपा। तारोदकं मल्ल
नेनोर्निपीय भोक्तं पुनः बीछ
ति तावदेव॥ विपद्यलेम्परणा
के गुडेन तथालुकं नरड्डु।
ल्लकोयपानात्। जंबीरनीरेण

निशारशोनेनमृस्नेन तैर्णं परि
पाक मेति॥ चंचुक सिद्धार्थ
क वास्तुकानां गायत्रिसारक्व
थितेन पाकः। शाकानि सर्वा
ण्युपयाति पाकं तारेण सद्य।
स्तिलनालजेन॥ म्लाम्रातकोडु
म्बरपिप्पलीनां फलानि च स्नत्
वटादिकानां। स्नुः शामनं पर्प
षितोदकेन पियाल मज्जा च
कडुस्मकेन॥ स्नेहाजीर्णरोगि
णांमध्ये चूर्णं ज्वालामलो हंति
वैरेचकानां। माषो भूयानिम्ब
मूलेन पाक स्त्रिंचा मुचत्यम्ल
नो चूर्णयोगात्॥ उस्रेन शीतं
शिशिरेण चोस्र मम्लेन च
क्षारगणो गुणाय। स्नेहेन नी
स्त्वमनाति योगेसिताहितासा
दितिकाशिराजः॥ ताहूलमथ
स्थितचूर्णकेन संदत्तेनयस्य
मखं नरस्य। तैलेन वा केवल
कांजिकेन सुखाय गण्डूष मसो
विदध्यात्॥ शीतोदकं नस्यजेरो
गमपि नारीपय श्लोजनहवि
नाशि। पलोदकं पूग गदे प्रश
स्तं धात्रीमलेपोः त्रिविरेचनेषु
स्वरास्य मांसं प्रमने : नहले
मयानसमिः स्वरतावसाने।

द्दीरोषणा सैंधवसाधितेन छा
गाण्डमुके सुरतातिरेके॥ श्र
वणापूरणजेन तिलतैलतः श्रव
णपूरण मेव सुखविडः। कव
लमेषु गदेषथ कारयेत् कव
ल मार्द्रकमद्र वजेषुनः। इ
ति जीर्णमंजरी॥
जीर्णज्वरः पुं पुरातनज्वररो
गः। अथ जीर्णज्वराधिकारः
तत्र जीर्णज्वरस्य सामान्यलक्ष
णमाह। यो द्वादशभ्यो दिवसे
भ्यऊर्द्धं दोषत्रयस्याहितकृन्नभ्य
ऊर्द्धं। न्दर्णानतनो निहतनिम
दवेगो भिषग्भिरुक्तो ज्वरए
ष जीर्णः॥ जीर्णज्वरस्यैव
विशेषं वातबलासकमाह
नित्यं मंदज्वरो रूक्षः शूनः कृ
च्छ्रेण सिध्यति। स्तब्धांगः श्ले
ष्मभूयिष्ठो नरो वातबलासकी
वातबलासकाख्यो ज्वरोऽस्या
स्तीति वातबलासकी। नरई
भवेत्। शूनः शोथी। श्ले
ष्मभूयिष्ठो बहुलश्लेष्मकः।
अथ जीर्णज्वरस्य सामान्यचिकि
त्सा। जीर्णज्वरी नरः कुर्याच्चोप
वासं कदाचन। लंघनात्तत्क्षभवे
त्क्षीणः।

ज्वरस्त स्याहुली यतः॥ पु
राणोपि ज्वरे दोषाय यपक्षेप ः
पुनस्तथा। लंघयेन्नत्र तं प
श्चात् पूर्ववत् कारयेत् क्रिया
तथा पूर्ववत्॥ तिदिग्धि
का नागरकाम्रतानां क्वाथ
पिबेन्मिश्रितपिप्पलीकं।
जीर्णज्वरारोचककासशूल
श्वासाग्निमांद्यार्दितपीनसेषु
हत्स्तुईमानयथायः स्मायते
नोपयुज्यते। त्रिकएवकक्वा
थः। पिप्पलीचूर्णसंयुक्तः
क्वाथ श्छिन्नोद्भवोद्भवः। जी
र्णज्वर कफध्वंसी पंचमूल
कृतोऽथवा॥ प्रसन्नायाः
कषायेनशीतलीकृतमी
रितं। मधुपादयुतं पीतं जीर्ण
ज्वरहरं परं॥ पिप्पलीमधु
संमिश्रगुडूचीस्वरसं पिबेत्
जीर्णज्वर कफ प्लीह कासा
रोचकनाशनं। जीर्णज्वरेऽग्नि
मांद्ये च शस्यते गुडपिप्पली।
चूर्णाकृते त्रिभिषजा मतः
पिप्पली मधुसंयुक्ता मेदः क
फविनाशिनी॥ श्वासकासज्व
रहरी प्लीहोदरापहा। आ

मरिचं चित्रकं पथ्या पिप्पलीमे
पवं तथा। चूर्णितोऽयं गणो
ज्ञेयः सर्वज्वरहरः परः॥ मे
दीरुचिकरः श्लेष्महृद्दीपन
पाचनः। आमलक्यादिचूर्णं
द्राक्षामृता शटीशृङ्गीमुस्त
कं रक्तचन्दनं। नागरं कटुका
पाठाभूनिम्बः सदुरालभः॥
उशीरधान्यकं पद्मं वालकं
कण्टकारिका। पुष्करं पिचुमर्दं
च दशाङ्गोऽग्निरसस्तते जीर्णज्व
रारुचिश्वासकासश्वयथुनाश
नं। द्राक्षाद्यष्टादशाङ्गक्वाथः
त्रिवृद्द्राक्षापञ्चहाद्यावासमह।
ह्याथवा कणाः। गव्यक्षीरेण
सपिष्ट्वा पिबेद्दशदिनानि हि
तथैवमुनयेदेतान् पुनर्विशा
निवासरान् पिबतां ज्वरशो।
तिः स्यात् पाण्डुरोगश्च शाम्य
ति॥ कासः श्वासोऽग्निमान्द्यञ्च
कफादिकं च नश्यति। अथा
दिवृद्धि यथाफलं हि। इश्र
वृद्धि यथाग्नि। वर्द्धमानपिप्प
ली॥ वातश्लेष्मज्वरोत्कासान् कि
याद्वातबलासके। जीर्णज्वरेऽकफत्ती
रोगार्त्तस्वासमन्विते॥ पयः पि
पुष्पसप्पा तथैव च विशेषप।

मं। चन्दनाद्यं हितं तैलं शीतशीयि
कारकीर्त्तितं॥ तथा नारायणं
तैलं जीर्णज्वरहरं परं। इति जी
र्णज्वराधिकारः। इति भा
वप्रकाशः॥
जीर्णोद्धारः पुं भग्नमन्दिरादेः
संस्कारः। यथा। विष्णुधर्मोत्त
रतृतीयकाण्डे। यस्य राष्ट्रस्त
विषये देववेश्म विशीर्यते।
तस्य सीदति तद्राष्ट्रं देववेश्म
यथा तथा। कृत्वा शीर्णस्य सं
स्कारं तथा देवस्य वेश्मनि। द्वि
गुणं फलमाप्नोति नात्र का
र्या विचारणा॥ विष्णुरहस्ये।
पतितस्य च यः कर्त्ता पतमान
स्य रक्षिता। विष्णोरायतनस्य
ह स नरो विष्णुलोकभाक्॥
अग्निपुराणे। पतितं पतमा
नं तु तथार्द्धस्फुटितं नरः। स
मुद्धृत्य द्विगुणं पुण्यं फलमा
प्नुयात्॥ देवीपुराणे मूलाच्च
तद्गुणं पुण्यं प्राप्नुयाज्जीर्णका
रकः। तस्मात् सर्वप्रयत्नेन जीर्ण
संस्कारमाचरेत्॥ हयशीर्षपञ्चरा
त्रे। वापीकूपतडागानां सुरधा
म्नां तथैव च। प्रतिमानां सभा
नां च सं॥ ॐ॥

स्कर्णीयो नरो भुवि॥ पुण्यं श
तगुणं तस्य भवेत्स्नात्र संश
यः। प्रतिष्ठाया विधिः कार्यस्त
था मन्दिरनिर्मिते॥ प्रायः श्री
हयशीर्षोक्तेरनुसारेण वैष्णवैः
देवालयप्रतिष्ठा च ख्याता न
लिखितेन किं॥ श्रीमूर्त्तिस्था
पनेनैव संपूर्णास्या विशेषतः
देवगृहं देवतायाः प्रतिष्ठावि
धिना स्वरा॥ सत्कार्यमनुज्ञा
नोक्तसमुदायोक्तकर्मणा।
इति श्रीहरिभक्तिविलासे
२० विलासः॥
जीव ऋ प्राणे। ऋ अ
जीजिवत् अजिजीवत्। प्रा
णः प्राणधारणं। जीवति लो
कः। इति दुर्गादासः॥
जीवनहेतुः पुं वर्त्तनोपायः।
स च दशविधः। यथा। विद्या
शिल्पं भृतिः सेवा गोरक्षं वि
पणिः कृषिः। वृत्तिर्भैक्ष्यं कु
सीदं च दश जीवनहेतवः॥
इति गारुडे २१४ अध्यायः॥
जीवन्मुक्तः त्रि जीवद्दशायां
मायाबन्धरहितः। तल्लक्षणं
यथा। स्वस्वरूपाखण्डब्रह्मज्ञा
नेन तदज्ञानबाधनद्वारा स्वस्वरू

पाखण्डब्रह्मणि साक्षात्कृते
सति अज्ञानतत्कार्यसञ्चित
कर्मसंशयविपर्ययादीनामपि
बाधितत्वात् अखिलबन्धरहि
तो ब्रह्मनिष्ठः। भिद्यते हृदय
ग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षी
यन्ते चास्य कर्माणि तस्मिन् दृ
ष्टे परावरे॥ इत्यादिश्रुतेः। अयन्तु
व्युत्थानसमये मांसशोणित
मूत्रपुरीषादिभाजनेन शरीरे
ण आन्ध्यमान्द्यापटुत्वादिभा
जनेनेन्द्रियग्रामेणाशनायापि
पासाशोकमोहादिभाजने
नान्तःकरणेन च तत्तत्पूर्व
पूर्ववासनया क्रियमाणानि
कर्माणि भुज्यमानानि कर्मा
णि भुज्यमानानि ज्ञानाविरुद्धा
रब्धफलानि च पश्यन्नपि
बाधितत्वात् परमार्थतो न प
श्यति। यथा इदमिन्द्रजालमिति
ज्ञानवान् तदिन्द्रजालं पश्यन्नपि
परमार्थमिदमिति न पश्यति।
सचक्षुरचक्षुरिव सकर्णोऽक
र्ण इव समना अमना इव सप्रा
णोऽप्राण इव इत्यादिश्रुतेः।
उक्तञ्च। सुषुप्तवज्जाग्रति यो न
पश्यति द्वयञ्च पश्यन्नपि चाद्वय
त्वतः। तथापि कुर्वन्नपि निष्क्रिय

श्रयः सम्यात्मविज्ञानात् इतीह ति
श्रयः। इति। अस्य ज्ञानान्तर्वर्ति
यमानानामेवाहारविहारादी
नामनुवृत्तिर्वल्कलवासनानामे
वानुवृत्तिर्भवति। शुभाशुभयो
रौदासीन्यं वा। तदुक्तं। बुद्धा
द्वैतसतत्त्वस्य यथेष्टाचरणं
यदि। शुनां तत्त्वदृशां चैव को
भेदोऽशुचिभक्षणे॥ ब्रह्मवि
त्त्वं तथा मुक्त्वा स आत्मज्ञो न।
चेतर इति। तदानीं शमादि
त्वादीनि ज्ञानसाधनान्यद्वेष्टृ
त्वादयः सद्गुणाश्चालंकारव
दनुवर्त्तन्ते। तदुक्तं। उत्पन्ना
त्मावबोधस्य त्वद्वेष्टृत्वादयो गु
णाः। अयत्नतो भवन्त्यस्य न तु
साधनरूपिणः इति॥ किं व
हुनाऽयं देहयात्रामात्रार्थ
मिच्छानिच्छापरेच्छाप्रापितानि
सुखदुःखलक्षणान्यारब्धफ
लान्यनुभवन् अन्तःकरणाभासा
दीनामवभासकः सन् तद
वसाने प्रत्यगानन्दपरब्रह्म।
णि प्राणे लीने सति अज्ञा
न तत्कार्यसंस्काराणाम
पि विनाशात् परमकैवल्यमा
नन्दैकरसमखिलभेदप्रतिभा
सरहितमखण्डं ब्रह्मावतिष्ठते

तत्तस्य प्राणा उत्क्रामन्त्यत्रैव स
मवलीयन्ते विमुक्तश्च विमुच्य
ते। इत्येवमादिश्रुतेः। इति वे
दान्तसारः॥
जं रंहसि। रंहो वेगगतिः
जवति घोटकः। इति दुर्गा
दासः॥
जु उ. गत्यां। उ. जवते।
इति दुर्गादासः॥
जुग इ त्यागे। इ
जुङ्गते। इति दुर्गादासः॥
जुड श गतौ। श जुडति।
जुडिता। इति दुर्गादासः॥
जुड शि बंधे। शि जुडति
अजुडीत्। तानुकेवलताप
तान्तस्थवलेन जुडत्यसौ। जु
जोड। इति दुर्गादासः॥
जुड क नोदे। क जोडय
ति नोदः प्रेरणं। इति
दुर्गादासः॥
जुत अ उ दीप्तौ। अ
अजुजोतत्। उ. जोतते।
इति दुर्गादासः॥
जुन श गतौ। श जुनति।
जोनिता। इति दुर्गादासः॥
जुर्व ई वधे। ऊङ्गी। जूः जु
रौ जुरः। ई जूर्णः। इति।

दुर्गादासः॥
जुल क पिषि। क
जोलयति। पिषि चूर्णीकरणे
इति दुर्गादासः॥
जुष मि श उ. ई मुदि॥
सेवे। षिचमस्वरी आत्म.
जुषते। ई नि जुष्टः स्नि।
मुदि हर्षे। इति दुर्गादासः।
जुष कि तर्के स्मृतः।
कि जोषयति जोषयत्यन्यगु
णान् सुधीः। तर्कयतीत्यर्थः
इति दुर्गादासः॥
जूर उ. य ई ज्यानौ॥
वधे। दीर्घी। उ. य जूर्यते
ई जूर्णः। ज्यानिर्गतवकृव
योभावः। इति दुर्गादासः॥
जूष म वधे। षष्ठस्वरी।
म जूषति जूषते। परस्मै
पदीत्यन्ये। इति दुर्गादासः॥
जृ न्यक्कारे। न्यक्कार तिर
स्करणं। जरति शत्रुं शूरः।
इति दुर्गादासः॥
जृभ इ उ. जृम्भे। सप्तम
स्वरी। इ जृम्भ्यते। उ. जृ
म्भते। इति दुर्गादासः॥
जृम्भ उ. ई जृम्भे। उ.
जृम्भते। ई जृब्धः। इति

दुर्गादासः॥
जॄ रि कि ज्यानौ।
रि जृणाति जीर्णः जीर्णिः
कि जारयति जरति। ज्यानि
र्गतवकृवयोभावः। इति दु
र्गादासः॥
जॄ इर् ष म य ज्यानौ।
इर् अजरत् अजारीत्।
ष जरा। म जरयति। य
जीर्यति। इति दुर्गादासः॥
जेष ऋ उ. गत्यां। ऋ
अजिजेषत्। उ. जेषते जि
जेषे। इति दुर्गादासः॥
जेह उ. ऋ यत्ने। उ. जे
हते जिजेहे। ऋ अजिजे
हत्। इति दुर्गादासः॥
जै तये। जायति। इति दु
र्गादासः॥
ज्ञप क म ज्ञाने। क म
ज्ञपयति। ज्ञप्ति मीमांसालोक
निशाणतोषणस्तनयः। ज्ञा
पन इत्यनेनैव सिद्धे ज्ञप
पाठ स्वरादि उभयपदीतिम
ते फलवत्कर्मेति परस्मैपदा
र्थः। इति धातुप्रदीपः। व
स्तुतस्तु ज्ञपिपद मस्यैव नि
ष्पादितं। तेन अनिर्दिष्टार्थो।

तथा ज्ञप्ति इह ज्ञानं । अत एव मष्टो ज्ञ दीप्ते इत्यत्र । अस्यैव मन्तेनत्त्व निष्पादितेन दीप्यर्थवाचकेन ज्ञात मित्यादि प्रतिपाद्यते । एवं ज्ञानपर्याये प्रतिपत्तामि चेतनेत्यमरः । इति दुर्गादासः ॥

ज्ञा ग बोधने । गज्ञानाति । सन्दर्भशुद्धिं गिरांजानीते जयदेव एवेत्यत्र अनुपसर्गात् फलवत्कर्त्तर्य्यात्मनेपदं । ततोऽनुजज्ञेगमनंस तस्य इत्यत्रानुपूर्वस्योपसर्ग प्रतिरूपकत्वेनानुपसर्गत्वात् । इति दुर्गादासः ॥

ज्ञा क म मारणे ॥ आलोके ॥ निशाने ॥ तोषणे ॥ स्तुतौ ॥ क म ज्ञपयति अज्ञपि अजिज्ञपि ज्ञपं ज्ञपं ज्ञापं ज्ञापं । आलोकोदर्शन प्रेरणं । निशानं तिक्ष्णीकरणं । तोषणं तुष्टीकरणं । ज्ञपयति शत्रून् शूरो मारयतीत्यर्थः । ज्ञपयति रूपं कामिनी विद्वान् दर्शयतीत्यर्थः । ज्ञपयति खड्गं कर्मकारः । शाणयतीत्यर्थः । ज्ञपयति गुरुं शिष्यः श्लाघयतीत्यर्थः । ज्ञप्तिः केश्चिन्न मन्यते । आलोकोज्ञानं प्रेरणं मित्यनुन्यास रक्षितौ (?) अतएव क्रमदीश्वरोपि जानाते चौरादिकं विभाषया मन्यते । तेनज्ञपयितं बोधयितुमिच्छमाणे दीप्यमान इतिणिजिच्छकेनौ ज्ञानप्रेरणापि । फ्लस्ते सति दीप्यमान इति प्रसिद्धं । एवं विज्ञप्तिरेषा मम जीवबन्धो इत्यादिषु च विज्ञापनमेवार्थः । इति दुर्गादासः ॥

ज्ञा क प्रेरणे । प्रेरणमिह नियोजनं । क ज्ञापयति भृत्यंस्वामी नियुङ्क्त इत्यर्थः । इति दुर्गादासः ॥

ज्ञाता त्रि ज्ञानशीलः । तत्पर्य्यायः । विदितः धत्तानसमन्वितः ५ । इति शब्दरत्नावली ॥ ज्ञातिः पुं सपिण्डादिः । जानाति छिद्रकुलस्थितिं च ज्ञातिः नाम्नीति तिकृ । इत्यमरटीकायां भरतः तत्पर्य्यायः सकुल्यः १ समानोदकः २ । इति जटाधरः ॥

785

ज्ञानं क्ली बोधः । आत्मगुणः । तत्त्रिविधं यथा । सर्वभूतेषु येनैकं भावमव्ययमीक्षते । अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकं ॥ १ ॥ पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान् । वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसं ॥ २ ॥ यत्तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहेतुकं । अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतं ३ ॥ इति श्रीभगवद्गीतायां १८ अध्यायः ॥ सर्वेषु भूतेषु परस्परं व्याहतेषु अविभक्तमनुस्यूतमेकमव्ययं निर्विकारं भावं परमात्मतत्त्वं येन ज्ञानेनेक्षते आलोचयति तज्ज्ञानं सात्त्विकं विद्धि ॥ १ ॥ सर्वेषु भूतेषु नानाभावान् वस्तुतएवानेकान् हेतुत्वात् पृथग्विधान् । सविशेषः स्वित्वादिरूपेण विलक्षणान् । येन ज्ञानेन वेत्ति तज्ज्ञानं राजसं विद्धि ॥ २ ॥ एकस्मिन् कार्य्ये देहे प्रतिमादौ वा कृत्स्नवत् परिपूर्णवत् सक्तम् तावानेव आत्मा ईश्वरो वा इत्यभिनिवेशयुक्तं अहैतुकं निरुपपत्तिकं अतत्त्वार्थवत् । परमार्थावलम्बनशून्यं अत एवाल्पं तुच्छं अल्पविषयत्वात् अल्पफलत्वाच्च यदेवं भूतं ज्ञानं तत्तामसमुदाहृतं ३ इति तट्टीकायां श्रीधरस्वामी ॥

ज्ञानयोगः पुं ब्रह्मज्ञानस्योपायः । यथा । सर्वभूतेषु गोविन्दो व्रजरूपोऽयमवस्थितः ॥ इति मत्वा महाप्राज्ञः प्रतिकूलं न कारयेत् ॥ शब्दादयो ये विषया विषयी चाप्य पुरुषः जानीयात्तदशेषं वैस्वरूपं परमात्मनः ॥ परमात्मा च भगवान् विष्वक्सेनो जनार्दनः । तद्भक्तिमान् भगवतो नाल्पपुण्यैर्हि जायते ॥ भगवत्कीर्तनप्रियः । भगवद्भक्तिमास्थाय वत्स भागवतो भव ॥ भगवान् भूतभव्येशो भूतादिप्रभवोऽव्ययः । भावेन तं भजस्वेशं भवभङ्गकरं हरिं ॥ भजस्व भावेन विभुं भगवन्तं भवेश्वरं ततो भागवतो भूत्वा भव ।

वंधान् प्रमोक्ष्यसि ॥ तत्र चित्त
समाधानं न शक्नोति भवान्
यदि । तदभ्यासपरस्तस्मिन्
कुरु योगं दिवानिशं ॥ तत्र
यद्यसमर्थस्त्वं ज्ञानयोगे महा
मते । क्रियायोगे दिवारात्रौ त
त्परः सततंभव ॥ इत्याद्ये व
क्षिपुराणे वैष्णवक्रियायोगे
यमानुशासनोनामाध्यायः
विस्तारस्तु श्रीभगवद्गीतायां ।
८ अध्याये द्रष्टव्यः ॥
ज्ञानवापी स्त्री वाराणस्यं
न्तर्गततीर्थविशेषः । तदुत्पत्ता
दि र्यथा । अगस्त्य उवाच ।
स्कंद ज्ञानोदतीर्थस्य माहा
त्म्यं वद सांप्रतं । ज्ञानवापीं प्र
शंसंति यतः स्वर्गौकसोप्य
लं ॥ स्कंद उवाच घटोद्भव
महाप्राज्ञ शृणु पापापनो
दिनीं । ज्ञानवाप्याः समुत्पत्तिं
कथ्यमानां मयाधुना ॥ अनादि
सिद्धे संसारे पुरा देवयुगे मुने
प्राप्तः कुतश्चिदीशानश्चरन्स्वै
रमितस्ततः ॥ न वर्षति यदाभ्रा
णि न प्रावर्तंत निम्नगाः जलाभि
लाषो न यदा स्नानपानादिकर्मणि
क्षारस्वादूदयोरेव यदासी
ज्जलदर्शनं । पृथिव्यां नरसं
चारे वर्तमाने क्वचित् क्वचित्
निर्वाणकमलावासे श्रीमदा
नंदकानने । स्वरसंभानजन
कं मोक्षसाधनसिद्धिदं । प्रवि
ष्टप्रदेत्रमेतत् स ईशानो ज
टिलस्तदा । लसत्त्रिशूलवि
मलरश्मिजालसमाकुलः ॥
आलुलोके महालिंगं वैकुं
ठपरमेष्ठिनोः । महाहमह
मिकायां प्रादुरासयदादि
तः ॥ ज्योतिर्मयीभिर्माला
भिः पतितः परिवेष्टितं ।
अस्येशानस्य तल्लिंगं दृष्ट्वेच्छे
त्यभवत्तदा ॥ स्नापयामि म
हालिंगं कलशैः शीतलैर्जलैः
चखान च त्रिशूलेन दक्षिणा
शोपकण्ठतः ॥ कुंडं प्रच
ण्डवेगेन रुद्रो रुद्रवपुर्धरः । पृ
थिव्यावरणं भासि निष्क्रांतानि
तदा मुने ॥ भूप्रमाणाद्दशगुणैः
वैरियं वसुधा वृता । तैर्जलैः स्ना
पयांचक्रेत्वस्पृष्टैरन्यदेहिभिः ।
विश्वभर्तृतुषारास्पर्शस्वातिसु
सकातिभिः महावहृष्टस्ततान

787

महाप्रह्लादिविधाविधिः ॥ सहस्र
धारैः कलशैः स ईशानो घटोद्भ
वः । सहस्रकृत्वः स्नपयामास
संहृष्टमानसः ॥ ततः प्रसन्नो भ
गवान् विश्वात्मा विश्वलोचनः
तमुवाच तदेशानं रुद्रं रुद्रवपुर्द्ध
रं ॥ तव प्रसन्नोस्मीशान कर्मणा
नेन सुव्रत । गुरुणानन्यपूर्वेणाम
मातिप्रीतिकारिणा ॥ ततस्त्वं ज
टिलेशान वरं ब्रूहि तपोधन । अदे
यं न भवास्त्यद्य महोद्यमपरायण
ईशाउवाच । यदि प्रसन्नो देवेश
वरयोग्योस्म्यहं यदि । तदेतद
तुलं तीर्थं तव नाम्नास्तु शंकर
विश्वेश्वर उवाच । त्रिलोक्यां या
नि तीर्थानि भूर्भुवः स्वः स्थितान्य
पि । तेभ्योखिलेभ्यस्तीर्थेभ्यः
शिवतीर्थमिदं परं ॥ शिवं ज्ञान
मिति ब्रूयुः शिवशब्दार्थचिंत ।
काः । तच्च ज्ञानं द्रवीभूतमिह मे
महिमोदयात् । अतो ज्ञानोदना
मैतत्तीर्थं त्रैलोक्यविश्रुतं । अस्य
दर्शनमात्रेण सर्वपापैः प्रमुच्यते
ज्ञानोदतीर्थसंस्पर्शादश्वमेधफ
लं लभेत् । स्पर्शनाचमनाभ्यां च
राजसूयाश्वमेधयोः फल्गुती
र्थे नरः स्नात्वा संतर्प्य च पिता म ।
ज्ञान् यत्फलं समवाप्नोति त
दत्र श्राद्धकर्मणि ॥ ज्ञानरूपो
हमेवात्र द्रवमूर्तिं विधाय च ।
जाड्यविध्वंसनं कुर्यां कुर्यां ज्ञा
नोपदेशनं ॥ इति दत्वा वरान्
शंभुस्तत्रैवांतरधीयत । कृ
तकृत्यमिवात्मानं सोप्यमं
स्त त्रिशूलभृत् ॥ ईशानो
जटिलो रुद्रस्तत्प्राश्य प
रमोदकं । अवाप्तवान् परं ज्ञा
नं येन निर्वृतिमाप्तवान् ॥
इति स्कंदे काशीखंडे ३३
अध्यायः ॥
ज्ञेयं त्रि ज्ञानयोगस्य । ज्ञान
ज्ञंयथा । ज्ञेयं यत्तत्प्र
वक्ष्यामि यज्ज्ञात्वामृतमश्नु
ते । अनादिमत्परं ब्रह्म न
सत्तन्नासदुच्यते ॥ सर्वतः
पाणिपादं तत्सर्वतोक्षिशि
रोमुखं । सर्वतः श्रुतिमल्लो
के सर्वमावृत्य तिष्ठति ॥ सर्वें
द्रियगुणाभासं सर्वेंद्रियवि
वर्जितं । असक्तं सर्वभृच्चैव
निर्गुणं गुणभोक्तृ च ॥ ब
हिरंतश्च भूतानामचरं चर
मेव च । सूक्ष्मत्वात्तदविज्ञे
यं दूरस्थं चांतिके च तत् । अवि

भक्तं च भूतेषु विभक्तमिव
च स्थितं भूतभर्त्तृ च तज्ज्ञेयं ग्र
सिष्णु प्रभविष्णु च ॥ ज्योतिषा
मपि तज्ज्योतिस्तमसः परमु
च्यते । ज्ञानं ज्ञेयं ज्ञानगम्यं हृ
दि सर्व्वस्य विष्ठितं ॥ इति क्षे
त्रं तथा ज्ञानं ज्ञेयं चोक्तं स
मासतः । मद्भक्त एतद्वि
ज्ञाय मद्भावायोपपद्यते ॥
इति श्रीभगवद्गीतायां १३
अध्यायः ॥
ज्या ग्रि जरायां । जराग
तवक्रवयोभावः । ग्रि जि
नाति वृद्धः । जीनः ज्यातिः ।
इति दुर्गादासः ॥
ज्या स्त्री धनुर्गुणः । तत्पर्य्या
यः । शिञ्जा ५ जीवा ६ पत्न
चिका ७ । इति शब्दरत्नाव
ली । गव्या ८ वाणासनः ।
९ गुणः १० इति हेमचन्द्रः ॥
ज्यायान् त्रि वृद्धतमः । तत्
पर्य्यायः । अतिवृद्धः ५ दश
मीस्थः ६ इति जटाधरः ॥
ज्यु उ. गत्यां । उ. ज्यवते ।
इति दुर्गादासः ॥
ज्युत अ उ. दीप्तौ । अ
त्स्यादित्युक्तः । अज्युतज्यो
तत् । उ. ज्योतते चेद्रः ।
इति दुर्गादासः ॥
ज्युत इर दीप्तौ । इर अ
ज्युतत् अज्योतीत् ज ज्यो
त । इति दुर्गादासः ॥
ज्या उ. नियम व्रतादेशोपनी
तिषु । व्रतस्यादेशो व्रतादेशः
उ. ज्यवते यात्त्रिको नियमी ।
स्यादित्यर्थः । ज्यवते पैतृतोऽज
नेच्छ्रतमुपदिशतीत्यर्थः । ज्य
वते पुत्रं विप्रः उपनयतीत्य
र्थः । इति दुर्गादासः ॥
ज्योतिर्हस्ता स्त्री दुर्गा । यथा
हस्ते शरीरमित्याहु र्हस्तं च ग
गनं तथा । ज्योतिषि ग्रह न
क्षत्राज्ज्योतिर्हस्ता ततः स्मृता
इति देवीपुराणे देवीनिरु
क्तनाम ४५ अध्यायः ॥
ज्योत्स्ना स्त्री दुर्गा । यथा ।
प्रभा प्रभादर्शितत्वात् ज्योत
स्ना चन्द्रार्कमालिनी । इति दे
वीपुराणे ४५ अध्यायः ॥ अ
पि च रौद्रायै नमो नित्यायै ।
गौर्य्यै धात्र्यै नमो नमः ॥
ज्योत्स्नायै चेन्दुरूपिण्यै सु
खायै सततं नमः ॥ इति मा
र्कण्डेये देवीमाहात्म्ये ५ ।

अध्यायः ॥
ज्रि अभिभवे । रेफोपधः ।
ज्रयति शत्रुं बली । इति दु
र्गादासः ॥
ज्री ग्रि कि ज्याने । ग्रि
ज्रिणाति ज्रीणः ज्रीणिः ।
कि ज्राययति ज्रयति । ग्रि
काभ्यामेव यात्त्रिकत्वादि
सिद्धे कि पाठो ण्यादित्वार्थः
इति दुर्गादासः ॥
ज्वर म रोगे । ज्वरति ज
नो धातुवैषम्यात् । स ज्वर
यति । इति दुर्गादासः ॥
ज्वरः पु रोगविशेषः तत्
पर्य्यायः । तापकः ७ सन्तापः
८ इति शब्दरत्नावली ॥ तस्य
गारुडोक्तनिदानादि यथा ।
धन्वन्तरिरुवाच । वक्ष्ये ज्वर
निदानं हि सर्व्वज्वरविबुद्धये ।
ज्वरो रोगपतिः पाप्मा मृत्यु रो
जोऽशनोऽन्तकः ॥ क्रोधो द
क्षाध्वरध्वंसी रुद्रोर्द्ध्वनयनोद्भ
वः । तत्सम्भवो मोहमयः
सन्तापात्मापचारजः ॥ विवि
धै र्नामभिः क्रूरो नानायोनि
षु वर्त्तते । पाकलो गजेष्वभि
तापो वाजिषु अलर्कः कुक्कुरेषु
इन्द्रमदो जलदेष्वनीलिका
ज्योतिरोषधिषु भूम्यामूष
रो नाम ॥ हृल्लासच्छर्द्दनका
सः स्तम्भः शैत्यत्वगादिषु ।
अङ्गेषु शीतपिडकामात्रा
दहः कफोद्भवे ॥ कालेयथा
स्वस्ववैषा प्रवृत्ति र्हेत्विरेववा
निदानोक्तानुपशयो विपरी
तोपशायिता ॥ अरुचिश्चा
विपाकश्च स्तम्भमालस्यमे
व च । हृद्दाहश्च विपाकश्च तन्द्र
मालस्यमेव च ॥ वलिर्विस
र्गीविलयादोषाणामप्रवर्त्तनं
लालाप्रसेको हृल्लासः क्षुन्ना
शो रसदं मुखं ॥ यच्च सष्टगु
रुत्वं च गात्राणां वक्रमूत्रता ।
न विजीर्णान्न चाग्लानि र्ज्वरस्या
मस्य लक्षणं ॥ क्षुत्क्षामता
लघुत्वं च गात्राणां ज्वरमार्द्दवं
दोषप्रवृत्ति रष्टाहो निरामज्व
रलक्षणं ॥ यथास्वलिङ्गं सं
सर्गे ज्वरसंसर्गजोऽपि वा ।
शिरोऽर्त्तिर्मूर्च्छावमि देहदाह
कण्ठास्यशोषारुचिपर्व्वभेदाः
उन्निद्रता सम्भ्रमरोमहर्षा ज्र
म्भातिवाक्त्वं पवनात् सपित्तात्
तापहृत्यरुचिसर्व्वशिरोरुक्पीन

स्यासनकासविबंधाः। शी
तत्नास्यतिमिरभ्रमितन्द्राः श्ले
ष्मवात जनितज्वरलिंग॥
शीतरुक्षमखेददाहबाधस्या
त्सकासः श्लेष्मपित्तप्रहृ
तिः।मोहस्तंद्रालिप्ततिक्तास्य
ता च श्लेष्मपित्तज्वरस्य
सर्वजो लक्षणैः सर्वैर्दाहोऽ
त्र चमुहुर्मुहुः।तद्वच्छीतंम
हानिद्रादिवाजागरणं निशि
सदा वा नैव वा निद्रा महास्वे
दोति नैव वा। गीत नर्त्तन
हास्यादि प्रकृतेहाप्रवर्त्तनं
साश्रुणी कलुषे रक्ते भग्ने लु
लितपक्ष्मणी। अक्षिणी पि
ण्डिका पार्श्वमूर्द्धपर्वास्थिरुक्।
भ्रमः॥स्रस्तोसरुजौ क
र्णौ महास्वेदोति नैव वा।परि
दग्धाखरा जिह्वा गुरुस्रस्ता
गात्रनिभा रक्तपित्तकफेजि
ह्वालोचने शिरसोःतिरुक् को
ष्ठानां श्यावरक्तानां मण्डलानां
च दर्शनं॥हृद्व्यथा मलसंस
र्गः प्रवृत्तिर्वाल्पशोऽतिवा। स्नि
ग्धास्यतावलक्षयः स्वरसादः प्र
लापिता दोषपाकश्चिरात्तन्द्राप्र
तेतेकं च कूजनं।सन्निपातमभि

न्यासंतं ब्रूयाच्चहृतौजसं॥वा
युना कफरुद्धेन पित्तमंतः स
पीडिते। व्याप्यचिताच्च सोऽत्या
श्चवर्हिर्मार्गं प्रपद्यते॥ तेन हा
रिद्रनेत्रत्वं सन्निपातोद्भवे ज्व
रे। दोषे विरुद्धेनष्टे ऽग्नौ सर्वस
म्पूर्णलक्षणः।असाध्यः सोऽ
न्यथा कृच्छ्रो भवेद्वैकल्पदोऽपि
वा। अन्यश्च सन्निपातोऽत्यो
यत्र पित्तं पृथक् स्थितं। त्वचि
कोष्ठे च वा दाहं विदधाति पु
रोऽनु वा। तद्वत्तान कफो
शीतं दाहादि दुस्तर स्तयोः
शीतादौ तत्र पित्तेन कफे।
स्यंदितशोषिते। शीते शान्ते
ऽम्लकेमूर्च्छामदतृष्णाश्च जा
यते॥दाहादौ पुनरन्ते स्युस्त
न्द्राष्ठेदवमिक्लमाः॥ ॥
आगंतुरभिघाताभिषंगशापा
भिचारतः॥चतुर्द्धातत्क्षते
च्छेदाद्यैरभिघातजः॥
श्रमाच्च तस्मिन्पवनः प्रायो
रक्तं प्रदूषयन् सव्यथा शोक
वैवर्ण्यसरुजं कुरुते ज्वरं।ग्र
हावेशौषधि विष क्रोध भी
शोक कामजः॥अभिषंगाद्
ग्रहेणास्मिन्नकस्माद्धासरोदने

791

औषधीगंधजे मूर्च्छा शिरोरु
ग्वमथुःक्षवः॥विषान्मूर्च्छा
तिसारास्यश्यावतादाहरुड्
भ्रमः।क्रोधात् कम्पः शिरो
रुक् च प्रलापो भयशोकजे
कामाद्भ्रमोऽरुचिर्दाहो ह्री
निद्राधीधृतिक्षयः। ग्रहादौ
सन्निपातस्य रूपादौ मरुत
स्तयोः॥कोपः कोपेऽपि पि
त्तस्य यौ तु शापाभिचारजौ
सन्निपातज्वरौ घोरौ भाव
सह्यतमौ मतौ॥ तत्राभि
चारिकैर्मंत्रैर्हूयमानस्य त
प्यते। पूर्वं चेतस्ततो देहस्त
तो विस्फोटतृड्भ्रमैः सदा।
हमूर्च्छाग्रस्तस्य प्रत्यहं वर्द्धते
ज्वरः।इति ज्वरोऽष्टधा दृष्टः
समासाद्द्विविधस्तु सः॥शारी
रो मानसः सौम्यस्तीक्ष्णोऽन्तर्व
हिराश्रयः। प्राकृतो वैकृतः
साध्योऽसाध्यः सामो निराम
कः॥पूर्वं शरीरे शारीरे ता
पो मनसि मानसे।पवने यो
गवाहित्वाच्छीते श्लेष्मयुते
भवेत्॥दाहः पित्तयुते मिश्रं
मिश्रेऽन्तः संश्रये पुनः ज्व
रोऽधिकं विकाराः स्युरन्तःदो

भो मलग्रहः॥वहिरेव वहि
र्वेगो तापोऽपि च सुसाधितः।
वर्षाशरद्वसंतेषु वाताद्यैः
प्राकृतः क्रमात्॥वैकृतोऽन्यः
स दुःसाध्यः प्रायश्च प्राकृतो
ऽनिलात्।वर्षासु मारुतो दु
ष्टः पित्तश्लेष्मान्वितो ज्वरं॥
कुर्यात् पित्तं च शरदि तस्य
चानुबलः कफः। तत्प्रकृत्या
विसर्गाच्च तत्र नानशनाद्भयं॥
कफो वसंते तमपि वातपित्तं
भवेदनु। बलवत्स्वल्पदोष
ज्वरः साध्योऽनुपद्रवः॥स
र्वथा विकृतिज्ञाने प्रागसाध्य
उदाहृतः।ज्वरोपद्रवतीक्ष्णत्व
मग्लानिर्बहुमूत्रता॥न प्रवृत्ति
र्न विजीर्णा न तृट्सामज्वरा
कृतिः।ज्वरवेगोऽधिकस्तृष्णा
प्रलापः श्वसनं भ्रमः॥मलप्र
वृत्तिरुत्क्लेशः पच्यमानस्य ल
क्षणं।जीर्णतामविपर्यासात्
सप्तरात्रं च लंघनात्॥ज्वरः पं
चविधः प्रोक्तो मलकालबला
बलात्।प्रायशः सन्निपातेन
भूयसा चूपदिश्यते सततः स
ततोऽन्येद्युस्तृतीयक चतुर्थ
कौ। प्रात मेव शाकदाहि।

स्रोतसा व्याप्तिनो मलाः॥ ता
पर्यन्तस्तनं सर्वान्तल्पदृष्ट्यादि
वर्द्धिताः। वलिनो गुरव स्तद्
द्विशेषेण रसान्विताः॥ सतते
निष्प्रतिहं द्वाज्वरं कुर्य्युः सदुः
सहं। मलस्तप्रकोष्मा धातवा
स शीघ्रं तत्पर्येततः॥ सर्वाका
रं रसादीनां शुद्ध्याशुद्ध्यापि वा।
क्रमात्। वातपित्तकफैः सप्त
दश द्वादशवासरान्॥ प्रायो
ऽनुयाति मर्य्यादां मोक्षाय च वधा
य च। इत्यग्निवेशस्य मतं हा
रीतस्य पुनः स्मृतिः॥ द्विगुणा
सप्तमी या च नवम्येकादशी तथा
एषा त्रिदोषमर्य्यादा मो
क्षाय च वधाय च॥ शुद्ध्याशुद्धो
ज्वरः कालं दीर्घमप्यनुवर्त्तते
कृशानां व्याधियुक्तानां मिथ्या
हारादिसेविनां॥ अल्पोऽपि दो
षोऽदुष्टादेर्लब्ध्वान्यतमतो व
लं। सप्रत्यनीको विषमं यस्मा
द्धिहितयाश्रितः॥ सोऽरिपक्षो
ज्वरं कुर्य्याद्विषमक्षयवृद्धिभा
क्। दोषः प्रवर्त्तते तेषां स्वे का
ले ज्वरयन् बली॥ निवर्त्तते पुन
श्चैव प्रत्यनीकबलाबलः॥ क्षी
णदोषज्वरः सूक्ष्मो रसादि।

ष्वेव लीयते॥ लीनत्वात् का
र्श्यवैवर्ण्यजाड्यादीनादधाति
सः॥ आसन्नविवृतास्यत्वात् स्रो
तसां रसवाहिनां॥ आशु सर्वस्य
वपुषो व्याप्तिर्दोषेण जायते।
संततः सततस्तेन विपरीतो
विपर्य्ययात्॥ विषमो विषमा
रम्भः तत्पाकालेन संगवान्।
दोषो रक्ताश्रयः प्रायः करोति
सततं ज्वरं॥ अहोरात्रस्य संधिः
स्यात् सकृदन्येद्युराश्रितः।
तस्मिन्मांसवहा नाडी मेदो
नाडी तृतीयके॥ ग्राही पित्ता
निलान्मूर्द्धस्त्रिकस्य कफपित्त
तः। सपृष्ठस्यानिलकफात्
स चैकाहान्तरः स्मृतः॥ चतु
र्थको मलैर्मेदोमज्जास्थ्यन्यत
रस्थिते मज्जास्थान्यतरस्थिते।
मज्जास्थ एवेत्यपरः प्रभावमनु
दर्शयेत्॥ द्विविधं कफेन जं
घाभ्यां स पूर्वं शिरसोऽनिलात्।
अस्थिमज्जोरुभयगते चातुर्थक
विपर्य्ययः। त्रिधा प्रकृं ज्वरय
ति दिनमेकं च मुञ्चति। वल
वलेन दोषाणामनुवेशादिजन्म
नां॥ पक्वान्नसविपर्य्यासात्तस
प्रयाणेन लक्षयेत्। ज्वरः सा
नुमनसस्तद्वत् कर्म्मणाश्चतरा

तदा॥ गंभीरस्थानचारित्वात्
सन्निपातेन संभवात्। तत्प्र
कृत्याच्च दोषाणां दुश्चिकित्स्य
श्चातुर्थकः॥ स्वस्थानस्थस्वत
नासो गुरुहारतरेषु च। दोषो
रक्तादिमार्गेषु शनैरल्पश्चिरे
णयतः। याति देहं च नाशाय
संभापादीन् करोत्यतः क्रमो
यत्नेन विच्छिन्नः संतापोऽल्प
तेज्वरः॥ विषमो विषमार
म्भः तत्पाकालानुसारवान्
यथो ज्वरः मरमति मंदपालि
धिपायथ॥ कालेनाप्नोति।
सदृशान् स रसादींस्तथा।
तथा। दोषोज्वरयति क्रोहश्चि
रात्रिरतेरेणव॥ भूमौ स्थितं
जलैः स्तिक कालमेव प्रती
तते। अंकुराय यथा वीजं दो
षवीजं भवेत्तथा॥ वेगं कृत्वा
विषं यद्वदाशये लीयते वले
कुप्यत्याप्यवले भूयः कालेदो
षविषं तथा॥ एवं ज्वराः प्रव
र्त्तते विषमाः सततादयः।
अरत्येको गौरवं दैन्यं भं
गोऽङ्गानां विजृम्भणं॥ अरो
चकोवमिः श्वासः सर्वस्मिन्
स्तोज्वरे। रक्तनिष्ठीवनं तृष्णा

अंदाहोस्त पिडकोद्गमः॥ दाहि
रागभ्रममदप्रलापा रक्तसं
श्रिते। तृट् ग्लानि स्पष्टवर्च्च
स्कमन्तर्दाहो भ्रमस्तमः॥
दौर्गन्ध्यं गात्रविक्षेपो मांसस्थे
मेदस्थिते। स्वेदोऽतितृष्णा
वमनं दौर्गन्ध्यं चासहिष्णुता॥
प्रलापो ग्लानिररुचि ररु
गे त्वस्थिभेदनं। दोष प्र
हति रुद्धोयः श्वासोऽङ्गादेपक्
जनं॥ अन्तर्दाहो वहिः शैत्यं
श्वासो हिक्का च मज्जगे। त
मसो दर्शनं मर्मच्छेदनं स्त
व्धमेढ्रता॥ शुक्रप्रवृत्तिर्म
त्युश्च जायते शुक्रसंश्रये। उ
नेत्रो ज्वरः। साध्याः पञ्चाम्यत
विपर्य्यये॥ प्रलिप्तमिव गा
त्राणि श्लेष्मणा गौरवेति च।
मंदज्वरः प्रलापस्तु सशीतः
स्यात् प्रलेपकः॥ निःस्वेदज्वरो
रुक्षः शीतः कृच्छ्रेण गच्छति।
स्तव्धाङ्गः श्लेष्मभूयिष्ठो भवेद्दे
गवलाशकः॥ हारिद्राभेदवर्णो
भस्तद्दलेपः प्रमेहति। स वै हा
रिद्रकोनामज्वरभेदोऽन्तक
स्मृतः॥ कफवातौ समौ यत्र
हीनपित्तस्य दाहनः। नीद्भो

एवं दिवा मंदो जायते रात्रिजो
ज्वरः ॥ दिवाकरापीतबले ।
व्यायामाच्च विशोषिते शरीरे
नियतस्यात्तान्ज्वरः स्यात्पौर्व
रात्रिकः ॥ आमाशये यदा उ
द्रे श्लेष्मपित्ते ह्यधःस्थिते ।
तदार्द्धं शीतलं देहे तदर्द्धं चोष्णं
प्रजायते ॥ काये पित्तं यदा
उद्रे श्लेष्मा चांते व्यवस्थितः
उष्णत्वं तेन देहस्य शीतत्वं
करपादयोः ॥ रसरक्ताश्रयः
साध्यो मांसमेदोगतस्तथा ।
अस्थिमज्जागतः कृच्छ्रैस्तैस्तैः
सांगैर्हतः प्रभुः ॥ विसर्गो
ज्वरवेगार्त्तः सक्षोभ इव दीय्य
ते । सदोषशब्दश्च शाठ्यद्रवं मु
क्ति वेगवान् । देहो लघुर्व्यपग
तक्लममोहतापः पाको मु
खे करणसौष्ठवमव्यथत्वं ।
स्वेदः क्षवः प्रकृतिगामि मनो
ऽन्नलिप्सा कण्डूश्च मूर्ध्नि विग
तज्वरलक्षणानि ॥ इत्यादि
महापुराणे गारुडे ज्वरनि
दानं समाप्तं ॥ १५२ अध्यायः
अथ ज्वरस्य चिकित्सा । ध
न्वंतरिरुवाच । ज्वरोऽथ धाह
घकुर्द्धसंयातागतजः स्मृतः ॥

मुस्तपर्पटकोशीरचंदनोदी
च्यनागरैः ॥ शृतशीतं जलं द
द्यात् पिपासाज्वरशांतये ॥१॥
नागरं देवकाष्ठं च धन्याकं बृ
हतीद्वयं ॥ दद्यात् पाचनकं पू
र्वं ज्वरिताय ज्वरापहं ॥२ आ
रग्वधाभयामुस्ततिक्ताग्रंथि
कनिर्मितः ॥ कषायः पाचनं
सामे सशूले च ज्वरे हितः ३ म
धुकसारसिंधूत्थवचोषणकणाः
समाः । श्लक्ष्णं पिष्ट्वांभसा न
स्यं कुर्यात्संज्ञाप्रबोधनं ४
त्रिवृद्विशालात्रिफलाकटु
कारग्वधैः कृतः ॥ सक्षारो
भेदनः क्वाथः पेयः सर्वज्वराप
हः ५ महौषधामृता मुस्तचं
दनोशीरधान्यकैः । क्वाथ
स्तृतीयकं हंति शर्करामधु
योजितः ॥ ६ अपामार्गजटाक
टिलोहितैः सप्ततंतुभिः ॥
बद्धा वारे रवेर्नूनं ज्वरं हंति तृती
यकं ७ । गंगाया उत्तरे कूले
स्याप्तुत्र तापसो स्मृतः । तेन
तिलोदकं दद्यान्मुच्येत्सैकाहिको
ज्वरः ॥८॥ गुडूच्याः क्वाथकल्का
भ्यां त्रिफलाया वृषस्य च ॥ मृद्वी
काया बलायाश्च सिद्धाः स्नेहाः ज्वरच्छिदः ९

धात्रीशिवाकणा वह्निः क्वाथः
सज्वरांतकः ॥१०॥ ज्वरातिसा
रहरणमौषधं प्रवदाम्यथ ।
पृश्निपर्णी बलाबिल्वनागरो
त्पलधान्यकैः ॥ पाठेंद्रयवभू
निंबमुस्तपर्पटकाः स्मृताः
जयंत्याममतीसारज्वरं सम
दोषधाः ११ नागरातिविषामु
स्तभूनिंबामृतवत्सकैः । सर्व
ज्वरहरः क्वाथः सर्वातीसार
नाशनः १२ मुस्तपर्पटकोदीच्य
शृंगवेरशृतं पयः । शालपर्णी
पृश्निपर्णी बृहतीकंटकारि
का ॥ बलाश्वदंष्ट्राबिल्वानिपा
ठानागरधान्यकं । एतदाहार
संयोगे हितं सर्वातिसारिणां ॥
१३ बिल्वं चूतास्थि निर्यूहः खं
डं मध्वतिसारणम् ।१४। अती
सारे हितं स्तब्धकुटजत्वक्
फलाहृतः ॥ १५ ॥ वत्सकाति
विषाबिल्वबालकं स्कषाय
कः । सविश्व आममूलाकोल
तीसारे सशोणिते ॥ १६ इति गा
रुडे १५४ अध्यायः । अपि च ।
हस्तवहुपलाशस्यापामार्ग
स्यवाहरः । मूलं सर्वज्वरहरं भूत
प्रेतादिनस्यंत १७ पीतं हृश्चिक
मूलं तु पर्युषितजलेन वै ।

सार्द्धं विनाशयेद्दाहं ज्वरं चप
रमेश्वर ॥१८॥ शिखायां चैव
नद्धं भवेदैकाहिकादिनुत्
१९ पतत्रसकांजिकं पीतं रक्त
कुष्ठज्वरादिनुत् ॥२०॥ इति त
त्रैव १५३ अध्यायः ॥ वचा त्रि
कटुकं चैव करंजदेवदारु च ।
मंजिष्ठा त्रिफला श्वेता शिरीषो
रजनीद्वयं ॥ प्रियंगुनिंबत्रिकटु
गोमूत्रेण च वर्षितं । नस्यमाले
पनं चैव स्नानमुद्वर्त्तनं तथा ॥ अ
पस्मारविषोन्माद शोषालक्ष्मी
ज्वरापहं । भूतेभ्यश्च भयं हंति रा
जद्वारे च शासनं ॥२१॥ अभया
मलकद्राक्षापाठाचैव विभीतकं
शर्करा च समं चैव जयेज्ज्वरह
रं भवेत् ॥ २२ ॥ इति च गारुडे १५५
अध्यायः ॥
अथ वैद्यकमतेन सामान्यतो ज्व
रस्य चिकित्सामाह । अंशांशो
यत्र दोषाणां विवेक्तुं नैव शक्य
ते । साधारणी क्रियां तत्र
विदध्याच्चिकित्सकः ॥ सा
मान्यतो ज्वरी पूर्वं निर्वातेऽनिल
येवसेत् । निर्वातमायुषो हितमा
रोग्यं कुरुते यतः ॥ वीजनस्या
निलस्यास्य स्वेदमूर्च्छा

श्रमापहः। तालवृन्तभवो वा
न त्रिदोषशमनो मतः ॥
वंशपत्रजनजः सोऽस्मो रक्तपि
त्तप्रकोपणः। चामरो वस्त्रसं
भूतो मायूरो वेत्रजस्तथा ॥
एते दोषजिता वाताः स्निग्धा
रूक्षाः सुपूजिताः ॥ नवज्वरी
भवेद्यत्नात् रूक्षवसनावृतः
यथा तप्तं पानीयं पिबेत् किं
चित्त्रिवारयन्। विनापि भेषजै
र्व्याधिः पथ्यादेव निवर्तते ॥ न
तु पथ्यविहीनस्य भेषजानां
शतैरपि। ततो ज्वरे वर्जनी
यान्याह सुश्रुतः। परिषेका
न् प्रदेहांश्च स्नेहान् संशो
धनानि च। दिवास्वप्नं व्यवायं
च व्यायामं शिशिरं जलं ॥ क्रो
धप्रवातभोज्यानि वर्जयेत्तरु
णज्वरी। परिषेकः स्नानादिः
स्नेहान् पाने निषिद्धान् ॥
निषिद्धानिषेधादोष माह।
शोषं छर्दिं मदं मूर्छां भ्रमं
तृष्णा मरोचकं। प्राप्नोत्य
पक्वानेतान् परिषेकादि
सेवनात् ॥ आदिशब्देन प्र
देहादयो गृह्यन्ते ॥ हारी
तेन प्रत्येकं दूषणमुक्तं।

व्यायामाज्ज्वरसंवृद्धिर्व्यवायात्
स्तम्भ मूर्छनं। स्नानेऽस्य स्नेहपा
नात् मूर्छा छर्दि मदो रुचिः।
गुर्वन्नभोजनात् स्वमाहि हम्भो
दोषकोपनं। अग्निसादः स्वर
त्वं च श्रोतसां चाप्रवर्तनं ॥ स्न
तिरिक्तवायादिस्पत्रसंवध्यते
स्वप्नात् दिवास्वापात् ॥ अन्न
च्च वर्जयेत्। सज्वरो ज्वरमु
क्तो वा विदाही नि गुरूणि च ॥
असात्म्यान्यन्नपानानि विरु
द्धाध्यशनानि च ॥ व्यायाम
ति चेष्टां चाभ्यंगं स्नानं च वर्ज
येत्। तेन ज्वरः शमं याति
न शान्तश्च पुनर्भवेत् ॥ ज्व
रीलंघनं कुर्यादिति चरकः वा
ग्भटश्च ॥ आमाशयस्थो ह
त्वाग्निं सामो मार्गं पिधापयन्
विदधाति ज्वरं दोषस्तस्मात् लं
घनमाचरेत् ॥ अस्यायमर्थः
यतो हेतोः आमाशयस्थो दो
षो वात पित्त श्लेष्मरूपः स्वहेतु
दुष्टः अग्निं हत्वा आच्छाद्य सा
मः अपक्वाहारः सारसहित
मार्गं रसमार्गं पिधापयन् ॥
अग्निषित्वाद्दहनावपि कर्मीरान्
तेन पिदधति त्यर्थः। ज्वरं क

797

रोति तस्माद्धेतो ज्वरी लंघनमाच
रेदित्यर्थः ॥ त्रिविधं त्रिविधे दो
षे तत् समीक्ष्य प्रयोजयेत्।
दोषेऽल्पे लंघनं पथ्यं मध्ये
लंघन पाचनं ॥ प्रभूते शोध
नं तत्र मूलादुन्मूलयेन्मला
न्। चरकश्च। तरुणे तु ज्वरे।
पूर्वं लंघनेन तथैन येत्। आ
मदोषमलिंगत्वात् लंघयीत य
थाविधि ॥ अन्यच्च। ज्वरादौ।
लंघनं कुर्यात् ज्वरमध्ये तु पा
चनं। कुर्यात् कोष्ठशुद्धौ य
थाबलं ॥ दोषशेषस्य पाकार्थं
मग्नेः संधुक्षणाय च। लंघित
श्चाप्यदोषश्च यवागूपानमाच
रेत् ॥ शाल षष्टिक मुद्गान्ना
पूर्यवा शस्त माहरेत्। पंच
कोलेन संसिद्धा यवागू मेध्य
लंघने ॥ अतिलंघितेन वातेन दुष्ट
तस्य संतर्पणं हितं। द्राक्षादाडि
मखर्जूर पियालैः सपरूषकैः
तर्पणं हैतकर्तव्यं तर्पणं ज्वर
शान्तये। यवलंघन पाहेनान
शान मुच्यते। यत आह सु
श्रुतः। आनद्ध स्तिमिते दोषे
र्यावंतं कालमातुरः ॥

तावत्तन शानं कुर्यात्ततः संसर्ग
माचरेत् ॥ आनद्ध स्तिमिते
दोषे निस्थले दोषैः संवद्धः।
संसर्गः ओषधादिप्रसंगं ॥
यत् चरक आह। चतः प्र
कारा संशुद्धिः पिपासा मा
रुतातपौ। पाचनान्युपवासश्च
व्यायाम श्चेति लंघनं ॥ च
तुःप्रकारा संशुद्धिः वमनविरे
चन निरूहवस्ति शिरोविरेच
नानि। तत्त्वनुवासनेन तस्य हर
णात्वात्। अत्र लंघनं कर्षणमि
त्यर्थः। तथा च सुश्रुतः। शरी
रलाघवकरं यद्द्रव्यं कर्म वा पुनः
तल्लंघनमिति ज्ञेयं बृंहणं तु
पृथक् विधं ॥ लंघनात् कर्ष
णादन्यत् शरीरपोषकमित्य
र्थः ॥ ननु आनद्ध स्तिमिते दो
षैः रित्यादि पूर्वोक्त सुश्रुतव
चनात् सामान्यतो ज्वरिणो य
था शास्त्ररूपं लंघनं क्रियते त
था चतः प्रकारा संशुद्धिः इ
त्यादि चरकवचनाद्वमनादि
रूपं लंघनं सर्वज्वरिभिः कथं
न क्रियते। तत्रोच्यते वमनादि
कमवस्थाविशेषेषु क्रियते न
तु सर्वज्वरेषु। तथा च सुश्रुतः।

सोतक्लेशेप्रोवल्लिनेदेयंवमनंश्ले
ष्मकेज्वरे। पित्तप्रायेविरेकस्तु
कार्य्यः प्रशिथिलाशये ॥ प्र
शिथिलाशये अत्र श्रोपसर्गः
वैपरीत्येनेनग्रहाशयेइत्यर्थः
सरुजेऽनिलजेकार्य्यसोदाव
र्तेनिरूहणं। कफाभिपन्नेशिर
सिकार्य्यमूर्द्धविरेचनं ॥ अपिव
सर्वज्वरिभिः पिपासानिग्रहस्त्व
नकार्य्य। यतआहहारीतः। त
स्मागरीयसीघोरासद्यः प्राण
विनाशिनी। तस्माद्देयंतृषा
र्त्तायपानीयंप्राणधारणं ॥
अतोऽवस्थाविशेष एव पि
पासासहनं ॥ ज्वरिभिर्मारुत
सेवनंनकार्य्य। सन्धृतेनप्रवा
तसेवनस्यसर्वथानिषिद्धत्वात्
अतोमारुतसेवनं अवस्थावि
शेषएवयुक्तं। आतपसेवनंचा
वस्थाविशेषएवसंगृहीतं ॥ लं
घनेनाथयवागूभिर्यदा दोषो न
पच्यते। तदा तं मुखवैरस्य
तृष्णारोचकनाशनैः ॥ ज्वर
घ्नैः पाचनैर्हृद्यैः कषायैः
समुपाचरेत्। इत्यत्र लंघन
पाचनयोः स्फुट एव भेदः
वाया ॥

मोपिनकार्य्यस्तस्यातिनिषिद्ध
त्वात्। अवस्थाविशेषे पुनः पा
र्श्वपरिवर्त्तनादिरूपः सोपि क
र्त्तव्यः। तस्माच्चतुः प्रकारा सं
शुद्धिरित्यादिश्लोके लंघन पदं
कर्षणपर्य्याय मिति निर्णीतं ॥
अनशनरूपस्यलंघनस्यफलमा
ह। लंघनेनक्षयंनीतेदोषे संधु
क्षितेऽनले। विज्वरत्वं लघुत्वं
चक्षुच्चैवास्यापजायते। लंघनेन
अनशनेन दोषेप्रहृते क्षयंनीते
यतआह। आहारं पचति शिखी
दोषानाहारवर्जितः। पचतीति।
संधुक्षितेऽनलेआच्छादकदोषे
संक्षीणेअग्नौप्रदीप्ते। यथोक्तसं
प्राप्ति सामग्री विघटनात्। वि
ज्वरत्वं शरीरस्य गौरवाभावेन भा
लघुत्वं। ततश्चभुक्ताचजायते
इत्यर्थः ॥ अन्यच्चाह सुश्रुतः ॥
अनवस्थितदोषाग्नेर्लंघनं दोष
पाचनं। ज्वरघ्नं दीपनं कां
क्षा रुचि लाघवकारकं ॥
अनवस्थितदोषाग्नेः अनव
स्थितः स्वस्थानादितस्ततो ग
तोदोषोऽग्निश्च यस्य तस्य ज्वरि
णः। कांक्षा अन्नाभिलाषः।

रुचिः लंघनेनामपाकान्मुख
शोषादिनाशेमुखस्ययत्प्रकृ
तत्वंसैवरुचिः शोभा। रुचिः स्त्री
दीप्तौशोभायामभिष्वंगाभिला
षयोरिति मेदिनीकारः ॥
सम्प्रतिकृतस्यलंघनस्यलक्ष
णमाह। वातमूत्रपुरीषाणांवि
सर्गोगात्रलाघवं। हृदयोद्गार
कंठास्यशुद्धौ तंद्राक्लमे गते
स्वेदेजातेरुचौ वापि क्षुत्त्।
पिपासासहोदये। कृतंलंघ
नमादेश्यंनिर्व्यथेचांतरात्म
नि॥ हृदयस्यशुद्धिरनवरो।
धः। उद्गारशुद्धिः सधूमोद्गा
राभावः। कण्ठस्यशुद्धिः।
कफाद्यलिप्तत्वं। आस्यशुद्धिः
मुखस्यप्रकृतरसत्वं। तंद्राक्ल
मेतंद्राचक्लमश्चतस्मिन्तंद्रा
निद्रावत्क्लमोऽग्लानिः क्षु
त्पिपासासहोदयेक्षुत्पिपा
सयोः सहयुगपदुदये। अंतरात्म
निमनसि। एतानिलक्षणानिमि
लितान्येवसम्यक्कृतेलंघनेभ
वंति। तत्प्रसंगेन हीनस्यलं
घनस्यलक्षणमाह। कफोत्क्ले
शः सहृल्लासः ष्ठीवनंचमुहुः।
मुहुः कंठास्य हृदयाशु

द्धिस्तंद्राचहीनलंघने ॥ क
फोत्क्लेशः कफस्यवमनोद्या
पस्थितिः। हृल्लासः हृदयात्क
फस्यनिर्गमः ॥ अतिशयितस्य
लंघनस्यलक्षणमाह। पर्वभे
दोंऽगमर्दश्चकासः शोषोमु
खस्यच। क्षुत्प्रणाशोरुचिस्तृ
ष्णादौर्बल्यंश्रोत्रनेत्रयोः ॥
मनसः संभ्रमोऽभीक्ष्णमूर्द्ध्ववा
तस्तमोहृदि। देहाग्निबलहा
निश्चलंघनेतिकृतेभवेत् ॥ दौ
र्बल्यश्रोत्रनेत्रयोः कर्णनेत्र
योः स्वविषयग्रहणासामर्थ्यं
मनसः संभ्रमः भ्रांतिः। ऊर्द्ध्ववा
तउद्गारवाहुल्यं। हृदितमः अं
धकारप्रविष्टस्येवज्ञानं ॥ बलं
हतन्लंघनंकारयेदित्याह।
बलाविरोधिनाचैनंलंघनेनो
पपादयेत्। बलाधिष्ठानमारो
ग्यंयदर्थोऽयंक्रियाक्रमः ॥ अ
यमर्थः। एनंज्वरिणंबलावि
रोधिना अनतिबलक्षयका
रिणालंघनेनउपपादयेत्
उपचरेत्। कुत इतिचेत्तत्रा
ह यदर्थइति यस्मैआरोग्या
यअयंक्रियाक्रमः चिकित्सो
पक्रमः। ततआरोग्यंबलाधिष्ठा

नंवलाश्रयमित्यर्थः॥ के
षांचिद्दानशनस्य निषेधमाह
सुश्रुतः। नहि मारुतत्स्णा
तन्मुखशोषभ्रमान्वितैः। न
कार्य्यंगुर्विणीवालहद्धदुर्व
लभीरुभिः॥ नत्याधुश्र
मक्रोधकामशोकादिरज्वरे।
ततत्वनशनंउल्वणमारुतयु
क्तेनज्वरिणानकार्य्यं। मारुता
ऽत्रनिरामोवोद्धव्यः। सामेत
मारुतेलंघनंकार्य्यमेव। स्वयं
माहतंत्रांतरे। अवश्य मेव
कुर्वीतज्वरीसामेसमीरणे।
लंघनंसामपाकार्थंनतद्दृष्ट
यथाकफे॥ तदुक्तं आमप
काहुंद्वं। अतएवोक्तं। कफपि
त्तेदृवेयावत्सहेतलंघनंवध।
आमत्वयाहृदूमपिवायुनेस
हतेक्षणं॥ आमस्य लक्षण
माह। आहारस्यरसः सावे
योनपक्कोःग्निलाघवात्।
आमसंज्ञांसलभतेवहुव्या
धिसमाश्रयः॥ तंत्रांतरे।
आम मन्नरसं केचित्केचि
त्तुमलसंचयं। प्रथमांदोषदु
ष्टिंवाकेचिदामंप्रचक्षते। अन्य
च्चाप्यपिपक्वमंसस्केद्दोषंधवह
पि।

द्धिलं। सदनं सर्वगात्राणा
मामइत्यभिशाद्दितः। तेनामे
नसमायुक्तदोषा दृष्याश्चता
दृशाः। तदुद्भवाआमयाश्च
सामा इतिवुधैःस्मृताः॥ अ
त्र सामस्य वातस्य लक्षण
माह। वायुः सामोविवंधा
ग्निसादनंद्राांत्रकूजनेःवेद
नाशोथ निस्तोदैःक्रमशोऽ
गानिपीडयेत्। विचरेद्युग
पञ्चापिगृह्णातिकुपितोभृशं
स्नेहाद्यैर्वृद्धिमायातिमेघच स
र्योदयेनिशि। विचरेद्युगपहा
पुराम क्षेककालं विचरेत्।
कुपितः सामोवायुः भृश म
तिशयेन गृह्णांग्सर्वाणीत्यर्थः॥
तस्यैव निरामस्य लक्षणमाह
निरामो विशदोरुक्षोनिर्विवं
धोःल्पवेदनः। विपरीतगुणैः
प्रांतिंस्निग्धैर्यातिविशेषतः॥
अत्रप्रसंगात्तत्सामस्यपित्तस्य ल
क्षणमाह। पित्तंसामंभवेदस्रंड
गंधंहरितंगुरु। अम्लीकाकण्ठ
हृद्दाहकरं प्रपावं तथास्थिरं॥
अम्लीका अविलचुकी इतिलोके
तस्यैनिरामस्य लक्षण माह।
निरामपीतमातास्त्र मत्युष्णं।

कटुकंसरं। दुर्गंधि रुचिकृद्वह्नि
वलवर्द्धन मीरितं॥ अथसा
मस्यकफस्यलक्षणमाह।
आविल स्तन्तल स्त्यानःकंठ
देशेःवतिष्ठते। सामोवलाशो
दुर्गंध स्तद् त्तयो रभिघातकृत्
स्त्यानः संहतः॥ तस्यनिराम
स्य लक्षण माह। फेनवा नि
रामो निर्गंधः फेणवांस्छेदवा
नपि। भवेत् स पिण्डितः पांडु
रास्यवैरस्यनाशकृत्॥ अथ
सामस्य व्याधे र्लक्षण माह
आलस्य तंद्रा व्यदयाविशुद्धि
र्दोषाप्रवृत्त्याविलम्बत्रलाभिः
गुरूदरत्वारुचित्स्तु मनाभिरामा
स्विंनव्याधिमुदाहरंति। आमं
ज्वरेलंघन कोल्पेयालंघन
मुपोदन तिक्तयूषैः। विदूक्षण
स्वेदनपाचनैश्च संशोधनैरूर्द्ध
मथस्त्रयैव॥ नहि मारुतत्
स्यादित्यादिश्लोके तस्यापि
निरामैव विवक्षिता तेन नि
रामत्वस्माच्चितेन लंघनं न
कार्य्यं। सामायांतस्यांयालंघ
नंकार्य्यमेव। तथामुखशोषाय
भ्रमावपि निरामावेव विवक्षितौ
सामयोस्तुतयो र्लंघनं ॥

कार्य्यमेव॥ गुर्विणीवालद्ध
द्धादिभिरपिनिरामैरेव लंघ
नंनकार्य्यं। सामैः पुनस्तैरपि
लंघनंकार्य्यमेव। क्षयोद्भात
क्षयो राजयक्ष्मा। वातजेज्व
रेलंघनंनकार्य्यं॥ ज्वरी लं
घनेपि जलं पिवेदित्याह
सुश्रुतः। तृषितो मोहमा
याति मोहात्प्राणान्विमुंच
ति। अतः सर्वास्ववस्थासुन
क्वचिद्वारि वारयेत्॥ हारीतश्च
तस्माद्दारीयस्तोदारासद्य : प्रा
णविनाशिनी। तस्माद्देयंतृषा
र्त्ताय पानीयंप्राणधारणं॥
अवश्यंपेयमपिजलंज्वरीकिं
चिद्दारयत् पिवेयतश्चाहसुश्रु
तएव। जीवनंजीविनांजीवो
जगत् सर्वंतु तन्मयं। अतो
ऽत्यंततयासक्तो नक्वचिद्वारिवा
रयेत् ॥ जीवनं जलं ॥ किं
चित्वारयेदेव। तथाच ।
ज्वरे नेत्रामये कोष्ठे मंदेऽ
ऽग्नावुदरे तथा। अरोचके
प्रतिश्यायेप्रसेकेश्वयथौत
ये। व्रणेचमधुमेहेच पानीयं
मंद माचरेत्। प्रसेके मुखप्र
सेके। मंद माचरेत् अल्प।

पिबेत्। यत आह। अतियो ।
गेन सलिलं तृष्यतेपि प्रयो
जितं। प्रयाति शोषं पित्तं तज्ज्व
रितस्य विशेषतः॥ तच्च ज
लं ज्वरी शीतलं न पिबेदित्या
ह सुश्रुतः। नवज्वरे प्रति
श्याये पार्श्वशूले गलग्रहे।
सद्यः शुद्धौ तथाध्माने व्या
धौ वातकफोद्भवे॥ अरुचिग्र
हणीगुल्म श्वास कासेषु वि
द्रधौ। हिक्कायां स्नेहपाने च
शीतवारि विवर्जयेत्॥ अन्य
च्चास एव। सेव्यमानेन शीतेन
ज्वर स्तोयेन वर्द्धते। अत्र शी
तजलमक्वथितं निषिद्धं। न
ध्यासत्तिक्वथितं ग्राह्यं आयात
तत्र क्वथितस्य विधि गुणाश्च
क्वाथ्यमानं तन्निर्वेगं निष्फे
णं निर्मलं च यत्। तत्तोयं क्व
थितं तेय दोषघ्नं पाचनं ल
घु॥ निर्वेगं शान्तेः॥ क्वथि
तस्य विषयानाह सुश्रुतः।
वात श्लेष्मज्वरार्तीय हितं मु
स्तांबु तच्यते। दीपनं स्यात् क
फच्छेदि वातपित्तानुलोमनं
नहि मार्दवकादोषस्तोतसां।
शीतमन्यथा॥ ०। वाग्भ।

टश्च। तस्मात्तोयं प्रयाम मुस्ताम्बु
पिबेद्वात कफज्वरे। ततकफ
विलयं नीत्वा तस्मा माप्नु निव
र्तयेत्॥ उदीर्य्यचाग्निं स्तोतांसि
समत्वं क्षान्त्वं विशोधयेत्। वात
पित्तकफस्वेद शकृन्मूत्राणि
सारयत्॥ अथोष्णोदकस्य ल
क्षणं गुणाश्च। क्वाथ्यमानं तन्नि
र्वेगं निष्फेणं निर्मलं तथा। अ
र्द्धावशिष्टं यत्तोयं तदुष्णोदकमु
च्यते॥ ज्वरकासकफ श्वासवा
त पित्ताम मेदसां। नाशनं। वस्ति
संशोधि पथ्य मुष्णोदकं सदा॥
अथर्तुभेदे जलस्य पाकभेदः॥
त्रिपादशेषं सलिलं ग्रीष्मे शारदि
शस्यते। हिमेऽर्द्धशेषं शिशिरे त
था वर्षावसन्तयोः॥ अन्ये तु। निदा
घे त्वर्द्धपादोनं पादहीनं तु शारदं
शिशिरे च वसन्ते च हिमे चार्द्धा
वशेषितं॥ अष्टमांशावशेषं तु
वारि वर्षासु शस्यते। इति के
चिद्बुधाः प्राहु र्जेज्जटागमदर्शि
नात्॥ केचित्। वसुषंगेषु॥
वेदेषु त्रिषु पदयोः॥ ॥
एकभागावशेषं। स्यात् दतु
वर्षादिषु क्रमात्॥ अत्र दो

803

षाणां यथोत्वणता हीनता
वा तथा व्यवस्था कल्पनीया॥ त
त्र पादहीनं पित्तघ्नं मर्द्धहीनं तु।
वातघ्नं। त्रिपादहीनं श्लेष्मघ्नं
संग्राह्यग्निप्रदं लघु॥ त्रिपादही
नस्य तेजांतरेऽप्यारोग्यांबुसंज्ञा।
तस्य लक्षणं गुणाश्च। पादशे
षस्तु यत्तोय मारोग्यांबु तदुच्य
ते। आरोग्यांबु सदा पथ्यं कास
श्वासकफापहं सद्यो ज्वरहरं ग्रा
हि दीपनं पाचनं लघु। आनाह
पाण्डुशूलार्शो गुल्मशोथोदरा
पहं॥ अथर्तुभेदे जलस्य ग्रह
णाय देशभेदः। हेमन्ते शिशि
रे चांबु सारसं वा तडागजं। वसं
तग्रीष्मयोः कौप्यं वाप्यं वा नैर्झ
रं हितं। नादेयं वारि नादेयं व
संतग्रीष्मयोः कौप्यं वाप्यं वा नै
र्झरं हितं॥ नादेयं वारि नादेयं वसं
तग्रीष्मयोर्बुधैः। विषवत्पत्र
पुष्पादि दुष्टं निर्झरयोगतः॥
औद्भिदं चान्तरीक्षं स्यात् कोपमाह
षि चस्मृतं॥ शस्तं शरदि नादेयं
नीरं मध्यदकं परं। दिवा रवि करैर्जु
ष्टं शीतं शीतकरैर्निशि॥ तोयं मम्बु
दकं नाम स्निग्धं दोषत्रयापहं। अन
भिष्यंदि निर्दोष मा ॥

न्तरीक्षजलोपमं॥ बल्यं रसा
यनं मेध्यं शीतं लघु सुधासमं
अम्लश्च। शरद्यगस्त्य उदयाद
खिलं सलिलं हितं। हंसोदक
तश्च। कार्तिके मार्गशीर्षे च प
योमात्रं प्रशस्यते॥ यद्यत्तु प
कमपि जले विषयविशेषे शी
तलं पिबेदित्याह सुश्रुतः।
दाहातिसार पित्तास्र मूर्च्छा मद्य
विषार्तिषु। मूत्रकृच्छ्रे पाण्डुरो
गेतस्याच्छर्दि भ्रमेषु च॥ मद्य
पानात् समुद्भूते रोगे पित्तोत्थि
ते तथा सन्निपातसमुत्थे च श्र
तं शीतं प्रशस्यते॥ क्वथितस्य
जलस्य शीतलकरणविशे
षगुणविशेषमाह सुश्रुतः।
शृतशीतं त्रिदोषघ्नं यदंतवोष्म
शीतलं। अन्तस्य मनभिष्यन्दि
कृमिरक्तज्वरघ्नं लघु॥ धारापा
ते विष्टंति दुर्जरं पवनादतं। अ
न्तर्बाष्प शीतलं पिहित मेव
शीतलं॥ अत्रापरेपि विशेषाः
दिवाशृतं पयो रात्रौ गुरुतामधि
गच्छति॥ तत्र पर्युषितं
वह्नि गुणभ्रष्टं त्रिदोषकृत्।
गुर्वस्लपाकं विष्टंति सर्वदो

गेषु निंदितं ॥ शृतं शीतं पुनस्त
प्तं तोयं विषसमं भवेत्। त्रि
मुहूर्तेऽपि तथाशीतः पुनः स्त
प्तो विषोपमः ॥ रात्रौ त
प्तोदकस्य लक्षणं मन्यदा
ह। श्लेष्मनाशशोषणं च त
प्तेनाईकेन वा। अथवा क
थनेनैव सिद्धमुष्णोदकं वदेत्
तस्य गुणाः। श्लेष्मानिलाम
दोषघ्नं दीपनं वस्तिशोधनं।
श्वासकासज्वरहरं पीतमु
ष्णोदकं निशि॥ अन्यच्च। भि
नत्ति श्लेष्मसंघातं मारुतं चा
पकर्षति। अजीर्णं जरयत्याशु
पीतमुष्णोदकं निशि ॥ ७ ॥
रात्रावुष्णोदकं च तप्तमेवपि
बेदित्याह। मुक्तं तदग्निजन
नं लघु च वस्तिशोधनं। पार्श्व
रुक् पीनसाध्मानहिक्कानि
लकफापहं॥ शास्त्रं त्वस्या
स्नेहेषु सद्यः स्मुहीनवस्व
रे विषयविशेषेत्वाममेव जलं
शीतलं पिबेदित्याह सुश्रुतः॥
मूर्च्छापित्तोष्णदाहेषु विषे रक्ते
मदात्यये भ्रमक्लमपरीतेषु त
मके वमथौ तथा॥ धूमोद्गारे
विदग्धे च शोषे च मुखकंठ

योः। ऊर्ध्वगे रक्तपित्ते च शीतमं
भः प्रशस्यते॥ शीतमम्भः श्रा
ममेव न तु क्वथितं। क्वथितं त
शीतं दाहादिषु यदुक्तं तत्सज्व
रेषु। विज्वरेषु तु दाहादिषाम
शीतं प्रशस्यते इति भेदः॥
आमादि जलानां जठराग्निना
पाककालावधि माह। आमं
जलं पाकमुपैति यामे पक्वं
पुनः शीतलमर्द्धयामे। पक्वं
कदुष्णं च ततोऽर्द्धकालं का
लात्रयः पीतजलस्य पाके॥
पित्तमद्यविषोत्थेषु तिक्तकैः
शृतशीतलं। जलं हितं त्रि
निशेषः॥ तिक्तानि च फलानि
तेभ्यो निर्धार्य योगमाह सु
श्रुतः। मुस्तपर्पटकोदीच्य
छुंठ्याह्वोशीरचंदनैः। शृतं शी
तं जलं दद्यात्तृष्णादाहज्वरशां
तये॥ छुंठ्याः च धान्यकं। यत
आह निघंटो धन्वंतरिः। कुस्तुं
बुरुः स्वर्णिकारा छुत्राधान्य
वितुन्नक मित्यादि। तद्गुणाश्च
धान्यकं दीपनं रुच्यं पाचनं स्वा
दुपाकि च। दोषत्रय तृषा दाह
श्वास कास ज्वर प्रणुदित्यादि॥
चक्रदत्तवंगसेन वृंदादयः॥

छुंठ्यास्थाने नागरं पठंति। त
था। मुस्त पर्पटकाशीर चंद
नोदीच्य नागरैरिति। नागरंक
टुकमपि नात्र पित्तजनकं म
धुरपाकित्वादिति तेषा मभि
प्रायः। नागरं नागरमुस्तकं
इति केचित्। क्वचिदेकदेशेन
समुदायोऽवगम्यते। यथा भी
मसेन इति। तीसटे तु नागर
स्थाने पर्पटं॥ एतस्य प्रक्रि
या। चंदने द्वित्वत्रसहार्थेऽत्वती
या। तेन मुस्तादिभिः षड्भिरा
मैरेव द्रव्यैः सहितं जलमु
क्तं जलमेव केवलं यथार्थपक्वं
पश्चात्तच्छीतलीकृतं दद्यात्।
तथा च वंगसेनः। यदप्सुमु
तशीतासु षडंगादि प्रयुज्यते
कर्षमात्रं ततो द्रव्यं साधयेत्॥
प्रास्थिकेऽम्भसि॥ अस्यायम
र्थः। यत्र हेतोः। अप्सु जलेषु।
शृतशीतासृतास्तु केवलास्व
वयपक्वास्तु। शीतासु शी
तलीकृतासु। षडंगादि द्रव्यं प्र
युज्यते। आममेव सद्यजले
स्थाप्यते। ततः प्रतेप्यत्वात् क
र्षमात्रं द्रव्यं समदितं षडंगादि
प्रास्थिकेऽतसिप्रस्थमात्रे क्वथि

तशीतले जले देयं ग्राहयेत्
अत एव षडंग मभिधायषडंग
पानीयमिति वंगसेनादिभिरुक्तं
अस्मिन् पक्षे चंदनं श्वेतं ग्राह्य
न तु रक्तं। तत्कषाय लेप।
यो रेव प्रयोक्तमुक्तं। यत आह
कषाय लेपयोः प्रायो युज्यते र
क्तचंदन मिति। षडंगपानीय
मिदं॥ षडंगादेः पाने तु वि
धातव्ये प्रक्रिया भिन्ना ता माह
वंगसेनः। कर्षमात्र मिह द्रव्यं साधयेत्प्रास्थिकेंऽभसि॥ अर्द्धशृतं
प्रयोक्तव्यं पाने पेयादि संवि
धौ॥ आदिशब्देन यूष यवागू
विलेपिभक्तानि गृह्यन्ते॥ पा
नप्रक्रियां शार्ङ्गधरोऽप्येता मे
वाह। तत्र द्रव्यं पलं साध्यं
चतुःषष्टिपले जले। अर्द्धशि
ष्टं तत् देयं पाने पेयादि संवि
धौ॥ पानप्रयोगं च षडंग मु
क्तवान्। अस्मिन् पक्षे चंदनं
रक्तं ग्राह्यं। कषाय लेपयोः
प्रायो युज्यते रक्तचंदन मिति
वचनात्॥ अथ रक्तचंदनस्य
गुणाः। तत्र रक्तं हिमं स्वादु छ
र्दि तृष्णास्त्र पित्तजित्। ति
क्तं नेत्रहितं वृष्यं ज्वर व्रण
विषापहं॥ षडंगादि प्रयु

ज्यते इत्यादिश्लोकेन वक्ष्यमाण
योगाउच्यते। तेयथा। श्रीपर्णी
चंदनोशीरपरूषक मधुकजं।
पानंपित्तज्वरे हन्याच्छारिवाद्यं
सशर्करं॥ अत्र श्रीपर्णीपरूष
कयोः फलेग्राह्ये। मधुकस्यत
पुष्पं। अन्यच्च। हन्यात् सप्तच्छी
मधुकं तथैवोत्पलसंकं।
पानंमूत्रंहिमंकिंवासोत्पलं
शर्करायुतं॥ हन्यात् पित्तज्व
रमितिशेषः। उत्पल मत्रक
मलमित्यादि। दिवास्वापन
कुर्वीतयतोः सौस्मात् कफा
वहः। ग्रीष्मवर्जेषुकालेषुदि
वास्वापो निषिध्यते उचितो
हि दिवास्वापोनित्यंतेषांशारी
रिणां। वातादयः प्रकुप्यंति ये
षामस्वपतांदिवा॥ येषांदिवा।
स्वप्न उचित स्तानाह। व्याया
म प्रमदाध्व वाहन रतान् क्ला
न्तानतीसारिणः स्थूलश्वासव
तस्तृषापरिगतान् हिक्का म
रुत् पीडितान्। क्षीणान्।
क्षीणकफान् शिशून् मद
हतान् वृद्धान्नसाजीर्णिनो
रात्रौ जागरितान् नरान् निर
शनान् कामंदिवा स्वापयेत्

अथ वातिकादिज्वरभंगपाका
वधि माह। वातिकः सप्तरात्रे
न दशरात्रेण पैत्तिकः। श्ले
ष्मिकोद्वादशाहेनज्वरः पाक
मुपैतिहि॥ रसस्यामत्वः व
धिमतिक्रम्यापि ज्वरलिङ्गति
यतस्त्राह सुश्रुतः। वक्रदोष
समन्दाग्नेः सप्तरात्रात् परंज्वरे
लंघनांतुयवागूर्भिर्यदा दोषा
नयच्चते॥ तदांतमुखवैरस्यत
स्माच्चकनाशनेः॥ कषाये
पाचनैर्लघ्वैर्ज्वरघ्नैः समुपाचरेत्
ज्वरस्य तारुण्यमध्यावस्यताजी
र्णतावधिः। आसप्तरात्रात्तरु
णंज्वरमाहु र्मनीषिणः। द्वा
दशाहा दभिव्याप्य मध्यंजी
र्णं ततः परं॥ आसप्तरात्रादि
ति। अकारः मर्यादायां। रात्रि
ग्रहो दिवसस्योपलक्षकः।
तेन सप्तमदिवसादर्वाक् ज्वर
स्तरुण इत्यर्थः। तथाचोक्तं
तंत्रांतरे। ज्वरे व्यतीते षडहे
जीर्ण इत्युच्यते बुधैरिति।
दशरात्रात् परे जीर्णमाहु
रन्येमनीषिणः। अत एव जा
तकर्णः। जीर्णस्त्वयोदशादि
वस इति॥ मध्यज्वरे भेषज

प्रयोग समयः। वातिके सप्तरा
त्रे न दशरात्रेण पैत्तिके। श्ले
ष्मिके द्वादशाहेन ज्वरे युंजीत
भेषजं॥ सप्तरात्रे इत्यत्र रात्रि
ग्रहो दिवसस्योपलक्षकः।
अतएवोक्तं। पाययेदातुरं स
प्तमेऽौषधं सप्तमेदिने। शामने
नाथवा दृष्ट्वा निरामं न मृषा
चरेदिति॥ शार्ङ्गधरेणाप्युक्तं।
गुडूची पिप्पलीमूल नागरैः
पाचनंस्मृतं। वातज्वरे तथापे
यंकालिंगंसप्तमेऽहनीति॥
हारीतेनाप्युक्तं। एतां क्रियाम
युंजीत षड्रात्रेसप्तमेऽहनि॥
पिबेत् कषाय संयोगान् पे
यांज्वरविनाशिनी। एतांक्रियां
लंघनादिरूपां। कषायसंयो
गान् कषायेनसाधितां पेयामि
त्यर्थः॥ खरनादेनाप्युक्तं। इ
ति षड्रात्रिकः प्रोक्तो नवज्वर
हरोविधिः। ततः परंपाचनी
यंज्वरेहितं॥ ततः परं सप्तमे
ऽहनीत्यर्थः॥ वाग्भटश्च। सप्ता
हादौषधं केचिदाहुरन्ये दशाह
तः। लघ्वन्नभोजिते केचिदेय मा
मोल्वणेनत॥ सप्ताहात् सप्त।

हमारभ्येत्यर्थः। अत्र ल्यब्लोपे
कर्मणि पंचमी। अत एव सुश्रु
तः। दशरात्रात् परं सर्वे दीतव्य
मिति निश्चितं। अतएव दशरात्रे
ण द्वादशाहेनति लंघनवताव्य
तीत्येनेत्यर्थः॥ अत्रचरकस्त्वेव
माह। ज्वरितं षडहेऽतीते ल
घ्वन्नं प्रतिभोजितं। पाचनं।
शामनीयंवा कषायं पाययेत
ते॥ अस्यायमर्थः॥ ज्वरितं षड
हेलंघनेन व्यतीते सप्तमेऽह
नि भोजितलघ्वन्नं अष्टमेदिने
कषायंपाययेदित्यर्थः॥ तथा
च सुश्रुतः। सप्तरात्रात्परं
केचिमन्यंतेदेयमौषधं। सप्त
रात्रात् परं अष्टमेऽहनीत्यर्थः
केचिच्चरकादयः॥ चक्रदत्तो
पि। सप्तरात्रेणपच्यंते सप्तधा
तुगता मलाः। निरामस्तु त
तः प्रोक्तो ज्वरः प्रायोऽष्टमे
दिने॥ एवंसति कषायदाने
सप्तमाष्टमयोर्दिवसयो र्विक
ल्पः॥ तत्रापि वयो वलाग्नि
दोषदेश कालोचितं कुर्यात्॥
भेषज मंत्रच दोषपाकं दृष्ट्वा
दद्यादित्याह सुश्रुतः। पैत्तिके

वा ज्वरे देय मल्पकालसमुत्थिते
ऽचिरज्वरितस्यापि भैषज्यं दो
षपाकतः ॥ इति । अस्याय मर्थः
अल्पकालसमुत्थिते पैत्तिके ज्व
रे दोषपाकं दृष्ट्वा भैषज्यं देयं
तत्र तत्र दश रात्रापेक्षा । तथा
ऽचिरज्वरितस्यापि पैत्तिके त
र नवज्वरयुक्तस्यापि दोषपाकं
दृष्ट्वा भैषज्यं देय मित्यर्थः ॥
दोषपाक लक्षण माह सुश्रुतः
मृदौ ज्वरे लघौ देहे प्रचलेषु म
लेषु च । पक्वं दोषं विजानीया
ज्ज्वरे देयं तदौषध मिति ॥ ज्वरे
मृदौ स्वल्पीभूते । मलेषु वा
त पित्त कफ मूत्र पुरीषेषु ।
प्रचलेषु स्वमार्गसंचारिषु । प
क्वं निरामं । दोषप्रकृतिवैकृत्यादे
केषां पक्वलक्षणं । दोषाणां उ
क्त वात पित्त कफानां प्रकृतिः
ज्वरस्य तदुपद्रवाणां चोत्पा
दनं । तस्या वैकृत्यं वैपरीत्यं
तस्मात् दोषपाकस्तानं पक्वे
षामते । लत लामता लघु
त्वंच गात्राणां ज्वरमार्दवं । दोष
प्रकृतिरुत्साहो निरामज्वरल
क्षणं ॥ दोषप्रकृतिः दोषाणां ।

स्वमार्गसंचारः । माधवनिदानेउ
क्तसाहस्यानेऋणाह इति पा
ठः ॥ ज्ञेयः पंचविधः कालोभै
षज्य ग्रहणे नृणां । अत्रानुक्ते
प्रभातं स्यात् कषायेषु विशे
षतः ॥ मुख्यभेषजसंबन्धान्नि
षिद्धस्तरुणेज्वरे । तोय पेयादि
संस्कारे निर्दोषं तत्र भैषजं ॥
मुख्यभैषजं क्वाथः तस्य सं
बन्धः पानं । यतस्त्राह । न क
षायं प्रसंशंतिनराणांतरुणे
ज्वरे । कषायेणाकुलीभूता
दोषाजेतु सुदुस्तराः ॥ आकु
लीभूताः प्रहृष्टाः स्वमार्गप
रित्यज्य यत स्ततो गताः । अ
त्र कषायशब्देन क्वाथो गृह्य
ते ॥ उक्तास्व कषस्य पर्य्यायाः
शृतं क्वाथः कषायश्च निर्यूहः
सनिगद्यते । तोयपेयादि सं
स्कारे निर्दोषं तत्र भेषज मि
ति ॥ तत्र तरुणे ज्वरे भेषजं ।
मुख्यभेषजं क्वाथरूपं । तोय
पेयादि संस्कारे निर्दोषं । यत
आह । न तु कल्पन मुद्दिश्य
कषायः प्रतिषिद्ध्यत इति कल्पनेषे
षपेयायवागवादिकं । नतु । स्वरसश्चतथा
कल्कः ॥

क्वाथश्च हिम फाण्टकौ । ज्ञेयाः
कषायाः । पंचैते लघवः स्यु
र्यथोत्तरं ॥ इति वचनात् स्वर
सादयोऽपि कथं न निषिद्ध्यते
तत्र । यः कषायः कषायः स्या
त्सवर्ज्य स्तरुणे ज्वरे इति । यः
कषायः कषायः स्यात्स चतुर्थ
भागावशेषकरणेन अष्टमभा
गावशेषकरणेन वा कषाय
वर्णः कषायरसश्च स्यात् । स
कः क्वाथः । स तरुणे ज्वरे
निषिद्धः ॥ क्वाथवाचकस्य
कषायस्य लक्षण माह । पा
दशिष्टः कषायः स्याद्यः षो
डशगुणेंऽभसा । क्वथितो ऽतः ष
डंगादि र्न निषिद्धो नवज्वरे ॥ अ
स्याय मर्थः । यः क्वाथ्यद्रव्यात्
षोडशगुणेनांभसा क्वथितः प
क्वः अथ च पादशिष्टः चतुर्थ
भागावशेषः स कषायः स्यात्
अतः षडंगादि स्तरुणज्वरे न
निषिद्धः । अपाकादर्द्धपाकाद्वो
क्तलक्षणाभावेन कषायत्वाभा
वात् ॥ तरुणज्वरे कषायस्य
दोष माह । दोषा बद्धाः क
षायेन स्तंभितास्तरुणेज्वरे । स्त
भ्यते न विपच्यन्ते कुर्वन्ति विषमज्वरं

कषायेण स्तंभिताः प्रहृतये निवा
रिताः । यतस्त्राह कषायरसगुणा
न् । कषायः स्तंभनः शीतोरूक्षः
पित्तकफापहः । इत्यादि । स्तंभ
ने आध्मानं कुर्वन्ति । न विपच्यन्ते
स्तंभनेन न विपच्यन्ते दुःखदत्वावि
लंबेन विपच्यन्ते इति यावत् ॥ अ
न्यच्च । न च अवंतेन पच्यते कषा
ये: स्तंभिता मलाः । निर्यान्ति विमा
र्गगा वाते घोरं कुर्युर्नवज्वरं ॥
अनुपस्थितदोषाणां वमनं तरु
णेज्वरे । हृद्रोगश्वाससमानाहमो
हंच कुरुते भृशं ॥ अस्याय म
र्थः । कफादिदोषोपस्थितौ स्व
यमेव चेत्स्रवति वमनेन तद्दोषा
य । अनुपस्थितदोषाणां तु तरु
णे ज्वरे वमनं यत्नकृतं हृद्रोगा
दीन् करोतीत्यर्थः । एतेन वचनेन
तरुणज्वरेयत्नाद्वमनं निषिद्धं ॥
अवस्थाविशेषतरुणेकर्तव्यमि
त्याह । सद्योभुक्तस्य वा जाते ज्व
रे संतर्पणोत्थिते । वमनं व
मनार्हस्य शस्त मित्याह ।
वाग्भटः ॥ वमनं वेति विक
ल्पा लंघनापेक्षया वमना
र्हस्येत्यनेन गर्भिण्यतिकृशा
तिवृद्धादि निरासः ॥ वाग्भ

दोः वृद्धवाग्भटः ॥ वमितं
लंघयेत् प्राज्ञो लंघितं न तु
वामयेत् । वमनं श्लेष्मणाक्रा
न्ताद्ध्यात्लंघनकर्षितं ॥ न
कार्य्यं गर्भिणी बाल वृद्धदु
र्वल भीरुभिः । अनशन मि
तिशेषः । अनेन वचनेन गर्भि
ण्यादीना मनशननिषेधात् ।
ज्वरे सामे पाचनं निरामे शम
नं पथ्यात्र मण्डादिकं चदद्या
त् ॥ पाचन शमनयो र्लक्षण
माह । यत्पचत्याम माहारं प
चेद्दामरसंचयत् । यदपक्कान्
पचेद्दोषांस्तद्धि पाचन मुच्यते
न शोधयति यद्दोषान् समा.
न्नोदीरयत्यपि । समीकरोति सं
वृद्धांस्तत् संशमन मुच्यते ॥
न शोधयति नोर्द्ध्वाधो मार्गा
भ्यां पातयति । नोदीरयति नव
र्द्धयति ॥ तयोः संप्रदानं का
लंचाह । पाचयेदान्तरं सामं पा
चनं सप्तमे दिने । शमनेना
प्यवाहष्टा निरामं तमुपाचरे
त् ॥ तं स्याद्दो मदेयं तपा
चनं दिवसत्रयं । शमनीयम
देयं तत् पचरात्रेततः परं ॥ शो
धनं दीपनंचैव एकरात्रे मदा

पयेत् । इत्यत्रिसंहितातः ॥ अ
न्यच्च । कृशांचैवाल्पदोषंच श
मनीयै रुपाचरेत् । ननु ला
लाप्रसेको । तेन्द्रालस्याविपा
कास्यवैरस्य गुरुगात्रता ॥
तत्राशो वङ्कमूत्रत्वं स्तब्धता
वलवान्ज्वरः । आमज्वरस्यालिं
गानि न दद्यात्तत्र भेषजं ॥ भेष
जंह्यामदोषस्य भूयो जनयति
ज्वरं । भृशं वाऽल्पेन ॥ अन्य
च्च । पाचयेद्दोषहरणं मोहा
दामज्वरे तु यः । स सुप्तं कृष्ण
सर्पंतु करागेण परामृशेत् ॥
इति वचनादामज्वरे भेषज नि
षेधात् कथं सामज्वरे पाचनं
देयं । उच्यते निरुपद्रवे सामे ज्व
रे पाचनं देयं । सोपद्रवेतु सा
मे भेषजं निषिद्धं । तथा च वा
ग्भटः । सामाहात् परेतोऽतु
ष्टे सामे स्यात् पाचनं ज्वरे । नि
रामे शमनं स्तब्धे सामे नौष
धमाचरेत् ॥ अतुष्टे निरुप
द्रव । स्तब्धे सोपद्रवे ॥ ॥
अथ सामान्यज्वरे पाचनं
कषाय माह सुश्रुतः । ना
गरं देवकाष्ठंच धान्यकं
वृहतीद्वयं । दद्यात् ॥

पाचनकं पूर्वं ज्वरितेभ्यो ज्व
रापहं ॥ धान्यकं रोहिष ।
तल्लाभाऽश्णीरंदद्यात् । वृहती
द्वयं वृहत्फला सूक्ष्मफला
वृहती । लघ्वा वृहतीचेति । कं
टकारीद्वयं षंडीधान्यकं सुर
दारुचेति शार्ङ्गधरेणऽक्तत्वा
त् । नागरादिक्काथः सर्वज्व
रेषु ॥ अथ सामान्यतः संश
मनीयान्याह सुश्रुतः । अथ
संशमनीयानि कषायाणि नि
वोधमे । सर्वज्वरेषु देयानि या
नि वैद्येनजानता ॥ हृस्त्रीवचि
त्व वर्षाभूपयः सोदक मेवच
पचेत्क्षीरावशेषं तत्र पेयं स
र्वज्वरापहं ॥ हृस्त्रीव मेतदुन
र्णवा । वर्षाभूः रक्तपुनर्णवा । त
थाच मदनपालः । पुनर्णवः
श्वेतमूलो हृस्त्रीवो दीर्घपत्रकः
पुनर्णवापरा रक्ता वर्षाभूः रक्तपु
ष्पकः ॥ पाकप्रकारमाह । क्षीरम
ष्टगुणं द्रव्यात् क्षीरान्नीरं चतुर्गु
णं । क्षीरावशेषं पानं च क्षीरपाके
ष्वयंविधिः ॥ द्रव्यात् पलपरिमि
तात् ॥ अन्यच्च । उदकाष्टगुणं ।
क्षीरं शिंशपा सारमेवच ॥

तत् क्षीरशेषं क्वथितं पेयं सर्वज्व
रापहं ॥ गुडूची धान्यकारिष्टं ।
पद्मकं रक्तचंदनं । एषां क्वा
थः सुप्रसिद्धः सर्वज्वरहरः
स्मृतः ॥ दीपनो दाहहृल्ला
स तृष्णा छर्द्यरुची हरेत् ।
गुडूच्यादि क्वाथः ॥ संशोधनं
तरुणज्वरिणो निषिद्धः तदा
ह सुश्रुतः । छर्दिमूर्छामन्द
मोह भ्रम तृड्विषमज्वरान् ।
संशोधनस्य पानेन प्राप्नोति
तरुणज्वरी ॥ संशोधनस्य
लक्षणमाह । स्थानाद्बहि
र्नयेदूर्द्ध्वमधो वा दोषसंचयं
संशोधनं तदेवस्याद्देवदाली
फलं यथा ॥ निषिद्धमपि सं
शोधनमवस्थाविशेषे देय
यत्नमाह । रोग शोधनसाध्ये
त्वयं विधा दोषदुर्वलं । तं समी
क्ष्याभिषक् कुर्य्यात् दोषप्रच्या
वनंमृदु ॥ शोधनसाध्यान्
रोगानाह । सद्योज्वरे विषेऽ
जीर्णेमदात्यावरुचौ तथा । लम
रोगे चह्यद्रोगे कासश्वासेचवाम
येत् जीर्णज्वरगरच्छर्दि गुल्म ।
प्लीहोदरेषुच । मूलेषोघे तु
जयाते कृमिरोगविरेचयेत् ॥

विरेचयेत् ॥ दोषदुर्बले दोषे
रूपचिते दुर्बले नत उप वा
सादिकृशं। अतएव समीदेप
ति। अन्यच्च ॥ चले दोषे मृदौ
कोष्ठे नेतेनात्र वलं नृणां।
अवसापन दुर्बलस्यापि शोधनं
हितदा भवेत् ॥ कृतो बलनापे
क्षणीय मित्याशंकाया माह
नदानस्याभवस्थायां शोधनं
दुर्बलस्यापि दोषदुर्बलस्या
पि अवसापनं भवेत्। कार्श्यादि
व्याधिकृत्र भवतीत्यर्थः ॥
बलवतः पुरुषस्य पक्वस्य
दोषस्य स्वस्थानस्थितस्य शो
धनाविधाने दोषमाह सकृतः
पक्वोप्यनिर्हृतो दोषो देहे ति
ष्ठन्महात्ययं। विषमं वा ज्वरं
कुर्य्याद्बलव्यापादमेव च ॥ पक्वः
लंघनतिक्ताम्बुपानपेयादिभिः
अनिर्हृतः अधोमार्गेणानुत्
सृष्टः। महात्ययं विषमज्वरं वा
नर्थकं। तस्यैव महात्ययत्वा
दिति गदाधरः। गंभीरमिति
कार्तिकः। महात्ययं महाक
ष्टं वा। बलव्यापादं बलक्षयं ॥ सं
शोधनमाह। आरग्वधं ग्रंथि
कमुस्ततिक्ता हरीतकीभिः क

थितः कषायः। सामे सश्लेष्मक
फवातपित्तज्वरे हितो रेचनपाच
नश्च ॥ आरग्वध पनवेरेण ॥
अन्यच्च। पथ्यारग्वधतिक्तात्रि
वृदामलकैः शृतं तोयं। पाचन
सारकं युक्तं मुनिभिर्जीर्णज्वरे
सामे ॥ आरोग्यपंचकद्वयं ॥
अनंतावालकं मुस्तं नागरं क
टुरोहिणी। पिष्टा मुस्तांबुना
कल्कं पाययेदत्तसंमितं ॥
कल्कः स्वल्पेन कालेन हन्यात्
सर्वज्वरानयं। विदध्यात् कोष्ठ
संशुद्धिं दीपयेच्च कृशानं ॥
अनंता सारिवा। सारिवादिक
ल्कः ॥ संशोधनं सपामं नच
येषां निषिद्धं तानाह। पीतांबु
र्लंघनक्षीणो जीर्णान्नभुक्तः पि
पासितः। न पिबेदोषधं यत्
संशोधनमथेतरत् ॥ पीतांबुः
पीततिक्तांबुः। भुक्तः भुक्तवा
नित्यर्थः। अत्राप्यवसितादित्वात्
कर्तरि क्तप्रत्ययः। इतरत् संश
मनं ॥ त्रिफला रजनीयुग्मं क
टकारीयुतं शठी। त्रिकटुग्रं
थिकमूर्वा गुडूची धन्वयासकः ॥
कटुका पर्पटो मुस्तं त्रायमाणा
च वालकं। निम्बं पु ॥

ष्करमूलं च मधुयष्टी च वत्सकः
यवानीन्द्रयवो भार्गी शिग्रुबीजं
सुराष्ट्रजा। वचा त्वक् पद्मको
शीरं चंदनातिविषा बला ॥ शा
लिपर्णी पृश्निपर्णी विडंगं तग
रं तथा। चित्रकं देवकाष्टं च चव्यं
पत्रं पटोलजं ॥ जीवकर्षभकौ
चैव लवंगं वंशलोचनं। पुंड
रीकं च काकोली पत्रकं जा
तिपत्रकं ॥ तालीशपत्रं मे
तानि समभागानि चूर्णयेत्
अर्द्धांशं सर्वचूर्णस्य किरातं प्र
क्षिपेत् सुधीः ॥ एतत् सुदर्श
नं नाम चूर्णं दोषत्रयापहं।
ज्वरांश्च निखिलान् हन्यान्ना
त्र कार्य्या विचारणा ॥ पृथग्द्वं
द्वागंतुजांश्च धातुस्थान् विषमा
न्तथा। सन्निपातोद्भवांश्चापि मा
नसानपि नाशयेत् ॥ शीतादीन
पिदाहादीन् मोहं तंद्रां भ्रमं तृषां
कासंश्वासं च पांडुं च हृद्रोगं का
मलामपि ॥ त्रिकपृष्ठकटीजा
नुपार्श्वशूलं च नाशयेत्। शी
तांबुना पिबेदेतत् सर्वज्वरनिह
न्तये ॥ सुदर्शनं यथा चक्रं दान
वानां विनाशनं। तद्वत् ज्वरा
णां सर्वेषां चूर्णमेतत् प्रणाशनं

पुष्करमूलाभावे कुष्ठमपि द
द्यात्। भार्गीभावे कण्टकारीमू
लं। सौराष्ट्राभावे स्फटिकां दद्या
त्। तगरालाभे कुटदेयं। जीव
कर्षभकयोरलाभे विदारीकं
न्दस्य भागद्वयं दद्यात्। पुण्ड
रीके श्वेतकमलं। काकोल्य
भावे अश्वगंधामूलं दद्यात्
तालीशपत्राभावे स्वर्णता
लीप्रदीयते। इति। अथवा कं
टकारी जटा देया। सुदर्शनचू
र्णं ॥ शटी निशाद्वयं मुंडी दा
रुपुष्करमूलकं। पला गुडूची
कटुका पर्पटश्च सवासकः ॥
भार्गी किराततिक्तश्च दशमूलं
तथैव च। क्वाथमेषां पिबेत् क
ल्ये सिंधुचूर्णयुतं नरः ॥ ज्वरा
न्सर्वान् द्वन्द्वतो हंति नात्र कार्य्या वि
चारणा। अनुभूतमसकृन्मये
तत् ॥ हरीतकी त्रिवृत् हृद्दा
रुकाणां पृथग्भवेत्। पलद्वय
कणा मुंडी गुडूची गोक्षुरो वरी
सहदेवी विडंगश्च प्रत्येकं पल
संमितं। मधुना वटिकां कृत्वा
खादेत् ज्वरमपोहति ॥ कास
श्वासमलस्तंभं वह्निमान्द्यं नि
यच्छति। लालादशाताग्रहणा

षड्वा सचंदनं लोहितचंदनं
च। त्वक्पत्रकं वारि मृणालम
ला प्रत्येकमेतानि पलोन्मिता
नि॥ किरातनिक्तं शिवृन्नासनि
क्ता मुस्ताकणा पर्पट कंटका
र्य्यः। विडंग विश्वामलकानि
वासा रसानि श्वावारुणासिंधु
वाराः॥ एतानि दोषानि पृथ
क् पलार्द्धमानानि सर्वाणि च
भेषजानि। कल्कानमीषां विद
धीत गव्यदुग्धेनवै सार्द्धतुला
मितेन॥ तैलं तिलानांतु तुला
नुमानं तेनैव कल्केन शनैः प
चेत्। हन्यात्ज्वरान् तैलमिदं
समस्तान् कुर्य्याद्बलं वीर्य्यम
तीव पुष्टिं। विमर्द्दनाद्दाघ्रुपरि
श्रमं भ्रमं शमं नयेत् संजनयेत्
धृतिं तनोः। तथा च पथ्यामस्थि
समुद्भवामपि प्रहन्ति निद्रांस
मुपार्ज्जयेत् सुखं। अरुणामं
जिष्ठा। वारि वाला। रस्ना रास्ना
लाक्षादि तैलं॥ लाक्षारससमं
तैलं तैलाच्चतुर्गुणम्
स्तगं ध्यानिशादारु कौन्तीकु
ष्ठाह्वचंदनैः। समूर्वा रोहिणीरा
स्नाशताह्वामधुकैः समैः। सिद्ध
लाक्षादिकं नामतैलमभ्यंजनादि
ना

सर्वज्वरतमोन्मादश्वासापस्मारवा
तनुत्। यक्षरोगस्य भूतघ्नं गर्भि
णीनांच शस्यते॥ मस्तु दधिज
लं। कौन्ती रेणुका। चंदन मत्र
श्वेतमेवनत्वरक्तं। रोहिणी कटु
की। लाक्षादितैलं॥ लाक्षा ह
रिद्रा मंजिष्ठा फिणिलं मधुकं
वला। लामज्जकं चंदनं च चम्प
कं नीलमुत्पलं॥ प्रत्येक मे
षां यन्मुष्टीः पक्कानि येचतुर्गु
णे। चतुर्भागावशेषेण गर्भे
चैतत् समापयेत्॥ रेणुका
पद्मकं चैव वाजिगंधा नथैव वच
वेतसं चोरकं कुष्ठ देवदारु न
खं त्वचं॥ शतपुष्पा पुण्डरी
कं मांसी मधुक मेवच। प
भिरतामितैः कल्कैः कषायैण
व पेषितैः॥ मस्तु शुक्तारनाल
ना मारकोटक मावपेत्। क्षीरा
टकसमायुक्तं तैलमस्य विपा
चयेत्॥ अभ्यंगात्तैल मेतद्धि
शीघ्रं दाह मपोहति। व्यपोह
ति त्वष्यावातं पित्तं श्लेष्म भवं
ज्वरं॥ सप्रलापं सतृस्नंच ता
लुशोष भ्रमान्वितं। ग्रहोपस
ष्टायेवाला रक्तः संहर्षिताश्च ये॥
तेषां कष्टप्रशमयेत्तैलं लाक्षादि

कं मद्दन। फेणिलं वदरं। ला
मज्जक मुशीरवत् पीतच्छवि
ह्वणविशेषः। लामज्जक यदा
न स्यात् उशीरं दीयते तदा।
चम्पकमित्यस्यस्थाने कुत्रापि
गैरिकं इति तत्कुमरं देषमि
ध्यते। समापयेत् प्रतिपादि
तार्थः। चोरकं ग्रंथिपर्णस्यभे
दो भरिटउर इति नेपालदेशे
भवति। तदलाभे ग्रंथिपर्णं
देयं। पुण्डरीकं श्वेतकमलं।
मस्तु दधिजलं। शुक्तं संधा
नभेदः। आरनालमपि सं
धानभेदः। महालाक्षादितै
लं॥ अथ नवज्वरे रसाः। सू
तो गंधष्टंकणः शोषणाश्च स
र्वेतुल्याः शर्करामत्स्यपित्तैः।
भूयो भूयो मर्द्दयेत् त्रिरात्रं
वल्लो देयः शृंगवेरद्रवेण॥
तापे शीते वीजनं तक्रभक्तं
वृन्ताकाद्यं पथ्यमेतत् प्रदि
ष्टं। अष्टो चोग्रं घंति सद्योज्व
रं तु पित्ताधिको मूर्छितोयंच
दद्यात्॥ अस्य प्रक्रिया। पारा
शुद्ध भाग १ गंधकशुद्ध भाग
१ सोहागा भस्म भाग १ मरिच।
भाग १ शर्करा भाग ४ रोहूम

त्स्यपित्त भाग ३। अमुं प्रति
दिनं सर्व दिन त्रयं मर्द्दयेत्
रसमिमं रक्तित्रयमितं मार्द्र
करसेनदद्यात्। ओदनं तक्र
वृन्ताकफलं भोक्तुं दद्यात्।
व्यजनाद्यैः शीतलमुपचारं
कुर्य्यात्। उदकमंजरी रसो
नवज्वरेषु॥ रसरत्नप्रदीपे।
अथात् समस्तसमुद्रफेण
हिंगूल गंधं परिमर्द्य यामं
नवज्वरे वल्लयुगं त्रिघस्त्र।
मार्द्रीमसाद्ये ज्वरधूमकेतुः॥
प्रक्रिया। पारा शुद्ध गंधकशु
द्ध हिंगुलशुद्ध समुद्रफेणस
मभागां सर्वयाममेकमार्द्रक
रसेन समर्द्य रक्तिकाषट्कमि
तमार्द्रकरसेन दिनत्रयं नव
ज्वरी भक्षयेत्। दिनत्रयान्नव
ज्वरो न शुष्पत्। ज्वरधूमकेतुः
रसेंद्रचिंतामणौ। शुद्धः सू
तो विषो गंधः प्रत्येकं शाण
संमितः। धूर्त्तवीजं त्रिशाणं
स्यात् सर्वेभ्यो द्विगुणा भवेत्
हेमाह्वा कारयेदेषां चूर्णं
सक्ष्मं प्रयत्नतः। जंवीरजीरके
द्रैयश्चूर्णं गुंजाद्वयोन्मितं॥ आ
र्द्रकस्य रसेनापि ज्वरं हंति त्रिदोषजं

एकाहिकं द्व्याहिकंच त्र्याहिकंच
चतुर्थकं॥ विषमंच ज्वरं हन्या
त्ज्वरं जीर्णंच सर्वथा। महाज्वरां
कुशोनामायं रसोऽयं सर्वसंम
तः॥ प्रक्रिया। शुद्धपारा शुद्ध
गंधक शुद्धविष प्रत्येकं टंक १
धत्तूरवीजटंक ३ चोकटंक १२
सर्वेषां चूर्णमतिसूक्ष्मं कर्तव्यं
महाज्वरांकुशः॥ सर्वज्वरेषु।
पूर्णायुरे। एको भागो रसात्।
शुद्धोद्धेलेय। पिप्पली शिवा
आकारकरभो गंधः कटुतैले
नशोधितः॥ फलानि चेंद्रवा
रुण्या अष्टभागमिताश्च मी
एकत्र मर्दयेच्चूर्णं सिद्धवारु
णिकारसैः॥ माषोन्मिता व
टी कृत्वा दद्यात् सद्योज्वरे बुधः
छिन्नारसानुपानेन ज्वरघ्नीव
टिकामता॥ शैलेयः कटु३
तिलोके॥ शिवाच हरीतकी
आकारकरभः आकरकरहा
इतिलोके। चतुर्भागमिता आ
मी शैलेयादयः षट्समुदि
ता भागचतुष्टयमिताः। ज्वर
घ्नी वटिका॥ ह्वागीयरे रसगंधं
चदरदं जैपालंकमवद्विंते। द
तीरसेनसंपिष्यवटी गुंजामिता

कृता॥ प्रभातेसितयासार्द्धम
सिताशीतवारिणा। एकेनदि
वसेनैषा नवज्वरहरी भवेत्।
ज्वरघ्नीवटिका॥ रसरत्नप्रदी
पे। रसो गंधो विषं शुंठी पि
प्पली मरिचानिच। पथ्याबि
भीतकं धात्री दंती वीजंच शो
धितं॥ चूर्णमेषां समांशानां
द्रोणपुष्पीरसैः पुटेत्। व
टीमाषनिभां कुर्यात् भक्षये
न्नूतने ज्वरे। नवज्वरहरी वटी।
इति नवज्वरे रसाः। अथ सामा
न्यज्वरे रसाः। शुद्धसूतं विषं
गंधं धूर्त्तवीजं त्रिभिः समं। च
तुर्णां द्विगुणं व्योषं चूर्णं गुंजा
द्वयोन्मितं॥ आर्द्रकस्य रसैः
किंवा जंवीरस्य रसैर्युतं। महा
ज्वरांकुशो नाम्ना सर्वज्वरविना
शनः। एकाहिकं द्व्याहिकंच
त्र्याहिकंच चतुर्थकं। विषमं
वा त्रिदोषं स्याज्वरं हन्ति नसंश
यः। प्रक्रिया। शुद्धपारा टंक १
शुद्ध विष टंक १ शुद्धगंधक टंक १
धत्तूरवीज टंक ३ सोंठि टंक ४ पी
पली टंक ४ मरिच टंक ४ सर्वेषां चू
र्णमतिसूक्ष्मं कर्तव्यं। महाज्वरां
कुशः॥ सर्वज्वरेषु सर्वरस ॥

ग्रंथेषु। सूतं गंधं विषं चैव
टंकणंच मनःशिला। एता
नि टंकमात्राणि मरिचं त्व
ष्टटंककं॥ कटुत्रयं टंकषट्
कं खल्ले क्षिप्त्वा विचूर्णयेत्।
रसः श्वासकुठारोऽयं श्वास
सर्वज्वरापहः॥ श्वासकुठा
रो रसः॥ श्वासे सर्वज्वरेर
सरत्नाकरे। दारुमुषां शिखि
ग्रीवां रसकंच पृथक् पृथक्
टंकत्रयानुमानेन गृहीत्वा क
नकद्रवैः॥ मर्दयेत्त्रिदिनं का
र्या वटी चणकमात्रया। मरि
चैरेकविंशत्यासमभिस्तुल
सीदलैः। खादेद्वटीद्वयं पथ्यं
दुग्धभक्तं सशर्करं। न्हणं विष
मंजीर्णं हन्यात् सर्वज्वरभवं॥
दारुमूषा दारुमूषी। शिखिग्री
वा तुतिया। रसक खपरिया
प्रत्येकं टंक ३ धतुरपत्रस्वरसेन
मर्दयेत् ज्वरांकुशः॥ सर्वज्वरेषु
नागरं कर्षमात्रं स्यात् कर्षमात्रंच
टंकणं। मरिचं सार्द्धकर्षं स्यात्
तावद्दग्धवराटकं विषकर्षंच तत्र्यो
शं सर्वमेकत्र चूर्णयेत्। रसोकृताण
नो नाम्ना खादेद्गुंजामितो ज्वरे। कृता
णानोरसो ज्वरे॥ शुद्धजैपालटंकेन

कंटादंकद्वयोन्मितं। गैरिकं टंक
मेकंच कन्यानीरेणमर्दयेत्॥
कलायसदृशी कार्या वटिका
ताच भक्षयेत्। शीतलेन ज
लेनैषा वटी जीर्णज्वरापहा॥
जीर्णज्वरघ्नीवटी॥ द्विभाग
तालेन हतेच ताम्रं रसंच गं
धंच समीनमाशुः। विषंसमं
चद्विगुणंच ताम्रं त्रिसप्तरात्र
णा दिवाकराशैः॥ विमर्दयेदिष्ट
स्वरसेन चूर्णं गुंजैकदंतेसित
यासमेतं। ज्वरांकुशोऽयं रवि
संदराख्यो ज्वरान्निहंत्यष्टवि
धान् समस्तान्॥ अस्य प्रक्रिया।
पारा टंक १ गंधक टंक १ विष
टंक १ द्विगुणतालक हतताम्र
टंक २ राकमत्स्यकपित्त १ सवप
कब्रवेलेजव चूर्णहोइ मिले नव
नीविके पातकी स्वरसक भावना
३१ द्यामे मह देवइ मात्रा रत्ती
एक अनुपान श्वेत शर्करा रत्ती
२ खाइ। सर्वज्वरे रविसुंदरोरसः
शुद्धसूतं तत्सा गंधं खल्ले ताव
द्विमर्दयेत्। सूतं तत् दृश्यते या
वत् किंतु कज्जलवद्भवेत्
एषा कज्जलिकाख्याता दृढ
णी वीर्यवर्द्धिनी। नानानुपा

रसेन

नयोगेन सर्वव्याधिविनाशिनी॥
कज्जलिकाविधानं तद्गणाभ्र र
सस्त्वप्रदीपे। जयापद्मरसेनाथ
वर्द्धमानरसेनच। भृंगराजर
सेनापि काकमाच्या रसेनच॥
रसंसंशोध्य यत्नेन तत्सम
शोषयेद्दलिं। भृंगराजरसैः
पिष्टाशोषयेदर्करश्मिभिः॥
सप्तधावा त्रिधावापिपश्चाच्
शीतकारयेत्। चूर्णयित्वास
मंतेनसहमर्द्दयेत्॥ तद्रस
तेयदाचूर्णंभवेत् कज्जलस
न्निभं। निर्धूमे वदरांगारे इ
वीजस्थाने प्रयत्नतः॥ तच्चतं
महिषीविष्टास्थापिते कदली
दले॥ निःक्षिप्यतदुपर्यन्यत्
पत्रंदत्वाप्रपीडयेत्॥ शीतलां
तात् ततःपश्चात् समुद्धृत्यावि
चूर्णयेत्। एवंसिद्धा भवेद्दा
पिद्यातिनी रसपर्पटी॥ ज्वरा
दिव्याधिसिद्धीमविस्पष्टाशुरा
हरः। चकारस्वपथ्यायुक्तः सुधा
वद्रसपर्पटीं॥ रक्तिकासमि
तां तावद्भृष्टजीरकसंयुतां।
गुंजार्द्धस्सहिंगवाप्पांभक्षये
द्रसपर्पटीं॥ रोगानन्तरूपभे
षजैरपितां भक्षयेद्बुधः॥

पिवेत्तदनुपानीयं शीतलंच
लकत्रयं॥ मत्स्यं वर्द्धयेत्तस्या
एकैकां रक्तिकां भिषक्। नाधि
कां दशगुंजातो भक्षयेन्नाकदा
चन॥ एकादशदिनारंभात्तत्ता
न्येवापकर्षयेत्। एवमेतांस
मश्नीयान्नरो विंशति वासरान्
शिवंगुरुंतथाविप्रान् पूजयि
त्वाप्रणम्यच। श्रद्धया भक्षयेद्द
न्तीरसांसरसाशनः॥ ज्वरंच
ग्रहणीचापितथातीसार मेव
च। कामलांपांडुरोगंच मूल
सीरं जलोदरं॥ एवमादीन्
गदान्हत्वालब्ध्वाःपुष्टिश्रवी
र्य्यवान्। जीवेद्वर्षशतंसाग्र
वलीपलितवर्जितः॥ रसप
र्पटी॥ अथ ज्वरिणो अन्नदा
नसमयः। तत्र चरकः। ज्व
न्न संभवति पक्वेषु रसदो
षमलेषु च। काले वा यदि
वाकालेसोऽकाल उदाहृतः
अन्यच्च। आमेपाकं गतेन्नरणां
यदा भोजनलालसा। भवेत्
कालेत्यकालेवासोऽकालउ
दाहृतः॥ तत्र कालमाह। ज्व
रस्य पाकावस्थाः नदानका
लः ज्वरस्य पाकका ॥

लश्च। वातिकः सप्तरात्रेण द
शरात्रेण पैत्तिकः। श्लैष्मिको
द्वादशाहेन ज्वरःपाकमपैति
हि॥ ज्वरस्य पाक उपशमः।
ज्वरपाकेनैव रसपाके दोषपा
कोऽपिकथितः। यतो दोषपा
कं विना ज्वरपाकोनभवतिर
सपाकं विनादोषपाकश्चन भ
वति॥ ननु यथा पैत्तिको ज्व
रो दशाहोरात्रेण पाकं याति
एकादशेदिनेऽन्नं दीयते। तथा
श्लैष्मिको ज्वरो द्वादशाहोरा
त्रेण पाकं याति त्रयोदशदि
वसेऽन्नं दीयते। तथा वाति।
को ज्वरः सप्ताहोरात्रेण पाकं
याति। अष्टमे दिवसेऽन्नं कथं
नदीयते। कथं सप्तम एव दि
वसेऽन्नं दीयते। इति। उच्यते।
कफपित्तेद्रवे धातु सहेते लंघ
नंवरं। आमस्तयाद्दहमपिवा
युर्नसहतेक्षणं॥ इति वचनादा
मरसपाके जाते आहारलाभं
विनावायुःक्षणमात्रमपि सो
ढुंनशक्नोति। स आशुकारित्वा
त् क्षणादाक्षेपकादीन् विकारा
न्जनयति॥ अतो वातिके ज्वरेपा

कदिनान्तिमे सप्तम एवदि
नेऽन्नं दीयते। तथाच धन्वंतरिः
ज्वराभिभूतः षडहे व्यतीते वि
पक्वदोषःकृतलंघनादिः। यो
भेषजंखादति वैद्यवश्यो निःसं
शयं हंत्यचिरात्सरोगान्॥ ज्व
राभिभूतः वातज्वराभिभूतः।
विपक्वदोषः पक्ववातः। कृत
लंघनादिः आदिशब्दात्कृत
पक्वजलपाननिर्वातगृहवास
गुरुस्नवसनधारणादिः। भेष
जमित्यत्रस्याप्युपलक्षणं। अ
तएवचरकः। ज्वरितं षडहे
तीतेलघ्वन्नं प्रतिभोजितं। पा
चनं शमनीयंवा कषायं पायये
त्ततमिति॥ ज्वरितंवात ज्वरिणं
षडहेऽतीतेइत्युपलक्षणं। पि
त्तज्वरिणं द्वादशाहेऽतीते। श्ले
ष्मज्वरिणं द्वादशाहेऽतीते। ल
घ्वन्नंभोजितंज्वरिणंपाचनंश
मनीयंवा कषायं पाययेत्।
पुनःसएव। सर्वज्वरेषु ज्वरि
तेदिनांते भोजयेल्लघु। दिनां
तेऽन्तशाहोऽत्रमथवाचीतेन
त्रिधाविभक्तस्यदिवसस्यमध्य
भागोपित्तप्राधान्यसमयेउक्तंच

भागभेदेन। वयोऽहोरात्रि भुक्तानां
तेऽन्तमध्यादिगाः क्रमादिति। ते
वातपित्तश्लेष्माणः। पित्तकाले
ऽपि मध्याह्नादौ वाक्। यत आह
याममध्येन भोक्तव्यं यामयुग्मं
न लंघयेत्। याममध्ये रसोत्
पत्ति र्यामयुग्माद्बलक्षयः॥
इति। एतत्स्वस्थपरमिति चे
न्न। यत आह। श्लेष्मक्षये प्र
वृद्धोष्मा बलवानेनलस्तदा
वेगापायेऽन्यथा नहि ज्वरवे
गाभिवर्द्धनं॥ तदा पित्तप्राधा
न्यसमये। अन्यथा उक्तसम
यादन्यदा। वेगापाये ज्वरा
ग्निवेगाभिवर्द्धनं भवतीत्यर्थः
अत्र विषमज्वरिणोऽन्ने दाने
कालविशेषमाह चरकः। सर्व
ज्वरेषु समाहं मात्रावल्लघु भोज
येत्। वेगापायेऽन्यथा तद्धि ज्व
रवेगाभिवर्द्धनं॥ सर्वज्वरेषु
सर्वविषमज्वरेषु। वेगापा
ये ज्वरवेगापाये भोजयेत्।
अन्यथा ज्वरवेगापायं विना।
तत्भोजनं ज्वरवेगाभिवर्द्ध
नं भवतीत्यर्थः॥ अथ पानाद्यह
णाय स्थानमाह। आहारनिर्हार

विहारयोगाः सदैव सद्भिर्विज
नेविधेयाः। इति॥ अस्य वल
स्य ज्वरितस्य भोजनार्थोपवे
शनप्रकारमाह सुश्रुतः।
ज्वरे प्रमेहो भवति स्वल्पैरपि
विचेष्टितैः। निषण्णं भोजयेत्त
स्मात् म्लेष्माचारौ च कारयेत् नि
षण्णं यथास्थानस्थितमेव न
तु स्थानान्तरे नीतं॥ अत्र ग्र
हणसमये पथ्यं ज्वरितेन क
वलः कर्तव्य इत्याह। यथादो
षोचितैर्द्रव्यैः कर्त्तव्यः कवल
ग्रहः। अरोचकास्यवैरस्य मल
पूति प्रसेकहृत्॥ सद्जीरक
चूर्णेन सिंधुजन्मयुतेन च। जि
ह्वादंतास्यमलं वैरस्यं तदुक्तं कव
लमाचरेत्॥ मुखे मलं विगंध
त्वं विरसत्वं च नश्यति। मनः प्र
सन्नं भवति भोजने तु रुचिर्भवेत्
ज्वरितो हितमश्नीयाद्यद्यप्यस्या
रुचिर्भवेत्। अन्नकाले ह्यभुंजा
नः क्षीयते म्रियतेऽपि च॥
अयमर्थः। यद्यपि अस्य ज्वरित
स्याहिते भक्ष्ये रुचिर्भवेत् तथापि ज्व
रितो हितमेवाश्नीयादिति नियमः। य
तस्तदाह सुश्रुतः। सर्वमिथ्यंघकाले च।

ज्वरी नाद्यात् कथंचन। न तु न
स्याहितं भुक्तमायुषे चास्त।
रवायच॥ आनद्धस्तिमितैर्दोषैर्या
वंत कालमातुरः। तावत्का
लं स लघ्वन्नमश्नीयात् सविरिक्त
वत्॥ आनद्ध स्तिमितैर्दोषैः।
अपक्वे दोषे क्षीम इत्यर्थः॥
ननु हितं वस्तुनि कथमरुचिः
स्यादत आह। सात्म्यात् स्वाद
भावाच्च पथ्यं द्वेष्यत्वमागतमि
ति। सात्म्यात् एकस्यैव भक्तस्य
सर्वदोपयोगात्। स्वादभावाच्च
भक्तस्यानास्वादत्वादपि विस्वादुत्वतः। पथ्य
मप्रियं स्यात्तथापि तदेव पथ्यं।
कल्पनाविविधैस्तैस्तैः प्रियत्व
गमवेत् पुनरिति॥ अथ च ज्वरि
तोऽन्नकालेऽश्नीयादेवेति हितो
ये नियमः। कुत इति चेत् हि
यतो हेतोरभुंजानः क्षीयते
पक्षघातं भवति तन्नोम्रियतेऽपि
च। ज्वरिताय हिताम्यन्नादीन्या
ह। रक्तशाल्यादयः शस्ताः पु
राणाः षष्टिकैः सह। यवाग्वो
दनलाजार्थे ज्वरितानां ज्वरापहाः
तत्र रक्तशालिगुणाः। रक्तशा
लिर्वर स्तेषां वल्यो ॥

वर्ण्य स्त्रिदोषजित्। चक्षुष्यो मू
त्रलः स्वर्यः शुक्रलस्तृड् ज्वरा
पहः॥ विषव्रणश्वास कास
दाहनुद्वह्निपुष्टिदः। तस्मादल्पा
न्तरगुणाः शालयो महदादयः
रक्तशालि र्यो मगधदेशे दाउ
दखानी इति प्रसिद्धः॥ मुद्गा
न्मसूरांश्चणकान् कुलत्थान्
समकुष्ठकान्। यूषार्थे यूषसा
त्म्यानां ज्वरितानां प्रदापयेत्॥ त
त्र मुद्गादिगुणास्तत्तत्शाके द्र
ष्टव्याः। पटोलपत्रं वार्त्ताककर्क
लकं कारवेल्लकं। कर्कोटकं
पर्पटकं गोजिह्वां बालमूलकं
पत्रं गुडूच्याः शाकार्थे ज्वरि
तानां प्रदापयेत्। तत्र पटोला
दिगुणास्तत्तत्शाके द्रष्टव्याः
लावान् कपिंजलान् एणान्
हरिणान् पृषतान् शशान्।
कुरंगान् कालपुच्छांश्च तथैव म
गमातृकान्॥ मांसार्थे मांससा
त्म्यानां ज्वरितानां प्रदापयेत्
सारस क्रौंच शिखिनस्तथा ति
त्तिरिकुक्कुटान्॥ गुरूष्णत्वान्न
शंसन्ति केचिदेवं व्यवस्थिताः।
तित्तिरिरत्रकुक्कुटस्य तित्तिरिः। गौ
रतित्तिरिः कपिंजलगदेन सर्व

गृहीतत्वात्। ज्वरितानां प्रकोपम
यदा याति समीरणः। तदैतेपि
हि शस्यन्ते मात्राकालोपपा।
दिताः॥ कपिंजल इति ख्या।
तो लोकेषु गौरतित्तिरिः। इति
निम्बुकं दाडिमं धात्रीफलम
म्लं प्रकीर्त्तितं। मद्यादम्ल
सात्म्याय कांजिकं वा प्रदाप
ने॥ अथौषधसिद्धाः पे
याः गुणाश्च। अन्नकाले
हिता पेया यथास्वं पाचनैः
कृता। दीपनी पाचनी लघ्वी
ज्वरघ्नीनां ज्वरापहा॥ यथा
स्वं पाचनैः कृता यथादोषपा
चनैः कृता। यथा। पंचमूल्याः
कषायं तु पाचनं वातिके ज्वरे।
सद्योह्नं पैत्तिके मुस्तकटुकैं
द्रयवैः कृतं॥ पिप्पल्यादि
कषायं तु पाचनं कफजे ज्वरे
लघुना पंचमूलेन पिप्पल्या
सह धान्यया॥ महत्या पंचमू
ल्या पथ्या ह्रीबेरस्पर्शिगोक्षुरैः॥
सिद्धानि भिषगन्नानि प्रयुंजीत य
थाक्रमं॥ वातपित्ते श्लेष्मपित्ते क
फवाते त्रिदोषजे। अस्यायमर्थः
वातपित्ते लघुना पंचमूलेन सिद्धा
न्यन्नानि भिषक् प्रयुंजीत। शालि

पर्णी पृश्निपर्णी कंटकारी बृहती त
था। गोक्षुरः पंचमः प्रोक्तः पंचमू
लमिदं लघु॥ श्लेष्मपित्ते वातपि
त्ते पिप्पल्या सह धान्यया। कफ
वाते महत्या पंचमूल्या। श्री
फलः सर्वतोभद्रा पाटला ग
णिकारिका। श्योनाकः पंचमः
प्रोक्तः पंचमूलमिदं महत्॥
त्रिदोषजे ज्वरे देया व्याघ्रीदुस्पर्श
गोक्षुरैः। व्याघ्री कण्टकारिका।
दुस्पर्शो यवासः। पेयास्त्वा रक्तशा
लीनां बस्ति पार्श्व शिरोरुजि।
श्वदंष्ट्राकंटकारीभ्यां सिद्धां ज्वरह
रीं पिबेत्॥ विबद्धवर्च्चाः सयवां
पिप्पल्यामलकैः शृतां। सर्पिष्मं
तीं पिबेत् पेयां ज्वरी दोषानुलोम
नीं॥ कासी श्वासी च हिक्की च पंचमू
लीशृतां पिबेत्। यवोः शान्तं। प्र
च पंचमूली बृहती लघ्वी च हिता।
तया शृता पेया पिबेदर्त्थः।
पेया भेषजसंयोगाल्लघुत्वाच्चा
ग्निदीपिका। वातमूत्रपुरीषा
णां दोषाणां चानुलोमिका॥ स्वे
दनाय च सोसत्वाल्लघुत्वात् त
त् शमाय च। आहारभावात्॥
वात प्राणाय सरत्वाल्लाघवाय च

ज्वरघ्नी हेतसात्म्यत्वात्तस्मात्तां पू
र्वमाचरेत्॥ हेतसात्म्यत्वात्
हेतवो वातपित्तकफा स्तेषां सा
त्म्यत्वात्। यवकोलकुलत्था
नां मुद्गमूलक शुण्ठयोः। प
कैकं मुष्टिमादाय पचेदष्टगु
णे जले॥ पंचमुष्टिक इत्येष
वातपित्तकफापहः। श्लेष्मप्र
शस्यते गुल्मे कासे श्वासे क्षये
ज्वरे॥ पंचमुष्टिकयूषः॥।
हृद्यमन्न पुरीषस्य गुदे वर्त्तिं
निधापयेत्। पिप्पली पिप्पली
मूलं यवानी चव्यसाधितं॥ पा
ययेत यवागूं वा मारुतायनुलो
मनीं। पेयाया यवागवाश्च।
क्वचिद् पवादमाह। मदात्यये
मद्यनित्ये ग्रीष्मे पित्तकफोत्थि
ते। ऊर्द्ध्वगे रक्तपित्ते च यवागू
र्न हिता ज्वरे॥ दाहच्छर्दिर्दितं
तामंनिरन्नं तृष्णयान्वितं। श
र्करामधुसंयुक्तं पाययेल्लाजत
र्पणं॥ लाजशक्तुरूपं तर्पणं।
तथा च ग्रंथान्तरे। दाहच्छर्दिर्दि
तं तामं निरन्नं तृष्णयान्वितं। च
र्म्मीर्नं मद्यपं चापि तोयालोडि
तशक्तुकं॥ शर्करा मधुसं
युक्तं पाययेल्लाजत ॥

र्पणं। ज्वरापहैः फलरसैर्युक्तम
न्नं हितं क्वचित्॥ संतर्पणं त्व
पंचाह पंचतरिः। द्राक्षादाडि
म खर्जूर प्रियालैः सशर्करं।
लाजचूर्णं समधाज्यं संतर्पण
मुदाहृतं॥ लाजाचूर्णं॥ द्राक्षा
द जल शर्करा मधाज्यसहितं तर्प
णमक्तमितस्यर्थः॥ लाजशक्तुग
णाश्च गुणश्रेष्ठ लाजानाशक्तवः
दोष सिता युक्ता विशेषतः।
छर्द्यतीसारतृड्दाह विषमूर्च्छा
ज्वरापहाः॥ चरकश्च। तत्र तर्पण
मेवादौ प्रदेयं लाजशक्तुभिः।
ज्वरापहैः फलरसैर्युक्तं मधु
सशर्करं॥ ज्वरघ्नानि फलान्या
ह चरक एव। द्राक्षा दाडिम खर्जूर
प्रियालैः सपरूषकैः। तर्पणार्ह
स्य दानेवं तर्पणं ज्वरनाशनं॥ प्रि
याल मत्रपक्वफलेन तन्मज्जाति
गुरुत्वात्। तर्पणार्हस्य दाहच्छर्दि
तृषार्त्तस्य लंघितस्य क्षीणस्यात्य
र्थः। अश्मोपवासानिलजे हितो नि
त्यं रसौदनः। रसो ऽत्र मांसर
सः। तेन सक्ति उदनो रसौ
दनः। अन्नेन व्यंजन मिश्रणे
न समासः। मुद्गयूषौदनश्चै
व हितः कफ समुत्थिते।

स एव सितया युक्तः पीतःपि
त्तज्वरे हितः ॥ स एव मधुसंयुतो
दन एव ॥ कफोऽल्पदोषोयः
क्षीणकफो जीर्णज्वरान्वितः ॥
क्विंथामृष्टदोषश्चरक्तः पित्ता
निलज्वरी ॥ पिपासार्त्तःसदाह
श्च पयसा सस्वस्थीभवेत् । अन्य
च्च । अजाक्षीरं गुडोपेतं पातव्यं
ज्वरशान्तये । तदेव तपयः पी
तं तरुणे हंति मानवं ॥ तरुणे
ज्वरे ॥ अन्यच्च । जीर्णे ज्वरे कफे
क्षीणे क्षीरं स्यादमृतोपमं ।
तदेव तरुणे पीतं विषवद्धंति ।
मानवं ॥ अथ ज्वरिणो नियम
माह । न हिरण्यात्र पवीक्षेत्ना
भिष्यंदि कदाचन । न तीक्ष्णं न
गुरुप्रायो भुंजीत तरुणज्वरी
नजातु तर्पयेत् प्राज्ञः सहसा
ज्वरकर्षितं । तेन संशामितोप्य
स्य पुनरेव भवेज्ज्वरः ॥ अथ ज्व
रविमुक्तेः पूर्वरूपमाह ।
दाहः स्वेदो भ्रम स्तृष्णा कं
प विड्भेद संज्ञिता । कु
जनं चातिवैगंध्य माकृति
ज्वरमोक्षणे ॥ विड्भिन्नम
लप्रवृत्तिः । अत्र संपदादित्वा
त् भावे क्विप् । कूजनं कु
थ्यमं । अतिवै गंध्यं गात्रस्य ।
ज्वरमुक्तो भविष्यत्या मेतल
क्षणं भवति ॥ ननु दोषक्षयं
विनानव्याधि निवृत्तिः । क्षी
णश्च दोषः कथमेवं विधं रू
पं करिष्यति । उच्यते । कश्चित्
क्षीणोपि दोषः विनाशकाले
स्वशक्तिं दर्शयति । यथा नि
र्वाणावस्थायां दीपो विशेषा
त् प्रज्वलति । वाग्भटोप्याह
धात्वन् प्रक्षोभयन्दोषो मोक्ष
काले विलीयते । तेन नरः श्व
सन् कूजन् वमन्विघत्र चेष्ट
ते इति ॥ न चेष्टेन अचेष्टश्चसा
त् । त्रिदोषजे ज्वरे लेतं दंतवेग
चथानवेगे । लक्षणं मोक्षकाले सा
द्यस्मिन् स्वेददर्शनं ॥ एतद्दा
हादिकं लक्षणं मोक्षकाले एते
ष्वेव ज्वरेषु स्यात् । केषु त्रिदोष
जे । अंतर्वेगे । धातुगे ज्वरे । अ
न्यस्मिन् स्वेदमात्रदर्शनं भ
वति । अथ ज्वरमुक्तस्य लक्ष
णमाह । देहो लघु र्व्यपग
तः क्लम मोह तापः पाको
मुखे करण सौष्टव मव्य
थत्वं । स्वेदः क्षवः प्रकृति
योगिमनो ऽन्न ॥

लिप्सा कण्डूश्च मूर्ध्नि विगतज्वर
लक्षणानि ॥ सुश्रुतोप्याह ।
स्वेदो लघुत्वं शिरसः कण्डूः पा
कोमुखस्य च । क्षवथुश्चान्नकां
क्षा च ज्वरमुक्तस्य लक्षणं ॥
अथ ज्वरमुक्तस्य नियमाः ।
व्यायामं च व्यवायं च स्नानं चंक्र
मणानि च । ज्वरमुक्तो न सेवेत
यावन्न बलवान् भवेत् ॥ अन्य
च्च । व्यायामं च व्यवायं च प्रवा
तं शिशिरं जलं । ज्वरमुक्तो न से
वेत यावन्न बलवान् भवेत् ।
अपि ज्वरविमुक्तस्य स्नानं कु
र्यात् पुन ज्वरं । तस्माज्ज्वरवि
मुक्तोपि स्नानं विष मिवत्य
जेत् ॥ बलवर्णाग्निवपुषाया
वन्न प्रकृति र्भवेत् । तावज्ज्वरेण
मुक्तोपि वर्जनीयानि वर्जयेत्
अथ वातज्वराधिकारः ।
तत्र वातज्वरस्य विप्रकृष्टस
न्निकृष्टकारणकथनपूर्विकां
संप्राप्तिमाह । वातलाहार चे
ष्टाभ्यां वायुरामाशयाश्रयः ।
बहिर्निरस्य कोष्ठाग्निं ज्वरकृत्
स्याद्रसानुगः ॥ अथ तस्य पू
र्वरूपमाह । जृंभात्यर्थं समीर
णादिति । समीरणात् ज्वरे उत्
पत्स्यति अत्यर्थं जृंभा स्यात् ।
जृंभा च श्रमादिपूर्विका भवति
अथ वातज्वरस्य लक्षणमाह
वेपथुर्विषमो वेगः कंठोष्ठमु
खशोषणं । निद्रानाशः क्ष
वस्तंभो गात्राणां रौक्ष्यमेव च
शिरोहृद्गात्ररुग्वक्त्रवैरस्यं ब
द्धविट्कता । शूलाध्माने जृं
भनं च भवन्त्यनिलजे ज्वरे ॥
एतान्यनिललक्षणानि प्रायो भावि
त्वेन सुश्रुतेन निर्दिष्टानि । च
कारादन्यान्यपि चरकनिदानो
क्तानि बोद्धव्यानि । तान्येव श्लो
केन प्रदर्श्यन्ते । भवंति विवि
धा वातवेदना स्यात् समता
पिंडिकोद्वेष्टनं कर्णस्वनो
वक्त्रकषायता ॥ ऊरुसादोह
नुस्तंभो विश्लेषः संधिजानुनोः ।
शुष्ककासो वमिर्लोमहर्षदंतहर्षः
श्रम भ्रमौ ॥ अरुणनेत्र मूत्रा
दित्वं प्रलापोष्णकामिता ।
विषमो वेगः शारीरोंचनादिरू
पोज्वरवेगो विषमो भवतीत्यर्थः
क्षवस्तम्भः छिक्काया अभावः
तथा च वाग्भटः । हर्षो रोमांग
दंतेषु वेपथुः क्षवथोर्ग्रहः इ
ति । चरकोपि । क्षवथुग्रहः नि

ग्रह इति । शिरो रुग्गात्ररुक्
गात्रपदे प्रयुक्ते शिरोरुग्ग्र
हप्रयोग स्तत्र विशेषेण
वेदनाबोधनार्थः ॥ अथवा
तज्ज्वरचिकित्सा । आमाश
यस्थो हत्वाग्निं सामो मा
र्गान् पिधापयन् । विदधाति
ज्वरं दोष स्तस्माल्लंघनमा
चरेत् ॥ इति वचनात् सा
मान्यतो ज्वरि मात्रस्य याव
दारोग्यदर्शनं लंघनाभिधा
ने वातज्वरिणो लंघनविधा
ने विशेष माह चरकः ॥
ज्वरितं षडहेऽतीते लघ्वन्नं
प्रतिभोजितं । पाचनं शम
नीयं वा कषायं पाययेद्भिष
क् ॥ सुश्रुतोप्याह । वातिके
सप्तरात्रेण दशरात्रेण पैत्ति
के । श्लैष्मिके द्वादशाहेन ज्व
रेषुंजीत भेषज मिति ॥ ननु
अत्र वैषम्येनाप्राण इति
श्रुतिः तदत्रैविनाप्राणिभिः
कथंस्यान्नद्यमित्याह । दोषाण
मेव सा शक्ति र्लंघनेयासहिष्णु
ता । नहि दोषक्षये कश्चित् सो
ढुं शक्तोति लंघनं ॥ कफपित्तेद्
वेधावसहेते लंघनं वहु । आमद

या हृद्ध्मपि वायुर्न सहते तत्तं ।
भेषजमाह । श्रीफलः सर्वतोभ
द्रा कामहतीच शोणकः । तर्क्का
रीगोक्षुरः द्वेहा बृहतीकलसी
स्थिरा ॥ रास्नाकणाकणामूल
कुष्टशुंठीकिरातकः । मुस्तामृ
तावलावालद्राक्षायासः शता
ह्विका ॥ पथ्याक्वाथाविहत्येव
प्रभंजनकृतं ज्वरं । सोपद्रवंच
योगोऽयं सर्वयोगवरः स्मृतः
श्रीफलो विल्वः । सर्वतो
भद्रा गंभारी । कामहतीपाट
ला । शोणकः शोनापाठा
इति लोके । तर्कारी गणिका
रिका । कलसी पृश्निपर्णी ।
स्थिरा शालिपर्णी । वाल सुगंध
वाला । यासो यवासः । दशमूला
दिक्वाथः ॥ सुश्रुतस्तु । पंचमू
लीकषायेन पाचनं वातिकेज्व
रे इति । अत्र पंचमूली बृहत्पंच
मूली । अतएव त्रिफाती । श्रीप
र्णीतर्क्कारी श्रीफल टुंटुकपाट
लामूलैः । पाचनमुचितमा
रुतजनितज्वरहारि वारिणि
क्वथितैः ॥ बृहत्पंचमूलीक्वा
थः ॥ किरातताम्रतो दीव्यबृ
हतीद्वय गोक्षुरैः । त्रिपर्णी

कलसी विश्वैः क्वाथो वातज्व
रापहः ॥ उदीच्यवालकं । त्रि
पर्णी शालिपर्णी । कलसी पृ
श्निपर्णी । किराताद्विक्वाथः ॥
गुडूची पिप्पलीमूल नागरैः पा
चनंस्मृतं । वातज्वरे तथा पेयंका
लिंगसमसैः हतिं ॥ कालिंगस्तु
तपेंद्रयवस्मृतं ॥ त्रिफाती । वि
श्वा स्मृता ग्रंथिक सिद्धतोयमरु
ज्वरस्याग्निवतः ऊनोऽयं । क्वाथो
ऽथ कुस्तुंवुरुदेवदारु महौषधः
पाचनमत्रचारु ॥ औषधं शुंठी ।
क्वाथः पाचनमिति । वेदाप्रमा
णमितिवत् । पंचमूलीवलारा
स्ना कुलत्थैः सह पोष्करैः । क्वा
थोहन्त्याशिवः कंपं पर्वभेदं म
रुज्वरं । पंचमूली विल्वादिः ।
बृहत्पंचमूल्यादिक्वाथः ॥
कणा रसोनाम्रतवह्नि विस्तानि
दिपिका सिंधुक भूमिनिंवैः स
मस्तकै राचरितः कषायो हिता
शितां हंति गदानिमांस्तु ॥
ज्वरं महद्धित्तसमुद्भवं तथा व
लासमंचानलमंदताच । कंठाव
रोधं हृदयावरोधं स्वेदंच रोमांच
हिमत्व मोहान् ॥ कणादि ।

क्वाथः ॥ शुद्धं शंकरशुक्रम
ष्टलुलितं मारारिनारी रजस्त
द्वत्ताव्रदमापतिस्फुटमलालका
रवल्ल स्तते । तावत्येव मनः
शिला च विमला तावत्तथा
टंकणे शुंठी द्वादशमिता कणाच
चिंचे दिक्पालसंख्यात्तके ॥ वि
षादिवस्तु निशिलोपरिष्टाद्वि
चूर्णयेद्वासरि शोधयेच्च । तत
स्तुखल्लेरस गंधकौच चूर्णं
च तथामयुग्मं विमर्द्य ॥ क
ल्पतरुनामधेयो यथार्थना
मारसः श्रेष्ठः । समीरणश्ले
ष्मगदान् हरते मात्रास्य गुंजै
का ॥ आर्द्रकेण समं भेषभक्षि
तो हंति वातकफसंभवं ज्वरं ।
श्वासकासमुखवैकशीतता
वह्निमांद्यविरुचींश्च नाशयेत्
नस्येनाश्ववहरति शिरोऽर्त्तिं
कफवातजां । मोहंमहांतमपि
चप्रलापंस्वस्थुग्रहं ॥ कल्पत
रुरसः ॥ सामान्यज्वरचिकित्सो
क्तोमहाज्वरांकुशः प्रदेयोऽत्र
विषमदोषप्रमाथिकोष्टगा
शुमणिरसकमाईकमर्दितं । क
मविवर्द्धितमुद्दलितज्वरश्विपुर
भैरव एषरसो वरः ॥ शुमणिः

मारितं ताम्रं तस्य भागाः पंच ।
रसकं हिंगुलं तस्य भागाः षट्
मात्रास्य रक्तिकार्द्धं । त्रिपुरभै
रवो रसो ज्वरे ॥ वातश्लेष्मज्व
रे स्वेदं जंघा पार्श्वास्थिशूलिनि
पीनस श्वासवाधीर्य्यकारयेत
हितानवित्॥ स्रोतसां मार्दवं
कृत्वानीत्वापावकमाशयं ।
हत्वा वातकफस्तंभं स्वेदो ज्व
रमपोहति ॥ खर्परभ्रष्टपट
स्थितकांजिकसंसिक्तवालु
कास्वेदः। शामयति वात
कफामय मस्तकशूलांग
भंगादीन् ॥ वालुकास्वेदः
शामयति वातकफामयम
स्तकशूलांगभंगादीन् वा
लुकास्वेदःकंपशिरोहृदय
गात्रव्यथायां जंभायापादस्तम
तायांपिंडिकोद्वेष्टनेरुरुसादे
हनुस्तंभे लोमहर्षेच॥ मातुलुंग
फलकोशस्थिः तिंपुजन्मभरि
चौचितेम्भवेत॥ हंति वातकफरोग
मास्यांगशोषमामुजडतामरोचकं
इतिकवलः कंठोष्ठमुखशोषे ॥
अम्लाम्रशर्करादाडिमाभ्यांबदरादा
डिमयोलल्या॥ कल्कं विधारयेतास्य
शोषवैरस्यनाशनं॥ द्राक्षामलकयोः

क्षिपेत्। तेन हृष्टा मुखस्रोतः
संशोषः स्तेन शाम्यति ॥ सरस
जायते वक्त्रे रुचिर्भवति भोजने
निद्रानाशस्य निदानमाह ।
लावणं लंघनं चिंताव्यायामः
शोककभीक्रुधः। एभिरेव भवे
निद्रानाशःश्लेष्मनिसंक्षयात् ॥
अस्य चिकित्सामाह। भक्षेत् वि
जयाचूर्णं मधुना निशि भक्षयेत्
निद्रानाशेऽतिसारे च ग्रहणीपा
वकक्षये ॥ गुडं पिप्पलिमूलस्य
चूर्णेनालोडितं लिहन् । चिरादपि
चसंनष्टां निद्रामाप्नोति मानवः।
वासस्तजंघामूलं मूलं वा शिरसि
काकमाच्याश्च। विहितं निद्राजनकं
सुमूलं वा प्लुतं तस्य गुडं पीतमिति शे
षः। मूलं तत्काकमाच्या वद्धं हस्तेन
मस्तके नियतं। विदधाति नष्टनि
द्रोऽतिशमाम्बरसिद्धमिदं ॥ शीलये
त्स्वद्रनिद्रस्तु क्षीरमद्यरसान्दधि।
अभ्यंगोद्वर्त्तनस्नानमूर्द्धकर्णाक्षि
तर्पणं ॥ रसं मांस रसं ॥
कांताबाहुलतालाश्लेषानि हृ
तिक्रुतहृत्सता । मनोऽनुकू
ला विषयाः कामं निद्रासुख
कल्कं सहृतं वदने ॥

प्रदाः। रसेषु शाकेच स्नूपे च सर्पि
र्दूधपयः स्मृचः॥ निद्रासंजन
यत्याशुपलाण्डुरूपयोजितः
रसेमांसरसे॥ एतद्वे पानकी
माषाः सुरामांसरसः पयः।
गोधूमतिल मत्स्याश्च निद्रांकु
र्वंति देहिनां ॥ निद्रानाशे ॥
दारुहैमवतीकुष्ठ शताह्वा
हिंगु सैंधवैः ॥ लिपन्तौ
लेरम्लपिष्टैः शूलाध्मानयु
तोदरं॥ हैमवती स्वेतवचा।
दारुषट्कलेपः शूलाध्मान
योः॥ कटुतैलकर्णहिंगुव
चालशुनसाधितं। उष्णं विनि
हितं हंति कर्णयोर्निस्वनं व्यथां
तैलं कर्णस्वने ॥ कणा सुरा
पिवच्चया यवान्या च समन्विता
तांबूलसहिता हंति शुष्कका
संमुविधूता॥ शुष्ककासे ॥
अथाश्रमाह। श्रमोपवासाभि
लंघेहितो नित्यं रसौदनः। मु
द्गामलकयूषस्तु वह्निविह्वाय
दीयते। रसोविहितमांसरसः।
पेयांवारकशालीनां वस्तिपार्श्व
शिरोरुजि। स्वदंष्ट्राकंटकारी
भ्यां सिद्धां ज्वरहरीं पिबेत्॥ का
सी श्वासी च हिक्कीच पंच मू

लीसृतां पिबेत्। पेया मिति शे
षः। इति वातज्वराधिकारः ॥
अथ पित्तज्वराधिकारः। तत्र
पित्तज्वरस्य विप्रकृष्ट सन्निकृ
ष्ट कारणकथन पूर्विकां सं
प्राप्तिमाह। पित्तलाहारचे
ष्टाभ्यां पित्तमामाशयाश्रयं।
वह्निं निरस्य कोष्ठाग्निं ज्वरकृत्
स्याद्रसानुगं॥ पित्तस्य पंगुत्वा
तेन कोष्ठाग्रेरुष्मावह्निर्नैते न
पाक्यते। यत आह। पित्तं पं
गु कफः पंगुः पंगवो मलधा
तवः। वायुना यत्र नीयंते तत्र
गच्छंति मेघवत्॥ इति। ततो
ऽत्र पित्तं वायुसहायं बोद्धव्यं।
यत आह। द्वयमेकरसं नास्ति
न रोगोऽप्येकदोषजः। एक
स्तु कुपितो दोष इतरान् अपि को
पयेत् ॥ इति ॥ अथ तस्य पू
र्वरूपमाह। पित्तात्तयनयो र्दा
ह इति। पित्तात् ज्वरे उत्पत्
स्यति नेत्रदाहः स्यात्। सच प्र
मादिपूर्वको भवति ॥ अ
थ पित्तज्वरस्य लक्षणमाह
वेगस्तीक्ष्णोऽतिसारश्च निद्रा
ल्पत्वं तथा वमिः। कण्ठोष्ठमु
खनासानां पाकः स्वेदश्च जाय

ते॥प्रलापोवक्त्रकटुता मूर्च्छादा
हो मदस्तृषा। पीतविण्मूत्रनेत्रत्वं
पैत्तिके भ्रम एव च ॥अतिसारः
पित्तस्य सरत्वात् सद्रवा प्रवृत्ति
रत्यतीसार एव तस्य ज्वरेऽप
द्रवत्वात्। वमिः यदा पित्तक
फस्थानं यातितदा बोद्धव्या।
प्रलापोऽनर्थकं वचः। मूर्च्छा
रूपादेरज्ञानं। मदः पूग कोद्र
वधत्तूरभक्षणादिव मत्तता।
भ्रमः चक्रारूढस्येवज्ञानं। च
कारात् रक्तकोष्ठादायो बोद्ध
व्याः॥ अथ पित्तज्वरस्य चिकि
त्सा। आमाशयस्थो हत्वाग्निं
सामो मार्गान् पिधाय यत्। वि
दधाति ज्वरं दोषस्तस्माल्लंघन
माचरेत्॥ इति वचनात् सा
मान्यतो ज्वरिमात्रस्य यावदारो
ग्यदर्शनं लंघनाभिधाने पित्तज्व
रिणो लंघनविधाने विशेषमा
ह सुश्रुतः। पैत्तिके दशरात्रेण
ज्वरे युंजीत भेषज मिति। दश
रात्रेण लंघनवता कालेनेने
त्यर्थः॥ किं तद्भेषजं तदाह।
तिक्तामस्तायवैः पाचकस्फ
लाभ्यां सहोदकं। पक्वं सश
र्करं पीतं पाचनं पैत्तिके।

ज्वरे॥ तिक्तादिकाथः॥ पर्प
टो वासक तिक्ता कैरातो ध
न्वयासकः। प्रियंगुश्च कृतः का
थ एषां शर्करया युतः॥ पिपा
सा दाह पित्तास्त्रयुक्तं पित्तज्वरं
हरेत्। पर्पटादिकाथः॥ द्रा
क्षा हरीतकी मुस्ता कटुका
कृतमालकः। पर्पटश्च कृतः
काथ एषां पित्तज्वरापहः। मुख
शोषप्रलापार्तदाहमूर्च्छाभ्र
मप्रणुत्। पिपासारक्तपित्तानां
शमनो भेदनो मतः॥ द्राक्षादि
काथः॥ पटोलयवधान्याक
मधुकं मधुसंयुतं। हंति पित्तज्व
रं दाहं तृष्णां चातिप्रमाथिनीं॥
पटोलादिकाथः॥ गुडूच्याम
लकीयुक्तः केवलो वापि पर्प
टः। पित्तज्वरं हरेत्तूर्णं दाह
शोषभ्रमान्वितं॥ गुडूच्यादि।
काथः॥ एकः पर्पटकः श्रेष्ठः
पित्तज्वरविनाशनः। किंपुन
र्यदि युज्येत चंदनोशीरवालकैः
ह्रीवेरं चंदनोशीर घन पर्पट
साधितं। दद्यात् सुशीतलं
वारि तृट्छर्दिज्वरदाहनुत्
ह्रीवेरादिकाथः॥ ॥
भूनिम्बातिविषा लोध्र मुस्तके

न्द्रयवाम्बुदाः। वालकं धान्यकं
विल्वकषायो माक्षिकान्वितः॥
विड्भेदश्वासकासांश्च रक्तपित्त
ज्वरं हरेत्। भूनिम्बादिकाथः॥
द्राक्षा चंदन पद्मानि मुस्ता ति
क्तामृतापि च। धात्री वालमृणा
लं च लोध्रेंद्रयव पर्पटाः॥ पद्म
कं प्रियंगुश्च यवासो वासक।
स्तथा। मधुकं पुलकं चापि
किरातो धान्यकं तथा॥ एषां का
थो निहंत्येव ज्वरं पित्तसमुत्थि
तं। तृषादाहप्रलापं च रक्तपित्तं
भ्रमं क्लमं॥ मूर्च्छां छर्दिं तथा
शूलं मुखशोष मरोचकं।
कासं श्वासं च हृल्लासं नाशये
न्नात्र संशयः॥ महाद्राक्षादिका
थः॥ ससितो निशि पर्युषितः
प्रात धान्याक तण्डुलकाथः।
पीतशमयत्यचिरादेतदाहं ज्व
रं पैत्तं॥ धान्याककाथः॥ अ
मृताया हिमः प्रातः ससितः पै
त्तिकज्वरं। वासायाश्च तथा का
स रक्तपित्तज्वरान् जयेत्॥ गु
डूची भूमिनिंबश्च वालं वीरण
मूलकं। लघुमस्तं त्रिहृद्धात्री
द्राक्षा वासा च पर्पटः॥ ए
षां काथो हरत्येव ज्वरं पि

त्तकृतं द्रुतं। सोपद्रवमपि मा
त र्निपीतो मधुना सह॥ गुडू
च्यादिकाथः॥ पलाशस्य
वदर्या वा निम्बस्य मृदुपल्लवैः
अम्लपिष्टैः प्रलेपोऽयं हन्यादा
हयुतं ज्वरे॥ उत्तानसुप्तस्य
गभीरताम्रकांस्यादि पात्रे नि
हिते च नाभौ। शीताम्बुधारा
वहुला पतंति निहंति दाहं
त्वरितं ज्वरं च॥ पथ्यातैल
घृतदोहे लिहं दाहज्वरापहः
कासासृक् पित्त वीसर्प श्वा
सान् हंति वमीरपि॥ तैलह
तदोहे विन्यत्र तत्समुच्चय।
तैलेन केवलेन दोहेणापि
लिप्यात्॥ कांजिकार्द्रपटे
नावगुण्ठनं दाहनाशनं। अ
घ गोतक्र संसिक्त शीतलीकृ
तवाससा॥ द्राक्षामलककल्
केन कवलोऽत्रहितो मतः।
पक्वदाडिमवीजैर्वा पानाकल्के
नचकश्चित्॥ धानाऽत्रधान्या
कं। इति कवलः॥ अथात्र
माह। दाह वम्यर्दितं तासं नि
रुं तृषयान्वितं। शर्करामधु
संयुक्तं पाययेल्लाजतर्पणं॥ ला
जतर्पणं लाजाश्च प्रक्षुद्र तर्पणं

संतर्पणस्त्वत्ररूपमुक्तं सामान्यज्व
रचिकित्सायां ॥ मृद्वद्युषोदनो
देयः सितया पैत्तिके ज्वरे ।
हर्म्ये अभ्राभ्रसंकाशे शशांक
करशीतले ॥ मलयोदकसं
सिक्ते स्वप्यात् पित्तज्वरी नरः
हारावलीचंदनशीतलानां
सुगंधपुष्पांबरभूषितानां ।
नितंबिनीनां सपयोधरीणा
मालिंगनान्याशु हरंति दाहं ।
वाप्यः कमलहासिन्यो जलयं
त्रगृहाः प्रभाः । नार्यश्चंदन
दिग्धांगा दाहदैन्यहरा मताः
इति पित्तज्वराधिकारः ॥
अथ श्लेष्मज्वराधिकारः । तत्र
श्लेष्मज्वरस्य विप्रकृष्टसन्निकृ
ष्टकारणकथनपूर्विकां संप्रा
प्तिमाह । श्लेष्मलाहारचेष्टाभ्यां
कफ आमाशयाश्रयः । बहिर्नि
रस्य कोष्ठाग्निं ज्वरकृत् स्याद्रसा
नुगः ॥ कफस्य कोष्ठाग्नितेज ।
सो वह्निर्नयनेन पंगुत्वादाशंका
यां जातायां पित्तस्यैव सिद्धांतो
बोद्धव्यः ॥ अथ तस्य पूर्वरू
पमाह । कफात् अन्नानभिनंदन
मिति । कफात् ज्वरे उत्पत्स्य
ति अन्नानभिलाषः स्यात् । स च

श्रमादिः पूर्वको भवति ॥ अ
थ श्लेष्मज्वरस्य लक्षणमाह
स्तैमित्यं स्तिमितो वेग आलस्यं
मधुरास्यता । शुक्लमूत्रपुरीष
त्वं स्तंभस्तृप्तिरथापि च । गौ
रवं शीतमुत्क्लेदो रोमहर्षो
तिनिद्रता । प्रतिश्यायोऽरुचिः
कासः कफजेऽक्ष्णोश्च शुक्ल
ता ॥ स्तैमित्यं अंगानामार्द्रपट
वेष्टितत्वमिव । स्तिमितो वेगः
ज्वरस्य मंदवेगः । आलस्यं सम
र्थस्यापि कर्मण्यनुत्साहः । स्तं
भः अंगानम्रता । तृप्तिः अन्ना
भिलाषस्तत्रापि भोजनासाम
र्थ्यं गौरवं गात्राणां । शीतं शीत
लगाति । उत्क्लेदः वमनोपस्थिति
रिव । अतिनिद्रता निद्राधिक्यं । प्र
तिश्यायो नासारोगविशेषः ॥
अरुचिः भोजनानिच्छा । चका
रात् पिडका शीता मुखप्रसेक
छर्दिर्हृल्लासहृदयोपलेप उष्णा
भिलाषो वह्निमांद्य मिति ।
यत्तदुक्तं । प्रसेकः पिडकाः शी
ताश्छर्दिस्तंद्रोष्णस्य कामिता । क
फेन लिप्तहृदयं भवेदग्नेश्च मं
दता ॥ अथ श्लेष्मज्वरचिकि
त्सा । आमाशयस्थो हत्वाग्नि

सामो मार्गान् पिधापयन् । वि
दधाति ज्वरं दोषस्तस्माल्लंघनमा
चरेत् ॥ इति वचनात् सामान्य
तोऽत्र त्रिमात्रस्य यावदारोग्यद
र्शनं लंघनाभिधाने श्लेष्मज्व
रिणो लंघनविधाने विशेष
माह सुश्रुतः । श्लैष्मिके द्वाद
शाहेन ज्वरे युंजीत भेषजमि
ति । द्वादशाहेन लंघनवता
व्यतीतेनेत्यर्थः ॥ किंतद्भे ।
षजं तदाह । पिप्पल्यादिक
षायेन कफजे परिपाचनमि
ति । पिप्पल्यादिगणमाह । पि
प्पली पिप्पलीमूलं मरिचं ग
जगजपिप्पली ॥ नागरं चित्रकं
चव्यं रेणुकैलाजमोदिका ॥ सर्ष
पो हिंगु भार्गी च पाठेंद्रयवजीर
काः ॥ महानिंबश्च मूर्वा च विषा
तिक्ता विडंगकं ॥ पिप्पल्यादि
गणो ह्येष कफमारुतनाशनः ।
गुल्मशूलज्वरहरो दीपनश्चाम
पाचनः ॥ पिप्पल्यादिक्वाथः ॥
दोषोपकल्पासंयोगः श्वास ।
कासज्वरापहः । प्लीहानं हंति
कांच बालानामपि शस्यते ॥
पिप्पली त्रिफला चापि सम
भागा ज्वरी लिहेत् । मधुना स

र्पिषा वापि कासी श्वासी ज्वरी
भवेत् ॥ कट्फलं पौष्करं शृंगी
कृष्णा च मधुना सह । श्वास
कासज्वरहरो लेहोऽयं कफना
शनः ॥ चातुर्भद्रिकावलेहः ॥
कट्फलं पौष्करं शृंगी यवा
नी कारवी तथा । कटुत्रयं च स
र्वाणि समभागानि चूर्णयेत्
आर्द्रकस्य रसे लिह्यान्मधुना
वा कफज्वरी । कासश्वासारुचि
छर्दिश्लेष्मानिलनिहत्तये । अ
ष्टांगोऽवलेहः ॥ सिंधुवारदल
क्वाथं कणाढ्यं कफजे ज्वरे ।
जंघयोश्च बले दीर्णे कर्णे च
पिहिते पिबेत् ॥ यवानी पिप्पली
वासा तथा खावसवल्कलं । ए
षां क्वाथं पिबेत् कासे श्वासे च क
फजे ज्वरे ॥ वासा क्षुद्रामृताक्वाथः
क्षौद्रेण ज्वरकासहृत् । वासादि
क्वाथः ॥ मरिचं पिप्पलीमूलं ना
गरं कारवी कणा । चित्रकं क
ट्फलं कुष्ठं ससगंधिवचा पि
बा ॥ कंटकारी जटा शृंगी
यवानी पिचुमर्दकः । एषां क्वा
थो हरत्येव ज्वरं सोपद्रवं क
फात् ॥ मरिचादिक्वाथः ॥
वातज्वराधिकारोक्त कल्पतरुर

गोपि श्लेष्मज्वरे दानव्य स्तस्यक
फव्याधिहरत्वात् ॥ सिंधुत्रिकटु
राजीभि र्रार्द्रकेण कफे हितः।
कवल इति शेषः ॥ अथात्र ।
माह मुस्तयुक्तोदनादेयो ज्वरेक
फसमुत्थिते । इति श्लेष्मज्वराधि
कारः ॥ अथ वातपित्तज्वरा
धिकारः । तत्रद्वंद्वजज्वरस्यवि
प्रकृष्ट सन्निकृष्ट कारण क
थन पूर्विकां संप्राप्ति माह।
तत्रवातपित्तज्वरस्य । वातपि
त्तकरै र्वातपित्ते आमाश्र।
याश्रये। बहि र्निरस्य कोष्ठा
ग्निं रसगोज्वरकारिणी॥ स्या
तामिति शेषः ॥ अथतस्य
पूर्वरूप माह। प्राग्रूपे वात
पित्तस्य भवतो वातपैत्तिके।
ज्वर इति शेषः॥ अथ वातपि
त्तज्वरस्य लक्षण माह । तृ
ष्णा मूर्छाभ्रमो दाहो निद्राना
शः शिरोरुजा। कंठास्यशोषो
वमथुरोमहर्षोऽरुचिस्तमः
पर्वभेदश्च जृम्भाच वात पित्त
ज्वराकृतिः। सर्वभेदः पर्वा
णि भिदांत इवेति संधिषु व्य
था ॥ अथ वातपित्तज्वर
स्य चिकित्सा। वातपित्तज्व

रेदेय मौषधं पंचमेऽहनि।कि
रातनिक्ता मुस्तं द्राक्षामा
मलकीशटी। निष्क्वाथ्यसगु
डंक्वाथं वातपित्तज्वरे पिबेत्
किरातादिक्वाथः ॥ गुडूची प
र्पटो मुस्तं किरातो विश्वभेष
जं। वातपित्तज्वरेदेयं पंचभद्र
मिदंशुभं ॥ पंचभद्रक्वाथः॥
त्रिफलाशाल्मलीरास्ना राज
वृक्षाटरूषकैः। शृतमंबुहरे
त्याशु वातपित्तभवंज्वरं ॥ त्रि
फलादिक्वाथः॥ मधुकंसा
रिवाद्राक्षा मधूकं चंदनोत्प
लं। काश्मीरफलकंलोध्रंत्रि
फला पद्मकेशरं ॥ पत्रूषकं
मृणालंचक्षिपेत् संचूर्णवा
रिणि। निशोषितं सितादौद्र
लाजयुक्तंच तत्पिबेत्। वा
तपित्तज्वरंदाहं तृष्णामूर्छारु
चि भ्रमान्॥ शमयेद्रक्तपित्तं
च जीमूतमिवमारुतः॥ अत्र
मधुकादिमृणालांत समुदि
तंपलपरिमितं संचूर्ण्यक्षिपे
त् वारिणि षट्पलपरिमिते
मधुकादि र्हिमो दाहे ॥ अथा
त्र माह। मृद्धामलकयूषस्त
वातपित्तज्वरे हितः महादाहे

प्रदातव्योयुषक्षणकसंभवः।
दाडिमामलकमुद्गसंभवो यूष
उक्त इति वातपैत्तिके। कफापि
त्तहरा मुस्ताःकारवेल्ला टयस्त
था। प्रायेण न च ते देया वा
तपित्तोत्तरे ज्वरे ॥ दत्तास्तज्व
र विष्टंभ शूलोदावर्तकारि
णः। इति वातपित्तज्वराधि
कारः॥ अथ वात श्लेष्म
ज्वराधिकारः। तत्र तस्य वि
प्रकृष्टसन्निकृष्ट कारणक।
थनपूर्विकां संप्राप्ति माह।
वातश्लेष्मकरै र्वातकफावामा
शयाश्रयौ। बहि र्निरस्य को
ष्ठाग्निं रसगौज्वरकारिणौ ॥
पूर्वरूपमाह। प्राग्रूपे वातक
फयोःस्यातां वातकफज्वरे ॥
तस्य लक्षण माह। स्तैमित्यं
पर्वणांभेदो निद्रागौरवमे
वच। शिरोग्रहः प्रतिश्यायःका
सः स्वेदाप्रवर्त्तनं॥ संतापोम
ध्यवेगश्च वातश्लेष्मज्वराकृतिः
स्वेदाप्रवर्त्तनं स्वेदस्याऽसम
ताङ्गावेन प्रवृत्तिः।तथाह हा
रीतः। शिरोग्रहः स्वेदभवश्च।
कासोज्वरस्य लिंगं कफवात।
जस्येति। स्वेदभवः स्वेदोत्प

त्तिः॥ ननु स्वेदः पित्तस्य धर्मः
अत एव पित्तज्वरे कंठौष्ठ मु
खनासानां पाकः स्वेदश्च जाय
ते इत्युक्तं। तस्मात् कथं वात
श्लेष्मज्वरे स्वेदस्याप्रवृत्तिः।
उच्यते। विकृतिविषमसमवा
यारब्धत्वाद्दोष इति कार्त्तिकः
प्रकृतिसमसमवायस्यविकृति
विषमसमवायस्य चायमर्थः
प्रकृत्याहेतुभूतयासमः कार
णानुरूपः समवायः कार्य्यकार
णभावः संबंधः प्रकृतिसमस
मवायःकारणानुरूपं कार्य्यमि
तिवावत्। यथाप्रकृते र्यथास्थि
तैः शुक्लैस्तंतुभिः समवायका
रणैरारब्धः पटः शुक्ल एवभव
ति। तथाप्रकृतेन केवलेन वाते
न पित्तेन कफेन वाजनितोज्वरो
वातादुचितै र्धर्मैर्वमथुवेगादि
का स्तैमित्यादिभि र्युक्तोभवति
विकृतिविषमसमवायस्तुवि
कृत्याहेतुभूतयाविषमः का
रणाननुरूपः समवायः का
र्य्यस्य कारणेः संबंधः। यथा
संयोगोहिकृताभ्यां हरिद्राचू
र्णाभ्यां हेतुभूताभ्यां विषमः
कारणाननुरूपो लोहितो व

रोगो जायते। तथायोगेन विक्ल
ताभ्यां वातश्लेष्माभ्यां हेतुभू
ताभ्यां विषमो कारणानतुरू
पा स्वेदस्यातिप्रवृत्ति रितिसि
द्धांतः॥ अथ वातश्लेष्मज्वर
स्य चिकित्सा। वातश्लेष्मज्व
रे देय मौषधं नवमे ऽहनि। पि
प्पली पिप्पलीमूलं चव्य चि
त्रक नागरैः। दीपनीयः स्मृतो
वर्गो वातश्लेष्मज्वरापहः॥
कोलमात्रो पयो गित्वा तु पंच
कोलमिदं स्मृतं। तीक्ष्णोष्णपा
चनं श्रेष्ठं दीपनं कफवातनुत्
गुल्मप्लीहोदरानाहशूलघ्नं पि
त्तकोपनं। पंचलोकं॥ किरा
तविश्वामृतवालिसिंहिकाक
णा कणामूलरसोनसिंधुके
कृतः कषायो विनिहंति सत्व
रं ज्वरं समीरानलकफानलसमु
त्थितं॥ किरातादिक्वाथः॥ पि
प्पल्यादिगणं क्वाथं पिबेद्धात
कफज्वरी। नातः परं किंचिद
स्मिन् ज्वरे भेषजमुत्तमं॥ पि।
प्पल्यादिक्वाथः॥ पिप्पली
पिप्पलीमूलचव्यचित्रकनागरै
रैः। वचासातिविषाजाती पा
ठावत्सकरेणुकं॥ किराततिक्त

को मूर्वा सर्षपा मरिचानि च।
कट्फलं पुष्करं भार्गी विडंगं
कर्कटाकयं॥ अर्कमूलं बृहत
सिंही श्रेयसी सुरदारुभा।
दीप्यकश्चाजमोदा च मुकनासा
सहिंगुका॥ एतानि समभागा
नि गणः षोडशविंशतिः। एषां
क्वाथो निपीतः स्याद्वातश्लेष्म
ज्वरापहः॥ हंति वातं तथा शी
तं प्रस्वेदमपि वेपथुं। प्रलाप
चातितंद्रां च रोमहर्षारुचीन।
था॥ महावातेः पतंत्रेच मू
त्राने सर्वगात्रजे। पिप्पल्या
दिर्महाक्वाथो ज्वरे सर्वत्र शस्य
तः॥ बृहत्पिप्पल्यादिक्वाथः॥
दशमूलीरसः पीतः कणायुतः
कफवातजे। ज्वरे विपाके निद्रा
यां पार्श्वरुक्श्वासकासके॥
दशमूलीक्वाथः॥ तत्र श्रेय
सी रास्ना वातश्लेष्मज्वरहरा
न॥ पिप्पलीभिः शृतं तोयमन
भिष्यंदि दीपनं। वातश्लेष्मज्व
रं हंति सेवितं शीतनाशनं॥
पिप्पलीक्वाथः॥ सूतकं टंक
णं भस्म प्रत्येकं समं समं। हिंगु
एं सूतकादेयं जैपालं तु षव
र्जितं॥ सैंधवं मरिचं।

विंबालकुदारः शर्करापि च। प्र
त्येकं सूततुल्यं स्याज्जैपाले ऽर्धमे
र्दयेद्दिने॥ सर्वेश्वर नामा
ऽयं रसो गुंजाद्वयोमितः। भ
क्षितः सममेतोयेन वातश्लेष्म
ज्वरापहः॥ सर्वेश्वरो रसो
वातश्लेष्मज्वरे शीतज्वरे च॥
रसप्रदीपे। स्वेदोद्गमे भेषज
लस्य चूर्णनिपातनं शास्त्रमि
ति ब्रुवंति। जीर्णशाकाहोलव
णस्य भाजनं संचूर्णितं स्वेदह
रं स्फुलनात्॥ मरिचपिप्प
ली शुंठी पथ्या लोध्रश्च यो।
करं। भूनिंबः कटुका कुष्ठ।
कर्चूरो लिंगिका शटी॥ एता
नि समभागानि सूक्ष्मचूर्णानि
कारयेत्। एतदुद्धूलनं श्रेष्ठं सो
तोवत् स्वेदनिर्गमे॥ लिंगिका
पंचगुरिया इति लोके। यत्रश
टी गंधपलाशी। मरिचाद्युद्धूल
नं॥ भूनिंब कासीतिकावचा
कट्फलं जंरजः॥ एयाम्रदु
लनं श्रेष्ठं संततस्वेदसंस्रवे।
भूनिंबाद्युद्धूलनं॥ पूर्वोक्तो
वालुकास्वेदोऽप्यत्र समुचितः
पतंजले। पीनस श्वास वा
धीर्ष्यंजंघा पार्श्वास्थिशूलिनि।

वातश्लेष्मज्वरे स्वेदं कारयेत्।
तद्विधानवित्॥ मातुलुंगफ
लकेशरो धृतः सिंधुजन्मम
रिचान्वितो मुखे। हंति वातक
फरोगमास्यगं शोषमाश्रु।
जडतामरोचकं॥ इति कवलः
अथात्र माह। सहत्या पंचमू
ल्यात्र सम्यक् सिद्धं चिकित्स
कः। सप्तमे दिवसे दद्यात् ज्वरे
वातश्लेष्मज्वराधिकारः॥
अथ पित्तश्लेष्मज्वराधिकारः त
त्रतस्य विप्रकृष्ट सन्निकृष्ट कारण
कथन पूर्विकां संप्राप्तिमाह।
पित्तश्लेष्मकरैः पित्तकफावामा
शयाश्रयौ। बहिर्निरस्य कोष्ठाग्निं
रसगौ ज्वरकारिणौ॥ पूर्वरूप
माह। प्राग्रूपं पित्तकफयोः स्या
तां पित्तकफे ज्वरे। अथ तस्य
लक्षणमाह लिप्ततिक्तास्यता तं
द्रा मोहः कासोऽरुचिस्तृषा। मु
हुर्दाहो मुहुः शीतं पित्तश्लेष्म
ज्वराकृतिः॥ आस्यस्य तिक्तत्वं
पित्तेन। लिप्तत्वं कफेन। तं
द्रा अर्धोन्मीलितनेत्रत्वं। मो
हो मूर्छा॥ अथ पित्तश्लेष्म
ज्वरस्य चिकित्सा। पित्तश्लेष्म
ज्वरे देयमौषधं दशमेऽहनि

गुडूचीनिंबधान्याक चंदनंकटु
रोहिणी ॥ गुडूच्यादिरयंक्वाथः
पाचनोद्दीपनः स्मृतः। तृष्णा
दाहारुचिच्छर्दि पित्तश्लेष्मज्व
रापहः इतिगुडूच्यादिक्वाथः
अमृताकटुकारिष्ट पटोलेच
नचंदनं। नागरेंद्रयवश्चैतत्
मृताष्टकमीरितं ॥ क्वथितं
सकणाचूर्णं पित्तश्लेष्मज्वरा
पहं। हृल्लासारोचकच्छर्दि
तृष्णा दाहनिवारणं ॥ अमृ
ताष्टकं ॥ कंटकार्य्यमृताभा
र्गीविश्वेंद्रयववासकं। भूनिं
बचंदनंमुस्तंपटोलंकटुरोहिणी
विपाच्यपाययेत् क्वाथं पित्त।
श्लेष्मज्वरापहं। दाहेतृष्णा
रुचिच्छर्दिकासशूलनिवार।
णं॥ कण्टकार्य्यादिक्वाथः
नागरोशीरविल्वाह्व धान्य
मोचरसाम्बुभिः। कृतःक्वा
थोभवेद्ग्राही पित्तश्लेष्मज्वर
पहः॥नागरादिक्वाथः॥ स
शर्करा मधुमांशा कटुकांचो
ष्णवारिणा। पीत्वाज्वरंजयेज्ज
न्तुः पित्तश्लेष्मसमुद्भवं। अत्रक
टुकाया द्वादशमाषाः॥शर्क
रायाश्चत्वारोमाषाः। एवंकर्ष

इतिचक्रदत्तः। वैद्यव्यवहारे
तुकटुकाशर्करयोः समभा
गयो रेवकर्षः। कटुकीकल्कः
सपत्रपुष्पवासाया रसः क्षौ
द्रसितायुतः। पित्तश्लेष्मज्वरं
हन्तिसास्रपित्तंसकामलं ॥
अत्र वासाया रसो अर्द्धपल
परिमितोदेयः। मधुसितयोः
प्रत्येकंटंकः प्रक्षेप्यः॥अ
थान्यमाह। कषायः परिपी
तस्तु मृगारेवपटोलयोः। पि
त्तश्लेष्मज्वरवमी दाहकंडूह
रोभवेत् ॥ अन्यच्च। पटोल
धान्ययोर्यूषः पित्तश्लेष्मज्व
रापहः। इति पित्तश्लेष्मज्व
राधिकारः॥ अथ सन्निपात
ज्वराधिकारः। तस्यनिदाना
दिचिकित्सा सन्निपातग्रहे
द्रष्टव्या ॥ अथागंतुकज्व
राधिकारमाह। तत्रागंतु
कज्वरस्य निदानान्याह। अ
भिघाताभिषंगाभ्या मभिचा
राभिशापतः। आगंतुर्जा
यतेदोषैर्यथास्वंतंविभाव
येत्॥अभिघातः शस्त्रमुष्टि
लगुडादिभिरभिहननं। अभिषं
गः कामशोकभयक्रोधभूता

दीनामावेशः। अभिचारः कृ
त्यायुत्पादनं। अभिशापः ब्रा
ह्मणगुरुवृद्धसिद्धादिकृतः।
शापः। तत्रागंतुज्वरे यथास्व
यथादोषलक्षणं दोषैर्विभाव
येत् विजानीयात्॥ अपराण्य
पिनिदानान्याह। ये भूत विष
वाय्वग्निक्षतभंगादिसंभवाः॥
रागद्वेषभयाद्येचतेस्युरागंत
वोगदाः॥भयाद्येत्यादिशब्देनभू
तविषवाय्वग्निक्षतभंगादयः।
संगृह्यंते। तेनरागादयोभंगा
द्यंताहेतवोप्यागंतुसंज्ञाः स्युः।
कार्य्यकारणयो रभेदोपचारा
त्। एतेनआगंतुजः स्मृतइत्यत्रा
प्यागंतुग्रहो हेतुवाची आगं
तुर्जायते दोषै रित्यत्र व्याधिवा
ची अभिघाताभिषंगाभ्यामित्या
दिश्लोके दोषैर्यथास्वंतंविभाव
येदितिवचनेनैव प्रतीयते।
अभिघातादीनां विप्रकृष्टका
रणत्वंमिथ्याहारविहाराणामपि
दोषाणांसन्निकृष्टकारणत्वं।
तथासतिदृष्टापमानसंकटहरु
द्रेमादिश्लोके आगंतुज्वरस्याहु
मतविघातो दोषजेष्वेव प्रवेशा

उच्यते। आगंतुज्वरस्य दोषा आ
रंभका न किंतु पश्चादनुबंधिनः
तथाचागंतुर्हि व्यथापूर्वोजायते
पश्चान्निजै दोषै रनुबध्यत इति
तत्र कस्यागंतोः कोनिजोदोष
इत्यपेक्षायामाह। कामशोक
भयाद्वायुः क्रोधात् पित्तं त्रयो
मलाः। भूताभिषंगात् कुप्यं
ति भूतसामान्यलक्षणाः॥
कामशोकभयात् कामशोक
भयजादागंतोर्वायुः कुप्यति।
क्रोधात् क्रोधजादागंतोः पित्तं
कुप्यति। भूताभिषंगात् भूता
वेशजादागंतोः त्रयो मलादो
षाः कुप्यंतीत्यर्थः॥भूतसा
मान्यलक्षणाः॥ भूतस्य भूत
लक्षणस्य सामान्यं समानता
येषांतानि भूतसामान्यानि
भूतसामान्यानि लक्षणानि
येषांते भूतसामान्यलक्षणाः
मलाः॥ अथागंतुज्वराणांहे
तुभेदे लक्षणभेदानाह।
प्रणावास्यता विषकृते तृष्णा
नी सार पवच। भक्तारुचि
पिपासाच तोदश्च सह मूर्च्छ
या॥ विषकृते स्थावर जंगम

विषमलक्षणाक्रान्ते ज्वरे। पृथग्वः
मुक्तानुविद्धः कृत्स्ना वर्षः श्या
कवर्णो वा। अतो सारः स्या
दरविषेणेव तस्याप्यो गामि
त्वात्। तोदः सूचीव्यधनेनेव
व्यथा॥ ओषधीगंधजे मूर्छा
शिरोरुग्वमथुस्तथा। का
मजे चित्तविभ्रंशस्तन्द्रालस्य
मभोजनं॥ हृदये वेदना चा
स्य गात्रं च परिशुष्यति। काम
जे समीहितकांताद्यप्राप्ति नि
मित्तके ज्वरे। चकारात् वाग्भटो
क्तान्यपि लक्षणानि बोद्धव्या
नि। तानि यथा। कामाद्भ्रमो
रुचिर्दाहो ह्री निद्राधीधृतिः
क्षयः। भयात्प्रलापः शोका
च्च भवेत् कोपाच्च वेपथुः॥
भयात् भयजे ज्वरे प्रलापः।
शोकाच्च चकारेण प्रलापश्च
वाकृष्यते। कोपाच्च कोपा
दपि वेपथुर्भवति॥ ननु वे
पथुर्वातस्य धर्मः तत्क
थं क्रोधजे ज्वरे वेपथुः। यत उक्तं
क्रोधात्पित्तमिति उच्यते। प्रकुःम
कुपितो दोषः स्वमानपि कोपयेत् इति
वचनात् पित्तकोपितवातजन्यत्वा

त्र वेपथुः॥ किंच क्रोधाद्दाहश्च
पि भवति। यत उक्तं विदेहेन।
क्रोधशोकौ स्मृतौ वातपित्त
प्रकोपनाविति। यत उक्तं।
भूताभिषंगादुद्वेगो हास्यरोद
न कम्पनं। केचिद्भूताभिषंगो
त्थो विषमज्वरं॥ भूताभिषंगो
त्थो विषमज्वरो भवति। कदा
चिदपि वेगवान् कदाचित् अन्तवे
ग[illegible]र्थः॥ अभिचाराभिशा
पाभ्यां मोहस्तृष्णा च जायते।
तृष्णा चेति चकारेण शारीरानु
बन्धि वाग्भटोक्तं च बोद्धव्यं। त
द्यथा। अथाभिचारिकैर्मन्त्रैर्हूय
मानस्य तप्यते। पूर्वं मनस्ततो देह
स्ततो विस्फोटविभ्रमैः। सदाह
मूर्छैर्ग्रस्तस्य प्रत्यहं वर्द्धते ज्वर इ
ति॥ अथ तेषां चिकित्सा॥ आ
गन्तजे ज्वरे नैव नरः कुर्वीत ल
ङ्घनं। तथा च वाग्भटः। मुह
वातत्पागन्तुजीर्णज्वरिषु ल
ङ्घनं। नेष्यत इति शेषः। अन
च्च। लङ्घनं न हितं काम शोक
चिन्ता भयादजे। भय भूत श्र
म क्रोध लङ्घनेषु लोभजे
किंतु दीप्ताग्नये तत्र दद्यात्

841

दद्यान्मांसरसौदनं। अभिघात
ज्वरे युञ्ज्यात् क्रिया मुक्तविवर्जि
तां॥ कषायं मधुरं स्निग्धं यथा
दोषमथापि वा। अभिघातज्व
रो नश्येत् पानाभ्यंगेन सर्पिषः।
रक्तावसेकैर्मद्यैश्च तथा मां
सरसौदनैः। मद्यैर्मद्याधिकैर्हि
तैः॥ अथ वेधश्रमान्यश्च भंगाभि
घातसमुद्भवान्। ज्वरानुपाचरेत्
पूर्ववत्क्षीरमांसरसौदनैः॥ अथ
ताडनं कर्णादिवेधो वा। भग्ना
स्थिच्छेदभेदादिकः। श्रमो हस्ता
दितः पतनं॥ अथ ष्ठीवनेषु चा
भ्यंगं दिवानिद्रां च कारयेत्॥
ओषधीगंधविषजो विषपित्तप्र
बाधनैः। जयेत् कषायैर्मति
मान् सर्वगंधकृतैर्भिषक्॥
सर्वगंधमाह। चातुर्जातकक
र्पूरकक्कोलागुरुकुंकुमं।
लवंगसहितं चैव सर्वगंधं विनि
र्दिशेत्॥ क्रोधजे पित्तजे काम्य
नार्थाः सद्वाक्यमेव च। आश्वा
सेनेष्टलाभेन वायोः प्रशमनेन
च॥ हर्षेणैव प्रशमं याति का
मशोकभयज्वरः॥ कामेरथ
मनोज्ञैश्च पित्तघ्नैश्चाप्युपक्र

मैः॥ सद्वाक्यैश्च प्रशमं याति ज्वरः
क्रोधसमुत्थितः। कामैः कामा
वेशैः। मनोज्ञैः धिक्कारादिभि
भयजनकवचनैर्वा॥ कामात्
क्रोधज्वरो नश्येत्। क्रोधात्का
मज्वरस्तथा। ज्ञातिताभ्यामु
भाभ्यां च कामक्रोधज्वरस्त्वयः
वातिताभ्या मुभाभ्यां मनसि नि
गृहीताभ्यां कामक्रोधाभ्यां॥
भूतविद्यासमुद्दिष्टैर्बंधावेश
नताडनैः। जयेद्भूताभिषंगो
त्थं मनः सान्त्वैश्च मानसं॥ ताड
ने निग्रहस्य स्थाने केचित् पूजने
ति पठन्ति॥ सहदेवाया मूलं
विधिना कंठे निबद्ध मपहरति
एक द्वि त्रि चतुर्भिर्दिवसैर्भूत
ज्वरमुग्रं॥ अभिचाराभिशापो
त्थौ ज्वरौ होमादिभिर्जयेत्। दा
नस्वस्त्ययनातिथ्यैरुत्पातग्र
हपीडजौ॥ इत्यागन्तुकज्वरा
धिकारः॥ अथ विषमज्व
राधिकारमाह। तत्र विषम
ज्वरस्य निदानादि चिकित्
सापर्यन्तं विषमज्वरग्रहे द्र
ष्टव्यम्॥ अथ जीर्णज्वरा
धिकारः। तस्य निदानादि

कंपारविष्टे तत्क्षणे दृष्टव्यं
॥ अथ दुर्जलजनितस्य ज्वर
स्य चिकित्सामाह । हरीत
कीनिंबपत्रनागरैसैंधवैः न
लः । पथ्याचूर्णसदाखादेत् दु
र्जलज्वरशांतये ॥ हरीतक्यादिचू
र्णं ॥ अरुचि मनलमांद्यं पीन
सश्वासकासानुदरमदकदो
षानामान्हन्यात् शोथान् । जन
यति तत्कांतिं चिरमेनेमय
सादं पलपरिमितशुंठीक्षोद
सिद्धः कषायः ॥ शुंठीकाथः
विषं भागद्वयं दर्पकपर्दः
पंचभागकः । मरिचं नव
भागचचूर्णवेष्टेणशोषयेत्
आर्द्रकस्य रसेनास्य कुर्यान्मु
द्गनिभावटी । वारिणावटिका
युग्मं प्रातः सायं च भक्षयेत् ॥ अ
यं रसो ज्वरे योज्यस्तस्मिन् दुर्ज
लजेः पिच । अजीर्णाध्मानवि
षूम्भ शूलेषु श्वासकासयोः
दुर्जलाजेतारसः ॥ पटोल मु
स्तामृतवल्लिवासकं सनागरं धा
न्यकिराततिक्तकं कषायमेषामधु
नापिबन्नरो निवारयेत् दुर्जलदो
षमुल्बणं । पटोलादिकाथः ॥ कि
राततिक्तत्रिवृद्दंतु पिप्पली वि
डंगविश्वाकटुरोहिणीरजः ॥ नि
हंति लीढं मधुनातिसत्वरं सु
स्तरं दुर्जलदोषजं ज्वरं ॥ किरात
तिक्तादिचूर्णं ॥ भोजनादौ नरै
र्भक्ष्यं गुणी राजाभयोत्थितं ।
कल्कंत सहते नित्यं नानादे
शोद्भवं जलं ॥ मर्हाद्रकयव
क्षारौ पीत्वा चोसेन वारिणा
नानादेशसमुद्भूतवारिदोष
मपोहति ॥ अथ साध्यस्य ज्व
रस्य लक्षणमाह । बलवत्स्व
ल्पदोषेषु ज्वरः साध्योऽनुपद्र
वः । ज्वरस्योपद्रवानाह । श्वा
सो मूर्छारुचिश्छर्दिस्तृष्णाती
सारविद्ग्रहाः । हिक्काकासांगभे
दाश्च ज्वरस्योपद्रवा दश ॥ अस
गाढुपद्रवाणां चिकित्सायां वि
शेषमाह । संजातोपद्रवो व्याधि
स्तस्माज्जोन स्याच्चिकित्सकैः ।
व्याधौ शांते प्रणश्यंति सद्यः स
र्वेप्युपद्रवाः ॥ अतो व्याधिं जये
द्यत्नात् पूर्वं पश्चादुपद्रवं ॥ भि
षग्यः कुशलः सोऽवजयेत्स
र्वमुपद्रवं ॥ तेषामपि प्रचुरेषु
मानाशायेदाशुकारिणं । मूलव्याधिं

जयेत् सर्वजेयो यो वा भवे द्वली ॥
अविरोधेन वा कर्म्मा उभयो
रपि च क्रिया ॥ तत्र ज्वरे श्वा
सस्य चिकित्सा । सिंही व्याघ्री
ताम्रमूली पटोली शृंगी पद्मा
पुष्करं रोहिणी च । सार्क श
टा शैलमल्याम्र वीजं श्वास
हन्यात् सन्निपाते दशांगः ॥
सिंही वडीकटैया । व्याघ्रीकटे
या । ताम्रमूली दुरालभा ।
पद्मा भार्गी । रोहिणी कुटकी
शैलमज्ञी कौरैया । दशांगोयो
गः ॥ भार्गी निंब चना भया
मृतलता भूनिंब वासा विषा
त्रायंती कटुका वचा त्रिकटुकश्ण
वाकशाकद्रुमैः । रास्नायासपटो
लपाटलिशटी दार्वी विशाला
त्रिवृद्ब्राह्मी पुष्करसिंहिकाद्वय ।
निशाधान्यदेवद्रुमैः ॥ क्वाथो
ऽयं खलु सन्निपातनिवहानष्टा
त्रिंशतापानतो दुर्द्धर्षाञ्जितेतेज
सा विजयते सर्पान्गरुत्मानि
व । किंच श्वासवलासकासगु
दरुग्रद्धोगहिक्कामरुन्मन्याल
भगल्यामयार्दितमलाविष्टंभव
र्ध्मावपि ॥ विषा अतीस । शाकद्रुमः
ककुभः । देवद्रुम । देवदारुः ॥
द्वात्रिंशदंगक्वाथः ॥ मधुना
कृष्णा कट्फलकर्कटशृंगी
भवं चूर्णं । श्वासामये महो
ग्रे लीढ्वा लोकः सुखी भवति
वन्योपलाग्नितापितदात्रस्या
ग्रेण पंजरे दाहः । अपहरति
श्वासामयमसंशयं भाषितं मु
निभिः ॥ अथ ज्वरे मूर्छायाश्चि
कित्सा । आर्द्रकस्य रसेन नस्यं
मूर्छायामाचरेन्नरः ॥ अंजनं
च प्रयुंजीत मधुसिंधुशिलोष
णैः ॥ शीतांभसादिसेकः सु
रभिर्धूपः सुगंधिपुष्पं च । म
जुतालवृंतवातः कोमलकद
लीदलस्पर्शः ॥ अथ ज्वरेऽरु
चेश्चिकित्सा । अरुचौ तत्र शृं
गवेरजरसकैः साम्लैः ससि
धुजैः कवलः । सिंधुत्थ मात
लुंगीफलकेशरधारणं वक्त्रे ।
अन्यच्च । अरुचौ मातुलुंगस्य के
शरं साज्यसैंधवं । धात्री द्राक्षासि
तानां वा कल्कमास्ये तु धारये
त् ॥ अथ ज्वरे छर्देश्चिकित्सा
क्वाथो गुडूच्याः समधुः सपीतः
पीतः प्रशांति वमनस्य कुर्यात्
विण्मक्षिकाणां मधुना वली
ढा संवदना शर्करया विना च

अथ ज्वरे तृष्णायाश्चिकित्सा
हं तशाववीजपूरकदाडिमवद
रैः सचुक्रकैर्वदने। लेपोज
यति पिपासामथरजनगृही
मुखात्। स्या॥ शीतं पयः क्षौ
द्रयुतं निपीतमाकण्ठमाश्चव
तद्वमेच्च तर्षप्रकर्षप्रशमा
य वक्रे दध्याद्द्रवदाग्र
लाजान्॥ अथ ज्वरे प्रतीसा
रस्य चिकित्सा। लंघनमेकं
मुक्त्वान चान्यदस्तीह भेषज
वलिनः। समुदीर्णदोषनि
चयं शमयति तत्पाचयत्य
पिच॥ वत्सादनीवत्सक
वारिवाहविश्वंभराभिर्विहिताः
सविश्वाः। ज्वरातिसारं त्ववि
नजयंति विश्वास्तावत्सक
वारिवाहः॥ विश्वंभरानिंबो
भूनिंवः॥ पाठामुस्तापर्पटमु
स्तविश्वाकिराततिक्तेंद्रयवान्
विपाच्य। पिवन् हरत्येव दद्धे
न सर्वज्वरातिसारान्पिहर्षि
वारान्॥ अथ ज्वरे विग्रहस्य चि
कित्सा। विग्रहे वातजित्कर्म
कुर्यादवानुलोमनं। मल्लप्रव
र्तयेदाम्ब्रीवलाभिः फलवर्ति
भिः पथ्यारग्वधतिक्ताश्चिहदामल

केः स्नृतं तोयं। जीर्णज्वरे विवंधे
दद्याद्दाम्श्चव विग्रहः शाम्यति॥
अथ ज्वरे हिक्कायाश्चिकित्सा।
नीरेण सिंधुत्थरजोऽ निस्तवं न
स्येन न्तं विनिहंति हिक्कां॥
शुंठीहठात्वा सितया समतोभ्यो
ऽथवा हिंगु समं ऋवच्च॥ अथ
ज्वरे कासस्य चिकित्सा॥ कासे
कणाकणामूलकलिंगमफ
लरजः। सविश्वभेषजं लिह्यात्
मधुना वाहषादसं॥ रजः पर्पट
कं॥ पुष्करमूल कट्फलकसंगी
कट्फल यासककारविकाभिः
मधुल्लुलितानि रथ्य खलु लेहः
कासरिपुः कफरोगहरश्च॥ अ
थ ज्वरे दाहस्य चिकित्सा। दाहादि
कारलिखितं। दाहेज्वर्याश्चिकित
सितं। परं ज्वरा विरुद्धं यन्मुखो
नापयोज्येयतः॥ अथ सुखसाध्य
स्य ज्वरस्य लक्षणं। सेतापोऽभ्यधि
को वाह्यस्तृष्णादीनां च मार्दवं। व
हिर्वेगस्य लिंगानि सुखसाध्यत
मेवच॥ तृष्णादीनामदिशब्दे
नान्तर्दाह संध्यास्थिव्यथा स्वा
सा गृह्यंते। तेषां मार्दवं मल्प
ता। वहिर्वेगस्य ज्वरस्य। वर्षाशार

द्वसंतेषु वाताद्यैः प्राकृतः क्र
मात्। प्राकृतः सुखसाध्यस्तु
शरत्सुरभि संभवः॥ सुरभि
र्वसंतः॥ अथ कष्टसाध्यस्य
ज्वरस्य लक्षणमाह। वैकृतो
ऽन्यः स दुःसाध्यः प्राकृतेष्व
निलोद्भवः। अन्यः प्राकृता
दन्यः वैकृतः। वर्षादिषु ज्व
रं जनयतां वातादीनां चिकित
साविशेषार्थं प्राधान्यमप्राधा
न्यं चाह। वर्षासु मारुतोदुष्टः
पित्तश्लेष्मान्वितं ज्वरे। ऊष्मा
तु पित्ते च शरदि तस्य चानुव
लः कफः॥ तस्यापि तज्वर
स्य चिकित्सामाह। तन्मक्ष
मा विसर्गाच्च तनयनादनशनाद्द्र
यं। तन्मकृत्यानस्य पित्तस्य
प्रकृत्या स्वभावेन। यतउक्तं
कफपित्ते द्वये धान्तु सहेते लंघ
नं वक्ष। इति। विसर्गाच्च शरदि
विसर्गकालत्वाच्च। यतउक्तं।
वर्षाशरद्धेमंता विसर्गाः का
लास्तत्रोपचितवलाः प्राणि
नो भवंति सोमस्य वलवत्वादि
ति। तत्र शरदि पित्तज्वरे अनशा
नादयेन। कफोवसंते तमपि वा
तपित्तं भवेदतु। वसंते कफज्वरेऽपि

कफप्रकृत्या लंघनाद्भयं न भव
ति। किंतु वसंतस्यादानकालत्वा
त्। तेतिः शाकें न कर्त्तव्यं। यतउ
क्तं। शिशिरवसंतग्रीष्मास्त्वादा
नकाला स्तत्रापचितवलाः॥
प्राणिनो भवंति सूर्यस्य वल
वत्वादिति। एतेनेदं उक्तं। व
र्षासु वायुः प्रधानं पित्तश्लेष्मा
णावप्रधाने। शरदि पित्तं प्रधा
नं कफोऽप्रधानं। वसंते श्लेष्मा
प्रधानं वातपित्ते अप्रधाने। तत्र
प्रधानस्य प्राधान्येन चिकित्साक
र्त्तव्या। सा चाप्रधानानिषिद्धा विधे
या। एवं वैकृतेष्वपि प्रधानस्य प्रा
धान्येन चिकित्सा कर्त्तव्या। तथा
चोक्तं। संसर्गे योगरीयान् स्यादुप
क्रमस्सवै भवेत्। शेषदोषावि
रोधेन सन्निपाते तथैव च॥ सं
सर्गे दोषद्वयस्य संसर्गे। गरी
यान् प्रधानं। अंतर्दाहोऽधिका
तृष्णा प्रलापः श्वसनं भ्रमः।
संध्यास्थिशूल मस्वेदो दोष
वर्चोविनिग्रहः॥ अंतर्वेग
स्य लिंगानि कष्टसाध्यत्व
मेवच। वर्चोविनिग्रहः पुरी
यामहृतिः॥ अथासाध्यस्य ज्व

रस्य लक्षणमाह। ज्वरः क्षीणस्य
मूलस्य गंभीरो दैर्घ्यरात्रिकः।
असाध्यो बलवान् यश्च केशसी
मंतकृत् ज्वरः॥ दैर्घ्यरात्रिकः
वक्रराज्यानुवेधी। केशसीमंतकृ
त् प्रभावात् केशेषु सीमंतं यः
करोति॥ गंभीरस्य लक्षणमा
ह। गंभीरस्तु ज्वरो ज्ञेयो ह्यंत
र्दाहेन तृष्णया। आनद्धत्वेन
चात्यर्थं कासश्वासोद्गमेन च॥
आनद्धत्वेन विबद्धमलत्वेन॥
सामान्यज्वरेपि कर्णमूलशोथ
स्यासाध्यत्वाधिकमाह। ज्वर
स्य पूर्वं ज्वरमध्यतो वा ज्वरांत
तो वा श्रुतिमूलशोथः। क्रमा
दसाध्यः खलु कृच्छ्रसाध्यः सु
खेन साध्यो मुनिभिः प्रदिष्टः॥
अथारिष्टमाह। तत्रारिष्टस्य
लक्षणं। रोगिणो मरणं यस्मा
दवश्यंभावि लक्ष्यते। तल्लक्ष
णमरिष्टं स्यादिष्टमप्यभिधी
ते हेतुभिर्बहुभिर्जातो बलिभिर्बहु
लक्षणः। ज्वरः प्राणांतकृद्यश्च
शीघ्रमिंद्रियनाशनः। उक्तस्तमा
त्र एव चिकित्स्यमानोऽपीन्द्रि
याणां चक्षुरादीनां शक्तिं यो
नाशयति॥ अन्यच्चारिष्टमाह
विसंज्ञस्ताम्यते यस्तु शेते निप
तितोऽपि वा। शीतार्दितोऽ
न्तरुष्णश्च ज्वरेण म्रियते नरः॥
विसंज्ञः विगतज्ञानः। ताम्य
ते नष्टहर्षः। शेते निपतितो
ऽपि वा अत्रापि शब्द एवार्थः
निपतित एव तिष्ठति न चोत्था
तुं समर्थः तथासन् शेत एव
वा। शीतार्दितः बहिः। अंतरु
ष्णः अंतर्दाहवान्॥ अन्यच्च
यो हृष्टरोमा रक्ताक्षो हृदि
संघातशूलवान्। वक्त्रेणैव
चोच्छ्वसिति ज्वरस्तं हन्ति मान
वं॥ हृष्टरोमा रोमांचवान्
हृदि संघातशूलवान् सान्नि
पातिकशूलवान्। वक्त्रेणैव
चोच्छ्वसिति न तु नासिकया॥
अन्यच्च। हिक्काश्वासतृषायुक्तं
मूढं विभ्रान्तलोचनं। संततोच्छ्वा
सिनं क्षीणं नरं क्षपति ज्वरः॥
क्षपति समापयति नाशयतीत्यर्थः। अ
न्यच्च। हतप्रभेंद्रियं क्षाममरो
चकनिपीडितं। गंभीरतीक्ष्णवे
गार्त्तं ज्वरितं परिवर्जयेत्॥ ह
तप्रभादीनि येषां। अथवा
हता प्रभा प्रतिभा विषय

ग्रहणशक्तिर्येषां तथाविधा
नींद्रियाणि यस्य तं हतप्रभेंद्रि
यं। क्षामं क्षीणं। गंभीरतीक्ष्णवेगा
र्तं गंभीरः उक्तलक्षणः तीक्ष्णवे
गः अतिदुःसहवेगः ताभ्यामा
र्तः खिन्नः॥ अन्यच्च। मरणं प्रा
प्नुयात्तत्र शुक्रस्यागमने ज्वरे। शे
फसः स्तब्धतामोक्षः शुक्रस्य
तु विशेषतः॥ व्याख्यातोऽयं श्लो
कः॥ विषमज्वरस्यारिष्टमाह।
आरंभाद्विषमो यस्य यस्य वा दै
र्घ्यरात्रिकः। क्षीणस्य चातिरूक्ष
स्य गंभीरो हंति यस्य तं। यस्य
विषमे विषमः आरंभाद्विषमः ननु ज्वरो नस्त
कृस्य। यस्य दैर्घ्यरात्रिको वाप्य
स्य क्षीणस्यातिरूक्षस्य च गंभी
रो भवति तं विषमो दैर्घ्यरात्रि
को गंभीरश्च हंतीत्यर्थः॥ इति
ज्वरातिसाराः॥ अथ ज्वराति
साराधिकारः। ज्वरातिसारयो
इदं मुनिभिरीरितं नयनयोरणा
नामांजनं करोति तिमिरक्षयं प
टलपुष्पनाशं बलात् । लवणसैप

वं। अंजनं सुरमा इति लोके।
सवितृपतिकफः समुद्रफेणः
शिला मनःशिला। सावरो
लोध्रः। स्फुटिक फटकरी। इंडुः
कर्प्परः। नयनशोणंतिमिरे नूत
नकुसुमे नूतनपटलेच॥ ह
रीतकीवचा कुष्ठं पिप्पलीम
रिचानिच विभीतकस्यमज्जा
चशंखनाभिर्मनःशिला। स
र्वमेतत्समंकृत्वा गव्यक्षीरेण
पेषयेत्। नाशयेत्तिमिरं कंडुं
पटलान्यर्बुदानिच। अधिवेवा
र्षिकं शुक्रं मासेनैकेन नाश
येत्। अधिकानि च मांसानि
रात्र्यावन्यत्व मेव च। चंद्रोदया
वर्त्तीपुष्पं तिमिरेच॥ रजनी
निम्बपत्राणि पिप्पली मरि
चानिच। विडंगंभद्रमुस्तंचस
मभी त्वभयास्तता। अंजनास्त्रे
णसंपिष्य छायायांशोषयेद्ग
टीः। वाटिका तिमिरं हंति रोमू
त्रेणत्रिपिष्टिकां। मधुना पटलं ह
ति नारीक्षीरेण शुक्रकं। पक्ष्मा
चंद्रप्रभावर्त्तिः स्पृष्टा रुद्रेण नि
र्मिता॥ इति चंद्रप्रभावर्त्तिः
कणा छागशकृन्मध्ये पक्का
तद्रसपेषिता। अचिराद्धंति न

क्तांध्यं नहत् संदेहः सुषणे॥
त्रिफलायाः रसं प्रस्थं प्रस्थं भृं
गराजस्यच। वृषस्यचरसं प्रस्थं
शतावर्य्याश्च तत्समं। गुडूच्या
आमलक्याश्चरसं छागीपय
स्तथा। प्रस्थं प्रस्थं समाहृ
त्य सर्वै रेभि र्घृतंपचेत्। क
ल्कः कणा सिता द्राक्षा त्रि
फला नील मुत्पलं। म
धुकंक्षीरकाकोली मधुपर्णी
निदिग्धिका। तत्साधुसिद्धंवि
ज्ञाय शुभे भांडे निधापयेत्
ऊर्द्धं पान मधःपानं मध्येपानं
प्रशस्यते। यावंतो नेत्रजारोगा
स्तान् पानादपकर्षति। सूर
के रक्तदुष्टेच रक्तेवाभिप्लुते
तथा। नक्तान्ध्ये तिमिरेकाचे
नीलिका पटलार्बुदे। अभि
ष्यंदेऽधिमंथेच पक्ष्मकोप
सुदारुणे। नेत्ररोगेषु सर्वेषु
दोषत्रयकृतेष्वपि। परंहित
मिदं प्रोक्तं त्रिफलाद्यंमहाघृ
तं॥ भृंगरजः भृंगराजः भं
गरा इति लोके॥ क्षीरका
कोल्या अलाभे अश्वगंधामू
लं ग्राह्यं। मधुपर्ण्यत्र जलजं
यष्टीमधु वदंत्यन्ये। नदला

भेसामान्य यष्टीमधुग्राह्यं तु
ल्पगुणत्वात्। त्रिफलाद्यघृते
शतमेके हरीतक्या द्विगुणंच
विभीतके। चतुर्गुणं त्वामल
के भृंगमार्कवयोःसमं। चतुर्गु
णेदकेदत्वा शनैर्मृद्वग्निनाप
चेत्। भागे चतुर्थे संवत्सक्का
थेत मवतारयेत्। शार्करामधु
कंद्राक्षामधुयष्टिर्निदिग्धिका
काकोलीक्षीरकाकोलीत्रि
फलानागकेशरं पिप्पलीच
दते मुक्तं जायमाणमथो
त्पलं। घृतप्रस्थसमं क्षीरंक
ल्कै रेतैः शनैः पचेत्। ह
न्यात् सतिमिरंकाचंनक्तांध्य
शुक्रमेवच। तथा स्रावंचके
डुंच श्वयथुंच कषायतां॥
कलुषत्वंच नेत्रस्य विषमेप
टलान्विते। वक्रनाशकिमुके
नसर्वान्नेत्रामयान्हरेत्। यस्य
चोपहताद्दृष्टिः सूर्य्याग्निप्रभा
प्रपश्यतः। तस्येतद्भेषजंप्रोक्तं
मुनिभिःपरमेहितं। मार्ज्जितेद
र्पणं यद्वत् परंनिर्मलतांव्र
जेत्। तद्वदेतेन पीतेननेत्रं
निर्मलतामियात्। वारि
द्रोणद्वयं चात्र वृषमार्कवयो

स्तले। काकोलीयुगलालाभे
अश्वगंधा मूलेग्राह्यं। द्वितीये
त्रिफलाद्येघृते॥ वासाविश्वा
मृता दार्वी रक्तचंदन चित्रकैः
भूनिंब कटुकापटोल त्रिफ निंब
लाबुदैः। निशाकलिंग कु
टजैः क्वाथः सर्वाक्षिरोग
हा। वैसथ्ये पीनसंश्वासे
कासे नाशयति ध्रुवं॥
वासादिक्वाथः। इति नेत्र
रोगाधिकारः। इति भावप्र
काशः॥ किंच। कतकस्यफ
लं शंखं सैंधवं मूषणं वचा॥
फेणं रसांजनं क्षौद्रं विडंगा
नि मनःशिला॥ एषावर्त्ति
र्हंतिकासं तिमिरं पटलंत
था॥ इति गारुडे १९८
अध्यायः॥

तिल गतौ। स्नेही। तेलति।
इति दुर्गादासः॥

तिल क श स्निहि। स्निहि
स्निग्धीभावे। क तेलयति
श तिलति तैलेवांगं॥
इति दुर्गादासः॥

तिलकः पुं स्त्री चंदनादिना
ललाटादिद्वादशांगकृतव्यक्ति
ह्नविशेषः। अथ द्वादशतिल

कविधिः। पद्मपुराणे उत्तरखं
डे। ललाटे केशवं ध्यायेन्नाराय
णं मथोदरे। वक्षस्थले माध
वंतु गोविंदं कंठकूपके॥
विष्णुंच दक्षिणे कुक्षौ बाहौच
मधुसूदनं। त्रिविक्रमं कंधरेतु
वामनं वामपार्श्वके। श्री
धरं वामबाहौ तु हृषीकेशं
तु कंधरे। पृष्ठे तु पद्मनाभं
च कक्ष्यां दामोदरं न्यसेत्।
तत्प्रक्षालनतोयंतु वासुदेवे
तिमूर्द्धनि। किंच। ऊर्द्ध्वपुंड्रं
ललाटे तु सर्वेषां प्रथमंस्मृ
तं। ललाटादिक्रमेणैव धार
णंतु विधीयते। इति। एवं
नानाप्रकाराचार्य्य सम्प्रदायानु
सारतः। न्यसेत् किरीटमंत्रं
मूर्द्ध्नि सर्वाङ्गसिद्धये। अथ
किरीटमंत्रः। ॐ श्रीकिरीट
केयूर हारमकरकुंडल चक्र
शंख गदा पद्महस्त पीताम्ब
रधर श्रीवत्साङ्कितवक्षः श्री
भूमिसहित स्वात्मज्योतिर्द्दी
प्तिकराय सहस्रादित्यतेजसे
नमोनमः। इति श्रीहरिभक्ति
विलासे ४ विलासः॥
तिलकः पुं ध्रुवकभेदः।
यथा। पंचविंशतिवर्णांघ्रिस्ति
लको ध्रुवको भवेत्। उद्दे
च तत्पुटे ताले रसे वीरेऽद्भुते
ऽपिवा। इति संगीतदामोदरः॥
तिलकालकः पुं शरीरस्थ
तिलः। तलस्तरणाति। य
था। कृष्णानि तिलमात्राणि
नीरुजानि समानि च। वात
पित्त कफोद्रेकात्तान् विद्या
त्तिलकालकान्। समानि
अनुन्नतानि। अयं तिलइ
ति लोके प्रसिद्धः॥
तच्चिकित्सा यथा। चर्मकी
लं जतुमणिं मशकान् ति
लकालकान्। उत्कृत्य शस्त्रे
णादहेत् क्षाराग्निभ्यां मशेष
तः। इति भावप्रकाशः॥
तिल गतौ। लहचांतः। क्षली
तिलति। इति दुर्गादासः॥
तीम य क्लेदने। य तीम्य
ति तितीम। क्लेदन मार्द्दीभा
वः। इति दुर्गादासः॥
तीरतक कर्मणां समाप्तौ।
कर्म्मणामिति स्पष्टार्थः।
अतीतिरत् व्रते लोकः स
मापितवानित्यर्थः। इति दु
र्गादासः॥

तीर्थं क्ली पुण्यस्थानादि ती
र्थतेऽनेन स्नाने पुण्यत्वे य
था। नदी देवनिखातेषु तडा
गेषु सरःसुच। स्नानं समाच
रेन्नित्यं गर्त्तप्रस्रवणेषु च। नि
पानादुद्धृतं पुण्यं ततः प्रस्र
वणादिकं। ततोपि सारसं
पुण्यं ततो नादेयमुच्यते।
तीर्थतोयं ततः पुण्यं गंगा
तोयं ततोऽधिकं। इत्याग्ने
यवह्निपुराणे स्नानविधिना
म ४ अध्यायः॥ जलस
मीपस्थावस्थितिमात्रस्थाने। य
थादित्यपुराणे। अरत्नि
मात्रे जले स्नात्वा कुर्य्यात्क्षौच
मनुद्धृते। पश्चाच्च शौचयेत्ती
र्थमन्यथा नशुचिर्भवेत्॥
तस्मिन्देशे शौचे कर्तव्ये य
स्मादरत्निमात्र व्यवहितेजले
तत्स्थलमेवतीर्थं जलसमी
पत्वात्। इत्याह्निकाचारतत्त्वे
सन्न्यासिनां सुप्रसिद्धविशेषः
अस्य प्रमाणं संन्यासिशब्दे द्र
ष्टव्यं॥ विप्रचरणयोः स्ती
र्थवासस्थानत्वे ब्राह्मणशब्दे
द्रष्टव्यं॥ विप्रदक्षिणकर्णे
स्तीर्थवासस्थानत्वंयथा। पराश
रः। प्रभासादीनि तीर्थानि गं
गाद्याः सरितस्तथा। विप्रस्य द
क्षिणे कर्णे वसंति मनुरब्र
वीत्। इत्याह्निकाचारतत्त्वे॥
तीर्थयात्रा स्त्री तीर्थगमने
तद्विधि निषेधौ। यथा। ऋष
य ऊचुः। कर्तव्या तीर्थयात्रा
स्मिन् लोके केन कथं द्विजैः
श्रोतुं न पतद्विच्छामो वद
वक्तिमतांवर मुने। सूत उवाच
एतत् श्रुत्वा ततः सूतः पुराण
मुनिसत्तमः प्रोवाच तान् मुनि
श्रेष्ठान् स्वधर्म्म शृणुतानघाः
यज्ञाधिकारे च गते द्विजेन्द्रः
सर्वस्वनाशे क्षितिपोऽथ वै
श्यः। शुश्रूषणायावलवी
र्य्यहीनः शूद्रस्तु तीर्थानि भजे
त सदान्तः। मुमुक्षुभिस्तीर्थ
गतिं मुनीन्द्रः कार्य्या तथा ते
न्फलकांक्षिभिश्च। तो ब्रह्म
चारी विधिवत्करोति स्वयं
यतो गुरुणा सन्नियुक्तः॥
नित्यं गृहस्थाश्रमसंस्थितस्य
मनीषिभिः तीर्थगतिर्निषिद्धा
मातुः पितुर्भक्तिमता गृहस्थः
सुतेन न कुर्य्यात् खलु तीर्थ
यात्रां। गंगाजलेनानुदिनं

मनुष्या मन्त्रोमयेनापि सदा
मुनीन्द्राः। स्नातीह सम्यक् य
दि भावशुद्धः फलं तदाप्नो
ति न चास्य देनत्। सर्वाणि
तीर्थानि हि यानि तानि स्वर्गे
ऽन्तरीक्षेऽपि पुनः पृथिव्यां।
तुल्यानि सम्यक् मुनयोऽभि
हीते सत्यं गृहस्थाश्रमसंश्रि
तस्य। यस्येह यज्ञेषु पिका
निताग्नि गृहेऽस्वहं दानव
तो मुनीन्द्राः। संज्ञकृतः कंक
नविवर्जितस्य तीर्थं यानि ए
वैतरे नियच्छा। इतिवह्नि
पुराणे १ अध्यायः॥

तीव स्थौल्ये। तीवति। इ
तिदुर्गादासः॥

तीक्ष्णकान्ता स्त्री मंगलच
ण्डिकाया रूपभेदः। यथा। पीठे
दिक्करवासिन्या द्विरूपा वस
ते शिवा। तीक्ष्णकान्ताख्यया
त्वेका योग्यताया प्रकीर्तिता। पु
नर्ललितकान्ताख्या याश्रीश्मश
ल्लचंडिका तस्यास्तु सततं रू
पं तीक्ष्णकान्ता कृयन्तप। कृत्ला
लंबोदरी या तु सास्यादेकज
टा शिवा। तेन रूपेण तां देवी
सततं परिपूजयेत्॥
श्रेगांगिमं श्रोत्र पंचतस्याः प्रा
कप्रतिपादिते। त्रिकोणं म
ण्डलं चास्याः कर्तव्यं येत्रप्रवे
के। आदौ रेथे ततः पश्चात्त
देखिति पदं ततः। तथा पदं
चाधिगतस्य तिष्ठन्विति पदं ततः
मंडलन्यासमंत्रोऽयं तीक्ष्णा
यापरिकीर्तितः। तव त्रिपुरे
वादि यम वेताल डर्हराः॥
गणप्रमेस्तत कोला हारपा
लाः प्रकीर्तिताः। एतांस्तु पूज
येत् सम्यक् मंडलस्याष्टदि
क्षु वै॥ आदौ संबोधने कृत्वा
वज्रपुष्पं ततः परं। वह्निजा
या ततः पश्चात् मंत्र मेषा प्र
कीर्तिता। पाद्योपकरणादीनां
स्थानन्यासस्य सर्वतः। सर्वे
शुक्लवस्त्रौक्ता ग्रासे रूपहृये पि
च। चामुण्डा चकराला च शुभ
गाभीषणा भगा। विकटेति
चयोगिन्यः प्रोक्तास्तस्यास्तु
भूपते। हे भगवत्येकजटे वि
महेपद मंततः। विकटंष्ट्री
महीति तन्नस्तारे प्रचोदया
त्॥ एषा तु तीक्ष्णागायत्री
पीठदेव्याः प्रकीर्तिता। निर्मा
ल्याधारिणी चास्या देवी विकट

चंडिका माला तु मृण्मयी
प्रोक्ता रुद्राक्षसंभवापि वा। वि
कोष पशदेयास्तु पूजने परिकी
र्तितः उपचारादिकं कुर्यद्वलि
दाने जपादिकं। सर्वन्तु पूर्व
वद्ग्राह्यं कामाख्यापूजने यथा
पानेषु मदिरा शस्ता नरो व
लिषु पार्थिवः। मोदकाना
रिकेलं च मांसं व्यंजन मेव
वे। नैवेद्येषु प्रियकरास्तीक्ष्ण
कान्तायाः परिकीर्तिता। इति
कालिकापुराणे ८२ अध्यायः॥

तु ल वृत्ति हिंसा पूर्तिषु।
ल तोलति तवीति॥ इति दु
र्गादासः॥

तुज इ क भा षद्दार्थे।
पंचमस्वरी। इ क तुंजयति
भा दीप्तिः। षद्दार्थो निकेत
न हिंसा बलदानानि। इति
दुर्गादासः॥

तुज इ प्राणे। बले। पंच
मस्वरी। इ तुञ्जते। प्राणं
जीवनं हिंसा याचुज्याया मि
ति कश्चित्। इति दुर्गादासः।
तुज हिंसे। तोजति। इति दु
र्गादासः॥

तुट् शि कलहे। शितुटति
अतुटीत् नीचः परस्परं वच
सा। ततोट। इति दुर्गादासः

तुड ञ वधे। पंचमस्वरी
ञ अतुतोडत्। वधो हिं
साकरणमिति गोविंदभट्टः
तोडति मलो मल्लांगं भिन
त्तीत्यर्थः। इतिदुर्गादासः।

तुड इ ङ वधे। पंचमस्व
री। इ तुण्डते। ङ तुण्ड
ते। वधो निष्पीडनमिति
रमानाथः। तुण्डते पार्श्वापि
कः। इति दुर्गादासः॥

तुड शि भेदे। शि
तुडति अतुडीत्। ततोड।
उपहसेन इति कश्चित्। इ
तिदुर्गादासः॥

तुड्ड नादरे। पंचमस्वरी
उड्डयोतः। नादरो अनादरः
तुड्डति। फलाभावात्न
दस्तुबंधः इतिदुर्गादासः॥

तुण श कौटिल्ये। कौटिल्यमि
ह कुटिलीकरणं। श तुणा
तिरुणं वायुः तोणिता।
इतिदुर्गादासः॥

तुत्थ त क स्तुतौ। आद्य
पंचमस्वरः पोषी दंत्यवर्गी
घधक स्याकारः। तुत्थयति

तुत्थापयति । स्तौति शब्दा
दनं । इति दुर्गादासः ॥
तुत्थं क्ली उपधातुभेदः । तु
तिया इति भाषा । तत्पर्य्या
यगुणाः । तस्य वितुन्नकं चा
पिशिपिग्रीवे मयूरकं । तु
त्थं ताम्रोपधातु हि किंचि
त्ताम्रेणतद्भवेत् । किंचित्ता
म्रगुणं तस्माद्वक्ष्यमाणगु
णं च तत् । तुत्थकं कटुकं क्षा
रं कषायं वामकं लघु । लेखनं
भेदनं शीतं चक्षुष्यं कफपि
त्तहृत् । विषाश्मकुष्ठ कण्डुघ्नं
खर्परं चापि तद्गुणं । इति भाव
प्रकाशः ॥ तुद अ औ श ब
धे । अ श तुदति तुदते । औ
तोत्ता । व्यथ इह ज्ञोतस्य
रूपे । तुतोद गदया चारिं ।
इति भट्टिः । विधुंतुदः । इ
ति दुर्गादासः ॥
तुम्प वधे । तुम्पति । इति
दुर्गादासः ॥
तुम्प श क्लिशि । वधे ।
श तुम्पति तुतुम्प । तुप प
श तुम्प श क्लिशि वधे इत्ये
ताभ्य एव तुम्पति तुम्पती
ति सिद्धौ तुम्प वधे इत्यस्य क्ता

दो पाठस्तु वेदे शब्देनस्पर्शा
तस्य चोच्चारणेनाभेदार्थः ।
इति दुर्गादासः ॥
तुल्फ वधे । तुल्फति । इति
दुर्गादासः ॥
तुल्फ श क्लिशि । वधे । श
तुफति तुतुल्फ । इति दुर्गा
दासः ॥
तुप वधे । तोपति । इति
दुर्गादासः ॥
तुप प श क्लिशि । वधे ।
प श तुम्पति । तुतोप ।
इति दुर्गादासः ॥
तुप इ क अर्द्दने । पंचमस्व
री । इ क तुम्पयति । अ
र्द्दनं वधः । इति दुर्गादासः ।
तुफ वधे । तोफति । इति
दुर्गादासः ॥
तुफ प श क्लिशि । वधे ।
प श तुम्फति तुतोफ । इति
दुर्गादासः ॥
तुब इ कि अर्द्द । तवर्ग
याद्यादिः । पंचमस्वरी । इत्
स्यात् । कि तुम्बयति । तुम्ब
ति । अर्द्दो वधः । इति दुर्गादासः
तुभ ल ङ हिंसे । लृ अ
तुभत् । ङ तोभते । इति

दुर्गादासः ॥
तुभ य श हिंसे । य तुभ्यति
श तुभ्नाति । तुतोभ । इति दु
र्गादासः ॥
तुम्बुरुः पुं क्ली फलवृक्षवि
शेषः । तत्फलेतद्व्यामसुखम
न्नहृत्तपर्य्यायास्तत्फलगुणा
श्च । तुम्बुरुः सौरभः सौरो वन
जः सानुजोऽन्धकः तुम्बुरुः
प्रथिते तिक्तं कटुपाके हि
तत् कटु । रुक्षोष्णं दीपनं ती
क्ष्णं रुच्यं लघु विदाहि च ।
वातश्लेष्मातिकौरिणहृच्छिरो
रुग्गुरुता कृमीन् । कफशू
लारुचिश्वासप्लीह कुष्ठा
नि नाशयेत् । इति भावप्रका
शः ॥ तुर लिर वेगे । ह्वली ।
लि तुतोर्ति । खेदिकः । वेगः
शीघ्रगमनं । अदादिवर्ज्जोया
तुभ्यः श्रापे विधानेनेवसि
द्धे अदादेः श्रापे विधाय त
लक् करणं निषाधो भा
वादिष्वेवादेऽ ऽत्रत इत्यने
नगुणार्थं मिति चतुर्भुजः
तेन तोर्त्ति तुर्त्ति मिति ।
तन्मते रुदे दापि रोदिते रुदि
त मिति स्यात् । इति

दुर्गादासः ॥
तुरगलीलकः पुं तालभेदः
यथा । द्रुतद्वंद्वे विरामान्ते लघु
स्तुरगलीलके । इति संगीतदा
मोदरः ॥
तुरुष्कः पुं गन्धद्रव्यभेदः ॥
शिलारस इति ख्यातः । तत्प
र्य्यायः । सिह्लकः ८ कपिश्च
लः ९ यावलः १० तैलाख्यः ११
पिण्डकः १२ जावकः १३ यावनः
१४ इति शब्दरत्नावली ॥
अन्यच्च । अथ शिलारसः ॥
सिह्लकस्तु तुरुष्कः स्याद्यतो
यवनदेशजः । कपितैलं च स
ख्यातं स्तथा च कपिनामकः ।
सिह्लकः कटुकः स्वादुः स्निग्धो
ष्णः शुक्रकान्तिकृत् । वृष्यः क
ण्ठ्यः स्वेद कुष्ठ ज्वरदाह ग्रहाप
हः । इति भावप्रकाशः ॥
तुरीयं क्ली प्रज्ञानतदुपहितचै
तन्ययोः साधारणभूतमनुपहि
तचैतन्यं । यथा । वनवृक्षतद
वच्छिन्नाकाशयोः जलजला
शय तद्गतप्रतिबिंबाकाशयो
र्वा आधारभूतानुपहिताकाशवद
नयोः अज्ञान तदुपहित चैत
न्ययोः साधारणभूतं यदनुपहि

तं चैतन्यं तत्तुरीय मित्युच्य
ते। शान्तं शिवमद्वैतं चतुर्थं
मन्यन्ते। इत्यादिश्रुतेः। इति
वेदान्तसारः॥
तुव ई हिंसे। कास्त्री।
तुः तुरौ तुरः। ई तूर्णः।
इति दुर्गादासः॥
तुल किं उन्मितौ। उन्मितिः
परिमाणं। किं तोलयति
तोलति काञ्चनं वणिक्।
त्वदीयं सौन्दर्य्यं तुहिनगिरिक
न्ये तुलयितु मिति शङ्करोक्तं
तुलां करोति इति औणाध्य
इति दुर्गादासः॥
तुलसी स्त्री स्वनामख्यातवृ
क्षः। महादेवाय तस्याः पत्रदा
नफलं। यथा। गयाश्राद्धफलं
दातुः पितॄणां परितोषदं। तत्
फलं स्यात् शुभं तुलसीपत्रदा
नतः। इति वृहद्धर्मपुराणे ९
अध्यायः॥ तस्यास्तन्मञ्जर्य्या
श्च हरिहरपूजने मुक्तिप्रदत्वं
पाद्मे देवहूतिविकुण्डलसंवादे।
तुलसीमञ्जरीभिः यः कुर्य्याद्
हरिहरार्च्चनं। न स गर्भगृहं या
ति मुक्तिभागी भवेन्नरः॥
इति श्रीहरिभक्तिविलासे।

७ विलासः॥ तत्पत्रेणाश
क्तिपूजाविधि र्यथा। कालिं
तकपत्रैश्च पुष्पैश्च रपिचं
डिका। तुलसीकुसुमैः पत्रै
र्ज्ञेयच्छ्री विवृद्धये। इतिश्री
कालिकापुराणे ८८ अध्यायः
अथ तुलसीग्रहणविधिः। वा
युपुराणे। अस्नात्वा तुलसीं
छित्वा यः पूजां कुरुते नरः।
सोऽपराधी भवेत् सत्यं तत्
सर्व्वं निष्फलं भवेत्। तत्रादौ
मन्त्रः। स्कान्दे। तुलस्यमृतज
न्मासि सदा त्वं केशवप्रिया।
केशवार्थं चिनोमि त्वां वरदा
भव शोभने। त्वदङ्गसम्भवैः प
त्रैः पूजयामि यथा हरिं। तथा
कुरु पवित्राङ्गि कलौ मलविना
शिनि। गारुडे च। मोक्षैकहेतो
धरणीप्रशस्ते विष्णोः समस्त
स्य गुरोः प्रियेति। आराधना
र्थं वरमञ्जरीकं लुनामि पत्रं तु
लसि क्षमस्व। इत्युक्त्वा तुलसीं
नत्वा चित्वा दक्षिणपाणिना
पत्राण्येकैकशो न्यस्येत् पात्रे
मञ्जरीमपि। तन्माहात्म्यञ्च
स्कान्दे। मन्त्रेणानेन यः कुर्य्याद्
गृहीत्वा तुलसीदलं। पूजनं वासुदे

वस्य लक्षकोटिफलं लभेत्।
किञ्च। शालग्रामशिलार्चार्थं प्र
त्यहं तुलसीक्षितौ तुलसीं ये
विचिन्वन्ति धन्यास्ते करपल्ल
वाः। इति। संक्रान्त्यादौ नि
षिद्धोऽपि तुलस्यवचयः स्मृतौ
परं श्रीविष्णुभक्तैस्तु द्वादश्या
मेव नेष्यते॥
अथ तुलस्यवचयनिषेधका
लः। विष्णुधर्म्मोत्तरे। नच्छिन्द्या
त् तुलसीं विप्रा द्वादश्यां वैष्णवः
क्वचित्। गारुडे। भानुवारं
विना दूर्व्वां तुलसीं द्वादशीं वि
ना। जीवितस्याविनाशाय न
विचिन्वीत धर्म्मवित्॥ पाद्मे
च। श्रीकृष्णसत्यसंवादीयका
र्त्तिकमाहात्म्ये। द्वादश्यां तुल
सीपत्रं धात्रीपत्रञ्च कार्त्तिके।
लुनाति स नरो गच्छेन्निरया
नतिगर्हितान्। अतएवोक्तं
देवार्थे तुलसीच्छेदो होमा
र्थे समिधां तथा। इन्दुक्षयेन
दुष्येत गवार्थे तु तृणस्य च।
एवं कृत्वा महापूजां सगोपी
गादिकं प्रभोः। क्रमाद्यथा
सम्प्रदायं तन्नुतस्यान्तेषु पूजय
त्। इति श्रीहरिभक्ति

विलासे ७ विलासः॥ अथ
तुलसीविवाहः प्रतिष्ठाविधि
श्च। श्रीवसिष्ठ उवाच। विवाहं
सम्प्रवक्ष्यामि तुलस्यास्तु यथा
विधि। यथोक्तं पञ्चरात्रे वै ब्रह्म
णा भाषितं पुरा। आदावेव व
नेवाप्य तुलसीं स्वगृहेऽपि
वा। वर्षत्रयेण पूर्णेन ततोऽय
जनमारभेत्। सौम्यायने प्र
कर्त्तव्यं गुरुशुक्रोदये तथा। अ
थवा कार्त्तिके मासि भीष्मपञ्चदि
नेषु च। वैवाहिकेषु ऋक्षेषु
पूर्णिमायां विशेषतः। मण्डपं
कारयेत्तत्र कुण्डवेदीं तथा पुनः
शान्तिकं च प्रकर्त्तव्यं मातृणां
स्थापनं तथा। मातृश्राद्धादि
कं पूर्व्वं विवाहवत् समाचरेत्।
ब्राह्मणांश्च शुचिस्नातान् वे
दवेदाङ्गपारगान्। ब्रह्मा चा
देशकश्चैव चत्वारश्च तथर्त्वि
जः। वैष्णवेन विधानेन वर्द्धनी
कलसं यजेत्। मण्डपे कारयेत्त
त्र लक्ष्मीनारायणं शुभं। अहय
सम्परः कृत्वा मातृणां पूजनं त
था। कृत्वा नान्दीमुखं श्राद्धं सो
ऽभिस्थापयेद्धरिं। कृत्वा रोप्य
। च तुलसीं लग्ने तत्क्षितेर

वौ वासः शतेन मंत्रेण वस्त्र
युग्मेन वेष्टयेत् । यदावध्ने
ति मंत्रेण कङ्कणं पाणिपल्लवे
कौदासितिच मंत्रेण पाणिग्रा
होविधीयते ततः कुंडे समाग
त्याचार्य्यः सहसा द्विजैः ।
आचार्य्यो वेदिकाकुंडे जुहु
यात्तु नवाहुतीः । विवाहक
मेवत् सर्व्वं वैष्णवे दृष्टिकोत्त
मेः । कर्त्तव्यमुत होमो विधि
षाद्विधिपूर्व्वकं । ॐ नमो भ
गवते केशवाय नमः स्वाहा ।
नारायणाय स्वाहा । माधवा
य । गोविंदाय । विष्णवे । मधुसू
दनाय । त्रिविक्रमाय । वामना
य । श्रीधराय । हृषीकेशाय ।
पद्मनाभाय । दामोदराय । उपेंद्रा
य । अनिरुद्धाय । प्रद्युम्नाय । अने
ताय । गदिने । चक्रिणे । विष्व
क्सेनाय । वैकुंठाय । जनार्द्द
नाय । मुकुंदाय । अधोक्षजा
य स्वाहा । इति होमः । यजमा
नः सपत्नीको ह्यम्येय गोत्रबां
धवाः । प्रदक्षिणाञ्च कुर्व्व
न्त्याश्चत्वारो विष्णुनासह । तु
लस्याः पाणिग्रहणो वेदिका
यां विभावसौ । स्नातकं मंजपेत्
सूक्तं पावमानीविशेषतः ॥
नैश्वेदशांतिकाध्याये नवसूक्तं
तथैवच । जीवसूक्तं पुनर्जप्त्वा
तथा वैष्णवसंहितां ॥ शंख
फलरिनिर्घोषैर्भेरीतूर्य्यस
निस्वनैः । गायते मंगलानां
ध्यानमंगल्यविधिमाचरेत् ।
दद्यात् पूर्णाहुतिं पश्चादभि
षेकविधिं ततः ॥ ब्राह्मणे
वृषभं दद्यादाचार्य्यं परिधा
पयेच ॥ गां घंटेच तथाश
य्यामाचार्य्याय प्रदापयेत् ।
ऋत्विग्भ्यो दापयेद्धाम्नैषां
दद्याच्च दक्षिणां । पश्चात् प्रतिष्ठि
तां देवीं विष्णुनाच समर्चयेत् ।
आजन्मोपार्ज्जितं पापं दर्शनेन
प्रणश्यति । रोपयेत्तुलसीय
स्तु सेचयेच्च प्रयत्नतः ॥ प्रति
ष्ठाप्य यथोक्तेन विष्णुना स
ह मानवः । स मोदते लभेत्ते
न विष्णुलोकं तथाक्षयं ।
प्राप्नोति विपुलान् भोगान्
विष्णुना सहमोदते । प्रति
ष्ठा श्रीतुलस्यास्तु लिखिता
विलयामले । इति श्रीहरिभ
क्तिविलासे २० विलासः ॥
तुवरी स्त्री सौराष्ट्रमृत्तिका ॥

तद्गुणाः तुवरी ग्राहिणी शी
ता लघ्वी कफविषास्रजित् । नौ
त्रणस्रावश्विदा कण्डूकुष्ठको
ठकृमिप्रणुत् । इति भावप्र
काशः ॥
तुष मि ल्ट य ओ तुष्टौ ॥
ल्ट अतुषत् । य तुष्यति । ओ
तोष्टा । मि तुष्टे ऽस्ति ।
इति दुर्गादासः ॥
तुस ध्वाने । तोषति ।
इति दुर्गादासः ॥
तुह इर् अर्द्दने । इर्
अतुहत् अतोहीत् । अर्द्दन
मिहवधः । इति दुर्गादासः ।
तुड ऋ अनादरे । वधस्त
री । ऋ अतुतुडत् । इति दु
र्गादासः ॥
तूण तू क संकोचे । दीर्घी
मूर्द्धन्योपधः । अतूतुणत् ।
इति दुर्गादासः ॥
तूण क संकोचे । दंत्यवर्गा
द्यादिः । क तूणयति चक्षुः
संकुचितं स्यादित्यर्थः । इ
ति दुर्गादासः ॥
तूण क ङ पूरणे । क ङ
तूणयते । इति दुर्गादासः ।
तूर य ङ ई हिंसे । स्पदे ।
य ङ तूर्य्यते । ई तूर्णः । इ
ति दुर्गादासः ॥
तूल क ङ पूरणे । दीर्घी
क ङ तूलयते । इति दुर्गा
दासः ॥
तूल क निष्कर्षे । दीर्घी ।
निष्कर्ष इह पुष्टतापरिच्छेदः
कतूलयति कांचनं वणिक्
इति दुर्गादासः ॥
तूष तुष्टौ । षट्स्वरी ।
तूषंति कुलदेवताः । इति
दुर्गादासः ॥
तृण ह उ म भक्षे । ह म
तृणोति तर्णोति तृणुते त
र्णुते । उ तर्णित्वा तृत्वा । इ
ति दुर्गादासः ॥
तृतीया स्त्री चंद्रस्य तृतीयक
लाक्रियारूपतिथिविशेषः ।
सा वैशाखस्य शुक्ला अक्षय
तृतीया । यथा । स्मृतिः । वैशाखे
मासि राजेंद्र शुक्लपक्षे तृतीयि
का । अक्षया सा तिथिः प्रोक्ता
कृत्तिका रोहिणीयुता । तस्यां
दानादिकं पुण्यं अक्षयं समुदा
हृतं । भविष्ये । या शुक्लाकृ
ष्णार्हेल वैशाखे मासि वैति
थिः । तृतीयासाक्षया लोके

गौरी गौरभिवंदिता। योऽस्यां
दद्याति करकान् वारि वाजस
मन्वितान्। स याति पुरुषो
वीरलोकान्वै हेममालिनः।
करकान्कुंभान्। वाजमन्नं।
हेममालिनःस्वर्णस्रा। ब्रह्मपु
राणे। यः पश्यति तृतीयायां
कृष्णचंदनचर्चितं। वैशाख
स्य सितेपक्षे स यात्यच्युतमंदि
रं। स्कंदपुराणे। वैशाखस्य
सितेपक्षे तृतीयाक्षयसंज्ञि
ता। तत्रमां लेपयेत्कृष्णलेपनै
रतिशोभनैः॥ ब्रह्मपुराणे
वैशाखशुक्लपक्षेतु तृती
यां जनार्दनः। यवानुत्पाद
यामास युगं चारब्धवान्कृते
ब्रह्मलोकात्त्रिपथगां पृथिव्या
मवतारयत्। तस्यां कार्यो यवै
र्होमो यवैर्विष्णुं समर्चयेत्॥
यवान् दद्यात्द्विजातिभ्यः प्र
यतः प्राशयेद्यवान्। पूजयेत्श
करं गंगां कैलासंच हिमा
लयं। भगीरथंच नृपतिं सा
गराणां हितावहं। स्नानं दानं
तपः श्राद्धं जपहोमादिकंच यत्
श्रद्धया क्रियते तत्र तदानन्त्याय
कल्पते। अक्षयं फलमश्नुते।

युगवचने नक्षत्रयोगाः फला
तिशयार्थः। इति तिथ्यादित
त्त्वं॥ पाद्मे श्रीवराहधरणीसं
वादे। त्रेतायुगं तृतीयायांप्र
वृत्तायां माससिमाधवे। प्रवृत्ते
च त्रयीधर्माः प्रवृत्ताः सत्य
वर्तिनः। प्रवृत्तया प्रोच्यते लो
के तृतीया हरिवल्लभा। स्ना
नेदानेऽर्च्चने श्राद्धे जपेपूर्व्वज
तर्पणे। येऽर्च्चयंति यवैर्वि
ष्णुं श्राद्धं कुर्वंति यत्नतः।
तस्यां ददति दानानि धन्यास्ते
वैष्णवा नराः। इति श्रीहरिभ
क्तिविलासे १४ विलासः॥
तृद हिंसे। तर्द्दति। इति
दुर्गादासः॥
तृद उ म ध इर् नादरे
हिंसे। उ तर्दित्वा तृत्वा।
म ध तृणत्ति तृन्ते। इर्
अतृदत् अतर्द्दीत्। इति
दुर्गादासः॥
तृन्प श प्रीणने। प्री
णनमिह प्रीतीभावः।
श तृम्पति लाभाल्लोकः
ततृम्प॥ इति
दुर्गादासः॥
तृन्फ श प्रीणने। शतृम्फति

ततृम्फ। इति दुर्गादासः॥
तृन्ह उ श हिंसे। सप्तम
स्वरी। उ अतृंहीत् अतृंढी
त्। श तृहति। इति दुर्गा
दासः॥
तृप कि संदीपने। प्रीण
ने। कि तर्पयति तर्पति।
इति दुर्गादासः॥
तृप न प्रीणने। प्रीणने
प्रीतिकरणं। न तृप्नोति पि
तरं पुत्रः। ततर्प यो ऽग्निस्त्र
यं तर्पयतीति हलायुधः।
इति दुर्गादासः॥
तृप ञि ल्ट य ऊ प्रीणने
ञि तृप्तोऽस्ति। ल्ट अतृप
त्। अस्य ल्टदित्वेपि कृषमृ
श स्पृशोस्यादि विशेषविधा
नात् पक्षे फ्योंसि सेन अ
ताप्सीत् अत्राप्सीत् अतर्पी
दित्यपि। य तृप्यति। ऊ त
र्प्स्यति तर्प्स्यति। प्रीणनमि
ह प्रीतीभावः प्रीतीकरणंच।
स्वन्दीनि तृप्यतु मधूनि पिब
त्रिवाचमिति श्रीहर्षः पिन्नता
र्यौ तृपरक्तेतोये विति भट्टिः
इति दुर्गादासः॥
तृप म श प्रीणने।

य श तृम्पति ततर्प। इति
दुर्गादासः॥
तृफ य श प्रीणने।
य श तृफति ततर्फ। इ
ति दुर्गादासः॥
तृष इर् य ञि तृषि। इर्
अतृषत् अतर्षीत्। अस्मात्
पुषादित्वात् नित्यं ङ इत्य
न्ये। य तृष्यति। ञि तृषि
तोऽस्ति। तृट् आकांक्षा।
तथा च। इच्छाकांक्षा स्पृ
हेहा तृट् वाञ्छा लिप्साम
नोरथः। इत्यमरसिंहः। तद्
पश्यिन मग्रहीदज्ञः पितरा
ज्ञेति न भोगान्तसयेति रघुः
तृष्यतिधनं लोकः। तृषिपि
पाषाया मिति शास्त्रं। तृ
ष्यतितोये पान्थः। इति रमा
नाथः। इति दुर्गादासः॥
तृष्णा स्त्री पानेच्छा। तत्प
र्य्यायः। तृषा २ इति शब्द
रत्नावली। तर्षणं ३ इति
जटाधरः। रोगविशेषः॥
तन्निदानं यथा। वातात् पि
त्तात् कफात् तृष्णास्सन्निपा
तात् रसक्षयात्। षष्ठीस्यादु
पसर्गाच्चवातपित्तेतुकारणं।

सर्वासु तृष्णास्वेकोपाधिः शोषमा
यात्त्वप्रशोषणात्। सर्वदेहेष्व
मात्रकम्पतापतृड्दाहमोहच्छे
तु। जिह्वामूलगलक्लोमता
लुतोयवहाः शिराः। संशोष्य
तृष्णा जायते तासां मानान्यल
क्षणं॥ मुखशोषो जलातृप्ति
रन्नद्वेषः स्वरक्षयः। कण्ठौष्ठ
जिह्वाकार्कश्यं जिह्वानिष्क्र
मणं क्लमः। प्रलापश्चित्तविभ्र
मो रक्तोहो कासश्वासमयाः।
मारुतात् क्षामता दैन्यं शंखतोदः
शिरोभ्रमः। गन्धाज्ञानास्यवैर
स्यश्रुतिनिद्राबलक्षयाः। शी
ताम्बुवेगाद्वृद्धिश्च पित्तान्मूर्छा
स्यतिक्तता। रक्तेक्षणत्वं सततं
शोषो दाहोऽतिधूमकः। क
फं रुणद्धि कुपितस्तोयवाहि
षु मारुतः। स्रोतःसु सकफ
स्तेन पङ्कवच्छोष्यतेऽनिलैः।
शूकैरिवाचितः कण्ठो निद्रा
मधुरवक्त्रता। आध्मानं शि
रसो जाड्यं स्तैमित्यच्छर्द्यरो
चकाः। आलस्यमविपाकश्च
यः स्यात्सर्वैर्लक्षणैः। आमो
द्भवा च भक्तस्य संरोधाद्वातपित्त
जा। उष्णक्लान्तस्य सहसा शीतां
भो भजत

स्तृषा। तृष्णावोर्ध्वंगतं कोष्ठे
ऊष्मान्तःपित्तकृज्जैव सा। याच
पानातिपानोत्था तीक्ष्णाग्नेः
स्नेहपाकजा। स्निग्धकट्वम्ल
लवणभोजनेन कफोद्भवा। तृ
ष्णा रसक्षयोक्तेन लक्षणेन
क्षयात्मिका। शोषमोहज्व
राद्यन्यदीर्घरोगोपसर्गतः।
या तृष्णा जायते तीव्रा सा पस
र्गात्मिका स्मृता॥ इति माध
वे तृष्णानिदानं १५९ अध्यायः
तद्दोषघ्नं यथा। त्रिफलापिप्प
लीचूर्णं भक्षितं समधुना। घृतं
भोजनादौ हि समधु पिपासां
शमितं हरेत्। इति तत्रैव १६०
अध्यायः॥ अपि च। अ
थ तृष्णाधिकारः। तत्र तृष्णा
या निदानपूर्विकां सम्प्राप्तिमा
ह। भयश्रमाभ्यां बलसंक्षयाद्वा
ऊर्ध्वं चितं पित्तविवर्द्धनैश्च।
पित्तं सवातं कुपितं नराणां
तालुप्रपन्नं जनयेत् पिपासां
स्रोतःस्वपांवाहिषु दूषितेषु दो
षेषु तृट्संभवतीह जन्तोः। ति
स्रः स्मृतास्ताः क्षतजा चतुर्थी
क्षयात्तथाऽन्यामसमुद्भवा च।
भक्तोद्भवा सप्तमिकेति तासां

निबोध लिङ्गान्यनुपूर्वशस्तु।
नराणां चितं स्वस्थान प्रवसं
चितं पित्तं सवातं पित्तविवर्द्ध
नैः कट्वम्लक्षारादिभिः कुपितं।
भयश्रमाभ्यां बलसंक्षयाद्वा उप
वासादेश्च वातः कुपितः। तद्व
यमूर्ध्वं प्रसरन् तालुप्रसन्नं स
त्पिपासां जनयेत्। न केवलं
तालुन्येव दूषिते तृष्णा भव
ति। किं तु जलवाहिस्रोतःस्व
पि। अत आह। स्रोतःस्वित्यादि
तत्र बहुवचनं न युक्तं। यतो
जलवहे द्वे स्रोतसी सुश्रुतेनो
क्ते। उच्यते। तयोरेवानेकप्रता
नयोगात्र दोषः। अपांवाहि
षु स्रोतःस्विति जिह्वादेरप्यु
पलक्षणं। यत आह चरकः।
रसवाहिनीश्च धमनी जिह्वा
हृदय गल तालु क्लोमच। सं
शोष्यन्तृष्णां देहे कुरुत तृष्णा
मतिबलौ पित्तानिलाविति।
संख्यामाह। तिस्र इत्यादि॥
तृष्णायाः नामान्यो लक्षणमा
ह। सततं यः पिवेत्तोयं न तृप्ति
मधिगच्छति। पुनः कांक्षति
तोयं तं तृष्णार्दितमादिशेत्
वातजाया लक्षणमाह॥

क्षामास्यता मारुत संभवायां
तोदस्तथा शंख शिरःसु चापि
स्रोतोनिरोधो विरसं च वक्त्रं
शीताभिरद्भिश्च विवृद्धिमेति।
शंखशिरः सुशंखयोः शिर
सि च। स्रोतोनिरोधो रसवह
शिरधमनीनिरोधः। पित्तजा
माह। मूर्च्छान्नविद्वेष विला
पदाहा रक्तेक्षणत्वं प्रततश्च
शोषः। शीताभिनंदा मुखति
क्तता च पित्तात्मिकायां परिधू
पनं च। विलापः प्रलापः। प्रत
तश्च शोषः अविरतश्च शोषः
शीताभिनंदा शीतेच्छा। परि
धूपनं कंठादूष्मनिर्गमइव। क
फजामाह। वाष्पावरोधात् क
फसंवृतेऽग्नौ तृष्णा बलासेन
भवेन्नरस्य। निद्रागुरुत्वं मधु
रास्यता च तयार्दितः शुष्यति
चातिमात्रं। अग्नौ जठराग्नौ।
कफसंवृते स्वकारणकुपिते
न कफेनोपरिष्टादाच्छादिते
वाष्पावरोधात् अग्नेरूष्माव
रोधात्। अवरुद्धानलोष्मणां
बुवहस्रोतःशोषणात् बला
सेन कफेन नरस्य तृष्णा भवेत्
तयात्तृष्णया अर्दितः पीडितः।

शुष्यति कृशो भवति ॥ क्षत
जामाह क्षतस्य रुक् शोणित
निर्गमाभ्यां तृष्णा चतुर्थी क्षतजा
मता ॥ क्षतस्य शस्त्रादिक्षतस्य
रुक् रुक्पीडा ॥ क्षयजामाह
रसक्षयाद्या क्षयसंभवा सा त
याभिभूतस्तु निशादिनेषु
पेपीयते ऽम्भः स सुखं न याति
तां सन्निपातादिति केचिदाहुः
रसक्षयोक्तानि च लक्षणानि
तस्यामशेषेणाभिषग्व्यवस्येत्
रसक्षयलक्षणानि सुश्रुतेनो
क्तानि । रसक्षये हृत्पीडा क
म्पः शोषः शून्यता तृष्णा चेति ।
व्यवस्येत् जानीयात् । आम
जामाह । त्रिदोषलिंगामसमुद्भ
वां च हृच्छूल निष्ठीवन सा
दकर्त्री । भुक्तोद्भवामाह ।
स्निग्धं तथाम्लं लवणं च भु
क्तं गुर्वन्नमेवाशु तृषां करोति
लवणं चेति चकारात् कटु च ।
उपसर्गजामाह । क्षीणस्वरः
प्रताम्य दीनाननहृदयशुष्क
गल तालुः भवति खलु सो
पसर्गात् तृष्णा सा शोषिणी क
ष्टा । शोषिणी धातुशोषिणी ।
उपसर्गानाह । ज्वरो

मोहः क्षयः श्वासकासपिण्डिका
स प्रवच । वहिर्निर्गतजिह्वाक
सर्वे ते तदुपद्रवाः ॥
तद्युक्ताया अरिष्टत्वं चाह । ज्वर
मोह क्षय कास श्वासाद्युप
सृष्टदेहानां । सर्वे त्वतिप्रस
क्ता रोगकृशानां वमिप्रसक्ता
नां । घोरोपद्रवयुक्ता स्तृष्णा म
रणाय विज्ञेयाः । आदिशब्दा
द्दतीसारादीनां ग्रहणं । अतिप्र
सक्ताः निरन्तराः । घोरोपद्रवयु
क्ताः अतीवसुखशोषास्थिताः
अथ तृष्णायाश्चिकित्सा ।
वातघ्नमन्नपानं मृदुलघुशी
तं च वाततृष्णायां । तृष्णायां
पवनोत्थायां सगुडं दधिश
स्यते । स्वादु तिक्तं द्रवं शीतं
पित्ततृष्णापहं परं ॥
मुस्तपर्पटकोदीच्यधन्याको
शीरचंदनैः । श्रृतंशीतं जलं
दद्यात् तृड्दाह ज्वरशान्तये ।
छर्द्यां धान्याके । काश्मिरद्राक्षेव
दद्यात् । चंदनमथ धवले द
धानस्यानितृष्णाहरत्वात् ।
शतमर्द्धपक्वमसमकर्तव्यं । षडंग
पाने १ । लाजोत्पकं मधुयुतं
शीतं गुडविमर्दितं । काश्मरी

शर्करायुक्तं पिबेत् तृष्णार्दितो
नरः ॥ २ ॥ आम्लस्य मार्द्रवास्कः
प्रावरणं चार्द्रमेव स्यात् । तेन
पिपासा शाम्यति दाह श्चाशो
पि देहिनां नियतं ३ । गो
स्तनीक्षुरस क्षीर यष्टीमधु मधू
त्पलैः । नियतं नासिकापी
तैस्तृष्णा शाम्यति दारुणा ४
वैक्षयं जनयत्यास्य संदधाति
मुखे जले । तृष्णा दाहप्रशमनं
मधुगंडूषधारणं । ५ । जिह्वाता
लुगलक्लोमशोषे मूर्द्धनि दाप
येत् । केशरं मातुलुंगस्य घृत
सैंधवसंयुतं । ६ । दाडिमंब
दरं लोध्रं कपित्थं बीजपूरकं
पिष्ट्वा मूर्द्धनि लेपस्तु पिपा
सादाहनाशनः । ७ । वारि
शीतं मधुयुतमाकण्ठाद्वा पिपा
सितं । पाययेद्वामयेच्चापि तेन
तृष्णा प्रशाम्यति । ८ । प्रातः
सुशर्करः पेयो हिमो धान्याक
संभवः । जयेत् तृष्णां तथा दाह
भवेत् स्रोतो विशोधनं ९ ।
आमलं कमलं कुष्ठं लाजा
श्च वटरोहकं । एतच्चूर्णस्य म
धुना गुटिकां धारयेन्मुखे । तृ
ष्णां प्रवृद्धां हन्त्येषा मुखशोषं च

दारुणं १० क्षतोद्भवां रुजं विनि
वारणेन जयेत् क्षतानां सरु
जस्य पातैः । ११ । क्षयोत्थितां
क्षीरजलं निहन्यान्मांसोदकं वा
मधुरोदकं वा १२ । आमोद्भवां
बिल्व वचायुतानां जयेत्क
षाये रपि दीपनानां ॥ १३ । गु
र्वन्नजामुल्लिखनैर्जयेच्च त
य विना सर्वकृतां जतृष्णां । उ
ल्लिखनैः लेखनद्रव्यैः १४ ।
स्निग्धेऽन्ने भुक्ते या तृष्णा स्या
त्तां गुडाम्बुना शामयेत् । अति
रोगदुर्बलानां तृष्णां शामये
दृणा मिहाम्बुपयः । पयोऽत्र
दुग्धं १५ मूर्च्छा छर्दि तृषा
दाहस्त्रीमद्य भृशकर्षिताः ।
पिबेयुः शीतलं तोयं रक्तपि
त्ते मदात्यये १६ सात्म्यान्नपा
नभेषजैस्तृष्णां तस्य जयेत्
पुनः । तस्यां जितायामन्यो
पि व्याधिः शक्यश्चिकित्सि
तुं १७ ॥ तृष्यन् पूर्वामय
क्षीणो न लभेत जलं यदि ।
मरणं दीर्घरोगं वा प्राप्नुयात्त्व
रितं नरः । तृषितो मोह माया
ति मोहात् प्राणान् विमुंच
ति । तस्मात्सर्वास्ववस्थासु न

क्वचिद्धारि वारयेत् अन्नेनापि
विना जन्तुः प्राणान् धारयते
चिरं। तोयाभावात् पिपासा
र्त्तः क्षणात् प्राणै र्विमुच्यते
इति तृष्णाधिकारः॥
इतिभावप्रकाशः॥
तृह ध ऊ श हिंसे।
सप्तमस्वरी। ध तृणेढि। ऊ
अतर्हीत् अतृक्षत। श तृंह
ति। इति दुर्गादासः॥
तृह इन्सी। सप्तमस्वरी।
तृहाति। इन्सी गतौ। इति
दुर्गादासः॥
तॄ तरे। अभिभवे। तुन्सी।
तरः प्लवनपूर्वकदेशान्तरप्राप्ति
र्न। प्लुति र्मज्जनाभावः। त
रति नदीं भेलया पान्थः। त
रति सकलदुःखं वामनं भाव
येत्। तरति शुष्ककाष्ठं ज
ले मज्जति नेत्यर्थः। इति
दुर्गादासः॥
तेजपत्रं क्ली स्वनामख्यातपत्र
म्। तज इति तेजपात इति
च भाषा। तस्य नाम गुणाः।
त्वक्पत्रंच वराङ्गं स्याद्भृङ्गंचो
चं तथोत्कटं। त्वचं लघूष्णं
कटुकं स्वादु तिक्तंच रूक्षकं॥
पिच्छलं कफवातघ्नं कण्ठामा
रुचिनाशनं। हृल्लासरोगवा
तार्शः कृमि पीनस शुक्रहृ
त्। इतिभावप्रकाशः॥
तेजितं त्रि तीक्ष्णीकृतं। तत्
पर्य्यायः। शितं ५ शाणादि
मार्जितं ६। इति शब्दरत्नाव
ली। क्ष्णुतं ७ निशातं ८ शि
तं ९ शातं १० इतिजटाधरः॥
तेजोवती स्त्री महाज्योतिष्म
ती तेजल इति तेजवल्कल
इति चभाषा। तस्याः पर्य्याय
गुणाः। तेजस्विनी तेजवती
तेजोह्वा तेजनी तथा। ते
जस्विनी कफश्वासकासा
स्यामयवातहृत्। पाचन्युष्णा
कटुस्तिक्ता रुचि वह्निप्रदी
पनी॥ इति भावप्रकाशः॥
तेप ङ ऊ कम्पे॥
च्युतौ। ङ अतितेपत्। ऊ
तेपते तेप्ता। तितेपे।
इति दुर्गादासः॥
तेव ङ ऊ देवने। देवन
मिह क्रीडा। ङ अतितेवत्
ऊ तेवते। तेवते बालः कं
दुकै र्नित्य मिति हलायुधः
देवन मिह रोदन मिति

मदमलः। इति दुर्गादासः॥
तैजसः पुं सूक्ष्मशरीरव्यष्ट्यु
पहितचैतन्यं। यथा। एत
द्व्यष्ट्युपहितं चैतन्यं तैजसो
भवति। तेजोमयान्तःकरणो
पहितत्वात्॥ इति वेदा
न्तसारः॥
तैलं क्ली तिलादिस्नेहः।
वारादिविशेषे तदभ्यंगे गु
णदोषौ। यथा। सन्तापः कीर्त्ति
रल्पायु र्धनं निधनमेवच।
आरोग्यं सर्वकामाप्तिरभ्यं
गाद्भास्करादिषु। उपोषित
स्य व्रतिनः कृत्तकेशस्य नापि
तैः। तावत् श्री स्तिष्ठति प्रीता
यावत्तैलं न संस्पृशेत्॥ इति
गारुडे ११४ अध्यायः॥
अथ तैलवर्गः। तत्र तैलस्य
स्वरूपनिरूपणं। तिलादिस्नि
ग्धवस्तूनां स्नेहस्तैल मुदाहृ
तं। तच्च वातहरं सर्वं विशेषात्
तिलसम्भवं॥ अथ तिलतैल
गुणाः। तिलतैलं गुरु स्थै
र्य्यं बलवर्णकरं परं। वृष्यं वि
कासि विशदं मधुरं रसपा
कयोः। सूक्ष्मं कषायानुरसं ति
क्तं वात कफापहं। वी
र्य्योष्णं हिमं स्पर्शे बृंहणं
रक्तपित्तहृत्। लेखने बद्धवि
ण्मूत्रं गर्भाशयशोधनं। दी
पनं बुद्धिदं मेध्यं व्यवायि व्रण
मेहनुत्। श्रोत्रयोनिशिरःशू
लनाशनं लघुताकरं। त्वच्यं
केश्यंच चक्षुष्य मभ्यंगे भो
जनेऽन्यथा॥ छिन्नभिन्नच्यु
तोत्पिष्टमथितक्षतपिच्चि
ते। भग्नस्फुटितविद्धाग्निदग्ध
विश्लिष्टदारिते। तथाभिहत
निर्भुग्नमृगव्याघ्रादिविक्ष
ते। वस्तौ पानेऽन्नसंस्कारे न
स्यकर्णाक्षिपूरणे। सेकाभ्यं
गावगाहेषु तिलतैलं प्रश
स्यते॥ ननु इह लेखनयोः क
थं सामानाधिकरण्य मित्या
ह। सूक्ष्मादिगुणवत्त्वेन स्रोतःसं
कोचयेद्यदा। तदा सारवह
न् कार्श्यं कुर्य्यात् कायकर्ष
ने। तेषु प्रविष्टं सत्तत् सौक्ष्म्य
विष्यन्दत्वमार्द्दवैः। तैलेऽत्तनेव
सं तैलं कृशानां तनुबृंहणं
व्यवाय सूक्ष्मतीक्ष्णस्क्षसर
तैर्मेदसः क्षयः। प्राणैः प्रकृत
तैतैलं तत्तैलं त्वन्नीरितं। अ
तेषु रोगेषु वाति सर्वलिंतत्

प्रवर्त्तयेत् । ग्राहकं सारकं वा
पित्तेषु तैल मुदीरितं । घृत
मष्टात् परमर्कं हीनवीर्य्यम
जायते । तैलं पक्व मपक्वं वा
चिरस्थायि गुणाधिकं । ग्रथ
सर्षपतैलगुणाः । दीप
नं सार्षपं तैलं कटुपाकरसंल
घु । लेखनं स्पर्शवीर्य्योष्णं
तीक्ष्णं पित्तास्रदूषकं । कफ
मेदोऽनिलार्शोघ्नं शिरःकर्णा
मयापहं । कण्डूकोठकृमिश्वि
त्रकुष्ठ दुष्टव्रणप्रणुत् । तद्व
द्राजिकयो स्तैलं विशेषान्मू
त्रकृच्छ्रकृत् । राजिकयोः कृ
ष्णगौरयोः ॥ ग्रथ तौवरीतैल
गुणाः । तुवरी ग्राहि कफास्रजित्
वह्निकृद्विषहृत्कण्डूकुष्ठको
ठकृमिप्रणुत् । मेदोदोषाप
हं चापि व्रणशोथहरं परं ॥
ग्रथ तैलसीतैलगुणाः । ग्रतसी
तैलमाग्नेयं स्निग्धोष्णं कफपि
त्तकृत् । कटुपाक मचक्षुष्यं
बल्यं वातहरं गुरु । मलकृद्
रसतः स्वादु ग्राहि त्वग्दोषहृत्
व्रणं । वस्तौ पाने तथाभ्यंगे नस्ये
कर्णस्य पूरणे । ग्रनुपान
विधौ चापि प्रयोज्यं वातशान्त
ये ॥ ग्रथ वरदरु तैलगुणाः
कुसुम्भतैलमस्ले स्वादुस्नेगु
रु विदाहि च । चक्षुर्भ्यामहि
तं बल्यं रक्तपित्तकफप्रदं ॥
ग्रथ खाखसवीजतैलगुणाः
तैलं खाखसवीजानां बल्यं
वृष्यं गुरु स्मृतं । वातहृत्क
फहृच्छीतं स्वादुपाकरसं
च तत् ॥
ग्रथ एरण्डतैलगुणाः । ए
रण्डतैलं तीक्ष्णोष्णं दीपनं
पिच्छिलं गुरु । वृष्यं त्वच्यं व
यस्थापि मेधा कान्तिबलप्रदं
कषायानुरसं सूक्ष्मं योनिशु
क्रविशोधनं । विस्रं स्वादुरसं
पाके सतिक्तं कटुकं सरं ॥
विषमज्वर हृद्रोग पृष्ठगुह्या
दिशूलहृत् । हन्ति वातोदरानाह
गुल्माष्ठीलाकटीग्रहान् ।
वातशोणित विड्बन्ध व्रध्नशो
थामविद्रधीन् । ग्रामवात गजें
द्रस्य शरीर वनचारिणः । एक
एव निहन्ताऽयमेरण्डस्नेहके
सरी ॥ ग्रथ शालतैलगुणाः
तैलं सर्जरसाभं तु विस्फो
ट व्रणनाशनं । कुष्ठपामा
कृमिहरं वातश्लेष्मामयापहं

905

ग्रथ सर्वतैलगुणाः ॥
तैलं स्वयोनिगुणकृद्धावरना
विलं मतं । ग्रतः शेषस्य तैल
स्य गुणा ज्ञेयाः स्वयोनिवत् ।
इति भावप्रकाशे तैलवर्गः ॥
ग्रथ पुराण तैलगुणाः ॥
यामे कल्क कषायवीर्य्य म
खिलं चूर्णं च पक्षत्रये ष
एमासान् घृतमोदकौ सहग
डौ मासद्वये गुग्गुलोः । सि
द्धानां रस भस्मनां सुविपुले
वीर्य्यं तु वर्षत्रयं किंचिन्न्यूनमवि
वर्जितं गुणपरं तैलं पुराणं
महत् ॥ इति नारायणदा
सकृत परिभाषा ॥
तोकमः पुं पल्लवाद्यंकुरः ।
यथा पत्र पुष्प फलच्छा
यामूल वल्कल दारुभिः ।
गन्ध निर्यास भस्मास्थि तोक्मैः
कामान् वितन्वते । इति श्रीभा
गवते १० स्कंधे २२ ग्रध्यायः ३५
श्लोकः । निर्यासो वृक्षरसः
तोक्माः पल्लवाद्यंकुराः । इति
तट्टीकायां श्रीधरस्वामी ॥
तोड क्र नादरे । क्र
ग्रततोडत् । नादरो ऽना
दरः । इति दुर्गादासः ॥
त्वज डु हाने । डु ग्रत्वा
क्षीत् । हानि र्वर्ज्जनं । त्वज
ति दुष्टलोके जनः । इ
ति दुर्गादासः ॥
त्वत् [२] त्री वायुः । ग्राकाशः
यथा । सत्यव्रतं सत्यपरं त्रि
सत्यं सत्यस्य योनिं निहि
तंच सत्ये । सत्यस्य सत्यमृ
तसत्यनेत्रं सत्यात्मकं त्वां श
रणं प्रपन्नाः । इति श्रीभागव
ते १० स्कंधे २ ग्रध्यायः ॥
सत्यव्रत मिति । सत्यं व्रतं स
कल्पो यस्य तं । सत्यपरं सत्यं
परं श्रेष्ठं प्राप्तिसाधनं यस्मि
न् तं । त्रिसत्यं त्रिष्वपि काले
षु सृष्टेः पूर्वं प्रलयानन्तरं
स्थितिसमये च सत्यं ग्रव्यभि
चारेण वर्त्तमानं । तदेवाह । स
त्यस्य योनि मिति । सत्यं शब्देन
पृथिव्यप्तेजांसि त्यच्छब्देन वा
य्वाकाशौ एवं सच्च त्यच्च स
त्यं भूतपंचकं । तत्र सत्य
मिव्याचक्षते । इति श्रुतेः ।
तस्य योनिं कारणं । ग्रनेन
सृष्टेः पूर्वं वर्त्तमानत्वोक्ता
तथा सत्ये तस्मिन्नेव निहितं
ग्रन्तर्य्यामितया स्थितं । ग्रनेन

स्थितिसमयेपि सत्यत्वमुक्तं
तथा सत्यस्य सत्यं तस्यैवस
त्यस्य सत्यं पारमार्थिकं ना
स्त्येवविषयमाणत्वं । प्र
लेन प्रलयेप्यवधित्वेन सत्य
त्वं दर्शितं । एवंत्रिसत्यत्वमु
पपादितं । तथा ऋतस्य
नेत्रे ऋतंसूनृतावाणीसत्ये
समदर्शने । तथा भगवता
व्याख्यास्यमानत्वात् । सत्यं
च समदर्शने । ऋतंच सूनृता
वाणीकविभिः परिकीर्तिता
इति । तयोर्नेत्रं नयनसाधने
नेतारं प्रवर्तकमिति यावत् ।
एवंसर्वप्रकारेणसत्यात्मकं
त्वां वयं शरणं प्रपन्ना इत्य
र्थः । इतिटीकायां श्रीधरस्वा
मी । त्यागः पुं सर्वकर्मफलवि
सर्जने । यथा । काम्यानां कर्म
णां न्यासं संन्यासं कवयो विदुः
सर्वकर्मफलत्यागं प्राहुस्त्या
गं विचक्षणाः । त्याज्यं दोष
वदित्येके कर्म प्राहुर्मनीषि
णः । यज्ञदानतपः कर्म न त्या
ज्यमिति चापरे । निश्चयं शृ
णु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुष

व्याघ्र त्रिविधः संप्रकीर्तितः ॥
यज्ञो दानं तपः कर्म न त्याज्यं का
र्यमेव तत् । यज्ञो दानं तपश्चै
व पावनानि मनीषिणां । एता
न्यपि च कर्माणि संगं त्यक्त्वा
फलानि च । कर्तव्यानीति मे
पार्थ निश्चितं मतमुत्तमं । नि
यतस्य तु संन्यासः कर्मणो नो
पपद्यते मोहात्तस्य परित्या
गस्तामसः परिकीर्तितः ॥
दुःखमित्येव यत्कर्म का
यक्लेशभयात्त्यजेत् । स कृत्वा
राजसं त्यागं नैव त्यागफलं ल
भेत् कार्यमित्येव यत्कर्म
नियतं क्रियतेर्जुन । संग
त्यक्त्वा फलं चैव स त्यागः
सात्विको मतः ॥ इतिश्री
भगवद्गीतायां १८ अध्या
यः ॥
त्यागी २ त्रि कर्मफलत्याग
वान् । यथा । न द्वेष्ट्यकुशलं क
र्म कुशले नानुषज्जते । त्यागी
सत्वसमाविष्टो मेधावी छि
न्नसंशयः । नहि देहभृता श
क्यं त्यक्तुं कर्माण्यशेषतः
यस्तु कर्मफलत्यागी स त्यागी
त्यभिधीयते । इतिश्रीभगवद्गीता

यां १८ अध्यायः ॥
त्रक ङ ऊ गतौ । दंत्यव
र्गाद्यादिः । ङ त्रंकते । ऊ
त्रंकते । इतिदुर्गादासः ॥
त्रग ङ गतौ । ङ त्रंगते ।
इति दुर्गादासः ॥
त्रद ङ चेष्टे । दंत्यवर्गा
द्यादिः । ङ त्रन्द्यते तत्रन्द ।
इतिदुर्गादासः ॥
त्रप ऊष मि ङ ह्रियि ।
ऊ त्रत्रपिथ अत्रप । ष त्रपा
मि त्रपयति त्रापयति । ङ
त्रपते । ह्रियि लज्जायां ।
इति दुर्गादासः ॥
त्रयी स्त्री दुर्गा । यथा । ऋ
ग्यजुस्सामभागेन सांगवेद
गतापि वा । त्रयीति पठ्यते लो
केदृष्टदृष्टार्थसाधिनी । इति
देवीपुराणे ४५ अध्यायः ॥
त्रस क भृतौ ॥ ग्रहे ॥
निषेधे । एतदाद्या श्चत्वारो
रेफयुक्ताद्याः । क त्रासयति
मृगं व्याधः धरति गृह्णाति
निराकरोति वा इत्यर्थः ॥
इतिदुर्गादासः ॥
त्रस ङ कि भासि । ङ
त्रंसते । कि त्रंसयति त्रं

सति । भासि दीप्तौ । इतिदु
र्गादासः ॥
त्रस य ई भये । य त्रस्यति ।
ई त्रस्तः । इतिदुर्गादासः ॥
त्रस ई ण भये । ई त्रस्तः ।
ण त्रेसतुः तत्रसतुः । त्रसति
इतिदुर्गादासः ॥
त्रिकटु क्ली मिलितशुंठीम
रीचपिप्पल्यः । तन्नामगुणाः
विश्वोपकुल्या मरिचंत्रयमेतत्रि
कटु कथ्यते । कटुत्रयंतु त्रिक
टु त्र्यूषणं व्योषमुच्यते ॥ त्र्यूष
णं दीपनं हंति श्वास कास
त्वगामयान् । गुल्म मेह कफ
स्थौल्य मेदः श्लीपदपीनसान्
इति भावप्रकाशः ॥
त्रिगुणा स्त्री दुर्गा । यथा । पदे
त्रिषु वेलिर्वेदो सामादित्रि
पदाथवा । उत्पत्तिस्थितिना
शेषु रजादित्रिगुणा मताः
इतिदेवीपुराणे ४५ अध्यायः
त्रिजटा स्त्री राक्षसीविशेषः
यथा । सीतां ताभिरनार्याभि
र्दृष्ट्वा संतर्जितां तदा । रा
क्षसी त्रिजटा वृद्धा वाक्यम
ब्रवीत् । इति रामायणे सु
न्दरकांडे २४ अध्यायः ॥

बिल्ववृक्षः। यथा। शृणु देवि
प्रवक्ष्यामि रहस्यं त्रिजटात्मकं।
पत्रं ब्रह्ममयं देवि प्रवृत्तं वर
वर्णिनि। श्रीशैलशिखरे जा
तः श्रीफलः श्रीनिकेतनः॥
विष्णुप्रीतिकरश्चैव मम प्रीति
करः सदा। ब्रह्मविष्णुशि
वाः पत्रे वृन्ते च शक्तिरूपिणी।
वृन्तमूले तु वज्रं स्यात् पत्रं ब्रह्म
शिवं प्रिये॥ एकं च त्रिजटा
पत्रं हरे वा हरिमर्चयेत्॥
कैवल्यं तस्य तेनैव शक्तिपू
जा विशेषतः॥ इति ज्ञान
भैरवतन्त्रे ९ पटलः॥
प्रस्तुत बिल्वशाखे द्रष्टव्यं॥
त्रिदशेश्वरी स्त्री दुर्गा। यथा
सुरेशा त्रिदशादेवानंदिनी
दुंदुभि सता। तेषांच वन्दि
नी नन्दी ईशत्वात् त्रिदशेश्व
री। इति देवीपुराणे ४५
अध्यायः॥
त्रिनयना स्त्री दुर्गा। यथा। प
शिवंग चोमरं लोकं तथात्र
स्नायतेपरं। नयं सत्काशेप
श्चितं दृष्टा त्रिनयना मता॥
इति देवीपुराणे ४५ अध्यायः
त्रिपत्रं क्ली दलत्रययुक्तबिल्व

पत्रे। यथा। विष्णुरुवाच
कुं हे पत्रे हरो ज्ञेयः पत्रेवा
मे विधिः स्वयं। अग्रे द
क्षिणपत्रे च त्रिपत्रदलमि
स्मृतं। इति बृहद्धर्मपुराणे बि
ल्वपत्रमाहात्म्ये ११ अध्यायः
त्रिपुरभैरवी स्त्री देवीविशे
षः। तन्मन्त्रादि यथा। भैरव्या
मंत्रमुख्येषु त्रिपुरायास्ततः
शृणु। तस्यास्तु सर्वमंत्राणि
त्रयोदशयुतानि वै। विंशति
स्तु सहस्राणि तत्राद्ये वाग्भवे
स्मृतं। द्वितीये कामराजाख्ये
मोहने च तृतीयके। आद्येषु
तेवाग्भवे तत्र चतुर्थं परिकीर्ति
तं। तेनबीजे द्वितीयत्वहितकं
वाग्भवेन तथा। आद्ये तत्पंच
मे प्रोक्तं चतुर्भिरपि चाक्षरैः
तेनबीजं द्वितीयं तु प्रथमे
परिकीर्तितं। द्वितीयं काम
राजं तु तृतीयं वाग्भवं तथा
पंचभि स्त्रिभिश्च यन्मंत्रं तत्ष
ष्ठे परिकीर्तितं। तेनबीजं द्विती
येन वाग्भवान्तेन सप्तमे। त
देवं वाग्भवाद्यं तु अष्टमं परिकी
र्तितं। वाग्भवं कामराजं चैव
ताभ्यां नवमं स्मृतम्॥

कामराजं तथैवाद्यं द्वितीयं चैव
मोहनं एकादशमिदं प्रोक्तं तदे
वाद्यं तु वाग्भवं द्वादशं कीर्तितं
मंत्रं षोडशं त्रिपुरं महत् तत्क्रम
तः त्रैपुरं मंत्रं शृणुष्वैकमनाः शि
वं प्रोतादि तस्य चाद्यादि वह्नि
बीजभवसंस्थितः आद्यं त्रिपुरभै
रव्या बीजमाद्यं प्रकीर्तितं उपा
न्त्यस्य तदादिस्थ व्यञ्जनाद्य वृषा
णकं चतुर्थस्वर बिन्दुयुक्तं
मेतत् द्वितीयकं उपान्त्यस्य तदा
दिस्थं वह्निः शेषस्वरस्तथा समा
सि बिन्दुसहितासंहितास्तु तृती
यकं एतत्तत्त्वं विजानाति योन
रो भुवि मानवः सिद्धविद्याधरे
भ्यश्च सोऽधिको मन्त्रयोगमहान्
एतत्त्रयोदश प्रोक्ता मंत्रा मंत्रे
षु चोज्ज्वलाः विंशतेस्तु सहस्रे
षु परा श्रेष्ठेत प्रकीर्तिताः विंश
तेस्तु सहस्राणामाद्यमेतत्
प्रकीर्तितं तस्याध्याने यथा
चतुर्भुजा रक्तवर्णा रक्तवस्त्रवि
भूषिता
रतिगाहे स्वजं बाधो विभ्रती
पुस्तकोत्तमं अभयं वामहस्
ताभ्यां वरं च दधती तथा॥

सहस्रसूर्यसंकाशां त्रिनेत्रां ग
जगामिनीं पीनोत्तुंगस्तनयु
गां स्मितप्रेतासनस्थितां स्मि
तशुभ्रवदनां सर्वालंकारसं
युतां तिसृभिर्मुण्डमालाभिः
शिरोवृतां कटीषु च त्रिगुणां
त्रिगुणीभूतैः प्रत्येकं परिभूषि
तां मदिराघूर्णनयनां रक्तद
न्तच्छदद्वयां चिंतयेत् सुरदां देवी
मेवं त्रिपुरभैरवीं इति कालि
कापुराणे ७७ अध्यायः त्रि
स्त्री देवीविशेषः तन्मंत्र।
ध्यानादिकं यथा शृणु तत्त्रि
पुरामूर्तेः कामाख्यायास्तु पू
जने एतस्या मूलमंत्रेण सर्व
सतन्त्रतन्त्रके श्रुवयोर्विषयोः
सम्यक् क्रमात्तु प्रतिपादितं
वाग्भवं कामराजेन डामरं
चेति तत्र ये सर्वधर्मार्थका
मादिसाधनं कुण्डलीयुतं त्री
नयस्मात् पुरतो दध्यात् दु
र्गाध्याता महेश्वरी त्रिपुरेति
ततः ख्याता कामाख्या काम
रूपिणी तस्यास्तु स्थापने या
दृक् कामाख्यायाः प्रकीर्ति
तं तेनैव स्थापनं कुर्यात्॥॥

मूलमंत्रेण साधकः त्रिको
णमंगुले चास्या स्त्रिपुरं त्रिरे
खकं मंत्रांतं अक्षरं ज्ञेयं तथा
रूपत्रयं पुनः त्रिविधा कुण्डली
शक्ति स्त्रिदेवानांच सृष्टये स
र्वत्रयं त्रयं यस्मात् तस्मात्तु त्रि
पुरा मता इदं तेन स्तवेन कृत्व
आद्यां मूर्त्तिं विचिंतयेत् त्रि
धावर्त्याथ हृदये तां मूर्त्तिं भू
रणभैरव सिन्दूरपुंजसंकाशां त्रि
नेत्रां तु चतुर्भुजां वामोर्द्धे पुष्प
कोदंडं धृत्वाधः पुस्तकं तथा द
क्षिणोर्द्धे पंचवाणान् तथा माला द
धत्यधः चतुर्णां कुणपानां तु पृ
ष्ठे न्यकुणपान्तरं निधाय तस्य
पृष्ठेन समपादेन संस्थिता
जटाजूटार्द्धचन्द्रेण समाबद्ध
शिरोरुहा नग्ना त्रिवलिभ
गेन चारुमध्या मनोहरा
सर्वालंकारसंयुक्ता सर्वांगसुन्द
री शुभा स्रवद्रुधिरसंदोहा
सर्वलक्षणसंयुक्ता एवंरूप
धरां ध्यात्वा त्रिधात्वानंच चि
न्तयेत् द्वितीयं त्रिपुरारूपं त
थैव तत्तृतीयकं आवाहनार्थं दे
व्यास्तु चिंतयेत् योनिमुद्रया ॥

बन्धूकपुष्पसंकाशां जटाजूटे
न्दुमंडितां सर्वलक्षणसंपूर्णां
सर्वालंकारभूषितां उद्यद्विम
लवस्त्रांपद्मपर्यंकसंस्थितां
मुक्तारत्नावलीयुक्तां पीनोन्न
तपयोधरां वलीविभंगचत्वा
मासुवामोदमोदितां नेत्राह्ला
दकरीं शुद्धां शोभनीं जगतां त
था त्रिनेत्रां योगनिद्राया मीष
द्धाससमायुतां नवयौवनसंपन्नां
मृणालाभचतुर्भुजां वामोर्द्धे पु
स्तकं धत्ते अक्षमालां तदक्षिणा
वामेनाभयदा देवी दक्षिणोर्द्धे
वरप्रदा प्रस्रवद्रक्तसूर्याभां
शिरोमालां तु बिभ्रती आपाद
लंबिनीं कल्पद्रुमसमाश्रयसं
स्थिता कल्पद्रुमदेवोपवना
तः स्थां कामाह्लादकरीं शुभां
द्वितीयां त्रिपुरां ध्यायेदेवं रूप
मनोहरां तृतीयं त्रिपुरां।
रूपं शृणु वेतालभैरव
जवाकुसुमसंकाशा सु
क्तकेशी वरानना
सदाशिवं हसंतं तं प्रेतवद्धि।
निधाय वै हृदये तस्य देवस्या।
कर्द्दपद्मासनस्थिता ॥

रक्तोत्पले स्मितश्रिता तु सगुणा
लां पद्मानुगां ग्रीवायां धारयं
तीं तु पीनोन्नतपयोधरां च
तुर्भुजां तथा नग्नां दक्षिणो
र्द्धे तु अक्षमालिनीं वरदां तद
धो वामे जगन्माया तथाभयं ॥
अस्तपुस्तकं धत्ते त्रिनेत्रां हसि
ताननां स्रवद्रुधिरभोगाक्तां
तथा सर्वांगसुन्दरी एवं विधं तृ
तीयं तु रूपं ध्यायेत् पूजकः
आद्यं तु वाग्भवं रूपं द्वितीयं का
मराजकं डामरे मोहने चापि
तृतीयं परिकीर्तितं एकैकं तु
त्रिरूपाणि प्राग्विचिंत्याथ सा
धकः मंत्रत्रयेण प्रत्येकं स
दिषोडशकैस्तथा पूजयेत्तु उप
चारैस्तु वह्निर्यहन्नथैवच इति
कालिकापुराणे ६२ अध्यायः
त्रिफला स्त्री मिलितसमभाग
हरीतकी विभीतकामलकीफ
लं तन्नाम गुणाः पथ्याविभी
त धात्रीणां फलैः त्रिफला।
समैः फलत्रिकं च त्रिफला
सा वराच प्रकीर्तिता त्रिफला
कफपित्तघ्नी मेहकुष्ठहरा स

रा चक्षुष्या दीपनी रुच्या विषम
ज्वरनाशिनी इति भावप्रकाशः
त्रिमधु क्ली ऋग्वेदैकदेशः त
द्व्रतं च तद्व्रताचरणेन यस्तदध्या
यी सोपि इति विज्ञानेश्वरः श्रा
द्धे त्रिचमधुश्राद्धोच्चारणविधि
यथा गायत्रीं त्रिःसकृद्वापि जपे
द्व्याहृतिपूर्विकां मधुवाता इति
त्र्यृचं मध्वित्येतत् त्रिकं जपेत्
इति श्राद्धतत्वे मिताक्षराधृतपा
रस्करवचनं त्रियुगः पुं विष्णुः
यथा इत्थं नृतिर्यगृषिदेवझ
षावतारैर्लोकान् विभावयसि
हंसि जगत्प्रतीपान् धर्मं म
हापुरुष पासि युगानुवृत्तं छन्नः
कलौ यदभवस्त्रियुगोऽथसत्वं
इति श्रीभागवते ७ स्कन्धे ९
अध्याये ३८ श्लोकः एकस्त्व
मेव इत्यादिभिः अष्टभिः श्लो
कैः षड्डक्तं प्रतिपादितेन र
त्नां तद्विपन्नवधस्व
सत्वेषाधितो
न स्वत इति तदुपसंहः।
रति ३४ मिति विभावय
सि पालयसि हंसि घातयसि

कलौ तत्तत्रकारोसि यतस्तदा त्वं
छन्नोऽभवः यतस्त्रिष्विव युगेष्वा
विर्भावात् स एवं तत्त्वं त्रियुग
इति प्रसिद्धः इति तट्टीकायां
श्रीधरस्वामी त्रिलोचनाष्टमी स्त्रीगौणा
चान्द्रज्यैष्ठकृष्णाष्टमी यथा ज्यैष्ठमासि
नृपश्रेष्ठ कृष्णाष्टम्यां त्रिलोचनं
यः पूजयति देवेशमीशलोकं
स गच्छति इति संवत्कौमुदी
धृतभविष्यपुराणवचनं अपि
च ज्यैष्ठमासस्य सिते पक्षे अष्ट
म्यां च महेश्वरि शिवार्चने च
तल्लोकं लभते नात्र संशयः इ
त्युत्तरकामाख्यातंत्रे ११ पटलः
त्रिवलिः स्त्री
जठरावयवविशेषः यथा ना
भिः प्रदक्षिणावर्त्तमध्ये त्रिव
लिशोभने इति
गारुडे ६६ अध्यायः ॥
त्रिवलीवलयोपेता मित्या
दिजगद्धात्रीध्यानं
त्रिवृत् स्त्री लताविशेषः ते
उडी इति भाषा तत्
पर्यायः श्वेता २४ सारा
२५ इति
शब्दरत्नावली ॥

त्रिसंध्यव्यापिनी स्त्री त्रिसंध्या
घटकीभूतयावत्क्षणव्यापि
नी तिथिः यथा त्रिसन्ध्याव्या
पिनीया तु सैव पूज्या सदा ति
थिः न तत्र युग्मादरणं मन्यत्र
हरिवासरात् इति पराशरी
येण त्रिसन्ध्याव्यापित्वेन निय
माभिधानं तदपवादकं इति
तिथ्यादितत्त्वे तयो छेमसाम
ख्यापवादकं तदपवादकं
इति तत्तट्टीका.
त्रुट क म छिदि दैरंग
त्रुट य पि वर्गप्रथमादी
क म त्रोटयते य त्रुटति
त्रोटिष्यति तदायत्तगणस्यै
व कुटादित्वं मिच्युटति मिति
दिवादिपाठेन कुटादित्वं पित्रु
टति अत्रुटीत शेषस्तु विदीर्णी
भावेपि यथा त्रुसदीमधनुः
केवोरनिनद इति महानाके
मयूखे नखर त्रुटतिमिर कु
म्भिकुंभस्थले कृविलनीभावे
पि यथा आह्वाणे यदि वत
स्तुमतिवास सदा जघने इस
त्रुटदं इति दुर्गादासः त्रुत्र व
धे त्रुन्यति इति दुर्गादासः

त्रुन्क वधे त्रुन्तति इति
दुर्गादासः
त्रुप वधे त्रोपति इति दु
र्गादासः
त्रुफ वधे त्रोफति इति
दुर्गादासः ॥
त्रेतायुगं क्ली द्वितीययुगं
तस्योत्पत्यादि यथा कार्त्ति
कशुक्लनवम्यां सोमवारे त्रे
तायुगोत्पत्तिः तत्र अवतार
त्रयं वामन परशुराम श्रीरा
मचन्द्राः पुण्यं त्रिपादं
पापमेकपादं पुष्करनामकं
तीर्थं सात्त्विको ब्राह्मणाः अ
स्थिगताः मानवदेहः दशास
हस्रवर्षं परमायुः व्यवहा
र्यं रौप्यपात्रं तद्युगाब्दाः १२
९६००० तत्र राजानः सूर्यवंशी
य वाकुक सगर अंशुमत्
असमंजस दिलीप भगीरथ अ
ज दशरथ श्रीरामचन्द्र कुशी
लवा एते चक्रवर्त्तिनः तल्लक्ष
णं दानधर्म्मवता नित्यं तपस्या
तीर्थदर्शनं अग्निहोत्रपराश्चै
का राजानो यज्ञकारिणः तत्र
तारकब्रह्मनाम ॥

ऽण्णाः चतुर्दश हस्तपरिमितौ

रामनारायणानंत मुकुंद म
धुसूदन कृष्ण केशव कंसा
रे हरे वैकुंठ वामन इति मु
द्धांकितपंजिकातः संगृहीतं
त्रेतायुगाद्या स्त्री त्रेतायुगा
रंभतिथिः सा च कार्त्तिक
शुक्लनवमी तत्प्रमाणं यु
गाद्याशब्दे द्रष्टव्यं ॥
त्रै उ पालने दंत्यवर्गाद्या
दिः उ त्रायते चक्रिस्त्वा
हीत्यादौ चाहीति त्रायते
त्राविव पश्चात् त्राईवाच
रतीति कौमार्थ्यं केचिद
दादौ त्रापठन्ते इति क्रम
दीश्वरः इति दुर्गादासः त्रौ
क त्रु उ गत्यां चतुर्दशा
स्वरी रेफमध्यः त्रु अत्र
त्रौकत् उ त्रौकते इति
दुर्गादासः
त्र्यंबकः पुं शिवांशचन्द्र
शेखरनामक पौष्यराजपु
त्रः यथा एवं तिष्ठन्तं म
न्वानां गर्भजातो यतो दृशं
प्रतत्र्यंबकनामाभूत प्र
थितो लोकदेवयोः सराजपु
त्रः कौमारावस्थां प्राप य
दा तदा सर्वशास्त्रार्थतत्त्वज्ञो
जितो ॥

स्तस्यो बभूव दृढ वले वीर्य्ये
प्रहरणे प्राज्ञे शीले च तत
समः ~~प्राज्ञे शीले च तत समः~~
नाम्ना भूमृत्प्रवरो हलनोवा
भूमौ भविष्यति अभिषिति
अभिषिच्याथ तं राजा कुमा
रं वलवत्तरं दृष्ट्वा पंचैकवर्षीयं
सर्वराजगुणैर्युतं तिसृभिः स
ह भार्य्याभिर्वनं प्रोष्य विवेश
ह वृद्धो विलक्रियां कर्तुं राजा
परमधार्म्मिकः गते पितरि
राजा सवनवासं महावलः
सर्वोत्तिर्न्निवश्यचक्रे मात्स्यैः स
चन्द्रशेखरः सार्वभौमो नृप
भूत्वा राजभिः परिषेवितः अ
मरैरिव देवेन्द्रो विजहार स्थि
रायुतः एवं प्रोषस्ततो भूत्वा
त्र्यवकः प्राप्य निर्वृतिं अस्ता
वर्त्तोपाये रम्ये करवीराव्हये
पुरे दृषद्वतीनदीतीरे राजा
भूत्वा सुमोदह इति कालि
कापुराणे ४८ अध्यायः अ
त्यत चन्द्रशेखरस्य दृष्ट
व्य त्र्यवका स्त्री उ
मा यथा सोम सूर्य्याग्नि
ना स्त्रीणि यस्या नेत्राणि
त्र्यविका तेनसा त्र्यंव ॥ ॥

कादेवी मुनिभिः परिकीर्त्ति
ता इति देवीपुराणे ४५
अध्यायः ॥
त्र्यैहिकः त्रि दिनत्रयनिर्वा
होचितधनयुक्तः यथा कु
सूलधान्यको वास्यात् कु
म्भीधान्यक एव वा त्र्यैहिको
वापि भवेदश्वस्तनिक एव वा
इति मानवे ४ अध्याये ७ श्लो
कः कुसूलधान्यक इति कु
सूलो व्रीह्यागारे स्यादित्य
भिधानिकाः इष्टकादिनिर्म्मि
तागारधान्यसंचयो भवेत अ
त्र कालविशेषापेक्षायां
स्य त्रैवार्षिकं भक्तं पर्य्याप्तं भृ
त्यवृत्तये अधिकं वापि विद्ये
त स सोमं पातुमर्हति
इति मनूक्त एवकालो ग्राह्यः
तेन नित्य नैमित्तिक धर्म्मकृ
त्यपोष्यवर्गसहितस्य गृहिणो
यावता धान्यादिधनेन वर्षत्र
य समधिकं वा निर्वाहो भवति
तावद्धनः कुसूलधान्यक उच्य
ते वर्षनिर्वाहोचितधान्यादिधनः
कुम्भीधान्यः प्राक सोमिकीं क्रि
यां कुर्य्यात् यस्यान्नं वार्षिकं भ
वेदिति या ॥

ज्ञवल्क्येन गृहस्थस्य वार्षिक
संचयाभ्यनुज्ञानात् मनुरपि
यदा वानप्रस्थस्यैव समानीच
य एव वेत्यनेन समासंचयं व
क्ष्यति तदपेक्षया बहुपोष्यव
र्गः सगृहिणः समुचितः सं
वत्सरसंचयः मेधातिथिस्तु
यावता धान्यादिधनेन बहुभृ
त्यदारादिमतः त्रिसंवत्सर
स्थितिर्भवति तावत् सुवर्णा
दिधनवानपि कुसूलधान्यक
इत्यभिधाय कुम्भी उष्ट्रिकाप्रमा
णिकधान्यादिचयः कुम्भीधान्य
क इति व्याख्यातवान् गोवि
न्दराजस्तु कुसूलधान्यक इत्य
त्र द्याचत्स कोष्ठप्रमाणधान्य
संचयो वा स्यात् द्वादशाहमात्र
पर्य्याप्तधनः कुम्भीधान्यक इ
त्यत्राप्युष्टे उष्ट्रिकाप्रमाण
धान्यादिसंचयो वा षडहमा
त्रपर्य्याप्तधनः द्वादशाहं कु
सूलेन वृत्तिः कुम्भी दिनानि ष
ट् इमा समूला गोविन्दराजो
क्तिं नानुरुन्धहे कुत्रा चेष्टात
सम्भवे ऐहिके अत्र पर्य्याप्तमै
हिकं धनं यस्य स त्र्यैहिकः तथा
वास्यात् दिनत्रय निर्वाहोचितध

न इत्यर्थः स्त्रीभवे स्वस्तने मरस्मा
स्तीति मनवधेय मिके कृत्वान
न्नसमासः तथावा भवेदिति कु
ल्लूकभट्टः ॥
त्र्याश्रयाः पुं अन्धवधिरमूकाः
यथा अत्रोक्तानि वचनानि स
र्वाणि तिर्य्यगधिकरणान्यायमू
लानि तथा हि तिर्य्यगधिकर
णे तिर्य्यक् पंग्वाश्रयेय देव
तानामनधिकार इति यागमा
त्रे उक्तं तत्र हेतवः तिरश्चो
विधिश्रोतःकरणविरहात
पंगोः प्रचरणविरहात् त्र्या
षेयाणामन्धवधिरमूका
नामवेक्षणश्रवणोच्चारण
विरहादिति श्रीचन्द्रशेखरवा
चस्पतिकृत चन्दनधेनुविधि
धृत तिर्य्यगधिकरणं ॥
त्वग्दोषः पुं त्वग्जातरोगः ना
स्योषधं यथा मन्दोग्नलोभ्रमी
रान्तर्गतं कनकस्य च तेनो
द्वर्त्तितदेहस्य दूरे कुष्ठप्रम
र्दिका त्वग्दोष स्त्वचेकस्य ष
मिदोषस्य नश्यति इति गारु
डे १९४ अध्यायः सर्वमहा
रोगाः यथा महारोगिणां पा
परोगाष्टकाय ॥

तमरोगवतः ॰ते च उन्माद
त्वग्दोषो राजयक्ष्मा श्वासो म
धुमेहो भगन्दरः उदरो ऽश्म ॥
री इत्यष्टौ पापरोगा नारदो
क्ताः इति स्मृतितत्त्वं
त्वच् ए वृत्त्यो वकारयुक्तः
दन्त्यवर्गाद्यादिः पात्वचत्ती
त्वचंती वृतिः संवरण त्वच
ति कवचेन देहं वीरः
इति दुर्गादासः
त्वन उ इत्यो वकारयु॒
क्तादिः उ त्वेचित्वा त्वक्त्वा ॥
इति गतिः इति दुर्गादासः
त्वर ञि ष मं ङ स्पर्शेञि
त्वरितः तूर्णः क्ति वारूथा
म झष त्वर संभ्रुषाक्वनिभ्यो
निष्ठायां वेमत्वोपि वेदेष्वेषा
स्याभेदार्थ मेतदनुवन्ध म
न्ये मन्यते षत्वरा मत्वरयङ
त्वरते स्यदरुह यौम्र मनुष्या
नं वानुनेत्र मक्षला स तत्त्व
रे इति दुर्गादासः ॥
त्वद् त्वचो ग्राहे
त्वचो ग्राहस्संवरणो ग्रहणो त्व
द् त्वचने इति
प्राचः त्वचने संवरणमिति
रमानार्थः त्वक्ति कार्यं ॥ ॥

वर्मणा भटः इति दुर्गादासः
त्वक्ष ऊ कार्श्ये ऊ त्वक्षिष्यति
त्वक्ष्यति कार्श्यं कृशकरणं
त्वक्ष्णोति काष्ठं तक्षा इति
दुर्गादासः ॥
त्वष्टी स्त्री दुर्गा यथा त्वष
त्वष्टो स्वतो धातु स्तस्य त्वष्टी
निपातने सृजत्येषा प्रजास्त
ष्टी त्वाष्टी तेन मकीर्तिता इ
ति देवीपुराणे ४५
अध्यायः
त्वाष्ट्री स्त्री त्वष्टुः स्यपत्यं त
ष्टृ शब्दात् स्यप्रत्ययेन निष्पन्ना
त्विष ञौ ज भासे ञौ अत्वि
षत् ञ त्वेषते त्वेषते भासो
दीप्तः अवास्त्रिवासे
दानेच त्विषौ ञ अनुवर्त्त
ते ञौ अवात्वित्सत् ञ अ
निवसति ददाति दीप्यते ञ
नोनिवसति ददाति दीप्यते
वा इत्यर्थः इतिदुर्गादासः
त्सर छद्मगतौ दन्त्यवर्गाद्य
स्याधोदन्त्यसकारः त्सरति
धूर्तः छलेन गच्छतीत्यर्थः
इति दुर्गादासः ॥

थ थकारः अस्य ध्यानादि
यथा नीलवर्णां त्रिनयनां
षड्भुजां वरदां परां पीतव
स्त्रपरीधानां सदा सिद्धिप्रदा
यिनीं एवं ध्यात्वा थकारंत
तन्मंत्रं दशधा जपेत् गंच
देवमयं वर्णं पंचप्राणमयं
सदा तरुणादित्यसंकाशं थ
कारं प्रणमाम्यहं इति वर्णो
द्धारतंत्रे अस्य नामानि यथा
थः स्थिरामी महाग्रंथिर्ग्रंथि
ग्राहो भयानकः पिली शिरसि
जो दंडी हकाली भिल्लोच्चयः
कृसो वुद्धि छिकर्मा च दलना
णाधिपोऽमरः वरदा भोगदा
केशो वामजानु रक्तोऽ
नलः लोलो
जज्जयिनी गुरुः पारब्रह्मवि
दारकः इति नानातंत्रशा
स्त्रे थुड पि सं वृत्तौ भिथु
डति अथुडीत् तथोड
इति दुर्गादासः
थुर्व ई वधे पंचमस्व
री थूः थुरौ थुरः ई थूर्णः
इति दुर्गादासः
थुर्वण क्ली हननं थुर्वधातो
र्भावे अनादि निष्पन्नं ॥ ॥

दकारः अस्य ध्यानादियथा
ध्यान मस्य दकारस्य वक्ष्यते
शृणु पार्वति चतुर्भुजां पीत
वस्त्रां नवयौवनसंस्थितां अ
नेक रत्न घटित हार नूपुर शो
भितां एवं ध्यात्वा दकारंत
तन्मात्रं दशधा जपेत
कुंडलिमहितं देवि त्रिविन्दु
सहितं तथा आत्मादितत्त्वसं
युक्तं दकारं प्रणमाम्यहं
इति वर्णोद्धारतंत्रे अस्यना
मानि यथा दोऽ द्रीणोधात
किर्धाता दाता दलं कलत्रकं
दीनं ज्ञानेच दानेच भक्ति दा
दवनी धरा स्वसुम्नायोगिनी
सद्यः कुंडलो वाम गुल्फकः
कात्यायनी शिवा दुर्गा लज्जा॒
नानात्रिकंडकी स्वस्तिकः कु
टिलारूपः कुम्भकर्णोमाजि
तेन्द्रियः धर्म शुद्धामदेवस्य
भ्रमा वकुमचंचला दरिद्रा
परमन्त्रोच दत्तपाणि स्त्रिरेव
कः इति नानातंत्रशास्त्रे द
य ई त्यागे अवने ई द
यते अवनं रक्षणं इति दु
र्गादासः ॥

दव न द्यातने न दद्ध्याति दव
दव द्याते इति जौमराः
पठंति तेन नदर्थ वत्यन मे
वोचितं ततश्च द्यातन मिति
हत्यर्थस्य पातिकचुरादित्वेन
स्वार्थे णौ रूपं हनन मित्य
र्थः किंच हिंसन पाठेनैवे
ष्टसिद्धे द्यातनपाठेनैवेष्ट
सिद्धे द्यातनपाठो हिंसाप्र
कारार्थः स्यात् वेति का
कदंतावेषणावद्विफलं त्वया
णामेव कातंत्राद्यसम्मतत्वा
त् इति दुर्गादासः ॥
दंड न क तत् पाते तत्
पात स्त्रीदंडपातनं क दंडय
ति दंडापयति अपराधिनं
राजा इति दुर्गादासः ॥
दंडनीतिः स्त्री दुर्गाव्याख्या
नयानयगता लोके विकल्प
निलयामला दंडनाकृष्यमाहा
पिदंडनीति रिति स्मृता इति
देवीपुराणे ४५ अध्यायः द
त्तकः पु द्वादशविधपुत्रान्तर्गत
पुत्रविशेषः सपिंडदत्तकस्य
अशौचव्यवस्था यथा सपिंड
स्य पुत्रीकरणे तु सपिंड
मरणादिनिमित्ते दत्तकस्य
तन्मरणादिनिमित्ते सपिंडानां

दशरात्र मेव निर्विवादं
इति अनंतभट्टकृतदत्तककौ
तिः औरसपुत्रेण सहतस्य
समभागित्वे यथा दत्तपुत्रे यथा
जाते केदाचित्तौ रसो
भवेत् पितृ वित्तस्य सर्वस्य
भवेतां समभागिनो इत्यपि
वचनं शूद्रविषयं इति
दत्तकचन्द्रिका अन्यत्
पोषणपुत्रशब्दे द्रष्टव्यं ददड
दाने धृतौ उ ददते इति
दुर्गादासः
दद्रुः पुं रोग विशेषः त
स्यौषधं यथा विडंगैडगजा
कुष्ठ निशा सिन्धूत्थ सर्षपैः
मूत्राम्बुपिष्टौ लेपोऽयं दद्रु
कुष्ठविनाशनः अपुन्नाडस्यवी
जानि धात्री सर्जरसः स्नुही।
सौवीरपिष्ट दद्रूणामेतदुद्व
र्तनं परं आरग्वधस्य पत्राणि
आरनालेन पेषयेत् दद्रु
किटिभ कुष्ठानि हंतिसि
ध्मानमेवच इति गारुडे १७५
अध्यायः पक्वस्य त्रिफला
भाग स्तथा भागद्वयंपिव
सोमराजस्य वीजानांजयं
पथ्याचदद्रुणत् अंकुतक्र

सगोमूत्रं कथितं लवणा
ब्धि कांस्यपृष्ठे खरं लेपात्
कुष्ठदद्रुविनाशनं हरिद्राह
रितालंचदूर्वा गोमूत्र सैन्धवं
अयंलेपो हन्ति दद्रु पामानं वै
गरं तथा इति गारुडे १९४ अ
ध्यायः मरीचं त्रिवृतं कुष्ठं ह
रिताल मनःशिला देवदारुह
रिद्रे द्वे कुष्ठं मांसी च न्दनं वि
शाला करवीरंच अर्कक्षीरं
शकृत् पलं पथ्याच कार्षिको
भागो विषस्यार्द्धपलं भवेत्
प्रस्थं कटुकतैलस्य गोमूत्रे
द्विगुणे पचेत् मृत पाकेलो
हपात्रे वा पाने मृद्वग्निनाप
चेत् पामा विचर्चिका चैव
मद्रु विस्फोटकानि च अभ्य
स्यते अथ वारनियमः रविवा
रे भवेद्वित्तं सोमे शान्तिर्भवेत्
किलाआयुरंगारके इति त
त्र दीक्षां विवर्जयेत् बुधे सौ
न्दर्य्य माप्नोति ज्ञानं स्याद् वृह
स्पतौ शुक्रे सौभाग्यमाप्नोति
यशोहानिः शनैश्चरे अथति
थिनिर्णयः आगमकल्पद्रुमे
प्रतिपदि कृता दीक्षा ज्ञानना
शकरी मता द्वितीयायां मुति
र्भवेत् चतुर्थ्यां वित्तनाशः
स्यात् पंचम्यां बुद्धिवर्द्धनं ष
ष्ठ्यां ज्ञानक्षयं सौख्यं लभते
सप्तमीदिने अष्टम्यां बुद्धिना
शः स्यात् नवम्यां ।

वपुषः क्षयः दशम्यां राजसौ
भाग्यमेकादश्यां शुचिर्भवेत्
द्वादश्यां सर्वसिद्धिः स्यात् त्र
योदश्यां दरिद्रता तिर्य्यग्योनि
श्चतुर्द्दश्यां हानिर्मासावसा
नके पक्षान्ते धर्मवृद्धिः स्यात्
अस्वाध्यायं विवर्ज्जयेत् सन्ध्या
गर्जितनिर्घोष भूकंपोल्कानि
पातने एतान्यन्यांश्च दिवसा
न् कल्मषान् परिवर्ज्जयेत्
द्वितीया पंचमी चैव षष्ठी चै
व विशेषतः द्वादश्यामपि क
र्तव्यं त्रयोदश्यां सुधा- शिवा
इति यत् त्रयोदशीविधानं त
द्विष्णुविषयं रामार्च्चनचन्द्रिका
धृतत्वात् पंचमी सप्तमी षष्ठी
द्वितीया पूर्णिमा सिता त्रयो
दशी च दशमी प्रशस्ता सर्वका
मदा इति सनत्कुमारवच
नाच्च शिवविषये सप्तम्या नि
षेधमाह शुक्लपक्षस्य दश
मी सप्तमी च विशेषतः नि
द्या सदैव षष्ठी स्यादिति यो
वागमान्तरे
अथ नक्षत्रनिर्णयं अश्विन्यां
सुखमाप्नोति भरण्यां मर
णं ध्रुवं कृत्तिकायां भवेद्दुःखी
रोहिण्यां वाक्पति भवेत् ॥

मृगशीर्षे सुखावाप्तिरार्द्रायां
बन्धुनाशनं पुनर्वसौ धनाढ्यः
स्यात् पुष्ये शत्रुविनाशनं अ
श्लेषायां भवेन्मृत्युर्मघायां दुः
खमोचनं सौन्दर्य्यं पूर्वफल्गु
ण्यां प्राप्नोति च न संशयः
ज्ञानं चोत्तरफल्गुण्यं हस्तायां
च धनी भवेत् चित्रायां ज्ञा
नसिद्धिः स्यात् स्वात्यां शत्रुवि
नाशनं विशाखायां सुखवा
नुराधायां बन्धुवर्द्धनं ज्येष्ठा
यां सुतहानिः स्यात् मूलायां
कीर्तिवर्द्धनं पूर्वाषाढोत्तराषाढे
भवेतां कीर्तिदायिके श्रवणा
यां भवेद्दुःखी धनिष्ठायां दरि
द्रता बुद्धिः शतभिषायां स्यात्
पूर्वभाद्रे सुखी भवेत् सौख्यं
चोत्तरभाद्रे च रेवत्यां कीर्तिव
र्द्धनं आर्द्राकृत्तिकयोर्निषेधस्तु
शिवतन्त्रान्तरविषये तथा च आ
र्द्रायां कृत्तिकायां च मंत्रारंभः
प्रशस्यते यदीशस्य कृशानोर्वा
मंत्रारंभो यथाक्रमं तन्त्रान्तरे
अश्विनी भरणी स्वाती विशाखा
हस्तभेषु च ज्येष्ठानुराधयोश्चै
व कुर्यान्मंत्राभिषेचनं
इति ज्योषाभे ॥

रणे यद्विधानं तत्सम्बविषयं
आगमस्य संहितोक्तत्वात्
अथ योगादिनिर्णयो विष्क
म्भे शुभः सिद्ध्याख्या पुष्का
नु ध्रुवयोगस्ततः परं प्रीतिः
सौभाग्ययोगश्च वृद्धियोगस्त
तः परं हर्षणश्च तथा योगः
सर्वमंत्रशुभावहः रत्नावल्यां
योगश्च प्रीतिरायुष्मान् सौभा
ग्यः शोभनो धृतिः वृद्धि ध्रुवः
सुकर्म्माच साध्यः शुक्रश्च ह
र्षणः वरीयांश्च शिवः सिद्धो
ब्रह्म इन्द्रश्च षोडश अथ क
रणनिर्णयः ववबालव कौल
व तैतिल गर वणिज स्तत
नरं करणानि शुभान्येव सर्वतं
त्रेषु भाविनि अथ लग्ननिर्ण
यः वृषे सिंहे च कन्यायां धन
मीनाख्यलग्नके चन्द्रताराऽनुकू
ले च कुर्य्याद्दीक्षामवर्जितं न
था स्थिरलग्ने विष्णुमन्त्रे शिव
मन्त्रे चरं शुभं द्विःस्वमंत्रे शिव
मंत्रे चरं शुभं द्विःस्वभावगतं
लग्नं शाक्तिमंत्रेषु प्रशस्यते अगस्त्य
संहितायां त्रिषडायगताः पापाः
शुभाः केन्द्रत्रिकोणगाः दीक्षा
यां तु शुभाः सर्वे दुःस्थाः सर्वेना
शकाः अथ पक्षनियमः शुक्ले

पक्षे भवेद्दीक्षा कृष्णेप्यापंचमा
द्दिनात् निषिद्धेष्वपि मासेषु
विशेषो मुनिभेदतः रत्ना
वल्यां षष्ठी भाद्रपदे शु
तथा कृष्णचतुर्दशी कार्त्ति
के नवमी शुक्ला मार्गे शु
क्ला तृतीयिका पौषे तु नव
मी शुक्लामा चतुर्थिका फा
ल्गुने नवमी शुक्ला चैत्रेकाम
चतुर्दशी वैशाखे चाक्षयाचे
ज्येष्ठे दशहरा तिथिः आ
षाढे पंचमी शुक्ला श्राव
णे -- कृष्णपंचमी एतानि
देवपर्वाणि तीर्थकोटिफ
लं भवेत् अत्र दीक्षा प्रकर
णे नमासश्च परीक्षयेत् न
तारं न च ~~भार्गवे~~ जन्मभ
न तंत्रे न तिथ्यादिक हर्षणं
न योगा करणं चैव शंकरेण
च भाषितं अन्यच्च मतं चैत्रे
त्रियोदशी शुक्ला वै शाखे
कादशी सिता ज्येष्ठे चतुर्द
शी कृष्णा आषाढे नागपंच
मी श्रावणे कादशी भाद्रे रोहि
णीसहिताष्टमी आश्विने च
महापुण्या महाष्टम्यभीष्ट
दा कार्त्तिके नवमी शुक्ला मार्ग
शीर्षसिते तथा षष्ठी चतुर्दशी
पौषे माघे प्येकादशी सिता फा

ल्गुने च सिता षष्ठी चेति का
लविनिर्णयः योगिनीतंत्रे अ
यने विषुवे चैव ग्रहणे चन्द्र
सूर्य्ययोः रविसंक्रान्तिदिवसे
युगाद्यायां सुरेश्वरि मन्वंतरा
सु सर्वासु महापूजादिने तथा
चतुर्थी पंचमी चैव चतुर्दश्य
ष्टमी तथा तिथयः शुभदाः
प्रोक्ता दीक्षाग्रहणकर्म्मणि इ
त्यादिवचनात् चतुर्दश्यष्टमी
ति शाक्तविषये चतुर्थीति ग
णेशविषये तत्तत्कल्पोक्तत्वा
त् निन्दितेष्वपि मासेषु दीक्षोक्ता
ग्रहणे शुभा सूर्य्यग्रहणका
लस्य समानो नास्ति भूतले विशे
षतो महादेवि दीक्षाग्रहणकर्म
णि तत्रयद्यत् कृतं सर्वमनं
तफलदं भवेत् रविसंक्रमणेचै
व सूर्य्यस्य ग्रहणे तथा तत्र
लग्नादिकं किंचिन्न विचार्य्यंक
यंचन रविसंक्रमणे चैवनान्य
दन्वेषितं भवेत् न वारतिथि
मासादि शोधनं सूर्य्यपर्वणि प
वं चन्द्रग्रहणेपि तथाकृष्णाम
ले न कुर्य्याद्वह्निकीं दीक्षां सु
परके विभावसौ न कुर्य्याद्देशिको
तंत्रे यदि चन्द्रम ॥

सोग्रहः एतच्च गोपाल श्री
विद्येतरविषयं अन्येषु पु
ण्ययोगेषु ग्रहणे चन्द्रसू
र्य्ययोरिति गौतमीयात् सू
र्य्यग्रहणकाले च नान्यद
न्वेषितं भवेदिति योगिनी
हृदयाच्च ताराद्यौ तु विशेषो
यथा दीक्षाकाले प्रवक्ष्यामि
नीलतंत्रानुसारतः कृष्णप
क्षे चाष्टम्यां शुभे लग्ने शुभे
दिने पूर्वभाद्रपदा युक्ते सि
तताराधि संयुते अथ वा अ
नुराधायां रेवत्यां वा सप्तमस्य
ने जानीयाच्छोभनं कालं सं
वत्सं ग्रहणं प्रति देव चैव
विशेषेण कार्त्तिके च विशेष
तः यामले श्रीपरा कालीवि
ज्ञानलोपो दोषश्च योमतः
सूर्य्यस्योपग्रहे तद्वत् तत्सम
क्ति फलप्रदः अमावास्या सो
मवारे भौमवारे चतुर्दशी अ
ष्टमी रविवारे च सूर्य्यपर्व
भवेत् सप्तमी कुलार्णवे सप्तमी
रविवारे च सोमे दर्शस्तथैव
च चतुर्थी कुजवारे चाष्टमी च
बृहस्पतौ देवपर्वसमाह्वया ता
सु दीक्षां समाचरेत् ॥

यामले पुण्यतीर्थे कुरुक्षे
त्रे देवीपीठचतुष्टये प्रयागे
श्रीगिरौ काश्यां कालाकालं
न शोधयेत् विश्वयामले दे
देवीवेधं समारभ्य यावत्
स्यान्नवमी तिथिः कृतात्
स्तु बुधै दीक्षा सर्वाभीष्टफ
लप्रदा मुक्तपते विशेषेण
तत्रापि तिथि रष्टमी तत्रापि
शारदी दुर्गा यत्र देवी गृहे
गृहे तत्र दीक्षा प्रकर्त्तव्या मा
सर्त्वादीन्न शोधयेत् तथा बो
धनेचैव दुर्गायाः कालाकालं
न शोधयेत् अशोकाख्या
ष्टमी यत्र रामाख्या नवमी
तथा लग्ने वाम्पद्म वालग्ने य
त्रस्यात्तिथि रष्टमी गुरो रास्ता
नुरूपेण दीक्षा कार्य्या विशेष
तः समयाचारतंत्रे युगाद्यायां
जन्मदिने विवाहदिवसे तथा
विषुवायनयो र्दिनेन्दुनैव किं
चिंद्विचारयेत् तथा शिष्या
नाद्दृष्य गुरुणा कृपया दी
क्षीयते यदा तदा लग्नादिकं
चिन्न विचार्य्यं कथंचन सर्व
दारा ग्रहा सर्वे नक्षत्राणि च रा
शयः यस्मिन्नहनि संतुष्टो गुरुः सर्वे

शुभावहा सारसंग्रहे
योगिनीतंत्रे च ग्रहणे च म
हातीर्थे नास्ति कालस्य नि
र्णयः गयायां भास्करक्षेत्रे वि
रजे चन्द्रपर्वते चट्टले च मतं
गे च तथा कन्याश्रमेषु च त
त्क्षणे यानतो दीक्षां तीर्थक्षे
त्रेषु पार्वति वाराहीतंत्रे सुक्षे
त्रे स्तो यदि वा वृद्धो गुरोरि
च्छो भवेद्यदि मेघच्छादिक
सिद्धेषु तदा दोषो नविद्यते
महाविद्यासु सर्वासु कालादि
विचारो नास्ति तदुक्तं मुंड
मालातंत्रे कालादिशोधनं
नास्ति नचामित्रादि दूषणं
अत्र मालानिर्णयो मालाया
हृदृष्टव्यः पुरश्चरणपरिशि
ष्टे तच्छेहे द्रष्टव्य कलावती
दीक्षा कलावतीपाठे द्रष्ट
व्या अथ पंचायतनी दीक्षा
यामले भवानीत्व यदा मध्ये
पैशान्या मच्युतं यजेत् आग्ने
यां पार्वतीनाथं नैरृत्यां गण
नायकं वायव्यां तपनं चैव पूजा
क्रम उदीरितं यदा तु मध्ये गो
विन्दं पैशान्यां शंकरं यजेत आ
ग्नेय्यां गणना॥ ॥

यं च नैरृत्यां तपनं तथा वा
यव्यां मंबिकां चैव भोगमोक्ष
कभूमिकां शंकरं च यदा स
विं पैशान्या मच्युतं च यजेत्
आग्नेय्यां तपनं चैव नैरृत्या
गणनायकं वायव्यां पार्वतीं
चैव स्वर्गमोक्षप्रदायिनीं आर्त
च यदा मध्ये पैशान्यां शंकरं
यजेत् आग्नेय्यां गणनाथं च
नैरृत्यां केशवं यजेत् वाय
व्यां मंबिकां देवीं स्वर्गसाधनभू
मिकां गणनाथं यदा मध्ये पै
शान्यां केशवं यजेत् आग्ने
य्यां मीश्वरं चैव नैरृत्यां तपनं
तथा वायव्यां मीश्वरीं चैव पू
जयेन्मोक्षसाधनीं स्वस्थानवर्जि
ता देवा दुःखशोकभयप्रदाः
तथा च गणेशविमर्शिन्यां शं
भौ मध्यगते हरीनहरभू देव्यो
हरौ शंकरे भास्वनागजा तारवो
हर गणेशाब्जा विकाः स्थापिताः
देव्या विस हरैकदंतरवयो लं
बोदरे ऽजेश्वरेनार्याः शंकरभा
गतेऽ स्तिश्चखदा व्यस्तास्त ते
हानिदाः रामसेनचन्द्रिकायां
गौतमी येच यदा तमध्ये॥ ॥

गोविंदं आग्नेय्यां गणनायकं
नैरृत्यां हूम मभ्यर्च्य वायव्या
मर्च्चयेच्छिवां पैशान्यां शंकरं
चैव भोग मोक्षफलप्रदं इ
ति यदंगदेवतायाः पूजने आ
ग्नेय्यादौ गणेशादिपूजन मु
क्तं तद्राम गोपालविषयमि
ति केचित् वस्तुतो वैकल्पि
क मिति सम्प्रदायः
एतेषां पूजनं तु गौतमीयो
क्तन्यादिभि र्ध्यात्वाभ्यर्च्य षडंगा
छेन मेव च विशाकृत्वा तपेत्मं
त्रेनमस्कृत्य समापयेत् अंग
देवता पूजा कालस्तु पीठपूजा
नंतरं तथा च सनत्कुमारतं
त्रे पीठस्यार्च्चन मंगदेवयजनं मा
णप्रतिष्ठा तथा आवाहनं निज
मूद्रिका विरचनं ध्यानं प्रभोः
पूजनं यत्र देवे पुष्पांजलिं
दत्वा अंगदेवान् समर्च्चयेत्
तत्र प्रतिष्ठितयंत्रादिविषयं
यंत्रातिरिक्ताधारे पूजने त
कुलावस्था एकपीठे पृथक्
पूजां विनाशं करोति यः अंगागि
ने परिवारस्य देवता पापमाप्नुया
त् एवं च आवाहनदेवता मन्याम

र्थ्यन्तं स्वस्वदेवतां उभाभ्यां ल
मन्ते प्रणवं मन्त्री तल्लदम्भ
तिः तदेतदतिरिक्तविषये स
र्वेषां मन्त्रमन्त्राणां सिद्धादि
विचारो नास्ति तथा च सिद्धा
दिशोधनं तेषां अंगत्वेन स
तिराजवत् एकमात्रैत्र पंचा
यतनाभावः तथा च रुद्रया
मले एकमात्रायां भैरवीता
रा छिन्नमस्तासु भैरवे मंत्रे
शोधे तथा रौद्रे पंचांगेने
ष्यते बुधैः उपविद्यास्तु स
र्वास्तु षट्कर्मादिषु साध
नेनात्र दीक्षाद्यपेक्षास्ति ना
त्रोगादिसम्बन्धनं तत्त्वसारे उ
पविद्यासु सर्वासु तथा प्रयो
गसाधने दीक्षां विनैव कर्त्त
व्य उपदेशः सदैव हि
तथा संक्षेपदीक्षा मूहूर्ति स
र्वतोभद्रे नवं कुंभं निधाय च
सोदकं गन्धपुष्पाभ्यां मर्च्चितं च
सुसंयुतं सर्वौषधिनवरत्न पंच
पल्लवसंयुतं तन्मो देवाह्वानं कुलाक्र
मेदक्षो संपातं पंचपल्लवमिति प
नसाम्राश्वत्थवटवकुलानि तथा
च वाशिष्ठे पनसाम्रं तथाश्वत्थं व

दं वकुलमेवच पंचपल्लवमि
त्युक्तं मुनिभिस्तंत्रवेदिभिः न
रत्नमिति मुक्तामाणिक्यवै
दूर्य्यं गोमेदान् वज्रविद्रुमौ
पद्मरागं मरकतं नीलंचेति
तथाक्रमात् निवन्धिशिष्यं
स्थलेकृते वेद्यां सुपारिमृष्टे
प्रायेत्न मंत्रितं मोक्षणीतोयैः
शांतिकुंभजले स्नात्वा मूलमं
त्रेणाष्टधा तं मंत्रितं रभिषेच
येत् अष्टधा तं अघोरमंत्रेणा अ
घ संपादयेन्मंत्रं हस्तं शिरसि
नि धारयन् समोक्षितमातनान्
दद्यात् ततः शिष्योऽर्च्चयेद्गुरुं
यथाशक्तिदक्षिणां भवैव सम्यक्
साक्षात् तदंगुष्ठाग्रकरे मूलेन
शिरसि करं निधाय अष्टवारा
न् कर्णे जपेत् तथा च तत्रा
प्यशक्तः कश्चिद्देवज सम्यग्
साक्षात् तदंगुष्ठाग्रपिचव्याप्तवा
रे मूलेन केवलं निधायाष्टोत्त
रेण कर्णे उपदेशोत्वयं विधिः इ
ति संक्षेपदीक्षा उपदेशानन्तरमा
विस्तारे चन्द्रसूर्य्यग्रहे तीर्थे सि
द्धक्षेत्रे शिवालये मंत्रमात्रप्रक
थनमुपदेशः स उच्यते विस्तारे
महा ॥

दीक्षा तथा दीक्षा उपदेशस्तु तं
परं युगेयुगे च कर्तव्या उपदेशः
कलौ युगे इति कुलानन्दकृत
तंत्रसारः दीक्षितः पुं अवभृथः
इत्यमरः प्रधानयागो दीक्षा त
स्या अन्तः समापको योऽपरो
यज्ञो न्यूनत्वादिदोषशान्त्यर्थं प्र
धानयागस्य पूरणार्थं प्रतिष्ठा
र्थं क्रियते सोऽवभृथ उच्यते
अवदीक्षितं विभर्त्ति पोषयतीति
नाम्नीति थक् यज्ञावशेषस्ना
नेऽयत् तदेवावभृथं विदुरि
ति त्रिकाण्डशेषः यज्ञान्ते तम
वभृथाभिषेकस्नानमिति रत्नुः
इत्यमरटीकायां भरतः ॥
दीक्षितः त्रि सोमपानवि
शिष्टयागकर्त्ता ॥
यथा स सोम
वेनैः दीक्षितः इत्यमरः
सत्रनी सोमपानवति मा
धरे यजमानः सन् दीक्षित
उच्यते अन्यत्र तु उपचारात्
दीक्षितः मौंज्युपनयनं चेत्ता
देशेषु उक्तः दीक्षाशब्दादितो
वा इतिनु टीकायां भरतः
गुरुमुखान्मुद्दीक्षितमंत्रः ॥॥

यथा अदीक्षिता ये कुर्वन्ति
जपपूजादिका क्रिया न भव
न्ति प्रिये तेषां शिलायामुप्त
बीजवत् ॥
देवि दीक्षाविहीनस्य न सिद्धि
र्नच सद्गतिः तस्मात् सर्वप्र
यत्नेन गुरुणा दीक्षितो भवेत्
अदीक्षितोपि मरणे रौरवं न
रकं व्रजेत् इति तंत्रसारः का
म्पिल्लनगरस्थयज्ञदत्तनाम
कब्राह्मणः यथाआसीत्
काम्पिल्लनगरे सोमयाजिकु
लोद्भवः यज्ञविद्याविशारदः
वेदवेदांगवेदार्थ वेदोक्ताचा
रचेचुरः राजमान्यो बहुधनो
वदान्यः कीर्तिभाजनः अग्नि
शुश्रूषणः रतो वेदाध्ययनत
त्परः इति कान्दे काशी
खंडे गंधवत्यलकावर्णने
नाम १३ अध्यायः ॥
दीक्षिता पुं सोमयाजी इति
केचित् दीक्षाविशिष्टः दीक्ष
धातोः कर्त्तरि क्तप्रत्य
येन निष्पन्नं ॥
दीक्षितायनी स्त्री काम्पिल्ल
नगरस्यदीक्षितनामकब्राह्मणपत्नी

यथा महापतिव्रतां सम्यक
पत्नीं प्रोवाचतां मधु दीनि
तायति कुत्रासि कान्ते गुण
निधिः स्मृतः अथ तिष्ठत किं
तेन कुसामम सुभोर्मिका य
गो दुर्जनकाले या त्वया मे
दुलिका कृता नवरत्नमयी
प्रीतं तां मानीय मयूखमेर
ति अकृत्वाथ तद्दाकपोता
साद्दीतितायनी इति काशी
खंडे १३ अध्यायः
दु दू औ न उपतापे दु
दवथुः औ दूनः न
दुनोति उपताप इहोपत
सो भावः उपतसीकरणंच
सन्नयेन दुनोमीति जयदे
वः वर्णप्रकर्षे सति कर्णि
कारं दुनोति दुः गन्धतया
स्वचेतः इति कालिदासः
इति दुर्गादासः ॥
दु गतो दवति इति दुर्गा
दासः ॥ दुःखित क मनस्क
तो विसर्गमध्यः कालेनडि
लता ज्ञाले यत्नपीनपयो
धरे कान्तः सर्वगुणोपेतो
वालेन्दुःखेन लभ्यते इति विद

ग्धतके अस्यार्थः तडिल्लता
समूहयति येन स्थूलमेघे का
लैकमनीषः सर्वगुणोपेतो
वालेन्दुः खे आकाशे न ल
भ्यते पक्षे देवाले सर्वगुणो
पेतः कान्तः पति दुःखेन
लभ्यते दुःखयति दुःखाप
यति मूर्द्धन्यषमध्यः इति
केचित् तत्र कृति दुःखकर
णं इति दुर्गादासः ॥
दुःखीन त्रि दुःखितः यथा
दुःखिनो तदुचवलषः स्नात
वत् परिपश्यति ते यांति पर
मां गतिं त्यक्त्वा त्ससुखभोगे
च्छा सर्वसत्वस्य वैष्णवाः भ
वंति परदुःखेन सायवो नि
त्यदुःखिता इति वह्निपुराणे
शिवे रूपाख्याननामाध्यायः
दुःखिधका स्त्री वृक्षविशेषः
दुग्धी इति दुग्धाक्षीरः इति
च भाषा तत्र पर्यायः दुग्धी
५ क्षीरी ६ क्षीरात्मिका ७
इति पाद्ये रत्नावली ॥
दुरालभा स्त्री स्वनामख्या
त वृक्षः तत्र पर्यायः धन्व
यासः २४ दुवसः २५ कच्छुरा २६

इति पाद्ये रत्नावली विकंटकः
२७ इति जटाधरः
दुरिष्टकृत पुं अभिचारकर्त्ता
तस्मा नरकं यथा देव द्विज
पितृन् द्वेष्टा रत्नदूषयिता च
यः सयाति कृमिभक्षे वैकृमी
शोच दुरिष्टकृत इति विष्णुपु
राणे २ अंशे ५ अध्यायः दुरि
ष्टकृत अभिचारकर्त्ता इति
तट्टीका
दुरुहः त्रि दुर्विज्ञेयः यथा
काव्यप्रकाशस्य दुरुहपंक्ती
र्गदाधरो व्याकुरुते प्रयत्नात्
इति गदाधरभट्टाचार्य्यकृतका
व्यप्रकाशटीका ॥
दुर्गं क्ली पर्वतादिभि र्दुर्गमं
पुरं तत्र पर्यायः स्कन्धावा
रो राजधानी कोट्ट दुर्गं पु
नः समे इति हेमचन्द्रः अथ
कोट्टो राजधानी राजधानक
मित्यपि इति पाद्ये रत्नावली
पुरं दुर्गमधिष्ठानं कोट्टोऽस्त्री
राजधान्यपि इति जटाधरः
राजस्तत करणावश्यकत्वे
तल्लक्षणाप्रभलक्षणंच यथा
दुर्गं तत्रसमस्त कुर्य्यात् प्राका

राद्दालतोरणैः दूषिताज्ञगराज्ञा
जा दुर्गै दुर्गमप्ययं चरेत दुर्गं
वले नृपाणांच नित्यं दुर्गं प्रश
स्यते शतमेको योधयति दु
र्गस्थो यो धनुर्धरः शतं दश
सहस्राणि तस्मात् दुर्गं प्रशं
स्यते जलदुर्गं भूमिदुर्गं वृक्ष
दुर्गं तथैवच अरण्य वनदुर्गं
च शैलजं परिखोद्भवं दुर्गका
र्यं नृपतिना यथायोग्यस्वदेशा
तः दुर्गं कुर्वन् पुरे कुर्य्यात्
त्रकोणं धनुराकृति वर्द्धलं
वा चतुष्कोणं नान्यथा नगरं
चरेत् मृदंगाकृति दुर्गंच स
र्वतः कलनाशने यथा
राक्षसराजस्य लंकादुर्गा जिता
पुरा वलेः पुरी शोणिताख्ये
तेजो दुर्गं प्रतिष्ठितं यत
यतस्तत व्यजनाकार मनोद्
ष्टिप्रियाविलः सौभाग्य प्रा
स्वराजस्य नगरं पंचकोणकं
दिवि यदृष्टेते राजं स्वंचेष्
ष्टभविष्यति यज्ञायो भ्रामकय
भूप पुर मितृ कुंभकं यत
शाकृति तत्रापि ततो भूद्विजय
प्रदं दुर्गभूमौ यजेद्दुर्गा दिकपा
लांश्चैव हस्ततः प्रजा ॥

यित्वा विधानेन जयं भूपः स
माप्नुयात् अतो दुर्गं नृपः
कुर्य्यात् सततं जयवृद्धये
इति कालिकापुराणे राज
नीतिविशेषः ८५ अध्यायः
दुर्भिक्षं क्ली भिक्षायाः अभा
विकालः तत्कारकवर्षाणि
यथा राष्ट्रभंगश्च दुर्भिक्षं त
स्करैरुपपीडनं जानीयाद्विप्र
हद्यौरे प्रमाथिनि वत्सरे १२
दुर्भिक्षं जायते घोरं सर्वोपद्र
वसंयुतं अनावृष्टिः समाख्या
ता व्यये संवत्सरे प्रिये २०
कचिद्वर्षति पर्ज्जन्यो देशे सं
छिन्नमंडलः दुर्भिक्षं २४ दु
र्भिक्षं जायते सर्वा मेदिनी ड
ह्यति प्रिये स्रवंति तोयानि
पीडिता मानवा भुवि २५
दुर्भिक्षं जायते घोरं धान्यौ
षधिप्रपीडनं अनले वत्स
माख्याता नात्र कार्य्या वि
चारणा ५० देशभंगः सुदुर्भि
क्षं समासात् कथयाम्यहं
पिंगले चारुपमाति॥
दुर्भिक्षं नर्म्मदाते ५१
दुर्भिक्षं मध्यमं प्रोक्तं ॥ ॥

व्यवहारो न वर्त्तते भवेद्दै
मध्यमा वृष्टिर्दुर्भिक्षो मम
पश्चिमे ५५ दुर्भिक्षं मरणं
घोरं धान्यौषधिप्रपीडनं पा
परोगो भवेद्देवि रक्ताक्षेऽम
रवन्दिनि ५८ रोगो मरणं
दुर्भिक्षं विरोधोपद्रवाकुलं
क्रोधेन विषमं सर्वं समाख्या
तं हरप्रिये ५९ मेदिनी चलते
देवि सर्वभूमं चराचरं देश
भंगश्च दुर्भिक्षं क्षये संतीयते
प्रजा सौराष्ट्रमालवे देशे द
क्षिणे कोशलोत्तमा दुर्भिक्षं
जायते घोरं क्षये संवत्सरे प्रि
ये ६० इति ज्योतिस्तत्त्वधृतष
ष्टिवर्षान्तर्गतवर्षविशेषफल
बोधकभविष्यपुराणीयवच
नानि अद्भुतेऽपि दुर्भिक्षं भव
ति यथा सौम्या स्थिनी समाद
य श्मशानाद्व्रजतेषामाः स्या
श्रृगालोऽथ वा मध्ये पुरस्य प्र
विशन्ति चेत् विकिरेति गृहा
दौ च श्मशाने साम्यदीभवेत्तच्चे
शेणा हन्यते लोकाः परचक्रस
मागमः संग्रामश्च महाघो
रो दुर्भिक्षं मकरमया अद्भु
तानि प्रसूयन्ति तत्र देशस्य।

विद्रवः अकाले फलपुष्पाणि दे
देशविद्रवकारणं इति ज्योति
स्तत्त्वं तत्राशौचिभिक्षाग्रहणे
दोषाभाव इति हारलताप्रभृ
तयः कौर्म्मे सद्यः शौचं समा
ख्यातं दुर्भिक्षे चाप्युपद्रवे
डिम्बाहवे हतानां च विद्युता
पार्थिवैः द्विजैः सद्यः शौचं स
माख्यातं श्वापादिमरणे तथा
इति शुद्धितत्त्वं अपि च दु
र्भिक्षे राष्ट्रसंपाते चमत्तके सू
तके पिता नियमाश्च न दुष्य
ति दानधर्म्मरता सत्या दीक्षिता
आमिषिक्ता व्रतस्तीर्थपरा स्त
था दीक्षाकाले विवाहादौ दै
वद्रोणां निमंत्रिते पूर्वसंकल्पि
ते चापि नाशौचं मृतसूतके
इति गारुडे २२८ अध्यायः॥
दुर्व ई वधे पंचसवरी दुः
दुरो दुरः ई दूणः इति
दुर्गादासः
दुल क उत् क्षेपे कः
दोलयति धूलिं वायुः इति
दुर्गादासः
दुष दर य ई वैकृते ॥

वैकृत मभ्यन्तरीभावः दर अ
दुषत् अदुक्षत् अस्मात् पुषा
दित्वान्नित्यं ञ इत्यन्ये यदुष्य
ति लोकः पापात् ईदोषा इ
ति दुर्गादासः
दुष्कृतं क्ली पापं तत्र तत्
कर्त्ते मरणानन्तरं तेन सह
गच्छति यथा गृहादर्थो नि
वर्त्तते श्मशानादपि बान्धवाः
सुकृतं दुष्कृतं लोके गच्छन्त
मनुगच्छति तस्माद्धितं समा
साद्य दैवाद्धा पौरुषादथ द्या
त् सम्यक् द्विजातिभ्यः कीर्त्तनी
नि च कारयेत् इति वह्निपुरा
णीयमानुशासननामाध्यायः
दुह इर अर्द्दने इर अदुहत्
अदोहीत् अर्द्दने भिदू वधः इ
ति दुर्गादासः॥
दुह ल ञ औ दुहि भुक्दो
हने तत्र व्यक्तीकरणमिति श्र
लपारायणिकाः ल ञ दोग्धि
दुग्धे गां दुग्धे गोपश्चैतो वे
स्वयं प्रदुग्धाऽस्य गुणैरुपस्नुता
वसूपमानस्य वसूनि मेदिनी
ति किराते वसूनीति कर्म्मणो
विद्यमानतया कर्म्मकर्त्तृत्वाभावात्

स्थलित मित्येके उहा देरम
धानकर्म्मविषये कर्म्मकर्त्तृत्वे
प्रधानकर्म्मप्रयोगो दुर्न्निवारः
इति कुलचन्द्रः स्वमेत त्वग्रत
प वानयो र्द्वेः पिधवत्वमि
ति वचनात् पचउहोः कर्म्म
णि विद्यमानेऽपि कर्म्मकर्त्तृ
त्वं इति दुर्गादासः॥
दू औ उ प विदे विद १६
उपतस्मीकरण मुपतस्मीभा
वश्च ओं हृनः उ प हूयते
दैत्ये जनं इति चतुर्भुजः
मां कथं पप्योत्व उपसे र
ति रघुः इति दुर्गादासः
दुरे त्रि अनिकटः तत्प
र्य्यायः २ त्रि अनिकटः तत्
पर्य्यायः अनिकटः तत्प
र्य्यायः अनासन्न २ इति श
ब्दरत्नावली आके १ पराके
२ पराचैः ३ आरे ४ परावतः ५
इति पंच दूरनामानि इति वे
दनिघंटौ ३ अध्यायः
दूर्वा स्त्री स्वनामख्यातघासः
तत्पर्य्यायः नन्दा द महावरा ए २
ति पाठरत्नावली दूर्वाष्टमी स्त्री
भाद्रशुक्लाष्टमी तत्र कर्त्तव्यव्रत
विधि र्य्यथा व्रतत्व भाद्रपदे मा

सि शुक्लाष्टम्या मुपोषितः दूर्वां
गौरी गणेशं च फलाकारं शिवं
यजेत् फलपुष्पादिभिः सर्व्वैः
शंभुं नमः शिवायच अनग्निप
क्वमश्नीयान्मुच्यते ब्रह्महत्यया
इति संवत्सरकौमुदीधृतगरु
डपुराणवचनं तद्व्रतप्रयोग
विधि र्य्यथा पूर्व्वदिने संयमं वि
धाय तद्दिने प्रातः कृतस्नाना
दिः आसने चोपविश्याचम्याच
लाक्षत् स्वस्ति वाच्य सूर्य्यार्घ्यं
दत्वा संकल्पं कुर्य्यात् विष्णुर्नमः
अद्य भाद्रे मासि शुक्ले पक्षे अष्टम्यां
तिथौ अमुकगोत्रा श्रीअ
मुकी मर्त्यलोकाधिकरणकस्व
स्वसौभाग्याविच्छिन्नः पुत्रपौत्रा
दिलाभपूर्व्वक ब्रह्मलोकप्राप्ति
कामा श्रीविष्णुप्रीतिकामा वा
भविष्यपुराणोक्ताष्टवर्षनिष्पा
दित दूर्वाष्टमीव्रत महं करिष्ये
इति संकल्प सूक्तं पठित्वा सतमु
द्रादिकं विधाय गणेशादिदेव
ताः संपूज्य ध्यानं कुर्य्यात् य
था नीलोत्पलदलश्यामं च
तुर्बाहुं किरीटिनं शंखचक्रग
दा पद्मधारिणं वनमालिनं
श्रीवत्सवक्षसंशोभितं क्रियावाग्य
समन्वितं इति

ध्यात्वा स्वशिरसि पुष्पं दत्वामा
नसै रुपचारैः संपूज्याध्याय
नं कृत्वा पुनर्ध्यात्वावाह्य पाद्या
दिभिः पूजयेत् पतत् पाद्यं औं
म कृष्णाय नमः पवं क्रमेणसं
पूज्य आवरणदेवताः पूजयेत्
यथा औं प्राच्यै नमः पवं दुर्गायै
गौर्य्यै श्रियै सरस्वत्यै गंगायै दि
त्यै अदित्यै सुषेणायै अरुन्धत्यै
मंदोदर्य्यै सुभद्रायै शांडिल्यै ज
यायै विजयायै रमायै दीप्तायै
रेवत्यै दमयन्त्यै शीलायै स्वके
णायै रंभायै वसुदेवायै देव
कै विश्वे महादेवाय सर्व्वेभ्यो
देवेभ्यः सर्व्वाभ्यो देवीभ्यः ततो
दूर्वां ध्यायेत् औं नीलोत्पलद
लश्यामां सर्व्वदेवशिरोधृतां वि
ष्णुदेहद्भवां पुण्याममृते र
सिषिंचितां सर्व्वदेवाजरां दूर्वा
ममरां विश्वरूपिणीं दिव्यसंस्था
नसंस्थात्री धर्म्मार्थकाममोक्षदां
पवं ध्यात्वा षोडशोपचारैः पू
जयेत्
१६ आसनं औं दूर्वायै नमः
पवं क्रमेण संपूज्य अष्टग्र
न्थियुक्तडोरके फलानि यज्ञो॥

पवीतादिकं दत्वा प्रणमेत्
त्वं दूर्वेऽमृतनामासि पूजिता
सि सुरासुरैः सौभाग्यं सं
ततिं दत्वा सर्व्वकार्य्यकरी भव
यथा शाखा प्रशाखाभि र्विस्तृ
तासि महीतले तथा ममापि सं
तानं देहि त्वमजरामरे ततो
भोज्य सुत स्वमेत डोरकं वाम
हस्ते वद्ध्वा कथां शृणुयात्
अथ कथा युधिष्ठिर उवाच
व्रत मेकं समाचक्ष्व विचार्य्य
मधुसूदन येन संततिविच्छे
जायते न कदाचन श्रीकृष्ण
उवाच मासि भाद्रपदेऽष्टम्यां
शुक्लपक्षे युधिष्ठिर दूर्वाष्टमी
व्रतं नाम या करोति पतिव्र
ता नरः तस्याः क्षयमाप्नोति सं
तानं साप्तपौरुषं वर्द्धते व
र्द्धते नित्यं यथा दुर्वा तथा कु
ले युधिष्ठिर उवाच कथं मे
था सम्भूतपवा कस्माद्दूर्वा चि
रायुषी कस्मादन्या पवित्रा
च लोके धन्या महीतले केन
वा तद्व्रतं देव चरितं केन हे
तुना श्रीकृष्ण उवाच क्षीरोद
सागरे पूर्व्वं मथ्यमानेऽमृतार्थि
ना विष्णुना कराब्जेन्याभ्यां विधृत्य

मंदरं गिरिं भ्रमता तेन वे
गेन लोमान्याघर्षितानि वै
उत्क्षिप्तानि रोमाणि चो
त् क्षिप्तानि महोत्तवे भ्रजाय
त शुभा दूर्वा रम्या हरितश्या
मला एव मेध्या ममृत पत्रा
दूर्वा विष्णु तनूद्भवा तस्या उ
परि विन्यस्तं मथितामृत
मुत्तमं देवदानव गंधर्व य
क्ष विद्याधरोरगैः तत्र ये उ
मृतकुंभस्य निपतद्बिन्दवि
न्दवः तैरियंस्पर्शमासाद्य दू
र्वाचैवाजरामरा वंद्या पवि
त्रा देवैस्तु सर्वदाभ्यर्चितात
था पूजयेत्तां प्रयत्नेन दूर्वे
र्नानाविधैरपि श्रद्धया फल
पुष्पैस्तु गुवाकै र्नारिकेलकैः
द्राक्षा हरीतकीभिश्च मोच
कै र्जंबुकैस्तथा नागरंगै
श्च जंबीरै र्बीजपूरैश्च शोभ
नैः दध्यक्षतैः पयोभिश्चधू
प नैवेद्यदीपकैः मंत्रेणाने
न राजेन्द्र शृणुष्व कथितंम
या त्वं दूर्वेऽमृतजातासि वं
दितासि सुरासुरैः सौभाग्यं स
ततिं दत्वा सर्वकार्यकरी भव
यथा शाखाप्रशाखाभि र्विस्त

तासि महीतले तथा ममापिसंत
तं देहि त्वमजरामरं एवमेव पुरा
पार्थ पूजिता त्रिदशोत्तमैः तेषां
पत्नीभिरनिशं भगिनीभिस्तथै
व च पूजिता च तथा गौर्या देव्या
श्रिया तथा सरस्वत्या गंगया च
दित्यादित्या सुशीलया विनुम
त्या वेणवत्या इनुमत्या सुशील
या विनुमत्या वेणावत्या इनुम
त्या सुशीलया मन्दोदर्या चेडि
कया मातवादीतया तथा मर्त्य
लोके च रेवत्या दमयंत्या सुशी
लतया सुकेशया चूतस्याच
रंतया मिश्रकेशया मञ्जनस्या
मेनकया तथैव मानिकादिभिः
स्त्रीभिरभ्यर्चिता दूर्वा सौभाग्य
सुखदायिनी स्नाताभिः सुविच
त्राभि दूर्वासं पूजिता जनैः द
त्वा पिष्टानि विप्रेभ्यः फलानि
विविधानि च तिलपिष्टानि गो
धूम धान्यपिष्टानि पायसं
भोजयित्वा सहस्रांतं संवत्सि
तकं तथा ततो भुंजीत त
त्वैपं स्वयं भक्त्या समाहिता
नारी चैव प्रकुर्वीत दाष्टमीव्रत
मुत्तमं सर्वतः सर्वसौभाग्यपुत्र
पौत्रादिभि र्युता ॥

मर्त्यलोके चिरं स्थित्वा चत
र्वर्गं गता पुनः वसते रमया
सार्द्धं यावच्चन्द्रदिवाकरौ मे
षार्कतेऽम्बरमले विप्रादे च
पते याश्चाष्टमीव्रत मदोन
भसीह कुर्युः दूर्वा तदत्तत
तिलैः प्रतिपूजयेत्तु स्तांऽया
भुयुः सकलसिद्धिसमृद्धिम
द्धिं इति भविष्योत्तरे दूर्वाष्ट
मी व्रतकथा समाप्ता ॥
दूषितः त्रि प्राप्तदोषः मैथु
नापवादयुक्तः तत्पर्यायः
ग्रातारितः ५ इति शब्दर
त्नावली
दृ ञ श आदरे आदरः भी
ता संभ्रमः न पाद्रियते गुरुं
लोकः मातृवन्धोऽयमित्यके
इति दुर्गादासः दृढः पुं नृप
कभेदः यथा दृढः सोफोऽस्य
(चरो विभवस्तुतरक्रमः नि
शाहकः प्रतितालः कथिताः
सम रूपकाः तल तालं यथा दृ
ढाख्यः स्यालघुद्वन्द्वतालेच दृ
ढलीलके च तद्दृशाख्ये युक्तः सू
गरैघरिकीर्तितः इति संगीतदा

सोढरः दृन्फ प शा उत्क्लेशे
दृंत्यवर्गान्तीयादिः सक्सम्स्व
री प शा दृन्फति शा दृफति चो
रं राजा क्लिश्नातीत्यर्थः दृद
र्फ ददर्फ इति दुर्गादासः दृप
शा बाधने शा दृपति दर्पिता
बाधते विहृतिः इति दुर्गा
दासः ॥
दृप ञ य ऊ स्र दृष गर्व
यौः त्रि दृप्तोऽस्ति य दृप्य
ति ऊ दर्पिष्यति दर्प्सति इरअ
दृपत् अद्राप्सीत् अदार्प्सीत् अ
दर्पीत् इति दुर्गादासः ॥
दृप कि सन्दीपने कि दर्पयति
पीति इति दुर्गादासः ॥
दृफ प शा उत्क्लेशे पशा
दृम्फति शा दृफति
चौरं राजा क्लिश्नातीत्यर्थः
ददर्फ इति दुर्गादासः दृ
भ प ई कि गुम्फने प्राद
र्भति ई दृब्धः कि दर्भ
यति दर्भति गुम्फनं ग्रंथ
नं इति दुर्गादासः ॥
दृभ कि ई भये कि दर्भ
यति दर्भति ई दृब्धः ॥ ॥

रमानाथस्तु दभी इति धात्व
र्थं मत्वा दारयति दरति भाष
यति भयति इत्याह इति दु
र्गादासः
दम्भ न उ॰ क सत्त्वाने ओ
ष्ठवर्गशेषोपधः सममस्वरी
न क दम्भयति दम्भयते उ॰
दम्भयते सज्यानो राशी क
रणं पथः केचित्तु मन्य ते
इति दुर्गादासः
दृषा इर् ई प्रेक्षे इर् अदर्शी
त् अद्राक्षीत् ई दृष्टा प्रेक्ष स्या
त्वेषत्तानं पश्यति चन्द्रं लोकः
ततः स ददृशे च तौ इति व्यती
हारे आत्मनेपदं कदा द्रक्ष्ये इदं
पुरा सेव्यामि त्रिपथगे भागीर
थि स्वं वपु रिति गणकृताति
त्या त्वात् इतिदुर्गादासः ॥
दृह इ वृद्धौ सममस्वरी
इ दंहते इति दुर्गादासः दृ
ह वृद्धौ सममस्वरी दृहति
इति दुर्गादासः ॥ दीधीङ्
दृ ति भिषि नि दृणाति दीर्णा
भिषि भये इति दुर्गादासः

दृ स भिषि मदरयति ॥

भिषि भये इति दुर्गादासः
दृष नि विदीर्ण य
दीर्यति नि दृणाति दीर्णः
दीर्णिः इति दुर्गादासः ॥
दे उ॰ पालने उ॰ दी नान्
यो दयते नित्यं इति हलायु
धं इति दुर्गादासः ॥
देव ऋ उ॰ देवने देवनमिह
क्रीडा ऋ अदिदेवत् उ॰
देवते बालः कन्दुके नित्य
मिति हलायुधः देवनमिह
रोदनं मिति भट्टमल्लः इति
दुर्गादासः
देवदारुः पुं स्वनामख्यातवृ
क्षः सच पार्वतीप्रियः यथा
अमुं पुरः पश्यसि देवदारुं पु
त्रीकृतोऽयं वृषभध्वजेनयो
हेम कुम्भस्तननिःसृतानां स्क
न्दस्य मातुः पयसां रसज्ञः
इति रघौ २ सर्गः ॥
देवदाली स्त्री लताविशेषः
घघरबेल इति लोके या इति
च हिन्दीभाषा खिलसावत पुष्प
हेता तत्पर्यायः देवदालीतवे
णीस्फाता कर्कटीचगरागरी देव
ताडेवृन्तकोशातक्यथजीमूतकस्यपि पीता

पुष्पा खरस्पर्शा विषघ्नी गरना
शिनी देवदाली रसे तिक्ता
कफार्शः शोथ पाण्डुताः ना
शयेद्वामनी तिक्ता लघ हि
क्काकृमि ज्वरान् देवदालीफ
लंतिक्तं कृमि श्लेष्मविनाश
नं स्तम्भनं गुल्म शूलघ्नं मर्मो
त्थवातजित् परं इति भावप्र
काशः ॥
देवरः पुं पत्युः कनिष्ठभ्राता
तत् पर्यायः देवृः २ देवरः
देवानः ४ इति जटाधरः त
रावाक: ६ देवली ७ इति
शब्दरत्नावली ॥
देवसभा स्त्री देवानां सभा
जः तत् पर्यायः सुभा २
सुधर्मा ४ इति शब्दरत्नावली
सुधर्मा ५ इत्यमरटीकायां
भरतः ॥
देवहूः पुं वामकर्णः यथा
आपणो व्यवहारोऽत्र चित्रम
स्थो बहूदने पितृहू दक्षिणः
कर्णो उत्तरो देवहूः दक्षिणः क
र्णो उत्तरो देवहूः स्मृतः इति
श्रीभागवते ४ स्कन्धे २९ अध्या
ये ११ श्लोकः
देवी स्त्री आदित्यभक्ता लिंगि
नी वन्ध्याककोंटकी ॥

शालिपर्णी महाश्वेता पाठा
नागरमुस्ता मूर्वा श्लोकः दृ
रीतकी अतसी
सर्पमानामपतिजातिः इति
राजनिर्घण्टः ॥
देहदुर्गन्धता स्त्री शरीरदौर्ग
न्ध्यं तन्नाशकौषधं यथा अर्जु
नस्य तु पुष्पाणि जंबुपत्रस
मानिच सलोध्राणि च तल्ले
पो देहदुर्गन्धतां हरेत् ॥
इति गारुडे १९४ अध्यायः दै
प शोधने चित्तदार्म्यभावे
यगादौ दायते इत्यादि शोधन
मिह सुद्धीकरणं दायति ताम्र
मस्त्रेनलोकः अवदातः सुस्त्री
भावे क्षिन्दते स्निह्यते कौणिस्थं
सुस्त्रोत्वेऽवदायति इति भट्टम
ल्लः इति दुर्गादासः
दो घ छेदे यदितोऽवद्य
ति विद्विषा घं इति
दुर्गादासः ॥
दौर्गन्ध्यं क्ली दुर्गन्धता तन्ना
शकतैलं यथा चन्दनं
कुंकुमं मांसी कर्पूरो जा
तिपत्रिका जाती कंकोली
पूगानां लवंगस्य फलानि
च अगुरू ॥

शीरं काश्मर्यः तगरं तालिका
गोरोचना प्रियंगुश्च चौलं म
दनकं नखं सरलः समप
र्णाश्च लाक्षा चामलं कीतया
कर्चूरकः पद्मकंच पनै स्तैलं
प्रसाधितं प्रस्वेद मल दौर्गन्ध्य
कडु कुष्ठह्र रं परं इति गारुडे
१८८ अध्यायः ॥
दौहित्रः पुं दुहितृपुत्रः तदु
क्तं पद्मे कन्यागृहे पितृर्भोज
ने दोषाभावो यथा कन्याया
व्रतदेयाया मभुंजन् भुक्त्वा
स नरकं व्रजेत् अप्रजायाच
कन्याया न भुंजीयात् कदा
चन दौहित्रस्य गृहं दुह्या कि
मर्थं मनुपोचसि महासत्व
समाकीर्णात् नास्ति ते नरका
द्भयं तीर्णस्त्वं सर्वदुःखेभ्यः प
रं स्वर्गमवाप्स्यसि दौहित्रस्य
च दानेन नन्दंति पितरः स
दा यत् किंचित् कुरुते दाने
तदानन्त्याय कल्पते मातुः पि
तुश्च विशेषं तत्प्रभस्वाभिता
मिनः मातृ हिरण्यस्य दौहि
त्रोऽहं मवाप्स्यते इत्यादो ब
ह्निपुराणे कन्यादानमाहात्म्या
यः मूद्रमात्रस्य दौहित्रो दत्त

कोभवति यथा
दौहित्रो भागिनेयश्च शू
द्रेसत्क्रियते सुतः
ब्राह्मणादि त्रियेनास्ति
भागिनेयसुतः क्वचित्
इति दत्तकमीमांसाधृतशेन
कवचनं तस्मान्मातामहधन
नाधिकारित्वं तथा दुहितृ
भावे दौहित्रः पौत्रः पौत्रदौ
हित्रयो र्लोके विशेषो नास्ति
धर्मतः तयो हि मातापितरौ
संभूतौ तस्य देहतः इति म
नुवचने पौत्रतुल्यत्वाभिधा
नेन यथा पुत्राभावे पौत्रस्त
था दुहित्रभावे पौत्रस्तथा दु
हित्रभावे दौहित्रः अत एव
गोविंदराजधृतो विष्णुः अपु
त्रपौत्रे संसारे दौहित्रा धन
मान्नुयुः
पूर्वेषा हि स्वधाकारे पौ
त्रे दौहित्रकाः समा
इति दायतत्त्वं अपि च
सर्वदुहित्रभावे दौहित्रस्या
धिकारः दौहित्रा ह्यखिलं रि
क्थमपुत्रस्य पितृ र्हरेत् स एव
दद्यात् द्वौ पिंडौ पित्रे मातामह
ाय च इत्यादिवचनात् ॥

भ्रात्रस्येति दुहितृपर्यन्ताभा
वोपलक्षणं १ भ्रातृपौत्रस्या
भावे पितृ दौहित्रस्याधि
कारः धनिपित्राद्वित्रयपिंड
दातृत्वात् २ पितृ दौहित्रा
भावे भ्रातृदौहित्रोऽधिकारी
धनिभोग्यपितृपितामहपिं
डदातृत्वात् ३ पितृव्यपौत्रा
भावे पितामहदौहित्रस्याधि
कारः धनिभोग्यपितामहप्र
पितामहपिंडदातृत्वात् ४ पिता
महदौहित्रस्याभावे पितृव्यदौ
हित्रस्याधिकारः धनिभोग्य
तत् पितामहप्रपितामहपिंड
द्वयदातृत्वात् ५ तदभावे पिता
महभ्रातृपौत्रः तेषां धनिभो
ग्यतत् प्रपितामहदौहित्रोपिं
डदातृत्वात् ततः प्रपितामह
दौहित्रोऽधिकारी धनिभोग्य
प्रपितामहपिंडदातृत्वात् ६
प्रपितामहदौहित्राभावे पि
तामहभ्रातृदौहित्रोऽधिकारी
धनिभोग्यप्रपितामहपिंडदा
तृत्वात् ७
पितामहभ्रातृदौहित्राभावे मा
तामहः तदभावे मातुलः त

दभावे मातुलपुत्रः तदभावे
मातुलपौत्रः तदभावे माता
महदौहित्रोऽधिकारी ८ ॥
मातामहदौहित्राभावे प्रमा
तामहः तदभावे प्रमातामह
पुत्रः तदभावे पितामहपौत्रः
तदभावे प्रमातामहदौहित्रो
ऽधिकारी ९ प्रमातामहदौहि
त्राभावे वृद्धप्रमातामहोऽधि
कारी तदभावे वृद्धप्रमातामह
पुत्रः तदभावे वृद्धप्रमातामह
पौत्रः तदभावे वृद्धप्रमाता
महदौहित्रोऽधिकारी १० स्त्री
धनेतु पुत्राभावे दौहित्रोऽ
धिकारी पुत्राधिकारात् प्राक् दु
हित्रधिकार श्रुतेः तदाधि
कार्या दुहितुः पुत्रेण वा सपु
त्रेवाथ स्यैव न्याय्यत्वात् ११
इति श्रीकृष्णतर्कालंकारकृतदा
यक्रमसंग्रहे दौहित्रभोजनं
माघस्य यथा त्रभोजने माघस्य
यथाव्रतस्य मपि दौहित्रं
श्राद्धे यत्नेन
भोजयेत् कुतपं चासने
दद्यात्तिलांश्च
विकिरेन्महीं ॥ ॥ ॥।

इति मानवे ३ अध्याय २३४
श्लोकः ॥
द्यावापृथिव्यौ स्त्री स्वर्गपृथ्व्यौ
तद्वैदिकपर्य्यायः यथे १ पु
रन्ध्री २ धिषणे ३ रोदसी ४
क्षोणी ५ अम्भसी ६ नभसी ७
रजसी ८ सदसी ९ सद्मनी १०
घृतवती ११ बहुले १२ गभी
रे १३ गम्भीरे १४ ओण्यौ १५ च
म्वौ १६ पार्थ्वौ १७ मही १८
उर्वी १९ पृथ्वी २० अदिती २१
अही २२ दूरे २३ अम्भे २४ अपा
रे २५ अरे २६ पारे २७ इति
सप्तविंशति द्यावापृथिव्यौ
मध्येयानि इति वेद
निर्घण्टौ ३ अध्यायः ॥
द्रु ल अभिसर्पणे अभिस
र्पणं आभिमुख्येन गमनं
ल द्रौति सिंहो मृगानिव
इति दुर्गादासः
द्युत ५ ङ दीप्तौ ५ अद्यु
तत् ङ द्योतते विद्युते इति
दुर्गादासः द्यै न्यक्करणे अभि
यो युक्तः द्यायति दुष्टं लोकः
इति दुर्गादासः
द्रवं क्ली वस्तु तस्य क्रिया ॥

विशेषे नवपुराणभेदेन म
हापुराणत्वं यथा द्वयाणमिन
वान्येव महापुराणानि कीर्त्यावि
धौ अते गुरु हत लोकत्या
समतया विड़गतः इति नारा
यणदासकृतपरिभाषा
द्रम गतौ दन्त्यवर्गतृतीया
दिः द्रमति इति दुर्गादासः
द्रा ल स्वप्ने पलायने स
ज्ञो निद्रा निपूर्व्व एव निद्रायां
मिति रमानाथः ल निद्राति
निद्रालुः द्राति चौरः पलायते
इत्यर्थः इति दुर्गादासः ॥
द्राख ऋ शोषार्थे दन्त्यः व
र्गतृतीयादिः रेफयुक्तः ऋ
अदद्राखत् शोषार्थे शोषाल
मर्थ्ययोः इति दुर्गादासः
द्राघ ऋ ङ आयामो दीर्घी
करणं शक्तिः सामर्थ्यं ऋअ
अदद्राघत् ङ द्राघते
जनः दिव्याने इत्यर्थः द्रा
घते वस्तुजनो दीर्घं
करोति इत्यर्थः द्राघते
धावितुं वाजी समर्थः स्या
दित्यर्थः इति दुर्गादासः
॥ ॥ ॥ ॥ ॥

द्राड ऋ ङ शीर्णौ
रेफयुक्तः ऋ अदद्राडत्
ङ द्राडते शीर्णौ विभेदे
इति दुर्गादासः ॥
द्राह ऋ ङ जागरे
निक्षेपे ऋ अदद्राहत् ङ
द्राहते इति दुर्गादासः ॥
द्राक्ष ३ कांक्षे घोरकृते
रेफयुक्तः घोरकृतमिह
तिरश्चामेव घोरवाशनं इ
त्येतेन काकः न मध्यपाठे
नैवेहसिद्धे यतस्य इहैवं
धौ वेदेऽस्त्वारणभेदार्थः इति
दुर्गादासः
द्राक्षा स्त्री फलविशेषः अं
गुर इति यवनभाषा तत्प
र्य्यायः जटाधरः स्मा १५
इति शब्दरत्नावली ॥
द्रु स्वभ्वौ गतौ द्रवति इति
दुर्गादासः
द्रु २ न उपतापे २ वैदिकः
न द्रुणोति उपताप इति
उपतप्तीभावः उपतप्तीकरणं
च इति दुर्गादासः
द्रुड शि मज्जने रेफयुक्तः म
ज्जन मिति मस्थाने ॥

रूपं द्रोडति प्रस्तरो जले द्रुडोऽपि
षति शि द्रुडति अद्रुडीत्
द्रुद्रोड पक्षे केचित्तु मन्यते
क्रमदीश्वर स्वकुटादि मेव
मन्यते इति
दुर्गादासः द्रुण श जैत्ये
गतौ वधे दन्त्यवर्गतृतीयादिः
द्रुणति दुद्रोणषति जैत्यं
कौटिल्यीकरणं इति
दुर्गादासः
द्रुपदराजः पुं पंचालदेशी
यचन्द्रवंशीयराजविशेषः त
स्य कन्या द्रौपदी पुत्रो शिख
ण्डिधृष्टद्युम्नौ इति महाभार
तं द्रुपदा स्त्री ऋक साच वैदि
कमन्त्रविशेषः यथा उच्छि
ष्टस्य चाण्डालादिस्पर्शे आपस्त
म्बः भुक्तोच्छिष्ट स्त्वनाचान्तश्चा
ण्डालैः श्वपचेन वा प्रमादात्
स्पर्शनं गच्छेत् तत्र कुर्य्याद्वि
शोधनं गायत्र्यष्टसहस्रं तु द्रु
पदां वा शतं जपेत् इत्याह्नि
काचारतत्त्वे द्रुह ९ यजुर्वे
दे जिघांसा इहानिष्टाचरणमि
ति विद्यानिवासः ९ अद्रुहत्
य द्रुह्यति खलः साधवे ॥

द्रोहिष्यति ध्रोक्ष्यति इति
दुर्गादासः
द्रुन ग ज वधे गतौ च ज
द्रुणोति द्रुणते ग म द्रु
णाति द्रुणीते इति
दुर्गादासः॥
द्रेक ऋ ङ स्वने शब्दे त
वर्गतृतीयादिः रेफयुक्तः
द्वाविंशौ अत् शब्दे वृद्धिरिति
चन्द्रः औन्नत्यमिति क्षीरस्वा
मी ऋ अदिद्रेकत् ङ
द्रेकते लोकः शाब्दायते अत्
सहिते वेत्यर्थः स्वनेनोत्
साहः स्वनोत्साहः इति
केचित् तस्मते शब्देनोत् स
हते इत्यर्थः इति दुर्गा
दासः
द्रै स्वप्ने द्रायति इति॥
दुर्गादासः
द्रोणदुघा स्त्री द्रोणपरि
मित दुग्धदात्री गवी तत्
पर्यायः द्रोणपयस्विनी इ
ति शब्दरत्नावली द्वन्द्वं क्ली
बं अथ द्वन्द्वयुक्तिः राज्ञो व
लं नहि वलं द्वन्द्वमेव वलं श्रूयि
ल्येवमवान् राज्ञा स्थिरा द्वन्द्ववला

द्वन्द्ववलाद्भवेत् तथा च पक्षः
प्रान्ते पोषयति प्राकारस्थे यत्र
धरः प्रान्ते दश सहस्राणि तस्मा
दुर्गविशिष्यते अकृत्रिमं कृ
त्रिमं च तत् पुन द्विविधं भवे
त् यद्दैवसूचितं द्वन्द्वं गिरि
नद्यादिसंश्रितं अकृत्रिम
मिदं ज्ञेयं दुर्लङ्घ्यमरिभूभुजां
प्राकारपरिखारण्यसंश्रयं
यद्भवेदिह कृत्रिमं नाम विज्ञे
यं लङ्घ्यालङ्घ्यन्तु वैरिणां तत्रा
कृत्रिमद्वन्द्वयुक्तिः यथा अ
स्युच्चे विस्तीर्णशिरा दुरारोहः
सकाननः सजलाशयसंभा
र भोज्यद्रव्यसमाश्रयः स्याव
निः सरणो द्वन्द्वः पर्वताख्ये म
हीभुजां नद्यो गम्भीरविस्तीर्णा
स्त्वनुजां न यौ द्वित्वव्यवस्थिता
तन्मध्ये भूमिदेशो यो नदीद्व
न्द्वः स उच्यते यदत्यद्विरकाली
नं दुर्लङ्घ्यविपिनादिकं तन्मध्य
रक्षितां भूमिं द्वन्द्वत्वेनोपतिष्ठते
वनद्वन्द्वमिति ख्यातं यथोर्ध्वं
महत्तरं कृत्रिमद्वन्द्वयुक्तिः यथा
यस्मिन् राज्ये गिरिर्नास्ति नद्यो
वा गहनोदकाः तस्य मध्ये महो
पालः कृत्रिमं द्वन्द्वमा

रभेत् गर्ते रलङ्घ्या विस्तीर्णा
गंभीराः खातवारयः द्वन्द्वत्वेन
समादिष्टाः परिखा वक्रयादसः
विशालशालं सचनं वक्रकंट
किसंकटं द्वन्द्वत्वेन समादिष्टं
विस्तीर्णं विषमं वलं महीरुहे
अश्वायोवध्यमानोपि कल्लोल्य
जलस्त्ववन् द्वन्द्वत्वेन समुद्दिष्टः
स दुर्लङ्घ्यो भूभुजां सर्वत परि
खोकृत्वा निवन्ध्योपरिकन्दरं त
जलस्रुतदेशत्वात् जलद्वन्द्वं
तदुच्यते यथा सभावे निम्नस्य
भूमिदेशस्य वन्धनात् वर्षास्वप्र
वते वारि जलद्वन्द्वं ततो भ
वेत् यतयोऽपि संक्षिप्यात् सं
क्षिप्तं द्वन्द्वमाचरेत् आश्रित्य कृ
त्रिमं द्वन्द्वं वलवद्वैरिणो दिशि
अन्यत्राकृत्रिमं द्वन्द्वं कृत्वा नरप
ति र्वसेत् रथपति र्यदा वैरी
स्थलद्वन्द्वं तदाचरेत् राज्ञास्तदा
थ श्रेद्वैरी जलद्वन्द्वं तदाचरेत्
गिरिद्वन्द्वं नृपः सेवेत् यस्यास्या
द्विविधो रिपुः सर्वो द्वित्रिविधो
युद्धः समासादुपदिश्यते मतिरा
तस्य राज्यान्ते प्रकटे गुप्त एव च
स्थाने सैनिकान् रक्षेत् ॥

प्रकटे निवसेत् स्वयं गजेन्द्रो
कोष संभारे संरक्षेदभिनिषु
यः अथ सामान्यतो गुणाः
तथा हि नीतिशास्त्रे समप्र
वेशापसरणं द्वन्द्वमुत्तम
च्यते अन्यत्र वह्निशाले वन
ताद्ग्रवद्वा माश्रयेत् धनुर्द्व
न्द्वं महीद्वन्द्वं गिरिद्वन्द्वं तथैव
च मनुष्यद्वन्द्वं सत्रं वरद्वन्द्व
चेतानि षट् अन्ये तु नद्वन्द्वे द्व
न्द्वमित्याहुः यो द्वन्द्वं प्रकीर्ति
तं योद्धुमूर्त्यं हि यत् द्वन्द्वं मू
लकायसमं हि तत्
अथान्यत्रापि यावत् प्रमाणं
नगरं हि राज्ञां ततो भवेदुत्त
म मध्यमान्त्यं त्रिंशद्दण्डो
गुणे तेरा त्रिदेशाङ्गानो धर
णीपतीनां गर्गस्तु यदन्य
द्विविधं द्वन्द्वं प्रोच्यते धरणी
भुजां ताभ्यामेवाति रिक्तेन तु
मन्त्रद्वन्द्वं विशेषतः अन्ये तु दे
वान् भिन्निषु मन्त्रद्वन्द्वान् ज
येत्नृपः मन्त्रद्वन्द्वे द्विभित्ते द्वि
नेता व्यक्त कार्ये वैकारक भोजस्त
द्वैदेव वे सिद्धलिङ्गं विस्तीर्णं वि
षमं च तत् समवेशापसरणं
तद्वन्द्वमुत्तमं विदुः इति ॥ ॥

भोजराजकृतयुक्तिकल्पतरुः
द्वापरयुगं स्त्री तृतीययुगं
तस्मात् पश्यादि यथा भाद्र
कृष्णत्रयोदश्यां गुरुवारे द्वा
परयुगोत्पत्तिः तत्र श्रवणा
र्द्धयं कृष्ण बुद्धौ शुभम
र्द्धं पापमर्द्धं नैमिषारण्यं ती
र्थं नाडीद्वौ ब्राह्मणाः रक्तगा
ताः प्राणाः समहस्तपरिमि
तो मानवदेहः सहस्रायुमा
युः ताम्रपात्रे भोजनं इति द्वा
परयुगस्य लक्षणं द्वापरयुगा
ब्दाः ८६४··· द्वापरयुगस्य
राजा शाल्व विराट हंसध्वज
केसध्वज मयूरध्वज व ब्रवा
हन रुक्मांगद जरासन्ध दु
र्योधन युधिष्ठिरः धर्म्माधर्म
रतो लोकः प्रलापी चपलः
सदा स्नाननिष्ठः कपटवाक
द्वापरे राजविस्तरः तत्र नाम
केशवनाम हरे मुरारे मधु
कैटभारे गोपाल गोविंदमु
कुंद शौरे यज्ञेश नारायण
कृष्ण विष्णो निराश्रयं मांजग
दीश रक्ष इति श्लोकितं पं
चिकातः संगृहीतं ॥
द्वापरयुगाख्या स्त्री द्वापरयुगा
रम्भतिथिः सा च गौणभाद्र
कृष्णत्रयोदशी तत्प्रमाणं यु
गाद्याशब्दे द्रष्टव्यं
द्विजः पुं सद्वृत्तब्राह्मणः त
ल्लक्षणं यथा अम्बरीष उवाच
कीदृशाय प्रदातव्यं महादा
नं द्विजातये विद्वषे वा निरा
धारे साचारे विद्वषे वा निरा
सने पतमे सर्वं साप्यादि य
थातथ्यं द्विजोत्तम उत्तरपति
संगस्य दातारं दानमेव हि
वशिष्ठ उवाच जात्या कुलेन वृ
त्तेन स्वाध्यायेन श्रुतेन च
एभिर्युक्तो हि यस्तिष्ठेत् नित्यं
स द्विज उच्यते न जाति न कु
ले राजन् न स्वाध्यायं श्रुतेन
च कारणानि द्विजत्वस्य वृत्तमे
व तु कारणं इति वह्निपुराणे प्र
तोपाख्याननामाध्यायः ॥
द्विरागमनं स्त्री विवाहानन्तरं
वध्वाः पितृगेहात् पतिगृहे
पुनरागमनं यथा नारायण
पद्धतौ वृत्ते पाणिग्रहे गेहा
त् पितुः पतिगृहे प्रति पुन
रागमनं वध्वा स द्विरागमनं
विदुः तस्य शुभकालादि॥

नादि यथा दीपिका
यां स्त्री शुद्धालि चेदा जन्म य
तरवोकाले विशुद्धे श्रेयं संत्यज्य
प्रतिलोमगे शुभदिने यात्रा प्रवे
शोचिते त्वत्कादस्तं निरंशक
नववधूयात्राप्रवेशो पतिः कु
र्यादेकपुरादिषु प्रतिभूगो नै
च्छन्ति दोषं बुधाः पैत्रागारे कु
चकुसमयोः संभवो वा यदि
स्यात् कालः शुद्धो न भवति
यदा संमुखो वापि शुक्रः मे
ये कुंभे ऽलि निच नभवेत्
भास्करः स्वैत्तथापि स्वामी भ
द्रे इति नववधूं वेशायेन्मन्दि
रं स्वं भर्त्ता गौचरशोभने दिन
पतौ नास्तंगते भार्गवे सूर्ये
कीटयदाजगे शुभदिने पते
च कृष्णेतरे द्वित्वाच प्रतिलोम
गो बुधसितोजीवस्य शुद्धो
तथा चानीता गुणशालिनी न
वधूः नित्योत् सवामोदते प
कग्रामे चतुः पालो दुर्भिक्षे राष्ट्र
विप्लवे पतिनानीयमानायाः पु
रः शुक्रो न दुष्यति तथा काश्यपे
पुत्रार्थीशेषु भृगवादिर्न्नीमिरं स्त्र च
भारद्वाजेषु वात्स्येषु प्रतिशु
क्रो न दोषभाक् श्रीपतिसंहि
तायां प्रचेताः पुष्यादित्यसमी
रणादिति वसुषु मुनरा रेव
ती ताराना यक रोहिणीषु शु
भदे तारे प्रशस्तं विधोकन्याम
कपमीन तौलि मृगभे स्यादं
गना द्वागमः ज्योतिःसारसं
ग्रहे विवाहमासि प्रथमं वधा
नागमनं यदि तदा सर्वसिद्धं वि
त्तं शुभमाद्वहं विचित्तगोः ॥
कृत्यचिन्तामणौ युग्मे द्वितीये
मे वर्षे च सुस्थे रंच दशाह्निको सं
प्राप्ते द्वादशे वर्षे पतिं हंति
द्विरागमे मतस्य सूके भ्रु
का पितृगृहे कन्या भुंक्ते
स्वामिगृहे यदि दौर्भाग्यं जा
यते तस्याः प्रापं ति कुलना
यिकाः इति ज्योतिस्तत्वे
निष्कर्षस्तु विवाहमासि प्र
थम समागमनाद्वध्वा ग्रह
स्य दशम द्वादशोतर वर्षे का
ल शुद्धौ वैशाख मार्गशीर्ष
फाल्गुनान्यतमेमासे रवि शु
द्धौ सोम बुध गुरु शुक्रान्य
तमवारे चन्द्रताराशुकूलेरो
हिणी पुनर्वसु मृगशिरः पु

घोत्तरात्रय हस्तस्वाती धने
ष्ठा रेवती षु विष्टिभिन्नकर
णेषु निषिद्धेतरयोगेषु कन्या
मिथुन तुला मीन लग्नेषु द्वि
रागमनं कस्यचिन्मते वुधवारो
पि निषिद्धः हारितादिमुखेरा
मनं गमनं मशिनवनारीणां
व्यय मपि धान्यादीनां न वुधो
वुधवासरे कुर्य्यात् इति सन
कुन्दमुक्तावली ॥

द्विराषाढः पुं मिथुनस्थरव्या
रब्धशुक्लप्रतिपदादिदर्शान्तमा
सद्वयं सच आषाढमलमासे भ
वति तथा ज्योतिषे मिथुनस्थो
यदा भानु रमावास्याद्वयं स्पृशे
त् द्विराषाढः स विज्ञेयो विष्णुः
स्वपिति कर्कटे सिंहिस्थमा
धवादिषु षट्कुमासिद्वर्शद्व
यं यदा द्विराषाढः स विज्ञेयं
प्रोक्ते तच्छावणो च्युतः इति
मलमासतत्वे अन्यच्च पौर्णमा
स्या द्वयं यत्र स्वर्णाप्ताद्व्य
भवेत् द्विराषाढः स विज्ञेयो
विष्णुः स्वपिति कर्कटे इति
गरुडे ८९ अध्यायं

द्विविन्दुः पुं विसर्गवर्णः एषा
विन्दु द्विविन्दुमात्रोवर्णो न्न
मात्रुवी संज्ञेस्तः इति मुग्ध
वोधव्याकरणं मूर्न्यद्वंवच
द्विष ल ज ई वे रे ल ज
द्विष्टि द्विष्टे ई अ द्विलत द्वि
षति मन्दा स्वपिति महात्मनो
इति दुर्गादासः

द्वु स्थगने वकारोपधः
द्वुवति स्थगनं संवरणं वर
णं इति भोचः वरणं स्वीका
रः स्थगनंचेति गोविंदभ
ट्टः इतिदुर्गादासः ॥

द्वेषः पुं शत्रुता साच आत्म
नोविशेषगुणः इति सिद्धांत
मुक्तावली तद्रूपवर्तित्वनि
षेधोयथा इंद्रियस्येन्द्रियस्या
र्थे रागद्वेषौ व्यवस्थितौ त
योर्नवशमागच्छेत् तौह्यस्य
परिपंथिनौ इति श्रीभगव
द्गीतायां ३ अध्याय ३४ श्लो
कः इन्द्रियस्येन्द्रियस्योति वीप्स
या सर्वेषां मिन्द्रियाणां मत्ये
क मित्युक्तं अर्थे स्वस्वविषये
अनुकूले रागः प्रतिकूले द्वेषः ए
वमवं रागद्वेषौ व्यवस्थितौ अव
श्यंभाविनौ इति तट्टीकायं श्रीधर
स्वामी ॥

ध धकारः अस्य ध्यानं यथा
त्रिभजां मेववर्णांचरक्तांवरधा
रां परा वरदां शोभनां रम्यां चव
र्वांमदायिनीं एवं ध्यात्वाथका
कारेतन्मंत्रं दशधाजपेत् अ
स्यनामानि यथा धोधनार्थे रु
चिः स्थाणुः सात्वतो योगिनी
प्रियः मीनेशः शोखिनी लोप
नागेशो विष्णुपावमी धिषणा
धरणी चिंता नेत्रयुग्मं प्रियो
मतिः प्रीतवासा त्रिवर्णाचधा
ता धर्मस्त्वंगमः संदर्शो मो
हनो लज्जा वच्चनगणाधरे धरा
वामपादांगुलेर्मूलं ज्योत्स्ना
स्मरपुरंभवः सर्पीत्याहोर्च
जंघाच धनेशो धनसंचयः
इति नानातंत्रशास्त्रं

धक्क क नाशने कोशधः
नाशनं नष्टीकरणं कधक्क
यति पापं गंगा इति दुर्गा
दासः

धटपरीक्षा स्त्री तुलापरीक्षा
तत्र धटोत्पत्तिविधि र्यथा
पितामह छित्वा तु यज्ञियं वृ
क्षं युपवन्मंत्रपूर्वकं प्रणम्य
लोकपालेभ्य स्तस्य कार्य्यो ॥ ॥

मनीषिभिः युपवदिति युपच्छे
दनविहितसर्वेतिकर्तव्यताति
देशः साच ॐ स्वधिते मैनं
हिंसी रिति छेदनमंत्रविधे
षादिरूपेति व्यवहारप्रदीपः
मेत्रः सौम्यो वानस्पत्यच्छिदने
नेप एव च चतुरस्त्रा तुला का
र्य्या दृढा ऋज्वी तथैववच क
टकानि च देयानि त्रिषुस्था
नेषु चार्थवत् कटकानि व
लयानि चतुर्हस्ता तुला का
र्य्या पादौ चोपरि तत् समौ
तत्र साधारणत्वेन शारदाति
लकोक्तो हस्तोग्राह्यः यथा
चतुर्विंशत्यांगुलाष्यं हस्तं तं
त्रविदो विदुः यवाना मष्टभिः
स्याद्देमं मध्यांगलमितीवितं यवा
नां तंडुलीकृतानां यवानां तंडु
ले रेकमंगुलं चाष्टभि र्भवेत्
अदीर्घयोजिते हस्तश्चतुर्विं
शति रंगुलैः इति कालिका
पुराणात् प्रमाणेन पार्श्वेन
यवानां षट् यवाः पार्श्वसंमिताः
इति कात्यायनवचनाच्च अन्यो
क्तं वस्त्या माह कापिलपंचरात्रे
अष्टाभिस्तैर्भवेज्ज्ञेयं मध्यमं सम
भि र्यवैः कनसं षडभि ॥

एषा च पर्जन्यो दशमः स्मृतः ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः अजघन्यो जघन्यजः इति विष्णो विशेषणं इत्येते द्वादशादित्या मनुना परिकीर्त्तिताः अग्नेः पश्चिमभागे तु रुद्राणां सद्मनं विदुः वीरभद्रश्च शंभुश्च गिरिशश्च महायशाः अजैकपादोऽहिर्बुध्न्यः पिनाकी चापराजितः भुवनाधीश्वरश्चैव कपाली च विशांपतिः स्थाणुर्भवश्च भगवान् रुद्राश्चैकादश स्मृताः महायशाः विशांपति तेगवांश्चेति विशेषणानि अनेन रुद्रस्य मध्ये मातृस्थानं प्रकल्पयेत् ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा वाराही चैव माहेन्द्री चामुंडा गणसंयुता गणसंयुतेति विशेषणं निर्ऋते रुद्ररेभागे गणेशायतनं विदुः वरुणस्योत्तरे भागे मरुतां स्थान मुच्यते श्वसनः स्पर्शनो वायुरनिलो मारुतस्तथा प्राणः प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्त्तिताः घटस्योत्तर भागे तु दुर्गा॥

मावाहयेद्बुधः एतासां देवतानां च स्वनाम्ना पूजनं विदुः विशेषमाह ब्रह्मपुराणे ओंकारादिसमायुक्तं नमस्कारान्तकीर्तितं स्वनाम सर्वसत्वानां मन्त्र इत्यभिधीयते अनेनैव विधानेन गन्धपुष्पे निवेदयेत् एकैकस्य प्रकुर्वीत यथोद्दिष्टक्रमेण तु मंत्र इत्यभिधानात् तेनैवेत्येवकारश्चार्थे स्कंदस्य ओं मस्कन्दाय नमः इति योज्यं न तु धर्म्माचार्यं प्रकल्पयामि नमः इति मिताक्षरोक्तं प्रमाणाभावादनन्वयश्च पितामहः भूषावसाने धर्म्माय दत्वाचार्याद्दिकं क्रमात् अर्घ्यादिपश्चादंशानां भूषांत सुपर्कं कल्पयेत गंधादिकं नैवेद्यान्तं परिचर्य्यां प्रकल्पयेत एतत्सर्वं प्राड्विवाकः कुर्य्यात् यथा प्राड्विवाकस्ततो विप्रो वेदवेदांगपारगः श्रुतवृत्तोपपन्नश्च शान्तचित्तो विमत्सरः सत्यसंधः शुचिर्दक्षः सर्वप्राणिहिते रतः उपोषितः शुद्धवासाः कृतदन्तादिधावनः सर्वासां देवतानां च पूजां॥

कुर्य्याद्यथाविधि रक्तगन्धपुष्पादीनाह नारदः रक्तैर्गन्धैश्च माल्यैश्च धूपदीपाक्षतादिभिः अर्चयेत घटं पूर्वं ततः शिष्टांश्च पूजयेत् घटधर्म्मं तथा च विष्णुनारदौ धर्म्मपर्य्यायवचने धट इत्यभिधीयते शिष्टानिन्द्रादीन् अविशेषात् सर्वत्र रक्तावयं मिताक्षरायां तु धर्म्मपूजन एव रक्तत्व नियमः तथा च तद्दिने ततो होमः कर्त्तव्यो वेदपारगैः आज्येन हविषा चैव समिद्भिर्होमसाधनैः सावित्र्या प्रणवेनैव स्वाहान्तेनैव होमयेत सावित्र्या गायत्र्या तेन प्रणवादिकां सावित्रीमुच्चार्य्य पुनः स्वाहाकारान्तं प्रणवमुच्चार्य्य समिदाज्यचरून् प्रत्येकमष्टोत्तरशतं जुहुयादिति मिताक्षरा वस्तुतस्तु गायत्रीहोमे योगियाज्ञवल्क्यः प्रणवव्याहृतिभ्यां च स्वाहान्ते होमकर्म्मणि तेन प्रणवादिकां सव्याहृतिकां गायत्रीमुच्चार्य्य स्वाहाकारान्ते पुनः प्रणवमुच्चार्य्य आज्यपायससमिधां मिलित्वा अष्टोत्तरशतं॥

जुहुयात् लाघवात् अत एव दैवतैके हि दधि पयसो मंत्रेणानुष्ठानं ऐन्द्रं दध्यमावास्यायामैन्द्रं पयोऽमावास्यायामिति श्राद्धविवेकः यत्तु पंचलांगलमहादाने पर्जन्यादित्यरुद्रेभ्यः पायसं निर्वपेच्चरुं एकस्मिन्नेव कुंडे च गुरुर्यस्मै निवेदयेत् पलाशसमिध स्तद्वदाज्यं कृष्णतिलास्तथा इति मत्स्यपुराणात् चरुर्णा होतृणां मध्ये यस्मै गुरुः पर्जन्यादिभ्यो होमं कुर्विति आज्ञां करोति स एव पर्जन्याय आदित्याय रुद्रेभ्य स्तत्तन्मंत्रैः पायसं पलाशसमिदाज्य कृष्णतिलांश्च प्रत्येकं जुहुयादिति भूपालप्रभृतिभिरुक्तं तद्युक्तं तद्वदिति तथैताभ्यां प्रत्येकद्रव्येण होमविधानात् अत एव स्वाकारस्य द्विश्चरुं जुहुयादित्युक्ता तद्वदिति पलाशादि जुहुयादित्युक्तं अत एव हर्षात् सर्गे वाचस्पतिमिश्रप्रभृतिभिरयमादि होमपोषपायस हृष्टहोमयोर्घपिष्टकाभ्यां मिलिताभ्यां सकृत् स्विष्टकृद्धोमो विहितः॥

कण्डको न होमो ग्रहादि ह
जायां शत मष्टाधिकं भवेत्
अष्टाविंशति रष्टौ वा शक्त्य
पेक्ष मथापि वा इति देवी
पुराणीयादिपददर्शनात्
अत्राप्यन्या संख्याउक्तेषा प
वंमत्स्यपुराणे मृणु राजन्
महाबाहो तडागादिषु यो वि
धिः वेद्यास्तु परितो गर्त्ता रत्निमा
त्राह्निमेखलाः नव सप्ताथवा
पंचा योनिवक्त्रा नृपात्मज इति
नवादिकुंडानुक्त्वा स्वल्पेप्येका
ग्निमत् कार्य्या विप्रश्चाह
ते नृभिः इति हर्षोत्कादत्राप्य
प्रोक्तावेकाग्निविधि रिति वद
न्ति अत्र प्राड्विवाकरहोत्रैव
होमः द्विजेषु सर्वकार्याणि
प्राड्विवाकः समाचरेत् अथ
देषु यथाधर्म्यं सोपवासो
नृपात्मज इति मितात्तराधृत
पितामहवचनात् अधर्म्ये यो
ज्ञमानमात्रं नवात्र भिव्रपा
रविनामृत्विजो रथकारवृहि
याप्रयुक्ति कल्पनेति वाच्यं श्रा
ल्पणमात्रस्यनानापत्तोपाठवि
धानेन कल्पनानुपपत्तेः तथा
च मनुः वेदानधीत्य वेदौ वा वेदं वा
पि

यथाक्रमं अविप्लुतब्रह्मचर्यो
गृहस्थाश्रम माचरेत् इति
प्रायश्चित्तहोमस्तु सामगानां
महाव्याहृतिभिः यत्र व्याहृ
तिभि होमः प्रायश्चित्तात्मको
भवेत् चतस्र स्तत्र कर्त्तव्याः
स्त्रीपाणिग्रहणे यथा अपि
वास्तान मित्याद्या प्राजापत्या
पिव्याहृतिः होतव्या स्त्रिविं
कल्पोऽयं प्रायश्चित्तविधिः
स्मृतः इति छन्दोगपरिशि
ष्टात् ततःपाप्मायनहोमो
भवृदेवभहोमः त्रिविकल्पः
त्यानेन तस्य निराधानात् भट्टना
रायणादिभिरप्रमाणीकृतत्वा
च्च पितामहः तोलयित्वा नृ
रं पूर्वं तस्मात्तमवतार्य्य च प्रा
मुखः प्रांजलिर्भूत्वा प्राड्विवाक
स्ततोवदेत् एह्येहि भगवन् ध
र्म्म दिव्येत्वस्मिन् समाविश स
हितो लोकपालै स्त्वं वस्वादित्य
मरुद्गणैः तेचाद्यमभियुक्तस्य
लेखयित्वात् मस्तके मंत्रेणा
नेनसहितं कुर्य्यात्तस्य शिरोग
तं आदित्य चन्द्रावनिलोऽनल
श्च द्यौ भूमि रापोहृदयं यमश्च
अहश्च रात्रिश्च उभे॥ ॥

९९७

चमन्त्येधर्म्मोपि जाति नरः
स्यहृतं इमं मंत्रविधिं कृतस्नं
सर्वदिव्येषु योजयेत् आवाह
नंच देवानां तथैव परिकल्प
येत् धट मासं त्रयेऽप्येवं विधि
नानेन मंत्रवित् त्वं धटो ब्रह्म
णा सृष्टः परीक्षार्थं दुरात्मनां
धकारात्धर्म्म मुद्दिष्टं टकारात्
कुटिलं नरं धृतो धारयसे य
स्माद्धट स्तेनाभिधीयते त्वं वे
त्सि सर्वभूतानांपापानि सुकृता
निच त्वमेव देवजानीषेन वि
दुर्यानि मानवाः व्यवहारा
भिशस्तोऽयंमानुषः शुद्धिमि
च्छति तदेनं संशयादस्मा
द्धर्म्मत स्त्रातुमर्हसि
लेखनप्रकार माह नन्दिपुराणे
शुभे नक्षत्र दिवसे शुभे राशि
दिन ग्रहे लेखयेत् पूज्यदेव
पान् रुद्र ब्रह्म जनार्द्दनान् पू
र्वदिग्वदनो भूत्वा लिपिज्ञो लेख
कोत्तमः निवेधारणेमतस्यपुरा
णे परीक्षेयेनान् स्तस्पन्नान् स
मग्रेणागतान् समान् अक्षरान्
लेखयेद्यस्तु सनरो लेखकः स्मृ
तः इति॥

दानसागरः धारयसे इत्यत्रभा
वयसे इति पाठोऽनुपयुक्तः तथा
हि कुटिले पापिनं संशयोप
न्ने वा आयोपापिन मेतावता
त्राभिधानं मनुपपन्नं उद्धरणत्वा
शुद्धस्यापि ज्ञापनात्
द्वितीये पूर्वसिद्धत्वेन ज्ञापना
नुपपत्तिः तस्मात् कुटिलं व्य
वहाराभिशस्तं धारयसे इत्येवा
र्थः अत एव उपसंहारो संश
याद्स्मादित्युक्तं अतएवकालि
कापुराणे पि मानुष स्तोल्य
ते त्वयीत्युक्त मिति स्मृतिसमु
च्चय व्यवहारदीपिकयो विंष्णुः
धटंच समयेन गृह्णीयात् तुला
धारकंच धर्म्मपर्य्यायवचनं ध
ट इत्यभिधीयते त्वमेव धटजा
नीषे न विदुर्यानि मानवाः व्यव
हाराभिशस्तोऽयं मानुषः शुद्धि
मिच्छति तदेनं संशयादस्माद्ध
र्म्मत स्त्रातुमर्हसि ब्रह्मघ्ना ये
स्मृता लोका ये लोकाः कूटसाक्षि
णाः तुलाधारस्य ते लोका स्तुला
धारस्य ते लोका समयेनत्व मेव
धट इत्यादिनियमेन धटं गृह्णी
यात् योजयेत् तुलाधारकंच॥

ब्रह्मघ्ना ये इत्यादिना निषमे
नेत्यर्थः अत्र नानासु निमग्नी
त मंत्राणां एकतरपाठानां समा
नप्रयोजनानां यव व्रीहिवद्वि
कल्प इति ग्रंथः गौरवाग्निनलि
खिताः अभिप्रेतप्राड्विवाकप
ठ्यमानेन ड इष्टार्थानां समुच्चयः
पितामहः नित्यं देयानि दिव्या
नि शुचये चार्द्रवाससे शुचये
चार्द्रवाससे शुचये जननमरणा
शौचरहितायस्नातिने स्नाति याज्ञ
वल्क्य दीपकलिकायां नारदः
हस्तव्रते षु सर्वेषु कुर्याद्वै सप
हानि च तान्येव पुनरालक्ष्ये हि
स्तौ विन्दुविचित्रितौ इत्यग्निवि
यौ हस्तलतिनो हस्तालतमल
त्यदिना चिह्नितं कृत्वा हस्तौ तरे
जातं न वा इति ज्ञातव्यमिति स्मृत
यं हस्तिनो दिव्याधिकारः नारदः
अहोरात्रोषिते स्नाते आर्द्रवाससि
मानवे पूर्वाह्णे सर्वदिव्यानां प्रदान
मनुकीर्तितं प्रत्यमंत्राणान् प्राग
पि पुनः स्नोलनमाह कालिकापुरा
णे उपोषितं तथा स्नातं स्नात
समं प्रथमं तस्मात्सं तोल्यकारयेद्
द्वा मवतायोरुमंत्रयेत ॥ ॥

याज्ञवल्क्यः तुलाधारणविद्
द्भिरभियुक्तस्तुलाश्रितः प्रति
मान समीभूतो रेखां कृत्वावता
रितः त्वं तुले सत्यधामासि पुरा
देवैर्विनिर्मिता तत्सत्यं वद
कल्याणि संशयान्मां विमो
चय यद्यस्मिन् पापकृन्मात स्त
तोमां त्वमधो नय शुद्धश्चेत्
गमयोर्द्ध्वं मां तुला मित्यभिमं
त्रयेत् तुलाधारणाभिज्ञै र्वे
णिगादिभिः पाषाणादि प्रति
मानसमीकृते तुलाधिरूढो
ऽभियुक्तो दिव्याधिकारी येनस
न्निवेशेन प्रतिमान समीकरणा
दशायां यत्रपादादयो व्यवस्थि
ताः शिकाचवत्र तत्र पांडुले
खेनांकयित्वा पिटकारवता
रितः त्वं तुलेति मंत्रेण तुलामा
मंत्रयेत् सत्यं सन्दिग्धार्थस्य स्व
रूपं वद दर्शय पापकृदसत्य
वादी शुद्धश्च सत्यवादी मंत्रश्रा
यंस्तत्त्वैः पौराणिकवात शूद्रे पि
पाकाः वेदमंत्रवर्जं शूद्रस्येति
न्नारायणिकेश्चतस्मृतौ वेदेति विप्र
स्यापात आह विस्पदेवादे तु विप्र
स्यैतो नमस्कारमंत्रविधानं तस्येम
जोमि

९८९

निषिद्धः प्रपंचस्तु निषितत्वेः
तुलान्वयः स्त्रीपरीक्षाया मपि
अविहितन एव प्रयोज्यः दिव्या
नीह विशुद्धये इत्यनेन संदिग्ध
र्थसन्देहनिवृत्तिफलकतयाः
विशेषेण स्त्रीपुंकर्तृकदिव्यावि
धानेन च प्रकृता तुलायोगात्
अतएव पत्नी सन्नह्यत्वो नो
धेहीति मंत्रे हि वक्त्र पत्नीक
यजमानकर्तृकप्रयोगोपि न
ह्यविरुद्धस्यप्रतिज्ञायार्थस्य शोध्या
यतस्य स्वस्य बोधाय प्राप्ता
माह नारदः अग्ने सर्वेच पत्र
स्य मभियुक्तं यथा ह्येतं सम्प्रा
प्य मूर्द्धितस्यैव न्यस्य देयो यथा
क्रमं देयो दिव्यविशेषः प्राड्विवा
केनेति शेषः ततः शिरोऽवस्थि
तपत्रकं शोध्यं नरं घटे पुनरा
रोपयेत्तस्मिन् शिरोवस्थित
पत्रक मिति स्मरणात् तुला
रोपितंच नरं विनाडीपंचककाल
लंघ्यात्रयगुर्वतरोह्वारण
योग्यमा कर्त्ते पहस्यात पं
र्णाकालो देशो स्तम्भीः का
ले वक्तव्यतं पूर्णां ॥ ॥ ॥

चन्द्रं मत्वा रात्रौ चेत तत
तामः प्रातःप्रोते प्रोतो राज्ञः
हूरः प्राप्यानस्नाद्वानेदर्षप्र
स्यान्ते प्राप्यैकोते कर्तव्या इति
श्लोकस्य पंचधा पाठयोग्यका
ले पंचपलात्मकं यावत्
तावत् स्थापयेत् यथा स्मृतिः
ज्योतिर्विद्भ्राह्मणैः श्रेष्ठैः कुर्या
त् कालपरीक्षणं विनाड्यः पंच
विज्ञेयाः परीक्षाकालकोविदैः
ततः कालस्य ज्योतिषे दशग
र्वे हराः प्राणाः षट्प्राणाः
स्याद्विनाडिका तासां षष्ठ्या च
टीज्ञेयाः होरात्रं घटिका स्तथा
तथा षष्ट्या पितामहः
साक्षिणो ब्राह्मणाः श्रेष्ठा य
थादृष्टार्थवादिनः ज्ञानिनः
शुचयोऽलुब्धा नियोक्तव्या नृ
पेण तपंसंति साक्षिणः स
र्वे शुद्धशुद्धौ नृपे तथा तति
तोपदिवृद्धेन स शुद्धः स्यात्त
संशयं समोवाहीयमानो वा
न विशुद्धो भवेन्नरः अस्परोषं
समोज्ञेया वृद्धोषत्तु हीयेत
अस्तित अभिचारे आलिंगनादि
दिना चौर्ये तदेवागमनादिना
तत्र पुनस्तोलनमाह ॥

बृहस्पतिः घटेऽभियुक्तं स्त
त्तितो हीन स्थेद्वा मानुयात्
तत् समस्त पुन स्तोल्योव
र्द्धितो विजयी भवेत् घोथ्यः
स्वद्रदोषांगीकारे पिप्रधान
दोषनिर्णयार्थं तत्रैव पुनस्तो
लनीयः अंगावैडएपसंभावना
यांत प्रयोगांतर मिति यदा
चानुपलभ्यमानहष्टकारण
क पवकत्तादीनां छेदनादि
स्तदाप्यशुद्धिः कलछेदे त
लाभंगेथट कर्कटयो स्तथा
रज्जुछेदेऽत्तभंगे च तथैवा
शुद्धि मादिशेत् इति बृहस्प
तिवचनात् कल शिक्यतल
धटकर्कटौतु लांतयोः शिक्या
धारावीषहृक्रावायसकीलकौ
कर्कटशृंगानिभोत्रत्तः पादः
स्तंभयो रुपरि निविष्ट स्तलाधा
रपट इति मिताक्षरा ञाद्यप्रयो
जकः कीलकः इति दत्तासुधः
मध्यकटक मिति पारिजातं
यदात् दृश्यमानकारणक
पर्वपोभंग स्तदा पुन रारोपये
त् शिक्यादिछेदभंगेषु पुन रा
रोपयेत्तर मिति स्मृतेः तत्तस्मृ
न्वृत्विक पुरोहिताचार्य्यान् ॥

दक्षिणाभिस्तु तोषयेत पवंका
रयिता राजा भुक्ता भोगान्
मनोरमान् महतीं कीर्त्तिमाप्नो
ति ब्रह्मभूयाय कल्पते तदयं
संक्षेपः प्राड्विवेक यथोक्तगुणे
न तेला कुर्य्यात ततः षड्हस्तो स
हटौस्तंभौ कृत्वा हस्तद्वयखा
थानेन दक्षिणोत्तरयो र्दिशो र्हे
स्तद्वयनिखननं कृत्वा गड्ढा
रकेकीलकाग्रस्तंभयो रुपरि
मेध्ये पार्श्वद्वये च विहितछिद्र
मध्यछिद्रनिवेपितलोहांकुशाय
दृकं निधाय उपरिकीलकस्यत
त् पट्टकस्य मध्यस्थितांकुशेन
तुलामध्यवलयस्थलोहांकुशं
संयुञ्ज्यात् पवंच मध्येस्तंभयो
रेतरा तिर्य्यक् तुलादंड स्तिष्ठे
तितुलाग्रस्थिताभ्या मायसकी
लकाभ्यां शिक्यद्वयरज्जुवन्धनं
कुर्य्यात् तुलायाः पार्श्वयोः प्रा
क् प्रत्यक् दिशो स्तोरणस्तं
भौ तुलातोरणयो रुपरि सूत्रसं
बद्धौ मृण्मयावथोमुखो घटमा
लकचुंबितो अवलंबो कार्य्याय
थाऽवलंबवि॥॥ इत्यादि

श्लेषाभ्यां तुलायामवनतिरु
न्नतिश्च ज्ञेया तथा जलहुभापि
इति दिव्य तत्वे अस्य
प्रयोग स्तुलापाठे द्रष्टव्यः
धण ध्वने धणति मृदंगः
इति दुर्गादासः ॥
धन रवे धनति मृदंगः इति
दुर्गादासः
धन लि र धान्ये धान्य मिह
धान्यक्रिया र वैदिकः लि द
धति भूमि र्धान्य सन् पादयति
इत्यर्थः इति दुर्गादासः
धनं क्ली द्रविणं तत् पर्य्यायः
रैः २१ भोगः २२ इति जटाधरः
स्वं २३ इतिशब्दरत्नावली तस्य
वैदिकपर्य्यायाः मघं १ रेक्णः २
रिक्थं ३ वेदः ४ वरिवः ५ श्वात्रं
६ रत्नं ७ रयिः ८ क्षत्रं ९ भ
गः १० मीढं ११ गयः १२ द्युम्नं
१३ इन्द्रियं १४ वसु १५ रायः
१६ राधः १७ भोजनं १८ त
ना १९ नृम्णं २० वन्धुः २१ मे
धा २२ यशः २३ ब्रह्म २४
द्रविणं २५ श्रवः २६ वृत्रं २७
ऋतं २८ इत्य ष्टाविंशतिर्नामानि

रेव धनना ॥

मानि इति वेदनिर्घण्टौ २ अध्यायः
तत् त्रिविधं यथा तत्र त्रिवि
धं ज्ञेयं शुक्लं शबल मेव च कृ
ष्णंच तस्य विज्ञेयो विभागः स
प्तधा पृथक् क्रमायतं प्री
तिदायं प्राप्तंच सह भार्य्यया
अविशेषेण सर्व्वेषां वर्णानां
त्रिविधं धनंवैशेषिकं धनं दृष्टं
ब्राह्मणस्य त्रिलक्षणं याजना
ध्यापनेनित्यं विशुद्धच प्रतिग्र
हः त्रिविधं क्षत्रियस्यापि प्राहु
र्वैशेषिकं धनं युद्धोपलब्धं कर
सरः प्रसरात् स्थानसंश्रयः ततो
व्यक्तिः ततो भेद इति अत्र प्रति
श्यायस्य सद्यो जनकनिदानपू
र्विकां संप्राप्तिमाह संधारणा
जीर्णरजोतिभाषात् क्रोधर्तु
वैषम्य शिरोभितापैः संजागरा
तिस्वपनाम्बुशीतावश्यायकैर्मै
थुन बाष्पसेकैः संस्त्यानदोषा
शिरसि प्रवृद्धो वायुः प्रतिश्या
य मुदीरयेत्तु संधारणा मूत्रपु
रीषधारणा रजो धूलिः तत्त्वेना
साम्प्रविष्टे हेतु ऋतु वैषम्यं ऋ
तुचर्या विपरीताचरणं शिरो
भितापः शिरसोऽभितापो येन
धूमादिना सः अवश्याय स्तुषा
रः बाष्पसेको रोदने संस्त्यानदो
षो शिरसि संहतकफे चयादि
क्रमशो जनकनिदानपूर्विकां
संप्राप्तिमाह चयं गता मू
र्द्धनि मारुतादयः पृथक् स
मस्ताश्च तथैव शोणितं प्रको
प्यमाना विविधैः प्रकोपनै
स्ततः प्रतिश्यायकरा भवं
ति ह पूर्वरूप माह त
व प्रवृत्तिः शिरसोभिपूर्णता
स्तंभोङ्गमर्दः परिहृष्टरोमत

उपद्रवा श्चाप्यपरे पृथग्विधा
नृणां प्रतिश्यायपुरःसराः स्व
ताः शिरसोऽभिहननं शिर
सो भावेणैव व्याप्तिः अपरेऽपि
पृथग्विधाः घ्राणधूमायन ता
लुविदारण नासा सुख स्रावाद
यो विदेहोक्ता बोद्धव्याः
वातिकस्य प्रतिश्यायस्य लक्ष
णमाह आनद्धा पिहिता नासा
तनुस्रावप्रसेकिनी गलताल्वो
ष्ठशोषश्च निस्तोदः शंखयोः स्व
र्यो भवेत् स्वरोपघातश्च प्रति
श्यायेऽनिलात्मके आनद्धा स्त
ब्धा अपिहिता न पिहिता अन
एव तनुस्रावप्रसेकिनी पैत्ति
कमाह उष्णः सपीतकः स्रावो
घ्राणात् स्रवति पैत्तिके कृशो
ऽति पाण्डुः सन्तप्तो भवेत्तृष्णाभि
पीडितः नासया तु सधूमाग्निं
वमतीव समानवः सपीतकः
ईषत्पीतकः श्लैष्मिकमाह घ्रा
णात् कफकृते श्वेतः कफः शी
तः स्रवेद्बहुः शुक्लावभासः
शूनाक्षो भवेद्गुरुशिरा नरः ग
लताल्वोष्ठशिरसां कण्डूभिरति
पीडितः सान्निपातिक ॥

माह भूत्वा प्रतिश्यायो योऽक
स्मात् सन्निवर्तते संपक्वो वा
ऽप्यपक्वो वा स सर्वप्रभवः स्मृ
तः अत्र यद्यपि दोषत्रयलिंगा
नि नोक्तानि तथापि तानि ज्ञे
यानि त्रिदोषजत्वात् अयमसा
ध्यः अत एवाह नृणां दुष्टः प्र
तिश्यायः सर्वजश्च न सिध्यति
दुष्टप्रतिश्यायलिंगमाह प्र
क्लिद्यति सकृन्नासा पुनश्च प
रिशुष्यति पुनरानह्यते वापि
पुनर्विव्रियते तथा निःश्वासो
वाति दुर्गन्धो नरो गन्धान् न
वेत्ति च एवं दुष्टं प्रतिश्यायं जा
नीयात् कृच्छ्रसाधनं आनह्यते
विबद्धा भवति विव्रियते अवि
बद्धा स्यात् क्लेदशोषविबन्धा
नैककाले भवन्ति किंतु पर्यय
यतः दोषाधिक्यं भवति त
दा तदा तत्तद्दोषकृतः स म
बोद्धव्यः इति न विरोधः कृ
च्छ्रसाधनं असाध्यं कष्टसाध्यं
च रक्तजमाह रक्तजे तु प्रति
श्याये रक्तस्रावः प्रवर्तते
पित्तप्रतिश्यायकृतैर्लिंगै
श्चापि समन्वितः ताम्राक्षश्च

भवेत् जन्तुरुरोघातप्रपीडितः
दुर्गन्धोच्छ्वासवक्त्रश्च गन्धा
नपि न वेत्ति सः उरोघातप्रपी
डितः उरोघातेनेव प्रपीडितः
अप्रतीकारेण कालान्तरे सर्व
एव प्रतिश्याया असाध्या भवन्ती
त्याह सर्व एव प्रतिश्याया नरस्या
प्रतिकारिणः दुष्टतां यान्ति का
लेन तदा साध्या भवन्ति हि प्रति
श्यायेषु क्रमयोऽपि भवन्तीत्याह
मूर्छ्छन्ति क्रमयश्चात्र श्वेताः
स्निग्धास्तथाणवः कृमितो यं
शिरोरोगस्तस्य तेनात्र लक्षणं
अत्र एषु प्रतिश्यायेषु कफस्य
प्राधान्यात् सर्वेषु प्रतिश्यायेषु
कफस्य प्राधान्यात् सर्वेषु प्रति
श्यायेषु कफजा एव क्रमयो भ
वन्तीति श्वेताः स्निग्धाश्च वृद्धाः
प्रतिश्याया अपरानपि विकारान्
कुर्वन्ति तानाह बाधिर्यमान्ध्य
मघ्रत्वं घोरांश्च नयनामयान् शो
षाग्निमान्द्यकासांश्च वृद्धाः कु
र्वन्ति पीनसं घोरांश्च नयनामया
न् इति वचनेऽप्यान्ध्यग्रहणं विशे
षार्थं अघ्रत्वं न जिघ्रतीत्यघ्रस्त
स्य भावोऽघ्रत्वं चतुस्त्रिंशत् सं
ख्या ॥

पूर्वणाथाह अर्बुदं सप्तधा शो
थाश्चत्वारोऽर्शश्चतुर्विधं चतु
र्विधं रक्तपित्तमुक्तं घ्राणेऽपि त
द्विदुः अर्बुदानि सप्त वातपित्त
कफसन्निपातरक्तमांसमेदो
जानि श्लेष्मसन्निपातजाः अर्शां
सि चत्वारि वातपित्तश्लेष्मसन्नि
पातजानि रक्तपित्तानि चत्वारि
वातपित्तश्लेष्मसन्निपातजानि
एतानि यथोक्तलिंगानि घ्राणे
ऽपि संभवन्ति
चिकित्साभेदात् पीनसस्याम
लक्षणमाह शिरोगुरुत्वमरु
चिर्नासास्रावस्तनुस्वरः क्षा
मः ष्ठीवति चाभीक्ष्णमामपीनस
लक्षणं नासास्रावस्तनुस्वरः क्षा
मः इत्यन्वयः अथ पक्वस्य पीन
सस्य लक्षणमाह आमलिंगा
न्वितः श्लेष्मा घनः खेषु निमज्ज
ति स्वरवर्णविशुद्धिश्च पक्वपी
नसलक्षणं आमलिंगान्वितः
श्लेष्मा आमलिंगैः शिरोगुरुत्वा
दिभिः युक्तः पश्चात् घनः
निबिडः अथ च खेषु नासा
रन्ध्रेषु निमज्जति सक्तो भवति
वर्णशुद्धिः श्लेष्मणः सक्त
निर्वाणता ॥

अथ नासारोगाणां चिकि
त्सा सर्वेषु सर्वकाले पीनसरो
गेषु जातमात्रेषु मविचेडेन
दध्ना भुंजीत नरः सुखं लभ
ते कट्फलं पौष्करं शृंगी
व्योषं यासश्च कारवी एषां चू
र्णं कषायं वा दद्यादार्द्रकैर्ज
रसैः पीनसे स्वरभेदे च नासा
स्रावे हलीमके सन्निपाते क
फे वाते कासे श्वासे च शस्य
ते २ कलिंगहिंगु मरिचलाक्षा
स्वरस कट्फलैः कुष्ठोग्राशि
ग्रुजन्तुघ्नैरवपीडः प्रशस्यते
पीनसादिषु ३ व्योषचित्रक
तालीसतिंतिडीकाम्लवेतसैः स
चव्याजाजितुल्यांशैः मेलात्व
क्पत्रपादिकं व्योषादिक
मिदं चूर्णं पुराणगुडमिश्रि
तं पीनस श्वासकासघ्नं रुचि
स्वरकरं परं व्योषादिवटी ४
व्याघ्री दन्ती वचा शिग्रु सुरसा
व्योषसिन्धुजैः सिद्धं तैलं नसि
तं स्यात् पूतिनस्यगदापहं व्याघ्री
तैलं ५ शिग्रुसिंही निकुंभा
नां बीजैः सव्योषसैन्धवैः वि
ल्वपत्ररसे सिद्धं तैलं ॥ ॥
स्यात् ॥

पूतिनस्यनुत् निकुम्भा दन्ती पू
तिनस्यनुत् नस्यात् शिग्रुतैले
६ घृतगुग्गुलुमिश्रस्य सिक्थक
स्य प्रयत्नतः धूमं क्षवथुरोगघ्नं
भ्रंशथुघ्नं च निर्दिशेत् ७ शुण्ठी
कणा बिल्व द्राक्षा कल्ककषाय
वत् तैलं पक्वमथाज्यं वा नस्यात्
क्षवथुनाशनं ८ नस्यं हितं नि
वृत्संज्ञनाभ्यां दीप्ते शिरःस्वेद
ने मल्पशस्त्र नस्ये कृते तीर
जलावसेकान् पीरेति भुंजीत
च मुद्गयूषैः ९ नासास्रावे घ्रा
णयोः चूर्णमवक्तं नाडादेयं पेच
पीडश्च पथ्याः नीहत्वा धूमादे
वदार्वीगिनकाभ्यां मांसं लाजं पथ्या
मत्राहिशोति १० प्रतिश्यायेषु स
र्वेषु गरहं वातविवर्जितं वस्त्रेण
वास्तगोविन शिरसो वेष्टनेक्षि
११ विडंगं सैन्धवं हिंगु गुग्गुलुः
समनः शिला वचेत्यचूर्णं मा
घ्रातं प्रतिश्यायं विनाशयेत्
१२ घृततैलसमायुक्तं शक्तुधू
मं पिबेन्नरः सधूमःस्यात् प्रति
श्याय कास हिक्काहरः परः
१३ प्रतिश्यायेषु सर्वेषु
पीतलं परमौषधं ॥ ।॥

प्रतिश्याये पिबेद्धूमं सर्वगन्ध
समायुतं १४ चातुर्जातकचूर्णं
वाघ्रेयं वा कृष्णजीरकं कृष्ण
जीरकमत्रकलौञ्जी १५ पुट
पक्वं जयापत्रं तैलसैन्धवसं
युतं प्रतिश्यायेषु सर्वेषु शीत
लं परमौषधं १६ जयात्र विज
या भंगेतियावत् पिप्पल्यः शि
ग्रुबीजानि विडंगमरिचानि च
अवपीडः प्रशस्तोऽयं प्रतिश्या
यनिवारणे १७ शिरसोऽभ्यञ्ज
नैः स्वेदैः नस्यैः कम्लेरोष्णभोजनैः
वमनैर्घृतपानैश्च नासार्शास
मुपाचरेत् १८ कृमिघ्नाये क्र
माः प्रोक्तास्तान् वै कृमिघ्ना
नि भेषजानि च बुद्धिमान् १९
रक्तपित्तानि शोथाश्च तथार्शा
स्यर्बुदानि च नासिकायां स्युरे
तेषां स्वं स्वं कुर्यात् चिकित्
सितं गृहधूमकणादारुक्षा
रनक्ताह्वसैन्धवैः सिद्धं शिख
रिबीजैश्च तैलं नासार्शसे हि
तं २० इति भावप्रकाशः
निकटं त्रि अदूरं तत ॥

पर्य्यायः अभ्यासः ६ सवेशः
७ अन्तः ८ अन्तिकः ९ सम
र्य्यादः १० सदेशः ११ अभ्यग्रः
१२ अभ्यर्णः १३ सविधः १४
उपकण्ठः १५ अभितः १६ इति
शब्दरत्नावली नेदिष्ठादिकपर्य्या
यः तलित् १ आसात् २ अ
वरे ३ उर्वशे ४ अस्तमीके
५ आके ६ उपाके ७ अर्वाके
८ अन्तमानां ९ अवमे १० उ
पमे ११ इत्येकादशान्तिक
नामानि इति वेदनिघण्टौ २
अध्यायः ॥
नित्यं त्री निरन्तरक्रियावच
ने तत्पर्य्यायः प्रसक्तं १०
आसक्तं ११ अलहं १२ इति
जटाधरः
निद्रालुः त्रि निद्राशीलः नि
द्रा विद्यते अस्य गौत्रादेत्यादि
नो आलुः इत्यमरटीकायां भ
रतः तत्पर्य्यायः तन्द्रालुः ४
इति जटाधरः निधिः पुं अज्ञा
तस्वामिक चिरनिखातस्वर्णा
दि यथा अधुना भूमौ चिरनिखा
तस्य सुवर्णादेर्निधिशब्दवाच्यत्वा
थिमत्रे विधिमाह राजा लब्ध्वा निधिं

दद्यात् द्विजेभ्योऽर्द्धं द्विजः
पुनः विद्वानशेषमादद्यात्
सर्व्वस्यासौ प्रभुर्यतः इतरे
ण निधौ लब्धे राजा षष्ठांश
माहरेत् अनिवेदितविज्ञातो
दाप्यस्तं दण्डमेव च उक्तल
तां निधिं राजा लब्ध्वार्द्धं ब्रा
ह्मणेभ्यो दत्वा शेषं कोषे नि
वेशयेत् ब्राह्मणस्तु विद्वा
न् वृत्ताध्ययनसम्पन्नः सदा
चारो यदि निधिं लभेत तदा
सर्व्वमेव गृह्णीयात् यस्माद
सौ सर्व्वस्य जगतः प्रभुः इत
रेण तु राजविद्वद्ब्राह्मण व्य
तिरिक्तेनाविद्वद्ब्राह्मणक्षत्रि
यादिना निधौ लब्धे राज्ञा षष्ठां
शमधिगन्त्रे दत्वा शेषं नि
धिं स्वयमाहरेत् यस्त्वधि
गतः अप्रख्यायमानं निधिं
योऽधिगच्छेत् राजा तद्धरेदपि
गं षष्ठमंशं प्रदद्यात् इति गौ
तमोऽपि निध्यधिगमो राजधनं न
ब्राह्मणस्याभिरूपस्य ब्राह्मणोऽप्य
ख्याता षष्ठमंशं लभेतान्ये क इति अ
अनिवेदित इति कर्त्तवि निधि अनिवे
दितस्यार्थो विज्ञातस्तु राज्ञा स्वयं निवेदि
त विज्ञातः पः क ॥

स्तु निधिं लब्ध्वा राज्ञे न निवेदि
तवान् विज्ञातश्च राज्ञा स सर्व्वं
निधिं दाप्यो दण्डश्च शक्त्यपेक्ष
या अथ निधेरपि स्वाम्यागत्य
रूपसंख्यादिभिः स्वत्वं भावय
ति तदा तस्मै राजा निधिं दत्वा
षष्ठं द्वादशं वांशं स्वयमाहरे
त् यथाह मनुः ममायमिति यो ब्रू
यान्निधिं सत्येन मानवः तस्या
ददीत षड्भागं राजा द्वादश
मेव वेति अंशविकल्पस्तु व
र्णकालाद्यपेक्षया वेदितव्यः
इति मिताक्षरायां व्यवहाराध्या
यः निपानं क्ली कूपसमीपे
शिलादिनिबद्धपशुपानार्थकृ
तकूपोद्धृताम्बुस्थानं तत्प
र्य्यायः निपानकं २ इति श
ब्दरत्नावली निपुणः त्रि को
[illegible]तमः तत् पर्य्यायः विज्ञा
निकः ३५ कुशली ३६ इति
शब्दरत्नावली नियमसेवा स्त्री
कार्त्तिकमासे नियमपूर्व्वक
भगवदाराधना यथा श्रीकृ
ष्णा नियमं विष्णोः कार्त्तिकेयः
क्षिपेन्नरः जन्मार्ज्जितस्य फलं ना
श्नुते ॥

ति नारद किञ्च नियमेन वि
ना चैव यो नयेत् कार्त्तिकं मु
ने चातुर्म्मास्यं तथा चैव ब्रह्म
हा स कुलाधमः तत्रोपक्रमका
ल श्लोकः श्रीकृष्णसत्यासंवा
दीय कार्त्तिकमाहात्म्ये आश्विन
स्य तु मासस्य या शुक्ला एकादशी
भवेत् कार्त्तिकस्य कुर्य्यादतन्द्रि
तः इति श्रीहरिभक्तिविलासे
१६ विलासः अन्यत् कार्त्तिक
शब्दे द्रष्टव्यं ॥

निम्बः पुं वृक्षविशेषः निम इ
ति भाषा तत्पर्य्यायः कीटः २३
मूकमालकः २४ इति जटाध
रः अस्य गुणाः निम्बः शीतो
लघु ग्राही कटुपाकोऽग्निवात
नुत् अहृद्यः श्रमतृट्कास
ज्वरारुचि कृमि प्रणुत् व्रण
पित्त कफ छर्द्दि कुष्ठ हृल्लास
मेहनुत् निम्बपत्रं स्मृतं नेत्र्यं
कृमि पित्त विषप्रणुत् वातलं
कटुपाकं च सर्व्वारोचक कुष्ठनु
त् नैम्बं फलं रसे तिक्तं पाके
तु कटुभेदनं स्निग्धं लघूष्णं
कुष्ठघ्नं गुल्मार्शः कृमि मेहनुत्

अथ महानिम्बः बकाइन इति
हिन्दीभाषा तत्पर्य्यायगुणाः
महानिम्बः स्मृतो द्रेका रम्यको
विषमुष्टिकः केशमुष्टि र्निम्ब
रकः कार्म्मुकः कीर इत्यपि म
हानिम्बो हिमो रूक्षस्तिक्तो ग्रा
ही कषायकः कफ पित्त कृमि
छर्द्दि कुष्ठहृल्लास रक्तजित्
प्रमेह श्वास गुल्मार्शो मूषिका
विषनाशनः इति भावप्रका
शः अयं शाखी नियमसेवाशा
ह्रात् एवं लेख्यः

निरस्तं त्रि निरुक्तं यथा दानर
त्नाकरे देवलः एकशाखास
कल्पा वा यदि वेदेरधीत्य च ष
ट्कर्म्म निरतो विप्रः श्रोत्रियो
नाम धर्म्मवित् इति व्यवहार
तत्त्वं निरर्थकं त्रि निष्फले तत्
पर्य्यायः विफले ३ इति
जटाधरः ॥

निरुद्धप्रकाशः पुं मेढ्रजात
क्षुद्ररोगविशेषः तल्लक्षणमा
ह वातोपसृष्टे मेढ्रे तु चर्म्म
संश्रयते मणिं मणिश्चर्म्मो
पनद्धस्तु मूत्रस्रोतो रुणद्धि च

निरुद्धप्रकशो तस्मिन्द्धार म
वेदनं मूत्रं प्रवर्त्तते जन्तोरस्म
णि विद्रियते न च निरुद्धप्र
कशं विन्द्यात् सरुजं वातसंज
भवं निरुद्धप्रकाशपदमार्ष
त्वात् अथ तस्यचिकित्सा नि
रुद्धप्रकशे नाडीं लोहीं सुभ
यतोमुखीं दारवीं वाजतुकु
तो घृताक्तां संप्रवेशयेत् परि
षिंचेद्वसां मज्जां शिशुमारवरा
हयो चक्रतैलं तथा योज्यं वा
तघ्नद्रव्यसंयुतं त्र्यहात् स्थूल
तरां सम्यक् नाडीं गर्भे प्रवे
शयेत् स्रोतो विवर्द्धयेदेवं स्नि
ग्ध मन्नंच भोजयेत् भित्वा वा
सेवनीं मुक्त्वा सद्यः क्षतवदा
चरेत् इति भावप्रकाशः ॥

निर्गुण्डी स्त्री नीलशेफालिका
तत् पर्य्यायः शेफालिका २
शेफाली ३ नीलिका ४ स
लिका ५ सुवहा ६ रजनी
हासा ७ निशिपुष्पिका ८
इति शब्दरत्नावली वृती वृ
त्तविशेषः निसिन्दा इति
भाषा तत् पर्य्यायः वि
न्धुकः १४ सिन्धुकं १५ सुर
सः १६ सिन्धुवारितः १७ सुरसा
१८ सिन्धुवारकः १९ इति च श
ब्दरत्नावली ॥

निर्जलैकादशी स्त्री ज्यैष्ठमा
सीयशुक्लैकादशी यथा पाद्मे
श्रीभीमसेन उवाच पितामह
शक्तोऽहमुपवासे कस्मिन् किं
ञ्चतो बहुफलं ब्रूहि व्रतमेकम
पि प्रभो श्रीव्यास उवाच वृषस्थे
मिथुनस्थेऽर्के शुक्ला ह्येकाद
शी हि या ज्यैष्ठमासि प्रयत्नेन सो
पोष्या जलवर्जिता स्नाने चाच
मने चैव वर्जयित्वोदकं बुधः उ
पयुञ्जीत नैवान्यद्व्रतभङ्गोऽन्य
था भवेत् उदयादुदयं यावद्व
र्जयित्वा जलं बुधः अप्रयत्ना
दवाप्नोति द्वादश द्वादशीफ
लं ततः प्रभाते विमले द्वा
दश्यां स्नानमाचरेत् जलं सु
वर्णं दत्वा तु द्विजातिभ्यो य
थाविधि भुंजीत कृतकृत्य
स्तु ब्राह्मणैः सहितो वशी प
र्वे कृते तु यत् पुण्यं भीमसे
न शृणुष्व तत् संवत्सरस्य
यामध्ये एकादश्यो

1035

भवन्ति हि तासां फलमवाप्नो
ति पुत्र मे नात्र संशयः इति
मां केशवः प्राह शङ्खचक्र
गदाधरः किंच धनधान्यवहा
पुण्या पुत्रभाग्यसुखप्रदा
उपोषिता नरव्याघ्र इति स
त्यं ब्रवीमि ते यमदूता महाका
याः करालाः कामरूपिणः द
ण्डपाशधरा रौद्रा नोपसर्पन्ति
तं नरं पीताम्बरधराः शङ्ख
चक्रहस्ता मनोजवाः अन्तका
ले नयन्त्येनं वैष्णवीं पुरीं किं
च तोयस्य नियमं यत्नात् कुरु
ते वैष्णवो जनः पलकोटिसुव
र्णस्य यामे यामे स पुण्यभा
क् स्नानं दानं जपं होमं यदस्मा
त् कुरुते नरः तत् सर्वं चाक्षयं प्रा
प्नमेतत् कृष्णस्य भाषितं किं
वा परेण धर्मेण निर्जलैकाद
श्यां नृपः उपोष्य सम्यग्विधि
ना वैष्णवं पदमाप्नुयात् किंच
यैः कृता भीमसेनेया निर्जलै
कादशी शुभा स्वकुलं तारितं
सर्वं कुलानीतं तथा प्रान्ते आ
त्मना सहितेनीतं वासुदेवस्य मन्दि
रे ॥
किंच आत्मद्रोहः कृतस्तैस्तु
र्यैरेषा नह्युपोषिता पापात्मा
नो दुराचारा दुष्टास्ते नात्र
संशयः किंच यश्च इमां शृणु
याद्भक्त्या यश्चापि परिकीर्त्त
येत् उभौ तौ स्वर्गमाप्नो हि ना
त्र कार्य्या विचारणा अथ
निर्जलव्रतविधिः यथाप्रा
ग् लिखितं कृत्वा संकल्पनि
यमं व्रते जलमादाय गृह्णी
यान्मन्त्रेणानेन वैष्णवः एका
दश्यां निराहारो वर्ज्जयिष्या
मि वै जलं केशवप्रीणनार्था
य अत्यन्तदमनेन च इति वर्ज्ज
येच्चाहोरात्रं विना चाचम
नार्थकं विना च प्राशने पा
दोदकस्यात्यन्तपावनं एका
दश्यां निशायां तु नित्यपूजां
विधाय हि हैमीं त्रैविक्रमीं
मूर्त्तिं स्नापयेत् पयः आदिभिः
वस्त्रादिकं समर्प्याथाभ्यर्च्य
गंधादिभिस्तुतो महाजागा
रं कुर्य्यात् तदग्रे नर्त्तनादिना
दिना प्रातः स्नानादि निर्वर्त्य त्रि
विक्रममर्च्चयेत् शय्यावस्त्राभ्रान्
विप्रेभ्यो दद्यात् तन्यापाद्यलंकृतान्
तत्र मन्त्रः ॥

देवदेव हृषीकेश संसारार्णव
तारक जलकुम्भप्रदानेन
यास्यामि परमां गतिमिति
दद्याच्च कनकं छत्रं वस्त्रयु
ग्ममुपानहौ जलपात्राणि दि
व्यानि विभवे सति वैभवं
भक्त्या विप्रान् भोजयित्वा पी
त्वाश्रात्तकराज्जलं सर्वदा
पीयमौनी सन् भुंजीत सह
बन्धुभिः इति श्रीहरिभक्ति
विलासे १५ विलासः। निर्णयः
पुं चतुष्पाद्व्यवहारांतर्गत
शेषपादः फयसला इति
पारसीयभाषा डिक्री इति
इङ्गरेजीयभाषा तद्विवरणं
यथा निर्णयः तत्र नारदः य
स्योचुः साक्षिणः सत्यं प्र
तिज्ञां स जयी भवेत् अन्य
थावादिनो यस्य ध्रुवस्तस्य प
राजयः स्वयमभ्युपपन्नो
पि स्वचर्यावसितोपि सन् क्रि
यावसन्नोप्यर्हति परं सभ्याव
धारणं सभ्यैरवधृतः पश्चा
त् राज्ञा शास्यः सम्यगास्तु तंप
स्य वादिनः प्रतिवादिनो वासा
क्षिणां स्वपक्षहानं साक्षि वि
नभुक्ति पापघ्नानां ॥

मध्यः स्वतमसमाने यस्य प्रति
ज्ञायाः सत्यत्वप्रतिपादकं स प
व जयी अन्यथा पराजित इति
प्रत्येतव्यं स्वयमभ्युपपन्नः आ
त्मनैवांगीकृतस्वपराजयः स्वच
र्यावसितः कंपस्वेदवैवर्ण्यादि
नापराजितत्वेनावधृतः क्रियाव
सन्नः साक्ष्यादिना प्राप्तपराज
यः परमनंतरं सभ्यावधारणं
सभासदां मिलितानामैक्यं परा
जितः इति निर्णयं अर्हेत स
भास्त्रविधिना शास्यः
निर्णयस्य फलमाह बृहस्पतिः
प्रतिज्ञाभावनाद्वादी प्राड्विवा
कादिपूजनात् जयपत्रस्या
दानात् जयी लोके निगद्यते
जयपत्रस्य लिखनप्रकारमा
ह स एव यद्वृत्तं व्यवहारेषु
पूर्वपक्षोत्तरादिकं क्रियाव
धारणोपेतं जयपत्रेऽखिलं
लिखेत् पूर्वोत्तरक्रियायुक्तं
निर्णयांतं यदा नृपः प्रदद्या
ज्जयिने पत्रं जयपत्रं तदुच्यते
कात्यायनः अर्थिवाक्यानि प्र
तिसारादिवचस्तथा निर्णयश्च
तथा तस्य यथा चावधृतं स्वयं प
तेद्यथातं ॥

लेख्यं यथापूर्वं निवेशयेत्
सभासदश्च ये तत्र धर्मशास्त्र
विदस्तथा तत्तु भाषोत्तरे क्रि
याच पत्रं साक्ष्यादिकं निर्णयो ज
यपराजयावधारणं निर्णयका
लावस्थितमध्यस्थाश्रोत्रादिकं
सर्वं लेखनीयं निजूपायस्यस
म्यक्त्वप्रदर्शनार्थं तथा हि भा
षोत्तरलिखनं हेत्वंतरेण पुनर्भा
यप्रत्यवस्थानानिषेधार्थं नहि
गृहीतस्य पुनः परिशोधितं
मयेति प्रत्यवस्थानं संभवति प्र
माणलिखनं तु पुनः प्रमाणा
न्तरोपन्यासनिरासार्थं तदाह
कात्यायनः क्रियां बलवतीं त्य
क्त्वा दुर्बलां योऽवलंबते स जये
ऽवधृते सभ्यैः पुनस्तां नाप्नुया
त् क्रियां निर्णीते व्यवहारे
तु प्रमाणं सफलं भवेत् लिखि
तं साक्षिणो वापि पूर्वमावेदि
तं न चेत् यथा पक्वेषु धान्येषु
निष्फलाः प्रावृषो गुणाः नि
र्णीते व्यवहाराणां प्रमाणमप्र
फलं तथा निर्णयोत्तरकृत्य
माह मनुः अर्थेऽपव्ययमानं तं
कारणेन विभावितं ॥

दापयेद्धनिकस्यार्थं दंडलेशं च
शक्तितः अपह्नवमाने अपलपंतं
कारणेन साक्ष्यादिप्रमाणेन
याज्ञवल्क्यः ज्ञात्वापराधं देशं
च कालं बलमथापि वा वयः
कर्मच वित्तं च दंडं दंड्येषु दा
पयेत् मनुः तीरितं चानुशि
ष्टं च यत्र क्वचन संभवेत् कृ
तं तद्धर्मतो विद्यात् न तद्भूयो
निवर्तयेत् अनुशिष्टं साक्ष्या
दिनिर्णीतं अत एव तीरितं प्रा
ड्विवाकादिभिः समापितं तद्विवा
दपदं पुनर्न निवर्तयेदित्यर्थः
यत्र त्वतीरितानुशिष्टयोरप्य
सेकृतत्वं मत्वा पराजयी पुन
र्द्विगुणं दंडमंगीकृत्य प्रत्यव
तिष्ठते तत्र पुनर्न्यायदर्शनमा
ह नारदः तीरितं चानुशिष्टं च
यो मन्येत विधर्मतः द्विगुणं दं
डमादाय तत्कार्यं पुनरुद्ध
रेत् असद्विचारे तु विचारांत
रमाह स एव असाक्षिकं हत
दुष्टं विमार्गेण च तीरितं अ
समस्तमतं दृष्टं पुनर्दर्शन
मर्हति असाक्षिकमित्यप्रमाणो
पलक्षणं याज्ञवल्क्यः ॥

उद्दृष्टांस्तु पुनर्दृष्टांस्तु पुनर्दृष्टा व्यवहारान्नृपेण तु सभ्याः सजयिनो दंड्या विवादाद्विगुणं दमं साति सप्तावसन्नानां दृष णदर्शने पुनः स्वचर्यावसितानां तु नास्ति पौनर्भवो विधिः साति वचनेन सम्यगवसिते न च प्रागवसादानां दोषदर्शने पुनर्न्यायदर्शनं स्वव्यापारेण विरुद्धभाषादिना प्रागवसादानां नास्ति पुनर्न्यायः बृहस्पति रपि पलायनादुत्तरत्वादन्यपत्ताश्रयेण च हीनस्य गल्पते वादो न स्ववाक्यजितस्य च मनुः बलाद्दत्तं बलाद्भुक्तं बलाद्या लिखितं च यत्तसर्वान् बलकृतानर्थानकृतान् मनुरब्रवीत् याज्ञवल्क्यः बलोपाधिविनिर्वृत्तान् व्यवहारान्निवर्तयेत् स्त्री नक्तमन्तरागारबहिर्ग्रामकृतांस्तथा मत्तोन्मत्तार्त्त व्यसनि बाल भीतादियोजितः असंबन्धकृतश्चैव व्यवहारो न सिध्यति उपाधि स्फुट मिति स्मृत्यपाणिः उपाधिर्भयादि रिति ज्ञानेश्वरः तन्मते भीतादियोजितं इत्यु

क्तवचनेन पौनरुक्तं वहिर्ग्रामः वहिर्देशः मत्तो मद्यादिना उन्मत्तो वातादिना व्यसनी द्यूताद्यासक्तः असंबन्धो वा दिनत्रिपुरुषव्यतिषिक्त उदासीनः अपिपद्यादस्वतंत्रो दासपुत्रादे ग्रेहणं तथा च नारदः स्वतंत्रोऽपि हि यत् कार्य्यं कुर्य्यादप्रकृतिं गतः तदप्यकृतमेवाहुरस्वातंत्र्यस्य हेतुतः कामक्रोधाभिभूतार्त्ता भय व्यसनपीडिताः रागद्वेषपरीताश्चैव या स्वप्रकृतिं गताः तथा दासकृतं कार्य्यमकृतं परिचक्षते अन्यत्र स्वामिसंदेशान्न दासः प्रभुरात्मनः पुत्रेण च कृतं कार्य्यं यत्स्यादच्छन्दतः पितुः तदप्यकृतमेवाहुर्दासः पुत्रौ च तौ समौ एतच्च कुटुम्बभरणातिरिक्तविषयं कुटुंबार्थेऽध्यधीनोऽपि व्यवहारं यमाचरेत् स्वदेशे वा विदेशे वा तं ज्यायान्न विचालयेत् इति मनुवचनात् कुटुम्बभरणार्थ भरणीयं अध्यधीनः परतंत्रः पुत्रदासादिः व्यवहारं ऋणादिकं ज्यायान्

1039

स्वतन्त्रः न विचालयेत् अत्र मन्येतेत्यर्थः तथा च नारदः स्वातंत्र्येत स्मृतं ज्येष्ठे ज्यैष्ठ्य गुणवयःकृतं अस्वतंत्राः प्रजाः सर्वाः स्वतंत्रः पृथिवीपति अस्वतंत्रः स्मृतः शिष्य आचार्य्ये स्वतंत्रता अस्वतंत्राः स्त्रियः सर्वाः पुत्रा दासाः परिग्रहाः स्वतंत्रस्तत्र तु गृही यस्य तत् स्यात् क्रमागतं गर्भस्थैः सदृशो ज्ञेयः अष्टमाद्वत् शिशुः बाल आषोडशाद्वर्षात् पौगंडोपि निगद्यते परतो व्यवहारज्ञः स्वतंत्रः पितरावृते जीवतोर्न स्वातंत्र्यं स्याज्जरयापि समन्वितः तयोरपि पिता श्रेयान् बीजप्राधान्यदर्शनात् अभावे च पूर्वजः परिग्रहाः अनुजीविप्रभृतयः तथा च बृहस्पतिः पितृव्य भ्रातृपुत्रस्त्री दासशिष्यानुजीविभिः यद्गृहीतं कुटुम्बार्थे तद्गृही दातुमर्हति कात्यायनः कुटुम्बार्थे मध्यक्षेण गृहीतं व्याधितेन वा उपप्लवनिमित्तं विद्यादापत्कृतं तत् कन्यावैवाहिकं

चैव प्रेतकार्य्ये च यत्कृतं एतत् सर्वं प्रदातव्यं कुटुम्बेन कृतं प्रभोः प्रभोरिति कर्त्तरि षष्ठी तेन प्रभुणा दातव्यमिति रत्नाकरः बृहस्पतिः यः स्वामिना नियुक्तोऽपि धनायव्ययपालने कुसीद कृषि वाणिज्ये निसृष्टार्थस्तु स मतः प्रमाणं तत्कृतं सर्वं लाभालाभव्ययोदये स्वदेशे वा विदेशे वा स्वामी तन्न विसम्वदेत् समस्तस्तस्य स्वामिन इत्यर्थः इति व्यवहारतत्त्वं ॥

निर्णीतः त्रि कृतनिर्णयः निश्चयविषयीभूतः तद्वैदिकपर्य्यायः निर्णे १ सन्नः २ मनुतः ३ द्विरुक्त ४ प्रतीच्यं ५ अपीच्यं ६ इति षड्निर्णीतान्तर्हितनामधेयानि इति वेदनिघण्टौ ३ अध्यायः ॥

निर्देश्य त्रि निर्देशकर्णीय यथा तथा हि अर्थीनाम साध्यार्थस्य निर्देष्टा तत् प्रतिपक्षस्तदभाववादी प्रत्यर्थी इति मितात्तरायां व्यवहाराध्याये सातिप्रकरणे ॥

निर्म्माल्यं क्ली देवोच्छिष्ट
द्रव्यं देवस्वत्वनिवृत्तिविशि
ष्टदेवदत्तं वस्तु तद्धारण
कालो यथा अथ निर्म्माल्यधा
रणं अत्रिस्मृतौ प्रातःकाले
सदा कुर्य्यान्निर्म्माल्योत्तारणं
बुधः तृषिताः पशवो वद्धाः
कन्यका च रजस्वला देवता
च सनिर्म्माल्या हन्ति पुण्यं पु
रा कृतं नारसिंहे श्रीयमो नौ
देवमाल्यापनयनं देवागारेसु
समूहनं स्नापनं द्वैसर्वदेवा
नां गोप्रदानसमं स्मृतं नारद
पंचरात्रेयः प्रातरुत्थाय विधा
य नित्यं निर्म्माल्य मोचनं नि
राकरोति न दरिद्रताच नाका
लमृत्युर्न च रोगमात्रं अरुणो
दयवेलायां निर्म्माल्यं धारयेत्तो
ज्ञेत् मातस्तु स्यान्महापा
त्वं घटिकामात्रयोगतः अ
ति धार्य्ये विजीयातत्तो
वज्रप्रहारवत् अरु
णोदयवेलायां धार्य्ये
तत् दसनेहमिं
घटियायां मतिक्रान्तौ त्वहं
पातकमावदेत् मुहूर्त्ते स
मतिक्रा॥ ॥ ॥॥

न्ते पूर्णे पातकमुच्यते अ
तिपातकमेव स्यात् घटिका
नां चतुष्टये मुहूर्त्तत्रितये पूर्णे
महापातकमुच्यते ततः परं
ब्रह्मवधो महापातकपंच
प्रहरे पूर्णानां यातेप्रायश्चि
त्तं ततो नहि निर्म्माल्यस्य
विलंवे च प्रायश्चित्त मथो
च्यते अतिक्रान्ते मुहूर्त्तार्द्धे
सहस्रं जपमाचरेत् पूर्णे
मुहूर्त्ते संजाते सहस्रं साष्टं
मुच्यते सहस्रत्रितयं कुर्य्या
त् घटिकानां चतुष्टये मुहू
र्त्तत्रितयेऽतीते अयुतं जप
माचरेत् प्रहरे पूर्णतां याते
याते पुरश्चरणमुच्यते प्रहरे
समतिक्रान्ते प्रायश्चित्तं न वि
द्यते इति श्रीहरिभक्तिविला
से ५ विलासः निर्म्मातः पुंसा
मः इति नानार्थसर्गशार्थे अ
मरः निवापः पुं मतोद्देशपकर्य्य
नं तत् पर्य्यायः निवपनं ४
पितृदानकं ५ इति शब्द
रत्नावली॥
निवास नेकस्त्यां अनि
निवासत् स्त्रि ति राछादनं

निवासयति यस्त्रिन्ने चीनां
मुकमिति हलायुधः इति
दुर्गादासः॥
निवृत्तात्मा पुं निषेधः यथा
कालमाधवीये वृद्धगार्ग्यः नि
षेधस्तु निवृत्तात्मा कालमात्र
मपेक्षते इति तिथ्यादितत्वं नि
वृत्तिः स्त्री प्रवृत्तिप्रागभा
वः यथा प्रवृत्त्युपाधिना विना
णं प्राप्तन् प्रागभावपवस्य
निवृत्तिनिराकरणात् साध्य
मानो निवृत्तिरुच्यते इत्येका
दशीतत्वे कलञ्जाधिकरणवि
चारः
निषा स्त्री निशाशब्दः प्रयमे
कवति यथा वाससचो वा निषा
ख्या च वासतेयी तमा निषो इ
ति रात्रिपर्य्याये त्रिकाण्डशेषः
निशा स्त्री मेषवृषमिथुनक
र्कट धनुर्म्मकर लग्नानि य
थाग्रजगापति घुर्भंचकर्म्मि
येविस्थ्यप निषा संज्ञाः स्त
ताश्चैते शेषा प्राग्ये दिनात्म
काः इति ज्योतिस्तत्वं नियमः
त्रिउभविष्टः यथा पादी॥

पादावस्पुंचयन्ती श्रीदैवका
स्मरणंति के निषण्णा पंकजे
पूज्या नमो देवी प्रिया इति ति
थ्यादितत्वं ॥
निष्क क उ माने मूर्द्धन्यषम
ध्यः क ड निष्कषते स्वर्णं
वणिक् इति दुर्गादासः॥
निष्कः पुं क्ली चत्वारः सुव
र्णाः चारिमोहर इति भाषा
यथाचत्वः सौवर्णिको निष्को
विज्ञेयस्तु प्रमाणतः इति मा
नवे ८ अध्यायः॥
निष्पताकध्वजः पुं स्त्री रा
ज्ञो पताकाशून्यदंडविशेषः
युक्तिकल्पतरुः तद्विवरणं
ध्वजशब्दे द्रष्टव्यं
निष्पद्यानं क्ली पदरहितवा
हनं तच्च नौकादिकं इति यु
क्तिकल्पतरुः तल्लक्षणादि
नौकाशब्दे द्रष्टव्यं ॥
निष्पावः पुं धान्यादीनां नि
स्तुषीकरणं तत् पर्य्यायः पू
तीकरणं ४ यथाधान्यादिनि
स्तुषीकार्य्ये वकुलीकरणादिषु
तथा च पूतीकरणे निष्पावः
पवनं पवः इति शब्दरत्नाव
ली राजाभिम्मोजे ॥

भटवास् इति भूंटवास इति
वा हिन्दीभाषा तत्पर्यायः
गुणाः निष्पावो राजशिम्बी
स्याद्वलकः श्वेतशिम्बिकः नि
ष्पावो मधुरो रूक्षो विपाके
म्लो गुरुः सरः कषाय स्त
न्य पित्तास्रमूत्रवात विबन्ध
कृत् विदाह्युष्णो विष श्लेष्म
शोथशुक्रनाशनः इति
भावप्रकाशः
निष्प्रवाणि त्रि नूतनवस्त्रं
तत्पर्यायः आहतं ५ अ
हतं ६ नववस्त्रं ७ इति श
ब्दरत्नावली॥
निसृष्टार्थः पुं धनायव्ययपा
लनादौ नियुक्तः यथा बृहस्प
तिः यः स्वामिना नियुक्तो
पि धनाय व्यय पालने कु
सीद कृषि वाणिज्यो निसृ
ष्टार्थस्तु स स्मृतः इतिविव
हारतत्त्वे पुरुषविशेषः
तस्य लक्षणं यथा धीरः स्थि
रमतिः सूरः स्वामिकार्य्यवि
धायकः स्वयोरूपप्रकाशी
च निसृष्टार्थः स उच्यते इति
संगीतदामोदरः
नीचः त्रि हीनजातिकर्म्मा

वर्व्वरः इत्यमरटीकायां भर
तः तत्पर्यायः हीनः १०
लघुः १४ तुच्छः १५ वेनकः
१६ इति शब्दरत्नावली
नीरेणकः त्रि धूलिशून्यभू
म्यादिः यथा नीरेणका भू
रभूदिति तत्पद्यरत्नाकरः
नीलः पुं अजमीढस्य राज्ञः
नीलिन्यां पत्न्यां जातः पुत्रः
यथा अजमीढस्य नीलिनी
नाम पत्नी तस्यानीलसंज्ञः
पुत्रोऽभवत् इति विष्णुपुरा
णे ४ अंशे १९ अध्यायः
नीलकुन्तला स्त्री गौर्य्याः स
खीविशेषः यथा सखी रत्न
सखी नाम जयादेवं सुविलि
नांतो निवार्य्योपरा माह सखी
सा नीलकुन्तला इति वृहद्ध
र्म्मपुराणे ६४ अध्यायः
नीलगलोपमः पुं नीलवर्ण
गणपतिः इति भूतडाम
रः अपि च नीलागललल्लो
लकालव्यालविलासिने ग
णेशाय नमो नीलकमला
मलकान्तये इति लीलाव
ती नीलध्वजः पुं राजविशेषः
अस्य पुरी माहिष्मती भार्य्या

ज्वाला कन्या स्वाहा लक्ष्मीशा
पाञ्चाला यथा अर्ज्जुनस्यह
योऽजत् पुरी माहिष्मतीं यदा
नीलध्वजेन वीरेण रक्षितां॥
दुर्गमंडितां नीलध्वजस्य महि
षी ज्वालानाम्नी सुमध्यमा सा
हा कन्या प्रसूतस्य सुन्दरी य
मितत् परा इति जैमिनिभारते
आश्वमेधिके पर्व्वणि १५
अध्यायः नीलपिंगला स्त्री गो
जातिविशेषः यथा गवां जाति
स्त्ववत्यामि शृणुष्वैकमनाहि
जप्रथमा गौरकपिला द्वितीया
गौरपिंगला तृतीया रक्तकपि
लाचतुर्थी नीलपिंगला पंचमी
शुक्लपिंगला सप्तमी चित्रपिं
गाक्षी अष्टमी बभ्रुरोहिणी नव
मी श्वेतैमी तपिंगाक्षी दशमी
श्वेतपिंगला तादृशा स्तेष्वनड्वा
हः कपिलास्तु प्रकीर्त्तिताः
इति वृहद्धर्म्मपुराणे उत्तर
खंडे १५ अध्यायः
नीलिका स्त्री क्षुद्ररोगवि
शेषः तल्लक्षणं यथा
कृष्ण मेवं गुणांवक्त्रे
गात्रे वा नीलिकां
विदुः ~~एवं ग्रागे~~ ॥ ॥॥

एवं ग्रणं नीरुजं तनुकं मंड
लं तच्चिकित् सा यथा
शिरावेधैः प्रलेपैश्च तथाभ्यंगै
रुपाचरेत् व्यंगंच नीलिकं वा
पि न्यच्छंच तिलकालकं वटां
कुरा मसूराश्च प्रलेपाङ्गना
शनाः व्यंगे मंजिष्ठयालेपः
प्रशस्तो मधुयुक्तया अथ
वा लेपनं शस्तं शशस्य रुधि
रेण च व्यंगघ्न तरुणत्वक्स्या
दजामूत्रेण पेषिता जातीफ
लस्य लेपस्तु हरेद्व्यंगं च नीलि
कां अर्कक्षीरहरिद्राभ्यां मर्दयि
त्वाप्रलेपनात् मुखकार्ष्ण्यं स
मंयाति चिरकालोद्भवं ध्रुवं
मसूरैः क्षीरसंपिष्टैर्लिप्तमास्यं
घृतान्वितैः सप्तरात्रात् भवेत्
सत्यं पुंडरीकदलोपमं वटस्य
पांडुपत्राणि मालती रक्तचन्द
नं कुष्ठं कालीयकं लोध्र मेभि
र्लेपं प्रयोजयेत् युवानपिडका
नां व्यंगानांच विनाशनं स्या
देतेन मुखं चापि वर्ज्जितं नीलि
कादिभिः कालीयकं कलंबक
इति
लोके युवानपिडका युवान
ने तत्र पिडका पृषोदरादित्वा।

त्वक्पत्रलोपः कुंकुमं चन्दनं
लोध्रं पत्रांगं रक्तचंदनं का
लीयक सुषीरंच मञ्जिष्ठा मधु
यष्टिका पत्रकं पद्मकं कुष्ठं
पद्मं गोरोचना निशा लाक्षा
दारुहरिद्रा च गैरिकं नाग
केशरं पलाशकुसुमंचापि
प्रियंगुश्च वटांकुराः मालती
च मधुच्छिष्टं सर्षपाः सुरभि
र्वचा चतुर्गुणपयः पिष्टैरेतै
रतसितैः पृथक् पचेन्मन्दा
ग्निनावैद्य स्तैलेप्रस्थद्वयोन्मि
तं वदनाभ्यंजनादेतद्व्यंगं नी
लिकया सह तिलकं माषकं न्य
च्छं नाशयेन्मुखदूषिकां पद्मि
नीकंटकं वापि हरेज्जन्मणिं
तथा विदध्याद्वदनं पूर्णचन्द्रस
दृशं सुन्दरं परमं वकुम् इति
लोके कालीयकं कलंव इति
लोके सुरभिर्वचा महाभरी इति
लोके कुंकुमाद्यं तैलं इति भाव
प्रकाशः नीली स्त्री वृक्षभेदः नील
र गाछ इति भाषा तत् पर्य्या
यः तूली ४१ तूलिका ४२
द्रोणिका ४३ इति ॥
शब्दरत्नावली॥

नीवारः पुं तृणधान्यभेदः
उड़ीधान इति बंगभाषा ती
नी इति हिन्दीभाषा तन्नाम
गुणाः प्रसाधिका तृणनीवा
रस्तृणान्त मिति च स्मृतं नी
वारः शीतलो ग्राही पित्तघ्नः
कफानिलकृत् इति भावप्रकाशः
नीहारः पुं हिमं तत् पर्य्यायः
निहारः ११ मिहिका १२
इति शब्दरत्नावली नुद पि
वधे णिनुदति अनुदीत् नुनो
ऽ इति दुर्गादासः॥
नृत य नर्त्ते पनृत्यति नर्त्ति
कः इति दुर्गादासः
नृसिंहः पुं महाविष्णुः तन्मं
त्रादि यथा अथ नृसिंहमंत्रः
निबन्धे उग्रं वीरं वदेत् पूर्वं
महाविष्णुमनन्तरं ज्वलंतं प
दमाभाष्य सर्वतोमुखमीरये
त् नृसिंहं भीषणं भद्रं
मृत्युमृत्युं वदेत्ततः नमा
म्यहमिति प्रोक्तो मंत्रराज
स्सुरद्रुमः अयं मंत्रो मायाद्य
दितोपि भवति तदा सर्व
फलप्रदः तथाच निबन्धे
सलेवा पुटि पोत स्यात्स

र्वकामफलप्रदः अस्य पूजा
प्रातः कृत्यादि वैष्णवोक्त पी
ठमन्त्रान्तं विधाय ऋष्यादिन्या
सं कुर्य्यात् शिरसि ब्रह्मणे ऋ
षये नमः मुखे ऽनुष्टुप् छन्दसे नमः
हृदि नृसिंहाय देवतायै नमः
ततः करांगन्यासौ चतुर्भिर्द्व
यं वर्णैः शिरस्त्वाद्वि रतैः
शिखाष्टाभिः समुद्दिष्टा
षड्भिः कवच मीरितं ताव
द्भिर्नयनं प्रोक्तं अस्त्रं स्यात्
करणान्तरैः ततो मंत्रन्यासः
शिरो ललाट नेत्रेषु मुख बा
ह्वङ्घ्रिसन्धिषु साग्रेषु कुक्षौ
हृदये गले पार्श्वद्वये पुनः
अपरांगे च ककुदि न्यसेद्व
र्णान् यथाक्रमं ध्यानं तु मा
णिक्याद्रिसमप्रभं निजरुचा सं
त्रस्तरक्षोगणं जानुन्यस्तक
रांबुजं त्रिनयनं रत्नोल्लसत्
भूषणं बाहुभ्यां धृतशंखचक्रम
निशं दंष्ट्रोग्रवक्त्रोल्लसत् ज्वा
लाजिह्वमुदारकेशरचयं वन्दे नृ
सिंहं विभुं एवं ध्यात्वा मानसैः स
म्पूज्य शंखस्थापनं कृत्वा वैष्णवो
क्तपीठपूजां कृत्वा पुनर्ध्यात्वावा
हनादि पंचपुष्पांज॥

लिदान पर्य्यन्तं विधायावरणपू
जा मारभेत् केशरे ष्वादिको
णेषु मध्ये दिक्षु च अंगानि पूजये
त् यथा उग्रं वीरं हृदयाय न
मः महाविष्णुं शिरसे स्वाहा
ज्वलंतं सर्वतोमुखं शिखायै
वषट् नृसिंहं भीषणं कवचाय
हुँ भद्रं मृत्युमृत्युं नेत्रत्रयाय वौ
षट् ततः पूर्वादिदलेषु गरुडं
शंकरं शेषं ब्रह्माणंच सम्पूजये
त् विदिग्दलेषु श्रियं ह्रियं धृ
तिं पुष्टिंच प्रणवादिनमोन्तेन
पूजयेत् तद्बहिः इन्द्रादीन् वज्रा
दींश्च संपूज्य धूपादि विसर्जनां
तं कर्म समापयेत् अस्य पुरश्चर
णं द्वात्रिंशल्लक्षजपः तथा च व
र्णलक्षं जपेन्मंत्रं तत् सहस्रं हु
तन्नुतैः पायसान्नैः मज्जुह्याद्वि
धिवत् पूजितेऽनले मंत्रान्तरं
यथा पाशः शक्ति नरहरि रंकु
शो वर्म्मफट् मनुः षडक्षरो न
रहरेः कथितः सर्वकामदः
अस्य पूजा प्रातः
कृत्यादि वैष्णवोक्तपीठन्यासां
ते पीठमन्त्रान्तरं विधाय ऋष्यादि

न्यासं कुर्य्यात् शिरसि ब्रह्मणे
ऋषये नमः मुखे पंक्तिछन्दसे
नमः हृदि नृसिंहाय देवतायै
नमः ततः करांगन्यासौ श्रां श्रं
गुष्टाभ्यां नमः ह्रीं तर्जनीभ्यां नमः
स्वा हा ह्लौं मध्यमाभ्यां वषट्
क्रों अनामिकाभ्यां हूं रूं कनि
ष्ठाभ्यां वौषट् फट् करतलपृ
ष्ठाभ्यां फट् एवं हृदयादिषु
ततो ध्यानं कोपादालोलजि
ह्वं विवृतनिजमुखं सोमसूर्या
ग्निनेत्रं पादादानाभिरक्तप्रभ
मुपरिसितं भिन्नदैत्येन्द्रगात्रं
शंखं चक्रासि पाशांकुशकु
लिश गदादारुणान्युद्वहन्तं भी
मं तीक्ष्णाग्रदंष्ट्रं मणिमयवि
विधाकल्पमीडे नृसिंहं एवं
ध्यात्वा मानसैः संपूज्य शंखं
स्थापनं कृत्वा वैसवोक्तपी
ठपूजां कृत्वा पुनर्ध्यात्वावाह
नादिपंच पुष्पांजलिदानपर्य्य
न्ते विधायावरणपूजामारभे
त् केशरेष्वग्न्यादिकोणेषु म
ध्ये दिक्षु च श्रीं हृदयाय नमः इत्या
दिना षडंगानि पूजयेत् ततः पत्रेषु
पूर्वादिषु शंखं चक्रं पाशं अ

कुशं वज्रं गदां खड्गं खेटकं च
मग्न्यादि नमोन्तेन पूजयेत्
तथा च निबन्धे श्रंगाहैसे वे
दिस्युक्तं शंखं पाशांकुशौ पुनः
वज्रं कौमोदकीं खड्गं खेटं
पत्रेषु पूजयेत् तत इन्द्रादी
न् वज्रादींश्च संपूज्य धूपा
दि विसर्जनान्तं कर्म समा
पयेत् अस्य पुरश्चरणं षट्
लक्षजपः श्रतथा च ऋत
लक्षं जपेन्मंत्रं हुतेन जक्ष
याक्ततः मत् सहस्रं समिद्धे
श्रैनोनोषयेद्गुरुना गुहे मंत्री
तरं यथा तकारो वह्निमारू
ढो मनुविन्दुसमन्वितः एका
क्षरो मन्त्रप्रोक्तः सर्वकामफल
प्रदः अस्य पूजा मातः कृत्या
दि वैसवोक्तध्यानाद्युनादिकं
सर्वं मन्त्रराजवत् विशेषस्त
ऋषि स्त्रि गायत्री छन्दो
नृसिंहो देवता तकारो वीजं
ॐकारः शक्तिः षड्दीर्घभा
जावीजेनांगकल्पना अस्य पु
रश्चरणं सहस्रलक्षजपः तथा
च सहस्रलक्षं जपेन्मंत्र मित्यादि
मन्त्रान्तरं यथा कल्पे जयद्वय
समुच्चार्य्य श्रीपूर्वं नृ॥

सिंहस्य पि अष्टाक्षरो मनुः
प्रोक्तो भजतां कामदो म
णि अस्य ब्रह्मा ऋषि गाय
त्री छन्दो नृसिंहो देवता षड्
दीर्घयुक्त वीजेनांगकल्पना
ध्यानार्च्चनं मन्त्रराजवत् अ
स्य पुरश्चरणं सहस्रलक्षजपः
वसुलक्षं जपेन्मंत्रमित्यादिव
चनात् इति तन्त्रसारः
नृसिंहचतुर्दशी स्त्री वैशाख
शुक्लचतुर्दशी तत्र व्रतवि
धिर्यथा वैशाखस्य चतुर्द
श्यां शुक्लायां श्रीनृकेश
री जात स्तदस्यां तत् पूजो
त् सवं कुर्वीत सव्रतं अथ
श्रीनृसिंहचतुर्दशीव्रत नित्य
ता हृहन्नारसिंहपुराणे श्री
भगवन्नृसिंह प्रह्लादसंवादे
व्रतविधिकथने वर्षे वर्षे तु
कर्त्तव्यं मम सन्तुष्टिकारणं
महागुह्य मिदं श्रेष्ठं मानवैर्भ
वभीरुभिः किंच विज्ञाय म
द्दिनं यस्तु लंघयेत् स तु पाप
भाक् एवं ज्ञात्वा प्रवर्त्तव्यं मद्दि
ने व्रतमुत्तमं अन्यथा नरकं या
ति यावच्चन्द्रदिवाकरौ तत्रापि
कालनिर्णयः तत्रैव सर्वेषा

मेव लोकानां मधिकारोऽस्ति
मद्भक्ते मद्भक्तिविशेषेण प्र
णिये मत् परायणैः अथ
तन्माहात्म्यं तत्रैव श्रीप्रह्लाद
उवाच नमस्ते भगवन् विष्णो
नृसिंहवपुषे नमः त्वद्भक्तोऽ
हं सुरेशानं त्वां पृच्छामि च
त्वत्तः स्वामिं स्त्वयि मे जात पत्रा
भक्तिर्बहुविधा कथं कथं ते
ऽहं प्रियो जातः कारणं वद मे
प्रभो श्रीनृसिंह उवाच कथया
मि महाप्राज्ञ शृणुष्वैकाग्रमा
नसः भक्ते येन कारणं वत्
स प्रियत्वस्य च तत् पुनः पुरा
कल्पे ह्यभूर्विप्रः किंचित्वेना
प्यधीतवान् नाम्ना च वसु
देवो हि वेश्यायां तत् परो
ऽभूः तस्मिन् जन्मनि नैव त्व
त्वं च कश्चित् सुकृतं कियत् सु
कृतं त्वत् मद्व्रतं चैकं वेश्यासंगा
तलालसः मद्व्रतस्य प्रभावे
न भक्तिर्जाता तवेदृशी श्री
नृसिंहाच्युत स्वामिन् कस्य
पुत्रेण किं कृतं वेश्यया
वर्त्तमानेन कथं तद्धि कृतं
मया आख्यानं विस्तरेणेदं वक्तु
मर्हसि साम्प्र॥

तं श्रीनृसिंह उवाच पुरावं
तीपुरे ह्यासीद्ब्राह्मणो वेद
पारगः तन्नाम वसुशर्म्मेति
सर्वलोकेषु विश्रुतं नित्यं हो
मक्रिया मेव करोति द्विजस
त्तमः ब्रह्मक्रियासु सततं स
र्वा सुकिल नत् परः अग्नि
होमादिभि र्यज्ञै रिष्टाः सर्वे
सुरोत्तमः तेनापि क्रियमाने
न नकृतं दुष्कृतं किंचित् त
स्यभार्य्या सुशीला भूद्विख्या
ता भुवनत्रये पतिव्रता सदा
चारा पतिभक्तिपरायणा
जज्ञिरे च सुताः पंच तस्यां हि
जवरात् ततः सदाचाराः सुवि
द्वांसः पितृभक्तिपरायणाः
तेषां मध्ये कनिष्ठस्त्वं वेश्या
यां नतपरः सदा ता सन्निवेश्या
मानेन सुरापाने कृतं त्वया
सदा पापरतस्त्वं हि नाकृथाथ्य
यनं भूषा विलासिनी गृहे नि
त्यं वसति हीभवमन पकदा
तद्गृहे ह्यासीत्त्वया महान् क
लिः ततः कलहभावेन भोजनन
कृतं त्वया अज्ञानान्मद्व्रतं चैव
अज्ञाना मुत्तमं व्रतमासहविया
हेन रात्रौ जागरणं कृतं ॥

वेश्यायाः अपि तत्र सर्वं अज्ञा
तेन तयासमं रात्रौ जागरो
तस्याः संजातं कायशोधनं
द्वयो र्मद्व्रतं ज्ञानमज्ञाना
नाद्भक्रपुण्यदं येन चीर्णं व्र
तेनायु मोदंते दिविदेवता
स्त्वमर्थितं नतो ब्रह्मा चक्रे
मद्व्रतमुत्तमं मद्व्रतस्य प्रभावेन
निर्म्मितं सचराचरं ईश्वरेणापि
तच्चीर्णं वधार्थं त्रिपुरस्य च म
हिम्नैव व्रतस्यास्य त्रिपुरं स
निपातितं अन्यैश्च वहुभि
र्देवै ऋषिभिश्च पुरातनैः
राजभिश्च महाप्राज्ञै विंहितं
व्रतमुत्तमं एतद्व्रतप्रभावेन
सर्वे सिद्धिमुपागताः वेश्या
पि मत् प्रियाज्ञाता त्रैलोके स
ख्यचारिणी ईदृशं मद्व्रतं व्र
तत्रैलोक्ये चैव विश्रुतं पूर्व
याश्च विलासिन्या व्रतमेत
दुपस्थितं प्रह्लादेन ते भक्ति
र्मोपि ज्ञाता ह्यनुत्तमा सा वे
श्यापाप्सराज्ञाता दिविभोगा
ननेकशः भुक्त्वा कामवि
लीनावत्वं प्रह्लाद विशिष्ट
र्मो कार्य्यार्थं मवतार सोम
त्कौरीतान् पृथक्त्वस्यो विधाय
सर्वकार्याणि ॥

1049

शीघ्रं मयि गमिष्यसि य इदं
व्रतमश्रेतं मविधास्यंति मा
नवाः न तेषां पुनरावृत्तिः
कल्पकोटिशतै रपि अपुत्रो
लभते पुत्रान् मद्भक्तांश्च सुवर्च
सः दरिद्रो लभते पुत्रो लक्ष्मी
धनदस्य च यादृशीं तेजस्का
मो लभेत्तेजो राज्यं भ्रष्ट राज्यमु
त्तमं आयुष्कामो लभेत्वायु
र्यादृशं तु शिवस्य च स्त्रीणां
व्रतमिदं साधु पुत्रदं भाग्य
दं तथा अवैधव्यकरं तासां
पुत्रशोकविनाशनं धनधा
न्य फलं चैव पतिप्रियकरं सुखं
सार्वभौमसुखं तासां दिव्यासो
ख्यं भवेत् ततः स्त्रियो वा पुरु
षा वापि कुर्वंति व्रतमुत्तमं ते
भ्यो ददाम्यहं सौख्यं भुक्तिमु
क्ति फलं तथा वहुनोक्तेन किं
वत् स व्रतस्यास्य फलस्य हि य
द्व्रतस्य फलं वक्तुं नाहं शक्नोन
शंकरः ब्रह्मा वत्सभिर्वक्तुं श्चना
लं स्याज्जीवितावधि किंच नत्रै
व व्रतविधि कथ्यते यथा प्रवृ
त्तिः स्यात् पातकस्य कलौ युगे
तथा तथा विधास्यंति मद्व्रतं
विरलं ॥

जनाः मद्व्रतस्य विधाने च म
तिनस्यात् दुरात्मानां सदापा
परतानांत पुरुषाणां विकं
र्मिनि विचार्य्यैव प्रकर्तव्यं
माधवे मासि मद्व्रतं प्राप्ते
भूतदिने यतस्य सर्वकल्मष
नाशने येनैव क्रियमाणेन
सहस्रद्वादशीफलं जायते
न मद्व्रतं चविन मानुषाणां म
हात्मनां तदंते च यश्चेदं शृ
णुयाद्भक्त्या व्रतं पापप्रणा
शनं तस्य श्रवणमात्रेण व्र
ह्महत्यां व्यपोहति पवित्रं
परमं गुह्यं कीर्तयेत् यस्तुमा
नवः सर्वान् कामानवाप्नो
ति व्रतस्यास्य फलं लभेत्
अथ तद्व्रतदिननिर्णयः आ
गमे वैशाखे शुक्लपक्षे च च
तुर्दश्यां महातिथौ सायं
प्रह्लादधिकार मम हि सुः प
रो हरिः सद्यः कटकटाशाहू
विस्मापितसभाजनः लीलया
सम्भगर्भी ताडकृतः प्राह भी
षणः देहेरे रवतारानो यत्न
तं समुपोषयेत् महापुण्यत
मं चंचमाय विसु प्रपूजयेत् हे
हे व्रतमसिंहे वैशाखस्य कृष्णपक्षस्य
चतुर्दश्यां समाचरेत्

सजन्मसंभवं पुण्यं व्रतं
पापप्रणाशनं किंच स्नाती
नदत्रयोगे तु शनिवारे हि
सहुते सिद्धयोगस्य योगेस्य यो
चलभ्यते देवयोगतः सर्वेरेते
स्तु संयुक्ते हत्याकोटिविना
शनं केवलेच सकर्मस्येमहि
तं फलकोटिभिः वैसवैन
तु कर्त्तव्या स्मरविद्धवतदृशी
अथ तद्व्रतविधिः दृशी अथ
तद्व्रतविधिः तत्रैव प्रातरु
त्थाय कुर्वीत नियमं मनसा
स्मरन् मामेवमहिने वदस
दंतधावनपूर्वकं नियममंत्रः
श्रीनृसिंह महोग्रस्त्वं दयां कु
रु ममोपरि अद्याहं ते विधा
स्यामि व्रतंनिर्विघ्नतां नयेति
व्रतस्थेन नवक्तव्यं महिनेपा
पिभिः सहमिथ्यालापो न
कर्त्तव्यः समग्रफलकांति
भिः स्त्रियं हतं विहायोत्रै
व्रतस्थेन महात्मना स्मर्त्तव्यं
मम रूपंच महिने सकले प्र
भे ततो मध्याह्नवेलायां नद्यां
दोवि सलेजस्ले पूर्वेवाद्देवखाते
वा तडागेवातिशोभने वैदिके
न चमंत्रेण स्नानं कुर्याद्विव
तात्ः ॥

मृत्तिका गोमयेनैव तथा
त्रीफलेन वा तिलैर्वा सर्व
पापघ्नैः स्नानं कृत्वा मह
त्मभिः परिधाय शुचि वस्त्र
नित्यकर्म्मसमाचरन् ततोगृ
हे समागत्य स्मरन् मां भक्ति
योगतः गोमयेन विलिप्या
थ कुर्यादष्टदलाम्बुजं क
लसं तत्र संस्थाप्य ताम्ररत्न
समन्वितं तस्योपरिन्यसेत् पा
त्रं तंडुलैः परिपूरितं हैमीमू
र्तिस्तु तत्रैव स्थाप्या लक्ष्मीस
मेवच पलेनचनदर्द्धेनतदर्द्धे
नवापुनः तथाशक्ति तथाका
र्य्यं वित्तशाठ्यविवर्जितैः पंचा
मृतेस्नाप्य पूजनेन समाचरेत
ततोब्राह्मणमाहूय तमाचार्य्य
मलोलुपं कुर्याद्धि सत्यसमा
युक्तं शान्तं दांतं जितेन्द्रियं ते
नैवकारयत् पूजां दृष्टा शा
स्त्रानुसारतः आचार्य्यवच
नाद्धीमान् पूजां कुर्याच्चरन्
व्रते तत्राद्ये प्रह्लादः पूजनी
यः तथाचाग्रमे प्रह्लादतो
शानाशाय या हि पुण्याचल
हेणी पूजयेत्तत्र यत्नेन हरेः
प्रह्लादमग्रतः वेदव्यासिंहे
उं

1051

कारयेत्तत्र पुष्पस्तवकशो
भित ऋतुकालोद्भवैः पुष्पैः
पूजोषः हेच यथाविधि उप
चारैः षोडशभि स्तन्मंत्रैर्नी
समभिरूप्य ततः पौराणि
कैर्मंत्रैः पूजनीयो विशेषतः
तत्रचन्दन मंत्रः चन्दनं शी
तलं दिव्यं चन्दनकुंकुममि
श्रितं ददामिते प्रत्नस्थं नृ
सिंह परमेश्वरेति पुष्पमंत्रः
कालोद्भवानि पुष्पाणि तुल
स्यादीनि पुष्पाणि तुलस्यादी
नि वै प्रभो पूजयामि नृसिंहे
शालक्ष्मासह नमोस्तुते धू
पं सर्वदेवस्ववल्लभं करोमिते
महाविष्णो सर्वकामसमृद्ध
ये इति दीपमंत्रः दीपः पाप
हराः प्रोक्तस्तमसांराशिनाश
नः दीपेन लभतेतेजस्तस्मा
दीपं ददामि ते इति नैवेद्य
मंत्रः नैवेद्यंसौख्यदं चारुभ
क्ष्यभोज्यसमन्वितं ददामि ते र
माकांत सर्वपापक्षयं कुरु इ
ति अर्घ्यमंत्रः नृसिंहाच्युतदे
वेश लक्ष्मीकांत जगत्पते अ
नेनार्घ्यप्रदानेन सफलाः स्यु

र्मनोरथाः इति पूजामंत्रः
पीताम्बर महाविष्णो प्रल्हा
दभयनाशकृत् यथाभूत
र्चनेनाथ यथोक्तफलदो भ
भवेति रात्रौजागरणं कुर्यात्
गीतवादित्र नर्तनैः पुराण
पठनं नृत्यं श्रोतव्यमत् कथान
कं ततः प्रभातसमये स्नानं कृत्वा
समाहितः पूर्वोक्तेन विधानेन
पूजयेन्मां प्रयत्नतः किंच म
हत्पुण्ये येनराजा ना ये जनिष्य
मत पुरः तां त्वमुद्धर देवेश
दुःसहात्भवसागरात् पात
कार्णवमग्नस्य व्याधि दुःखा
म्बुराशिभिः तीव्रैस्तु परिभू
तस्य महादुःखगतस्य मे करा
वलम्बनंदेहि शेषशायिन् ज
गत्पते श्रीनृसिंह रमाकांत
भक्तानां भयनाशन क्षीराम्बु
धिनिवास त्वं चक्रपाणे ज
नार्दन व्रतेनानेन मेदेव भु
क्तिमुक्तिप्रदोभव एवंप्रार्थ्य
ततो देवं विसर्ज्यच यथावि
धि उपहारादिकं सर्वमाचा
र्य्याय निवेदयेत् दक्षिणा
भिः ससंतोष्य ब्राह्मणांश्च
विसर्जयेत् मम ध्यानसमास

क्तो भुंजीत सह बन्धुभि रिति
इति श्रीहरिभक्तिविलासे १४
विलासः
नृम नीतौ मनरयति नी
तिः प्रापणा इति दुर्गा
दासः
नृ गि नीतौ गि न्हणाति
नीतिः नीतिः नीतिः प्रापणा
इति दुर्गादासः
नेमिः स्त्री कूपनिकटसमान
स्थानं यथा नेमि नैमी ति का
चस्मात कूपांतिकसमस्थले
इति शब्दरत्नावली॥
नैवेद्यं क्ली देवाय निवेदनी
यद्रव्यं तस्यच्युत पत्ति यथा
चतुर्विधं कुलेशानि द्रव्यं तेष
इसांचितं निवेदनात् भवेत
त्रि नैवेद्यं तद्दाह्रतं इति
कुलार्णवे १० उल्लासः तद्रव्या
णि यथा समितेन सम्पुहेन पा
यसेन समितेन सम्पुहेन पायसे
न ससर्पिषा सितो दनं सकद
लि दध्याद्येश्च निवेदयेत् इति
प्रपंचसारः नौः स्त्री नौका यथा
ततः प्रवासितो विद्वान् विदुरे
ण नरस्तदा पार्थानां दर्शयामा
सनोमारुतगामिनी सर्वगा॥

तस्मह्यं नावं यंत्रयुक्तां पता
किनीं शिवे भागीरथ्यांती
रे नवै ह्रिसंतिभि कृतां
इति महाभारते आदिपर्व
णि जतुगृहे १४९ अध्यायः
पते नयन्त्रवाहिता नौकाप्र
नीयते कलेर नौका इति इति
म्भोट इति च यस्याः प्रसिद्धिः
नौका स्त्री वारिरथः इति
त्रिकांडशेषः तत् पर्य्यायः त
रंडः ९ पादालिन्दा १० उत्
प्लवा ११ होडुः १२ वाधूः १३
वार्डुटः १४ वहित्रं १५ पोतः
१६ इति शब्दरत्नावली वह
नं १७ इति जटाधरः॥
न्यच्छं क्ली त्वग्रोगविशेषः
मेचेता इति भाषा तल्लक्षणं
यथा मंडलं महद्दल्पं वा श्या
वं वा यदि वा सितं सहजं नी
रुजं गात्रे न्यच्छं तदभिधीय
ते तच्चिकित्सा यथा शिरा
वेधैः प्रलेपैश्च तथाभ्यंगैरु
पाचरेत न्यच्छं लिम्पेत पयःपिष्टैः
कल्कैः क्षीरतरुद्भवैः त्रिभुवन
विजयापत्रं मूलं स्यात विरसशिला
पाचेभिः उद्धर्तनं विरचितं॥

1053

न्यछु वंगणापहं सिद्धं स्थावि
रस्य दृष्टदारो इति भावप्रक
शः न्यायः पुं
तर्कशास्त्रं यथा न्याय वैशे
षिकादिः स्यात तर्कविद्या प्र
तिष्ठिता तस्या मान्वीक्षिकी ज्ञे
या मत्वा न्यक्त्वानमुत्सृजेत् इति
शब्दरत्नावली न्याय्यं त्रि न्याया
गतधनादिः तत् पर्य्यायः क्रा
मोचितं १ इति शब्दरत्नावली

प

पः पकारः तस्य ध्यानं
यथा विचित्रवसनां देवीं द्विभु
जां पंकजेक्षणां रक्तचन्दनलि
प्तांगीं पद्ममाला विभूषितां म
णिरत्नादि केयूर हारभूषितां
मणिरत्नादि केयूर हारभूषि
तविग्रहां चतुर्वर्गप्रदां नित्यां नि
त्यानन्दमयीं परां एवं ध्यात्वाप
कारं तु तन्मन्त्रं दशधा जपेत् इति
वर्णोद्धारतंत्रे तस्य नामानि यथा
पः पुरुषप्रियता तीक्ष्णालोहितं
पंचमो रमा गुह्यकर्त्ता॥

निधिः शोषः कालरात्रिः सवा
हिना तपनः पालनः पालपद्म
रेणु निरंजनः सावित्री पातिनी
पानं वीरतन्त्रो धनुर्द्धरः दक्षिपा
र्श्वश्च सेनानीर्मरीचिः पवनः
शनिः उड्डीशं जपिनी कुंभः
लसं रेखा च मोहकः मूला द्वि
तीय मिन्द्राणी लोकांतो म
नः आत्मनः इति नानातं
त्रे पक्वं क्ली सिद्धतंडुला
दि तत्र पाकस्य विधि निषेधा
दि यथा पूर्वाशाभिमुखो भूत्वा
उत्तराशामुखेन वा पचेदन्नंच
मध्याह्ने सायाह्ने च विवर्जये
त् अग्न्याशाभिमुखे पक्वा अ
न्नं तत्त्वं विजानीहि पूर्वमुखो
धर्मकाम आग्नेयमुखो पित्र्
कामश्च पश्चिमे पैशाच्याभि
मुखे पक्वा दरिद्रो जायते नरः
यदा तु आयसे पात्रे पक्वमश्ना
ति यो द्विजः स पापिष्ठोपि भुंक्ते
न्नं रौरवे परिपच्यते ताम्रे प
क्वा बहुहीनिर्माणो भवति
वेष्टयं
स्वर्णपात्रे तु यत् पंकमश्नतं

तदपि स्मृतं पितृभ्यां प
क्वमन्नंच पितृभ्योन यशस्वि
नि पुंडरीकस्य यज्ञस्य लभते
फलमीप्सितं वातलेन तु पत्र
पक्वमभक्ष्या च कनिष्ठया
असगोत्रेण यत् पक्वं शाणि
ते तदपि स्मृतं अभक्तेन च पं
तु पक्वं स्त्रिया पक्वं तथैव च
पक्वपात्रेच यत् पक्वं तत्त स
र्वं निष्फलं भवेत् उडुंबरेण
काष्ठेन कदंवस्य दलेन च पा
लेन करमर्दन उदरावर्तकेन
च पक्वान्नं नैव भुंजीत भुक्त्वा
कृच्छ्रं समाचरेत् अप्रजाया
तु वनिता नाम्न्या यादेव तन्न
हे शालकास्य पंकान्नं पि
ठीयकस्य चैव हि कलि चंडा
लकस्यैव वन्ध्यावारुणकस्य
च भेरंड शाल्मलेर्वापि पक्वा
न्नं गर्हितं स्मृतं यदा मृन्म
यपात्रे तु पक्वं वैमार्वकालि
कं मासेप हेन यथा ह्योच तत्पा
त्रे विसृजेद्रुद्री धनुःपाके तथा
सिंहे मिथुने वा वरानने यः कु
र्याद्भोजनं देवि कृच्छ्रेणैव विशु
ध्यति पक्वदातु जलं दद्यात्
द्विवारं न प्रदापयेत् त्रिभागं पू
रयेत् पात्रं पश्चात्तोयं न दापये
त् पा इति मोदकं कन्दुपक्वं
च गव्याज्यं हुतसंयुतं पुनः
पुनर्भोजने च पुनरन्नं न दु
ष्यति इति च मत्स्यसूक्ते म
हातंत्रे ४२ पटलः ॥
पंकिलः त्रि सकर्दमः तत्प
र्यायः पंकयुक्तः ३ इति शब्द
रत्नावली कर्दमान्वितः ४ इति
जटाधरः ॥
पंक्तिः स्त्री सजातीयसंस्थान
विशेष तत् पर्यायः श्रेणिः
॥ संततिः १२ इति जटाधरः श्रे
णी १३ पालिः १४ पाली १५
वीथिका १६ इति शब्दरत्नाव
ली ॥ पच डु ञ ई ष पाके
पाको विक्लित्त्यवहृत्यापा
डु पक्त्रिमं ञ पचति पचते त
डुलान्योदनं लोकः ई पक्वा ष
पचा इति
दुर्गादासः ॥
पच ङ ई व्यक्तीकारे ई
पक्वा ङ पचते स्वगुणं ॥

भिल्लकः इति दुर्गादासः
पच ई ङ व्यक्तीकारे ई
पंच्यते ङ पंचते स्वगुणं भि
ल्लकः इति दुर्गादासः
पचर क ततो तति मिद वि
स्तारवचनं १ क मिद पं
चयति धीरो ग्रंथार्थं इति
दुर्गादासः
पज ई रोधे रोधस्त्रावरणं
पंजरः स्तोत्रधानरयं
इति दुर्गादासः ॥
पज्झटिका स्त्री छन्दोविशेषः
तल्लक्षणं यथा प्रतिपद यमा
कित छोडशमात्रा नवमगुरु
त्वविभूषितगात्रा पज्झटिका
पुनरत्र विवेकः क्वापि न म
ध्यं गुरुगणेन पकः उदाहर
णं यथा तरलवतंसाश्लिष्टस्क
न्धश्लथतरपञ्झटिकाकटिबन्धः
मौलिचपल शिखिचन्द्रकवृन्दः का
लिय शिरसि ननर्तमुकुन्दः इति छ
न्दोमंजर्यां मात्रावृत्ताख्ये ५ स्तव
कः वृद्धचंटका इति तट्टीका
पंचतत्वं क्ली पंचमकारं तट्टी
काणं एवं लिखितं वैसवानोय
था तत्वज्ञान मिदं ॥
प्रोक्तं वैसवे शृणु यत्नतः
गुरुतत्वं मंत्रतत्वं मनस्तत्वं सु
रेश्वरि देवतत्वं ध्यानतत्वं पंच
तत्वं वरानने तत्रादौ श्रीगुरो
स्तत्वं स्वेहाद्वदामि पार्वति
सर्वेषां वर्तिकायुक्तं देहस्य
प्रसितेजसं गुरुणा मंत्रदा
नेन तत् सूत्रे दीपितं भवेत्
देवताया शरीरं हि मंत्रा
दुत्पद्यते ध्रुवं अत एव
हि तस्यात्मा देवरूपो न सं
शयः ईश्वरस्य तु यद्वीर्यं
तदेवत्रतयात्मकं तेन व
र्णात्मकं देहं जंतो रेव न सं
शयः यत्र वर्णाः सर्ववर्णमया
स्ते परमेश्वरि वर्णितत्व मिदं
देवि सर्वस्वं मम यद्भवेत् स
यं देवो न चान्योऽस्ति निर्मि
लो देवरूपकः सर्वत्र देवतां
ध्यायेत् तृण गुल्मलतादिषु
ध्यानेन लभते सर्वं ध्यानेन वि
श्वरूपकः ध्यानं न सिद्ध्यति
इति ते कथितं तत्वं वैसवस्या
सुरेश्वरि यज्ज्ञानादमरत्वं च
विश्वरूपो भवेन्नरः ते नरा न
हि गच्छंति कदाचिद्यममंदिरं

इति निर्वाणतंत्रे १२ पटलः
पंचपक्षी मुं पारिभाषिकप
क्षिपंचकद्वारा त्रिकालबोध
क मन्त्रग्रंथः यथा प्रणम्य
श्रीमहादेवं सर्वशास्त्रविशा
रदं नविष्यद्दर्थबोधाय पप्र
च्छुर्मुनयो उदा तेषां वचनमा
कर्णानिजगाद् महेश्वरः त्रिका
लज्ञानबोधार्थं पंचपक्षीपटे
प्रदर्श्यते अनेन शास्त्रसारेणलो
केकालत्रयंप्रति वलावला
निरूप्यतेसर्वकार्येषु निश्चि
तं आगतं पृच्छकंदृष्ट्वा दैव
ज्ञः सावधानतः प्रयत् करो
तिकर्माणि तस्मात् सर्वं वि
चारयेत् उर्द्धावलोकने जीव
स्तथोर्द्धो तन्मूलके समद
ष्टौ भवेद्धात रेता श्चिंताप्रभे
दतः तत्र ललाटे पुत्रचिंता
स्यात् कामचिंता च कंटके
वाहुभ्यां वस्त्रचिंता च व्याधि
चिन्तातथोदरे कटौ विच्छेद
चिंता च शत्रुचिंता च गुह्यके
दुःखचिंताभवेत् पादे पतेषि
ताप्रभेदकाः अपरं च अतरं
पतिभूक्तं च दिदिवतदिनानि

च कालं वर्णं वलं मित्रं
स्थानमूलादिकं क्रमात् आ
दृष्टप्रश्नलग्नेभ्यः प्रथमात
रतोऽपि वा पृच्छकस्य वचः
श्रुत्वा ग्राह्योवर्णः स्वरस्तथा
स्वरेण कल्पयेद्धारं वारान्
पक्षीप्रज्ञापने पक्षिणोज्ञा
यते वाक्यं वाक्याच्चफलसं
भवः अकारादि ओकारांताः
स्वराःपंच प्रकीर्तिताः भुक्त्य
र्थं कल्पयेद्रूपं स्वरा स्तेपवि
रूपिणः अकारं श्येन आख्या
त इकारो वायसश्चैव एकार
स्ताम्रचोलकः ओकारो नील
कंठश्च स्वरास्तेपक्षिसंज्ञकाः
अकारः पूर्वदिग्भागे इकार
श्चैव दक्षिणे उकारः पश्चिमे
ज्ञेय एकारश्चोत्तरे तथा पो
सम्यानेषुसर्वेषु उकारस्तुप्र
कीर्तितः शकुनानां क्रियाग
त्या दृते युद्धे जयाजयौ प्रा
कृश्येनः पिंगलो याम्ये पश्चि
मेकाक उच्यते उत्तरे ताम्रचूड
श्च कलापी मध्यगः स्मृतः उ
न्नेणान्तरके हीनान् ककारादी
न् विन्यसेत् अकारादिषु॥

हान्तान् स्थानेकैकं षट् पविक्र
मात् अस्वरे क छ ड ध वर्णा
ध भवाश्च भवंति हि खज
ढ नमम षा वर्णा इकारेपरिकी
र्तिताः गफताः पयषावर्णा
उस्वरे स्युर्यथाक्रमं घटथाः
फरसा एते वर्णा एस्वरमात्र
गाः च ठद वलहा वर्णा ओस्व
रे परिकीर्तिताः प्रथमे रवि
भौमौ च द्वितीये चन्द्र चन्द्रजौ
तृतीये जीववारश्च चतुर्थे
भृगुवासरः पंचमे मन्दवार
श्च पक्षिणां क्रमयो लिखेत्
नंदाभद्राजयारिक्ता पूर्णा
व तिथयः क्रमात् अका
रे मेष सिंहालिः इः कन्या
युग्म कर्क्कटाः उकारे चाप
मीनौ च एकारे च तुला वृषौ ओ
कारे मृग कुंभौ च एवं राशिं
च संलिखेत् स्वराधःस्थापये
त् खेटान् राहो र्वीपस्तनाय
कः अकारे सप्त नक्षत्राणि रेव
त्यादिक्रमेण च पंच पंच इका
रादेव मृते स्वरोदये प्रथमे चा
श्विनीषट् पंचनक्षत्र मुच्यते अतः
क्रमात् द्विषट्चैव पंचपंच ॥च

तारकाः स्थानांच क्रमेण
वदेवताः परिकीर्तिताः इ
श्वरः पवनश्चैव इन्द्राकाशः
सदाशिवः प्राच्यां पृथ्वीगुरु
श्चैव याम्यां शुक्रो जलंतथा
अंगारकः पश्चिमेऽग्निर्बुधोवा
युरुत्तरे सूर्यपुत्रस्त
थाकाशो उर्द्धमेवं लिखेत्ततः
क्षितौ ब्रह्मा जले विष्णु स्तथा रु
द्रो हुताशने ईश्वरः पवने चै
व तथाकाशे सदाशिवः भू
तो मयूरः कुजश्च कुक्कुटो व
ले मानकः वलिभुक् श्येनको
ष्यानो भविष्यंतो स्तनिश्चितं
श्येनो हिरण्यवर्णश्च पिंगलः
शुक्लवर्णकः काको रक्तोऽसि
तश्चित्रः कुक्कुटः श्यामलः पि
खी काको वलीयान् सर्वेभ्यस्त
स्मात् श्येनो हि दुर्वलः कुक्कुटो
दुर्वलस्ताभ्यां पिंगलस्तेभ्य उ
नकः सर्वेभ्यो दुर्वलः पक्षीनील
कः सर्वेभ्यो दुर्वलः पक्षीनील
कंठो नसंशयः वलीमयुरात् कु
मस्तु ताम्रचूडस्तथो वली एतेभ्यो
वलवान् श्येन अतणां वायसो व
ली मित्रमयूरः श्येनस्य मयूरस्या चापं

गलः ताम्रचूडस्य सुहृदौ मयूर
पिंगलौ तथा वायसस्यापिमि
त्रं स्यात् शिखी भवति सर्वदा
सुहृदौ पिंगल श्येन मयूरारु
णशेखरौ काक
श्येनाश्च पिंगलस्य च विद्विषः
मयूरस्य रिपू नित्यं सर्वदा श्ये
नवायसौ भवतः श्येन काकौ
हौ ताम्रचूडस्य विद्विषौ का
कस्य शत्रवो नित्यं पिंगलश्ये
न कुक्कुटाः उर्द्धदृष्टिर्भवेत् ।
जीवो त्वधोदृष्टिस्तु मूलकं स
मदृष्टिर्भवेद्धातुरेते चिंताप्रभे
दकाः श्येनो मूलं तथा कुजा
जीवो धातुश्च वायसः कुक्कु
टो मूलजीवौ च मूलधातुः शि
खिरपि श्येनो नरो वधूः
कुजः पुरुषो वायस स्तथा
कुक्कुटः स्त्री पुमांश्चैव शिखी
नपुंसकस्तथा श्येन कुजौ
द्विजश्रेष्ठौ महीपालस्तु वाय
सः ताम्रचूडो वणिक् शूद्रो
नीलकंठस्तथांत्यजः यत्तथात्
पिंगलो ज्ञेयो द्विपदौ श्येनवाय
सौ ताम्रचूडोनखी शृंगी शिखं
डीपतित्तवकः ॥

श्येनो मुखं कंठबाहू कुजो व
तस्तु वायसः कुक्कुटः पृष्ठभा
गाः स्यात् शिखी पादयुग्मं
क्रमात् श्येना भूम्यां धनं तेषं
पिंगलो जलपंकयुक् वाय
स स्तृणसंज्याते कुक्कुटो भा
स्मनाहृते श्येनः शिखी गृहा
र्थे वन्युस्थानेषु निश्चितं स
ग्रामे श्येन कुजौ तु वायसो
वन्यु माश्रयात् कुक्कुटः पर
देशेच परग्रामे तथा शिखी
कुजस्तु दशाहस्ते च त्वहं क्रो
शेतु कुक्कुटः द्विक्रोशेतु तथा का
कः श्येनः क्रोशेतु एवं तः म
यूरो योजने चेति तथैवं दु
रनिश्चयः भूक्रौ च मासे ग
मने च पतौ राज्येपि नाति
लयनं तु समे श्रोते च वर्षे
शाकुनस्य चर्या कालप्रमा
णं मुनयो वदंति शुक्रे चन्द्रे
गुल्म वल्ली लता कन्द्रे बुधे
तथा पत्रं गुरौ फलं सूर्ये मूलं च
रविजे कुजे शुक्रे चन्द्रे भवेद्रौप्यं
बुधे स्वर्णं महाघनं गुरौ रत्न
युतं हेम सूर्ये मौक्तिकमेव च
भौमे ताम्रं शनौ लोहं ॥

ग्रहावहीनि कीर्तयेत् एतेषां
धातुभेदं च वारणा शुद्धयक्र
मात् शुक्रे चन्द्रे जलाधारो दे
वतावसति गुरौ रवौ चतुष्प
दस्थाने कुजे मिष्टकानिल
यो बुधे दग्धस्थाने कुजे प्रो
क्तं शनौ राहौ च वाल्मभूः श्म
मीभिर्हिरके स्थाने नष्टभूमिं
विलोकयेत् रवौ सोमे च भेरु
ण्डो मयूरो वायसः शनौ पारापु
धः शिखी शुक्रे काककुजो ग
रौ तथा कुज कृष्णविडुत्तौ क
मोऽयं शुक्ल कृष्णयोः यस्य वा
रस्यायं पक्षी तदादिं गणये
द्बुधः दिनपती कार्यकृत्पीम
श्चपती बलप्रदः दिनेषु तत
था कृष्णे दिनेषु पश्चादुत् शु
क्ले रात्रिषु योजयेत् बालः
कुमारस्तरुणो वृद्धो मृत
इति क्रमात् घटिका षट्
चैवं द्विफलमेषां कुमुदौ पि
तं किंचिल्लभकरो बालः कुमा
रस्त्वर्द्धलाभदः तरुणो राज्य
दो वृद्धो हानिदो मृत्युदो मृतः
भोजनं गमनं राज्यं निद्रा ॥

मरण मेव च पक्षांतरे भवेत् क्र
मे शुक्ले स्यात् क्रमशो विदुः प
तिताय क्रमशो ज्ञात्वा फलंक्रया
त् यथा तथा गणयेत् पं
चपक्ष्यादौ ज्ञात्वा नगणाद्य पि
शुक्लपक्षे ततः कृष्ण पक्षे
भोजनं मरणं चैव निद्रा रा
ज्यं तथैव तथैव च गमनं पं
चपक्षाणां कृष्णपक्षे क्रमादि
वा राज्ये सुभिक्ष महालोभे न
ष्टलाभे सदा जयं रोगमुक्तिम
हालाभं पतितानां भूक्तिलत
णां अनायासेन दृष्टिः स्याद्दृ
ष्टधनसंचयः भूला तो रोगना
शश्च यात्रासिद्धौ रणे जयः
दूराद्यागमनं योगमनं योगः
प्रयाणे पतितलक्षणे राज्यो
दये यदि प्रश्नो लाभार्थं स्वस्थ
लाभदः रुजानां चिररोगः स्या
त् यावे हानिः तयो रणे पू
रे ग्रामप्रवेशं च गमनं काल
हे तथा मन श्चैवलमारोग्यं ग
मनेषु विचारयेत् राज्यलाभो
जयं सौख्यं अलोभे रोगना
शनं दुर्भिक्षं वज्रवृष्टिश्च
पतितानां राज्यलक्षणे यात्रा
हानि रमावृष्टिः ॥

कार्याहानि स्वदर्शनं व्याधिस्तु
दीर्घरोगस्तु पतितानां सुसिल
तानां अपमृत्युभयं चैव सर्वका
र्यविनाशनं एतदेव फलं क्रमा
त्‌ पतितानां एतदेव फलं मृत्युल
तां श्येने भोक्तरि काकस्त
पोथोराजा भुजंगभुक्‌ स्वप्ना
वस्थागतः कुजं परास्तत्‌ ताम्र
प्रेश्वरं काके भोक्तरि केकीत
पोथः स्यात्‌ पिंगलो नृपः
ताम्रचूडस्तथा स्वापी श्येनः
कालवशं गतः मयूरे भोक्त
रि तथा कुजो यात्रावशं गतः
महीपः कुक्कुटः श्येनः स्वा
पी काको वशं गतः
कुजे भोक्तरि पोथस्तु कुक्कु
टः श्येनको नृपः काको निद्र
वशं यतो मयूरो मरणं गतः
कुक्कुटे भोक्तरि श्येनः पोथो
राजा तु वायसः शिखीनिद्रा
वशं यातः पिंगलः कालमा
प्नुयात्‌ इति शुक्लपक्षस्य दिवा
क्रमः शुक्लस्य रात्रिक्रमस्तु
स्वरोपि यथा अत्रुमोदिते उ
त्सोदितेन ओमित्येवायुः इत्ये
व ज्ञेयो एवमुक्तोसि श्येनेभो
क्तरि॥

कुजः स्यात्‌ पोथः काको मही
पतिः ताम्रचूडो निद्रितस्तु शि
खी कालवशं गतः मयूरे भो
क्तरि श्येनः पोथः कुजो म
हीपतिः स्वप्नावस्थां गतः
काक स्ताम्रचूडो मृत स्तथा
कुक्कुटे भोक्तरि शिखीमहा
गमन माप्नुयात्‌ श्येनो मही
पतिः कुजः स्वापी काको मृ
तिं गतः काके भोक्तरि या
त्रायां ताम्रचूडः शिखी नृ
पः निद्रायां रमते श्येनः कु
जः कालवशं गतः कुजे भो
क्तरि यात्रायां वायसं कुक्कुटो
नृपः नीलकंठ स्तथा स्वापी
श्येनो मृत्युवशं गतः इति
शुक्लपक्षस्य दिवाक्रमः कृ
ष्णपक्षस्य रात्रिक्रमस्तु स्वरो
पि यथा अर्द्धस्वरोभोः गोक
थिपुर्ष पः कानखिगुः उः पन्नोह
रिः विस्तस्तालोकः इत्युक्तं पक्षि
णांकार्य्यं लाभालाभं शुभाशु
भं येन विज्ञानमात्रेण त्रिकाल
ज्ञो भवेन्नरः नावज्ञक्तिशास्त्रा
णि पक्षिनामनेकशः यावन
मृत्युतेपक्षिशकुने पोकरादितं इति

श्रीमहादेवविरचितं पंचपक्षि
शाकुनं समाप्तम्‌
पंचमी स्त्रीं विद्याविशेषः
तद्विवरणं यथा कामं विसयु
तं देवि शक्तिमायेन्दु मेवच
महामायां ततः पश्चात्‌ वाग्भ
वं बीजमुद्धरेत्‌ विसयुतं अ
कारयुक्तं त्रितयेः शक्तिरे
कारः माया ईकारः वियद्वि
न्दु स्ततः पश्चात्‌ कालो नकु
लि रेवच मायाक्षरेण संयुक्त
नादविन्दु कलान्वितं पप्रथ
मं कामराजस्य वीजं परमदु
र्लभं वियद्विसयुतं कामो
हंसः शक्तिस्ततः परं महामा
या ततः पश्चात्‌ सम्प्रावतीति
कथ्यते हंसो हंकारः एत
द्वितीयं कामकूटं मात
नं शिवबीजंच वायुबीजं त
तः परं इन्दुबीजं ततः पश्चा
त्‌ महामाया समुद्धरेत्‌ इति
तृतीयं इयं मधुमती शिवबी
जं तथा कामं इन्दुं देवी नियो
जयेत्‌ महामाया ततः पश्चा
त्‌ शक्तिकूटं समुद्धरेत्‌ देवी
सकारं वाग्भवं प्रथमं॥

कूटं शक्तिकूटं तु पंचमं मध्य
कूटत्रयं देवि कामराजं मनोह
रं कथिता पंचमी विद्या त्रैलो
क्यसम्भवोदया ईश्वरउवाच
शृणु देवि महाभागे शक्तिकू
टं सुदुर्लभं वाग्भवं प्रथमं कू
टं कामराजं त्रिकूटकं शक्ति
कूटं प्रवक्ष्यामि तव स्नेहात्‌ वि
शेषतः जीवं प्राणोमहादेवि
मादनं तदनंतरं इन्दुबीजं ततः
पश्चात्‌ भुवनेशीतु पंचमं जीवं
सकारः प्राणो हकारः इति वा
शक्तिकूटं अथ वादेवदेवेशि
सौभाग्यायास्तु वाग्भवं कूटत्रयं
कामराजं शक्तिबीजंच पूर्ववत्‌
पुषाणाक्ता महादेवि पंचमीप
रमेश्वरी अस्या वाग्भवं कूटं हि
त्वा सौभाग्यायाः प्रथम कूटं
वाग्भवं कूटं त्रितयेः कामराज
कूटत्रयं पंचस्या एव वामनेत्रा
त्रिकूटं वा भगादिकूटमेव वा
अविद्या सिद्धिदा विद्या सर्वदोष
विवर्जिता भग पकारं एते
नाष्टधा पंचमी वाग्भव श
क्तिकूटभेदेन यामले
द्विविधा पंचमी॥

विद्या पंच पंचाक्षरी परा मध्ये
षट्क्षरी चैव शक्तिश्च त्र्यक्षर
री षडिति कामराजविद्याया
मध्यकूट मित्यर्थः शक्तिरि
ति कामराजस्य शक्तिकूट मि
त्यर्थः एषा चतुर्थी वाग्भव
कूटभेदात् एतयोः कामराज
स्य तृतीयकूटं तत्रैव काम
बीजं महेशानि शिवबीजं ततः
परं तदधो हंसबीजं तु इन्दुबी
जं विचिंतयेत् महामाया ततः
पश्चात् कूटं परमदुर्लभं ए
षा पूर्ववदुद्धृत्य अन्या चतुर्थी
तथा तत्वबोधे कामाख्या परा
शक्ति संस्थानकूटरूपिणी म
हामाया तथाच तंत्रे कामबी
जं महेशानि शंभुबीजं ततः प
रं तदधश्चन्द्रबीजं तु पृथ्वीबी
जं ततो लिखेत् तदन्ते च म
हामाया कूटं परमदुर्लभं एषा
पूर्ववदुद्धृत्य अन्याचतुर्थी ते
न षट्त्रिंशद्रूपिणी पंचमी है
समाहेश्वरे वामकेश्वर विद्यायां
कूटं वाग्भवमुत्तमं एकारादि
वाग्भवं तत् कूटं वाग्भव मुत्त
मं एकारादि॥

वाग्भवं तत् सौभाग्यायाश्च वाग्भ
वं एषा च पंचमी विद्या त्रैलो
क्यवशकारिणी श्रीक्रमेण
तासां चैव विद्यानां प्राणा स्मृ
ताः वरानने रमां मायां हंसबीजं
वाग्भवाद्ये नियोजयेत् शक्त्यं
ते तु महादेवि हंसं मायां र
मां तथा एभिर्युक्तेन देवेशि
विद्याजपन माचरेत् जपश्च
सप्तवारमेवदीपन्यां तथा द
र्शनात् एतासां पूर्वोक्त श्रीक्र
मोक्त विद्यानां पंचस्थानविशे
षोयथा रमां मायां हंसबीजं
वाग्भवाद्ये नियोजयेत् शक्त्यं
तेतु महेशानि हंसं मायां रमां
तथा कामराजत्रये देवि क
कारं शक्तिसंयुतं मायाबिन्दु
समायुक्तं सूर्यकोटिसमप्रभं
प्रथमं कामकूटस्य चाद्ये नि
योजयेदिदं वान्ते वह्निसमा
युक्तं वामनेत्रविभूषितं नाद
बिन्दुसमायुक्तं श्रियो बीजमु
दाहृतं द्वितीये द्वितीयं काम
बीजं तज्जपेदन्त्याच स्वरवि
र्गाणां वह्निसंयुक्तं वामनेत्रवि
भूषितं नादबिन्दुसमायुक्तं माया
बीजं॥

प्रकीर्तितं मधुमती जपे
ज्ञापि सर्वकामफलप्रदा
इति तंत्रसारः
रागिणीविशेषः साच वसंत
रागस्य प्रिया यथा वसंती
पंचमी हौली बहारी रूपमं
जरी रागिण्यो ऋतुराजस्य
वसंतस्य प्रिया इमाः अस्या
ध्यानं यथा संगीतगोष्ठीषु
गरिष्ठभावं समाश्रितागायेन
संप्रदायैः खर्वांगिणी नूपुर
पादपद्मा सा पंचमी पंचमवे
द वेद्यी इति संगीतदर्पणः पं
चमीव्रतं श्री माघशुक्लपंच
मारभ्य षट्वर्षपर्यंतं प्रतिमा
सीयशुक्लपंचम्यां श्रीकर्तव्यता
यमविशेषः तत् प्रयोगो यथा
तत्रादौ कृतनित्यक्रियाप्रजमाना
कुशहस्ताचमनं स्वस्तिवाच
नपूर्वकं संकल्पं कुर्यात् वि
ष्णु र्नमोऽद्यमाघे मासि शुक्ले
पक्षे पंचम्यां पुत्रपौत्राद्यव
नवच्छिन्नसंतति महदैश्वर्य
सौभाग्यारोग्य सौन्दर्याद्वैध
व्याप्राप्तिपूर्वक विष्णुलोकप्रा
प्तिकामा अद्यारभ्य॥

षड्वर्षपर्यंतं प्रतिमासीय
शुक्लपंचम्यां गणपत्यादिनाना
देवता सलक्ष्मीकवासुदेवपूजा
पूर्वक भविष्यपुराणोक्तकथा
श्रवणरूप षट्पंचमीव्रत महं
करिष्ये इति संकल्प सूक्तं पाठ
येत् ततः सामान्यार्घ्यादि आस
नशुद्धि भूतशुद्धि मातृकान्यास
करांगन्यासांतं कृत्वा गणेशादी
न् संपूज्य लक्ष्मी नारायणं च य
थाशक्ति पूजयेत् ततो भोज्यो
त्सर्गं कृत्वा प्रणमेत् अथक
था शेषशय्यासमासीनं लक्ष्मी
धृतपदाम्बुजं योगनिद्राविनि
वृत्तं कस्य नारदः परिपृच्छति के
नोपायेन भगवन्नारीदुःखं न वि
न्दति सौभाग्यारोग्य सौन्दर्य पु
त्रपौत्रादिकं लभेत् इत्युक्तो मा
धवः शुक्ले लक्ष्मीमुख निरीक्षण
ईगिताकारतत्वज्ञा पद्मा पद्मा
लयवल्लभा वल्लभाज्ञां पुरस्कृत्य
प्रीता वचनमब्रवीत् श्रीरुवाच
षट्पंचमीव्रतं सम्यक् सर्वदु
ताप पापनाशनं सौभाग्यारोग्यसौ
न्दर्यपुत्रपौत्रप्रदं माघे मा
सि सिते पक्षे पंचमी याम्शुभा॥

शिवात्मकं चिंतयेत् पश्चि
मे चाद्यं द्वितीयं च तयोन्तरे
अघोरं दक्षिणे देवं पूर्वे
तत्पुरुषं तथा ईशाने म
ध्यतो ज्ञेयं चिंतयेद्धृदि तत्
परः इति निर्वाणतंत्रे ९ प
टलः अन्यत् षडाम्नायश
के द्रष्टव्यं ॥
पंचीकरणं क्ली पंचभूतानां
भागविशेषेण मिश्रीकरणं
यथा पंचीकरणेन आकाशा
दिपंचस्वैकैकं द्विधा समं विभ
ज्य तेषु दशसु भागेषु मध्ये
प्राथमिकान् पंचभागान् प्र
त्येकं चतुर्धा समं विभज्यते
षां चतुर्णां भागानां स्वस्वद्वि
तीयार्द्धभागं परित्यज्य भागा
न्तरेषु संयोजनं तदुक्तं द्विधा
विधाय चैकैकं चतुर्धा प्रथ
मं पुनः स्वस्वेतरद्वितीयांशे
योजनात् पंच पंच ते इति अ
स्याप्रामाण्यं नाशंकनीयं त्रि
वृत्करणश्रुतेः पंचीकर
णस्याप्युपलक्षणत्वात्
पंचानां पंचात्मकत्वे समानेपि
तेषु च वैशिष्ट्यात् तद्वादस्तद्वा

द इति न्याये न आकाशा
दिव्यपदेशाः संभवंति
तदानीमाकाशे शब्दोऽभि
व्यज्यते वायौ शब्दस्पर्शौ अ
ग्नौ शब्दस्पर्शरूपाणि अप्सु
शब्दस्पर्शरूपरसाः पृथि
व्यां शब्दस्पर्शरूपरसगन्धा
श्च एतेभ्यः पंचीकृतेभ्यो भू
तेभ्य भूर्भुवः स्व र्मह र्जन
स्तपः सत्यमित्येतन्नामका
नामुपर्युपरि विद्यमानानां
अतल वितल सुतल रसा
तल तलातल महातल पा
ताल नामकानामधोधो वि
द्यमानानां लोकानां ब्रह्मा
ण्डस्य तदन्तर्गतचतुर्विधस्थू
लशरीराणामन्नपानादीनां
चोत्पत्ति र्भवति इति वेदां
तसारः पठ गतौ पठति
इति दुर्गादासः पठ क
ति षि क पाठयति विधि
दीप्तौ इति दुर्गादासः पठ
त् क वेष्टने ग्रंथने इत्यन्ये
पठयति मालां मालिकः इति
दुर्गादासः पठ वाचि पठ
ति श्लोकं धीरः इति दुर्गादा
सः

पड इ उ. गत्यां ई पंडते
उ. पंडते इति दुर्गादासः
पड इ क संहतौ इक पंडयति
संहतौ राशीकरणे इति दु
र्गादासः ॥
पण उ. व्यवहृतौ स्तुतौ व्यव
हारे उ. पणते पणायति पणा
यते आर्यान्तत्वादुभयपद मि
ति वोपदेवः प्राणानामपणिष्ट
सौ अत्र कर्मणि षष्ठी स्तुतौ तप
णायति पणायते विष्णुं धीरः अ
त्रेत्व ह्वयो र्वृयो रेव आयस्याप्र
सिद्धे आत्मनेपदमेव अपणि
ष्ट पैणायिता पणिषीष्ट प
णिष्यते आणिष्यत इति दुर्गादा
सः पत ल कपैश्वर्ये गत्योः ऐश्वर्य
मिश्वरीभावः गतिरिह पतनं पा
तयति पत्रं वृतात् इति
दुर्गादासः
पत य उ. ऐश्वर्ये य उ. पत्य
ते ऐश्वर्यमेश्वर्यमिश्वरीभावः
इति दुर्गादासः तत
ल ज गत्यां ऐश्वर्ये
ल अपतत्
ज पातः पतः गति
रिह पतनं पतति पत्रं ॥

वृतात् इति दुर्गादासः
पताका स्त्री ध्वजं निशान
इति भाषा तत्पर्यायः पता
का ५ जयंती ६ वैजयंतिका ७
कदली ८ कन्दुली ९ केतुः १०
कदका ११ क्षौममशुलं १२
इति शब्दरत्नावली चिह्नं १३
इति जटाधरः ॥
पतितः त्रि द्वादशवार्षिकव्र
तेनाशुपाप्युक्तः तस्य पौर्द्ध
देहिकविधि र्यथा पूर्वोक्त
वाल्महादेः दीक्षायोगाद्वादि नि
षेध स्तदानीमेव वत्सरा
न्ते तु सर्वमौर्द्धदेहिकं कुर्य्या
त् गोब्राह्मणहतानां च पति
तानां तथैव च ऊर्द्धं संवत्स
रात् कुर्य्यात् सर्वमेवोर्द्धदे
हिकं इति हेमाद्रौ षट्त्रिंश
न्मतात् एवं म्लेच्छीकृताना
मपि गयाश्राद्धमपि कार्य्यं
ब्रह्महा च कृतघ्नश्च गोघ्नाती
पंचपातकी सर्वे ते निष्कृतिं
यान्ति गयायां पिण्डपातनात्
इत्यग्निपुराणात् एवं आत्मापि
क्रियते पतितानां तु गते सं
वत्सरे क्वचित् देशधर्म्म ॥

प्रमाणत्वात् गयाकूपे सव
न्धुभिः मार्त्तण्डपादमूले वाश्रा
द्धं हरिहरौ स्मरन् सर्पापदेहत्य
ष्टः तत्र वर्षमध्ये कृत्य मुक्त
मपरार्के वायुपुराणे सुकृप
तेन द्वादशं कुर्य्यात् श्राद्धं
न वत्सरं द्वादशाहानि वा
कुर्य्यात् सुक्ते च प्रथमेऽहनि
छागलेयः नारायणबलिः का
र्य्या लोकगर्हाभयान्नवैः तथा
तेषां भवेच्छौचं नान्यथेत्यत्र
वीयमः व्यासः नारायणं स
मुद्दिश्य शिवं वा यत् प्रदी
यते तस्य शुद्धिकरं कर्म त
द्भवेन्नैतदन्यथेति स चात्र
चान्द्रादि प्रायश्चित्तं कृत्वा
कार्य्यः तदुक्तं हेमाद्रौ षट्
त्रिंशन्मते कृत्वा चान्द्राय
णं पूर्वं क्रिया कार्य्या य
थाविधि नारायणबलिः का
र्य्यो लोकगर्हाभयान्नवैः पि
ण्डोकगर्हाभयान्नवैः पिण्डोदक
क्रियाः पश्चात् वृषोत्सर्गादि
कं च यत् एकोद्दिष्टानि कुर्वीत
सपिण्डीकरणं तथा हिवोदासी
येद्दहनात् तत्र पतिते च म्रूते

शुद्धे प्राजापत्यं स्त्रषोडशम
ते चापत्यरहिते कृच्छ्राणां नवति
चरेत् इत्याह इदं प्रायश्चित्तं हि पि
त्रादिविषयं ईद्रिये रपरिस्यका
ये च मूढा विषादिनः घातयंति
स्वमात्मानं चे उलादिहताश्च ये
तेषां पुत्राश्च पौत्राश्च दयया सम
भिश्रिताः यथाश्राद्धं प्रवर्तंते वि
सोनाम प्रतिष्ठितं तथा ते सं प्र
वक्ष्यामि तमाद्रौ तेनैसोक्तः त
त्रैव बौधायनोऽपि नारायणबलिं
व्याख्यास्यामोऽभिशस्त पतित
स्यात्मघातिनां ब्राह्मणह
ननां च द्वादश वर्षाणि त्रीणि
वा राशिमरणं यत्र यस्य तत्र तत्र
कुर्वीतेति गरुडपुराणेऽपि तच
ण्डालादिभ्यो मृत्यो दग्धपारी
रं प्रेतस्य संस्थाप्यास्थीनि यत्न
तः प्रायश्चित्तं तत्कर्तव्यं पुत्रेश्च
न्द्रायणत्रयं इत्युक्तं मदनरत्ने
ब्राह्मण हननोञ्च द्वादशव
र्षाणि त्रीणि वा कुर्वीतेति
मदनरत्ने ब्राह्मे प्रमादादपि
निः शोकु स्त कस्माद्धि पिशे
दितः चण्डालैर्ब्राह्मणैः श्रोत्रै
र्निहतो यत्र कुत्रचित् तस्य

दाहादिकं कार्य्यं यस्मात् प
तितस्तुमः चान्द्रायणं न मह
च्छ्रद्वयं तस्य विशुद्धये यद्वा कृ
च्छ्रान् पंचदश कृत्वा त्रिविधि
ना दहेत् बुद्धिपूर्वमतोऽनान्त
त्रिंशत् कृच्छ्रं समाचरेत्
इत्युक्तं स्मृतिरत्नावल्यां तद्दि
गुणं प्रायश्चित्तं कृत्वा अर्वाग
ब्दात् सर्वं कार्यमित्युक्तं आ
त्मनो घातकस्यार्थं चरेच्चान्द्रा
यणद्वयं तप्तकृच्छ्र च तत्कं च
त्रिंशत् कृच्छ्राणि वा पुनः अ
र्वाक् संवत्सरात् कुर्यात् द
हनादि यथोदितं कृत्वा नारा
यणबलि मतिमत्वा तदाशुष
इति इदं चात्मवधनिमित्तं त
ज्ञातिवधप्रायश्चित्तेन समुच्चि
तं कार्यं अत एव बौधायनेनो
क्तं द्वादश वर्षाणि श्रीणि वेति
मदनपारिजाते स्मृत्यर्थसारे च
ब्रह्महादीनां तद्योग्यप्रायश्चि
त्तं कृत्वा नारायणबलिः का
र्य्य इत्युक्तं एवं स्वेच्छीकृताना
मपि यत्तु कश्चिदाह पुत्रकृतेन
प्रायश्चित्तेन पितुः पापनाशो माभू
भावः आत्मघातेत्त वचनादस्तु महा
पातके तु कथं॥

स्यादिति स स्वयमेव आत्म
वधप्रायश्चित्तस्य ज्ञातिवधनि
मित्तेन समुच्चयं वदन् इद
यदृत्य एव नहि ज्ञातिवधनि
मित्तं पुत्रकर्तृक सर्वप्रायश्चि
त्तादिविधिवापत्तेः प्रागुक्तबौ
धायनवचनाच्चेति दिक् इदं
प्रायश्चित्तं नाहिताग्नेरेव प्राय
श्चित्तानर्हाणां तु पतितोदक
मात्रं कार्यमिति केचित् मद
नपारिजातादिस्वरसोऽप्येवं व
स्तुतस्तु नदर्शनर्हयो वचने
नुपादानात् अविशेषात्तत्रापि
नारायणबलि र्गयाश्राद्धं चेति
युक्तं पतितोदकविधिस्तु मि
ताक्षरायां जातिविषय इत्यपरे स
यथा हेमाद्रौ ब्राह्मे पतित
स्य तु कारुण्यात् यस्तु शि कुर्व
न्मिहृति स हि दासीं समाहूय
सर्वगं दत्तवेतना अस्मदुच्चट
हस्तान्ता यथावृत्तं ब्रवीमपि
हे दासि गच्छ मूल्येन तिलाना
नय सत्वरं तोयपूर्णं घटं च मं
सतिलं दक्षिणामुखी अपवि
ष्ट्वा वामेन चरणेन ततः दि
प कीर्तयेः पातकीसंज्ञां वे

पिवेति मुक्तवेश निपाम्य तस्य वाक्यं सालहृस्मूत्वा करोतितत् एवं कृते भवेन्मुक्तिः पवित्र पतितानां न चान्यथेति इदं च मन्महे कार्यं पतितस्य दासी मृताक्ति पद्म चन्द मध्यवर्ज्जयेदेतावताय मुपचरितो भवतीति मदनरत्ने विस्तृतं इदं वालत्यागिविषयं आत्मत्यागिनः पतितास्ते नापि चोदकमाभाजः स्युविस्तुप क्रम्य विस्मृता पतस्याक्षिधा नादित्तिगोतुः उपलत्याग्या त् सर्वेषामिति तु युक्तं इति निर्णय सिन्धौ ४ परिच्छेदः ॥

पद्य पज गत्यां पद्मपद्यौ त् ज पाद्यः पद्यः इति दुर्गादासः

पद्य ई क गत्यां ई क पं पद्यति इति दुर्गादासः

पद्यादिगुग्गुलं पुं ईषधविशेषः यथा पथ्या विभीतमलकीफलानां पलं क्रमेण हि गुणाभिवृद्धं प्रस्थानं शुद्धवपलं कुमारणां द्रोणे जले संस्थितमेकतोऽवशेषं कथितं कषायं भांडे पक्वेन तत् पुनरेव लौहे अमृतवल्केर्वत्मार्द्धं द्रव्यात् द्रव्याणि संचूर्ण्य पलार्द्धकानि विडंग दंती त्रिफला गुडूची कृष्णा त्रिवृन्नागरकोषणानि यथेष्टवेलं मनरस्य भोज्ये हितं वु पानानि च भोजनानि निषेव्यमानो विनिहन्ति रोगान् मग्रधसीं नूतनविज्जितांचद्धीहान मुग्रं जठराग्निगुल्मं पाडुत्व कंडूत्व विकारवक्तं पथ्यादिको गुग्गुलु रेषनाम्ना ख्यातः स्त्रियं वप्रमितप्रतावं वलेन नागेन समं मनुष्यजवेन कुर्यात्तरुणेन तस्य म्युः प्रकर्ष विदधाति च त्वेवलं तथा पुष्टिकरो विषघ्नः तत्तस्य सन्धानकरो विशेषाद्रोगेषु शस्तः सकलेषु तज्ज्ञैः इति भावप्रकाशः

पद स्थैर्य्ये पदति इति दुर्गादासः

पद य ई ङ गत्यां यङ पद्यते ई पन्ना इति दुर्गादासः

पद तक ङ गतौ कङ

1071

पदयते इति दुर्गादासः पद्माकरः पुं पद्मजनकजलाशयः तत् पर्य्यायः सरोजिनी ६ इति जटाधरः सरोजिनीवरः ७ तडागः ८ तटाकः ९ सरसं १० सरः ११ सरकं १२ इति शब्दरत्नावली ॥

पद्मिनीकंटकः पुं क्षुद्ररोगविशेषः पद्मकाटा इति भाषा तल्लक्षणं यथा कंटकैराचितं वृद्मिनीकंटकप्रख्यैस्तदाख्यं कफवातजं आचितं व्याप्तं पद्मिनीकंटकप्रख्यैः पद्मिनीनालकंटकसदृशैः तदाख्यं पद्मिनीकंटकनामकं तच्चिकित्सा यथा पद्मिनीकंटकेरोगे छर्दयेन्निम्बवारिणा तेनैव सिद्धं साक्षौद्रं सर्पिः पाने प्राशयेत् निम्बारग्वधकल्केवा कुरूद्वर्त्तनं हितं चकृशीतेन निम्बोद्वर्तकाथेन गोघृतं पचेत्ततस्तु निम्बस्य कृतमालस्य पत्रकैः कल्कैर्भूयः पचेत् सिद्धं तत् पिबेत् पलसंमितं पद्मिनीकंटकाद्रोगान्मुक्तो भवति ॥ नान्यथा इति निम्बादिघृतं इति भावप्रकाशः ॥

पन ङ ईडे ईडः स्तुतिः पनायति पनायते विश्वं धीरः आर्यो तन्वाडुभयपद मिति वोपदेवः अरेत आयस्यास्मिपदे आत्मनेपद मेव ङ अपनिष्ट पेने पनिता पनिषीष्ट पनिष्यते अपनिष्यते इति दुर्गादासः

पनसः पुं फलवृक्षविशेषः काठाल इति भाषा तत् पर्य्यायः ११ चंपालुः १२ कंटकीफलः १३ रसालः १४ मृदंगफलः १५ पानसः १६ इति

पनसिका स्त्री क्षुद्ररोगविशेषः स च कर्णमध्यजातः तल्लक्षणं यथा कर्णस्याभ्यंतरे जातां पिडकां मुग्रवेदनां स्थिरां पनसिकां तां तु विद्याद्वातकफोत्थिता तच्चिकित्सा यथा भिषक् पनसिकां पूर्वं स्वेदयेदथ लेपयेत् कल्कैः मनः शिलाकुष्ठ निशातालकदारुभिः पक्वां विद्राय तां भिषक् व्रणवत् समु ॥

पाठयेत् इति भावप्रकाशः ॥ पव पतौ उ पवर्गशेषोपधः पवति इति दुर्गादासः पय ङ गतौ ङ पयते इति दुर्गादासः

परिकर्त्ता पुं अनूढज्येष्ठे विवाहस्य याजकः इत्युद्वाहतत्त्वं

परिचरणकर्म्म क्ली परिचर्य्या तद्वैदिकपर्य्यायः इरज्यति १ विधेम २ सपर्य्यति ३ नमस्यति ४ दुवस्यति ५ ऋध्नोति ६ ऋणद्धि ७ ऋच्छति ८ सपति ९ विवासति १० इति दश परिचरणकर्म्माणः इति वेदनिर्घण्टौ ३ अध्यायः ॥

परिदायी पुं अनूढज्येष्ठेन तत्कनिष्ठाय कन्यादाता यथाहारीतः ज्येष्ठेऽनिर्विष्टे कनीयान् निर्विशन् परिवेत्ता भवति परिविन्नो ज्येष्ठः परिवेदनीया कन्या परिदायी दाता परिकर्त्ता याजकस्ते सर्वे पतिताः इत्युद्वाहतत्त्वं परिपाटिः स्त्री अनुक्रमः तत्पर्य्यायः क्रमः १ इति जटाधरशब्दरत्नावल्यौ

परिप्लुतः त्रि जलादिप्लावितः यथा आर्द्रां जहि नेयं क्षौवीसलिलेन परिप्लुता इति मार्कण्डेये देवीमाहात्म्ये १ अध्यायः ॥ परिभूतः त्रि अविज्ञातः तत्पर्य्यायः अभिभूतः १ इति जटाधरः अपमानितः २ इति शब्दरत्नावली परिमोक्षः पुं मलत्यागः यथा पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद हिंसाया निर्ऋतेर्मृत्योर्निरयस्य गुदं स्मृतः इति श्रीभागवते २ स्कन्धे ६ अध्याये १० श्लोकः परिमोक्षस्य मलत्यागस्य पायुरिन्द्रियं गुदं स्थानं निर्ऋतेरलक्ष्म्याः इति तट्टीकायां श्रीधरस्वामी परित्राणं यथा विष्णुधर्म्मोत्तरे सर्व्वाम्बुभानो परिमोक्षकारि संपज्जने द्वयवस्य विष्णोः इति तिथ्यादितत्त्वं ॥

परिवर्त्तिका स्त्री मेढ्रजातल्परोगविशेषः

तल्लक्षणमाह मर्द्दनात् पीडनाच्चापि तथैवाप्यभिघाततः मेढ्रचर्म्म यदा॥

वायुर्भजते सर्व्वतः स्थितः तदा वातोपसृष्टेन तच्चर्म्म परिवर्त्तते सवेदनं सदाहञ्च पाकञ्च व्रजति क्वचित् मणेरधस्तात् कोषस्तु ग्रन्थिरूपेण लम्बते मारुतागन्तुसम्भूतां विद्यात्तां परिवर्त्तिकां सकण्डूः कठिना वापि सैव श्लेष्मसमन्विता अस्यांवामज्जायामपि पित्तानुबन्धो बोद्धव्यो दाहपाकभावात् कोषः चर्म्मकोषः अथ तस्याश्चिकित्सा परिवर्त्ते घृताभ्यक्तं स्विन्नमुपनाहयेत् त्रिरात्रं पंचरात्रं वा वातघ्नैः शाल्वणादिभिः ततोऽभ्यज्य शनैश्चर्म्म पातयेत् पीडयेन्मणिं प्रविष्टे चर्म्मणि मणौ स्वेदयेदुपनाहयेत् दद्याद्वातहरान् वस्तीन् स्निग्धान्यन्नानि भोजयेत् इति भावप्रकाशः

परिवेत्ता पुं अनूढज्येष्ठे कृतविवाहकनिष्ठः इत्युद्वाहतत्त्वं

परिवेदनीया स्त्री अनूढज्येष्ठे तत्कनिष्ठेन विवाहिता कन्या अस्याः प्रमाणं परिदायिशब्दे द्रष्टव्यं ॥

परिवेषकः पुं परिवेष्टा परिवेषणकर्त्ता तस्य लक्षणं यथा स्नातः श्रीचन्दनचर्च्चितः स्ववसनः स्रग्वी प्रसन्नाननः प्रष्टाल्पास्तभगः प्रसन्नहृदयः श्रीकान्तपूजारतः स्वामिस्नेहपरः स्वपाकनिपुणः प्रौढो वदान्यः शुचिर्विप्रो वा परिवेषकस्तु कुलजः स्यात् पितुर्भूपतेः इति पाकराजेश्वरः परिवेषिका स्त्री परिवेषणकर्त्री तस्या लक्षणं यथा स्नाता विशुद्धवसना नवधूपितांगी कर्पूरसौरभमुखी नयनाभिरामा बिम्बाधरापि रसि वहुसुगन्धिपुष्पा मन्दस्मिता दितिभृता परिवेषिका स्यात् इति पाकराजेश्वरः परिव्राट् पुं चतुर्थाश्रमी परिव्राड् तत्पर्य्यायः सन्न्यासी १ श्रमणः २ इति जटाधरः परिव्राजकः ३ पाराशरी ४ व्रजवः ५ इति शब्दरत्नावली ॥

परिहासः पुं परिहसनं ठाट्टा इति भाषा तत्पर्य्यायः ॥

क्रीडः १० देवका ११ इति श
ब्दरत्नावली वक्रा १२ इति
जटाधरः पर्कटी स्त्री स्वनाम
ता: पाकुड इति भाषा अस्या गु
णाः शीतः कषायः शिशिरो व्र
णयोनिगदापहः दाह पित्तक
फास्त्रघ्नः शोथहा रक्तपित्तनु
त् इति भावप्रकाशः ॥
पर्ण त् क हारित्ये हरित्
पीतवर्णे तस्य भावः हारि
त्यं पर्णयति पर्णापयति च
स्यकं इति दुर्गादासः
पर्द ङ अपानेन् सर्गे ङ. प
र्दते हृद्दः इति दुर्गादासः
पर्युषितः त्रि कुहं वासि इति
भाषा तुलसीपुष्पद्ये पर्यु
षितदोषाभावो यथा तुलसी
दलपुष्पाणि पद्मं गंगोदकं
कुशाः न पर्युषितदोषो ऽत्र
छिन्नभिन्नं न दुष्यति इति
~~दुर्गादासः~~ ॥ पुराणं ॥ इति
पर्व गतौ पर्वति इति
दुर्गादासः ॥
पर्व पूर्तौ पर्वति प
र्यस्ता कुम्भचेटी इति
दुर्गादासः ॥

पर्वतराजः पुं हिमालयगिरिः
अस्य प्रमाणं वक्ष्यमाणशब्दे
द्रष्टव्यं ॥
पर्वतराजपुत्री स्त्री दुर्गा यथा
जितवन् धनंजयस्य यद्वयोः
भक्तध्वजात् सितपक्षमी या
आरभ्य तस्मा दशमीं च याव
त् प्रपूजयेत् पर्वतराजपुत्रीं
इति तिथ्यादितत्त्वं
पर्ष ङ स्नेहे रेफोपधः स्नेह
इह आर्द्रीभावः ङ पर्षते प
यसा पटः स्पर्षे इति चतुर्भुजः
स्पर्षते पयसा षे इति दुर्गादा
पल न गतौ न पालः प
लः इति दुर्गादासः
पल क रक्षे क पाल
यति कुत्सवत्ते वेश सिद्धे ही
र्घिणोपि पाठः कात्रवन्ना
नामिदवुवन्यवत् जे रक्षि
तां बोधयति तेन पा
लति पलति इत्यपि सि
द्धं इति
पलाण्डुः पुं मूलविशेषः
पेयाज इति भाषा
तत् पर्यायः पलाण्डुः १४
सुकन्दकः १५

1075

इति शब्दरत्नावली
पलान्नं क्ली मांसादियुक्तसि
द्धभक्तं पोला ऊ इति भाषा
तस्य पाकप्रकारोद्रव्याणि च
यथा छागमांसं १ शरावं घृत
शरावपादः त्वचं ३ माष
कं लवंगं ३ माषकं एला ३
माषकं तंडुलं १ शरावः म
रिचं २ तोलकं तेजपत्रं २ तो
लकं कुंकुमं १ माषकं आर्द्र
कं २ तोलकं धन्याकं २ तो
लकं द्राक्षा ४ प्रभावपादार्द्धं
छागमांसं सूतं धोरयित्वा
मुष्कमले हपाककरणानंत
रं पात्रांतरे तेजपत्रोपरि
अल्पाविडगंधद्रव्येन सह प्र
थमं सज्जीकर्तव्यं तत तंडुले
जलेनार्द्धसिद्धं कृत्वा मेडपाल
नपूर्वकं मत्स्याविडगन्धद्रव्ये
ण सहतन्मांसोपरि सज्जीकर्त
व्यं एवंप्रकारेण बारं बारं सज्जी
कृत्वा तदुपरि अवशिष्ट घृतलेप
नं दद्यं तमांगारोपरि रक्षेत
इति पाकराजेश्वरः अत्र मां
सस्थाने मत्स्यफलमूलादिकं
गन्धद्रू ॥ ॥ ॥

वेण सह दधियोगं घृतपरि
मानस्याधिक्यं च भवितमर्हति
पलितं क्ली केशशुक्लताज
नकरोगः अस्य निदानं पूर्व
शुक्लं चिकित्सायां लोह चू
र्णस्य कर्षं दशार्द्धं घृतमञ्ज
नः धात्रीफलद्वयं पथ्ये हेत
थेकं विभीतकं पिष्ट्वा लोहम
ये भांडे स्थापयेत्त्रिभिर्वासयेत्
लेपो ऽयं महेशराद्धेति पलित
ने ह संशयः दशार्द्धं पंचकर्षा
णि काश्मर्यामूल मार्द्धो सह
चरकुसुमं केतकस्यापि मूलं १
लोह चूर्णं सभृंगं त्रिफलपलयु
ते तैलमेभिः पचेयुः कृत्वा लोह
सभांडे क्षितितलविहिते स्थाप
येन्मास मेकं केशाः काशप्रका
शा अपि मधुपनिभा अस्य यो
गाद्भवेति त्रिफला नीलिकापत्रं
भृंगराजो ऽयःशोरजः अवीमू
त्रेण संपिष्टं लेपात् कृष्णीकरं
परं इति भावप्रकाशः
पल्पुल न क लूनि हृस्वोः
यकारयुक्तकलकारमध्यः
हस्वमध्यस्य लूनि छेदः
पूर्तिः ॥

पवित्रीकरणे अपपल्पूलनं तृणं लोकः पल्पूलयति जनं गंगा इति दुर्गादासः

पल्पूल न क लूनि इत्यके य कारस्य कैकलकारमध्यः दीर्घ मध्यस्थ लूनि छेदे इतिः पवित्रीकरणे अपपल्पूलनं तृणं लोकः पल्पूलयति जनं गंगा इति दुर्गादासः

पल गतौ पलति इति दुर्गादासः ॥

पल्लवः पुं क्लीं नवपत्रादियुक्त शाखाग्रपर्वातत पर्यायः बलं ५ किसलं ६ किशलं ७ किशलयं ८ विटपः ९ इति शब्दरत्नावली प्रवृयोवनं १० इति जटाधरः ॥

पवित्रः त्रि व्रतादिना शुद्धः तत् पर्यायः शुचिः ४ शुद्धः ५ चलापवित्रितः ६ इति शब्दरत्नावली शुभ्रपः ७ पावनः ८ इति जटाधरः शुद्धद्रव्यं तत् पर्यायः शुद्धं ४ शुचि ५ पुण्यं ६ इतिवत् ७ इति जटाधरः

पश ञ बाधे ग्रंथे ञ पशति पशयते बाधो विहतिः ग्रंथो ग्रंथनं ग्रंथस्थाने स्पर्शने पठंति केचित् इति दुर्गादासः

पश क बन्ध क पाश यति इति दुर्गादासः

पश न क अनुपसर्गाद्वन्धबाधयोः स्पर्शगत्योः तालव्योपधः पशयति अनुपसर्गादिति सोपसर्गस्य प्रयोगो निषिध्यते बाधो विहतिः इति दुर्गादासः

पश्पतिकर्म्मीन पुं दर्शनकर्म्मतद्वेदिकपर्य्यायाः चिकाल १ वाकनत २ आचत ३ चष्ट ४ विचष्टे ५ विचर्षणिः ६ विश्ववर्षणिः ७ अवचाकशत ८ इत्यष्टौ पश्पतिकर्म्माणः इति वेदनिघंटौ ३ अध्यायः

पष न क अनुपसर्गाद्वन्धबाधयोः स्पर्शगत्योः मूर्द्धन्योपधः कपषयति अनुपसर्गादिति सोपसर्गस्य प्रयोगो निषिध्यते बाधो विहतिः इति दुर्गादासः

पष क बन्धो क पाष यति तालव्यांत एवाय मिति वररुचं देश्यान्त इति केचित् ॥

मूर्द्धन्यांतपाठस्त कस्याचिद भ्रमात् इति दुर्गादासः

पष् ञ बाधे ग्रंथे ञ पषपषते बाधो विहतिः ग्रंथो ग्रंथनं ग्रंथनस्थाने स्पर्शने केचित् पठंति इति दुर्गादासः पस क बन्धे क पासयतिः पृथक पाठादयं न णित् अन्यथा पस कि ञ इत्यनेनैव सिद्धे पृथक पाठोऽदयं न णित् अन्यथा पस कि ञ इत्यनेनैव सिद्धे पृथक पाठोऽनर्थकं स्यात् इति दुर्गादासः

पस ञ बाधे ग्रंथे ञ पसति पसते इति दुर्गादासः ॥

पल क परिग्रहे क पलयति इति दुर्गादासः पल न क परिग्रहे पलयति पलामयति इति दुर्गादासः ॥

पक्षघातः पुं स्वनामरोगः पक्षाघातः वातरोगविशेषः तल्लक्षणादि यथा गृहीत्वार्द्धं ततो वायुः शिराः स्नायु विशोष्य च पक्षमन्यतमं हन्ति सन्धिबन्धान् विमोक्षयन् कृत्स्नोऽर्द्धकाय स्तस्यादकर्म्मण्यो विचेतनः एकांगवातं केचिदन्ये पक्षवधं विदुः अर्द्धं अर्द्धनारीश्वरवत् पक्षं वाहु पाद्योरूजंघाभिभागं अन्यतमं वामं दक्षिणं वा विमोक्षयन् शिथिलीकुर्वन् अकर्म्मण्यः कर्म्मासमर्थः विचेतनः ईषत् स्पर्शादिज्ञानयुक्तः असाध्यासाध्यज्ञानार्थमाह दाहसंताप मूर्च्छाः स्युर्वायोपित्तसमन्विते शैत्य शोथ गुरुत्वानि तस्मिन्नेव कफावृते दाहो वाह्यः संतापः आभ्यंतरं पक्षवधलक्षणमन्यत्रापि वातव्याधौ बोद्धव्यं सामान्यतो वायाविति निर्द्दिष्टत्वात् पक्षाघातस्य साध्यत्वादिकमाह शुद्धवातहतं पक्षं कृच्छ्रसाध्यतमं विदुः साध्यमन्येन संयुक्तमसाध्यं क्षयहेतुकं शुद्धः केवलः अन्येन पित्तेन कफेन वा क्षयहेतुकं तयोर्धातुक्षयं तत्र कुपितं वातनिमित्तकं

अपर मसाध्यलतरणमाह पा
ञ्चिनी सूतिकावालवृद्धास्त्री
णेष्वसृतये पत्राघातं परि
हरेत् वेदनारहितो यदि वेदना
रहितो यदीति भिन्न मसाध्यल
तरणं अथ तस्यापि कित्
सा माषात्मगुप्ता वातारिवा
ट्यालक जटा म्पूतं हिंगुसै
न्धवसंयुक्तं पत्राघातं विना
शयेत् साषिके हिंगु सिन्धूरवि
जरणाद्यास्तु पाणिकाः माषा
दिकार्षिः १ ग्रैष्मिकाः शिक्ष
त्विक्षाहीरास्ना सैन्धव कल्कतै
माषकाथ म्पूतं तैलं पत्राघातमा
षकाथ म्पूतं तैलं पत्राघातं व्य
पोहति ग्रैष्मिकादितैलं २ माषा
त्मगुप्तातिविषारुवूक रास्नाश
तास्त्वा लवणैः सपिष्टैः चतुर्गु
णे माषवलाकषाये तैलं म्पू
तं हन्ति हि पत्राघातं माषादितै
लं ३ इति भावप्रकाशः पत्रा
घातस्तु जन्मान्तरीयमहापातकशे
षपापचिह्नविशेषः यथा एवं जन्मकृ
तैःपापैर्नरकस्य परिक्षये वाधतेव्या
धिरूपेण तस्य कृच्छ्राभिः शमं कुष्ठं च रा
जयक्ष्मा च प्रमेहोग्रहणीतथा मूत्रकृच्छ्राश्म
री

काषाश्च अतिसार भगंदरौ दुष्ट
व्रणं गण्डमाला पत्राघातोऽक्षि
नाशनं इत्येवमादयो रोगा
महापापोद्भवा गदाः तत्प्रा
यश्चित्तं यथा लतस्य च्चावचेपु
न्धं प्रदद्यात् केशवार्च्चने दद्या
त् द्विजसहस्राय मिष्टान्नं द्वि
जभोजने इति मलमासतत्त्वे
किंच कुनखी श्यावदन्तः पुवहा
द पाराद्रे कृच्छ्रं चरित्वा उद्ध
रेयातां तद्देनतावितिअत्र
द्वादशरात्रे पराकरूपं तत्र पं
चधेनवः तत्र मात्रापस्य तत्रा
ह कर्त्ता यतिचान्द्रायणेन वि
षमपिष्टान्नात् अस्तुत्वमेक
धर्म्माणामितिवचनादाकां
तितत्वात् कुष्ठादीनामपिप्रा
यश्चित्तं अत एव कुष्ठमं
दिष्टसूक्तं इति स्मृति
तत्त्वे पा पाने असेव
पिवादेशः पिवति पांथः इ
ति दुर्गादासः॥
पा ल रक्षणे ल पा
ति इति दुर्गादासः
पाकः पुं पठनं रन्धनं स

न्तस्य प्रकारो यथा भर्जनं
तलनं स्वेदः पचनं क्वथनं
तथा तान्दूरं पुटपाकश्च
पाकः सप्तविधो मतः भर्जनं
केवलपात्रे तलनं स्नेहद्रव्ये
स्वेदनं अम्बुतापे पचनं ज
ले क्वथनं सिद्धद्रव्यरसग्रह
णे तान्दूरं द्वारवह्नितप्तयंत्रे
पुटपाकः अधोह्यग्नितापे
ज्ञेयः इति पाकराजेश्वरः
पांचालः त्री शास्त्रे यथापि
तृहृन्नृपन्नृपपर्य्या द्वाद्दिति
णेन पुरंजनः राष्ट्रं दक्षिणपं
चालं याति श्रुतधरान्वितः इ
ति श्रीभागवते ४ स्कंधे पुरंज
नोपाख्याने २५ अध्यायः पंचा
नां विषयाणामन्यतोऽनवगा
तानां शास्त्रं इति प्रवृत्तं च नि
वृत्तं च शास्त्रं पंचालसंज्ञकं इ
ति च तट्टीकायां श्रीधरस्वामी
अत्र पंचाल मिति पाठः किं
तु स्वार्थे तप्रत्यये पांचा
लमपि भवति॥
पाठः पुं अध्ययनं
तत् पर्य्यायः निपाठः
२ निपठः ३॥ ॥ ॥

इतिसंकीर्णवर्गे अमरः॥
पाणिः पुं हस्तः तत्पर्य्यायः
भुजः २ इति जटाधरः कुलिंद
इति शब्दरत्नावली भुजादलः ४
इति त्रिकांडशेषः॥
पाणिकच्छपिका स्त्री कूर्म्ममु
द्रा यथा पाणिकच्छपिकां कृत्वा
तु कूर्म्ममस्त्रेण साधक तत्र सं
स्कृतपुष्पेण पूजयेदात्मनो व
पुः पूजितं तेन पुष्पेण देवत्वं
स्यस्य जायते कर्म्ममंत्रो यथा द्वि
तीयं वैसवीनं त्रं वीजं विन्दिनुसं
युतं षष्ठस्वरो परिचरं कूर्म्मवी
जं प्रकीर्त्तितं इति कालिकापुरा
णे ५९ अध्यायः॥
पांडुलेखः पुं पांडुलिपिः म
सविदा इति पारस्यभाषा यथा
व्यासः पांडुलेखेन फलके भूमौ
वा प्रथमं लिखेत् न्यूनाधिकंतु
संशोध्य पश्चात् पत्रे निवेशयेत्
फलके काष्ठादिपट्टके
इति व्यवहारतत्त्वं
पातालं क्ली विवरं
वडवानलः
इति मेदिनी॥ ॥ ॥

पादस्फोटः पुं विपादिका
रोगः तत्पर्य्यायः स्फुटिः २
स्फुटिः ३ पादस्फोटिः ४ इ
ति शब्दरत्नावली सत्र पका
रक्षुद्ररुक्कुष्ठान्तर्गत तृतीय
कुष्ठं यथा वैपादिकं पाणिपा
दस्फुटनं तीव्रवेदनं पाणिपाद
स्फुटनं पाण्योः पादयोश्च स्फु
टनं विहारणं येन तत् इति माध
वकरः अस्य चिकित्सा कुष्ठ
शब्दे ५३८ पृष्ठे द्रष्टव्या पान
कं क्लीं पानद्रव्यविशेषः तत्प्र
कारो यथा यथोक्तपरिमितपा
कैरानिन्दुरसयुक्तोऽथवान्यान्त
युक्तः पक्वरसः इति पाकराजे
श्वरः पानीयं क्लीं पानार्हद्रव्य
विशेषः पाना इति वंगभाषा
शरवत् इति पारस्यभाषा शरे
तत्र अम्लिकापानीयं पित्तशमि
नाशकं मिष्टदाडिमीपानीयं
अतिपिपासाकासनाशकं अम्ल
दाडिमीपानीयं उदरविकारेधा
रकं तथा वृद्धिकारकं च निम्बूपा
नीयं छर्द्दिहृल्लास पित्तज्वर निवार
कं सकलाहारपाचकं च नागरंगपा
नीयं कास

पित्तविनाशकं अनेकरागप्र
शासनं च सेवचन्दनपा
नीयं बलकारकं उन्मादमूर्च्छा
रोगशान्तिकारकं रुचि
वर्द्धकं उदरविकारोपकारकं
च इति पाकराजेश्वरः पापां
तं क्लीं तीर्थविशेषः तस्य ना
मान्तरं पृथूदकं अस्य कीर्त्तिश्च
यथा पृथूदके महातीर्थे तत्र
कीर्त्तिर्ति नामतः स्थाणुवटतरा
त्स्य राष्ट्रं नरपतेस्ततः हयमा
ने तदा राष्ट्रे प्रदृष्टे यज्ञकर्म्म
णि अतीयत ततो वाष्पं नृपते
डुस्कृते नैव ततः स चिन्तयामा
स ब्राह्मणस्य विचेष्टितं पुरोहि
तेन संयुक्तो रत्नान्यादाय सर्व
शः प्रसादनार्थं विप्रस्य अनुकी
र्त्तयेत् तदा प्रसादितः स राजा
च तुष्टः प्रोवाच तं नृपं ब्राह्मणा
नावमन्तव्याः पुरुषेण विजान
ता ब्राह्मणः पूज्यते यस्मात् नश्ये
त्रिपुरुषं कुलं पवमुक्तो
स नृपतिः मार्गेण पथसा पुनः
उवाच यथा मासमृतां तस्य रा
ज्ञो हिते स्थितः तस्मिंस्तीर्थे
त यः ॥ ॥ ॥

स्नाति श्रद्दधानो जितेन्द्रियः
स प्राप्नोति नरो नित्यं मनसा
चिन्तितं फलं तत्र तीर्थं स्मवि
ख्यातं पापांतं नाम नामतः
यस्मेह यज्ञतमस्य मधु सस्राव
वै नदी तस्मिन् स्नातोऽश्वम
ध्या च मुच्यते सर्वपातकैः
फलं प्राप्नोति यज्ञस्य अश्व
मेधस्य मानवः पापांत मिति
विख्यातं तीर्थं पुण्यतमं द्वि
जाः इति वामन पुराणे ३८
अध्यायः
पायसः पुं परमान्नं तस्य पि
ण्डदानेन गयायामस्ति निः
क्षेपे फलं यथा पितृनुद्दिश्य
यो भक्त्या पायसं मधुसंयुतं
गुप्ति विनिःक्षिपेत् तस्मा भवं
ति पितरस्तस्य वर्षशतं हरेय
च्छेति विविधं यानकाम्यानपरा
तृप्ताः पितामहाः इति स्कान्दे
काशीखण्डे २० अध्यायः पा
रत् कर्म्मणि समासो अपपा
रत् इति दुर्गादासः पारमहं
स्यं त्रि परमहंससम्बन्धि य
था श्रीमद्भागवतं पुराणम
मलं यद्वैष्णवानां प्रि ॥ ॥

यं यस्मिन् पारमहंस्यमेकम
मलं ज्ञानं परं गीयते यत्र
ज्ञानविरागभक्तिसहितं नै
ष्कर्म्यमाविष्कृतं तच्छृण्वन्सु
पठन् विचारणपरो भक्त्या वि
मुच्येन्नरः इति श्रीभागवते
१२ स्कन्धे १३ अध्यायः पार
महंस्यं परमहंसैः प्राप्यं इति
तट्टीकायां श्रीधरस्वामी पा
रिणाय्यं क्लीं गृहोपकरणान
ते शय्यासनादि यथा मनुः
अर्थस्य संग्रहे चैनां व्यये
चैव नियोजयेत् शौचे धर्म्मे
ऽन्नपक्त्यां च पारिणाय्यस्य रक्ष
णे पारिणाय्यस्य गृहोपकरण
स्य शय्यासनादेः इत्युद्वाहतत्त्वं
परिणयकाललब्धे स्त्रीधने यथा
मातुः परिणयनकाललब्धं तु
त्रसत्वे पित्रमेणानूढा दुहितो
रेवाधिकारः मातुः पारिणाय्यं
स्त्रियो भजेरन्निति वशिष्ठोक्तेः इ
ति दायतत्त्वं ॥
पारिभाषिकं क्लीं परिभाषया
र्थबोधकं पदं यथा तत्रा
धुनिकसङ्केतः परिभाषा तया
अर्थबोधकं पदं पारिभाषिकं ॥

कं यथा पाम्लकारादिसंहे
तेन नदी वृक्षादिपदं इति श
क्तिवादे गदाधरः ॥
पारिहास्यं क्लीं परिहासस्य
भावः परिहासद्वारा कृतं
यथा सांकेत्यं पारिहास्यं वा
स्तोभं हेलन मेववा वैकुं
ठनामग्रहणं मशेषाघहरं
विदुः इति श्रीभागवते ६
स्कन्धे अजामिलोपाख्याने २
अध्यायः नन्वयं पुत्रनामाग्र
हीत् न भगवन्नाम तत्राह
सांकेत्यं पुत्रादौ संकेतितं पा
रिहास्यंपरिहासेन कृतंस्तोभं
गीतालापपूरणार्थं कृतं हे
लनं किं विलनेति सावज्ञ
मपि च वैकुण्ठःनामोच्चारणं
इति तट्टीकायां श्रीधरस्वा
मी॥ पार्श्वपिप्पलं क्लीं हरी
तकीविशेषः राजवृत्त इति
हिंदी भाषा इति भावप्रकाशः
पार्श्वैकादशी स्त्री भाद्रशुक्लै
कादशी तद्विवरणं पार्श्वप
रिवर्तनशब्दे द्रष्टव्यं ॥
पाल क २ तो कपाल
यति रक्षवतै वेशासिद्धे टी।

चिरणोपि पाठः कात्रवस्या
नामिदनुवन्धवत् परस्मि
तांवोधयति तेन पालति प
लति इत्यपि सिद्धं इति श्री
दुर्गादासः पाषाणः पुं
शिला तत्पर्यायः प्रस्तरः
८ पारावुकः ११ काचकः १२
इति शब्दरत्नावली पाषाण
चतुर्दशी स्त्री वृश्चिकराशि
रविकशुक्लपक्षचतुर्दशी
यथा भविष्ये वृश्चिके शुक्ल
पक्षेतु या पाषाणचतुर्द
शी तस्यामायुधधेनौरीनक्ते
पाषाणभोजने पाषाणभोज
नैः पाषाणाकारपिष्टकभोज
नैः इति तिथ्यादितत्वं ॥
पाषाणगर्द्दभः पुं हनुसन्धि
जातव्रणरोगविशेषः तल्लक्षण
माह वातश्लेष्मसमुद्भूतः श्वय
थुर्हनुसन्धिजः स्थिरोमन्दरु
जः स्निग्धो ज्ञेयःपाषाणगर्द्द
भः स्थिरं कठिनं तच्चिकि
त्सा यथा पाषाणगर्द्दभं
पूर्वं स्वेदयेत् कृपालो
भिषक् ततः पनसि।
कामोक्तैः ॥ ॥ ॥

1083

कल्कैरुतैः प्रलेपयेत् वात
श्लेष्मिकयोगश्चैः कल्कै र
सैश्च लेपयेत् परिपाकग
तं भित्वा व्रणवत् समुपाचरेत्
जलोकाभि स्रुते रक्ते सशा
म्यति विनोषधं पनतस्य
लेपु वजुषु प्रेतिने लिखितं
लिखितं ततः इति भावप्र
काशः पिशगतौ शपिय
ति इति दुर्गादासः ॥
पिच्च क छेदे क पिच्चयति
इति दुर्गादासः ॥
पिच्छ श वाधे श पिच्छति
पिच्छति वाधे विहितिः इति
दुर्गादासः
पिच्छिका स्त्री चामरविशेषः
यथा पिच्छिकां भ्रामयित्वाव
रुविषंहरात् कृत्वापणमद्दरेद
स्मचरणे इदं श्रुतिं अपिणाकु
णामस्य इति रत्नावली ना
टके ४ अङ्कः ॥
पिञ्ज २ क भाषार्थो २ क
पिंजयति भावःदीप्तिः षष्ठार्थो
निकेतन हिंसा वलदानानि
इति दुर्गादासः पिज २ ल ङ व
र्णापूजयोः २ पिंजते ल ङ पिंक्ते

इति दुर्गादासः
पिट सरलो धनो पेटति जनं
किंचित्क्षपीकरोति शब्दायते
वा इति दुर्गादासः पिटकः पुं
समुद्गवः तत्पर्यायः पिटः ४
पेटिका ६ तविः ७ तरी ८ मं
जूषा ९ पेडिका १० इति शब्द
रत्नावलीपिठ क्लिशि वधे उ
दुवर्गाद्यादिः पेठति पिपिठतः
क्लि शि ङः क्लेशभवे इति दु
र्गादासः ॥ पिड २ क सेहलो
२ क पिंडयति संहतिः राशीक
रणं इति दुर्गादासः ॥
पिंड [illegible] २ ङ से हलो २ पिं
डयते ङ पिंडते इति दुर्गा
दासः पिंड क्लीं पुम्
हुशेष द्रव्य निर्मित विल्वाका
र पितृदेशपकदेयान्नं गया
ते पिंडदानेच गयांते तीर्थ
मेवच पंचकोतं कामरूपं पि
छिलान्तं सरित्
प्रभा जना
हूतस्य हस्तेत
पिंडं दद्यात् स्वकं
नरः विरजे च तथा ॥ ॥

चाखकर्णी रामे च सोमकेजी
वत् पिंडप्रदानेन अल्पयुर्जीय
ते नरः मघागमे महातेत्रे
सकं पिंडं ददेत यः मास
हयाधिकं वर्षं मयु षो व
द्धते क्रमात् इति योगिनी
तंत्रे प्रथमतमे २ भागे ५
पटलः अन्यत् ग याशाद्धे
द्रष्टव्यं ॥ पिंडो त्रि भरी
री यथा यथा सूर्यं विना
भूमि गृहं दीप विवर्जितं ति
गृहीनो यथा पिंडी मयश्री
स्त्वा विना मघा इति जैमि
निभारते आश्वमेधिकपर्वे
णि ७८ अध्यायः
पितृपक्षः पुं गौणाश्विन
कृष्णपक्षः स तु प्रेतपक्षः
तत्र श्राद्धफलं यथा हेमाद्रि
माधवसंग्रहयो र्नागरखंडे आ
षाढ्याः पंचमे पक्षे कन्या
संस्थे दिवाकरे यो वै श्राद्धं न
रः कुर्य्यादेकस्मिन्नपि वासरे न
स्य संवत्सरं यावत् तृप्ताः स्युः
पितरो ध्रुवं नभा वाथ नभस्यो वा
मलमासो यदा भवेत् नभस्योपि
तु पक्षः स्यादन्यत्रैव तु पंचमः इति
मलमासतत्वं पितृहूः
पुं दक्षिणकर्णः यथा पि
तृहू र्नृप पुर्य्या द्वार्दक्षिणे
न पुरंजनः इति श्रीभागवते
४ स्कन्धे पुरंजनोपाख्याने २५
अध्यायः शास्त्रे च प्रथमं श्रो
तव्यं कर्म्मकांडं इत्येतावता
ना सामान्येन प्रवृत्तस्य तत्कस्य
कर्म्मकांडस्य दक्षिणकर्णेन
श्रवणं क्रियते तत्र स्वर्धम
नुष्ठाय पितृभि राहूतः पितृ
लोकप्रापकं पितृयानं प्रप
द्यते तदनेन प्रकारेण पितृ
णा माह्वान मनेन भवतीति पि
तृहू र्दक्षिणः कर्णः इति त
ट्टीकायां श्रीधरस्वामी ॥ पि
ल क उ दि क पेल यति उ
दि प्रेरणे इति दुर्गादासः
पिव इ सेचने इ पिन्वते
इति दुर्गादासः
पिश श प अवयवे श पिं
शति पटः अवयवी स्यादि
त्यर्थः इति दुर्गादासः
पिशुनः त्रि अप्रकाशेनाऽ
हितप्रबोधकः परस्परभेदशी
लः इत्यमरटीकायां भरतः

तत् पर्य्यायः द्विजिह्वः सूचकः
कर्णेजपः पिशुन इत्यपि दुर्ज
नो दुर्विधो विषकद्रुश्च पिशु
नः खलः इति जटाधरः कर्णेज
पः सूचकः स्यादनो हितप्रबो
धके परस्परं भेदशीले पिशु
नो दुर्जनः खलः इति शब्दर
त्नावली ॥ पिष ष ई लृ चू
र्णने पिनष्टि लोको गोधूमं इ
ति दुर्गादासः ॥ पिस अ गत्या
म् अपिपेसत् अपिपिसत् पि
पेसतुः पिपिसतुः इति दुर्गा
दासः ॥
पिस क घहार्थे गत्यां कपे
सयति दृढहन्ता क्रोऽ प्यमिति
केचित् घहार्थो निकेतन
हिंसा बल दानानि इति
दुर्गादासः
पिस इ कि द्युतौ इ पि
स्यते कि पिंसयति पिं
सति द्युति दीप्तः इति दु
र्गादासः
पी ङ य पाने ङ य पी
यते इति दुर्गादासः ॥
पीड अ क वा ये णा दे
वाधो विहतिः णाद्दो विलो
डनं अ अपीपिडत् अपि
पीपीडत् क पीडयति पात्रे
लोकः पीडयति स्तनं कामी
इति दुर्गादासः पीय प्रीण
ने पीयूषं सौत्रधातु रयं इति
दुर्गादासः पीष प्रीणने पीयू
षं सौत्रधातु रयं इति दुर्गादा
सः पील रोधे रोधो रोधः
क्रियानिरोधः जडीभाव इत्य
र्थः पीलति पङ्गुः इति
दुर्गादासः ॥
पीव स्थौल्ये पीवति लोकः
स्थूलः स्यादित्यर्थः इति
दुर्गादासः ॥
पुंस क मर्द्दे ओष्ठवर्गपोषो
पधः संयोगादनुस्वारः तेन
क्विपि पुंसोः सुड्ग्रावित्यस्
डि पुमान् मर्द्दोऽभिमर्द्दने
क पुंसयति खलं राजा इति दु
र्गादासः पुंसवनं क्ली स्त्रीक
र्त्तव्यव्रतविशेषः यथा श्रीराजो
वाच व्रतं पुंसवनं ब्रह्मन् भवता य
दुदीरितं तस्य वेदितु मिच्छामि

यनविष्णुः प्रसीदति श्रीशुक उ
वाच शुक्ले मार्गशिरे पक्षे
योषिद्भर्त्तुरनुज्ञया आरभे
तव्रतमिदं सर्वकामिकमा
दितः निशाम्य मरुतां जन्मब्रा
ह्मणाननुमंत्र्य च स्नात्वा शु
क्लदती शुक्ले वसीतालंकृतां
वरे पूजयेत् प्रातराशात् प्रा
क् भगवंतं श्रियासह अलंते
निरपेक्षाय पूर्णकामनमोस्तु
ते महाविभूतिपतये नमः स
कलसिद्धये यथा त्वं कृपया
भूत्या तेजसा महिम्नौजसा जु
ष्ट ईशगुणैः सर्वैस्ततोऽसि भ
वान् प्रभुः विष्णुपत्नि महामा
ये महापुरुषलक्षणे प्रीयेथा
मे महाभागे लोकमातर्नमोस्तु
ते ओम् भगवते महापुरुषाय म
हानुभावाय महाविभूतिपतये
सह महाविभूतिभिर्बलिमुपह
रामीति अनेनाहरहर्मंत्रेण विष्णो
रावाहनार्घ्यपाद्योपस्पर्शनस्ना
नवासउपवीतभूषण गन्धपुष्प
धूपदीपोपहाराद्युपचारान् सुस
माहितोपाहरेत् हविःशेषं च जुहु
यादनले द्वादशाहुतीः ओम् नमोभ

गवते महापुरुषाय महाविभूति
पतये स्वाहेति श्रियं विष्णुं च वर
दाशिषां प्रभवावुभौ भक्त्या संपूज
येन्नित्यं यदीच्छेत् सर्वसंपदः प्र
णमेद्दंडवद्भूमौ भक्तिप्रह्वेण चेत
सा दशवारं जपेन्मंत्रं ततः स्तोत्र
मुदीरयेत् युवां तु विश्वस्य विभू
जगतः कारणं परं इयं हि प्रकृ
तिः सूक्ष्मा मायाशक्तिर्दुरत्ययात
स्या अधीश्वरः साक्षात् त्वमेव पुरु
षः परः त्वं सर्वयज्ञ इज्येयं क्रियेयं
फलभुग्भवान् गुणव्यक्तिरियं
देवी व्यंजको गुणभुग्भवान् त्वं
हि सर्वशरीर्यात्मा श्रीः शरीरेंद्रि
याशयाः नामरूपे भगवती प्रत्य
यस्त्वमपाश्रयः यथा युवां त्रिलो
कस्य वरदौ परमेष्ठिनौ तथा म उ
त्तमश्लोक संतु सत्या महाशिषः
इत्यभिष्टूय वरदं श्रीनिवासं श्रि
या सह तन्निःसार्योपहरणं द
त्वाचमनमर्चयेत् ततः स्तुवीत
स्तोत्रेण भक्तिप्रह्वेण चेतसा य
ज्ञोच्छिष्टमवघ्राय पुनरभ्यर्चये
द्धरिं पतिं च परया भक्त्या मह
पुरुषचेतसा प्रियैस्तैस्तैरुप
नमेत् प्रेमशीलः स्वयं॥ ॥

पतिः विभृयात् सर्वकर्माणि
पत्न्या उच्चावचानि च कृतमेक
तरेणापि दंपत्यो रुभयोरपि प
त्न्यां कुर्यादनर्हायां पतिरेत
त् समाहितः विष्णोर्व्रतमिदं
विभ्रन्न विहन्यात् कथं
चन विप्रान् स्त्रियो वीरवतीः स्र
ग्गन्धबलिमंडनैः अर्चेदहर
हर्भक्त्या देवं नियममास्थिता
उद्वास्य देवं स्वे धाम्नि तन्निवेदि
तमग्रतः अद्यादात्मविशुद्ध्य
र्थं सर्वकामसमृद्धये एतेन
पूजाविधिना मासान् द्वादश
हायनं नीत्वाथोपरमेत् साध्वी
कार्त्तिके चरमेऽहनि श्वोभूतेऽ
प उपस्पृश्य कृष्णमभ्यर्च्य पूर्व
वत् पयःशृतेन जभ्यर्च्या पूर्व
हुयाच्चरुणा सह सर्पिषा पा
कयज्ञविधानेन द्वादशैवाहुतीः
पतिः आशिषः शिरसादायद्वि
जैः प्रीतैः समीरिताः प्रणम्य शि
रसा भक्त्या भुंजीत तद --- आ
चार्यमग्रतः कृत्वा वाग्यतः सहब
न्धुभिः दद्यात् पत्न्यै चरोः शेषं सु
प्रजास्त्वं सुसौभगं एतच्चरित्वा वि
धिवद्व्रतं विभोरभीप्सितार्थं

लभते पुमानिह स्त्री चैतदास्था
य लभेत सौभगं श्रियं प्रजां
जीवपतिं यशो गृहं कन्या च
विन्देत समग्रलक्षणं पतिं
त्ववीरा हतकिल्बिषां गतिं मृ
तप्रजा जीवसुता धनेश्वरी सु
दुर्भगा सुभगा रूपमग्र्यं वि
न्देद्विरूपा विरुजा विमुच्यते
य आमयावीन्द्रियकल्यदेहं
एतत् पठन्नभ्युदये च कर्म
ण्यनंततृप्तिः पितृदेवतानां
तुष्टाः प्रयच्छंति समस्तका
मान् होमावसाने हुतभुक्
श्रीहरिश्च राजन्महन्मरुतां
जन्मपुण्यं दितेर्व्रतं चाभिहितं
महत्ते इति श्रीभागवते
६ स्कंधे पुंसवनव्रतकथनं
१९ अध्यायः पुंस्कोकिलः
पुं पुरुषपिकपक्षी पुंस्याद्ये
न कोकिलशब्दस्य कर्मधा
रयसमासे तस्यान्तलोपे पुं
सः सन्निति मस्य सन्निकृते
मस्यानुस्वारे निष्पन्नः इति मु
ग्धबोधव्याकरणं पुट
पि श्लेषे पि पुट ति
अपुटीत्
अपोट श्लेषं संव॥ ॥ ॥

न्येभावः इति दुर्गादासः पु
ट क चूर्णो भाति कपोट
यति भाति दीप्तो इति दु
र्गादासः ॥ पुट त क सं
सर्गे पुटयति पुष्पं सूत्रेण
जनः संसृज्यतीत्यर्थः इति
दुर्गादासः पुट्ट कले च्छे पं
चमस्वरीटह्वयान्तः पकटका
र इति रामः क पुट्टयति लो
कममस्योभावः इति दुर्गादासः
पुड इंञ्यते मर्दे पंचमस्वरी
इ पुंड्यते मर्दे चूर्णीकरणे इ
ति दुर्गादासः ॥
पुण श धर्म्मे शुभक्रियायां
मित्यन्ये ण पुणति शुभे लो
कः पोषिता इति दुर्गादासः
पुत गतौ तङ्यान्तः पुतिका
सौत्रधात्वयं इति दुर्गादा
सः पुत्तलकः पु यज्ञादिनि
र्म्मित प्रतिमूर्त्तिः पुत्तल इति
भाषा यथा आचारात् पोष्य
त्वाच्चभर पत्रैः पुत्तलं
कं कृत्वा शिरः प्रभृ ति
षु पलाशपत्त्राणि देवा
इति
शुद्धितत्वं । ॥ ॥

पुत्तलिका स्त्री तृणकाष्ठमृद
श्मधातुरत्नादिनिर्म्मितप्रतिमू
र्त्तिः पुत्तली पत्ते ति स्वार्थे कनि
ईकारस्य ह्रस्वे आपि निष्पन्ना पु
त्तली स्त्री मृदादिनिर्म्मितप्र
तिमूर्त्तिः यथा अमावास्यांस
मासाद्य मध्यरात्रौ विचक्षणः
मृन्मयीं पुत्तलीं कृत्वा दीपा
दिभिरलंकृता इति उत्तरका
माख्यातंत्रं ॥ पुथ य हिंसे
य पुथ्यति प्रपोथयति दुर्गा
दासः ॥ पुथ इ कंथे पंच
मस्वरी इ पुंथ्यते अंतस्था
प्रथमादिरयमित्यन्ये पुंथति
इति दुर्गादासः
पुथ क लिपि कपोथ
यति लिपि दीप्तो इति
दुर्गादासः ॥ पुनर्जन्म क्ली
पुनर्द्धारीरोत्पत्तिः यथा आ
ब्रह्मभुवनाल्लोकाः पुनरा
वर्त्तिनोऽर्ज्जुन मामुपेत्य तु
कौन्तेय पुनर्जन्म न विद्यते इ
ति श्रीभगवद्गीतायां
८ अ अध्याये १६ श्लोकः पु
नर्यात्रा स्त्री निवर्त्तयात्रा
स्नात आषाढ शुक्लपक्षीय
रथद्वि ॥ ॥ ॥

तीयानन्तरं तत्रवमदिवसविहि
ता श्रीजगन्नाथदेवस्य दक्षिण
मुखयात्रा फिरेरथ इति उत्क
लथ इति कलेव्यता यात्राशब्दे द्र
ष्टव्या॥ पुर श अग्रगत्याश
पुरति ज्येष्ठः कनिष्ठस्याग्रेग
च्छतीत्यर्थः पोरिता इति दुर्गा
दासः पुरश्चरणं क्ली पुरश्क्रि
या स्यात् इष्टदेवता मंत्रसि
द्ध्यर्थं तद्देवता पूजापूर्वकं त
न्मंत्रजपहोम तर्पणाभिषेक
ब्राह्मणभोजनरूप पंचांगक
साधनं यथा योगिनीहृदये
गुरोराज्ञां समादाय मुहूर्तः
करणे नरः ततः पुरस्क्रियो
कुर्य्यान्मंत्रसंसिद्धिकाम्यया
जीवहीनो यथा देही सर्व्वक
र्म्मसु न क्षमः पुरश्चरणहो
नोऽपि तथा मंत्रः प्रकीर्त्तितः त
स्मादादौ स्वयं कुर्यात् गुरुर्वा
कारयेद्ध्रुवः गुरोरभावे विप्रे
वा सर्वमाणिहिते रतं स्नि
ग्धं शास्त्रविदं मित्रं नाना
गुणसमन्वितं स्त्रियं वा सद्गु

णोपेतां सपुत्रां विनियोजये
त् आदौ पुरस्क्रियां कर्त्तुं स्था
न निर्णय उच्यते योगिनीहृ
दये पुण्यक्षेत्रे नदीतीरे गुहा
पर्वतमस्तके तीर्थप्रदेशाः
सिन्धूनां संगमः पावने वनं
उद्यानानि विविक्तानि विल्व
मूलं तटं गिरेः तुलसीका
ननं गोष्ठं वृषशून्यं शिवा
लयं अश्वत्थामलकीमूलं
गोशाला जलमध्यतः देवता
यतनं कूलं समुद्रस्य निजं गृ
हं साधनेषु प्रशस्तानि स्थ
नान्येतानि मंत्रिणां अथ वा
निवसेत्तत्र यत्र चित्तं प्रसी
दति तथा गृहे शतगुणं वि
द्याद्गोष्ठे लक्षगुणं भवेत्
कोटि देवालये पुण्यमनंतं
शिवसन्निधौ म्लेच्छ दुष्ट
गव्याल शंकातंक विवर्जिते
एकान्तपावने निन्दारहिते भ
क्तिसंयुते सुदेशे धार्म्मिके
देशे सुभिक्षे निरुपद्रवे रम्ये
भक्तजनस्थाने निवसेत्तापसः
प्रिये गुरूणां सन्निधानेन चि
त्तैकाग्र्यस्थले तथा यथा मनः

तमस्थान माश्रित्य जपमाच
रेत् यत्र ग्रामे जपेन्मंत्री तत्र
कूर्म्मं विचिंतयेत् गोतमीये
पर्वते सिंधुतीरे वा पुण्यारण्ये न
दीतटे यदि कुर्य्यात् पुरश्च
र्य्यां तत्र कूर्म्मं न चिंतयेत् वि
ल्वमूलादावपि कूर्म्मं चेत्ता।
नास्ति तदुक्तं वैशम्पायनसं
हितायां पुण्यक्षेत्रं गृहीतौ
र्थे देवतायतने शुभे नदीती
रे तथा सिन्धुसंगमोऽतिमनो
हरः पर्वतस्य गुहाश्चैव तथा
पर्वतमस्तकं विल्वमूलं स्म
शानं वनमुद्यानमेव च प
शुस्थानेषु विप्रेन्द्र कूर्म्मं च
क्रं न चिंतयेत् अथ पुरश्च
रणे भक्ष्यादिनियमः गौत।
मीये पुरश्चरणकर्म्मणि भ
क्ष्य विचारयेत् अन्यथा भो
जनाद्दोषात् सिद्धिहानिः प्र
जायते शास्त्रान्तरे च समश्नी
यात् अंशसिद्धिसमीहया तस्मात्त्रि
त्यं प्रयत्नेन शास्त्रज्ञापीभवेन्नरः
अग्राह्यस्य हितार्थं दधि क्षीरं घृतं
गव्यं हैमन्तं गुडवर्ज्जितं तिलाश्चैव
सितामुद्गाः कन्दः केमुकवर्ज्जितः

नारिकेलफलं चैव कंदली ल
वली तथा आम्र मामलकं चै
व पनसं च हरीतकी व्रतान्तरप्र
शस्तं च हविष्यं मन्यते बुधैः व्र
तान्तर इति हैमंतिकं सिता शि
त्रं धान्यं मुद्गा तिला यवाः क
कलाय कंगुनीवारा वास्तूकं
हिलमोचिका षष्टिका काल
शाकं च मूलकं केमुकेतर
तलवणे सैन्धव सामुद्रे गव्ये
च दधि सर्पिषी पयोऽनुद्धृतसा
रं च पनसाम्रहरीतकी पिप्प
लीरकं चैव नागरंगं च तिन्ति
डी कदली लवली धात्री फला
न्यगुडमैत्तवं अतैलपक्वं मुन
योहविष्यान्नं शाकं पावकमेव
वा पयो मूलं फलं वापि यत्र
यत्रोपलभ्यते रम्भाफलं तिं
तिडीकं कमलानागरंगके फ
लान्येतानि भोज्यानि पथ्याः
न्यानि विवर्ज्जयेत् यत्र योगि
नीतंत्रे चिंचां च नालिकापा
कं लायां लकुचं तथा क
दंवं नारिकेलं च व्रते कुम्मा
ण्डकं त्यजेत् तन्त्र व्रतान्तरे वा
प्य चिंचा तिंतिडी॥ ॥

1091

अथ वर्ज्यानि विवर्ज्जयेन्मधुका
रलवणं तैलमेव च तांबूलं का
स्यपात्रे च दिवाभोजनमेव च त
था क्षारं च लवणं मांसं गृंजनं।
कांस्यभोजने मांसं गृंजनं कां।
स्यभोजने मायाटकी मसूरांश्च
कोद्रवां शुष्कशाकानपि अत्रं प
र्युषितं चैव निःस्नेहकीटदूषि
तं रामार्ज्जुनचन्द्रिकायां मैथु
नं तत्कथालापं तद्गोष्ठीं प
विवर्ज्जयेत् ऋतुकालं विनाभ्यं
त्री स्त्रियं नैव गच्छति ल
वणं च पलं चैव क्षारं तैड्रसा
तरं कौटिल्यं क्षौर मभ्यंगास्ति
तेकृत्यं च वर्ज्जयेन्मद्दनादिकं
स्नायाद्वा पंचगव्येन केवलाम
लकेन वा मंत्रजस्तानपानीयैः
स्नानमाचमनभोजनं कुर्याद्य
थोक्तविधिना त्रिसन्ध्यं देवता
र्च्चनं अपवित्रकरो नग्नः शिर
शि प्रावृतोपि वा प्रलपन् प्रज
पेद्यावत्तावन्निष्फलमुच्यते ना
रदीये मृदुस्तोत्रं सूपक्वं च कु
र्यादिह लघुभोजनं नैन्द्रियाणां
यथा वृद्धिस्तथा भुंजीत साधकं

कुलार्णवेपि यस्मात्र पामरान्न
पानपुष्टाङ्गः कुरुते धर्मसंचयं
अन्नदातुः फलस्यार्द्धं कर्त्तुश्चार्द्धं
न संशयः तस्मात् सर्वप्रयत्नेन प
रान्नं वर्ज्जयेत् सुधीः पुरश्चरणका
लेषु सर्वकर्म्मसु शास्त्रवि जिह्वा
दग्धा परान्नेन करौ दग्धौ प्रति
ग्रहात् परस्त्रीभिर्म्मनो दग्धं क
थं सिद्धिर्वरानने परान्नं भिति
तेतरविषयं भितायां तस्य स्वल्पो
त् पापात् तथा च वैदिकाचार
कानां शुचीनां श्रीमतां सत्
कुलस्थानजातानां भिता।
णी वा ग्रजन्मनां
विहाय वह्निं नहि वस्तु किं
चित् ग्राह्यं परेभ्यः सति स
म्भवे च असम्भवे तीर्थं वदिहि
शुद्धात् पर्वातिरिक्ते प्रति ग्र
हजपात् तत्रासमर्थोऽवृदि
ने विशुद्धात् याचेत यावद्दिन
मात्रभैक्ष्यं गृह्णाति रागादधि
कं न सिद्धिः प्रजायते कल्प
पाते रहस्ये सकृदुच्चरिते
पापे प्राणं समुदीरयेत्
प्रोक्ते पारशरेणापि प्राणाया
मं सकृच्चरेत् वह्नप्रलापी
आपस्थ्यन्यस्याङ्गानि॥

ततोजपेत् हुतेप्येवं तथाऽष्ट
द्रव्यस्यान्यानां सर्पिषेव चसर्व
मार्दीत्रनियमान् पुरश्चरणाङ्क
त्यजेत् विस्मृत्येन सर्गसंकादि
युक्तः कर्म्म करोति यत् जप
होमादिकं सर्वमपवित्रं भवेत्
प्रिये मलिनाम्बरकेशादि मु
खदौर्गन्ध्यसंयुतः योजपेत्तं
दहत्याशु देवता गुप्तिसंस्थि
ता आलस्यं जृम्भनं निद्रां क्षु
तं निष्ठीवनं भयं नीचाङ्गस्प
र्शनं कोपं जपकाले विवर्ज्ज
येत् एवं मुक्तविधानेन विल
म्बं त्वरितं विना उक्तसंख्यं जपं
कुर्य्यात् पुरश्चरणसिद्धये दे
वता गुरुमन्त्राणामैक्यं संभा
वयन् धिया जपेदेकमनाः प्रा
तः कालं मध्यन्दिनावधि यत्
सङ्ख्यया समारब्धं तत् कर्त्तव्यं
कुर्य्यात् अतन्द्रितो भवेन्नरः मु
द्रमालायां यत् संख्यया समा
रब्धं तज्जाप्यं दिने दिने न्यूना
धिकं न कर्त्तव्यमासमापनात् ॥
सदा जपेत् अजपेद्भक्त
संख्यायाः सहस्रगुणं जपं
कलौ अन्यत्रापि कृते जपस्त

कल्पे कृतेतायां द्विगुणो
मतः द्वापरे त्रिगुणः प्रोक्तश्चतु
र्गुणो जपः कलौ कुलार्णवे वि
न्यूनातिरिक्तकर्म्माणि न फ
लन्ति कदाचन यथाविधि
कृतान्येव सन्त कर्म्माणि फ
लन्तिहि भूशय्या ब्रह्मचारित्वं
मौनमाचार्य्यसेवा नित्यपू
जा नित्यदानं देवतास्तुतिकीर्त्त
नं नित्यं त्रिसवनं स्नानं क्षुद्रक
र्म्मविवर्ज्जनं नैमित्तिकार्च्चनं चैव
विश्वासो गुरुदेवयोः जपनिष्ठ
स्य द्वादशैते धर्म्माः स्युर्मन्त्रसिद्धि
दाः स्त्रीशूद्रपतितव्रात्यना
स्तिकोच्छिष्टभाषणं परिवर्ज्जये
त् सन्ध्येनापि न भाषेत जपहोमा
र्च्चनादिषु अन्यथानुष्ठितं सर्वं भ
वत्येव निरर्थकं पुरश्चरणकाले
तु यदि स्यान्मृतसूतकं तथा च
कृतसेकस्यापि व्रतं नैव परित्यजे
त् योगिनीहृदये भयीत कु
शाशय्यायां शुचिवस्त्रधरः स
दा प्रत्यहं क्षालयेत् शय्यामेका
की निर्भयः स्वपेत् असत्यभाष
णं वादं कुटिलं परिवर्ज्जयेत् ॥

वर्ज्जयेद्धीनवाद्यादिश्रवणं नृ
त्यदर्शनं अभ्यङ्गं गन्धलेपं च
पुष्पधारणमेवच वर्ज्जयेदुष्णोद
कस्नानमन्यदेवप्रपूजनं न
चैव नैकवासा जपेन्मन्त्रं बहु
वासाकुलोपि वा केशास्रावन
संहितायां विपर्य्यासं नकु
र्य्याच्च कदाचिदपि मोहतः उ
पर्य्युपो वहिर्विस्त्रे पुरश्चरण
कृन्नरः पतितानामन्त्यजानां
दर्शने भाषणे श्रुते क्षुतेऽधो
वायुगमने जृम्भने जपमुत्
सृजेत् तथा तस्य चान्तमाप्नो
प्राणायामं षडङ्गकं कृत्वास
म्यक् जपेत् शेषं यद्वा सूर्य्या
दिदर्शनं आदिशाद्दक्षिब्रा
ह्मणं च तत्रान्तरे मनः संहरे
त् शौचं मौनं मन्त्रार्थचिन्तनं
अव्यग्रत्वमनिर्वेदो जपस्य
सिद्धिहेतवः उष्णीषी कञ्चुकी न
ग्नो मुक्तकेशो गणावृतः अ
पवित्रकरोऽशुद्धः प्रलपन्न ज
पेत् क्वचित् अन्यासनः शाया
नो वा गच्छन् भुञ्जान एव वा अ
प्रावृतो करौ कृत्वा शिरसा प्रावृ
तोपि वा चिन्ताव्याकुलचित्तो वा ।
वह्वाक्रान्तः व

धान्वितः रथ्यायामशिवस्था
नेन तद्वेदितिमिरालये ॥ उपानद्गू
ढपादो वा यानशय्यागतोपि
वा प्रसार्य्य न जपेत् पादावुत्
कटासनं एवच न यज्ञकाष्ठ
पाषाणेन भूमौ नासनेस्थितः
तथा मार्ज्जारकुक्कुटं क्रौञ्चशा
नं शूद्रं कपिखरं दृष्ट्वाचमेज्ज
पेत् शेषं स्पृष्ट्वा स्नानं विधीयते
सर्वत्र जपेत्वयं नियमः मानसे
तु नियमो नास्त्येव तथा च
अशुचिर्वा शुचिर्वापि गच्छंस्ति
ष्ठन् स्वपन्नपि मन्त्रैकशरणो वि
द्वान् मनसैव सदाभ्यसेत् न
दोषो मानसे जाप्ये सर्वदेशे
पि सर्वदा एवमादिजपेत्तत्र
मन्त्रे विशेषो वक्तव्यः जप
फलमाह शिवधर्म्मे जपनिष्ठो
द्विजश्रेष्ठोऽखिलयज्ञफलं ल
भेत् सर्वेषामेवयज्ञानां जाय
तेऽसौ महाफलः जपेन दे
वता नित्यं स्तूयमाना प्रसीदति
प्रसन्ना विपुलान् कामान्
दद्यान्मुक्तिं च शाश्वतीं
यक्षो एत रक्षः पिशाचा
ग्रहाः
सर्पाश्च भीषणाः ॥ ॥ ॥

जापिनं नोपसर्पंति भयभी
समंततः पाद्मनारदीययोः
यावंतः कर्मयज्ञाः स्युः प्रदि
ष्टानि तपांसि च सर्वे ते जप
ज्ञस्य कलां नार्हंति षोडशीं मा
हात्म्यं वाचिकस्योक्तं जापय
ज्ञस्य कीर्तितं तस्माच्छतगुणो
पांशुः सहस्रो मानसः स्मृतः
तथानंते मानसः सिद्धिकामा
नां पुष्टिकामे रुपांशुकं वा
चिके मारणे चैव प्रशस्तो जप
इरितः गौतमीये शान्त्यात्रिस
भवनं स्नान मध्याह्ने हिः स
कृत्वा गौतमीये शान्त्यात्रि
सकृत् त्रिसन्ध्यं प्रजपेन्मंत्रं
पूजनं तत्समं भवेत् सन्ध्या
त्रये पूजां गत्वा जप मेकोऽथ
भत मित्यर्थः एकदा वा
भवेत् पूजानंतजपेत पूजनं
विनाजपांतिकाभवेत् पूजाप्र
जापस्थाने वा जपेन्मंत्रं प्रातः
कालं समारभ्य जपेन्मध्यंदिना
वधि मध्यन्दिनावधीतिन नि
यमपरं किंत्वधिककालव्यव
च्छेदपरं अन्यथा तत्समयज
नियमे कदाचित् जिह्वाया जा
ड्यं स्याद्वा प्रतिनियतदिवसीय

जपसंख्यायाः पूर्णत्वे अधिक
त्वे वा नियमभंगः स्यात् मनः
संहृत्य विषयान्मंत्रार्थगतमा
नसः न द्रुतं न विलंबं च जपे
न्मौक्तिकपंक्तिवत् जपः स्या
दंतरावृत्ति र्मानसोपांशुवा
चिकैः धिया पदतरश्रेणीं
वर्णस्वरपदात्मिकां उच्चैरर्थ
मुद्दिश्य मानसः स जपः स्मृ
तः मंत्रनिर्णये मानसं मंत्रव
र्णस्य चिंतने मोक्षः स्मृतः जि
ह्वोष्ठौ चालयेत् किंचिद्देवता
गतमानसः किंचित् श्रवण
वर्णयोग्यः स्यात् उपांशुः स जपः
स्मृतः मंत्रमुच्चारयेद्वाचा वाचि
कः स जपः स्मृतः उच्चैर्जपादि
शिष्टः स्यादुपांशुर्दशभिर्गु
णैः जिह्वाजपः शतगुणः
सहस्रो मानसः स्मृतः मकारा
त्रे निजकर्णगोचरो यो मा
नसः स जपः स्मृतः उपांशु
र्निजकर्णस्य गोचरः सः प्र
कीर्तितः निगदस्तु जनैर्वे
त्रिविधोयं जपः
स्मृतः तंत्रांतरे उच्चैर्जपोऽ
धमः प्रोक्त उपांशुर्मध्यमः
स्मृतः उत्तमो मानसो देवि त्रि
विधः कथितो जपः ॥

जिह्वाजपस्तु जिह्वाजपः स
विज्ञेयः केवलं जिह्वया बुधै
रिति अतिविलंबातिशीघ्रज
पे दोष माह अतिशीघ्रजपे दो
षमाह अतिह्रस्वो व्याधिहेतुर
तिदीर्घो वसुक्षयः अक्षराक्षर
संयुक्तं जपेन्मौक्तिकहारवत्
मनसा यः स्मरेत् स्तोत्रं वचसा वा
मनुं जपेत् उभयं निष्फलं या
ति भिन्नभांडोदकं यथा गौतमी
ये पशुभावे स्थिता मंत्राः केव
ला वर्णरूपिणः सौषुम्नध्वनि
च्चरिताः प्रभुत्वं प्राप्नुवंति ते पा
द्मनारदीययोः मंत्रास्ताराणि चि
च्छक्तौ प्रोतानि परिभावयेत् ता
मेव परमव्योम्नि परमामृतबृंहि
ते दर्शयत्यात्मसद्भावं पूजाहोमा
दिभिर्विनेति गौतमीये दशाक्ष
रपटले मूलमंत्रं प्राणबुद्ध्या सुषु
म्नामूलदेशके मंत्रार्थं तस्य चैत
न्यं जीवं ध्यात्वा पुनः कुलार्ण
वेपि मनोन्यत्र शिवोऽन्यत्र श
क्तिरन्यत्र मारुतः न सिद्ध्यति
वरारोहे कल्पकोटिशतैरपि
जातसूतकमादौ स्या ॥ ॥

दंते च मृतसूतकं सूतकद्वय
संयुक्तो यो मंत्रः स न सिद्ध्य
ति अतस्तद्रहितं कृत्वा मं
त्रं यावज्जपेत्क्रिया सूतकद्व
यनिर्मुक्तः स मंत्रः सर्वसि
द्धिदः जातसूतकमादौ स्या
न्मृतसूतकमंततः सूतकद्व
यनिर्मुक्तो मंत्रः सिद्ध्यति
नान्यथा तत्रैव तत्सिद्धैर्विम
यत्नेन ध्रुवेन पुटितं मनुं अ
ष्टोत्तरशतं वापि सप्तवारं ज
पादितः जपांते च तथा जप्या
त् चतुर्वर्गफलाप्तये तत्रैव
ब्रह्मबीजं मनो हुत्वा चाद्यंते
परमेश्वरि सप्तवारं जपेन्मंत्रं
सूतकद्वयमुक्तये मंत्रार्थं
मंत्रचैतन्यं योनिमुद्रां न वेत्ति यः
शतकोटिजपेनापि तस्य सिद्धि
र्न जायते लमर्बीजाद्या ये मंत्रा
नदास्यंति फलं प्रिये मंत्रास्तु त
त्समुहिताः सर्वसिद्धिकराः स्मृ
ताः चैतन्यरहिता मंत्राः प्रोक्ता
वर्णास्तु केवलं फलं नैव प्रयच्छं
ति लक्षकोटिजपैरपि मंत्रोच्चारे
कृते यादृक् स्वरूपं प्रथमं भवे
त् शते सहस्रे लक्षे वा कोटिजप्ये

ये ततत्फलं हृदये ग्रंथिमे
दश्च सर्वावयववर्द्धनं ध्यानं
न्दाश्रुणि पुलको देहावेशः
कुलेश्वरि गद्गदोक्तिश्च सह
साजायते नात्र संशयः सकृद
च्चरिते प्येवं मंत्रे चैतन्यसंयुते
दृश्यंते प्रत्यया यत्र पारंप
र्य्यं तदुच्यते मासमात्रं ज
पेन्मंत्रं भूतलिप्या तु संपुटं
क्रमोत्क्रमात् सहस्रं च त
स्यसिद्धो भवेन्मंत्रः सान्धिव
र्णा व्योमाराग्नि जलान्धराः
अंत्य माद्यं द्वितीयं चतुर्थं म
ध्यमं क्रमात् पंचवर्गास्तरा
णिस्सु वांतश्चेतेनुभिः सह
एषा भूतलिपिः प्रोक्ता द्विच
त्वारिंशदक्षरैः मंत्रस्तु अ इ उ
ऋ लृ ए ऐ ओ औ ह य र व ल
ङ क ख ग घ ञ च छ ज झ ण
ट ठ ड ढ न त थ द ध प फ भ
व शषसाः अनः वरं मंत्रमुच्चा
र्य्य पुनः क्रमेणोच्चरेत् गोप
नीये एवं जपं पुराकृत्वा तेजो
रूपं समर्पयेत् देवस्य दक्षि
णे हस्ते कृपा पुष्पाद्य वारि
भिः सफलं तद्विभाव्येवं प्रा॥

णायामं समाचरेत् जपस्या
दो जपांते च त्रितयं त्रितयं च
रेत् शक्तिविषये देव्या वामह
स्ते तथा च एवं जपं पुरश्च
र्णा गन्धाक्षत कुसुमादिकैः जपंस
मर्पयेद्देव्या वामहस्ते विचक्षणः
जपांते प्रत्यहं मंत्री होमयेत्तद
शांशतः तर्पणं चाभिषेकं च त
त्तद्दशांशतो मुने प्रत्यहं भोजये
द्विप्रान् न्यूनाधिकमयं ततये अ
थवा सर्वपूर्ते च होमादिकम
थाचरेत् संपूर्णायां प्रतिज्ञा
यां तर्पणादिक माचरेत् मुंड
मालायां यस्य यावान् जपः प्रो
क्तः स्तद्दशांश मत्र क्रमात् तत
द्दुर्व्यपसंख्ये होमं कुर्य्याद्दिने
दिने जपसंख्यायां विशेषमा
ह मुंडमालायां नाहंते दैह
पर्वैर्वीन धान्यैर्वा च पुष्पकैः
न चन्दनैर्मृत्तिकया जपसंख्यांतु
कारयेत् लाक्षाकुपतीद सिन्दूरं
गोमयं च करीषक विलोड्य
दिकां कृत्वा जपसंख्यांतु कारये
पुरश्चरणचंद्रिकायां च ततो ज
पदशांशेन होमं कुर्य्याद्दिने।

दिने । अशक्तौ वा लक्षसंख्यायां
पूर्णायां होम माचरेत् ॥ ॥
तथा । होमाद्यशक्तौ च सनत्
कुमारीये । यद्यदंगं भवेद्भग्नं
तत्संख्या द्विगुणो जपः । हो
माभावे जपः कार्य्यो होमसं
ख्या चतुर्गुणः । विप्राणां द्वि
क्षत्रियाणां च वसुसंख्या गुणः स्मृ
तः । वैश्यानां वसुसंख्याकमेषां
स्त्रीणां मयं विधिः ॥ येवर्णाश्र
श्रिताः शूद्राः सच तस्य विधिं च
रेत् । अनाश्रितस्य शूद्रस्य दि
कसंख्याकः समीरितः शूद्रस्य
विप्रभृत्यस्य तत्पत्याः सहशोज
पः ॥ अत्राप्यशक्तौ श्रुत यो
गिनी हृदये । होमकर्मण्यशा
क्तानां विप्राणां द्विगुणो जपः
इतरेषां तु वर्णानां त्रिगुणादिः
समीरितः ॥ त्रिगुणादि होम
संख्या त्रिगुणजपः क्षत्रियेण
कार्य्यः । वैश्येन चतुर्गुणः
शूद्रेण पंचगुणः तदुक्तं कु
लार्णवे । यद्यदंगं विहीनं स्या
त् तत्संख्या द्विगुणो जपः कु
र्वीत त्रि चतुः पंच यथा संख्यं
द्विजादयः एतेन स्त्रीशूद्राणां
होमाधिकारः तथा च वाणिज्या

मर्द्ध शार्ङ्गकोणं अस्त्रे भव
ति शूद्राणां । इति नागभट्ट
निबन्धे । शूद्राणां अस्त्रमिति
ऊं ए ३ प्रकारेण सारदायां ॥
स्त्रीणां होमाधिकारस्तु तत्र।
लाजैर्होमं पुरोपेतैर्होमः
कन्यां प्रयच्छति । अनेन विधि
ना कन्या वरमाप्नोति वांछितं
अतः स्त्रीणां होमाधिकारः
न च ब्राह्मणद्वारा । तथा च तंत्रे
ॐकारोच्चारणाद्धोमात् शाल
ग्रामशिलार्च्चनात् ब्राह्मणीग
मनाच्चैव शूद्रश्चांडालतां व्रजे
त् ॥ इति साक्षान्निषेधात् ॥
तथा स्त्रीणामपि सर्ववैदिके
कर्मसु शूद्रवत्त्वप्रतिपादना
त् स्त्रीशूद्रकरसंस्पर्शो वज्रपात
समो मम इति भगवद्वचनाच्च त
थाच नारायणकल्पे अष्टाक्ष
रो महामंत्रः समाणः शूद्रयोषि
तोः । प्रणवादिश्च यो मंत्रो न
स्त्रीशूद्रे प्रशस्यते । इति सर्वत्र
स्त्रीणां शूद्रवद्व्यवहारः ॥ शू
द्रस्यापि स्वकर्तृकहोमः तथा
चवाराहीतंत्रे । यदि कामी भव
स्येव शूद्रोपि होमकर्मणि व
द्विजायां परित्यज्य हृदयांते

न होमयेत् ॥ सर्वेषां वा
द्विगुणो जपः। तथाच वासिष्ठे
यद्यदंगं विहीयेत तत्संख्या
द्विगुणो जपः। कर्तव्य स्सांग
सिद्ध्यर्थं तदशक्तेनभक्तितः
नचेदंगं विहीयेत तद्विशिष्टे
मवाप्नुयात्। विप्रभोजनमात्रे
णाखिलं सांगं भवत् फलं यत्र
भुंक्ते द्विज स्तस्मात्तत्र भुंक्तेहविः
स्वयं। तथा अगस्त्यसंहितायां
यदि होमे प्यशक्तः स्यात् स
जायां तर्पणेपि वा। तावत्
संख्याजपेनैव ब्राह्मणाराधने
नच। भवेदंगद्वयेनैव पुरश्चर
णमार्थ्यैव ॥ वीरतंत्रे।
नियमः पुरुषे ज्ञेयो न योषि
त्सु कथंचन। तत्पात्नीयो
षिता मत्र तथानं नच मज्जने
केवलं जपमात्रेण मंत्राः सि
द्ध्यंति योषितां। ततश्च। गुरवे
दक्षिणां दद्यात् भोजनाच्छा
दनादिभिः। गुरुसंतोषमात्रेण
मंत्रसिद्धिर्भवेत् ध्रुवम् ॥
तथा च योगिनी हृदये गुरो
रभावे पुत्राय तत्पत्न्यै वा नि
वेदयेत्। तयो रभावे देवेशि
ब्राह्मणेभ्यो निवेदयेत् ॥

सम्यक् सिद्धैकमंत्रस्य पंचांगो
पासनेनच। सर्वमंत्राश्च सिद्ध्यं
ति त्वत्प्रसादात् कुलेश्वरि ॥
गुरुमूल मिदं सर्वं मित्याहु
स्तन्त्रवेदिनः। एकग्रामे स्थितो
नित्यं गत्वा वंदेत वै गुरुं ॥
गुरु रेव परं ब्रह्म तस्मादारो
त मर्चयेत्। तदंते महतीं पू
जां कुर्य्यात् साधकसत्तमः ॥
सुभाषिणीं कुमारीं च भूषणै र
पि भूषयेत्। पिष्टान्नं बहुशः
कार्य्यं भुंजीत बंधुभिः सह ॥
एवं सिद्धमनु र्मंत्री साधयेत्
सकलेप्सितान् ॥

अथ ग्रहणपुरश्चरणं ॥

तंत्रे। अथवान्यप्रकारेण पुर
श्चरण मुच्यते। ग्रहणे र्कस्य
चेन्दोर्वा शुचिः पूर्वं मुपोषि
तः ॥ नद्यां समुद्रगामिन्यां ना
भिमात्रोदकस्थितः। स्पर्शा
द्विमुक्तिपर्य्यंतं जपेन्मंत्र मन
न्यधीः ॥ यदि नद्यादि र्दूषिता
नदी भवति तदा यत् कर्त्तव्यं
तदाह रुद्रयामले। अपि शुद्धो
दकैः स्नात्वा शुचौ देशे समा
हितः। ग्रासाद्विमुक्तिपर्य्यंतं ज
पेन्मंत्र मनोन्यधीः। इति कृत्वा

न संदेहो जपस्य फलभाग्भ
वेत्। नद्यभावे। यद्वा शुद्धो
दकैः स्नात्वा शुचिः पूर्व मुपो
षितः। ग्रहणादि विमोक्षांतं
जपेन्मंत्र मनन्यधीः ॥ उपवा
सासमर्थे तु नैव। अथवा
न्यप्रकारेण पौरश्चरणिको
विधिः चन्द्रसूर्य्योपरागे च स्ना
त्वा प्रयतमानसः ॥ स्पर्शनादि
विमोक्षान्तं जपेन्मंत्रं समाहि
तः। जपाद्दशांशतो होमं त
था होमात्तु तर्पणं। एवं कृ
ते तु मंत्रस्य जायते सिद्धि रु
त्तमा ॥ गोपाल मंत्रतर्पणे तु
होमसमसंख्यात्वं यथा। इह
गोपालमंत्रस्य तर्पणं होमसं
ख्यया। वर्णाना मिह सर्वेषामि
त्यागमविदो विदुः दृष्ट्वा स्ना
त्वा सुसंकल्प्य विमोक्षांतं जप
वरेत्। तावद्धोमादिकं कुर्य्या
त् ग्रहणान्ते शुचिः पुमान् एवं
जपान्मंत्रसिद्धि र्भवत्येव न संश
यः ॥ ग्रहणे जपस्य आवश्य
कत्वं। ग्राहादे रनुरोधेन य
दि जप्यं त्यजन्नरः। सम्भवदेव
ताद्रोही पितॄन् सप्तनयत्यधः
इति सनत्कुमारीय वचनात्।

वस्तुतस्तु आरब्धपुरश्चरणवि
षयमिदं। तथाहि आरब्धे पुर
श्चरणे यदिच ग्रहणं भवेत् त
दाश्राद्धाद्यनुरोधेन जपं नत्य
जेत् एवं ग्रहणावपि पुरश्चरणवि
शेषे बोद्धव्यं इति सर्वसमञ्ज
सं ॥ योगिनीहृदये कल्पो
क्तविधिना मंत्री कुर्य्याद्धोमा
दिकं ततः अथ वा तद्दशांशे
न होमादींश्च समाचरेत्। त
था अनंतरं दशांशेन क्रमाद्धो
मादिकञ्चरेत्। तदन्ते महतीं
पूजां कुर्य्याद्ब्राह्मणभोजनं ॥
ततो मंत्रस्य सिद्ध्यर्थं गुरुं संत
र्प तोषयेत्। एवंच मंत्रसि
द्धिः स्यात् देवताच प्रसीदति ॥
अत्र ब्राह्मणभोजन मावश्यक
मेव। सर्वथा भोजयेद्विप्रान्
कृतसांगत्वसिद्धये। विप्रा
राधनमात्रेण व्यंगं सांगं भ
वेद्ध्रुवं ॥ क्रियाभावे दीक्षा
हीनान् पशून् यस्तु भोजये
त्स्व स्वमंदिरे। स याति परमे
शानि नरकानेकविंशतिं ॥ ए
वंयः कुरुतेदेवि पुरश्चरणकं
प्रिये। सर्वपापविनिर्मुक्तो दे
वीसायुज्य माप्नुयात् ॥

यद्यपि पुरश्चरणपदं पंचाङ्गप
रं । तथाच । जप होमौ तर्पणं
चाभिषेको विप्रभोजनं । पंचा
ङ्गोपासनं लोके पुरश्चरणमु
च्यते ॥ तथापि ग्रहणादौ पुर
श्चरणपदं गौणं जपमात्रपरं ।
सूर्य्योदयं समारभ्य यावत्सू
र्य्योदयांतरं इत्यादौ तथा दर्श
नात् तत्र होमादे रभावात् ॥
तर्हि कथं ग्रहणपुरश्चरणे हो
मादि इति चेत् वचनादेव । न
च पुरश्चरणस्य पंचाङ्गत्वात् स
र्वत्रैव स्यादिति वाच्यं ग्रहणे
पुन स्तद्विधान मनर्थकं स्यात्
किंच ग्रहणे होमादिनियमात्
नान्यत्र होमादिः । ग्रहणपुरश्च
रणे होमादिविधानं तु प्रकृती
भूत पंचाङ्गपुरश्चरणतुल्यताबो
धनाय । अत एव ग्रहणे पंचाङ्ग
स्वरूप पुरश्चरणे कृते मुख्यप्रयो
गोप्यधिकार इति प्रकटीकृतं
तदकरणे पुनः केवल जपमा
त्रपुरश्चरणे कृते नाधिकार
इति सर्वसम्मत मिति । पुर
श्चरणकालस्तु वाराहीये चन्द्र
ताराणुकूलेच शुक्लपक्षे शुभे
ऽहनि । आरभेत पुरश्चर्य्याः
हरौ सुप्ते न चारेत् ॥
प्रतिप्रसवः । रुद्रयामले । का
र्त्तिकाश्विन वैशाख माघेऽथ
मार्गशीर्षके । फाल्गुने श्राव
णे दीक्षा पुरश्चर्य्या प्रशस्यते ॥
अस्ताके अस्तोदये च दीक्षा पु
रश्चरणयो र्निषेध माह तंत्रान्त
रे । अस्तोक्ते सुदिते नैव कुर्य्या
द्दीक्षां जपं प्रिये कृते नाशो
त्तवेदाशु आयुः श्री सुतसं
पदाम् ॥

अथ पुरश्चरणप्रयोगः ॥

तत्र तावत् भूमेः परिग्रहं कृ
त्वा पुरश्चरणप्राक् दृतीयादि
वसे दौ रादिकं विधाय वेदिका
याश्चतुर्द्दिक्षु क्रोशं क्रोशद्वयं
वा क्षेत्रं चतुरस्त्रं आहारादिवि
हारार्थं परिकल्प्य तत्र कूर्मंच
क्रान्तरूपं मण्डले विधाय पक्व
भक्तं कुर्य्यात् । ततः परदिने
स्नानादिकं विधाय शुद्धः सन्
वेदिकाया श्चतुर्द्दिक्षु अश्वत्थो
दुम्बर प्लक्षाणां मन्यतमस्य वि
तस्तिमात्रान् दशकीलकान् ॐ
नमः सुदर्शनाय अस्त्राय फडि
तिमंत्रेणाष्टोत्तरशताभिमंत्रितान्
वेदिकाया दशदिक्षु । ॐ ये

चात्र विघ्नकर्त्तारो भुवि दिव्यंत
रीक्षगाः । विघ्नभूतास्तथैवान्ये
मम मंत्रस्य सिद्धिषु ॥ मयैतत्
कीलितं क्षेत्रं परित्यज्य विदूर
तः । अपसर्पन्तु ते सर्वे निर्वि
घ्नं सिद्धि रस्तु मे । इत्यनेनवि
खन्य तेषु ॐ नमः सुदर्शना
य अस्त्र फडिति मंत्रेणास्त्रं सं
पूज्य पूर्वादिक्रमेण इन्द्रादिलो
कपालान् पूजयेत् । तद्यथा ।
ॐ भूर्भुवः स्व इंद्र लोकपा
इहागच्छ इत्यावाह्य पंचोपचा
रै रम्यांश्च पूजयेत् ॥
तथा च मुण्डमालायां । अरण्ये
ग्रादिकं गत्वा कुर्य्याद्भूमेः परि
ग्रहं तथा ह्यमुकमंत्रस्य पुरश्च
रणसिद्धये । मयेयं गृह्यते भूमि
र्मंत्रो ऽयं सिध्यता मिति ॥
तथा । ग्रामे क्रोशमितं स्थानं
नद्यादौ स्वेच्छया मतं । नगरा
दावपि क्रोशयुग्म यथा पिवा
क्षेत्रं वायावदिष्टन्तु विहारार्थं
प्रकल्पयेत् । आहारादिविहा
रार्थं तावती भूमि माक्रमेत्
क्षीरिवृक्षोद्भवान् कीलान् अ
स्त्रमन्त्राभिमंत्रितान् । निखने
द्दशदिग्भागे तेषुस्त्र प्रपूज-
येत् ॥ लोकपालान् पुन स्तेषु गं
धाद्यैः पूजयेत् सुधीः । ततोमध्य
स्थाने क्षेत्रपालं वास्तोष्पतिं सम्पू
ज्य सर्वविघ्नविनाशार्थं गणप
तिं पूजयेत् । ॐ अद्येत्यादि
अमुकगोत्र श्रीअमुकदेवशर्म्मा
तत्कर्त्तव्यामुकमंत्रपुरश्चरणक
र्म्मणि सर्वविघ्नविनाशार्थं गणे
शपूजा महं करिष्ये । इति संक
ल्प वेदिकामध्ये पंचोपचारैर्ग
णेशं पूजयेत् । तदुक्तं । क्षेत्र
पालादिकं तत्र पूजयेत् विधिव
त्ततः । क्षेत्रेशं च स्तुनाम्नानं वि
घ्नराजं समर्चयेत् ॥ दिक्पा
लेभ्यो वलिं दद्यात् ततःक्षेत्रं स
माविशेत् । ततो माषभक्तादि
ना पूजितदेवताभ्योवलिं दद्या
त् । ततः । ॐ येरौद्रा रौद्र
कर्म्माणो रौद्रस्थान निवासिनः
मातरोप्युग्ररूपाश्च गणाधिपत
यश्चये ॥ विघ्नभूतास्तथैवान्ये
दिग्विदिक्षु समाश्रिताः ॥
सर्वे ते प्रीतमनसः प्रतिगृह्ण
न्त्विमं वलिम् ॥ इत्यनेन दशादि
क्षुभूतेभ्योवलिं दद्यात् ततो गा
यत्री जपेत् । तथाच ।
प्रातः स्नात्वा तु गायत्र्याः

सहस्रं प्रयतो जपेत् । ज्ञाता ज्ञा
तस्य पापस्य क्षयार्थं प्रथमंततः।
इति विद्याधराचार्य्यः ॥
यद्वा प्रातःस्नात्वा तु गायत्र्या प्र
युतं प्रयतो जपेत् ॥
इति तत्र पुन स्मृतपापशंकया
ओम् अद्येत्यादि अमुकगोत्र श्री
अमुकदेवशर्म्मा ज्ञाता ज्ञातपा
पक्षयकामो अष्टोत्तर सहस्र
गायत्रीजपं मयुतगायत्रीजपं
वा अहं करिष्ये । इति
संकल्प जपेत् । तत उपवासं
हविष्यंवा कुर्य्यात् ॥ ततप
रदिने उषसि स्नानादिकं कृत्वा
स्वस्तिवाचनपूर्वकं संकल्पं कुर्य्या
त्। यथा विष्णुः ओम् अद्येत्यादि
अमुकगोत्र श्रीअमुकदेवशर्म्मा
अमुकदेवताया अमुकमंत्रसिद्धि
प्रतिबंधकाशेषदुरितक्षयपूर्व
कतन्मंत्रसिद्धिकामो ऽद्यारभ्यया
वता कालेन सेत्स्यति तावत्
काल ममुकदेवताया अमुक
मंत्रस्य इयत्संख्या जप तद्दशां
शहोम तद्दशांशतर्पण तद्दशां
शाभिषेक तद्दशांशब्राह्मणभोज
नरूप पुरश्चरण महं करिष्ये ।
इति संकल्प भूतशुद्धि प्राणाया

मादिकं कृत्वा स्व स्व मुद्रां बद्ध्वा
स्व स्व पूजापद्धत्युक्तक्रमेण दे
वतां संपूज्य दीपं प्रज्वालितं दे
वतां हृदये कृत्वा प्रातःकाले
समारभ्य मध्यं दिनं यावत्जपं
कुर्य्यात् । तत स्तद्दशांशहो
म तद्दशांशतर्पण तद्दशांशा
भिषेक तद्दशांशब्राह्मणभोज
नं कुर्य्यात् । तथा च । सनत्
कुमारतन्त्रे । प्रणवं ततस्तदग्रे
ति मास पक्ष तिथ्यावपि । अमु
कामुकगोत्रोहं मूल मुच्चार्य्यत
तपरं ॥ सिद्धिकामो ऽस्यमंत्रस्य
इयत्संख्यां जपं ततः ॥
दशांशं हवनं होमाद्दशांशंत
र्पणं ततः ॥ दशांशं मार्जनम्
तस्माद्दशांशं विप्रभोजनम् ॥
पुरश्चरण मेवं हि करिष्ये प्राग
दङ्मुखः । तथा । दीपस्य ज्वलि
तस्याथ जपकर्म्म प्रशस्यते । त
द्दीपस्थान माश्रित्य वातातपस
हो कुटिं ॥ निर्म्माय विधिवत्
कुर्य्यात् जपं तत्र शुभे दिने ।
ततो होमः स्तत स्तर्पणं ॥
तेजास्तरे । तर्पणंतु ततः कुर्य्या
त्तीर्थोदैः शुद्धमिश्रितैः । जलेदे
वं समावाह्य पायाद्यैः सद

1103

कात्मकैः ॥ सम्पूज्य विधिव
त्कुर्य्या परिवारसमन्विते पके
कमंजलिंतोये परिवारान् प्र
तर्पयेत् ततो होमदशांशेन त
र्पयेत् परदेवतम् ॥ सम्प
र्णाय्यान्तु पंचर्विंया पुन रेके
कमंजलिं । अंगादिपरिवारेभ्यो
दत्वा देवं विसर्जयेत् ॥ तर्प
णवाक्यंतु मूल मुच्चार्य्य श्री
अमुकं तर्पयामि नमः। इतिवि
ष्णुविषयं । तथा च गौतमीये
आदौ मंत्रं समुच्चार्य्य श्रीपूर्वं
कृत्स मित्यपि तर्पयामि पदं
चोक्ता नमो ऽन्ते तर्पयेन्नरः ॥
अन्यत्र मूल मुच्चार्य्य अमुकदे
वतांतर्पयामीति।तथाच। तर्प
यामिपदस्त्वोक्ता मंत्रांते स्वेष्टना
मतः द्वितीयांतेषु चेत्येवं तर्प
णस्य मनु र्म्मतः। शक्तिविषये
पुन र्म्मूल मुच्चार्य्य अमुकीं तर्प
यामि स्वाहा । होम तर्पणयोः
स्वाहेति तन्त्रान्तरवचनात्। नील
तंत्रे। मंत्रांते नाम चोच्चार्य्य तर्प
यामि ततःपरं कुर्य्याच्चैववरा
रोहे स्वाहांतं तर्पणं मतमि
त्यादि ॥ विश्वेश्वरतंत्रे ॥
विद्यां पूर्वं समुच्चार्य्य तदन्ते

देवताभिधां । तर्पयामीति
संप्रोक्ता स्वाहांतं स्तर्पणंम
तः ॥ अभिषेकवाक्यंतु नमो
ऽन्तेमूल मुच्चार्य्य अमुकदेव
तामहं मभिषिंचामि इति कल
समुद्रया स्वमूर्द्धि अभिषिंचे
त् तथाच । गौतमीये नमोऽन्ते
मूलमुच्चार्य्य तदन्ते देवताभि
धां द्वितीयांता महं पश्चादभिषि
चाम्यनेनतु । अभिषिंचेत् स्वमू
र्द्धानं तोयैः कुंभाख्यमुद्रया ॥
शक्तिविषये नीलतंत्रे । मंत्रांते
नाम चोच्चार्य्य सिंचामीति नमः
पदमिति। ततो ब्राह्मणान् भो
जयित्वा पूजां कुर्य्यात् ॥ ततो
दक्षिणा। अद्येत्यादि कृतैतदमु
कमंत्रपुरश्चरणकर्म्मणः सांग
तार्थं दक्षिणामिदं कांचनेव
क्विदैवतं अमुकगोत्राय गुरवे
तुभ्यमहं सम्प्रददे। ततो ऽच्छि
द्रावधारणं कुर्य्यात् ॥
अथ ग्रहणपुरश्चरणसंकल्पः
तद्यथा ओम् अद्येत्यादि राहु
ग्रस्ते निशाकरे दिवाकरे वा
अमुकगोत्र श्रीअमुकदेवशर्म्मा
अमुकदेवताया अमुकमंत्रसि
द्धिकामो ग्रासाद्विमुक्तिपर्य्यंत प्र

कदेवताया अमुकमंत्रजपरूप
पुरश्चरणमहं करिष्ये। इति
संकल्प्य जपेत्। तत स्तद्दिने
तत् परदिने वा स्नानादिकं वि
धाय ओम् अद्येत्यादि अमुक
देवताया अमुकमंत्रस्य कृते
तत् ग्रहणकालेन इयत् सं
ख्याजप तद्दशांशहोम तद्दशां
शतर्पण तद्दशांशाभिषेक तद्द
शांशब्राह्मणभोजनकर्माण्यहं
करिष्ये। इति संकल्प्य होमा
दिकं कुर्यात्। दक्षिणादिकं
तु एवंवत्। इति कृत्यानन्दक
ततंत्रसारः॥ अत्र आगमकल्प
द्रुमोक्त कर्मचक्रं तत्कृते द्रष्ट
व्यं। हरिभक्तिविलासीयपुरश्च
रणं तु तद्ग्रन्थे समुद्रपाविला
से द्रष्टव्यं॥
पुराणं कर्त्री व्यासादिमुनिप्रणी
तवेदार्थवर्णित पंचलक्षणान्वि
तशास्त्रं। तच्चाष्टादशमहापुराणा
ना मनुक्रमणिका अर्थात् ते
षां श्लोकपर्वखंड भोगोपाख्या
न श्रवण दान फलानि लिख्य
ते। सूत उवाच। एतच्छ्रुत्वा नार
दस्तु कुमारस्य वचो मुदा। पु
नरप्याह सुप्रीतो जिज्ञासुः

श्रेय उत्तमं॥ नारद उवाच
साधु साधु महाभाग सर्वलो
कोपकारकं महातंत्रं त्वयाप्रो
क्तं सर्वतंत्रोत्तमोत्तमं॥
अधुना श्रोतुमिच्छामि पुराण
ख्यानमुत्तमं। यस्मिन् यस्मिन्
पुराणे तु यद्यदाख्यानकं मुने
तत्तत् सर्वं समाचक्ष्व सर्वज्ञ सं
यतो मतः। तच्छ्रुत्वा वचनं वि
प्रा नारदस्य प्रभाववहं। पुराणाख्या
नसंपन्नं कुमारः प्रत्युवाचह॥
सनत्कुमार उवाच। पुराण
ख्यानकं विप्र नानाकल्पसमु
द्भवं। नानाकथासमायुक्तं मनु
तेवकु विस्तरं। ऋषिः सनातनश्चा
यं यथा वेद तथापरः। न वेद
तस्मात् पृच्छत्वं वरुकल्पविदं
वरं। श्रुत्वेत्थं नारदो वाक्यं कु
मारस्य महात्मनः। प्रणम्य विन
योपेतः सनातन यथाब्रवीत्।
ब्रह्मन् पुराणविच्छ्रेष्ठ ज्ञानवि
ज्ञानतत्पर। पुराणानां विभा
गं मे साकल्येनानुकीर्तय॥
यस्मिन् श्रुते श्रुतं सर्वं ज्ञातेज्ञा
तं कृते कृतं। वर्णाश्रमाचारध
र्मं साक्षात्कारं मेष्यति॥
कियन्तिच पुराणानि कियत्संख्या

नि मानतः। किं किमाख्यान
युक्तानि तद्वदस्व मम प्रभो॥
चातुर्वर्ण्याश्रया नाना व्रतादी
नां कथा स्तथा। सृष्टिक्रमेण
वंशानां कथाः सम्यक् प्रकाशय।
त्वत्तोधिको नचान्योस्ति पुरा
णाख्यानवित्प्रभो तस्मादाख्या
हि महत्वं सर्वसंदेहभंजने। ततः
सनातनो विप्राः श्रुत्वा नारद
भाषितं। नारायणं स्मृत्वा ध्या
त्वा प्रोवाचाथ विदांवरः॥ स
नातन उवाच साधु साधु मुनि
श्रेष्ठ सर्वलोकोपकारक। पु
राणाख्यानविज्ञाने अज्ञातानै
ष्ठिकी मतिः। तुभ्यं समभिधा
स्यामि यत् प्रोक्तं ब्राह्मणपुरा
मरीच्यादिऋषिभ्यस्तु पुत्रेस्तु
हृतात्मना॥ एकदा ब्राह्मणःपु
त्रो मरीचि र्नाम विश्रुतः। स्वा
ध्यायश्रुतसंपन्नो वेदवेदांगपा
रगः। उपसृत्य स्वपितरं ब्रह्माणं
लोकभावनं प्रणम्य भक्त्या प
प्रच्छ इदमेव मुनीश्वर। पुरा
णाख्यानममलं यत्तु पृच्छसि
मानद॥ मरीचिरुवाच। भगव
न्देवदेवेश लोकानां प्रभवाव्य
य। सर्वज्ञ सर्वकल्याण सर्वाध्यक्ष

नमोस्तु ते पुराणबीज माख्या
हि मह्यं पृच्छ्यते पितः। लक्षण
ञ्च प्रमाणञ्च वक्तारं पृच्छके त
था॥ ब्रह्मोवाच। शृणु वत्स प्र
वक्ष्यामि पुराणानां समुच्चये॥
यस्मिन् ज्ञाते भवेज्ज्ञातं वाङ्मयं
सचराचरं। पुराणमेकमेवा
सीत् सर्वकल्पेषु मानद। चतु
र्वर्गस्य बीजंच शतकोटिप्रवि
स्तरं। प्रवृत्तिः सर्वशास्त्राणां पु
राणाद्भवततः। कालेनाग्रह
णं दृष्ट्वा पुराणस्य महामतिः
हरि र्व्यासस्वरूपेण जायते च
युगे युगे। चतुर्लक्षप्रमाणेन
द्वापरे द्वापरे सदा। तदष्टादश
धा कृत्वा भूर्लोके निर्दिशत्य
पि। अद्यापि देवलोकेतु शतको
टिप्रविस्तरं। अत्रैव तस्य सार
स्तु चतुर्लक्षेण वर्ण्यते॥
ब्राह्मं १ पाद्मं २ वैष्णवंच ३ वाय
वीयं ४ तथैवच॥ भागवतं ५
नारदीयं ६ मार्कंडेयं ७ कीर्तितं
आग्नेयंच ८ भविष्यंच ९ ब्रह्म
वैवर्तं १० लिंगके ११॥
वाराहंच १२ तथा स्कान्दं १३
वामनं १४ कूर्मं १५ संज्ञिके॥
मात्स्यंच १६ गारुडं १७ तद्व

ब्रह्माण्डाख्य एष मितिविषट् ॥
पकंकथानकं सूतं वक्तुः श्रोतुः
समाकृयं । प्रवक्ष्यामि समासेन
निशामय समाहितः ॥
तत्र प्रथमं ब्रह्मपुराणं । ब्राह्मे
पुराणे तत्रादौ सर्वलोकहिता
य वै । व्यासेन वेदविदुषा समा
ख्यातं महात्मना ॥ तद्धि सर्वपु
राणाग्र्यं धर्मकामार्थमोक्षदं
नानाख्यानेतिहासाढ्यं दशसा
हस्रमुच्यते ॥ तत्पूर्वभागे ।
देवानां मसुराणांच यत्रोत्प
त्तिः प्रकीर्तिता । प्रजापतीनांच
तथा दक्षादीनां मुनीश्वर । ततो
लोकेश्वरस्यात्र सूर्यस्य परमा
त्मनः । वंशानुकीर्तनं पुण्य म
हापातकनाशनं । यत्रावतारः
कथितः परमानंदरूपिणः श्री
मतो रामचंद्रस्य चतुर्व्यूहावतारि
णः ॥ ततश्च सोमवंशस्य कीर्त
नं यत्र वर्णितं । कृष्णस्य जगदी
शस्य चरितं कल्मषापहं । द्वीपा
नांचैव सिन्धूनां वर्षाणां चाप्य
शेषतः । वर्णनं यत्र पातालस्व
र्गाणांच प्रदृश्यते नरकाणां स
माख्यानं सूर्यास्तुतिकथानकं
पार्वत्याश्च तथा जन्म विवाहश्च

निगद्यते ॥ दक्षाख्यानं ततः
प्रोक्तमेकाम्रवर्णनं । पूर्वभा
गोय मुदितः पुराणस्यास्य मा
नद ॥ तदुत्तरभागे । अस्योत्त
रे विभागे तु पुरुषोत्तमवर्ण
नं । विस्तरेण समाख्यातं ती
र्थयात्रा विधानतः । अत्रैव कृ
ष्णचरितं विस्तरात् समुदीरि
तं । वर्णनं यमलोकस्य पितृ
श्राद्धविधि स्तथा । वर्णाश्रमाणां
धर्माश्च कीर्तिता यत्र विस्तरा
त् । विष्णुधर्म युगाख्यानं प्रलय
स्यच वर्णनं । योगानांच समाख्या
नं सांख्यानांचापि वर्णनं । ब्रह्म
वादसमुद्देशः पुराणस्यच शंसनं
एतद्ब्रह्मपुराणं तु भागद्वय समा
चितं । वर्णितं सर्वपापघ्नं सर्व
सौख्यप्रदायकं ॥ तत्फलश्रु
तिः । सूतशौनकसंवादं भुक्ति
मुक्ति प्रदायकं । लिखित्वैतत्पु
राणं यो वैशाख्यां हेमसंयुतं ॥
जलधेनुयुतं चापि भक्त्यादद्या
द्द्विजायते पौराणिकाय संपूज्य
वस्त्रभोज्य विभूषणैः ॥
स वसेद्ब्रह्मणो लोके यावच्चंद्र
दिवाकरं । यः पठेच्छृणुयाद्वा
पि ब्राह्मानुक्रमणीं द्विज ॥

सोपि सर्वपुराणस्य श्रोतुर्वक्तुः
फलं लभेत् । शृणोति यः पुरा
णं तु ब्राह्मं सर्वं जितेंद्रियः ॥ ह
विष्याशी च नियमात् स लभेद्ब्रह्म
णः पदं । किमत्र बहुनोक्तेन यद्य
दिच्छति मानवः । तत् सर्वं लभते
वत्स पुराणस्यास्य कीर्तनात् ॥
इति श्रीनारदीयपुराणे पूर्वभागे
बृहदुपाख्याने चतुर्थपादे ९२
अध्यायः १ ॥
द्वितीयं पद्मपुराणं । श्रीब्रह्मोवाच
शृणु पुत्र प्रवक्ष्यामि पुराणं पद्म
संज्ञिकं । महत् पुण्यप्रदं नृणां
शृण्वतां पठतां मुदा ॥ यथापं
चेंद्रियः सर्वः शरीरीति निगद्यते
तथेदं पंचभिः खंडैरुदितं पाप
नाशनं ॥
तत्र प्रथमे सृष्टिखंडे । पुलस्त्येन
तु भीष्माय सृष्ट्यादिक्रमतो द्विज ।
नानाख्यानेतिहासाद्यैर्यत्रोक्तो य
स्य विस्तरः ॥ पुष्करस्य च माहा
त्म्यं विस्तरेण प्रकीर्तितं ॥
ब्रह्मयज्ञविधानंच वेदपाठादिल
क्षणं ॥ दानानां कीर्तनं यत्र व्रता
नांच पृथक् पृथक् । विवाहः
शैलजायाश्च तारकाख्यानकं मह
त् ॥ माहात्म्यंच गवादी

नां कीर्तितं सर्वपुण्यदं । का
लकेयादिदैत्यानां वधो यत्र
पृथक् पृथक् । ग्रहाणां मर्च
नं दानं यत्र प्रोक्तं द्विजोत्तम ।
तत् सृष्टिखण्डमुद्दिष्टं व्यासेन
सुमहात्मना ॥ द्वितीये भूमि
खण्डे । पितृ मात्रादि पूज्यत्वे
शिवशर्म्मकथा पुरा । सुव्रत
स्य कथा पश्चात् वृत्रस्य च वध
स्तथा । पृथो र्वेणस्य चाख्यानं ध
र्माख्यानं ततः परं पितृशुश्रूषा
णाख्यानं नहुषस्य कथा ततः ॥
ययातिचरितंचैव गुरुतीर्थनिरू
पणं । राज्ञा जैमिनिसंवादो ब
ह्वाश्चर्यकथायुतः ॥ कथाह्य
शोकसुन्दर्या हुण्डदैत्यवधान्वि
ता । कामोदाख्यानकं तत्र वि
हुण्डवधसंयुतं कुंजलस्य च संवाद
श्च्यावनेन महात्मना । सिद्धाख्या
नं ततः प्रोक्तं खंडस्यास्य फलो
दनं । सूतशौनकसंवादं भूमि
खण्ड मिदं स्मृतं ॥ तृतीये स्व
र्गखण्डे । ब्रह्माण्डोत्पत्ति रुदिता
यत्रर्षिभिश्च सौतिना ॥ सभूमि
लोकसंस्थानं तीर्थाख्यानं ततः
परं ॥ धर्मोत्पत्तिकथनं नर्म
दायास्तीर्थानां कथा पृथक् ॥

कुरुक्षेत्रादितीर्थानां कथाः पु
ण्याः प्रकीर्तिताः कालिंदीपु
ण्यकथनं काशीमाहात्म्यवर्ण
नं। गयायाश्चैव माहात्म्यं प्र
यागस्य च पुण्यकं। वर्णाश्रमा
नुरोधेन कर्मयोगनिरूपणं व्या
सजैमिनिसंवादः पुण्यक
र्मकथान्वितः समुद्रमथनाख्या
नं व्रताख्यानेनतःपरं। ऊर्जपंचा
हमाहात्म्यं स्तोत्रं सर्वापराधनु
त्। एतत्स्वर्गाभिधं विप्र सर्वपा
तकनाशनं॥ चतुर्थे पाताल
खंडे। रामाश्वमेधे प्रथमे राम
राज्याभिषेचनं। अगस्त्याद्या
गमश्चैव पौलस्त्यान्वयकीर्तनं
अश्वमेधोपदेशश्च हयचर्यास्त
तःपरं। नानाराजकथाः पुण्याज
गन्नाथानुवर्णनं॥ वृंदावनस्य
माहात्म्यं सर्वपापप्रणाशनम्
नित्यलीलानुकथनं यत्र कृष्णा
वतारिणः। माधवस्नानमाहा
त्म्यं स्नानदानार्चने फलं धराव
राहसंवादो यमब्राह्मणयोः क
था। संवादो राजदूतानां कृष्ण
स्तोत्रनिरूपणं शिव शंभु समा
योगो दधीच्याख्यानकं ततः।
भस्ममाहात्म्यमतुलं शिवमा

हात्म्यमुत्तमं देवरातसुताख्यानं पु
राणज्ञप्रशंसनं गौतमाख्यानकं चै
व शिवगीता ततः स्मृता। क
ल्पान्तरे रामकथा भारद्वाजाश्र
माहिते॥ पातालखंडमेतद्धि
शृण्वतां ज्ञानिनां सदा॥
सर्वपापप्रशमनं सर्वाभीष्टफलप्र
दम्॥ पंचमे उत्तरखंडे॥
पर्वताख्यानकं पूर्वं गौर्यै प्रोक्तं
शिवेन वै। जालन्धरकथा पश्चा
च्छ्रीशैलाद्यनुकीर्तनं॥ सगरस्य
कथा पुण्या ततः परमुदीरितं॥
गंगाप्रयागकाशीनां गयायाश्चा
धिपुण्यकं॥ आम्रादिदानमा
हात्म्यं तन्महाद्वादशीव्रतं। चतु
र्विंशैकादशीनां माहात्म्यं पृथ
गीरितं॥ विष्णुधर्मसमाख्यानं
विष्णुनामसहस्रकम्॥
कार्तिकव्रतमाहात्म्यं माघस्नान
फलं ततः। जंबुद्वीपस्य तीर्थानां
माहात्म्यं पापनाशनं साभ्रमत्या
श्च माहात्म्यं नृसिंहोत्पत्तिवर्ण
नम्। देवशर्मादिकाख्यानं गीता
माहात्म्यवर्णनं। भक्त्याख्यानं च
माहात्म्यं श्रीमद्भागवतस्य ह॥
इंद्रप्रस्थस्य माहात्म्यं बहुतीर्थ
कथाचितम्॥ मंत्ररत्नाभि

धानं च त्रिपाद्भूत्यनुवर्णनं। अ
वतारकथा पुण्या मत्स्यादीनाम
तः परं। रामनामशतं दिव्यं त
न्माहात्म्यं च वाडव। परीक्षणं च
भृगुणा श्रीविष्णोर्वैभवस्य च
इत्येतदुत्तरं खंडं पंचमं सर्वपु
ण्यदं॥ तत्फलश्रुतिः॥
पंचखंडयुतं पाद्मं यः शृणोति
नरोत्तमः। स लभेद्वैष्णवं धाम
भुक्त्वा भोगानिहेप्सितान्॥
एतद्धि पंचपंचाशत्सहस्रं पद्म
संज्ञकं पुराणं लेखयित्वा वै
ज्येष्ठ्यां स्वर्णाब्जसंयुतं॥ यः
प्रदद्यात् सुसत्कृत्य पुराणज्ञा
यमानदः। स याति वैष्णवं धाम
सर्वदेवनमस्कृतः पद्मानुक्रम
णीमेतां यः पठेत् शृणुयात् त
था। सोपि पद्मपुराणस्य लभे
त्श्रवणजं फलं॥ इति श्री
नारदीयपुराणे पूर्वभागे बृह
दुपाख्याने चतुर्थपादे ९३
अध्यायः २॥
तृतीयं विष्णुपुराणं श्रीब्रह्मो
वाच। शृणु वत्स प्रवक्ष्यामि पुरा
णं वैष्णवं महत्। त्रयोविंशतिसा
हस्रं सर्वपातकनाशनं॥ यत्रा
दिभागे निर्दिष्टाः षडंशाः शक्ति

जेन ह। मैत्रेयायादिमे तत्र
पुराणस्यावतारिकाः॥
तत्र प्रथमतो भागस्य प्रथमां
शे आदिकारणसर्गश्च देवादीनां
च संभवः। समुद्रमथनाख्यानं द
क्षादीनां ततोन्वयाः। ध्रुवस्य च
रितं चैव पृथोश्चरितमेव च
प्राचेतसं तथाख्यानं प्रह्लादस्य
कथानकं॥ पृथक् राज्याधि
काराख्यः प्रथमोंश इतीरितः
प्रथमस्य भागस्य द्वितीयोंशे।
प्रियव्रतान्वयाख्यानं द्वीपवर्ष
निरूपणं॥ पातालनरकाख्या
नं सप्तस्वर्गनिरूपणं। सूर्यादि
चारकथनं पृथक्लक्षणसंयुतं
चरितं भरतस्याथ मुक्तिमार्ग
निदर्शनं। निदाघऋतुसंवादो
द्वितीयोंश उदाहृतः॥ प्रथ
मभागस्य तृतीयोंशे। मन्वंतर
समाख्यानं वेदव्यासावतारकं
नरकोद्धारकं कर्म गदितं च
ततः परं॥ सगरस्यौर्वसंवादे स
र्वधर्मनिरूपणं। श्राद्धकल्पं त
थोद्दिष्टं वर्णाश्रमनिबन्धने॥
सदाचारश्च कथितो मायामोह
कथा ततः। तृतीयोंशोयमदि
तः सर्वपापप्रणाशनः॥

प्रथमभागस्य चतुर्थांशे सू
र्य्यवंशकथा पुनः सोमवंश
नुकीर्तनं। चतुर्थेंशेतु निश्चेष्ट
नानाराजकथाचितं ॥ प्रथम
भागस्य पंचमांशे कृष्णावतार
संभ्रमो गोकुलीया कथाततः
पूतनादिवधो बाल्ये कौमारे
ऽघादिहिंसनं। कैशोरे कंस
हननं माथुरं चरितं तथा।
ततस्तु यौवने प्रोक्ता लीला
द्वारवतीभवा ॥ सर्वदैत्यवधो
यत्र विवाहाः पृथक्विधाः। य
त्रस्थित्वा जगन्नाथः कृष्णोयोगे
श्वरेश्वरः। भूभारहरणं चक्रे प
रस्वहननादिभिः। अष्टावक्री
यमाख्याने पंचमांशः इतीरितः
प्रथमभागस्य षष्ठांशे। क
लिजं चरितं प्रोक्तं चातुर्विध्यं
लयस्य च। ब्रह्मज्ञानसमुद्दे
शः खांडिक्यस्य निरूपितः। के
शिध्वजेन चैवेत्थं षष्ठांशः परि
कीर्तितः। तस्याद्वितीयभागे।
सूतः पर्वं तु सत्रेन शौनकादि
ति सादरात् ॥ पृष्टेन चोदिताः
शास्त्रा हि धर्मे त्वराक्रयाः ॥
नानाधर्मकथाः पुण्या व्रतानि
नियमा यमाः ॥ धर्मशास्त्रं चार्थ

शास्त्रं वेदांतं ज्योतिषं तथा।
वंशाख्यानं प्रकरणान् स्तोत्रा
णि मनवस्तथा नानाविद्याश्र
याः प्रोक्ताः सर्वलोकोपकार
काः एतद्विष्णुपुराणं वै सर्वशा
स्त्रार्थसंग्रहं ॥ तत्फलश्रुतिः
वाराहकल्पवृत्तांतं व्यासेन क
थितं त्विह। योनरः पठते
भक्त्या यः शृणोति च सादरं
तावुभौ विष्णुलोकं हि व्रजेतां
भुक्तभोगकौ। तल्लिखित्वा
च यो दद्यादाषाढ्यां घृतधेनुना
सहितं विष्णुभक्ताय पुराणा
र्थविदे द्विज। सयाति वैष्ण
वं धाम विमानेनार्कवर्चसा ॥
यस्तु विष्णुपुराणस्य समनुक्र
मणीं द्विज। कथयेच्छृणुयाद्वा
पि सपुराणफलं लभेत् ॥ इति
श्रीनारदीयपुराणे पूर्वभागे बृ
हदुपाख्याने चतुर्थपादे ९४
अध्यायः ३

चतुर्थं वायुपुराणं। ब्रह्मोवाच।
शृणु विप्र प्रवक्ष्यामि पुराणं वा
यवीयकं। यस्मिन् श्रुते लभे
द्धाम रुद्रस्य परमात्मनः ॥ चतु
र्विंशतिसाहस्रं तत्पुराणं प्र
कीर्तितं। श्वेतकल्पप्रसंगेन ध

र्म्माण्याह मारुतः ॥ तद्वायवी
यमुदितं भागद्वयसमाचितं ॥
तस्य पूर्वभागे। सर्गादिलक्षणं
यत्र प्रोक्तं विप्रसविस्तरं ॥ मन्व
तरेषु वंशाश्च राज्ञां ये यत्रकी
र्तिताः गयासुरस्य हननं विस्त
रायत्रकीर्तितं ॥ मासानां चैव
माहात्म्यं माघस्योक्तं फलाधि
कं। दानधर्मा राजधर्मा विस्त
रेणोदितास्तथा ॥ भूपाता
लककुब्व्योमचारिणां यत्र
निर्णयः। व्रतादीनां च पूर्वोयं
विभागः समुदाहृतः ॥ तदु
त्तरभागे। उत्तरे तस्य भागे तु
नर्मदातीर्थवर्णनं। शिवस्य सं
हिताख्या वै विस्तरेण मुनीश्व
र। यो देवः सर्वदेवानां दुर्विज्ञे
यः सनातनः। स तु सर्वात्मना
यस्यास्तीरे तिष्ठति संततं ॥
इदं ब्रह्मा हरिरिदं साक्षाच्चे
दं परो हरः। इदं ब्रह्म निरा
कारं कैवल्यं नर्मदाजलं ॥
ध्रुवं लोकहितार्थाय शिवेन
स्वशरीरतः। शक्तिः कापि स
रिद्रूपा देवेयमवतारिता। ये
वसंत्युत्तरे कूले रुद्रस्यानुचरा
हि ते। वसंति याम्यतीरे ये

लोकं ते यांति वैष्णवं ॥ ओंका
रेश्वरमारभ्य यावत् पश्चिमसा
गरं। संगमाः पंच च त्रिंशन्न
दीनां पापनाशनाः। दशैक
मुत्तरे तीरे त्रयोविंशति दक्षि
णे पंचत्रिंशत्तमः प्रोक्तो रे
वा सागरसंगमः। संगमैः सहि
तान्येवं रेवातीरद्वयेपि च ॥
चतुःशतानि तीर्थानि प्रतिसि
द्धानि च संति हि ॥ षष्टितीर्थ
सहस्राणि षष्टिकोट्यो मुनीश्वर
संति चान्यानि रेवायास्तीरद्व
येपदे पदे ॥ संहितेयं महापु
ण्या शिवस्य परमात्मनः। नर्मदा
चरितं यत्र वायुना परिकीर्तितं ॥
तत्फलश्रुतिः लिखित्वेदं पु
राणं तु गुडधेनुसमाचितं। श्रा
वण्यां यो ददेद्भक्त्या ब्राह्मणा
य कुटुंबिने। रुद्रलोके वसेत्
सोपि यावदिन्द्राश्चतुर्दश। यः
श्रावयेद्वा शृणुयाद्वायवीय
मिदं नरः। नियमेन हविष्याशी
स रुद्रो नात्र संशयः। यश्चानु
क्रमणीमेतां शृणोति श्रावये
त्तथा ॥ सोपि सर्वपुराणस्य
फलश्रवणजं लभेत्। इति
श्रीनारदीयपुराणे पूर्वभागे बृ

बृहदुपाख्याने चतुर्थपादे ९५
अध्यायः ५ ॥
पंचमं श्रीभागवतपुराणं श्री
ब्रह्मोवाच मरीचे शृणु वक्ष्या
मि वेदव्यासेन यत्कृतं श्रीम
द्भागवतंनाम पुराणं ब्रह्मसंमि
तं। तदष्टादशसाहस्रं कीर्तितं
पापनाशनं। सुरपादपरूपोयं
स्कंधैर्द्वादशभिर्युतः। भगवा
नेव विप्रेंद्र विश्वरूपी समीरि
तः ॥ तस्य प्रथमस्कंधे। तत्र
तु प्रथमस्कंधे सूतर्षीणां स
मागमः ॥ व्यासस्य चरितं पु
ण्यं पांडवानां तथैवच। पारी
क्षितमुपाख्यान मितीदंसमु
दाहृतं ॥ द्वितीस्कंधे। परी·
क्षिच्छुकसंवादे सृतिद्वयनिरू
पणं। ब्रह्मनारदसंवादेऽवता
रचरितामृतं ॥ पुराणलक्षणं
चैव सृष्टिकारणसंभवः। द्विती
योयंसमुदितः स्कन्धोव्यासेनधी
मता ॥ तृतीयस्कंधे। चरितं वि
दुरस्याथ मैत्रेयेणास्यसंगमः।
सृष्टिप्रकरणं पश्चाद्ब्रह्मणः प
रमात्मनः। कापिलं सांख्य मप्य
त्र तृतीयोऽयमुदाहृतः ॥ चतु
र्थस्कंधे। सत्याश्चरितं मादौ

तु ध्रुवस्य चरितं ततः पृथोः पु
ण्यासमाख्याने ततः प्राचीनब
र्हिषः। इत्येष तुर्यो गदितोवि
सर्गे स्कंध उत्तमः ॥ पंचमस्कंधे
प्रियव्रतस्य चरितं तद्वंश्यानां
च पुण्यदं। ब्रह्मांडांतर्गतानां
च लोकानांवर्णनं ततः नरक
स्थिति रित्येष संस्थानेपंचमो
मतः ॥ षष्ठस्कन्धे।
अजामिलस्यचरितं दक्षसृष्टिनि
रूपणं। वृत्राख्याने ततःपश्चान्म
रुतांजन्मपुण्यदं षष्ठोय मुदितः
स्कंधोव्यासेन परिपोषणे ॥
सप्तमस्कंधे। प्रह्लादचरितं पु
ण्यं वर्णाश्रमनिरूपणं सप्तमो
गदितो वत्स वासनाकर्मकी
र्तने ॥ अष्टमस्कंधे ॥
गजेंद्रमोक्षणाख्यानं मन्वंतर
निरूपणं। समुद्रमथनंचैव ब
लिवैभवबंधनं। मत्स्यावतारच
रितं मष्टमोयं प्रकीर्तितः ॥
नवमस्कंधे। सूर्यवंशसमाख्यानं
सोमवंशनिरूपणं ॥ वंश्यानुच
रितेप्रोक्तो नवमोयं महामते।
दशमस्कन्धे। कृष्णस्य बाल
चरितं कौमारंच ब्रजस्थितिः
कैशोरं मथुरास्थानं यौव

नं द्वारकास्थितिः। भूभारह
रणं चात्र निरोधे दशमःस्मृ
तः ॥ एकादशस्कंधे। नारदे
न तु संवादो वसुदेवस्यकीर्ति
तः। यदोश्च दत्तात्रेयेण श्रीकृ
ष्णेनोद्धवस्यच। यादवानां मि
थोंतश्च मुक्तावेकादशः स्मृ
तः ॥ द्वादशस्कंधे ॥ भविष्य
कलिनिर्देशो मोक्षोराज्ञः प
रीक्षितः ॥ वेदशाखाप्रणय
नं मार्कंडेयतपः स्मृतः ॥
सौरी विभूति रुदिता सात्वती
च ततःपरं ॥ पुराणसंख्याक
थनमाश्रये द्वादशोह्ययं। इत्ये
वं कथितं वत्स श्रीमद्भागवतं
तव ॥ तत्फलश्रुतिः। वक्तुः
श्रोतुश्चोपदेष्टु रनुमोदितुरे
वच साहाय्यकर्तु र्गदितं भ
क्तिभुक्ति विमुक्तिदं ॥ प्रौष्ठप
द्यां पूर्णिमायां हेमसिंहसमा
चितं। देयं भागवतायेदं द्विजा
य प्रीतिपूर्वकं। संपूज्य वस्त्र
हेमाद्यै र्भगवद्भक्ति मिच्छता
योप्यनुक्रमणी मेतां श्रावये
च्छृणुयात्तथा ॥ सपुराणश्रवण
जंप्राप्नोति फलमुत्तमं ॥
इति श्रीनारदीयपुराणे पूर्वभा

गे बृहदुपाख्याने चतुर्थपादे
९६ अध्यायः ५ ॥
षष्ठं नारदीय पुराणं। श्रीब्रह्मो
वाच। शृणु विप्रप्रवक्ष्यामि पु
राणं नारदीयकं। पंचविंश
तिसाहस्रं बृहत् चित्रकथाश्र
यं ॥ तत्र पूर्वभागे प्रथमपादे
सूतशौनकसंवादः सृष्टिसंक्षे
पवर्णनं। नानाधर्मकथाः पु
ण्याः प्रवृत्ते समुदाहृताः ॥ प्रा
ग्भागे प्रथमे पादे सनकेनम
हात्मना ॥ पूर्वभागे द्वितीयपा
दे। द्वितीये मोक्षधर्माख्ये
मोक्षोपायनिरूपणं ॥ वेदां
गानाञ्च कथनं शुकोत्पत्तिश्च
विस्तरात्। सनन्दनेन गदिता
नारदाय महात्मने ॥ पूर्वभा
गे तृतीयपादे। महातंत्रे समु
द्दिष्टं पशुपाशविमोक्षणं। म
न्त्राणां शोधनं दीक्षा मंत्रोद्धा
रश्चपूजनं ॥ प्रयोगाः कवचं
नामसहस्रं स्तोत्र मेवच। गणे
श सूर्य विष्णूनां शिव शक्त्या
रनुक्रमात् ॥ सनत्कुमारमुनि
नानारदाय तृतीयके ॥ पूर्व
भागे चतुर्थपादे। पुराणलक्ष
णंचैव प्रमाणं दान मेव च

पृथक् पृथक् समुद्दिष्टं दान
कालपुरःसरं । चैत्रादिसर्वमासे
षु तिथीनांच पृथक् पृथक् । प्रो
क्तं प्रतिपदादीनां व्रतं सर्वाघ
नाशनं । सनातनेन मुनिनाना
रदाय चतुर्थके । एवंभागोय
मुदितो बृहदाख्यानसंज्ञितः ॥
तदुत्तरभागे ॥ अस्योत्तरे वि
भागे तु प्रश्न एकादशीव्रते
वशिष्ठेनाथ संवादो मान्धा
तुः परिकीर्तितः । रुक्मांग
दकथा प्रोक्ता मोहिन्युत्प
त्ति कर्मच । वसुशापश्च मो
हिन्यै पश्चाद्दहनक्रिया गंगा
कथा पुण्यतमा गयायात्रानुकी
र्तनं । काश्या माहात्म्य मतुलं
पुरुषोत्तमवर्णनं । यात्राविधा
नं क्षेत्रस्य बह्वाख्यानसमन्वि
तं । प्रयागस्याथ माहात्म्य कुरु
क्षेत्रस्य ततपरं । हरद्वारस्य चा
ख्यानं कामोदाख्यानकं तथा
बदरीतीर्थमाहात्म्यं कामाख्या
यास्तथैवच । प्रभासस्यचमाहा
त्म्यं पुराणाख्यानकं ततः । गो
तमाख्यानकं पश्चाद्वेदपादस्त
वः । गोकर्णक्षेत्रमाहात्म्यं ल
क्ष्मणाख्यानकं तथा । सेतुमा
हात्म्यकथनं नर्मदातीर्थवर्णनं
अवंत्याश्चैव माहात्म्यं मथुरा
यास्ततःपरं ॥ वृन्दावनस्य महि
मा वसोर्ब्रह्मान्तिके गतिः ॥
मोहिनीचरितं पश्चादेवं वै नार
दीयके ॥ तत्फलश्रुतिः ।
यः शृणोति नरो भक्त्या श्रा
वयेद्वा समाहितः । सयाति
ब्रह्मणो धाम नात्र कार्या वि
चारणा । यस्त्वेतद्विषुवेणायां
धेनूनां सप्तकांचितं । प्रदद्याद्वि
जवर्याय स लभेन्मोक्ष मेवच
यश्चानुक्रमणीमेतां नारदीय
स्यवर्णयेत् । शृणुयाद्वैकचि
त्तेन सोपि स्वर्गगतिं लभेत् ॥
इति श्रीनारदीयपुराणे पूर्वभा
गे बृहदुपाख्याने चतुर्थपादे
९३ अध्यायः ६ ॥
सप्तमं मार्कण्डेयपुराणं । श्रीब्र
ह्मोवाच । अथाते संप्रवक्ष्यामि
मार्कण्डेयाभिधंसुते । पुराणं
सुमहत्पुण्यं पठतां शृण्वतां
सदा । यत्राधिकृत्य शकुनीन्
सर्वधर्मनिरूपणं मार्कण्डेयेन मु
निना जैमिनेः प्राक्समीरितं ।
पक्षिणां धर्मसंज्ञानां ततो
जन्मनिरूपणम् । एवंजन्म

कथा चैषां विनियाच दिवस्प
तेः ॥ तीर्थयात्रा बलस्याथो द्रौ
पदेयकथानकं हरिश्चंद्र क
था पुण्या युद्धमाडीवकाभि
धं ॥ पिताह्नसमाख्याने दत्तात्रे
यकथा ततः । हैहयस्याथचरि
तं महाख्यानसमाचितं मदा
लसाकथा प्रोक्ता ह्यलर्कचरि
ताचिता । सृष्टिसंकीर्तनं पुण्यं
नवधा परिकीर्तितं कल्पान्तका
लनिर्देशो यक्षसृष्टिनिरूपणं
रुद्रादिसृष्टिरप्युक्ता द्वीपवर्षा
नुकीर्तनं ॥ मनूनांच कथाना
नाकीर्तिताः पापहारिकाः । ता
सुदुर्गाकथात्यंत पुण्यदा चाष्ट
मेन्तरे । तत्पश्चात्प्रणवोत्प
त्तिस्त्रयीतेजः समुद्भवः । मार्त
ण्डस्यच जन्माख्या तन्माहात्म्य
समाचिता । वैवस्वतान्वयश्चापि
वत्सप्रश्चरितं ततः । वत्सप्री
स्तानं वत्सश्रीच पाठः । खनि
त्रस्य ततः प्रोक्ता कथा पुण्या
महात्मनः । अविक्षिच्चरितं चैव
किमिच्छव्रतकीर्तनं । नरिष्यंत
स्य चरितं इक्ष्वाकुचरितं ततः । त
लस्या श्चरितं पश्चाद्रामचंद्र
स्य सत्कथा । कुशवंशसमाख्यानं
सोमवंशानुकीर्तनं पुरूरवःक
था पुण्या नहुषस्य कथाद्भुता
ययातिचरितं पुण्यं यदुवंशा
नुकीर्तनं ॥ श्रीकृष्णबालचरितं
माथुरं चरितं ततः । द्वारकाच
रितं चाथ कथा सर्वावतारजा
ततः सांख्यसमुद्देशः प्रपंचा
सत्वकीर्तनं । मार्कण्डेयस्य च
रितं पुराणश्रवणे फलं ॥
तत्फलश्रुतिः यः शृणोति न
रो भक्त्या पुराणमिदमादरा
त् । मार्कण्डेयाभिधं वत्स स ल
भेत्परमां गतिं ॥ वक्तुर्व्याकुरु
ते चैतच्छैवं स लभते पदं ॥ त
त् प्रयच्छेल्लिखित्वा यः सौ
वर्णकरिसंयुतं । कार्तिक्यां द्वि
जवर्याय स लभेद्ब्रह्मणः पदं
शृणोति श्रावयेद्वापि यश्चानु
क्रमणीमिमां । मार्कण्डेयपुरा
णस्य स लभेद्वांछितं फलं ॥ इति
श्रीनारदीयपुराणे पूर्वभागे बृ
हदुपाख्याने चतुर्थपादे ९४
अध्यायः ७ ॥
अष्टमं अग्निपुराणं । श्रीब्रह्मो
वाच । अथातः संप्रवक्ष्यामि त
वाग्नेयपुराणकं ईशानकल्प
वृत्तांतं वसिष्ठायानलोऽब्रवीत् ॥

तत् पंचदशसाहस्रं नाम्नांचवि
तमद्भुतं। पठतां शृण्वतांचैवस
र्वपापहरं नृणां॥ प्रश्नपूर्वं पु
राणस्य कथासर्वावतारजा सृ
ष्टिप्रकरणं चाथ विष्णुपूजा
दिकं ततः॥ अग्निकार्यं ततः प
श्चात्मंत्र मुद्रादि लक्षणं सर्वदी
क्षाविधानंच अभिषेकनिरूप
णं। लक्षणं मंडलादीनां कु
शापामार्जनं ततः। पवित्रारोप
णविधि र्देवालयविधि स्ततः
शालग्रामादिपूजाच मूर्त्तिल
क्ष पृथक् पृथक् न्यासादीनां
विधानंच प्रतिष्ठा पूर्तकात्ततः
विनायकादिदीक्षाणां विधिर्ज्ञे
यस्ततः परं। प्रतिष्ठा सर्वदेवा
नां ब्रह्मांडस्य निरूपणं। गंगा
दितीर्थमाहात्म्यं जंब्वादिद्वी
पवर्णनं ऊर्द्ध्वाधोलोकरचना
ज्योतिश्चक्रनिरूपणं। ज्योतिषंच
ततः प्रोक्तं शास्त्रं युद्धजयाह्व
यं। षट्कर्मच ततः प्रोक्तंमं
त्रयंत्रौषधीगणः। कुब्जिकादि
समर्चा च षोढान्यासविधिस्त
था। कोटिहोमविधानंच मन्वं
तरनिरूपणं। ब्रह्मचर्यादिधर्मा
श्चश्राद्धकल्पविधिस्ततः ग्रहयज्ञ

स्ततः प्रोक्तो वैदिकस्मार्त्तकर्म
च। प्रायश्चित्तानुकथनं तिथी
नांच व्रतादिकं। वारव्रतानुक
थनं नक्षत्रव्रतकीर्तनं॥ मा
सिकव्रतनिर्देशो दीपदानविधि
स्तथा। नवव्यूहार्चनं प्रोक्तं न
रकाणां निरूपणं व्रतानांचा
पि दानानां निरूपणमिहोदि
तं। नाडीचक्रसमुद्देशः सं
ध्याविधिरनुत्तमः॥ गायत्र्य
र्थस्य निर्देशो लिंगस्तोत्रं ततः
परं। राजाभिषेकमंत्रोक्तिः धं
मेकृत्यंच भूभुजां॥ स्वप्नाध्या
यस्ततः प्रोक्तः शकुनादिनिरू
पणम्। मंडलादिकनिर्देशो
रणदीक्षाविधि स्ततः॥ रामो
क्तनीतिनिर्देशो रत्नानांलक्ष
णं ततः। धनुर्विद्या ततः प्रोक्ता
व्यवहारप्रदर्शनं। देवासुरवि
मर्दाख्या ह्यायुर्वेदनिरूपणं।
गजादीनां चिकित्साच तेषां
शांति स्ततः परं॥ गोनसादि
चिकित्साच नानापूजास्ततः प
रं। शांतयश्चापि विविधा
छंदःशास्त्र मतःपरं॥ साहि
त्यंच ततः पश्चादेकार्णादिसमा
ह्वयाः॥ शिष्टानुशि

ष्टिश्च कोशः स्वर्गादिवर्गके॥
प्रलयानां लक्षणंच शारीरक
निरूपणं। वर्णनं नरकाणांच यो
गशास्त्रमतः परं॥ ब्रह्मज्ञानं त
तः पश्चात् पुराणश्रवणे फलं
एतदाग्नेयकं विप्र पुराणं परि
कीर्तितं॥ तत्फलश्रुतिः॥
तल्लिखित्वा तुयोदद्यात् हेम
णीकमलाचितं। तिलधेनुयुतंवा
पि मार्गशीर्ष्यां विधानतः। पुरा
णार्थविदे सोऽथ स्वर्गलोके म
हीयते। एषानुक्रमणी प्रोक्ता
तवाग्नेयस्य भक्तिदा॥ शृण्वतां
पठतांचैव नृणांचेह परत्रच॥
इतिश्रीनारदीयपुराणे। पूर्व
भागे बृहदुपाख्याने चतुर्थपा
दे ९९ अध्यायः॥ ८॥
नवमं भविष्यपुराणं। श्रीब्र
ह्मोवाच। अथ ते संप्रवक्ष्यामि
पुराणं सर्वसिद्धिदं। भविष्यं
भवतः सर्वलोकाभीष्टप्रदाय
कं। यत्राहं सर्वदेवानां मादिक
र्त्तासमुद्यतः। सृष्ट्यर्थं यत्र संजा
तो मनुः स्वायंभुवः पुरा॥ स मां
प्रणम्य पप्रच्छ धर्मसर्वार्थसाध
कं। अहंतस्मै तदाप्रीतः प्रावो
चं धर्मसंहितां॥ पुराणानां

यदा व्यासो व्यासंचक्रे महाम
तिः। तदा तां संहितां सर्वां पं
चधा व्यभजन्मुनिः। अघोरकल्प
वृत्तांतनानाश्चर्यकथाचितां॥
तत्र प्रथमपर्वाणं। तत्रादिमं
स्मृतं पर्व ब्राह्मं यत्रास्त्युपक्रमः
सूत शौनकसंवादे पुराणप्रश्न
संक्रमः। आदित्यचरितः प्रायः
सर्वाख्यानसमाचितः॥ सृ
ष्ट्यादिलक्षणोपेतः शास्त्रसर्व
स्वरूपकः। पुस्तलेखक लेखा
नां लक्षणंच ततः परं॥ संस्का
राणांच सर्वेषां लक्षणं चात्र
कीर्तितं। पक्षत्यादितिथीनांच
कल्पाः सप्त च कीर्तिताः। अष्ट
म्याद्याः शेषकल्या वैष्णवे पर्व
णि स्मृताः। शैवेच कामतोभि
न्नाः सौरे चांत्यकथाचयः॥
प्रतिसर्गाह्वयं पश्चान्नानाख्या
नसमाचितं। पुराणस्योपसंहा
रसहितं पर्वपंचमं। एषु पंच
सुपर्वस्मिन् ब्रह्मणो महिमा
धिकः॥ द्वितीय तृतीय चतुर्थ
पंचमपर्वसु। धर्मकामेच मोक्षे
तु विष्णोश्चापि शिवस्यच॥
द्वितीयेच तृतीयेच सौरोवर्ग
चतुष्टये॥ प्रतिसर्गाह्वयं

त्वेयं प्रोक्तं सर्वकथाचितं ॥ समाविष्य विनिर्दिष्टं सर्वं व्यासेन धीमता । चतुर्दशसहस्रंतपुराणं परिकीर्तितं ॥ भविष्यं सर्वदेवानां साम्यं यत्र प्रकीर्तितं । गुणानां तारतम्येन समंब्रह्मेति हि श्रुतिः ॥ तत्फलश्रुतिः । तल्लिखित्वा तु यो दद्यात् पौष्यां विद्वान् विमत्सरः गुडधेनुयुतं हेम वस्त्रमाल्य विभूषणैः ॥ वाचकं पुस्तकं चापि पूजयित्वा विधानतः । गंधाद्यै भोज्य वस्त्रैश्च कृत्वा· नीराजनादिकं ॥ यो वै जितेन्द्रियो भूत्वा सोपवासः समाहितः । अथ वै यो नरो भक्त्या कीर्तयेच्छृणुयादपि । समुक्तः पातकैर्घोरैः प्रयाति ब्रह्मणः पदं । योप्यनुक्रमणीमेतां भविष्यस्य निरूपितां ॥ पठेद्वा शृणुयाद्वैतौ भुक्तिमुक्तिं च विन्दतः ॥ इति श्रीनारदीयपुराणे पूर्वभागे बृहदपाख्याने चतुर्थपादे १०० अध्यायः ९ ॥

दशमं ब्रह्मवैवर्तपुराणं । श्रीब्रह्मोवाच । शृणु वत्स प्रवक्ष्यामि पुराणं दशमं तव । ब्रह्मवैवर्तकं नाम वेदमार्गानुदर्शकं ॥ सावर्णिर्यत्र भगवान् साक्षाद्देवर्षये स्थितः । नारदाय पुराणार्थं प्राह सर्वमलौकिकं ॥ धर्मार्थकाममोक्षाणां सारः प्रीतिर्हरौ हरे । तथा रभेदसिद्ध्यर्थं ब्रह्मवैवर्तमुत्तमं । रथान्तरस्य कल्पस्य वृत्तांतं यन्मयोदितं । शतकोटिपुराणे तत् संक्षिप्य प्राह वेदवित् ॥ व्यास श्चतुर्धा संव्यस्य ब्रह्मवैवर्तसंज्ञितम् । अष्टादशसहस्रं तत् पुराणं परिकीर्तितम् ॥ ब्रह्म प्रकृति विघ्नेश कृष्णखण्डसमाचितं । तत्र सूतर्षिसंवादे पुराणोपक्रमो मतः ॥ तत्र प्रथमे ब्रह्मखण्डे । सृष्टिप्रकरणं त्वाद्यं ततो नारदवेधसोः । विवादः सुमहान् यत्रद्वयोरानीत् पराभवः ॥ शिवलोकगतिः पश्चा ज्ञानलाभः शिवान्मुनेः शिववाक्येन तत् पश्चात् मरीचेर्नारदस्य तु ॥ मनन श्चैव सावर्णे ज्ञानार्थंसिद्धसेवितं । आश्रमे सुमहत्पुण्यं त्रैलोक्याश्चर्यकारिणि ॥ एतद्ब्रह्मखण्डे हि श्रुते पाप

विनाशनं ॥ द्वितीये प्रकृति· खंडे । ततः सावर्णिसंवादो नारदस्य समीरितः ॥ कृष्णमाहात्म्यसंयुक्तो नानाख्यानकथोत्तरः । प्रकृते र्वंशभूतानां कलानां चापि वर्णितं ॥ माहात्म्यं पूजनाद्यं च विस्तरेण यथाविधितं । एतत्प्रकृतिखंडे हि श्रुते भूतिविधायकं ॥ तृतीये गणेशखंडे । गणेशजन्मसंप्रश्नः सपुण्यक महाव्रतं । पार्वत्याः कार्तिकेयेन सहयत्रेशसंभवः चरितं कार्तवीर्यस्य जामदग्न्यस्य चाद्भुतं । विवादः सुमहान् पश्चाज्जामदग्न्य गणेशयोः ॥ एतद्विघ्नेशखण्डे हि सर्वविघ्नविनाशनं ॥ चतुर्थे श्रीकृष्णजन्मखंडे । श्रीकृष्णजन्मसंप्रश्नो जन्माख्यानं ततोऽद्भुतं ॥ गोकुले गमनं पश्चात् पूतनादिवधोऽद्भुतः । बाल्यकौमारजा लीला विविधास्तत्र वर्णिताः । रासक्रीडा च गोपीभिः शारदीयमुदाहृता । रहस्ये राधया क्रीड वर्णिता बहुविस्तरा ॥ सहाक्रूरेण तत्पश्चान्मथुरागमनं हरेः कंसादीनां वधे वृत्ते साध· स्य द्विजसंस्कृतिः काश्य सांदीपनेः पश्चाद्विद्योपादानमद्भुतं यवनस्य वधः पश्चाद्द्वारकागामनं हरेः ॥ नरकादिवधस्तत्र कृष्णेन विहितोऽद्भुतः । कृष्णखंडमिदं विप्र नृणां संसारखंडनं ॥ तत्फलश्रुतिः । पठितं च श्रुतं ध्यातं पूजितं चाभिवर्णितं । इत्येतद्ब्रह्मवैवर्तं पुराणं चात्यलौकिकं ॥ व्यासोक्तं चादिसंभूतं पठन् शृण्वन् विमुच्यते । विज्ञानज्ञानशमनात् घोरात् संसारसागरात् ॥ लिखित्वेदं च यो दद्यान्माघ्यां धेनुसमाचितं ब्रह्मलोकमवाप्नोति सयुक्तोऽज्ञानबन्धनात् ॥ यश्चानुक्रमणीं वापि पठेद्वा शृणुयादपि । सोपि कृष्णप्रसादेन लभते वाञ्छितं फलं ॥ इति श्रीनारदीयपुराणे पूर्वभागे बृहदपाख्याने चतुर्थपादे १०१ अध्यायः १ ॥

एकादशं लिंगपुराणं । श्रीब्रह्मोवाच । शृणु पुत्र प्रवक्ष्यामि पुराणं लिंगसंज्ञिकं । पठतां शृण्वतां चैव भुक्ति मुक्ति प्रदायकं । यच्च लिंगाभिधं तिष्ठन् वह्नि

लिंगे हरोभ्यधात् । महे य
मादिसिद्ध्यर्थं अग्निकल्पकथा
श्रये । तदेव व्यासदेवेन भागद्व
यसमाचितं पुराणं लिंगमुदि
तं बह्वाख्यानविचित्रितं । तदे
कादशसाहस्रं हरमाहात्म्य
सूचकं परं सर्वपुराणानां सा
रभूतं जगत्त्रये पुराणोपक्र
मे प्रश्नः सृष्टिः संक्षेपतः पुरा
तत्र पूर्वभागे । योगाख्यानं
ततः प्रोक्तं कल्पाख्यानं ततः
परं । लिंगोद्भवस्तदर्चा च की
र्तिता हि ततः परं ॥ सनत्कुमा
रशैलादि संवादश्चाथ पावनः
ततो दधीचिचरितं युगधर्म
निरूपणं । ततो भुवनकोषाख्या
सूर्यसोमान्वयस्ततः । ततश्च
विस्तरात् सर्गं त्रिपुराख्यानकं
तथा । लिंगप्रतिष्ठा च ततः प
शुपाशविमोक्षणं । शिवव्रता
नि च तथा सदाचारनिरूपणं ।
प्रायश्चित्तान्यरिष्टानि काशी
श्रीशैलवर्णनं । अंधकाख्यान
कं पश्चाद्वाराहचरितं पुनः । नृ
सिंहचरितं पश्चाज्जलंधरवधस्त
तः ॥ शैवं सहस्रनामाथ दक्ष
यज्ञविनाशनं । कामस्य दहनं

पश्चात् गिरिजायाः करग्रहः
ततो विनायकाख्यानं नृत्या
ख्यानं शिवस्य च । उपमन्युक
था चापि पूर्वभाग इतीरितः
तदुत्तरभागे । विष्णुमाहात्म्य
कथनं अंबरीषकथा ततः ॥
सनत्कुमारनंदीश संवाद
श्च पुनर्मुने । शिवमाहात्म्य
संयुक्तः स्नानयागादिकं ततः
सूर्यपूजाविधिश्चैव शिव
पूजा च मुक्तिदा दानानि बहु
धोक्तानि श्राद्धप्रकरणं ततः
प्रतिष्ठा तत्र गदिता ततोऽघोर
स्य कीर्तनं । व्रजेश्वरी महाविद्या
गायत्रीमहिमा ततः । त्र्यंबक
स्य च माहात्म्यं पुराणश्रवणस्य
च एतस्योपरिभागस्ते लैंगस्य
कथितो मया । व्यासेन हि निब
द्धस्य रुद्रमाहात्म्यसूचिनः ॥
तत्फलश्रुतिः । लिखित्वैतत्
पुराणं तु तिलधेनुसमाचितं ।
फाल्गुन्यां पौर्णमास्यां यो दद्या
द्भक्त्या द्विजातये । स लभेच्छिव
सायुज्यं जरामरणवर्जितः । यः प
ठेच्छृणुयाद्वापि लैंगं पापाप
हं नरः । स भुक्तभोगो लोके
स्मिन्नंते शिवपुरं व्रजेत् ॥

लिंगानुक्रमणीमेतां पठेद्यः
शृणुयात्तथा ॥ तावुभौ शिवभ
क्तौ च लोकद्वितयभोगिनो ।
जायतां गिरिजाभर्तुः प्रसादा
न्नात्र संशयः ॥ इति श्रीनारदी
यपुराणे पूर्वभागे बृहदुपाख्या
ने चतुर्थपादे १०२ ॥
अध्यायः १०२॥
द्वादशं वराहपुराणं । श्रीब्र
ह्मोवाच । शृणु वत्स प्रवक्ष्या
मि वाराहं वै पुराणकं । भागद्व
ययुतं शश्वद्विष्णुमाहात्म्यसूच
कं ॥ मानवस्य तु कल्पस्य प्रसं
गं मत्कृतं पुरा । निबबंध पुराणे
स्मिंश्चतुर्विंशसहस्रके । व्यासो हि
विदुयो श्रेष्ठः साक्षान्नारायणो भु
वि । तत्रादौ शुभसंवादः स्मृतो
भूमिवराहयोः ॥
तत्र पूर्वभागे । अथादिकृतवृ
त्तांते रैभ्यस्य चरितं ततः । दु
र्जयाय च तत्पश्चाच्छ्राद्धकल्प
उदीरितः ॥ महातपस आख्यानं
गौर्युत्पत्तिस्ततः परं । विनाय
कस्य नागानां सेनान्यादित्ययो र
पि ॥ गणानां च तथा देव्याध
नदस्य वृषस्य च । आख्यानं स
त्यतपसो व्रताख्यानसमन्वितं ॥

अगस्त्यगीता तत्पश्चाद्रुद्रगी
ता प्रकीर्तिता । महिषासुरवि
ध्वंसे माहात्म्यं च त्रिशक्तिजं ॥
पर्वाध्यायस्ततः श्वेतोपाख्या
ने गोप्रदानिकं । इत्यादिकृत
वृत्तांते प्रथमोद्देशनामकं ॥
भगवद्धर्मके पश्चाद्व्रततीर्थ
कथानकं । द्वात्रिंशदपराधानां
प्रायश्चित्तं शरीरकं ॥ तीर्था
नां चापि सर्वेषां माहात्म्यं पृ
थगीरितं । मथुराया विशेषे
ण श्राद्धादीनां विधिस्ततः । व
र्णनं यमलोकस्य ऋषिपुत्रप्र
संगतः । विपाकः कर्मणां चैव
विष्णुव्रतनिरूपणं ॥ गोकर्णस्य
च माहात्म्यं कीर्तितं पापनाशनं
इत्येष पूर्वभागोऽस्य पुराणस्य नि
रूपितः ॥ उत्तरभागे ॥
उत्तरे प्रतिभागे तु पुलस्त्य कु
रुराजयोः । संवादे सर्वतीर्थानां
माहात्म्यं विस्तरात् पृथक् ॥
अशेषधर्माश्चाख्याताः पौष्क
रं पुण्यपर्व च । इत्येवं तव वा
राहं प्रोक्तं पापविनाशनं ॥
तत्फलश्रुतिः ।
पठतां शृण्वतां चैव भगवद्भक्ति
वर्द्धनं । कांचनं गारुडं कृत्वा तिल

येनुसमाचिते। लिखित्वैतच्च
यो दद्याद्धेमसिं विप्राय भक्तितः
स लभेद्धेमसंयाम देवर्षिगण
वंदितः यो वान्यनुक्रमणीमेतां
शृणोत्यपि पठत्यपि। सोपि
भक्तिं लभेद्विभो संसारोच्छे
दकारिणीं ॥ इतिश्रीनार
दीयपुराणे पूर्वभागे बृहदु
पाख्याने चतुर्थपादे १०३
अध्यायः १०॥
त्रयोदशे स्कंदपुराणं। श्रीब्रह्मो
वाच। शृणुवत्स मरीचे च पुरा
णं स्कंदसंज्ञिकं। यस्मिन्प्रति
पदं साक्षान्महादेवो व्यवस्थितः
पुराणे शतकोटौ तु यच्छैवं
वर्णितं मया। ततस्तस्यार्थजा
तस्य सारो व्यासेन कीर्तितः॥
स्कंदाह्वय स्तत्र खंडाः सप्तैव
परिकल्पिताः॥ एकाशीति
सहस्रं तु स्कांदं सर्वाघकृंतनं
यः शृणोति पठेद्वापि स तु सा
क्षाच्छिवः स्थितः। यत्र माहेश्वरा
धर्माः षण्मुखेन प्रकाशिताः॥
कल्पे तत्पुरुषे वृत्ताः सर्वसि
द्धिविधायकाः॥ तत्र प्रथमेमा
हेश्वरखंडे। तस्य माहेश्वरश्चा
द्यः खंडः पापप्रणाशनः ॥

किंचिन्न्यूनार्कसाहस्रो बहुपु
ण्यो बृहत्कथः सुचरित्रशतैर्यु
क्तः स्कंदमाहात्म्यसूचकः। यत्र के
दारमाहात्म्ये पुराणोपक्रमः पुरा
दक्षयज्ञकथा पश्चाच्छिवलिंगा
र्चने फलं। समुद्रमथनाख्यानं दे
वेंद्रचरितं ततः। पार्वत्याः समु
पाख्यानं विवाहस्तदनंतरं॥
कुमारोत्पत्तिकथनं ततस्ता
रकसंगरः। ततः पाशुपता
ख्यानं चंडाख्यानसमाचितं। द्यु
तप्रवर्तनाख्यानं नारदेन समा
गमः। ततः कुमारमाहात्म्ये पं
चतीर्थकथानकं। धर्मवर्मनृ
पाख्यानं नदी सागर कीर्तनं
इंद्रद्युम्नकथा पश्चान्नाडीजंघ
कथाचिता। प्रादुर्भाव स्ततो
मह्याः कथा दमनकस्य च। मही
सागरसंयोगः कुमारेशकथा
ततः॥ ततस्तारकयुद्धं च नाना
ख्यानसमाचितं। वधश्च तारकं
स्याथ पंचलिंगनिवेशनं। द्वी
पाख्यानं ततः पुण्यं ऊर्द्ध्वलोक
व्यवस्थितिः। ब्रह्मांडस्थितिमा
नं च बर्करेशकथानकं महाका
लसमुद्भूतिः कथा चास्य महाद्भुता
वासुदेवस्य माहात्म्यं कोटितीर्थ।

र्थं ततः परं॥ नानातीर्थसमा
ख्यानं गुप्तक्षेत्रे प्रकीर्तितं।
पांडवानां कथा पुण्या महावि
द्याप्रसाधनं॥ तीर्थयात्रासमाप्ति
श्च कौमारमिदमद्भुतं। अरुणा
चलमाहात्म्ये सनक ब्रह्मसंक
था। गौरीतपः समाख्यानं त
त्तत्तीर्थनिरूपणं महिषासुरजा
ख्यानं वधश्चास्य महाद्भुतः॥
शोणाचले शिवास्थानं नित्य
दापरिकीर्तितं। इत्येष कथितः
स्कान्दे खंडो माहेश्वरोद्भुतः॥
द्वितीये वैष्णवखंडे।
द्वितीयो वैष्णवः खंडस्तस्या
ख्यानानि मे शृणु। प्रथमं भूमि
वाराहं समाख्यानं प्रकीर्तितं॥
यत्रवोचकुभ्रस्य माहात्म्यं पा
पनाशनं। कमलायाः कथा
पुण्या श्रीनिवासस्थिति स्ततः
कुलालाख्यानकं चात्र सुवर्णमु
खरीकथा। नानाख्यानसमायु
क्ता भारद्वाजकथाद्भुता॥ मतं
गांजनसंवादः कीर्तितः पापनाश
नः। पुरुषोत्तममाहात्म्यं कीर्ति
तं चोत्कले ततः॥ मार्कंडेय
समाख्यानं अंबरीषस्य भूपतेः।
इंद्रद्युम्नस्य चाख्यानं ॥

विद्यापतिकथा शुभा॥ जैमि
नेः समुपाख्यानं नारदस्यापि
वाडव। नीलकंठसमाख्यानं ना
रसिंहोपवर्णनं॥ अश्वमेधक
थाराज्ञो ब्रह्मलोकगतिस्तथा
रथयात्रा विधिः पश्चाज्जन्म स्ना
नविधिस्तथा॥ दक्षिणामूर्त्यु
पाख्यानं गुंडिचाख्यानकं ततः
रथरक्षाविधानं च शयनोत्स
वकीर्तनं। श्वेतोपाख्यानमत्रो
क्तं वह्न्युत्सवनिरूपणं। दोलो
त्सवो भगवतो व्रतं सांवत्
सराभिधं॥ पूजा च कामिभिर्वि
ष्णो रुद्दालकनियोगकः॥
मोक्षसाधनमत्रोक्तं नानायो
गनिरूपणं॥ दशावतारकथनं
स्नानादिपरिकीर्तनं। ततो वद
रिकायाश्च माहात्म्यं पापनाश
नं॥ अग्न्यादितीर्थमाहात्म्यं वै
नतेयशिलाभवं। कारणं भगव
द्वासे तीर्थं कापालमोचनं। पं
चधाराभिधं तीर्थं मेरुसंस्थाप
नं तथा। ततः कार्तिकमाहात्म्ये
माहात्म्यं मदनालसं॥
धूम्रकेशसमाख्यानं दिनकृ
त्यानि कार्तिके। पंचभीष्मव्र
ताख्यानं कीर्तिदं भुक्तिमुक्तिदं

नद्रुतस्य च माहात्म्यं विधाने
स्नानजे तथा। पुंड्रादिकीर्तने
चात्र मालाधारणपुण्यके ॥
पंचामृतस्नानपुण्यं धूपनादा
दिजे फले। नानापुष्पार्चनफले
तुलसीदलजेफले। नैवेद्यस्य
च माहात्म्यं हरिवासरकीर्तने।
अखंडैकादशीपुण्यं तथाजा
गरणस्य च। मत्स्योत्सवविधाने
च नाममाहात्म्यकीर्तने। ध्याना
दिपुण्यकथने माहात्म्ये मथुरा
भवे। मथुरातीर्थमाहात्म्यं पृथ
गुक्तं ततःपरं वनानां द्वादशा
नां च माहात्म्यं कीर्तितं ततः ॥
श्रीमद्भागवतस्यात्र माहात्म्यं
कीर्तितं परं। वज्रशांडिल्य
संवादे अंतर्लीलाप्रकाशके
ततो माघस्य माहात्म्ये स्नानदा
न जपोद्भवे। नानाख्यानसं
मायुक्तं दशाध्याये निरूपिते
ततो वैशाखमाहात्म्ये शय्या
दानादिजे फले जलदानादि
विधयः कामाख्यानमतः परं।
श्रुतदेवस्य चरितं व्याधोपा
ख्यानमद्भुतं। तथाक्षयतृती
यादेर्विशेषात् पुण्यकीर्तनं।
ततस्त्वयोध्यामाहात्म्ये च।

कब्रह्मकृततीर्थके। ऋणपाप
विमोचाख्ये तथाधारसहस्रके
स्वर्गद्वारे चंद्रहरि धर्महर्युपव
र्णने। स्वर्णवृष्टेः रूपाख्याने ति
लोदा सरयूयुतिः सीताकुंडगु
प्तहरिः सरयू घर्घराचयः गोप्र
चारश्च दुग्धोदे गुरुकुंडादिपंच
कं। घोषार्कादीनि तीर्थानि
त्रयोदश ततःपरं। गयाकूप
स्य माहात्म्यं सर्वाघविनिवर्त
कं ॥ माण्डव्याश्रमपूर्वाणि ती
र्थानि तदनंतरं। अजितादि
मानसादि तीर्थानि गदितानि
च ॥ इत्येष वैष्णवः खंडो द्वि
तीयः परिकीर्तितः ॥ तृतीये
ब्रह्मखंडे ॥ अतः परं ब्रह्मखंडे
मरीचे शृणु पुण्यदे। यत्र वै से
तुमाहात्म्ये फले स्नानेक्षणो
द्भवे। गालवस्य तपश्चर्या रा
क्षसाख्यानकं ततः चक्रतीर्था
दिमाहात्म्यं देवीपत्तनसंयुतं ॥
वेतालतीर्थमहिमा पापनाशा
दिकीर्तनं मंगलादिकमाहात्म्यं
ब्रह्मकुंडादिवर्णनं। हनुमत्
कुंडमहिमागस्त्यतीर्थभवं फलं
रामतीर्थादिकथनं लक्ष्मीतीर्थ
निरूपणं। शंखादितीर्थमहिमा

तथा साध्यामृतादिजः। धनुष्को
ट्यादिमाहात्म्यं क्षीरकुंडादिजे
तथा। गायत्र्यादिकतीर्थानां मा
हात्म्यं चात्र कीर्तितं ॥ रामना
थस्य महिमा तत्त्वज्ञानोपदेश
नं। यात्राविधानकथनं सेतौ मु
क्तिप्रदं नृणां ॥ धर्मारण्य
स्य माहात्म्यं ततः परमुदीरितं
स्थाणुः स्कंदाय भगवान् यत्र
तत्त्वमुपादिशत्। धर्मारण्यस
संभूतिस्तत्पुण्यपरिकीर्तनं।
कर्मसिद्धेः समाख्यानं ऋषिवं
शनिरूपणं। अप्सरातीर्थमुख्या
नां माहात्म्यं यत्र कीर्तितं। वर्णा
नामाश्रमाणां च धर्मतत्त्वनिरूप
णं ॥ देवस्थानविभागश्च बकु
लार्ककथा शुभा। छत्रानन्दा
तथा शांता श्रीमाता च मतंगिनी
पुण्यदाश्च समाख्याता यत्र दे
व्यः समास्थिताः। इंद्रेश्वरादि
माहात्म्यं द्वारकादिनिरूपणं।
लोहासुरसमाख्यानं गंगाकू
पनिरूपणं। श्रीरामचरितं चै
व सत्यमंदिरवर्णनं। जीर्णोद्धार
स्य कथनं शासनप्रतिपादनं।
जातिभेदप्रकथनं स्मृतिधर्म
निरूपणं ॥ ततस्तु वैष्णवा धर्मा

नानाख्यानैरुदीरिताः चातुर्मा
स्ये ततः पुण्ये सर्वधर्मनिरूपणं
दानप्रशंसा तत्पश्चाद्व्रतस्य
महिमा ततः। तपसश्चैव पू
जायाः सच्छिद्रकथनं ततः ॥
प्रकृतीनां भिदाख्यानं शाल
ग्रामनिरूपणं। तारकस्य वधो
पायो अश्वत्थो महिमा तथा
विष्णोः शापश्च वृक्षत्वं पार्वत्य
नुनयस्ततः। हरस्य तांडवं नृ
त्यं रामनाम्नो निरूपणं। हरस्य लिं
गपतनं कथा पैजवनस्य च ॥
पार्वतीजन्मचरितं तारकस्य व
धोद्भुतः। प्रणवैश्वर्यकथनं
तारकाचरितं पुनः। दक्षयज्ञस
मासिश्च द्वादशाक्षरनिरूपणं। ज्ञा
नयोगसमाख्यानं महिमा द्वाद
शार्कजः। श्रवणादिकपुण्यं च
कीर्तितं शर्मदं नृणां ॥ तृतीये
ब्रह्मखंडस्योत्तरभागे। ततो
ब्रह्मोत्तरे भागे शिवस्य महि
माद्भुतः। पंचाक्षरस्य महिमा
गोकर्णमहिमा ततः। शिवरा
त्रेश्च महिमा प्रदोषव्रतकीर्तनं
सोमवारव्रतं चापि सीमंतिन्याः
कथानकं तद्भद्रायूत्पत्तिकथ
नं सदाचारनिरूपणं। शिवव

र्मस्समुद्देशा तद्गुहावर्णने
भद्राश्वमहिमा चापि भस्ममाहा
त्म्यकीर्तने। शावराख्यानकंचै
वउमामाहेश्वरव्रतं। रुद्राक्षस्य
च माहात्म्यं रुद्राध्यायस्य पुण्य
कं। श्रवणादिकपुण्यंच ब्रह्म
खंडेसमीरितः॥ चतुर्थेकाशी
खंडेमनुत्तमे। विंध्यनारदयोर्थ
संवादः परिकीर्तितः। सत्य
लोकप्रभावश्चागस्त्यावासे शु
रागमः। पतिव्रताचरित्रंच ती
र्थचर्याप्रशंसनम्॥ तत
श्च सप्तपुर्याख्या संयमिन्या
निरूपणं। ब्रध्नस्य च तथें
द्राग्न्योर्लोकाप्तिः शिवशर्म
णः॥ अग्नेः समुद्भव श्चैव
क्रव्यादवरुणसंभवः। गंधवत्य
लकापुर्योरीश्वर्याश्चसमुद्भवः
चंद्रेन्दु बुधलोकानां कुजेज्य
र्कभुवां क्रमात्। सप्तर्षीणांच ध्रु
वस्यापि तपोलोकस्य वर्णने॥
ध्रुवलोककथा पुण्या सत्य
लोकनिरीक्षणं। स्कंदागस्त्यस
मालापो मणिकर्णीसमुद्भवः
प्रभावश्चापि गंगाया गंगाना
मसहस्रकं। वाराणसीप्रशंसा
चभैरवाविर्भवस्ततः। दंडपाणि

खंडे॥ अतः परं चतुर्थेत काशी ५

ज्ञानवाप्या ह्युद्भवः समनंतरं
ततः कलावत्याख्याने सदाचा
रनिरूपणं। ब्रह्मचारिसमाख्या
ने ततःस्त्रीलक्षणानिच। कृत्या
कृत्यविनिर्देशो ह्यविमुक्तेशव
र्णनं। गृहस्थयोगिनोर्धर्माः का
लज्ञानं ततः परं। दिवोदासक
था पुण्या काशीवर्णनमेवच
योगिनीचर्याच लोलार्कोत्तरशा
म्बार्कजाकथा। द्रुपदार्कस्यता
र्क्ष्याख्यारुणार्कस्योदयस्ततः॥
दशाश्वमेधतीर्थाख्या मंदराच्चग
णागमः। पिशाचमोचनाख्याने
गणेशप्रेषणं ततः। मायागण
पतेश्चाथ प्रादुर्भावस्ततः।
विष्णुमायाप्रपंचोथ दिवोदास
विमोक्षणं। ततः पंचनदोत्प
त्ति र्बिंदुमाधवसंभवः। ततोवै
ष्णवतीर्थाख्या शूलिनः काशि
कागमः। जैगीषव्येन संवादोज्ये
ष्ठेशाख्या महेशितुः। क्षेत्राख्या
ने कंडुकेश व्याघ्रेश्वरसमुद्भवः
शैलेश रत्नेश्वरयोः कृत्तिवा
सस्य चोद्भवः। देवता नाम
धिष्ठाने दुर्गासुरपराक्रमः॥
दुर्गाया विजयश्चाथ ओंकारे
शस्य वर्णने। पुनरोंकारमा

हात्म्यं त्रिलोचनसमुद्भवः॥ के
दाराख्या च धर्मेशकथा विश्वभु
जोद्भवा। वीरेश्वरसमाख्यानं गं
गामाहात्म्यकीर्तनं। विश्वकर्मे
शमहिमा दक्षयज्ञोद्भवस्तथा॥
सतीशस्यामृतेशादे र्भुजस्तंभः
पराशरेः॥ क्षेत्रतीर्थकदंबश्च
मुक्तिमंडपसंकथा। विश्वेश
विभवश्चाथ ततो यात्रापरिक्र
मः॥ पंचमे अवंतीखंडे।
अतः परं त्ववंत्याख्यं शृणु खं
डंच पंचमं। महाकालवनाख्या
ने ब्रह्मशीर्षच्छिदा ततः। प्राय
श्चित्तविधिश्चाग्ने रुत्पत्तिश्च स
रागमः। देवदीक्षा शिवस्तोत्रं ना
नापातकनाशनं॥ कपालमो
चनाख्यानं महाकालवनस्थि
तिः। तीर्थंकलकलेशस्य सर्व
पापप्रणाशनं॥ कुंडमप्सरसं
ज्ञंच सर्वे रुद्रस्य पुण्यदं। कुटुं
बेशंच विद्याध्र मर्कटेश्वरतीर्थ
कं॥ स्वर्गद्वारं चतुःसिंधु तीर्थं
शंकरवापिका। सकरार्क गंध
वतीतीर्थं पापप्रणाशनं। दशा
श्वमेधैकानेश तीर्थे च हरि
सिद्धिदे। पिशाचकादियात्राच
हनुमत्क यमेश्वरौ॥ महाका

लेशयात्राच हनुमत्क यमेश्वरौ
महाकालेशयात्राच लक्ष्मीके
श्वरतीर्थकं। शुक्रेश भेशापा
ख्याने कुशस्थल्याःप्रदक्षिणं॥
अक्रूर मंदाकिन्यंकपाद चंद्रार्क
वैभवं॥ करभेश कुकुटेश ल
ड्डुकेशादि तीर्थकं। मार्कंडेसं
यज्ञवापी सोमेशं नरकांतकं।
केदारेश्वर रामेश सौभाग्येश
नरार्ककं। केशार्केशक्ति भेदं
च स्वर्णक्षुरमुखानिच॥ ओंका
रेशादितीर्थानि अंधकस्तुति
कीर्तनं। कालारण्ये लिंगसंख्या
स्वर्णशृंगाभिधानकं॥ कुशस्थ
ल्याश्चावंत्या उज्जयिन्याश्चाभिधान
कं। पद्मावती कुमुद्वत्यमरावती
तिनामकं॥ विशाला प्रतिकल्पा
भिधानेच ज्वरशांतिकं। शिप्रा
स्नानादिकफले नागोत्पत्तिः शि
वस्तुतिः हिरण्याक्षवधाख्याने
तीर्थं सुंदरकुंडकं। नीलगंगाप
ष्कराख्ये विंध्यावासनतीर्थकं
पुरुषोत्तमाधिमासे तीर्थेचाघ
नाशनं। गोमती वामने कुंडे
विष्णोर्नामसहस्रकं। वीरेश्व
रः कालभैरवस्य च तीर्थके
महिमा नागपंचम्यां नृसिंहस्य

जयंतिका ॥ कुठेश्वरयात्रा
च देवसाधककीर्त्तने। कर्करा
जाख्यतीर्थंच विघ्नेशादिसंरो
हने। इंद्रकुण्डप्रभृतिषु वकृती
र्थनिरूपणं। यत्राष्टतीर्थजा पु
ण्या रेवामाहात्म्य मुच्यते। य
मपुत्रस्य वैराग्ये मार्कंडेयवन
संगमः। प्राप्तयानुभवाख्याने
मृत्स्नापरिकीर्तने। कल्पे क
ल्पे पृथक्नाम नर्मदायाः प्रकी
र्त्तितं। स्तव मार्षे नार्मनंच
कालरात्रिकथाततः। महादे
वस्तुतिः पश्चात् पृथक्कल्पक
थाद्भुता। विशल्याख्यानकंपश्चा
ज्जालेश्वर् कथातथा। गौरीव्रत
समाख्याने त्रिपुरज्वालनं ततः।
देहपातविधानंच कावेरीसंगम
स्ततः॥ दारुतीर्थे ब्रह्मवर्त्ते यत्रे
श्वर् कथानके अग्नितीर्थे रवि
तीर्थे मेघनादे विदारुके। देव
तीर्थे नर्मदेशे कपिलाख्येकर
ञ्जके। कुण्डलेशे पिप्पलादे वि
मलेशंच शूलभित्। शचीहर
णाख्यान मंधकस्य वधस्ततः
शूलभेदोद्भवो यत्र दानधर्माः
पृथग्विधाः। आख्यानंदीर्घतप
स ऋष्यशृंगकथाततः। चित्रसे

नकथा पुण्या काशिराजस्य
मोक्षणं। ततो देवशिलाख्या
नं शबरीचरितान्वितं व्याधाख्या
नं ततः पुण्यं पुष्करिण्यर्कतीर्थ
कं। आदित्येश्वरतीर्थंच शक्रतीर्थ
करोटिकं। कुमारेश मगस्त्येशं
च्यवनेशंच मातृजं। लोकेशं
धनदेशंच मङ्गलेशंच कामजं
नागेशंचापि गोपारं गौतमं
शंखचूडजं॥ नारदेशं नन्दि
केशं वरुणेश्वरतीर्थकं॥ द
धिस्कंदादितीर्थानि हनूमंतेश्व
रंततः। रामेश्वरादितीर्थानि
सोमेशं पिंगलेश्वरं। ऋणमो
क्षं कपिलेशं पूतिकेशं जलेश
यं॥ चंडार्कं यमतीर्थंच कह्लो
डीशंच नान्दिकं। नारायणंच
कोटीशं व्यासतीर्थं प्रभासिकं
नागेशं संकर्षणकं मन्मथेश्वर
तीर्थकं। एरंडीसंगमं पुण्यं सु
वर्णशिलतीर्थकं॥ करंजं काम
हं तीर्थं भांडीरं वाहिणीभवं।
चक्रतीर्थं धौतपापंस्कान्दमां
गिरसाह्वयं। कोटितीर्थं मयो
न्माख्यं मंगलाख्यं त्रिलोचनं।
इंद्रेशं कंबुकेशंच सोमेशंको
हनेशकं। नार्मदं चार्कं मा

ग्नेयं भार्गवेश्वरमुत्तमं। ब्राह्मं
दैवंच भार्गेशं आदिवाराहणं
कवे। रामेशमथ सिद्धेशंआ
हल्यं कंकटेश्वरं। शाक्रेसोम्य
च नान्देशं तापेशं रुक्मिणीभ
वं॥ योजनेशंवराहेशं द्वादशी
शिवतीर्थके। सिद्धेशमंगले
पंच लिंगवाराहतीर्थकं। कुं
डेशं सितवाराहं भार्गवेशं रवी
श्वरम्॥ शुक्लादीनि चतीर्था
नि हुंकारस्वामितीर्थकं। संग
मेशं नारकेशं मोक्षं सार्पञ्च
गोपकं॥ नागं शाम्बंचसिद्धे
शं मार्कंड अक्रूरतीर्थके॥ का
मोद शूलारोपाख्यं माण्डव्यं
गोपकेश्वरं। कपिलेशं पिंग
लेशं भूतेशं गांग गौतमे॥
आश्वमेधं भृगुकच्छं केदारे
शंचपापनुत्। कनखलेशं
ज्ज्वालेशं शालग्रामं वराहकं।
चंद्रप्रभास मादित्यं श्रीपत्या
ख्यंच हंसकं मूलस्थानंच शू
लेशं मांग्रायाचित्रदैवकं। शि
खिशं कोटितीर्थंच दशकन्यंसु
वर्णकं ऋणमोक्षं भारभूतिस्त्वा
स्ते पुंख मंडिमं॥ आमलेशंक
पालेशं शृंगेरंडीभवं ततः।

कोटितीर्थं लोभनेशं फलस्तु
तिरतः परं हमिजंगलमाहात्म्य
रोहिताश्वकथाततः धुंधुमार
समाख्यानं वधोपायस्ततोस्य
च। वधो धुंधोस्ततः पश्चान्त
श्चित्रवहोद्भवः महिमास्य त
तश्चंडीशप्रभावो रतीश्वरः
केदारेशो लक्षतीर्थं ततो
विष्णुपदीभवं। मुख्यारं च्यवना
ख्याख्यं ब्रह्मणश्चसरस्ततः। च
कारख्यं लालिताख्याने तीर्थंच
वकुलासयं। रुद्रावर्तंच मार्क
एवं तीर्थंपापप्रणाशनं॥ राव
णेशंसुरूपदं देवानुप्रेततीर्थ
कं जिकोदतीर्थसम्भूतिः शिवा
द्वेदे फलस्तुतिः॥ पष्ठखंडोऽय
वस्याख्यः पूर्ववत्पापनाशनः
षष्ठे नागरखण्डे। अतःपरं
नागराख्यः खण्डः यष्टोमिथी
यते। लिंगोत्पत्तिसमाख्याने ह
रिश्चंद्रकथाशुभा। विश्वामि
त्रस्य माहात्म्यं त्रिशंकुस्वर्ग
तिस्तथा। हाटकेश्वरमाहात्म्ये
वृत्रासुरवधस्तथा। नागबिले
शंखतीर्थे अचलेश्वरवर्णने च
मत्कारपुराख्याने चमत्कार
करंपरं। गयशीर्षं बालशाख्यं

वालमंडं मृगाह्वयं ॥ विष्णुपादस्तु
गोकर्णो युगरूपं समाश्रयः सि
द्धेश्वरं नागसरः सप्तार्षेयं ह्य
गस्त्यकं ॥ भ्रूणगर्तं नलेशा
श्च भैष्मं दुर्वैरं मर्ककम् ॥
शार्मिष्ठं सोमनाथश्च दौर्ग
मानर्तकेश्वरं । जमदग्निवधा
ख्यानं नैःक्षत्रियकथानकं । रा
मह्रदं नागपुरं जडलिंगं च यज्ञ
भूः ॥ मुण्डीरादित्रिकार्कश्च स
तीपरिणयस्तथा । वालखिल्यं च
वागेशं वालखिल्यं च गारुडं ॥
लक्ष्मीशापः साप्तविंशः सोमप्रा
सादमेव च । अम्बावृद्धं पादुका
ख्यं आग्नेयं ब्रह्मकुण्डकं । गोमु
खं लोहयष्ट्याख्यं अजापालेश्व
री तथा । शानैश्चरं राजवापी
रामेशो लक्ष्मणेश्वरः ॥ कुशे
शाख्यं लवेशाख्यं लिंगं सर्वो
त्तमोत्तमं । अष्टषष्टिसमाख्या
ने दमयन्त्यास्त्रिजातकं ॥
ततोम्बा रेवती चात्र भट्टिका
तीर्थसम्भवं । क्षेमङ्करी च के
दारं शुक्लतीर्थं मुखारकं ॥ स
त्यसंधेश्वराख्यानं तथा कर्णोत्
पला कथा । अटेश्वरं याज्ञव
ल्क्यं गौर्यं गाणेशमेव च । ततो

वास्तुपदाख्यानं अजागृहकथा
नकं ॥ सौभाग्यपांडुक शूलेशंध
र्मराजकथानकं । मिष्टान्नदेश्व
राख्यानं गाणपत्यत्रयं ततः ॥ जा
वालिचरितं चैव मकरेशकथा
ततः । कालेश्वर्यन्त्यकाख्याने
कुण्डं नाप्सरसं तथा ॥ पुष्पा
दित्यं रौहिताश्वं नागरोत्प
त्तिकीर्तनं भार्गवं चरितं चैव
वैश्वामित्रं ततः परम् ॥ सारस्व
तं पैप्पलादं कंसारीशं च पै
ण्डकं ॥ ब्रह्मणो यज्ञचरि
तं सावित्र्याख्यानसंयुतं ॥
रैवतं भर्तृयज्ञाख्यं मुख्यतीर्थ
निरीक्षणं । कौरवं हाटकेशा
ख्यं प्रभासं क्षेत्रकत्रयं ॥ पौ
ष्करं नैमिषं धर्म्म मरण्यत्रितयं
स्मृतम् । वाराणसी द्वारका
ख्यावन्त्याख्येति पुरीत्रयं ॥
वृन्दावनं खाण्डवाख्यं मद्वैका
ख्यं वनत्रयं । कल्पः शालस्तथा
नंदो ग्रामत्रयमनुत्तमं । असि शु
क्लपितृसंज्ञं तीर्थत्रयमुदाहृतं
अर्बुदो रैवतश्चैव पर्वतत्रयमु
त्तमं ॥ नदीनां त्रितयं गंगा न
र्मदा च सरस्वती ॥ सार्द्धकेको
टित्रयफलमेकैकं चैषु की

र्तितं । कूपिका शंखतीर्थश्चान
र्कं वालमण्डनं । हाटकेशक्षे
त्रफलप्रदं प्रोक्तं चतुष्टयं ॥
शाम्बादित्यं श्राद्धकल्पं यौधिष्ठि
रमथान्धकं । जलशायि चतु
र्मास्यं अशून्यशयनव्रतं । मंकणे
शं शिवरात्रिं तुलापुरुषदानकं ।
पृथ्वीदानं वाणकेशं कपालमो
चनेश्वरं ॥ पापपिण्डं साप्तलैंगं
युगमानादिकीर्तनं । निम्बेश शा
कम्भर्याख्यं रुद्रैकादशकीर्त
नं ॥ दानमाहात्म्यकथनं द्वाद
शादित्यकीर्तनं ॥ इत्येष नागरः
खण्डः प्रभासाख्योऽधुनोच्यते
सप्तमे प्रभासखण्डे ॥ सोमे
शो यत्र विश्वेशोऽर्कस्थलं पु
ण्यं महत् । सिद्धेश्वरादिका
ख्यानं पृथगत्र प्रकीर्तितं ॥
अग्नितीर्थं कपर्दीशं केदारेशं
गतिप्रदं । भीमभैरवचण्डी
शा भास्कराङ्गारकेश्वराः ॥
बुधेज्य भृगु सौरेन्दुः शिखी
शा हरविग्रहाः । सिद्धेश्वराद्याः
पंचान्ये रुद्रास्तत्र व्यवस्थिताः
वरारोहा ह्यजापाला मंगला
ललितेश्वरी लक्ष्मीशो वाडवे
शोऽर्घ्यीशः कामेश्वरस्तथा

गौरीशो वरुणेशाख्यं उषीशो
च गणेश्वरं कुमारेशश्च शाक
ल्पशाकुलीतक गौतमं ॥ दैत्य
घ्नेशो चक्रतीर्थं सन्निहत्याह्वयं
तथा । भूतेशादीनि लिंगानि
आदिनारायणाह्वयं । ततस्तु
कथराख्यानं शाम्बादित्यकथा
नकं । कथा कण्टकशोषिन्या
महिषघ्न्यास्ततः परं । कपालीश्व
रकोटीश वालब्रह्माख्य सत्कथा
नरकेशः संवर्तेश निधीश्वरक
था ततः । बलभद्रेश्वरस्याथ गं
गाया गणपस्य च । जाम्बवत्या
श्च सरितः पाण्डुकूपस्य सत्क
था । शतमेध लक्षमेध कोटिमे
धकथा तथा ॥ दुर्वासार्क घट
स्थान हिरण्यासंगमोत्कथा । न
गरार्कस्य कृष्णस्य संकर्षण सु
द्रयोः । कुमार्याः क्षेत्रपालस्य ब्र
ह्मेशस्य कथा पृथक् । पिंगला सं
गमेशस्य शंकरार्क घटेशयोः
ऋषितीर्थस्य नंदार्क त्रितकूप
स्य कीर्तनं । शशपानस्य पर्णार्क
संकुमत्योः कथाद्भुता वाराह
स्वामिवृत्तान्तं छायालिंगाख्यगु
ल्फयोः ॥ कथा कनकनंदायाः
कुन्ती गंगेशयोस्तथा ॥ चम

सोङ्केद विदुर त्रिलोकेशकथात
तः ॥ मंकणेश त्रैपुरेशाषंड
तीर्थकथा स्मृता । सूर्यप्राची
त्रीक्षणयो रुमानामकथा तथा
भद्रार मूलस्थलयो श्च्यवनार्के
णयोस्तथा। अजापालेश वा
लार्क कुवेरस्थलजा कथा। ऋ
षितोयाकथा पुण्या संगालेश्व
रकीर्तनं । नारदादित्यकथनं ना
रायणनिरूपणं ॥ तप्तकुण्डस्य
माहात्म्यं मूलचंडीशवर्णनं। च
तुर्वक्त्रगणाध्यक्ष कलम्बेश्वरयोःक
था ॥ गोपालस्वामि वकुलस्वामि
नो मरुती कथा। क्षेमार्कोन्नत
विघ्नेश जलस्वामिकथा ततः॥
कालमेघस्य रुक्मिण्या ओर्वशी
श्वर भद्रयोः शंखावर्त मोक्षती
र्थ गोष्पदाच्युत सद्मनां ॥ जा
लेश्वरस्य हुंकारकूप चण्डीश
योः कथा। आशापुरस्थविघ्नेश
कलाकुंडकथाद्भुता कपिलेश
स्य च कथा जरद्गवशिवस्य च ॥
नलकर्कोटेश्वरयो र्हाटकेश्वर
जाकथा ॥ नारदेश मंत्रभूष्या
दुर्गाकूटे गणेशजा। सुपर्णै
लाख्यभैरव्यो र्भल्लतीर्थभवा कथा
कीर्तनं कर्दमालस्य गुप्तसोमे

श्वरस्य च। बकुस्वर्णेश शृंगेश
कोटीश्वरकथा ततः ॥ मार्कंडेश्व
रकोटीश दामोदर गृहात्कथा
स्वर्णरेखा ब्रह्मकुण्डं कुन्तीभी
मेश्वरौ तथा ॥ मृगीकुण्डश्च स
र्वस्वं तेने वस्त्रापथे स्मृतं। कुश
विल्वेश गंगेश रैवतानां कथा
द्भुता। ततोऽर्बुदे श्वभ्रकथा अच
लेश्वरकीर्तनं। नागतीर्थस्य च
कथा वसिष्ठाश्रमवर्णनं ॥ भद्र
कर्णस्य माहात्म्य त्रिनेत्रस्य ततः
परं। केदारस्य च माहात्म्यं तीर्था
गमनकीर्तनं । कोटीश्वररूपतीर्थ
हृषीकेशकथा ततः ॥ सिद्धे
श शुक्रेश्वरयो र्मणिकर्णीश
कीर्तनं ॥ पंकतीर्थ यमतीर्थ
वाराह तीर्थवर्णनं। चंद्रप्रभासपि
ण्डोद श्रीमाता शुक्लतीर्थजं ॥
कात्यायन्याश्च माहात्म्य ततः पि
ण्डारकस्य च। ततः कनखलस्या
थ चक्र मानुषतीर्थयोः ॥ कपि
लाग्नितीर्थकथा तथा रक्तानु
बन्धजा। गणेश पार्थेश्वरयो र्या
त्रायामुन्नलस्य च चण्डीस्थानं ना
गभव शिवःकुण्ड महेशजा ॥
कामेश्वरस्य मार्कंडेयोत्पत्तेश्च
कथा ततः ॥ उद्दालकेशसि

द्धेश गततीर्थकथाः पृथक्
श्रीदेवमातोत्पत्तिश्च व्यासगौ
तम तीर्थयोः कुलसन्तारमाहा
त्म्यं राम कोटाश्च तीर्थयोः ॥
चंद्रोद्भेदेशानशृंग ब्रह्मस्थानो
द्भवोद्भवं ॥ त्रिपुष्कररुद्रहृद गुहे
श्वर कथाशुभा अविमुक्तस्य
माहात्म्यं उमामाहेश्वरस्य च ॥
महौजसः प्रभावश्च जम्बुतीर्थ
स्य वर्णनं। गंगाधर मिश्रकयोः
कथा श्राद्ध फलस्तुतिः ॥ द्वा
रकायाश्च माहात्म्य चन्द्रशर्म
कथानकं। जागराद्याख्यव्रतं च
व्रत मेकादशीभवं। महाद्वाद
शिकाख्याने प्रह्लादर्षिसमाग
मः॥ दुर्वाससः उपाख्याने यात्रोप
क्रमकीर्तनं। गोमत्युत्पत्तिकथ
नं तस्यां स्नानादिजंफलं। च
क्रतीर्थस्य माहात्म्यं गोमत्युद
धिसंगमः ॥ सनकादिहृदाख्या
नं नृगतीर्थकथा ततः गोप्रचार
कथा पुण्या गोपीनां द्वारकागम
मः। गोपीसरः समाख्यानं ब्रह्म
तीर्थादिकीर्तनं। पंचनद्यागमा
ख्यानं नानाख्यानसमाचितं ॥
शिवलिंग महातीर्थ कुसस्थला
दिकीर्तनं। त्रिविक्रमस्य सूत्रोत्था

दुर्वाससः कृष्णसंकथा ॥ कुशादै
त्यवधो भूद्वाख्या विष्णोपादाब्जनजं
फलं। गोमत्यां द्वारकायाश्च ती
र्थागमनकीर्तनं कृष्णमंदिरसं
संप्रेक्षा द्वारवत्यभिषेचनं। त
त्रतीर्थावासकथा द्वारकापुण्य
कीर्तनं। इत्येष सप्तमः प्रोक्तःख
ण्डः प्राभासिको द्विज ॥ स्कान्दे
सर्वोत्तरकथा शिवमाहात्म्यवर्ण
ने ॥ तत्फलश्रुतिः।
लिखित्वैतत्तु यो दद्याद्धेमशूल
समन्वितं। माघ्यां सत्कृत्य विप्रा
य स शैवे मोदते पदे ॥
इति श्रीनारदेयपुराणे पूर्वभागे
वृहदुपाख्याने चतुर्थपादे १०४
अध्यायः १३
चतुर्दशं वामनपुराणं। श्रीब्र
ह्मोवाच शृणु वत्स प्रवक्ष्यामि
पुराणं वामनाभिधं। त्रिविक्रम
चरित्राढ्यं दशसाहस्रसंख्यकं
कूर्मकल्पसमाख्यानं वर्गत्रयकथा
नकं। भागद्वयसमायुक्तं वक्तृश्रो
तृशुभावहं ॥ तत्र पूर्वभागे ॥
पुराणप्रश्नः प्रथमं ब्रह्मशी
र्षच्छिदा ततः ॥ कपालमोच
नाख्यानं दत्तयविहिंसनं ॥
हरस्य कालरूपाख्या काम·

स्य दहनं ततः ॥ प्रह्लाद नारा
यणयो र्युद्धं देवासुराश्रयः ॥
सुकेशपर्कं समाख्याने ततो भु
वनकोषकं ॥ ततः काम्याख्यता
ख्यानं श्रीदुर्गाचरितं ततः ॥
तपतीचरितं पश्चात् कुरुक्षेत्रस्य
वर्णनं । सरोमाहात्म्य मतुलं
पार्वतीजन्मकीर्तनं तपस्तस्या
विवाहश्च गौर्युपाख्यानकं त
तः ॥ ततः कौशिकुपाख्या
नं कुमारचरितं ततः ॥ ततो
ऽन्धकवधाख्यानं साध्योपाख्या
नकं ततः । जाबालिचरितं
पश्चाद्दक्षायाः कथाद्भुताः ॥
अन्धकेश्वरयो र्युद्धं गणत्वं चा
न्धकस्य च । मरुतां जन्मकथनं
बलेश्च चरितं ततः ॥ ततस्तु
लक्ष्म्या श्चरितं त्रैविक्रम मतः
परं । प्रह्लादतीर्थयात्रायां प्रो
च्यंते तत्कथाः शुभाः ॥ तत
श्चवंधुचरितं प्रेतोपाख्यानकं त
तः । नक्षत्रपुरुषाख्यानं श्रीदा
मचरितं ततः ॥ त्रिविक्रमचरित्रां
ते ब्रह्मप्रोक्तः स्तवोत्तमः । प्र
ह्लादबलिसंवादे सुतले हरि
पूजनं ॥ इत्येष पूर्वभागोऽस्य पु
राणस्य तवोदितः ॥

तदुत्तरे भागे वृहद्वामनाख्ये ।
शृणु तस्योत्तरे भागे बृहद्वामन
संज्ञकं ॥ महेश्वरी भागवती सौ
री गाणेश्वरी तथा ॥ चतस्रः
संहिता श्चात्र पृथक् साहस्रसं
ख्यया ॥ माहेश्वर्यान्तु कृष्ण
स्य तद्भक्तानाञ्च कीर्तनं । भाग
वत्यां जगन्मातु रवतारकथाद्भु
ता ॥ सौर्य्यां सूर्यस्य महिमा ग
दितः पापनाशनः ॥ गाणेश्वर्यां
गणेशस्य चरितञ्च महेशितुः ॥
इत्येतद्वामनं नाम पुराणं सुवि
चित्रकं । पुलस्त्येन समाख्यातं
नारदाय महात्मने ॥ ततो नार
दतः प्राप्तं व्यासेन सुमहात्मना
व्यासात्तु लब्धवान् वत्स तच्छि
ष्यो रोमहर्षणः ॥ स चाख्यास्यति
विप्रेभ्यो नैमिषीयेभ्य एव च ।
एवं परंपराप्राप्तं पुराणं वाम
नं शुभम् ॥ तत्फलश्रुतिः ।
ये पठन्ति च शृण्वन्ति तेपि या
न्ति परां गतिम् । लिखित्वैतत्पु
राणं तु यः शारद्विषुवेऽर्पयेत् ॥
विप्राय वेदविदुषे घृतधेनुसमा
न्वितं स समुद्धृत्य नरकान्नये त्स्व
र्गं पितॄन् स्वकान् ॥ देहान्ते
भुक्तभोगोऽसौ याति विष्णोः परं

पदम् ॥ इति श्रीना
रदीयपुराणे पूर्वभागे बृहदु
पाख्याने चतुर्थपादे १०५ ॥
अध्यायः ॥१४ ॥
पञ्चदशं कूर्मपुराणं । श्रीब्रह्मो
वाच । शृणु वत्स मरीचेद्य पुरा
णं कूर्म्मसंज्ञितं लक्ष्मीकल्पानु
चरितं यत्र कूर्म्मवपुर्हरिः । धर्मा
र्थ काम मोक्षाणां माहात्म्यंच
पृथक् पृथक् । इंद्रद्युम्नप्रसं
गेन प्राहर्षिभ्योदयान्तिकं ॥ तत्
सप्तदशसाहस्रं सचतुःसंहि
तं शुभं । यत्र ब्राह्म्यां पुरा प्रो
क्ता धर्म्मा नानाविधा मुने नाना
कथाप्रसंगेन नृणां सद्गतिदाय
काः ॥ तत्पूर्वभागे । तत्पूर्व
विभागे तु पुराणोपक्रमः पुरा
लक्ष्मीप्रद्युम्नसंवादः कूर्म्मर्षि
गणसंकथा । वर्णाश्रमाचार
कथा जगदुत्पत्तिकीर्तनं ॥ का
लसंख्या समासेन लयांते स्त
वनं विभोः । ततः संक्षेपतः सर्गः
शांकरं चरितं तथा ॥ सहस्रना
म पार्वत्या योगस्य च निरूपणं ।
भृगुवंशसमाख्यानं ततः स्वायंभु
वस्य च ॥ देवादीनां समुत्पत्तिर्द
क्षयज्ञाहति स्ततः । दक्षसृष्टिक

था पश्चात् कश्यपान्वयकीर्तनं
आत्रेयवंशकथनं कृष्णस्य चरि
तं शुभं । मार्कण्डकृष्णसंवादो
व्यास पाण्डवसंकथा ॥ युगधर्मा
नुकथनं व्यास जैमिनिकी कथा
वाराणस्याश्च माहात्म्यं प्रयागस्य
ततः परं ॥ त्रैलोक्यवर्णनञ्चैव वे
दशाखानिरूपणम् ॥
तदुत्तरभागे । उत्तरेस्य विभागे तु
पुरा गीतेश्वरी ततः ॥ व्यास
गीता ततः प्रोक्ता नानाधर्म
प्रबोधनी । नानाविधानां तीर्था
नां माहात्म्यंच पृथक् ततः ॥
नानाधर्मप्रकथनं ब्राह्मीयं सं
हिता स्मृता । अतः परं भगव
ती संहितार्थनिरूपिणी ॥ कथि
ता यत्र वर्णानां पृथग्वृत्तिरु
दाहृता ॥ तदुत्तरभागीय भगव
त्याख्यद्वितीयसंहितायाः पंचपा
देषु । पादेस्याः । प्रथमे प्रोक्ता
ब्राह्मणानां व्यवस्थितिः ॥
सदाचारात्मिका वत्स भोगसौख्य
विवर्द्धनी ॥ द्वितीयेक्षत्रियाणा
न्तु वृत्तिः सम्यक् प्रकीर्तिता ॥
यया त्वाश्रितया पापं विधूयेह
व्रजेद्दिवं ॥ तृतीये वैश्यजा
तीनां वृत्तिः रुक्ताचतुर्विधा ॥

यया चरितया सम्यक् लभते
गतिमुत्तमां ॥ चतुर्थेस्यास्तु
थ्यापादे शूद्रकृति रुदाहृता ॥
यया सन्तुष्यति श्रीशो लक्ष्मी
श्रेयोविवर्द्धनः ॥ पञ्चमेस्या
स्ततः पादे वृत्तिः संकरजोदिता
यया चरितयाप्नोति भाविनी
मुत्तमां गतिं । इत्येषापञ्च
पद्युक्ता द्वितीया संहिता मुने
तृतीयाप्रोदिता सौरी लक्ष्मी
कामविधायिनी । षोढा ष
ट्कर्मसिद्धिं साबोधयंती च
कामिनां ॥ चतुर्थी वैष्णवी
नाम मोक्षदा परिकीर्तिता ।
चतुष्पदी द्विजादीनां साक्षा
त् ब्रह्मस्वरूपिणी ॥ ताक्र
मात् षट् चतु र्द्वीषु साहस्राः
परिकीर्तिताः ॥ तत्फलं
श्रुतिः । एतत्कूर्मपुराणंतुच
तुर्वर्गफलप्रदं ॥ पठतां शृण्व
तां नृणां सर्वोत्कृष्टगतिप्रदं । लि
खित्वैतत्तु यो भक्त्या हेमकूर्मस
मन्वितं ॥ ब्राह्मणायायने दद्या
त्सयाति परमां गतिं ॥ इतिश्री
नारदीयपुराणे पूर्वभागे बृह
दुपाख्याने चतुर्थपादे ९८
अध्यायः १५ ॥

षोडशे मत्स्यपुराणे । श्रीब्रह्मो
वाच ॥ अथ मात्स्यं पुराणं
ते प्रवक्ष्ये द्विजसत्तम । यत्रोक्तं
सप्तकल्पानां वृत्तं संक्षिप्य भू
तले ॥ व्यासेन वेदविदुषा न
रसिंहोपवर्णनं । उपक्रम्य त
दुद्दिष्टं चतुर्दशसहस्रकं ॥ म
नुमत्स्य सुसंवादो ब्रह्माण्डवर्ण
नं ततः । ब्रह्म देवासुरोत्पत्ति
र्मारुतोत्पत्तिरेवच ॥ मदनद्वा
दशी तद्वत् लोकपालाभिपू
जनं । मन्वन्तरसमुद्देशो वैण्य
राज्याभिवर्णनं ॥ सूर्य वैवस्व
तोत्पत्ति र्बुधसंगमनं तथा ॥
पितृवंशानुकथनं श्राद्धकाल
स्तथैवच पितृतीर्थप्रचारश्च
सोमोत्पत्ति स्तथैवच । कीर्त
नं सोमवंशस्य ययातिचरितं
तथा कार्तवीर्यस्य चरितं वृ
ष्णि वंशानुकीर्तनं । भृगुशापस्त
था विष्णो र्दशधा जन्म च ति
तौ ॥ कीर्तनं पूरुवंशस्य वंशो
हो ताशनः परः । क्रियायोग
स्ततः पश्चात् पुराणं परिकी
र्तितं ॥ व्रतं नक्षत्रपुरुषं मार्त्त
ण्डशयनं तथा । कृष्णाष्टमी व्र
तं तद्वद्रोहिणी चंद्रसंज्ञितं

तडागविधिमाहात्म्यं पादपो
त्सर्ग एव च । सौभाग्यशय
नं तद्वदगस्त्यव्रतमेवच ॥ त
थानंततृतीयाया रसकल्या
णिनीव्रतं । तथैवानंदकर्याश्च
व्रतं सारस्वतं पुनः ॥ उपरागा
भिषेकश्च सप्तमीशयनं तथा
भीमाख्या द्वादशी तद्वदनंगश
यनं तथा ॥ अशून्यशयनं तद्व
त्तथैवांगारकव्रतं । सप्तमीसप्तकं
तद्वद्विशोकद्वादशीव्रतं ॥ मेरु
प्रदानं दशधा ग्रहशांतिस्तथैव
च । ग्रहस्वरूपकथनं तथा शि
वचतुर्दशी ॥ तथा सर्वफल
त्यागः सूर्यवारव्रतं तथा । सं
क्रांतिस्नपनं तद्वद्विभूतिद्वाद
शीव्रतं ॥ षष्टिव्रतानां माहा
त्म्यं तथा स्नानविधिक्रमः । प्रया
गस्य तु माहात्म्यं द्वीपलोका
नुवर्णनं ॥ तथान्तरीक्षचारश्च
ध्रुवमाहात्म्यमेवच । भवनानि
सुरेन्द्राणां त्रिपुरोद्योतनं तथा
पितृप्रवरमाहात्म्यं मन्वन्तरवि
निर्णयः चतुर्युगस्य संभूति
र्युगधर्मनिरूपणं वज्रांगस्य तु
संभूति स्तारकोत्पत्तिरेवच तार
कासुरमाहात्म्यं ब्रह्मदेवानु·

कीर्तनं ॥ पार्वतीसंभव स्तद्वत्
था शिवतपोवनं । अनंगदेह
दाहश्च रतिशोकस्तथैवच ॥
गौरीतपोवने तद्वच्छिवेनाथ
प्रसादनं । पार्वती ऋषिसंवाद
स्तथैवोद्वाहमंगलं कुमारसंभ
वस्तद्वत् कुमारविजयस्तथा
तारकस्य वधो घोरो नरसिंहो
पवर्णनं पद्मोद्भवविसर्गस्तु त
थैवान्धकघातनं वाराणस्यास्तु
माहात्म्यं नर्मदाया स्तथैवच
प्रवरानुक्रमस्तद्वत् पितृगाथा
नुकीर्तनं । तथोभयमुखीदानं दा
नं कृष्णाजिनस्यच ॥ ततः सा
वित्र्युपाख्यानं राजधर्मा स्तथैवच
विविधोत्पातकथनं ग्रहशांति
स्तथैवच यात्रानिमित्तकथनं स्व
प्नमंगलकीर्तनं ॥ वामनस्य तु
माहात्म्यं वाराहस्य ततः परं ॥
समुद्रमथनं तद्वत् कालकूटा
भिशंसनं । देवासुरविमर्दश्च
वास्तुविद्या तथैवच ॥ प्रतिमा
लक्षणं तद्वद्देवतास्थापनं तथा
प्रासादलक्षणं तद्वन्मण्डपाना
ञ्च लक्षणं । भविष्यराज्ञामुद्देशो
महादानानुकीर्तनं । कल्पानुकी
र्तनं तद्वत् पुराणेस्मिन् प्रकी·

र्तिते ॥ तत्फलश्रुतिः । पवि
त्रमेतत् कल्याणं मायुकीर्तिविव
र्द्धनं । यः पठेच्छृणुयाद्वापि स
याति भवनेहरेः। लिखित्वैतत्तु
यो दद्याद्धेममत्स्य गवान्वितं
विप्रायाभ्यर्च्य विषुवे सयाति
परमं पदम् ॥ इति श्री
नारदीयपुराणे पूर्वभागे बृ
हदुपाख्याने चतुर्थपादे ९३
अध्यायः ९८ ॥
सप्तदशं गारुडपुराणं श्रीब्र
ह्मोवाच । मरीचे शृणु वक्ष्य
पुराणं गारुडं शुभं । गरुडाया
ब्रवीत् पृष्टो भगवान् गरुडास
नः। एकोनविंशसाहस्रं तार्क्ष्यं
कल्पकथान्वितं ॥ तत्र पूर्वखंडे
पुराणोपक्रमो यत्र सर्गसंक्षेप
तस्ततः ॥ सूर्यादिपूजनविधि
दीक्षाविधिरतः परं । श्राद्धपू
जा ततः पश्चान्नवव्यूहार्चनं हि
ज। पूजाविधानंच तथा वैष्ण
वं पंजरंततः । योगाध्यायस्त
तो विष्णोर्नामसाहस्रकीर्तनं
ध्यानं विष्णोस्ततः सूर्यपूजा
मृत्युंजयार्चनं । मालामंत्राः
शिवार्चाथ गणपूजा ततः प
रं । गोपालपूजा त्रैलोक्यमो
हन श्रीधरार्चनं विष्णवर्चा पंच
तत्त्वार्चा चक्रार्चा देवपूजनं ॥
न्यासादि संध्योपास्तिश्च दुर्गार्चा
थ सुरार्चनं । पूजा माहेश्वरी
चातः पवित्रारोहणार्चनं ॥ मू
र्तिध्यानं वास्तुमानं प्रासादानां
च लक्षणं । प्रतिष्ठा सर्वदेवा
नां पृथक् पूजाविधानतः ॥ यो
गोऽष्टांगो दानधर्मः प्रायश्चित्तवि
धिक्रिया ॥ द्वीपेश नरकाख्यानं
सूर्यव्यूहश्च ज्योतिषं ॥ सामुद्रिकं
स्वरज्ञानं नवरत्नपरीक्षणं । माहा
त्म्यमथ तीर्थानां गयामाहात्म्य
मुत्तमम् ॥ ततो मन्वंतराख्यानं
पृथक् पृथक् विभागशः ॥
पित्राख्यानं वर्णधर्मा द्रव्यशु
द्धिः समर्पणम् ॥ श्राद्धं वि
नायकस्यार्चा ग्रहयज्ञस्तथाश्र
माः । मलहाख्या प्रेताशौचं नी
तिसारो व्रतोक्तयः ॥ सूर्यवं
शः सोमवंशोऽवतारकथनं हरेः
रामायणं हरिवंशो भारताख्या
नकन्ततः ॥ आयुर्वेदे निदा
ने प्राक् चिकित्सा द्रव्यजाग
णाः ॥ रोगघ्नं कवचं विष्णो
र्गारुडं त्रैपुरो मनुः ॥
प्रश्नचूडामणिश्चान्ते ।

हयायुर्वेदकीर्तनं औषधीनाम पर्णं।
कथनं ततो व्याकरणोहनं ॥ छंदसां
दःशास्त्रं सदाचारस्ततः स्नानवि
धिःस्मृतः ॥ तर्पणं वैश्वदेवंच
संध्या पार्वणकर्मच । नित्यश्रा
द्धं सपिंडाख्यं धर्मसारोऽघनि
ष्कृतिः । प्रतिसंक्रमउक्तोस्याद्यु
गधर्माः कृतेः फलम् ॥ योगशा
स्त्रं विष्णुभक्तिर्नमस्कृतिफलं
हरेः। माहात्म्यं वैष्णवञ्चाथ ना
रसिंहस्तवोत्तमं ॥ ज्ञानामृतं गु
ह्याष्टकं स्तोत्रं विष्ण्वर्चनाह्वयं
वेदांत सांख्यसिद्धांतं ब्रह्मज्ञा
नंतथात्मकं ॥ गीतासारफलो
त्कीर्तिः पूर्वखण्डोऽयमीरितः
उत्तरखंडे प्रेतकल्पे । अथा
सैवोत्तरे खण्डे प्रेतकल्पः पु
रोदितः ॥ यत्र तार्क्ष्येण संपृष्टो
भगवानाह वाडव । धर्मप्रक
टनं पूर्वं योनीनां गतिकारणं
दानादिकं फलञ्चापि प्रोक्तं म
होर्द्धदेहिकं । यमलोकस्य मा
र्गस्य वर्णनंच ततः परं । षो
डशश्राद्धफलकं वृत्तान्तञ्चात्र
वर्णितं । निष्कृति यममार्गा
द्धर्मराजस्य वैभवं । प्रेतपी
डाविनिर्देशः प्रेतचिह्ननिरू ।
प्रेतानां चरिताख्यानं का
रणं प्रेतत्वं प्रति। प्रेतकृत्यविचा
रश्च सपिण्डीकरणक्रियः । प्रे
तत्वमोक्षणाख्यानं दानानिचवि
मुक्तये। आवश्यकोत्तमं दानं प्रे
तसौख्यकरं हितं शारीरकवि
निर्देशो यमलोकस्य वर्णनं ॥
प्रेतत्वोद्धारकथनं कर्मकर्तृवि
निर्णयः । मृत्योः पूर्वक्रिया
ख्यानं पश्चात् कर्मनिरूपणं ॥
मध्यंषोडशकं श्राद्धं स्वर्गप्राप्ति
क्रियोहनं। सूतकस्याथ संख्या
नारायणबलिक्रिया ॥ वृषोत्
सर्गस्य माहात्म्यं निषिद्धपरि
वर्जनं । अपमृत्युक्रियोक्तिश्च
विपाकः कर्मणां नृणां ॥
कृत्याकृत्यविचारश्च विष्णुध्या
नं विमुक्तये । स्वर्गतो विहिता
ख्यानं स्वर्गसौख्यनिरूपणं ॥
भूर्लोकवर्णनञ्चैव सप्तधा लो
कवर्णनं पंचोर्द्ध्वलोककथनं ब्र
ह्मांडस्थितिकीर्तनं ॥ ब्रह्माण्डा
नेकचरितं ब्रह्मजीवनिरूपणं
आत्यंतिकलयाख्यानं फलस्तु
तिनिरूपणं ॥ इत्येतद्गारुडं ना
म पुराणं भुक्तिमुक्तिदं ॥
तत्फलश्रुतिः।कीर्तितं पाप·

प्रमनं पठतां शृण्वतां नृणां । लिखित्वैतत्पुराणं तु विष्णवे यः प्रयच्छति । सोऽवर्णं हंसयुग्मा ढ्यं विमाय स दिवं व्रजेत् ॥ इति श्रीनारदीयपुराणे पूर्वभागे बृहदुपाख्याने चतुर्थपादे ९८ अध्यायः ॥१३॥

अथाष्टादशं ब्रह्माण्डपुराणं। श्रीब्रह्मोवाच । शृणु वत्स प्रवक्ष्यामि ब्रह्माण्डाख्यं पुरातनं । यच्च द्वादशसाहस्रं भाविकल्पकथायुतं प्रक्रियाख्योऽनुषंगाख्य उपोद्घातस्तृतीयकः । चतुर्थ उपसंहारः पादा श्चत्वार एव हि ॥ पूर्वपादद्वयं पूर्वो भागोऽत्र समुदाहृतः । तृतीयो मध्यमो भागश्चतुर्थ स्तूत्तरो मतः ॥ तत्र पूर्वभागे प्रक्रियापादे ॥ आदौ कृत्यसमुद्देशो नैमिषाख्यानकं ततः । हिरण्यगर्भोत्पत्तिश्च लोककल्पन मेव च ॥ एष वै प्रथमः पादो द्वितीयं शृणु मानद ॥ पूर्वभागेऽनुषंगपादे । कल्प मन्वन्तराख्यानं लोकज्ञानं ततः परं ॥ मानसीसृष्टिकथनं रुद्रप्रसववर्णनं महादेवविभूतिश्च ऋषिसर्गस्ततः परं ॥ अग्नीनां विजयश्चाथ कालसद्भाववर्णनं । प्रियव्रतान्वयोद्देशः पृथिव्यायामविस्तरः ॥ वर्णनं भारतस्यास्य ततोन्येषां निरूपणं । जंब्वादिसप्तद्वीपाख्यानं ततोऽधोलोकवर्णनं ऊर्ध्वलोकानुकथनं ग्रहचारस्ततः परं । आदित्यव्यूहकथनं देवग्रहानुकीर्तनं । नीलकंठाख्यानं महादेवस्य वैभवं । अमावस्यानुकथनं युगतत्त्वनिरूपणं । यज्ञप्रवर्तनं चाथ युगायोरंत्ययोः कृतिः ॥ युगप्रजालक्षणं च ऋषिप्रवरवर्णनं । वेदानां व्यसनाख्यानं स्वायंभुवनिरूपणं । शेषमन्वंतराख्यानं पृथिवीदोहनं ततः । चाक्षुषेऽद्यतने सर्गो द्वितीयेंऽघ्रिः पुरोदले ॥ मध्यमभागे उपोद्घातपादे । अथोपोद्घातपादे तु सप्तर्षिपरिकीर्तनं ॥ प्राजापत्यचय स्तस्माद्देवादीनां समुद्भवः । ततो जया भिव्याहारौ मरुदुत्पत्तिकीर्तनं ॥ काश्यपेयानुकथनं ऋषिवंशनिरूपणं । पितृकल्पानुकथनं श्राद्धकल्प स्ततः परं । वैवस

तसमुत्पत्तिः सृष्टि स्तस्य ततः परं मनुपुत्रान्वय श्चातो गांधर्वस्य निरूपणं ॥ इक्ष्वाकुवंशकथनं वंशोऽत्रेः सुमहात्मनः ॥ अमावसोरन्वयश्च रजे श्चरितं सद्भुतं ययातिचरितं चाथ यदुवंशनिरूपणं । कार्तवीर्यस्य चरितं जामदग्न्यं ततः परं ॥ वृष्णिवंशानुकथनं सगरस्याथ संभवः भार्गवस्यानुचरितं तथा कार्त्यवधाश्रयं ॥ सगरस्याथ चरितं भार्गवस्य कथा पुनः ॥ देवासुराहवकथा कृष्णाविर्भाववर्णनं ॥ इनस्य च स्तवः पुण्यः शुक्रेण परिकीर्तितः । विष्णुमाहात्म्यकथनं बलिवंशनिरूपणं । भविष्यराजचरितं संप्राप्तेऽथ कलौ युगे । एवमुद्घातपादोऽयं तृतीयो मध्यमे दले ॥ उत्तरभागे । उपसंहारपादे । चतुर्थमुपसंहारं वक्ष्ये खण्डे तथोत्तरे । वैवस्वतांतराख्यानं विस्तरेण यथातथं ॥ पूर्वमेव समुद्दिष्टं संक्षेपादिह कथ्यते । भविष्याणां मनूनां च चरितं हि ततः परं । कल्पप्रलयनिर्देशः कालमानं ततः परम् ॥ लोका श्चतुर्दशाततः कथिता मानलक्षणैः वर्णनं नरकाणां च विकर्माचरणै स्ततः । मनोमयपुराख्यानं लयः प्राकृतिक स्ततः । शैवस्याथ पुरस्यापि वर्णनं च ततः परं । त्रिविधाद्गुणसंबंधाज्जंतूनां कीर्त्तिता गतिः अनिर्देश्याप्रतर्क्यस्य ब्रह्मणः परमात्मनः । अन्वय व्यतिरेकाभ्यां वर्णनं हि ततः परं ॥ इत्येष उपसंहारः पादो वृत्तः स चोत्तरः । चतुष्पादं पुराणं ते ब्रह्माण्डं समुदाहृतं ॥ अष्टादश मनोपमं सारात्सारतरं द्विज । ब्रह्माण्डं च चतुर्लक्षं पुराणत्वेन पठ्यते । तदेव व्यस्य दित मष्टादशधा पृथक् पाराशर्येण मुनिना सर्वेषा मपि मानद ॥ वस्तुदृष्ट्वाथ तेनैव मुनीनां भावितात्मनां मत्तः श्रुत्वा पुराणानि लोकेभ्यः प्रचकाशिरे ॥ मुनयो धर्मशीलास्ते दीनानुग्रहकारिणः मया चेदं पुराणं तु वशिष्ठाय पुरोदितं । तेन शक्तिसुतायोक्तं जातू कर्णाय तेन च व्यासो लब्ध्वा ततश्चैतत् प्रभंजन

मुखोद्गतं । प्रमाणीकृत्य लो
केऽस्मिन् प्रावर्त्तयमनुत्तमं ॥
तत्फलश्रुतिः । य इदं कीर्त्तये
द्वत्स शृणोति च समाहितः । स
विधूयेह पापानि याति लोक
मनामयं । लिखित्वैतत्पुराणं
तु स्वर्णसिंहासनस्थिते । पत्रेण
च्छादिते यस्तु ब्राह्मणाय प्रय
च्छति । स याति ब्रह्मणो लोकं ना
त्र कार्य्या विचारणा ॥ मरीचेः
ऽष्टादशैतानि मया प्रोक्तानि या
नि ते । पुराणानि तु संक्षेपाच्छ्रो
तव्यानि च विस्तरात् ॥
अष्टादशपुराणानि यः शृणो
ति नरोत्तमः । कथयेद्वा विधानेन
नेह भूयः स जायते ॥ सूत्रमेत
त् पुराणानां यन्मयोक्तं तवाधु
ना । तन्नित्यं शीलनीयं हि पु
राणफलमिच्छता ॥ न दाम्भि
काय पापाय देवगुर्व्वनुसूयवे
देयं कदापि साधूनां द्वेषिणे न
शठाय च ॥ शान्ताय शमचि
त्ताय शुश्रूषाभिरताय च ॥
निर्म्मत्सराय शुचये देयं स
द्वैष्णवाय च ॥ इति श्रीनारदीय
पुराणे पूर्व्वभागे बृहदुपाख्याने
चतुर्थपादे १०९ अध्यायः ९

इत्यष्टादशमहापुराणानुक्रम
णिका समाप्ता ॥
पुरातनः पुं पुराणः । तद्वैदि
कपर्य्यायाः । प्रत्न १ प्रदिवः २
प्रवयाः ३ सनेमि ४ पूर्व्वं ५
अह्नाय ६ इति षट् पुराणना
मानि । इति वेदनिघण्टौ ३
अध्यायः ॥
पुरी स्त्री नगरी । तद्गुणं य
था । पुरी समन्ताद्विहिता स
पताका सतोरणा । सचक्रा स
शतघ्नीचैव सयन्त्रखनका तथा ५
सोपशल्या प्रतोलीका साट्टा
लक गोपुरा । सचक्रग्रह
णी चैव सोल्कालातावपोथि
का । ६ सोष्ट्रिका भरतश्रे
ष्ठ सभेरी पणवानका ।
सतोमराङ्कुशा राजन् सशत
घ्नीकलाङ्गला ७ सभुशुण्ड्य
श्मगुडका सायुधा सपरश्व
धा । लोहचर्म्मवती चापि सा
ग्निः सगुडशृङ्गिका ८ । इति
महाभारते आरण्यके पर्व्वणि
सौभवधे १५ अध्यायः ॥
पताका ध्वजाञ्चलः तोरणा
नि बहिर्द्वाराणि । चक्राणि योध
शाणाःकुडास्तदाश्रयस्थानानि भा
षा

यांवरूज संज्ञानि । अन्ये तु वि
न्ध्येन सर्ज्जेन शृङ्गाणि कुडा इ
त्याहुः उदाहरन्ति च । कल्पने
कुडशृङ्गाणि रथस्योपरि हरि
भिः । विन्यस्तशैलशृङ्गार्थे क
ल्पादिस्पर्शे उपतः ॥ इति यन्त्रा
णि आदग्रेयोऽश्यवलेन दूषत्
पिण्डात् क्षेपणानि महान्तिका
मनसंज्ञानि । क्षुद्राणि सीस
गुलिकोत्क्षेपणानि बन्दूकसं
ज्ञानि अट्टालकाः स्वरंगहारा ग
प्रमार्गकर्त्तारः ५ उपशल्याः
लोहमुखाः कीलाः तद्युक्ताः
प्रतोल्या रथ्यामार्गा यस्यां सा
अट्टालकाः उपरिगृहाः । गो
पुराणि पुरद्वाराणि साट्टानि
अट्टेन अट्टेन सहितानि अट्टा
लकादीनि यस्यां सा । साट्टेति
विशेषणं उपशल्यस्य ग्रामान्त
सरख्याया आवृत्या सम्बध्यते
चक्रग्रहणी सैन्यनिग्राहिका
मोच्छा इति म्लेच्छप्रसिद्धा सो
ल्कालातावपोथिका ज्वाला
सहित सल्कक विघ्नपातनाय
यस्यामिति आहुः । उल्कवोल्का
प्राणहरत्वात् यंत्रोत्क्षिप्तो गोलः
अलातं सकाष्ठदण्ड लोहयम

नाग्नेयं प्रहरणं बाण इति भा
षायां प्रसिद्धं । तया रथस्याध्य
यनात्या वपि पोथिकापातयि
त्र्यः मंत्रमय्यः कर्णायन्त्रदत्त्र
प्राक्षिसदृशाः तद्युक्ता सोल्का
ज्वालावपोथिका ६ अष्ट्रिका
सच्चर्म्ममयानि भाण्डानि ।
सार्ष्टिकेति पाठे ऋष्टय आयु
ध विशेषाः ७ अश्मगुडकाः
वर्त्तुलीकृताः पाषाणाः । लोह
मयानि चर्म्माणि कमठपृष्ठा
काराणि प्रहारवारकाणि । सा
ग्निः आग्नेयौषध सहिता । गुडाः
गोलकाः । शृङ्गिका तडतले
पकयंत्राणि । शत्रूणामुपरि
पातनानामुपरि पातनायतन्नो
गुडो द्रवीभूतो यत्राग्निरवरे
स्थाप्यते तत्सहिता त्वन्ये ८
इति नीलकण्ठकृत भारत
भावदीपनाम टीका ॥ पुरुषः
पुं मनुष्यः । तद्वैदिकपर्य्यायाः
मनुष्याः १ नरः २ धवाः ३ जन्तवः ४
विशः ५ क्षितयः ६ कृष्टयः ७ चर्ष
णयः ८ नहुषः ९ हरयः १० मर्य्याः ११
मर्त्याः १२ मर्त्ताः १३ व्राताः १४
तुर्व्वशाः १५ द्रुह्यवः १६ आयवः
१७ यदवः १८ अनवः १९ पूरवः

२० जगतः २१ तस्थुषः २२ पं
चजनाः २३ विवस्वतः २४ पू
तनाः २५ इति पंचविंशतिर्दे
णामानि ॥ इतिदेवनिघण्टौ
१ अध्यायः ॥
पुरोगामी त्रि अग्रगामी । त
त्पर्य्यायः । नासीरः २ अग्रस
रः ३ । इति शब्दरत्नावली ॥
पर्व पर्णी ॥ पंचस्वरी ।
पूः पुरौ पुरः । पूर्वति पयसा
कुम्भं चेटी । इति दुर्गादासः ॥
पुल श महत्त्वे । श पुलति
पुलिनं शरदि महत्स्यादि
त्यर्थः । पोलिता । इति दुर्गा
दासः ॥
पुल ज महत्त्वे । ज पोलः
पुलः । पोलति । इति दु
र्गादासः ॥
पुल क उच्छ्रितौ । उच्छ्रि
तिरुच्चीभावः । क पोल
यति पर्वतः ॥
इति दुर्गादासः ॥
पुष ग पुष्टौ । ग पुष्णाति
पुपोष । इति दुर्गादासः ॥
पुष पुष्टौ । पोषति तातः
पुत्रं । इति दुर्गादासः ॥
पुष ऌ य ओ पुष्टौ ॥
ऌ अपुषत् । य पुष्यति । ओ
पाष्टा । इति दुर्गादासः ॥
पुष क धृतौ । क पोषयति
इति दुर्गादासः ॥
पुष्करं क्ली तीर्थविशेषः । यो
गविशेषे गंगादीनां पुष्करत्वं
यथा । मकरस्थो यदा भानुस्त
दा देवगुरुर्यदि । पूर्णिमायां
भानुवारे गंगा पुष्कर ईरितः
गंगाजन्मा प्रयागेच कोटि
सूर्य्यग्रहैः समः । सिंहस्थे
दिनकरे तथा जीवेनसंयुते ।
पूर्णिमायां गुरौ वारे गोदा
वर्य्यान्तु पुष्करः ॥ तत्रस्ना
नेच दानेच सर्वकोटिगुणं
भवेत् ॥ मेषसंस्थे दिवाना
थे देवानाञ्च पुरोहिते । सो
मवारे क्षितासूम्या कावेरी पु
ष्करो मतः । कर्कटस्थे दिवा
नाथे तथा जीवेन्दुवासरे ।
अमायां पूर्णिमायां वा कृ
ष्णा पुष्कर उच्यते ॥ इतिस्कंद
पुराणे पुष्करखण्डे श्रीशै
लमाहात्म्यं ॥
पुष्प य फल्लने । पंचस्वरी
मध्येन्द्रोपधः । फल्लने विक
सने । य पुष्यति कुन्दकोरकं
इति दुर्गादासः ॥

पुष्पकासीसं क्ली पीतवर्णका
सीसं । यथा । अथ कासीस भस्म
कृन्मृत्तिकाम्लं । कासीसं धातु
कासीसं पांशुकासीस मित्य
पि । तदेव किंचित्पीतन्तु पुष्प
कासीस मुच्यते ॥ कासीसमम्ल
मुष्णञ्च तिक्तंच तुवरं तथा । वा
तश्लेष्महरं केश्यं नेत्रकण्डू वि
षप्रणुत् ॥ मूत्रकृच्छ्राश्मरी
श्वित्र नाशनं परिकीर्तितं ।
इतिभावप्रकाशः ॥
पुस्त क वन्ध्ये । पंचस्वरी ।
दन्त्योपधः । क पुस्तयति ।
इति दुर्गादासः ॥
पू ङ शोधे । शोध इह शु
द्धीकरणं । ङ पवते पापिनं
गंगा । इति दुर्गादासः ॥
पू ङ य शोधे । अयं कैश्चि
न्न मन्यते । ङ य पूयते ।
इति दुर्गादासः ॥
पू ञ गि शोधे । ञ गि ज्ञा
नवीनःपुनातु । पुनीते ।
क्वचित् स्ना प्रत्ययस्यापि प्वादि
त्वात् ह्रस्व इति वररुचि । तेन
स्मरणात् पुनते पापं धारणात्
पूर्वसंचितं । दर्शनाल्लभते सो
त्र मेतद्योगस्य लक्षणं । इति
दुर्गादासः ॥
पूज क पूजे । षट्स्वरी ।
के पूजयति गुरुं लोकः
इति दुर्गादासः ॥
पूण क संघाते । षट्स्वरी
पूणयति धान्यं लोकः ।
राशीकरोतीत्यर्थः । इति दु
र्गादासः ॥
पूतिकरञ्जः पुं करञ्जभेदः
यथा । अथ कटुकरञ्ज स्तोय
करंज नाम गुणाः । करञ्जो
नक्तमालश्च करज श्चिरवि
ल्वकः । घृतपर्णिकरञ्जोऽन्यः
प्रकीर्य्यः पूतिकापिच । सचो
क्तः पूतिकरञ्जः सोमवल्कश्च
सम्मतः । करंजः कटुक स्ती
क्ष्णवीर्य्योष्णो योनिदोषहृत्
कुष्ठोदावर्तगुल्मार्शो व्रणकृ
मिकफापहः । तत्पत्रं कफ
वातार्शः कृमिशोथ हरं परं
भेदनं कटुकं पाके वीर्य्योष्णं
पित्तलं लघु । तत्फलं कफ
वातघ्नं मेहार्शः कृमिकुष्ठ
जित् । घृतपर्णिकरंजोऽपि क
रंजसदृशो गुणैः । इति भा
वप्रकाशः ॥
पूतिकर्णः पुं कर्णरोगविशेषः

तल्लक्षणं यथा। पूतिकर्ण
माह। कर्णविद्रधिपाकाद्वा स
कोर्णो वापि प्रपूरणात्। पूयं स
वति यस्येति स ज्ञेयः पूतिकर्ण
कः। कर्णस्रावाद्दिदार्थमाह।
पूतेति नियमेन पूति यथास्या
द्देवं स्रवति॥ तच्चिकित्सा। यथा
कर्णस्रावे पूतिकर्णे तथैव कृ
मिकर्णके। सामान्यं कर्म कु
र्वीत योगान् वैशेषिकानपि॥
सर्जिकाचूर्णसंयुक्तं बीजपूर
रसं क्षिपेत्। कर्णस्राव रुजा
दाहास्तेन नश्यन्त्यसंशयः १॥
आम्रजम्बु प्रवालानां मधुक
स्य वटस्य च। पल्लवैस्तु साधितेन
तैलेन पूतिकर्णकं हरेत् २ जाती
पत्ररसे तैलं विपक्वं पूतिकर्ण
जित् ३ कुष्ठं रसाञ्जनं नार्याः
क्षीरेण क्षौद्रसंयुतं। प्रशस्य
ते चिरोत्थेषु तत् स्रावेषु पूति
कर्णके ४ कुष्ठ हिङ्गु वचादा
रु शताह्वा विश्व सैन्धवैः॥
पूतिकर्णापहं तैलं वस्तमूत्रे
ण साधितं। कुष्ठादितैलं ५
शम्बुकस्य तु मांसेन कटुतै
लं विपाचयेत्। तस्य पूरणमात्रे
ण कर्णनाडी प्रशाम्यति ६ चोपेन

गन्धक शिला रजनीभवेन गु
ञ्जाफलेन कटुतैलपलाष्टकेन
धत्तूरपत्ररसतुल्य मिदं विप
क्वं नाडीं जयेच्चिरभवामपि
कर्णजातां॥ पुष्टिः पदं॥ ७
कृमिकर्णविनाशाय कृमिघ्नीं
कारयेत् क्रियां। वार्ताकुधू
मश्च हितः सार्षपस्नेह एव
च पूरणं हरितालेन गव्यमू
त्रयुतेन च। धूपने कर्णदौर्ग
न्ध्ये गुग्गुलुः श्रेष्ठ उच्यते॥
इति भावप्रकाशः॥
पूताष्टका स्त्री आग्रहायण्या
ऊर्द्ध्व कृष्णाष्टमी। तद्विवरणं
अष्टकाशब्दे द्रष्टव्यं॥
पूय ई ङ दुर्गन्ध्य शीर्णयोः
षट्स्वरी। ई पूतः। ङ पूय
ते मलश्यः दुर्गन्धः स्यादित्यर्थः
शीर्णे भेदने। इति दुर्गा
दासः॥
पूर ई य ङ पूर्तौ। दीप्तौ।
ई पूर्णः। य ङ पूर्यन्ते पि
तरस्त्वेति हलायुधः। पूर्ति
आप्यायने। इति दुर्गादासः॥
पूर क पूर्तौ। दीप्तौ। क पि
तॄन् पूरयति श्राद्धे हव्यैः
कव्यैश्च यः सदा॥ इति

हलायुधः॥ इति दुर्गादासः॥
पूरकः पुं आत्मनासिकागतोच्छ्वा
सः। ब्रह्मध्यानपूरक प्राणाया
मांगत तत्तन्मन्त्रं जपन् वामना
सिकया वायुना देहपूरणं॥
यथा व्यासः। आदाने रोधमुत्
सर्गं वायोस्त्रिस्त्रिः समभ्यसेत्।
ब्रह्माणं केशवं शम्भुं ध्यायेद्दे
वाननुक्रमात्। एवं वचने त्रिं
यमाख्याभिधानाद्ध त्रिस्त्रिरिति
वीप्सा सन्ध्यात्रयापेक्षया। ब्र
ह्माणं केशवं शम्भुं ध्यायन्नमु
च्येत बन्धनात्। योगियाज्ञव
ल्क्यः। भूः भुवः स्वः महर्जन
स्तपः सत्यं तथैव च। प्रत्योंका
रसमायुक्तं तथा तत्सवितुः प
दं॥ ओं आपो ज्योतिरित्येत
च्छिरः पश्चात्तु योजयेत्॥
त्रिः पठेनेन योगात्तु प्राणायाम
स्तु शब्दितः॥ पूरकः कुम्भको
रेचः प्राणायाम स्त्रिलक्षणः
नासिकाकृष्टउच्छ्वासो ध्मातः पू
रकउच्यते॥ कुम्भको निश्चलः
श्वासो मुच्यमानस्तु रेचकः।
मोचनं विशेषयति विस्मृपरा
णं। नासस्कृतमुखो जृम्भे
हास कासौ च वर्जयेत्॥

नोच्चैर्हसेत् सशब्दं च न मु
ञ्चेत् पवने बुधः। इत्याह्निका
चारतत्त्वं॥
पूर्व क निकेतने। षट्स्वरी
निकेतन मिह निमन्त्रणं नि
वासो वा। क पूर्वयति द्वि
जान् भोक्तुं गृही। पूर्वयति
तीर्थेषु साधुः। इति दुर्गादासः
वर्गपवान्तीयं॥
पूर्व क निकेतने। षट्स्वरी
निकेतन मिह निमन्त्रणं नि
वासो वा। क पूर्वयति द्वि
जान् भोक्तुं गृही। पूर्वयति
तीर्थेषु साधुः। इति दुर्गादासः
अन्त्यवान्तीयं॥
पूल कि संहतौ। षट्स्वरी।
कि पूलयति पूलति। संहति
राशीकरणं। इति दुर्गादासः
पूष वृद्धौ। षट्स्वरी। पूषति
इति दुर्गादासः॥
पृ लि पालने। लि पिपर्ति।
इति दुर्गादासः॥
पृ क पूर्तौ। पूर्त्तिः पूरीक
रणं। क पारयति पयसा कु
म्भं लोकः। इति दुर्गादासः॥
पृ न प्रीतौ। न अतिथीन्
पृणोति। इति दुर्गादासः॥

पृ श उ॰ व्यायामके। व्यायाम
को व्यापारः। श उ॰ पर्य्येष्या
प्रयते स्पर्धोः। इति दुर्गादा
सः॥
पृच कि संयमे॥ सम्पर्के।
संयमनं बन्धने। कि पर्च्चय
यति पर्च्चति दुष्टं राजा। इ
ति दुर्गादासः॥
पृच ध ई सम्पर्के सम्पर्कोऽ
त्र संश्लेषीकरणं सम्पृक्तीभाव
श्च। ध पृणक्ति पञ्चधा वाणं
संपृणक्ति न वाणिभि र्य इति
हलायुधः। ई पृक्तः सम्पर्क
इति दुर्गादासः॥
पृच ई ल उ॰ सम्पर्के। ई
पृक्तः। ल उ॰ पृङ्क्ते पर्च्य
ते। स चेह सम्पृक्तीभावः
सम्पृङ्क्ते नाभिपाक्ते यै इति
हलायुधः। सम्पृङ्क्ते मधुना
चूर्णं भियुवीति तु श्रीतर्म्मेत
न्यर्षत्वादिति चतुर्भुजः। इति
दुर्गादासः॥
पृज ल ई उ॰ सम्पर्के।
सम्परिस्तरी। ई पृक्तोते। ल उ॰
पृक्ते। अयं केश्चिन्न मन्यते
इति दुर्गादासः॥
पृड श मुदि। मुदि हर्षे।
करणे। श पृडति दीने दाता
पण्डिता। इति दुर्गादासः॥
पृण श तृपि। तृपि तृप्तीकरणे।
श अग्निं पृणति यो द्विजः।
पण्डिता। इति दुर्गादासः॥
पृथ क प्रक्षेपे। कपर्थयति गु
उ मौषधे जनः॥ इति दु
र्गादासः॥
पृथूदक क्ली तीर्थभेदः। य
था। तेष्क्राता ऋषयः सर्व्वे ती
र्थमाहात्म्यमुत्तमं। कपालमोच
नमिति नाम चक्रुः समागताः।
तत्रापि सुमहत्तीर्थं विश्वामित्र
स्य विश्रुतं। ब्राह्मण्यं लब्धवा
न्यत्र विश्वामित्रो महामुनिः
तस्मिंस्तीर्थवरे स्नात्वा ब्राह्म
ण्यं लभते ध्रुवं। ब्राह्मणस्तु वि
शुद्धात्मा परं पद मवाप्नुयात
ततः पृथूदकं गच्छेन्नियतो नि
यताशनः। तत्र सिद्धस्तु ब्रह्मर्षी
रुषङ्गुर्नाम नामतः॥ जाति
स्मरो रुषङ्गुस्तु गङ्गाद्वारे सदा
स्थितः। अन्तकाले ततो दृष्ट्वा
पुत्रान् वचनमब्रवीत्। इह
श्रेयो न पश्यामि नयध्वं मां
पृथूदकं। विज्ञाय तस्य तद्भा
वं रुषङ्गो स्ते तपोधनाः। ते

वै तीर्थे उपानिन्युः सरस्वत्यास्त
पोधने। स तैः पुत्रैः समानीतः
सरस्वत्यां समाप्लुतः॥ स्मृत्वा
तीर्थगुणान् सर्व्वान् प्राहेदम्
षिसत्तमः। सरस्वत्युत्तरे तीरे
यः संत्यजेदात्मन स्तनुं। पृथू
दके जप्यपरो नैनं श्वो मरणं
लभेत्। तत्रैव ब्रह्मयोन्यस्ति
ब्रह्मणा यत्र निर्म्मिता। पृथू
दकं समाश्रित्य सरस्वत्यास्त
टे स्थितः। चतुर्वर्णस्य सृष्ट्यर्थं
आत्मज्ञानपरोऽभवत्। तस्या
भिध्यायतः सृष्टिं ब्रह्मणोऽव्य
क्तजन्मनः। मुखतो ब्राह्मणा
जाता बाहुभ्यां क्षत्रिया स्तथा।
ऊरुभ्यां वैश्यजातीयाः पद्भ्यां
शूद्रा स्ततोऽभवन्। चातुर्वर्ण्य
ततो दृष्ट्वा आश्रमस्थान् सुतं
स्ततः॥ एवं प्रतिष्ठितं तीर्थं ब्र
ह्मयोनीति संज्ञितं॥
तत्र स्नात्वा मुक्तिकामः पुनर्यो
निं न पश्यति। इति वामनपुरा
णे ३८ अध्यायः॥
पृथिवी स्त्री पृथ्वी। तद्वैदिक
पर्य्यायाः। गौः १ ग्मा २ ज्मा ३
क्ष्मा ४ क्षा ५ क्षमा ६ क्षोणी ७
क्षितिः ८ अवनिः ९ उर्व्वी १० पृ
थ्वी ११ मही १२ रिपः १३ अदि
तिः १४ इला १५ निर्ऋतिः १६
भूः १७ भूमिः १८ पूषा १९ गा
तुः २० गोत्राः २१। इत्येकविंश
तिः पृथिवीनामधेयानि। इति वे
दनिघण्टौ १ अध्यायः॥
पृष उ सेके। उपर्षित्वा पृष्ट्वा
इति दुर्गादासः॥
पृषत् क्ली जलबिन्दुः। यथा
पृषदपरुष विषाणाग्रेण लु
ठति। इति श्रीभागवते ५ स्क
न्धे ८ अध्यायः॥ पृषत् जलबिन्दु
स्तद्वत् अपरुषेण मृदुना विषा
णाग्रेण लुठति संज्ञाहृदयाति
इति तट्टीकायां श्रीधरस्वामी
पृष्ठोदयः पुं मेष वृष कर्कट
धनु मकर मीन लग्नाः। य
था। अजो गोधनि तुरमत्रौ क
क्षिंधर्न्वि स्मराः स्वपा। निशा
संज्ञाः स्मृता ह्येते शेषा श्चाहे
दिनात्मकाः॥ निशासंज्ञा वि
मिथुनाः स्मृताः पृष्ठोदया स्त
था। शेषाः शीर्षोदया ह्येते मी
न श्चोभयसंज्ञकः। इति ज्यो
तिस्तत्त्वं॥
पॄ जि गि लि पालने। पृ
णौ। जि पृतोऽस्ति। स्मृत्वा

योदिदित्यत्र पूर्वज्ञेनात्र निष्ठा
तस्यनः । णि पूरणाति ॥
क्तौ तु एर्ति विस्वेव मनीयादि
त्वात्र नि० । णि पिपर्ति: ।
इतिदुर्गादासः ॥
पृ क पूर्त्तौ । क पारयति ।
इति दुर्गादासः ॥
पेण ऋ पेषे । गतौ ॥
श्लेषे । ऋ अपिपेणत् पिपे
णतुः । इतिदुर्गादासः ॥
पेल ऋ चाले ॥ गतौ ।
ऋ अपिपेलत् पिपेलतुः ।
चालः कम्पः । इति दुर्गा
दासः ॥
पेव ऋ ङ सेवने । ऋ अपि
पेवत् । ङ पेवते । इति
दुर्गादासः ॥
पेस ऋ गत्यां । ऋ अपिपे
सत् पिपेसतुः । इति दुर्गा
दासः ॥
पै शोषे । पायति धान्य
मातपेन । इतिदुर्गादासः ॥
पोतवणिक पुं नौकया वा
णिज्यकर्त्ता । तत्पर्य्यायः ॥
समुद्रयानचारी ३ इति जटाध
रः । नौवाणिज्यकरः ४ इति
शब्दरत्नावली ॥

पौनर्भवः पुं पुनर्भूपुत्रः ॥
सतु भर्तृपरित्यक्त विधवयोर
न्येनोत्पादितः । तस्य लक्ष
णं यथा । यापत्या वा परि
त्यक्ता विधवा वा स्वयेच्छया ।
उत्पादयेत् पुन र्भूत्वा सपौन
र्भव उच्यते ॥ इति मानवे ९
अध्यायः १७५ श्लोकः । ये
ति याभर्त्रा परित्यक्ता मृत
भर्तृका वा स्वेच्छया अन्यस्य
पुन र्भार्य्या भूत्वा यमुत्पाद
येत् स उत्पादकस्य पौनर्भ
वः पुत्र उच्यते । इति तट्टीका
यां कुल्लूकभट्टः ॥ अक्षत
योन्या भर्तृपरित्यक्तविधव
योः पौनर्भवेन भर्त्रा सहवि
वाह विधिः एवं कौमारंपति
मुत्सृज्यान्य माश्रित्य पुनरा
गतया सेन कौमारेण भर्त्रा
सह विवाहविधि र्यथा ।
साचेदक्षतयोनिः स्याद्गतप्रत्या
गतापि वा । पौनर्भवेनभर्त्रासा
पुनः संस्कार मर्हति ॥
इतिमानवे ९ अध्याये १७६ ॥
श्लोकः । साचेदिति सा स्त्रीय
द्यक्षतयोनिः सती अन्यमाश्र
येत्तदा तेन पौनर्भवेन ।

भर्त्रा पुन विवाहाख्यं संस्कार
मर्हति । यद्वा कौमारं पतिमु
त्सृज्यान्य माश्रित्य पुन स्तमे
व प्रत्यागता भवति तदातेन
कौमारेण भर्त्रा पुनर्विवाहा
ख्यं संस्कार मर्हति । इति त
ट्टीकायां कुल्लूकभट्टः ॥
सप्तविध पौनर्भवः कन्या व
र्ज्जनीया यथा । सप्तपौनर्भवाः
कन्या वर्ज्जनीयाः कुलाधमाः ॥
वाचा दत्ता मनोदत्ता कृतकौ
तुकमंगला । उदकस्पर्शिता
याच याचपाणिगृहीतिका
अग्निंपरिगता याच पुनर्भूप्रभ
वाचया ॥ इत्येताःकाश्यपेनो
क्ता दहेति कुलमग्निवत् । कृ
तकौतुकमंगला बद्धकंकना
उदकस्पर्शिता उदकपूर्वं दत्ते
तिरत्नाकरः । इत्युद्वाहतत्त्वे ॥
प्याय ओ ई ङ वृद्धौ । ओ ई
पीनं मुखं । उपसर्गात्तु प्रप्या
नं । अस्वांगे तु प्यानं पीनः
स्वेदः । ङ प्यायते । इति
दुर्गादासः ॥
प्यय क उत्सर्ज्जि । अन्तस्था
द्ययुक्तः । उत्सृजि उत्सर्गे ।
कप्याययति धनं दाता । इति

दुर्गादासः ॥
प्युष य इर् भागे ॥ दाहे । अ
न्तस्थाद्ययुक्तः । य प्युष्यतिध
ने दयादः । इर् अप्युषत्
अप्योषीत् । अस्मात् पुषादि
त्वान्नित्यं ङ इत्यन्ये । इति दु
र्गादासः ॥
प्युस य इर् विभागे । अन्त
स्थाद्ययुक्तः । य प्युस्यति धनं
दायादः । इर् अप्युसत् अप्यो
सीत् । अस्मात् पुषादित्वात्
नित्यं ङ इत्यन्ये ॥ इति दु
र्गादासः ॥
प्यै ङ वृद्धौ । अन्तस्थाद्य
युक्तः । ङ प्यायते । इति
दुर्गादासः ॥
प्रकृतिः स्त्री भगवतो माया
ख्याशक्तिः । साच परापरभे
देनद्विधा । यथा । भूमि रापो
नलो वायुः खं मनो बुद्धि रे
वच । अहंकार इतीयं मि
न्ना प्रकृति रष्टधा । ४ । अ
परे यमित स्त्वन्यांप्रकृतिंवि
द्धि मेपरां । जीवभूतां महा
वाहो ययेदं धार्य्यते जगत् ।
५ इति श्रीभगवद्गीतायां ७
अध्यायः ॥ एवं श्रीमता

र मभिमुखीकृत्य इदानीं प्रकृतिद्वारा सृष्ट्यादिकर्तृत्वेन ईश्वरतत्त्वं प्रतिज्ञातं निरूपयिष्यन् परापरभेदेन प्रकृतिद्वयमाह भूमि रिति द्वाभ्यां । भूम्यादीनि पंच भूतसूक्ष्माणि मनःशब्देन तत्कारणभूतोऽहंकारः बुद्धिशब्देन तत्कारणं महत्तत्त्वं अहंकारशब्देन तत्कारणमविद्या इत्येव मष्टधा भिन्ना यद्वा भूम्यादिशब्दैः पंच महाभूतानि सूक्ष्मैः सह एकीकृत्य गृह्यन्ते । अहंकारशब्देनैवाहंकारः तेनैव तत्कार्य्याणि इन्द्रियाण्यपि गृह्यन्ते बुद्धि रिति महत्तत्त्वं । मनःशब्देन तु मनसैवोन्नेयं अव्यक्तस्वरूपं प्रधान मित्यनेन प्रकारेण मे प्रकृतिर्म्मायाख्या शक्ति रष्टधा भिन्ना विभागं प्राप्ता । चतुर्विंशतिभेदभिन्नाया अप्यष्टस्वेवान्तर्भाव विवक्षयाष्टधा भिन्नेत्युक्तं । तथाच क्षेत्राध्याये इमा मेव प्रकृतिं चतुर्विंशतितत्त्वात्मना प्रपंचयिष्यति । महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च । इन्द्रियाणि दशैकंच पंच चेन्द्रियगोचरा इति च ॥ अपरा मिमां प्रकृति मुपसंहरन् परां प्रकृति माह अपरेय मिति । अष्टधा प्रकृति रुक्ता इय मपरा निकृष्टा जडत्वात् परार्थत्वाच्च । इतः सकाशात् परां प्रकृष्टा मन्यां जीवभूतां जीवस्वरूपां मे प्रकृतिं जानीहि । परत्वे हेतु हेतुः यया चेतनया क्षेत्रज्ञस्वरूपया स्वकर्म्मद्वारेणेदं जगद्धार्य्यते ५ इति तट्टीकायां श्रीधरस्वामी ॥

प्रज्ञु ञौ श ज्ञीप्से । ज्ञीप्सा ज्ञातु मिच्छा । तप कम इत्येव ज्ञापते निष्पादनात् ञौ अप्राज्ञीत् । श एज्ञुति वोज्ञौ गुरुं शिष्यः । इति दुर्गादासः ॥

प्रज्ञा स्त्री बुद्धिः । तद्वैदिकपर्य्यायाः । केतुः १ केतः २ चेतः ३ चित्तं ४ क्रतुः ५ असुः ६ धीः ७ शचीः ८ माया ९ वयुनं १० अभिख्या ११ इत्येकादश प्रज्ञानामानि । इति वेदनिघण्टौ ३ अध्यायः ॥

प्रणामः पुं प्रकर्षेण नमनं । तद्विधिर्यथा । कालिकापुराणे

शिरोमत् पादयोः कृत्वा बाहुभ्यांच परस्परं । प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् । किंचागमे । दोर्भ्यां पद्भ्यांच जानुभ्या मुरसा शिरसा दृशा मनसा वचसा प्रणामोऽष्टांग ईरितः ॥ जानुभ्यांचैव बाहुभ्यां शिरसा वचसाधिया ॥ पंचांगकः प्रणामः स्यात् पूजासु प्रवराविमाविति ॥ गारुडे दक्षिणं कृत्वा ऊर्द्ध्वाक्रान्त पृष्ठतो बुधः । अवपंच प्रणामांश्चीन् शाक्त भेदापिकाधिकान् ॥ तथाच नारदपंचरात्रे । क्षेपिं वीक्ष्य हरिं चाग्रे गुरुनत्स्य गुरुमेवच । चतुर्विंशाद्दश वा चतुर्विंशादुद्दर्के ॥ नमेत्तदर्द्ध मथवा तदर्द्धं सर्व्वदा नमेत् ॥ विष्णुधर्म्मोत्तरे । देवार्च्चादर्शनादेव प्रणमेन्मधुसूदनं । स्नानापेक्षा नकर्त्तव्या दृष्ट्वार्च्चां द्विजसत्तमाः देवार्च्चा दृष्टिपूतेहि शुचि सर्व्वं प्रकीर्त्तितं । अथनमस्कारमाहात्म्यं । नारसिंहे नमस्कारः स्मृतो यज्ञः सर्व्वयज्ञेषु चोत्तमः । नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत् । स्कान्दे । दण्डप्रणाम कुरुते विष्णवे भक्तिभावतः । रेणुसंख्यां वसेत् स्वर्गे मन्वन्तरशतं नरः ॥ तत्रैव ब्रह्मनारदसंवादे । प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्च्चयेत् । सयां गति मवाप्नोति न तां क्रतुशतैरपि ॥ नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत् । तत्रैव श्रीशिवोमासंवादे । भूमि मापीड्य जानुभ्यां शिर आरोप्य वैभुवि । प्रणमेद्यो हरिं देवं सोऽश्वमेधफलं लभेत् । तत्रैवान्यत्र ॥ तीर्थकोटिसहस्राणि तीर्थकोटिशतानिच नारायणप्रणामस्य कलां नार्हन्ति षोडशीं । शाठ्येनापि नमस्कारं कुर्व्वतः शार्ङ्गधन्वने शतजन्मार्ज्जितं पापं तत्क्षणादेव नश्यति । रेणुमण्डितगात्रस्य कणा देहे भवन्ति ये । तावद्वर्षसहस्राणि विष्णुलोके महीयते । विष्णुधर्म्मोत्तरे । अभिवाद्य जगन्नाथं कृतार्थश्च तथा भवेत् नमस्कारक्रिया तस्य सर्व्वपापप्रणाशिनी । जानुभ्यांचैव पाणिभ्यां शिरसाच विचक्षणः कृत्वा

णामं देवस्य सर्व्वान् कामान
वाप्नुयात् । विष्णुपुराणे । अना
दि निधनं देवं दैत्य दानव दा
रणं । ये नमंति नरा नित्यं नहि
पश्यंति ते यमं । ये जना ज
गतां नाथं नित्यं नारायणं द्वि
जाः । नमन्ति नहि ते विष्णोः
स्थानादन्यत्र गामिनः । नारदी
ये । एकोपि कृष्णस्य कृतः प्रणा
मो दशाश्वमेधावभृथेन तुल्यः
दशाश्वमेधी पुनरेति जन्म कृ
ष्णप्रणामी न पुनर्भवाय । हरि
भक्तिसुधोदये । विष्णोर्दण्ड
प्रणामार्थं भक्तेन पततां भु
वि । पतितं पातकं कृत्स्नं नो
त्तिष्ठति पुनः सह । स्कांदे देव
दूतविकुण्डलसंवादे । नत्वा त्व
त्वा नरो घोर मरणे नियतेन्द्रि
यः । सत्फलंसमाप्नोति तत्र
नत्वा गरुडध्वजे । कृत्वापि बहु
शः पापं नरो मोहसमन्वितः
नयाति नरकं नत्वा सर्व्वपापह
रं हरिं । तत्रैव वेदनिधिस्तुतौ ।
अपि पापं दुराचारं नरं त्वत्प्र
णतं हरे । नेक्षन्ते किंकरा या
म्या उल्का लपने यथा ॥
विष्णुपुराणे श्रीयमस्य निज

महानुशासने । हरि ममरगणार्च्चि
तांघ्रिपद्मं प्रणमति यः परमा
र्थतो हि मर्त्यः । तमपगतसम
स्तपापबंधं ब्रज परिहृत्य यथा
ग्निमाज्यसिक्तं । ब्रह्मवैवर्त्ते ।
शरणागतरक्षणोद्यतं हरिमी
शं प्रणमंति ये नराः । न पतं
ति भवाम्बुधौ स्फुटं पतितानु
द्धरति सनातनो । अष्टमस्क
न्धेच बलिवाक्ये । अहो प्रणा
माय कृतः समुद्यमः प्रपन्नभ
क्तार्थविधौ समाहितः । यल्लो
कपालैस्त्वदनुग्रहोऽमरैरलब्ध
पूर्वोऽपसदेऽसुरेऽर्पितः ॥ अ
तएव नारायणव्यूहस्तवे । अ
हो भाग्यं महोभाग्यं महोभा
ग्यं नृणामिदं । येषां हरिप
दाब्जाग्रे शिरो न्यस्तं यथा त
था ॥ किंच । नारसिंहे श्रीय
मोक्तौ । तस्य वै नारसिंहस्य
विष्णोरमिततेजसः । प्रणामं
ये प्रकुर्व्वन्ति तेषामपि नमो न
मः । भविष्योत्तरेच जलधेनु
प्रसंगे । विष्णोर्देव जगद्धात
र्जनार्द्दन जगत्पते । प्रणा
मं ये प्रकुर्व्वन्ति तेषामपि न
मो नमः । इत्यादि ॥ अथ

1155

प्रणाममनित्यता । बृहन्नारदीये
लुब्धकोपाख्यानारम्भे सकृद्वा
न नमेद्यस्तु विष्णवे धर्मकारि
णे । शवोपमं विजानीयात्
कदाचिदपि नालपेत् । किंच ।
पाद्मे वैशाखमाहात्म्ये यमब्रा
ह्मणसंवादे । पश्यंतो भगव
द्द्वारं नाम पाशं परिच्छदं ।
अकृत्वा तत्र प्रणामादि यांति
ते नरकौकसः ॥ अथ नम
स्कारे निषिद्धानि । विष्णुस्मृ
तौ । जन्मप्रभृति यत्किंचि
त्पुमान्वै धर्म्ममाचरेत् । सर्व्वं
तन्निष्फलं याति एकहस्ता
भिवादनात् । वाराहे । वस्त्रप्रा
वृतदेहस्तु योनरः प्रणमेत मां ।
श्वित्री स जायते मूर्खः सप्तज
न्मानि भामिनि । किंचान्यत्र ।
अग्रे पृष्ठे वामभागे समीपे
गर्भमंदिरे । जपहोम नमस्का
रान् कुर्य्यात् केशवालये ॥
अपि च सकृद्भूमौ निपतितो
न शक्तः प्रणमेत्सुधीः । उत्था
योत्थाय कर्त्तव्यं दण्डवत् प्रणि
पातनं । इति श्रीहरिभक्तिवि
लासे ८ विलासः ॥
प्रतिपत्तिः स्त्री श्राद्धादौ सर्व्व

शेषांगकर्म्म । यथा प्रतिपत्ति
रूपकर्म्मणा एव प्रतिपाद्याभा
वे तन्निवृत्तिः । इति तिथ्यादित
त्वं ॥ निर्व्वाहितांगकद्रव्यकर
णकांगत्वे प्रतिपत्तिरूपकर्म्मो
णत्वे प्रतिपत्तिकर्म्म उक्ताक्रि
या । यत्र एकेन द्रव्येण कर्म्म
द्वयं निर्व्वाह्यते तत्र उत्तरकर्म्म
प्रति पत्तिकर्म्म । तन्निर्व्वाहकंच
प्रतिपाद्यं । इति तट्टीकायां का
शीरामवाचस्पतिः ॥ अथ प्र
तिपत्त्यधिकरणं । शाकान्निरस्य
ति लोहितं निरस्यति गुदेनो
पयजति सर्व्वं जुहोति ।
इत्यग्नीषोमीयपशौ श्रूयते ।
अत्राग्निरस्यतीति दृष्टान्तार्थं ।
यथा पशो हृदयवर्ण्णि शूलकस्य
जति तथा लोहित मपि स्रज
ति । अन्यत्र पशोः शीर्षमांसो
पक्रमेण होमः । अत्र तु गुदमां
सोपक्रमेणेति । तत्र च यत्रशे
ष मृत्विग्भ्यो ददातीति परि
भाषया मांसस्याप्राप्तप्रतिपत्तिः
प्राप्ता । अत्र सर्व्वहवनेन प्रति
पत्त्यभावात् कर्म्मैव गुणप्रस्तादि
ति । अत्र सिद्धान्तः । यदि कार्या
उपपत्तिरिति । यदि प्रतिपा

ये स्यात्तदा प्रतिपत्ति रंगाभि
न्यर्थः । इति रामकृष्णीयाधि
करणकौमुदी ॥ अपिच ॥
उपांशुयाजद्रव्येण शेषकार्यं
भवेन्नवा । भवेद्विमर्शः सर्वेभ्य
इसृत्या प्रापितत्वतः ॥ उ
त्कर्ष्यद्रव्यशेषस्तु भाव्युपल
क्षणादिकृत् । अतोन प्रतिप
त्त्यर्हः शेषकार्य्यंततः कथं ॥
इति माधवीयाधिकरणमाला
यां ४ पादे प्रथमाधिकरणं ॥
प्रतिहस्तकः पुं प्रतिनिधिः ।
यथा । आश्रितानां भृतौ स्वा
मिसेवायां धर्म्मसेवने । पुत्र
स्योत्पादने चैव न सन्ति प्रति
हस्तकाः ॥ इति हितोपदेशे नी
तिशास्त्रे सुहृद्भेदो नाम द्वि
तीयकथासंग्रहः परिच्छेदः ।
प्रत्याध्मानः पुं वातव्याधिवि
शेषः ॥ तस्य लक्षणमाह ।
विमुक्तपार्श्वहृदयं तदेवामा
शयोत्थितं । प्रत्याध्मानं वि
जानीयात् कफव्याकुलिता
निलं ॥ विमुक्तपार्श्वहृदयं
पार्श्वे हृदये विहाय जातं
तदेवाध्मानं ॥ कफव्याकु
लितानिलं कफेनावरुद्धवातं

अथ तस्य चिकित्सा ॥
प्रत्याध्माने समुत्पन्ने कुर्य्या
त् वमन लंघने । दीपनादि
नियुञ्जीत सर्व्वं वस्तिकर्म्म च
इति भावप्रकाशः ॥
प्रत्यालीढं क्लीं धन्विनां स्थ
स्थानविशेषः । यथा । स्यात्प्र
त्यालीढमालीढं समं पादेन
यापदं । वैशाखं मंडलं चेति
धन्विनां स्थानपंचकं । स्याद्द
क्षपादसंकोचात् वामपादप्रसा
रणात् । प्रत्यालीढमितिप्रो
क्तमालीढं तद्विपर्य्ययात् ॥
तुल्यपादयुगं यत्र समपाद
मुदाहृतं । वितस्त्यन्तरितपाद
युगं वैशाखमुच्यते । मण्डला
कारपादाभ्यां मंडलं स्थानमी
रितं । इति शब्दरत्नावली ॥
प्रत्युत अ वैपरीत्ये । यथा ।
बुधादिवाक्यं तु न नियामकं
प्रमाणाभावात् प्रत्युत फल
श्रुतेर्गुणफलबोधक मिति ।
इति तिथ्यादितत्त्वे जन्माष्टमी
प्रकरणं ॥
प्रथ क प्रक्षेपे । ख्यातौ ।
रेफयुक्तः । क प्राथयति ।
इति दुर्गादासः ॥

प्रथ स य ङ ख्यातौ ॥
रेफयुक्तः । स प्रथयति ।
ष प्रथा । ङ प्रथते गुणी
प्रसिद्धः स्यादित्यर्थः । इति
दुर्गादासः ॥
प्रथमः त्रि प्रधानं । आदिः ।
तत्पर्य्यायः । अग्रिमः ६ आ
दिमः २ इति जटाधरः । प्राक्
८ इत्यव्ययवर्गे अमरः ॥
प्रदक्षिणं स्त्री प्रदक्षिणं । य
था । अथ प्रदक्षिणं । ततः प्रद
क्षिणं कुर्य्यात्कृत्वा भगवतो
हरेः । नामानि कीर्त्तयन् शक्तो
तांच साष्टांगवंदनं ॥
प्रदक्षिणासंख्या चोक्ता नार
सिंहे । एकां चण्ड्या रवेः स
प्त पितस्रो दद्याद्विनायके ।
चतस्रः केशवे दद्यात् शिवे
त्वर्द्धप्रदक्षिणं ॥ प्रदक्षिण
माहात्म्यं वाराहे । प्रदक्षिणं
ये कुर्वन्ति भक्तियुक्तेन चेतसा
न ते यमपुरं यान्ति यान्ति पु
ण्यकृतां गतिं । यः त्रिःप्रद
क्षिणं कुर्य्यात् साष्टांगकप्रणा
मकं । दशाश्वमेधस्य फलं प्रा
प्नुयान्नात्र संशयः । स्कान्दे
ब्रह्मनारदसंवादे । विष्णोर्हि

मीनं यः कुर्य्यात् सकृत्कृत्वा प्र
दक्षिणं । अश्वमेधसहस्रस्य फ
लमाप्नोति मानवः । तत्रैव चातु
र्मास्यमाहात्म्ये । चतुर्वारं भ्रमीभि
स्तु जगत् सर्वं चराचरं । क्रान्तं
भवति विप्राग्र्य तत्तीर्थगमनाधि
कं । तत्रैवान्यत्र । प्रदक्षिणं तुयः
कुर्य्याद्धरिं भक्त्यासमन्वितः ॥
हंसयुक्तविमानेन विष्णुलोकं
स गच्छति । नारसिंहे । प्रद
क्षिणेन चैकेन देवदेवस्य मन्दि
रे । कृतेन यत्फलं न्ह्णां त
च्छृणुष्व नृपात्मज ॥ पृथ्वीप्र
दक्षिणफले यत्तत् प्राप्य हरिं
जे । अन्यच्च । एवं कृत्वा तु कृ
ष्णस्य यः कुर्य्याद्धि प्रदक्षिणं ।
सप्तद्वीपवतीपुण्यं लभतेतु
पदे पदे ॥ पठन्नामसहस्रं तु
नामान्येवाथ केवलं । भक्ति
सुधोदये । विष्णु प्रदक्षिणी
कुर्वन् यस्तत्रावर्त्तते पुनः ॥
तदेवावर्त्तनं तस्य पुन र्नावर्त्त
ते भवे ॥ बृहन्नारदीये यमभ
गीरथसंवादे । प्रदक्षिणत्रयं
कुर्य्यात् यो विष्णो र्मनुजेश्वर ।
सर्वपापविनिर्मुक्तो देवेन्द्रत्वं स
मश्नुते । तत्रैव प्रदक्षिणमाहा

त्येप स्वधर्मोपाख्यानारम्भे।
भक्त्या कुर्वन्तिये विष्णोः प्रदक्षि
णाचतुष्टयं। तेषियां परं स्था
नं सर्वलोकोत्तमोत्तममिति।
तत् ख्यातं यत् स्वधर्मस्य ए
वंस्मिन् गृध्रजन्मनि। कृष्णप्र
दक्षिणाभाषान्महासिद्धिरभू
दिति॥ अथ प्रदक्षिणा
यां निषिद्धं विष्णुस्मृतौ॥
एकहस्तप्रणामश्च एकाचैव
प्रदक्षिणा। अकाले दर्शनं वि
ष्णोर्हन्ति पुण्यपुरा कृतं। अका
ले भोजनादिसमये किन्तु।
कृष्णस्य पुरतो नैव स्थ्यसे
वप्रदक्षिणां। कुर्य्यादुन्मवि
कारूपां वैमुख्यापादनीभ्रमो॥
तथाचोक्तं। प्रदक्षिणां न
कर्तव्यं विमुखत्वा कारणात्
इति श्रीहरिभक्तिविलासे ८
विलासः॥
प्रबोधनी स्त्री श्रीहरे रुत्थाने
कादश्यादिः। अथ प्रबोधनीकृ
त्यं। प्रायन्ना मित्र कृत्वास्मार्ही
यामोर्थिमहोत्सवे। प्रबोध्यकृ
ष्णं संपूज्य विधिनावो ह्ययेद्वयं॥
अथ प्रबोधनीकृत्यमित्यता।
स्कान्दे तत्रैव। जन्मप्रभृति य
त्पुण्यं नरेणोपार्जितंभुवि।
वृथा भवतितत् सर्वं न कृता
बोधवासरे॥
अथ प्रबोधनीमाहात्म्यं तत्रैव
प्रबोधन्याश्च माहात्म्यं पापघ्न
पुण्यवर्द्धनं। मुक्तिदं कृतबु
द्धीनां शृणुत्वं मुनिसत्तम॥
तावद्गर्जन्ति विप्रेन्द्र गंगाभा
गीरथी क्षितौ। यावन्नाया
ति पापघ्नी कार्त्तिके हरिबो
धनी। तावद्गर्जन्ति तीर्थानि
आसमुद्रसरांसिच। यावत्प्र
बोधनी विष्णोस्तिथिर्नायाति
कार्तिके। वाजपेयसहस्राणि
अश्वमेधशतानिच। एकेनैवो
पवासेन प्रबोधन्यां लभेन्नरः
दुर्लभं चैव दुष्प्रापं त्रैलोक्येसच
राचरे। तदपि प्रार्थितं वि
प्र ददाति हरिबोधनी॥
ऐश्वर्यं संततिं प्रज्ञां राज्यंच
सुखसंपदः। ददात्युपोषिता
विप्र हेलया हरिबोधनी॥
मेरुमंदरतुल्यानि पापान्यु
र्जितान्यपि एकेनैवोपवासे
न दहते हरिबोधनी। पूर्व
अंग्यानिदानानिदत्वा यत्फ
लमश्नुते। एकेनैवोपवासेन

ददाति हरिबोधनी। किंच।
ज्ञातः सएव सुकृती कुलं ते
नैव पावितं। कार्त्तिके मुनि
शार्दूल कृत्य येन प्रबोधनी।
यानि कानि च तीर्थानि त्रैलो
क्ये संभवन्तिच। तानि तस्यगृ
हेसम्यक् यः करोति प्रबोधनीं
सर्वकृत्यं परित्यज्य तुष्ट्यर्थं च
कृपाणिनः। उपोष्यैकादशी
सम्यक् कार्त्तिके हरिबोधिनी
किंतस्यबहुभिः कृत्यैः फलो
कप्रदं मुने। सकृच्चोपो
षिता येन कार्त्तिके हरिबो
धनी॥ स ज्ञानी सहियो
गीच सतपस्वी जितेन्द्रियः।
स्वर्गमोक्षोच तस्यास्ता मुपा
स्ते हरिबोधनीं॥ विष्णोः प्रि
यतमा ह्येषा धर्मसारस्यदायि
नी। इमां सकृदुपोष्यैव मुक्ति
भागी भवेन्नरः॥ प्रबोधनीमु
पोष्यैव न गर्भे विशते नरः।
सर्वधर्मान् परित्यज्य तस्मा
त्कुर्वीत नारद॥ स्नानंदानं त
पोहोमः समुद्दिश्य जनार्द्दनं
नरैर्यत् क्रियते विप्र प्रबोध
न्यां तदक्षयं॥ महाव्रतमि
दंपुत्र महापापौघनाशनं। प्र
बोधवासरे विष्णो विधिवत्स
मुपोषयेत्। व्रतेनानेन देवेशं
परितोष्य जनार्द्दनं। विराजय
न् दिशो दीप्त्या प्रयाति भुव
नंहरेः॥ पाद्मेच तत्रैव॥ उ
पादिभोगिशयने भगवाननं
तो यस्मिन्दिने स्वपिति चाथ
विबुध्यते च। तस्मिन्ननन्यमन
सामुपवासभाजां कामं ददात्य
भिमतं गरुडांकशायी॥ वाराहे
च। उपवासासमर्थानां सदैव
पृथुलोचने। एका सा द्वादशी
प्रोक्ता समुपोष्या प्रबोधनी।
तस्यामाराध्य विष्णुं जगता
मीश्वरेश्वरं। प्राप्नोति सकलं
तद्धि द्वादशद्वादशीव्रतं। अन्
गांगारकयुता यदिसा भवति प्रि
ये। तदा सासहस्रगुणा को
टिकोटिगुणोत्तरा। शयने बो
धनेचैव कोटिद्वादशेच सुंदरि
उपोष्यैव विधानेन याति सल
यतो नरः। एकादशी सोमयु
ता कार्त्तिके मासि भामिनि। उ
त्तरा भाद्रसंयोगे अनन्ता सात्र
कीर्तिता। तस्यां यत् क्रियते
भद्रे सर्वं मानन्त्य मश्नुते।
अनन्तपुण्यफलदा तेनेता स्मृ

तत्फले। तत्रैव श्रीयमवरदसं
वादे। अन्यच्च ते प्रवक्ष्यामि शृ
णुष्वातरं मुने। कार्त्तिकेः
शुक्लपक्षे तु साक्षादेकादशी
स्मृता। भक्तिप्रदा हरेः सा तु
नाम्ना ख्याता प्रबोधिनी। यासा
विष्णोः परा मूर्त्ति रव्यक्तानेक
रूपिणी। सा क्षिप्ता मानुषे लो
के द्वादशी मुनिपुंगव। श्रीम
थुरायांच विशेषतः पाद्मे तत्रै
व। तावद्गर्जंति तीर्थानि वाजि
मेधादयो मखाः। मथुरायां
प्रिया विष्णो र्यावन्नायाति बो
धनी। संसारदावतप्तानां का
मक्रोधपिपासिनां श्रीकृ
ष्णपादपद्मस्य सान्निध्यं प्रीत
येगृहं। भवपाप्मजनाब्धौ वै प्र
बोधिकेयं प्रबोधनी। कथं नसेव्य
ते मूढै र्मथुरायां किमन्यतः।
अथ विशेषतः प्रबोधन्यां श्री
भगवत्पूजादिमाहात्म्यं॥
स्कान्दे तत्रैव प्रबोधनीमाहा
त्म्ये। येऽर्च्चयंति नरास्तस्यां
भक्त्या देवन्तु माधवं। सप्तु
याद्य प्रमुच्यंते पापै र्जन्मसहस्रा
र्जितैः। बाल्ये यच्चार्जितं व
तस यौवने वार्द्धकेचयत्।

सप्तजन्मकृतं पापं स्वल्पंवा
यदि वा बहु। शुक्लार्द्रस्मृनिशा
हेल सुगुह्यमपि नारद। तत्
क्षालयति गोविंद स्तिथौ त
स्यां प्रपूजितः। किंच। प्रबोध
वासरे विष्णोः कृते चहरेःकी
र्यां। सप्तद्वीपावनीदानेयत्फ
ले तद्भवेन्मुने। वाराहेच॥
कौमुदस्य तु मासस्य याशिता
द्वादशीभवेत्। अर्च्चयेयस्तु
मां तत्र तस्य पुण्यफलंशृणु
यावल्लोका हि वर्त्तंते यावद्वे
चैव माधवि। मद्भक्तो जाय
ते तावदन्यभक्तो नजायते।
अथ प्रबोधकालनिर्णयः।
भविष्ये। आ भा का सितप
क्षेषु मैत्रश्रवण रेवती। आ
दिमध्यावसानेषु प्रस्वापावर्त्त
नादिकं। पाद्मे। पौष्णशेषा य
दा नास्ति मैत्राद्यमपि नोनि
शि। द्वादश्यामपि तत्कुर्या
दुत्थाने शयने हरेः। निशिस्वा
पो दिवोत्थाने संध्यायांपरिव
र्त्तने। अन्यत्र पादयोगेपि द्वा
दश्यामेवकारयेत्॥ वारा
हेच। अपाद नियम स्तत्र
स्वापे वा परिवर्त्तने। पादयो

गो वदा तस्मान्दस्त्रेणापि तदा
भवेत्। किंच स्कान्दे। रेवत्यन्ता
यदा राम्नौ द्वादश्याच समन्वि
तः। तदा विबुध्येत विष्णुर्दि
नांते प्राप्य रेवतीं। रेवत्यादि
र्यथांतोवा द्वादश्या च विनाभ
वेत्। उभयो र्घ्यतावे तु संध्या
याश्च महोत्सवः॥ वाराहेच।
द्वादश्यां संधिसमये नक्षत्रा
णा मसंभवे। आ भा का सि
तपक्षेषु शयनावर्त्तनादिकं।
अत एव पुष्करपुराणे। यस्य
यस्य तुदेवस्य यन्नक्षत्रंतिथि
श्चया। तस्य देवस्य तस्मिंश्च
शयनावर्त्तनादिकं॥ अथ
भगवत्प्रबोधनविधिः। शय
न्यामिव निष्पाद्य महापूजांज
लाशये। कृत्वा नीत्वाथ संक
ल्पं कृत्वा तत्र प्रबोधयेत्। त
त्रमंत्रः। ब्रह्मेंद्र रुद्राग्नि कुबेर
सूर्य्य सोमादिभि र्वन्दितपाद
पद्मः। बुध्यस्व देवेश जगन्नि
वास मंत्रप्रभावेन सुखेन देव।
इयंतु द्वादशी देव प्रबोधार्थं
विनिर्म्मिता। त्वयैव सर्वलोका
नां हितार्थं शेषशायिना॥
उत्तिष्ठोत्तिष्ठ गोविंद त्यजनि

द्रां जगत्पते। त्वयिसुप्ते जग
त्सुप्तं सुस्थिते चोत्थितं भवे
त्। गता मेघा वियच्चैव नि
र्मलं निर्मला दिशः। शारदा
नि च पुष्पाणि गृहाण मम के
शव। उत्तिष्ठोत्तिष्ठेत्यत्र क्वचि
च्चैवं। त्वयि सुप्ते जगन्नाथ
जगत्सुप्तं भवेदिदं। उत्थिते
चेष्टते सर्वं उत्तिष्ठोत्तिष्ठ माध
वेति॥ वाराहेच। ब्रह्मेंद्ररुद्रै
रभितर्क्यभावो भवान्मुनिर्वंदि
तवंदनीयः। प्राप्ता तव द्वाद
शी कौमुदाख्या जागृष्व जा
गृष्व च लोकनाथ। मेघा गता
निर्मलपूर्णचंद्रः शारदपुष्पा
णि च लोकनाथ। अहं ददानी
च भक्तिहेतो र्जागृष्व चलोक
नाथ। श्रुतिश्च। इदं विष्णुर्वि
चक्रमे त्रेधा निदधे पदं समूढ
मस्य पांशुले इत्यादि। ततस्त
स्मात्समुत्थाप्य कृत्वा नृत्या
दिनिस्वनैः। नीरे सुखं निवेश्या
थ शाययेतस्वगृहे॥ तथा
द्वितीयस्कंधे श्री ब्रह्मस्तुतौ
सोऽसावदभ्रकरुणो भगवान्वि
वृद्ध प्रेमस्मितेन नयनांबुरुहं वि
जृंभन्। उत्थाय विश्वविजयाय

च विषादे माध्या गिरापनय
तात् पुरुषः पुराणः। इति॥
ततः पुष्पांजलिं दत्वा संस्थाप्य
विधिवत्प्रभुं। नीराज्य न्यास
र्पणं च वस्त्रादीनि समर्पयेत्॥ त
थाच ब्राह्मे। एकादश्यांतु शुक्ला
यां कार्तिके मासि केशवे। प्रसु
प्तं बोधयेद्रात्रौ भक्तिश्रद्धासम
न्वितः। नृत्यै गीतै स्तथा वाद्यै
र्ऋग्यजुःसाममंगलैः। विना
पनवशाद्यैश्च पुराणश्रवणेनच
वासुदेवकथाभिश्च स्तोत्रैरन्यै
श्च वैष्णवैः। सुभाषितैरिंद्रजा
लै भूमिशोभाभि रेवच। पु
ष्पै र्धूपैश्च नैवेद्यै र्दीपवृंदैः
सुशोभनैः॥
ह्लोभि र्भक्ते रसैश्च फलैः शा
केश्च पायसैः॥ इक्षोर्विका
रै र्मधुना द्राक्षाद्यैः सदाडि
मैः। कुठेरकस्य मंजर्या मा
लत्या नववेनच॥ नूतने पु
ष्पविशेषैः। ह्रस्वाभ्यां श्वेतर
क्ताभ्यां चंद्रमाभ्यां च सर्वदा
कुंकुमालक्तकाभ्यां च रक्तस
त्रैः सकुंकुमैः॥ तथा नाना
विधैः पुष्पै र्द्रव्यै र्वीरकृयासु
तैः एव मेव प्रायः पाद्मेच

तथा स्कान्देच। वकुपुष्पैर्वि
कफलैः कर्पूरागरु कुंकुमैः
हरेः पूजा विधातव्या कार्ति
के बोधवासरे इति। इत्थं कृत्वा
महापूजां महानीराजनं तथा
स्वव्रतं समर्पयेत् कृष्णे सपुष्पा
क्षतवारिणा। वेदस्तुत्यादिना
स्तुत्वा स्वरूपक्लिप्त्यादिना प्रभुं
संप्रार्थ्य गीतवाद्यादिघोषैरा
रोहयेद्रथं। तथाच भविष्यो
त्तरे श्रीकृष्णयुधिष्ठिरसंवादे।
महोत्सवैवे रात्रौ भ्रामयेत्स्य
न्दने स्थितं। उत्थिते देवदेवे
शे नगरे पार्थिवः स्वयं। दी
पोद्योतकरे मार्गे नृत्यगीतस
माकुले॥ अथ रथयात्रामा
हात्म्यं भविष्योत्तरे तत्रैव।
यं यं दामोदरः पश्येत्पदास्थि
तो धरणीधरः। तं तं प्रदे
शं राजेंद्र सर्वं स्वर्गाय कल्प
येत्। किंच। यावत् पदानि
कृष्णस्य रथस्याकर्षणे नरः
करोति क्रतुभि स्तानि तुल्या
नि नरनायक। रथस्थं ये नि
रीक्षंते कौतुकेनापि केशवं।
देवतानां गणाः सर्वे भवंति
श्वपचादयः। स्त्रियोःपिशुति

माप्नोति रथयात्रापरायणाः
पितृ मातृ भर्तृकुलं नयंति ह
रिमंदिरं। कुर्वंति नर्तकीनृत्यं
रथाग्रे कौतुकान्विते। अप्स
रोभिः सह क्रीडां कुर्वंतीन्द्राश्च
तुर्दश। ये रथाग्रे प्रकुर्वंति
गीतवाद्यादि मानवाः। देव
लोकात् परिभ्रष्टा जायंते
मण्डलेश्वराः। मौल्येन संद
त्तस्याग्रे गायमानाश्च गायकाः
वादकैः सह राजेंद्र प्रयांति ह
रिमंदिरं। रथोत्सवे मुकुं
दस्य येषां हर्षोऽपि जायते।
तेषां न नारकी पीडा यावदि
न्द्राश्चतुर्दश। रथोत्सवस्य
माहात्म्यं कलौ वितनुते हि यः
पुण्यवृद्ध्या विशेषेण लोभेन वा
धनवान्नरः सप्तद्वीपसमुद्रां
न्ता रत्नधान्यसमन्विता। सशै
लवनपुष्पाढ्या तेन दत्ता मही
भवेत्। अन्यत्र च। बोधनी त्र
यादा यात्रा कार्तिके शुक्लपक्ष
तः। रथस्थो यत्र भगवांस्ति
ष्ठायच्छति वांछितं भजंते ये
रथारूढं देवं सर्वेश्वरेश्वरं।
तेषां यात्रा कृता नृणां कामा
निष्टान् प्रयच्छति। श्रीकृष्णरथ

शोभां ये प्रकुर्वंति प्रहर्षिताः
तेषां मनोरथावाप्तिं यच्छते पु
रुषोत्तमः। कृष्णस्य रथशो
भां ये प्रकुर्वंति स्वशक्तितः
वाञ्छितं तेभ्यो यच्छंति नित्यं
सूर्यादयो ग्रहाः। कृष्णस्य र
थशोभां ये प्रकुर्वंति सहर्षि
ताः। पदे पदे तथा पुत्र पुण्यं
तेषां प्रयागजं। रथयात्रास्थि
ते कृष्णे जयेति प्रवदंति ये। ज
येत्वि पुन र्यैवै पुण्य पुण्यं
वदाम्यहं। गंगाद्वारे प्रयागेच
गंगासागरसंगमे। वाराणस्या
दितीर्थेषु देवानाञ्चैव दर्शने
यत् पुण्यं कविभिः प्रोक्तं का
र्तिकेन च नरेश्वर। जयशब्दे
कृते विष्णो रथस्थे तत्फलं
स्मृतं। रथस्थितो नरै र्यस्तु दृ
ष्टो धरणीधरः। यथालाभो
पपन्नैश्च पुष्पै र्भक्त्या समर्पि
तः। ददाति वांछितान् कामा
न्नेतेच परमं पदं। मंगलं ये प्र
कुर्वंति धूपदीपां स्तथा स्तवं
नैवेद्यं वस्त्रपूजांच भक्त्यानी
राजनं हरे। रथारूढस्य कृष्ण
स्य संग्रामे हरिवासरे। फलेन
तन्मया ज्ञाते जानाति यदिके

प्राव:। ब्रह्मस्वहारी गोघ्नश्च
भ्रूणहा ब्रह्मनिंदक:। महापा
तकयुक्तापि ब्रह्महा गुरुतल्प
ग:। मद्यप: सर्वपापोपि कलि
कालेन मोहित:। रथाग्रत: प
दैकेन मुच्यते सर्वपातकै:।
किंचान्यत्र। रथारूढे महावि
ष्णौ येऽनुवंति जयस्वनं। एज्ञो
जाखिलपापेभ्यो मुक्तो याति
हरे: पदं। किंच। रथस्याकर्ष
णं पूर्वं कुरुते दैत्यनायक:।
तत: सुरा: स्थिरसंख्या यत्नात् सं
पर्वमानवा:। इत्थं च रथयात्रा
याविधिरुक्त: स्वतो भवत्।
अथापि कश्चित्तत्रान्यो विशे
षोऽपि वितन्यते॥ अथ रथ
यात्राविधि: श्रीकृष्णे तु रथा
रूढे कृत्वा जयजयध्वनिं। नि
घोषश्च महापूजा नाशीर्वा
द्यानि कीर्तयेत्। तथा च विष्णु
धर्मे। वक्त्रं नीलोत्पलरुचि लस
त्कुण्डलाभ्यां सुरम्यं चेद्याकारैर
तितिलकं चंदनेनाक्तनेस्य।
गत्वा लीलाजनमुखकरी प्रेक्ष
णेनामृतेनोच्चे: पद्मावासा सतत
मुरसा धारयन् पातु विष्णु:॥
युक्त: पौष्कादितादे मंधरतन
रणत् किंकिणीजालमाले र
त्नोघैर्मौक्तिकानामविरतम
णिभि: संभृते स्वैव हारे:।
हैमै: कुंभै: पताकाभिवनरक
चिभिर्भूषित: केतुमुख्य स्तु
द्वैर्ब्रह्मेशावन्यो दुरितहरहरे:
पातु जैत्रो रथो व:॥ मोदं
ते सज्जना हा निंदितधिय:
स्वस्त्याखिलोपद्रवा: स्वस्था:
स्वस्थिरबुद्धय: प्रतिहतामित्रा
रमंतो सुखं। दैत्या गिरिग
ह्वराणि गहनं प्रभ्रंजंधं भ
वाद्वैत्यादि भगवानयं यदुप
तिर्यानं समारोहति॥ पला
यध्वं पलायध्वं रे रे दितिजदान
वा:। संरक्षणाय लोकानां रथा
रूढो न्केशवीति। ततो विवि
धगाद्यानि पठित्वाऽथ महाप्र
भो:। महाप्रसादमालाच स्वी
कुर्यात् परया मुदा॥ तन्मा
हात्म्यंच्योक्तं। भक्त्या गृहीत्वा
ति यो माला वैसंवी मंगला
श्रयां। नतेषां दुर्लभं किंचि
दिह लोके परत्र च। तस्मात्
सर्वे प्रयत्नेन सर्वकामसमृ
द्धये। मालामेतां प्रशस्तीयासा
ख्यमोक्षप्रदायिनी॥ इति

संचिन्त्याकृष्यमानञ्च श्रीमन्ना
दादितीरथे। आकृष्य प्रेरयन्
एकैका भ्रामयेद्वैष्णवै: सह॥
तथा च भविष्योत्तरे तत्रैव।
दृश्यमाने भागवते गीतवादि
त्रनिस्वनै:। भ्रामयेत्त स्यंदनेवि
ष्णो: पुरमध्ये समंतत:। किं
च। प्रबोधवासरे प्राप्ते कार्ति
के पाण्डुनंदन। देवालयेषु
सर्वेषु पुरमध्ये समंतत:॥
भ्रामयेत्तथ्यानिर्घोषे रथस्थं ध
रणीधरं। किंच। रथागमे मु
कुंदस्य पुरशोभां तु कारयेत्।
सर्वतो रमणीयं तु पताकैरुप
शोभितं। तोरणै: वेदिभिर्मुक्ते
रंभास्तंभैश्च शोभितं। स्थाने
स्थाने महीपाल कर्तव्यं पुण्य
संयुतं॥ विचित्ररथशोभाच
कर्तव्या भाविते नैरिति।
रथेन गच्छन् भगवाननुगम्यो
ऽखिलै जनै:॥ स्वस्वगेहाग
तपश्चाद्ध्या:स्यथा दोषो मह
द्भवेत्॥ अथ रथानुगमन
नित्यता। तत्रैव। रथेन महता
गच्छेत् पार्श्वत: पृष्ठतोऽग्रत:।
विष्णुनैव समा: सर्वे भवंतिस्म
ष्पादय:॥ रथस्थं येन गच्छेति
भ्रममाने जनार्दने। विप्राश्च
यनसंपन्ना भवंति श्वपचाधमा:
किंच। येषां गृहागतो याति
रथस्थो मधुसूदन:। पूजा तै
ष्णै: प्रकर्तव्या वित्तशाठ्यविव
र्जितै:। अनर्चितो यदा याति
गृहाग्रस्य महीधर:। पितरस्त
स्य विमुखा वर्षाणां दशपंच
च। य: पुन: कुरुते पूजां गृहा
याते तु माधवे। वसते श्वेतद्वी
पे तु यावदिन्द्राश्चतुर्दश। अन्य
त्र नानुव्रजति यो मोहाद्रथजं तं
जगदीश्वरं। ज्ञानाग्निदग्धक
र्म्मापि स भवेद्ब्रह्मराक्षस:। इ
ति। अथ स्वमंदिरे नीत्वा एवं
वन्मूजयेत्प्रभुं। रात्रौ जागरणं
कुर्याद्विधिवद्वैष्णवै: समं॥
अथ प्रबोधनीजागरणमहा
त्म्यं। स्कांदे तत्रैव। एवं जन्म
सहस्रेषु पापं यत् समुपार्जि
तं जागरेण प्रबोधन्यां दहते
तूलराशिवत्। कृत्वापि पा
तकं घोरं ब्रह्महत्यादिकं नर:
कृत्वा जागरणं विष्णो र्धूत
पापो भवेन्नृते॥ कर्मणा मन
सा वाचा पापं यत्समुपार्जि
तं। क्षालयेत्तस्य गोविन्द: प्र

बोधन्यांतु जागरे उद्यापनं यत्
फलं विप्रे स्नानमेधादिभिर्मखैः
प्राप्यते तत् सुखेनैव प्रबोधन्यां
तु जागरे । आसमुद्रसवनीर्थां
ति दत्वा गां कांचनीं महीं ।
न तत् फलमवाप्नोति यत्
कृत्वा जागरं हरेः ॥ चंद्रसू
र्योपरागे तु यत्फलं परिकी
र्त्तितं । तत्सहस्रगुणं पुण्य
प्रबोधन्यांतु जागरे । स्नानंदा
नं तपो होमः स्वाध्यायश्चार्च्च
नं हरेः । तत् सर्वं कोटिगु
णितं प्रबोधन्यांतु जागरे ॥
समतीतं भविष्यं च वर्त्तमानं
कुलायुतं । विष्णुलोकं नयत्या
शु जागरेण प्रबोधनी । चलंवि
पितरो हृष्टा विष्णुलोकमलं
कृताः । विमुक्ता नारकैर्दुःखैः
कर्त्तुः कुलप्रजागरं । आद्याः
पक्षे तु ये जाता मातृतः पितृ
तस्तथा । तारयेन्नात्र संदेहः
प्रबोधन्यां तु जागरे । किंच ।
फलं नानाविधैर्द्रव्यैः प्रबोध
न्यां तु जागरे । शंखे तोयं समा
दाय अर्घ्यं दद्याज्जनार्द्दने ।
यत् फलं सर्वदानेषु सर्वती
र्थेषु यत् फलं । तत् सर्वं को
टिगुणितं दत्वार्घ्यं बोधवासरे ।
पाद्मे च तत्रैव । अन्यत्रापि वि
याविष्टो जागरे स्यात् प्रबोध
नी । किं पुनर्मथुरायां स्यात
तो वै जन्मसद्मनि । एकैव
कादशी कृष्ण जन्मगेहे कृता
नेव । ततोऽधिकं न कर्त्तव्यं लो
के किंचन विद्यते । रात्रौ जाग
रणं तत्र प्रीत्या कुर्वन्ति ये नराः
संसारे मोहस्वप्नेऽपि सदा जा
ग्रति जाग्रति । किंच । तत्रैव
श्रीराधिकोपाख्याने । प्र
बोधनीजागरपुण्यवैभवात्
प्रसन्न ईशो विधिवाक्यसत्यकृ
त् चकार रासोत्सवमेनं सह
वृंदावने स्वामि रपीह राधया
सान्तस्यनानाद्भुतगोपरूपिणा
कृष्णेन जन्मान्तरवांछितेन ।
तथा महाप्रेमजलाकुलेन्द्रिया
निन्ये ऽन्यलोकं कथयाकृतार्थ
तां । तस्मात् प्रबोधनीकृत्वा
रात्रौ कृत्वा च जागरं । सुप्तो
त्थितं हरिं दृष्ट्वा कामैः संसा
रजा द्विजाः । मथुरायान्तु किं
वाच्यं जागरे हरिसन्निधौ । का
र्त्तिके बोधनीं प्राप्य ततः श्रेयः
परं न हि ॥ मथुरायां

प्रबोधन्यां कृतजागरणस्य हि
तरणार्द्धदानतो वैशेषः । मोचय
द्ब्रह्मराक्षसं । जागरस्य च मा
हात्म्यं गीतवादित्रनर्त्तने । ह
रेः प्रीतिकरं रात्रौ वर्त्तमेनैव
प्रकाशते । यस्तु गायति कृष्णा
ग्रे कौमुदीं द्वादशीं तथा । स
र्वलोकान् परित्यज्य विष्णु
लोकं स गच्छति । अतएवो
क्तं तत्रैव । राज्यमन्यत्र संत्य
ज्य स्फीतं निहतकण्टकं । का
र्त्तिके मथुरायां वै कौमुद्यां जा
गरं चरेत् ॥ अथ पारणादि
नकृत्यं । प्रातर्नित्यक्रियां कृ
त्वा शक्त्या संभोज्य भूसुरा
न् । शक्त्या कृतव्रताच्छेदं स
दद्याद्दक्षिणादिकं ॥ दाने य
थाव्रतं तेभ्यो दत्वा पारणमा
चरेत् । प्रवर्त्तयेच्च संत्यक्तं चा
तुर्मास्यव्रतेषु मत् ॥ तथा च
भविष्योत्तरे तत्रैव । प्रभाते वि
मले स्नात्वा भोजयेदन्नविस्त
रैः । घृतक्षीरदधि तौद्रकासा
रगुड़मोदकैः । अर्घ्यैश्चंदने
र्धूपैः पुष्पैर्गन्धैर्द्विजोत्तमान् ।
आचांतेभ्यस्ततो दद्यात्पक्वं य
त्किंचिदेव हि ॥ स्ववाचास्तु
मनोभीष्टं पत्रपुष्पफलादि
कं ॥ चतुरो वार्षिकान्मासा
न् नियमो यस्य यत्कृतम् ॥
कथयित्वा द्विजेभ्यस्तद्दद्याद्भ
क्त्या सदक्षिणं ॥ एवमेव
पाद्मे । तत्रैव किंचाधिकं ।
चातुर्मास्यव्रते विप्राः पश्चा
दछिद्रवाचनमिति ॥
इति श्रीहरिभक्तिविलासे १६
विलासः ॥

प्रलेहः पुं व्यंजनविशेषः ।
दम्योष्ठु कोरमा इत्यादिपा
रस्यभाषा ॥ इति पाकराजे
श्वरः ॥

प्रशस्यः त्रि प्रशंसनीयः ॥
प्रशंसे शान्तधातोः कर्मणि
क्यप् प्रत्ययेन निष्पन्नः ॥

प्रस म य उ, प्रसवे । ततो ।
रेफयुक्ताद्यः । स प्रसयति ।
य प्रस्ता । उ, प्रसते कीर्त्तिं वि
द्या । प्रसते विस्तारयति वेत्य
र्थः । इति दुर्गादासः ॥

प्रसज्यप्रतिषेधः पुं निषेध वि
शेषः । तल्लक्षणं यथा । अप्रा
धान्यं विधेर्यत्र प्रतिषेधे प्रधान
ता । प्रसज्यप्रतिषेधोऽसौ क्रि
यया सह यत्र नञ् ॥

अस्यादाहरणं । भोजराजः ।
पौषे चैत्रे कृष्णपक्षे नवान्ने ना
चरेद्बुधः । भवेज्जन्मान्तरे रोगी
पितॄणां नोपतिष्ठते ॥ अत्र
रोगीति निन्दाश्रवणात् प्र
सज्यता । नोपतिष्ठते इति श्र
वणात् पर्य्युदासता । इति
मलमासतत्त्वं ॥
प्रसाधनी स्त्री कंकतिका । त
द्युक्ति यथा । प्रसाधनी दिङ्
नव नाग सप्त संख्याभिरङ्गु
लिभिः क्रमेण । चक्रवर्त्तिनां
पृथिवीपतीनां संपत्ति सौभा
ग्ययशः समृद्धिदा । काष्ठजा
धातुजा चैव शृंगजा च यथा
क्रमं । जांगलानूपसामान्यदेश
जानां महीभुजां । छत्रदण्डव
दुन्नेयः काष्ठजाया विनिश्चयः
कनकं रजतं ताम्रं पित्तलं सी
सकं तथा । लौहं सर्व्वं च सर्व्वा
र्द्धं मादित्यादिद्गुणाभुवो । राज्ञा
मेवोपयुज्येत कालकीर्त्तिप्र
साधनी । स्वराणां महिषा
णाञ्च सिंहजाता प्रसाधनी ।
गजदन्तसमुद्भूता राज्ञा सेवो
पयुज्यते । अत्रापि रत्नविन्या
सो ज्ञेय श्चामरदण्डवत् । इति
युक्तिकल्पतरुः ॥
प्रा ल पूर्त्तौ । ल प्राति ।
चुटं जलेन लोकः । इति
दुर्गादासः ॥
प्राड्विवाकः पुं अक्षदर्शकः ।
तत्पर्य्यायः । व्यवहारदर्शी २
इति शब्दरत्नावली ॥
प्री ञ तर्पणे । ञ प्रयति
प्रयते । इति दुर्गादासः ॥
प्री क तर्पणे । क ये प्राय
यन्ति कविसूक्तिरसायनानि
इति हलायुधः । प्रीणयन्ति
पीतिकेचित् । इति दुर्गादासः
प्री श ग का कै । तर्पणे ।
तर्पण मिह प्रीतिभावः प्रीति
करणञ्च । श ग प्रभुः प्रीणाति
विश्वभुक् । प्रीणाति तोयवज
नानिति हलायुधः । प्रीणीते
इति दुर्गादासः ॥
प्री ङ य प्रीतौ ॥ कान्तौ ।
प्रीति रिह प्रीतिभावः । ङ य
यः प्रीयते प्रणयिषु । इति
हलायुधः । इति दुर्गादासः ॥
प्रीः स्त्री प्रीतिः । इति कलापटी
दीकायां दुर्गादासः । प्रथमावि
भक्तिः । यथा । त्रिधाः प्री ह्री
श्री ची पी यी सुः । स्वादी

नि त्रीणि त्रीणि क्रमात् प्रीर्ह्री
श्री ची पी धी स्त्री संज्ञानि स्युः
इति मुग्धबोधव्याकरणं ॥
प्रु ङ सर्पणे । रेफयुक्तः ॥
ङ प्रवते । इति दुर्गादासः ॥
प्रुष उ दाहे । उ प्रोषित्वा प्रु
ष्ट्वा । दाहे भस्मीकरणे । इति
दुर्गादासः ॥
प्रुष श सेके । पूर्त्तौ । स्नेहे ।
श प्रुष्णाति पुष्णेयं । सेकस्था
ने मोचन मिति धातुप्रदीप
भट्टमल्लौ । इति दुर्गादासः ॥
प्रेङ्खोल त् क चापले । अ
स्यस्वरेतीयोपधः । अपिप्रे
ङ्खोलत् । चापलं चञ्चलीभावः
इति दुर्गादासः ॥
प्रेतदेहः पुं क्लीं प्रेतशरीरं ॥
यथा । कृते सपिण्डीकरणे
नरः संवत्सरात् परं । प्रेतदेहं प
रित्यज्य भोगदेहं प्रपद्यते ॥
इति तिथ्यादितत्त्वधृतविष्णुध
र्म्मोत्तरीयवचनं ॥
एवं दशपिण्डदानेन तत्तत्पत्ति
र्यथा । शिर स्त्वाद्येन पिण्डे
न प्रेतस्य क्रियते सदा । द्विती
येन तु कर्णाक्षि नासिकान्तु स
मासतः ॥ गलांस भुजवक्षा
सि तृतीयेन यथा क्रमात् ।
चतुर्थेन तु पिण्डेन नाभि लिं
गगुदानि च । जानु जंघे तथा
पादौ पंचमेन तु सर्व्वदा । स
र्व्वमर्म्माणि षष्ठेन सप्तमेन तु
नाडयः ॥ दन्तलोमाद्यष्टमेन
वीर्य्यञ्च नवमेन तु । दशमे
न च पूर्णत्वं तृप्तता क्षुद्विपर्य्य
यः । इति शुद्धितत्त्वधृतकूर्म्म
पुराणवचनं ॥
प्रेतपक्षः पुं भाद्राश्विन
कृष्णपक्षः । तत्र मृतस्य पार्व्व
णविधिना सांवत्सरिके श्राद्धं
कर्त्तव्यं । यथा । आषाढ्याः पंच
मेपक्षे कन्यासंस्थे दिवाकरे ।
यो वै श्राद्धं नरः कुर्य्यादेक
स्मिन्नपि वासरे । तस्य संव
त्सरं यावत्तृप्ताः स्युः पितरो ध्रु
वं । नभो वाथ नभस्यो वा म
लमासो यदा भवेत् ॥
सप्तमः पितृपक्षः स्यादन्यत्रैव
तु पंचमः । इति । तत्र मृतस्य
सपिण्डीकरणादूर्द्ध्वं यत्र यत्र
प्रदीयते । तत्र तत्र त्रयं कुर्य्या
द्वर्ज्जयित्वा मृताहनि । अमा
वास्यां तयो यस्य प्रेतपक्षे
घवा पुनः । सपिण्डीकरणाद

द्दं तस्योक्तः पार्व्वणो विधिः। इति शौचाङ्केन प्रत्याब्दिकं पार्व्वणविधिना कर्त्तव्यं। इति मलमासतत्त्वं ॥ तत्र निषिद्धदिनेपि तिलतर्पणं कर्त्तव्यं। यथा स्मृतिः। तीर्थे तिथिविशेषेच गंगायां प्रेतपक्षके। निषिद्धेऽपि दिने कुर्य्यात् तर्पणं तिलमिश्रितं ॥ इति च मलमासतत्त्वं ॥

प्रेतश्राद्धं क्ली प्रेतोद्देशकश्राद्धं तदनुष्ठानं यथा ॥ तत्र गोभिलः। अथैकोद्दिष्टमेकं पवित्रमेकोऽर्घ्य एकः पिण्डो नावाहनं नाग्नौकरणं नात्र विश्वेदेवाः स्वदितमिति तृप्तिप्रश्नः। उपतिष्ठतामित्यक्षय्यस्थाने अभिरम्यतामिति विसर्गोऽभिरताः स्मीति प्रतिवचनमेतत् प्रेतश्राद्धमिति। इति श्राद्धतत्त्वं तच्च नवश्राद्धं तन्मासिकं कर्त्तव्यं चतुर्थपंचमनवमैकादशाहेषु प्रेतश्राद्धं। यथा यमः। चतुर्थे पंचमे चैव नवमैकादशे तथा। यदत्र दीयते जंतोस्तन्नवश्राद्धमुच्यते इति श्राद्धविवेकः ॥ साग्निनिरग्न्युभयकर्त्तव्यं श्राद्धमाद्यश्राद्धादिसपिण्डीकरणान्तं श्राद्धं यथा। द्वादश प्रतिमास्यानि आद्यं षाण्मासिके तथा। सपिण्डीकरणं चैव इत्येतत् श्राद्धषोडशं इति श्राद्धतत्त्वं ॥

अनुचरश्राद्धं। तत्र संवत्सरं यावत् प्रत्यहं प्रेतोद्देशकान्नजलदानरूपं। यथा। पारस्करः। अहरहरन्नमस्मै ब्राह्मणायोदकुंभंच दद्यात् पिण्डमप्येके निपृणंति। इदं तीर्थः। इति श्राद्धविवेकः ॥ तथादित्यपुराणादिष्वाप्तिनिमित्तमेकोद्दिष्टश्राद्धं। यथा। पितृयज्ञं निर्वर्त्य मासिके श्राद्धपर्व्वणि श्राद्धं प्रतिकृतौ चैव मातापित्रोर्मृतेऽहनि। असपिंडीकृते प्रेत मेकोद्दिष्टेन तर्पयेत्। तेनानुचरश्राद्धे मृताहविहितमासिके तथा विशिष्टतीर्थे इत्यादिनामी प्रेतश्राद्धकरणेच्छायां मातापित्रोर्मृताहनि च असपिण्डीकृते प्रेतमेकोद्दिष्टेन तर्पयेत्। इति श्राद्धतत्त्वं ॥

प्रेमभक्तिः स्त्री स्नेहयुक्तश्रीकृष्णसेवा। विष्णुकांतिकममता। तल्लक्षणं। यथा। नारदपंचरात्रे। अनन्यममता विष्णौ ममता प्रेमसंयुता भक्तिरित्युच्यते भीष्म प्रह्लादोद्धव नारदैः इति प्रेमभक्तेस्तु माहात्म्यं भक्तेर्माहात्म्यतः परं। सिद्धमेव यतो भक्तेः फलं प्रेमैव निश्चितं ॥ अथ प्रेमसम्पत्तिचिह्नानि ॥ सप्तमस्कंधे श्रीप्रह्लादस्य बालानुशासने ॥ निशम्य कर्माणि गुणानतुल्यान् वीर्य्याणि लीलातनुभिः कृतानि ॥ यदातिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कण्ठ उद्गायति रौति नृत्यते च ॥ यदाग्रहग्रस्त इव क्वचिद्धसत्याक्रन्दते ध्यायति वन्दते जनं। मुहुः श्वसन् वक्ति हरे जगत्पते नारायणेत्यात्ममतिर्गतत्रपः। तदा पुमान् मुक्तसमस्तबन्धन स्तद्भावभावानुकृताशयाकृतिः। निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजं ॥ इति श्रीहरिभक्तिविलासे ११ विलासः ॥

प्रोष स्र ज पर्य्यापणे। रेफयुक्तः। स्र अप्रोषयत्। स प्रोषति प्रोष्यते ॥ पर्य्यापणं सामर्थ्यं। अप्रोषी दिसेन कश्चन। पर्य्यापणं परिसमाप्तिः। इति गोविन्दभट्टः इति दुर्गादासः ॥

प्रोष्ठी स्त्री मत्स्यभेदः। पुंटी इति भाषा। तत्पर्य्यायः। श्वेतकोलः ४ इति पाकराजावली ॥

प्लव ङ गतौ। अन्तस्थान्ततीययुक्तः। ङ प्लवते। प्लु ङ इत्यनेनैव सिद्धे अस्य पाठः प्लविष्यते प्लव्यते इत्यादिसिद्ध्यर्थः। इति दुर्गादासः ॥

प्लक्ष भक्षणे। अन्तस्थतृतीययुक्तः। स प्लक्षति प्लक्षते। इति दुर्गादासः ॥

प्लिह ङ गतौ। अन्तस्थतृतीययुक्तः। ङ प्लेहते। इति दुर्गादासः ॥

प्लु ङ सर्पणे। अन्तस्थान्ततीययुक्तः। ङ प्लवते। इति दुर्गादासः ॥

प्लुष ग सेके। पूर्त्तौ ॥ स्नेहे ग प्लुष्णाति। इति दुर्गादासः ॥

प्लुष उ दाहे । उ प्लोषित्वा प्लुष्ट्वा । इति दुर्गादासः ।

प्लुष य लृ दाहे । अयमस्य तृतीययुक्तः । य प्लुष्यति । लृ अप्लुषत् । अप्लोष । इति दुर्गादासः ॥

प्लुस इर य दाहे । विभागे । अयंस्यात्तृतीययुक्तः । इर अप्लुसत् अप्लोसीत् । य प्लुस्यति । इति दुर्गादासः ॥

प्लेव ञ ङ सेवने । अयंस्यात्तृतीययुक्तः । ञ अपि प्लेवत् । ङ प्लेवते । इति दुर्गादासः ॥

प्सा ल भक्षणे । ल प्साति इति दुर्गादासः ॥

फ

फ फकारः । अस्य ध्यानं यथा । मलयोद्भववर्णाभं ललजिह्वं चतुर्भुजं । भक्ताभयप्रदं नित्यं नानालंकारभूषितं । एवं ध्यात्वा फकारन्तु तन्मन्त्रं दशधा जपेत् ॥ इति वर्णोद्धारतन्त्रं ॥ अस्य नामानि यथा । फः सखी दुर्मुखी एका वामपार्श्वो जनार्दनः । जया पादः शिखा रौद्री फेत्कारः शाखिनीप्रियः । उमा विहंगमः कालः कुब्जिनी प्रियपावकौ ॥ प्रलयाग्निर्नीलपादोऽक्षरः पशुपतिः शशी ॥ फत्कारो यामिनी व्यक्तापावनो मारुतर्द्दनः । निष्फला वागहंकारः प्रयागो ग्रामणीः फलं । इति नानातन्त्रशास्त्रं ॥

फक्क असद्व्यवहारे । शनैर्गतौ । कोपधः । फक्कति खलः कुत्सिते व्यवहरतीत्यर्थः फक्कति हंसो मन्दं गच्छतीत्यर्थः । इति दुर्गादासः ॥

फण ण निस्नेहे । ण फेणतुः पफणतुः निस्नेहो अनायासेनोत्पत्तिः । फणति वाञ्छितं श्रीमतो अनायासेन जातं । अस्यैव ण्यन्तस्य निष्पादने अनायासकृते फाण्टं इत्यमरः । अत एव इमानाद्योऽपि चरादौ फण गतौ इत्यत्र गतेरन्यत्र । फाणयति जनो अनायासेन जनयतीत्यर्थः इत्याह । इति ॥

दुर्गादासः ॥

फण मि ण गतौ मि फणयति फाणयति । ण फेणतुः पफणतुः । इति दुर्गादासः ॥

फणितः त्रि गतः । निःस्नेहितः । फणधातोः क्तप्रत्ययेन निष्पन्नः ॥

फणितल्पगः पुं विष्णुः । सर्पशय्यायां गच्छतीति यः । इति व्युत्पत्तिः ॥

फल ञि श्रा भिदि । ञि फलोऽस्ति । श्रा फलितं फुल्लं तेन । फलति काष्ठं कुठारः । इति दुर्गादासः ॥

फल निष्पत्तौ । इह नवपुष्पकोमला मणीनां रविकरसम्वलिताः फलन्ति भासः । इति भारविः । निष्पादनेऽपि वाल्मीकिः । फलन्ति स्म यस्य चरितस्तोत्राय दिव्या गिरः इति दुर्गादासः ॥

फल जगतौ । ज फालः फेलुः । इति दुर्गादासः ॥

फलं क्ली कर्मजन्यशुभादृष्टदुरदृष्टस्वर्गनरकादि । तत्त्रिविधं यथा । अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्मणः फलं भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् । इति श्रीभगवद्गीतायां १८ अध्यायः ॥ अनिष्टं नारकित्वं । इष्टं देवत्वं मिश्रं मनुष्यत्वं । एवं त्रिविधं पापस्य पुण्यस्य उभयमिश्रस्य च कर्मणो यत् फलं प्रसिद्धं तत्सर्वं मत्यागिनामेव प्रेत्य परत्र भवति तेषां त्रिविधकर्मसम्भवात् न तु संन्यासिनां क्वचिदपि भवति । इति तट्टीकायां श्रीधरस्वामी । वेदादीनां फलं । यथा । वह्निं प्रति मरीचिवाक्यं । स तं प्राह फलं ब्रूहि वेदस्य च धनस्य च । दारश्रुतस्य विप्रादेः स्वर्गापवर्गहेतवे वह्निरुवाच । अग्निहोत्रफला वेदा दत्तभुक्तफलं धनं । रतिपुत्रफला दाराः शीलवृत्तफलं श्रुतं । इति वह्निपुराणे नित्याह्निकस्नानविधिनामाध्यायः ॥ लवणादिसंयोगे फलस्यान्नत्वे यथा । ताम्बूलेऽग्निसंयोगाल्लवणयोगेनापि एकं । फलं चित्रयसंयोगात्तदन्नं भवति तत्क्षणात् । इति शास्त्रे नैवेद्यकाष्टवचनमिति केचित्

फलकामः त्रि कर्मफलकामी। यथा। धर्मवाणिज्जिकास्तृष्णाः फलकामा नराधमाः। अर्चयन्ति जगन्नाथं नेकामानाश्रुवंस्मत। इति मलमासतत्त्वधृत विष्णुधर्मोत्तरीय स्तीयकाण्डीयवचनं॥

फलदः त्रि फलदाता। यथा विशिष्टफलदा कन्या निष्कामानां विमुक्तिदा। इति मलमासतत्त्वधृत विष्णुपुराणवचने॥

फलप्रदः त्रि फलदाता। यथा। क्रीणीहि भो फलानीति श्रुत्वा सत्वरमच्युतः। फलार्थी धान्यमादाय ययौ सर्वफलप्रदः। इति श्रीभागवते १० स्कंधे ११ अध्यायः॥

फलभाक्[२] त्रि फलभागी। यथा। मासपक्षतिथीनांच निमित्तानांच सर्वशः। उल्लेखनमकुर्वाणो न तस्य फलभाग्भवेत्। इति तिथ्यादितत्त्वधृतमत्स्यतत्त्व धृतभविष्यपुराणवचने॥

फलविक्रयिणी त्रि फलविक्रेत्री कुंजड़ाइनी इति हिंदीभाषा। यथा। फलविक्रयिणी तस्य च्युतधान्यकरद्वयं। फलैरपूरयद्रत्नैः फलभाण्डमपूरि च। इति श्रीभागवते १० स्कंधे ११ अध्यायः॥

फलार्थी[२] त्रि फलकामी। यथा। सर्वस्त्रैकश्रुतकर्तव्या प्रतिष्ठा विधिना बुधैः। फलार्थिभिस्तु प्रतिष्ठं यस्मान्निष्फलमुच्यते। इति मठप्रतिष्ठातत्त्वधृत हयशीर्षपंचरात्रीय संकर्षणकाण्डीयवचने॥

फलशाली[२] त्रि फलाश्रयः। यथा। परसमवेत यात्तत्त्वेजन्य फलशालित्वं कर्मत्वं। इति कर्मलक्षणे सारमंजरी।

फलासंगः स्त्री फलासक्तिः। यथा। त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः। कर्मण्यभिप्रवृत्तोपि नैव किंचित् करोति सः। इति श्रीभगवद्गीतायां ४ अध्यायः॥

फलेसक्तः त्रि फलासक्तः फलकामी। यथा। भगवद्गीता। युक्तः कर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठिकीं। अयुक्तः कामकारेण फले सक्तो निबध्यते। फलेसक्तः ममफलायेदं कर्म करोमीत्येवं फले

सक्तो नितरां बंधं प्राप्नोति। इति मलमासतत्त्वे॥

फालकृष्टः त्रि फालेन कर्षितभूम्यादिः। यथा। नमस्तु पथि कुर्वीत नभस्मनि न गोव्रजे। न फालकृष्टे न जले न चित्यां न च पर्वते। इति मानवे ४ अध्यायः॥

फिरंगः पुं स्वनामख्यातम्लेच्छदेशः। यथा। सर्वाम्नाये नव प्रोक्ते षडशीतिः प्रकीर्तिताः। फिरंगभाषया मंत्रा स्तेषां संसाधनात्कलौ। अधिपा मण्डलानांच संग्रामेष्वपराजिताः॥
5 इंरेजा नव षट् पंच लंडुजाश्चापि भाविनः। इति मेरुतंत्रे २३ प्रकाशः॥ रोगविशेषः॥ अथ फिरंगस्य निरुक्तिमाह। फिरंगसंज्ञके देशे बाहुल्येनैव यद्भवेत्। तस्मात् फिरंग इत्युक्तो व्याधिर्व्याधिविशारदैः॥ तस्य विप्रकृष्टं निदानमाह। गंधरोगः फिरंगोऽयं जायते देहिनां ध्रुवं। फिरंगिणोऽति संसर्गात् फिरंगिण्याः प्रसंगतः॥ व्याधिरागंतुजो ह्येष दोषाणामत्र संक्रमः। भवेत्तल्लक्षयेत्तेषां लक्षणैर्भिषजांवरः। फिरंगिण्याः प्रसंगात इति विशेषार्थं। रूपमाह। फिरंग स्त्रिविधो ज्ञेयो बाह्याभ्यंतरतस्तथा। बहिरंतर्भवश्चापि तेषां लिंगानि च ब्रुवे॥ तत्र बाह्यः फिरंगः स्याद्विस्फोटसदृशोऽल्परुक्। स्फुटितो व्रणवद्वेद्यः सुखसाध्योपि स स्मृतः। संध्यस्वाभ्यंतरः स स्यादुभयो लक्षणैर्युतः। कष्टदोतिचिरस्थायी कष्टसाध्यतमस्तु सः॥

उपद्रवानाह। कार्श्यं बलक्षयो नासाभंगो वह्नेश्च मंदता। अस्थिशोषोऽस्थिवक्रत्वं फिरंगोपद्रवा अमी॥ साध्यत्वादिकमाह। बहिर्भवो भवेत् साध्यो नूतनो निरुपद्रवः। आभ्यंतरस्तु कष्टेन साध्यः स्यादयं मामयः॥ बहिरंतर्भवो जीर्णः क्षीणस्योपद्रवैर्युतः। व्याप्तो व्याधिरसाध्योयमित्यूचुर्मुनयः परा॥ अथ फिरंगस्य चिकित्सा। फिरंगसंज्ञके रोगे रसः कर्पूरसंज्ञकः। अवश्यं नाशयेदेतदूचुः पूर्वे चि-

कित्सकाः । लिम्पेत्तेरसकर्प-
रपाशने विधिरुत्तमः । अनेन
विधिना स्यादन्तु वै प्रोथनवि-
न्दति गोधूमचूर्णं संनीय वि-
दध्यात् सूक्ष्मकूपिकां । तन्मध्ये
निःक्षिपेत् सूतं चतुर्गुञ्जामितं
भिषक् । ततस्तु गुटिकां कुर्य्या-
द्यथा न स्याद्बहिर्बहिः । सूक्ष्म-
चूर्णं लवङ्गस्य तोवटी भवन्-
लयेत् । दन्तस्पर्शो यथा न स्या-
त्तथा तां मधुना गिलेत् । तां-
बूलं भक्षयेत् पश्चाच्छाकाम्ल-
लवणं त्यजेत् । अस्य सात्म्य-
मन्नानं विशेषात् स्त्रीनिषेवणं ।
कर्पूररसः १ पारद टङ्कमानः
स्यात् खदिर टङ्कसम्मितः ।
आकारकरभ आपि ग्राह्य टं-
कद्वयान्वितः । टङ्कत्रयमितं क्षौ-
द्रं खल्वे सर्वं विनिःक्षिपेत् ।
संमर्द्य तस्य सर्वस्य कुर्य्यात्स-
प्तवटी भिषक् । स रोगी भक्ष-
येत् प्रातः रेकैका सेवना वटी
वर्जयेदम्ललवणं फिरङ्गस्तस्य
नश्यति । सप्तशालिका वटी २
पारदः कर्षमात्रः स्यात्तावदेव
हि गन्धकः । तण्डुलाः अस्य मा-
त्राः स्युस्तेषां कुर्य्याच्च कज्जली ॥

तस्याः सप्तवटीः कुर्य्यान्नासिकायां
मं प्रयोजयेत् । दिनानि सप्त
तेन स्यात् फिरङ्गोऽतो न संश-
यः । सप्तप्रयोगाः ३ । पीतप-
ञ्चवल्लीपत्ररसैः टङ्कमितैर-
सं । हस्ताभ्यां दर्शयेन्नावत्ताव-
वतस्तेनान्तं दृश्यते । ततः सेव-
दयेद्धस्तादेवं वासरसप्तकं ।
त्यजेल्लवणमम्लञ्च फिरङ्ग-
स्तेन नश्यति ४ । चूर्णयेत्त्रि-
वपत्राणि पथ्यानिम्बाष्टमाषि-
कां । यावत्येव तावती राविं नि-
बषोडशभागिकां । प्रमाणमा-
नमिदं चूर्णं मध्नीयाद्भस्मासु-
ह १ फिरङ्गं नाशयत्येव वाह्य-
साभ्यन्तरं तथा ५ ॥ चोपचीनी-
भवं चूर्णं प्रमाणमानं समाति-
कं । फिरङ्गव्याधिनाशाय भक्षये-
ल्लवणं त्यजेत् ॥ लवणं यदि वा
त्यक्तुं न शक्नोति तदा जनः । सै-
न्धवं सहितं भुञ्जीत मधुरापर-
संहितं ६ । अर्द्धकर्षमितं सू-
तं कुर्वटकरसैः सह । खल्वे वि-
मर्द्दयेत्तत्र पलार्द्धं गुग्गुलं क्षि-
पेत् । तथार्ककरभे कुष्ठं त्रि-
फला च पृथक् पृथक् । अर्द्धक-
र्षमितं सर्वं चूर्णयित्वा ततः

क्षिपेत् ॥ तत्सर्वं मधुसर्पिर्भ्यां
द्विपलाभ्यां पृथक् पृथक् ।
मर्द्दयेदथ तत् खादेद्द्विकर्षमि-
तं रसं ॥ द्वाणः फिरङ्गरोगस्य सु-
स्थावस्थं विनश्यति । अल्या-
पि चिरजातोऽपि प्रशाम्यति म-
हाव्रणः । एतद्भक्षयतः प्रोथो
मुखस्य च न जायते । वर्जये-
दम्ललवणमेकविंशतिवास-
रान् ७ । इति फिरङ्गाधिका-
रः । इति भावप्रकाशः ॥

फिरङ्गरोटी स्त्री रोटिकावि-
शेषः । पाउरोटी इति पाउरु-
टि इति च भाषा । सा क्षेत-
लस्याथवा खर्ज्जूरस्य रसेनम-
धुरिकाजलेन वा मिश्रितो
गोधूमकणिका मधिककाल-
मुत्तम संमर्द्य गोलाकारं स्थले
स्थूले निर्म्माय तन्दूरपाकेन नि-
ष्पादिता भवति । इति पाकरा-
जेश्वरः ॥

फिरङ्गिणी स्त्री फिरङ्गदेशो-
द्भवनारी । यथा । गन्धरोगः
फिरङ्गोऽयं जायते देहिनां भु-
वि । फिरङ्गिणीऽति संसर्गात्
फिरङ्गिण्याः प्रसङ्गतः । इति
भावप्रकाशः ॥

फिरङ्गी २ पुं फिरङ्गदेशोद्भवपु-
रुषः । अस्य प्रमाणं पूर्वश-
ब्दे द्रष्टव्यं ॥

फुल्ल विकासे । फल्ली । लवुयो-
तः । विकास इह कसत्रगत्ता-
वितिदंस्यांतस्य च त्रि रूपं । वि-
पूर्वत्वेनार्थान्तरवाचितया वि-
कसनमित्यर्थः । फुल्लति मल्ली
कालिका । इति दुर्गादासः ॥

फेणपः पुं स्वयम्पतितफला-
दिजीविमुनिविशेषः । यथा ।
वैखानसा वालिखिल्यौडुम्बराः
फेणपा वने । न्यासे कुटीचकः
पूर्वं बह्वोदो हंस निष्क्रियौ ।
इति श्रीभागवते ३
स्कन्धे १२ अध्यायः ॥ वनेस्थि-
तास्त्वारः । तत्र वैखानसाः
अकृष्टपच्यवृत्तयः । वालिखि-
ल्याः नवे ऽन्ने लब्धे पूर्वसंचि-
तान्नत्यागिनः । औडुम्बराः प्रा-
तरुत्थाय यां दिशं प्रथमं प-
श्यन्ति तत आहृतैः फला-
दिभिर्जीवन्तः । फेणपाः स्व-
यं पतितैः फलादिभिर्जीवन्तः
कुटीचकः स्वाश्रमधर्म्मप्रधानः
वह्वोदः कर्म्मोपसर्ज्जनी कृत्य
ज्ञानाभ्यासप्रधानः ॥

हंसो ज्ञानाभ्यासनिष्ठः । नि
ष्क्रियः प्राप्ततत्त्वः । एतेच सर्वे
यथोत्तरं श्रेष्ठाः । इति तट्टी
कायां श्रीधरस्वामी ॥
फेणायमानः त्रि उत्थितफे
णदुग्धादिः । फेण इव आचर
तियः इत्यर्थे फेणशब्दात् क्य
प्रत्ययानन्तरं शानप्रत्ययेन
निष्पन्नः ॥
फेल ऋ गतौ । ऋ अपिफे
लत् पिफेलतुः । इति दु
र्गादासः ॥

व

व वकारः । अस्य ध्यानं । यथा
नीलवर्णां त्रिनयनां नीलाम्ब
रधरां परां । नागहारोज्ज्वलां
देवीं द्विभुजां पद्मलोचनां
एवं ध्यात्वा वकारन्तु तन्म
न्त्रं दशधा जपेत् ॥
तत्प्रणाममन्त्रो । यथा । त्रिश
क्तिसहितं वर्णं त्रिविधामृततले
पितं । स्वयं कुण्डलिनीदेवी स
ततं प्रणमाम्यहं ॥ इति व
र्णोद्धारतन्त्रं ॥ अस्य नामा
नि यथा । वो वनी भूधरो
मार्गो चर्च्चरी लोचनप्रियः ।
प्रचेताः कलसः पक्षी सलग
ण्डः कपर्द्दिनी । एहवंशोभ
यामातुः शिथिवाहो युगाभ्यः
सुखविन्दुर्वलीचण्डा योह्वावि
लोचनप्रियः । ह्लादिनी तापि
नी भूमि सुपर्णिन्द्र बलिप्रियः
सुरभिर्म्मुखविस्तुष्ठ संहारोव
सुधाधिपः । षष्ठाभरं चेपटा
चमोदकोगगणप्रति । एवी
बाष्पा मध्यलिङ्गो शनिः कुम्भ
लतीयकौ । इति नानातन्त्रशास्त्र
वंह्वीयान् त्रि अतिशयवकुलः ।
अय मनयो रतिशयेन वकुः
इत्यर्थे वकुशब्दादीयसुप्रत्यये
नानिष्पन्नः ॥
वठ पैन्ये । पैन्य मिहसाम
र्थ्यं । वठति वीरो योद्धुंसम
र्थः स्यादित्यर्थः । इति दुर्गा
दासः ॥
वन शब्दे । वनति । इति दु
र्गादासः ॥
वणिग्भावः पुं वणिजांधर्म्मः ॥
तत्पर्य्यायः । सत्यानृतं ३ वा
णिज्यं ४ वाणिज्या ५ वनिक्पथः

६ इति जटाधरः । वणिज्यं ७
इति शब्दरत्नावली ॥
वद स्थैर्य्ये । वदति पर्वतः ।
अवादीत् अवदीत् । हसादेः
सेम इत्यादिना वा दीर्घः ।
व्रजवदत्यादौ दन्त्यादिवदेरग्र
हणादिति प्राञ्चः । इति दु
र्गादासः ॥
वदरं क्ली शृगालकोलिः । शे
याकुल इति भाषा । तत्पर्य्या
यः । वादरं ९ इति शब्दरत्ना
वली । कोलिमात्रे । तत्प
र्य्यायः । कर्कन्धुः १५ वदरः
१६ कोला १७ कोली १८ कु
वली १९ स्वादुफला २० सुप्र
नखी २१ पिच्छिला २२ कुवलः
२३ इति च शब्दरत्नावली ॥
वध क वन्धे । कवाधयति ।
इति दुर्गादासः ॥
वध ङ निन्दे । वन्धे । ङ वी
भत्सते खलं लोकः । वधते
तत्र स्यादयो न प्रयुज्यन्ते ।
इति रमानाथः । मावधिष्टाज
टायुं मा मितिभट्टिप्रयोगः ।
इति दुर्गादासः ॥
वधकर्म्म क्ली प्राणवियोगफल
क व्यापारः । तद्वैदिकपर्य्यायाः
दभ्नोति १ क्नथयति २ धरति ३
स्वर्वति ४ तृणक्ति ५ तृम्फति ६
कृण्वति ७ कृन्तति ८ श्नथिति ९
नभते १० अर्दयति ११ स्तृणा
ति १२ स्नेहयति १३ यातयति १४
स्फुरति १५ स्फूलति १६ निव
र्यन्तु १७ अवतिरति १८ विया
तः १९ आतिरत् २० तलित् २१
आखण्डलः २२ दुणाति २३ वस्त्रा
ति २४ शृणाति २५ शाम्नाति
२६ त्सरोल्छि २७ ताल्छि २८
नितोशते २९ निवर्हयति ३०
मिनाति ३१ मिनोति ३२ धमति
३३ इति त्रयस्त्रिंशद्वधकर्म्माणः
इति वेदनिघण्टौ २ ॥
अध्यायः ॥
वन द उ ङ याचने । द ङ
वनुते । उ वनित्वा वन्त्वा । इति
दुर्गादासः ॥
वन्ध ऊ ग वन्धे । ऊ अवान
त्सीत् । ग वध्नाति । वध्नान्तेषा
ठमुंच मुंच पापधैः किं पुते
निर्वधसे । इत्यपपाठः । निर्ब
ध्यते इति पाठामिति रमाना
थः । वस्तुतस्तु अस्य गणकृ
तानित्यतया ञे स्वभावे आत्मने
पदे च सिद्धे ॥ इति

दुर्गादासः ॥
वन्ध क वन्धे । क वन्धयति
इति दुर्गादासः ॥
वन्धुदत्तं क्ली पितृमातृभ्यां द
त्तं स्त्रीधनं । यथा । याज्ञव
ल्क्यः । वन्धुदत्तं तथा शुल्कम
न्वाधेयकमेव च । अप्रजायाम
तीतायां वान्धवास्तदवाप्नुयुः ।
वंधुदत्तपदेन कन्यादशायाम्
पितृभ्यां दत्तं तदुच्यते । इति
दायभागः ॥
वंध्याकर्कोटकी स्त्री तिक्तक
र्कोटकी । तत्पर्य्यायगुणाः ।
वंध्याकर्कोटकी देवी कन्यायो
गेश्वरीति च । नागारि र्भस्मद
मनी विषकंटकिनी तथा ॥
वंध्याकर्कोटकी लघ्वी कफास्र
व्रणशोधिनी सर्पदर्पहरी ती
क्ष्णा विसर्पविषहारिणी । इति
भावप्रकाशः ॥
वभ्र गतौ । वकारादिः ।
ओष्ठ्यवर्गचतुर्थोपधः । वभ्रति ।
इति दुर्गादासः ॥
वभ्रुवाहनः पु मणिपूरस्य राज
विशेषः । स च चित्राङ्गदायां
अर्ज्जुनाज्जातः । यथा । करेणु
मत्यां नकुलो निरमित्रं त
थार्ज्जुनः । इरावंतमुलूप्यांवै
सुतायां वभ्रुवाहनं । मणि
पूरपतेः सोऽपि तत्पुत्रः पु
त्रिकासुतः । इति श्रीभागव
ते ९ स्कंधे २२ अध्यायः ॥
अपि च । वैशंपायन उवाच ।
श्रुत्वा तु नृपतिः प्राप्तं पितरं
वभ्रुवाहनः । निर्य्ययौ विनये
नाथ ब्राह्मणार्थपुरःसरः ॥
मणिपूरेश्वरं त्वेवमुपायातं धनं
जयः । नाभ्यनंदत् समेधावी
क्षात्रधर्म्ममनुस्मरन् । इति ।
भर्त्तारं निहतं दृष्ट्वा पुत्रं च प
तितं भुवि । चित्राङ्गदा परि
त्रस्ता प्रविवेश रणाजिरे ॥
इति च महाभारते । आश्वमे
धिके पर्व्वणि ८० अध्यायः ॥
वम् अव्य शिवप्रजांते कपोल
वाद्यविशेषः । तत्तु उकार अ
कार मकारात्मकं शिवप्रण
वस्वरूपं । यथा । डिम् डिम्
डिम् डिम् डिडिम् डिम् डिडि
मरु डमरुं वादयन् सन्ननादं
वम् वम् वम् वम् वम् वम्
भ्रमितदशशिरा लालमानेन
लस्यन् । कर्पूरासितभस्मापरि
तपटुजटालेविरूढाहमाले ।

1181

मायायोगीदशास्योप्यसुरमण
पुरः प्रांगणे प्रादुरासीत् ॥
इति रामलीलामृतकाव्यं ॥
वरुणवीजं । यथा । नासापुटे
धृत्वा वमिति वरुणवीजस्य च
तुष्षष्टिवारजपेन कुंभकं कृत्वा
तस्माल्ललाटस्थचंद्राङ्गलितसु
धया मातृकावर्णात्मिकया
समस्तं देहं विरचय्यलमिति पृ
थ्वीवीजस्य द्वात्रिंशद्वारजपेन दे
हं सुदृढं विचिंत्य दक्षिणेन वायुं
रेचयेत् । इति भूतशुद्धिप्रक
रणे तंत्रसारः ॥
वस्व गत्यां । वस्वति । इति
दुर्गादासः ॥
वर्द्ध गत्यां । वर्द्धति । इति
दुर्गादासः ॥
वर्ह उ. स्तुति हिंसा दान
वाक्ये । वेफोपधः । उ. वर्हते
इति दुर्गादासः ॥
वल क म जीवने । क म
वलयति । इति दुर्गादासः ।
वल ञ धान्यावरोधे । जी
वने । ज वालः वलः । धनस्य
भावो धान्यं समृद्धि स्तस्य अ
वरोधः प्रतिबंधः धान्यावरो
धः । वलति ऋणहीनं विधिः
ऋणहीनस्य समृद्धिं प्रतिवघ्ना
ति इत्यर्थः । अयं सर्व्वो अन्येन्ने
मन्यते । वलत्यनेन लोकः ।
इति दुर्गादासः ॥
वल उ. दाने । वधे ॥
निरूपेण । उ. वलते । इति
दुर्गादासः ॥
वल क उ. निरूपे । क उ. वाल
यते धर्म्मं धीरः । अयं केश्चि
न्न मन्यते । इति दुर्गादासः ।
वलं क्ली सामर्थ्यं ॥
तत्पर्य्यायः ।
महः ११ स्थाम १२ । इति श
ब्दरत्नावली ॥ ऊर्ज्जः १३ । इति
जटाधरः ॥ तद्वैदिकपर्य्यायाः
ओजः १ पाजः २ शवः ३ तवः
४ तरः ५ त्वक्षः ६ शर्द्धः ७
वाधः ८ नृम्णं ९ तविषी १०
शुष्मं ११ शुष्णं १२ शूषं १३
दक्षः १४ वीलुः १५ च्यौत्नं १६
ऋषसहः १७ यहः १८ वधः १९
वर्गः २० वृजनं २१ वृक् २२
मज्मना २३ पौंस्यानि २४ धर्ण
सिः २५ द्रविणं २६ स्यन्द्रासः
२७ शम्वरं २८ इत्यष्टाविंशति
र्वलनामानि । इति वेदनि
घण्टौ २ अध्यायः ॥

वला स्त्री वाटालोकः । वाटि
याला इति भाषा । तत्पर्य्यायः ।
पीतपाकी १२ वाट्या १३ वा
टी १४ विनया १५ वाट्याली
१६ वाटिका १७ इति शब्दर
त्नावली ॥
वलिः पुं देवतोद्देशेन घाता
र्थोपकल्पितच्छागादिः यथा
भविष्ये । प्रजानां महिषाणां
चमेषाणांच तथावधात् । प्री
णयेद्धि पिवदुर्गां मांस शोणि
ततर्पणैः । इति । पशुघात
एवंकरकशीर्षयो र्वलित्वे ।
यथा । स्थाने नियोजयेद्दत्तं
शिरश्च सप्रदीपकं । एवं दत्वा
वलिपूर्णं फलं प्राप्नोति सा
धकः । इति चण्डीकल्पवत्तत्वं
तच्छेदनार्थखड्गलक्षण मा
ह निवन्धतन्त्रे । द्वादशांगु
लिकोमुष्ट्या दीर्घोहार्विशदं
गुलः । षडंगुलस्तु विस्तारः
खड्गः कार्य्यो विधूपमः ॥ छे
दयेत्तेन खड्गेन वलिंसर्वसुख
श्रियै । अथवोत्तरवक्रेचस्त
यंप्रधानतस्ततः । सकृत्प्रहा
रेण वलिहननं तदभावेदो
षंचाह तत्रैव । हत्यादेक

प्रहारेण खड्गेन चान्यतोऽपि
वा । यद्यप्येकेन घातेन वलि
च्छेदोन जायते । तदङ्गवा
प्य च महान् कर्तु र्हानिः प
दे पदे ॥ तन्त्रान्तरे । एकखड्ग
प्रहारेण पशुर्यत्र न हन्यते
तदा विघ्नं विजानीयात् क
र्त्तुर्वा छेत्तुरेववा ॥ निवंधेऽपि
यशोहानिः ज्ञानहानिस्तथैव हा
नि स्ततः परं । पुत्रहानिः सु
ते सत्वे तदसत्वे निजक्षयः ॥
अतः सद्यो महेशानि तन्मांसै
र्होमयेत्सुधीः । होमादेव भ
वेच्छान्ति र्महत्येवनसंशयः
प्रकारान्तरशान्ति माह तन्त्रे
व । हत्यादेकप्रहारेणचान्य
था दोष मावहेत् । तच्छान्तये
जपेद्विद्यां तारादेव्याः सहस्र
कं । सहस्रं जुहुयान्मांसैर्द
याद्वास्वर्णमाषकं रुधिरंत
नुपार्वत्येनचदेयंकदाचन । व
लिमन्त्रं समादाय भगवत्यै
निवेदयेत् ॥ निवंधे । यद्यप्ये
केन घातेन महिषोनैव छि
द्यते । तदङ्गमहतीहानिः क
र्तुः पुत्रादिसंपदां । यस्मात्सञ्जा
यते देवि ततःशान्तिं समाच

रेत् । आनीय महिषं तत्र घात
यित्वा चतत्रवै । साक्षिभि र्लो
मसहिते ऊनेद्देवि यथार्थतः
तच्छान्तये जपेद्विद्यां काली
वा तारिणीपरां । अयुतं परमे
शानि सहस्रं वापि साधकः ।
सहस्रं विल्वपत्रैस्तु जुहुया
त्संस्कृतेऽनले । व्राह्मणंवा
गुरुंवापि वरयेत् वस्त्रभिः प्रि
ये । पंडितं वरयेद्धाथ वहुमान
पुरःसरैः । ततः स्वर्णं व्राह्मणा
यतस्मै दद्यात् शुभाप्तये । ए
वंचेद्यजमानस्य शान्तिर्भवति
नित्यशः । ऊन त्वस्यैव शंका
स्यात्तद्दद्धि स्तद्दतसावधि । अ
थवा सर्वतोभद्रे नवकुंभे निधा
पयेत् । सौवर्णीं राजतीं वापि ता
म्रंवा तैजसंतुवा । मार्त्तिकं
वाचरेत्तत्र वित्तशाठ्यं नचाचरे
त् । तत्रैव कालिकां तारां त
था महिषमर्द्दिनीं । यजेद्दावि
शद्दां देवी समस्तारभिमंडितां
ऊलदीपैस्तथा वस्त्रैर्धन धा
न्यादिभिः प्रिये । पूजयेत्पर
मेशानी वित्तशाठ्य विवर्ज्जि
तः ॥ वलि सम्यं छागलेवा तद्
णंच सुलक्षणं घातयित्वा शोभा
गो

चतुर्थां शोणितंन्यसेत् ॥ अप
रंशोणिते तत्र राजते खर्परेन्य
सेत् । अस्त्राभि स्तर्पयेद्देवीव
समान विधानतः । एकेन वटु
कादींश्च तथैकेनापि भैरवान्
अपरेणापि देवेशानन्येन यो
गिनीगणं । तर्पयित्वा ततः प
श्चाद्देव्या स्तर्पण माचरेत् । द
क्षिणान्ते ततः कृत्वा पठेन्नाम
सहस्रकं । यथाशक्ति महेशा
निभूयो देवीं घटे यजेत् । घट
वक्त्रेवटाश्वत्थ स्नेहोडुंवरशाखि
कां । ब्रह्मकूर्च्चंच निःक्षिप्य घट
के सफलाक्षतं । पिधाय कुंभ
वक्त्रंच शोभेणाच्छादयेत् पुनः
जप्त्वा नत्वा ततः साध्यं तज्जानी
य स्वहस्तते । तदन्तस्तु पंचवा
द्येषु मूर्त्तैश्शोभने सुधीः ॥
अभिषिंचेत्कान्तकोर्नीयजमाने
चसाधकः । सुमंगलाभिर्नारी
भिःक्षिप्रपुष्पाक्षतांचितं । आशि
षां द्विजातीनां माशीर्वादपु
रस्सरं । करेणास्य शिरः स्पृष्ट्वा
प्रयुंजीताशिषं पुनः ॥ भद्रमस्तु
शिवं चास्तु महामाया प्रसीदतु
रक्षन्तु त्वां सदा देवाः सम्पदः
संतु सर्वदा ॥ अथोत्थाप्याः

भिषिक्तः सन् तोषयेद्ब्राह्म
णान् धनैः । एवञ्च यजमानस्य
शान्तिर्भवति नित्यदा । प्रसंगा
दुत्पलिविघ्नस्य शान्तिकर्म निरू
पितं । सर्वसंपत्करं दुःसंसर्वशा
भाग्यसिद्धिदे । भूतेचतुर्निमि
त्तादावप्येवं शान्ति माचरेत्
इति निबंधतंत्रोक्त बलिवि
घ्नशान्तिसंग्रहः ॥
अन्यच्च । एकखड्गप्रहारेण पशु
र्यत्र न हन्यते । तदा विघ्नविज्ञा
नीयाद्दाता राष्ट्रं तथैव वा इति ।
प्रायश्चित्त माह । हन्यादेक
प्रहारेण अन्यथा दोषभाव
हेत् । तच्छान्तये जपेद्दिव्यां
दुर्गाबीजसहस्रकम् । सहस्रं
जुहुयाद्देव्यै प्रदद्यात् स्वर्णमा
षकं । इति कृत्यमहार्णवे वा
चस्पतिमिश्रे धृतं ॥
अपरञ्च । कालिकापुराणे । चं
द्रहासेन कर्त्रा वै छेदनं मुख्य
मिष्यते । हस्तेन छेदयस्तु
प्रोहितोऽप्यन्तःसाधकः पशुं ॥ पति
तं वाथ राजेन्द्र ब्रह्महत्यामवा
प्नुयात् । मतस्य तु सकं । छेद
यैत्री हत्या खड्गेन प्रहारेण स
हृदयः । इति दुर्गोत्सवतत्त्वे ।

बलिदाने त्वौ श्रीकृष्णपार्ष
देभ्यस्तन्निवेदितनैवेद्यांशदाने
यथा । अथ बलिदाने । तेता
जवनिकाविधानपसार्य यथा
विधि । विष्वक्सेनाय भगवन्नै
वेद्यांशं निवेदयेत् । तथा
च पंचरात्रे श्रीनारदवचनं ।
विष्वक्सेनाय दातव्यं नैवेद्यं
तच्छतांशकं । पादोदकं प्र
सादञ्च लिंगेचंडेश्वराय च ।
तद्विधिश्चोक्तः । शुद्धोदी
शानतः पात्रान्नैवेद्यांशं समु
द्धरेत् । सर्वदेवस्वरूपाय प
राय परमेष्ठिने । श्रीकृष्णसे
वायुक्ताय विष्वक्सेनाय ते
नमः ॥ इत्युक्त्वा श्रीहरे र्वाम
तीर्थाङ्क्तिं समर्पयेत् । शान्ता
शांवा सहस्रांश मन्यथा नि
ष्फलं भवेत् । पश्चाच्च बलिरि
त्यादिश्लोकानुच्चार्य वैष्णवः
सर्वेभ्यो वैष्णवेभ्यस्तंशतांश
विनिवेदयेत् ॥ ते च श्लोकाः
बलि र्विभीषणो भीमः कपि
लो नारदोऽर्जुनः । प्रह्ला
दश्चाम्बरीषश्च वसुर्वायुसु
तः शिवः । विष्वक्सेनोद्
वाक्रूरः सनकाद्याः शु

कादयः । श्रीकृष्णस्य प्रसादो
ऽयं सर्वे गृह्णन्तु वैष्णवाः ॥
इति । इदं यद्यपि गृह्यतदर्पण
र्पणतः परं । तथापि भक्त्या
तु स्वस्यात् कृष्णस्याज्ञापि संभ
वेत् ॥ अथ बलिदानमाहा
त्म्यं । नारसिंहे । ततस्तदन्न
शेषेण पार्षदेभ्यः समन्ततः
पुष्पान्तैर्दिग्विभागेण बलिं य
स्तु प्रयच्छति ॥ बलिनावै
ष्णवेनाथ तस्माः संतो दिवौ
कसः । शान्तिं तस्य प्रयच्छे
ति श्रिय मारोग्यमेव च ॥
इति श्रीहरिभक्तिविलासे ८
विलासः ॥
बल्ह उ. स्तुति हिंसा दान
वास्तु अन्यस्यन्तीयापयः ।
उ. बल्हते । इति दुर्गादासः ॥
बहु त्रि आदिसंख्या । अनेकं
तद्वैदिकपर्य्यायाः । उरु १ उ
वि २ पुरु ३ भूरि ४ शश्वत् ५
विश्वं ६ परीणसा ७ व्यानशिः
८ शतं ९ सहस्रं १० सलिलं ११
कुवित् १२ । इति द्वादशबहु
नामानि । इति वेदनिर्घण्टौ ३
अध्यायः ॥
बालगर्भिणी स्त्री प्रथमगर्भव
ती

गौः । तत्पर्य्यायः । पलिक्नी २
इति जटाधरः । बालगर्भव
ती ४ इति शब्दरत्नावली ॥
बाहुः पुं स्त्री भुजः । तत्पर्य्या
यः । दोषः ५ बाहः ६ । इति
जटाधर शब्दरत्नावल्यौ ॥
तद्वैदिकपर्य्यायः । आयती
१ च्यवाना २ अभीशू ३ अप्न
वाना ४ विनंगृसौ ५ गभस्ती
६ कवस्नौ ७ बाहू ८ भुरिजौ
९ क्षिपस्ती १० शक्करी ११ भ
रित्रे १२ इति द्वादश बाहुना
मानि । इति वेदनिर्घण्टौ २
अध्यायः ॥
बुद्धः पुं भगवदवतारविशेषः
तत्पर्य्यायः । धर्म्मचक्रः ३७
महामुनिः ३८ असमः ३९ ख
समः ४० मैत्री ४१ बलः ४२ गु
णाकरः ४३ अकनिष्ठः ४४ त्रि
शरणः ४५ बुधः ४६ वक्री ४७
वागीशानिः ४८ जितारिः ४९
अर्हणः ५० अर्हन् ५१ महासुखः
५२ इति शब्दरत्नावली । महा
बलः ५३ । इति जटाधरः ॥
बुधः पुं विद्वान् । तत्पर्य्यायः
विदग्धः २२ दृष्टक् २३ सुधी
२४ वेदी २५ दृष्टः २६ बुद्धः २७

विधाता २८ प्रजिलः २९। इति शब्दरत्नावली। अव्यक्तः ३० प्राप्तरूपः ३१ स्वरूपः ३२ अभिरूपः ३३ कुथानः ३४ कविताबेदी ३५ वप्ता ३६ विदितः ३७ कविः ३८ ॥ इति जटाधरः ॥

ब्रह्मकूर्च्चं क्ली व्रतविशेषः। यथा। कृच्छ्रप्रातातपः। रजस्वले तु ये नार्य्यावन्योन्यंस्पृशतो यदि। सवर्णे पंचगव्यन्तु ब्रह्मकूर्च्चं मतः परं ॥ पंचगव्यपानं व्रतरूपं तेनोपवासः ॥ ब्रह्मकूर्च्चं माह जाबालिः। अहोरात्रोषितोभूत्वा पौर्णमास्यां विशेषतः। पंचगव्यं पिबेत् प्रात ब्रह्मकूर्च्चविधिः स्मृतः ॥ तद्दशाक्तौ पुरातकं दातव्यं ॥ इति प्रायश्चित्ततत्त्वं ॥

ब्रह्मजज्ञः पुं समष्टिस्थूलदेहाभिमानिविराट्। सच हिरण्यगर्भाज्जातःसर्वज्ञः। यथा। त्रिणाचिकेतस्त्रिभिरेत्य संधिं त्रिकर्मकृत्तरति जन्ममृत्यू। ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमां शान्तिमत्यन्तमेति ॥ इति कठोपनिषदि प्रथमा वल्ली ॥ पुनरपि कर्मस्तुतिमेवाह त्रिणाचिकेत इति। त्रिणाचिकेतः त्रिःकृत्वा नाचिकेतोऽग्निश्चितो येन स त्रिणाचिकेतः तद्विज्ञानस्तदध्ययनस्तदनुष्ठानवान् वा त्रिभिर्मातृपित्राचार्य्यैरेत्य प्राप्य संधिं संधानं मात्राद्यनुशासनं यथावत् प्राप्येत्येतत् ॥ तद्धि प्रामाण्यकारणं श्रुत्यन्तरादवगम्यते। यथा मातृमानित्यादेः। वेदस्मृतिशिष्टैर्वा प्रत्यक्षानुमानागमैर्वा तेभ्योहि विशुद्धिः प्रख्याता। त्रिकर्मकृत् इज्याध्ययनदानानां कर्त्ता तरति अतिक्रामति जन्म च मृत्युञ्च जन्ममृत्यू। किंच ब्रह्मजज्ञमिति ॥ ब्रह्मजज्ञं ब्रह्मणो हिरण्यगर्भाज्जातो ब्रह्मजः ब्रह्मजश्चासौ ज्ञश्चेति ब्रह्मजज्ञः सर्वज्ञो ह्यसौ। तं देवं द्योतनात् ज्ञानादिगुणवन्तं ईड्यं स्तुत्यं विदित्वा शास्त्रतः निचाय्य दृष्ट्वा च आत्मभावेन इमां स्वबुद्धिप्रत्यक्षां शान्तिं उपरतिं अत्यन्तमेति अतिशयेनैति वैराजं पदं ज्ञानकर्मसमुच्च-

1187

यानुष्ठानेन प्राप्नोतीत्यर्थः ॥ इति शांकराचार्य्यकृतभाष्यं।

ब्रह्मदारु क्ली स्वनामख्याततूत्याकारवृक्षः। तत्पर्य्यायः। तूगः ४ यूषः ५ इति शब्दरत्नावली ॥

ब्रह्मसायुज्यं क्ली ब्रह्मत्वं। तत्पर्य्यायः। ब्रह्मसायुज्यं ४ इति शब्दरत्नावली ॥

ब्रह्मसूत्रं क्ली यज्ञोपवीतं। तत्पर्य्यायः। उपवीतं ५ सावित्रं ६ सावित्रीसूत्रं ७ इति शब्दरत्नावली ॥

ब्रह्मावर्त्तः पुं देशविशेषः। यथा। सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरं। तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते। तस्मिन्देशे य आचारः पारंपर्य्यक्रमागतः। वर्णानां सान्तरालानां स सदाचार उच्यते। कुरुक्षेत्रञ्च मत्स्याश्च पंचालाः शूरसेनकाः। एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः। एतद्देशप्रसूतस्य सकाशादग्रजन्मनः। स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः। इति मानवे २ अध्यायः ॥

भ

भ भकारः। अस्य लेखनप्रकारान्तरं यथा। किंचिदाकुंचिता रेखा वामाद्दक्षिणतो गता। ततो वक्रा वामगता तास्तु वामादयः क्रमात्। ऋजुमात्रा मध्यगता कोणदक्षगता पुनः। महाशक्तिस्वरूपा सा ध्यानमस्य प्रचक्षते ॥ तद्यथा। तडित्प्रभां महादेवीं नागकंकणशोभितां। षड्भुजां वरदां भीमां रक्तपंकजलोचनां। रक्तवस्त्रपरीधानां रक्तपुष्पोपशोभितां। चतुर्वर्गप्रदां देवीं साधकाभीष्टसिद्धिदां। एवं ध्यात्वा ब्रह्मरूपां तन्मंत्रं दशधा जपेत् ॥ तत्प्रणाममंत्रो यथा। त्रिशक्तिसहितं वर्णं त्रिविन्दुसहितं प्रिये। आत्मादितत्त्वसंयुक्तं भकारं प्रणमाम्यहं ॥ इति वर्णोद्धारतंत्रं ॥ तस्य नामानि यथा। भः क्लिन्नो भ्रमरो भीमो विश्वमूर्त्तिर्निशाभवं छिरोठो भूषणोमले

यन्त्रस्तरस्य वाचकः ॥ नक्षत्रे
भ्रमणा दीप्ति वेगो भ्रमिः यथा
नभः । नाभि मन्त्रं महा वाक्ष
विस्फूर्त्ति विनाण्डकः ॥ प्रा
णात्मा तापिनी वज्रा विस्फुर
पीच चन्द्रिका । भीमसेनः सु
धासेनः सुरेवो मायापरं हरः
इति नानातन्त्रशास्त्रे ॥
भक्तं क्ली अन्नं । तस्य सुसिद्धत्वं
परिभाषकत्वंच यथा । तण्डुला
म्बुविसंयोगाल्लवणयोगेन पि
ष्टकं । फले त्रितयसंयोगादन्नं
भवति तल्लक्षणात् इति रामा
श्रितचन्द्रिकाधृतवचन मिति
केचित् ॥
भक्तमण्डः पुं क्ली अन्नाग्ररसः
माड़ इति भाषा । तत्पर्य्यायः ।
पिच्छा ४ । इति जटाधरः ॥
भगं क्ली पुं योनिः । तस्य शु
भाशुभलक्षणं यथा । शुभः क
मठपृष्ठाभो गजस्कन्धोपमो भ
गः । वामोन्नतस्तु कन्याजः पुत्र
जो दक्षिणोन्नतः । आखुरोमा
गूढमणिः स्वश्लिष्टः संहतः
पृथुः । तुङ्गः कमलवर्णाभः
शुभो श्वत्थदलाकृतिः । कुरङ्गख
रूपोग्र चुल्लिकोदरसन्निभः
रोमशो विवृतास्यश्च हस्तना
सोतिदुर्भगः । शंखावर्त्तो भगो
यस्याः सा गर्भ मिह नेच्छति
चिपिटः कर्परकारः किंकरी
पददो भगः । वंशवेतसपत्रा
भो गजरोमोच्चनासिकः ।
विकटः कुटिलाकारो लम्बग
लस्तथाशुभः । इति स्कान्दे का
शीखण्डे ३७ अध्यायः ॥
भगवद्भक्तः पुं श्रीकृष्णभक्तियु
क्तः । अथ भगवद्भक्तानां लक्ष
णानि । सामान्यतः लैङ्गे ।
विष्णुरेव हि यस्यैष देवतावै
ष्णवः स्मृतः । अत्र विशेषः ॥
व्रत कर्म्म गुण ज्ञान भोगज
न्मादिमन्तस्तपि । शैवेष्वपि च
कृष्णस्य भक्ताः सन्ति तथा तथा
तत्र व्रतिषु मध्ये भगवद्भक्ति
हेतुव्रतपरता भगवद्भक्तलक्ष
णं । तथा च स्कान्दे श्रीमा
र्कण्डेय भगीरथसंवादे ।
दशमीशेषसंयुक्तं दिनं वै
ष्णववल्लभं नोपासते मही
पाल ते वै भागवता नराः ॥
माघात्यये नचाप्नोति दिनंश
प्यहेवैः नैवाः । कुर्वन्ति जागरं
रात्रौ सदा भागवता हि ।

ते उपोष्य द्वादशी शुद्धां रात्रौ
जागरणान्विता । अल्पां तु सा
पयेयस्तु सर्वे भागवता नराः ॥
भक्तिर्न विच्युता येषां नच्युता
निव्रतानि च । सप्रियः श्रीपति
र्येषां ते स्युर्भागवता नराः ॥
कर्म्मिषु भगवदर्पणादिना त
दाज्ञात्वज्ञावा भक्तिहेतुस्सदा
चारपरता तत्रैव । धर्म्मार्थं जी
वितं येषां सन्तानार्थंच मैथुनं
पचनं विप्रमुख्यार्थं ज्ञेयास्ते
वैष्णवा नराः ॥ अध्वगोतु प
थिश्रान्तः काले ऽत्र गृहमागतं
यो ऽतिथिं पूजयेद्भक्त्या वैष्ण
वः स न संशयः ॥ सदा·
चाररताः शिष्टाः सर्वभूतानु
कम्पकाः । शुचयस्त्यक्तरागा
ये सदा भागवता हि ते ॥
पाद्मे वैशाखमाहात्म्ये श्रीना
रदाम्बरीषसंवादे । जीवितं
यस्य धर्म्मार्थं धर्म्मो हर्य्यर्थमे
व च । अहोरात्राणि पुण्यार्थं त
मन्ये वैष्णवं जनं । लैङ्गे च ।
विष्णुभक्तिसमायुक्तान् श्रौत
स्मार्त्तप्रवर्त्तकान् । प्रीतो भव
ति यो दृष्ट्वा वैष्णवोसौ प्रकीर्त्ति
तः ॥ गुणवत्सु भक्तिहे·
तुकृपालुत्वादिसद्गुणशीलता
स्कान्दे तत्रैव । परदुःखेनात्मदुःखं
मन्यन्ते ये नृपोत्तम । भगवद्ध
र्म्मनिरता स्ते नरा वैष्णवा नृप
तृतीयस्कन्धे श्रीकपिल देव
हूतिसंवादे । तितिक्षवः कारु
णिकाः सुहृदः सर्वदेहिनां ।
अजातशत्रवः शान्ताः साधवः
साधुभूषणाः । पञ्चमस्कन्धे ऋ
षभदेवस्य पुत्रानुशासने । महत्
सेवां द्वार माहुर्विमुक्ते स्तमोद्वा
रं योषितां सङ्गिसङ्गं । महा
न्तस्ते समचित्ताः प्रशान्ता वि
मन्यवः सुहृदः । साधवो ये
एकादशस्कन्धे श्रीभगवत्प्रद
त्तोद्धवप्रश्नोत्तरे । कृपालु रकृ
तद्रोहस्तितिक्षुः सर्वदेहिनां ।
सत्यसारो ऽनवद्यात्मा समः स
र्वोपकारकः । कामैरहतधी
र्दान्तो मृदुः शुचि रकिञ्चनः ।
अनीहो मितभुक् शान्तः स्थिरो
मच्छरणो मुनिः । अप्रमत्तो ग
भीरात्मा धृतिमान् जितषड्गु
णः । अमानी मानदः कल्यो मै
त्रः कारुणिकः कविः ॥ विष्णु
पुराणे यमतद्भटसंवादे । न
चलति निजवर्णधर्म्मतो यः सम

मति यस्य सुहृद्विपक्षपक्षे।
न हरति न चलति किंचिदुच्चैः स्थि
रमनसं तं मवेहि विष्णुभक्तं ॥
ज्ञानिषु भक्तिहेतुज्ञानवत्ता
प्रकादशे। सर्वभूतेषु यः
पश्येद्भगवद्भावमात्मनः। भू
तानि भगवत्यात्मन्येष भाग
वतोत्तमः। नयस्य स्वपरइतिवि
त्तेष्वात्मनि वा भिदा। सर्वभूत
समः शांतः स वै भागवतोत्तमः
ज्ञात्वा ज्ञात्वाथ ये वै मां या
वान् यश्चास्मि यादृशः। भज
न्त्यनन्यभावेन ते मे भक्त त
मा मताः। ईश्वरे तदधीनेषु
बालिशेषु द्विषत्सु च। प्रेममै
त्री कृपोपेक्षा यः करोति स
मध्यमः॥ अर्चायामेव हरये
पूजां यः श्रद्धयेहते। न तद्भक्ते
षु चान्येषु स भक्तः प्राकृतः
स्मृतः॥ भोगवत्सु स्वभक्तिहे
तुभोगानासक्तता हरियोगे
प्रयोजने। गृहीत्वापींद्रियैरर्था
न् यो न द्वेष्टि न कांक्षति ॥
विष्णोर्मायामिदं पश्यन् स
वै भागवतोत्तमः ॥
सज्जन्मविद्यादिमत्त्व भक्तिहे
तुनिरभिमानिता तत्रैव ॥
न यस्य जन्मकर्मभ्यां नवर्णाश्र
मजातिभिः। सज्जते ऽस्मिन्नहंभा
वो देहे वै स हरेः प्रियः॥ भा
वः कथंचिद्भक्तेष्व ज्ञानानाम
कृपमानिता। भक्तिनिष्ठापका
ज्ञाता स्तुतो ह्युत्तमतोदिता।
निष्ठापकाः परिपाकं प्रापकाः
शैवेषु श्रीशिवकृष्णाभेदकता
बृहन्नारदीये। शिवे च परमे
शाने विष्णौ च परमात्मनि।
समबुद्ध्या प्रवर्तंते ते वै भाग
वतोत्तमाः इति॥
अन्यच्च तेषां भगवच्छास्त्रार्थ
परतादिकं। साक्षाद्भक्त्यात्मके
मुख्यं लक्षणं लिख्यते। पुनः
श्रीभागवतशास्त्रपरता स्कांदे
येषां भागवते शास्त्रे सदाति
ष्ठति सन्निधौ। पूजयंति च ये
नित्यं ते स्युर्भागवता नराः॥
येषां भागवते शास्त्रे जीविता
दधिकं भवेत्। महाभागव
ताश्रेष्ठा विष्णुना कथिता नराः
वैष्णवसम्मानिष्ठा लैंगे।
विष्णुभक्तमथायांतं यो दृष्ट्वा
सुमुखः प्रियः। प्रणामादि क
रोत्येव वासुदेवे यथा तथा।
स वै भक्त इति ज्ञेयः स प्र

नाति जगत्त्रयं। तुल्लावशामि
यः शृण्वन् तथा भागवतेरि
तः। प्रणाममर्थं कृत्वा यो वदे
हैवस्ववो हितः। भोजनाच्छा
दनं पूर्वं यथाशक्त्या ददाति
यः। विष्णुभक्तस्य सततं स वै
भागवतः स्मृतः। गारुडे। ये
न सर्वात्मना विष्णुभक्त्या भावो
निवेशितः। वैष्णवेषु कृतात्म
त्वात्स महाभागवतोहि सः॥
श्रीतुलसीसेवानिष्ठा बृहन्नार
दीये श्रीभगवन्मार्कंडेयसंवादे
तुलसीकाननं दृष्ट्वा ये नमस्कु
र्वते नराः। तत्काष्ठांकितक
र्णा ये ते वै भागवतोत्तमाः॥
तुलसीगंधमाघ्राय संतोषं कु
र्वते तु यः। तन्मूलमृत्तिका ये
ष्णु ते वै भागवतोत्तमाः॥
श्रीभगवतः कथापरता बृह
न्नारदीये श्रीभगवन्मार्कंडेय
संवादे। मत्कथाश्रवणे येषां
वर्तते सात्त्विकी मतिः। तद्भक्त
विष्णुभक्ताश्च ते वै भागवतोत्त
माः। स्कांदे श्रीभगवदर्जुनसं
वादे। मत्कथां कुरुते यस्तु म
त्कथां च शृणोति यः। हृ
ष्यते मत्कथायां च स वै-
भागवतोत्तमः। तृतीयस्कंधे
तत्रैव। मदाश्रयाः कथामृष्टाः
शृण्वंति कथयंति च। तपंति
विविधास्तापा नैतान्मद्गतचे
तसः। नामपरता बृहन्नारदी
ये तत्रैव। मन्नामस्राश्च मद्भ
क्ता मद्भक्तजनलोलुपाः। मन्ना
मश्रवणासक्ता स्ते वै भागव
तोत्तमाः। येऽभिनंदंति ना
मानि हरेः शृण्वंति हर्षिताः
रोमांचितशरीराश्च ते वै भा
गवतोत्तमाः। तत्रैवान्यत्र।
अन्येषामुदयं दृष्ट्वा येऽभि
नंदंति मानवाः। हरिनाम
पराये च ते वै भागवतोत्तमाः
॥ स्मरणपरता। तत्र स्वधर्म
निष्ठाया रागद्वेषादिनिष्ठामा
स्मरणं श्रीविष्णुपुराणे। यम
तद्भटसंवादे। न चलति उच्चैः
श्रीभगवत्पदारविंदे स्थितम
नास्तमवेहि विष्णुभक्तं। क
लुषमलेन यस्य नात्मा विम
लमतेर्मलिनीकृतस्तमेनं
मनसि कृतजनार्दनं मनुष्यं सत
तमवेहि हरेरतीव भक्तं। क
नकमपि रहस्यवेक्ष्य बुद्ध्या तृ
णमिव यः समवेति वै परस्वं।

भवति च भगवत्यनन्यचेताः
पुरुषवरे समेवेहि विष्णुभक्ते
स्फटिकगिरिशिलामलः क्व
विष्णुर्मनसि त्वतां क्वच मत्स
रादिदोषः। न हि तुहिनमयूख
रश्मिपुंजे भवति हुताशनदी
प्तिजः प्रतापः। विमलमति रम
त्सरः प्रशांतः शुचिचरितोऽखि
लसत्वमित्रभूतः। प्रियहितवच
नोऽस्तमानमायो वसति सदा
हृदि तस्य वासुदेवः। वसति
हृदि सनातने च तस्मिन् भ
वति पुमान् जगतोऽस्य सौम्य
रूपः। क्षितिरस मतिरम्यमात्म
नोऽन्तः कथयति चारुतयैव शा
लपोतः॥ अन्यविजयेन वैशम्पा
दिना च स्मरणं श्रीहरियोगे
श्वरोत्तरे। देहेंद्रिय प्राणमनो
धियां यो जन्माप्ययक्षुद्भय
तर्षकृच्छ्रैः। संसारधर्मैरविमु
ह्यमानः स्मृत्या हरेर्भागवतप्र
धानः। त्रिभुवनविभवहेतवे
ऽप्यकुंठस्मृतिरजितात्मसुरा
दिभिर्विमृग्यात्। न चलति भ
गवत्पदारविंदाल्लवनिमिषार्द्ध
मपि सवैष्णवाग्र्यः। भागवतकृति
कर्मांश्चिपात्तान्नाममनिवेदिक्रया
निरस्तताये

हृदि कथमुपसीदतां पुनः स
प्रभवति चंद्र इवोदितेऽर्कता
पः॥ एकांतपरता स्कान्दे तत्रै
व। येऽर्चयंति सदा विष्णुं ये
प्रांवरं देहवि। देहिनः पुण्यक
र्माणः सदा भागवता हि ते। लोके
विष्णुरते शुभान्येव करोति हि
हृसंयुतः। प्रतिमां च हरेर्नि
त्यं पूजयेत् प्रयतात्मवान्।
विष्णुभक्तः सविज्ञेयः कर्म
णा मनसा गिरा। नाराय
णपरो नित्यं भूप भागवतो
हि सः॥ ॥ वैष्णवधर्मनि
ष्ठतादि पाद्मोत्तरखंडे। ता
पादि पंचसंस्कारी नवेज्याक
र्मकारकः। अर्थपंचकविद्वि
प्रो महाभागवतो हि सः॥ ता
पः तप्तमुद्राधारणं तदादिपंच
संस्कारयुक्तः। पंचसंस्काराश्च
तत्रैवोक्ताः। तापः पुंड्रं तथा।
नाम मंत्रो यागश्च पंचमः॥
इति। अस्यार्थः। नाम श्रीकृष्ण
दासेत्यादि। मंत्रः श्रीगुरोः सका
शात् मंत्रग्रहणं। यागः होम
पूर्वकयथाविधिदीक्षाग्रहणमि
त्यर्थः। नव इज्याकर्माणि पूजा
संबंधिकृत्यानि श्रवणादीनि वा

ज्याक्तार्चनादीनि वा सर्वेषां
तेषां पूज्यांगत्वात्। तानि च
तत्रैवोक्तानि। अर्चने मंत्रप
ठने यागयोगौ महात्मनः॥
नामसंकीर्तने सेवा तच्चिह्नैरं
कने तथा। तदीयाराधनेचेयं
नवधा भिद्यते शुभे। अर्थपंच
के चत्वारो धर्मादयः पुरुषार्थाः
पंचमपुरुषार्थश्च भक्तिः। यद्वा
पंचतत्त्वानि जीवात्मपरमात्म
परमेश्वर तद्भक्तानां याथार्थ्या
नि। इति तट्टीका॥ एकांति
ता गारुडे। एकांतेन सदावि
ष्णौ यस्माद्देवे परायणाः। त
स्मादेकांतिनः प्रोक्ता तद्भाग
वतचेतसः॥ तद्धितानेनान
न्यपरता एकादशे उद्धवप्र
श्नोत्तरे। ज्ञात्वा ज्ञात्वाथ ये
वै मां यावान् यश्चास्मि यादृ
शः। भजंत्यनन्यभावेन ते वै
भागवता मताः। एकादश
शस्कंधे। न कामकर्मबीजा
नां यस्य चेतसि संभवः। वा
सुदेवैकनिलयः सवै भागवतो
त्तमः॥ सा च एकांतिता चतु
र्द्धा। तत्र धर्मानादरेण श्रीमदुद्ध
वप्रश्नोत्तर एव। आज्ञायैवं गु

णान् दोषान् मयादिष्टानपि स्व
कान्। धर्मान् संत्यज्य यः सर्वा
न् मां भजेत् स च सत्तमः॥
सर्वधर्मान् परित्यज्य मामेकं
शरणं व्रज। अहं त्वां सर्वपापे
भ्यो मोक्षयिष्यामि मा शुचः॥
यदा यस्यानुगृह्णाति भगवाना
त्मभावितः। स जहाति मतिं
लोके वेदे च परिनिष्ठितां॥
अन्यसर्वनिरपेक्षता श्रीमद्भग
वदुद्धवसंवादे पैलोपाख्याने
संतोऽनपेक्षा मच्चित्ताः प्रशां
ताः समदर्शिनः। निर्ममा निर
हंकारा निर्द्वंद्वा निष्परिग्रहाः
अत एव श्रीकपिलदेवहूति
संवादे। त एते साधवः साध्वि
सर्वसंगविवर्जिताः। संगस्ते
ष्वथ ते प्रार्थ्यः संगदोषहरा हि
ते॥ विद्याकुलत्वेपि मनोरति
परता स्कांदे तत्रैव। यस्य कृ
च्छ्रगतस्यापि केशवे रमते
मनः। न विच्युताच्च भक्तिर्वै स
वै भागवतो नरः॥ आपत्सु
तस्य यस्येह भक्तिरव्यभिचा
रिणी। नान्यत्र रमते चित्तं स
वै भागवतो नरः॥
प्रेमैकपरता च श्रीऋषभदेव

स प्रश्नानुशासने । ये वा म
यीशे कृतसौहृदार्था जनेषु
देहम्भरवार्त्तिकेषु । गृहेषु जा
यात्मज रातिमत्सु न प्रीति
युक्ता यावदर्थाश्च लोके ॥
इति मित्रे धने वा । त्रिधा प्रे
मैकपरता प्रेम्णः स्यात्तारत
म्यतः । उत्तमा मध्यमा चासौ
कनिष्ठा चेति भेदतः ॥
तत्रोत्तमा यथा एकादशे ह
रियोगेश्वरोत्तरे । सर्वभूतेषु
यः पश्येद्भगवद्भावमात्मनः
भूतानि भगवत्यात्मन्येष भाग
वतोत्तमः । देहे देवस्य भावं
यः सर्वभूतेषु पश्यति । भाव
यति च तान्यस्मिन्नित्यर्थः सन्त
तः सन्तो । श्रीकपिलदेवहूतिसंवा
दे । मय्यनन्येन भावेन भक्तिं
कुर्वन्ति ये दृढां । मत्कृते त्यक्त
कर्म्माण स्त्यक्तस्वजनबान्धवाः
श्रीहरियोगेश्वरोत्तरे च विसृ
जति हृदयं न यस्य साक्षाद्धरि
रवशाभिहितोऽप्यघौघना
शः । प्रणयरसनया धृताङ्घ्रि
पद्मः स भवति भागवतप्रधा
न उक्तः ॥ मध्यमस्माह हरि
योगेश्वरोक्तावेव । ईश्वरे त

दधीनेषु बालिशेषु द्विषत्सु च
प्रेम मैत्री कृपोपेक्षा यः करो
ति स मध्यमः ॥ कनिष्ठस्त
त्रैव । अर्च्चायामेव हरये
पूजां यः श्रद्धयेहते । न तद्भ
क्तेषु चान्येषु स भक्तः प्राकृ
तः स्मृतः ॥ श्रद्धया पूजने
प्रेमबोधके भक्त इत्यपि । प्रे
माहिकरणात्तत्त्वस्वलभक्ता
न पेक्षणात् । लक्षणानि च
यान्यग्रे भक्तेर्लेख्यानि तान्यपि
वन्दनादीनि विद्यन्ते येषु भाग
वता हि ते । एतानि लक्षणा
नीत्युत्तमाद्यादि भेदतः
ऊह्यानि लक्षणान्येवं विवेच्या
नि परान्यपि । ईदृल्लक्षणव
तस्तु दुर्लभा बहवो जनाः
दिव्याहि भगवद्भक्त नव
नैते इतस्ततः ॥ अतएवो
क्तं मोक्षधर्म्मे नारदीये ।
जायमानं हि पुरुषं यं पश्येन्म
धुसूदनः । सात्त्विकः स तु वि
ज्ञेयो भवेन्मोक्षार्थनिश्चय
इति । इति श्रीहरिभक्तिविला
से १० विलासः ॥
भगवत् त्रि षडैश्वर्य्यान्वितः ॥
स च परमेश्वरः । तन्नामविशे

षस्य सेवनं यथा । अथ श्री
भगवन्नाम सदा सेव्यं सर्व्वतः
तन्माहात्म्यं च विख्यातं संक्षेपे
णात्र लिख्यते ॥ अथ श्रीभगव
न्नामविशेषस्य च सेवनं । ऋषि
भिः कृपया दिष्टं तत्तत्कामह
तात्मनां ॥ अथ कामविशेषे
ण श्रीभगवन्नामविशेषसेवा
माहात्म्यं । तत्र पापक्षयार्थं को
र्मे । श्रीशब्दपूर्वं जयशब्दपूर्वं ज
यद्वयाद्युत्तरं तथा हि । त्रिः स
मकृत्वा नरसिंहनाम जप्त्वा निहु
न्यादपि विप्रहत्यां ॥
महाभयनिवारणार्थं तत्रैव ।
श्रीपूर्व्वं नरसिंहो हि जयाद्युत्त
रतस्तथा । त्रिः समकृत्वो ज
प्तस्तु महाभयनिवारणः ॥
कालविशेषतु मंगलार्थं विष्णु
धर्म्मोत्तरे श्रीमार्कण्डेयवज्रसं
वादे । पुरुषं वामदेवं च तथा सं
कर्षणं विभुं । प्रद्युम्नमनिरुद्धं च
क्रमाद्देवेषु कीर्त्तयेत् । अब्देषु
संवत्सरादिषु पंचसु ॥ बल
भद्रं तथा कृष्णं कीर्त्तयेदयनद्व
ये ॥ माधवं पुण्डरीकाक्षं त
था वै भोगशायिनं ॥ पद्मना
भं हृषीकेशं तथा देवं •

त्रिविक्रमं । क्रमेण राजशार्दू
लवसंतादिषु कीर्त्तयेत् ॥ वि
ष्णुं च मधुहन्तारं तथा देवं त्रि
विक्रमं । वामनं श्रीधरं चैव हृ
षीकेशं तथैव च ॥ दामोदरं प
द्मनाभं केशवं च यदूत्तमं । ना
रायणं माधवं च गोविन्दं च त
था क्रमात् । चैत्रादिषु च मा
सेषु देवदेवमनुस्मरेत् । प्रद्युम्न
मनिरुद्धं च पक्षयोः कृष्णशुक्ल
योः । सर्व्वः शर्व्वः शिवः स्थाणु
र्भूतादिर्निधिरव्ययः । आदित्या
दिषु वारेषु क्रमादेवमनुस्म
रेत् ॥ विश्वं विष्णुर्वषट्कारो
भूतभव्यभवत्प्रभुः । भूतकृ
द् भूतभृद्भावो भूतात्मा भू
तभावनः । अव्यक्तः पुण्डरीका
क्षो विश्वकर्म्मा शुचिश्रवाः ॥
संभवो भावनो भर्त्ता प्रभवः प्रभु
रीश्वरः ॥ अप्रमेयो हृषीकेशः
पद्मनाभोऽमरप्रभुः ॥ अग्राह्यः
शाश्वतो धाता कृष्णश्चैतान
नुस्मरेत् । देवदेवस्य नामानि
कृत्तिकादिषु यादव ॥
ब्रह्माणं श्रीपतिं विष्णुं कपिलं
श्रीधरं प्रभुं ॥ दामोदरं हृषीके
शं गोविन्दं मधुसूदनं । भ

परंगादिनं देवं शांखिनं पश्चि
ने तथा । चक्रिणंच महाराज
प्रथमादिषु संस्मरेत । प्रथमा
दिषु प्रतिपदादिषु ॥ सर्वदा
सर्वदा नाम देवदेवस्य यादव
नामानि सर्वाणिजनार्द्दनस्य
कालश्च सर्वःपुरुषःप्रवीरः। त
स्मात्सदासर्वगतस्य नाम ग्राह्य
यथेष्टं वरदस्यराजन ॥ विवि
धकामसिद्धयेच पुलस्त्योक्तौ ।
कामःकामप्रदःकान्तः कामपा
लस्तथाहरिः । आनन्दो माध
वश्चैव कामसंसिद्धये जपेत ।
रामः परशुरामश्च नृसिंहोवि
ष्णुरेवच ॥ विक्रमश्चैव मा
द्दीति जप्यान्यरिजिगीषुभिः
विद्या मभ्यस्यतानित्यंजप्तव्यः
पुरुषोत्तमः ॥
दामोदरंबंधगतो नित्य मेवज
पेन्नरः । केशवंपुंडरीकाक्षम
निशं हितथा जपेत ॥
नेत्रवाधासु सर्वासु हृषीकेशं
भयेषुच ॥ अच्युतंचामृतंचै
वजपेदौषधकर्म्मणि ॥ संग्रा
माभिमुखो गच्छन संस्मरेद
पराजितं ॥ चक्रिणंगादिनं
श्चैव शार्ङ्गिणं खड्गिनं ।

तथा । क्षेमार्थी प्रवसन्नित्यंदि
क्षु प्राच्यादिषु स्मरेत ॥ अजि
तंचाधिपंचैव सर्वं सर्वेशं त
था । संस्मरेत पुरुषोभक्त्या
व्यवहारेषु सर्वदा ॥ नारायणं
सर्वकाले क्षुतप्रस्खलनादि
षु ॥ ग्रहनक्षत्र पीडासुदेव
बाधासुसर्वतः । दस्युवैरिनिरो
धेषु व्याघ्रसिंहादि संकटे ।
अंधकारे तमस्तीव्रे नरसिंहम
नुस्मरेत ॥ अग्निदाहे समुत्पन्ने
संस्मरेज्जलशायिनम ॥
गरुडध्वजानुस्मरणाद्विषवीर्य
मपोहति ॥ स्नानेदेवार्च्चने
होमेप्रणिपातेप्रदक्षिणे ॥
कीर्त्तयेद्भगवन्नामवासुदेवेति
तत्परः ॥ ॥
स्थापने वित्त धान्यादे रपध्या
नेच दुःस्वप्ने । कुर्वीत तन्मना
भूत्वा अनंताच्युतकीर्त्तनं ॥
नारायणंशार्ङ्गधरं श्रीधरंपुरु
षोत्तमं । वामनं खड्गिनंचैवदु
ःस्वप्ने सदास्मरेत ॥ महार्ण
वादौ पर्यंकशायिनंच नरः
स्मरेत ॥ बलभद्रं समुद्या
र्थं सर्वकर्माणि संस्मरेत ॥
जगत्पति मपत्यार्थं ।

स्तुवन भक्त्यानसीदति । श्रीशं
सर्वाभ्युदयिके कर्म्मण्याशुप्र
कीर्त्तयेत ॥ अरिष्टेषु ह्यशे
षेषु विशोकंच सदाजपेत ॥
मरुत्प्रपाताग्निजल बंधना
दिषु मृत्युषु । स्वतंत्रपरतंत्रे
षु वासुदेवंजपेद्बुधः ॥ सर्वा
र्थशक्तियुक्तस्य देवदेवस्यच
क्रिणः । यथाभिरोचते नाम
तत्सर्वार्थेषु कीर्त्तयेत । सर्वार्थ
सिद्धिमाप्नोति नाम्ना मेकार्थ
तायतः । सर्वाण्येतानि नामा
नि परस्य ब्रह्मणो हरेः ॥
एवं विष्णुधर्म्मोत्तरेच मार्कण्डे
यवज्रसंवादे । किंच कूर्मंवरा
हंमत्स्यंवा जलप्रतरणे स्म
रेत ॥ भ्राजिष्णुमग्निजनने ज
पेन्नामन्यखंडितं ॥ गरुडध्व
जानुस्मरणादापदो मुच्यतेन
रः । ज्वरजुष्टशिरोरोगविष
वीर्यंच शाम्यति ॥ ॥ बल
भद्रंतु युद्धार्थी कृष्यारंभेहला
युधं ॥ उत्तारणे वणिज्यार्थी
राम मभ्युदये नृप । मांगल्ये
मंगलं विष्णुं मांगल्येषुच की
र्त्तयेत । उत्थितःकीर्त्तयेद्विष्णुं
प्रस्वपन माधवंनरः । भोज

ने चैव गोविंदं सर्वत्र मधुसूद
नं । तत्रैवान्यत्र । औषधे चिंत
येद्विष्णुं भोजनेचजनार्द्दनं ।
शयने पद्मनाभंच मैथुनेच
प्रजापतिं ॥ संग्रामेचक्रिणं
क्रुद्धं स्थानभ्रंशे त्रिविक्रमं ॥
नारायणंविषोत्सर्गे श्रीधरं
प्रियसंगमे । जलमध्येवराहं
चपावके जलशायिनं । कानने
नरसिंहंच सर्वत्र रघुनंदनं ॥
दुःस्वप्ने स्मरगोविंदं विसृष्टे
मधुसूदनं मायासुवामनंदेवं
सर्वकार्येषु माधवं ॥ किंच
कीर्त्तयेद्वासुदेवंच अनुक्तेष्व
पि यादव । कार्यारंभेतथा
राजन यथेष्टं नामकीर्त्तयेत
सर्वाणि नामानि हि तस्य रा
जन सर्वार्थसिद्धौ तु भवंतिपुं
सः । तस्माद्यथेष्टं खलु कृष्ण
नाम सर्वेषु कार्येषु जपेतभ
क्त्या ॥ इतिश्रीहरिभक्तिविलासे
११ विलासः ॥ ॥ भगवद्दृष्टी
कारिते यथा । महाभारतेश्वरा
वहाके । हरणमेततप्रहृष्टेम
हृदयान्नापसर्पति । यद्गोविंदे
ति चुक्रोश कृष्णामांद्वारवासिनं
आदि पर्वणि श्रीकृष्णार्ज्जुनसं

वादे। गीत्वा तु मम नामानि नर्त्तयेन्मम सन्निधौ। इदं ब्रवीमि ते सत्यं क्रीतोऽहं तेन चार्जुन॥ गीत्वा च मम नामानि रुदन्ति मम सन्निधौ। तेषामहं परिक्रीतो नान्यक्रीतो जनार्दनः॥ एवं कृत्वा च मम नामानि त्यादि॥ विष्णुधर्मे प्रह्लादेन। जिते तेन जितं तेन जितं तेनेति निश्चितम्। जिह्वाग्रे वर्त्तते यस्य हरिरित्यक्षरद्वयम्॥ इति तत्रैव ९ विलासः॥ ॥ भगवत्सान्निध्यलक्षणानि यथा। हयशीर्षे। तस्मिन्नेव मुहूर्त्ते तु हर्षो वा भयमेव च। वक्त्रे भ्रमो वा त्रासो वा जायते यदि। व्यामोहः परमोहो वा स्तनिते परमे तथा। अप्रकृतानां प्रकृतिर्वा स्यात् गात्राणां वाथ वेपथुः॥ व्यामोहो मोह्याविशेषः। परमोहो मूर्च्छा॥ वैराग्यं नेत्रयो वा स्याद्दर्पः कन्दर्प एव वा। परमो विस्मयो वाथ दिव्यो वा श्रूयते ध्वनिः दिव्यो वा दिव्यघोषो वा गन्धर्वनगरस्य वा। दर्शनं जायते

काले तस्मिन् सुरगणार्च्चिते। नरानार्य्याः प्रहृष्टा ते गायन्तेऽप्यन्योन्यहर्षिताः। नेदिभ्रष्टरवो वापि श्रूयते छन्दसां ध्वनिः। दिव्यगन्धा रसा वापि पक्वस्यापि भवन्ति हि। लिङ्गैरेतैर्विजानीयात् तत्र सन्निहितं हरिम्। प्रभा चैव विशेषेण ज्वलतीव च दृश्यते। स्फुरन्तीव च दृश्येत प्रतिमा च विशेषतः॥ स्फुरन्निव जनः कश्चित् स्मयमान इव क्वचित्। वीक्षमाणो जनस्तत्र प्रहृष्ट इव लक्ष्यते॥ एतैस्तु लक्षणैर्ज्ञेयस्तत्र सन्निहितो हरिः। विशेषादथवा पश्येच्छक्रचापोपमं क्वचित्॥ छविं वज्रप्रभां पश्येत् पद्मरागप्रभां यथा। सौदामिनीप्रभां पश्येत् प्रतिमायां क्वचिद्यदि। एतैर्लिङ्गैस्तु बोद्धव्यस्तत्र सन्निहितो हरिः। वधिरा इव केचित्तु मूका इव तथापरे। विभ्रान्ता इव केचित्तु जडा इव तथापरे। धावन्त इव केचित्तु पतन्त इव चापरे। नृत्यन्त इव चापल्येन मत्ता इव तथा यदि। चित्रस्था इव

केचित्तु विवशा इव केचन॥ भवन्ति तत्र चोन्मत्ताः प्रमत्ता इव चापरे। लिङ्गैरेतैस्तु बोद्धव्यस्तत्र सन्निहितो हरिः॥ इति श्रीहरिभक्तिविलासे १९ विलासः॥

भस्मकूटः, पुं, कामरूपस्थपर्वतभेदः। यथा। नन्दनात् पूर्वभागे तु भस्मकूटो महागिरिः। यत्र तिष्ठति भूतेशो महादेवो वृषध्वजः॥ इति श्रीकालिकापुराणे ८१ अध्यायः॥

भस्माचलः, पुं, कामरूपस्थपर्वतभेदः। यथा। सर्वतीर्थजले स्नात्वा स्पृष्ट्वा चैवं सवासवम्। मणिकर्णेश्वरं दृष्ट्वा मुक्तिर्भस्माचले गते। इति श्रीकालिकापुराणे ८१ अध्यायः॥

भक्षणीयं, त्रि, भक्ष्यद्रव्यं। तत्स्थापनविधिर्यथा। प्रशस्ताहि मले पात्रे सविस्तीर्णे मनोरमे। तत्र भक्ष्यं परिण्यस्तं मध्यभागे तु संयुतम्॥ सूपं सर्पिःपले पाके पिष्टमज्जे तु मत्स्यके। स्थापयेद्दक्षिणे पार्श्वे भुञ्जानस्य यथाक्रमम्॥ प्रलेहाद्याः द्रवाः सर्वे पानीयं पानकं पयः। चोष्यं सन्धानकं लेह्यं सव्यपार्श्वे निधापयेत्॥ सर्वान् इक्षुविकारांश्च पक्वान्नं पायसं दधि। पुरतः स्थापयेद्भोक्तुहेयोः पङ्क्त्योश्च मध्यतः॥ इति पाकराजेश्वरः॥

भाम ट क कोपने। इति कविकल्पद्रुमः॥ अभ्रभामत इति दुर्गादासः॥

भीष्मपञ्चकं, क्ली, बकपञ्चकं। यथा। आरभ्यैकादशीं पञ्च दिनानि व्रतमाचरेत्। भगवत्प्रीतये भीष्मपञ्चके यदि प्रकुर्यात्। तथा धात्रीव्रतं पौर्णमास्यां कुर्वीत कार्त्तिके। तथा नवम्यां शुक्लायां मत्तयं नवमीव्रते॥ पैतामहादिकृच्छ्राणि मासोपोषणमेव च। समर्थः कार्त्तिके कुर्य्याज्ज्ञात्वा पाद्मादितो विधिम्॥ इति श्रीहरिभक्तिविलासे १६ विलासः॥

भुक्तिः, स्त्री, भोगः। दखल इति पारस्य भाषा। सा च प्रमाणचतुष्टयान्तर्गतप्रमाणविशेषः यथा। लिखिताद्यभावे दिव्य

माह याज्ञवल्क्यः । प्रमाणं लि
खितं भुक्तिः साक्षिण इति
कीर्त्तितं । एषा मन्यतमाभावे
दिव्यान्यतम मुच्यते । इति व्य
वहारतत्त्वे । तद्विवरणं । यथा
अथ भुक्तिः । तत्र याज्ञवल्क्यः
पश्यतोऽब्रुवतो हानि भूमेर्विंश
तिवार्षिकी । परेण भुज्यमा
नाया धनस्य दशवार्षिकी
विवाद मकुर्वतः समक्षं भूस्वा
मिनः परेणाप्रतिरोधिना भु
ज्यमानाया भूमेर्विंशतिवर्षाणि
हेन्नास्वत्वहानिः । अत्र लोकव्य
वहारकर्मत्वाद्वर्षगणना सा
वनेन । तथाच विष्णुधर्मोत्तरं । स
त्राण्युपास्यान्यथ सावनेन लो
कंचयत् स्याद्व्यवहारकर्म । तेनै
व । सावनेच तथा मासि त्रिंशत्
सूर्योदया स्मृता इति । विशेष
पतिव्यासः । वर्षाणि विंशति
यस्य भूर्भुक्ता तु परैरिह । सति
राज्ञि समर्थस्य तस्य सेह न सि
ध्यति । सम्यक्त्वस्य वलत्वादिदो
षरहितस्य । धनस्य दशवर्षाणि
हेन्नास्वत्वहानिः । तथाच मनु
नारदौ । यत्किंचिद्दशवर्षाणि
सन्निधौ प्रेक्षते धनी । भुज्यमानं

परैस्तूष्णीं न स तल्लब्धुमर्हति ॥
यत् किंचिदुनज्ञाते समक्षमेव
प्रीत्यादिव्यतिरेकेण परै दश
वर्षाणि भुज्यमाने स्वामी तूष्णीं
प्रेक्षते माभुज्यता मिति प्रति
षेधं न रचयति नासौ तल्लब्धुं
योग्यो भवति तत्र तस्य स्वा
म्यं नश्यतीत्यर्थः । गौतमः ।
अजडापोगण्डधनं दशवर्षभु
क्तं परैः सन्निधौ भोक्तुरिति ।
जडो विकलेन्द्रियः । पोगण्डः
एतोऽनुत्पन्नश्मश्रुगण्डःक
पोलो यस्य सः । तदाहरदः ।
बाल आषोडशाद्वर्षात् पोग
ण्डश्चापि शब्द्यते । अत्रापोग
ण्डः प्रकीर्त्तितइति कुल्लूकभ
ट्टेन लिखितं । तत्पाठेऽपि अ
पोगण्डस्तु पोगण्डइति द्विरू
पकोशाद विरोधः । तस्माद्या
ज्ञल्कादिवचनात् दशवर्षवि
शतिवर्षादिकाले भोगएवस्व
त्वं जनयति । यथा कालप्राप्ति
वशेन वीजमंकुरं जनयति तद
वस्तु कुरुतम मिति । स्वामिना
चाप्रतिषिद्धेः पिशाचोक्तका
लीनभोगात्स्वाम्य मन्यस्य भव
ति । यथा जयेन राज्ञः परराष्ट्रप्र

इति । एव मेवश्रीकरवालो
कजोगेक भवदेवभट्ट शूल
पाणि कुल्लूकभट्ट चण्डेश्वर व्य
वर्द्धमानोपाध्याय प्रभृतयः ।
व्यवहारोऽप्येतादृगेव । एतद्धि
रुद्धवचनान्यन्यथा व्याख्याया
ति । तत्रोपेक्षया स्वत्वहानि मु
क्त्वाच स्वत्वमाह नारदः । भुज्य
मानान् परै रर्थान् य स्तान्मो
हादुपेक्षते । समक्षं तिष्ठतोऽ
प्यस्य तान् भुक्तिः कुरुते वशे ॥
व्यक्त माह बृहस्पतिः ॥
स्थावरं सिद्धिमाप्नोति भुक्त्याहा
नि मुपेक्षया । उपेक्षया त्व
मया । तत्कारणंच स्वामिनः
स्वशीलत्व महेच्छत्व दयाल
त्वादि । एवंच विंशतिवर्षात् स्वं
स्वकृतिसाध्यकर्षण पालनाद्ये
रुत्पन्नद्रव्य एव स्वत्वं । एवं दश
वर्षात् स्वं स्वकृतिसाध्यदोहन
पालनाद्यै रुत्पन्नदुग्धादावेव
स्वत्वं । तेनैककालपरतस्तु भूमो
गवादिधने च स्वत्वमिति । पूर्वंत
त्तत्राशकभोगे तु सोऽर्थोदोषाभ
वत्येव ॥ भोगे तु स्वत्वहा
नि मध्यादीनां आवर्त्तयतिप
रपतोऽब्रुवत इत्यभिधाय ।

याज्ञवल्क्यः । आधि सीमोपनिः
क्षेप जड बाल धनै र्विना । त
थोपनिधि राजस्त्री श्रोत्रिया
णां धनैरपि । आधि र्बन्धक द्र
व्यं । उपनिःक्षेपः । वासनस्थम
नाख्याय समुद्रं यन्निधीयते ।
इतिनारदोक्तः । वासनस्य निः
क्षेपाधारस्यतत्संप्रदायादिद्रव्य । समु
द्रग्रन्थ्यादियुतं । जडो बुद्धिवि
कलः । बालोऽप्राप्तषोडशवर्षः ।
उपधिः प्रीत्या भोगार्थं मर्पितः
ततश्च आध्यादिभिर्जडादिध
नैश्च विना अन्यानि धनानि उ
क्तभोगकालेन स्वामिनो नप्रं
तिपतानि तत्स्वामिनोऽन्न नप्रपत्ति नैवा भोक्तुर्भवंति
मित्वाद्वयोः स्मृतिः ॥ द्वार
मार्गक्रिया भोगजलवाहादि
षुक्रिया । भुक्ति रेव तु गुर्वीस्या
न्न दिव्यं नच साक्षिणः ॥ या
ज्ञवल्क्यः ॥
आगमो ह्यधिको भोगाद्विना
पूर्वक्रमा गतात् । आगमः
कारणं तत्र भुक्तिः स्तोकापि
यत्रनो ॥ आगमस्तु कृतोयेन
न सोऽभियुक्तस्त मुद्धरेत् ।
न तत्सुतस्तत्सुतोवा भु
क्ति स्तत्र गरीयसी ॥ यो

ऽभियुक्तः परेतः स्यात्तस्य दि
क्थीन शुद्धेत् । न तत्र कारणं
भुक्तिरागमेन विनाकृता ॥ भू
म्यादावागमः पूर्वपुरुषक्रमा
नागतभोगाद्बलवान् अतः क्र
मागतभोग आगमाद्बलवान्
तथाच बृहस्पतिः । अनुमानाद्गु
रुः साक्षी साक्षिभ्यो लिखितं गु
रुः । अव्याहता त्रिपुरुषी भुक्ति
रेतेभ्यो गरीयसी । त्रिपुरुषभो
ग माह व्यासः । प्रपितामहे
न यद्भुक्तं तत्पुत्रेण विनाच तं ।
तौ विना यस्य पित्राच तस्य
भोग स्त्रिपौरुषः । पिता पिता
महो यस्य जीवेच्च प्रपितामहः
त्रयाणां जीवतां भोगो विज्ञे
यस्त्वेकपुरुषः । आगमोऽपि
बलवान्नभवति यत्र स्तोकापि
भुक्तिर्नास्ति । तथाच नारदः ।
विद्यमानेऽपि लिखिते जीव
त्स्वपि च साक्षिषु । विशेषतः
स्थावराणां यन्न भुक्तं न तत्स्थि
रं । इति दीपकलिका । यत्र वा
दिनो स्वल्पागमबलप्रवृत्तो प्रा
गमयोश्च पूर्वापरभावो न नि
श्चीयते तत्र यस्य भुक्तिस्तस्या
गमो बलीयान् तत्तस्यस्वत्वार्थ

इति मिताक्षरा । अर्थाद्यत्रागम
पौर्वापर्य्यानिश्चय स्तत्र । सर्वे
ष्वेव विवादेषु बलवत्युत्तरा क्रिया
आधौ प्रतिग्रहे क्रीते पूर्वा तु ब
लवत्तरा ॥ इति याज्ञवल्क्यव
चनान्निर्णयः । आगम स्त्विति आ
गम्यते प्राप्यते स्वं भवति
येन क्रयादिना स आगम इति
व्यवहारमातृका । आगमः सा
क्षिपत्रादिक मिति याज्ञवल्क्य
दीपकलिका । आगमो धनोपा
र्ज्जनोपायः क्रयादि रिति मैथि
लाः । तत्रान्येनाभियुक्तः आगम
कर्त्ता तत्कृतता मुद्धरेतत्
पुत्र पौत्रौ नागम मुद्धरेतां किं
तु भुक्तिरेव तत्र प्रमाणं ॥
॥ विशेषयति बृहस्पतिः । आ
हर्त्ता शोधयेद्भुक्ति मागमंचा
पि संसदि । तत्सुतो भुक्तिमेवै
कां पौत्रादिषु न किंचन ॥
इति शूलपाणिधृतं । तत्पुत्रा
दौ न किंचनेति मैथिलधृतं ॥
आहर्त्ता अर्जनकर्त्ता । अत्र पुत्र
स्य भुक्तिशोधनमात्रं । भुक्ति
शोधन माह तु व्यास कात्याय
नौ । सागमो दीर्घकालश्च नि
श्छिद्रोऽन्यरवोज्झितः । प्रत्य-

र्थिसन्निधानंच पंचाङ्गो भोग
इष्यते ॥ प्रमाणमिति शेषः ।
सागमः क्रियादियुक्तः । एषच
भूमिविषयकविंशतिवर्षधनवि
षयकदशवर्षान्यूनकालभोगपरः
योऽभियुक्त इति यो भोगोक्ति
यमाणे परेणाभियुक्तः परे
तो मृतः स्यात्तदागममुद्धृतवा
न् तदा पुत्रादिरेव तं शुद्धेत्
तथाह नारदः । तथारूढविवाद
स्य प्रेतस्य व्यवहारिणः । पुत्रे
ण सोऽर्थः संशोध्यो नतु भो
गो निवर्त्तयेत् । भोगः केवल
भोगः । तथा च स एव ।
आदौ तु कारणं दानं पश्चाद्भु
क्तिस्तु सागमेति । एष साविवा
दभोगः षष्ठ्येतत्परः । तथा
विधभोगस्यागमं विनापि प्र
माणत्वात् । तथा च व्यासः । व
र्षाणि विंशतिं भुक्ता स्वामिना
व्याहता सती । भुक्तिः सा पौ
रुषी भूमेर्द्विगुणा तु द्विपौरुषी
त्रिपौरुषी तु त्रिगुणा न तत्रान्वे
ष्य आगमः । एतद्वचन मस्म
त्प्रभोगविषयकमिति समस्त
विंशतिवर्षभोगविषयकवचने
नाविरुद्धं । एतादृक् स्मृतिकाल

विषय एव कात्यायनः । स्मार्त्तेका
ले क्रिया भूमेः सागमा भुक्ति
विष्यते । अस्मार्त्ते त्वागमाभावा
त् क्रमात् त्रिपुरुषागता ॥ षष्टि
वर्षकपुरुषभुक्ता त्रिपुरुषभु
क्तिव्यपदेशस्य फलमाह न
तत्रेत्यादि । अत एव नारदः ।
अन्यायेन तु यद्भुक्तं पित्रा पू
र्वतरैस्त्रिभिः । न तच्छक्यम
पाकर्त्तुं क्रमात् त्रिपुरुषागतं ॥ अ
न्यायेनेत्यज्ञातागम मिति शूल
पाणिधृतापाठः । तत्पूर्वैः ।
पित्रा सह पितामहादय त्रिभिरि
त्यर्थः । यत्तु । अनागमन्तु योभुं
क्ते बहून्यब्दशतान्यपि । चौर
दण्डेन तं पापं दण्डयेत् पृथिवीपतिः
इति दण्डविधायकव्यासवचनं
तद्धर्म्मशास्त्रविरोधात् तत्तुल्या
धीपरं । तदाह स एव । यत्र विप्र
तिपत्तिः स्याद्धर्म्मशास्त्रार्थशा
स्त्रयोः । अर्थशास्त्रार्थ मुत्सृ
ज्य धर्म्मशास्त्रार्थ माचरेत् । ए
व मेव शूलपाणिः । वस्तुतस्त्वन
नागम मिति दण्डविधायकवचनं
स्त्रीधन नरेन्द्रधनपरं । स्त्रीधनंच
नरेन्द्राणां नकदाचन जीर्यति
अनागमं भुज्यमानमपि वर्षश

प्राप्ते ऽपि ॥ इति स्वत्वनिर्णय
कल्पतरुवचनैकवाक्यत्वात् । य
दविप्रतिपत्तिः स्यादिति वचन
स्याप्येतदुदाहरणं । यत्रैकस्य
जयेऽवधार्य्यमाणे भिन्नलब्धि
रपरस्य जयेऽवधार्य्यमाणे धन
लब्धिः स्वत्वं । हिरण्यभूमिला
भेभ्यो भिन्नलब्धिर्वेदा यतः । अ
तो यतेत तत्वागमाविति वेद
विदां मतं । इति याज्ञवल्क्या
कार्य्यशास्त्रमुक्तस्य कोपलो
भविवर्ज्जित इति धर्म्मशास्त्र
मवलम्ब्य व्यवहारं पश्यतः । अ
तएव । सम्मेलनावयवकल्पं य
स्मार्थ्यसहितं वचः । इति काम्या
यनोक्तमिति । भवदेवस्तु व्यास
वचनेन प्रतिवादिभोगसन्निधा
ने पुरुषैकद्वयभोगाभिप्रायेणै
पुरुषत्रिकभोगस्य तत्रापि प्रमा
णत्वादित्याह ॥ अथ भुक्ति
स्वत्वापवादः । तत्र बृहस्पतिः
भुक्तिस्त्रैपुरुषी सिद्धा दपरेषां
न संशयः अनिवृत्ते सपिण्डत्वे
सकुल्यानां न सिध्यति ॥ अ
वासिना च यदुक्तं गृहक्षेत्रा
पणादिकं । सुहृद्बन्धु सकुल्य
स्य न तद्भोगेन हीयते ॥ वि

वादस्थ्रावित्रैर्भुक्तं राज्ञाम
स्मैः स्तैश्चैव च । सुदीर्घेणापि
कालेन तेषां तत्र न सिद्ध्यति
आधयो विक्रयस्थाने । वि
वाहो ज्ञामता । इति च व्य
वहारतत्त्वं ॥
भुजः पुं स्त्री बाहुः । तत्
पर्य्यायः । बाहः ५ बाहा ६
भुजा ७ दोषः ८ दोषा ९
इत्यमरटीकायां भरतः ॥
भूमिका स्त्री भूमिः । भूमि
रेव भूमिका स्वार्थे कप्रत्यये
न निष्पन्ना । इति व्याकरणं ।
वेदान्तमते चित्तस्यावस्थावि
शेषः । यथा । क्षिप्तं मूढं विक्षि
प्तमेकाग्रं निरुद्धं इति पंच भू
मयः । अत्रासुरसंपल्लोक शा
स्त्रदेहवासनासु वर्त्तमानं चित्तं
क्षिप्तभूमिका १ निद्रा तन्द्रा
दिग्रस्तं चित्तं मूढभूमिका २
कदाचिद्ध्यानयुक्तं चित्तं क्षि
प्ताद्विशिष्टतया विक्षिप्तभूमि
का ३ ॥ तत्र क्षिप्तमूढयोः स
माधित्वशङ्कैव नास्ति विक्षि
प्ते तु समाधित्वशङ्का तदित
रत् भूमिद्वये समाधिः । एका
ग्रे मनसि संभूत मध्ये प्रद्योतय

त्तिं क्षिणोति च क्लेशान्कर्मबं
धनानि श्लथयति निरोधमभि
मुखीकरोतीति सःप्रज्ञातो यो
ग एकाग्रभूमिका ४ सर्ववृ
त्तिनिरोधरूपा संप्रज्ञातसमा
धि निरुद्धभूमिका ५ । इति वे
दान्तसंज्ञानिरूपणग्रन्थः ॥
भृगुः पुं अरण्यकाएटकव्याप्त
तिविपार्श्वोच्चदेशः ॥ निरव
लंबनपर्वतादिपार्श्वः । आरडि
इति भाषा । तत्पर्य्यायः । दर
ह ४ । इति जटाधरः । पतन
स्थाने ५ इति शब्दरत्नावली ।
भोक्ता त्रि भोजनकर्त्ता । तस्य
लक्षणं यथा । स्नातः सुधौत
मृदुसूक्ष्मशुक्लवासा स्त्रक्का
लधौतचरणः सह पुत्रमित्रैः
स्त्रग्वी प्रसन्नहृदयो रसपाक
वेद्यो भोक्ता विशेच्च सततं
हि महार्हवेद्यैः । मृदुतूलम
ये स्थलेचारुवस्त्रावगुण्ठिते
आसने प्राङ्मुखो भोक्तोपवि
शेद्धान्यदङ्मुखः । इति पाक
राजेश्वरः ॥
भोजनं क्ली भक्षणं । तद्वै
दिकपर्य्याया । आवयति १
भवति २ बभस्ति ३ वेति ४

वेवेष्टि ५ अविष्यन् ६ वप्सति
७ भसथः ८ वष्टो ९ करति १०
इति दशनातिकर्म्माणः । इति
वेदनिघण्टौ २ अध्यायः ॥
भोजनपात्रं क्ली भक्ष्यद्रव्याधा
रः । यथा । तिष्ठेति यत्नवका
श्चनिर्म्मितानि श्रेणीकृता
नि परितस्तु कठोरकाणि ॥
रुकाप्यशोकनवमण्डलभास्क
रेषत् द्रोणीभृतां रजतनिर्म्मि
तथालकं स्यात् ॥ अथोर्द्धप्र
तिमादर्शी कांस्यमादर्शवत्
शुचि । पात्रं दृढं सुविस्तीर्णं स्त्री
णामस्यंतडुलेभं ॥ पद्मावलीभ
वति वा न्यपतेजनाय निर्जल
जालरहितामलवारिधौता ।
पालाशभूरुहदले रचितामनो
ज्ञा नातारविपर्णकृगणेः परि
वेष्टिता च । इति पाकराजेश्व
रः ॥
भोलानाथः पुं शिवः । यथा ।
ब्रह्मणो वचनं श्रुत्वा भोला
नाथः कृपानिधिः । संहृत्य तो
महाज्वालां स्वगणैः स्त्वरया
मुने । इति श्रीशिवपुराणोत्त
रखण्डे तुंडिवासदेवसंवादे वा
राणसीमाहात्म्ये पंचक्रोशीया

ग्रायां महाकालगणोत्पत्तिर्नाम ५५ अध्यायः ॥ पुस्तकान्तरे भोलानाथ इत्यत्र महादेव इतिपाठः ॥

भ्लाशृ य ङ भासि । इति कविकल्पद्रुमः । य ङ भ्लाश्यते । इति दुर्गादासः ॥

भ्लाशृ ऋ न दु ङ भासि । इति कविकल्पद्रुमः । ऋ अबभ्लाशत् । न भ्लेशे बभ्लाशे । दु भ्लाशथुः । ङ भ्लाशते । इति दुर्गादासः ॥

भ्लास व ङ भासि । इति कविकल्पद्रुमः ॥ य ङ भ्लास्यते इति दुर्गादासः ॥

भ्लास ऋ व ङ दु भासि । इति कविकल्पद्रुमः ॥ ऋ अबभ्लासत् । न भ्लेसे बभ्लासे । ङ भ्लासते । दु भ्लासथुः । इति दुर्गादासः ॥

भ्रेषः पुं अधःपतने । यथा । भ्रेषो भ्रंशो यथोचितात् ॥ इत्यमरः । यथोचितात् । यथा प्राप्तात् भ्रंशोऽधःपतने । इति भ्रेषशब्दटीकायां भरतः

भ्रम्श ऌ उ ङ अधःपते ॥ इति कविकल्पद्रुमः ऌ अभ्रशत् । उ भ्रंशित्वा भ्रष्ट्वा । ङ भ्रंशते । इति दुर्गादासः ॥

भ्रमिः स्त्री मण्डलाकारसैन्यरचना । यथा । वीरान् सहस्रशो दृष्ट्वा भ्रमिभिः पर्य्यवस्थितान् लवो लवेन सत्काय शरान् रोषप्रपूरितः ॥ भ्रमिं रराम सहस्रेण द्वितीयायुतसंख्यया तृतीयायुतयुग्मेन तुरीयायुत पंचभिः ॥ पंचमी लक्षयोधानां षष्ठी योधायुताधिके ॥ सप्तमी लक्षयुग्मेन सप्तभिर्भ्रमिभि र्वृतान् ॥ मध्ये लवो भ्रमिव्यामः संचरन् वह्निवत्तदा दाहयामास सर्व्वान् वै सैनिकान् भ्रमिकारकान् ॥ इति पाद्मे पातालखण्डे ८१ अध्यायः ॥

भ्रातृद्वितीया स्त्री कार्त्तिकशुक्लद्वितीया । तद्विवरणं । यथा । यमद्वितीया तु प्रतिपद्युता ग्राह्येत्युक्तं निर्णयामृतादौ । यमद्वितीया मध्याह्नव्यापिनी पूर्व्वविद्धा चेति हेमाद्रिः । अत्र विशेषो हेमाद्रौ स्कान्दे ॥ ऊर्ज्जे शुक्लद्वितीयायां अपराह्णेऽर्च्चयेद्यमं । स्नानं कृत्वा

भास्करजायां यमलोकं न पश्यति । ऊर्ज्जे शुक्लद्वितीयायां पूजितस्तर्पितो यमः । वेष्टितः किन्नरैर्हृष्टैस्तस्मै यच्छति वाञ्छितं ॥ तथा भविष्ये । प्रथमा श्रावणे मासि तथा भाद्रपदेऽपरा । तृतीयाश्विनयुजे मासि चतुर्थी कार्त्तिके भवेत् ॥ श्रावणे कलुषा नाम तथा भाद्रे च गीर्म्मता । आश्विने प्रेतसंचारा कार्त्तिके याम्यका मता ॥ इत्युक्त्वा प्रथमायां व्रते द्वितीयायां सरस्वतीपूजा तृतीयायां श्राद्धमुक्त्वा चतुर्थ्यां मुक्तं । कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर । यमो यमुनया पूर्व्वं भोजितः स्वगृहे चितः । अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता । अस्यां निजगृहे विप्र न भोक्तव्यं ततो नरैः । स्नेहेन भगिनीहस्तात् भोक्तव्यं पुष्टिवर्द्धनं । दानानि च प्रदेयानि भगिनीभ्यो विधानतः स्वर्णालंकारवस्त्रान्नपूजासत्कारभोजनैः । सर्व्वा भगिन्यः संपूज्या अभावे प्रतिपन्नकाः प्रतिपन्ना माता भगिन्य इति हेमाद्रिः । पितृव्यभगिनीहस्तात् प्रथमायां युधिष्ठिर मातुलस्य सुताहस्तात् द्वितीयायां तथा नृप । पितुर्मातुः स्वसुः कन्ये तृतीयायां तयोः करात् । चतुर्थ्यां सहजायाश्च भगिन्या हस्ततः परं । सर्व्वासु भगिनीहस्तात् भोक्तव्यं बलवर्द्धनं ॥ यस्यां तिथौ यमुनया यमराजदेवः संभोजितः प्रतिजगात् स्वसृसौहृदेन । तस्यां स्वसुः करतलादिह यो भुनक्ति प्राप्नोति रत्नसुखधान्यमनुत्तमं सः ॥ मंत्रस्तु । यमेच चित्रगुप्तेच यमदूतांश्च पूजयेत् ॥ अर्घ्यश्चात्र प्रदातव्यो यमाय सहजद्वयैः । मंत्रस्तु । एह्येहि मार्त्तण्डज पाशहस्त यमान्तकालोकधरामरेश । भ्रातृद्वितीयाकृतदेवपूजां गृहाण चार्घ्यं भगवन्नमस्ते ॥ भ्रातस्तवानुजाताहं भुंक्ष्व भक्तमिदं शुभं प्रीतये यमराजस्य यमुनाया विशेषतः । ज्येष्ठाग्रजाते ति वदेदिति स्मार्त्ताः । इत्यन्नदानमित्यप्याहुः । ब्रह्माण्डपुराणेपि । यात्रु भोजयते नो

री भ्रातरं पुत्रमके निधौ। अर्च्चयेच्चापि ताम्बूले न स वैधव्य माप्नुयात्। भ्रातरायुः त्वया राजन् नमवेनत्र काहिं चिदिति। इति निर्णयसिन्धौ २ परिच्छेदः॥

म

म मकारः। अस्य लेखनप्रकारो यथा। ऊर्द्ध्वाधः क्रमतो रेखा वामे वक्रा तु कुण्डली। पुन स्त्र्याधोगता सैव ततः ऊर्द्ध्वगता पुनः। ब्रह्मा शम्भुश्च विष्णुश्च क्रमशस्तासु तिष्ठति अत एवं ब्रमवपात् यकारस्य लेखनप्रकारो लिखितः अतः पुनरुक्तः॥ ॥ अस्य ध्यानं यथा। कुस्मादप्रभुजां भीमां पीतलोहितलोचनां। कुम्भ्रा वरयर्द्धा निस्या यस्मकामार्थ मोक्षदां। एवं ध्यात्वा मकारं तु तन्मन्त्रं दशधा जपेत्॥ तत् प्रणाम मन्त्रो यथा। त्रिशक्ति सहितं वर्ण्णं बिन्दुसहितं सदा। आत्मादितत्त्वसंयुक्तं हृदिस्थं प्रणमाम्यहं। इति वर्णोद्धारतन्त्रे॥

मंगलनीराजनं क्ली आत्मपुरूतं कर्तव्य भगवदारात्रिकं। मंगलाआरती इति भाषा। यथा। पठित्वाथ प्रियान् श्लोकान् महावादित्रनिःस्वनैः। प्रभो नीराजनं कुर्य्यान्मंगलाख्यं जगद्धिते नीराजनं त्विदं सर्वैः कर्तव्यश्च विविग्रहैः। परमश्रद्धयोत्थाय द्रष्टव्यञ्च सदा नरैः॥ स्त्रीणां पुंसांच सर्वेषामेतत् सर्वेष्टपर्वकं। समस्तदैन्यदारिद्र्य दुरिताद्युपशान्तिकृत्। इति श्रीहरिभक्तिविलासे ३ विलासः॥

मणिकर्णः पुं कामरूपस्थ शिवलिङ्गभेदः। यथा। भस्मकूटस्य चैशान्यां मणिकूटो महागिरिः। मणिकर्णो नाम हरस्तत्र तिष्ठति लिङ्गकः। सद्योजातस्वरूपस्तु मणिकर्णा इतीरितः। सद्योजातस्य मन्त्रेण पूजितव्यः सदाशिवः। इति कालिकापुराणे ८२ अध्यायः॥

मणिकर्णिकेश्वरः पुं काशीस्थशिवलिङ्गविशेषः। यथा ओंकार

प्रथमं पश्येत् मत्स्योदर्य्यां कृतोदकः। त्रिपिष्टपमहादेवं ततो वै कृत्तिवाससं। रत्नेशं चाथ चन्द्रेशं केदारञ्च ततो व्रजेत्। धर्मेश्वरंच वीरेशं गच्छेत् कामेश्वरं ततः॥ विश्वकर्म्मेश्वरंचाथ मणिकर्णीश्वरं ततः। अविमुक्तेश्वरं दृष्ट्वा ततो विश्वेशमर्च्चयेत्॥ एषा यात्रा प्रयत्नेन कर्तव्या क्षेत्रवासिभिः। इति काशीखण्डे १०० अध्यायः॥

मणिकर्णेश्वरः पुं कामरूपस्थशिवलिङ्गविशेषः। यथा। सर्वतीर्थजले स्नात्वा स्पृष्ट्वा पुंक्तिर्भस्माचलेगते। इतिकालिकापुराणे ८१ अध्यायः॥ (वदंसवासरं मणिकर्णेश्वरंदृष्ट्वा)

मणिकूटः पुं कामरूपस्थपर्वतभेदः। यथा। भस्मकूटस्य चैशान्यां मणिकूटो महागिरिः मणिकर्णो नाम तत्र तिष्ठति लिङ्गकः॥ इति कालिकापुराणे ८२ अध्यायः॥

मत्तः पुं स्वदानदन्ती। मातउथाल्हाथी इति भाषा। तत्पर्य्यायः। मतंगः ५ तरस्वरः ५॥ इतिशब्दरत्नावली॥

मत्तः त्रि सुरापानेन विकलीतकरणः। तत्पर्य्यायः। मदोत्कटः ५। इति जटाधरः। हृष्टः। मदीभियेनि हर्षे क्तः। इत्यमर भरतौ॥

मतस्यः पुं स्त्री स्वनामख्यातजलजन्तुः। माछ इति भाषा। तत्पर्य्यायः। शुभा ऐ इति जटाधरः॥

मध्याह्नः पुं अह्नोऽष्टमुहूर्तात्मकमध्यभागः। सच कुतपकालस्य संज्ञाविशेषः। यथा। अह्नो मुहूर्ता विख्याता दशपंचच सर्वदा॥ तत्राष्टमो मुहूर्त्तोयः सकालः कुतपः स्मृतः। मध्याह्ने सर्वदा यस्मान्मन्दीभवति भास्करः। तस्मादनन्तफलदस्तत्रारम्भो विशिष्यते। मध्याह्नः खड्गपात्रञ्च तथा नेपालकम्बलं। रौप्यं दर्भाः तिलागावो दौहित्रे चाष्टमः स्मृतः॥ पापं कुत्सितमित्याहुस्तस्य सन्तापकारिणः। अष्टावेते यतस्तस्मात् कुतपा इति संस्मृताः॥ इति मत्स्यपुराणे श्राद्धकल्पे २२ अध्यायः॥

मनः क्ली लिंगशरीरावयव
विशेषः। यथा। सूक्ष्मशरीरा
णि सप्तदशावयवानि लिंगश
रीराणि। अवयवास्तु ज्ञानेन्द्रि
यपंचकं बुद्धि मनसी कर्म्मेन्द्रि
यपंचकं वायुपंचकं चेति। म
नो नाम संकल्पविकल्पात्मि
काऽन्तःकरणवृत्तिः। मनस्तु क
र्म्मेन्द्रियैः सहितं सत् मनोमय
कोषो भवति। इति वेदान्त
सारः॥
मननं क्ली श्रुतस्याद्वितीय
वस्तुनो वेदान्तार्थानुगुणयु
क्तिभिरनवरत मनुचिन्तनं।
इति वेदान्तसारः। बोधनं। यथा
र्ण। इति मनधात्वर्थदर्शनात्
मनस्य त्रिनेत्रावच्छिन्नं। अन्तः
करणस्थितं। यथा। मनस्य
मनमध्यस्य मध्यस्य मनवर्ज्जि
तं। मनसा मन आलोक्य स्वयं
सिद्ध्यन्ति योगिनः। इतिश्रीम
दुत्तरगीतासूपनिषत्सु ब्रह्मवि
द्यायां योगशास्त्रे श्रीकृष्णार्ज्जु
नसंवादे ब्रह्मनिरूपणं नाम १
अध्यायः। तादृशब्रह्मापरो
क्षेण मुच्यते इत्याह मनस्य
मित्यादि। मनस्य मनो
ऽवच्छिन्नं। मनमध्यस्य मनसा
हीभूतं। मध्यस्य सर्व्वसाक्षी
भूतं। मनवर्ज्जितं संकल्पवि
कल्पादिरहितं। मन मनवो
धात्मकं। तदेव मनसा परिशु
द्धान्तःकरणेन। आलोक्य तदो
चरापरोक्षचरमवृत्तिं लब्ध्वा
योगिनः ज्ञानिनः। स्वयमे
व सिद्ध्यन्ति निवृत्ताविद्यका
मुक्ता भवन्तीत्यर्थः। इति श्री
मदुत्तरगीतायाः सुबोधिन्या
टीकायां श्रीगौडपादाचार्य्य
विरचितायां १ अध्यायः॥ स
र्व्वेषामप्यद्वैतात्मेति प्रमाणा
द्व मनशब्दोऽकारान्तः॥
मंत्रः पुं परामर्शः। मंत्रणं।
खनादिभ्यो मंत्रणग्रहणस्य
निषेधो यथा। अंगनागृहीताव
पिवाः क्रूरयोनिषु रत्नाश्रये। ते
षां मंत्रोनभुतवदः प्रोक्तःकारि
भिरेवच। कामुकानां जडानां
च स्त्रीजितानां तथैवच। स्व
शुरस्य गृहे नित्यं जामातार
मंकारकः। तस्यापि नभवेन्मं
त्रः कार्य्यसिद्धो कदाचन।
इति जैमिनिभारते आश्वमे
धिकपर्व्वणि २ अध्यायः॥ ग्रन्थ

त् मंत्रणशाद्भदस्यं॥
मंत्रदः पुं शिष्यकर्णे तदिष्ट
देव मंत्रप्रदानकर्त्ता। मंत्रदात
गुरुः। यथा। परापरगुरूणांच
निर्णयं शृणु पार्व्वति। आदौ सर्व्व
ग्रदेवेषि मंत्रदः परमो गुरुः॥
परापरगुरु स्त्वं हि परमेष्ठीत्व
हं गुरुः। इति बृहन्नील तंत्रे
१ पटलः॥ ततपित्रादीनाम
पि परमगुरुत्वादि यथा। मा
नवस्य महेशानि संक्षेपान्नि
गदामिते। गुरुः परमगुरु
श्चैव परापरगुरुस्तथा। स्व
गुरुः परमेशानि साक्षाद्ब्रह्म न
संशयः। तत्पिता परमगुरुः
स्वयं विष्णु र्हितः सदा। तत्
पिता परापरगुरुर्महेश्वरस्मृतः
सदा। इति शाक्तानन्दतरंगि
णीधृतमहिषमर्द्दिनीतंत्रं॥
मंदगामी [2] त्रिमृडुगमनशीलः
तत्पर्य्यायः। खेरगामी ३ म
न्दः ४। इति शब्दरत्नावली॥
मयूरः पुं स्वनामख्यातपक्षी
तस्य पक्षस्य विचित्रताकारणं
यथा। प्रविश्यायां क्रत्याशुवे
दवत्यां स रावणः। पुष्पकं
समारुह्य परिचक्राम मेदिनीं
तेता मरुत्तं नृपतिं यजन्तं
सह देवतैः। उशीरवीजमासा
द्य ददर्श स तु रावणः॥ सं
वर्त्तो नाम ब्रह्मर्षिः साक्षाद्भ्रा
ता बृहस्पतेः। याजयामास ध
र्म्मज्ञः सर्व्वै र्देवगणै र्वृतः॥
दृष्ट्वा देवास्तु तद्रक्षो वरदा
नेन दुर्ज्जयं। तिर्य्यग्योनिं स
माविष्टा स्तस्य धर्षणभीरवः।
इन्द्रो मयूरः संवृत्तो धर्म्मराज
स्तु वायसः। कृकलासो धना
ध्यक्षो हंसश्च वरुणोऽभवत्।
इत्यादि। हर्षात्तदाब्रवीदिन्द्रो
मयूरं नीलवर्हिणं। प्रीतो
ऽस्मि तव धर्म्मज्ञ भुजगाद्धि
नते भयं। इदं नेत्रसहस्रं तु
यत्तद्बर्हे भविष्यति। वर्षमा
णे मयि मुदं प्राप्स्यसे प्रीति
लक्षणं। एवमिन्द्रो वरं प्रादा
न्मयूरस्य सुरेश्वरः। नीलाः कि
ल पुरा वर्हा मयूराणां नरा
धिप। सुराधिपाद्वरं प्राप्य
गताः सर्व्वे विचित्रतां। इत्य
ते वाल्मीकीये रामायणे उत्त
रकाण्डे १८ सर्गः॥
मरु पुं भारतवर्षस्थलदेवता
विशेषः। यथा। शान्तनोऽपि

यते भ्राता योऽनुतिष्ठति धर्म्म
वित्। सम्पूर्णदेहः पुरुषोत्तम
वद्भिः सह मोदते ॥ इति श्री
भागवते ६ स्कन्धे ५ अध्यायः
प्रायेण प्रकृष्टे गमने ॥
पुराण मेव वेधु यस्य। मरु
द्भिर्भ्रान्तवत्सलैर्देवैः। इति
तट्टीकायां श्रीधरस्वामी।
मर्य्यादागिरिः पुं कुलाचलः
वर्षसीमापर्व्वतः। यथा। अत्र
तोत्तरयोरिलावृते नीलः श्वेतः
शृङ्गवानिति त्रयो रम्यकहिर
ण्मय कुरूणां वर्षाणां मर्य्या
दागिरयः प्रागायताः। उभय
तः क्षारोदावधयो द्विसहस्र
योजनपृथव एकैकशः पूर्व्व
स्मात् पूर्व्वस्मादुत्तरोत्तरो दशां
शाधिकांशेन दैर्घ्य एव ह्रसन्ति
एवं दक्षिणेनेलावृते निषधो
हेमकूटो हिमालय इति प्रा
गायता यथा नीलादयः। अ
युतयोजनोत्सेधा हरिवर्षकिं
पुरुष भारतानां यथा संख्यं।
तथैवेलावृतमपरेण पूर्व्वेण
च माल्यवद्गन्धमादनावानील
निषधायतौ द्विसहस्रं पप्रथ
तुः केतुमाल भद्राश्वयोः सी
मानं विदधाते। इति श्रीभाग
वते ५ स्कन्धे १६ अध्यायः ॥
मशकः पुं क्षुद्ररोगविशेषः।
मसा इति लोके प्रसिद्धः ॥
तल्लक्षणं। यथा। अवेदनं स्थि
रञ्चैव यस्य गात्रे प्रदृश्यते। मा
षवत् कृष्णमुत्सन्नं मलिनमश
कं दिशेत्। अवेदनं वेदनार
हितं। स्थिरं अचलं ॥ तच्चि
कित्सा यथा ॥ चर्म्मकील
जतुमणिं मशकांस्तिलका
लकान्। उत्कृत्य शस्त्रेण दहे
त्क्षाराग्निभ्यां मशेषतः। इति
भावप्रकाशः ॥
मसूरिका स्त्री वसन्तरोगः ॥
तस्यास्त्वादनक्रिया टीका इति
ख्याता। सा तु गोस्तनज न
स्याजज मसूरिकापयेन भव
ति। यथा। धेनुस्तन्यमसूरि
कानराणाञ्च मसूरिका। तज्ज
लं बाहुमूलाच्च शस्त्रान्तेन गृ
हीतवान्। बाहुमूले च शस्त्राणि
रक्तोत्पत्तिकराणि च। तज्जलं
रक्तमिलितं स्फोटकज्वरसंभवं
इति धन्वन्तरिकृतशाक्तेयग्र
न्थः ॥
महत् त्रि महान्। महती।

तद्वैदिकपर्य्यायाः। ब्रध्नः २ ऋ
ष्वः ३ बृहत् ४ उक्षितः ५ तवसः
६ तविषः ७ महिषः ८ अभ्वः ९
ऋभुक्षाः १० उक्षा ११ विहायाः
१२ यह्वः १३ ववक्षिथ १४ विव
क्षसे १५ अंहसः १६ माहिनः १७
गम्भीरः १८ ककुहः १९ रभसः
२० व्राधनः २१ विरप्शी २२ अद्भुतं
२३ वर्हिष्ठः २४ वर्हिषत् २५ इ
ति पञ्चविंशति र्महन्नामानि।
इति वेदनिघण्टौ ३ अध्यायः ॥
महच्छब्दस्य शाखादिषड्वि
शेषणेषु प्रयोगनिषेधो
यथा। शंखे तैले तथा मांसे
वैद्ये ज्योतिषिके द्विजे। यात्रा
यां पथि निद्रायां महच्छ
ब्दो न दीयते ॥ इति भट्टिप्र
थमसर्गीयचतुर्थश्लोकटीका
यां भरतः ॥
महाकुष्ठं क्ली वृहत्कुष्ठरो
गः। तत्सप्तविधं यथा। कपा
लिकं तथा सिध्मं ततः काकण
कं तथा। पुण्डरीकर्क्षजिह्वौ च म
हाकुष्ठानि सप्त च। एवंविके क
पालौदुम्बरमण्डलाख्ये सिध्म
प्रहेऽकाकणान्ते नपुंसकलिङ्गः
ननु कथं सिध्मस्य महा
कुष्ठेषु गणना स्मृतेन क्षुद्र
कुष्ठकत्वात्। उच्यते। त्वक्स्था
यिता सिध्म पुष्पिका स्पर्शनेन
च क्षुद्रकुष्ठमुक्ता यावद्धातुप्र
विष्टैव सिध्मं महाकुष्ठमेव प्र
विधस्य सिध्मस्य चरकेण महा
कुष्ठेषु दर्शितत्वात्। एषां महा
कुष्ठत्वञ्च शीघ्रमुत्तरोत्तरधात्व
वगाहत्वात्। उल्वणदोषजन्यत्वा
त् चिकित्सावाहुल्याच्च। इति भा
वप्रकाशः। एषां चिकित्सा कु
ष्ठशब्दे द्रष्टव्या ॥
महाद्रावकः पुं औषधविशेषः
। द्रावक इति भाषा। यथा।
यवक्षारस्य भागौ द्वौ स्फटि
कार्द्धस्तथा मतः। एकीकृत्य
प्रपिष्यापि सूक्ष्मे वेतसतैरभेवैः
शुष्कं कृत्वा क्षिपेत् पात्रे मैस
के वस्त्रलेपिते। अम्लसीसक
पात्रेण हितवे मेलयेद्बुधः ॥
द्वौ द्वौ यौ पादेशेन पचेत्तावत्स्व
मौषधं। ततो ज्वाला भवेत्स्वा
प्य पात्रस्य लभते रसं। ततो
रसं विनिक्षिप्य स्थापयेत् स्नि
ग्धभाजने। लवणेन वटी कु
र्य्यादथवा सततं प्रकैः। श्री
हादिस्थलरोगेषु दापयेद्भि

कां भिषक् । द्रवीकरोति श
गंच महाद्रावकसंज्ञकः ॥
श्वित्रेच दद्रुरोगेच प्रलेपं द्रा
वकस्यच । वह्निवज्ज्वलनं त
स्य दधि दत्वा प्रलेपयेत् ॥
ग्रपिच । इष श्वित्रमपामार्गे
विन्द्रा कुष्माण्डनाडिका । स्नु
हीतालस्य पुष्पंच वर्षाभूर्वेन
न्तथा । एतेषां क्षारमाहृत्य
लिम्पाकस्वरसेनच । क्षाल
यित्वा क्षारतोयं वस्त्रपूतञ्च
कारयेत् ॥ चण्डातपेनसंशो
ष्य ग्राह्यं तद्द्रवणोचिते । एत
स्य द्विपलंग्राह्यं गवक्षारपल
द्वयं । स्फटिकाद्विपलंचैवन
रसारपलं तथा । पलार्द्धं सैंध
वं ग्राह्यं टंकणं तोलकद्वयं ।
कासीसं तोलकं चैवमुद्राशं
खंच तोलकं । दारुमोचं कर्ष
कंच तोलं समुद्रफेणकं ॥
सर्वं मेकत्र संचूर्णंपवकयंत्रेण
साधयेत् । महाद्रावकमेतद्धि
योज्यंच रसज्ञारणे ॥ हन्तिगु
ल्मादिकान् रोगान् यकृत्
प्लीहोदराणिच ॥
इति भैषज्यरत्नावली ॥
महाध्वनिकः पुं धूपपात्रे हि
मालयावधिक महापथगम
नेनसम्पादितमरणः । यथा ।
भृग्वग्नि जलसंग्राममहेप्रस्थानतस्त
संन्यासानशनाशनि महाध्वनि
कानां मुदकक्रिया कार्य्या सद्यः
शौचं भवतीति । इति शुद्धि
तत्वधृतसुमंतमतं ॥
महानसं क्ली पाकगृहं । तद्वि
वरणं यथा । आग्नेय्यां दिशि
कर्तव्य मावासस्य महानसं ।
गवाक्षजालमार्गाय मूर्द्धभित्त
पलेपितं । चुल्लीतत्र प्रकर्तव्या
पूर्वपश्चिम मायता । मृत्स्नया
दीनिभाण्डानि क्षालितानिच वा
रिणा । तेषुयत्पच्यते द्रव्यं त
णवत् सर्वसंमतं । ग्रतुभावेप
चेल्लोहे चक्र रोगोविकारजि
त् । कांस्यजेपाचितंयत्तुतद्धि
ते मतिदंस्मृति । यच्च ताम्र
मये सिद्धं नरुच्यं तन्नपित्त
कृत् । सौवर्णे राजते पाच्य
माप्यन्नमृतं गृहे । ततपा
कं सर्वदोषघ्नं दृष्टि वर्णोत्सवदा
यकं ॥ पुष्प महानसोपयो
गेपाकवस्तूनि । वस्तुनिभे
जनाहीति विविधानि पुनः
पुनः । सर्वाणिगणयुक्तानिष्पा

यितानि महानसे । तास्याम्र
मार्जनी वाप्या पुच्छहण्डी सुक्
श्विका । चर्षणी चैणवे पात्रेञ्ज
लपूर्णास्त्वालिञ्जरः । वह्निसंज्ज
नना ग्रावः कुद्दाले सककारकः
दारुखंडानि शुष्काणि हस्त
मात्राणिचेन्धनं । अजीर्णान्यन
तिस्थूलान्यंजेभूरयमलानिच
तितउ स्थालनी पीठो मूषले
चाप्युदूखलं । सूर्पं लोष्ठ शि
ला दर्वीचतुरस्रावपट्टिका । सं
दंशाकैतयुगले वस्त्रखण्डचतु
ष्टयं । नालिका छुरिकाचैव
हस्तपूले सकटाहकं । वह्निसं
चालनार्थाय दर्वी दीर्घौहलेला
हजा तंदरं कर्करी स्नावा नम्र
कंटप्रवेष्टनी । इत्यादि वस्तु
जातं हि युज्यतेच महानसे ।
इति पाकराजेश्वरः ॥
महाप्रस्थानगमने क्ली महा
पथगमने । तत्तु मरणोद्देशेन
हिमालयपर्य्यन्तप्रयाणं तच्च
कलौ निषिद्धं । यथा वृहन्नार
दीये समुद्रयात्रास्वीकारः क
मंडलु विधारणं । द्विजानामस
वर्णासुकन्यासूपयमस्तथा । दे
वरेणसुतोत्पत्ति मधुपर्कैपशो
र्वधः । मांसादनेतथा श्राद्धे
वानप्रस्थाश्रमस्तथा । दत्ताया
श्चैव कन्यायाः पुनर्दानंवरस्य
च । दीर्घकालं ब्रह्मचर्य्यनर
मेधाश्वमेधकौ । महाप्रस्थान
गमनं गोमेधंच तथा मखं ।
इमान् धर्मान् कलियुगेवर्ज्या
नाहुर्मनीषिणः ॥ इत्यु
द्वाहतत्वं ॥
महामहावारुणी स्त्री गंगा
स्नानस्य योगविशेषः । स तु
शनिवार शतभिषानक्षत्र शु
भयोगयुक्त गौणचान्द्रचैत्रकृ
ष्णत्रयोदशीरूपः । यथा । शु
भयोगसमायुक्ता शनौ शत
भिषा यदि । महामहेति वि
ख्याता त्रिकोटिकुल मुद्धरेत् ।
इति तिथ्यादितत्वधृतस्कंदपु
राणवचनं ॥
महामांसं क्ली नरादिपिशितं
यथा । अस्मा हविर्मांसे म
हामांसैः स्वर्गीपितृभिः ॥ पूजे
येहकुज्जातीयैःवलिभिभोज्ज
नैः शिवां ॥ इति तिथ्यादित
त्वधृतकालिकापुराणं ॥
अस्मञ्च । गो नरेभाश्वमहिषव
राहोष्ट्रशृगाद्रवं ॥ महामां

साष्टकं देवि देवताप्रीतिका
रकं ॥ इति कौलार्च्चन
दीपिका ॥
महारण्यं क्ली वृहद्वनं । तत्
पर्य्यायः ॥ कान्तारः ३ । इति
जटाधरः ॥
महाराजोपचारः पुं राजार्ह
पूजोपकरणं । तद्यथा ॥
ततश्च चामरच्छत्र पादुकादीन्
यथाविधि । महाराजोपचारांश्च
दत्वादर्शं प्रदर्शयेत् । विष्णु
धर्म्मोत्तरे । यथादेशं यथाका
लं राजलिङ्गं सुरालये । यद्दा
भवति राजैव नात्र कार्य्या वि
चारणा ॥ तत्र चामरमाहा
त्म्यं विष्णुधर्म्मोत्तरे । तथा चा
मरदानेन श्रीमान् भवति भूत
ले । मुच्यते च तथा पापैः स्वर्ग
लोके च गच्छति ॥ छत्रस्य त
त्रैव । छत्रं वकुलाकं च कु
त्वरी वस्त्रसंयुते । दिव्यवस्त्र
संयुक्ते हेमदण्डसमन्विते । यः
प्रयच्छति हंसस्य छत्रं चलङ्गा
युते हतः । प्राप्यते सोऽमरैः सर्वैः
क्रीडते पितृभिः सह ॥ तत्रै
वासव । राजा भवति लोके ऽ
स्मिन् छत्रं दत्वा द्विजोत्तमाः ।

माः । नाप्नोति रिपुजं दुःखं
संग्रामे विजयी भवेत् ॥
उपानत्सम्प्रदानेन विमानम
प्यारोहति । यथेष्टं तेन लो
केषु विचरत्यमरप्रभः ॥
ध्वजस्य तत्रैव । लोकेषु ध्वज
तः स्यात् दत्वा विष्णोर्वरं ध्वजं
शक्रलोकमवाप्नोति वहून्
युगपावकः । किञ्च । शुक्लपीत
पताकाभिर्निवेद्य गरुडध्वजं
केशवाय द्विजश्रेष्ठाः शक्रलो
के महीयते । यत्प्रासादे ध्व
जारोपमाहात्म्यं लिखितं पु
रा । तदत्राप्यखिलं ज्ञेयं तत्रा
त्रस्यमिदं तथा । किञ्च । भवि
ष्ये । विष्णोर्ध्वजे तु सौवर्णं दण्डं
कुर्य्याद्विचक्षणः । पताका चा
पि पीता स्यात् गरुडस्य समीप
गा ॥ व्यजनस्य । विष्णुधर्म्मोत्तरे
तालवृन्तप्रदानेन निर्वृतिं प्राप्नु
यात्परां ॥ वितानस्य तत्रैव ।
वितानकप्रदानेन सर्व्वपापैः
प्रमुच्यते । परां निर्वृतिमाप्नो
ति यत्र यत्राभिजायते ॥
खड्गादीनां । दत्वा निस्त्रिंशका
न् शस्त्रान् शत्रुभिर्नाभिभू
यते । दत्वा तद्धन्वनेशास्त्रमग्रा

ध्येयफलं लभेत् ॥ किञ्च ।
यतद्गृहं तथा दत्वा शुभगात्र
स्त्विजायते । पादपीठप्रदानेन स्था
ने सर्वत्र विन्दति ॥ दर्पणस्य प्र
दानेन रूपवान् दर्पवान् भवे
त् । मार्ज्जयित्वा तथा तच्च सु
भगस्त्वभिजायते ॥
यत्किञ्चिद्देवदेवाय दद्याद्भ
क्तिसमन्वितः । तद्देवालयमा
प्नोति स्वर्गलोके स गच्छति ।
किञ्च । वामनपुराणे श्री
वलिं प्रति श्रीप्रह्लादोक्तौ ॥
श्रद्दधाने भक्तिपरे यो नृदि
एप जनार्दने ॥ वलिदानानि
दीयन्ते श्रुत्वा याणि विद्बुधाः
अत्रापि केचिदिच्छन्ति दत्वा
पुष्पाञ्जलित्रयं । एवमुक्तादशो
पचारा बुधाः सन्दर्शयेदिति ।
इति श्रीहरिभक्तिविलासे ८
विलासः ॥
महावारुणी स्त्री गङ्गास्नान
स्य योगविशेषः । सतु शनिवा
रयुक्तशतभिषानक्षत्रयुक्त चैत्रकृष्ण
त्रयोदशीरूपः । यथा ।
वारुणेन समायुक्ता मधौ कृष्णा
त्रयोदशी । गङ्गायां यदि लभ्ये
त सूर्य्यग्रहशतैः समा ॥

शनिवारसमायुक्ता सा महावा
रुणी स्मृता । गङ्गायां यदि ल
भ्येत कोटिसूर्य्यग्रहैः समा ॥
इति तिथ्यादितत्त्वधृत स्कन्द
पुराणवचनं ॥
महाशतावरी स्त्री वृहच्छताव
री । तत्पर्य्यायगुणाः । महाश
तावरी त्वम्ला शतमल्यूर्द्ध्वकण्टि
का । सहस्रवीर्य्याहेरुञ्ज कृष्ण
प्रोक्ता महोदरी । महाशताव
री मेध्या हृद्या वृष्या रसायनी
शतवीर्य्या निहन्त्यर्शो ग्रहणी
नयनामयान् । इति भाव
प्रकाशः ॥
महाश्रावणिका स्त्री क्षुपवि
शेषः । तत्पर्य्यायगुणाः । मुण्डी
भिक्षुरपि प्रोक्तः श्रावणी च
तपोधना । श्रावणिका मुण्डि
तिका तथा श्रावणशीर्षिका
महाश्रावणिकान्यातु सा स्म
ताभ्रकदम्बिका । कदम्बपुष्पि
का चस्यादव्ययातु तपस्विनी ।
मुण्डितिका कटुः पाके वीर्य्योष्णा
मधुरा लघुः । मेध्या गण्डापचीकृ
च्छ्रकृमियोन्यर्त्तिपाण्डुनुत् ॥
श्रीपदारुच्यपस्मारप्लीहमेदो
गुदार्त्तिहृत् । महामुण्डी च मुण्डी

च गुरौ रूक्षा महर्षिभिः ॥
इति भावप्रकाशः ॥
महाश्वेता स्त्री कृष्णभूमिकू
ष्माण्डः । तत्पर्य्यायः । क्षीरवि
दारिका ४ क्षीरवल्ली ५ क्षीरकं
दा ६ इति जटाधरः । क्षीरिका
७ इति शब्दरत्नावली ॥
महासाहसिकः पुं बलपूर्व्वोप
हारकः । यथा । चाट तस्करदु
र्वृत्त महासाहसिकादिभिः । पी
ड्यमानाः प्रजा रक्षेत् कायस्थै
श्च विशेषतः । इति याज्ञवल्क्य
वचनं । चाटाः प्रतारकाः विश्वा
स्ये परधन मपहरन्ति । प्र
छन्नापहारिणः तस्कराः । दु
र्वृत्ताः इन्द्रजालिक कितवाद
यः । सहो बलं सहसा बले
नकृतं साहसं महच्च तत्साह
सञ्च महासाहसं तेन वर्त्तन्ते
इति महा साहसिकाः प्रसह्या
पहारिणः । इति मिताक्षरा
याम्आचाराध्यायः १ ॥
महिषः पुं स्वनामख्यातपशुः
तस्य परीक्षा यथा । विपत्तेर
पसंत्रासे कुरुते येन हेतुना ।
भारं वहति वाहरे माहिषोसौ
निरूप्यते । वक्ष्यमाणविशिष्ट
मूर्द्धांसजभेदेन पञ्चधा । तद्य
था भृशं कृष्णाः परिणाहबृह
द्विषाणा द्रोणकाः । वक्राशि
रो मारकाश्च महिषा ब्रह्मजा
तयः १ । केकराः कामलाः स्थू
लाभ्रंशं कृष्णाश्च मारकाः । व
क्राशिरोवक्रबला महिषाः क्ष
त्रजातयः २ । स्थूलाङ्गाः क्षीण
शृङ्गाश्च सकृष्णा भारवाहिनः
अमारका वक्रबला महिषा वै
श्यजातयः ३ । क्षीणाः क्षीण
बलाः क्षीणशृङ्गा शोणाक्षरमश्रवे
अल्पाशिनो भारसहा महिषाः
शूद्रजातयः । ४ सर्व्वदा जल
मिच्छन्ति येल्पसत्वा महौजसः
भारसहाः कृष्णशृङ्गाश्च ते ऽन्त्यजा
महिषा मताः ५ एषां दोषगु
णानापि वृषवल्लक्षयेद्बुधः ।
पोषणं चापि संस्थाने वृषव
ल्लक्षयेत् मतं ॥ इति युक्ति
कल्पतरुः ॥
माहिषी स्त्री महिषयोषित् ॥
तस्याः क्षीरगुणाः । माहिषम
धुरं गव्यात् स्निग्धं शुक्रकरं गु
रु । निद्राकरं महिष्यंदि तथा
भिष्यकरं हिमं ॥ तस्या दधि
गुणाः । माहिषं दधि सुस्नि

ग्धं श्लेष्मलं वातपित्तनुत् स्वा
दुपाक मभिष्यन्दि वृष्यं गुर्व
सृक्दूषणं ॥ तस्या नवनीतगु
णाः ॥ नवनीतं माहिषाख्यं
वातश्लेष्मकरं गुरुः । दाह पि
त्तश्रमहरं मेदः शुक्रविवर्द्ध
नं ॥ तस्या घृतगुणाः । माहि
षन्तु घृतं स्वादु पित्त रक्ता
निलापहं । शीतलं श्लेष्मलं
वृष्यं गुरु स्वादु विपच्यते ॥
इति भावप्रकाशः ॥
मांसविक्रयी त्रि आमिषविक्र
यकर्त्ता । तत्पर्य्यायः । वैतं
सिकः ५ । इति जटाधरः । कौट
किकः ६ इति शब्दरत्नावली ।
मांसाष्टका स्त्री गौणचान्द्रमा
घकृष्णाष्टमी । तत्र मांसोपकर
णकश्राद्ध मावश्यकं । यथा
अथाष्टकाश्राद्धं । पित्र्यदाना
यमूलेस्वष्टका स्त्रिस्त्रपक्षच
कृष्णपक्षे तरिशाहि पूर्व्वा चैन्द्री
विश्वाख्याते । प्राजापत्याद्विती
यास्यात् तृतीया वैश्वदेवकी ।
आद्या पूपैः सदा कार्य्या मांसै
रन्या भवेत्तथा ॥ शाकैः
कार्य्या तृतीयास्यादेष द्रव्य
गतो विधिः । मूलेप्रधानस्या
ने । अमावास्याहि श्राद्धस्य
प्रधानकालः तद्वदिति या
वत् । ऐन्द्री साग्नेरिन्द्रदेव
ताकयागसंबन्धात् । एवं प्रजा
पत्या वैश्वदेवकी च । मांसैः
पशोः । तथाच गोभिलः । य
द्युवान्यतरसंभवः स्यात् त
दा पशुनैव कुर्य्यादिति । य
द्युवेति निपातसमुदायो य
द्यर्थे पशुरपि छाग एवाजा
गोःनादेशे पशुरिति गौतमा
त् । नच तेष्या ऊर्द्ध्व मष्टम्या
गौरिति गोभिलसूत्रेण ग
वोपदेशात् कथमनुपदिष्ट
त्वमितिवाच्यं । तदसंभवे पशु
नेत्यनेनयः पशुरुपदिष्टस्तस्य
विशेषतोऽनुपदिष्टत्वात् । वस्तु
तस्तुहरिवंशे मृगोपि विहि
तः । इत्याकृत्य विकृतिं वै प्र
एकायायथादिष्टान् । मांसमा
नयश्राद्धाय ततो हत्वा महाबल
इत्यादिना तत्ता मांसतोष्यनात् ।
पश्वभावे स्थालीपाकेन । यथा
गोभिलः । अपिवास्थालीपाकं
कुर्वीतेति । तद्विधानेन । स्थाली
पाकं पशुस्थाने कुर्य्याद्यथानु
कल्पिकं । अपयेन्न सवनस्याया

स्तरूपेण गोः पयस्तु। इति
छन्दोगपरिशिष्टीये श्राद्धे।
अस्त्विति ओदनचरोः पश्चात्
अन्नमेव पितरः स्पृहयन्त्यन्नम
इक्षवश्च मधूनि च। तस्माद
द्यात् सदा युक्तो विहन्त्स्य श्रा
द्धेषु च। इति शातातपे
नोक्तं। तस्मादन्ने प्रधानेऽप्
पादिकं तु उपकरणत्वेन श
क्तौ तु माषपूपकं सदेति श्र
वणात्। इति श्राद्धतत्त्वं॥
मात्स्यमण्डलं क्ली नेत्रयोर्मध्यं
तत्र आसन्नमृत्युर्नैव पश्यति।
यथा। अरुन्धतीं ध्रुवं चैव वि
ष्णोस्त्रीणि पदानि च। आस
न्नमृत्युर्नो पश्येच्चतुर्थं मात्स्य
मंडलं। अरुंधती भवेज्जिह्वा
ध्रुवो नासाग्रमुच्यते। वि
ष्णोः पदानि भ्रूमध्ये नेत्रयो
र्मात्स्यमंडलं। इति काशी
खंडे ४२ अध्यायः॥
माधवी स्त्री स्वनामख्यातपु
ष्पलता। तत्पर्यायः। वसं
तदूती ५। इति जटाधरः। लता
माधवी ९। इति शब्दरत्नाव
ली। अपिच। माधवी स्याद्वास
न्ती पुण्ड्रका मण्डकापि च
अतिमुक्तो विमुक्तश्च कामुको
भ्रमरोत्सवः। माधवी मधुरा
शीता लघ्वी दोषत्रयापहा
इति भावप्रकाशः॥
माया स्त्री इन्द्रजालादिः। तत्
पर्यायः। इन्द्रजालिः २ कुह
कं ३ कुसृतिः ४ शाम्बरी ५
इति जटाधरः। शाम्बरी ६
इति शब्दरत्नावली॥
मार्कः पुं भृङ्गराजः॥ इति
रत्नमाला॥
मार्कवः पुं भृङ्गराजः। इत्य
मार्कवः मरः। मर्कति केशरू
ञ्जनार्थं गच्छतीति मार्कवः। मर्क
सर्पे नाम्नीति अवः निपातना
द्वृद्धिः। मार्कवोऽप्यस्यचतु
र्थ्यांतः मर्के विशादित्वाद्रूप्यो
दरादित्वादद्वागमो दीर्घश्चेति
पदेन साधितत्वात्। मार्को
रेफान्त इति केचित्। इति
तट्टीकायां भरतः॥
मार्गपाली स्त्री कुशकाशम
यरज्जुः। यथा। ततोऽपराह्न
समये पूर्वस्यां दिशि नारद। मा
र्गपाली प्रबध्नीयाद्दुर्गस्तंभे च
पादपे कुशकाशमयीं दिव्यां
संस्कावै दृढभिस्कुदा। वृष

धित्वा गजानश्वानं कुशाग्रादि
संयुतान्। गोवृषान् महिषां
श्चैव घंटाभरणभूषितान्। मे
रीमृदंगपटहवादित्रध्वनिनादि
तान्। तस्याः स्थानेन येत्स्याये शो
तिपाठादिनं दितैः। मार्गपालि
नमस्तुभ्यं सर्वानंदप्रवर्षिके॥
तले तवसुखेनास्तु गजाश्वा
वः प्रयांतु मे। राजानो राजपुत्रा
श्च ब्राह्मणाः शूद्रजातयः॥
मार्गपाली समालिख्यवार्ताः स्यु
श्च सदैव हि। ततो गावश्च सं
पूज्या गंधपुष्पादिभिः क्रमा
त्। आत्मनः श्रेयसे भूपव
तिपूजां करोति हि। अग्रतः
संतु मे गावो गावो मे संतु पृ
ष्ठतः॥ गावो मे सर्वतः संतु
गवां मध्ये वसाम्यहं। या ल
क्ष्मीर्लोकपालानां धेनुरूपे
ण संस्थिता॥ घृतं वहति य
ज्ञार्थे मम पापं व्यपोहतु॥
या कामधेनुर्भवने च विष्णो
र्या कामधेनुर्यमदग्निगेहे।
या सौरभेयी तु वशिष्ठगेहे सा
कामधेनुर्वरदा समास्तु। कृत्वे
तत्सर्वं स्नानदानाद्यं दैत्यपते
र्बलेः पूजां कृत्वा ततः प.
श्चात् सम्यगृहं समारभेत्॥
इति पाद्मे उत्तरखंडे कार्तिकमा
हात्म्ये १२४ अध्यायः॥
मालाकारः पुं मालिकः। तद्गृ
हस्थितपुष्पस्य पर्युषितदोषा
भावो यथा। न पर्युषितदो
षोऽस्ति तुलसी बिल्व चंपके
जलजे बकुलेऽगस्त्ये माला
कारगृहेषु च। इति मेरुतंत्रे ५
प्रकाशः॥
मित्रसप्तमी स्त्री मार्गशीर्ष
शुक्लसप्तमी। यथा। अदितेः
कश्यपज्जज्ञे मित्रो नाम दिवा
करः। मार्गशीर्षस्य मासस्य
शुक्लपक्षे शुभे तिथौ॥ सप्त
म्यां तेन सा ख्याता लोकेऽस्मि
न् मित्रसप्तमी। तत्रोपवासः क
र्तव्यो भक्ष्यानाद्य फलानि
वा॥ इति श्रीगोविंदानंदाचा
र्यकृत संवत्सरकौमुदीधृत
भविष्यपुराणवचनं॥
मिथिला स्त्री देशविशेषः॥
तिरुत इति भाषा। तन्नामका
रणं यथा। अराजकभयं नॄ
णां मन्यमाना महर्षयः। देहं
सममथुः स्म निमेः कुमारः सम
जायत जन्मना जनकः सोऽभू

हैदेहस्तु विदेहजः । मिथिलो
मथनाज्जातो मिथिला येन
निर्म्मिता । इति श्रीमद्भागवते
९ स्कन्धे १३ अध्यायः । अपि च
निमेः पुत्त्रस्तत्रैव मिथिर्नाम
स महान् स्मृतः । प्रथमं भुज
बले येन तैरहुतस्य पार्श्वतः
निर्म्मितं स्वीयनाम्ना च मि
थिलापुरमुत्तमं । पुरीजन
नसामर्थ्यात् जनकः स च की
र्त्तितः । इति भविष्यपुराणं ।
मिथ्याचारः त्रि कपटाचारः ।
दाम्भिक इत्यर्थः । इति वक्ष्य
माणश्लोकटीकायां श्रीधर
स्वामी । यथा । कर्म्मेन्द्रियाणि सं
यम्य य आस्ते मनसा स्मरन् । इ
न्द्रियार्थान् विमूढात्मा मिथ्या
चारः स उच्यते । इति श्रीभगवद्गी
तायां ३ अध्यायः ॥
मिश्रेया स्त्री शाकविशेषः
शुलफा इति भाषा । तत्पर्य्या
यगुणाः । शतपुष्पा शताह्वा
च मधुरा कारवी मिसिः । अति
च्छत्रा सितच्छत्रा संहितच्छ
त्रिकापि च । छत्रा शालेयशा
लीनौ मिश्रेया मधुरा मिसिः ।
शतपुष्पा लघु स्तीक्ष्णा पित्त

कृद्दीपनी कटुः । उष्णा ज्वरा
निलश्लेष्मव्रणशूलाक्षिरोग
हृत् । मिश्रेया तद्गुणा प्रोक्ता
विशेषाद्योनिशूलनुत् । अग्नि
मान्द्यहरी हृद्या बद्धविट्कृमि
शूलहृत् । रूक्षोष्णा पाचनी
कासवमिश्लेष्मानिलान् हरेत् ।
इति भावप्रकाशः ॥
मिष्टपाकः पु शर्करारसपक्क
फलादिः । मोरब्बा इति पार
स्यभाषा । तदेकप्रकारो यथा
अपक्काम्रं द्विखण्डं कृत्वा तन्म
ध्ये शलाकया छिद्रजालकर
णानन्तरं चूर्णमिश्रितजले द
ण्डचतुष्टयं स्थापयित्वा जलेन धौ
तं कुर्य्यात् । ततो जलेन सिद्धं
कृत्वा जलस्रावणं एवं एकमेक
तारवत् शर्करारसे मग्नकर
णानन्तरं तापं दद्यात् । रसे
घनीभूते शुद्धं यावत् ता
पेन निष्पन्नो भविष्यति । इति
पाकराजेश्वरः ॥
मुकुटं क्ली स्वनामख्यातशि
रोभूषणं । तत्पर्य्यायः । मकु
टं ६ मौलीकः ७ शेखरः ८ अ
वतंसः ९ वतंसः १० उत्तंसः ११
उष्णीषकं १२ कोटीरकं

१३ । इति शब्दरत्नावली ॥
मुक्ता स्त्री रत्नविशेषः ॥ तत्
पर्य्यायः । शुक्तिबीजं २७ हा
री २८ । इति शब्दरत्नावली ॥
ऊवले २९ । इति जटाधरः ॥
मुक्तिः स्त्री मोक्षः । तत्पर्य्यायः
अपुनर्भवः ९ क्षिवः १० अ
क्षरं ११ । इति जटाधरः ॥
मुखदूषिका स्त्री मुखजात
क्षुद्ररोगविशेषः । वयसफो
डा इति भाषा । तल्लक्षणमाह ।
शाल्मलीकण्टकप्रख्याः कफ
मारुतपित्तजाः । जायन्ते पिड
का यूनां ज्ञेयास्ता मुखदूषि
काः । अख्याः स्वरूपाः । एता यू
नामेव मुखे भवति स्वभावात् ।
अथ तच्चिकित्सा । अर्गुलस्य च
तत्रैषा मुखलेपः कनिष्ठकः
मध्यमस्तु विभागः स्यादुत्तमो
हिङ्गुला भवेत् । स्थितिकालो
पि तस्योक्तो यावत् कल्को न
शुष्यति । शुष्कस्तु गुणहीनः
स्यात्तथा दूषयति त्वचं ॥
मुखलेपमाह । लोध्रधान्य
वचालेपस्तारुण्यपिडकापहः
तद्वद्गोरोचनायुक्तं मरिचं मु
खलेपनं ॥ सिद्धार्थकः ।

वचा लोध्रः सैन्धवैश्च प्रलेप
ने । वमनञ्च निहन्त्याशु पि
डका यौवनोद्भवा । केवलाः
पयसा पिष्टा स्तीक्ष्णाः शा
ल्मलिकण्टकाः । आलेपे अ
हमेतेन भवेत् पद्मोपमं मुखं
इति भावप्रकाशः ॥
मुखवेष्टनं क्ली ग्रन्थारम्भे तत्र
वक्तव्यकथनं । तस्य नामान्तरं
अनुक्रमणिका । भूमिका ।
यथा । इति छन्दोमञ्जर्य्यां मुख
वेष्टनाख्यप्रथमस्तवकः । इति
तन्मुख्यकर्त्तृगङ्गादासवैद्येन
लिखितं ॥
मुखवाद्यं क्ली शिवपूजान्ते
वम् इति शब्देन गालवाद्यं ॥
यथा । लिङ्गं निर्म्माल्यविधिव
त् विधिवत् पूजयेच्छिवं । षड
क्षरं जपित्वा वै मुखवाद्यं शु
चिस्मिते ॥ इति लिङ्गार्च्चन
तन्त्रे १५ पटलः । अपि च । मु
खवाद्यं सदा तेहि कृत्वा तु पर
मेश्वरि । मातृकामन्त्रसहितं
मुखवाद्यं सुदुर्लभं । आका
रादिक्षकारान्तमनुलोमविलो
मतः । उच्चार्य्य परमेशानि मु
खवाद्यं शुचिस्मिते । सबिन्दुं

वर्णां शुद्धाख्यं पंचाशन्मातृकाश्रिये। अनुलोमविलोमेन सर्वेन्वर्णवरानने। अनेनैव विधानेन मुखवाद्यं करोति यः। स सिद्धः सगणः सोपि साक्षी वोलात्र संशयः। मृत्युंजयोः हे देवेशि मुखवाद्यप्रसादतः। यस्मिन् काले महेशानि ग्रहो वलवान् भवेत्। तस्मिन्काले महेशानि मुखवाद्यं करोम्यहं। ततश्रुत्वा परमेशानि ग्रहराजः स साक्षये। पलायते महेशानि तत्क्षणात् परमेश्वरि। येन शास्त्रविहितं मुखवाद्यं विना प्रिये स सर्वयातनाभोगी अन्ते कीरवतां व्रजेत्। इति च लिंगार्चनतंत्रे ८ पटलः॥

मुषरः पुं अस्त्रविशेषः॥ मुगुर इति भाषा। तत्पर्य्यायः। मुद्गरः ५। इति जटाधरः॥

मुषली स्त्री तालमूली। तत्पर्य्यायः। मुषली ८ तालिका ९ तालमूलिका १० इति शब्दरत्नावली। अर्शोघ्नी ११॥ इति जटाधरः। अस्या गुणाः। तालमूली तु विदुर्द्धिर्मुषली परिकीर्त्तिता। मुषली मधुरा वृष्या वीर्य्योष्णा बृंहणी गुरुः। तिक्ता रसायनी हन्ति गुदजाननिलं तथा। इति भावप्रकाशः॥

मुष्ककः पुं वृक्षविशेषः। घंटापारुल इति भाषा। तत्पर्य्यायः। घण्टा १० घण्टाकः ११ फाटः १२ इति शब्दरत्नावली॥

मुस्तकः पुं स्त्री तृणमूलविशेषः। मता इति भाषा। तत्पर्य्यायः। अभ्रनामकः १० श्रीभद्रा ११ भद्रकः १२ भद्रा १३ इति शब्दरत्नावली॥

मूर्त्तिः स्त्री स्वरूपः। यथा। आचार्य्यो ब्रह्मणो मूर्त्तिः पिता मूर्त्तिः प्रजापतेः। भ्राता मरुत्पते मूर्त्तिं माता साक्षात्क्षितेस्तनुः। दयाया भगिनी मूर्त्तिः धर्म्मस्यात्मातिथिः स्वयं। अग्नेरभ्यागतो मूर्त्तिः सर्वभूतानि चात्मनः॥ इति श्रीभागवते ६ स्कन्धे ७ अध्यायः॥

मूर्द्धावसिक्तः पुं वर्णसंकरभेदः। स तु क्षत्रियायां ब्राह्मणेनोत्पादितः। यथा। स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान् सुतान्। सदृशानेव तानाहुर्मातृदोषविगर्हितान्। इति मानवे १० अध्यायः ६ श्लोकः॥ स्त्रीष्विति अनुलोम्येन अव्यवहितवर्णजातीयासु भार्य्यासु द्विजातिभिर्ये उत्पादिताः पुत्राः। यथा। ब्राह्मणेन क्षत्रियायां क्षत्रियेण वैश्यायां वैश्येन शूद्रायां। तान् मातृहीनजातीयत्वदोषेण गर्हितान् पितृसदृशान् न तु पितृसजातीयान् मन्वादय आहुः। पितृसदृशग्रहणात् मातृजातेरुत्कृष्टाः पितृजातितो निकृष्टा ज्ञेयाः। एतेषाञ्च नामानि मूर्द्धावसिक्तमाहिष्यकरणाख्यानि याज्ञवल्क्यादिभिरुक्तानि। इमेयश्चैषा मुशानसोक्ताः। हस्त्यश्वरथशिक्षा अस्त्रधारणञ्च मूर्द्धावसिक्तानां। नृत्यगीतनक्षत्रजीवनं शस्यरक्षाच माहिष्याणां। द्विजातिशुश्रूषा धनधान्याध्यक्षता राजसेवा दुर्गान्तःपुररक्षाच पारशवोग्रकरणानामिति। इति तट्टीकायां कुल्लूकभट्टः॥

1225

मृगया स्त्री राज्ञां वनेषु मृगहननक्रिया। तन्नियमविधिर्यथा। चचार मृगयां तत्र दृप्त आत्तेषुकार्मुकः। विहाय जायामतदर्हां मृगव्यसनलालसः ५। आसुरीं वृत्तिमाश्रित्य घोरात्मा निरनुग्रहः। न्यहनन्निशितैर्बाणैर्वनेषु वनगोचरान् ६। तीर्थेषु प्रतिदृष्टेषु राजा मेध्यान् पशून् वने। यावदर्थमलं लुब्धो हन्यादिति नियम्यते ७॥ इति श्रीभागवते ४ स्कन्धे २६ अध्यायः॥ आत्ता गृहीता इषवो रागद्वेषादिरूपाः कार्मुकञ्च भोगाभिनिवेशरूपं येन। जायां विवेकवतीं बुद्धिं विहाय। अतदर्हां मागानर्हां। तत्र हेतुः स्वरूपेति मृगाः विषयाः तेषु व्यसनं भोगासक्तिस्तेन लालसः आतिस्पृहायस्य॥५॥ घोरो रागादिभिः वनेषु भजनीयदेशेषु। वनगोचरान् भजनीयविषयान्। न्यहनत् भजनीयदेशात् हृतवान्। कथं पलेतस्यमेव ६॥ तर्हि आसुरीं वृत्तिमाश्रित्य इति कि

मिति मृगया निषिध्यते । क
श्चापद्येतावद्राज्ञो विहितैव
सा । अध्यात्मपक्षेपि जीवस्य
विषय भोगो विहित एव इत्या
शंक्याह तीर्थेष्विति त्रिभिः ।
अयंभावः । न हि मृगया वि
धीयते रागप्राप्तत्वात् किंतु
नियम्यते प्रवृत्तिः संकोच्यते
नियममेव षड्भिः दर्शयति
यदि अल मत्स्यै लब्धो रा
गी सन् हन्यात् तर्हि तीर्थेषु
श्राद्धादिष्वेव । तत्रापि श्रुति
दृष्टेषु प्रख्यातेष्वेव न निम्नगा
ह्रादिषु । तत्रापि राज्ञैव । मेध्या
नेव । वन एव । यावदुपयोग
मेवेति । एवं जीवस्य विषय
सेवापि यावदुपयोगं न यथे
ष्टमिति नियम एवेत्यर्थः ॥
७ ॥ इति तट्टीकायां श्रीधरस्वा
मी ॥ मृतवत्सा स्त्री गर्भो
वधि वर्षत्रये यावत् पुनः पु
त्रस्तत्रसंताना ॥ तल्लक्षण
प्रांतोपायानि यथा ॥
गर्भः संजातमात्राद्वा पञ्चात्
मासाच्चवत् सवात् । स्त्रियते द्वि
त्रिवर्षाद्वा यस्याः सा मृतवत्
सिका । तत्र योगं प्रकर्तव्यं

यथा शंकरभाषिते । मार्गशी
र्षे तथा ज्येष्ठे हर्तिमालेपि ते
शुभे । नूतने कलसे शुभे पूज
येन्मातृकाः सुधीः । शालाफ
लसमायुक्ते नवरत्नसमन्विते
सुवर्णरसिकायुक्ते षट्कोण
मंडलेस्थिते । तन्मध्ये पूजयेद्दे
वीं पक्वांतीनाम विश्रुतां । गंध
पुष्पैस्तथा धूपैर्दीप नैवेद्यसं
युतैः । पूजयेद्भक्तिभावेन
मद्यमांसैः समत्स्यकैः ॥ ब्रा
ह्मी माहेश्वरी चैव कौमारी
वैष्णवी तथा वाराही च तथा
चैंद्री षट्पत्रेषु च मातरः ॥
पूजयेन्मध्यपत्रेन केंकारे ना
म विश्रुते । दधिभक्तानि
पिष्टानि समसंख्यानि कार
येत् । षट्संख्येषु च पत्रेषु मा
तृभ्यः कल्पयेत् पृथक् । चिले
भ्यः समसंपिंडं शुचिस्थानेव हिः
क्षिपेत् । तैर्भुक्तं गृहमाग
त्य चैकाग्रे याग मारभेत् ॥
कन्यका योगिनी वामाभोज
येत् सकुटुंबकैः । दक्षिणाद्दा
पयेत्तासां देवता येन चासना
विसृज्य देवताश्चापयेत्पातत्
कलसोदकं ॥ शाकुनंवीतये

ह्रीमान् शुभेन शुभमादिशे
विपरीते पुनः कार्योयागो न
त्वसिद्धिदे । प्रतिवर्षमिदं का
र्यं दीर्घजीविसुतं लभेत् ॥
ॐ ह्रीं क्लैं पक्वांतीदेवतायै
नमः । अनेन मंत्रेण पूजा ज
पश्च कार्यः ॥ प्रात्युरवः
कृतिकाकृते वंध्याकर्कोट
की हरेत् । तत्कंदं पेषयेत्तो
यैः कर्षमात्रं सदा पिवेत् ॥
यावीजपूरं इवमूलमेकं क्षी
रेण पक्वं प्रपिवेत् विमिश्र
श्रुतेन निर्जयात्तु पतिप्रया
ति दीर्घायुषं सा तनयं प्रसूते
मंजिष्ठा मधुकं कुष्ठं त्रिफला
शर्करा वला । मेदा पयस्या का
कोली मूलं चैवाश्वगंधजं ॥
अजमोदा हरिद्रे द्वे हिंगुः कुट्
करोहिणी । उत्पलं कुमुदं द्रा
क्षा काकोलो मूलकद्वयं ॥
एतेषां कर्षकै भार्गिर्घृतप्रस्थं
विभावयेत् । शतावरीरसे क्षी
रं घृतस्पंदं चतुर्गुणं ॥ संपिवे
न्नियतं नारी निसं स्त्रीव चपास्य
ते । पुत्रान् जनयते नारी मेधा
ढ्यान् प्रियदर्शनान् ॥ या चै
वास्थिरगर्भा स्यात् या

नारी जनयेन्मृतं । अल्पायुषं
च जनयेत् या च कन्याः प्रसूय
ते । योनिदोषे रजोदोषे गर्भ
स्रावे च शस्यते । प्रजावर्द्धनमा
युष्यं सर्वग्रहनिवारणं । नाम्ना
फलघृतं ह्येतदायुष्यं परिकी
र्तितं । नोक्तं च लक्षणामूलं
वदंत्यत्र चिकित्सकाः । जीव
वत्सा शुक्लवर्णा घृत मत्र तु
दीयते । अरण्यगोमयेनात्र वह्नि
ज्वाला प्रदीयते । अत्र पयस्या
क्षीरयुक्त भूमिकाकुष्मांडे । उत्प
ले नीले । इति इंद्रजालतंत्रे मृ
तवत्सा चिकित्सा ॥ अन्यच्च । अ
श्वत्थवत्सा सुतजीवनोपायः ॥
ईश्वर उवाच । गर्भः संजातमात्रे
ण एको मासद्वयं त्रयं । स्त्रिय
ते द्वित्रिवर्षाद्वि यस्याः सा मृत
वत्सका ॥ गृहीत्वा शुभनक्षत्रे
अपामार्गस्य मूलकं । गृहीत्वा
लक्ष्मणामूलं एकवर्णगवां पयः
पीत्वा सा लभते गर्भं दीर्घजीविस
तां भवेत् । यद्वैव कल्पनदात्वं
नान्यथा शंकरोदितं ॥ वेध्या
कर्कोटिकाकंदं भोचारोजेन पे
षयेत् । ऋतुकाले तु सप्ता
हं दीर्घजीविसुता भवेत् ॥

मृतं सुतं प्रकुर्व्वीत यथा शंक
रभाषितं ॥ मार्गशीर्षेऽथवा
ज्यैष्ठे श्रावणे वा शुभे दिने ॥
नूतनं कलसं पूर्णं गन्धतो
येन कारयेत् । शाखाफल
समायुक्तं नवरत्नसमन्वितं ॥
सुवर्णमुद्रिकायुक्तं षट्कोण
मण्डले स्थितं । तन्मध्ये पूजयेद्दे
वीमेकान्तीनामविश्रुतां । गन्ध
पुष्पाक्षतैर्धूपैर्दीपैर्नैवेद्यसं
युतैः । अर्च्चयेद्भक्तिभावेन दु
ग्धं माषं तथा मधु । वाराही च
तथा चैन्द्री ब्राह्मी माहेश्वरी त
था । कौमारी वैष्णवी देवीः षट्
सु कोणेषु सान्तरः । पूजये
न्मन्त्रभावेन दधिपिण्डानि कार
येत् । सप्तसंख्याप्रमाणानि
षट्संख्या षट्सु पात्रतः । स
प्तमं तु पृथक्कृत्वा शुचिस्थाने
विशेषतः । तद्दत्तं गृहमागच्छे
त्कन्यका बटुकस्त्रियः । भोज
येद्दक्षिणां दत्त्वा प्रणामं कारये
त्ततः । विसृज्य स्वेष्टदेवीं च ग्रा
सं तत्सकलेष्टदः । शकुनेवी
क्षयेद्धीमान् शुभेन शुभमादि
शेत् । विपरीते पुनः कार्य्यं या
गं तावत् सुसिद्धिदं ॥ मृतव
षमिदं कार्य्यात् दीर्घजीविसुतं
लभेत् । सिद्धियोगमिदं ख्यातं
नान्यथा शङ्करोदितं ॥ अथ
मन्त्रः ॥ ॐ परब्रह्म परमात्म
ने अमुकीगृहे दीर्घजीविसु
तं कुरु कुरु स्वाहा ॥ अथ का
कवन्ध्या । ईश्वर उवाच ॥ एकं
पुत्रवती या सा काचिद्वन्ध्या भ
वेद्यदि । काकवन्ध्या तु सा ज्ञेया
चिकित्सा तत्र कथ्यते । वि
ष्णुक्रान्तां समूलां तु पिष्ट्वा माहि
षदुग्धके । महिषीनवनीतेन
ऋतुकाले तु भक्षयेत् । एवं स
प्तदिनं कुर्य्यात् पथ्यां तु मिष्ट
पूर्ववत् । गर्भं सा लभते नारी
काकवन्ध्या सुशोभने । अश्वगं
धीयमूलेन ग्राहयेत् पुष्पभा
स्करे । पेषयेन्माहिषीक्षीरे पला
र्द्धं भक्षयेत् सदा ॥ समाहाल
भते गर्भं काकवन्ध्या चिरायुषं
यस्मै कस्मै न दातव्यं नान्यथा
शङ्करोदितं ॥
अथ मन्त्रः । ॐ नमः शक्तिरूपाय
अस्या गृहे पुत्रं कुरु कुरु स्वाहा
१०००० जपात् सिद्धिः । इति
श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रे
यसंवादे जन्मवन्ध्यादीनां प्र

करणंनाम १७ सप्तदशपटलः
कविकुण्ठे १० पटलः ॥
मृत्युः त्रि प्राणवियोगः । त
न्मान्तरे । अध्ययः २७ तत्समा
णं यथा । अहमात्मोद्धवा
मीषां भूतानां सुहृदीश्वरः ॥
अहं सर्वाणि भूतानि तेषां स्थि
त्युद्भवाप्ययः । इति श्रीमद्भाग
वते ११ स्कन्धे १६ अध्यायः १०
श्लोकः ॥
मेखला स्त्री स्त्रीकट्याभरणं ।
चन्द्रहार गोट इत्यादि भाषा
तत्पर्य्यायः । कक्षा ८ रस
ना ९ रशना १० कक्षा ११ स
प्तकी १२ सारसनं १३ । इतिश
ब्दरत्नावली ॥ कलापः १४
इति जटाधरः ॥
मेघः पुं वारिवाहः । तद्वैदि
कपर्य्यायाः । अद्रिः १ ग्रावा २
गोत्रः ३ बलः ४ अश्नः ५
पुरुभोजाः ६ वलिशानः ७
अश्मा ८ पर्व्वतः ९ गिरिः १०
व्रजः ११ चरुः १२ वराहः १३
शम्बरः १४ रौहिणः १५ रैवतः
१६ फलिगः १७ उपरः १८ उप
लः १९ चमसः २० अहिः २१
अभ्रं २२ बलाहकः २३ मेघः
२४ दृतिः २५ ओदनः २६ वृ
षन्धिः २७ वृत्रः २८ असुरः २९
कोशः ३० । इति त्रिंशन्मेघना
मानि । इति वेदनिघण्टौ १
अध्यायः ॥
मेथिका स्त्री क्षुपविशेषः ॥
मेथिशाक इति भाषा । अथ
मेथीवनमेथी । तयोर्नामगु
णाः । मेथिका मेथिनी मे
थी दीपनी बहुपत्रिका । बोध
नी गन्धबीजा च ज्योतिर्गन्ध
फला तथा । वल्लरी चन्द्रिका
मेथ्या मिश्रपुष्पा च कैरवी ।
कुञ्चिका बहुपर्णी च पीतबी
जा मुनीरिका । मेथिका वात
शमनी श्लेष्मघ्नी ज्वरनाशिनी
ततः स्वल्पगुणा वन्या वाजिनां
साक्षपूजिता । इति भावप्रकाशः
मेधावी[न्] त्रि मेधाविशिष्टः ॥
तद्वैदिकपर्य्यायाः । विप्रः १
विग्रः २ गृत्सः ३ धीरः ४ वे
नः ५ वेधाः ६ कण्वः ७ ऋभुः
८ नवेदाः ९ कविः १० मनीषी
११ मन्धाता १२ विधाता १३ वि
पः १४ मनश्चित् १५ विपश्चित्
१६ विपन्यवः १७ आकेनिपः १८
उशिजः १९ कीस्तासः २०

अद्दातयः २१ मतयः २२ मत
ग्याः २३ वाग्यतः २४ इतिचतु
र्विंशतिर्मेधाविनामानि । इति
वेदनिर्घण्टौ ३ अध्यायः ॥
मेषः पुं पशुविशेषः । भेडा इ
ति भेडा इतिच भाषा ॥ तत्
पर्य्यायः । रोमशः १४ मेडुः
१५ मेढ्रकः १६ मेण्ढः १७ हु
डुः १८ । इति शब्दरत्नावली
मेण्ढकः १९ उडुः २० संफलः
२१ इतिहेमचंद्रः ॥
मेषी स्त्री मेडी । तत्पर्य्यायः
एडका ४ मेषिका ५ इतिश
ब्दरत्नावली । ऊरवी ६ रुजा
७ अविला ८ वेणी ९ । इति
हेमचंद्रः ॥ तन्मांसगुणाः ।
छाग मेष वृषाश्वाद्याः ग्राम्याः
प्रोक्ता महर्षिभिः । ग्राम्यावा
तहराः सर्वे दीपनाः कफपित्त
लाः । मधुरा रसपाकाभ्यां बृ
हणा बलवर्द्धनाः ॥
तस्या दुग्धगुणाः । आविकंल
वणंस्वादुस्निग्धोष्णंचाश्मरी
प्रणुत् । अहृद्यं तर्पणं केश
शुक्र पित्त कफप्रदं ॥ गुरु
कासे ऽनिलोद्भूते केवले वाति
लेवरं । इति भावप्रकाशः ॥

मेलंदः पुं भ्रमरः । यथा ।
श्रीमन्मुरपदाम्भोरुहनिःस
रन्मकरन्दसंदोहास्वादनतंदि
तमनोमेलंद इत्यादि । इति
वररुचिकृत पत्रकौमुद्यां प्रा
ज्यप्रशस्तिः ॥
मोहनभोगः पुं समिताशर्क
राघृतादिकृतमिष्टान्नविशेषः
इति पाकराजेश्वरः ॥
मोखं त्रि सुखसंवंधीवंप्र
त्वसेवयापीनपायं । तत्तुग्रभ
त्वभक्तगणरूपं तत्र क्लीवं । सं
सर्गद्रूपस्य तस्य प्रायश्चित्तं
यथा । सुमंतुः । यश्चैतैर्योनमो
खच्चैर्वाणां संबंधानां मन्यत
मेनसहसंपर्कं मियात् तस्या
प्येतदेव प्रायश्चित्तं विदथ्या
त् । इयात् कुर्य्यात् । एतदेवे
ति द्वादशवार्षिक मित्यर्थः
अत्र याजनादीनां मन्यतमेन
संवत्सरेण पततीत्यवगम्यते
इति शूलपाणिकृत प्रायश्चि
त्तविवेकः ॥

य यकारः । तस्यध्याने यथा
धूम्रवर्णां महारौद्रीं चतुर्ज्जार
क्तलोचनां । रक्तांबरपरीधा
नां नानालंकारभूषितां ॥
महामोक्षप्रदां नित्यां अष्टसि
द्धिप्रदायिनीं । एवं ध्यात्वाय
कारं तु तन्मंत्रं दशधा जपेत्
तत्प्रणाममंत्रो यथा ॥
त्रिशक्तिसहितं वर्णं त्रिविंदुस
हितं सदा । प्रणमामि सदा व
र्णं शक्तिमामोक्षमव्यये । इति
वर्णोद्धारतंत्रं ॥ तस्य नामा
नि यथा । यो वाणी वसुधा
वायु र्विकृतिः पुरुषोत्तमः
युगांतः श्वसनः शीघ्रो धूम्रा
र्चिः प्राणिसेवकः । शंखोभ्र
मोजटी लोला वायुवेगी य
शस्करी । संकर्षणः त्वपाव
लोहृदयंकपिलाप्रभा । आग्ने
यो व्यापकस्त्यागो होमोया
नेश्वमा सुखं । चंडः सर्वेश्वरी
धूम्र श्चामुंडा तमुखेश्वरी ।
लक्षणामलयो मातांहसि
नी भृंगिनायकः । तेनसः
शोषकीं मीनो धनिष्ठानंग
वेदिनी । सेहः सोमः पक्षिना
मा पापहा प्राणसंज्ञकः ॥

इति नानातंत्रशास्त्रं ॥
यज्ञः पुं यागः । तद्वैदिकप
र्य्यायाः । वेनः २ अध्वरः ३ मे
धः ४ विदथः ५ नार्य्यः ६ सव
नं ७ होत्रा ८ इष्टिः ९ देवताभा
१० मखः ११ विष्णुः १२ इंदुः १३
प्रजापतिः १४ घर्म्मः १५ इति
पंचदश यज्ञनामानि । इति
वेदनिर्घण्टौ ३ अध्यायः ॥
यज्ञसूत्रं क्ली यज्ञोपवीतं ॥
गुणभेदेनतत्सूत्र नियमोयथा
सत्ये स्वर्णमयं सूत्रं त्रेतायां
राजतं तथा । द्वापरे ताम्रजं
प्रोक्तं कलौ कार्पाससंभवं ।
इति बृहद्राजमार्तण्डः ॥
अन्यच्च । यज्ञार्थं धार्य्यते सू
त्रं यज्ञं ब्रह्मण्यमिष्यते ॥
स्वर्णं रौप्यं ताम्र सूत्रं पट्टं
कार्पास वार्हिषं । मृगाजिने
गुद्दंशंखी यथालब्धं विधा
यच । यज्ञसूत्रं परिचवद्रुस
लिंगक्रियात्मकं ॥ न तमवि
यमोग्राह्यःस्वब्रह्मण्यसंकया
इति वृद्धहारीतसंहिता ॥
यमुना स्त्री स्वनामख्यातनदी
तत्पर्य्यायः । कृपासा ८ तापी ९
कलिन्दनंदिनी १० यमनी ११

यमी ४२। इति शब्दरत्नावली
कलिन्दशैलजा ५३ सूर्य्यसु
ता ५४। इति जटाधरः॥
यवद्वीपः पुं उपद्वीपविशेषः
यावा इति भाषा। यथा। यत्न
वन्तो यवद्वीपं सप्तराज्योपशो
भितं। सुवर्णरूप्यकद्वीपं सु
वर्णाकरमण्डितं। इति वाल्मी
कीये रामायणे किष्किन्ध्या
काण्डे ४० सर्गः॥ अतःपरं य
त्नवन्तो भूत्वा सप्तराज्योपशो
भिते यवद्वीपे तथा सुवर्णद्वी
पे विचेतव्य मिति शेषः। सुव
र्णाकरमण्डितमिति सुवर्णं उ
त्पद्यते यैस्तैः शोभिते। इति रा
मायणतिलकनाम्नटीका।
यवनः पुं जवनः। सच यवन
देशः। ययातिराजपुत्त्रतुर्व
सुवंशः। सगरराजेनैषां सर्व
शिरोमुण्डनं सर्वधर्म्मबहिष्कृ
त्य... चकृतंते चात्मधर्म्मपरित्या
गात् म्लेच्छत्वं ययु रिति वि
ष्णुपुराणं कृतवान् यवनः सो
सलमानेशोरजेशाभयजातिका
चकः। यवनादीनां राज्यकाला
यथा। सप्त गर्द्दभिनश्चापि
शका श्चाष्टादश स्मृताः॥

यवनाष्टौ भविष्यन्ति तुषारा
श्चभविष्यति। अष्टौ ते यवना
राज्यं वर्षाणां परिसंख्यया।
भोक्ष्यन्त्यशीतिं तदृच्च येभिरा
द्रैभिनः स्मृताः। शतानित्री
णि वर्षाणां द्व्यशीतिश्च शता
नि वै। शकानां राज्यकालः स्या
दूर्द्विष्यानिश्चयोगतः। शतस्या
र्द्धचतुर्थानि वर्षाणां राज्यभा
गिनः। मरुण्डानां स्मृताः काला
यस्मिन् भोक्ष्यन्ति ते महीं। मरुण्डा
वृषलैः सार्द्धं तथान्ये म्लेच्छसं
भवाः। भोक्ष्यन्ति राज्यं प्राच्येषु
भविष्य तद्धयाविते। शतानि
त्रीणि वर्षाणां श्रोएडूराज्यभु
जः स्मृताः। अष्टाशीति पार्वतेया
स्त्वेहेषते परिसंख्यया। शतार्द्ध
मन्यस्तुतथा राज्यं भोक्ष्यन्ति ते न
पाः। समषष्टिस्तु वर्षाणि दश
तीवाह्यास्ततः स्मृताः तेषूच्छन्नेषु
कालेषु ततः किलकिला नराः
भविष्यन्तीह यवना धर्म्मतः का
मतोऽर्थतः। तैर्विमिश्रा जनप
दा आर्य्या म्लेच्छाश्च सर्व्वशः॥
विपर्य्ययेन वर्त्तन्ते ज्ञनाधिष्यन्ति
वै प्रजाः। लुब्धानिष्टवरांश्चैव
भविता म्लेच्छादर्शया॥ तेषां

अतीते पर्य्याये बहुवर्षेषु
स्वदा। राजानः संप्रणश्यन्ति
कालेन महता ततः। कल्कि
नाताडिताः सर्व्वे आर्य्या म्लेच्छा
श्च सर्व्वशः। अधर्म्मिकाश्च ये
सर्व्वे पाषण्डाश्चैव सर्व्वशः।
युष्टे नृपतिशार्द्दूले वै संध्या
शिष्टे चैवकलौ॥ इति ब्र
ह्माण्डपुराणे ७४ अध्यायः
यवप्रख्या स्त्री क्षुद्ररोगविशे
षः। तल्लक्षणं यथा। यवाका
रा सुकठिना ग्रथिता मांससं
श्रिता। पिडका श्लेष्मवाता
भ्यां यवप्रख्येति सोच्यते।
यवाकारा मध्ये स्थूला प्रान्ते
कृशा॥ तच्चिकित्सा यथा।
अथालजी यवप्रख्यां पूर्व्वं स्वे
देरूपाचरेत्। मनःशिलादे
वदारु कुष्ठकल्कैः प्रलेपये
त्। पक्वां व्रणविधानेन य
ष्ट्वाकेन प्रसाधयेत्। इति
भावप्रकाशः॥
याच्ञा स्त्री याचनं। तद्वेदि
कपर्य्याया। ईमहे १ याम्मि २
मन्महे ३ ददृहि ४ शाकि ५
पूर्द्धि ६ मिमिढि ७ मिमीहि ८
रिरिढि ९ रीरीहि १० पीपरत ११

यन्तारः १२ यन्धि १३ इषुध्याति
१४ मदेमहि १५ मनामहे १६
मायते १७ इति सप्तदश याच्ञा
कर्म्माणः। इति वेदनिघण्
टौ ३ अध्यायः॥
यात्रा स्त्री देवाः षोडशप्रका
रोत्सवः। यथा। वैशाखे सं
चयात्राच चंदनागुरुकल्पना
ज्येष्ठे महास्नानयात्रा ध्रुवत्वा
वी दिनत्रये। आषाढे रथया
त्राच द्विदिनव्यापिनी परा।
श्रावणे जलयात्राच वस्त्रभू
षणचामरैः। भाद्रे यात्रा सु
नेनाख्या चण्डिकाया दिनत्रये
आश्विनेच महापूजा यात्राय
त्र बलिप्रिया। कार्त्तिके दी
पयात्राच नवान्न मग्रहायणे
पौषे चोगणयात्रा वस्त्रालं
कारभूषणैः। माघे मासि म
हादेवी रंटन्तीच चतुर्दशी॥
दोलाकेलिः फाल्गुने च चैत्रे
यात्रा चतुर्दशी॥ हृतीयात्रा
रासयात्रा वासंती नीलयात्रि
का। एवं यात्रा मयाप्रोक्ता षो
डशी भवमोचनी। इति कामके
श्वरतन्त्रे ५५ पटलः॥
युक्तः त्रि योगारूढः। तस्य

लक्षणं यथा। ज्ञान विज्ञान
तृप्तात्मा कूटस्थो विजितेंद्रि
यः। युक्तइत्युच्यते योगी सम
लोष्टाश्मकांचनः। इति श्रीभ
गवद्गीतायां ६ अध्यायः ८
श्लोकः॥ योगारूढस्य लक्ष
णं श्रैष्ठ्यं चोक्त मुपसंहरति
ज्ञानेति। ज्ञान मौपदेशिकं वि
ज्ञान मपरोक्षानुभवः ताभ्यां
तृप्तो निराकांक्षात्मा चित्तं
यस्य। अतः कूटस्थो निर्वि
कारः। अत एव विजिता
नि इंद्रियाणि येन। अत
एव समानि लोष्टादीनि यस्य
मृत्खंड पाषाण सुवर्णेषु हे
योपादेयबुद्धिशून्यः स युक्तो
योगारूढ इत्युच्यते ८॥
इति तट्टीकायां श्रीधरस्वा
मी॥ युगाद्या स्त्री युगारंभति
थिः। यथा। अथ युगाद्याः। त
त्रैव। युगाद्या वर्षवृद्धिश्च सप्त
मी पार्वतीप्रिया। रवेरुदयमी
क्षंते न तत्र तिथियुग्मता। इत्य
नेन व्यवस्था। ब्रह्मपुराणे। वै
शाखे शुक्लपक्षे तु तृतीयायां
कृतंयुगं। कार्तिके शुक्लपक्षे
तु त्रेतारभ्यत नवमेऽहनि॥ अथ

भाद्रपदे कृष्णत्रयोदश्यां तु
द्वापरं। माघे च पौर्णमास्यां
वै घोरं कलियुगं स्मृतं। युगा
रंभास्तु तिथयो युगाद्यास्तेन
विश्रुताः। अत्र वैशाखादयः
पौर्णमास्यंता एव। ब्रह्मपु
राणे तथैव तिथिकृत्याभिधाना
त्। सत्यव्रतचिंत्ये कार्तिके न
वमेऽहनीत्यनेनैव हि सिद्धे शु
क्लपक्ष इति व्यर्थं स्यात्। तेन
भाद्रकृष्णत्रयोदशी अमायुक्
कृष्णपक्षीयेति मैथिलोक्तं नि
रस्तं॥ आसां प्रशंसामाह वि
ष्णुपुराणं। वैशाखमासस्य सि
ता तृतीया नवम्यसौ कार्तिक
शुक्लपक्षे। नभस्य मासस्य त
मिस्रपक्षे त्रयोदशी पंचदशी च
माघे। एता युगाद्याः कथिताः
पुराणैरनंतपुण्यास्तिथयश्च
तस्रः। उपप्लवे चंद्रमसो रवेश्च
त्रिष्वष्टकास्वप्ययनद्वये च उप
प्लवे ग्रहणे। पानीय मप्यत्र ति
लैर्विमिश्रं दद्यात् पितृभ्यः प्रय
तो मनुष्यः। श्राद्धं कृतं तेन स
माः सहस्रं रहस्य मेतत् पित
रो वदंति। स्नानमपि कृष्णसम
विधेयं। संवत्सरफले तत्रैव

स्यां कार्तिके तथा। मन्वादौ
च युगादौ च मासत्रयफलं ल
भेत्। इति तिथ्यादितत्वं॥
युद्धं क्ली योधने। नैघंटिक
पर्यायाः। रणः १ विवाक
२ विवादः ३ नद्वः ४ भरे ५
आक्रंदे ६ आहवे ७ आजौ
८ पृतनाज्ये ९ अभीके १०
समीके ११ ममसत्ये १२ नेम
धिता १३ संका १४ समितिः
१५ समने १६ मीळ्हे १७ पृतना
१८ स्पृधः १९ मृधः २० पृत्सु २१
समत्सु २२ समर्ये २३ समर
णे २४ समोहे २५ समिथे २६
संखे २७ संगे २८ संयुगे
२९ संगथे ३० संग्रामे ३१ वृ
त्रतूर्ये ३२ पृक्षे ३३ आणौ
३४ शूरसातौ ३५ वाजसातौ
३६ समनीके ३७ खले ३८
खजे ३९ पौंस्ये ४० महाध
ने ४१ वाजे ४२ अज्म ४३
सद्म ४४ संयत् ४५ संवत्
४६ इति षट्चत्वारिंशत् सं
ग्रामनामानि। इति वेदनिघंटौ
२ अध्यायः॥
योगः पुं विष्कंभादिसप्तविं
शतिसंख्यककालविशेषः तत्

साधनमाह। ग्रहकलाः रवी
न्दुकलायुताः खखनागैर्भ
क्ता योगा भवंति क्रमात्। अथ ग
तगतैष्यविलिप्तिकाभिर्जज्ञ
वेन गतागतनाडिकाः। इति
भास्करीयसिद्धांतशिरोमणौ
गणिताध्यायः॥ यस्य ग्रहस्य
नक्षत्रं ज्ञातुमिष्यते तस्य क
लाः कार्याः। तथा चंद्रार्कयो
र्योगस्य कलाः कार्याः। उ
भयत्र शताष्टकेन हृते प्रथ
मस्थाने गतानि द्वितीयस्था
ने गतयोगाः। अथ यान्यव
शिष्टानि गतानि स्वस्वहारेभ्यः
तानि गम्यानि स्युः तेषां ग
तानां गम्यानां विकलाः स्व
स्वगतिभिर्भाज्याः। यल्लभ्यते
तद्गतगतनाडिका भवंति। य
द्योगाणां विकला भक्ता स्व
देष्या घटिका भवंति। इति
मिताक्षरानामी तत्कृतटीका
योगमहं क्ली यद्रक्षणेन इष्ट
ज्ञानुवृत्तयने भवतितत्। यथा
पादुके योगपट्टं च तर्जन्या
बौष्मधारणं। न जीवत्पितृ
कः कुर्यात् ज्येष्ठे भ्रातरि जी
वति॥ तल्लक्षणं। यथा।

ष्टज्जातोः समायोगे वस्त्रेव
लयवद्दृढं । परिवेष्ट्य यष्टिं तु
स्निग्धं तद्योगपट्टकं ॥ इ
ति पाद्मे कार्त्तिकमाहात्म्ये २
अध्यायः ॥
योगराजगुग्गुलुः पुं वातरो
गादीनां औषधविशेषः । यथा
नागरं पिप्पलीमूलं चव्यमूष
णचित्रकं । भृष्टं हिङ्ग्वजमोदा
च सर्षपाजीरकद्वयं । रेणुकें
द्रयवौ पाठा विडङ्गं गजपिप्प
ली । कटुकातिविषा भार्गी व
चामूर्वा च पत्रकं । देवदारुक
णा कुष्ठं रास्ना मुस्ता च सैन्ध
वं । एला त्रिकण्टकः पथ्याधा
न्यकं च विभीतकं । धात्री च
त्वगुशीरं च यवक्षारोः तिला
न्यपि । एतानि समभागानि स
ह्मचूर्णानि कारयेत् । यावन्त्ये
तानि चूर्णानि तावद्देयाश्च गुग्गु
लुः । संमर्द्य सर्पिषा पश्चात्स
र्वं संमिश्रयेत्ततः । एकं पिं
डं ततः कुर्यात् धारयेत् घृत
भाजने । गुटिकाः कर्षमात्रा
स्तु खादेत्तास्तु यथोचितं ॥
यथोचितमिति दोषकालानल
लाद्यपेक्षया ॥ परिभाषा ।
च आदौ शाणोन्मितं खा
देत् ततः कर्षार्द्धमात्रकं । ततः
कर्षमितं खादेत् गुग्गुलुं च
मेतान्नरः । दिनानां सप्तके
पूर्वे गुग्गुलोः शाणमाहरेत् ।
द्वितीये कर्षमर्द्धं तु तृतीये कर्ष
ततः परं । गुग्गुलुर्योगराजो
यं महान् प्रोक्तो रसायनः ॥
मैथुनाहारपानानां नियमो
नात्र विद्यते ॥ सर्वान् वातामे
यान् हन्यात् आमवातं भगन्द
रं । वातरक्तं तथा कुष्ठं तथाऽ
ष्ट्रणानपि । अर्शांसि ग्रह
णीरोगं प्लीहगुल्मोदराण्य
पि । आनाहं मन्दमग्निं च श्वासं
कासं अरोचकं ॥ प्रमेहं नाभि
शूलं च कृमीन् क्षयमुरोग्रहं । शु
क्रदोषं रजोदोषमुदावर्त्तं भगंद
रं ॥ रास्नादिक्वाथसंयुक्तः सर्व
वातामयान् हरेत् । काकोल्या
दिशृतात् पित्तं कफमारग्व
धादिना ॥ दार्वीशृतेन मोहाख्य
गोमूत्रेण च पाण्डुतां । मधुना
मेदसो वृद्धिं कुष्ठं निम्बशृतेन
च । छिन्नाक्वाथेन वातास्र
शोफं मूलकजात शृतात् । पाट
लाक्वाथसहितो विषमूषकसंभवं ।

त्रिफलाक्वाथसंयुक्तो दारुणं
नेत्रवेदनां पुनर्नवादेः क्वाथे
न हन्ति सर्वोदराणपि ॥
अथ रास्नादिक्वाथो यथा । रास्ना
पुनर्नवा शुण्ठी गुडूच्येरण्डजैश्शृ
तं । समपाद्गते वाते सामे स
र्वाङ्गगे पिबेत् ॥ महायो
गराजो गुग्गुलुः । इति भा
वप्रकाशः ॥
योगारूढः त्रि इन्द्रियभोग्येषु
शब्दादिषु तत्साधनकर्मसु
चानासक्तः । तस्य लक्षणं य
था । यदा हि नेन्द्रियार्थेषु न क
र्मस्वनुषज्जते । सर्वसंकल्पसं
न्यासी योगारूढस्तदोच्यते ॥
इति श्रीभगवद्गीतायां ६ अ
ध्यायः ४ श्लोकः ॥ कीदृशो
ऽयं योगारूढो यस्य शमः का
रणमुच्यते इत्यत्राह यदेति
इन्द्रियार्थेषु इन्द्रियभोग्येषु
शब्दादिषु तत्साधनेषु च
कर्मसु यदा नानुषज्जते आ
सक्तिं न करोति । तत्र हेतुः
आसक्तिमूलभूतान् सर्वान्
भोगविषयान् कर्मविषयां
श्च संकल्पान् संन्यसितुं स
क्तं शीलं यस्य स । तदा यो
गारूढ उच्यते । इति तट्टीका
यां श्रीधरस्वामी ॥
योनिः पुं स्त्री प्राणिनामुत्
पत्तिस्थानं । तत्र चतुरशीति
लक्षप्रकारं यथा । चतुर
शीतिलक्षाणि चतुर्भेदाश्च ज
न्तवः । अण्डजाः स्वेदजाश्चै
वोद्भिज्जाश्च जरायुजाः । ए
कविंशतिलक्षाणि ह्यण्डजाः
परिकीर्त्तिताः । स्वेदजाश्च त
थैवोक्ता उद्भिज्जास्तत्प्रमाण
तः । जरायुजाश्च तावन्तो म
नुष्याद्याश्च जन्तवः । सर्वेषा
मेव जन्तूनां मानुषत्वं सुदुर्ल
भं । इति श्रीगारुडपुराणे प्रेत
कल्पे धर्मप्रकटनो नाम २
अध्यायः । अन्यच्च जलजा
नव लक्षाणि स्थावरा लक्ष
विंशतिः । कृमयो रुद्रसंख्या
काः पक्षिणां दशलक्षकं ॥
त्रिंशल्लक्षाणि पशवश्चतुर्ल
क्षाणि मानुषाः । सर्वयोनिप
रित्यज्य ब्रह्मयोनिं ततोऽभ्यगा
त् । इति वृहद्विष्णुपुराणं ॥
अपि च । स्थावरा विंशल
क्षश्च जलजा नवलक्षकाः ।
कृमिजा दशलक्षश्च रुद्रलक्ष

अपचितिगणः ॥ पशवो विंशल
तश्चचतुर्लक्षमानवाः । पते
षुभ्रमणं कृत्वा द्विजत्वमुपजा
यते । इतिकर्मविपाकः ॥
यौवनपिडका स्त्री युवकाले
मुखेजातःक्षुद्रस्फोटकः ॥
वयेसफोडा इति भाषा ॥
तल्लक्षणं यथा । शाल्मलीकं
टकप्रख्याःकफमारुतशोणि
तैः । जायन्ते पिडकायूनां वक्त्रे
याःमुखदूषिकाः । इति सुश्रु
ते १ भागे ४ अध्यायः ॥
अस्या श्चिकित्सा मुखदूषिका
शब्दे द्रष्टव्या ॥

र

२ रकारः । तस्य लेखनप्र
कारो । यथा । ऊर्द्ध्वादकुञ्चिता
रेखा त्रिकोणाधोगता हि सा
विपरीताः केशवब्रह्मशक्ति
रूपतिनिश्चयाः ऊर्द्धस्थिता तथा
मात्रा साशक्तिःपरिकीर्तिता ।
तस्य मध्यगता रेखा वक्तिर्
पा हि सा स्मृता ॥ ॥

निर्गुणेनःसोमसदावेष्टितकदा
चित् गुणीभवेत् ॥ तस्य ध्या
नं यथा । ललज्जिकां महारौ
द्रीं रक्तास्यांरक्तलोचनां । रक्त
वर्णां महाभुजां रक्तपुष्पोप
शोभितां । रक्तमाल्याम्बरधरां
रक्तालंकारभूषितां ॥ महा
मोक्षप्रदां नित्या मष्टसिद्धिप्र
दायिकां एवं ध्यात्वाब्रह्मरूपां
तन्मन्त्रं दशधा जपेयेत् ॥
तत्प्रणाममन्त्रो यथा ।
त्रिशक्तिसहितेदेवि आत्मादि
तत्त्वसंयुते । सर्वतेजोमयंवर्णं
सततं प्रणमाम्यहं । इतिवर्णो
द्धारतन्त्रं ॥ तस्यनामानि यथा ।
रोरक्तः क्रोधिनी रेफःपाव
कस्तेजसोमतः । प्रकाशाद
र्पणो दीप्तो रतक्लृप्ताप्रबली
भुजंगेशो मतिः सूर्यो धातु
रक्तः प्रकाशकः ॥
व्यापको रेवतीदासं ऊर्ध्वाशा
वान्हिमण्डलं । उग्ररेखास्थल
दंडो वेदकण्ठ पलापुरा ।
प्रकृतिः सुवालो ब्रह्मणश्च
शायकोधनं । श्रीकण्ठ उन्माद
द्वयंमुखी त्रिपुरसुन्दरी । सर्वं
ईर्ष्यानिजो ज्वाला श्रीशैलो ।

विषघ्नोमुखी ॥ इति नानात
न्त्रशास्त्राणि ॥
रक्तकमलं क्ली रक्तवर्णोत्प
लं । तत्पर्य्यायगुणाः । विशे
षतः सिते पद्मं पुण्डरीकमिति
स्मृतं । रक्तेकोकनदंज्ञेयं नी
लमिन्दीवरं स्मृतं ॥
धवले कमले शीते मधुरेक
फपित्तजित् । तस्मादल्पगुणं
किंचिदन्यद्रक्तोपलादिकं ॥
इतिभावप्रकाशः ॥
रक्तकरवीरकः पुं लोहितवर्ण
करवीरपुष्पवृक्षः । तत्पर्य्याय
गुणाः । करवीरःश्वेतपुष्पःश
तकुम्भोऽश्वमारकः । द्वितो
योरक्तपुष्पश्च चण्डातोलगुड
स्तथा ॥ करवीरद्वयंतिक्तंक
षायं कटुकंच तत् ॥ व्रण
लाघवकृन्नेत्रकोप कुष्ठव्रणा
पहं । वीर्य्योष्णं क्रिमिकण्डूघ्नं
भक्षितं विषवन्मतं ॥ इतिभा
वप्रकाशः ॥
रक्तखदिरः पुं रक्तवर्णखदिर
वृक्षः । तत्पर्य्यायगुणाः । खदि
रो रक्तसारश्च गायत्री दन्तधाव
नः । कण्टकी बालपत्रश्चबहु
शल्यश्च यज्ञियः ॥ खदिरः

शीतलोदन्त्यःकण्डूकासारुचि
प्रणुत् । तिक्तःकषायो मेदो
घ्नः क्रिमिमेह ज्वरव्रणान् ॥
श्वित्र शोथाम पित्तास्र पाण्डु
कुष्ठ कफान्हरेत् । इति भा
वप्रकाशः ॥
रक्तचन्दनं क्ली रक्तवर्णचन्दनं
काष्ठं । तत्पर्य्यायः । पतङ्ग ९
पतङ्ग ९ रक्तवीजं ९ । इति
शब्दरत्नावली । पूर्वलिखित
स्यास्य भावप्रकाशोक्त गुणे
पीत मित्यत्र शीतं पित्त मि
त्यत्र्च तिक्तं पठनीयं ॥
रक्तापामार्गः पुं रक्तवर्णापा
मार्गक्षुपः । रांगाआपांगा । इति
वंगभाषा । लालचिरचिरी
इतिहिंदीभाषा । तत्पर्य्यायगुणाः
अथ आरक्तचिरचिराः । रक्तो
ऽन्यो वशिरो वृत्तफलो धामा
र्गवोपिच । प्रत्यक्पर्णी केश
पर्णी कथिता कपिपिप्पली
अपामार्गोऽरुणो वात विष्ट
म्भी कफकृद्धिमः । रूक्षःपूर्व
गुणैः न्यूनःकथितोगुणवेदि
भिः । अपामार्गफलं स्वादु र
सेपाकेच दुर्ज्जरं । विष्टम्भिवा
तलं रूक्षं वातपित्त प्रसादनं ॥

इतिभावप्रकाशः ॥
रक्तः एरण्डः वृक्षविशेषः ॥
लालभेरण्डा इति भाषा त
त्पर्य्यायगुणाः। शुक्लएरण्डः आ
मण्डश्चित्रो गंधर्वहस्तकः। पंचा
ङ्गुलो वर्द्धमानो दीर्घदंडोप्यडं
बकः। रक्तोऽपरो रुबूकः स्या
द्रुरुबूको रुबु स्तथा ॥ व्या
घ्रपुच्छश्च वातारिश्चञ्चुरुत्ता
नपत्रकः। एरण्ड युग्मंमधु
र मुष्णं गुरु विनाशयेत्। शू
ल शोथ कटी वस्ति शिरःपी
डोदर ज्वरान्। ब्रध्नश्वासकफा
नाह कास कुष्ठाम मारुतान्
एरण्डपत्रं वातघ्नं कफक्रिमि
विनाशनं ॥ मूत्रकृच्छ्रहरंचा
पि पित्तरक्तप्रकोपणं। वाता
ग्रदलंगुल्म वस्तिशूल हरंप
रं। कफवात कृमीन् हंतिवृ
द्धिं सप्तविधा मपि। एरण्ड
फलमत्युष्णं गुल्मशूलानि
लापहं। यकृत्प्लीहोदराशोघ्नं
कटुकं दीपनं परं॥ तद्वन्मज्जा
च विड्भेदी वातश्लेष्मोदरापहः
इतिभावप्रकाशः ॥
रजः स्त्री प्रकृते गुणविशेषः
यथा। सत्त्वं रजस्तम इति गु
णाः प्रकृतिसंभवाः। निबध्नं
तिमहाबाहो देहे देहिन मव्ययं
५। रजोरागात्मकं विद्धि तृष्णा
संगसमुद्भवं। तन्निबध्नाति कौं
तेय कर्मसंगेन देहिनं ७ ॥ स
त्त्वं सुखे संजयति रजः कर्मणि
भारत। ज्ञानमावृत्य तु तमः
प्रमादे संजयत्युत ॥ ९ ॥
रजस्तमश्चाभिभूय सत्त्वंभव
ति भारत। रजः सत्त्वं तमश्चै
व तमः सत्त्वं रजस्तथा १० ॥
लोभः प्रवृत्तिरारम्भः कर्म
णामशमः स्पृहा। रजस्येता
नि जायन्ते विवृद्धे भरतर्षभ १२
कर्मणः सुकृतस्याहुः सात्वि
कं निर्मलं फलं। रजसस्तु फ
लं दुःखमज्ञानं तमसः फलं
१६ सत्त्वात्संजायते ज्ञानं रज
सो लोभ एवच ॥ प्रमादमो
हौ तमसो भवतोऽज्ञानमेवच
१७। ऊर्ध्वं गच्छंति सत्त्वस्था म
ध्ये तिष्ठंति राजसाः। जघन्य
गुणवृत्तस्था अधो गच्छंति
तामसाः १८ इतिश्रीभग
वद्गीतायां १४ ॥
अध्यायः ॥
रटंती स्त्री गौणचान्द्रमाघीय

कृष्णचतुर्दशी। तत्र अरुणोद
यकाले स्नानं कर्तव्यं। यथा।
नमः। माघे मासस्यसिते पक्षेर
टंत्याख्याचतुर्दशी। तस्यामु
दयवेलायां स्नात्वा नावेक्षतेय
मं। उदयवेलाया मरुणोदय
वेलयां। अनर्काभ्युदिते का
ले माघे कृष्णचतुर्दशी। स्नात्वा
यमकालेन तत्र स्नानंमहा
फलं। स्नात्वा संतर्प्य तुयमा
न सर्वपापैः प्रमुच्यते। अत्र
तिथिकृत्यत्वात् गौणचान्द्रादरः
अत्रारुणोदयकाल एवस्नाने
एवोक्ता चतुर्दश्यायमतर्पणंच।
यत्तु उदयवेलायां सूर्योदय
वेलायां अनर्काभ्युदितइतिद्वि
पदत्वेनमिति व्याख्यानं तत्स
मुद्रकरभाष्यप्रत सत्तारूपाम
ह्यस्तमयाद्दौनवलोकनेनेति। इ
तितिथ्यादितत्त्वे ॥ किंच अन
र्काभ्युदिते काले स्नानंकुर्य्या
त्सविजले। आत्तजन्मकृतंपापं
तत्क्षणादेव नश्यति ॥ रटं
तीनामविख्याता सर्वपापहरा
शिवा ॥ इति मत्स्यसूक्ते ५५
पटलः ॥ क्वचित्पुस्तके सवि
जले इत्यत्र वहिर्जले इति
पाठः। तत्रयमपूजाविधि र्य
था। माघे मासस्यसितेपक्षे रटं
त्याख्या चतुर्दशी। तस्यां संपू
जयेत्काली महाविभवविस्तरैः॥
चक्रवर्त्ती महाराज्ञो भवत्येव न
संशयः। इति हरमौलितंत्रे ७
पटलः ॥
अपिच। माघेमास्य सिते प
क्षे रटंत्याख्या चतुर्दशी। त
स्यां कालिकापूजा सर्वविघ्नो
पशांतये ॥ इति कालिका
पुराणं ॥ अपरंच ॥
माघे मासस्यसितेपक्षे रटंत्याख्या
चतुर्दशी। तस्यां प्रदोषसम
ये पूजयेन्मुण्डमालिनीं ॥
इत्याचार्य्यचूडामणिकृत तंत्र
तत्त्वार्णवधृतवचनं। अस्यास्त
प्रपामाशोद्धृतं ॥
रत्नं क्ली मणिः। तद्भेदिकप
र्य्यायाः। अंधः १ वाजः २ पयः ३
प्रयः ४ श्रवः ५ पृक्षः ६ पितुः ७
वयः ८ सिनं ९ अवः १० क्षुः ११
धासिः १२ इराः १३ इलाः १४ इषं
१५ ऊर्क् १६ रसः १७ स्वधाः १८
अर्कः १९ क्षद्मः २० नेमः २१
ससं २२ आयुः २३ सूनृता २४
ब्रह्म २५ वर्चः २६ कीलालं २७

यथाः २८ । इत्यष्टाविंशति रत्न
नामानि । इति वेदनिघण्टौ २
अध्यायः ॥
रथकः पुं मंदिरावयवविशेषः
यथा अष्टकोशेन गर्भस्य रथ
कानां तु निर्गमः । परिधेर्गुणा
भागो रथको स्तत्र कल्पयेत् ।
तत्तृतीयेन वा कुर्यात्तस्य रथ
कानां तु निर्गमे । रामत्रयं
स्थापनीयं रथकत्रितयेसदा
इति श्रीहरिभक्तिविलासे २०
विलासः ॥
रथक्रांतः पुं तालविशेषः ॥
यथा । अश्वक्रांतो रथक्रांतो
विष्णुक्रांत स्ततः परे । सूर्य
क्रांतो विधुक्रांतो वलिभिन्ना
गपल्लवाः ॥ इति पंचमहीताना
संज्ञाः सप्तकमान्मताः ॥
इति संगीतरत्नाकरः ॥
रथयात्रा स्त्री आषाढशुक्लद्वि
तीयायां श्रीजगन्नाथस्य रथारो
हणरूपोत्सवः । यथा । स्कंदपु
राणे । आषाढस्य सिते पक्षे द्वि
तीया पुष्यसंयुता ॥ तस्यां र
थे समारोप्य रामं मां भद्रया
सह । यात्रोत्सवं प्रवृत्याथ प्री
णयेच्च द्विजान् बहून् । तथा
ऋक्षाभावे तिथौ कार्या सदा
सा प्रीतये मम । मां जगन्नाथ
सा यात्रा । इति तिथ्यादितत्वे
नातः श्रेयः पदो विश्वा कृतस
वःशास्त्रसंमतः । रथयात्रैव
यात्राणां श्रेष्ठेत्याह प्रजाप
तिः ॥ इति यात्रातत्वे ॥ ॥
अस्मत्यात्राशब्दे द्रष्टव्यं ॥
रश्मिते स्त्री कृतवेधनद्रव्ये
तस्य पात्रान्तरे स्थापनविधि
र्यथा ॥ संकीर्णपात्रसंभारेमा
गैर्वा ग्रामवर्जिते । स्थापये
द्गुणवान्सूदः सिद्धान्ने पात्र
कांतरे । भक्तं सुपावके स्था
प्यं न स्थाप्यं पात्रकांतरे । घृतं
कांस्ये स्थाप्यं मांसं ता
म्रभवे रसं ॥ स्थापयेद्राज
ते हैमे पात्रे लौहे श्यकाष्ठजे
पक्वादि षड्विधं शाकं स्था
प्यं काष्ठाश्म लौहजे ॥
पक्वान्नं पिष्टकं भक्ष्यं स्था
प्यं कांस्यैश्च दारुजे । धा
रयेत् सुसृतं क्षीरं पार्थि
वे वाथ काष्ठजे ॥ पानी
येपायसं तक्रं मृन्मयेष्वेव
धारयेत् । काचजे स्फा
टिके वाथ वैदूर्यादिके.

विश्रिते ॥ धारयेत् सर्वदापा
त्रे रागषाडव शाडकान् ॥
उक्तपात्रांतरे स्थाप्य यद्रव्यंत
द्गुणापहं । सर्वदा सुखदेह
स्य समथा दोष कारकं ।
इति सूपकारशास्त्रे पाकरा
जेश्वरः ॥
रश्मिः पुं किरणः । तद्वैदिक
पर्यायाः । खेदयाः १ किरणाः
२ गावः ३ रश्मयः ४ अभीशवः
५ दीधितयः ६ गभस्तयः ७ व
नं ८ उस्राः ९ वसवः १० मरीचि
पाः ११ मयूखाः १२ सप्तऋषयः
१३ साध्याः १४ सुपर्णाः १५ ।
इति पंचदश रश्मिनामानि ॥
इति वेद निघण्टौ १ अध्यायः
रसास्वादः पुं अखंडवस्त्वनव
लंबनेनापि चित्तवृत्तेः सविक
ल्पानंदास्वादनं । समाध्यारंभ
समये सविकल्पानंदास्वादनं
वा । इति वेदांतसारः ॥
चतुर्थं विघ्नमाह अखंडेति ।
उक्तसविकल्पसमाध्यौ स्म
ये द्वितीयः शब्दानुविद्धस्त्रि
पुटीविशिष्टस्तस्मिन् य आन
न्दो बाह्यशब्दादिविषयप्रपंच
भानत्यागप्रयुक्तो न तु चैत
न्यप्रयुक्तः । यथा निधिग्रह
णाय प्रवृत्तस्य निधिपरिपाल
कभूतप्रेताद्युत्तस्य निधिप्रा
प्त्यभावेपि भूताद्यनिष्टनिवृ
त्तिमात्रेण कोपि महानानंदो
भवति तथा सविकल्पसमाधा
यखंडवस्त्वनवलंबनेन निरा
नंदरसास्वादनाभावेपि आनि
एवाह्यप्रपंचनिवृत्तिजन्यानंदं
सविकल्पकरूपं ब्रह्मानंदभ्रमे
ण स्वादयति तद्रसास्वादन
मित्यर्थः । लक्षणांतरमाह स
माधीत्यादि । निर्विकल्पसमा
ध्यारंभकाले अनुभूयमानस
विकल्पकानंदत्यागाक्षमस्तुत
या पुनः स्तस्यैवास्वादनेरसास्वा
दइत्यर्थः ॥ इति सुबोधिन्या
ख्यातट्टीका ॥
राजी स्त्री राजिका । रक्तवर्ण
सर्षपः । इति राजनिघण्टुः ॥
रात्रिः स्त्री निशा । तद्वैदिकप
र्यायाः । श्यावी १ क्षपा २ शर्व
री ३ अक्तुः ४ ऊर्म्या ५ राम्या ६
यम्या ७ नम्या ८ दोषा ९ नक्ता
१० तमः ११ रजः १२ असिक्नी १३
पयस्वती १४ तमस्वती १५ घृ
ताची १६ शिरिणा १७ मोकी १८

प्रोषकी १९ उग्रः २० प्रगः २१ हिमा २२ वल्ली २३ इति त्रयोविंशती रात्रिनामानि । इति विभावरी १ सुनरी २ भास्वती ३ ओदती ४ चित्रा ५ मघा ६ अर्जुनी ७ वाजिनी ८ वाजिनीवती ९ सुम्नावरी १० अहना ११ द्योतना श्विता १२ अरुषी १३ सूनृता १४ सूनृतावती १५ सूनृतावरी १६ । इति षोडशोषानामानि । इति च वेदनिघण्टौ १ अध्यायः ॥

राधा स्त्री श्रीराधिका । सा च श्रीकृष्णवामभागांशरूपा शक्तिः । यथा । स कृष्णः सर्व्वसृष्ट्यादौ सिसृक्षुरेक एव च । सृष्ट्युन्मुखस्तदंशेन कालेन प्रेरितः प्रभुः । स्वेच्छामयः स्वेच्छया च द्विधारूपो बभूव ह । स्त्रीरूपा वामभागांशा दक्षिणांशः पुमान् स्मृतः । तां ददर्श महाकामी कामाधारः सनातनः । अतीव कमनीयाञ्च चारुचम्पकसन्निभां । इत्यादि ॥ तस्या अनन्तत्वाकारणादिर्यथा । हरि मांतया सार्द्धं रासे रासमण्डले । रासोल्लाससुरसिके रास क्रीडाञ्चकार ह । नानाप्रकारशृङ्गारं शृङ्गारो मूर्त्तिमानिव । चकार सुखसम्भोगं यावद्वै ब्रह्मणो दिनं । ततः स च परिश्रान्तस्तस्या योनौ जगत्पिता । चकार वीर्य्याधानञ्च नित्यानन्दः शुभे क्षणे । गात्रतो योषितस्तस्याः सुरतान्ते च सुव्रत ॥ निःससार श्रमजलं श्रान्तायास्तेजसा हरेः । महाक्रमणक्लिष्टाया निःश्वासश्च बभूव ह । तदावव्रे श्रमजलं तत्सर्व्वं विश्वगोलकं । स च निःश्वासवायुश्च सर्व्वाधारो बभूव ह । निःश्वासवायुः सर्व्वेषां जीविनाञ्च भवेषु च । बभूव मूर्त्तिमद्वायोर्वामाङ्गात् प्राणवल्लभा । तत्पत्नी सा च तत्पुत्राः प्राणाः पञ्च च जीविनां । प्राणोऽपानः समानश्चैवोदानो व्यान एव च । बभूवुरेव तत्पुत्रा अधःप्राणाश्च पञ्च च ॥ घर्म्मतोयाधिदेवश्च बभूव वरुणो महान् ॥ तद्वामाङ्गाच्च तत्पत्नी वरुणानी बभूव ह । अथ सा कृष्णशक्तिश्च कृष्णगर्भं दधार च । शतमन्वन्तरं यावत् ज्वलन्ती ब्रह्म

तेजसा ॥ कृष्णप्राणाधिदेवी सा कृष्णप्राणाधिकप्रिया । कृष्णस्य सङ्गिनी शश्वत् कृष्णवक्षःस्थलस्थिता । शतमन्वन्तरातीते कालेऽतीतेऽपि सुन्दरी । सुषाव डिम्बं स्वर्णाभं विश्वाधारालयं परं । दृष्ट्वा डिम्बञ्च सा देवी हृदयेन विदूयता । उत्ससर्ज्ज च कोपेन ब्रह्माण्डे गोलके जले । दृष्ट्वा कृष्णश्च तत्त्यागं हाहाकारं चकार ह । शशाप देवीं देवेशस्तत्क्षणञ्च यथोचितं । यतोऽपत्यं त्वया त्यक्तं कोपशीले सुनिष्ठुरे । भव त्वमनपत्यापि चाद्यप्रभृति निश्चितं । या यास्त्वदंशरूपाश्च भविष्यन्ति सुरस्त्रियः । अनपत्याश्च ताः सर्व्वास्त्वत्समा नित्ययौवनाः । एतस्मिन्नन्तरे देवीजिह्वाग्रात् सहसा ततः । आविर्ब्बभूव कन्यैका शुक्लवर्णा मनोहरा । पीतवस्त्रपरीधाना वीणापुस्तकधारिणी । रत्नभूषणभूषाढ्या सर्व्वशास्त्राधिदेवता । अथ कालान्तरे सा च द्विधारूपा बभूव ह । वामार्द्धाङ्गाच्च कमला दक्षिणार्द्धा सरस्वती । एतस्मिन्नन्तरे कृष्णो द्विधारूपो बभूव सः । दक्षिणार्द्धाच्च द्विभुजो वामार्द्धाच्च चतुर्भुजः ॥ उवाच वाणीं श्रीकृष्णस्त्वमस्य कामिनी भव । अत्रैव मानिनी राधा नैव भद्रं भविष्यति ॥ एवं लक्ष्मीञ्च प्रददौ तुष्टो नारायणाय च । स जगाम च वैकुण्ठं ताभ्यां सार्द्धं जगत्पतिः ॥ अनपत्ये च ते द्वे च यतो राधाङ्गसम्भवा । इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २ अध्यायः ॥

रामः पुं श्रीरामचन्द्रः । तस्य तारकब्रह्ममन्त्रो यथा । सर्व्वेषाञ्च मन्त्राणां मन्त्रराजः षडक्षरः । तारकब्रह्म चेत्युक्तं तेन रक्षा प्रशस्यते ॥ तन्मन्त्रस्तु रां रामाय स्वाहा । इति रामार्च्चनचन्द्रिकायां ४ पटलः ॥

राशिव्यवहारः पुं अन्नराशिपरिमाणज्ञापककर्म्म । तद्विवरणं यथा । अथ राशिव्यवहारे कर्म्मसूत्रं वृत्तम् । अनणुषु दशमांशोऽणुष्वथैकादशांशः परिधिनवमभागः शूकधान्येषु वेधः । भवति परिधिषष्ठे वर्ग्गिते वेधनिघ्ने घनगणितकराः स्युर्म्मागधास्ताश्च खार्य्यः ॥

उदाहरणम्। समभुवि किल राशिर्यः स्थितः स्थूलधान्यः परिधि
परिमितिः स्याद्धस्तषष्टिर्यदीया। प्रवद गणक खार्यः किंमि
ताः संति तस्मिन्नथ पृथगणुधान्यैः शूकधान्यैश्च शीघ्रम्॥

अथ स्थूलधान्यराशिमानावबोधनाय

न्यासः

परिधिः ६०। वेधः ६। परिधेः षष्ठांशः १०। वर्गितः १००। वेध ६ निघ्नः। लब्धाः खार्यः ६००।

अथाणुधान्यराशिमानानयनाय

न्यासः

परिधिः ६० वेधः $\frac{६०}{११}$। जाते फलं ५४५ $\frac{५}{११}$

अथ शूकधान्यराशिमानानयनाय

न्यासः

परिधिः ६० वेधः $\frac{२०}{३}$ खार्यः ६६६ $\frac{२}{३}$

अथ भित्त्यंतर्बाह्यकोणसंलग्नराशिप्रमाणानयने करणसूत्रं
वृत्तम्। द्विवेदसत्रिभागैकनिघ्नात्तु परिधेः फलं। भित्त्यंतर्बाह्य
कोणस्थराशेः स्वगुणभाजितं। उदाहरणम्। परिधिर्भित्तिलग्न
स्य राशेस्त्रिंशत्करः। किल। अंतःकोणस्थितस्यापि तिथितु
ल्यकरः सखे। वहिःकोणस्थितस्यापि पंचचत्वारिंशत्समस्मितः। ते
षामाचक्ष्व मे द्विपंचनहस्तान् पृथक् पृथक्॥
अत्रापि स्थूलादिधान्यानां राशिमानावबोधनाय स्पष्टहेतुद्वयं।

तत्रादावणुधान्यराशिमानबोधकं हेतुं॥

न्यासः 

अत्राद्यस्य परिधिः ३०। द्विनिघ्नः ६०। अन्यः १५। चतुर्घ्नः ६०।
अपरः ४५। सत्रिभागैक ४ निघ्नः ६०। एषां वेधः ६। एष्यः
फलं तस्य मेतावंत्य एव खार्यः ६००॥ एतत्स्वस्वगुणेन
भक्तं जाते पृथक् पृथक् फलम् ६००। १५०। ४५०॥

अथाणुधान्यराशिमानानयनाय



एवंवत् क्षेत्रत्रयाणां स्वगुणगुणितपरिधिः ९०। वेधः ९०/११

फलानि २२२ ८/११ १३९ ५/११ ४०९ १/११

अथ शूकधान्यराशिमानानयनाय



अत्रापि पूर्ववत् क्षेत्रत्रयाणां स्वगुणगुणितः परिधिः ९०। वेधः १०/३ फलानि ३३३ १/३ १६६ २/३ । ५०० ।

इति लीलावत्यां राशिव्यवहारः समाप्तः ॥

रासयात्रा स्त्री कार्त्तिकीपौर्णमासीकर्त्तव्यश्रीकृष्णस्योत्सवविशेषः । तद्विवरणं यात्राशब्दे द्रष्टव्यं ॥ शाक्तिविषयकरासयात्रा यथा । पौर्णमास्यां रासयात्रां देव्याः कुर्य्यात्त्रिशाङ्केके । एवंवन्मञ्च मासाप्य देवीं देव्यास्सनं यजेत् । पौर्णमास्यां चैत्रपौर्णमास्यां ॥ संमुखे रासस्थाने भैरवी भैरवान्वितं कृत्वा तान् पूजयित्वा चभ्रामयेत् कुम्भचक्रवत् ॥ कोलाहले मृदंगादिवाद्यैर्न्नृत्यैः सगीतकैः । कुर्य्यादाने दहृदयः साधकः स्थिरमानसः । विलम्बाख्यं न कुर्वीत देवीयात्रा सुखप्रदा । इति वामकेश्वरतन्त्रे ५४ पटलः ॥

रास्ना स्त्री स्वनामख्यातलताविशेषः । तत्पर्य्यायः । द्रोणगन्धिका १ सर्पगन्धा २ पलंकषा ३ । इति जटाधरः ॥

राहुबृहस्पतियोगः पुं एकराशिस्थितगुरुराहुः । गुरुचाण्डालियोग इति ख्यातः । तस्य कालाशुद्धिजनकत्वं यथा । भोजदेवव्यवहारसमुच्चये । सर्वं कार्य्यं न कर्त्तव्यं गुरौ सिंहेऽलिगेऽपि च । तत्र दीक्षां न कुर्वीत तमोयुक्ते बृहस्पतौ ॥ तमोयुक्ते राहुयुक्ते । व्रतदीक्षे इति नित्यतरवैदिककर्म्मोपलक्षणं । तथाच स्मृतिसारे ज्योतिषे । एकराशौ स्थितौ स्यातां यदि राहुबृहस्पती । विवाहव्रतयज्ञादि सर्वं तत्र परित्यजेत् । मलमासाद्युपक्रम्य भविष्ये । कृत्तभेदेप्येकराशौ सम्यक् यदि चानयोः । गुरोराहोरपि तथा त्यजेद्विद्वान्न संशयः ॥ अत्र गुरोर्लङ्घितत्वं हेतुः । यत्र यत्र स्थितो जीवस्तमोयोगेन लङ्घ्यते । उपहासाय किं तस्मादसत्कर्म्मो मनीषिणां इति मलमासतत्त्वं ॥ अस्य प्रतिप्रसवो यथा । कर्णाटे नाटोग्ने कलिंगदेशे बृहस्पती राहुयुतो विरुद्धः ॥ शेषेषु देशेषु न चास्ति दोषः सर्वत्र कार्य्यं मुनयो वदन्ति इति बृहद्राजमार्त्तण्डधृतवचनमिति केचिद्वदन्ति ॥

रिप्रवाहः पुं कुल्यादाविः ॥ ॥ ॥

यथा। क्रव्याद मग्निं प्रहिणोमि दूरं। यमराज्यं गच्छतु रिप्रवाहः। इति भवदेवभट्टोक्त कुशण्डिकापद्धतिः॥ रिप्रं पापं वहतीति रिप्रवाहः। इति तट्टीकायां गुणविष्णुः॥

रुद्राक्षे स्त्री स्वनामख्यातवृक्षवीजे। तस्य स्थूलत्वं प्रशस्तं। यथा। रुद्राक्षं शिवलिङ्गञ्च स्थूलं स्थूलं विशिष्यते। शालग्रामे नर्मदञ्च सूक्ष्मः सूक्ष्मो विशिष्यते॥ इति मेरुतन्त्रे ९ प्रकाशः॥

रूपे स्त्री सौन्दर्य्यं। तद्वैदिकपर्य्यायाः। निर्णिक् १ वव्रिः २ वर्पः ३ वपुः ४ अमतिः ५ अप्सः ६ प्सु ७ अप्सः ८ पिष्टं ९ पेशः १० कृशनं ११ अरुषं १२ अर्जुनं १३ ताम्रं १४ अरुषं १५ शिल्पं १६। इति षोडश रूपनामानि। इति वेदनिर्घण्टौ ३ अध्यायः॥

रेचकः पुं ध्मातनासिकया रेच्यः प्राणायामाङ्गमुच्छ्वासनवायुः। यथा। पूरकः कुम्भको रेचः प्राणायाम स्त्रिलक्षणः। नासिकाकृष्ट उच्छ्वासो ध्मातः पूरक उच्यते। कुम्भको निश्चलश्वासो मुच्यमानस्तु रेचकः॥ इत्यग्निकारतन्त्रे भेदकोत्रि॥ रेहियं स्त्री वरुणं। इत्यमरः॥ रोहिषतृणं। इति राजनिर्घण्टः॥ तन्नाम गुणाः। कत्तृणं रोहिषं देवजग्धं सौगन्धिकं तथा। भूतीकं ध्याम मोरञ्च श्यामकं धूपगन्धिकं॥ रोहिषं तुवरं तिक्तं कटुपाकं व्यपोहति। हृत् कण्ठव्याधि पित्तास्र शूल कास कफज्वरान्॥ इति भावप्रकाशः॥ अन्यत् कत्तृणशब्दे द्रष्टव्यं॥

ल

लः लकारः। तस्य ध्यानं यथा। चतुर्भुजां पीतवस्त्रां रक्तपङ्कजलोचनां। सर्वदा सुखदां भीमां सर्वालङ्कारभूषितां। योगीन्द्रसेवितां नित्यां योगिनीं योगरूपिणीं। चतुर्वर्गप्रदां देवीं नागहारोपशोभितां॥ एवं ध्यात्वा लकारन्तु तन्मन्त्रं दशधा जपेत्॥ इति वर्णोद्धारतन्त्रं॥

तस्य नामानि। यथा। ल श्रीः स्थलना पृथ्वी माधवः शक्रवाचकः। वलानुजः पिनाकीशो व्यापको मांसस्तकः॥ खड्गी नादो ऽमृतं देवी लवणं वारुणीपतिः। शिवा वाणी क्रियामाता भामिनी कामिनी प्रिया॥ ज्वालिनी वेगिनी नादः प्रद्युम्नः पोषणो हरिः। विश्वात्मभेदो बली चेतो मेरुः शिरिः कलाधरः। इति तन्त्रशास्त्रं॥

लकुचवदरः पुं क्षुद्रकोलिः। इति राजनिर्घण्टः। तस्य फलगुणाः। कर्कन्धुः क्षुद्रवदरं कथितं पूर्वसूरिभिः। अम्लं स्यात् क्षुद्रवदरं कषायं कथितं मनाक्। स्निग्धं गुरुञ्च तिक्तञ्च वात पित्तापहं स्मृतं। शुष्कं भेदाग्निकृत् सर्वं लघु तृष्णा क्लमास्रजित्। इति भावप्रकाशः॥ लेड स्त्री पुरीषं। स्याड इति भाषा। यथा। सभ्यमानेन सकुस्यवासुना निरुद्धवायुः स्तुरणांस्तु निक्षिपन्। प्रस्विन्नगात्रः परिवृत्तलोचनः पपात लेडं विसृजन् क्षितौ व्यसुः॥ इति श्रीभागवते ९ स्कन्धे ३२ अध्याये ८ श्लोकः॥ लण्डं पुरीषमुत्सृजन्। इति तट्टीकायां श्रीधरस्वामी॥ लण्डजः पुं लण्डदेशजातः॥

अधुना लण्डनाख्यनगरीयइंरेजइति ख्यातः। यथा। अधिपामण्डलानाञ्च संग्रामेष्वपराजिताः। इंरेजा नव षट् पञ्च लण्डजाश्चापि भाविनः॥ इति मेरुतन्त्रे २३ प्रकाशः॥

लताह्वी नारी। यथा। नग्नां परलतां पश्यन् प्रयुतं यस्तु साधकः। प्रजपेत् स भवेत् शीघ्रं विद्यायां बलभः स्वयं॥ इति तन्त्रसारे पूर्णाभिषेचनं॥ लताप्रतानिनी स्त्री शाखाप्रचयवती लता। तत्पर्य्यायः प्रताना १ कत्तः २ ८। इति जटाधरः॥

लतासाधनं। स्त्री योषिदपि करणकेऽदेवताराधने। तद्यथा लतायाः साधने वस्य स्रण सुहरवल्लभे। शाते केशे शातं

तालेशते सिंदूरमण्डले ॥
स्तनद्वंद्वे शतद्वंद्वं प्रांतेनाभौ
महेश्वरि। शतं योनौ महेशा
नि उत्थाय च शतत्रयं ॥
एवं दशशतं जप्त्वा सर्वसिद्धी
श्वरो भवेत्। अथान्यत् संप्र
वक्ष्यामि साधनं भुवि दुर्लभं
रजोवस्थां समानीय तद्योनौ
स्वेष्टदेवतां। पूजयित्वा म
हादेवि दिने पूजयेन्मनुं ॥
शतत्रयं च षट्त्रिंशदधिकं प्र
त्यहे जपेत् ॥ अष्टोत्तरशतं
एवं चक्रवक्त्रे जपेद्बुधः ॥
तत स्तां नवभिः पुष्पैः पूजयेद
ष्टोत्तरं शतं ॥ ततः स्वांगकृ
तिं दत्वा जपेदष्टोत्तरं शतं ॥
धनवान् बलवान् वाग्मी स
र्वयोषित्प्रियंकरः। षोड
शाहेन च भवेत् सत्यं सत्यं
न संशयः ॥ इति मायातंत्रे
१२ पटलः ॥ अन्यत् अत्र
द्रावकल्पे ९ पटले गुप्तसाध
नतंत्रे ४ पटले च द्रष्टव्यं ॥
लयः पुं अखंडवस्त्वनवलंबने
न चित्तवृत्तेर्निद्रा। इति श्रीप
रमहंससदानंदयोगींद्रकृतवे
दांतसारः। तत्राद्यं विघ्नं लक्ष
यति लयस्तावदिति। लयो द्वि
विधः। चिरकालशुक्लाष्टांगस
हितनिर्विकल्पकसमाध्यभ्यास
पाटवेनाभितमेलाहतलतिम
जलबिंदुवत् तैलरहितदीप
कलिकावच्च प्रत्यगभिन्ने पर
मानंदे चित्तवृत्ते लयः प्रथमः
द्वितीयस्तु मूर्च्छावस्थावत् आ
लस्येन चित्तवृत्ते र्बाह्यशब्दादि
विषयग्रहणानादरे सति प्र
त्यगात्मस्वरूपानवभासनात्
वृत्ते स्तब्धीभावलक्षणा निद्रारू
पः। इति श्रीनृसिंहसरस्वतीकृ
त सुबोधिन्याख्या टीका ॥
लालायितः त्रि लालाविशिष्टः
कातर इति यावत्। लालाश
ब्दात् नमस्तपो वरिवः कण्डू
दिभ्यः क्यः कृतौ इति मुग्धबो
धव्याकरणसूत्रेण क्यप्रत्य
ये कृते क्तप्रत्ययान्निष्पन्नः ॥
यथा। अत्र लालायितः फणी
इति अनंतदेवोक्त गणेशालि
खित पाणिनिव्याकरणीय
महाभाष्ये। अपिच। परिखाव
लयच्छलेन या न परेषां ग्रह
णस्य गोचरः। फणिभाषितभा
ष्यफक्किकाविषमा कुंडलनामवा

पिता। इति पूर्वनैषधे २।
सर्गः। परिखेति। शत्रूणां ग्र
हणगोचरो नेय मिति कृत्वा
परिखावलयव्याजेन या पुरी
कुण्डलनां प्रापिता विधात्रेति
शेषः। फणिना भाषिता वा
महाभाष्यफक्किका तद्वद्विष
मा साऽपि परेषां ज्ञानगोचरो
नेयमिति कृत्वा अत्र लालायि
तः फणीन्द्रेणैव कुंडलनां प्रापि
ता पणिनेति शेषः। इति
भवदत्तकृततट्टीका ॥
लिंगं क्ली उपक्रमोपसंहारादि
यथा। लिंगानि तु उपक्रमो
पसंहारावभ्यासोऽपूर्वता फला
र्थवादोपपत्त्याख्यानि। तत्रोक्तं
उपक्रमोपसंहारावभ्यासः पू
र्वता फलं। अर्थवादोपपत्ती
च लिंगं तात्पर्यनिर्णये
तत्र प्रकरणप्रतिपाद्यस्यार्थ
स्य तदाद्यंतयो रुपादानं उ
पक्रमोपसंहारौ। यथाछां
दोग्ये षष्ठे प्रपाठके प्रकर
णप्रतिपाद्यस्याद्वितीयवस्तु
नः एक मेवाद्वितीय मित्या
दौ ऐतदात्म्य मिदं सर्वमित्यन्ते
नच प्रतिपादनं १। प्रकरणप्र
तिपाद्यस्य वस्तुनः तन्मध्ये पौ
नःपुन्येन प्रतिपादनं अभ्यासः
यथा तत्रैवाद्वितीयवस्तुनो म
ध्ये तत्त्वमसीति नवकृत्वः प्रति
पादनं २ प्रकरणप्रतिपाद्यस्य
वस्तुनः प्रमाणान्तरेणाविष
यीकरणं अपूर्वत्वं। यथा त
त्रैवाद्वितीयवस्तुनो मानान्तरा
विषयीकरणं ३। फलं तु। प्रक
रणप्रतिपाद्यस्यात्मज्ञानस्य तद
नुष्ठानस्य वा तत्र तत्र श्रूयमाणं
प्रयोजनं। यथा तत्रैव आचार्य
वान् पुरुषो वेद तस्य तावदेव चि
रं यावन्न विमोक्ष्ये अथ सम्पत्स्ये
इत्यद्वितीयवस्तुज्ञानस्य तत्प्रा
प्तिप्रयोजनं श्रूयते। ४। प्रक
रणप्रतिपाद्यस्य तत्र तत्र प्रशं
सनं अर्थवादः। यथा तत्रैव
उत त मादेशमप्राक्ष्यो येना
श्रुतं श्रुतं भवत्यमतं मत म
विज्ञातं विज्ञात मित्यद्वितीय
वस्तुप्रशंसनं ५ प्रकरणप्रति
पाद्यार्थसाधने तत्र तत्र श्रूयमा
णा युक्तिः उपपत्तिः। यथा त
त्रैव यथा सोम्यैकेन मृत्पिंडेन
सर्वं मृन्मयं विज्ञातं स्याद्वाचा
रंभणं विकारो नामधेयं मृत्ति

केऽपेव सत्यं । इत्यादावद्वि
तीयवस्तुसाधने विकारस्य
वाचारंभणमात्रत्वे युक्तिःश्रू
यते ॥ ९ । इति श्रीपरमहंस
सदानंदयोगीन्द्रविरचितवेदां
तसारः ॥

लुण्डिका स्त्री पक्ववेष्टित
मेषलोमादिः । लुडि इति मु
ष्टि । इतिच भाषा । यथा सैंध
वेच चूर्णमभ्यक्तं ताम्रभाजने
मातपे । प्रतप्तमूर्च्छया चूर्णेन
मलंच समाहरेत् । ताम्रभाज
नच्युतं सैंधवं दत्वा पोट्टे तत्
कृत्वा मेषलोमलुण्डिकया
मृष्ट्वा मलग्रहं कृत्वा तेनमृ
ज्यात् । इति भैषज्यरत्नावली

लोचिका स्त्री दधिच्युतमर्हितो
सोदकसहितदलितमण्डलाका
रनिर्मित च्युतभृष्टसमिता । लु
चि । इति भाषा । इति पाकराजे
श्वरः ॥

व

व दंत्यवकारः । सच अंतस्थ
वर्णः । यथा । अंतस्थाःस्यु यं व
ल वाः । इति कलापव्याकरणं
अपिच । ततोऽक्षरसमाम्नायम
सृजद्भगवानजः । अंतस्थोष्म
स्वर स्पर्श ह्रस्व दीर्घादिलक्षणं
इति श्रीभागवते १२ स्कंधे ६ ॥
अध्यायः ॥ ततस्तेभ्योऽक्षराणां
समाम्नाये समाहारे तमेवाह ।
अंतस्था य र ल वाः । उष्माणः
श ष स हाः । स्वरा अकारा
द्याः । स्पर्शाः कादयो मावसा
नाः । ह्रस्वा दीर्घाश्च । आदि
शब्दात् जिह्वामूलीयादयः ।
तएव लक्षणं स्वरूपं यस्य त
इति तट्टीकायां श्रीधरस्वामी
अस्य नामानि यथा ॥

वो वालो वारुणी सूक्ष्मावह
णो मेदसंज्ञकः । खड्गी शोज्ज्वा
लिनी वस्तः फलमधुनिवाचकः
उत्कारी शाश्वतो वीरेतोवज्रा
स्फिक सागरः श्रुतिः ॥
त्रिधातुः शंकरः श्रेष्ठो विशे
षोऽयमसाद्र्नं । इति नानात
न्त्रशास्त्रं ॥

वंशपत्री स्त्री नाडीहिंगु । तत्
पर्य्यायगुणाः । वंशपत्री वेणु
पत्री पिंडा हिंगुशिवाटिका । हिं
गुपत्रीगुणा विज्ञै वंशपत्री च

कीर्तिता । इति भावप्रकाशः
वकपंचकं क्ली कार्तिकशुक्लै
कादश्यादि पंचतिथ्यात्मकं ।
यथा । तत्रैकादश्यादितिथिपं
चके वकपंचकं । वकोऽपितत्र
नाश्नीयान्मत्स्यंचैव कदाचन
इति वचनात् । इति कृत्यतत्त्वं
किंच । कार्तिक मधिकृत्य ब्र
ह्मपुराणं । एकादश्यादिषु
तथा तास्तु पंचसु रात्रिषु ।
दिने दिने चस्नातव्यं शीतला
सु नदीषुच ॥ वर्जित व्या
तथा हिंसा मांसभक्षणमे
वच । ततश्च मांसभक्षण
निषेधे कार्तिकमास तत्कृ
ष्णपक्ष तदेकादश्यादिपंचदि
नानि शाक्ताशाक्तभेदात् पाप
तारतम्याद्वा निषिद्धानि । इति
तिथ्यादितत्त्वं । अपिच । ए
कादशीं समारभ्य यावत्पंच
दशी भवेत् । वकोऽपि तत्र नाश्ना
त्यस्मिन् मांसंच किंनरः ॥ इति
संवत्सरकौमुदीधृतब्रह्मपुरा
णवचनं ॥

वगला
वगलामुखी } स्त्री दशमहाविद्या
न्तर्गतदेवीविशे
षः । तदुक्तं तंत्रांतरे । ब्रह्मास्त्रं
संप्रवक्ष्यामि सद्यः प्रत्ययकार
कं । साधकानां हितार्थाय स्त
म्भनाय च वैरिणां । यस्याः स्म
रणमात्रेण पवनोऽपि स्थिराय
ते । प्रणवं स्थिरमायांच तत
श्च वगलामुखि । तदन्ते स
र्वदुष्टानांततोवाचं मुखं पदं ।
स्तम्भयेति ततो जिह्वां कील
येति पदद्वयं । बुद्धिं नाशय प
श्चात्तु स्थिरमायां समालिखेत्
लिखेच्च पुनरोंकारं स्वाहेति
पदमंततः । षट्त्रिंशदक्षरी वि
द्या सर्वसंपत्करी मता । स्थिरमा
या ह्लीं । तथा च । वह्निहीनें
दुमायायुक् स्थिरमाया प्रकी
र्तिता । ॐ ह्लीं वगलामुखि स
र्वदुष्टानांवाचं मुखं स्तम्भय जि
ह्वां कीलय कीलय बुद्धिं नाश
य ह्लीं ॐ स्वाहा ॥ तंत्रांतरे । व
ह्निहीनेंदुमायायुक् वगला
मुखि सर्वदुष्टं । दुष्टानां वाच
मित्युक्त्वा मुखं स्तम्भय कीर्तये
त् । जिह्वां कीलय बुद्धिं तत् वि
नाशाय पदं वदेत् । पुनर्बीजेन
तस्यांते वह्निजायावधिर्भवेत् ।
तारादिकाच षट्त्रिंशदक्षरा व
गलामुखी । ॐ ह्लीं वगलामुखि

सर्वदुष्टानां वाचं मुखं स्तंभय जि
ह्वां कीलय बुद्धिं विनाशय ह्लीं
ॐ स्वाहा। इत्यपि मंत्रांतरं ॥
अनयोः पूजा। प्रातः कृत्यादि
प्राणायामांतं विधाय ऋष्यादि
न्यासं कुर्य्यात्। यथा शिरसि ना
रदऋषये नमः। मुखे त्रिष्टुप्छं
दसे नमः। हृदि बगलामुखी
देवतायै नमः॥ गुह्ये ह्लीं बी
जाय नमः। पादयोः स्वाहा श
क्तये नमः। नारदो ऋषिस्त्रि
ष्टुप्छंदश्च तन्मुखे। श्री
बगलामुखी देवी हृदये वि
न्यसेत्ततः। ह्लीं बीजं गुह्यदेशे
तु स्वाहाशक्तिस्तु पादयोः॥
ततः कराङ्गन्यासौ। ॐ ह्लीं अं
गुष्ठाभ्यां नमः। बगलामुखि त
र्जनीभ्यां स्वाहा। सर्वदुष्टानाम
ध्यमाभ्यां वषट्। वाचं मुखं स्तं
भय अनामिकाभ्यां हुं। जिह्वां
कीलय कीलय कनिष्ठाभ्यां
वौषट्। बुद्धिं नाशय ह्लीं ॐ स्वा
हा करतलपृष्ठाभ्यां फट्। ए
वं हृदयादिषु। तथा च दिव्यतेजे
युग्मवर्णेषु सप्ताद्रि षोयार्णै
श्च मन्त्रकैः। करन्यासस्तत
योः करांगन्यासमाचरेत्ततो

मूलांते आत्मतत्वव्यापिनी ब
गलामुखी श्रीपादुकां पूजयामि
इति मूलाधारे मूलांते विद्या
तत्वव्यापिनी बगलामुखी श्री
पादुकां पूजयामि शिरसि। मू
लांते शिवतत्वव्यापिनी बगला
मुखी श्रीपादुकां पूजयामि सर्वां
गे। ततश्च मूर्द्धिभाले दृग्यो
र्घ्राणद्वये कर्णयोः पुनः। ओ
ष्ठयोर्मुखहस्तेषु दक्षिणांगे च
कूर्परे। मणिबंधांगुलेर्मूले
गले च कुचयो हृदि। नाभौ
कक्षे गुह्यदेशे वामांसे कू
र्परे तथा। मणिबंधेऽगुले
र्मूले ततश्च विन्यसेत् पुनः
दक्षवामे चोरुजान्वो गुल्फ
मांगुलिमूलयोः। क्रमेण
मंत्रवर्णांस्तु न्यस्य ध्यायेत् य
थाविधि। ततो ध्यानं। मध्ये
सुधाब्धि मणिमंडप रत्नवेदीसिं
हासनोपरिगतां परिपीतवर्णां
पीतांबराभरणमाल्यविभूषि
तांगीं देवीं स्मरामि धृतमुद्गरवै
रिजिह्वां। जिह्वाग्रमादाय करे
ण देवीं वामेन शत्रून् परिपीडयं
तीं। गदाभिघातेन च दक्षि
णेन पीतांबराढ्यां द्विभुजां

नमामि। एवं ध्यात्वा मानसैः
संपूज्य बहिःपूजा मारभेत्
तत्र प्रथमतोऽर्घ्यस्थापनं।
यथा। अष्टांगुले चतुरस्रं वि
धाय ईशानादिकोणेषु पूर्वा
दि दिक्षु च कुसुमाक्षतरक्त
चंदनैः ह्रीं गणपतये नमः
इत्यनेन गजदानेन संपूज्य तेन
मधुना वा अर्घ्यपात्र मापूर्य
त. ततो वाग्भवं विद्यया संपू
ज्य अंगानि विन्यसेत्। ततो धे
नुयोनिमुद्रे प्रदर्श्य तेनोदकेन
आत्मानं पूजोपकरणं चाभ्यु
क्षयेत्। अस्यार्घ्यं। अग्रेष
उक्त्वा वृत्त मण्डले भूपुरान्विते
ततो मूलमुच्चार्य ॐ आधार
शक्तिकमलासनाय नमः।
एवं शक्तिपद्मासनाय नमः।
एवंवत् ध्यात्वा पीठे आवाह्य ष
डंगानि न्यसेत्। ततो मुद्रां प्रद
र्श्य पुरतः षट्कोणेन मंडलं सृजेत्
ततो मूलेन मंत्रयित्वा धेनु
योनिमुद्रे प्रदर्श्य आत्मविद्या
शिवैस्तत्वैः बिन्दुत्रयं मुखे द
त्वा तर्ज्जन्यंगुष्ठयोगेन सांगा
वरणां बगलामुखीं तर्पयेत्
ततो यथासंभव मुपचारैः सं

पूज्य आवरणपूजा मारभेत्
षट्कोणेषु एवं ॐ सुभगायै
नमः। एवमग्निकोणे भगसर्पि
ण्यै। ईशाने भगवहायै। पश्चि
मे भगसिद्धायै। नैर्ऋते भगपा
तिन्यै। वायौ भगमालिन्यै।
ततोऽष्टदलपत्रेषु ब्राह्म्याद्याः पू
ज्याः। पत्राग्रेषु ॐ जयायै न
मः। एवं विजयायै। अजिता
यै। अपराजितायै। स्तंभि
न्यै। जृंभिन्यै। मोहिन्यै। आ
कर्षिण्यै। ततो द्वारेषु ॐ भैर
वाय नमः। तद्बाह्ये इंद्रादीन्
वज्राद्यांन् पूजयेत्। ततो मू
लेन धूपादिकं दत्वा यथाश
क्ति जपं विधाय त्रिशूलमुद्रां
प्रदर्श्य पुष्पांजलित्रयं कृत्वा दे
व्यै योनिमुद्रां प्रदर्शयेत्। ततो
भैरवाय बलिं दद्यात्। ततो
विसर्जनांते कर्मसमापयेत्॥
अस्य पुरश्चरणं लक्षजपः॥
तथा च। पीतांबरधरो भूत्वा
पूर्वाशाभिमुखस्थितः। लक्ष
मेकं जपेन्मंत्रं हरिद्राग्रन्थिमा
लया॥ ब्रह्मचर्यरतो नित्यं प्र
यतो ध्यानतत्परः। प्रियंगुकु
सुमेनापि पीतपुष्पैश्च होमयेत्

द्वितीयमंत्रस्यतुन्यासादिकं सर्वं
पूर्ववत् । ध्यानन्तु ।
गम्भीराञ्च मदोन्मत्तां स्वर्णकां
तिसमप्रभां । चतुर्भुजां त्रिनय
नां कमलालसमानसां ॥ मु
द्गरं दक्षिणे पाशं वामे जिह्वांच
वज्रकं । पीताम्बरधरां देवीं दृढ
पीनपयोधरां । हेमकुण्डलभूषां
च स्वर्णसिंहासनस्थितां ॥
अथ प्रयोगाः । कृतेवाग्ग
तिस्तम्भं दुष्टानां बुद्धिनाशनं
जपहोम प्रयोगेच मंत्रेचाप्य
युतं जपेत् । हरिद्रा हरिता
लाभ्यां लवणं जुहुयान्निशि
स्तम्भयेत् परसैन्यानि नात्रका
र्या विचारणा । अथवा पीत
पुष्पैश्च त्रिमध्वक्तैश्च होमयेत्
स्तम्भनेषु चसर्वेषु प्रयोगःप्रस
यावहः ॥ यंत्रन्तु । ओंकारयोः
संमुखयोर्द्वयोः शिरसोर्लि
खेत् । मध्ये तु नाम साध्यस्य
तद्बाह्ये चाष्टदलं बीजं द्वितीय
वर्णस्य तृतीयं विन्दुभूषितं ।
चतुर्दशस्वरोपेतं संलिखेत् पृ
थिवीगतं ठकारेणसमावेष्ट्य
चतुष्कोणपुरं वहिः ॥
तत्कोणेरेखासंसक्तैः शूलैः
र्वज्राष्टकं लिखेत् । त्रिशूल
मध्यरेखायाः पृथ्वीवीजानि
पार्श्वयोः । अष्टपत्रेचकोणेषु
तद्वहिर्वगलां लिखेत् । पृथिवीं
तरिते वाह्ये मातृकापरिमंड
ले । आवेष्ट्य चाष्टधा पश्चा
न्महाहे स्थिरमायया । निरुध्यां
ऊशावीजेन नादसंमिलिता
त्रिशा । लिखत्सर्ववदावेष्ट्य
श्चाञ्च वगलामुखीं । पटेपाषा
णपट्टे वाहरिद्रान्मत्तनालकैः ।
दिव्यस्तम्भे मुखलेने लिखित्वा
गाढमाक्रमेत् । विवादे यंत्रमा
लिख्य भूर्जेनैव वस्त्रभिः ॥
कुम्भकारस्य चक्रस्य भ्रमतो वि
परीततः । मृत्तिकां समुपाद
यहृषभं कारयेत्ततः । यंत्रं त
स्योपरि न्यस्य तालकेनविलि
प्यच । तन्मायां विलिःलि
प पीतवस्त्रे निजे गृहे । अर्च
येन्नचतुष्कालं नित्यं पीतोप
चारतः । दुष्टस्य स्तम्भयत्येव
मुखं वाचस्पतेरपि । इति
वगलापरिच्छेदः ॥
विश्वसारे । काली तारा महावि
द्या षोडशी भुवनेश्वरी । भैरवी
छिन्नमस्ता च विद्याधूमावती

तथा । वगला सिद्धविद्या च मा
तंगी कमलात्मिका । एता दश
महाविद्याः सिद्धविद्याः प्रकी
र्तिताः ॥ अथ वगलामुखीस्तो
त्रं । मध्ये सुधाब्धिमणिमंडप
रत्नवेदीसिंहासनोपरिगतां प
रिपीतवर्णां । पीताम्बराभरण
माल्यविभूषितांगीं देवीं भजा
मि धृतमुद्गर वैरिजिह्वां । जि
ह्वाग्र मादाय करेण देवीं वा
मेन शत्रून् परिपीडयन्तीं । गदा
भिघातेन च दक्षिणेन पीतां
वरां तां द्विभुजां भजामि । च
लत्कनककुण्डलोल्लसितचारु
गंडस्थलीं लसत्कनकचंपक
द्युतिमदिन्दुविम्बाननां । गदाहत
विपक्षकां कलितलोलजिह्वांच
लां स्मरामि वगलामुखीं
विमुखवाङ्मनःस्तम्भिनीं । पीयू
षोदधिमध्यचारुविलसद्रक्तो
त्पलेमंडपे यत्सिंहासनमौलि
पातितरिपुं प्रेतासनाध्यासिनीं
स्वर्णाभां करपीडितारिरस
नां भ्राम्यद्गदां विभ्रमां इत्थं ध्या
यति यान्ति तस्य विलयं सद्यो
ऽथ सर्वापदः । देवि त्वच्चरणां
बुजार्चनकृते यः पीतपुष्पांज
लीन् भक्त्या वामकरे निधा
य च मनुं मंत्री मनोज्ञाक्षरं । पी
ठध्यानपरोऽथ कुम्भकवशात्
वीजं स्मरेत् पार्थिवे तस्यामि
त्रमुखस्य वाचि हृदये जाड्यं भ
वेत् तत्क्षणात् । वादी मूकति
रंकति क्षितिपतिर्वैश्वानरः शी
तति क्रोधी शाम्यति दुर्जनः
सज्जनति क्षिप्रानुगः खंजति
गर्वी खर्वति सर्वविच्च जडति
त्वद्यन्त्रणायंत्रितः श्रीनित्ये वग
लामुखि प्रतिदिनं कल्याणि तु
भ्यं नमः । मंत्रस्तावदलं विपक्ष
दलने स्तोत्रं पवित्रंच ते यंत्रं
वादिनियंत्रणं त्रिजगतां जैत्रं
च चित्रं च ते ॥ मातः श्रीवग
लेति नाम ललितं यस्यास्तिजं
तोर्मुखे तन्नामग्रहणेन संसदि
मुखस्तम्भो भवेद्वादिनां । दुष्ट
स्तम्भन मुग्रविघ्नशमनं दारि
द्र्यविद्रावणं भूभृद्भूशमनं चल
न्मृगदृशांचेतःसमाकर्षणं । सौ
भाग्यैकनिकेतनं समदृशांका
रुण्यपूर्णामृतं मृत्योर्मारण
माविरस्तु पुरतो मातस्त्वदीयं व
पुः । मातर्भंजय मे विपक्षवदनं
जिह्वांचलां कीलय ब्राह्मींमु

इय नाशयाशु पिबता मुखो
गतिं स्तंभय । शत्रुं स्मरामि दे
वि तीव्रतां गदया गोवाकीपीतां
बरे विघ्नौघे बगले हर प्रणम
तां कारुण्यपूर्णेक्षणे । मातर्भैर
वि भद्रकालि विजये वाराहि
विश्वाश्रये श्रीविद्ये समये महे
शि बगले कामेशि रामे रमे ।
मातङ्गी त्रिपुरे परात्परतरे स्व
र्गापवर्गप्रदे दासोऽहं शरणा
गतः करुणया विश्वेश्वरि त्राहि
मां । संरंभे चौरसंघे प्रहरणस
मये बंधने व्याधिमध्ये विद्या
वादे विवादे प्रकुपितनृपतौ
दिव्यकाले निशायां । वश्ये वा
स्तंभने वा रिपुवधसमये निर्जने
वा वने वा गच्छंस्तिष्ठंस्त्रिका
ले यदि पठति शिवं प्राप्नुया
दाशु धीरः ॥ नित्यं स्तोत्रमिदं
पवित्रमिह यो देव्याः पठत्याद
रा द्धृत्वा यंत्रमिदं तथैव सम
रे बाहौ करे वा गले । राज्ञा
नो ह्यथवा सदान्तकरिपोः स
र्पा मरोन्नादिका स्तेवै यान्ति
विमोहिता रिपुगणा लक्ष्मीः
स्थिराः सिद्धयः ॥ त्वं विद्याप
रमा त्रिलोकजननी विघ्नौघ

संछेदिनी योषाकर्षणकारि
णी जनमनः संमोहसंदायिनी
स्तम्भोच्चाटनकारिणी पशुमनः
संमोहसंदायिनी जिह्वाकील
न भैरवी विजयते ब्रह्मादिमंत्रो
यथा । विद्यालक्ष्मी सर्वसौभा
ग्यमायुः पुत्रैः पौत्रैः साम्रा
ज्यसिद्धिं । मानं भोगो व
श्यमारोग्य सौख्यं । प्राप्तं
तत्तद्भूतलेऽस्मिन् नरेण ॥
यत्कृतं जपसन्नाहं गदितंप
रमेश्वरि । दुष्टानां निग्रहार्था
य तद्गृहाण नमोऽस्तु ते ॥
ब्रह्मास्त्रमिति विख्यातं त्रि
षु लोकेषु विश्रुतं । गुरुभ
क्ताय दातव्यं न देयं यस्य क
स्यचित् । पीताम्बरां द्विभुजां
च त्रिनेत्रां गात्रकोज्ज्वलां । शि
लामुद्गरहस्तां च स्मरेत्तां बग
लामुखीं । प्रातर्मध्याह्नका
लेस्तवपठनमिदं कार्यसिद्धि
प्रदं स्यात् ॥ इति रुद्रयामले
बगलामुखीस्तोत्रं समाप्तं ॥
इति कृष्णानन्दकृत तन्त्र
सारः ॥

वचनं स्त्री वाक्यं । तद्वैदिक
पर्यायाः । श्लोकः १ धारा २ इला

३ गौः ४ गौरी ५ गान्धर्वी ६
गभीरा ७ गंभीरा ८ मन्द्रा ९
मन्द्राजनी १० वाशी ११ वाणी १२
वाणीची १३ वाणः १४ पविः
१५ भारती १६ धमनिः १७ नालीः
१८ मेलिः १९ मेना २० सूर्या २१
सरस्वती २२ निवित् २३ स्वा
हा २४ वग्नुः २५ उपब्दिः २६
मायुः २७ काकुत् २८ जिह्वा
२९ घोषः ३० स्वरः ३१ स्वनः
३२ शब्दः ३३ ऋक् ३४ होत्रा
३५ गीः ३६ गाथा ३७ गणः
३८ धेना ३९ ग्ना ४० विपा ४१
नना ४२ कशा ४३ धिषणा
४४ नौः ४५ अक्षरं ४६ मही
४७ अदितिः ४८ शची ४९ वा
क् ५० अनुष्टुप् ५१ धेनुः ५२ व
ल्गुः ५३ गल्दा ५४ सरः ५५
सुपर्णी ५६ बेकुरः ५७ इति स
प्तपंचाशत् वाङ्नामानि । इति
वेदनिर्घण्टौ १ अध्यायः ॥
वज्रः पुंक्ली इन्द्रास्त्रविशेषः ।
तद्वैदिकपर्यायाः दिद्युत् १
नेमिः २ हेतिः ३ नमः ४ प
विः ५ सृकः ६ वृकः ७ वधः
८ वज्रः ९ अर्कः १० कुत्सः ११
कुलिशः १२ तुजः १३ तिग्मः १४

मेनिः १५ स्वधितिः १६ सायकः
१७ परशुः १८ । इत्यष्टादशवज्र
नामानि । इति वेदनिर्घण्टौ २
अध्यायः ॥
वटकः पुं पिष्टकविशेषः ॥
वड़ा इति भाषा । तत्प्रकारा
यथा । कदल सूमन माषदला
दस्नत्सीरिशासे मर्मविच सुचन
रुचेः सच्छतेजात चक्रैः । कृत
इह हृतपक्वो यः पतेत् खेड
पाके वटके मस्तके लि सा
अथातु प्रियेष्टे १ माषिन्नेः
शालिचूर्णैः दधि मरिच सिता
नारिकेलाद्रिशासे जीरैला
सलवंगामृतकदलफलैः फे
णितैः पिष्टमुक्तैः । सृष्टः प
क्वो घृते यः प्रपतति समयो
दुग्धपूरे प्रगाढे सन्दाकर्पूरक
लिंतमिह सुवटके सा अथात
सुप्रियेष्टे २ ॥
ग्रैष्मिवटिकालि स्ने इव्यैः स्व
छान्दुयापतेत् । पंचास्तेद्ध
पाको सापीयूषग्रैष्मिपालि
का ॥ ३ ॥ सत्तीरसार शालि
तंदुल नारिकेल जाती लवंग
मरिचैः ससितैः सुपिष्टैः ।
रंभेलयाभ्व चूतभावनया । स

वेषा सा ना संतनगुटिकांवि
टपे प्रियेष्टां ॥ ५ ॥ कदलम
रिचडगेपैः खंड गोधूमपक्कप्र
कटितवटकोऽयं भूरि जाती
फलाढ्यः । नवविधु मधुमध्ये
यो विलासे विधत्ते रचित इह
तयाऽसौ सीधुपर्वो विलासः
॥ ५ ॥ लवंगैलेडमरिचैः संयुतैः
शर्करायैः । चक्रे गंगाजला
ख्यानि लड्डुकान्यपराणि च ९
ते सेल युतैः लीरसारे स्तथा
लोगालिशास्यकैः । अन्यान्य
प्याज्यसंमृष्टैः सा रसे सरप
पिका ७ इति श्रीरघुनाथ
भट्टकृते गोविंदलीलामृते
१९ सर्गः ॥

वेतसः ७ गोपिशाखुः । वाञ्जर
इतिभाषा ॥ तत्पर्यायाः ॥
दीर्घा ४ दीपकः ५ दीपः ६
इति शब्दरत्नावली । दीर्हि
लोयः ७ वाकुलेयः ८ तत्तभः
९ ॥ संख्याज्ञातस्य तस्य पर्य्या
यः । तत्तकः १ तत्तभः २ तत्तभः
३ कच ४ । इति जटाधरः ॥
वनहविका स्त्री अरण्यहरिद्रा
तस्य गुणाः । अरण्यहलदी कं
दः कुष्ठवातास्रनाशनः । इति

भावप्रकाशः ॥
वर्गः ७ समानांकद्वयस्याघा
तः । अस्य सुबोधोदाहरणानिपू
र्वेलिखितानि स्यातस्तत्र लिखि
तः अत स्तद्धोषांश्च तत्समुदा
य एवात्र पुनर्लिख्यते । वर्गक
रणसूत्रं हृत्तद्वयं । समद्विघातः
कृतिरुच्यते ऽथास्थाप्यो ऽन्त्यव
र्गो द्विगुणांत्यनिघ्नः । स्वस्वो
परिष्टाच्च तथापरेऽका स्त्य
क्त्वान्त्य मुत्सार्य पुनश्च राशिं
खंडद्वयस्याभिहति द्विनिघ्नी
तत्खंडवर्गैक्ययुता कृतिर्वा
इष्टोनयुग्राशिवधः कृतिःस्या
दिष्टस्य वर्गेण समन्वितो वा
अत्रोद्देशकः सखे नवाना
ञ्च चतुर्दशानां ब्रूहि त्रिही
नस्य शतत्रयस्य । पंचोत्तर
स्यापयुतस्य वर्गं जानासि चे
द्वर्गविधानमार्गम् न्यासः ९
१४ । २९७ । १००५ । एषां यथो
क्तकरणेन जाता वर्गाः ८१
१९६ । ८८२०९ । १०१००२५ ॥
अथवानवानां खंडे ४ । ५ अ
नयोराहतिः २० द्विनिघ्नी ४०
तत्खंडवर्गैक्येन ४१ युता
जातासैव कृतिः ८१ । अथवा

चतुर्दशानां खंडे ६ । ८ अन
योराहतिः ४८ । द्विनिघ्नी ९६ ।
तत्खंडवर्गौ ३६ । ६४ । अन
योरैक्येन १०० युता जातासै
व कृतिः १९६ । अथवा खंडे
४ । १० । तथापि सैव कृतिः १९६
॥ अथवा राशिः २९७ । अयं
त्रिभिरूनः युग्मयुतश्च २९४ ।
३०० अनयो र्घातः ८८२०० ।
त्रिवर्ग ९ । युतो जातो वर्गः
स एव ८८२०९ । एवं सर्वत्रापि
इति लीलावत्यां वर्गः ॥
वर्गमूलं क्ली० हरितसमानांक
द्वयस्याघांकः । यथा वर्गमूले
करणसूत्रं वृत्तम् । त्यक्त्वान्त्या
द्विषमात् कृतिं द्विगुणयेन्मू
लं समे तद्धृते त्यक्त्वालब्धं कृ
तिं तदाद्यविषमाल्लब्धं द्विनि
घ्नं न्यसेत् । पंक्त्या पंक्तिहृतेस
मेऽन्यविषमात् त्यक्त्वाप्तवर्गं
फलं पंक्त्यां तद्द्विगुणं न्यसेदि
ति मुहुः पंक्तेर्दलं स्यात्पदं
अत्रोद्देशकः ।
मूलं चतुर्णां च तथा नवानां
पूर्वं कृतानां च सखे कृतीनां
पृथक् पृथग्वर्गपदानि विद्धि
बुद्धेर्विवृद्धिर्यदितेऽत्र जाता ।

न्यासः ४ । ९ । ८१ । १९६ ।
८८२०९ । १०१००२५ । लब्धानि
क्रमेण मूलानि २ । ३ । ९ । १४ ।
२९७ । १००५ । इति लीलावत्यां व
र्गमूलम् ॥
सजातीयांकत्रयस्य घातः घनः
तस्य तन्मूलस्य च समुदायस्
योदाहरणानि पूर्वं न लिखि
तानि प्रसंगादत्र पुनर्लिख्यंते
घनेकरणसूत्रं वृत्तत्रयं । समत्रि
घातश्च घनः प्रदिष्टः स्थाप्योघ
नोऽन्त्यस्य ततोऽन्त्यवर्गः ॥
आदित्रिनिघ्नस्तत आदिवर्गस्
त्र्याहतोऽन्त्यादि घनश्च सर्वे ।
स्थानान्तरत्वेन युता घनः स्यात्
प्रकल्प्य तत्खंडयुगं ततोऽन्त्यं
एवं मुहुर्वर्गघनप्रसिद्धावाद्यां
कतो वा विधिरेष कार्यः ॥
खंडाभ्यां वा हतो राशि स्त्रिघ्नः
खंडघनैक्ययुक् वर्गमूलघ
नः स्वघ्नो वर्गराशेर्घनो भवेत् ॥
अत्रोद्देशकः । नवघनं त्रिघन
स्य घनं तथा कथय पंचघन
स्य घनं च मे । घनपदं च ततो
पि घनात् सखे यदि घनेऽस्ति
घना भवतो मतिः । न्यासः ९ । ३
१५५ । जाताः क्रमेण घनाः

२२९ । ९९८८३ । ९९५३२२५ ॥
अथवा राशिः ९ । अस्य खण्डे
४।५। आभ्यां राशि हृतः ९८-
त्रिनिघ्नस्य ५४० खण्डद्वयेनैकेन
१८९। युतो जातो घनः २२९ ।
अथवा राशिः २२ अस्य खण्डे २०।
२। आभ्यां हत त्रिनिघ्नस्य ११३४०
खण्डद्वयेनैकेन ८३४३। युतो जा
तो घनः ९९८८३ ॥ अथवा रा-
शिः ५ । अस्य मूले २। घनः
८। अयं स्वघ्नो जात स्त्रिगुणो
घनः ८४ अथवा राशिः ९ ।
अस्य मूले ३ घनः २७। अस्य व
र्गो नवाब्धो घनः २२९ । एवं
वर्गमूलघनवर्गः । इति घनः
॥ अथ घनमूले करणसूत्रं वृ
त्तद्वयम् । आद्यं घनस्थानम
थाघने द्वे पुन स्तथान्त्याद्
घनतो विशोध्यम् । घने पृथक्
स्थपद मस्य कृत्वा त्रिघ्नान्तदा
द्यं विभजेत् फलन्तु । पंक्त्यां न्य
सेत्तत् कृतिमन्त्यनिघ्नीं त्रिघ्नीं
त्यजेत्तत्प्रथमात् फलस्य । घ
नं तदाद्याद्घनमूल मेवं पंक्ति
र्भवेदेव मतः पुनश्च ॥
अत्रोद्देशकः । पूर्वघनानाम्
तानां न्यासः २२९ । ९९८८३ ।
९९५३२२५ । क्रमेण लब्धानि
मूलानि ९ । २७ । १२५ । इति
लीलावत्यां घनमूलम् ॥
वर्णसंकरः पुं मिश्रितजातिः
तत्कारणं दोषाश्च यथा ।
अधर्माभिभवात् कृष्ण प्रदुष्यन्ति
कुलस्त्रियः । स्त्रीषु दुष्टासु वार्ष्णे
य जायते वर्णसंकरः । संकरो
नरकायैव कुलघ्नानां कुलस्य
च । पतन्ति पितरो ह्येषां लुप्तपि
ण्डोदकक्रियाः । दोषैरेतैः कु
लघ्नानां वर्णसंकरकारकैः ।
उत्साद्यन्ते जातिधर्माः कुलधर्मा
श्च शाश्वताः ॥ उत्सन्नकुलध
र्माणां मनुष्याणां जनार्दन ॥
नरके नियतं वासो भवतीत्य
नुशुश्रुमः ॥ इति श्रीभगव
द्गीतायां १ अध्यायः ॥
वर्णाधिपः पुं ब्राह्मणादिव
र्णचतुष्टयस्याधिपतिग्र
हः । यथा । ब्राह्मणे शुक्रवागी
शौ क्षत्रिये भौमभास्करौ । चन्द्रो
वैश्ये बुधः शूद्रे पतिर्म्लेन्दोः
न्त्यजे जने । इति ॥ स्वाध्याये
ये वेद वर्णाधिप इह शुभदे
शोत्सवे नादिनो च । इति च
ज्योतिस्तत्त्वं ॥

वर्णितः त्रि स्तुति युक्तः । तत्
पर्य्यायः । नुतः १५ । इति ज
टाधरः ॥
वर्हीण पुं मयूरः । इत्यमरः ॥
वसंतपंचमी स्त्री श्रीपंचमी
यथा । मकरस्थे सहस्रांशौ शु
क्लपक्षे यथाविधि । इत्यारभ्य
पंचम्यां च जगद्धात्री प्रातरेव वन
दीजलैः । स्नापयित्वा सलक्ष्मी
कां कुंभे स्मीरकेतरेपि ॥ वसं
वसंतपंचमीनाम सर्वपापप्र
मोचनी । वसंतेच समभ्यर्च्य
कंदर्पस्वरतिप्रिये । वसंतराग
श्रवणात् श्रियमाप्नोत्यभी
प्सितां । श्रीपंचमीतकेचिता
मुनयः प्रवदंति वै । वर्तयेद्द
कुंभकेन श्रियानविच्युतिर्भवे
त् । इति मत्स्यसूक्ते ५५ प
टलः ॥ अन्यच्च ॥
माघस्य शुक्लपंचम्यां महाद्
नांसमाचरेत् । नैव प्रवालैः कु
सुमै रनुलेपैर्विशेषतः ॥
नीराजनोत्सवे कृत्वा भक्त्या
संमान्य वैस्नवान् । वसंतरा
गजनयन् गीत नृत्यादिकार
येत् ॥ तदुक्तं । श्रीपञ्च
मी समारभ्य यावत् स्याच्छ
यनं हरेः । वसंतरागः कर्त
व्यो नान्यदा तु कदाचनेति ॥
कृत्वा वसंतपंचम्यां श्रीकृष्ण
स्याद्वेनोत्सवं । स्याद्वसंत इव
प्रेयान् वृंदावनविहारिणः
इति श्रीहरिभक्तिविलासे
१४ विलासः ॥
वसंतोत्सवः पुं फाल्गुनोत्
सवः । यथा । फाल्गुन्यां पौर्ण
मास्यां तु विदध्याद्दोलवैः सह
श्रीकृष्णप्रियभक्तस्य वसंत
स्याद्वेनोत्सवे । भविष्योत्तरतो
ज्ञेय स्तद्विधि श्चेद पेक्षते ॥
यः श्रीयुधिष्ठिरस्याग्रेकाव्यक्तो
भगवता स्वयं ॥
तन्माहात्म्यं तत्रैव । एवं यः कु
रुते पार्थ शास्त्रोक्तं फाल्गु
नोत्सवं । मत्प्रसादाच्च सिद्ध्यं
ति तस्य सर्वे मनोरथाः । कृते तु
घोरसमये सितपंचदशी प्रा
प्ते वसंतसमये समुपस्थितेच
संप्राप्य चूतकुसुमं सह चंद
नेन सत्यं हि पार्थ पुरुषोऽथ
प्राप्ते सुखी स्यात् ॥
इति श्रीहरिभक्तिविलासे १४
विलासः ॥
वसमाणः त्रि भविष्यत्कथनीय

विषयः। वचघातेः स्यमानव
सयेन निष्पन्नः। यथा। अत्रैव
स्यमानवचनात् मध्यरात्रप्राप्ता
वेवर्जयंतीत्वं। इति तिथ्यादि
तत्वं॥ अपिच। तत्रैव द्वाद
शीमध्ये पारणं श्रवणोधिके
वस्यमाणंच चरेतेऽन्यथाप्र
त्यवहृया व्रतं॥ इति श्रीहरि
भक्तिविलासे १५ विलासः॥
वाकुची स्त्री वृक्षविशेषः॥
हाकुच इतिभाषा। तत्पर्य्या
यगुणा॥ अवल्गुजो वाकुची
स्यात् सोमराजी सुपर्णिका।
शशिलेखा कृष्णफला सोमर
तिफलीतिच। सोमवल्ली का
लमेषी कुष्ठघ्नीच प्रकीर्त्तिता।
वाकुची मधुरा तिक्ता कटुपा
कारसायनी॥ विष्टंभहृद्धिमा
रुच्या सरा श्लेष्मास्त्रपित्तनुत्
रूक्षा हृद्या श्वास कुष्ठ मेहज्व
र कृमिप्रणुत्॥ तत्फलंपि
त्तलं कुष्ठ कफानिलहरंकटु
केश्यं त्वच्यं कृमि श्वास का
सशोथाम पाण्डुहृत्॥ इति
भावप्रकाशः॥
वामनव्रतं स्त्री श्रवणद्वादशी
वर्तिका वामनदेवस्य व्रतवि

शेषः। अथ श्रीवामनव्रतविधिः
नत्वा गुरु मनुज्ञाप्य पश्चान्निय
म माचरेत्। नहि सिद्धेद्गुरोर्भ
क्तिं विषमंच विनाफलं॥
नियममंत्रः। एकादश्यां निरा
हारः स्थित्वाचैवापरेऽहनि।
भोक्ष्ये श्रीवामनानंत शरणा
गतवत्सल इति। एकादश्या
रजन्यांवा द्वादश्यां वार्च्चयेत्प्र
भुं। स्वर्णं रूप्यमये पात्रे ता
म्र वंशमयेऽपिवा। कुम्भेको
स्थापयेत् पार्श्वे छत्रिकापादु
का स्तथा। अक्षांचा वैणवी
यष्टि मत्तसूत्रं पवित्रकं॥
पुष्प गंधैः फलै र्धूपैः प्रदी
पै श्चार्च्चयेद्धरिं। नानाविधै
श्च नैवेद्यै र्भक्ष्य भोज्यै र्गुडो
दनैः॥ जागरंनिशि कुर्वीत
गीत वादित्र नर्त्तनैः॥ ए
वमाराध्य देवेशं प्रभातेविम
लेसति॥ आदावर्घ्यं प्रदात
व्यं पश्चाद्देवं प्रपूजयेत्।
नारिकेलेन शुभ्रेणदद्याद
र्घ्यं त्र्यस्त्रेदैवत्॥ तत्र मंत्रः॥
वामनाय नमस्तुभ्यं क्रान्तत्रि
भुवनायच गृहाणार्घ्यमयादत्तं
वामनाय नमोऽस्तुते। वाम

नाय अर्घ्योनमः। मत्स्यंकूर्मं
वराहंच नरसिंहंच वामनं।
रामं रामंच कृष्णंच क्रमात्बौद्ध
कल्किनौ। पादयो र्जानुनो
र्गुह्ये नाभ्या मुरसि कक्षयोः।
भुजयोर्मूर्द्धि सर्वांगेष्वर्च्चयेद्दा
युधानिच। महापूजां ततः
कृत्वा गोमहीं कांचनादिकं।
शक्त्याचार्याय दातव्यं ब्राह्मणे
भ्यश्चमंत्रतः। ब्राह्मणश्चापि
मंत्रेण प्रतिगृह्णाति मंत्रवित्
ददाति मंत्रतो ह्येव दाता भक्ति
समन्वितः। तत्र दानमंत्रः। वा
मनो बुद्धिदो दाता द्रव्यस्थो वा
मनः स्वयं। वामनःप्रतिग्राही
तेन मे वामने रतिः। वामनः
प्रतिगृह्णाति वामनोपिददाति
च। वामनस्तारकोद्वाभ्यां तेन
दं वामनेनमः॥ इति॥ एवं
कृत्वा विधानेन भोजनं षड्र
सकं। एवं दद्याद्ब्राह्मणेभ्यः
पश्चाद्भुंजीत वंधुभिः। यद्वाम
नपुराणेच यद्विधानेन व्रतं
वामनस्योदितं तस्यानुसारा
लिखितं मिदं॥ व्रतमेवंतं
गृहीत्वा नियमं प्रातर्गत्वान
द्योश्चसंगमे। सौवर्णंवामनं

कृत्वा सौवर्णमाषकेण वा। य
थाशक्त्याथ वित्तस्य कुम्भोपरि
जगत्पतिं। स्वर्णपात्रे स्थापयि
त्वा मंत्रैरेतैश्च पूजयेत्। ॐवा
मनायनमः पादौ कटिंदामोद
रायच॥ ऊरु श्रीमतयेगुह्यं
काम देवायपूजयेत्॥
पूजयेज्जगतांपत्यु रुदरंविश्वधा
रिणे। हृदयं योगनाथाय कं
ठं श्रीपतयेनमः। मुखंचपंक
जाक्षाय शिरः सर्वात्मनेनमः॥
इत्थं संपूज्य वासोभि राच्छाद्य
च जगद्गुरुं। दद्यात् सुश्रद्धया
चार्घ्यं नारिकेलादिभिः फलैः
ॐनमो नमस्ते गोविंद बुध
श्रवणसंज्ञक। अघौघसंक्ष
यं कृत्वा प्रेतमोक्षप्रदोभव।
इत्यर्घ्यमंत्रः॥ छत्रोपानह गो
दानं दद्यादत्र कमंडलुं। वि
शेषेण द्विजाग्र्याय वामनःप्री
यतामिति। दध्योदनसमायु
क्तां वारिधानीं प्रदापयेत्। पू
जयित्वा जगन्नाथं वामनः प्री
यता मिति॥ यथाशक्त्याच
दानानि द्विजाग्र्येभ्यः प्रदापयेत्
कुर्य्याज्जागरणं रात्रौगीतवा
द्यसमन्वितं॥ श्रद्धया प

रया युक्तो विप्रानभिमिषेक्षणः
प्रभाते भोजयेद्विप्रान् द्वादश्यां
पारणं ततः ॥ ऊर्ध्वान्तस्वयं प्र
हृष्या तत् सर्वं सफलतां व्रजेत्
॥ तन्माहात्म्यञ्च तत्रैव । एवं
कृतेन कालेय व्रतेऽस्मिन् वि
जयादिने । नतुल्भतरं किं
चिदिह लोकेऽप्यवापरे ॥
फलमस्य व्रतस्योक्तं दत्वापि
ओ नैरोत्तम । वेश्याहारकरोषु
किं याति पैश्याहरणादपि ॥
नपावनतरं किंचिद्दतः परमि
होच्यते । विजयाव्रततुल्यं
च नपरं परिपठ्यते ॥
भविष्यान्तरेच । श्रमामे तत्र
तेनस्मिन् यत्फलं तन्निबोध
मे । चतुर्युगानि राजेन्द्र सप्त
सप्ततिसंख्यया । प्राप्य विष्णु
पुरं राजन् क्रीडते कालमक्षय
। इहागत्य भवेद्राजा प्रतिप
क्षभयंकरः ॥ हस्त्यश्वरथया
नानां दाता भोक्ता विमत्सरः ।
रूपसौभाग्य संपन्नो दीर्घायु
र्निरुजो भवेत् । पुत्र पौत्रैः प
रिवृतो जीवेच्च शरदां शतं ।
इति श्रीहरिभक्तिविलासे १५
विलासः ॥

वामनेत्रे स्त्री दीर्घकारः ॥
यथा । ई स्थिमूर्ति र्महामाया
लोलाक्षी वामलोचने । इत्या
दि वर्णाभिधाने । अपिच ॥
ईशो वैश्वानरस्थः शशधर
विलसद्वामनेत्रेण युक्तो बी
जोतेऽहं मम ह्रिया लिनविक्र
रे कालिके येजपति । इति तं
त्रसारे महाकालविरचितश्या
मास्तोत्रं ॥
वायुः पुं वातियः । सच पंचम
तां तर्गतभूतविशेषः । तद्वि
शेषविवरणं यथा । वायवः
प्राणापानव्यानोदानसमानाः
प्राणो नाम प्राग्गमनवान्
नासाग्रस्थानवर्ती । अपानोना
म अवाग्गमनवान् पाय्वादि
स्थानवर्ती । व्यानो नाम विष्व
ग्गमनवानखिलशरीरवर्ती । उ
दानः कण्ठस्थानीय ऊर्द्ध्वगमन
वानुत्क्रमणवायुः समानः श
रीरमध्यगताशितपीतान्नादि
समीकरणकरः । समीकरणन्तु
परिपाककरणं रस रुधिर शुक्र पु
रीषादिकरणं । केचित्तु नागकू
र्म कृकर देवदत्तधनंजयाख्याः
पंचान्ये वायवः सन्तीत्याहुः ॥

तत्र नागः उद्गिरणकरः । कूर्मः
निमीलनादिकरः । कृकरः क्षु
धाकरः देवदत्तः जृम्भणकरः ।
धनंजयः पोषणकरः । एतेषां
प्राणादिष्वन्तर्भावात् प्राणा
दयः पंचैवेति केचित् । इदं
प्राणादिपंचकं आकाशादि
गतरजोंऽशेभ्यो मिलितेभ्य उत्प
द्यते । इदं प्राणादिपंचकंक
र्मेन्द्रियसहितं सत् प्राणमय
कोषो भवति । अस्य क्रिया
त्मकत्वेन रजोंऽशकार्यत्व ॥
एतेषु कोशेषु मध्ये विज्ञान
मयो ज्ञानशक्तिमान् कर्तृरू
पः । मनोमय इच्छाशक्तिमान्
करणरूपः । प्राणमयः क्रिया
शक्तिमान् कार्यरूपः । इति
वेदान्तसारः ॥
वार्त्तीवहः पुं धान्यादेर्वीव
हतियः । पसारी इति भाषा
तत्पर्यायः । वार्त्तीवहः ३
इति शब्दरत्नावली । संवाद
वाहके त्रि ॥
वार्द्धुषिकः पुं वृद्धिजीवी ॥
वाडिखोर इति सूदखोर इति
च भाषा । तत्पर्यायः । कुसी
दः ५ । कुसीदिकः ८ । इति

शब्दरत्नावली ॥
वासन्तीपूजा स्त्री चैत्रमासीयदु
र्गापूजा । यथा । चैत्रे मासि सि
तेपक्षे सप्तम्यादिदिनत्रये । प्रा
तः प्रातर्महादेवीं दुर्गां भक्त्या
प्रपूजयेत् ॥ इति ॥
तत्राष्टम्यां अन्नपूर्णापूजा यथा
तत्राष्टम्यां मन्नपूर्णां पूर्वोक्तेना
थकोत्तमः । रक्तवासे रक्तपुष्पै
र्बलिभिः पूजयेच्छिवां ॥ इति
च मायातन्त्रे ७ पटलः ॥
अपि च । विशेषाच्चैत्रमासस्य
याऽतिथिः स्यात् सिताष्टमी ।
तस्यां यः पूजयेद्भक्त्या प्रसादय
ति मां ध्रुवं ॥ इति प्राणभवेत
न्त्रे ५४ पटलः ॥
विकंकतः पुं वदरीसदृशाम्ल
फलवृक्षः । वैंचइतिभाषा । त
त्पर्यायः । वैकंकतः १९ तुनिक
रः २० कोठिकारी २१ । इतिशब्द
रत्नावली । किंकिरी २२ स्रुवद्रु
म २३ इति जटाधरः त्रि ॥
विकृष्टकालः पुं चिरकालः ॥
यथा । विकृष्टकाले यो वेगोर्मे
दैः समभिवर्तते । तद्विकानाम
सा हिक्का जत्रुमूलात् प्रधाव
ति विकृष्टकालैः चिरेण ॥

अत्र ककोरसो संधिः ॥ इति भावप्रकाशः ॥

विचित्रितः त्रि नानावर्णयुक्तः यथा। आसने सर्वशोभाढ्ये रत्नमणिनिर्मिते। विचित्रितेच चित्रेण शृसतां शोभनेहरे ॥ इतिब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्यायः ॥

विजयोत्सवः पुं आश्विनस्य शुक्लदशमीविहितभगवदुत्सवविशेषः। यथा। आश्विनस्य सिते पक्षे दशम्यां विजयोत्सवः। कर्त्तव्यो वैष्णवैः सार्द्धं सर्वत्र विजयार्थिना ॥ अथ विजयोत्सवविधिः ॥ रथमारोप्य देवेशं सर्वालंकारशोभितं। सायित्रमाथचतुर्वीणपाणिनकं चरांतके। स्वलीलया जगन्नाथमाविर्भूतं रघूद्वहं। राज्ञोपचारैः श्रीरामं शमीवृक्षतलं नयेत्। सीताकान्तं शमीयुक्तं भक्तानामभयंकरं। अर्चयित्वा शमीवृक्षं अर्चयेद्विजयाप्तये ॥ तत्र मंत्रः॥ शमी शमयते पापं शमी लोहितकंटका। धारिण्यर्जुनवाणानां रामस्य प्रियवादिनी॥ करिष्यमाणयात्रा यथाकालं सुखंमया ॥ तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजिते। गृहीत्वा साक्षतां मार्द्रां शमीमूलगतां मृदं। गीतवादित्रनिर्घोषैः ततो देवं गृहं नयेत्। कैश्चिद्दैत्यैः स्तत्र भाव्यं कैश्चित् भाव्यञ्च वानरैः ॥ कैश्चिद्रक्षमुखैव भाव्यं कोशलेन्द्रस्य तुष्टये ॥ निर्जिता राक्षसा दैत्या वैरिणो जगतीतले ॥ रामराज्यं रामराज्यं रामराज्यमिति ब्रुवन् ॥ आनीय स्थापयेद्देवं निजसिंहासने सुखं। ततो नीराज्य देवेशं प्रणमेद्दण्डवत् भुवि ॥ महाप्रसादवस्त्रादि धारयेत् वैष्णवैः सह ॥ इति श्रीविष्णुधर्म्मोक्तानुसारेण वलेख्ययं। विधिः श्रीरामविजयोत्सवेऽपि उत्सवकृत् असतो ॥ सीता दृष्टेति हनुमद्वाक्यं श्रुत्वाकरोत् प्रभुः। विजयं वानरैः सार्द्धं वासरेऽस्मिन् शमीतले ॥ इति श्रीहरिभक्तिविलासे १५ विलासः ॥

विद्या स्त्री महाविद्या। कलौ तस्या नानामस्यास्तामसीरूजा

सर्वत्र भविता। अधुनास्या वा रोपषारीपूजा इति ख्याता। यथा। अस्मिन् कालेऽसुरेशानि प्रकाशो जायते भुवि तमोऽथ भैरव सर्वत्र देवताप्रतिमासदा ॥ अष्टम्याञ्च चतुर्दश्याञ्च वर्म्मा शनिभौमयोः। संक्रान्त्यां पंचदश्याञ्च पक्षयोरुभयोरपि। कृत्वा तु पूजयिष्यति महाविद्यां सभैरवां। विद्याञ्च विविधां देवि तथान्यप्रतिमां शुभां ॥ एवं हि तामसी पूजा सात्त्विकी च भवेत् कलौ इति मायातन्त्रे ९ पटलः ॥

विनिगमना स्त्री एकतरपक्षपातिनी युक्तिः। एकतरावधारण। यथा। उच्यते। एकदेशोपात्तस्यैव भूहिरण्यादावुत्पन्नस्य स्वत्वस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतया अव्यवस्थितस्य गुटिकापातादिना व्यञ्जने विभागः ॥ इति दायभागः ॥ उच्यते इति ॥ भूहिरण्यादावुत्पन्नस्य एकदेशोपात्तस्य तत्तद्देशावच्छिन्नस्य विनिगमना इदममुकस्य नान्यस्य अवधारणरूपा तत्प्रमाणाभावेन वैशेषिकव्यवहारः परं परैनैरपेक्ष्येण दानविक्रयादिलक्षणः तदनर्हतया अव्यवस्थितस्य सतो अव्यवस्थितकल्पस्य गुटिकापातादिना व्यञ्जने इदममुकस्य अवधारणेन विभाग इत्यर्थः। इति तट्टीकायां श्रीकृष्णतर्कालंकारः ॥

विनिर्मोकः पुं व्यतिरेकः ॥ यथा। दिवाकरवारविनिर्मोके तु गर्गः। इति चूडाप्रकरणे ज्योतिस्तत्त्वं ॥

विनेयः त्रि दण्डनीयः। यथा ज्योतिर्ज्ञानं तथात्मानमविदित्वा तु येऽल्पणं। श्रावयन्त्यर्थलोभेन विनेया स्तेऽपि यत्नतः॥ विनेयाः दण्डनीयाः ॥ इति ज्योतिस्तत्त्वं ॥

विंडुवासरः पुं गर्भे सन्तानोत्पत्तिकारकशुक्रपातदिनं इति ज्योतिषं ॥

विरूढः पुं गुणोत्कर्षादिवर्णनं यत्र तत्। नायिकः कथित श्रेति विरूढो द्विविधो मतः ॥ संयुक्तानियमो ह्यत्र वर्णितः पूर्ववद्बुधैः ॥ हि चतुःषड्दश

स्वात्र कलास्तु विरुदे मताः।
दशभ्यो नाधिकाः कार्य्याः क
लास्तु विरुदे बुधैः ॥ कलिका
भ्यस्तु विरुदे मिदासावेव की
र्त्तिता। विरुदं कवयः प्राकृते
णोत्कायादिवर्णनमिति । वि
रुदः कालिकाद्यन्ते धीरवीर
दिशाद्भाक्। इत्युपोद्घातः ॥
इति श्रीरूपगोस्वामिकृतश्री
गोविंदविरुदावलीभाष्ये श्री
वलदेवविद्याभूषणः ॥
विरुदावली स्त्री विरुदश्रेणी
स्तवमाला। तल्लक्षणादि य
था। अथोच्य विरुदावल्या लक्ष
णं ग्रंथकृतकृते। यत्नात्तेन पठ
ति प्राज्ञस्तदा वोधोऽस्य पुष्क
लः सामास्यविरुदावल्या गोविं
दविंदविरुदावल्यां । योऽन्यथा
पिविशेषस्ते स तावदिह लि
ख्यते। कलिका लोकविरुदैस्त
ता विविधलक्षणैः। कीर्त्तिप्र
तापयोर्दीप्य सौंदर्याद्येष·
शालिनी। कलिकाद्यंतसंस
र्गिपद्या दोषविवर्जिता। श
ब्दाडंवरसंश्लिष्टा कर्त्तव्या विरुदा
वली ॥ इति श्रीरूपगोस्वा
मिकृत श्रीगोविंदविरुदाव·
लीभाष्ये श्रीवलदेवविद्याभू
षणः ॥ कलिकालक्षणं क
लिकाशब्दे लिखितं विरुद
लक्षणं तच्छब्दे द्रष्टव्यं ॥
विल्वः पुं स्वनामख्यातवृक्षः
तस्य गोमयोद्भवत्वं यथा।
यज्ञार्थं चेह संभूत्यै यथा वृ
हिरस्य च। गोमयो रोचना
क्षीरं मूत्रं दधि घृतं गवां ॥
षडंगानि पवित्राणि तथासि
द्धिकराणि च। उत्थितो विल्व
वृक्षस्तु गोमयान्मुनिसत्तम ॥
तत्रासौ वसते लक्ष्मीः श्रीवृक्षस्ते
न चोच्यते। इति वह्निपुराणे
वैष्णवधर्म्मे शुद्धिव्रतनामा
ध्यायः ॥
विवह पुं उद्वाहः। तत्प्रयो
गो यथा। अथ कृतवृद्धिश्रा
द्धः संप्रदाता लग्नसमये संप्र
दानशालायां गत्वा अग्रतः
स्त्रीगवीं वद्धा विष्टरादिकं स
ज्जीकृत्य पश्चिमाभिमुखोऽनुप
विष्ट स्तिष्ठेत्। ततोऽग्रत उपस्थि
ते वरे संप्रदाता कृताञ्जलि र्व
रणं कुर्य्यात् ॥ ॐ सा
धु भवानास्तामिति पृच्छेत्
जामाता ॐ साध्वहमासे इति

वदेत्। संप्रदाता ॐ अर्चयि
ष्यामो भवंतं इति पृच्छेत् ॥
जामाता ॐ अर्चय इति वदेत्
ततः संप्रदाता पाद्यार्घ्याचम
नीय गंधमाल्य यथाशक्त्यं
गुरीय सपदक यज्ञोपवीत
सुवर्णशृंगारादिकं प्रदाय जामा
तरमर्च्चयेत्। ततः संप्रदाता द
क्षिणं जानु धृत्वा ॐ अद्येत्यादि
अमुकगोत्रस्यामुकप्रवरस्यामु
कदेवशर्म्मणः प्रपौत्रं अमुकगो
त्रस्यामुकप्रवरस्यामुकदेवश
र्म्मणः पौत्रं अमुकगोत्रस्यामु
कप्रवरस्यामुकदेवशर्म्मणः पु
त्रं अमुकगोत्रं अमुकप्रवरं अमु
कदेवशर्म्माणं अमुकगोत्रस्या
मुकप्रवरस्यामुकदेवशर्म्मणः प्र
पौत्रीं अमुकगोत्रस्यामुकप्रवर
स्यामुकदेवशर्म्मणः पौत्रीं अमु
कगोत्रस्यामुकप्रवरस्यामुकदेव
शर्म्मणः पुत्रीं अमुकगोत्रां अमु
कप्रवरां श्रीअमुकीदेवीं एनांक
न्यां शुभविवाहेन दातुं एभिः
पाद्यादिभिरभ्यर्च्य भवंतमहं
वृणे। जामाता ॐ वृतोऽस्मी
तिवदेत् संप्रदाता यथाविहि
तंविवाहकर्म कुरु। जामाता ॐ
यथाज्ञानतः करवाणीतिवदेत्
ततः स्त्र्याचारादिकं कारयित्वा
शुभचंद्रिकां कारयेत् ॥
ततोऽग्रे उपस्थिते वरे संप्रदा
ता इमं मंत्रं जपति। प्रजा
पति ऋषि रनुष्टुप्छंदोऽर्हनी
या गौ र्देवता गवोपस्थापने
विनियोगः ॥ ॐ अर्हणा पुत्र
वाससा धेनु रभवद्यमे सा नः
पयस्वती दुहा उत्तरा मुत्तरां स
मां। ततो जामाता प्रजापति ऋ
षि र्गायत्री छंदो विराड्देवता
उपविशदर्हनीयजपे विनियो
गः। ॐ इद महमिमां पद्यां
विराज मन्नाद्यायाधितिष्ठामि
इमं मंत्रं जपन्नासने प्राङ्मुखे
उपविशति। ततः संप्रदातापि
पश्चिमाभिमुख उपविशेत्।
ततो दाता साग्रपंचविंशतिकुश
पत्रै र्हिं वामावर्त्तग्रंथिं र
चितं विष्टरं उत्तराग्रं उत्तानह
स्ताभ्यां गृहीत्वा ॐ विष्टरो
विष्टरो विष्टरः प्रतिगृह्यता मि
त्यादधानो विष्टर मर्पयति।
जामाता च ॐ विष्टरं प्रतिगृह्णा
मि इति विष्टरं गृहीत्वा प्रजा
पति ऋषि रनुष्टुप्छंद ओषधयो

देवता विष्टरस्यासनदाने वि
नियोगः। ॐ या ओषधीः सोम
राज्ञीर्बह्वीः शतविचक्षणाः।
तामह्यमस्मिन् आसनेऽच्छि
द्राः शर्म यच्छत। इत्यासने वि
ष्टरमुत्तराग्रं दत्वा उपविशति
ततः संप्रदाता पुनः स्वाच्छमे
व विष्टरं गृहीत्वा ॐ विष्टरो वि
ष्टरो विष्टरः प्रतिगृह्यतामिति
तथैव पुनरर्पयति। जामाता
च ॐ विष्टरं प्रतिगृह्णामीति त
थैव गृहीत्वा प्रजापतिर्ऋषिर
नुष्टुप्छन्द ओषध्यो देवता विष्ट
रस्य पादयोरधस्थापने विनि
योगः। ॐ या ओषधीः सोमरा
ज्ञीर्विष्ठिताः पृथिवीमनु। ता
मह्यमस्मिन् पादयोरच्छिद्राः
शर्म यच्छत। इति पादयोरध
स्तादुत्तराग्रं विष्टरं स्थापयेत्।
ततः संप्रदाता पानीयपात्रं गृही
त्वा ॐ पाद्यः पाद्यः पाद्यः प्रति
गृह्यतामिति पानीयपात्रमर्प
यति। जामाता ॐ पाद्यं प्रतिगृ
ह्णामीति गृहीत्वा प्रजापति
र्ऋषिर्विराड्गायत्री छन्द आपो
देवता पादप्रक्षालनार्थोदक
वीक्षणे विनियोगः। ॐ यतो
देवीः प्रतिपश्याम्याप स्ततो
मा समृद्धिरागच्छतु। अनेनोदकं
वीक्षेत्। ततो जामाता तस्मात्
पात्रादुदकं गृहीत्वा प्रजापति
र्ऋषिर्विराड्गायत्री छन्दः श्री
र्देवता सव्यपादप्रक्षालने विनि
योगः। ॐ सव्यं पादमवनेनिजे
अस्मिन्राष्ट्रे श्रियं दधे। अनेन
वामपादे उदकाञ्जलिं दद्यात्।
ततोऽपरमञ्जलिं गृहीत्वा प्र
जापतिर्ऋषिर्विराड्गायत्री
छन्दः श्रीर्देवता दक्षिणपाद
प्रक्षालने विनियोगः। ॐ द
क्षिणं पादमवनेनिजे अस्मिन्रा
ष्ट्रे श्रियं मावेशयामि। अनेन
दक्षिणपादे उदकाञ्जलिं दद्यात्।
ततः पुनरुदकाञ्जलिं गृहीत्वा
प्रजापतिर्ऋषिर्विराड्गायत्री
छन्दः श्रीर्देवता उभयपादप्र
क्षालने विनियोगः। ॐ पूर्वम
न्यमपरमन्यमुभौ पादाववने
निजे राष्ट्रस्यर्ध्या अभयस्याव
रुद्ध्यै। अनेन पादद्वये उदका
ञ्जलिं दद्यात्। ततः सम्प्रदाता
साक्षतदूर्वापल्लवान् शंखादि
पात्रे निधाय। ॐ अर्घो ऽर्घो
ऽर्घः प्रतिगृह्यताम्। इत्यभिधा-

यार्घ्यमर्पयति। जामाता च ॐ
अर्घं प्रतिगृह्णामीति गृहीत्वा प्र
जापतिर्ऋषिरर्घो देवता अर्घ
प्रतिग्रहणे विनियोगः॥ ॐ अ
न्नस्य राष्ट्रिरसि राष्ट्रिस्ते भूयासं
अनेनार्घं शिरसि दद्यात्॥
ततः सम्प्रदाता उदकपात्रं गृही
त्वा॥ ॐ आचमनीयमाचम
नीयमाचमनीयं प्रतिगृह्यतां
इत्युदकपात्रमर्पयति॥ जा
माता च ॐ आचमनीयं प्रतिगृ
ह्णामीति गृहीत्वा प्रजापतिर्ऋ
षिराचमनीयं देवता आचमनी
याचमने विनियोगः॥ ॐ यशो
सि यशो मयि धेहि। अनेनोप
गुह्य सकृदभ्युक्षमाचामेत्। ततः
संप्रदाता घृत दधि मधुयुक्तं
कांस्यपात्रं कांस्यपात्रान्तरेण
पिधाय गृहीत्वा ॐ मधुपर्को
मधुपर्को मधुपर्कः प्रतिगृह्य
तामिति मधुपर्कं समर्पयति।
जामाता च ॐ मधुपर्कं प्रतिगृ
ह्णामीति गृहीत्वा प्रजापतिर्ऋ
षिर्मधुपर्को देवता अर्हणीयम
धुपर्कग्रहणे विनियोगः ॐ य
शसो यशोऽसि। अनेन मधुपर्कं
गृहीत्वा भूमौ निधाय प्रजापति
र्ऋषिर्मधुपर्को देवता अर्हणी
यमधुपर्कप्राशने विनियोगः
ॐ यशसो भक्षोऽसि महसो भ
क्षोऽसि श्रीर्भक्षोऽसि श्रियं श्रियं
मयि धेहि। अनेन मन्त्रेण वारत्र
यं भक्षयित्वा सकृत् तूष्णीं भक्ष
येत्। ततो जामाता आचान्तो मं
गलौषधिलिप्तेन दक्षिणहस्ते
न तादृशमेव कन्याया दक्षि
णहस्तं स्वहस्तोपरि निदध्यात्।
ततः सौभाग्य पतिपुत्रवतीना
री मंगलपूर्वकं कुशेन हस्तद्व
यं बध्नाति। ततः संप्रदाता ति
लकुशसहितमुदकपात्रं गृही
त्वा वामहस्तेनार्चितां कन्यां
धृत्वा ॐ अद्यामुके मासि अमु
कराशिस्थे भास्करे अमुके प
क्षे अमुकतिथौ अमुकगोत्रः
श्री अमुकदेवशर्मा अमुकका
मः अमुकगोत्रस्यामुकप्रवरस्या
मुकदेवशर्मणः प्रपौत्राय अमु
कगोत्रस्यामुकप्रवरस्यामुकदेव
शर्मणः पौत्राय अमुकगोत्रस्या
मुकप्रवरस्यामुकदेवशर्मणः पुत्रा
य अमुकगोत्रायामुकप्रवराय
श्री अमुकदेवशर्मणे ब्राह्मणाय
वराय अर्चिताय। अमुकगोत्रस्या

मुकप्रवरस्यामुकदेवशर्म्मणः प्रपौत्री अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्म्मणः पौत्री अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्म्मणः पुत्री अमुकगोत्रा अमुकप्रवरां श्रीअमुकीदेवीं इति त्रिरुच्चार्य्य एतां कन्यां सवस्त्रालंकृतां प्रजापतिदेवताकां तुभ्यमहं संप्रददे इति हस्तद्वयोपरि सतिलजलकुशानर्पयति। जामाता ओं स्वस्तीत्यभिधाय कन्यायै प्रजापतिदेवताका इति वदेत्। गायत्री कामस्तुतिं च पठेत्। ओं क इदं कस्मा अदात् कामः कामायादात् कामो दाता कामः प्रतिग्रहीता कामः समुद्रमाविशत् कामेन त्वा प्रतिगृह्णामि कामैतत्ते तत ओं अद्येत्यादि कृतैतत्कन्यादानकर्म्मणः सांगतार्थं दक्षिणामेतत् स्वर्णं अमुकगोत्रायामुकदेवशर्म्मणे ब्राह्मणाय वराय तुभ्यमहं संप्रददे। ततो जामाता ओं स्वस्तीति वदेत्। ततः पतिपुत्रवती नारी दंपत्योर्वस्त्रेण ग्रन्थिं बध्नाति। ततः कुशाग्रम्भिं मुक्ता वस्त्रणाच्छाद्यामो न्यावलोकनं कारयेत्। ततो भद्रे दक्षिणपार्श्वे वरं मुपवेशयेत्। ततो नापितेन गौ गौरिति उक्ते जामाता पठति। प्रजापतिऋषिर्बृहतीच्छन्दो गौर्देवता सर्व्वकृद्गवीमोक्षणे विनियोगः ओं मुञ्च गां वरुणपाशाद्द्विषन्तं मेऽभिधेहि तञ्जह्यमुष्य चोभयो रुत्सृज गामत्तु तृणानि पिबतूदकं। इति पठेत्। ततो नापितेन मुक्तायां गवि जामाता पठति। प्रजापतिऋषिस्त्रिष्टुप्छन्दो गौर्देवता गवानुमन्त्रणे विनियोगः॥ ओं माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः प्रनुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट। अनेन गां विसर्जयेत्। ततो मंगलं कुर्यात्। ततो भर्त्तुर्वामपार्श्वे वधूमुपवेशयेत्। इति सम्प्रदानं समाप्तम्॥ इति भवदेवभट्टः॥

विहृता स्त्री क्षुद्ररोगविशेषः॥ तल्लक्षणं यथा। विहृतास्यामहादाहोपका उंबरसन्निभा। विहृतामिति तां विद्यात् पि-

त्तोत्था परिमंडला॥ पवितः शोथवती॥ अस्याश्चिकित्सा विहृतामिन्द्रवृद्धांच गर्दभीं जालगर्दभं। पैत्तिकस्य विसर्पस्य क्रियया साधयेद्भिषक्॥ पाकेनुरोपयेदाज्यैः पक्के ममधुरभेषजैः॥ इति भावप्रकाशः॥

विवेकः पुं नित्यानित्यवस्तुविवेचनं। यथा। नित्यानित्यवस्तुविवेकस्तावत् ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनं। इति वेदान्तसारः॥

विशातनी स्त्री मोचनकर्त्री। यथा। साधु वीर त्वया पृष्टमवतारकथां हरेः। यत्त्वं पृच्छसि मर्त्यानां मृत्युपाशविशातनीं इति श्रीभागवते ३ स्कन्धे ९ अध्यायः। मृत्योः पाशं विशातयति मोचयतीति तथा। इति तट्टीकायां श्रीधरस्वामी

विष्णुः पुं नारायणः। शिवस्याष्टमूर्तिपूजानन्तरं तत्रैव विष्णाष्टमूर्तिपूजा यथा। कृताए ज्ञामया देवि अष्टमूर्त्तेः शिवस्य च। यथा हि परमेशानि तच्छृणुष्व वरानने॥ अष्टपत्राम्बु। कृत्वा पूजां महेशानि कुण्डल्यां वाह्यवेष्टने। अष्टविष्णा महेशानि नामानि शृणु कामिनि॥ उग्रं विष्णुं महाविष्णुं ज्वलन्तं संप्रतापनं। नृसिंह भीषणं भीमं मृत्युमृत्युं प्रकीर्त्तितं। एतान् विष्णून् महेशानि यथा संपूज्य तच्छृणु। संमुखादिक्रमाद्देवि पूजयेद्विष्णुमव्ययं॥ तन्मन्त्रं शृणु चार्व्वङ्गि ज्ञानसारं वरानने॥ ओं उग्राय विष्णवे नमः॥ ओं महाविष्णवे नमः। ओं ज्वलन्ताय विष्णवे नमः। ओं संप्रतापनाय विष्णवे नमः। ओं नृसिंहाय विष्णवे नमः। ओं भीषणाय विष्णवे नमः। ओं भीमाय विष्णवे नमः। ओं मृत्युञ्जयाय विष्णवे नमः। इति पूजां महेशानि कृत्वा हि परमेश्वरि। विष्णुज्ञाने मया प्रोक्तं सर्वशक्तिसमन्वितं। इति लिङ्गार्च्चनतन्त्रे ७ पटलः॥

विष्णुपदं क्ली नुमध्यं। यथा। अरुन्धती ध्रुवश्चैव विष्णोस्त्रीणि पदानि च। आसन्नमृत्यु·

नौ यशोऽचतुर्थं मार्तण्डमण्डलं । अरुन्धती भवेज्जिह्वा ध्रुवो नासाग्रमुच्यते । विष्णोः पदानि भ्रूमध्ये नेत्रयो र्मार्तण्डमण्डले ॥ इति काशीखण्डे ५२ अध्यायः १३ । १४ श्लोकौ ॥

विष्णुशिला स्त्री शालग्रामशिला । कैला तस्याः स्थितिकालो यथा । अयुताब्दे कलेर्याते त्यजेद्विष्णुशिला महीं । तदर्द्धं जाह्नवीतोयं तदर्द्धं देवताशिला ॥ इति मेरुतन्त्रे ५ प्रकाशः ॥

विष्णुशृङ्खलः पुं योगविशेषः । यथा । मात्स्ये । द्वादशी श्रवणस्पृष्टा स्पृशेदेकादशीं यदा । स एव वैष्णवो योगो विष्णुशृङ्खलसंज्ञितः ॥ तस्मिंस्तु पोष्य विधिवन्नरः संक्षीणकल्मषः । प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभा मिति ॥ विष्णुधर्मोत्तरे द्वितीयविष्णुशृङ्खलयोगमाह एकादशी द्वादशी च वैष्णव्यमपि तत्र भवेत् । तद्विष्णुशृङ्खलं नाम विष्णुसायुज्यकृद्भवेत् । तस्मिंस्तु पोषणाद्गच्छेच्छ्वेतद्वीपपदं ध्रुवं इति श्रीहरिभक्तिविलासे १५ विलासः ॥

विसूचिका स्त्री विसूची } स्त्री अजीर्णरोगविशेषः । ओलाउठा इति भाषा । तस्य निरुक्तिर्यथा । सूचीभिरिव गात्राणि तुदन् संतिष्ठतेऽनिलः । यस्याजीर्णेन सा वैद्यैर्विसूचीति निगद्यते ॥ तस्या निदानमाह । न तां परिमिताहारा लभन्ते विदितागमाः । मूढास्तामजितात्मानो लभन्तेऽशनलोलुपाः ॥ विदितागमा ज्ञातायुर्वेदाः ॥ तस्य लक्षणमाह । मूर्च्छातिसारो वमथुः पिपासा शूले भ्रमोद्वेष्टनजृम्भदाहाः । वैवर्ण्यकम्पौ हृदये रुजश्च भवन्ति तस्यां शिरसश्च भेदः । उद्वेष्टनं हस्तपादयोः । शिरसो भेदः शिरःशूलं ॥ तस्या उपद्रवानाह । निद्रानाशोऽरतिः कम्पो मूत्राघातो विसंज्ञता । अमी उपद्रवा घोरा विसूच्याः पञ्च दारुणाः ॥ अमी उपद्रवा घोराः अमी निद्रानाशादय उपद्रवाः सर्वेषामेव रोगाणां घोराः भयंकराः ।

विसूच्याः पञ्च दारुणाः विसूच्यास्तु पञ्चापि यदि स्युस्तदा दारुणाः प्राणभयंकराः ॥ तस्या अरिष्टमाह । यः श्यावदन्तौष्ठनखोऽल्पसंज्ञश्छर्द्यर्दितोऽभ्यन्तरयातनेत्रः । क्षामस्वरः सर्वविमुक्तसन्धिर्यायान्नरः सोऽपुनरागमाय ॥ सर्वविमुक्तसन्धिः सर्वे विमुक्ताः शिथिलीभूताः सन्धयो यस्य सः । इति भावप्रकाशः ॥ अस्याश्चिकित्सा अजीर्णशब्दे द्रष्टव्या ॥

वीर्य्यं क्ली बलं । औषधानां वीर्य्यस्य स्थितिकालो यथा । यामं कल्ककषायवीर्य्यमविलेहचूर्णेच पक्षत्रयं यन्मासान्नवनीतमोदकौ सहखण्डौ मासत्रये गुग्गुलोः । सिद्धानां रसभस्मनां सुविपुलं वीर्य्यं च वर्षत्रयं किंचिन्न्यूनविवर्जितं गुणपं तैले पुराणं महत् । इति नारायणदासकृतपरिभाषा ॥

वुद्धिः स्त्री आत्मनो गुणविशेषः । सा त्रिविधा यथा । प्रवृत्तिं च निवृत्तिं च कार्य्याकार्य्ये भयाभये । बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी । यया धर्ममधर्मं च कार्य्यञ्चाकार्य्यमेव च । अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी । अधर्मं धर्ममिति या मन्यते तमसावृता । सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥ इति श्रीभगवद्गीतायां १८ अध्यायः ॥

वृद्धिश्राद्धं क्ली वृद्धिनिमित्तकश्राद्धं । तत्त्वभ्युदयनिमित्तं पित्राद्युद्देशेन श्रद्धया अन्नादेर्दाने । तत्कर्मविशेषात् एवं कर्त्तव्यं यथा । निर्णयामृते मत्स्यपुराणं अन्नप्राशे च सीमन्ते पुत्रोत्पत्तिनिमित्तके । पुंसवने निषेके च नववेश्मप्रवेशने । देववृक्षजलादीनां प्रतिष्ठायां विशेषतः । तीर्थयात्रा वृषोत्सर्गे वृद्धिश्राद्धं प्रकीर्त्तितं ॥ हलायुधधृतकूर्मपुराणे । तीर्थयात्रासमारम्भे तीर्थात् प्रत्यागमेऽपि च । वृद्धिश्राद्धं प्रकुर्वीत बहुसर्पिःसमन्वितं ॥ इति श्राद्धतत्त्वं ॥

वृषः पुं पुरुषगवः । तस्य

लक्षणादि यथा । अश्वेभलक्ष
णेऽयुक्ता वसंतेऽस्य चतुष्पादाः
गावः कृतयुगे सृष्टा स्वयमेव
स्वयंभुवा ॥ ब्रह्म क्षत्रिय विट्
शूद्रजातिभेदा श्चतुर्विधाः । शु
क्लांगाः शुचयो गुरुत्वा मृदवः शु
द्धचेतसः ॥ अल्पाशिनो वक्रव
लाः वृषभा ब्रह्मजातयः । द्वयो
र्लक्षणसंवन्धात् द्विजातिर्वृषभो
भवेत् त्रिलक्षणसमावेषात् त्रि
गुणः स वृषाधमः । पीतांगा मृ
दवः शुद्धा अक्रोधा भारवाहिनः
यथेष्टाभोजिनः क्षीणा वृषभा
वैश्यजातयः । कृष्णांगाः क्रूरहृ
दया अपवित्राः सदाशिनः ॥
वृहद्वृषणकोषाश्च वृषभाः शूद्र
जातयः । द्वयो र्लक्षण सम्प
र्कात् द्विजाति वृषभो भवेत् ॥
वातस्य तु । दृष्टीतले समुत्
पन्ना गजाश्वा ये च तुष्पदाः ॥
गुणत्रयविभेदेन तेषां भेदत्र
यं भवेत् । एतन्मतानुसारेणाभो
जः प्राह महीपतिः । ये शुक्लाः
शुचयः शुद्धा महाभारवहाश्च
पि ॥ वक्राशिनः स्वल्पकोषास्ते
वृषाः सात्विका मताः ॥ रक्ता
रक्तरुषः शुद्धा दृष्टा भारं

वहाः शुभाः । वक्राशिनो वक्र
वला स्ते वृषा राजसा मताः
विवर्णा विकृतांगाश्च निर्वलास्व
ल्पभोजिनः । अपवित्रा वृहत्को
षास्ते वृषा स्तामसा मताः । ल
क्षणद्वयसंबंधात् द्विगुणो वृष
भो भवेत् ॥ त्रिलक्षणसमावे
शात् त्रिगुणः स वृषाधमः ॥
अथ गुणाः । नीलः शुभो ध्वजो वा
मः क्षेमो भद्रः शिवः स्थिरः । भो
जदेवेन लिखिता इत्यष्टौ वृष
भा गुणाः । तद्यथा । श्वेतादन्य
तरो वर्णः श्वेतः खुर विषाण
योः । ललाट पुच्छयोः श्वेतः
स नीलः शुभमावहेत् ॥ १ ॥
यो हृत्पृष्ठे रम्यास्ता सविभ
क्ततनुः शुभः । कुरुते यन्न्वहं
स दोषैर्मुक्तो यदालये २ ॥
वर्णस्तु सहजः प्रेङ्खो रम्यस्सुध
ज उच्यते । भद्रः कुले यने यास
विवर्द्धयति निश्चयं ३ ॥ पूर्वार्द्धे
चोन्नतो यस्तु परार्द्धे चैव नीच
कः । निर्दोषो वामदक्षिणकुक्षे
त्रिषु संततं ४ ॥ चंदके दृश्य
ते यस्य ललाटे देव निर्मि
तं । क्षेमनामा वृषः कुर्य्या
द्धन धान्य विवर्द्धनं ॥ ५ ॥

आवर्त्ताश्च शुभा यस्य शुक्रय
स्यापि वा शुभाः । भद्रनामा
वृषः कुर्य्यात् भर्त्तुः सर्वार्थसा
धने ६ ॥ आवर्त्तं शुक्तिविन्ता
ने हृदयेषु वृषतेष्वपि । पादाः स
र्वे सिता यस्य पुच्छतालो सितो
तथा ॥ महोक्षा चायते नेत्रे
कोणे चातिलघुः स्थिरो । मुष्क
योः कृष्णता चैव शृंगे चातिशु
भे दृढे । तनुरोमा महावेगः स्नि
ग्धगंभीरनिस्वनः । शिव इत्येव
कथितः शिवं प्रकुरुते ध्रुवं ।
७ ॥ चरणाः पंजराः स्थूलाः
शिरः शुभ्रं भवेत्तनुः । श्राण
व्याप्तौ दायता शुभा रेखा मस्त
कगामिनी । रक्तताल्वोष्ठजिह्वा
स्तु स्थिरः स्थैर्य्यकारकः श्रियाः ।
नाल्पपुण्येन लभ्योयं वृषभः
शुभलक्षणः ॥ ८ ॥ गौरीस्तामह
देवेन तु लोमत्वे पृष्ठता भारवाहि
ता । कुमारकत्व सिम्पेते वृषभा
णां गुणा मताः ॥ अथ दोषाः ।
व्यंगो विवर्णो विषमः श्वित्री
धूम्रश्शूलः खरः । एते सप्त म
हादोषा वृषभाणां सुदीरिताः ।
विषाणे विषमो यस्य खुरोश्च
विषमास्तथा । नेत्रकोणेथवा

गात्रे पञ्जरे वैकृतं भवेत् ॥
अंग इत्येष कथितो धन धान्य
विनाशनः ॥ १ ॥ पूर्वार्द्धे मस्य वर्णे
तु परार्द्धे चान्यवर्णके एष क्रोडो
विवर्णको वा विवर्णः कुलनाशनः
॥ २ ॥ परार्द्धमुन्नतं यस्य पूर्वार्द्धे
स्त्वाति नीचकं ॥ गच्छतः स्थवे
गेन लग्नो शल्यायेते खरस्वरः ।
विषमो नाम वृषभः संपत्तिक्ष
यकारकः ३ ॥ हिमकुंदेन्दुसं
काशा गात्रेषु लोमविन्दवः ।
श्वित्री नाम महादोषो दूरतस्तं
परित्यजेत् ४ ॥ शृंगाग्रे दीपि
काकारे ज्वलते केकरे दृषेण
कपिलः पुच्छभागच्छेत् सधू
म्रो मृत्यु मावहेत् ५ ॥ दंतसु
ग खुरादीनां यद्येकोपि चले
त् स्वयं । मुष्को वा चलते यस्य
स चलः कुलनाशनः ॥ ६ ॥
आवर्त्ताः शुक्रयो रेखा विषमा
श्च विसंस्थिताः ॥ न्यूनाधिकाः
पंजरास्तु खुरास्तु विषमास्तथा
गुदान्मेढ्रान्तरे यावद्रेखा ध्व
जेव दृश्यते । विस्तृते विषमे
चाणे जिह्वा चैवासिता भवेत्
खरवो हतस्त्याज्या भर्तुः स
र्वधनाशनः । ७ । स्वल्पतादीर्घ

रोमत्वं स्त्रीणांभारवाहिता ॥
रोगत्वं मारकत्वंच वृषदोषाउ
दाहृताः ॥ ब्रह्मादिजातिभेदे
न चत्वारो येवृषामताः ॥ चतु
र्विधानां लोकानां तेपवस्युः
शुभावहाः । योमोहादन्यजाती
यं कुरुते वृषमेनरः ॥ तस्य
नश्यंति वित्तानिचन माचुः
कुलं बलं ॥ ॥ वात
पित्तकफैरेका व्याधयो ये
वृषमताः ॥ तेषामुपशमः
कार्य्यो यथास्वं विधिनाबुधैः
इति वृषपरीक्षा । इति भोज
राजकृतयुक्तिकल्पतरुः ॥
वृषणकच्छुः स्त्री क्षुद्ररोग
विशेषः । तल्लक्षणं यथा । स्ना
नोत्सादनहीनस्य मलोवृषणसं
स्थितः । प्रक्लिद्यते तदास्वेदात्
कण्डूं जनयते तदा । ततः कण्डू
यनात् क्षिप्रं स्फोटः स्रावश्च
जायते । प्राहुर्वृषणकच्छूं तां
श्लेष्मरक्तप्रकोपजां ॥ उत्सा
दनं उद्वर्त्तनं । मलः मैलं इ
ति लोके । प्रक्लिद्यते आर्द्रो
भवति ॥ तच्चिकित्सा य
था । सर्जाह्व कुष्ठसैन्धव
सितासिद्धार्थैः प्रकल्पि
तो योगः । उद्वर्त्तनेन निघ्नंतेश
मयति वृषणस्य कण्डूतिं । ति
यग्वृषणकच्छूंन्तु चिकित्सेत्
पामरोगवत् । अहिस्तननि
र्द्दिष्टक्रिययापिच तां हरेत् ।
इतिभावप्रकाशः ॥
वृषोत्सर्गः पुं अशौचान्ताद्वि
तीयदिनादिकर्त्तव्यत्रिशूलच
क्रांकितवत्सतरीचतुष्टययुक्त
वृषत्यागः । वृषाभावे तत्प्रति
निधिर्यथा । एकादशाहे स
म्प्राप्ते वृषाभावो भवेद्यदि ।
दर्भैः पिष्टैस्तु संपाद्य तं वृषं
मोचयेद्बुधः ॥ वृषोत्सर्जन
वेलायां वृषाभावः कथंचन ॥
मृत्तिकाभिस्तु दर्भैर्वा वृषंकृत्वा
विमोचयेत् । इति मार्कण्डेयतक
ले ८ अध्यायः ॥
वृक्षायुर्वेदः पुं तरुचिकित्सा
दिशास्त्रं । तद्यथा । धन्वंतरि
रुवाच । वृक्षायुर्वेदमाख्यास्ये
प्लक्षश्चोत्तरतः शुभः । प्राग्व
टो याम्यतस्त्वाम्र आप्येश्वत्थ
क्रमेण तु । दक्षिणां दिशमुत्
पन्नाः समीपे कण्टकद्रुमाः ॥
उद्याने गृहवासे स्यात् तिला
न् वाप्यथपुष्पितान् । गृह्णी

1283

याच्छोपयेद्वृक्षान् द्विजं चंद्रंप्र
पूजयेत् । ध्रुवाणि पंचवाय
व्यं हस्तं प्राजेश वैष्णवं ॥
नक्षत्राणि तथा मूलं शस्यं
ते द्रुमरोपणे । प्रवेशयेन्नदीवा
हान् पुष्करिण्यान्तुकारयेत्
हस्ते मघा तथामैत्र माद्यंपु
ष्यंसवासवं । जलाशयसमारं
भे वारुणं चोत्तरात्रयं । संपूज्य
वरुणं विष्णुं पर्जन्यंतत्समा
चरेत् । अरिष्टाशोकपुन्नाग
शिरीषाश्च प्रियंगवः । अशोक
कदलीजंबू स्तथा बकुलदा
डिमाः । सायंप्रातस्तुघर्म्मे शी
तकाले दिनान्तरे । वर्षारात्रेषु
भूः शोष्ये सेक्तव्या रोपितादु
माः ॥ उत्तमं विंशतिर्हस्ता मध्य
मं षोडशान्तरे । स्थानात्स्था
नान्तरं कार्य्यं वृक्षाणां द्वादशां
तरं । विफलाः स्युर्घना वृक्षाः
शस्त्रेणादौ हि शोधनं ॥ वि
डंगघृतपङ्काक्तान् सेचयेच्छी
तवारिणा । फलनाशे कुलत्थै
श्च माषैर्मुद्गैर्यवैस्तिलैः । घृत
शीतपयः सेकः फलपुष्पा
य सर्व्वदा । आविकाजशकृच्चू
र्णं यवचूर्णं तिलानिच । गोमां
समुदकंचेति सप्तरात्रं निधाप
येत् । उत्सेकः सर्व्ववृक्षाणांफ
लपुष्पादिवृद्धिदः । मत्स्याम्भ
सातु सेकेन वृद्धिर्भवति शा
खिनः । विडंगतण्डुलोपेतंम
त्स्यं मांसं हि दोहदं ॥
सर्व्वेषामविशेषेण वृक्षाणांरो
गमर्द्दनं । इत्याग्नेये महापुरा
णे वृक्षायुर्वेदः ॥
वेतसः पुं लताविशेषः । वे
तस इति भाषा वेति जलम
वतो गच्छति इति वेतसः । वी
लईलवत् नास्तीति तसः । इ
त्यमरटीकायां भरतः । अस्य भा
वप्रकाशोक्तपर्य्यायगुणाः पू
र्वं लिखिताः जलवेतसस्य भा
वप्रकाशोक्तपर्य्यायगुणानलि
खिता अतोऽत्र लिख्यन्ते । अथ ज
लवेतसः । निकुंचकः परिव्या
धो नादेयी जलवेतसः ॥
जलजो वेतसः शीतः संग्रा
ही वातकोपनः ॥ इति भा
वप्रकाशः ॥
वेदाधिपः पुं चतुर्वेदाधिपति
ग्रहः । यथा । ऋग्वेदाधिप
तिर्जीवो यजुर्वेदाधिपः सितः
सामवेदाधिपो भौमो शशि

ज्ञोऽथर्ववेदराट् ॥ इति ज्यो
तिस्तत्त्वे ॥
वेदान्तः पुं वेदव्यासप्रणीत
दर्शनशास्त्रविशेषः । यथा । वे
दान्तो नाम उपनिषत्प्रमाणं
तदुपकारीणि शारीरकसूत्रा
दीनि च ॥ इति परमहंस परि
व्राजकाचार्यश्रीसदानन्दयोगी
न्द्रविरचित वेदान्तसारः ॥
इदानीं सर्वस्यापि वस्तुविचा
रोद्देशपूर्वकत्वात् प्रतिज्ञाते
वेदान्तनामतो निर्दिशति वे
दान्त इति । उपनिषद एव प्र
माणं उपनिषत्प्रमाणं । उप
निषदो यत्र प्रमाणमिति वा
तदुपकारीणि वेदान्तवाक्यसं
ग्राहकाणि शारीरकसूत्रादी
नि च । शरीरमेव शरीरं तत्र भ
वो जीवः शारीरकः स सूत्र्य
ते यथातथ्येन निरूप्यते यैः
तानि शारीरकसूत्राणि अ
थातो ब्रह्मजिज्ञासा इत्यादी
नि । आदिशब्दो भाष्यादिसं
ग्रहार्थः । चशब्दो वेदान्तशास्त्रानु
षङ्गार्थः । यद्वा शारीरकसूत्रा
तद्व्याख्यादिवेदान्तार्थसंग्रह
वाक्यानि । अथातो ब्रह्मजि
ज्ञासा इत्यादिसूत्राणीति । आ
दिशब्देन भगवद्गीताद्यध्यात्म
शास्त्राणि गृह्यन्ते । तेषामपि
उपनिषच्छब्दवाच्यत्वादिति भा
वः । इति श्रीनृसिंहसरस्वतीकृ
ततटीका सुबोधिनी ॥
वेसवारः पुं हिङ्ग्वार्द्रक मरीच
जीरक हरिद्रा धन्याकाः क्रमे
ण द्विगुणपरिमाणेनैकीकृ
ताः । इति पाकराजेश्वरे पाक
परिभाषा ॥
वैष्णवः पुं विष्णुभक्तः । विष्णु
मन्त्रोपासकः । तस्य लक्षणं
यथा । गृहीतविष्णुदीक्षाको
विष्णुसेवापरो नरः । वैष्णवश्चा
त्र संग्राह्यः स्कान्दाद्युक्तात्समा
रतः । तथा च स्कान्दे । परमाप
मापन्नो हर्षे वा समुपस्थिते ।
नैकादशीं त्यजेद्यस्तु यस्यादी
क्षास्ति वैष्णवी । समात्मा सर्व
जीवेषु निजाचारादविप्लुतः ।
विष्ण्वर्पिताखिलाचारः स हि वै
ष्णव उच्यते । इति श्रीहरिभ
क्तिविलासे ११ विलासः ॥
अथ श्रीवैष्णवनिन्दादिदोषः ॥
स्कान्दे मार्कण्डेयभगीरथसं
वादे । यो हि भागवतं लोक-

मुपहासं नृपोत्तम । करोति त
स्य नश्यन्ति अर्थधर्मयशःसु
ताः ॥ अथ वैष्णवसमागमवि
धिः । तेजोद्रविणपञ्चरात्रे ॥
वैष्णवो वैष्णवं दृष्ट्वा दण्डवत्
प्रणमेदुभौ । उभयो रन्तरावि
ष्णुः शंखचक्रगदाधरः ॥
अथ वैष्णवसम्माननित्यता ।
स्कान्दे श्रीमार्कण्डेयभगीरथसं
वादे । दृष्ट्वा भागवतं दूरात्स
म्मुखे यो न याति हि । नगृह्णाति
हरिस्तस्य पूजां द्वादशवार्षिकीं
॥ अथ वैष्णवस्तुतिः ॥
स्कान्दे । धन्योऽहं कृतकृत्योऽहं
यद्यूयं गृहमागताः । दुर्लभं
दर्शनं नूनं वैष्णवानां यथा हरेः ॥
अथ वैष्णवाभिगमनमाहात्म्य
स्कान्दे श्रीमार्कण्डेयभगीरथ
संवादे । सम्मुखं व्रजमानस्य
वैष्णवानां नराधिप । पदे पदे
यज्ञफलं प्राहुः पौराणिका
द्विजाः ॥ अथ वैष्णवस्तुतिमा
हात्म्यं । तत्रैव । प्रसन्नं वा परो
क्षे वा यः प्रशंसति वैष्णवं ।
ब्रह्महा मद्यपः स्तेयी गुरुगा
मी सदा नृप । मुच्यते पात
कात् सद्यो विष्णुराह नृपो-
त्तम ॥ अथ वैष्णवान्न
माहात्म्यं । तत्रैवामृतस्परोद्वा
रे । श्रद्धया दत्तमन्नं वैष्ण
वाग्निषु जीर्यति । तदन्नं मेरु
णा तुल्यं भवतेच दिने दिने ॥
अथ वैष्णवशास्त्रमाहात्म्य ॥
स्कान्दे श्रीब्रह्मनारदसंवादे
वैष्णवानि च शास्त्राणि ये शृ
ण्वन्ति पठन्ति च । धन्यास्ते मा
नवा लोके तेषां कृष्णः प्रसी
दति । इति च श्रीहरिभक्ति
विलासे ९ विलासः ॥
वैष्णवाचमनं स्त्री विष्णुपूजा
दिपूर्वकर्मठ कर्तृसंस्कारको
ग ओंकारादिनमोन्त चतुर्थ्यन्त
तन्नामोच्चारणपूर्वक त्रिर्ज
लपानादि । यथा । त्रिः पाने के
शवं नारायणमाधवमप्यथ
प्रक्षालने द्वयोः पाण्योर्गोवि
न्दं विष्णुमप्युभौ । मधुसूदनमे
कं च मार्जनेऽन्यं त्रिविक्रमं ।
उन्मार्जनेऽधरयोर्वामनं श्री
धरोऽवुभौ । प्रक्षालने पुनः पा
ण्योः हृषीकेशं च पादयोः ।
पद्मनाभं प्रोक्षणे तु मूर्ध्नि दामो
दरः ततः । वासुदेवं मुखे सं
कर्षणं प्रद्युम्नमिनुभौ । ना

मयो नैत्रयुगले ऽनिरुद्धंपुरु
षोत्तमं ॥ अधोक्षजे न्रसिंह
न्नु कर्णयो नाभितो ऽच्युतं ।
जनार्दनञ्च हृदये उपेंद्र म
स्तकेततः ॥ दक्षिणेनहरिं
वाहौ वामेकृसं यथा विधि ।
नामोऽन्तञ्च चतुर्थ्यन्तमाचा
मेत् क्रमतो जपन् ॥ अश
क्तः केवलेदंन स्पृशेत्कर्णं
तथाच वाक् । कुर्वीतालभ
नेवापि दक्षिणश्रवणस्यवै ॥
तथाच वाक् इति यत स्मृथैव
वचनमस्ति । कुर्वीतालभनेवा
पीति मार्कंडेयपुराणवचनम
तोनपोनरुक्तं । इति श्रीहरि
भक्तिविलासे ३ विलासः ॥
वैस्नवाचारः पुं विस्नुभक्तानां
माचरणं । यथा । अथाचारा
वहुविधाः शिष्टाचारानुसारतः
श्रीवैस्नवानां कर्तव्या लिख्य
तेऽत्रसमासतः ॥ अथाचाराः
श्रीविस्नुपुराणे और्वसगरसं
वादे गृहस्थाचारकथनावसे ।
देवगो ब्राह्मणान् सिद्धान्वृ
द्धाचार्यांस्तथार्च्चयेत् । द्वि
कालंच नमेत् संध्यामग्नीनुप
चरेत्तथा । सदानुपहते वस्त्रे

प्रशस्ताश्च तथौषधीः । गारु
डानिच । रत्नानि विभृयात्प्र
यतोनरः । प्रसिद्धामलकेशश्च
सुगंधिश्चारुवेशधृक् । किंचित्
परस्वंनहरेत् नाल्पमप्यप्रियंव
देत् । प्रियंच नानृतं ब्रूयान्नान्य
दोषानुदीरयेत् । नान्यस्त्रियं त
थावैरं रोचयेत् पुरुषेश्वरः ॥
न दुष्टयानमारोहेत् कूलच्छा
यांन संश्रयेत् । विद्विष्ट पति
तोन्मत्त वहुवैराति कीटकैः ॥
वंधकी वंधकीभर्तृ क्षुद्रानृत
कथैः सह । तथातिव्ययशीले
श्च परिवादरतैः शठैः ॥ बुधो
मैत्री न कुर्वीत नैकः पंथान
माश्रयेत् । नावगाहेज्जलौ
घस्य वेगमग्रे जनेश्वर ॥
प्रदीप्तं वेश्मन विशेन्नारोहेच्छि
खरं तरोः । नकुर्य्याद्दन्तसंघर्षं
न कुस्णीयाञ्च नासिकां । नासं
वृतमुखो जृम्भेत् श्वासकाशौ
विवर्जयेत् । नोच्चैर्हसेत् सशब्द
चमुंचेत् पवनं वुधः ॥ नखा
नवादयेच्छिंद्यान्नतृणं नमही
लिखेत् । न श्मश्रुभक्षयेल्लोष्ट
नंगृह्णीयाद्विचक्षणः ॥ ज्यो
तींष्यमेध्यशस्तानि नाभिवीक्षे

तचप्रभो । न कुर्य्याच्छवंचै
व शवगंधो हि सोमजः ॥ चत
ष्पथं चैत्यतरुं श्मशानोपव
नानिच । दुष्टस्त्रीसन्निकर्षञ्च
वर्जयेन्निशि सर्वदा । पूज्यदेवद्वि
जज्योतिश्छायां नातिक्रमेद्बुधः ।
नैकः शून्याटवीं गच्छेन्नचशू
न्यगृहं व्रजेत् ॥ केशास्थिकं
टकामेध्य वलि भस्म तुषां
स्तथा । स्नानार्द्र धरणीं चैव
दूरतः परिवर्जयेत् ॥ नानार्या
नाश्रयेत् कांश्चिन्न जिह्मं रोच
येद्बुधः । उपसर्पेन्नच व्यालांश्चि
रं तिष्ठेन्न चोत्थितः ॥ यथेष्ट
भोजकांश्चैव तथा देव परा
ङ्मुखान् । वर्णाश्रमक्रियातीता
न् दूरतः परिवर्जयेत् ॥ अती
वजागरस्वप्ने तद्वत् स्थानासने
वुधः । नसेवेत तथा शय्यांव्या
यामंच नरेश्वर ॥ दंष्ट्रिणः शृं
गिणश्चैव प्राज्ञो दूरेण वर्जये
त् । अवश्यायञ्च राजेंद्र पुरो
वातातपौ तथा ॥ नस्नायान्न
स्वपेन्नग्नो न चैवोपस्पृशेद्बुधः
मुक्तकच्छश्च नाचामेद्देवाद्य
र्चञ्च वर्जयेत् ॥ नैक
वस्त्रः प्रवर्तेत द्विजवाचनके ·

जपे ॥ किंच । न च निर्वृतये
त् केशश्वाचामेन्नैव चोत्थितः ।
पादेन नाक्रमेत् पादंन पूज्या
भिमुखं नयेत् । अपसव्यं नै
व गच्छेद्देवागार चतुष्पथान्
मंगल्य पूज्यांश्च तथा विपरी
तान्न दक्षिणं । सोमार्काग्न्य
म्बुवायूनां पूज्यानांच न संमु
खे । कुर्य्यात् ष्ठीवन विण्मूत्रस
मुत्सर्गंच पण्डितः । तिष्ठन्न मू
त्रयेत्तद्वत् पथ्यानं नावमूत्रयेत्
श्लेष्म विण्मूत्र रक्तानि सर्वदैव
नलंघयेत् । श्लेष्म ष्ठीवनकोत्
सर्गो नान्नकाले प्रशस्यते । व
लिमंगलजप्यादौ नहोमेन महा
जने ॥ योषितो नावमन्येत न
चासां विश्वसेद्बुधः । न चैवेर्ष्यु
र्भवेत्तासु नाधिकुर्य्यात् कदाच
मंगल्य पुष्प रत्नाज्य पूज्यान
नभिवाद्यच । ननिष्क्रामेत् गृ
हात् प्राज्ञः सदाचारपरो नरः
अकालगर्जितादौ तु पर्वस्व
शौचकादिषु । अनध्याये बुधः
कुर्य्यादुपरागादिके तथा । व
र्षातपादिके छत्री दंडी रात्र्यट
वीषुच । शरीरत्राणकामो वैस्नो
पानत्कः सदा व्रजेत् । नार्द्धेन

तिर्य्यक् ह्रवं वा निरीक्षन् पर्य्य
टेदुधः। युगमात्रं महीपृष्ठं न
रो गच्छेद्विलोकयन्। किंच
प्रियमुक्तं हितं नैतदितिमत्वा
नतद्वदेत्। श्रेय स्तद्धितं
वाच्यं यद्यप्यत्यन्तमप्रियं॥ प्रा
णिनामुपकाराय यदेवेह प्र
त्र च। कर्म्मणा मनसा वाचा त
देव मतिमान् भजेत्॥ वृहन्नार
दीये सदासारप्रसंगे। प्रसावह
मितिब्रूयाद्द्विजो वै ह्यभिवाद
ने। श्राद्धं व्रतं जपं दानं देवताभ्य
र्चनं तथा। यज्ञञ्च तर्पणञ्चै
व कुर्वन्तं नाभिवादयेत्॥
तथा स्नानं प्रकुर्वन्तं धावन्तम
शुचिं तथा॥ भुंजानंच प्रणाया
नत्नं भक्षकशिरस्तथा। भिक्षा
न्नपाणिं चैव रमन्तं जलमध्यगं
कृताभिवादनो यस्तु न कुर्य्या
त्प्रतिवादनं। नाभिवाद्यः स
विज्ञेयो यथा शूद्रस्तथैव सः॥
मार्कण्डेयपुराणे मदालसाल
र्कसंवादे। असत्प्रलापमनृ
तं वाक्पारुष्यंच वर्जयेत्॥
असच्छास्त्रमसद्वादमसत्सेवां च
पुत्रक॥ केशप्रसाधनादर्शदर्श
नं दन्तधावनं। पूर्वाह्ण एव का

र्य्याणि देवतानांच तर्पणं। उ
दक्या दर्शने स्पर्शं वर्जयेत् संभा
षणं तथा। नचाभीक्ष्णं शिरः
स्नानं कुर्य्यान्निष्कारणं नरः॥
शिरःस्नातश्च तैलेन नाङ्गं किं
चिदपि स्पृशेत्। पस्या देवाब्रा
ह्मणानां राज्ञो दुःखातुरस्य च।
विद्याधिकस्य गुर्विण्या भार
वस्य महीयसः। मूकान्धवधि
राणाञ्च मत्तस्योन्मत्तकस्य च
पुंश्चल्याः कृतवैरस्य बालस्य
पतितस्य च उपानहस्तमास्या
निष्टतान्यस्य नैव धारयेत्। उपवी
तमलंकारं करकं चैव वर्जये
त्। नतिष्ठ वाकुंजंघश्च प्राज्ञ
लिखेत् कदाचन। न चापि
विक्षिपेत् पादौ वाससी न च
धूनयेत्। आजानुकं वसति
नो विरूपान् भाषयेत् तथा म
नोज्ञानथ मांश्चैव नोपहासेन ह
र्षयेत्। परस्पदं तु नोच्छेत्
शिक्षार्थं पुत्रशिष्ययोः। नानु
लेपनमादद्यात् स्नातः स्नात
कीं कचित्। नचापि रक्तवासाः
स्याच्चित्रवासधरो पिवा। न्त्रक
मनि चानेच स्त्रीसंभोगेच पुत्र
का स्नायीत चेलवान् प्राज्ञः

कटभूमिमुपेत्य च। पुराणमुत्त
लमग्निञ्च विभृयान्न विचक्षणः
कटभूमिं श्मशानं। नाचक्षीत
धयन्तीं गां जले नाञ्जलिना पि
वेत्। धयन्तीं विधन्तीं। शौच
कालेषु सर्वेषु गुरुष्वल्पेषु वा पु
नः॥ नविलंवेत शौचार्थं नमु
खेनानलं धमेत्। विष्णुधर्म्मोत्त
कायामुष्टुदृष्टसंवाददोषिणः॥
अजाश्वा मुखतो मेध्या नगौर्वै
त्सस्य चाननं। माता प्रस्रवणे
मेध्यं शकुनिः फलपातने॥
उदक्या शौचलग्नाश्च सूतिका
न्तावसायिनः॥ स्पृष्ट्वा स्नायीत
शौचार्थं तथैव मृतहारिणः
नारं स्पृष्ट्वास्थि सस्नेहं स्नातः
शुध्यति मानवः। आचम्यैव
तु निःस्नेहं गामालभ्यार्कमीक्ष
वा। नचालपेत् जनं द्विष्टं वीर
हीनां तथा स्त्रियं। देवताभि
पितृभ्यश्चापि यत्त्सिद्धादिनिर
कैः। कृत्वा तत्स्पर्शनालाभं शुद्धो
दर्कावलोकनात्। अवलोक्य
तथोदक्यां संसज्ञान् पतिते
षाण्ढं। विपर्क्षिं सूतिकां चेटवि
वस्त्रान्त्यावसायिनः। मृतनिर्या
तकाश्चैव परदाररताश्च ये। एत

देव हि कर्त्तव्यं प्राज्ञैः शोधन
मात्मनः॥ किंच। यज्ञापि कु
र्वतो नात्मा जुगुप्सामेति पु
त्रक। तत्कर्तव्यमशंके यन्नगो
प्यं महाजने॥ भविष्योत्तरे
श्रीकृष्णयुधिष्ठिरसंवादे। उ
पासितेन येप्यर्का द्विजाः संध्यां
नपश्चिमां। सर्वान् तान्धा
र्मिको राजा शूद्रकर्माणि यो
जयेत्॥ दूरादावसथान्मूत्रं
दूरात् पादावसेचनं। उच्छि
ष्टोत्सर्जनं भूप सदा कार्य्यं हि
तैषिणा। उच्छिष्टोनस्पृशेच्छी
र्षं सर्वप्राणास्तदाश्रयाः॥
केशग्रहान् प्रहारांश्च शिरस्ये
तान् विवर्जयेत्॥ नपाणिभ्या
मुभाभ्यांतु कण्डूयाज्जातु वै शि
रः॥ किंच। स्ववासिनी गुर्विणी
श्च वृद्धवालातुरौ तथा॥
भोजयेत् संस्कृतान्नेन प्रथमं
चरमं गृही। अर्चे सकेवलं भुंक्ते
वद्धे गो वाहनादिके। यो भुं
क्ते पाण्डवश्रेष्ठ प्रेक्षता मप्रदा
यच॥ वर्जयेद्दधि शाकंच रा
त्रौ धानाश्च वासरे। किंचा
स्तजश्च नावकर्षेत न वहि
र्धारयीतच। गृहे पारावता

धन्याः शुकाश्च सहसारिकाः
कौर्म्मे व्यासगीतायां । स्वर्ण
स्वा यदि वा शाकं मूलं वा
जलमेव वा । परस्यापहरन् जं
तुर्नरकं प्रतिपद्यते । न राज्ञः
प्रतिगृह्णीयान्न शूद्रात्पति
तादपि । नान्यस्माद्याचकत्वं च
निंदिताद्वर्जयेद्बुधः । नित्यं या
चन कोनस्मात् पुन स्तेनैव वा
चयेत् प्राणानपहरन्नेष याच
कस्तस्य दुर्मतिः । न देवद्रव्यहा
री स्याद्विशेषेण द्विजोत्तमाः ।
ब्रह्मस्वं च नापहरेदापद्यपि
कदाचन । न विषं विषमित्या
हुर्ब्रह्मस्वं विषमुच्यते । देवस्वं
चापि यत्नेन सदा परिहरेत्ततः
न धर्मस्यापदेशेन पापं कृत्वा
व्रतं चरेत् । व्रतेन पापं प्रच्छा
द्य कुर्वन् स्त्रीशूद्रदम्भनं ॥
प्रेत्येह चादृशो विप्रो गर्ह्यो
ब्रह्मवादिभिः । देवद्रोहा
द्गुरुद्रोहः कोटि कोटिगुणा
धिकः । ज्ञानापवादो नास्ति
कं तस्मात्कोटिगुणाधिकं ॥
विस्तु । हिमवद्विन्ध्ययोर्मध्यपू
र्वपश्चिमयोश्शुभं । मुक्त्वा समुद्र
योर्देशं नान्यत्र निवसेद्द्विजः ।

कृष्णो वा यत्र चरति मृगो
नित्यं स्वभावतः । पुण्याश्च वि
श्रुता नद्यस्तत्र वा निवसेद्द्विजः
अर्द्धक्रोशान्नदीकूलं वर्जयित्वा
द्विजोत्तमाः ॥ किञ्च ग्रामेणा
भस्मनाचैव सलिलेन विशेष
तः । द्वारेण लंघमार्गेण षड्
पंक्तिर्विभिद्यते । परक्षेत्रे चरं
तीं गां न चाचक्षीत कस्यचि
त् । न स्वप्नं परि वेषयेत् वा नेंद्रचा
पं न चाग्निकं । परस्मै कथयेद्धि
द्वान् शशिनं वा कथंचन । ति
थिं पक्षस्य न ब्रूयान्नक्षत्राणि
विनिर्दिशेत् । न देव गुरुविप्रा
णां दीयमानं तु वारयेत् । निंद
येद्धा गुरुन् देवान् वेदं वा सो
पबृंहणं ॥ कल्पकोटिशतं सा
ग्रं रौरवे पच्यते नरः । तूष्णी
मासीत निंदायां न ब्रूयात्किं
चिदुत्तरं । कर्णौ पिधाय गंतव्य
न चैनमवलोकयेत् । वर्जये
द्वैरहस्यं च परेषां गूहयेद्बुधः
विवादं स्वजनैः सार्द्धं न कुर्या
द्वै कदाचन । न पापं पापिनं
ब्रूयादपापं वा द्विजोत्तमाः ॥
नेक्षेतोद्यंत मादित्यं शशिनं
चानिमित्ततः ॥ नास्तं

यान्तं नवाविष्टं नोपसृष्टं न
मध्यगं । तिरोहितं वाससा वा
न दर्शांतरगामिनं । नग्नां स्त्रियं
पुमांसं वा पुरीषं मूत्रमेव वा
पतितं व्यंगं चांडालानुच्छिष्टा
न्नावलोकयेत् । नद्युक्तं चैव नो
गां वा नोल्लंघेत मत्तमेव वा ॥
सहशोऽन्नं भोजने पत्नीं नैवा
पीक्षेत मैथुनी । स्रवंतीं जृंभ
माणां वा नासनस्थां यथासुखं
नोदके चात्मनो रूपं न कूलं
श्वभ्रमेव वा । न शूद्राय मतिं
दद्यात् कृशरं पायसं दधि ॥
नोच्छिष्टं वाप्यतः मधु न च कृष्णा
जिनं हरिः । न कुर्यात् कस्यचि
त्पीडां सुतं शिष्यं च ताडयेत् ॥
नात्मानं मवमन्येत दैन्यं यत्ने
न वर्जयेत् । न चाविशिष्टान् सत्
कुर्यान्नात्मानं शंसयेद्बुधः ॥
न नदीष्वन्यनदीं ब्रूयात् सर्वतेषु
न सर्वतं । आवसेन्नैव नैवापि य
स्त्यजेत् सहवासिनं । शिरोऽ
भ्यंगावशिष्टेन तैलेनांगं न ले
पयेत् । रोमाणि च रहस्यानि
स्थानि खानि न च स्पृशेत् ॥
न पाणि पादवाङ्नेत्रचापल्यं
निसमाश्रयेत् । नाभिहन्याज्जलं

पद्भ्यां पाणिना न कदाचन ॥ न
घातयेदिष्टिकाभिः फलानि न
फलेन च । नम्लेच्छभाषणं शि
क्षेत्राकर्षेच्च पदासनं ॥ नोत्संगे
भक्षयेद्भक्ष्यान् गां च संवेशये
न्नहि । नाक्षैः क्रीडेत्कथा वेन स्त्री
भिर्वादं न चाचरेत् ॥ नदंतैर्न
खलोमानि छिंद्यात्सुप्तं न
बोधयेत् । न बालातप मा
सेवेत् प्रेतधूमं विवर्जयेत् ॥
नैकः सुप्यात् शून्यगृहे स्वयं
नोपानहौ वहेत् । नाकारणा
द्वा निष्ठीवेन्न बाहुभ्यां नदीं
भवेत् ॥ नपादक्षालनं कुर्या
त् पादेनैव कदाचन । नाग्नौ
प्रतापयेत् पादौ न कांस्ये धा
वयेद्बुधः ॥ नाभिप्रसारयेद्देवा
न्ब्राह्मणान् गामथापि वा ।
न स्पृशेत्पाणिनोच्छिष्टो वि
प्र गोब्राह्मणानलान् ॥ नचै
वान्नं पदावापि न देवप्रति
मां स्पृशेत् । नाजस्रेदनुपस्प
र्श सर्वंतीनो अतिक्रमेत् ॥
चैत्यवृक्षं नैवच्छिंद्यान्नाप्सुष्ठी
वनमुत्सृजेत् । न चाग्निलंघयेत्
यष्टीमान् नोपसर्प्याद्बुधः क्वचि
त् ॥ नचैवं पादतः कुर्यात्ति

लवद्दंतिषि सज्जेत् । नकूप
मवरोहेत नाचक्षीताशुचिः क्वचि
त् ॥ अग्नौ न प्रक्षिपेदग्निं नाद्भिः
प्रशमयेत्तथा । सुहृन्मरणमा
र्त्तिं वा न स्वयं श्रावयेत् परान् ।
अपण्यं कूटपण्यं वा विक्रयेन
प्रयोजयेत् । कुणपस्थानोदक
स्थाने सीमान्ते वा कृषेन्नतु ॥
नभिंद्यात् पूर्वसमयं सत्योपे
तं कदाचन । परंपरं पशून् व्या
ला पक्षिणो नच योधयेत् ॥
कारयित्वा स्वकर्माणि कारून्
न्विद्वान् न वंचयेत् । वहि
र्गन्धंच कुद्वार प्रवेशंच विवर्ज्ज
येत् । नैकश्चरेत् सभां विप्रः स
मवायंच वर्ज्जयेत् । न वीजये
द्वा वस्त्रेण न देवायतने स्वपेत् ।
नाग्निं गो ब्राह्मणादीनां अंत
रेण व्रजेत् क्वचित् । नाक्रामेत्
कामतश्छायां ब्राह्मणानां ग
वामपि ॥ स्वांतु नाक्रामयेच्छा
यां पतिताद्यै र्न रोगिभिः । वर्ज्ज
येन्मार्ज्जनीरेणुं वस्त्रस्नान घटो
दकं ॥ नाश्नीयात् पयसा तक्रं
न वीजाद्युपवीज्जयेत् । वितत
स्यायाश्च रोहीव मोहूं वा नि
दृशस्यच । आविकं संधिनीक्षी

रं मपेयं मनुरब्रवीत् । हंतका
र मथाग्रञ्च भिक्षाञ्चाशक्ति
तो द्विजः । दद्यादतिथये नित्यं
बुध्यते परमेश्वरं भिक्षा माहु
ग्रासमात्रं मग्रंतस्माच्चतुर्गुणं ।
पुष्कलं हंतकारंतु तच्चतुर्गुण
मिष्यते । मार्कण्डेये । भोजनं हं
तकारं वा अग्रं भिक्षा मथा
पि वा । अदत्वा तु न भोक्त
व्यं यथा विभवमात्मनः ॥
काशीखण्डे । नैवोत्तकदास
नेऽश्नीयान्नाग्नौ वस्त्रमथ क्षि
पेत् । श्राद्धं कृत्वा परश्राद्धे यो
ऽश्नीयात् ज्ञानवर्ज्जितः । दातुः
श्राद्धफलं नास्ति भोक्ता कि
ल्बिषभुग्भवेत् । नाच्चादयेल्लो
मनखं दशनेन कदाचन ॥
करजैः करजच्छेदं कारेणैव वि
र्ज्जयेत् । अपहारेन गात्रञ्च स्वेद
पर्पदवेश्मनो । उत्कोचञ्च
त दैत्यार्थं द्रव्यं हरात् परित्यजे
त् । नष्ठीवनञ्च श्लेष्माणं गृहा
त् हरेर्विनिःक्षिपेत् । उद्धृत्य
पंचमृत्पिंडान् स्नायात् पर
जलाशये अनुद्धृत्य च तत्कर्त्त
रेनसः स्याद्भागीयभाक् ॥
ब्राह्मे । यस्तु पाणितले भुंक्ते

यच्च फूत्कारसंयुतं । प्रसृतांगु
लिभिर्यच्च तस्य गोमांसवच्च
तत् ॥ अत्रिस्मृतौ । स्तनाधिक
स्तनी या गौर्याश्च वा ऽभक्ष्य
चारिणी । तयोर्दुग्धं नहोतव्यं
न पातव्यं कदाचन ॥ अजा
गावो महिष्यश्च याऽमेध्यम
पि भक्षयेत् । हव्ये कव्ये च त
द्दुग्धं गोमयंच विवर्ज्जयेत् ॥
अंगुल्या दंतकाष्ठंच प्रत्यक्ष
लवणं तथा । मृत्तिकाभक्षण
ञ्चैव तुल्यं गोमांसभक्षणैः ॥
अत्रापवादो मनुस्मृतौ । सामु
द्रं सैन्धवञ्चैव लवणे परमाद्भु
ते । प्रत्यक्षे अपि ते ग्राह्ये निषे
ध स्त्वन्यगोचरः ॥ अत्रि
स्मृतौ । दिवा कपित्थच्छाया
च निशायां दधिभोजनं कार्पा
स दंतकाष्ठंच शक्रादपि हरेत्
श्रियं ॥ विष्णुस्मृतौ च । कपि
लायाः पयः पीत्वा शूद्रस्तु न
रकं व्रजेत् । होमशेषं पिवेद्विप्रो
विप्रः स्यादन्यथा पशुः ॥
परिहर्त्तव्य न लेखितत्तत्शा
स्त्रोक्त मन्यथा । यद्यन्नलिखि
तं किंचित्तत्तत्सतं महात्म
भिः ॥ आचाराश्च दृशाः शति

परेपि वहुलाः सतां । तेऽलो
क शास्त्रतो ज्ञेया अपेक्षाय
दि वैष्णवैः । नित्यत्वमेषांमाहा
त्म्य मप्यत्र लिखितात् भृशं
सदाचारस्य । नित्यत्वान्माहा
त्म्याच्च सुसिद्ध्यति । इति श्री
हरिभक्तिविलासे नित्यकृत्यस
मापनोनाम ९ विलासः ॥
वोल्लं क्ली स्वनामख्यातवणि
कद्रव्यं । तत्पर्य्यायगुणाः । वो
लं गंधरसः प्राणं पिण्डं गोपर
साः समाः । वोलं रक्तहरं शी
तं मेध्यं दीपन पाचनं । मधु
रं कटु तिक्तंच ग्रहं स्वेदत्रिदो
षजित् । ज्वरापस्मार कुष्ठघ्नं
गर्भाशयविशुद्धिकृत् । इति
भावप्रकाशः ॥
व्यंजनं क्ली अन्नोपकरणं ॥
तच्च शाकसूपादि । तत्पर्य्या
यः । तेमः २ । इति शब्दरत्नावली
व्यध्वः पुं कुत्सितमध्वः । तत्
पर्य्यायः । कुपथः २ असत्पथः
३ कुत्सितवर्त्म ४ । इति शब्द
रत्नावली ॥
व्याघ्रनखं क्ली नखाख्यगन्धद्र
व्यं । तत्पर्य्यायगुणाः । नखं
व्याघ्रनखं व्याघ्रायुधं तच्च

कारकं। नखं स्वल्पं नखी प्रोक्ता गुहेहविलासिनी॥ नखद्वयं ग्रह श्लेष्म वातास्र ज्वर कुष्ठहृत्। लघूष्णं शुक्रलं वर्ण्य स्वादु व्रणविषापहं। अलक्ष्मी मुखदौर्गन्ध्यहृत् पाकरसयोः कटुः। इति भावप्रकाशः॥

व्यात्तं त्रि प्रसारितं। विस्तृतं। यथा। स्तब्धोर्द्ध्वकर्णं गिरिकन्दराद्भुतव्यात्तास्यनासं हनुभेदभीषणं। दिविस्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षःस्थलमल्पमध्यमं। इति श्रीभागवते ७ स्कन्धे ८ अध्यायः। गिरिकन्दरवत् अद्भुते व्याते प्रसृते आस्ये नासे च यस्मिन्। इति तट्टीकायां श्रीधरस्वामी॥

व्याप्तिकर्म्मा पुं व्यापनक्रियाविशिष्टः। सर्वव्याप्तक्रियः। तद्वैदिकपर्य्यायाः। इन्वति १ नक्षति २ आक्षाणः ३ आनट् ४ आष्ट ५ आपानः ६ अशत् ७ नशत् ८ अनसे ९ अश्नुते १० इति दशव्याप्तिकर्म्माणः॥ इति वेदनिघण्टौ २ अध्यायः॥

व्यामिश्र त्रि संमिलितं। भिन्नविषयाणामेकीभावकरणं। यथा। व्यामिश्रेणैव वाक्येन बुद्धिं मोहयसीव मे। तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्॥ इति श्रीभगवद्गीतायां ३ अध्याये २ श्लोकः॥ क्वचित्कर्म्मप्रशंसा क्वचित् ज्ञानप्रशंसा इत्येवं व्यामिश्रं सन्देहोत्पादकमिव यद्वाक्यं तेन मे मतिं उभयत्र दोलायितां कुर्वन् मोहयसीव। इति तट्टीकायां श्रीधरस्वामी॥

व्युदासः पुं निरासः। परित्यागः। यथा। तदेवमेवकारश्रवणात् त्रिविधेऽपि स्वेष्टविशेषानियमते कर्म्मणि खण्डाभ्युदासाय। इत्यमावास्याश्राद्धकालनिरूपणे तिथ्यादितत्त्वे॥

व्युप्तिः स्त्री वस्त्रादिवपनक्रिया। तत्पर्य्यायः। वाणी ४। इति शब्दरत्नावली॥

व्रश्चनः पुं वृक्षच्छेदनजातनिर्यासः। यथा। देवतार्थहविःशिग्रु लोहितान् व्रश्चनांस्तथा। अनुपाकृतमांसानि विड्जानि कवकानि च॥ इति याज्ञवल्क्यः॥ व्रश्चनान् वृक्षच्छेदनजातान् लोहितानपि॥

यथा मनुः। लोहितान् वृक्षनिर्य्यासान् व्रश्चनप्रभवांस्तथा इति। इति मिताक्षराया माचाराध्यायः॥

व्रह्म क्ली परमात्मा। यथा। वितत्वान्महत्वाच्च तथा नित्यस्वरूपतः। ब्रह्मात्मनो न भेदोऽस्ति चैतन्ये ब्रह्मणोऽधिके इति प्राचीनन्यायग्रन्थः॥

श

श तालव्यशकारः। तस्य लेखनप्रकारो यथा। कुञ्चिता वामतो दक्षगता च मोक्षानिलयः। पुनरूर्द्ध्वगता तास्तु वक्रिचेद्र दिवाकरी। मात्रा भवानी विज्ञेया ध्यानमस्य प्रचक्षते। इति वर्णोद्धारतन्त्रं॥

शाकद्रुमः पुं देवदारुवृक्षः इति भावप्रकाशः॥

शंखः पुं रत्नविशेषः। शंख इति भाषा। तल्लक्षणादि यथा। क्षीरोदकूलेऽपि सुराष्ट्रदेशे तदन्यतोऽपि प्रभवन्ति शंखाः अरुक्षवर्णाः शशिशुभ्रभासः सूक्ष्मास्यवक्त्रा गुरवो महान्तः॥ तेवामदक्षिणावर्त्तभेदेन द्विविधा मताः। दक्षिणावर्त्तशंखस्तु पुण्यादायुर्यशोधनं। तेनैव शिरसा यस्तु स्रुतस्नानः प्रतीच्छति वारि हित्वा सपापानि पूयसोऽतिमानवः। वृत्तत्वं स्निग्धताच्छत्वं शंखस्येति गुणत्रये। आवर्त्तभङ्गदोषौ हि हेमयोगाद्विनश्यति। ब्रह्मादिजातिभेदेन स पुनस्तु चतुर्विधः॥ तद्यथा। ये स्निग्धमसृणाकारा मृदवो लघवस्तथा। ब्राह्मणाः प्रस्तरा ज्ञेयाः सर्वकर्म्मसु शोभनाः। ये दृढाङ्गाः सुशरवस्त्यशोघांशविभागिनः। अथ मानः क्षत्रिया ज्ञेयाः कर्कशाङ्गास्तथैव च। मृदवो गुरवो ये तु येऽस्तेनैव इत्तिताः। तैवैश्याः स्वविभक्तांशा युज्यन्ते सर्वकर्म्मसु। ये कर्कशाङ्गाश्च कर्कशा ये प्रतिष्ठिताः येऽसन्तगुरवः स्निग्धास्ते शूद्राः प्रस्तराधमाः। इति प्रोक्तं मयेषेण सम्यक् पाषाणलक्षणं। विचार्य्य मतिमान् कार्य्यनिषेधक

वंविवर्त्तयेत्ः ॥ इति शुक्तिक
ल्पतरौ अलंकारगणयुक्तिः। अ
चभ्रसवणात् शंखस्य जातिभे
दस्थाने पाषाणस्य सलिलविनिः
श्रीकृष्णार्जुनादिशंखनामानि
यथा। पांचजन्यं हृषीकेशो दे
वदत्तं धनंजयः। पौण्ड्रं दध्मौ
महाशंखं भीमकर्मा वृकोदरः
रः। अनंतविजयं राजा कुंती
पुत्रो युधिष्ठिरः। नकुलः स
हदेवश्च सुघोषमणिपुष्पकौ
इति श्रीभगवद्गीतायां १ अध्या
यः ॥ दक्षिणावर्तशंखस्य तो
येन विस्फुष्णफलं। यथा।
स्फोटोदक्षिणावर्त्तशंखस्य तो
येन योऽभिषिंचयेद्धरिं। सप्तजन्म
कृतं पापं तत्क्षणादेव नश्य
ति। इत्याह्निकाचारतत्त्वे ॥
शंखद्रावकः पुं औषधविशेषः
यथा। अर्क स्नुही तथा चिंचा
तिलापामार्गचित्रकं। अपामार्ग
भस्मसमं वस्त्रपूतं जलं हरेत्
स्वल्पाग्निना पचेत्तत्तु यावल्लव
णतां गतं। लवणेन समो ग्रा
ह्यो हौ क्षारौ टंकणं तथा ॥
समुद्रफेणगोदंता कासीसं शं
खोरका तथा। द्विगुणं पंचल

वणं मातुलुंगरसेन च। काचकु
प्यां तु सप्ताहं वासयेद्दस्रयोग
तः। शंखचूर्णं पलं दत्त्वा वारुणी
यंत्रकं रेत्। सर्वधातून् हरेच्छी
घ्रं वराटी शंखकादिकान्। उद
रादिसर्वरोगाणां सद्यो हि ना
शकः परः। शंखद्रावकः ॥
अपि च। योगिनीभैरवाम्यां च
वलिमादौ प्रदापयेत् पश्चाच्चे
दं च कर्तव्यमेवाह परमेश्वरि
रसः शंखद्रवो नाम शंभुदेवे
न भाषितः। तस्यानुष्ठानमेत
स्य मिदानीं कथ्यते मया ॥
शंखचूर्णं यवक्षारं सर्जिकाक्षा
रं टंकणं। समं च पंचलवणं
स्फटिकारी नृपादरः काचकू
प्यां ततः क्षिप्त्वा वारुणीयंत्रमुद्धृ
रेत्। यामैकं द्रावयत्येष शंख
शुक्तिं वराटकान्। अग्निमांद्य
नाशयेत्तच्च प्लीहगुल्माश्म
रीं तथा। उदरामयविध्वंसिनं
प्लीहोदरहरं च अजीर्णं नाश
येच्छीघ्रं ग्रहणीं च विसूचिकां
भुक्तशेषे च भोक्तव्यो मात्रया
तो रसो नमः। तत्क्षणाद्द्रवेन्न
स्य पुनर्भोजनमिच्छति। प्र
त्यहं भोजनांते च संसेव्यो ।

ऽयं वैसो नमः ॥ नरुजा यां भयं
क्वापि सत्यं सत्यं वदाम्यहं ॥
नेदं यस्य कस्यापि सदा गो
प्यं च कारयेत्। रसः शंखद्रवो
नाम वैद्यानामुपकारकः ॥
शंखद्रावको रसः ॥
इति भैषज्यरत्नावली ॥
शयनैकादशी स्त्री श्रीहरेः श
यनसंबंधितिथिः। सा चाषाढ
शुक्लैकादशी। तद्विवरणं श
यनशब्दे हरिशयनशब्दे च द्र
ष्टव्यं ॥
शर्करार्बुदः पुं क्ली क्षुद्ररोग
विशेषः। तल्लक्षणं यथा। प्राप्य
मांसशिराः स्नायुं मेदः श्लेष्मा त
थानिलः। ग्रंथिं करोत्यसौ भि
न्नो मधु सर्पि वसा निभं ॥ स्र
वत्यास्राव मत्यर्थं तत्र वृद्धिं ग
तोऽनिलः। मांसं विशोष्य ग्र
थितां शर्करां जनयत्यतः ॥
दुर्गंध क्लिन्न मत्यर्थं नाना व
र्णं ततः शिराः। स्रवंति स
हसा रक्तं तं विद्याच्छर्करार्बुदं ॥
शर्करा वालुका तुल्या ॥ तच्चि
कित्सा यथा। मेदोर्बुदवि
धानेन साधयेच्छर्करार्बुदं ॥
इति भावप्रकाशः ॥

शस्त्रहतचतुर्दशी स्त्री गौ
णाश्विनकृष्णचतुर्दशी। गौण
कार्तिककृष्णचतुर्दशी च
यथा। लिंगपुराणे। दीपमा
ला तथा कृष्णचतुर्दशी शिवा
यतः। चतुर्थ्यां च नघां च चत्वरे
षु गृहेषु च। एकविंशकुलोपे
तो वसेच्छिवपुरे नरः। अत्र श
स्त्रहतानां मुल्कादानं श्रामे
घाद्यदेशे। इति संवत्सरकौमु
दी। अन्यच्च अथ शस्त्रहतच
तुर्दशी। तत्र विस्नुः। शस्त्रहता
नां श्राद्धकर्माणि चतुर्दशी
प्रशस्ता। युद्धहतानां मेवेति
न निमयाप्यमिदं। ब्रह्मपुराणे
प्रायोऽनशन शस्त्राग्निविषाद्यु
हत्त्विलांतथा। चतुर्दश्यां तु
कर्तव्यं तृप्त्यर्थमिति निश्चयः
प्रायो महापथगमनं ॥ वायुपु
राणे। युवानस्तु गृहे यस्य मृ
ताः स्युर्यास्तु दापयेत्। शस्त्रेण तु
हतायेवै तेषां दद्याच्चतुर्दशी ॥
युवान एव पितादयो मृता
इत्यर्थः। मरीचिः। विषश
स्त्रश्वापदाहि तिर्यग्ब्राह्मण
घातिनां। चतुर्दश्यां क्रियाका
र्या अन्येषां तु विगर्हिता। ब्राह्म

णकृतत्वात्तेः स्यादलीति ब्राह्म
णत्यातीयेचैवे ब्राह्मणेन हता
इति ब्रह्मपुराणवचनात् । नत
कृत ब्राह्मणघातः तस्यपात
तत्वात् । अन्येषां मशस्त्रादिहता
नां एतत्त्वशास्त्रहतश्राद्धं विस्वा
दिभिः सामान्यप्रकरणे लिखना
त् सकलकृष्णपक्षसाधारणे
पित्रादीनामेवपार्वणविधिप्रक
रणात् पार्वणविधिना कार्य्यं
सपिण्डीकरणादूर्द्ध्वं यत्रयत्रप्रदी
यते तत्रतत्रत्रयंकुर्य्याद्वर्जयित्वा
स्तानहनि । इति शंखवचनाच्च ॥
ननु अन्येषांतु विगर्हिता इति
श्रवणात् कथंपुरुषिकपार्व
णविधिः । नयस्मपुरुषाश्रय
एव शास्त्रहतास्तस्यैव पुरुषि
कविधि रूपपद्यते । एवंयस्यैको
शास्त्रहतावेकोवातेनापि द्वेपुरु
षिकैकपुरुषिकं पार्वणं कर्त्त
व्यं । यथामनुः । पितायस्यतुवृ
त्तः स्यात् जीवेच्चापि पितामहः
पितुः समानं संकीर्त्य कीर्त्तयेत्
प्रपितामहं । तथा हारीतः ॥
पितामहेपि जीवे वै पितर्य्येव
व समापयेत् ॥ नन्वेकोद्दि
ष्टमेव श्रूयते । यथा शंखः

सपिण्डीकरणादूर्द्ध्वं मृतेकृष्णचतु
र्द्दशी । प्रतिसंवत्सरादन्यदेकोद्दि
ष्टं न कारयेत् ॥ यमः । सपिण्डी
करणादूर्द्ध्वं यत्पितृभ्यः प्रदीय
ते । एकोद्दिष्टविधानेन तत्का
र्य्यं शास्त्रघातिने ॥ भविष्यपुरा
णे । समत्वमागतस्यापि पितुः
शास्त्रहतस्य च चतुर्दश्यां तु कर्त्त
व्यमेकोद्दिष्टं नपार्वणं ॥ चतु
र्द्दश्यां तु यच्छ्राद्धं सपिण्डीकरणे
कृते । एकोद्दिष्टविधानेन तत्
कार्य्यं शास्त्रघातिने ॥ उच्यते
एषांवचनानां समूलकत्वात्
समूलत्वेपि पार्वणशास्त्रविष
यान्येतानि विस्वादिवचनेषुपा
र्वणावगतेः । भ्रात्रादीनां तु शास्त्र
हतानामेकोद्दिष्टविधिना कार्य्यं
अपुत्राये मृताः केचित् स्त्रियोवा
पुरुषाश्चये । तेषामपि च देयं
स्यादेकोद्दिष्टं नपार्वणं ॥
इत्यापस्तम्बवचनेन पार्वणनि
षेधात् । तच्चनसकलकृष्णप
क्षसाधारणं विस्वादिवचनेषु
श्राद्धपक्षस्य पार्वणपरत्वोक्तेः
किन्त्वाश्विनमासीय कृष्णप
क्षविषयं । ब्रह्मपुराणे प्राया
ऽनशनेत्यादिना सकलकृष्ण-

पक्षसाधारणं श्राद्धमभिधाय
आश्विने । तर्पणीयास्तु दर्श्यां
लुप्तपिण्डोदकक्रिया । इति
यत्तु नरभिधाने तच्छस्त्रहतभ्रा
त्रादिविषयं अतएव तत्रैवामा
वास्यायां पितरः सम्मानादीमु
द्दो अपीति वृद्धप्रपितामहा
दीनामपि श्राद्धं दर्शितं । इयं
च चतुर्दश्यां मशास्त्रहतश्राद्ध
निंदा आश्विनमासीयपक्षश्राद्धा
दिकल्पव्यतिरिक्तसामान्यकृष्ण
पक्षविहितश्राद्धकाम्यश्राद्धविष
या । प्रकरणभेदेन श्राद्धकर्मभेदा
त् सामान्यविशेषन्यायात् इत
रथा चतुर्दश्यां संक्रान्तिश्राद्धेः
शास्त्रहतनिन्दास्यात् । अतएव
कृष्णपक्षे दशम्यादौ वर्जयित्वा
चतुर्दशीमिति मनुवचनेपि चतु
र्द्दशीवर्जनं पक्षश्राद्धादिव्यति
रिक्तश्राद्धविषयं ॥ ननु शस्त्रा
दिहतानां श्राद्धनिषेधः श्रूय
ते । तथा छागलेयः । शस्त्र
विप्रहतानां च श्रृंगिदंष्ट्रिसरी
सृपैः । आत्मनस्त्यागिनां चैव श्रा
द्धमेषां न कारयेत् । सत्यंबुद्धि
पूर्वहतानामेव । प्रमादस्तता
नांतु श्राद्धादिकमाहाङ्गिराः

अथकश्चित् प्रमादेन म्रियते
अग्न्युदकादिभिः । अशौचं तस्य
कर्त्तव्यं कर्त्तव्या चोदकक्रिया
अबुद्धिपूर्वमपि शृंगादिभिः
क्रीडां कुर्वतो मृतानां न कर्त्तव्यं
यथा चक्रपुराणे ॥ शृंगिदं
ष्ट्रि नखिव्याल विष वह्निस्त्रि
या जलैः । आदरात् परिहर्त्त
व्यः कुर्वन् क्रीडां मृतस्तु यः
परिहर्त्तव्यः श्राद्धादौ शास्त्रा
त्वमत्या बुद्धिपूर्वं मृतानामपि
कर्त्तव्यं । यथाह वृद्धगार्ग्यः
वृद्धः शौचस्मृते लुप्तः प्रत्या
ख्यात भिषक्क्रियः । आत्मा
नं घातयेद्यस्तु भृग्वग्न्यनश
नादिभिः । तस्य त्रिरात्रमशौचं
द्वितीये त्वस्थिसंचयः । तृती
येतूदकं कृत्वा चतुर्थे श्राद्धमि
ष्यते । एवं क्रीडा व्यतिरेकेना
बुद्धिपूर्वं मृताः शास्त्रात्वमत्या
बुद्धिपूर्वकमृता अपि श्राद्धा
र्हाः कथं लुप्तपिण्डोदकत्वमि
तिचेत् गौणमिति क्रमः । बु
द्धिपूर्वे पिण्डोदकक्रियालोपा
दिति । इति श्राद्धविवेकः ॥
शाकाष्टका स्त्री शाकोपकर
णकश्राद्धार्हाष्टमी । साच गौणा

फाल्गुणकृष्णाष्टमी। तद्दिवसं
परिशिष्टे मासाष्टकाशेष्टं इ
ष्टव्यं ॥
शाणः पुं परिमाणविशेषः। य
था। माषैश्चतुर्भिः शाणः स्यात्
धरणः स निगद्यते। टङ्कः स एव
कथितस्तद्द्वयं कोल उच्यते
इति भावप्रकाशः ॥
शालग्रामः पुं गण्डकीशिला
विशेषः। तस्योत्पत्तिकारणं
यथा। शालग्रामस्योत्पत्तिं शृ
एवं तु परमाद्भुतां। गण्डक्या
श्चाकृतपस्तप्तं भवंतु मम देवताः
सर्वाः पुत्राः सदैवाद्य जनानां
मिति ते सुराः। तस्यास्तु तपसा
हृष्टा ब्रह्मविष्णुमहेश्वराः ॥
वरं दातुं समायाता वव्रे सा स
र्व पुत्रतां। अशक्यत्वाद्वरं
दातुं तदा प्राप्तास्तया क्रुधा ॥
प्रत्यक्षमीमाः सुराः कृते यस्मा
त्पुनःपुनः। कीटयोनिं प्रप
द्यध्वं क्रुद्धा सेति शशाप तान्
अविचार्य वरं प्राप्तास्तया
यत्नप्रसादिताः। तेन कर्म
विपाकेन जडाकृष्णा नदीभ
व। अन्योन्यशापं श्रुत्वेत्थं
महान् कोलाहलोऽभवत्

प्रकम्पिताः सुराः साच ब्रह्मा
णं ते व्यजिज्ञपत्। ब्रह्मन्त्रा
हि महाशापाद्भयान्न पतिता
त कृपया। इति देववचः श्रुत्वा
ब्रह्मा शंकरमब्रवीत्। शिरः शो
वाच धातारमहं संहारकारकः
त्वत्सृष्टिकर्त्ता विष्णुश्च पाल
कोऽद्भुतमन्तरः ॥ स दृष्टव्यो
यथा संख्य सुभयोः संभवेदि
ति। इति माहेश्वरं श्रुत्वा वचनं
विष्णुरब्रवीत्। शृणु ब्रह्मन्म
हादेव शृणु देवी गजानन। म
हेशो वाऽस्मणो ग्राह्यमातं गोशा
पतो वद। भविष्यत्यत्र योमे
हं भविष्यामि कलेवरं। शीर्णं
भविष्यति यदा तन्मेदो मज्ज
संभवाः। पाषाणांतर्गताः की
टा वज्राख्याः प्रभविष्यथ अथै
व गण्डकी पुण्या गंगातुल्या म
हानदी। गण्डक्यां गिरिराजस्य द
क्षिणे दशयोजने। विस्तीर्णे त
त्रतु तत्रैव पुण्यक्षेत्रे महीतले
चक्रतीर्थमिति ख्यातं त्रिषु
लोकेषु विश्रुतं। शालग्राम
गतादेवा देवहारवतीगताः ॥
उभयोः संगमो यत्र मुक्तिस्तत्र
न संशयः। सर्वदेवप्रीतिका

भुक्तिमुक्तिप्रदायिनी भवेत्त
स्मात्तु पाषाणा ये तदंतर्गताः
सुराः। प्रार्थितं स विनासर्वे
वज्रकीटा भवन्त्विति। अनेनै
व तु गण्डक्याः पुत्रत्वे भवताम
पि। भविष्यति तदंतस्थ चिह्नेन
हैव तेऽद्भवं। विज्ञाय येऽर्चयि
ष्यंति सा प्रीता तस्य देवता।
न यंत्रस्य न मन्त्रस्य न तत्रस्या
पि पूजनात्। संतोषो जायते
तेषां गण्डक्या मार्जनाद्यथा
इति विष्णुवचः श्रुत्वा ब्रह्माव
चनमब्रवीत् ॥ कीदृक्पूज्या
शिला विष्णोः किंचिह्ना कस्य
वल्लभा। किंफलं चाधिका
रीच केन मार्गेण तद्वद ॥ इति
ब्रह्मवचः श्रुत्वा विष्णुर्वचनम
ब्रवीत्। स्त्रीयवर्णा शिला पू
ज्या ब्राह्मणैः सुखमीप्सये। क्ष
त्रियाशिलामंत्रसिद्धिर्हासि
द्धिकरोतिच। मेचकाकीर्तिता
धैनं नागरवत् सा यशोहरा ॥
पांडुरा पाष्यशमनी मलिना पा
पपीकरा। पीता पुत्रफलं द
द्यादारवर्णा सुतान्हरेत्। नीला
संदिशते लक्ष्मीं श्यामाभा हरते
मतिं रोगप्रदा रक्तवर्णाभिंड

राभा महाकलिं ॥ दारिद्र्यकारि
णी वक्रा समा सर्वार्थसाधिका
स्थूलानिहंति चैवायुः सूक्ष्मा स्व
ल्पमतिं हरेत्। पूजाफलं लांछि
त निष्फलं लांछनं विना। क
पिला चित्रवैकल्यं नेत्ररोगं च
कर्बुरा ॥ भग्ना भग्नकरी ज्ञेया
बहुचक्राऽपमानतां। लक्षणेन त
रहीनाच देवचक्रा वियोगतां
बृहन्मुखी कलहकृत् बृहच्चक्रा
सुतान्हरेत्। संलग्नचक्रा त्वस
त्विकटचक्रा महागदं। भग्नच
क्रा तु दारिद्र्यं सर्वनाशं त्वधोमु
खी। कुष्ठादिकं व्यालमुखी विष
माविषिथापदं। विकृतावर्तना
भिश्च विकारान्कुरुते बहून्।
वंशच्छेदो गृहस्थानां नारसिं
होऽपजायते वैखानो दुःखदायी
चयथायस्मा तथा सुखं। यथा
स्थिरापालयालक्ष्मी सद्विभेदान
तः शृणु। लक्ष्मीहरिः सविज्ञेयो
यत्र पद्मं सचक्रकं। केवलावन
मालाचा गृहस्थानामभीष्टदः १
वासुदेवः सविज्ञेयो यत्र द्वेचक्र
युग्मकं। निरंतरं समे चापि स
क्षेत्रः पापनाशनः २ ॥ सं
कर्षणः सविज्ञेयः प्राक्पश्चा

चक्रयुग्मकं। संलग्नं पूर्वभाग
संमहस्तः सुशोभनः ३ प्रद्यु
म्नश्चक्रः स्यात्सूक्ष्मं दीर्घं विवि
त्रिते। सुषिरांतर्बहिश्छिद्रं पी
त इष्टप्रदायकः। ४। अनिरुद्ध
स्तु नीलाभो वर्तुलश्चातिशो
भनः रेखात्रयं तत्र द्वारि पृष्ठे प
द्मेन लांछिते ५ केशवः सतु
विज्ञेय स्तेषकम्बा ह्यमेववा
प्रावरा पश्चाच्च चक्रं स्यात्
चतुष्कोणः सभागपृष्ठात् ६।
नारायणः श्यामवर्णः नाभौ
चक्रं तथोन्नते। दीर्घरेखासु
मायुक्तं दक्षिणे सुषिरं पशु
७ हरिरूपा शिला साम्याद्य
स्या ऊर्द्ध्वं मुखं भवेत्। हवि
द्धपार्श्वे द्वारे भुक्ति मुक्तिप्रदा
तु सा ८॥ परमेष्ठी सविज्ञेयः
पद्म चक्रान्वितस्तु यः। बिल्वाकृ
तिश्च शुक्लाभः पृष्ठे च सुषिरं भवे
त् ९ विष्णुस्तु कृष्णवर्णः स्यात्
स्थूलचक्रे सुशोभने। द्वारोपरि
तथा रेखा दृश्यते मध्यदेशा
तः १० नारसिंहस्तु कपिलः पृ
थुचक्रो बृहन्मुखः। त्रयो वा
पंच वा नव बिन्दवो गृहिनांन
स्यात्॥ ११॥ कपिलो नरसिंहस्तु

गुड लाक्षा निभो भवेत्। स्थूल
चक्रद्वयं मध्ये द्वारे रेखा सुशो
भना। १२। महालक्ष्मीसिंहो विज्ञेयः
पृष्ठे बैकै लंबासौ ग्रंतः। रेखा
श्च केशराकाराश्चरवं दीर्घं भ
यानकं॥१३॥ लक्ष्मीनृसिंहो
विज्ञेय स्थूलचक्रः सबिंदुकः
पृष्ठेकमलरोगश्चैको वनमाला
विराजितः॥१४॥ वराहो सौ
शक्तिलिंगो चक्रे चविषमे
तथा। इंद्रनीलनिभः स्थूल
स्त्रिरेखा लांछितो भवेत्॥
१५ पृथ्वी वाराहनाम्नी साया
वराहाकृतिः शिला। आभुग्ना
चैव रेखैका गतराज्यप्रदायि
का॥१६॥ मत्स्याख्या सा शि
लाज्ञेया बिंदुत्रय विभूषिता
कांस्याद्वाराहनाम्नी दीर्घा
सुभुक्तिमुक्तिदा॥१७॥ कूर्मा
ख्या तु शिला पृष्ठे वर्तुला चो
न्नता भवेत्। हरितं वर्णमायं
तं कौस्तुभेनच चिह्निता। शि
ला कूर्मः सविज्ञेयः कूर्माकार
स्तुया भवेत्। चक्रांकिता तथा
वृत्ता पूजिता सा पदप्रदा १८ श्रृ
गीवोंऽकुशाकारा रेखा चक्रा
समीपगा। वक्रबिंदुसमायुक्तं

पृष्ठं नीरदनीलकं॥१९। ज्ञे
यः सौम्यहयग्रीवो हयग्रीवास
मा शिला। दीर्घया लेखया यु
क्ता रेखा वा नातिदृश्या भवेत्।२०।
हयशीर्षः सविज्ञेयो अंकुशस्य
हयाकृतिः। पद्माकृति भवेद्वापि
साक्षमाले शिरस्तथा॥२१॥
वैकुंठ स्तिलवर्णाभ श्चक्रमेकं
तथा ध्वजं। द्वारोपरि तथा रे
खा पद्माकारा सुशोभना॥
२२॥ श्रीधरस्तु तथा देवश्चि
ह्नितो वनमालया। कदंबकु
सुमाकारा रेखापंचकभूषितः
२३ वामनः सतु विज्ञेयो योऽति
ह्रस्वश्च वर्तुलः। अतसीकुसु
मप्रख्यो बिंदुनोपरि शोभितः
२४ दधिवामन नामातु ऊर्द्ध्वं
पश्चक्रसंयुतः। महाद्युति र
नीकस्थः सुभिन्नः क्षेमदायकः
२५॥ सुदर्शनस्तथा देवः श्या
मवर्णो महाद्युतिः। वामपा
र्श्वे तथा चक्रं रेखैकैव तु दक्षि
णे।२६। सहस्रार्जुननामासौ
नानारेखामयी भवेत्। चक्रा
कारा यंत्र पंक्तिः सन्तुष्टप्रदाय
कः॥२७ स्थूलो दामोदरो यस्य
मध्ये चक्रं प्रतिष्ठि ।

तं। पृष्ठाभं द्वारसंकीर्णः पीत
रेखा धनप्रदः॥२८॥ रामोदा
मोदरो ज्ञेय ऊर्द्ध्वं पश्चक्रवह्नि
ले। नातिदीर्घमुखं मध्ये लंबरे
खा स भोगदः॥२९। दामोदरः
सविज्ञेयो यश्चक्रद्वयलांछि
तः। सूक्ष्मं भवेच्च विवरं पूजि
तः सुखदः सदा॥३०॥
अनंतो वक्रवर्णः स्यान्नागाभो
गेन चिह्नितः। अनेकचक्रसं
भिन्नः सर्वकामफलप्रदः ३१
पुरुषोत्तम नामासौ यस्यादिक्षु
विदिक्षु च ऊर्द्ध्वं न्यासस्यानि ह
श्यपस्तेषु रूषाद्यफलप्रदः ३२
योगेश्वरः सविज्ञेयो लिंगाय
स शिरोगतं। ब्रह्महत्यादि
पापानां नाशको योगसिद्धि
दः॥३३॥ पद्मनाभस्तथा र
क्तः पंकजछत्रसंयुतः। तुल
स्या पूजितो नित्यं दरिद्रं क्लीस्य
रोभवेत्॥३४। रश्मिज्वालो
हिरण्याह स्वर्णाभः स्फटिको
पमः। अथवा जायते नानास्व
र्णरेखाभिरन्वितः॥३५॥ गा
रुडः सतु विज्ञेयो मध्ये पत्रह
यान्वितेः। सुदीर्घा ह्यग्रतो रे
खा स सर्पविषनाशकः ३६

जनार्दनः स विज्ञेयः केवलानि
स्फुटानि च। यस्योदरे तु चक्रा
णि चत्वारि पिलक्ष्मिकृत् ३०
लक्ष्मीनारायणो ज्ञेयो वनमा
लांकितोदरः। सूक्ष्मद्वारस्तु
सूक्ष्मो भुक्ति मुक्तिप्रदायकः
३१ हृषीकेशः स विज्ञेयो योः
र्द्धचंद्राकृति र्भवेत्। तमभ्य
र्च्य लभेत्स्वर्गं विषयांश्च स
मीहितान्। ३९। लक्ष्मीनर
हरि र्ज्ञेयः कृष्णवर्णः सविंदु
कः। वामपार्श्वे समचक्रे गृहस्था
भीष्टदायकः ४० त्रिविक्रमस्तु
विज्ञेयः श्यामवर्णो महाद्युतिः
वामपार्श्वे चक्रयुग्म मेकरेखा
तु दक्षिणे। ४१ कृष्णो ज्ञेयः
शिला कृष्णा सचक्रा वा विच
क्रिका। प्रदक्षिणावर्त्तकृतवन
मालाविभूषिता॥ ४२ चतुर्मु
खः स विज्ञेयो द्वे चक्रे मध्यदेश
तः। चतस्रः पार्श्वगा रेखा वेद
शास्त्रागमप्रदः। ४३। विस्मा भ्र
दाइमे प्रोक्ता ग्रैवेवा वाहयेद्व
र्हि। विसर्जयेद्वा पूजांते प्रति
ष्ठा नाचकारयेत्॥ शालग्रा
माः समाः पूज्या समेषु द्वित
यं न हि। अस्समा नैव पू
ज्यन्ते एकः पूज्यातमो मतः।
शिला द्वादश यो नित्यं भक्त्या
संपूजयेन्नरः। दिने दिने धर्म
वृद्धिः पापनाशश्च जायते॥
शालग्रामशिला यस्तु भक्त्या
संपूजयेन्नरः। शते दिनानि यस्ते
न कृतः कामः स सिद्धति॥
शालग्रामा मत्स्वरूपाः शृण
तेषां तु लक्षणं। यत् सेवना
द्भवेदिष्ट मिहलोके परत्र च॥
शिवनाभः स विज्ञेयः शालि
गाकारेनागतः। स्वयम्भुलिं
गाकृतिमान् मंत्रसिद्धि विधा
यकः। १। त्र्यंबकः स तु विज्ञेयो या
बिन्दुत्रयभूषितः। मूलाकारा
तथा रेखा गतपुत्रप्रदायकः
२ धूर्जटिः स तु विज्ञेयो यत्र
रेखा जटा समा। तिस्रो य
त्र प्रदृश्यन्ते सोऽर्चितः ज्ञानदा
यकः॥ ३॥ शम्भुस्तु पाण्डुरो
ज्ञेयो विंदुकस्तस्तु मस्तके।
बिल्वप्रमाणस्तेजस्वी पूजि
तः स्त्रीवशंकरः ४। ईश्वरः स तु
विज्ञेयो रक्तो विंदुस्तु मस्तके
एकचक्रो द्विचक्रो वाभ्यंतरेः
यस्य गोपदं ५ मृत्युंजयः स
विज्ञेयः स्वल्पमृत्युविनाशकः

अपमृत्युकं तहंद्वेच येना रेखाभि
र्मूलवान् ६ चंद्रशेखरनामा
सार्द्धचंद्राकृति र्मस्तके। मध्ये
चंद्र द्वयं तस्य सेवनाद्रोगनाश
नं॥ ७॥ रुद्रः स एव विज्ञेयः
कपिलो मूर्ध्नि रक्षितः। चक्र
मध्ये भवेद्रेखा मारयेद्विपुसंत
तिं ८॥ शालग्रामान्तरेखा व
दन्ये शक्तिकीट समुद्भवान्।
येषां पूजनतो देवी भवानी सुप्र
सीदति॥ श्रीविद्या सा तले च
क्र मूर्द्धे च्छत्रे प्रदृश्यते। वा
ह्ये चंद्राकिता मूर्द्धो स्निग्धा
श्यामा त्रिवलेष्टदा॥ १। महाका
ली तु सा ज्ञेया योनिचिन्हसम
न्विता। २ छिन्नमस्तायाः सर्वाशि
ला त्रिकोणसांकिता च या। य
द्दायुधाकृति र्मूर्द्धे तां देवीं तत्र
निर्दिशेत्। देवीशिला सचक्रा
या दक्षमार्गेण तां यजेत्॥
सार्चिता वाममार्गेण लोकद्व
यसुखावहा। या चक्ररहिता देवी
शिला तां वामतो ऽर्चयेत्॥
सर्वकार्येण विप्राणां नराभो
लाभकृद्भवेत्॥ गौरीशिला
तुलीमेव प्रायः कलियुगे स्मृताः
स्फटिकाभा भवेत्
सा तु धर्ममुक्त्वा विमुंचति।
तैलस्यार्द्धस्थिते वह्निं साभिषि
क्ता प्रवर्षणं। कुरुते शापयेभि
ष्याकृते सात् कष्टकारिका॥
गणेशः स तु विज्ञेयः स्वल्पशु
ण्डांकितो भवेत्॥ शुण्डाका
रा शिला वापि गजाननसमा
पि वा। यस्या मध्ये महच्छ्रे
ष्ठं सूक्ष्मचक्रं च यद्विशि। सा शिला
तस्य दिक्कास्य सेव्या तद्विशि
राज्यदा॥ अर्द्धचंद्राकृतिर्यत्र
दृश्यते शाकलद्वयं॥ सा तु च
न्द्रशिला प्रस्तयुक्ता भोमशि
ला मता। वानाकारेण चिह्नेन
ज्ञेया बुधशिला स्मृताः। दीर्घेण
चतुरस्रेण युक्ता गुरुशिला म
ता॥ पंचकोणान्तु शुक्रस्य चापा
काराश्शनेर्मता। सूर्पाकारा तु रा
होः स्यात् केतोस्तु ध्वजरूपिणी
प्रायो कलियुगे घोरे वामाचार
विमिश्रिते॥ भक्ष्याभक्ष्यविचा
रादिरहिते म्लेच्छसंकुले॥
कामक्रोधादिभि र्लोभे जने
स्त्रीभि र्विनिर्जिते॥ कृष्णशि
वः क्व गुरु मंत्रः क्व जपः क्व
च सिद्धयः॥ अयुताद्वेव
। ले याते तज्जहिसशिला:

मही ॥ तदर्द्धाज्ञाकृतीनोयंतद
द्धीदेवताशिला । जप एव क
लौ श्रेयान् शालग्रामार्च्चने
तथा ॥ इति भेरुतंत्रे ५
पटलः ॥

शालिंची स्त्री शाकभेदः । शा
चे इति भाषा । अस्य प्रमाणं
शैलकशब्दे द्रष्टव्यं ॥

शाल्वणः पुं वातघ्नौषधग
णविशेषः । यथा । काकोल्यादिः
सवातघ्नः सर्वाम्लद्रव्यसंयुतः ।
सानूपौदकमांसस्तु सर्वस्नेह
समन्वितः । सवेशालः सुखोष्णलव
णः शाल्वणः परिकीर्त्तितः । ते
नोपनाहं कुर्वीत सर्वदा वातरो
गिणां । इति सुश्रुते चिकित्सि
तस्थाने ५ अध्यायः ॥

शिवः पुं महादेवः । तेन कोच
विहारदेशीयराजवंशोत्प
त्ति यथा । श्रीदेव्युवाच । देवे
श परमेशान सर्वज्ञ सर्वपू
जित । क गच्छसि सुरु नाथ
कृपया वद शंकर ॥ ईश्वर उ
वाच । कोचाख्याने च देशे च
योनिगर्त्तसमीपतः । साध्वी
सती वाचिका हिरेवतीजनावि
श्रुता । म्लेच्छदेहोद्भवा या
तु योगिनी सुंदरी मता । तत्
कुचौ कठिनौ हृद्यौ योनेस्तस्या
श्च पीनता ॥ भिक्षाचारप्रसंगे
न गच्छामि च दिवानिशं । तत्
सन्निधौ महेशानि तयामेरसमंस
हत् ॥ देव्युवाच ॥
कुत्रासीत् किं तपस्तस्याः कथं
प्राप्ते महीतले । त्वयासार्द्धं र
तिर्यत् स्यात् नाल्पस्य तपसः
फलं । तत्रापि च कृपा तस्या ल
सते महती मया । इदानीं कि
मभूत् साहि कृपया परया व
द ॥ ईश्वर उवाच । नगेन्द्रतनये
बाले शृणु मत् प्राणवल्लभे
सावधीचरिते किंचित् कथया
मि शुचिस्मिते । रमक्रीडां च का
राहमेकाग्रकालेन मुदा । वेदाग
संभवा साध्वी योगिनी सासुरी
मता । नाम्ना तस्याः सुरूपि मे
मनः कियाया नगात्मजे । मामा
श्रमतकटंतमे ह्येयेम सेवका
मदे । एकाग्रगाहने देवि पर्वते
तीर्थसंकुले । नैवैको ब्राह्मणो
जातो भिक्षार्थं ता सुवाचह ॥
तदत्र सुलेन तस्मै भिक्षा तिष्ठ
न्नहरतः । ततः शशाप विप्रस्तां
म्लेच्छतां याहि दुर्म्मदे ॥ ३

स्तुत्का स ययौ विप्रो म्लेच्छत्व
माप योगिनी । अतोऽर्थिनः सम
र्थश्चेत् याचितेन ददाति च ॥
सद्गति मवाप्नोत्य समर्थो वि
नयं चरेत् । तस्मात्तु तपसा दे
वि क्रीतोऽहं सम्भवं सदा ॥
अतस्तया रतिर्ज्जाता मम का
मिनि सर्वदा । तस्याः पुत्रो विशु
सिंहो मदंशे संसमुद्भवः ॥ ए
केन जितवान् कामान् सौमारा
न् गौडपंचमान् विनिर्जित्य तत्
पान् सर्वान् एकः श्रीमान् महा
मतिः । तस्यापि बहवः पुत्राः पृ
थिवीपरिपालकाः । कुवाचाया
र्मिकाः सर्वे राजानो गुरुडमेदाः
ततोपि स विशुसिंहो योगमा
श्रित्य विकले । तिष्ठत्यव्यक्तरूपे
ण पद्दे आकल्प मन्तिके ॥ का
मात् सा माधवी देवी मद्देहे
लीनतां गता । यथा जायाने
दिमाता तथेयं योगिनी मता
यथा पुत्रो भृंगरीटि स्तथा विशु
सिंहात्मजः ॥ विशुसिंहोपि क
ल्पान्ते परां सिद्धि मवाप्स्यति
तद्वंशजास्तु राजानः सर्वे केला
सवासिनः । भविष्यंति महा
त्मानो गणेशाः सर्वशालिनः ॥
रूपयौवनसंपन्ने देवकन्याग
णैः सह । विहरंति सदा देवि
क्रीडंति भैरवा यथा ॥
यदा यदा ब्रह्मशापः कामाख्या
यां भवेत् पुनः । तदा तदा वर्त्ती
र्थाहं विश्वकामस्य पालकः ॥
तथा तद्वंशजाः सर्वे भवेयुः का
मपालकाः । कल्पान्त मेवं देवेशि
यावत् शापो विमुच्यते ॥
तावदेव महामाये महीं ख्यात क्री
डते ध्रुवं । कल्पमेवं महेशानि
कलौ वर्षशतत्रयं ॥ यावत्तु प
रमेशानि भुंक्ते शापं परात्मि
के । कामाख्या हि महामाये
तदं ते सकला भवेत् । एवं ते
कथितं देवि ब्रह्मशापविमो
चनं ॥ कामाख्याया महे
शानि साकल्येन मया ध्रुवं
इति श्रीयोगिनीतंत्रे देवीश्वर
संवादे चतुर्विंशतिसाहस्रे १३
पटलः ॥

शिवावलिः पुं राजो शिवादेय
मांसप्रधाननैवेद्यं । यथा ।
अथ शिवावलिः । कुलचूडा
मणौ । बिल्वमूले प्रातरेवाश्म
शाने वापि साधकः । मांसप्र
धाननैवेद्यं संध्याकालेनिवे

दयेत्॥ कालि कालीतिवक्त
ध्ये तत्रोमा शिवरूपिणी॥
पशुरूपधरा याति परिवारग
णैः सह। भुक्त्वा रौति यद्देशा
न्तं शुभं शुभोत्स्य स्सरं।
तद्देव मंगलं तस्य नान्यथाकु
लभूषण। अथवा मन्त्रदानेन
नियते नोषयेत्क्वचित्। नित्य
प्राहे तथा संध्यावदने पित
तर्पणे। तथैव कुलसेव्यानां
निमान्ता कुलपूजने। पशुरूपा
शिवादेवी या नाद्यति निर्जने
ने। शिवा रावेण तस्याशुभ
र्वं नश्यति निश्चितं। जपप
जातिथानानि यत्किंचित्कृ
तानिच। गृहीत्वा पूजयेदत्वा
च शिवा रोदिति निर्जने॥
एकया भुज्यते यत्र शिवया दे
वेश्वर॥ तत्रैव सर्वशक्तीनां
प्रीतिः परमदुर्लभा। पशुशा
क्तिः पतिशक्ति सर्वशक्तिर्य
थाक्रमात्। विगुणं कर्मसंपा
तमाप्नोति सततः। तेन सर्वप्रय
त्नेन कर्तव्यं पूजनं महत्। रा
त्रादि भयमापन्ने देशान्तरम
यादिके। शुभाशुभानि कर्मा
णि विचिन्त्य वलिं माहरेत्। शक्त्या

देवि महाभागे शिवे कालाग्नि
रूपिणि। शुभाशुभफलं सम्यक्
ब्रूहि शक्ता वालितव। एवमु
च्चार्य दातव्यो वलिः कुलजन
प्रियः। यदि न भुज्यते वस्म
तदा नैव शुभं भवेत्॥
शुभं यदि भवेत्तत्र भुज्यते तद
शेषतः। एवं ज्ञात्वा महादेव शा
न्तिस्वस्त्ययनं चरेत्। नैवेद्याप
रि मूलसंत्र मष्टोत्तरशतं ज
प्त्वा वलिं दद्यादिति शेषः॥
इति तंत्रसारः॥
शिष्यः त्रि उपदेशः। तत्प
र्यायः। अंतेषदः ४। यथा
छान्दोग्ये तेवासि शिष्यं तेषद प
कार्थत्वाइमे। इतिजटाधरः॥
शीघ्रं क्ली त्रिषु। तद्वेदिकप
र्यायाः। नु १ मक्षु २ द्रवत् ३
ओषं ४ जीराः ५ जूर्णिः ६ शु
म्नाः ७ मृचिनाशः ८ शीभं ९
तृष्ट १० तूर्यं ११ तूर्णिः १२ अजि
रं १३ भुरण्युः १४ शु १५ आशुः
१६ प्राशुः १७ तूतोजिः १८
तूतुजानः १९ तुज्यमानासः
२० अज्राः २१ साचीवत् २२ द्युग
त् २३ ताजत् २४ तरणिः २५
वातरंह्या २६। इति षट्

विंशति क्षिप्रनामानि। इति
वेदनिघण्टौ २ अध्यायः॥
शीतला षष्ठी स्त्री माघशुक्ला
षष्ठी। यथा। प्रशस्ता द्वादशे मा
सि पुत्रापत्यविवृद्धये। स्तनेज्ञा
ते तथा षष्ठी षष्ठी द्वादशरूपि
णी। वैशाखे चंदनी षष्ठीज्ये
ष्ठे चारण्यसंज्ञिताः॥ आषाढे
कार्दमी ज्ञेया श्रावणे लुठनी
तथा॥ भाद्रे चपेटी विख्याता
दुर्गाख्याश्वयुजे तथा। नाडा
ख्या कार्तिके मासि मार्गे मू
लकरूपिणी॥ पौषमासस्य
रूपाच शीतला तपसिस्मृता
गोरूपिणी फाल्गुनेच चैत्रे
शोकाप्रकीर्तिता॥
इति स्कंदपुराणं॥
शीर्षोदयः पुं मिथुन सिंहक
न्या तुला वृश्चिक कुंभ मीन
लग्नरूपः। यथा। अजगोपति
युग्मंच कर्कि धन्वि स्मृतास्तथा
निशा संज्ञाः स्मृता अतेशेषा
श्चान्ये दिनात्मकाः॥
निशासंज्ञा विमिथुनाः स्मृताः
पृष्ठोदया स्तथा। शेषाः शीर्षो
दया होते मीन श्चोभयसंज्ञकः
इतिज्योतिस्तत्वे॥

शीलं क्ली ब्रह्मण्यतादित्रयोद
शविधधर्ममूलं॥ रागद्वेषवर्ज
नं। यथा। वेदोऽखिलो धर्म मू
लं स्मृतिशीलेच तद्विदां।
आचारश्चैव साधूना मात्मन
स्तुष्टिरेवच। इति मानवे २
अध्यायः॥ शीलं ब्रह्मण्यतादि
रूपं। तदाह हारीतः। ब्रह्मण्य
ता देवपितृभक्तता सौम्यता
अपरोपतापिता अनसूयता म
दुता अपारुष्यं मैत्रता प्रियवा
दित्वं कृतज्ञता शरण्यता कारु
ण्यं प्रशान्ति श्चेति त्रयोदशवि
धं शीलं। गोविन्दराजस्तु।
शीलं रागद्वेषपरित्याग इ
त्याह। इति तट्टीकायां कु
ल्लूकभट्टः॥
शुक्तं क्ली कांजिकादि। यथा
कार्तिके वर्जयेत्तैलं कार्तिके
वर्जयेन्मधु। कार्तिके वर्जयेत्
कांस्यं कार्तिके शुक्तसंधितं
इति श्रीगोपालभट्टविलिखि
ते भगवद्भक्तिविलासे १६
विलासः। शुक्तं कांजिकादि
पर्युषितान्नद्रव्ये संधितंच
वर्जयेत्। इति श्रीजीवगोस्वा
मिकृत तट्टीका दिग्दर्शनी।

शुभसूचनी स्त्री देवीविशेषः
सुवचनीतिख्याता । साच स्त्रिया
पूज्या । तस्याः ध्यानं यथा । र
क्ता पद्मचतुर्मुखी त्रिणयनी
चामीकरालंकृता । पीनोत्तुंगकु
चा शुक्लवसना हेमाद्रिरूपाप
रा । ब्रह्मानंदमयी कमंडलुक
राह्वाभीतिहस्ता शिवा । ध्येया
सा शुभसूचनी त्रिजगतामं
तापदुःखहारिणी । इत्याचारमा
लेरुः ॥

शूकरदंष्ट्रः पुं क्षुद्ररोगविशेषः
तल्लक्षणमाह । सदाहो रक्त
पर्यन्तस्त्वक्पाकी तीव्रवे
दनः । कण्डुमान् ज्वरकारीच
स स्याच्छूकरदंष्ट्रकः ॥ सग्रद
ष्ट्रः ॥ तच्चिकित्सा यथा
मृगराजकमूलस्य रजन्याश्च
हितस्य च । चूर्णेन तु सहसा
लेपाद्दाहाहि जनाशनं । श
जीवमूलकल्कस्तु पीतो गव्ये
न सर्पिषा प्रातः शमयति शूक
रदंष्ट्रं शूद्रज्वरं घोरं ॥
रजनी मार्कवमूलं पिष्टं शीते
न वारिणा । तल्लेपाद्धन्ति वीस
र्पं वाराहदशनात्मके । इति
भावप्रकाशः ॥

शूल्यपाकः पुं शूलविद्धाग्ना
रपक्वमांसादि । काबाब इति
पारस्यभाषा । इति पाकरा
जेश्वरः ॥

शैल्कं क्ली शाकविशेषः ।
शुल्का इति भाषा । भूतचतुर्द
श्यांचतुर्दशशाकमध्ये तदु
क्तणीयं । यथा । निंगयामूते
ओलं केमुकवास्तूकं सर्षपंका
लंच निंबजयां । शालिंची हि
लमोचिकांच पटुकं शौल्कं गु
डूचीन्तथा । भण्डाकी सुनिषण्ण
कं शिवदिने खादन्तिये मा
नवाः । प्रेतत्वं नच यान्ति कार्ति
कदिने कृष्णेच भूते तिथौ ॥
इति तिथ्यादितत्वं । अस्य प
र्यायगुणाः शतपुष्पाशब्दे
द्रष्टव्याः ॥

श्रवणं क्ली षड्विधलिंगैरशे
षवेदान्तानां अद्वितीये वस्तु
नि तात्पर्यावधारणं । लिंगा
नि तूपक्रमोपसंहाराभ्यासाऽपू
र्वता फलार्थवादोपपत्त्याख्या
नि । इति वेदान्तसारः ॥

श्राद्धं क्ली पितृद्देश्यकश्र
द्धयान्नादिदानं । अथ वैष्णव
श्राद्धविधिः । मासे श्राद्धदिनेः

पि प्रागन्नं भगवतेऽर्पयेत् वै ।
नच्छेषेणवकुर्वीत श्राद्धभागि
वतो नरः ॥ पद्मस्मृतौ
गृहाग्निशिशुदेवानां यती
नां ब्रह्मचारिणां । पितृपाको
नदातव्या यावत् पिण्डान्नि
वर्पयेत् । इति । ऐहिक सामान्य
वचनं विशेषवचन ब्रजेः ॥
क्रान्ति स्मृतिपुराणादिवनिभि
र्बाध्यते फलं । तथा च पाद्मे ।
विस्रा निवेदितान्नेन यष्टव्यं दे
वतान्तरं । पितृभ्यश्चापि तद्दे
यं तदानंत्याय कल्पते ॥
मोक्षधर्मे नारदोक्तौ । सात्व
तैर्विधिमास्थाय प्राक् सूर्यमु
खतिः स्मृते । पूजयामास देवे
शं तच्छेषेण पितामहान् । ब्रह्मा
ण्डपुराणे । यः श्राद्धकाले हरिभु
क्तशेषं ददाति भक्त्या पितृदेव
तानां । तेनैव पिण्डांस्तुलसीवि
मिश्रान् आकल्पकोटिं पितरः
सुतृप्ताः । स्कान्दे श्रीशिवोक्तौ
देवान् पितॄन् समुद्दिश्य य
द्विष्णोर्विनिवेदितं । तानुद्दि
श्य ततः कुर्यात् प्रदानं तस्य
चैव हि । प्रयान्ति तृप्तिं मत
ला सोदकेन तु तेन ।

मुकुंदगात्रलेपेन ब्राह्मणा
नां विलेपनं ॥ चंदनेन तु
पिण्डानां कर्तव्यं पितृतृप्तये
देवानांच पितॄणांच जायते
तृप्तिरक्षया । एवं कृते महीपा
लाभो भवेत् संशयः क्वचित्
तत्रैव श्रीपुरुषोत्तमखण्डे ।
अन्नाद्यं श्राद्धकालेतु पतिता
द्यैर्निरीक्षितं । तुलसीदलमि
श्रेणसलिलेनाभिषिंचयेत् ।
तदन्नं शुद्धतामेति विस्रान्नं
वेद्यामिश्रितं । विस्रान्नं वैष्णवे
षं तु तस्माद्देयं द्विजन्मना ॥
पिण्डं चैव विशेषेण पितॄणां
तृप्तिमिच्छता । तत्रैव श्रीब्रह्म
नारदसंवादे । पितृनुद्दिश्य यः प्र
ज्ञाकेशवस्य कृतान्नैः । मत्का
ले नारकी पीडां मुक्तिं यांति म
हामुने । धन्यास्ते मानवा लोके
कलिकाले विशेषतः । ये कु
र्वन्ति हरेर्नित्यं पित्रर्थं पूजनं
मुने किं तैर्वेदर्भिः पिण्डै
र्गयाश्राद्धादिभिर्मुने । येऽर्चि
तो हरिर्भक्त्या पितॄणर्थ्चादि
नेऽहनि । यमुद्दिश्य हरेः पू
जा क्रियते मुनिपुंगव । उद्धृत्य
नरकावासात्तं नयेत् परमं प

दं। यो ददाति हरेः स्थाने पि
तृनुद्दिश्य नारद । कर्तव्यंहि
पितॄणां यत्नात् कृतं तेनभो
द्विज ॥ श्रुतौ च ॥ एक ए
व नारायण आसीत् नब्रह्मा
नेसे द्यावापृथिव्यौ सर्वेदेवाः
सर्वेपितरः सर्वेमनुष्याः वि
ष्णुना आशित मश्नंति विष्णु
नाघ्रातं जिघ्रंति विष्णुना पी
तं पिबंति तस्माद्विद्वांसो विष्णू
पहृतं भक्षयेयु रिति । अत
एवोक्तं श्रीभगवता विष्णुधर्मे
प्राणेभ्यो जुहुयादन्नं मन्निवे
दित मुत्तमं । तृप्यंति सर्वदा
प्राणा मन्निवेदितभक्षणात्
तस्मात् सर्वप्रयत्नेन प्रदेयं म
न्निवेदितं । ममापि हृदय
स्थस्य पितॄणांच विशेषतः ॥
किंचनस्यैवान्यत्र। भक्ष्यं भोज्यंच
यत्किंचिदनिवेद्याग्रभोक्तरि
नदेयं पितृदेवेभ्यः प्रायश्चित्ती
यतो भवेत् । सर्गादौकाथि
तोदेवे यज्ञभुक् भगवानहरिः
यज्ञभागभुजो देवा तत स्ते
नप्रकल्पिता ॥
इति श्रीहरिभक्तिविलासे ९
विलासः ॥ अथोपवासदिने

श्राद्धनिषेधः । पाद्मे पुष्करखं
डे । एकादश्यां यदा रामश्राद्धं
नैमित्तिकं भवेत् । तद्दिने तु
परित्यज्य द्वादश्यां श्राद्धमाच
रेत् तत्रैवोत्तरखण्डे । एका
दश्यांतुप्राप्तायां मातापित्रोर्मृ
तेऽहनि ॥ द्वादश्यां तत्प्र
दातव्यं नोपवासदिने क्वचि
त् । गर्हितान्नं न चाश्नंति पि
तरश्च दिवौकसः । स्कांदे ॥
एकादशी यदानित्या श्राद्धं नै
मित्तिकं भवेत् । उपवासं
तदा कुर्यात् द्वादश्यां श्राद्ध
माचरेत् ॥ ब्रह्मवैवर्त्ते ॥
येकुर्वंति महीपाल श्राद्धं
त्वेकादशीदिने । त्रयस्ते न
रकं यांति दाता भोक्ता प्रे
रकः । इति श्रीहरिभक्तिविला
से १२ विलासः ॥
श्रीपंचमी सा माघशुक्लपंच
मी। यथा। चतुर्थी वरदाशुक्ला
तत्रपौरी सुपूजिता। सौभाग्य
मतुलं कुर्यात् पंचम्यां श्रीर
पि श्रियं । सरस्वतीपूजानन्त्या
य श्रोत्र गौडाचारः । अत्रश्री
पंचम्यामारभ्य प्रतिमासंवत्
सरमाप्य श्रीपंचमी व्रतं

कुर्वंतिपठंतिच इतिसंवत्सरकौ
मुदीधृतब्रह्मपुराणवचनं ॥
श्रीरामनवमी सा चैत्रशुक्लन
वमी। सा च श्रीरामस्य जन्म
तिथिः। तद्व्रतकथा। पुरैकदा
सुखासीनं ब्रह्माणं जगतां
पतिं । उवाच सहसागत्य स
नकः संजितेंद्रियः । सनक
उवाच । राज्ञा दशरथेनैव रा
ज्ञा कौशल्यया पिवा। कस्मा
त्कर्मवशाल्लब्धः पुत्रोऽसौ ज
गतीपतिः ॥ दूर्वादलश्याम
रामो विस्तार्य्य कथयस्व मे।
ब्रह्मोवाच। साधु पृष्टं त्वया
वत्स जगतां हितकारकं ।
पुरा राजा दशरथः कौशल्या
च समाहितौ । जजाप मंत्रं
गोप्याः शिवस्य च विशेषतः
तयोर्जपेन तुष्टः सन् शिवः प्र
सन्नतां गतः ॥ दशरथ उवाच
अद्यमेसफलं जन्म अद्य मेस
फलं तपः ॥ अद्यमे सफ
लंचक्षुर्येन त्व मवलोकितः
श्रीशिव उवाच ॥ किं तेका
र्यं महाराज कथयस्व ददा
मि तत् ॥ दशरथ उवाच। देव
देवाप्यपुत्रोऽहं क्षितिदुःखेन

दुःखितः । चिरं विचार्य्य मनसा
शिवाराधनतत्परः । इति श्रु
त्वा महादेव स्तमुवाच दयापरः
कुरुराजन् परंयत्नं ततस्ते जग
त्पतिः । श्रीरामनामा पुत्रोऽ
सौ कौशल्यायां भविष्यति।
इत्युक्त्वा तं महादेव स्तत्रैवांत
र्हितोऽभवत् ॥ इति रुद्रमुखा
त् श्रुत्वा राजा दशरथः सुखी
ततश्चक्रे वंशयज्ञं सदेव्या स
हतत्परः ॥ ततः काले महा
राज्ञी गर्भंधत्ते मनोहरं । चैत्रे
मासि सिते पक्षे नवम्यां शोभने
दिने ॥ प्राप्ते पुण्ये सुवेल
ग्ने जातो रामः स्वयं हरिः ॥
पुनर्वसुऋक्षसंयुक्ता सा तिथिः
सर्वकामदा । श्रीराम नवमी
प्रोक्ता कोटिसूर्यग्रहाधिका
तस्मिन् दिने महापुण्ये रामसु
द्दिश्य भक्तितः ॥ यत्किंचित्क्रि
यते कर्म तदत्यक्षकरं स्मृतं।
उपोषणं जागरणं पितृनु
द्दिश्य तर्पणं तस्मिन् दिने तु
कर्तव्यं ब्रह्मप्राप्ति मभीप्सु
भिः । तस्मिन् दिने महापुण्ये
राममुद्दिश्य भक्तितः । जपेदे
कांत आसीनो यावत् स्याद

शमीदिने तेनैवस्मात् पुरस्य
था दशम्यां भोजयेद्विजान्
भक्त्या भोज्यैर्बहुविधै र्भक्त्या
दद्याच्च दक्षिणां । कृतकृ
त्योभवेत्तेन सद्यो रामः प्रसीद
ति । युक्तं रामनवम्यां तु भुंक्ते
मर्त्यो विमूढधीः । कुंभीपा
केषु घोरेषु पच्यते नात्र संश
यः । कुर्याद्रामनवम्यां यउपो
षणं सतेद्विजः । न पुनर्मा
तृजठरे स्वयं रामो भवेत्तु सः
श्रीरामनवमी नाम पुण्यात्
पुण्यतमं व्रतं । इति श्रुत्वास
संतुष्टः सनकः पुनरब्रवीत्
विधिनाकेन कर्तव्यं वद मे
कमलोद्भव ॥ ब्रह्मोवाच ।
व्रतस्य दिने स्नात्वासकृद्भु
क्त्वा निरामिषं । स्नात्वाच यामि
न्यां शयीत स्थंडिलेकुशे ।
ब्राह्मे मुहूर्ते चोत्थाय कृत्वा प्रा
तःक्रियां ततः । प्रातःस्नात्वा शु
चिर्भूत्वा संकल्प्य विधिनाचरेत्
प्रति मायांघटे वापि पटे वार्यं
त्रैतो पिवा । शालग्रामशिला
यां तु तुलसीदलकल्पिता ए
जाश्रीरामचंद्रस्य कोटिकोटिगु
णाधिका । कौशल्यास्तनीया
रा

राजा चैव ततःपरं ॥ षडंगास
जयेत्तत्र लक्ष्मणादीन् विशेषतः
पूजयेत् परया भक्त्या परिवारं
ततः परं ॥ ततोग्रहांश्च दि
क्पालांस्तदस्त्राणि च पूजयेत्
ततो मध्याह्नके सूर्ये तज्जन्म
भावयेद्व्रती । उच्चस्थग्रहपंचके
सुरगुरौ सेंदौ नवम्यां तिथौ
लग्ने कर्कटके पुनर्वसुदिने
मेषं गते पूषणि । निर्द
ग्धुं निखिलाः पलाशसमि
धोमध्याद्योध्यारणे राविर्भू
तमभूदपूर्वविभवं यत्किंचि
देकंमहः । ततो वाद्यादिकं
कृत्वा दद्यादर्घ्यं विशेषतः । स
लमंत्रेण दद्याद्वै भक्त्या पुष्पां
जलित्रयं । एवं सह स्यामेषु
ग्रहणंच जपेद्व्रती । इतिहास
कथांश्रुत्वा गीतनृत्यैर्निशां
नयेत् । ततः परदिने प्रातःस्ना
नं कृत्वा विधानतः । रामहवी
दलरूपांश्च भक्त्या भक्त्या प्रपू
जयेत् । दक्षिणां विधिवद्दत्वा
ततःछिद्रावधारयेत् । भोज
यित्वा ततो विप्रान् स्वयं पार
णमाचरेत् ॥ यद्वै मृण्मया
त्रिंशं पुण्याद्धेच विशेषतः ॥

वरुपुत्रो धनाढ्यश्च अंते ब्रह्म
त्वमाप्नुयात् ॥ संग्रामे वैरिणं
हंता सर्वत्र विजयी भवेत् । रा
जद्वारे महाघोरे संग्रामे शत्रुसं
कुले । दूर्वादलश्यामरामस्म
रणात्ताकरो भवेत् । भक्त्या
यः श्रृणुयाद्रोगी उल्लाघः स
भवेत्सदा । वंध्या पुत्रवती सा
च पतिचित्तानुवर्तिनी । सप
त्नीदर्पदलनी सा भवेन्नात्र सं
शयः । दरिद्रोलभते वित्तं भीतो
भवति निर्भयः । यत्तदान त
पांस्यस्य तीर्थस्नानादिकाःक्रि
याः ॥ नरामनवमीनाम व्रत
स्यैककला समाः । यस्मैकस्मै
नदातव्यं नप्रकाश्यंकदाचन ।
शिष्याय भक्तियुक्ताय शुचये पि
प्रदापयेत् । शठाय परतंत्राय वि
कल्पनरताय च ॥ भ्रमादपि न
वक्तव्यं यदीच्छेदात्मनोहितं ।
मयैतत् कथितं वत्स तवस्ने
हाद्व्रतोत्तमं । यइदं कुरुते भ
क्त्या श्रीरामनवमीव्रतं ॥ सर्व
पापप्रमुक्तश्च अंते ब्रह्मत्वमा
प्नुयात् । इतिश्रीरामभक्तितरं
गिण्यां ब्रह्मसनकसंवादे श्री
रामनवमीव्रतकथा समाप्ता ॥

स्वहस्तैः स्त्री सेवा । चाकरीति
भाषा । यथा । सत्यानृतं तु वा
णिज्यं तेन चैवापि जीव्यते ।
सेवा श्ववृत्ति राख्याता तस्मा
त्तां परिवर्जयेत् । इति मानवे
४ अध्यायः ६ श्लोकः ॥
सेवा तु दीनदृष्टिसंदर्शनस्वा
मितर्जन नीचक्रियादिधर्मयो
गात् श्वन इव वृत्तिरतः श्वव
त्ति रुक्ता तस्मात्तां प्रकृतो
ब्राह्मणः त्यजेत् । इति
कुल्लूकभट्टः ॥
श्वोवसीयसं स्त्री कल्याणं ।
यथा । श्वः श्रेयसं शुभं शिवं
कल्याणं श्वोवसीयसं श्रेयः
क्षेमं भावुकं भविकं कुशलं
मंगलं भद्रं भद्रं प्रशस्तानि । इति
हेमचंद्रः ॥ तद्वति वि । एवं य
त् श्वोवसीयः इति सांतं लि
खितं तत् प्रमादेन ॥

ष

ष मूर्द्धन्यषकारः । तस्य ले
खनप्रकारो । यथा । चतुष्को
णात्मिकारेखावामदक्षिणतःक्र

मात्। वह्नौद विसव स्तास्तु ति
ष्ठंति क्रमतः सदा। ऊर्द्ध्वमाज्ञाश
क्तिरूपा महालक्ष्मीसमा स्मृता
माज्ञा मध्यगता यातु वाग्देवी
सापरा स्मृता। इति वर्णोद्धारतं
त्रे। एतद्विपरीतंष्वर्वं यान्हिरिवते
तत् प्रमादेन ज्ञेयं ॥
षट्कर्म् क्ली योगांगषट्प्र
कारक्रिया। तद्यथा। धौति र्व
स्तिस्तथा नेति नौलिकी त्राट
कस्तथा। कपालभाति श्चैता
नि षट्कर्माणि समाचरेत्।
अंतर्धौति दंतधौति हृद्धौति
मलशोधनं। धौत्य श्चतुर्वि
धाः प्रोक्ता घटं कुर्वंति निर्म
लं। वातसारं वारिसारंवह्नि
सारं बहिष्कृतं। घटस्य निर्म
लार्थाय अंतर्धौति श्चतुर्विधा
प्रयोगः ॥ काकचंचुवदास्ये
न पिवेद्वायुं शनैः शनैः।
चालयेदुदरं पश्चाद्वर्त्मना
रेचयेत् शनैः ॥ वातसारं
परं गोप्यं देहनिर्मलकार
कं। सर्वरोगक्षयकरं देहा
नलविवर्द्धकं ।१। आकंठं
पूरयेद्वारि वक्त्रेणच पिवेत्
शनैः। चालयेदुदरेणैव।

चोदराद्रेचयेदधः। वारिसारंप
रं धौतं देहनिर्मलकारकं।
साधयेद्यः प्रयत्नेन देवदेहंप्र
पद्यते २ नाभिग्रंथिंमेरुपृष्ठे
शतवारंच कारयेत्। उदरा
मयजं त्यक्ता जठराग्निंवि
वर्द्धयेत्। वह्निसारमिदंधौ
तं योगिनां योगसिद्धिदं ३
काकीमुद्रां साधयित्वापूर
येदुदरंमरुत्। धारयेदर्द्धयामं
तु चालयेदधवर्त्मना। इदंधौ
तंपरं गोप्यं नप्रकाश्यंकदाचन
नाभिमग्नजले स्थित्वाशक्ति
नाडीं विसर्जयेत्। कराभ्यां
क्षालयेन्नाडीं यावन्मलविस
र्जनं। तावत्प्रक्षाल्यनाडींच
उदरे वेशयेत् पुनः। इदंप्र
क्षालनं गोप्यं देवानामपिदु
र्लभं। केवलं धौतिमात्रेण
देवदेहो भवेत् ध्रुवं। या
मार्द्धधारणात् शक्तिं यावन्न
साधयेन्नरः। वहिष्कृतमहद्धौ
तिस्तावच्चैव नजायते ॥
दंतमूले जिह्वामूले रंध्रेचक
र्णयुग्मयोः। कपालरंध्रे पंचै
ते दंत धौति र्विधीयते ॥
प्रयोगः खादिरेण रसेनाथ

1317

मृत्तिकामिश्र शुद्धिभिः। मार्ज
येद्दंतमूलंच यावत् किल्वि
षमाहरेत्। दंतमूलंपरं धौति
र्योगिनां योगसाधने नित्यंकु
र्यात् प्रभातेच दंतरक्षायये
गवित्। दंतमूले धारणादि
कार्य्येषु योगिनां यतः ।१।
अथातः संप्रवक्ष्यामि जिह्वा
शोधनकारणं। जरामरण
रोगादिनाशयेत् दीर्घलंबिका
तर्जनी मध्यमानामा अंगुलित्र
ययोगतः। वेशयेद्गलमध्येतु
मार्जयेल्लंबिकामलं। शनैःश
नैर्मार्जयित्वा कफदोषंनिवा
रयेत्। मार्जयेन्नवनीतेनदोह
येच्च पुनःपुनः। तदग्रंलोह
यंत्रेण कर्षयित्वा पुनःपुनः
नित्यंकुर्यात् प्रयत्नेन रवेरु
दयेऽस्तके। एवं कृतेतुनि
त्यंच लंबिका दीर्घतांगता २
तर्जन्यंगुल्यग्रेण मार्जये
तकर्णरंध्रयोः। नित्यमभ्या
सयोगेन नादांतर प्रकाशनं
३।४ वृद्धांगुष्ठेन दक्षेणमा
र्जयेद्भालरंध्रके। एवमभ्या
सयोगेन कफदोषं निवारये
त् नाडी निर्मलतां याति दि

व्यदृष्टिः प्रजायते। निद्रांते भो
जनांतेच दिवांतेच दिने दिने
५ ॥ हृद्धौतिं त्रिविधां कुर्या
त् दंडवजलवाससा ॥ रंभा
दंडं हरिद्दंडं वेत्रदंडंतथैव
च ॥ हृन्मध्ये चालयित्वा
तु पुनः प्रत्याहरेत् शनैः ॥
कफपित्तं तथा क्लेदं रेचयेद्
र्ध्ववर्त्मना। दंडधौतिविधानेन
हृद्रोगंनाशयेत् ध्रुवं। हरि
दंडं वटांकुरं १ भोजनान्ते
पिवेद्वारि आकंठं पूरितं
सुधीः। ऊर्द्ध्वदृष्टिं क्षणं कृत्वा
तज्जलं वमयेत् पुनः। नित्य
मभ्यासयोगेन च कफ पित्तं
निवारयेत् ।२। चतुरंगुलवि
स्तारं सूक्ष्मवस्त्रं शनैर्ग्रसेत्।
पुनःप्रत्याहरेदेतत् प्रोच्यतेधौ
तकर्मकं। गुल्म ज्वर प्लीह
कुष्ठ कफ पित्तं विनश्यति
आरोग्यं वलपुष्टिश्च भवेत्तस्य
दिनेदिने ३। अपानक्रूरता
तावन्मलं यावन्न शोधयेत् ॥
तस्मात्सर्वप्रयत्नेन मलशोध
न माचरेत्। पीतमूलस्य दंडे
न मध्यमांगुलिनाथवा। यत्ने
न क्षालयेद्गुह्यं वारिणा चपुनः

पुनः ॥ वारयेत् कोष्ठकाठिन्य
मामाजीर्णं निवारयेत् कार
णोकान्तिपुष्टिश्च दीपनं वह्नि
मण्डले । जलवस्तिः शुष्कव
स्तिर्वस्तीच द्विविधौ स्मृतौ । ज
लवस्तिं जले कुर्यात् शुष्कवस्ति
स्तिं क्षितौ सदा ॥ नाभिमग्नजले
पायुं न्यस्तनालोत्कटासने ।
आकुंचनं प्रकाशंच जलवस्ति
समाचरेत् । प्रमेहंच गुदावर्त्तं
क्रूरवायुं निवारयेत् । भवेत्
स्वच्छन्ददेहश्च कामदेवसमो
भवेत् । न्यस्तनालोत्कटासने
ऊरुद्वये हस्तं दत्वा शरीरावडु
दरं कुर्यादित्यर्थः ।२। वस्तिप
श्चिमतानेन चालयित्वा शनैः
शनैः । अश्विनीमुद्रया पायुं
आकुंचयेत् प्रकाशयेत् । ए
वमभ्यासयोगेन कोष्ठदोषान्न
विद्यते विवर्द्धयेत् जाठराग्निं
आमवातं विनाशयेत् ।३।
वितस्तिमानं सूक्ष्मसूत्रं नासा
नाले प्रवेशयेत् । मुखान्निर्ग
मयेत्पश्चात् प्रोच्यते नेतिक
र्मकं । साधनान्नेतिकर्मापि खेच
रीसिद्धिमाप्नुयात् कफदोषा वि
नश्यन्ति दिव्यदृष्टिश्च जायते ॥

अमन्दवेगो तुंदंच भ्रामयेदुभ
पार्श्वयोः । सर्वरोगान्निहन्तीह
देहानलविवर्द्धनं । इति नौलि
की ॥ निमेषोन्मेषकं त्यक्त्वा
सूक्ष्मलक्ष्यं निरीक्षयेत् । या
वदश्रूणि पतन्ति त्राटकं प्रोच्य
ते बुधैः । एवमभ्यासयोगेन
शांभवी जायते ध्रुवं । नश्य
न्ति नेत्ररोगा दिव्यदृष्टिप्रदा
यकं ॥ सीत्कृत्य पीत्वा व
क्त्रेण नासानाले विरेचयेत् ।
वातक्रमेण व्युत्क्रमेण शीत्
क्रमेण विशेषतः । भालभा
तिस्त्रिधा कुर्यात् कफदोषं
निवारयेत् ॥ इडया पूरयेद्वा
युं रेचयेत् पिंगलया पुनः ।
पिंगलया पूरयित्वा पुनश्चन्द्रेण
रेचयेत् । पूरकं रेचकं कृत्वा
वेगेन न तु धारयेत् । एवमभ्या
सयोगेन कफदोषं निवारये
त् ॥ नासाभ्यां जलमाकृ
ष्य वक्त्रेण रेचयेत् पुनः ॥
पायं पायं प्रकुर्वन् व्युत्क्रमं श्लेष्म
दोषं निवारयेत् । न जायते वा
र्द्धकंच ज्वरो नैव प्रजायते । इ
ति घेरण्डसंहितायां षट्कर्म
शोधनं प्रथमोऽध्यायः ॥

षट्त्रिंशन्मतं स्त्री षडधिकत्रिं
शत्संख्यकधर्मशास्त्रप्रयोज
कमुनीना मभिप्रायः । यथा ।
तथाच षट्त्रिंशन्मते । इति ति
थित्स्वरूपकथने निष्पादितत्वे
तेषां नामानि यथा मनु र्विष्णु
र्यमो दक्षो अंगिरोऽत्रिर्बृहस्प
ती । आपस्तंब श्चोशनाचका
त्यायनपराशरौ ॥ वसिष्ठव्या
संवर्त्तौ हारीतगौतमावपि ।
प्रचेताः शंखलिखितौ याज्ञ
वल्क्यश्च काश्यपः ॥
शातातपो लोमशश्च जमद
ग्निः प्रजापतिः । विश्वामित्र पै
ठीनसी बौधायन पितामहौ ॥
छागलेयश्च जाबालो मरीचि
श्च्यावनो भृगुः । ऋष्यशृंगोना
रदश्च षट्त्रिंशत्स्मृतिकार
का ॥ एतेषांतु मतेयत्तु षट्
त्रिंशन्मत मुच्यते । इति शंख
लिखितौ ॥
षडाम्नायः ॥ शिवस्य षड्वक्त्र
विनिर्गत षट्प्रकारतंत्रशास्त्रं
यथा । श्रीशिव उवाच । अथे
दानीं प्रवक्ष्यामि आम्नाय क
थनं पृथक् । पूर्वाम्नायो यदा
मेत्र त्वदा प्राचीदिशि स्थितः

सदाशिवोहं भगवानाचारः प
रिकीर्त्तितः । एवंवै दक्षिणाम्ना
यो दक्षिणस्यां दिशि स्थितः ॥
एवं हि पश्चिमाम्नायः पश्चिमा
यां दिशि स्थितः । एव मेवो
त्तराम्नाय उत्तरस्यांदिशि स्थि
तः । सुखमूर्द्धकृते देवि यत्रो
र्द्ध्वं तत्रसन्निधौ । ऊर्द्ध्वाम्नायश्च
कथितो देवाना मपि दुर्लभः
यदाचाधोमुख देवि यत्प्रोक्तं
गिरिजे प्रिये । अधआम्नाय
रेसुक्तः सर्वसत्वे सुमध्यमे
षडाम्नायाश्च कथिता श्री
तपात्रिक्रमनामतः ॥
यस्मिन् यस्मिंश्च ये देवाः क
थितास्तु वरानने । तान्देवांश्च
प्रवक्ष्यामि साधकानां हिताय
वै । श्रीविद्याभेदसहिता ताराच
त्रिपुरा तथा । भुवनेशी चात्र
पूर्वाम्नाये प्रकीर्त्तिताः
बगलामुखीचवशिनी त्वरिता
धनदा तथा । वशिनी बालभैर
वीत्यर्थः । महिषघ्नी महालक्ष्मी
र्दक्षिणाम्नायकीर्त्तिताः । महास
रस्वती विद्या तथा वाग्वादिनी
परा । प्रत्यंगिरा भवानीच पश्चि
माम्नायकीर्त्तिताः । कालिकाभै

दसहिता तारा भैरव्य संयुता ॥
मातंगी भैरवी छिन्ना तथा धूमा
वती परा। उत्तराम्नायकथिताः
कलौ प्रीतिफलप्रदाः। समस्तभे
दसहिताः कालिकायाः प्रकीर्ति
ताः द्वाविंशत्यक्षरी तासां दक्षि
णाम्नायकीर्तिता। एकजटा प
श्चिमाम्नाये महामोक्षप्रदायिनी
तत्परा परमा विद्या नवविधा
नसंयोगिता। एवं प्रसादमंत्रश्च
ऊर्द्ध्वाम्नाये प्रकीर्त्तितः। वाग्मी
श्वरादयो देवा अथ प्राम्नाय
कीर्तिताः। ऊर्द्ध्वाम्नायो अथ श्रे
व केवलं मोक्षदो भवेत्। य
माख्य काममोक्षार्थं आम्नाया
स्ते प्रकीर्त्तिताः। यथोक्तविधि
नाभ्रैकृत्वा फलमवाप्नुयात्
पूर्वाम्नायादि सर्वासां विधानं
शृणु सुन्दरि। कृत्वा येनाप्नु
लभते फलं यदुत्तमोत्तमं ॥
षट्कर्मफलदा पूर्वाम्ना
म्नायाः प्रकीर्त्तिताः। उत्तराम्नायो
देवोपि तेषां मध्ये फलप्रदः
इति समयाचारतंत्रे २ पटलः
तत्राम्नायभेदेनाचारभेद
उक्तः ॥ यथा। पूर्वाम्ना
योदिते कर्म पाशवं कथिते

प्रिये। यदुक्तं दक्षिणाम्नायेन
देवपाशवे स्मृते। पश्चिमाम्ना
यजे कर्म पशुवीरसमाश्रिते
उत्तराम्नायजे कर्म दिव्यवीरा
श्रिते प्रिये। दिव्यापि वीरभा
वेन साधयेत् पितृकानने।
वीरासनं विना दिव्यः पूजयेत्
पितृकानने ॥ ऊर्द्ध्वाम्नायादिते
कर्म दिव्यभावाश्रिते प्रिये।
इति निरुत्तरतंत्रे। १ ॥
पटलः ॥
षंढः पुं नपुंसकः। सच चतुर्द
शविधः विंशतिविधश्च। यथा
नारदः। परीक्ष्यः पुरुषः पुंस्त्वे
निश्चे देवो मलक्षणैः। चतुर्द
शविधः शास्त्रे षंढो दृष्टो म
नीषिभिः। चिकित्स्यश्चाचिकि
त्स्यश्च तेषामुक्तो विधिः क्र
मात्। निसर्गषंढो वध्यश्च
पक्षषंड स्तथैव च। अभिशापा
द्गुरो रोगात् देवक्रोधात्तथैव
च। ईर्ष्याषंडश्च सेव्यश्च वात
रेता मुखेभगः ॥ आक्षिप्तमो
घबीजौच शालीनोऽन्यापति
स्तथा ॥ १४ । कामतंत्रे त
निसर्गषंढा वध्यपक्षषंढ
श्च कीलकः ॥ पापदिष

षंढस्तथा ईर्षकः सेव्यकस्त
था। आक्षिप्त मोघबीजौच
शालीनोऽन्यापति स्तथा। मु
खेभगो वातरेताः कुंभीकः
पंडुनष्टकौ। आसेव्यश्च सुगंधी
च षंढः स्त्रीवानि विंशतिः। २०
तेषां लक्षणानि यथा। ध्वजा
दिरहितो मर्त्त्यो निसर्गषंढ उच्य
ते १। गलितांडोभवेद्वद्धः
२ पक्षांतरितशक्तिमान्। प
क्षषंढः ३ कीलकस्त्वयः ल्के
ष्यादात्मनः स्त्रियं। परेणसहसं
योज्य पश्चात्ता मेव सेवते ४
शापादि षंढो गर्भादि शापादे
व प्रहर्षणः ५ सदास्त्रभिन्नते
तास्तु रतिलब्धः ६ ईर्षकः।
दृष्ट्वान्यवाय मन्येषां व्यवाये यः
प्रवर्त्तते। ७। वक्त्रे स्त्री सेवना
ज्ञातविरसः सेव्यकः स्मृतः ८
प्रत्यक्षकृतवीर्योयो विसर्गोम
मये भवेत्। आक्षिप्तबीजः स
ज्ञेयो ९ मोघबीजस्तु सस्म
तः। पुरुषस्त्रीसन्निधानाद्योभ
वेत् प्रतिभञ्जः १० । अथ शाली
न लक्षणं प्रतितं ११ परस्यामे
व यस्यास्ति पुंस्त्वं सोऽन्या
पतिः स्मृतः। १२। वक्त्रे एव तु

यः कुर्यान्मैथुनं समुखेभगः
१३। वातरेता विसर्गोयो वात
लिंगेन मुंचति १४ कुंभीकः स
तु यो नार्याः पाणावेव प्रव
र्त्तते ॥ १५ ॥ अविकारि ध्वजः
पंडः १६ नष्टो रोगाद्युक्त
कः। १७ शुक्रपाणप्रवृत्तोऽत्रा
यी आसेव्यः १८ सुगंधि
कः। यो योनि मेफसोगंधमा
घ्राय लभते बलं। १९ ॥
षंढः स्त्रीतुल्यवाकचेष्टः स्त्रीध
र्मा छिन्नलिंगकः। २० इतिवि
धावाचस्पतिकृतस्मृतिरत्नाव
ल्या मुहुर्मुहुरस्य विकारः।
षडाम्नाचक्रे स्त्री नराणां जन्मा
दिषष्ठस्थानचारितचक्रविशेषः
यथा। जन्माद्ये कर्म ततोपिद
शमे सांघातिकं षोडशभे।
समुदाय मष्टादशभे विनाश
संज्ञं त्रयोविंशे। आद्यात्पंच
विंशे मानस मेवं भवः षड्भ्युतः
स्यात्। तेषां फलं।
ईहा देहार्थहानिः स्यात् जन्मवेउ
मताभिपते कर्मर्क्षे कर्मणोहानिः
पीडा मनसि मानसे ॥ स्तर्हि
इविण वेधतो हानिः सांघा
तिके तथा। सततं समाधुर

यिके मित्र भृत्यार्थसंक्षयः
वैनाशिके विनाशः स्याद्दे
ह द्रविण सम्पदां। इतिज्यो
तिस्तत्त्वं ॥
षष्ठी स्त्री चन्द्रस्य षष्ठकलात्मिका
या रूपतिथिविशेषः। वैशाखा
दियुतस्या विशेषनामानि। य
था। प्रशस्ता द्वादशी मासि सम
स्ता पापसूदये। सिते जाते त
या षष्ठी षष्ठी द्वादशरूपा
एताः। वैशाखे चारन्ती षष्ठी ज्यैष्ठे
चारण्यसंज्ञिता। आषाढे का
र्दमी ज्ञेया श्रावणे लुण्ठनी
तथा। भाद्रे चपेटी विख्याता
दुर्गाख्याश्वयुजे तथा। नाम्ना
ख्या कार्त्तिके मासि मार्गे मूल
करूपिणी पौषे मासस्त्वन्नरूपा च
प्रीतेला तपसि स्मृता ॥
गोरूपिणी फाल्गुने च चैत्रेऽ
शोका प्रकीर्त्तिता ॥ इति
स्कन्दपुराणं ॥

स

स दन्त्यसकारः। अस्य विव
रणं पूर्व्वलिखितं ॥

संसिद्धिः स्त्री परमासिद्धिः ॥
मोक्षः। यथा। मामुपेत्य पुन
र्जन्म दुःखालयमशाश्वतं। ना
प्नुवन्ति महात्मानः संसिद्धिं पर
मां गताः। इति श्रीभगवद्गीता
यां ८ अध्याये १५ श्लोकः ॥
संहिता स्त्री मुनिप्रणीतधर्म्म
शास्त्रं। तत्र स्कन्दपुराणस्य ष
ट्संहिता यथा। स्कान्दमथा
भिवक्ष्यामि पुराणं श्रुतिसम्मि
तं। षड्विधं संहिताभेदैः पञ्चाश
त्खण्डमण्डितं ॥ आद्या सनत्कु
मारोक्ता द्वितीया सूतसंहिता
तृतीया शाङ्करी विप्रा स्मृत
र्थी वैष्णवी मता। ततःपरा संहि
ता ब्राह्मी सौरान्त्या संहिताम
ता। ग्रन्थतः पञ्चपञ्चाशत्
सहस्रेणोपलक्षिता। आद्या
तु संहिता विप्रा द्वितीया ष
ट्सहस्रिका। तृतीया ग्रन्थत
स्त्रिंशत्सहस्रेणोपलक्षिता
तुरीया संहिता पञ्चसहस्रेणो
पलक्षिता। ततोऽन्या त्रिसह
स्रेण ग्रन्थेनैव विनिर्म्मिता॥
अन्या सहस्रतः सृष्टा ग्रन्थतः
पण्डितोत्तमाः। इति स्कन्दपु
राणे सूतसंहितायां शिवमा

1323

हात्म्यखण्डे १ अध्यायः ॥
संकल्पः पुं कर्म्मणो मानसं।
तद्वाक्यञ्चना यथा। श्रीपदं
पूर्व्वमुच्चार्य्य ततो विष्णुपदं व
देत्। ओम् तत्सदित्युच्चार्य्य
नाम गोत्रं ततो वदेत्।
ततश्च प्रीतिकामो मूलवीजं
समुन्नयेत्। ततोऽस्यां च वरा
रोहे गंगास्नानमहं ततः। क
रिष्ये इति संकल्प्य शिवः स्नानं
समाचरेत्। त्रिः स्नात्वा पञ्च
लापांगि इतिवाक्यं सुराच्चिते
अघेत्याद्यस्य चांवाणि रहस्यं प्र
वदामि ते। इति कामधेनुत
न्त्रे ३१ पटलः ॥
अपि च। अथ संकल्पविधा
नं। असंकल्पितमर्त्यो यन्मूलाधि
कमथापि वा। न सम्यक्फल
भाग्न्यात्तस्मान्नियममाचरेत्।
ताम्रपात्रे स्वरेवं च सतिलं जल
पूरितं। सकुशं च फलं हैविगृ
हीत्वाचस्य कल्पतः। अभ्यर्च्य
च शिरःपद्मे श्रीगुरुं करुणा
मयं। पद्मेशवदनो वापि देवं
इवदनोऽपि वा। मासं पक्षं तिथिं
चैव देवपर्व्वादिकं तथा। आ
घन्तकालञ्च तथा

गोत्रं नाम च कामिनी। क्रिया
कार्यं करिष्येऽन्त मेवं समुत्सृ
जेत् पयः। इति योगिनीतन्त्रे
प्रथमखण्डीय १ पटलः ॥
अन्यच्च। शिवपूजायां मानससं
कल्पो यथा। ततस्तु परमे
शानि कृत्वा संकल्पमानसं ॥
यथा एवं महादेवि ब्रह्माण्डस्थि
तिमानसः। तथा भवतु सर्व्वांग
इति संकल्पमानसः। न गोत्रं म
म देवेशि न नाम परमेश्वरि
न मासा परमेशानि नापिताम
म कामिनि तस्मिन् कालेम
हेशानि ममसर्व्वं नहि प्रिये ॥
न वारं न तिथिं देवि तस्मि
न् काले शुचिस्मिते। न काष्ठा
न कला देवि तस्मिन् काले व
रानने ॥ न दिवा परमेशानि
न रात्रिं परमेश्वरि। अत एव
महेशानि संकल्पं मानसं स्मृ
तं ॥ मानसं यदि आयाति त
दा ध्यानेन किं प्रिये। संक
ल्पं मानसं देवि चतुर्व्वर्गप्रदा
यकं। स्थूलं हि परमेशानि सं
कल्पं व्यर्थमुच्यते। संकल्पेन
विना देवि यत्किंचित् कृत
वान्सुधीः। तदुक्तं परमेशानित

न्तसर्वैमानसंपरं । यद्वत्कंपरमेश्वानि मुनिना तत्त्वबुद्धिना । तत्सर्वं परमेश्वानि अर्थं भवति पार्वति । इति संकल्पमाचष्यै जीवन्यासं समाचरेत् । इति लिंगार्च्चनतंत्रे ५ पटलः ॥

संघट्टचक्रं क्ली युद्धविचारार्थनक्षत्रांकितचक्रविशेषः । यथा । अश्विन्यादि लिखेच्चक्रं सप्तविंशतितारकैः । त्रिकोणेन वमिवेधः कर्त्तव्य स्तिर्य्यगाकृतिः अश्विनी रेवती वेधो अश्विनी ज्येष्ठयोस्तथा । मघापुष्ययोः सर्पं चित्रो रेस्याषामूलयोस्तथा ॥ ज्येष्ठा मूलकयोर्वेधो भवेत् संघट्टचक्रके । एवं संघट्टचक्रे च कार्य्या क्रूरगता ग्रहाः । भूपनामर्क्षसंघट्टे युद्धं भवति नान्यथा निर्वेधे सौम्यवेधे च युद्धं नास्ति रणेशयोः । क्रूरवेधे भवेद्युद्धं तत्कालेऽत्रोरुदारुणं युद्धाकांक्षी भवेद्राजा यस्यभं क्रूरवेधितं ॥ युद्धद्वेषी भवेत् सौम्यभे च वेधविवर्जिते सौम्यक्रूर विभागेन संत्रिमिश्रकसेण ॥ च । वक्रातिचारगत्याच युद्धमस्तिनास्तिच । इति स्वरोदये संघट्टकालानलचक्रं ॥

सत्यं क्ली यथार्थः । तद्वैदिकपर्य्यायाः । वट् १ श्रत् २ सत्रा ३ अद्धा ४ इत्था ५ ऋतं ६ इतिषट्सत्यनामानि । इति वेदनिघण्टौ ३ अध्यायः ॥

सत्ययुगं क्ली प्रथमयुगं । तस्योत्पत्त्यादि यथा । वैशाखशुक्लपक्षे तृतीयायां रविवारेसत्ययुगोत्पत्तिः । तत्रावतारचतुष्टयं मत्स्य कूर्म वराहनृसिंहाः । एतेषु पुण्यं । पापं नास्ति । कुरुक्षेत्रं तीर्थं । ग्रहीशा ब्राह्मणाः । मज्जागताः प्राणाः । इच्छामृताः । एकविंशतिहस्तपरिमितो मानवदेहः । लक्षवर्षं परमायुः । स्वर्णनिर्मितभोजनपात्रं सत्युगाब्दाः १७२८००० । सत्ययुगस्य राजा बलि वेण मान्धाता पुरूरवा धुंधुमारिकः कार्त्तवीर्य्यः एतेषट् चक्रवर्त्तिनः । सत्ययुगस्य लक्षणं । सत्यधर्मरता निरये तीर्थानांच सदाश्रयं । नंदंति देवताः सर्वाः

सत्ये सत्यपरा नराः ॥ तत्रतारकब्रह्मनाम यथा । नारायणपरावेदा नारायणपराक्षराः । नारायणपरामुक्ति र्नारायणपरागतिः ॥ कलौ तारकब्रह्मनाम पूर्वं न लिखितं मतोत्रलिख्यते हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ॥ हरे राम हरे राम राम राम हरे हरे ॥ इति मुद्रिकितपञ्जिकातः संग्रहीतं ॥

सत्ययुगाद्या स्त्री कृतयुगारंभकातिथिः । सातुवैशाखशुक्लतृतीया । तद्विवरणं युगाद्याशब्दे द्रष्टव्यं ॥

सन् पुं व्याकरणीयप्रत्ययविशेषः । तत्सूत्रादि यथा । सनिच्छायां । धोः परः सन् स्यादिच्छायां । अत्र मिच्छतिजिज्ञासति । इति मुग्धबोधव्याकरणे सनंतपादः ॥ प्रथमैकवचनांतपुंलिंगसच्छब्दरूपोप्येवं । तदुदाहरणं । रामं नमति सानंदं धर्म्मानभिनिविष्टसन् ॥ इति तत्रैव कारकपादः ॥

संतानः पुं संततिः । तद्वैदि
॥ ॥ ॥
कपर्य्यायाः । तुक् १ तोकं २ तनयः ३ तोक्म ५ शेषः ६ अप्नः ७ गयः ८ जाः ९ अपत्यं १० यहुः ११ सूनु १२ नपात् १३ प्रजा १४ बीज १५ इति पंचदशापत्यनामानि । इति वेदनिघण्टौ २ अध्यायः

संतानिका स्त्री मिष्टान्नविशेषः सरभाजा इति भाषा ॥ तत्करणप्रकारो यथा । दुग्धं शरावचतुष्टयं शर्करार्द्धशरावपरिमिता घृते शरावपादैकं च गृहीत्वा तद्दुग्धे आवर्त्तनेन घनीभूते उल्ले स्थिते मन्थानदंडेन मथनेन वकुलरकेणेन भविष्यति । तत्फेनसहितदुग्धसन्तप्तागारोपरि रक्तणात् सरो जायते । तत्सरमेत्रेण चतुष्कोणाकृतिं निर्म्माय घृतेन भृष्ट्वा पक्वतारवद्दुश्शर्करारसे मग्नं कुर्य्यात् । किंतु तन्माधिकद्रवणं न रक्षेत् । इति पाकराजेश्वरः ॥

संधानिका स्त्री खाद्यद्रव्यविशेषः । आचार इति भाषा । तत्करणप्रकारैकं यथा । आपक्वाम्रफलानि विंशतिः राजि

का शरावषोडशकभागमिता मरिचं तोलकद्वयं लवणं षट् तोलकं मेथिका द्वितोलकं जीरकं तोलकद्वयं हरिद्रातोलकैकं नागरमुस्तकं एकतोलकं कृष्णजीरकं तोलकैकं गृहीत्वा आम्रभिन्नं सकलद्रव्यं चूर्णयित्वा एकत्रीकुर्य्यात्। आम्रन्तु दीर्घं द्विखण्डञ्च तुषवर्ज्जं वा कृत्वा अग्नौ हरीकृत्वतदभ्यन्तरे एवोक्तचूर्णं प्रदाय त्वाशलाकया वहुखण्डमाम्रवत् कुर्य्यात्। ततस्तैलेन सञ्जयेत्। इति पाकराजेश्वरः॥

संधिः पुं राज्ञां षड्गुणान्तर्गतगुणविशेषः। मेल इति पेका। इति च भाषा। तद्विवरणं यथा। वलवता भवेत् संधिः स्वयं हीनस्तमाचरेत्। मर्य्यादोल्लंघनं नास्ति यदि शत्रोरिति स्थितिः। मर्य्यादोल्लंघने यत्र शत्रौ संशयितं भवेत्। न तं संशयितं कुर्य्यादित्येवाच वृहस्पतिः॥ वलवद्भिर्गृहीतः सन्नुपायः नत्यप्रतिक्रियः। आपन्नः संधिभावेन विदध्यात् कालयापनं। ये च दैवेनोपहता राष्ट्रं येषाञ्च दुर्गतं। वहवो रिपवो येषां तेषां संधिर्विधीयते। इमेतौ भिन्नमंत्रश्च नीचधर्मरताश्रयः पैतैः संधिं न कुर्वीत विशेषात् एवमादितैः॥ संधिं हित्वा ह्यपैः कुर्वन् प्राणेन सह हि हीयते। इति भोजराजकृत युक्तिकल्पतरुः॥ षोडशविध संधि यथा। वलीयसाभियुक्तस्तु नृपो नान्यप्रतिक्रियः। आपन्नः संधिमन्विच्छेत् कुर्वाणः कालयापनं॥ कपाल १ उपहारश्च २ संतानः ३ संगत ४ स्तथा। उपन्यासः ५ प्रतीकारः ६ संयोगः ७ पुरुषान्तरः। ८ अदृष्टनर ९ आदिष्ट १० आत्मादिष्ट ११ उपग्रहः १२ परिक्रय १३ स्तथोच्छिन्न १४ स्तथा च परभूषणः १५ स्कन्धोपनेयः १६ संधिश्च षोडशैते प्रकीर्त्तिताः। इति षोडशकं प्राहुः संधिं संधिविचक्षणाः॥ तेषां लक्षणानि। कपालसंधिर्विज्ञेयः केवलं समसंधितः १ संप्रदानाद्भवति य उपहारः स उच्यते २॥ संतानसंधिर्विज्ञेयो दारिकादानपूर्वकः॥ ३

सद्भिस्तु संगतः संधि मैत्रीपूर्व उदाहृतः। यावदायुः प्रमाणस्तु समानार्थप्रयोजनं सम्पत्तौ वा विपत्तौ वा कारणैर्यो न भिद्यते॥ संगतः संधिरेवायं प्रकृष्टत्वात् सुवर्णवत्। तथान्यैः संधिकुशलैः काञ्चनः स उदाहृतः॥ ४। आत्मकार्य्यस्य सिद्धिं तु समुद्दिश्य क्रियतेयः। स उपन्यासकुशलैरुपन्यास उदाहृतः। ५ मयास्योपकृतं पूर्वं ममाप्येष करिष्यति इति यः क्रियते संधिः प्रतीकारः स उच्यते। अन्यच्च॥ उपकारं करोम्यस्य ममाप्येष करिष्यति। अयं चापि प्रतीकारो राम सुग्रीवयोरिव। ६॥ एकार्थां सम्यगुद्दिश्य क्रियां यत्र हि गच्छति। सुसंहितप्रयाणेन स च संयोग उच्यते ७॥ आवयोर्योधमुख्याभ्यां मदर्थः साध्यतामिति। यस्मिन् पणस्तु क्रियते स संधिः पुरुषान्तरः ८ त्वयैकेन मदीयोऽर्थः संप्रसाध्यस्त्वसाविति। यत्र शत्रुः पणं कुर्य्यात् सोऽदृष्टपुरुषः स्मृतः ९ यत्र भूम्येकदेशेन पणेन रिपुर्वर्जितः। संधीयते संधिविद्भिः स चादिष्ट उदाहृतः १० स्वसैन्येन तु संधानमात्मादिष्ट उदाहृतः ११ क्रियते प्राणरक्षार्थं सर्वदानादुपग्रहः॥ १२॥ कोषांशेनार्द्धकोषेण सर्वकोषेण वा पुनः। शिष्टस्य प्रतिरक्षार्थं परिक्रय उदाहृतः १३ भुवां सारवतीनां तु दानादुच्छिन्न उच्यते १४। भूम्युत्थफलदानेन सर्वेण परभूषणः १५ परिच्छिन्नं फलं यत्र प्रतिस्कन्धेन दीयते। स्कन्धोपनेयं तं प्राहुः संधिं संधिविचक्षणाः १६ परस्परोपकारस्तु मैत्री संबन्धकस्तथा। उपहारश्च विज्ञेयाश्चत्वारश्चैव संधयः॥ इति विष्णुशर्म्मकृत हितोपदेशे सन्धिर्नाम चतुर्थकथासंग्रहः॥

संधिजं क्ली आसवादि। यथा काशीखंडे। कार्त्तिके वर्जयेत्तैलं कार्त्तिके वर्जयेन्मधु॥ कार्त्तिके वर्जयेत् कांस्यं कार्त्तिके मासि सन्धिजं॥ सन्धिजं आसवादि। इति तिथ्यादितत्त्वं॥

संधितं त्रि आसवादि । यथा। कार्त्तिके वर्ज्जयेत् कांस्यं कार्त्तिके शुक्तसंधितं । इति श्रीहरिभक्तिविलासे १६ विलासः ॥ शुक्तं काञ्जिकादि पर्य्युषितद्रव्यं संधितंच वर्ज्जयेत् । इति तट्टीका ॥

सन्निरुद्धगुदः पुं गुह्यद्वारोद्भवरोगविशेषः । इति भावप्रकाशः ॥ तन्निदानादि क्षुद्ररोगशब्दे द्रष्टव्यं ॥

समंतपंचकं क्ली कुरुक्षेत्रे। तच्च कुरुपाण्डवयोर्युद्धस्थानं। तत्र पुरा परशुरामः क्षत्रियरुधिरेण पंचह्रदान् चकार। यथा। त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः। समंतपंचके पंच कृतवान् रुधिरैर्ह्रदान्। स तेषु तर्पयामास पितॄन् भृगुकुलोद्वहः। साक्षात्ददर्श पितरं स च रामं न्यवारयेत्। इति पाद्मे भूमिखण्डे २४ अध्यायः। अन्यच्च। त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः। समंतपंचके पंच रौधिरान् ह्रदान् नव। इति श्रीभागवते ९ स्कन्धे १६ अध्यायः तस्य माहात्म्यं सीमा च यथा पृथिव्यां नैमिषं तीर्थमन्तरीक्षे च पुष्करं। त्रयाणामपि लोकानां कुरुक्षेत्रं विशिष्यते। इत्यारभ्य। तरंतुकारंतुकयोर्यदंतरं रामह्रदानां च मचक्रुकस्य च। एतत्कुरुक्षेत्रसमंतपंचकं पितामहस्योत्तरवेदिरुच्यते। इति महाभारते यवनपर्वणि ८३ अध्यायः॥

समाधानं क्ली निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानं। इति वेदांतसारः। इदानीं समाधानं लक्षयति निगृहीतस्येति। शब्दादिविषयेभ्यो निगृहीतस्यांतःकरणस्य श्रवणादौ तदनुगुणेषु तदुपकारकेषु अमानित्वादिसाधनविषयेषु समाधिनैरंतर्येन तच्चिंतनं समाधानमित्यर्थः। इति तट्टीकासुबोधिनी ॥

समाधिः पुं योगांगविशेषः। यथा। समाधिस्तु द्विविधः सविकल्पको निर्विकल्पश्चेति। तत्र सविकल्पको नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षया द्वितीयव

स्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानं। तदा मृण्मयगजादिभानेऽपि मृद्भानवत् द्वैतभानेऽप्यद्वैतं वस्तु भासते। तदुक्तमभियुक्तैः ॥ दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षयं। अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्तं ॥ दृशिस्तु शुद्धोऽहमविक्रियात्मको न मेऽस्ति बन्धो न च मे विमोक्ष इत्यादि ॥ निर्विकल्पकस्तु। ज्ञातृज्ञानादिभेदलयापेक्षया द्वितीयवस्तुनि तदाकाराकारितायाः बुद्धिवृत्तेरतितरामेकीभावेनावस्थानं। तदा तु जलाकाराकारितलवणानवभासेन जलमात्रावभासवदद्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमेवावभासते ततश्चास्य सुषुप्तेश्चाभेदशंका न भवति उभयत्र वृत्त्यभाने समानेऽपि तत्सद्भावासद्भावमात्रेण तयोर्भेदोपपत्तेः। अस्यांगानि। यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः। तत्राहिंसा सत्यास्तेयब्रह्मचर्य्यापरिग्रहाः यमाः १ शौच संतोषतपः स्वाध्यायेश्वरप्रणिधानानि नियमाः २। करचरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिकादीनि आसनानि ३ रेचकपूरककुंभकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः ४ इंद्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः ५ अद्वितीयवस्तुन्यंतरिंद्रियधारणं धारणा ६ तत्राद्वितीयवस्तुनि विच्छिद्य विच्छिद्य अंतरिंद्रियवृत्तिप्रवाहो ध्यानं ७ समाधिस्तु उक्तः सविकल्पक एव ८ एवमस्यांगिनो निर्विकल्पकस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः संभवंति लयस्तावत् अखंडवस्त्वनवलंबनेन चित्तवृत्तेर्निद्रा १ अखंडवस्त्वनवलंबनेन चित्तवृत्तेरन्यावलंबनं विक्षेपः २ लयविक्षेपाभावेऽपि चित्तवृत्ते रागादिवासनया स्तब्धीभावात् अखंडवस्त्वनवलंबनं कषायः ३ अखंडवस्त्वनवलंबनेनापि चित्तवृत्तेः सविकल्पानंदास्वादनं रसास्वादः

समाध्यारंभसमये सविकल्प
ेनेदास्वादनेवा ४ अनेनविघ्न
चतुष्टयेनरहितं चित्तं निर्वात
दीपवदचलंसदखण्डचैतन्यमा
त्रमवतिष्ठते यदातदानिर्विक
ल्पकःसमाधिरित्युच्यते ॥
तदुक्तं । लयेसंबोधयेत् चित्तं
विक्षिप्तं शमयेत्पुनः । सक
षायं विजानीयात् शमप्राप्तं
नचालयेत् ॥ नास्वादयेद्रसं
तत्र निःसंगःप्रज्ञया भवेत्
इत्यादि । यथादीपो निवात
स्थोनेंगते इत्यादि च । इति ।
श्रीसदानंदयोगींद्रविरचित
वेदांतसारः ॥
समिद्धः पुं प्रदीप्तः । यथा ।
कात्यायनः । योऽनर्च्चिषि जु
होत्यग्नौव्यंगारिणिचमानवः
मंदाग्निरामयावीचदरिद्रश्च
सजायते । तस्मात् समिद्धे
होतव्यं नासमिद्धे कदाचन
इति संस्कारतत्त्वं ॥
सर्वजया स्त्री स्त्रीकर्त्तव्यमार्ग
दिद्वादशमासनिष्पाद्यव्रतवि
शेषः । यथा । अथ सर्वजया
व्रतं । सामान्योक्तंकृत्वा अद्य
मार्गशीर्षे मासि अमुकपक्षे
अमुकतिथौ विष्णुपदीसंक्रा
न्तामारभ्य वर्षपर्य्यन्तं अमुकगो
त्रा श्रीअमुकी द्वादशमासव्या
कादिमार्गफलप्राप्तिपूर्वकपु
त्रपौत्राद्यैश्वर्य्यप्राप्त्युत्तरस्वर्गका
मा मनोरथकामा वाराणशा
दिहरगौरीपूजात्मकसर्वजया
व्रतमहंकरिष्ये । ततः सामान्यो
क्तंनवग्रहपूजांतं कृत्वा अंग
न्यासप्रणवेन कृत्वा गौरीसहि
तहरं ध्यायेत् । श्वेतवर्णं वृषारू
ढंव्यालयज्ञोपवीतिनं । विभूति
भूषितांगंच व्याघ्रचर्मधरंशुभं
पंचवक्त्रं दशभुजं चंद्रचूडकं
त्रिनेत्रं पार्वतीयुक्तं प्रमथैश्च
समन्वितं । प्रसन्नवदनंदेवं व
रदं भक्तवत्सलं । इतिध्यात्वा
ओम् नमः शिवाय श्रीं दुर्गा
यैनमः । इति मंत्रेणार्च्चयेत् कृ
त्वा पुनर्ध्यात्वा ओम् गौरीसहि
तहरायनमः । इत्यासनादिनापू
जयेत् । ततः पंचपुष्पांजलिंदा
नं कृत्वा प्रणमेत् । नमस्तेपार्व
तीनाथ नमस्ते शशिशेखर ।
नमस्तेपार्वतीदेव्यै चंडिकायै
नमोनमः ॥ अथकथा ॥ ल
क्ष्मीरुवाच । भगवन्सुखासीनं

लक्ष्मीः पृच्छति केशवं । केन
व्रतेन देवेश स्त्रीणांसर्वमनो
रथं । सौभाग्य मतुलञ्चापिपु
त्र पौत्रविवर्द्धनं । नानासुखस
मायुक्तो लभते वैष्णवं पदं ॥
तद्व्रतं ब्रूहिमेदेव क्रियतेचय
थाप्रभो । श्रीभगवानुवाच ।
अस्तिसर्वजया नामव्रतानांव्र
तमुत्तमं तस्यानुष्ठानमात्रेण
स्त्रीणांसर्वमनोरथं लोकत्रय
हितेयुक्ता सिद्ध्यतीहनसंशयः
कुरुत्व तद्व्रतंदेवि प्रचारयम
हीतले । लक्ष्मीरुवाच । प्रस
न्नो यदि देवेश विधानं मयि
कथ्यतां । सुखेन येन देवेश
क्रियतेव्रतमुत्तमं । श्रीभगवा
नुवाच । सर्वजयाव्रतं वक्ष्ये शृ
णुपद्मे सुशोभने । नैव दृष्टं
व्रतं देवि यथा सर्वजयाव्रतं
पुरुषाणां गयाश्राद्धं स्त्रीणां
सर्वजयाव्रतं । पितृद्धारणकं
नामसमनोरथप्रदायकं । व्रतरा
जमिदंभद्रे नारीणां सुखदाय
कं मार्गशीर्षेत्यजेत्शाकं पौंड
रीकंफलं लभेत् । पौषेतुल
वणं त्यक्त्वा गोसहस्रफलं
स्मृतं । माघेतैलं परित्यज्य
श्रियं प्राप्नोति मानवी ॥ फा
ल्गुनेच त्यजेत् पूगं भवेत्
पतिव्रता सती । चैत्रेपुष्पंपरि
त्यज्य सा याति परमां गतिं
भक्तं त्यक्त्वाथ वैशाखे याति
चंद्रपुरी शुभां । ज्यैष्ठे धाराज
ले त्यक्त्वा वारुणं लोकमाप्नु
यात् । आषाढ़ेच दधित्यक्त्वा
वारुणं लोकमाप्नुयात् । श्रा
वणे वसनं त्यक्त्वा प्रजापति
पुरंव्रजेत् । भाद्रेतु व्यंजनं त्य
क्त्वा नारायणपुरंव्रजेत् । आ
श्विनेच घृतं त्यक्त्वालावण्य
मुत्तमं लभेत् । शय्यांच कार्त्ति
केत्यक्त्वा प्रयाति परमांगतिं
मासांते चोपभुंजीत सर्वंदत्वा
द्विजातये । शय्या देयाव्रते
पूर्णे दानानि विविधानिच ।
गौर्य्यां हरंच संपूज्य शाकं
भुंजीत पायसं । एवं या कुरु
ते नारी वर्षं यावत् समाप्यते
स्वर्गेवसति सानित्यं पुत्रपौत्र
प्रतिष्ठिता तत्कुरुष्व प्रयत्ने
न येन सर्वजयाभव । शची
वदेवराजस्य रतीव मदनस्य
च । तत्सदृशी भवेत् भद्रे
व्रतस्यास्य प्रसादतः । इति

स्कंदपुराणोक्ता सर्वज्ञयात्र
तकथासमाप्ता ॥ ततःस्नात्वा
प्रणम्य विसर्जयेत्। वर्षांते प्र
तिष्ठा कर्तव्या। द्रव्यदाने अमु
कमासामुकद्रव्यत्यागजन्य
मुकफलप्राप्तिकामा शिवदुर्गा
प्रीतिकामावा ब्राह्मणायाहं
ददे इति वदेत्। इति कृत्यचंद्रि
का। सांख्ययोगः पुं ज्ञानयोगः
सच ब्रह्मविद्या। यथा। द्वितीये
शोकसंतप्त मर्जुनं ब्रह्मविद्य
या। प्रतिबोध्य हरिं मुक्तोस्थि
तप्रज्ञस्य लक्षणं ॥ इतिश्री
धरस्वामी। तद्योगो यथा।
श्रीभगवानुवाच। अशोच्यान
न्वशोचस्त्वं प्रज्ञावादांश्च भाष
से। गतासूनगतासूंश्च नानु
शोचंति पंडिताः। नत्वेवाहं
जातुनासं नत्वंनेमे जना
धिपाः। नचैव नभविष्यामः
सर्वेवयमतःपरं। देहिनो
स्मिन् यथादेहे कौमारं यौ
वनंजरा॥ तथा देहांतरप्रा
प्ति धीरस्तत्र नमुह्यति ॥ मा
त्रास्पर्शास्तुकौंतेय शीतो
ष्णसुखदुःखदाः। आगमापा
यिनोनित्या स्तांस्तितिक्षस्व.
भारत। यंहिन व्यथयंत्येते पुरु
षं पुरुषर्षभ। समदुःखसुखं
धीरं सोऽमृतत्वाय कल्पते॥
नासतो विद्यते भावोनाभा
वो विद्यतेसतः उभयोरपि दृष्टो
ऽतस्त्वनयो स्तत्वदर्शिभिः॥
अविनाशितुतद्विद्धि येनसर्व
मिदं ततं। विनाशमव्ययस्या
स्यन कश्चित् कर्तु मर्हति॥
अंतवंत इमे देहा नित्यस्यो
क्ताः शरीरिणः अनाशिनोऽप्र
मेयस्य तस्मात् युद्धस्वभारत।
य एनंवेत्तिहंतारं यश्चैनंमन्य
तेहतं। उभौ तौ नविजानी
तो नायंहंतिनहन्यते। नजा
यते म्रियतेवा कदाचिन्नायं
भूत्वा भविता वान भूयः॥
अजो नित्यः शाश्वतोयंपुराणो
नहन्यते हन्यमानेशरीरे। वे
दाविनाशिनंनित्यं यएनमज
मव्ययं ॥ कथंसपुरुषःपार्थ
कंघातयतिहंतिकं ॥ वासां
सि जीर्णानि यथा विहायन
वानिगृह्णातिनरोपराणि। त
थाशरीराणिविहायजीर्णान्य
न्यानिसंयातिनवानि देही॥
नैनं छिंदंति शस्त्राणि नैनं

दहति पावकः। नचैनं क्लेद
यंत्यापो नशोषयतिमारुतः॥
अच्छेद्योयमदाह्योय मक्लेद्यो
ऽशोष्यएवच ॥ नित्यःसर्व
गतःस्थाणुरचलोयंसनातनः
अव्यक्तोय मचिंत्योय मवि
कार्योय मुच्यते ॥
तस्मादेवं विदित्वैनं नानुशो
चितुमर्हसि। अथचैनंनित्यजा
तं नित्यंवा मन्यसेमृतं। त
थापित्वं महाबाहो नैनं शोचि
तुमर्हसि ॥ जातस्यहि ध्रुवो
मृत्यु ध्रुवं जन्ममृतस्यच ॥
तस्मादपरिहार्येर्थे नत्वं शो
चितु मर्हसि ॥ इत्यादि श्री
भगवद्गीतायांसांख्ययोगोना
म २ अध्यायः ॥
साम्मुखी स्त्री सायाह्नव्यापि
नीतिथिः। यथा। पंचमीसप्त
मीचैव दशमीचत्रयोदशी। प्र
तिपन्नवमीचैव कर्तव्या सम्मु
खीतिथिः। इति पैठीनसिवच
नस्यतु। साम्मुख्यं नाम सा
याह्नव्यापिनी दृश्यते यदा
इति स्कंदपुराणेन सायाह्न
व्यापितिथेः साम्मुख्यविधाने
नरुज्ञादाबलबकाशादुपवासपर
त्वे सायाह्नव्यापित्व मपिगुरु
त्वेन्यूनत्वेन ज्ञेयं। इति तिथ्या
दितत्वं ॥
सात्म्यं त्रि सुखजनकं। आत्म
नो हितं कर्म आत्मने आत्मे
न सह वर्तमाने सात्म्यं। इति
भेषज्यरत्नावली ॥
सात्विकः त्रिशत्वगुणयुक्तः
तद्विवरणं यथा। यजंते सा
त्विकादेवान् यक्षरक्षांसिराज
साः। प्रेतान् भूतगणांश्चान्ये
यजंते तामसाजनाः ॥ सा
त्विकयज्ञो यथा। अफलाकां
क्षिभिर्यज्ञो विधिदृष्टो यइ
ज्यते। यष्टव्यमेवेति मनःस
माधाय ससात्विकः। सात्विक
तपो यथा। श्रद्धयापरया तप्तं
तपस्तत्त्रिविधंनरैः। अफला
कांक्षिभिर्युक्तैः सात्विकं परि
चक्षते। सात्विकदानं। यथा।
दातव्य मिति यद्दानं दीयते
ऽनुपकारिणे। देशे काले च
पात्रेच तद्दानं सात्विकंस्मृतं।
इतिश्रीभगवद्गीतायां १७ अ
ध्यायः ॥ सात्विकयोगो। य
था। कार्य्य मित्येव यत्कर्म
यते क्रियतेऽर्जुन। संगंत्य

त्यक्त्वा फलंचैव सत्यागःसात्वि
कोमतः । सात्विकज्ञानं । यथा
सर्वभूतेषु येनैकंभाव मव्यय
मीक्षते । अविभक्तंविभक्तेषु
तज्ज्ञानं विद्धिसात्विकं ॥
सात्विककर्म यथा । नियतं
संगरहित मरागद्वेषतः कृतं
अफलप्रेप्सुना कर्मयत्तत्सा
त्विक मुच्यते । सात्विकबुद्धि
र्यथा । प्रवृत्तिंच निवृत्तिंचका
र्याकार्येभयाभये । बंधंमो
क्षंचया वेत्ति बुद्धिःसापार्थ
सात्विकी ॥ सात्विकी धृति
र्यथा । धृत्यायया धारयतेमनः
प्राणेन्द्रियक्रियाः । योगेनाव्य
भिचारिण्या धृतिः सापार्थ
सात्विकी । सात्विकसुखं य
था । यत्तदग्रेविषमिवपरिणा
मेऽमृतोपमं । तत्सुखंसात्वि
कंप्रोक्तं मात्मबुद्धिप्रसाद
जं । इति तत्रैव १८ अध्यायः
सात्विककर्म्मो कर्त्तृशब्दे सा
त्विकाहार आहारशब्दे च
द्रष्टव्यौ ॥
साधारणः त्रि समानः सा
मान्यः । इत्यमरः । तद्वैदिकप
र्य्यायाः । स्वः १ हक्षिः २ नाकः ३
गोः ४ विष्टप् ५ नभः ६ । इति
षट् साधारणनामानि । इति वे
दनिघण्टौ १ अध्यायः ॥
सिध्मं क्ली सन्नमहाकुष्ठान्तर्ग
तकुष्ठरोगविशेषः । तल्लक्षणं य
था । श्वेतं ताम्रंतनुच यद्रजोद्धृ
ष्टं विमुंचति । प्रायशश्चोरसितत्
सिध्म मलाबुकुसुमोपमं ॥
इति माधवकरः । त्वक्स्थाश्रगता
सिध्मपुष्पिका इति मलाबुपु
ष्पवत्श्वेते सिध्मं यातुप्रविष्टं
सिध्मपुष्पिकेतरं श्वेत लोहित
वर्णं । एतेन सिध्मस्य द्वैविध्यं
सूचितं । इति विजयरक्षि
तादयः ॥
सिध्मपुष्पिका स्त्री कुष्ठव्याधि
भेदः । साचत्वक्स्थाश्रगतामलाबुपु
ष्पवत् श्वेता । इति माधवनिदान
टीकायां विजयरक्षितादयः ॥
सीता स्त्री श्रीरामपत्नी ॥
तज्जन्मव्रतादि गौतमं प्रति
शिवेनोक्तं यथा । वैशाखे
शुक्लपक्षे नवम्यां संयमं
कुरु । परेद्यु र्विकुरुष्वैतज्जा
नकीजन्मनो व्रतं ॥
संतुष्टो जानकीतेन भवि
ष्यति नसंशयः ॥

एतद्व्रतंसमाप्याप्ति कर्त्तव्यं मो
द्विजोत्तम । माहात्म्यं तस्य गा
दितुं नास्ति मे निश्चले मनः ।
अहंतद्रसलीनोऽस्मि शक्तस्त
द्वदितुं नहि ॥ तस्मादेकंवदा
मित्वां मार्कंडेयाश्रमेऽधुना ।
गत्वा मुनींद्रःसकले मार्कंडेया
ऽनुपृच्छ्यतां ॥ सर्वंनिवेदितं
तस्मै व्रतमाहात्म्यमुत्तमं । विधा
नंच फलं तस्य स श्रुति स्वा
वदिष्यति ॥ मार्कंडेयोप
दिष्टेन विधिनाचरतद्व्रतं । य
थाशक्त्यापि कुर्वीणो व्रतस्या
स्यवमादरात् ॥ लप्स्यसेसक
लानकामाज्ञात्र कार्य्या विचा
रणा । इत्यादि गौतमप्रश्नानं
तरं श्रीमार्कंडेय उवाच ॥ त्रे
तायुगे उत्तरायणे गते कमलि
नीपतौ । सर्वर्तुनिकरश्रेष्ठेऽस्र
तौ तकुसुमाकरे । माक्षिपुराण
तमे विप्र माधवे माधवप्रिये
नवम्यां शुक्लपक्षेच वासरेमंग
ले शुभे ॥ सार्पनक्षत्रेच मध्या
ह्ने जानकी जनकालये । आ
विर्भूताश्रये देवी योगेश्वराति रू
पमा ॥ एतद्योगे कृतंचेतद्व्र
तं प्रोक्तं मनंतकं ॥ अ
ष्टम्यां यदि विद्धा स्यात्तन्नवमीसा
यवे स्थिते । कुर्य्याद्भेदं व्रतंतस्या
कृतंचेन्न्यूनता भवेत् ॥ मध्या
ह्नव्यापिनी ग्राह्या व्रतेऽस्मिन्न
वमीतिथिः । द्विनद्वयगतायो
द्वितस्यां कुर्य्या परां नरैः । ए
तैर्योगैर्विनापि स्यात्तद्दिनेपा
पनाशनं । व्रतानां नित्यमा
म्नातं कर्त्तव्यव्रत मुत्तमं ॥
यस्तुनो कुरुते मोहात् जा
नकीजन्मसंभवं । व्रतं सप
च्यते घोरे नरकेनात्रसंशयः
तस्मिन्नहनि मूढात्मा भुक्त्वा
पतन्तु यो नरः । मुने सकामि
संज्ञाने सपुंय खादति स्फुटं
नकरोति द्विजः कृत्वा व्रतानां
मुत्तमंव्रतं । समहापातकीत्येयः
सर्वधर्मबहिष्कृतः । कुरुतेयो
व्रतं सोपि षष्टीदानफलंल
भेत् । महाषोडशदानानां यत्ता
ता मुनिपुंगव । प्राप्नोतिसर्व
तीर्थानां प्राप्नुयात् सकलंफ
लं सर्वभूतदयां कृत्वा फल
माप्नोति यज्जनः । तत्प्राप्नोति
व्रतात्तस्मात् नात्र कार्य्या वि
चारणा ॥ ब्राह्मम्या प्रातरु
त्थाय कृत्वा शौचं मतंद्रितः

महानद्यां तडागे वा कूपेवाप्यां
तिकेपिवा। स्नात्वा कुर्य्यात्त्रि
त्यकर्म्म प्रातःसंध्यादिवंदनं।
देवान् पितॄंश्च संतर्प्य हविष्या
शीच संयतः॥ एकभक्तब्रह्म
चारी स्याद्भूमिशायीचगोतम।
नवम्यां प्रातरुत्थाय दान्तो भू
त्वासमाहितः। तीर्थोदोविधि
वत्स्नात्वा कृतनित्यक्रियोनरः
कुर्वीत मंडपं रम्यं षोडशस्त
म्भमंडितं। अष्टस्तंभयुतं वापि
चतुस्तंभ मथापिवा। तोरणैः
सहितं कुर्य्याद्वितानवरशोभितं
द्वारेषु शंखचक्रादिपताका
भिर्ध्वजैस्तथा। अलंकुर्य्यात्स्त
तिस्तंभ स्थापयेत्कलसान्
शुभान्। शुक्लतंडुलसंपूर्ण
रत्नपात्रैरलंकृतान्। मध्येतुवेदिं कु
र्य्यात्चतुर्हस्तप्रमाणतः। हस्त
मात्रोच्छ्रितं रम्यं चतुरस्रं महामु
ने॥ पलद्वयमितां कुर्य्यात् जा
नकीप्रतिमां शुभां। कांचनी
मथवा शक्त्या कुर्य्यादेकपलो
न्मितां। तदर्द्धेन तदर्द्धेन कुर्य्या
द्वक्त्राच्चतुर्भुजां विलसत्का
भक्त्यैवं राजतीमपिकारयेत्
ओडुंबरीं पैत्तली वा मृन्मयी।
मृत्तज्ञात्सुत। ऊर्द्ध्वे पटेऽथवा
लेख्यावर्णकैः प्रतिमांरवौ ले
खांच सूतिकागारं सर्वतस्त्वप
टावृते। पर्य्यंकशयने सुमात
त राज्ञी महामते तस्याः समी
पतः स्वस्था मैथिली स्तनपायि
नी। जातकर्मकरो लेख्यो ज
नकश्च महीपतिः। शतानंदःपु
रोधाश्च लेखनीयः प्रयत्नतः॥
इत्यादिचरितं लेख्यं जानकीज
न्मसंभवे॥ यथाशक्तिहलेकु
र्य्यात् कांचने किलगोतम
राजते हेममयले स्वर्णसिंहा
सने तथा। कुर्य्यात्ताम्रमये
कुंभे स्वर्णपात्रावृते शुभे। त
न्मध्ये पंचरत्नादि तीर्थोदं नि
क्षिपेन्मुने॥ आचार्य्यं शास्त्रकु
शलं वेदाध्ययनकोविदं। वृण
याद्विमलाचारं मरते सोगदास
नैः श्रुतरीयोत्तरीयैश्च पंचपा
त्रादिभिर्वृतीं। श्रीफलाद्भिर
भ्यर्च्य गंधमाल्यानुलेपनैः।
वृणुयाद्वै विधानेन ततः षोडश
ऋत्विजः विधावतः सदाचारान्
होमार्थं भक्तिसंयुतः॥ मध्ये वे
द्यां समालेख्य विचित्रं वर्णकै
स्ततः॥ पद्मं अष्टदलं तस्या

पयेत् कलसं ततः॥ रत्नसिंहा
सने रम्ये संस्थाप्य विजितेन्द्रियः
तत्राधिवासनं कुर्य्यादग्नुमारण
पूर्वकं। प्रतिमायां विधानेन
देवीमावाहयेत्ततः॥
प्राणानायम्य मूलेन त्रिरेका
ग्रेण चेतसा। मूलमंत्रस्यजन
कं मुनिं विन्यस्य मूर्द्धनि॥ मुखे
च्छंदश्च गायत्री सीतादेवीहृदि
न्यसेत्। नाभौ तु विन्यसेद्धीमान्
लक्ष्मीबीजं सबिंदुकं॥ पादयो
श्च नमः शक्त्यै ततो विन्यस्य मंत्र
वित्। श्रीं श्रीं मित्यादिभि
र्बीजैर्दीर्घषट्स्वरसंयुतैः॥
कृत्वा करषडंगेषु न्यासं ध्याये
त्ततो व्रती॥ चतुर्भुजां स्व
र्णाभां रामालोकनतत्परां॥
श्रीराघवान्वितां सीतां चिंतयेद्धृ
दि सर्वदा॥ इति ध्यात्वा समुच्चा
र्य मूलमंत्रं कृतांजलिः॥
सबिंदुकमलाबीजं एवमुच्चार्य
गोतम। सीतायै इति पश्चात्तु
नमः शब्दं वदेत् किल। संपूज्य
प्रतिमां रात्रौ कृत्वैवमधिवासनं।
ब्रह्मचारी भूमिशायी तस्यां रात्रौ
भवेद्व्रती॥ तस्यां नवम्यां वि
धिवत् कृत्वा शौच म
तद्धितः नद्यादौ विमले स्नात्वा
नित्यकर्म विधायच। ततस्तु
प्रथमे यामे नित्यपूजाविधिं
व्रती। कृत्वा द्वितीयप्रहरे गी
तवाद्यपुरःसरं। मध्याह्नसम
येभक्त्या कुर्य्यादेकाग्रचेतसा
आसने उपविश्यादौ मूलंवि
न्यस्य पूर्ववत्। चतुरस्रंचष
ट्कोणं त्रिकोणंचपुरस्ततः
कृत्वा मंडल माधारं तत्रसम्य
ग्मंत्रवित्। मूलेन शंखं सं
स्थाप्य जलमासिच्य निर्मलं
चिन्मयं तत्र संचिंत्य तीर्थमंकु
शमुद्रया॥ आकृष्य मूलमं
त्रेण सप्तवाराभिमंत्रितैः। जलैः
संप्रोक्षयेद्विद्वान् सामग्रीं पूजनो
चितां। पात्राणि ताम्रहेमादि
निर्मितानि ततो मुने। पाद्या
र्घ्याचमनार्थंच मधुपर्कार्थमेवच
तथैवाचमनीयार्थं मेवमासाद
येत्क्रमात्। एकस्मिन्नथवा
पात्रे पाद्यादीन् प्रकल्पयेत्॥
पात्राणीत्थं समासाद्य ततः
तद्यागमाचरेत्। पुष्पांजलिं
समादाय ध्यायेद्वै प्रतिमाग
ताः शंखचक्रगदापद्मायु
धां तां चतुर्भुजां। महामते तथा

प्राप्तो जनकस्य महात्मनः।
हलचालनतः साक्षादाविर्भूता
स्वतः श्रियै। सीता देवी हृदि
ध्यात्वा मूलमंत्रेण मंत्रवित्।
पुष्पांजलित्रयं देवीप्रतिमामूर्द्ध्नि
क्षिपेत्। हिरण्यवर्णां मंत्रेण
देवी मावाहयेत्ततः। आवा
हनादिमुद्राणां मस्तके संप्र
दर्शयेत्। तामावाह्य इत्य
कोमंत्रो देव्यासनेमुने। अस्य
र्पणमर्घ्यदाने पाद्य कांसोस्मि
मंत्रतः। चंद्रप्रभेति मंत्रेणाद
द्यादाचमनीयकं। आदित्यव
र्णे इत्येको मंत्रः पंचामृतेभवे
त्। आप्यायस्वेति मंत्रेणपय
स्नापयेत्ततः। दधिक्राव्णस्त
तोदध्नाघृतेनघृतवत्सुना। मधु
वातेति ऋचयास्नपयात्सुने।
स्वादुः यवस्वमंत्रेण ततस्तीर्थो
दकैः क्रमात्। उपैतु मामिति प्रो
क्तः सीतायास्नपने मनुः। स्वर्ण
सिंहासने रम्ये प्रतिमां स्थाप
येद्व्रती। दासीभिः स्तुतपिपा
सेतिसृजयेद्विमलाम्बरैः। मा
त्वद्वारा मितिभवद्दाते गंधा
दिकस्य तु। मनसः काममा
त्याहुर्मंत्र माभरणादिके मधु
पर्के ततो दद्यात् सीतादेव्यै विधा
नतः। कस्तूरी कुंकुमोपेतैः कर्पू
रागरुचंदनैः। प्रतिमां पूजयेत्
कृत्वा ततः पुष्पैः स्वकालिकैः।
सुगंधैः कर्दमेनेति मंत्रेण कि
लोत्तमम्। अर्चयेत्तुलसी
पत्रैः कोमलैर्मंजरीयुतैः। प्रति
मां मूलमंत्रेण शतमष्टोत्तरं
जपेत्॥ ततः संपूजयेद्विद्वान्
राजानं जनकं व्रती॥ जनकं
व्रती॥ जनकपूजामंत्रः॥
देवी पद्मालया साक्षादवतीर्णा
यदालये। मिथिलापतये तस्मै
जनकायनमोनमः॥ महामतिपू
जामंत्रः। श्रीसीताजननीमात
र्महिषी जनकस्यच। पूजांगृहा
णमद्दत्तां महामति नमोऽस्तुते॥
शतानंदपूजनमंत्रः॥
निधाने सर्वविद्यानां विहितक्रतु
लक्षणः। जनकस्य पुरोधास्त्वं
शतानंदाय तेनमः॥
हलपूजनमंत्रः। जीवयस्याखिलं
विश्वं चालयन्वसुधातले। प्रादु
र्भावयसे सीतां सीर तुभ्यंनमोऽ
स्तुते॥ सभापूजनमंत्रः॥
त्वयैवोत्पादितं सर्वं जगदेत
च्चराचरं। त्वमेवासि म.

हामायामुनीनामपि मोहिनी
त्वयायन्नाहेम लोकाः श्रीसीता
वल्लभापरा वंदनीयासि देवा
नां सभेत्वां नमाम्यहं॥ त
तोऽष्टदलमध्यस्था जायाद्याभ
क्तितः क्रमात्। संपूजयेद्विशुद्धा
त्मा गंध पुष्पाक्षतादिभिः॥
वहिर्मंडलवर्तिन्यः षोडशान्या
स्तु देवताः। अनिमाद्यभिधाः
पूज्या वहिः सर्वा ऋच स्ततः॥
संपूज्यावरणान्येवं मुख्यदेव्या
स्ततोव्रती॥ दशांगेन गुग्गुलेन
दद्याद्धूपमापःस्रुतेविभिः॥
दीपंतु साज्यवर्तीभिरार्द्रपुष्करि
णामिति नैवेद्यं घृतपक्वान्न
नानाव्यंजन संयुतैः॥ प्रदद्याद्धा
तपायसाद्यं रण्याङ्गीपः करिणा
मिति। दद्याद्यच गुडलड्डुकान्म
हामतये निवेदयेत्। तांबूलंच
ततोदद्यात्कर्पूराद्यैः सुसंयुतं
संगतासिद्धये देया यथाशक्ति
च दक्षिणा। नीराजयेत्ततो देवी
प्रणमेत्तदनंतरं। तामाहूयच
मंत्रेण पुष्पांजलिं समर्पयेत्॥
मूलेन धारयेत् विप्रश्रेष्ठो नरस
हस्रकं। अष्टोत्तरशतंवा
पिपायसं शर्करा।
युतं। आहुतीनां ततः पश्चा
न्मुनेकुर्यात् प्रदक्षिणं। पुनः
पुष्पांजलिं दद्यात् सीतामूर्द्ध
नि भक्तितः। आदाय तुलसी
पत्रं पुष्पयत्किंचिदेववा॥
सीतांघ्रिपंकजाङ्कत्वा तदाका
रं विभावयन्। इति नम्रशिरा
भूत्वा रोपयेत्तत् स्वमूर्द्धनि।
ततः सीतापदांभोजद्वयंसमु
प्य मंगलं। करांजलिपुटं
बद्ध्वा प्रार्थयेद्रामवल्लभां भ
क्त्यापरमया ब्रह्मन्नृत्ताभिःको
मलशक्तिभिः। दुरंतसंसारस
मुद्रमग्नं सीतेशरण्यापारणाग
गतं त्वां। उद्धारयत्वाम्सुकृतं म
यैतद्धृतं ततो देवि मयिप्रसीद
संप्रार्थ्य जानकीमेवं दंडवत्प्र
णमेत्पुनः। पुष्पांजलिं पुनर्दत्
त्वा स्तवीतपरमेश्वरीं॥ नी
लनीरजदलायतेक्षणां को
शलेशभुजसावलंवनां। सानु
रागहरिमेव वीक्षती भावयेम
नसि रामवल्लभां। मंदहासयुति
गांच कृपणारीकामकांतिपरि
भूतचांद्रिकां। ताडकारिसह
प्रेमविभ्रमां भावये मनसि रा
मवल्लभां॥ कुंतलालककलाक

पोलमानना बाहुवक्रागसस्तथा
सुमधुतिं। वाससा पिदधती
क्रियाकुलां भावये मनसि रा
मवल्लभां। कायवाङ्मनसगीः
पतिर्ध्यात स्वप्न जाग्रतिपुरा
घवेश्वरः। शिवविरिंचिभिरिंद्रि
वंदितां भावयेमनसि रामव
ल्लभां। भक्तैककाम्यां प्रकृतेः
परांच चित्ते भृशंलोकनमस्कृ
तांच। भ्रूवायुवह्निवननाकसं
हितां विभावये चेतसि रामव
ल्लभां। इंद्र रुद्र धनदाम्बुपाल
कैःसद्विमानगणमास्थितैर्दि
वि। पुष्पवर्ष मनुसंस्तुतशीलां
भावये मनसि रामवल्लभां।
श्रेयमान ममवेश्म स्वरूपांता
मथामतनुनिर्जितहेमां फुल्ल
नीरजविभावराननां भावयेम
नसि रामवल्लभां। संचये हि
विसदां विमानगौरीस्मयाकु
लमनोभिरीक्षितां। तेजसापि
दधतींसदादिशो भावयेमनसि
रामवल्लभां॥ एतदष्टक म
निष्हानिकृच्चः पठेदघ शृणु
सहस्रुखं। अंतरायरहिता त
मैथिली तस्य भक्तिमतुला
प्रयच्छति। स्तुत्वेत्थं जानकी

देवीं गीतवाद्यादिभिर्व्रती।
रात्रौ जागरणैः सर्वां तारात्रि
मपवाहयेत्॥ ततः प्रातर्द्वि
शम्याच एवंविधिनाहि
तु प्रतिमां पूजयित्वादावाचा
र्य्यं पूजयेत्ततः। तस्मै सोप
स्कराद्दद्यात् सवत्सांगांपय
स्विनीं। दक्षिणांच यथाशक्ति
ततः पूर्णाहुतिंचरेत्॥ पूर्णा
हुतिविधानेन कृत्वाच प्रतिमा
दिकं। सीतायाः प्रीतये दद्यात
मंडपादि विसर्जयच। सीताप्री
तिंवाचयीत ब्राह्मणांश्चार्थ्यभा
षितैः। अन्येभ्योपि यथाशक्त्या
भूयसीं दक्षिणां ददेत्। अति
थिभ्योऽन्नदानंच कर्त्तव्यंतद्दिने
किल। संतोष्यसकलान् लो
कान् कुटुंबसहितोव्रती॥
विधिना पारणं कुर्य्यात्सभूमि
शायीच मानवः। तस्यापरिस
हा प्रीता सीता स्यात्तत्त्वसंशयः
यद्गृहे नित्यपूजा स्यात प्रति
मा तत्र गौतम॥
तस्यामेवोत्सवं कुर्य्याज्ज्ञान
कायाः पूजनादिवं। नित्य पू
जा न यस्य स्यात् सीतायाः
प्रतिमा यदा। शालग्रामशिला

यांसकुर्य्यात्सीतोत्सवंबुधः॥
लक्ष्मीनारायणेयस्मात्तस्मांसेव
सतः सदा। एवंोक्तविधिनासीता
नवम्या उत्सवे द्विज॥
पूजां कुर्वीत वैतस्याः सर्वोप
चारष्टतादिभिः। तथैव तेनवै
तस्मिन् जानकी रघुनंदनौ।
इत्थं निगदिते सर्वं जानकीज
न्मनो व्रतं। कुर्वंतीन्द्रादयः स
र्वे व्रत मेतदनुत्तमं॥ गंधर्वाः
किन्नरा यक्षा गुह्यकाः सिद्ध
चारणाः। नागाश्च मुनयश्चा
पि प्रकुर्वंति व्रतेद्विज। यः कु
र्य्याद्व्रतमेतद्धि जानकीजन्मसं
भवे। सलभेत् सकलं ब्रह्मन्
पृथ्वीयात्राफलं किल। तथा
षोडशदानानां फलं प्राप्नोति
मानवः। अश्वमेधादियज्ञानांती
र्थानामपिगौतम। अत्युग्रतप
सांवापि वेदोक्तायुष्यविन्दति
गौतमेदं व्रतं तस्माद्वश्यंकुरु
भक्तितः॥ नेदं वक्तुंसमर्था
स्ते फणीन्द्र चतुराननाः॥
कृतान्कृतान्तमादस्माद्दीर्घायुःप्रा
प्नुवानहं। व्रतानां नित्य माम्ना
तेभक्तिदं कुर्वतां सतां॥
सूत उवाच। मुनये गौतमाये

त्थं जानकीजन्मसंभवं। व्रतंच
व्रतमाहात्म्यंविधानं कृतिचो
दितं। जगाद सकलं व्यक्तमा
र्कंडेयो मुनीश्वरः। इत्यादि
श्रीभविष्यपुराणे श्रीसीता
नवमीव्रतमाहात्म्यंसमाप्तं॥
सुखं क्ली आत्मनो गुणवि
शेषः। इति नैयायिकाः। मन
सोधर्म्मः। इतिवेदान्तिकाः। त
द्वैदिकपर्य्यायाः। शर्म्मशाता १
शातरा २ शातपंता ३ शिल्गुः ४
स्समकं ५ प्रोष्ठथं ६ मयः ७
सुगम्यं ८ सुदिनं ९ भूषं १०
शुनं ११ शग्मं १२ भेषजं १३
जलाषं १४ स्योनं १५ सुम्नं
१६ शेवं १७ शिवं १८ शं १९
कं २० इति विंशति सुखना
मानि। इतिवेदनिघण्टौ ३ अ
ध्यायः। त्रिविधसुखं यथा।
अभ्यासाद्रमतेयत्र दुःखान्तंच
नियच्छति यत्तदग्रेविषमिवप
रिणामेऽमृतोपमं। तत्सुखं
सात्त्विकं प्रोक्तमात्मबुद्धिप्रसा
दजं १ विषयेन्द्रियसंयोगात्
यत्तदग्रेऽमृतोपमं। परिणा
मेविषमिवतत्सुखं राजसंस्मृ
तं २॥ यदग्रे चानुबंधेच।

सुखंमोहन मात्मनः ॥ निरा
लस्यप्रमादोस्य तन्नाममसुदा
हृतं ॥ ३ ॥ इतिश्रीभगवद्गी
तायां १८ अध्यायः ॥
सुग्रीवी स्त्री ताम्राग्रर्भजाता
कश्यपपत्नीहिता । यथा । षट्सु
ताश्च महासत्वा स्ताम्रायाःप
रिकीर्तिताः सुकीश्येनीचभा
सीचसुग्रीवीशुचिगृध्रिका ।
इतिगारुडे ८ अध्यायः ॥
इयं कश्यपपत्नीति पराभ्रमा
लिखिता ॥ [illegible] ॥
सुतः पुं पुत्रः । पतयोर्भुतप
त्रि यथा । सूते सुतः कर्मणि
क्तः । पुतो नरकभेदात् त्रा
यते इति पुत्रः । पुन्नाम्नोनर
काद्यस्मात् पितरं त्रायतेसुतः
तस्मात् पुत्रइति ख्यातः स्व
यमेव स्वयंभुवेति स्मृतिः ॥
किम्वा पुनाति माता पितरा
विति त्रासुमिति त्रे निपाता
त् क्रस्वत्वे पुत्रः । पुत्रो हित
कारः एकतकारस्य इत्यमरटी
कायां भरतः ॥ पराप्य
शब्दे एतट्टीकायां लेखना
भावादत्र लिखिता ॥
सुता स्त्री पुत्री । यथा । आत्म

जात्मजयः सूनुः सुतः पुत्रः स्त्रियं
त्वमी । आहुर्दुहितरं सर्वेऽप्या
द्यमरः । अमी आत्मजायाः स्त्रि
यां वर्तमाना दुहितरमाहुः ॥
यथा । आत्मजा । तनया । सू
नोः प्रत्ययांतराभावात् स्त्रि
यामपि सूनु रेव । सुता ।
पुत्री । स्वार्थे के केःकस्व इ
ति क्रस्वत्वे द्वेष सुतपुत्रेत्या
दित्व विभाषया अत्र । इति
पुत्रिका पुत्रकाच । शोनादि
पाठात् पुत्रीच । माभेषीः पु
त्रि सीतेति महानाटकं ।
इति तट्टीकायां भरतः ॥
सुदर्शनः पुं विष्णुचक्रं । वैस
वांगेतच्चिक्रधारणविधि यथा
ब्रह्माण्डे । कृत्वा धातुमयीमु
द्रांतापयित्वा स्वकां तनुं । चक्रा
दिचिह्निता भूप धारयेद्देष्णवो
नरः । नारदीयपंचरात्रे । द्वाद
शारन्तु षट्कोणं वलयत्रयसं
युतं । हरेः सुदर्शनं तस्य धारये
द्दक्षिणे करे ॥ इति श्रीहरिभ
क्तिविलासे १५ विलासः ॥
अन्यत् समुद्राशब्दे द्रष्टव्यं ॥
श्रीमंदिरोपरिदेय तच्चक्रप्रमा
णं यथा । विस्तरेर्धमलंचक्रंत

त्रिभागेनाद्य कारयेत् । द्वाविं
शादङ्गुलं ज्येष्ठं कनिष्ठंतद्दशा
नितः । प्रतिमायाःस्त्रिभागेनका
रयेद्वा सुदर्शनं । लोहजं शैल
जं वापि कारयेच्चित्रपूर्वकं ।
अष्टारं द्वादशारं वामध्ये मू
र्तिसमन्वितं । नारसिंहेन रौ
द्रेण विश्वरूपेण वाधुनः ॥
इत्यादि ॥ अधिवास विधा
नेन चक्रं दंडे ध्वजे तथा ॥
देववत्सकलं कृत्वा मण्डप
स्नपनादिकं । नेत्रोन्मीलनकं
कृत्वापूर्वोक्तं सर्व माचरेत् । अ
धिवासयेत विधिनाशय्यायां
प्राप्य देशिकः । ततः सहस्रशी
र्षेति सूक्तंचक्रेन्यसेद्बुधः । तथा
सौदर्शनं मंत्रं मनस्तत्त्वेनिवेश
येत् ॥ मनोःनुरूपेणास्यैव स
जीवकरणं स्मृतं ॥ प्रातेषुम
तेयोन्यस्याःकेशवाद्याः सुरोत्त
माः ॥ नाभ्यत्तप्रतिनेमीषु न्य
सेत्तत्वानिदेशिकः ॥ नार
सिंहं विश्वरूप मत्तमध्ये निवे
शयेत् । सकलं विन्यसेद्दंडे सू
त्रात्मानं सजीवकं । निष्कलं
परमात्मानं ध्वजेध्यायन्न्यसे
द्धरिं । तच्चक्रांकिता ।

पिनीध्यायेत् ध्वजरूपांचला
ननां । ततो मंडपमध्येतुस्ना
प्यपूज्य यथाविधि । पूर्वोक्ते
नविधानेन होमं कुंडेषु कारये
त् । ततः प्रभातसमये मूर्तिपैः
सहदेशिकः ॥ मूर्तिपःआ
चार्याः । कलसे स्वर्णशाक
लेन्यस्त्वारत्नानिपंचच । स्थाप
येच्चक्रमंत्रेण स्वर्णचक्रमथ
स्ततः । पादेनतत्संस्थाप्यनेत्र
पट्टेनस्थापयेत् ततोनिवेशये
च्चक्रं द्वादशारं सुदर्शनं दुर्नि
रीक्ष्यंस्फुरद्दंष्ट्रमद्भुताग्निस्फुलिं
गकं तन्मध्येचिंतयेद्देवंनृसिं
हं दैत्यानिर्दलं । स्फुरत्सौदा
मिनीजिह्वं ज्वलज्ज्वलनकेश
रं दीप्तार्कनयनं चंद्रकोटिभा
स्वरंदंष्ट्रिणं ॥ तस्यस्तपनी
यस्य सटापकधाननं । सर्वड
ष्टहरंदेवं द्वष्टेभ्यः देवदानवैः ॥
सर्वंवर्णांतरीक्षेनचतुर्दशयुते
नच । विंडमालेकृतेनाष्टोत्तरा
वेनसुतेनच । ततेप्रणातियुक्ते
नस्थापयेद्गुरुहस्तापनं । इतिश्री
हरिभक्तिविलासे १९ विला
सः ॥ चक्रमंत्रो यथा ॐनमो
भगवते सुदर्शनायनिमित्ताय

नसकलविप्रधज्ञाय भगवन्ना
रायणकराम्भोरुहस्पर्शोडले
लिताय । पश्येहित्वं सहस्रारच
क्रराजसुदर्शन यन्मद्भागो प्रसृ
ह्यस्व प्रज्ञांचैव नमोनमः । इ
ति वनस्यैव १५ विलासः ॥
सुदुस्तरं त्रि अतिदुःखेनात्त
रणीयं । यथा । सुदुस्तरामि
मां मन्ये योगचर्या मनात्मनः
यथांजसा पुमान्सिध्येत न
स्मे ब्रूह्यंजसाच्युत । इतिश्रीभा
गवते ११ स्कंधे २९ अध्यायः
सुमंगला स्त्री कामाख्यादे
शीयनदीविशेषः । यथा । नदी
सुमंगलानाम हिमपर्वतनिर्ग
ता । पूर्वस्यां मणिकूटस्य सदा
स्रवति शोभना । मणिकूटं
समारुह्य यस्तां पश्यति वैनदीं
स गंगास्नानजं पुण्यमवाप्य
त्रिदिवं व्रजेत् । इतिकालिका
पुराणे ८१ अध्यायः ॥
सुरथः पुं चैत्रवंशीयचैत्रस्य
नुपुत्रः । स च स्वारोचिसमन्व
न्तरे कोलाध्वंशीयपतिः । ते
नादौ पृथिव्यां दुर्गासुजाकृ
ता । यथा । कोलाविध्वंसिता
सा स्वरोचिषेण महात्मना । राज्ञा
मेधसनिघ्राणा सन्मयांच सरित्त
टे । मेषादिभिश्च महिषैः कूष्मा
ण्डैश्च गंडकैः । छागैर्मीनैश्च कृ
ष्णाख्यैः पक्षिभि र्बलिभिस्तुते ॥
वेदोक्तानि च दत्त्वैव उपचारा
णि षोडश । स्तोत्राच कवचं
ध्यात्वा संजप्य च विधानतः ॥
राज्ञा कृत्वा परीहारं वरं प्राप
यथेप्सितं । मुक्तिं संप्राप वैश्य
श्च संजप्य च सरित्तटे । तत्रै
व राज्ञा वैश्यश्च साश्रुनेत्रः
पुटांजलिः । विससर्ज स
रण्मीं तां गंभीरे निर्मलेजले
स्तन्मयी मृण्मयी देहाजल
धौतौ नराधिपः ॥ रुरोद तत्र
वैश्यश्च ततः स्थानान्तरं ययौ
मत्का देहं च वैश्यश्च पुष्करे दु
ष्करं तपः । कृत्वा जगाम गो
लोकं दुर्गादेवीवरेण च । रा
जा ययौ स्वराज्यं च प्रजेन नि
ष्कंटकेबली । भोगं च बुभुजे भू
पः षष्टिवर्षसहस्रकं भार्यां
स्वराज्ये संन्यस्य पुत्रे सकाल
योगतः । मनु र्बभूव सावर्णि
स्तस्माच पुष्करे तपः । इतिब्र
ह्मवैवर्त्ते प्रकृतिखंडे ५४ अ
ध्यायः । विस्तारस्तु दुर्गा

शुद्धे द्रष्टव्यः ॥
सुरा स्त्री मद्यं । सौत्रामणियज्ञे
पि तत्पाननिषेधो यथा । य
द्घ्राणभक्षो विहितः सुरायास्त
था पशो रालभनं नहिंसा ।
एवंव्यवायः प्रजयानरत्यै इमंवि
शुद्धं नविदुः स्वधर्मं ॥ इति
श्रीभागवते ११ स्कंधे ५ ॥
अध्यायः ॥ यस्मात् सुराया घ्रा
णभक्षः अवघ्राणं स एव विहि
तः नपानं तथा पशोरपि आ
लभनमेव विहितं नतु हिंसा
अतो न यथेष्टभक्षणाभ्यनुज्ञे
त्यर्थः । व्यवायोपिप्रजयानि
मित्तभूतयानतुरत्यै । अतो म
नोरथवादिनइमं विशुद्धं स्व
धर्मं न विदुरिति ॥ इति
तट्टीकायां श्रीधरस्वा
मी ॥
सूतिकागृहं क्ली प्रसवागारं ।
प्रसवात् पूर्वं तत्संस्कार माह
सांख्यायनगृह्ये काकादन्यामे
चकपोतवल्गुहत्याः कोषात
क्याः कालङ्गीतस्य मूलानि
पेषयित्वा उपलेपयेद्देशं य
स्मिन् प्रजायते रक्षसामपह
त्यै इति । काकादमी काक
जंघा मेचकपोतकीकाकमा
चिका । कोषातकी घोषकं ।
कालङ्गीतकः षष्टिमधुके
तिकल्पतरुः । अतएव हरिवंशे
षष्ठमासनुष्ठको यत्नो मातृषे
देव साध्यते । अयत्नो येन
दैवं हि मद्विधैः प्रतिहन्यते ।
मंत्रग्रामैः सुविहितै र्गोपये
श्चैव योजितैः । यत्नैश्चा
नुकूलेन दैवमप्यनुलोम्यते
इत्यनुचरान् प्रतिकेसवाक्यं
इति ज्योतिस्तत्वं ॥
सृंका स्त्री शब्दवती रत्न
मयी माला । यथा । तमब्रवी
त्प्रीयमाणो महात्मा वरं तवे
हाद्य ददामि भूयः । तवैव ना
म्ना भविताय मग्निः सृंकां चेमा
मनेकरूपां गृहाण । इति कठो
पनिषदि प्रथमावल्ली । सृंकां श
ब्दवतीं रत्नमयीं मालां इमा
मनेकरूपां विचित्रां गृहाण स्वी
कुरु । सृंकां वाकुत्सितां
गतिं कर्ममयीं गृहाण । अ
न्यदपि कर्मविज्ञानमनेक
हेतुत्वात् स्वीकुर्विन्त्यर्थः ॥
इत्यादि शांकरभाष्यं ॥
सेवती स्त्री पुष्पविशेषः ॥

सेऽती इतिभाषा। तत्पर्य्या
यगुणाः। शतपत्री तरुण्युक्ता
कर्णिका चारुकेसरा। महाकु
मारी गंधाढ्या लक्षपुष्पाति
मंजुला। शतपत्री हिमा हृद्या
ग्राहिणी शुक्रला लघुः। दोष
त्रयास्रजिद्वर्णा तिक्ता कट्वी
च पाचनी। इतिभावप्रकाशः।
सोमराजी स्त्री षट्चरच्छेदो
विशेषः। यथा। हरे सोमरा
जीसमा ते यशः श्रीर्जगा
मंडलस्य छिन्नत्रोपकारं। इ
तिच्छेदोमंजरी। चंद्रशालीच
सोमरोगः पुं स्त्रीरोगविशे
षः। यथा। अथ सोमरोगा
धिकारः। तत्र सोमरोगस्य
निदानपूर्विकां संप्राप्तिमाह
स्त्रीणामतिप्रसंगेन शोका
च्चापि श्रमादपि। अतिसारक
योगाद्वा गरयोगात्तथैव च।
आपः सर्वशरीरस्थाः क्षुभ्यंति
प्रस्रवंति च। तस्मात्ताः प्रच्यु
ताः स्थानान्मूत्रमार्गं व्रजंति हि
अथ तस्य लक्षणमाह॥
प्रसन्ना विमला शीता निर्गंधा
नीरुजः सिताः। स्रवंति चाति
मात्रं ताः सा न शक्नोति दुर्व्व

ला। वेगं धारयितुं तासां न विंद
ति सुखं क्वचित्। शिरः शिथिल
ता तस्या मुखं तालु च शुष्यति
मूर्च्छा जृंभा प्रलापश्च त्वग्रूक्षा
चातिमात्रतः। भक्ष्यभोज्येषु पे
येषु न तृप्तिं लभते सदा॥
संधारणाच्छरीरस्य ताश्चापः
सोमसंज्ञिताः। ततः सोमक्ष
यात् स्त्रीणां सोमरोग इति
स्मृतः॥ अथ सोमरोगस्य
चिकित्सा। कदलीनां फलं
पक्वं धात्रीफलरसं मधु॥ श
र्करासहितं खादेत् सोमधा
रणमुत्तमं॥१॥ माषचूर्णं स
मधुकं विदारी मधुशर्करा। प
यसा पाययेत् प्रातः सोमधारण
मुत्तमं॥२॥ स एव सहजः
सोमस्तथा मूत्रेण चेन्मुक्तः। त
दैलापत्रचूर्णेन पाययेत् कदली
रसं ३॥ जलेनामलकीबी
जकल्कं समधुशर्करं। पिबेद्दि
नत्रयेणैव श्वेतप्रदरनाशनं॥ ध
तकीदन्ताहारता संप्रवेताग
केशरं। मह्ये तक्रेण संपिष्टं श्वे
तप्रदरनाशनं ५॥
तदेवं मूत्रातीसारस्य लक्षणं चि
कित्सां चाह। सोमरोगे चिरं

जाते यदा मूत्रमतिस्रवेत्।
मूत्रातिसारं तं प्राहुर्बलविध्वंस
नं परं। तालकंदं च खर्जूरं म
धुकं च विदारिकां। सितासम
युक्तं खादेत् मूत्रातीसार
नाशनं १ चक्रमर्दकमूलेन
सपिष्टं तंडुलांबुना॥
प्रभातसमये पीतं जलप्रदर
नाशनं २ इति सोमरोगे मूत्रा
तिसाराधिकारः॥ इतिभा
वप्रकाशः॥
सोमवारव्रतं क्लीं प्रतिसोम
वारोपवासपूर्वकसायंकाल
कर्त्तव्यशिवदुर्गापूजारूपव्रत
विशेषः। तद्विवरणं यथा। सो
मवारे विशेषेण प्रदोषादिगु
णे युते। केवले वापि ये कु
र्युः सोमवारे शिवार्च्चनं॥
न तेषां विद्यते किंचिदिहा
मुत्र च दुर्लभं। उपोषितः शु
चिर्भूत्वा सोमवारे जितेंद्रियः
वैदिकैर्लौकिकैर्वापि विधि
वत् पूजयेच्छिवं। ब्रह्मचारी
गृहस्थो वा कन्या वापि सभर्तृ
का॥ विभर्तृका वा संपूज्य ल
भते वरमीप्सितं॥ तत्राहं क
थयिष्यामि कथां श्रोत्रमनो

रमां। श्रुत्वा श्रुतिप्रियः शंभो
र्भक्तिं कुर्वंतु निश्चलां। आर्य्याव
र्त्तनृपः कश्चिदासीद्धर्मभृतां वरः
चित्रवर्म्मेति विख्यातो यमराजो
दुरात्मनां॥ सोत्रकूलः सप
त्नीषु पुत्रमेकं न लब्धवान्। चि
रेण प्रार्थितो लेभे कन्यामे
कां मनोहरां॥ स एकदा ज्ञा
तकलज्ञाणज्ञानरूप्य सर्व्वान्
द्विमुख्यवर्गान्। कृतहेलेना
पि निविष्टचेताः पप्रच्छ तस्याज
नने विचारं॥ अथ तं प्राववद
त् कोपि वृद्धो द्विजसत्तमः
एषा सीमंतिनी मान्या कन्या
तव महीपते। अथान्योपि
द्विजः प्राह प्रेष्यवानविशे
षतः। पञ्चाचतुर्दशे वर्षे वै
धव्यं प्रतिपत्स्यति। इत्या
कर्ण्य वचस्तस्य वज्रनिर्घातनि
ष्ठुरं। मुहूर्त्तमभवद्राजा चिंता
व्याकुलमानसः। सापि सीमंति
नी बाला क्रमेणागतशैशवा वै
धव्यमात्मनो भावि सा शुश्राव स
खीमुखात्। परं निर्वेदमापन्ना
तदाकर्ण्य सुचिंतिता। याज्ञ
वल्क्यमुनेः पत्नीं मैत्रेयीं पर्य्यपृच्छ
त। मातस्त्वच्चरणांभोजे प्रपन्ना

भयाकुला सौभाग्यवर्द्धनं कर्म
मम संश्रित मर्हसि ॥
इतिप्रपन्नां नृपतेःकन्यामाहमु
नेः सती । शृणुष्व व्रत तन्वंगि
पार्व्वती शिवसंयुतं । सोमवारे
शिवं गौरीं पूजयस्व समाहि
ता उपोषिता वा स्नात्वा तावि
रजोंवरधारिणी यतवाङ्नि
श्चलमतिः पूजां कृत्वा यथोचि
तं । ब्राह्मणान् भोजयित्वाच
शिवेशमर्चक प्रसादय । पापक्ष
योऽभिषेकेण साम्राज्यं पीठ
पूजनात् । सौभाग्यमखिले
सौख्यं गंधमाल्याक्षतार्चना
त् । धूपदानेन सौगंध्यं कांतिर्दी
पप्रदानतः । नैवेद्येन महाभो
गो लक्ष्मीस्तांबूलदानतः ॥
धर्म्मार्थकाममोक्षाणां नमस्का
रः प्रसाधनं । अष्टैश्वर्य्यादि सि
द्धीनां जप एवाहि साधनं । हो
मेन सर्व्वकामानां समृद्धिरपि
जायते । सर्व्वेषामेव देवानां तुष्टि
र्ब्राह्मणभोजनात् । इत्थमारा
धयन्शिवे सोमवारे शिवामपि
प्राप्ता विपाकं दुरितक्षये वी
न विहन्यसे । घोरान्तरं प्रप
न्नापि महाक्लेशभयानकं ॥

शिवपूजाप्रभावेण तरिष्यसि
महद्भयं ॥ इत्थं सीमंतिनी स
म्यक् तन्निशम्य सतीमुखात्
ययौसापि वरारोहा राजपत्नी
तथापि च । इत्यादि स्कंदपु
राणे ब्रह्मोत्तरखण्डे सोमवा
रव्रतमाहात्म्ये ८ अध्यायः ।
सोमसिद्धान्तः पुं कापालिक
वेशधारी । यथा । ततः प्रवि
शति कापालिकवेशधारी ख
ड्गहस्तः सोमसिद्धान्तः । इति
श्रीकृष्णमिश्रकृते प्रबोधचं
द्रोदयनाटके ३ अंकः । सोम
सिद्धांत इति उमया सहवर्त्तमा
नः सोमो महादेव स्तदुपासित
सिद्धांत आगमशास्त्रे । इति
श्रीयुतहरिहरतर्कालंकार
तनूजश्रीरुद्रदेवनिर्म्मिततट्टी
का ॥ सौभाग्यवर्त्तीया स्त्रीभा
इन्दुकान्तीया । सा च मन्वंत
रा । इतिस्मृतिः ॥
स्कंदषष्ठी स्त्री चैत्रमासीयशु
क्लषष्ठी । तत्प्रमाणादि षष्ठी
शब्दे द्रष्टव्यं । अन्यच्च । अमावा
स्यायुतपञ्चः स्कंदःषष्ठीकृता
ग्रहणात् । ततःषष्ठ्यां तु शुक्ला
यां मासेऽस्तु चैत्रनामनि । सेनो

पत्येऽभिषिक्तस्तु देवानां ब्रह्म
णास्वयं । इति संवत्सरे कौमु
दीधृतब्रह्मपुराणवचनं ॥
स्कान्दं क्ली स्कंदपुराणं । यथा
वाराहंच तथा स्कान्दं वामनं
कौर्म्मसंज्ञकं । इत्यादि नारदीय
पुराणे । अस्य विवरणं परिशि
ष्टपुराणशब्दे द्रष्टव्यं ॥
स्तिमितः त्रि अचंचलः आर्द्रः
यथा स्तिमितोऽचंचलार्द्रयोः
इति मेदिनी । एवं यस्य चेच
लार्थो अमालिखितः ॥
स्तेनः पुं चोरः । तद्वैदिकप
र्य्यायाः । तृपुः १ तक्वा २ रि
भ्वा ३ रिपुः ४ रिक्वा ५ विहायाः
६ तायुः ७ तस्करः ८ वनर्गुः ९
हुरश्चित् १० मुषीवान् ११ मलि
म्लुचः १२ अघशंसः १३ वृकः १४
इति चतुर्द्दश वेदस्तेननामानि ।
इति वेदनिघण्टौ ३ अध्यायः ।
देवायानिदेवयज्ञादिभोक्ता ॥
यथा । इष्टान्भोगान् हि वो
देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्ते
न एव सः ॥ इति श्रीभ
गवद्गीतायां ३ अध्यायः १२
श्लोकः ॥

स्तोता त्रि स्तवकर्त्ता । तद्वैदिक
पर्य्यायाः । रेभः १ जरिता २
कारुः ३ नदः ४ स्तामुः ५
कीरिः ६ गौः ७ सूरिः ८ नादः
९ छंदः १० स्तुप् ११ रुद्रः १२
कृपण्युः १३ इति त्रयोदश स्तो
तृनामानि । इति वेदनिघण्टौ
३ अध्यायः ॥
स्तोभः पुं सामावयवविशेषः
सतु गीतालापपूरणाक्षरः ॥
सच त्रयोदशविधो यथा । अ
यं वा व लोको हाउकारः १ वा
युर्हाइकारः २ चन्द्रमा अथ
कारः ३ आत्मेहकारः ४ अग्नि
रीकारः ५ आदित्य ऊकारः ६
निहव एकारः ७ विश्वेदेवा औ
होइकारः ८ प्रजापतिर्हिंकारः
९ । प्राणः स्वरो १० अन्नंया
११ वाग्विराट् निरुक्त १२ त्र
योदशस्तोभः संचरो हुंका
रः १३ दुग्धेऽस्मैवाग्दोहं योवा
चो दोहोऽन्नवानन्नादो भव
ति य एता मेवं साम्नामुप
निषदं वेदोपनिषदं वेद
इति छान्दोग्योपनिषद्ब्राह्म
णे प्रथमप्रपाठकः समाप्तः ॥
अस्य भाष्यं । भक्तिविषयोपा

सनेस्सामावयवसंबंधमित्यतःसा
मावयवांतरस्तोभाक्षरविषया
एयुपासनांतराणिसंहतान्युपदि
श्यंते अनंतरं सामावयवसंबंध
त्वाविशेषादयंवावायमेव लो
को हाउकारः स्तोभो रथंतरे
साम्निप्रसिद्धः इयं वै रथंतर
मित्यस्मात् सवर्णसामान्या
हाउकारः स्तोभोऽयंलोक
इत्येव मुपासीत । १ वायु र्हा
इकारो वामदेव्येसामनि हा
इकारःप्रसिद्धो वायुपसंबं
धश्चवामदेव्यस्यसाम्नोयोनि
रित्यस्मात् सामान्याद्धाइकार
वायुदृष्ट्योपासीत २ । चंद्रमा
अथकारःचंद्रदृष्ट्या अथकार
मुपासीत अन्नेहीदं स्थितमन्ना
त्माचंद्रः थकारोकारसामान्या
च ३ । आत्मा इहकार इहेति
स्तोभः प्रत्यक्षो ह्यात्मा इहेति
व्यपदिश्यते इहेति च स्तोभः
४ तत्सामान्यादग्निरीकार
श्रुति । ३ निधनानिचाग्ने
यानि सर्वाणि सामानीत्य
तः ५ तत्सामान्यादादित्य
ऊकारः उच्चै रूर्द्धं सन्ने आदि
त्यमायमुकारस्थाये स्तोभ

आदित्यदैवत्ये साम्नि स्तोभर
त्वादित्य ऊकारः ६ निहव इत्या
ह्वान मेकारस्तोभः एहीति
चाह्वयंतीति ७ । तत्सामान्या
द्विश्वेदेवा औहोइकारो वैश्वदेव्ये
साम्नि स्तोभस्य दर्शनात् ८
प्रजापतिर्हिंकारः अनिरुक्तो हिं
कारस्य चाव्यक्तत्वात् ९
प्राणः स्वरः स्वर इति स्तोभः
प्राणस्य च स्वरहेतुत्वसामा
न्यात् । १० अन्नं याया इति स्तो
भोऽन्नं अन्नेन हीदं यातीत्य
तः ११ तत्सामान्यात् वागि
ति स्तोभो विराडन्नं देवतावि
शेषो वा वैराजे साम्नि स्तोभद
र्शनात् अनिरुक्तोऽव्यक्तत्वात्
इदं चेदं चेति निर्वक्तुमशक्य
तश्यतः १२ । संचरो विकल्प्य
मानस्वरूपत्वात् कोऽसावि
त्याह हुंकारः अव्यक्तो ह्ययमतो
ऽनिरुक्तविशेष एवोपास्य इ
त्यभिप्रायः १३ ॥ स्तोभाक्ष
रोपासनाफलमाह । दुग्धेऽस्मै
वाग्दोहं भिन्नाद्युक्तार्थं यएता
मेवं यथोक्तलक्षणं साम्नां सा
मावयवस्तोभाक्षरविषयामुप
निषदं दर्शनं वेदेतस्यैतत् य

थोक्तं फलमित्यर्थः । द्विरभ्या
सोऽध्यायपरिसमाप्त्यर्थः सा
मावयवविषयोपासनाशेषः प
रिसमाप्यत इति । इति श्री
मत्गोविंदभगवत्पूज्यपाद
शिष्यस्य परमहंसपरिव्राज
काचार्य्यस्य श्रीमत्शंकरभग
वत्पादस्य कृतौ छान्दोग्योप
निषद्विवरणे प्रथमः प्रपाठकः
समाप्तः ॥
स्त्रीगुरुः पु दीक्षाकर्त्री । मं
त्रमात्रोपदेष्ट्री । तल्लक्षणं यथा
साध्वी चैव सदाचारा गुरुभक्ता
जितेन्द्रिया । सर्वमंत्रार्थतत्त्वज्ञा
सुशीला पूजने रता ॥ सर्व
लक्षणसंपन्ना जपिका पद्मलो
चना रत्नालंकारसंयुक्ता वर्णा
भरणभूषिता । शान्ता कुली
नाकुलजा चन्द्रास्या सर्ववृद्धि
गा । अनन्तगुणसंपन्ना रुद्रत्व
दायिनी प्रिया । गुरुरूपा शक्ति
दात्री शिवज्ञाननिरूपिणी गुरु
योग्या भवेत् सा हि विधवा परि
वर्जिता ॥ स्त्रियोदीक्षा शुभा
प्रोक्ता मातुश्चाष्टगुणा स्मृता
पुत्रिणी विधवा ग्राह्या के
वलानन्दकारिणी ॥

सिद्धमंत्रं यदि तदा शृङ्गीयाद्विप
वासुरे । केवलं सफलं तत्र मा
तुरष्टगुणं स्मृतं ॥ स्वयं वास्व
प्नविलये ददाति यदि मन्त्रं
तेनाष्टगुणमाप्नोति यदि सा
पुत्रिणी सती । यदि माता स्त्री
यमंत्रं ददाति तज्जायते च । त
दाष्टसिद्धिमाप्नोति भक्तिमार्गे
न संशयः । न देवदुर्लभं देवयद्
मात्रा प्रदीयते । आदौ भक्तिं त
तो मुक्तिं संप्राप्य कामरूपवं
क । सहस्रकोटिविद्यार्थे जा
नाति नात्र संशयः । स्वप्ने वा य
दि वा माता ददाति च स्वमन्त्रके
पुत्रं दीक्षा साधिका त्वा दानव
त्वमवाप्नुयात् । यदि भाग्यव
शेनैव जानती च्छानुवर्त्तिनी
तदा सिद्धि मवाप्नोति तत्र मे
दं विचारयेत् । स्त्रीयमंत्रोपदे
शेन न कुर्य्याद्गुरुचिंतनं ॥
इति स्त्रीगुरुकथनं । इति रु
द्रयामले उत्तरखंडे २ पटलः
पर्वखंडे १५ पटलश्च ॥ त
त्त्वाने गुप्तसाधनतंत्रे १ पटले
तत्पूजने बृहन्नीलतंत्रे २ पट
ले तत्स्तोत्रे कवचे च मातृका
भेदतंत्रे ७ पटले द्रष्टव्यं ॥

तद्गीताच कंकालमालिनीतंत्रे
२ पटले वेदितव्या ॥
स्थले क्ली वस्त्रगृहे । यथा ।
पटवासः पटमयं दूष्यं वस्त्रगृहे
स्थले । इति त्रिकांडशेषः ॥
स्थितप्रज्ञः त्रि मनोगतसर्व
वासनारहितः । यथा । प्रजहा
ति यदा कामान् सर्वान् पार्थ
मनोगतान् । आत्मन्येवात्मना
तुष्टः स्थितप्रज्ञस्तदोच्यते । दुः
खेष्वनुद्विग्नमनाः सुखेषु विगत
स्पृहः वीतरागभयक्रोधः स्थि
तधीर्मुनिरुच्यते । इति श्रीभ
गवद्गीतायां २ अध्यायः ५५
५६ श्लोकौ ॥
स्नानयात्रा स्त्री ज्यैष्ठपौर्णमा
स्यां श्रीविष्णोः महास्नानरूपो
त्सवः । यथा ब्रह्मपुराणे ॥
मासि ज्यैष्ठे तु संप्राप्ते नक्षत्रे शा
क्रदैवते पौर्णमास्यां तदा स्ना
ने सर्वपापं हरेद्द्विजाः ॥ त
स्मिन् काले तु ये मर्त्याः पश्यं
ति पुरुषोत्तमं । बलभद्रं सु
भद्रांच ते यांति पदमव्ययं ॥
स्कंदपुराणे विष्णुधर्मोत्तरयोः
ज्यैष्ठ्यां महेश्चावतीर्णोस्मि तत्पु
ण्ये जन्मवासरे ॥ तस्यामे
स्नपनं कुर्य्यान्महास्नानावि
धानतः ज्यैष्ठ्यां प्रातः स्नान
काले ब्रह्मणा सहितेन च मां ।
रामं सुभद्रां संस्नाप्य मम
लोकमवाप्नुयात् ॥ इति
तिथ्यादितत्त्वं । अन्यत् यात्रा
शब्दे द्रष्टव्यं ॥
स्वपितिकर्म्मन् पुं शयनकर्त्ता
तेह्वेदिकपर्य्यायः । स्वपिति १
स्वप्ति २ इति द्वौ स्वपितिक
र्म्माणौ इति वेदनिघण्टौ ३
अध्यायः ॥
स्वेदः पुं घर्म्मः । इत्यमरः ॥
उष्मा । तापः । तस्य भावप्रका
शोक्तविधिः एवं लिखितः । च
रकमते अधुना लिख्यते । अथा
तः स्वेदाध्यायं व्याख्यास्यामः
इति ह स्माह भगवानात्रेयः ।
अथ स्वेदान् प्रवक्ष्यामि ये
यथावत् प्रयोजिताः । स्वेदसा
ध्याः प्रशाम्यंति गदा वातक
फात्मकाः । स्नेहपूर्वंप्रयुक्तेन
स्वेदनावजितेऽनिले । पुरीष
मूत्ररेतांसि न सज्जंति कदाच
न । शुष्काण्यपि च काष्ठानि
स्नेहस्वेदोपपादनैः ॥
नमयंति यथान्यायं किं पुन

र्जीवतो नरान् । रोगर्त्तुव्याधि
तापेक्षो नात्युष्णोतिमृदुर्नच ।
द्रव्यवान् कल्पितो देशे स्वेदः का
र्य्यकरो मतः । व्याधौ शीते श
रीरे च महान् स्वेदो महाबले ।
दुर्बले दुर्बलः स्वेदो मध्यमे म
ध्यमो हितः ॥ वातश्लेष्मणि
वाते वा कफे वा स्वेद इष्यते ।
स्निग्धरूक्षस्तथा स्निग्धो रू
क्षश्चाप्युपकल्पितः । आमाश
यगते वाते कफे पक्वाशयाश्रि
ते । रूक्षपूर्वो हितः स्वेदः स्नेह
पूर्वस्तथैव च । वृषणौ हृदयं
दृष्टी स्वेदयेन्मृदु वा न वा ॥
मध्यमं वंक्षणौ शेषमंगावयव
मिष्टतः । सुशुद्धैर्नक्तकैः पिंडा
गोधूमानामथापि वा । पद्मोत्
पलपलाशैर्वा स्वेद्यः संवृत्य च
क्षुषी । मुक्तावलीभिः शीता
भिः शीतलैर्भाजनैरपि । ज
लार्द्रैर्जलजैर्हस्तैः स्विद्यतो हृद
यं स्पृशेत् । शीतशूलव्युपरमे
स्तंभगौरवनिग्रहे । संजाते
मार्द्दवे स्वेदे स्वेदनाद्विरतिर्मता ।
पिपासा मांससदने मूर्च्छापित्त
प्रकोपनं । दाहः स्वेदांगदौ
र्बल्यमतिस्विन्नस्य लक्षणं ॥
उक्तस्तस्याशितीये यो ग्रैष्मि
कः सर्वशो विधिः । सोतिस्वि
न्नस्य कर्त्तव्यो मधुरः स्निग्धशी
तलः । अशितीये अशनाध्या
ये ॥ कषायमद्यनित्यानां गर्भि
ण्या रक्तपित्तिनां । पित्तिनां
सातिसाराणां रूक्षाणां मधुमे
हिनां । विदग्धभ्रष्टब्रध्नानां
विषमद्यविकारिणां । श्रांता
नां नष्टसंज्ञानां स्थूलानां पित्त
मेहिनां । तृष्यतां क्षुधितानां
क्रुद्धानां शोचतामपि ॥ काम
ल्युदरिणांचैव क्षतानामाढ्य
रोगिणां । दुर्बलातिविशुष्का
णामुपक्षीणौजसां तथा । भि
षक्तैमिरिकाणांच न स्वेद
मवतारयेत् ॥ प्रतिश्यायेच
कासेच हिक्काश्वासेष्वलाघवे
कर्णमन्याशिरःशूले स्वरभे
दे गलग्रहे । अर्द्दितैकांगसर्वां
गपक्षाघाते विनामके । कोष्ठा
नाहविबंधेषु शुक्राघाते विजृं
भके । पार्श्वपृष्ठकटीकुक्षिसंग्र
हे गृध्रसीषु च । मूत्रकृच्छ्रे महत्त्वे
च मुष्कयोरंगमर्द्दके । पादजानू
रुजंघार्त्तिसंग्रहे श्वयथावपि ।

खल्लीष्वामेच प्रीते चवेपथौ
वातकंटके ॥ संकोचायाम
शूलेषु स्तम्भगौरवसुप्तिषु स
र्वाङ्गेषु विकारेषु स्वेदनं हित
मुच्यते ॥ तिलमाषकुलत्था
म्लघृततैलामिषौदनैः । पायसैः
कृशरैर्मांसैः पिण्डस्वेदान् प्रयो
जयेत् गोखरास्व वराहोष्ट्र
शकृद्भिः सतुषैर्यवैः । सिक
ता पांशुपाषाण करीषायस
पुटकैः ॥ श्लैष्मिकान् स्वेदये
त् पूर्वैर्घृतिकान् समुपाचरे
त् । द्रव्याण्येतानि शस्यन्ते य
थास्वं प्रस्तरेष्वपि । भूशयेषु
च जेन्ताकेषूष्मगर्भगृहेषु च
विधूमाङ्गारतप्तेष्वभ्यक्तः स्वि
द्यति ना सुखं । ग्राम्यानूपौदकं
मांसं पयोवस्तशिरस्तथा । व
राहमध्य पित्तासृक् स्नेहव
त्तिलतण्डुलाः । इत्येतानि समु
त्क्वाथ्य नाडीस्वेदे प्रयोजयेत्
देशकालविभागज्ञो युक्त्यपे
क्षी भिषक्तमः । वारुणामृत
कैरण्ड शिग्रुमूलक सर्षपैः । वा
सावंश करञ्जार्कपत्रैरश्मन्तक
स्य च शोभाञ्जनक शैरीषमा
लती सुरसार्जकैः । पत्रैरुत्

क्वाथ्यसलिले नाडीस्वेदं प्रयो
जयेत् ॥ भूतीक पञ्चमूलाभ्यां
सुरया दधिमस्तुना ॥ मूत्रै
रम्लैश्च सस्नेहैर्नाडीस्वेदं प्रयो
जयेत् ॥ पत्रपल्लवनिर्यूहाः
प्रयोज्या जलकोष्ठके । स्वेद
नार्थे घृतक्षीरतैलकोष्ठांश्च
कारयेत् । गोधूमशकलैश्चूर्णै
र्यवानां साम्लसंयुतैः । सस्ने
ह किण्व लवणैरुपनाहः प्र
शस्यते । गन्धैः सुराया किण्वेन
जीवन्त्या शतपुष्पया । उमया
कुष्ठतैलाभ्यां युक्तया चोपना
हयेत् ॥ चर्मभिश्चोपनद्धव्यः
सलोमभिरपूतिभिः ॥ उष्ण
वीर्यैरलाभेत्तु कौशेयाविकशा
टकैः । रात्रौ बद्धं दिवा मुञ्चेत् मु
ञ्चेद्रात्रौ दिवाकृतं । विदाह
परिहारार्थं स्यात् प्रकर्षस्तु शी
तले ॥ संकरः १ प्रस्तरो २
नाडी ३ परिषेको ४ ऽवगाहनं
५ जेन्ताको ६ ऽश्मघनः ७ क
र्षूः ८ कुटी ९ भूः १० कुम्भी
च ११ ॥ कूपो १२ होलाक १३
इत्येते स्वेदयन्ति त्रयोदश । तेषां
यावत् प्रवक्ष्यन्ते सर्वेषामनुपू
र्वशः । इति ॥ तत्र वस्त्रान्त

रितैरवस्त्रान्तरितैर्वा पिण्डैर्य
थोक्तैरुपस्वेदनं संकरस्वेद इ
ति विद्यात् १ शूकशमीधान्यपु
लाकानां वेशवार पायसकृशरो
त्कारिकादीनां वा प्रस्तरे कौ
षेयाविकोत्तरप्रच्छदे पञ्चाङ्गुलो
रुबुकार्कपत्रप्रच्छदे वा स्वभ्य
क्तसर्वगात्रस्य शयानस्योपरि
स्वेदनं प्रस्तरस्वेद इति विद्यात्
२ ॥ स्वेदनद्रव्याणां पुनर्मूल
फलपत्रभङ्गादीनां मृगशकु
नि पिशितशिरः पदादीनामु
ष्णस्वभावानां वा यथार्हमम्ल
लवणस्नेहोपसंहितानां मूत्र
क्षीरादीनां वा कुम्भ्यां वाष्पमनु
द्वमन्त्यां उत्क्वथितानां नाड्या
शरेषीका वंशदल करञ्जार्क
पत्रान्यतमकृतया गजाग्रहस्त
संस्थानया व्याममदीर्घया व्यामा
र्द्धदीर्घया वा व्याम चतुर्भागाष्टभा
गमूलाग्रपरिणाहस्रोतसा सर्व
तो वातहरपत्रसंवृतच्छिद्रया द्विस्त्रि
र्वा विनामितया वातहरसिद्धस्ने
हाभ्यक्तगात्रस्य वाष्पमुपहरेत्
वाष्पो ह्यनूर्द्ध्वगामी विहतचण्ड
वेगस्त्वचमविदहन् सुखं स्वे
दयतीति नाडीस्वेदः ॥ ३

वातिकोत्तरवातिकानां पुनर्मू
लादीनामुत्क्वाथैः सुखोष्णैः
कुम्भीर्वर्षुनिकाः प्रनाडीर्वा पू
रयित्वा यथार्हसिद्धस्नेहाभ्यक्त
गात्रं वस्त्रावच्छन्नं परिषेचयेदि
ति परिषेकः । ४ । वातहरोत्
क्वाथक्षीरघृततैलपिशित
रसोष्णसलिलकोष्ठकावगाह
स्तु यथोक्त एवावगाहः ५ अथ
जेन्ताकं चिकीर्षुर्भूमिं परी
क्षेत । तत्र पूर्वस्यां दिशि उत्तर
स्यां वा गुणवति प्रशस्ते भूमिभागे
कृष्णमधुरमृत्तिके सुवर्णवर्णमृत्ति
के वा परीवापपुष्करिण्यादी
नां जलाशयानामन्यतमस्य कू
ले दक्षिणे पश्चिमे वा सूप
तीर्थे समसुविभक्तभूमिभागे
सप्ताष्टौ वा अरत्नीः सूपक्र
म्योदकात् प्राङ्मुखमुदङ्मुखं
वाभिमुखतीर्थं कूटागारं का
रयेत् । उत्सेधविस्तारतः परम
रत्नीः षोडश समन्तात् सुवृत्तं
मृत्कर्मसम्पन्नमनेकवातायनं
अस्य कूटागारस्यान्तः समन्त
तो भित्तिमरत्निविस्तारोत्से
धां पिण्डिकां कारयेत् आक
पाटात् । मध्ये चास्य कूटागार

स्य चतुष्किष्कुमात्रं पुरुषप्रमा
णं मृण्मयं कंडुसंस्थानं बहु
सूक्ष्मच्छिद्रमंगारकोष्टकस्तंभं
सपिधानं कारयेत् तंच खादिरा
णामाश्वकर्णादीनां वा काष्टानां
पूरयित्वा प्रदीपयेत् । स यदा जा
नीयात्साधु दग्धानि गतधूमा
नि अवतप्तंच केवलमग्निना
तदग्निगृहं स्वेदयोग्येन चोष्म
णा युक्त मिति तत्रैनं पुरुषं वा
तहराभ्यक्तगात्रं वस्त्रावच्छन्नं
प्रवेशयेत् । प्रवेशयं श्चैनम
नुशिष्यात् । सौम्य प्रविश क
ल्याणायारोग्याय चेति । प्रवि
श्य चैनां पिंडिका मधिरुह्य पा
र्श्वापरपार्श्वाभ्यां यथासुखं श
यीथाः । न च त्वया स्वेदमूर्च्छा
परीतेनापि सता पिंडिकैषा वि
मोक्तव्या आप्राणोच्छ्वासात्
भ्रश्यमानो ह्यतः पिंडिकाव
काशात् द्वारमनधिगच्छन् स्वे
दमूर्च्छापरीततया सद्यः प्राणा
न् जह्याः तस्मात् पिंडिकामेनां
न कथंचन मुंचेथाः । त्वं यदा
जानीयाः विगताभिष्यंद मा
त्मानं सम्यक् प्रस्रुतस्वेदपिच्छं
सर्वस्रोतोविमुक्तं लघुभूतमप

गतविबंधस्तंभ सुप्ति वेदनागौ
रवमिति ततस्तां पिंडिकाम
नुसरन् द्वारं प्रपद्येथा निष्क्र
म्य च न सहसा चक्षुषोः परि
पालनार्थं शीतोदकमुपस्पृ
शेथाः । अपगतसंतापक्लम
स्तु मुहूर्तात् सुखोष्णेन वा
रिणा यथान्यायं परिषिक्तोऽ
श्नीयाः । इति जेंताकः स्वेदः । ५
शयानस्य प्रमाणेन घनामश्म
मयीं शिलां । तापयित्वा मारुत
घ्नै र्दारुभिः संप्रदीपितैः ॥ व्य
पोह्य सर्वानंगारान् प्रोक्ष्य चै
वोष्णवारिणा । तां शिलामथ
कुर्वीत कौशेयाविकसंस्तरां ॥
तस्यां स्वभ्यक्तसर्वांगः शयानः
स्विद्यते सुखं । कौरवाजिनकौ
शेय प्रावाराद्यैः सुसंवृतः । इ
त्युक्तोऽश्मघनस्वेदः कर्षूस्वेदः
प्रवक्ष्यते ॥ ७ । खानयेच्छ
यनस्याधः कर्षूं स्थानविभागवि
त् । दीप्तै रधूमै रंगारै स्तां कर्षूं
पूरयेत्ततः ॥ तस्या मुपरि श
य्यायां स्वपन् स्विद्यति ना सुखं
८ अनत्युत्सेधविस्तारां वृत्ता
कारामलोचनां । घनभित्तिं
कुटीं कृत्वा कुष्ठाद्यैः संप्रलेप

येत् । कुटीमध्ये भिषक् शय्यां
स्वास्तीर्णां सोपकल्पयेत् । प्रावा
राजिन कौशेय कुथ कंबल गोल
कैः । हसंतिकाभि रंगारैः पूर्णाभि
स्ताच सर्वशः ॥ परिवार्यांतरा
रोहेदभ्यक्तः स्विद्यति ना सुखं स
य एवाश्मघनस्वेदविधिर्भूसो
सपवत् ॥ ९ ॥ प्रशस्तायां
निवातायां समायामुपदिश्य
ते । कुंभीं वातहरक्वाथपूर्णां
भूमौ निखातयेत् । अर्द्धभागं त्रि
भागं वा शयनं तत्र चोपरि ।
स्थापयेदासनं वापि नातिसांद्र
परिच्छदं ॥ अथ कुंभ्यां सुसं
तप्तान् प्रक्षिपेदयसो गुडान्
पाषाणान् वोष्मणा तेन तत्
स्थः स्विद्यति ना सुखं ॥ १०
सुसंवृतांगः स्वभ्यक्तः स्नेहै र
निलनाशनैः । कूपं शयनवि
स्तारं द्विगुणं चापि वेधतः ॥
देशे निवाते शस्ते च कुर्यादंतः
सुमार्जिते । हस्त्यश्व गोखरो
ष्ट्राणां करीषै र्दग्धपूरिते ॥
स्ववच्छन्नः सुसंस्तीर्णेऽभ्यक्तः
स्विद्यति ना सुखं ११ । धीती
कां तु करीषाणां यथाकालं
प्रदीपयेत् । धीतीका गर्भिकां

शयनांतःप्रमाणेन शय्यामुप
रि तत्र च । सुदग्धायां विधूमा
यां यथोक्तामुपकल्पयेत् स्वव
च्छन्नः सुखं तत्राभ्यक्तः स्विद्यति
ना सुखं । होलाकस्वेद इत्येष सु
खप्रोक्तो महर्षिणा १२ । इति
त्रयोदशविधः स्वेदोऽग्निगुण
संश्रयः ॥ व्यायाम उष्णसद
नं गुरुप्रावरणं क्षुधा । बहुपा
नं भयक्रोधावुपनाहाहवातपाः
स्वेदयंति दशैतानि नरमग्निगु
णाद्दते । इत्युक्तो द्विविधः स्वे
दः संयुक्तोऽग्निगुणैर्नच । ए
कांगसर्वांगगतः स्निग्धो रू
क्षस्तथैव च । इत्येतत् द्विविधं
द्वंद्वं स्वेदमुद्दिश्य कीर्तितं ॥
स्निग्धस्वेदै रुपक्रम्यः स्विन्नः
पथ्याशनो भवेत् । तदहः स्वि
न्नगात्रस्तु व्यायामं वर्जयेन्नरः इति
तत्र श्लोकाः । स्वेदो यथाकार्य
करो हितो येभ्यश्च यद्विधः ।
यत्र देशे यथा योग्यो देशो र
क्ष्यश्च यो यथा । स्विन्नातिस्वि
न्नरूपाणि तथातिस्विन्नभेषजं
अस्वेद्याः स्वेदयोग्याश्च स्वेदद्र
व्याणि कल्पना । त्रयोदशवि
धः स्वेदो विना दशविधोऽ

ग्निना। संग्रहेणैव षट् स्वेदाः स्वेदाध्याये निदर्शिताः॥ स्वेदाधिकारे यद्वाच्यमुक्तमेतन्महर्षिणा। शिष्योक्तप्रतिपत्त्यर्थमुपदेशः पुनर्वक्ष्य इति। इति चरकीय स्वेदाध्यायः समाप्तः॥

ह

ह हकारः। अस्य लेखनप्रकारो यथा॥ ऊर्द्धादाकुञ्चिता मध्ये कुण्डलीत्वं गता त्वधः॥ ऊर्द्धं गता पुनः सैव तासु ब्रह्मादयः क्रमात्॥ मात्रा च पार्वती ज्ञेया ध्यानमस्य प्रचक्ष्यते। करीषभूषिताङ्गीं च साट्टहासां दिगम्बरीं। अस्थिमाल्यामष्टभुजां वरदां मुण्डमालिनीं। नागेन्द्रहारभूषाढ्यां जटामुकुटमण्डितां॥ सर्वसिद्धिप्रदां नित्यां धर्मकामार्थमोक्षदां। एवं ध्यात्वा हकारन्तु तन्मन्त्रं दशधा जपेत्॥ इति वर्णोद्धारतन्त्रं॥ अस्य नामानि यथा। हकारो नकुलीशोऽपि हंसः प्राणोऽङ्कुशः शिवे। महेशो नकुलीचैव वराहो गगनेश्वरः॥ लिंगं शून्यो महाशून्यः प्राणश्च परमेश्वरि। इति श्रीरुद्रयामले ८ पटलमन्त्राभिधाने॥

हदनं क्ली विष्ठात्यागः। हागा इति भाषा। यथा। विट्स्रजि हदने। इति गृधातुटीकायां दुर्गादासः॥ हदधात्वर्थोऽप्यत्र॥

हद्दा स्त्री मेषादिलग्नानां त्रिंशांशाः। तेषु एषु द्वादशलग्नेषु पञ्चानां पञ्चानां ग्रहाणां संख्याविशेषेण भागविशेषो भवति। नराणां वर्षप्रवेशादौ शुभाशुभगणनायामस्य प्रयोजनं। तद्भागविशेषो यथा। मेषलग्ने प्रथमे वृहस्पतेः ६ भागाः। ततः शुक्रस्य ६ अंशाः ततो बुधस्य ८ भागाः। ततो मंगलस्य ५ भागाः। ततः शनेरपि ५ अंशाः। समुदायेन त्रिंशदंशाः भवन्ति॥

वृषलग्ने प्रथमे शुक्रस्य ८ भागाः। ततो बुधस्य ६ अंशाः। गुरोः ८ भागाः शनेः ५ अंशाः।

मंगलस्य ३ अंशाः।

मिथुनलग्ने प्रथमे ६ भागाः बुधस्य। ततः शुक्रस्य ६ भागाः। वृहस्पतेः ५ अंशाः। मंगलस्य ७ अंशाः। शनेः ६ अंशाः॥

कर्कटलग्ने प्रथमे मंगलस्य ७ अंशाः। ततः शुक्रस्य ६ भागाः बुधस्यापि ६ भागाः। वृहस्पतेः ७ अंशाः। शनेः ४ अंशाः॥

सिंहलग्ने प्रथमे ६ भागाः वृहस्पतेः। शुक्रस्य ५ अंशाः। शनेः ७ भागाः। बुधस्य ६ भागाः। मंगलस्यापि ६ भागाः॥

कन्यालग्ने प्रथमे बुधस्य ७ अंशाः। शुक्रस्य १० अंशाः। गुरोः ४ अंशाः। मंगलस्य ७ भागाः। २ भागौ शनैश्चरस्य॥

तुलालग्ने आदौ ६ अंशाः शनेः ८ भागाः बुधस्य। गुरो ७ भागाः। शुक्रस्यापि ७ अंशाः २ भागौ मंगलस्य॥

वृश्चिकलग्ने आदौ मंगलस्य ७ भागाः शुक्रस्य ४ अंशाः ८ भागा बुधस्य। वृहस्पतेः ५ अंशाः ६ भागाः शनेः॥

धनुर्लग्ने प्रथमे वृहस्पतेः १२ अंशाः। ततः शुक्रस्य ५ अंशाः। बुधस्य ४ अंशाः। मंगलस्य ५ भागाः। शनेः ४ अंशाः॥

मकरलग्ने आदौ बुधस्य ७ अंशाः। गुरोरपि ७ भागाः। ८ अंशाः शुक्रस्य। शनेः ४ अंशाः। मंगलस्यापि ४ अंशाः॥

कुम्भलग्ने प्रथमे बुधस्य ७ भागाः शुक्रस्य ६ भागाः। वृहस्पतेः ७ अंशाः। मंगलस्य ५ भागाः। शनेरपि ५ भागाः॥

मीनलग्ने आदौ १२ अंशाः शुक्रस्य ४ भागाः वृहस्पतेः। बुधस्य ३ अंशाः। मंगलस्य ९ भागाः ततः शनेः २ भागौ॥

एषां प्रमाणानि। यथा। मेषे षट्कं तर्काष्ट पञ्चेषुभागा जीवास्फुजिज्ज्ञार शनैश्चराणां १। वृषे षट् तर्काष्ट पञ्चाग्निलोकाः शुक्रज्ञ जीवार्कि कुजेश हद्दाः २॥ युग्मे षडंगेषु नगाङ्गभागाः सौम्यास्फुजिज्जीवकुजार्कि हद्दाः ३॥ कर्केऽद्रितर्कांग नगाब्धि भागाः कुजास्फुजिज्ज्ञेज्य शनैश्चराणां ४॥ सिंहेऽङ्गभूताद्रि रसांग भागा देवेज्य शुक्रार्कि बुधार हद्दाः ५॥ स्त्रियां नगाग्न्यब्धि नगाद्रि

भागाः सौम्याशनैश्च जीवकुजार्कि हृताः ६ तुले रसाष्टादि न गाक्षि भागाः कालज्ञजीवास्फुजिदारसौम्याः ७ ॥ कीटे नगाष्टाष्ट शरांग भागा भौमास्फुजिज्ज्ञेज्य शनैश्चराणां ॥ ८ ॥ चापे रवीशास्तु तिपंच वेदा जीवास्फुजिज्ज्ञारशनैश्चराणां ९ मृगेन गाक्ष्यष्ट युगाश्रुतीनां सौम्यज्य शुक्रार्कि कुजेषु हृताः ॥ १० कुंभे नगांगादि शरेषु भागाज्ञ शुक्र जीवार शनैश्चराणां ११ मीनेऽर्कवेदानल नंदपक्षाः सितेज्य सौम्यार शनैश्चराणां १२ ॥

इति नीलकंठीयताजकं ॥

हन्यमानः त्रि वर्त्तमानहननीयवस्तु । हनधातोः कर्मणिशानप्रत्ययेन निष्पन्नः । यथा । हन्यमाने महासैन्ये विलोक्यामर्षं मुहुर्मुहुः । आध्यायावन्निशुंभोथ मुख्ययासुरसेनया । इति मार्कंडेये देवीमाहात्म्य ॥

हपुषा स्त्री वणिकद्रव्यविशेषः । तत्तमरीचवृक्षवद्दीर्घकुसवर्त्तिफलं । हउबु इतिख्यातं । इति वैद्यः । होहबेर इति हिंदीभाषा तत् द्विविधं । तन्मध्ये प्रथमं फले मत्स्यसदृशं वितगंध द्वितीयं मत्स्यफलसदृशम स्पगंधं तयोर्नामानि गुणाश्च हपुषा वपुषा विस्रा परास्थ्यफला स्मृता । मत्स्यगंधा प्लीहहंत्री विषघ्नी ध्वांतनाशिनी । हपुषा दीपनीतिक्ता मृदूष्णातुवरा गुरुः । पित्तोदर प्रमेहार्शो ग्रहणी गुल्मशूलहृत् । पराप्यैतद्गुणा प्रोक्ता रूपभेदो द्वयो रपि । इति भावमिश्रकृतभावप्रकाशः । अपिच हपुषा हवुषा विस्रा विस्रगंधाविगंधिका । अन्या चौसास्वल्पफला कच्छुघ्नी ध्वांतनाशिनी । प्लीहशत्रु विषघ्नीचकफघ्नीचापराजिता । एवंतु पंचनाम्नी स्यादपरा सप्तपाभिधा हपुषा कटु तिक्तोचगुरुश्लेष्मवलासजित् । प्रदरोदरविट्भमशूलगुल्मार्शसांहरा । इति श्रीनरहरिपंडितविरचितराजनिर्घंटे शताह्वादिवर्गस्त्रवर्गः ॥

हवुषा स्त्री हपुषा । इति राजनिर्घंटः ॥

1361

हारं त्रि हरिसंबंधीयं । हरणकर्ता । यथा । यत्कुरुवैतः प्रेमरतिविंत्सला सर्वेच प्रुष्यन्नचित्तेन पुंसः । भक्ति हरौ तत् पुरुषेच सख्यं तदेव हारंवदत्समसे चेत् । इति श्रीभागवते ९ स्कन्धे ७ अध्यायः ॥ तदेव हारं हरे स्त्राविते सनोहरंवा । इति तट्टीकायां श्रीधरस्वामी ॥

हितकारी त्रि शुभकारकः ॥ यथा । लक्ष्मणेन च धर्मात्मन् भ्राता त्वद्धितकारिणा । स्रात्भिरात्मसहितं पश्यमोऽद्यवयंतृप । इति श्रीरामायणेउत्तरकांडे १ सर्गः ॥

हिरण्यं क्ली सुवर्णं । तद्वैदिकपर्यायाः । हेम १ चंद्रं २ रुक्मं ३ अयः ४ हिरण्यं ५ पेशः ६ कृशनं ७ लोहं ८ कनकं ९ कांचनं १० भर्मं ११ अमृतं १२ मरुत् १३ दत्रं १४ जातरूपं १५ । इति पंचदश हिरण्यनामानि इति वेदनिघंटौ १ अध्यायः ।

हुडः पुं मेषाद्ययस्थाने । हुरुज् इति भाषा । रक्षोपरिविलसत्पाशाश्रणुंगा । यथा । पुरीमसेनाविहिता सपताका सतोरणा । सचक्रा सहुडा चैव सयंत्र खनका तथा । इति महाभारते वनपर्वणि सोभवधे १५ अध्यायः ॥ पताका ध्वजोंचलः ॥ तोरणानि वहिर्द्वाराणि । चक्राणि योधचक्राणि । हुडा स्तदाश्रयस्थानानि । भाषायां हुरुजसंज्ञानि । अन्ये तु विस्फोटनसंज्ञानश्वृंगाणि हुडा इत्याहुः ॥ उदाहरंति च कल्पंते हडश्वृंगाणि रथस्योपरि सूरिभिः ॥ विस्फूरस्तंभरूपाथकरादिसा प्रोद्यते । इति । यंत्राणि अग्नेयौषधवलेन दृषत्पिंडान्क्षेपणानि । महांति कामानसंज्ञानि क्षुद्राणि सीसगुलिकोत्क्षेपणानि वंदूकसंज्ञानि खनकाः सुरंगद्वारा गुप्तमार्गकर्त्तारः । इति तट्टीकायां नीलकंठः ॥

होडः पुं नौकाभविशेषः ॥ डुंगी इति भाषा तत्पर्यायः ॥ तरांधुः २ वहनं ३ वहित्रं ४ वार्वटः ५ इति त्रिकांडशेषः दक्षिणराढीयमौलिककायस्थानां हिस्समतिपद्धतं तत्रोत

प्रकृतिविशेषः । इति कुलाचार्य्यग्रन्थः ॥ गौडदेशीयश्रोत्रियब्राह्मणविशेषाणां कुपाधिश्च अस्य प्रमाणं अन्नदामङ्गलग्रन्थे धृ ॥ नन्दमिश्रग्रन्थे च द्रष्टव्यं ॥

ह्रस्वः त्रि ळरुः । तद्वैदिकपर्य्यायाः । ऋहत् १ ह्रस्वः २ निचृत ३ माणुकः ४ प्रतिष्ठा ५ कृधु ६ वम्रकः ७ दभ्रं ८ अर्भकः ९ क्षुल्लकः १० अल्पः ११ इत्येकादश ह्रस्वनामानि । इति वैदनिघण्टौ ३ अध्यायः ॥

ल

ल शेषलकारः गौडदेशे अस्याकारोच्चारणयो भेदो नास्ति किन्त्वस्याथ एकविन्दुमात्रविह्नं क्रियते । वेदे अस्य उच्चारणस्थानं जिह्वामूलं ॥ देवनागरवर्णमालायां अस्याकार एवंप्रकारः ⋯ । अस्य प्रयोगाः । अग्निमीळे । हे ईळे वीळुचित् । इत्यादि ऋग्वेदः तन्त्रे वर्णमालाजपे अस्य प्रयोजनं । यथा । अनुलोमविलोमेन क्रमयुक्तया वर्णमालया आदिलान्त लादि आन्त क्रमेण परमेश्वरि । ळकारं मेरुरूपञ्च लंघयेन्न कदाचन । इति मुण्डमालातन्त्रे ॥ मातृकान्यासेऽपि अस्य प्रयोजनं । तत्प्रमाणं मातृकाशब्दे द्रष्टव्यं ॥

तस्य नामानि यथा । ळः पृथ्वी विमला मेधा अनन्तोऽप्यवहासिता । व्यापिनी शिवदा केतु ऊँगानसारनं हठः ॥ मैत्रा स्वरज्ञानी च वेदार्थसारो नारायणः स्वयं । जठरो नकुलिः पीता शिवेशोऽनन्तमालिनी ॥ इति श्रीनन्दमहाचार्य्यविरचितवर्णाभिधाने ॥ अपि च । ळकारो विमलोऽजीवः शिवभूमि वैनानने । इति श्रीरुद्रयामले ८ पटले मन्त्राभिधाने ॥

ळ

ळ ळकारः । अस्य नामानि यथा । ळकारो नरसिंहश्च मेरुः संवर्त्तकोऽपि च । तव महात्म्यं देवि कथितं मातृकान्तरं । पर्य्यायेऽपि विज्ञेयं न प्रकाश्यं कदाचन । इति श्रीरुद्रयामले ८ पटले मन्त्राभिधाने ॥ अस्य ध्यानं यथा चतुर्भुजां रक्तवर्णां शुक्लाम्बरविभूषितां । रत्नालङ्कारसंयुक्तां वरदां पद्मलोचनां ॥ ईषद्धास्यमुखीं लोलां रक्तचन्दनचर्च्चितां । पुंदात्रींच चतुर्वर्गप्रदां सौम्यां मनोहरां ॥ गन्धर्वसिद्धदेवाद्यैर्ध्यातां मायां सुरेश्वरीं । एवं ध्यात्वा ळकारं तु तन्मन्त्रं दशधा जपेत् ॥ इति वर्णोद्धारतन्त्रे ॥

ळरः पुं नश्वरवस्तु । यथा । द्वाविमौ पुरुषौ लोके ळरश्चाळर एव च । ळरः सर्वाणि भूतानि कूटस्थोऽळर उच्यते ॥ इति श्रीभगवद्गीतायां १५ अध्याये १६ श्लोकः ॥ ळरश्चाळरश्चेति द्वाविमौ पुरुषौ लोके प्रसिद्धौ ॥ तावेवाह तत्र ळरः पुरुषो नाम समस्तानि भूतानि ब्रह्मादिस्थावरान्तानि शरीराणि अविवेकिलोकस्य शरीरेष्वेव पुरुषत्वप्रसिद्धेः । कूटो राशिः शिलाराशिः ॥ पर्वत इव एकदेशेषु नश्यत्स्वपि निर्विकारतया तिष्ठतीति कूटस्थश्चेतनो भोक्ता स त्वळरः पुरुष उच्यते विवेकिभिः । इति तट्टीकायां श्रीधरस्वामी ॥

ळरकुष्ठं क्ली स्वल्पकुष्ठरोगः । तत्तु एकादशविधं । यथा ळरकुष्ठान्याह । एककुष्ठं १ सूतं एवं गजचर्म २ ततः परं ततश्चर्म्मदलं ३ प्रोक्तं ततश्चापि विचर्च्चिका ४ विपादिकाभिधा ५ सैव पामा कच्छू ६ स्ततः परा ततो दद्रुश्च ७ विस्फोटः ८ किटिभं च ९ ततः परं ततश्चालसकं १० प्रोक्तं शतारुश्च ११ ततः परं । ळरकुष्ठानि चैतानि कथितानि भिषग्वरैः ॥ ननु दद्रुः कथं ळरकुष्ठेषु गणिता सुश्रुतेन महाकुष्ठेषूक्तत्वात् । उच्यते । असितावगाढमूला दद्रुः सुश्रुतेन महाकुष्ठेषूक्ता असितेतरा नवगाढमूला दद्रुः ळरकुष्ठमेव । एवं विधाया दद्रा चरकेण ळरकुष्ठेषु दर्शितत्वात् ॥

कुष्ठानां त्रिदोषजत्वेनैकत्वे त्रि
दोषस्योल्वणतया सप्तधात्व
माह । सर्वेष्वपि त्रिदोषेष्वप
देशाधिकत्वतः कुष्ठानि सप्त
धा दोषैः पृथक् द्वन्द्वं समागतैः
सर्वेष्वपि कुष्ठेषु त्रिदोषजेषु
सत्स्वपदेशाधिकत्वतः व्य
पदेशः कापालादिसंज्ञा श्लेषा
महाद्दशत्वरूप यदाधिकत्वेन
तः कुष्ठानि सप्तधा कैः दोषैः क
थं भूतैः पृथक् द्वन्द्वं समागतैः
समागतैः संगतैः मिलितैरि
ति यावत् । अयमर्थः । कि
मपि कुष्ठं वातोल्वणं किमपि
पित्तोल्वणं किमपि कफोल्व
णं किमपि वातपित्तोल्वणं कि
मपि वातश्लेष्मोल्वणं किमपि
पित्तश्लेष्मोल्वणं किमपि त्रिदो
षोल्वणमिति ॥ पूर्वरूपमाह
अतिश्लक्ष्णाः खरस्पर्शः स्वेदा
स्वेदो विवर्णता । दाहः कण्डू
स्त्वचि स्वापः स्वादः कोठोन्न
तिः श्रमः । व्रणानामधिकं शू
लं शीघ्रोत्पत्तिश्चिरस्थितिः । रू
ढानामपि रूक्षत्वं निमित्तेऽल्पे
पि कोपनं । रोमहर्षो ऽसृजः का
र्ष्ण्यं कुष्ठलक्षणमग्रजं । अति

श्लक्ष्णाः । अतिमृदुः । अथ वा
खरः रूक्षः कर्कशो वा स्पर्शः ।
स्वेदास्वेदौ घर्मादिसम्प्रसंगाभा
वेऽपि स्वेदः । अथवा घर्मादिप्रसं
गेऽपि स्वेदाभावः । त्वचि स्वापः स्प
र्शाज्ञता । शीघ्रोत्पत्तिः शीघ्रा
उत्पत्तिर्व्रणानामित्यन्वयः ॥
संप्राप्तिपूर्वकं सामान्यं लक्षण
माह । शिराः प्रपद्य तिर्यक् च
त्वग्लसीकासृङ्मांसमिष दूषयेत्
स्पर्शघ्नं कुष्ठ निःसृत्य वहिस्त
तः । त्वचः कुर्वन्ति वैवर्ण्यं दोषाः
कुष्ठमुशन्ति तत् । तिर्यक् तिर्य
गाताः शिराः प्रपद्येत्यन्वयः ॥
येनोल्वणेन दोषेण यत्कुष्ठ
मुत्पद्यते तदाह । वातेन कु
ष्ठं कापालं पित्तेनौडुम्बरं कफा
त् । मण्डलाख्यं विचर्चीच ऋ
ष्याख्यं वातपित्ततः । चर्मैककु
ष्ठकिटिम सिध्मालस विपादि
काः । वातश्लेष्मोद्भवाः पित्तकफा
द्दद्रुशतारुषी । पुण्डरीकं सवि
स्फोटपामा चर्मदलं तथा । स
र्वैर्दोषोल्वणैर्दोषैः काकण
कं बुधाः । विचर्चीच कफादिभ्य
त्वयः । पुण्डरीकं सविस्फोटं पा
मा चर्मदलं तथा । पित्तकफात्

त्यन्वयः ॥ अथ क्षुद्रकुष्ठानां म
ध्ये एककुष्ठस्य लक्षणमाह । अ
स्वेदनं महावास्तु यन्मत्स्यश
कलोपमं । तदेककुष्ठं चर्माख्यं
बहलं हस्तिचर्मवत् । महावास्तु
महास्थाने । मत्स्यशकलोपमं
अत्र शकलशब्देन लक्षणया त्व
गुच्यते । तेन चक्राकार मत्स्यक
पत्रसदृशं भवति । एककुष्ठमि
ति क्षुद्रकुष्ठेषु मुख्यत्वात् । गज
चर्माह । चर्माख्यं बहलं हस्ति
चर्मवत् रूक्षकृष्णच । गजचर्मा
ख्यं बहलं स्थूलं हस्तिचर्मवत्
रूक्षं कृष्णं च । २ । चर्मदलमाह ।
रक्तं सशूलं कण्डूमत् सस्फोटं द
लयत्यपि । तच्चर्मदलमाख्यातं
मस्पर्शासहमुच्यते । दलयत्यपि
विदारयत्यपि चर्मेति शेषः ३ ।
विचर्चिकामाह । सकण्डूः पि
डका श्यावा बहुस्रावा विचर्चि
का । पिडका क्षुद्रपिडका । ४ । त
नु क्षुद्रकुष्ठानां कथमेकादश
त्वे विपादिकया द्वादशत्वसंभ
वात् उच्यते । विचर्चिकैव पाद
योर्भवति विदारणयोगात् वि
पादिका तेन संख्यातिरेकः । अ
तएव भोजः । दाल्यते त्वक् स्व

सरूक्षा पाण्योः ज्ञेया विचर्चि
का । पादे विपादिका ज्ञेयास्था
नभेदाद्विचर्चिका । दाल्यते वि
दार्यते । केचिद्विचर्चिकातो
विपादिकां भिन्नामाहुः । वैपा
दिकं पाणिपादस्फुटनं तीव्रवे
दनं । पाणिपादस्फुटनं पाण्योः
पादयोश्च स्फुटनं विदारणं वे
दनेति ॥ पामामाह । सूक्ष्मा
बह्व्यः स्राववत्यः प्रदाहाः पामे
त्युक्ता पिडकाः कण्डुमत्यः ।
पिडकाः पीडयन्ति इति पिड
का इति क्षिपकादित्वान्निपात्य
ते ५ । कच्छूमाह । सैव स्फोटैः
स्तीव्रदाहैः रूपेता ज्ञेया पाण्योः
कच्छूरुग्रा स्फिजोश्च । सैव
पामा । स्फोटैर्महद्भिः । स्फि
जौ प्रोथौ ६ दद्रुमाह । सक
ण्डूरागपिडकं दद्रुमण्डलमुद्गत
दद्रुमण्डले मण्डलरूपेणोत्प
द्यते । उद्गते उच्छूने ॥ ७ । वि
स्फोटमाह । स्फोटाः श्यावारु
णाभासा विस्फोटाः स्युस्त
नुत्वचः ८ किटिभमाह । श्या
वं किणखरस्पर्शं परुषं किटि
भं स्मृतं । किणखरस्पर्शं किणः
शुष्कव्रणस्थानं तद्वत् कर्कशस्पर्शं

पक्षं रूक्षं ४ ॥ अलसकमाह
कण्डूमद्भिः सरागैश्च गण्डैरल
सकं चितं। गण्डैर्महापिडकाभिः
चितं विवेष्टितं ५ शतारुषमा
ह। रक्तं श्यावं सदाहार्तिशता
रुः स्याद्बहुव्रणं ॥ ६ ॥
अथ सप्तधातुगतानां कुष्ठा
नां लक्षणमाह। तत्र रसगतस्य
लक्षणमाह। त्वक्स्थे वैव
र्ण्यमङ्गेषु कुष्ठे रौक्ष्यंच जायते।
त्वक्स्वापो रोमहर्षश्च स्वेदस्या
तिप्रवर्तनं। त्वक्शब्देनात्र रस
उच्यते। धातुप्रस्तावात् त्वक्स्था
श्च। त्वक्स्वापः स्पर्शाज्ञत्वे। त्वक्
स्वापश्चन्यादिकं केचिदत्र रक्त
स्य लिङ्गं मन्यन्ते ॥ १ ॥ शोणितग
तमाह। कण्डूर्विपूयकश्चैव कुष्ठे
शोणितसंभवे। विपूयः विशे
षेण पूयः ॥ २ ॥ मांसगतमा
ह। बाहुल्यं वक्त्रशोषश्च कर्का
कश्यं पिडकोद्गमः। तोदः स्फो
टः स्थिरत्वंच कुष्ठे मांससमाश्रि
ते। बाहुल्यं कुष्ठस्य पुष्टिः। पि
डकोद्गमः क्षुद्रपिडकोद्गमः।
स्फोटाः बृहत्पिडकाः। स्थिर
त्वं अंशचाविस्थं ३ ॥ मेदोगत
माह। कौण्यं गतिक्षयोऽङ्गानां

संभेदः क्षतसर्पणं। मेदःस्था
नगते लिङ्गं प्राग्युक्तानि तथै
वच ॥ कौण्यं हस्तनाशः।
अङ्गानां संभेदः अङ्गभेदः।
क्षतसर्पणं क्षतप्रसरणं। प्रा
ग्युक्तानि रक्तमांसगतलिङ्गा
नि ॥ ४ ॥ अस्थिमज्जगतमाह।
नासाभङ्गोऽक्षिरोगश्च क्षते
षु कृमिसंभवः। स्वरोपघा
तः पिडका भवेत् कुष्ठेऽस्थिम
ज्जे ५। ६। शुक्रगतमाह। दं
पत्योः कुष्ठबाहुल्यात् दुष्टशोणि
तशुक्रयोः। यदपत्यं तयोर्जा
तं ज्ञेयं तदपि कुष्ठितं। दंपत्योः
स्त्रीपुरुषयोः दुष्टशोणितशुक्र
योः यदपत्यं तयोर्जातमिति
७ ॥ ननु दुष्टशोणितशुक्र
योः केवलयोः गर्भसंभवाद्दु
ष्टशोणितशुक्रयोः कथमप
त्योत्पत्तिः। यत आह सुश्रु
तः। कामान्मिथुनसंयोगे शुद्ध
शोणितशुक्रजः। गर्भः सं
जायते नार्याः स जातो बालउ
च्यते। इति अमस्त्र। वातादि
दुष्टे तेषः अङ्गोत्पादने नस
मर्थाः ॥ इति। उच्यते। गर्भो
त्पुष्टो बाहुल्यः। अपदुष्टस्य

गर्भो दुष्टशोणितशुक्रयोर
पि भवति पङ्गुजन्मान्धबधिरा
दीनां संभवात्। शोणितमज्जाते
वं। कुष्ठिते कुष्ठे संजात मस्यास्ति
नारकादित्वादितच्। शुक्रातेव
गते कुष्ठे सपत्येन युज्यते इ
तिसापत्यर्थे ॥ कुष्ठेषु लक्षणं
वातादिदोषलिङ्गमाह। खरं
श्यावारुणं रूक्षं वातकुष्ठं सवे
दनं। पित्तात् प्रकुपितं दाह
रागस्रावान्वितं मतं। कफात्
क्लेदि घनं स्निग्धं सकण्डूशैत्य
गौरवं। द्विलिङ्गं द्वन्द्वजं कुष्ठं त्रि
लिङ्गं सान्निपातिकं ॥ खरं क
र्कशं। श्यावारुणं श्यावं वारु
णंच। प्रकुपितं क्लेदसहितं कु
लं। क्लेदि आर्द्रतायुक्तं। घनं पु
ष्टं। साध्यत्वादिकमाह। साध्यं
त्वग्रक्तमांसस्थं वातश्लेष्माधि
कं चयत्। मेदोगं द्वन्द्वजं याप्यं
वर्ज्यं मज्जास्थिसंश्रितं। कृमि
तृड्दाहमन्दाग्निसंयुक्तं यत्त्रिदो
षजं वातश्लेष्माधिकं चयत् एते
न सिध्मैककुष्ठ गजचर्मविपादि
का किटिभालसकानि साध्या
नि। मज्जप्रमाणस्था शुक्रगत
मप्यसाध्यं कृमिकृदाद्यपि वर्ज्यं

मित्यन्वयः ॥ अरिष्टमाह। प्र
भिन्नं प्रस्रुताङ्गं च रक्तनेत्रं हत
स्वरं। पञ्चकर्मगुणातीतं कु
ष्ठं हन्तीह कुष्ठिनं ॥ प्रभिन्नं
विदीर्णं हतस्वरं घर्घरस्वरं।
पञ्चकर्मगुणातीतं असंजाता
वमनादिपञ्चकर्मगुणं ॥
अथ त्वग्दोषसाम्यात् कुष्ठभे
दत्वाच्छ्वित्रमाह। कुष्ठैक
संभवं श्वित्रं किलासं चारुणं भ
वेत्। निर्दिष्टमपरिस्रावि त्रि
धातूद्भवसंश्रयं कुष्ठैकसंभवं
कुष्ठेन सह एक स्वल्पाः संभवो
निदाने यस्य तत् ॥ श्वित्रस्य
भेदानाह। किलासं चारुणम्भ
वेत् श्वित्रमेव रक्तमांसाश्रया
त् किलासमरुणंच भवेदि
त्यर्थः ॥ ननु कुष्ठस्य श्वित्रस्य च
को भेद इत्यत आह। निर्दिष्टम
परिस्रावीति। श्वित्रमपरिस्रा
वि भवति कुष्ठन्तु स्रावि अथ च त्रि
धातूद्भवसंश्रयमिति त्रयो
धातवो वातपित्तकफाः श्लेष्मः
पृथक् तेभ्यः उद्भवो। यस्य तत्
अयञ्च त्रयो धातवो रक्तमांस
मेदांसि संश्रयोऽधिष्ठानं यस्य
तत् ॥ कुष्ठं सान्निपातिकं स

वैधात्तुगतंच भवतीति भेदः॥
दोषभेदेन लक्षणभेदानाह।
वाताद्रूक्षारुणं पित्तात्ताम्रंक
मलपत्रवत्। सदाहं रोमवि
ध्वंसि कफाच्छुक्लं घनं गुरु। स
कण्डूकं क्रमाद्रक्तं मांसमेदःसु
चादिशेत्। वर्णेनैवेदृशमयं कु
ष्टं तच्चोत्तरोत्तरं। अरुणमीष
येलोहिते कमलपत्रवदित्यने
न मध्य श्वेतमन्ते लोहितेवो
पपति। घनं पुष्टं। क्रमाद्रक्तं
मांसमेदःसु चादिशेत्।
तथाचचरकः। अरुणंरक्ते
वाते ताम्रं पित्ते पले गते।
श्वेते श्लेष्माणि मेदःस्थे श्वित्रंकु
ष्टं परंपरमिति। उभयेहिवि
धमपि श्वित्रं वर्णेन इदृशेवब्रु
रुणं ताम्रं श्वेतञ्च। दोषभेदा
त् द्विविधं दोषजं व्रणजंच।
तथाच भोजः श्वित्रंतु द्विविधं
विद्याद्दोषजं व्रणजं तथा।
इति। श्वित्रंसाध्य समाध्यंचाह
अशुक्लरोमावहुलम् असंसृष्ट
मथो नवं। अनग्निदग्धजं
साध्यं श्वित्रं वर्ज्यं मतोऽन्यथा
अवहलं तनु। अन्यच्च। गुद
पाणितलौष्ठेषु जातमप्यचिर

त्नतं। वर्जनीये विशेषणात्कि
लासं श्वित्रं मिच्छता। गुह्यमे
हने भगेच। तलमत्रपादतले
स्फुटतेनोक्ते ज्ञातमिति सामा
न्यतो निर्दिष्टत्वात्। अचिरेत
ने नवमपि॥ कुष्ठस्य संसर्ग
जत्वे प्रसंगेनान्यानपि संसर्गि
जान् रोगानाह। प्रसंगात्
गात्रसंस्पर्शात् निश्वासात्
सहभोजनात्। एकशय्याशना
च्चापि वस्त्रमाल्यानुलेपनात्
कुष्ठं ज्वरश्च शोषश्च नेत्राभि
ष्यंद एवच। औपसर्गिक रोगा
श्च संक्रामंति नरान्नरं। प्रसंगा
त् प्रकर्षेण संगः प्रसंगोमैथु
नं तस्मात्। गात्रसंस्पर्शात्
तर्हि मैथुनादिति विशेषार्थः
वस्त्रमाल्यानुलेपनात् एकस्मा
देव। शोषो यक्ष्मा। औपसर्गि
करोगाः शीतलादयः॥ स
कुष्ठस्यमृतस्यपुन ज्ञातस्यापि
कुष्ठं भवतीत्याह। म्रियते य
दि कुष्ठेन पुनर्जातस्य तद्भवेत्
नातो निंद्यतरो रोगो यथाकुष्ठं
प्रकीर्तितं। एतावता कुष्ठि
नो कुष्ठं सर्वथा प्रतिकरणीय
न तदुपेक्षणीयं॥ ॥

अथकुष्ठस्य चिकित्सा। वातो
त्तरेषु सर्पि र्वमनं श्लेष्मोत्तरेषु
कुष्ठेषु। पित्तोत्तरेषु मोक्षोरक्त
स्य विरेचनंचेष्टं॥ पथ्या क
रंज सिद्धार्थ निशावल्गुजसै
न्धवं। विडंग सहितैः पिष्टैर्ले
पो मूत्रेण कुष्ठनुत्। अवल्गु
जः वकुचीति लोके। पथ्या
दिलेपः॥ सोमराजीभवेच्चूर्णं
श्रृंगवेरसमन्वितं उष्णेनाभि
दहंति कुष्ठरोगक्लास्पदं॥
सोमवाराजी वकुचीति लोके
सोमवाराज्युष्णेनं॥ रसायनं
प्रवक्ष्यामि ब्रह्मणा यदुदाहृतं
मार्कंडेयप्रभृतिभिर्यत्प्रयुक्तं
महर्षिभिः॥ पुष्पकालेतुपुष्पा
णि फलकाले फलानिच॥
संगृह्य पिचुमर्दस्य त्वङ्मूलानि
दलानिच। द्विरंशानि समाहृत्य
भागिकानि प्रकल्पयेत्। त्रिफ
लात्रुषणं ब्राह्मी स्वदंष्ट्रारुष्क
राग्नयः। विडंगसारवाराहीलो
हचूर्णामृताःसमाः। निशात्व
यावल्गुजक व्याधिघ्नातः सश
र्कराः। कुष्ठमिंद्रयवांपाठाचूर्णा
मेषांतुसंयुतं। खदिरासन निंवा
नां घनक्वाथेनभावयेत्॥

सप्तधा पंचनिंवंतु मार्कवस्वरसे
नच। स्निग्धः शुद्धतनुर्धीमान्यो
जयेत्तत्कुभेदिने मधुनातिक्तह
विषा खदिरासनवारिणा लेह्यं
शुल्कंभसा वापि कोलवृद्ध्यापलं
भवेत्। जीर्णे तस्मिन्समश्नी
यात् स्निग्धंलघु हितंचयत्।
विचर्चिकोदुंबर पुंडरीककपा
ल दद्रु किटिभालसादि। शता
रु विस्फोट विसर्पमालाःक
फप्रकोपं त्रिविधं किलासं॥
भगंदर श्लीपद वातरक्त जडा
न्ध्य नाडीव्रण शीर्षरोगान्। स
र्वान्प्रमेहान् प्रदरांश्च सर्वान्
दंष्ट्राविषं मूलविषं निहंति॥
स्थूलोदरः सिंहपराक्रमः स्यात्
सुस्निग्धसंधि मधुनोपयोगात्
सदोपयोगादपि ये दृशंति सर्पा
द्यो यांति विनाशमाशु जीवेच्चि
रं व्याधिजरादिमुक्तः शुभेरत
श्चंद्रसमान कांतिः। अयमर्थः
निंवस्य फल पुष्प त्वक् पत्र
मूलानि सर्वाणि समुदितानि
द्विगुणानि चूर्णितानि भृंगराज
स्वरसेन सप्तवारान् भावयेत्।
त्रिफलादीनि पाठांतानि समुदि
तान्येक भागानिचूर्णितानि खदि

शमनः निम्बानां निविडक्वाथे
नभावयेत् ततः सर्वमेकीकृत्यमधा
दिनावलिह्यात्। पंचनिम्बाव
लेहः॥ शशिलेखा पंचपले
तावद्गिरिजस्य गुग्गुलोर्दशाच
तायस्य पलत्रितयं हेलोह
स्यावल्गीकायाः त्रिफलाकरंज
पल्लव खदिर गुडूची त्रिवृद्त्वः
मुस्ता विडंग रजनी कुटजत्व
क् निम्ब वह्नि सम्पाकाः। प
ते रचितां वटिकां मधुघृतमि
श्रां गिलेत् प्रातः। गोमूत्रेणच
कुष्ठं नुदंत्यस्त्रवात मचिरेण।
श्वित्राणि पाण्डुरोगं विषमान्
र्दप्रमेह गुल्मांश्च नाशयति
वलीपलितं योगः स्वायंभुवोना
म्रा॥ शशिलेखा सोमराजी।
गिरिजस्य शिलाजतुनः। तथ
स्य स्वर्णमाक्षिकस्य। श्रावणी
कामुंडी इति लोके। स्वायंभुवो
गुग्गुलुः॥ त्रिवृतं त्रिफलाव्यो
ष मञ्जिष्ठा कारवी वचा। सैन्ध
वातिविषे कुष्ठं चव्येलायवश्
कजे। विडंगान्यजमोदाच मु
स्ताचामरदारुच। यावंत्येता
निसर्वाणि तावन्मात्रंतुगुग्गुलं
संक्षुद्य सर्पिषा सार्द्धं गुटि·

को कारयेद्भिषक्। प्रातर्भोज
नकालेच खादेदग्निबलं यथा
हंत्यष्टादश कुष्ठानि कृमीन
दुष्टव्रणानिच ग्रहण्यर्शोवि
कारांश्च मुखामय गलग्रहान्
गृध्रसी मस्थिभग्नञ्च गुल्मंचा
पि नियच्छति। व्याधीन् को
ष्ठगतांश्चापि जयद्विष्णुरिवासु
रान् एकविंशतिको गुग्गुलुः॥
वातरक्ताधिकारोक्तः पुरः कै
शोरकाभिधः। कुष्ठानां वातर
क्तानां नाशाय परमौषधं।
कैशोरको गुग्गुलुः॥ भल्ला
तकं प्रस्थयुगं छित्वा द्रोणज
लेक्षिपेत्। प्रस्थद्वयं गुडूच्याश्च
चूर्णस्य तत्रांभसि क्षिपेत्। चतु
र्थांशावशेषेयत् कषाय मवतार
येत्। तस्मिंस्ते कषायेचवस्त्रपू
तानिः क्षिपेत्। सशावमात्रे गो
सर्पि गौडस्य प्रस्थकं तथा।
सितां प्रस्थमितां दद्यात् प्रस्था
र्द्धं माक्षिकं क्षिपेत्। सर्वाण्येकत्र
भाण्डेतु पचेन्मृद्वग्निना शनैः।
सर्वद्रव्ये घनीभूते पावकादव
तारयेत्। तत्र क्षेप्याणि चूर्णा
नि क्रमतो विल्वमिताम्भता। वाकु
चीचाथ दद्रुघ्नः पित्तमदोहरी·

1371

तकी॥ धात्री दार्विश्च मंजिष्ठा
मरीचं नागरं कणा। यवानी
सैंधवं मुस्तं त्वगेलानागकेशरं
पर्पटः पत्रकं वाल मुशीरं चंद
नं तथा॥ गोक्षुरस्यच बीजानि
कर्चूरो रक्तचंदन॥ एषांकप
लार्द्धमानानां चूर्णमेषामिह क्षि
पेत्। पलमात्र मिदं प्रातः सम
श्नीयाज्जलेन हि॥ नाशयेद्व
लेहोयं कुष्ठानिनिखिलान्यपि।
वातरक्तानि सर्वाणि सर्वाण्य
र्शांसि सेवितः। आयाम मा
तपं वह्नि मस्त्रं मांसं दधि क्षि
यं। तैलाभ्यंगं तथाध्वानं न
हि भल्लातके त्यजेत्॥ अमृ
तभल्लातकावलेहः॥
निंबं गोपाकृष्णा कट्वी श्रायंती
त्रिफलाचंदने। पर्पटावल्गुजानं
तावचा कृदिरचंदने। पाठा शु
ठी शटी भार्गी वासा भूनिंबवत्स
कं। धमासेद्रवारुणीमूर्वा विडंगं
द्रुयवानले। हरिकोणाः स्नुता
द्वैका पटोलं रजनीद्वयं। कृष्णा
रग्वध सप्पाक कुम्भवैद्योश्च
फले। मंजिष्ठा लांगली रास्ना
नक्तमालः पुनर्नवा। दंती वि
जयसारश्च भृंगराजः कुरंटकं॥

शंकोटकंच साख्योटं क्षिपलां
शेष्टथक् पृथक्। शृङ्गीयान्
निसर्वाणि जलद्रोणे पचेच्छ
नैः। अष्टमांशावशेषेयत् कषाय
मवतारयेत्। विधायवाससापू
तं स्थापयेद्भाजनेदृढे। भल्लातक
सहस्राणि क्षिप्त्वा त्रीण्यम्भेणः
म्भसि। पचेदष्टावशेषे तु कषा
यमवतारयेत्। तत्र वस्त्रेण सं
शोध्य द्वौकषायौ विमिश्रयेत्।
गुडस्यतु तुलां दत्वा लेहवत्सा
धु साधयेत्। भल्लातकसहस्रा
णि तत्रबीजानि निःक्षिपेत्।
त्रिकटु त्रिफला मुस्तं विडंगं चि
त्रकं तथा॥ सैंधवं चंदनं कुष्ठं दी
प्यकंच पलंपृथक्। सोगंधार्ध्यं
क्षिपेत्तत्र चतुर्जातं पलंपलं॥
महाभल्लातकोह्येषमहादेवेन
भाषितः। प्राणिनांहितकामा
य जयच्छ्रीत्रु प्रयोगतः॥
श्वित्रमौदुंबरंदद्रु मृत्तिजिह्वंस
काकणम् पुंडरीकंच चर्माख्यं
विस्फोटं रक्तमंडलं। कंडुका
पालकं कुष्ठं पामानंच विपादि
कां। वातरक्तं षडर्शांसि पांडुरो
गं व्रणं कृमीन्। रक्तपित्तमु
दावर्तं कासं श्वासं भगंदरं॥

सदाभ्यासेन पलित मामवातंस
हुत्तरं ॥ निर्यथत्वस्तु कथिता
विहाराहारमैथुनैः। ऊरूतेपरमां
कांतिं प्रदीप्तं जठरानलं । अतु
पाने प्रयोक्तव्यं छिन्नातोयेपयो
ऽथवा । भोजनेतुसदात्याज्य मु
लमम्लं विशेषतः । गोपा गो
पालीति गोपा गोपकन्या से
तसाउ इतिलोके । यत्र आह
निघण्टुः ॥
सारिवा शारदास्फोटा गोपक
न्या प्रतानिकेति । तहाचको
गोपीशाहूम्य । यत्र आह । गो
पी श्यामा शारिवा स्यादनंता
तृपलशारिवेत्यमरः गोपांगना
गोपवल्ली लताह्वा काष्ठशारि
वेति मदनपालः ॥ अरुणाअतौ
स। अवल्गुजः सोमराज्जी। अन
न्ता दुरालभा। चंदनं श्वेतं ॥
भार्गपा अलाभे कंटकारीमूलं
गृह्णीयात्। श्यामा कृष्णसाउ
हस्तिकर्णः ऋषिकण। इकाव
कादृति। सप्ताह्वः छति वन्ना कू
स्ववेद्यः जलवेतस उच्चटाफलं आ
रक्तगुंजाफले कुरंटकः पीतपु
ष्पकटसैरेया । दीप्यकः यवानी
॥ महाभल्लातकः ॥ ॥मंजिष्ठा

त्रिफलातिक्तावाचादारुनिशा
म्रुता । निंबश्चेषांकृतः क्वाथः स
र्वकुष्ठानिनाशयेत् लघुमंजिष्ठा
दिक्वाथः ॥ मंजिष्ठा वाकुची
चक्रमर्दश्चपिचुमर्दकः । हरीतकी
हरिद्राच धात्रीवासाशतावरी ॥
बला नागबला यष्टीमधुकं तु
कोपिच । पटलस्तु तोशीरंगु
डीच रक्तचंदनं ॥ मंजिष्ठादि
ये क्वाथः कुष्ठानां नाशनः परः
वातरक्तस्य संहंता कण्डुमंडल
खंडनः मध्यममंजिष्ठादिक्वाथः
मंजिष्ठा कुटजामृताघनवचाशु
एठीहरिद्राद्वयं च्छद्रारिष्ठ पटो
लेकुष्ठ कटुका भार्गी विडंगाग्नि
के । मूर्वा दारु कलिंगभृंगम
गधा त्रायंति पाठा वरी । गायु
डी त्रिफला किरातक महानिंबा
सनारग्वधे । श्यामावल्गुजचं
दनंवरुणक दंतीचपर्पाखोटके
वासा पर्पट सारिवा प्रतिविषा
ऽनंता विशाला जले । मंजिष्ठा
दिरयं कषाय मितियः संसेवते
तस्यतु त्वक्दोषाह्यचिरेण यां
ति विलयं कुष्ठानिचाष्टादश
नाशं गच्छति वातरक्त मखि
लं नश्यंति रक्तामया ॥

1373

वीसर्प स्वचि सून्यता नयन
ज्जारोगाः प्रशाम्यंतिच । अरिष्टः
निंबः । कलिंग मिंद्रयवं भृंगं
भृंगरा । वरीशतावरी । गायत्री
खदिरः । असनः विजयसारः
श्यामा प्रियंगुः । चंदन मत्र रक्तं
ग्राह्यं। सारिवा सारे । अनंतादुरा
लभा। विशाला इंद्रवारुणी ।
जलं नेत्रवाला । वृहन्मंजिष्ठा
दिक्वाथः ॥ मरिचं त्रिवृताश्
ला हरिताले मनःशिला। दे
वदारु हरिद्रे द्वे मांसी कुष्ठंस
चंदनं । विशाला करवीरश्च
क्षीर मर्कसमुद्भवं गोमयस्य
रसे कुर्यात् प्रत्येकं कर्षसंमि
तं। विषस्यार्द्धफलंदेयं तैलंप्र
स्थमितं कटु । पचेच्चतर्गुणेगोमू
त्रे गोमत्रे द्विगुणेनतथा ॥ म
रिचाद्य मिदं तैल मभ्यंगात्।
कुष्ठनाशनं । पलस्याभ्यंगतः
श्वित्रं विवर्णितत्क्षणात्भवेत्
तैल मेतत् जयेत् कण्डु पामां
क्षिप्रं विचर्चिकां । पुंडरीकं
तथा दद्रु शून्यतां नित्यसेवि
नां । लघुमरिचाद्यं तैलं ॥
मरिचं त्रिवृता दंती क्षीरमार्क
शकृद्रसः । देवदारु हरिद्रे द्वे

मांसी कुष्ठं सचंदनं । विशालाक
रवीरश्च हरिताले मनःशिला ।
चित्रकं लांगली मुस्ताविडंगं च
क्रमर्दकः । शिरीषः कुटजो निं
बः सप्तपर्णोऽमृतास्नुही । सम्पा
को नक्तमालश्चखदिरो वाकु
ची वचा । ज्योतिष्मतीचपलि
का विषं द्विपलिकंभवेत् ।
आढकं कटुतैलस्य गोमूत्रंच
चतुर्गुणं । मृत्पात्रे लोहपा
त्रेवा शनै र्मृद्वग्निनापचेत् ।
मरिचाद्य मिदंतैलंमहन्मुनि
भिरीरितं । भिषगो तेनतैलेन
अक्षयेत् कोष्ठिकान् व्रणान्
पामा विचर्चिकादद्रु कण्डुवि
स्फोटकानिच ॥ वलीच पलि
तं छाया नीलं व्यंगं तथैवच ॥
अभ्यंगेन प्रणश्यंति सौकुमार्यं
चजायते । प्रथमे वयसि स्त्री
णां यासां नस्यप्रदीयते । ता
सा मपि जरां प्राप्य नस्यांता
मवलितौ स्तनौ । बलीवर्द्दस्तु
रंगोवा गजोवा वायुपीडितः
त्रिभि रभ्यंजनै रस्य भवेन्मारु
तविक्रमः ॥ ज्योतिष्मती मा
लकंगुनी इति लोके । महा
मरिचादितैलं ॥

तालकस्यतु पत्राणि यस्य से
ति पृथक् पृथक् ॥ अभ्रकस्यै
वतद्वाक्ष्ये हरितालचिकित्सकैः
पुनर्नवायाः स्वरसैः तालकं त
द्विमर्दयेत् ॥ दिनमेकं ततस्त
स्मिन् चनत्वं गमितेसति ॥
कुर्वीत चक्रिकां तां तु शोषये
त् सम्यगातपे । पुनर्नवास
मस्तांगक्षारे स्थाली गलावधि
पूरयेच्च ततः क्षारं दृढयेत् पी
डनेनहि । क्षारस्योपरि तां द
द्यात् तालकस्य तु चक्रिकां ॥
तत आच्छादनं दत्वामुद्रांकृत्वा
विशोषयेत् । स्थालीचुल्यां नि
धायाग्निं मन्दं ज्वालयेद्भिष
क् । निरंतरं महोरात्रपंचकेनेन
सिध्यति । स्वांगशीतंसमुत्तार्य
गृह्णीयाद्रस मुत्तमं । तालके
श्वरनामायं भुक्तो गुंजामितोर
सः । गुडूच्यादिकषायेन गदा
नेतान् विनाशयेत् ॥ अष्टा
दशापि कुष्ठानि वातरक्तं तथो
द्धतं । फिरंगदेशजं रोगं दुस्तरं
च अपोहति । एतद्भेषजसेवी
तु लवणाम्लौ विवर्जयेत् ॥
तथा कटुरसं वह्निं मातपं
हरन् स्त्यजेत् । लवणं यः

परित्यक्तुं न शक्नोति कथंच
न । सतु सैंधवं मश्नीयात्तस्यदु
रोपदवोहि सः । तालकेश्वरोर
सः ॥ तालं ताम्रं शिला
सूतं टंकणं सिंधुसंयुतं । गंधा
कीं हिंगुलेन सूत्नाजैवीराद्भिः
प्रमर्दयेत् । षड्हं घटिते घोषा
भूधरे सकलं विदं षट्पलेहि
पलं ताम्रं लोहभस्मचतुष्पले
जंबीराद्भिः दिनं चूर्णं विंशांशं
विषं क्षिपेत् । अस्यमाषद्वय
स्वादेत्महिषीघृतसंयुतं ॥ मधा
ज्ये बाकुचीबीजैः कर्षलिह्या
ततः परं । तालकेश्वरनामा
यं सर्वकुष्ठहरो रसः ॥ अर्को
मारितं ताम्रं द्वितीयतालके
श्वरोरसः ॥ रसावलिस्ताम्र
मयः पुरोग्निः शिलाजतु
स्याद्विषतिन्दुकस्तु । वराचत
स्त्रगगनं करंजबीजं पृथग्भा
गचतुष्टयंच । संमर्द्य सर्वमधु
ना घृतेन घृतस्य पात्रे निहितं
प्रयत्नात् । कर्षभजेत् प्रत्यह
मस्य पथ्यं शाल्योदनं दुग्ध
मधुत्रयंच । विशीर्णकर्णांघ्र
लिनासिकोपि भवेदनेनस्मरतुल्य
मूर्तिः । तासपरित्यागवह प्रदि

ष्ठो जलोदरं तत्र निवृत्तमूले॥
ताम्रमयस्तु मारितं । पुरोगुग्गु
लुः । अग्निः चित्रकं विषयतिंदु
कः कुचिला । वरा त्रिफला । र
सादि त्रिफलांतं सर्वं तुल्यं । ग
गन मभ्रकं । करंजबीजंच पृथ
क् चतुर्गुणं स्यात् । तत्र कुष्टेव
द्धमूले सति जलोदरं मेवपथ्य
गलत्कुष्टारिरसः ॥
अथ नागबन्धाख्यस्य रसस्यविधि
रुच्यते । यः पुरा मुनिवर्यैरुदा
हृताय श्चिकित्सकजनैः समा
हृतः । यस्तु कुष्ठपरमोपका
रको नागमारणविधिः सलि
ख्यते ॥ सुपक्वांस्थालिकां मे
कां माढकाम्बुप्रतिक्षमां । गुड
चूर्णकृतैः पंकैः रागलं लेपये
द्बहिः । गंधकं भिषगानीयश
रावमितं मुत्तमं । चूर्णयित्वात
दर्द्धं तु तस्यां स्थाल्यां प्रसारये
त् । शरावार्द्धस्य ताम्रस्य पत्रा
ण्यतितनूनिच । स्थाल्यायद्गंध
कं तस्मिन्नुपर्युपरि धारयेत् ।
शरावार्द्धस्य सीसस्य पत्राणिच
तनूनिच । धारयेत्ताम्रपत्राणा
मुपर्य्येवतथैवच । गंधकस्य
शरावार्द्धं पत्राणां मंततस्त्वतः

दत्वा तस्यावशेषंतुसर्वेषामुपरि
क्षिपेत् ॥ ततः पिधानं दत्वातु
विदध्यात् संधिमुद्रणं । गुडं चू
र्णञ्च खटिकं मिश्रयेत्तेन मुद्रये
त् । मुद्रां संशोष्यतां स्थालीं
चुल्यामुपरिधारयेत् । तदधो
ज्वालयेदग्निं द्वादशप्रहराव
धि ॥ स्वांगशीते समुत्तार्य
ततो निष्काशयेच्चौषधं । शि
लायां चूर्णयित्वा तु वस्त्रपूतं
चकारयेत् । त्रिद्रोणजलयोग्यं
तु विशालास्यं महाघटं । गुड
चूर्णकृतैः पंकैः रागलं लेपये
द्बहिः । सर्षपःषड्गुंजायामःस्या
द्द्विषड्गुंजोऽथवा । कनिकःकृ
स्नवर्णः स्यात् किम्वा गोधूमव
र्णवान् । वयस्तस्य विधातव्या
यथा देहो न भिद्यते तालकस्य
दलं यत्नाच्चूर्णयेत् कुडवद्वयं ॥
विषं पलमितं तुत्थं दत्वा दत्वा
स्तरान्तरे । हरितालस्य चूर्णेन
स्तरयेत्कुंभगोदरं । विषं पलमिते
तुत्थं वाकुची पलसंमिता ।
भल्लातकं सुपक्वं यत् प्रस्थमेकं
यवं तथा । सर्वाणि समभा
गीर्ष्या धारयेत महाघटे । ते
षामुपरि संपंच धारयत् कुः

गुडूलीकृते । सर्पस्योपरि संछिद्य धात्र्याऽऽलेपितानि पीडनैः ॥
सनाल मर्कपत्रं तु शरावयुग्मे लेपितम् । स्नुहीदले सनालेच लिपेत् प्रस्थमिते तथा । वटप्ररोहे प्रस्थं च कुमारीप्रस्थसंमिते । दत्वा पिधाने चूर्णेन गुडेन खादिरेणच । मुद्रयेत्तत्सहवह्निना मृदा कुट्टितया पिच मुद्रां संशोष्य चुल्ल्यां तु धारयेत्तं महाचटे । तदधो ज्वालयेदग्निं याम मेकं यथोदने । ततो हठाग्नि दातव्योयावत्स्युः प्रहरादश । पुनः प्रहरमेकंच वह्निं दद्याद्यथोदने । ततो लोहे कटाहे तु प्रागावर्तितयोन्मिते । गोघृतं प्रक्षिपेत्सर्वं मौषधं यत्कृते स्थिते दत्वाग्निं चालयेत्तावद्यावदुत्थितो नलः । भेषजंच भवेत्कूर्ते तत स्तस्मिन् परिक्षिपेत् ॥
भृङ्गायाः स्फटिकाख्याया हेपले तत्र निः क्षिपेत् । भृङ्गस्य टंकण स्यापि पलयुग्मंच निःक्षिपेत् । ततः प्रहरमेकं तच्चालयेच्च लिकोपरि । तत स्ताम्रे च सीसे च मिश्रयित्वावतारयेत् । रसो

नागवयाख्योयं विधिनानेन सिध्यति । आदौ गुंजामिते खादेत्तावन्ति च संयुते । क्रमेणा वर्द्धयेत्तावद्यावद्गुंजाचतुष्टयं । वर्द्धयेत्पाचिवेचापि तथैव ह्रियथा रसे ॥
यवस्य पर्पटी भोक्तुं दद्याद्धा षष्टिकौदनं । लवणं वर्जयेत्सप्तदिनानि गुणालोलुपः । लवणं यः परित्यक्तुं नशक्नोति कथंचन । सैंधवं खादयेत्तेन तच्चसप्तदिनोपरि । रसेनानेन नश्यंति काष्ठानि सकलान्यपि ॥
सन्निपातानाश्च नश्यंति राजयक्ष्मादय स्तथा ॥ इतिनागवयाख्योरसः ॥ ॥ अथवि
पिष्टानां कुष्ठानां चिकित्सा । तत्र सिध्मस्य चिकित्सा । कुष्ठं मूलकवीजं प्रियंगवः सर्षपा रजनी पतत् केशरघृष्टे निहंति च बहुवार्षिकं सिध्मं । शिरीष रसेन पिष्टं मूलकवीजं प्रलेपतः सिध्मं । क्षारेण वा कदल्या रजनी मिश्रेणानाशयति दार्वी मूलकवीजानि तालकः सुरदारुचाप्ता तूलपत्रे सर्वाणि कार्षिकाणि पृथक् पृथक् । पंरवचूर्णितप्राणाः स्यात् सर्वो लेपकत्र वारिणा ।

1377

पेषयेत प्रलेपोयं सिध्मानां नाशनः परः ॥ अथ चर्मदलस्य चिकित्सा । सलिले चाम्रपेषीन्तु किंचित्सैन्धवसंयुता । ताम्रपात्रे विनिर्घृष्टा लेपाच्चर्मदलापहा । आमपेषी आमचूर । सलिलेन तु शुष्काणि घृष्ट्वा धात्रीफलानिच । कराभ्यां स्नावसाप्नोति नरचर्मदलान्वितः ॥
अथ पामाचिकित्सा जीरकस्य पलं पिष्टं सिंहास्यपलेनतथा कटुतैले पचेदाभ्यां सद्यः पामाहरं परं ॥ कटुतैलं षट्पलमिते । जीरकादितैलं ॥
मंजिष्ठा त्रिफला लाक्षा लांगली रात्रि गंधकैः ॥ चूर्णितै स्तैल मादित्यपाकं पामाहरं परं । आदित्यपाकतैलं । सैन्धवं चक्रमर्दश्च सर्षपाः पिप्पली तथा । आरनालेन संपिष्टाः पामा कंडुहराः स्मृताः ॥ अथ कच्छूचिकित्सा अर्कपत्ररसे पक्वं हरिद्रा कल्कसंयुतं । नाशयेत् सार्षपतैलं पामां कच्छूं विचर्चिकां अर्कतैलं मनःशिलालेकाः सीसं गंधाश्मा सिंधुजन्म च

स्वर्णक्षीरी शिलाभेदी शुंठी कुष्ठं चमागधी । लांगली करवीरश्च दन्त्युग्रः क्रिमिहानलः दंती निंबदलस्त्वेभिः पृथक्कर्षमितैर्भिषक् ॥
कल्कीकृतैः पचेत्तैलं कटुप्रस्थद्वयोन्मितं । अर्क्क सी कुण्डगंधेन पृथक्पलमितेनच । गोमूत्रस्याढकेनापि शीते स्वच्छहस्तिना पचेत् । अभ्यंगेन हरेदेतत् कच्छूं दुःसाध्यता मपि ॥ पामानंच तथा कण्डूं त्वग्व्याधिहृद्यिनाम यान् । कच्छूराक्षसनामेदं तैले हारीतभाषितं ॥ कच्छूराक्षसनामतैलं ॥ अथ चेद्रुचिकित्सा । कुष्ठं क्रिमिघ्नोदद्रुघ्नो निशा सैंधव सर्षपाः ॥
अम्लमिष्टाः प्रलेपोयं दद्रुकुष्ठनिसूदनः ॥ दूर्वाभया सैन्धव चक्रमर्द्द कुठेरकाः कांजिकतक्रपिष्टाः त्रिभिःप्रलेपे रपिवद्धमूले दद्रुंच कुष्ठंच विनाशयंति । कुठेरकः ममरी इति लोके । लोके गण्डलकाख्या सिद्धार्थश्च स्नुहीक्षीरं । यत्रामितिमसमभागं स्यादेषां द्विगुणस्तु दद्रुघ्नः । अष्टगुणे गोतक्रेतानि पक्वतानि संदध्यात् । दिवसत्रि

तयाहृष्टं सम्यग्विशोषयेत्तानि ॥
वन्योपलेन घृष्ट्वा दद्रु मालेपयेत्
तेन । सप्ताहाल्लेपोयं दद्रुमव
श्यं विनाशयति ॥ अथश्वित्र
स्य चिकित्सा । विभीतकत्वक्
मलपूजटानां क्वाथेनहृत्वाशु
दुसंयुतेन । अवल्गुजं वीजम
पाकरोति श्वित्राणिकुष्ठान्यपि
पुंडरीकं । मलपूः काकोडुंबरि
का । अवल्गुजः सोमराजी ॥
कुडवावल्गुजवीजं हरितालेन
चतुर्थांशं । मनःशिला ताल
कान्हो गुंजाफलमाग्निमूलेच ।
मूत्रेणागवां पिष्टं सवर्णताकार
कं श्वित्रस्य श्वित्रकुष्ठंब्रजनास्ते
पत्राहेनापिकेन वा । गिरिक
र्ण्याः सितायाश्च मूलेन परिलेपि
ते । गिरिकर्णी नीलापराजिता ।
क्वाथः सराकुचीचूर्णं धात्रीखदि
रसारयोः । पीतेदुक्रं दयवलेश्वि
त्रं संसेवितो हंति ॥ मथितेनापि
वेतचूर्णं काकोडुंबर्यवल्गुजं ।
तैलीक्ता चर्मसेवीस्यात्तेकापी
श्वित्रहृद्भवेत् । मथितं निर्जं
ले विलोडितं दधि । तक्रं च
तुर्थांशजलयुक्तं वस्त्रपूतंदधिः
खदिरस्य पलान्यष्टौ सोमराज्याः

पलद्वयं । त्रिफला पिचुमर्दश्चदा
रुदार्व्यपर्पटी ॥ पृथक् पला
शा मृहृत्यासिंहिकायाः पलद्वयं ।
जलाढकद्वयेसाध्यं यावत् पा
दावशेषितं ॥ क्वाथ्यमानेच मृ
द्वग्नौ घृतप्रस्थं विपाचयेत् । चेत
घ्वलेसोमराज्याः खदिरस्य पले
तथा ॥ पटोलमूले त्रिफले
त्रायमाणेंदुरालभा । कर्षांशे क
टुकंचापि कार्षिके सूक्ष्मपेषिते
पलद्वयं कौशिकस्य शुद्धस्या
त्रप्रदापयेत् । सिद्धं सर्पि रि
दं श्वित्रं हन्यादंभइवानलं । अ
ष्टादशानां कुष्ठानां परमंचै
तदौषधं सोमराजीघृतं नामनि
र्मितं ब्रह्मणा पुरा ॥ लोका
ना मुपकाराय श्वित्रकुष्ठादि
रोगिनां । सोमराजीघृतं ॥
महौषधं महामेदा निंबपत्रा
णि सर्षपाः । मनःशिला च
सिंहास्यपद्मचारिण्यवल्गुजं ॥
हरिद्रे हरितालेच त्रिफला
पीतगान्धकः । एतानि समभा
गानि विषार्द्धांशानि योजयेत्
सर्पिषश्चपलान्यष्टौ देवदारु
रसंशुभं । द्विगुणं त्रिगुणं
तीवं ।

गोमूत्रंच चतुर्गुणं ॥ ताम्रपात्रे
तु संस्थाप्य शने र्मृद्वग्निना प
चेत् । चतुर्भागावशेषंतु सकल्क
मवतारयेत् । अग्नौ लिप्तंतु निः
शब्दं जलमुक्तं विचक्षणः ॥
अभ्यंगपानयो र्योगादाशु सर्वा
न् गदान् जयेत् अष्टादशानां कु
ष्ठानां दद्रूणां श्वित्रिणां तथा ।
दुष्टनाडीषु मर्माणां स्राविणां
कीटिनां तथा । अस्रक्स्राव
परीताये ये च त्यक्तभिषक्
क्रियाः सर्वग्रहविमुक्तानांशी
र्णांगानां विशेषतः ॥ सर्वथा
तुगाते कुष्ठे पतिते भूशिरोरु
हे । वर्जराज्यकृच्छोषाणांतथा
सर्वाश्रवातिनां ॥ पानेभ्यंगे न
स्ये वस्तिकर्मणि नित्य
शः । सप्तरात्रप्रयोगेन सर्वकु
ष्ठानि नाशयेत् । हिमसाहस्रयो
गेण पूर्णचंद्रनिभाननः । जा
तकेश नख श्मश्रु र्भातिषो
डशवर्षवत् अनंगसदृशः साक्षा
त् सर्वामयविनाशनः । एतद्घृत
महाश्रेष्ठं भार्गवेणावतारितं ॥
मनुष्याणां हितार्थाय सर्वव्या
धिहरंपरं । महामार्तंडकमि
दंघृतं सर्वामयार्चितं ॥ इति

महामार्तंडघृतं ॥ इति कुष्ठा
धिकारः ॥ इति भावप्रका
शः ॥

क्षुद्रता स्त्री } अल्पता । क्षुद्रता ।
क्षुद्रत्वं क्ली } अधमत्वं । दरिद्र
त्वं । क्षुद्रस्य भाव इत्यर्थे क्षुद्र
शब्दात् ता त्व तद्धितप्रत्यया
भ्यां एतच्छब्दद्वयं निष्पन्नं ॥

क्षुद्रदंशी स्त्री क्षुद्रदंशिका ।
इति जटाधरदर्शनात् ॥

क्षुद्रबुद्धिः त्रि अल्पमतिः । क्रू
रधीः । अधमचेतनः । क्षुद्रा
बुद्धि र्यस्य इति बहुव्रीहिस
मासनिष्पन्नः ॥

क्षुद्ररोगः पु स्वल्पव्याधिः ॥
तस्यगणना यथा । पलितः १
इंद्रलुप्तः २ दारुणकः ३ अरु
षिका ४ इरिवेल्लिका ५ पनसि
का ६ पाषाणगर्दभः ७ मुख
दूषिका ८ अंधः ९ नीलिका
१० वल्मीकः ११ कक्षा १२ गंधिना
म १३ अग्निरोहिणी १४ विदारि
का १५ चिप्पः १६ परिवर्तिका १७
अवपाटिका १८ निरुद्धप्रका
शः १९ सन्निरुद्धगुदः २० वृष
णकच्छुः २१ अहिपूतनः २२
गुदभ्रंशः २३ शूकावदंष्ट्रः २४

अनुशयी २५ अलसः २६ दा
री २७ कदरः २८ तिलकालकः
२९ मसकः ३० जतुमणिः ३१
न्यच्छः ३२ पद्मिनीकंटकं ३३ अ
जगल्लिका ३४ यवप्रख्या ३५ अं
त्रालजी ३६ विवृता ३७ इंद्रवृद्धा
३८ गर्द्दभिका ३९ जालगर्द्दभः
४० कच्छपी ४१ पार्कगर्द्दुदः ४२
एषां मध्ये येषां लक्षणचिकित्सा
पूर्वं न लिखिता ते चात्र लिख्य
ते ॥ अथ अरुंषिकालक्षणमा
ह । अरुंषि बहुवक्त्राणि बद्ध
क्लीदीनि मूर्द्धनि । कफास्रक्
कृमिकोपेण तानि विद्यादरुं
षिकां । अरुंषी व्रणानि । अथारु
षिकाया श्चिकित्सा । नीलोत्प
लस्य किंजल्का धात्रीफलसमन्वि
तः । यष्टीमधुकयुक्तश्च लेपाद्ध
न्यादरुंषिकां । त्रिफलाया रजो
यष्टीमार्कवोत्पल सारिवा । सैं
धवं पक्क मेतैस्तु तैलं हन्यादरुं
षिकां । त्रिफलाद्यं तैलं ॥
अथाग्निरोहिणीलक्षणमाह ।
कक्षाभागेषु ये स्फोटा जायंते
मांसदारुणाः ॥ अंतर्दाहज्व
रकरा दीप्तपावकसन्निभाः ॥
सप्ताहाद्वा दशाहाद्वा पक्षाद्वा

घ्नंति मानवं । तामग्निरोहिणीं
विद्यादसाध्यां सान्निपातिकीं ।
सप्ताहाद्दशाहादि वात पित्त क
फाधिक्यापेक्षया बोद्धव्यं । घ्नं
तीत्यनुपक्रांताः । उपक्रांतास्तु
साध्या एव । चरकेणाग्निरो
हिण्या श्चिकित्साया उक्तत्वा
त् ॥ तस्या श्चिकित्सा ॥
पित्त वीसर्प विधिना साधये
दग्निरोहिणीं रोहिण्यां लंघनं
कुर्याद्रक्तमोक्षणनृपते । प्रा
शीरस्य च संशुद्धिं तांतु वृद्धांप
रिमजेत् ॥ अथ विदारिका
लक्षणमाह । विदारिकन्दव
द्वृत्तो कक्षावंक्षण संधिषु ।
रक्तो विदारिकां विद्यात् सर्वजां
सर्वलक्षणां । अत्र पिडका मि
ति विशेष्यपद मध्याहरणीयं ।
अथ तच्चिकित्सा । विदारिकायां
प्रथमं जलौकायोजनं हितं ।
पाटनं च विपक्वायां ततो व्रण
विधिः स्मृतः । अथावपाटिका
लक्षणमाह अल्पीयसीं यदाह
र्षात् बलाद्गच्छेत् स्त्रियं नरः
हस्ताभिघातादथवा चर्मण्युद्व
र्तितेबलात् । मर्द्दनात्पीडना
द्वापि शुक्रवेगाविघाततः । यस्य

वपाट्यते चर्मतां विद्यादवपाटि
कां । वातेन कर्कशा रूक्षा सूक्ष्मा
कृष्णा रुग्ग्रथिता । पित्तेन पीता
रक्ता वा दाहवत्या समन्विता ॥
श्लेष्मणा कठिना स्निग्धा कंडू
मत्यल्पवेदना । अल्पीयः अल्प
तरं योनिच्छिद्रं यस्यास्तां । अव
पाट्यते विदार्यते । अथ तस्या
श्चिकित्सा । स्नेह स्वेदै रिमां
वैद्य श्चिकित्सेदवपाटिकां ॥
अथ सन्निरुद्धगुदस्य लक्षण
माह । वेगसंधारणाद्वायुर्विह
तो गुदसंश्रितः । निरुणद्धि म
हास्रोतः सूक्ष्मं द्वारं करोति हि ।
मार्गस्य सौक्ष्म्यात् कृच्छ्रेण पु
रीषं तस्य गच्छति । सन्निरुद्धगु
दं व्याधि मेतं विद्यात् सुदुस्तरं ।
अथ तस्य चिकित्सा । सन्निरु
द्धगुदे तैलैः सेको वातहरैर्हितः
तथा निरूहपकशक्रियापि क
थिता हिता ॥ अथाजगल्लि
कालक्षणमाह । स्निग्धा सव
र्णा ग्रथिता नीरुजा मुद्गसन्निभा
कफवातोत्थिता ज्ञेया बालाना
मजगल्लिका ॥ ग्रथिता गुल्फि
तेव । मुद्गसन्निभा मुद्गाकृतिः
अथ तस्याश्चिकित्सा ॥

तत्राजगल्लिका मामां जलौ
काभिरुपाचरेत् । शुक्ति सौरा
ष्ट्रिकाक्षारकल्कै श्चालेपये
त्सुधीः । कठिनां क्षारयोगैस्तु
द्रावयेदजगल्लिकां । अपक्वामज
गल्लिकां मूर्वा कल्केरपि वि
लेपयेत् । पक्कां व्रणविधानेन
यथोक्तेन प्रसाधयेत् ॥
अथान्त्रालजीलक्षण माह ।
घनामवक्त्रां पिडका मुन्नतां
परिमंडलां । अंत्रालजीमल्प
पूयां तां विद्यात् कफवातजां
घनां कठिनां । परिमंडलां व
र्तुलां । अल्पपूयां स्वल्पस्रावां
अथ तस्या श्चिकित्सा । अंत्रा
लजीं यवप्रख्यां पूर्वं स्वेदैरु
पाचरेत् । मनःशिला देवदा
रु कुष्ठकल्कैः प्रलेपयेत् ॥
पक्वां व्रण विधानेन यथोक्ते
न प्रसाधयेत् । इति भावप्रका
शे क्षुद्ररोगाधिकारः ॥
क्षुद्ररोगाः पुं अल्पस्थास्वरोगाः
यथा । रस निमित्त मेव स्थौल्य
कार्श्यं च तत्र श्लेष्मलाहारसेवि
नोऽध्यशनशीलस्याव्यायामिनो
दिवास्वप्नरतस्य चाम एवान्न
रसो मधुरतरश्च शरीरमनु

क्रामन्नतिस्नेहात् क्लेदो जनयति तदतिरेकोऽल्पमापादयति तत मतिस्थूले क्षुद्रश्वासपिपासा ज्वर स्वप्न स्वेद गात्रदौर्गन्ध्यक्रथन गात्रसाद गद्गदत्वानि क्षिप्रमेवाविशन्ति। इत्यादि सुश्रुते १९ अध्यायः॥

तस्य निदानादि यथा। यैरेव कारणैर्हिक्का बहुभिः संप्रवर्त्तते। तैरेव कारणैः श्वासो घोरो भवति देहिनां॥ विहाय प्रकृतिं वायुः प्राणोऽथ कफसंयुतः। श्वासयत्यूर्द्ध्वगो भूत्वा तं श्वासं परिचक्षते॥ क्षुद्रकस्तमकश्छिन्नो महानूर्द्ध्वश्च पञ्चधा॥ भिद्यते स महाव्याधिः श्वास एको विशेषतः॥ प्राग्रूपं तस्य हृत्पीडा भक्तद्वेषोऽरतिः परा॥ आनाहः पार्श्वयोः शूलं वैरस्यं वदनस्य च। किञ्चिदारभमाणस्य यस्य श्वासः प्रवर्त्तते। निषण्णस्यैति शान्तिं च स क्षुद्र इति संज्ञितः॥ इति च सुश्रुते ५२॥ अध्यायः॥

क्षुद्रश्वेता स्त्री अर्क्कादिगणान्तर्गतवृक्षविशेषः। यथा। अर्क्कालर्क्क करञ्जद्वय नागदन्ती मयूरक भार्गी रास्नेन्द्रपुष्पी क्षुद्रश्वेता महाश्वेता वृश्चिकाल्यलवणा तापसवृक्ष इति। अर्क्कादिको गणो ह्येष कफमेदो विषापहः। कृमि कुष्ठप्रशमनो विशेषाद्व्रणशोधनः॥ इति सुश्रुते ३९ अध्यायः॥

क्षुद्रहा पुं महादेवः। इति शिवसहस्रनामस्तोत्रं। इति कश्चित्। महाभारतीयानुशासनपर्वणि शिवसहस्रनामस्तोत्रे एतन्नामनास्ति। लिङ्गपुराणोक्तविष्णुकृतशिवसहस्रनामस्तोत्रे तु क्षुद्रहा इति नाम वर्त्तते। यथा। प्रशान्तबुद्धिरक्षुद्रः क्षुद्रहा नित्यसुन्दरः। धैर्याग्र्यधुर्यो धात्रीशः साकल्पः शर्वरीपतिः॥ इति वृहत्तन्त्रसारः॥

क्षुद्रहिङ्गुली स्त्री कण्टकारी॥ इति शब्दचन्द्रिकायां क्षुद्रहिङ्गुलिकाशब्ददर्शनात्॥

क्षुद्राञ्जनं क्ली चक्षुरोगौषधविशेषः। यथा। गोमूत्रपित्तमदिरा शकृद्धात्रीरसे पचेत्। क्षुद्राञ्जनं रसेऽचाम्ले यकृतस्तेन फलेपिवा॥ गोमूत्राजार्णवमल

विश्रुतः। प्रसन्धेरभवत् पुत्रः क्षुपो प्रत्याभिसंस्थितः। क्षुपस्य पुत्रस्त्विक्ष्वाकुर्महीपालोऽभवत् प्रभुः। इति महाभारते आश्वमेधिके सर्वाणि ४ अध्यायः॥ द्वारकापश्चिमदिक्स्थपर्वतः। यथा। दक्षिणस्यां लतावेष्टः पञ्चवर्णो विराजते। इन्द्रकेतुप्रतीकाशः पश्चिमस्यां तथा क्षुपः। इति महाभारते हरिवंशे द्वारवतीविशेषनिर्माणे ९८ अध्यायः॥

क्षुपकः पुं क्षुपः। क्षुद्रवृक्षः। यथा। अतो यो विपरीतः स्यात् सुखसाध्यः स उच्यते। अवद्धमूलः क्षुपको यद्वदुत्पाटनेऽसुखः। इति सुश्रुते प्रथमभागे २४ अध्यायः॥

क्षुभः पुं प्रवर्त्तकः। यथा। ये च तेऽनुचराः सर्वे पादोपान्तं समाश्रिताः। मातृचारणदेवा घास्तान् स्तान् वन्दे शिवान् क्षुभान्। इति महाभारते वनपर्वणि ३ अध्यायः। अस्मिन् क्षुभान् विघ्नदशन्यादिप्रवर्त्तकान्। इति तट्टीकायां नीलकण्ठः॥

क्षुभा स्त्री निग्रहानुग्रहकर्त्री देवता। यथा। क्षुभया सहितामैत्री याश्चान्या भूतमातरः। तास्सर्वा नमस्यामि पंक्तमा शरणागतः। इति महाभारते वनपर्वणि ३ अध्यायः। क्षुभा मैत्री निग्रहानुग्रहकर्म्मौ देवते भूतमातरः गौरी पद्मादयः। ब्राह्मी माहेश्वर्यादयश्च इति तट्टीकायां नीलकण्ठः॥

क्षुरकर्म्म क्ली क्षुरद्वारा केशादिकर्त्तनं। क्षौरान्तरस्नानेकर्त्तव्यं यथा। दुःस्वप्ने मैथुने वान्ते विरिक्ते क्षुरकर्म्मणि चिति धूम श्मशानास्थ्निस्पर्शने स्नानमाचरेत्। इति मिताक्षरायां प्रायश्चित्ताध्याये पराशरवचनं। अस्मत्तैलेऽपि द्रष्टव्यं॥

क्षुरधारः पुं अस्त्रविशेषः। यथा। खड्गांश्च दीप्तान् दीर्घांश्च कलापांश्च महाधनान्। विपाठान् क्षुरधारांश्च धनुर्भिर्निदधुः सह। इति महाभारते विराटपर्वणि पाण्डवप्रवेशे ६ अध्यायः। विपाठान् बाणविशेषान् तादृशान् क्षुरधारांश्च इति तट्टीकायां नीलकण्ठः

क्षुरस्य शाणितमुखं ।
तद्युक्ते त्रि ॥
क्षुरधारा स्त्री क्षुरस्य धारः
यथा । अन्तकः पवनो मृत्युः
पातालं वडवामुखं । क्षुरधारा
विषं सर्पो वह्निरित्येकतः
स्त्रियः । इति महाभारतेऽनु
शासनपर्व्वणि पञ्चचूडानारद
संवादे ३८ अध्यायः । अन्त
कादिवत् सद्योनाशका यस्य
र्थः । इति तट्टीकायां नीलकं
ठः ॥ क्षुरभाण्ड क्ली क्षुराधारः
भोंडि इति भाषा । यथा । भ
द्रे शीघ्रमानीयतां क्षुरभा
ण्डेन क्षौरकर्मकरणाय ग
च्छामि । सापि छिन्ननासिका
गृहमध्यस्थितैव कार्य्यकरणा
पेक्षयात् क्षुरभाण्डात् क्षुरमेकं
समाकृष्य तस्याभिमुखं प्रेष
यामास । इति विष्णुशर्म्मवि
रचितपञ्चतन्त्रे १ तन्त्रे ॥
क्षेत्रं क्ली गृहं । नगरं । इति
वैजयन्तीकोषः ॥
क्षेत्रजः पुं द्वादशविधपुत्रान्त
र्गतपुत्रविशेषः । स च देव
रादिना भ्रातृभार्य्यायां य
थोक्तविधानेनोत्पन्नः । यथा
अपुत्रां गुर्व्वनुज्ञातो देवरः पु
त्रकाम्यया । सपिण्डो वा सगो
त्रो वा घृताभ्यक्त ऋतावियात्
आगर्भसम्भवाद्गच्छेत् पतित
स्त्वन्यथा भवेत् । अनेन वि
धिना जातः क्षेत्रजोऽस्य भ
वेत् सुतः । इति मिताक्षरा
यामाचाराध्यायः ॥
अन्यत् पूर्व्वलिखितं ॥
क्षेत्रदः पुं वटुकभैरवः । यथा
क्षेत्रदः क्षेत्रपालश्च क्षेत्रज्ञः स
त्रियो विराट् । श्मशानवासी
मांसाशी खर्प्पराशी मखान्त
कृत् । इति विश्वसारोद्धारतन्
त्रे आपदुद्धारकल्प वटुक
भैरवस्तोत्रे ॥ क्षेत्रदातरि
त्रि ॥
क्षेत्रदेवता स्त्री केदाराधिष्ठा
त्री । सा च सर्पाद्रिरूपा । यथा
रत्नाकरः कथयति । आलिक
स्मिंश्चिद्धिष्ठाने हरिदत्तो ना
म ब्राह्मणः । तस्य च कृषिक्रि
र्त्तनस्त्वेव निष्फलः कालो
ऽतिवर्त्तते । तस्यैकस्मिन् दिव
से स ब्राह्मणो ऽस्मकालावसा
नेऽश्मार्त्तैः स्वक्षेत्रमध्ये वृक्षच्छा
यायामसमः । अनतिदूरे वल्मी

कोपरि प्रसारितं वृहत्स्फटा
टोपं भीषणं भुजङ्गमं दृष्ट्वाचि
न्तयामास । नूनमेषा क्षेत्रदेव
ता मया कदापि न पूजिता ।
तेनेदं मे कृषिकर्म्मविफलीभ
वति । इति पञ्चतन्त्रे काकोलू
कीये नाम ३ तन्त्रे ॥
क्षेत्रपः पुं वटुकभैरवः ॥
यथा । अक्षेण भूताग्र्यन्तस्य
वदने तीक्ष्णादर्शने । क्षेत्रपक
रालो भीष्मे क्षेत्रपाले हृदिस्थ
ते ॥ इति विश्वसारोद्धारतन्त्रे
आपदुद्धारकल्पे वटुकभैरव
स्तोत्रे ॥ ॥ क्षेत्ररक्ष
के त्रि ॥
क्षेत्रपतिः पुं केदाराधिपः ।
यप्रस्वामी । यथा । अथ प्रभाते
स क्षेत्रपतिर्लगुडहस्तस्तं प्र
देशमागच्छन् काकेनावलो
कितः । इति हितोपदेशे मित्र
लाभप्रकरणं ॥
क्षेत्रपालरसः पुं ग्रहणीयुक्त
शोथस्यौषधं । इत्यवदीतिख्या
ते । यथा । हिङ्गुलञ्च विषं ता
म्रं लौहं तालकटङ्कणं जीर
माहिफेनाच्च समभागं विम
र्द्दयेत् । यवार्द्धा वटिका कार्य्या
पथ्यं दुग्धोदनं हितं । अलव
णं वारिहीनञ्च दातव्यं भिषग्
वरैः । गुरुशोथ मग्निमान्द्यं ग्र
हणीं मतिदुस्तरां । ज्वरञ्च वि
षमं जीर्णं नाशयेन्नात्र संशयः
इति भैषज्यरत्नावली ॥
आहिफेणं अहिफेणं ॥
क्षेत्रयमानिका स्त्री क्षेत्रजात
यमानी । यथा । उपाधि कुग्रग्रो
ये तु वचा क्षेत्रयमानिके ।
इति नानार्थे त्रिकाण्डशेषः
क्षेत्रलिप्ता स्त्री भूमण्डलस्य
कला । यथा । अथ यदि ग्रहाग्र
होदयासुभि रष्टादशशतानि
क्षेत्रलिप्ता लभ्यन्ते तदा तदन्त
रकलासुभिः किमिति फले
क्षेत्रलिप्ताः ता ग्रहार्कभुक्त्य
न्तरेण भाज्याः । भुक्त्यन्तरे हि
क्षेत्रलिप्तान्तरात्मकमतः सजा
तीयकरणाय क्षेत्रलिप्तीकर
णं भुक्त्यन्तरेणैको दिवसो लभ्य
ते इति युक्तं मुक्तं । इति सि
द्धान्तशिरोमणौ गणिताध्याये
ग्रहोदयास्ताधिकारः ॥
असुभिः दशविपलैः । यथा । गु
र्व्वक्षरैः खेन्दुमितै रसुस्तैः ष
ड्भिः पलं तैः घटिका खषड्भिः ॥

इति तत्रैव कालमानाध्यायः
क्षेत्रवित् पुं क्षेत्रज्ञः । जीवा
त्मा । यथा । त्वं नरेन्द्र जग
तामथ तस्थूषाञ्च देहेन्द्रिया
सुधिषणात्मभि रावृतानां
यः क्षेत्रवित्तपनया हृदि विश्व
गाविः प्रत्यक् चकास्ति भगवां
स्तमवेहि सोऽस्मि ॥ इति श्री
भागवते ५ स्कंधे ११ अध्याये
१२ श्लोकः ॥ यस्मादनात्म
इति स्वनर्थहेतुः तत्तस्माज्ज
गतां जङ्गमानां तस्थूषां स्थाव
राणाञ्च देहादिभिः आत्मना
अहंकारेणचावृतानां हृदिय
श्चकास्ति प्रकाशते तन्मवेहि ।
कथं सोऽस्मीति । सोऽस्मीति
पाठे सएवैकास्ति ततोन्यद
सदित्यर्थः । ननुजीवो हृदि
चकास्ति नान्य स्तत्राह ॥
क्षेत्रविदं जीवं तपति निय
मयतीति क्षेत्रवित्तपः तस्य
भावस्तत्ता तया अन्तर्यामित्वे
न । यद्वा । क्षेत्रवित्ते अहं
ममत्वास्पदे पातीति क्षेत्रवि
त्तपः तेनरूपेण जीवस्वरूपा
पत्तेर्यात्र पाति । ननु कर्म
जीवं नियच्छति नत्वादिः प

सत्त्वः । तर्हि वुद्धि नै प्रत्यक्
प्रतिलोमं चकास्ति बुद्धिस्तु प
राक् विषयाकारेण तर्ह्यहं
कारः न विषयक् व्यापकत्वेन स
र्वपरिच्छिन्नः । एवंभूतो यो भ
गवान् तमवेहीति । इति तट्टी
कायां श्रीधरस्वामी ॥
क्षेत्रसीमा स्त्री अंगारतुषघ
टादिद्वारा चिह्नित भूमिमर्या
दा । यथा । सीमा क्षेत्रादिमर्या
दासा चतुर्विधा । जनपदसीमा
ग्रामसीमा क्षेत्रसीमा गृहसीमा
चेति । इति मिताक्षरायां व्यव
हाराध्याये सीमाविवादप्रक
रणं ॥ विस्तारस्तु सीमावि
वादशब्दे द्रष्टव्यः ॥
क्षेत्रिकः पुं कलत्रस्वामी ॥
यथा । हरेत्तत्र नियुक्तायां
जातः पुत्रो यथौरसः । क्षेत्रि
कस्य तु तद्बीजं धर्मतः प्रसवश्च
सः । इति मानवे ९ अध्याये
१४५ श्लोकः । हरेदिति त
त्र नियुक्तायां योजातः क्षेत्र
जः पुत्र औरस इव धनं
हरेत् यस्मात् तत्तस्य कारण
भूतं बीजं तत् क्षेत्रस्वामिन
ए । तत्कार्यं करणत्वात् इति

1389

तट्टीकायां कुल्लूकभट्टः ॥
क्षेत्री पुं स्वामी । भर्ता ॥
यथा । भर्तुः पुत्रं विजानंति श्रु
तिद्वैधं तु भर्तरि । आहुरुत्पा
दकं केचिदपरे क्षेत्रिणं विदुः ॥
इति मानवे ९ अध्याये ३२
श्लोकः ॥ भर्तुरिति भर्तुः
पुत्रो भवतीति मुनयो मन्य
न्ते । भर्तरि द्विप्रकारो श्रुतिर्व
र्तते । केचित्पादकमवोढा
रमपि भर्तारं तेनपुत्रेण पु
त्रिणमाहुः । अन्ये तु वोढा
रं भर्तारमनुत्पादकमपि
अन्यजनितेन पुत्रेण पुत्रिण
माहुः ॥ इति तट्टीकायां
कुल्लूकभट्टः ॥
क्षेत्रोपेतः पुं श्वफल्कपुत्रः ॥
इति केचित् । क्षेत्रोपेत इति
साधुपाठः । यथा । युगान्धरो
नमित्रस्य वृष्णिः पुत्रोऽपरस्त
तः । श्वफल्कश्चित्ररथश्चैव
तत्पिताञ्च श्वफल्कतः ॥
अक्रूरप्रमुखा आसन् पुत्रा द्वा
दश विश्रुताः । आसङ्गः सार
मेयश्च मृदरो मृदुरिर्गिरिः ॥
धर्मवृद्धिः सुकर्माच क्षेत्रोपे
तोऽरिमर्दनः । शत्रुघ्नो गंध

मादश्च प्रतिवाहुश्च द्वादश ।
इति श्रीभागवते ९ स्कंधे २४
अध्यायः ॥
क्षेपणं क्ली प्रस्तरादीनां दूर
प्रेरणार्थरज्जुनिर्मितशिक्यं ।
फिंगा इति भाषा । यथा । प्रव
वुर्वायवश्चण्डा स्तमः पांशवमै
रयन् । दिग्भ्यो निपेतुर्ग्रावाणः
क्षेपणैः प्रहिता इव ॥ इति
श्रीभागवते ३ स्कन्धे १९ अध्या
यः । पांशुकृततमश्च प्रेरितवन्तः
क्षेपणैः यंत्रैः । इति तट्टी
कायां श्रीधरस्वामी ॥
क्षेपणीयं क्ली पाषाणप्रक्षेप
णास्त्रं । यथा । तत्र जन्यं रघोर्घो
रं पार्वतीयै र्गणै रभूत् ॥
नाराचक्षेपणीयाश्मनिष्पेषो
त्पतितानलं ॥ इति रघुवंशे
४ सर्गः । तत्रेति तत्रहिमा
द्रौ गणैः सह रघोर्युद्धमभू
त् । किं गणैः पर्वते उत्पन्नैः
किं युद्धं भयंकरं । पुनः किंना
राचानां बाणविशेषाणां क्षेप
णीयानां पाषाणप्रक्षेपणास्त्रा
णां ये अश्मानस्तेषाञ्च नि
ष्पेषेण उत्पतिता अग्नेयोय
स्मिन् । इति तट्टीका । क्षेपण

योगो वि ॥
क्षेपदिनं क्ली अहर्गणानयनार्थं क्षीयविधानं प्रयुक्तक्षयनाडी। यथा। इदानीं महर्गणार्थं क्षेपदिनान्याह। क्षीयनक्षत्रोपयुताः क्षयनाड्यः क्षेपदिनानि दिनागणसिद्धौ। एवं मानीता ये तयाहा क्षेपा मध्ये यत्नाडिका ये तत्र क्षीयविधानप्रयुक्तेषु दिनाद्ये कल्प्ये। या घटिकास्तानि दिनानि। या विघटिकास्ता घटिकास्तासां मध्ये यो येषु स्युः शास्त्राणि पानीयपलानि कल्प्यानीति। इति सिद्धान्तशिरोमणौ गणिताध्याये प्रत्यब्दशुद्धिः ॥

क्षेपपातः पुं ग्रहकक्षाक्रान्तिमंडलयो र्योगः। यथा। इदानीं क्रान्तिवृत्त माह। क्रान्तिवृत्ते विपर्ययं शृङ्खके भ्रमत्यत्र भानुस्थ्रमार्द्धे उभा भानुतः। क्रान्तिपातः प्रतीपं तथा प्रस्फुटाः क्षेपपाताश्चलनवोपकृत्। इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥

क्षेमं क्ली शाल्मलीद्वीपस्य वर्षविशेषः। यथा। श्वेतो जंबुप्रमाणेन द्वीपाख्यातिकरो हिरण्मय यउत्थितो यत्राग्निरुपास्ते सप्तजिह्वः। तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्तवर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम। शिवं वयसं सुभद्रं शान्तं क्षेमं मस्तमभयमिति वर्षाणि। इति श्रीभागवते ५ स्कन्धे २० अध्यायः ॥ मठविशेषः। यथा। मठे यथोच वाराहक्षेत्रे यशोविधायकः। श्रीकण्ठक्षेममठयो राशीतुष्कधरान्तिके। इति राजतरङ्गिण्यां ८ तरङ्गः ॥

क्षेमः पुं धर्मेण शान्त्या मुत्पादितः पुत्रः। यथा। अवसाय प्रजज्ञे वै क्षेमं शान्तिरसूयत सुखं स्तुष्टिर्यशः कीर्त्तिं दिवे ते धर्मसूनवः। इति विष्णुपुराणे १ अंशे ७ अध्यायः ॥ कलिङ्गदेशस्य राजा। यथा क्षेमोग्रतीर्थः कहरः कलिङ्गेषु नराधिपः। मतिमांश्च मनुष्येन्द्र ईश्वरश्चेति विश्रुतः इति महाभारते आदिपर्वणि ६७ अध्यायः ॥

वंशे वंशीयस्तु विराजपुत्रः। यथा। ततः सुतं जयाहिषः शुचिस्तस्य भविष्यति। क्षेमोऽथसुव्रतस्तस्माद्धर्मसूत्रः समस्ततः इति श्रीभागवते ९ स्कन्धे २२ अध्यायः ॥ लब्धपरिपालनं। यथा। उपेयादीश्वरं चैव योगक्षेमार्थसिद्धये। स्नात्वा देवान् पितॄंश्चैव तर्पयेदर्चयेत्तथा। इति याज्ञवल्क्यसंहितया माचाराध्यायः। तदनंतर मीश्वर मभिषेकादिगुणयुक्तं सन्यवा श्रीमन्तमकुत्सिते योगक्षेमार्थं। अलब्धलाभो योगः। लब्धपरिपालनं क्षेमः तदर्थ मुपयात्। उपासीत उपेयादित्यनेन सेवा प्रतिषेधाति वेतनग्रहणेन आज्ञाकरणे सेवा तस्याः श्ववृत्तित्वेन निषेधात्। इति तट्टीकामिताक्षरा ॥

क्षेमकः पुं नागविशेषः ॥ यथा। नागः शङ्खमुखश्चैव तथा कूष्माण्डकोऽपरः। क्षेमकश्च तथा नागो नागः पिण्डारकस्तथा ॥ इति महाभारते आदिपर्वणि ३५ अध्यायः ॥ जनमेजयवंशीयनृपराजविशेषः। यथा। शतानीकाद्दुर्दमन स्तस्यापत्यं महीनरः। दण्डपाणि र्निमिस्तस्य क्षेमको भविता यतः। इति श्रीभागवते ९ स्कन्धे २२ अध्यायः ॥ राक्षसविशेषः। यथा। एतस्मिन्नेव काले तु पुरीं वाराणसीं नृप। शून्यां निवेशयामास क्षेमको नाम राक्षसः इति महाभारते हरिवंशे २९ अध्यायः ॥

क्षेमकारः त्रि क्षेमंकरः। मङ्गलकर्त्ता। यथा। क्षेम प्रियमद्रात् कुर्वा इति सूत्रेण क्षेमशब्दात् परस्य कृधातोः खप्रत्ययाभावपक्षे ऽणात् षात्विति षणप्रत्ययेन निष्पन्नः। इति मुग्धबोधव्याकरणं ॥

क्षेमकृत् त्रि मङ्गलकारकः। यथा। दुर्लभं प्राकृतं वाक्यं दुर्लभः क्षेमकृत् सुतः। दुर्लभा सदृशी भार्या दुर्लभः स्वजनः प्रियः इति चाणक्ये ५४ श्लोकः ॥

क्षेमगुप्तः पुं काश्मीरदेशस्य राजविशेषः। यथा। क्षेमगुप्ताभिधानोऽभूदस्य राजात

दात्मजः। आसवासेवनोत्सिक्त विनताश्रयण संज्वरः॥ इति राजतरङ्गिण्यां ८ तरङ्गः॥

क्षेमजित् पुं राजविशेषः। स तु मगधदेशे षट्त्रिंशद्वर्षपर्य्यन्तं राजा भविष्यति। तस्य नामान्तरं क्षेमार्च्चिः। इति मत्स्यपुराणमिति केचित्॥

क्षेमदर्शी [न्] पुं चेदिवंशीयराजविशेषः। यथा। कोशलानामाधिपत्ये सम्प्राप्ते क्षेमदर्शिनं मुनिः कालकवृक्षीय आजगामेति नः श्रुतं॥ इति महाभारते शान्तिपर्व्वणि राजधर्मे ८० अध्यायः॥

क्षेमधन्वा [न्] पुं सूर्य्यवंशीयराजविशेषः। स तु पुण्डरीकपुत्त्रः। यथा। नभसः पुण्डरीकस्तु क्षेमधन्वा ततः स्मृतः। क्षेमधन्वस्तु तस्यासीद्देवानीकः प्रतापवान्। इति महाभारते हरिवंशे १९ अध्यायः। सावर्णनामकतृतीयमनुपुत्त्रः। यथा। संवर्त्तनः सुशर्म्मा च देवानीकः पुरूद्वहः। क्षेमधन्वा दृढायुश्च आदर्शः पाण्डको मनुः। सावर्णस्य तु पुत्त्रा वै तृतीयस्य नव स्मृताः॥ इति च तत्रैव ७ अध्यायः॥

क्षेमधर्म्मा [न्] पुं राजविशेषः॥ यथा। ततश्च शिशुनागस्य पुत्त्रश्च काकवर्णो भविता तस्य पुत्त्रः क्षेमधर्म्मा तस्यापि क्षेत्रौजाः इति विष्णुपुराणे ४ अंशे २४ अध्यायः॥

क्षेमधूर्त्तिः पुं राजविशेषः॥ यथा॥ बृहन्तस्तत्र मद्यायां नैकैकस्य दृढविक्रमं। क्षेमधूर्त्तिर्महाराज विशाखोरसि मार्गणैः। इति महाभारते द्रोणपर्व्वणि ९८ अध्यायः॥

क्षेममूर्त्तिः पुं करूषदेशीयराजविशेषः इति केचित्। क्षेमधूर्त्तिरिति साधुपाठः। यथा। कारूषकाश्च राजानस्ते मध्यन्तिस्थैव च। कृतायुह दृहस्यैव वृहत्सेनस्यैव च॥ इति महाभारते आदिपर्व्वणि ६७ अध्यायः॥

क्षेमशूरः पुं निर्भयस्थाने बलप्रकाशकः। यथा। किं क्षेमशूरैर्विबुधैरसंयुगविकत्थनैः। रहोजुषा किं हरिणा शम्भुना वा वनौकसा। इति श्रीभागवते १० स्कन्धे ४ अध्यायः॥

क्षेमे निर्भयदेशे शूरैः। संयुगादन्यत्र विकत्थने प्रौढवादो येषां तैः। ननु हरेर्विभेमि शम्भोश्चेति चेत्तत्राह रहोजुषेति। सर्व्वस्यान्तःप्रविष्टेन न क्वचिदपि बहिर्दृष्टेनेत्यर्थः। पुरुषप्रवेशरहितमिलावृतवनमोको यस्य तेन शम्भुना। इति तट्टीकायां श्रीधरस्वामी॥

क्षेमाधिः पुं मिथिलादेशस्य सूर्य्यवंशीयराजविशेषः। यथा। अरिष्टनेमिस्तस्यापि पुत्त्रास्तस्य तु पार्श्वकः। ततश्चित्ररथो यस्य क्षेमाधिर्मिथिलाधिपः। इति श्रीभागवते ९ स्कन्धे १३ अध्यायः॥

क्षेम्यः पुं राजविशेषः। यथा। मन्वन्तरेऽपि दायादः सुनीथो नाम धार्म्मिकः। सुनीथस्य च दायादः क्षेम्यो नाम महायशाः। क्षेम्यस्य केतुमान् पुत्त्रः सुकेतुस्तस्य चात्मजः। इति महाभारते हरिवंशे २९ अध्यायः॥

क्षैण्य क्ली क्षीणता। यथा। क्षैण्यत्वेनेतु प्रायिकमरणज्ञाना प्रवृत्तस्य चान्द्रायणपादादिकं इति प्रायश्चित्ततत्त्वं। अपि च अस्मिन् धनजनक्षैण्यनिमित्ते मण्डलोत्क्रमे। सर्व्वतो दिक्षु मुक्तस्यावधानस्थपरम्परा। इति राजतरङ्गिण्यां ५ तरङ्गः॥

क्षोद्यः त्रि क्षोदनीयः। चूर्णीकरणीयः। यथा। ववन्धुर्बन्धनीयांश्च क्षोद्यान् संचुक्षुदुस्तथा। बिभिदुर्भेदनीयांश्च तांस्तान् देशान्नरास्तदा। इत्यार्षे रामायणे वाल्मीकीये अयोध्याकाण्डे ८० सर्गः। बन्धनीयान् सेतून् क्षोद्यान् क्षोदनीयान् शर्कराभूयिष्ठप्रदेशान्। संचुक्षुदुः चूर्णयामासुः। भेदनीयान् जलनिर्गमार्थं भेद्यान्। इति तट्टीका॥

क्षोभणं त्रि क्षोभजनकं॥ संचलनकारकं। यथा। आहतांगैः समरस्ते त्वं देवप्रहरणैस्तदा। अक्षोभ्याणां समुद्राणां क्षोभणं क्षिप्रकारिणं। इत्यार्षे रामायणे वाल्मीकीये अरण्यकाण्डे ३२ सर्गः॥ क्षोभणं क्षोभकर्त्तारं। इति तट्टीका॥

क्षोभणः पुं बटुकभैरवः ॥ यथा। कंकालधारी मुंडी च व्यालयज्ञोपवीतवान्। क्षोभणो मोहनः स्तंभी मारणः क्षोभण स्तथा। इति विश्वसारोद्धारतंत्रे तस्य स्तोत्रे ॥

क्षोणीभुक् पुं राजा। यथा। कृत्वा शास्त्रविभीषिकां कतिपयग्रामेषु दीनाः प्रजा मुष्णंतो विट जल्पितै रुपहताः क्षोणीभुजः स्मो किल। विद्वांसोपि वयं किल त्रिजगतो सर्वाधि त्यापदा मीश स्तत्परिचर्यया न गणिता ये दैषनारायणाः। इति शांतिशतके १ परिच्छेदे ११ श्लोकः ॥

क्षोणीमयः पुं मत्स्यः। पृथ्व्याश्रयः। यथा। मत्स्यो युगांतसमये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतः विस्रंसितानुरुभये सलिले मुखान्म आदाय तत्र विजहार ह वेदमार्गान्। इति श्रीभागवते २ स्कंधे ७ अध्यायः। मत्स्यावतारः माह। मत्स्योभा विना वैवस्वतेन मनुना दृष्टः क्षोणीमयः पृथ्वीमयः पृथिवी प्रधान स्तदाश्रय इत्यर्थः। अत एव निखिलजीवनिकायानामाश्रयः। मे सुरवाद्विस्रंसितान् गलितान् वेदस्य मार्गान् वेदानादाय तत्र युगांतसलिले विजहार। हृ हर्षे। इति तट्टीकायां श्रीधरस्वामी ॥ क्षोणीमयोपि पाठः ॥

क्षौद्रः पुं वर्णसंकरविशेषः। सत्तमसजातीयात् मागध्यां जातः। यथा। चतुरो मागधीसूते क्रूरान् मायोपजीविनः। मांस स्वादुकरं क्षौद्रं सौगंध्यमिति विश्रुतं। इति महाभारते अनुशासनपर्वणि ४८ अध्यायः। एते मागध्या मायोपगवादित्यश्चतुर्भ्यः क्रमाज्जायंते। इत्युपसंहरति चतुर इति। एते चत्वारो वागुरादिनाजीवंतीति मायोपजीविनः ॥ अन्येपि चत्वारो मागध्यांविश्रुताः सजातीयादुत्पद्यंते तेषां नामानि मांसमित्यादि मांसं मांसविक्रेतारं। स्वादुकरं मांसैव संस्कारकं। क्षौद्रं सूदं सूद मिति पाठश्चेपि शाकाद्यन्नपाककरं ॥

सौगंध्यं उत्कलतया सैरंध्रं। एकस्यैव मागधस्य एतद्वृत्ति चतुष्टयमुक्त मिति ज्ञेयं। इति तट्टीकायां नीलकंठः। क्षुद्रता। इति पाणिनिव्याकरणं

क्षौरपव्यं क्ली क्षुरवज्रतुल्य तीक्ष्णाग्रपृष्ठं। यथा। नद्दी उभयतोवाहा पंचपंचाशत्तरश हे। क्वचिद्धंसे चित्रकपथे क्षौरपव्यस्वये श्यामि। इतिश्रीभागवते ६ स्कंधे ५ अध्यायः। पंचपंचाशत्पंचविंशते। अद्रुते शृहे। क्षौरपव्यं क्षुरैः पविभिर्वज्रैश्च निर्मित मिव तीक्ष्णं पृष्ठं चेत्यर्थः। स्वयं स्वतंत्रे। श्यामि भ्रमणस्वभावे इति तट्टीकायांश्रीधरस्वामी

क्ष्माधृतिः पुं काश्मीरदेशीयराजविशेषः। यथा। अथाभ्यषिच्यत क्षिप्रं विप्रैरेत्ययशस्करः क्ष्माधृतिः प्रोद्दाममर्यादः सानुमानिव तोयदैः। इति राजतरंगिण्यां ५ तरंगः

क्ष्मापः पुं राजा। यथा। आसप्तार्त्तिं चित्रयामास क्ष्मादेवोद्दृश चैकृतान्। लब्धोदया क्षीबयेन क्ष्मापा ज्ञानानुयायिनः। इति राजतरंगिण्यां ५ तरंगः

क्ष्मापालः पुं राजा। यथा। नके लोभं समुत्पाद्य जिक्षया स्निग्धदीर्घया पिपीलिकारवत्प्रस्तः क्ष्मापालैः शल्यकेषिव। इति राजतरंगिण्यां ५ तरंगः ॥

क्ष्वेडनं क्ली मोचनं। त्यागः यथा। त्रासनं सर्वभूतानां कालांतकयमोपमं। निष्यासक्ष्वेडनादेव भक्षयंतमिव स्थिते। इति महाभारते वनपर्वणि १२९ अध्यायः ॥ क्ष्वेलिका स्त्री क्रीडा। यथा।

क्ष्वेलिकायां मां स्पृष्टा समाधिना आमीलितदृशा प्रेमसंरम्भेण चकित चकितं अगात्प्रदपरुषविषाणाग्रेण लुठति। इति श्रीभागवते ५ स्कंधे ८ ॥ अध्यायः ॥ संभवति चेतदित्याह क्ष्वेलिकायां क्रीडायां स्पृशायः समाधिस्तेनामीलिते दृशौ येन तं मां प्रेमसंरम्भेन प्रणयकोपेन एषत् जलबिंदुलल्लदपरुषेण विषाणाग्रेण लुठति संघट्टयति। इति तट्टीकायां श्रीधरस्वामी

क्ष्वेली स्त्री क्रीडा। यथा। बाहुप्रसार परिरंभ करालकोरुनीविस्तनालभन नर्म्मनखाग्रपातैः। क्ष्वेल्यावलोकहसितैर्व्रजसुंदरीणामुत्तंभयन्रतिपतिं रमयांचकार। इति श्रीभागवते १० स्कंधे २९ अध्यायः॥ बाहुप्रसारस्य परिरंभस्य करालकादीनामालभनं स्पर्शश्च नर्म्म परिहासश्च नखाग्रपातश्च तैः क्ष्वेल्या क्रीडया च अवलोकैश्च हसितैश्च कामं तासां उद्दीपयन् तारमयामास इति तट्टीकायां श्रीधरस्वामी। अत्र क्ष्वेल्य मिति प्रमादात् केनचिल्लिखितं॥ ॥

शुद्धांकितोऽभूद्ग्रंथो वेदर्त्तुयुगभूमिते।
सहस्रे परिशिष्टोयं शब्दकल्पद्रुमस्य हि॥

पिप्पली क्षौद्र कट्फलं। सैन्धवो पहितं युञ्ज्यान्निहितं वेणुगह्वरे॥ मेदोयकृत्कृतं चाज पिप्पल्यः सैन्धवं मधु। रसामलकं चापि पक्वं समम्ध्यापयेत्॥ कोष्ठक्षद्विनिर्माणे तद्वत्क्षुद्रान्त्रे ने हितं। इति सुश्रुते १८ अध्यायः॥

क्षुद्रादिः पुं कण्टकार्य्यादिकषायः। यथा। क्षुद्रामृता नागरपुष्कराह्वयैः कृतः कषायः कफमारुतोत्तरे। सश्वासकासारुचि पार्श्वरुक्ज्वरे ज्वरे त्रिदोषप्रभवेऽपि शस्यते॥ इति भैषज्यरत्नावली॥

क्षुद्रांत्रं क्ली हृदयस्थितस्वल्पान्त्रं। यथा। समाननाम्नः पवनस्य सकलाङ्गचारित्वेऽपि नाभ्यादिस्थानविशेषवाचो युक्तिप्रदर्श्याभिप्रायेण प्राणायतनानि प्रपंचयितुमाह। वपा वसावहननं नाभिः क्लोम यकृत्प्लिहा क्षुद्रांत्रं वृक्कौ वस्तिः पुरीषाधानमेव च। प्राणाशयोऽथ हृदयं स्थूलांत्रं गुद एव च। उदरं च गुदौ कोष्ठौ विस्तारोऽयमुदाहृतः॥ वपा प्रसिद्धा। वसा मांसस्नेहः। नाभिः प्रसिद्धा। अवहनने पुप्फुसः। प्लीहा आयुर्वेदप्रसिद्धः। तौ च मांसपिंडाकारौ सव्यकुक्षिगतौ। यकृत् कालिका। क्लोम मांसपिण्डः तौ च दक्षिणकुक्षिगतौ। क्षुद्रांत्रे हृतस्थांत्रे। वृक्कौ हृदयसमीपस्थौ मांसपिण्डौ। वस्तिर्मूत्राशयः। पुरीषाधाने पुरीषाशयः। आमाशयोऽपक्वान्नस्थाने। हृदये हृत्पुण्डरीके। स्थूलांत्रगुदोदराणि प्रसिद्धानि। बाह्याङ्कुदवलयादंतर्गुदवलये द्वे। तौ च गुदौ कोष्ठौ कोष्ठे नाभेरधः प्रदेशो भवौ। अयञ्च प्राणायतनस्य विस्तार उक्तः पूर्वश्लोके तु संक्षेपः। अतएव पूर्वश्लोकोक्तानां केषांचिदिह पाठः॥ इति मिताक्षरायां प्रायश्चित्ताध्यायः॥

क्षुधार्त्तः त्रि क्षुत्पीडितः। यथा। शीतार्त्तश्च क्षुधार्त्तश्च कंपान्वितकलेवरः। जजागार तदा रात्रौ स्नुतो नीहारवारिणा॥

इति शिवरहस्ये शिवरात्रिव्र
तकथा ॥
क्षुधावती स्त्री क्षुधाजनकौष
धवटी । अजीर्णादिरोगनाश
कगुडिका । यथा । रसायोगं
धकाभ्राणि अुषणं त्रिफला
वाच । यमानी पातरुष्णाचच
विका जीरकद्वयं । प्रत्येकंप
लमेषान्तु चटकर्णं भवर्णवा ।
माणकं ग्रंथिकं चैव केशरा
ज सुदर्शनाः । दंडोत्पला वि
हृदंती जामात रक्तचंदनं ।
भृंगापामार्ग कुलकामेड़ुकं
चपलाद्रकं ॥ आर्द्रकस्वरसे
नाथ गुडिकां संप्रकल्पयेत् ।
वदरास्थिसमा श्रेषा भक्षयि
त्वा पिवेदनु ॥ वारिभक्तं जे
ल श्चैव प्रात रुत्थाय मानवः
वटी क्षुधावतीनाम सर्वाजी
र्णविनाशिनी । अग्निं च कुरु
ते दीप्तं भस्मकं च नियच्छति
अम्लपित्तं च शूलं च पवित्रा
सकृतक्षयेत् । तत्सर्वं शम
यत्याशु भास्कर स्तिमिरं यथा ।
मधुरं वर्जयेदत्र विशेषात्तक्री
रशर्करे । इति भैषज्यरत्नाव
ल्या अम्लपित्तचिकित्सा ॥

तस्याः स्वल्पवृहत्भेदौ तत्रै
वद्रष्टव्यौ ॥ क्षुधायुक्तेऽपि ॥
क्षुधासागररसः पुं औषधवि
शेषः । यथा । त्रिकटु त्रिफला
चैव तथा लवणपंचकं । क्षार
त्रयं रसं गंधं भागैकं सर्ववह्नि
ये । गुंजामात्रां वटीं कुर्याल्ल
वंगैः पंचभिः सह । क्षुधासा
गरनामायं रसः सद्योगनि
र्मितः । एवं वह्निषु सित्यकृत
वत्तुक्तभागवत् तेनात्र विष
स्य भागद्वयं । इति भैषज्यर
त्नावली ॥
क्षुपः पुं श्रीकृष्णात् सत्यभा
मायां जातपुत्रविशेषः । यथा
जज्ञिरे सत्यभामायां भानुर्भी
मरथः क्षुपः । रोहितो दीप्ति
मां श्चैव ताम्रजाक्षो जलांतकः
भानु भीमरथिका चैव ताम्रप
र्णी जलंधमा । चतस्रो ज
ज्ञिरे तेषां स्वसारो गरुडध्व
जात् । इति महाभारते हरि
वंशे १६३ अध्यायः ॥
इक्ष्वाकुराजपिता । यथा ।
आसीत् कृतयुगे तात मनु
र्दंडधरः प्रभुः । तस्य पुत्रो महा
नाकः प्रसान्धिरिति विश्रु.

क्रदन

२०८

शब्द कल्पद्रुम

परिशिष्ट